



२०६

शब्द कल्पद्रुम



शब्दकल्पद्रुम



२०८
शब्दकल्पद्रुम



ॐश्रीगणेशायनमः

शब्दकल्पद्रुमः

अर्थात्

एतद्देशस्थ समस्त कोषाशेषशास्त्र सङ्कलितकारादिवर्ण क्रमविन्यस्तशब्द तल्लिङ्ग नानार्थ पर्य्याय प्रमाण प्रयोग धातु तदनुबन्धाभिधेय सहित तत्तच्छब्द प्रसङ्गोत्थित वेद वेदाङ्ग पुराणेतिहाससङ्गीत शिल्प सूपकारशास्त्र ज्योतिस तन्त्राख्यान काव्यालङ्कार छन्दः प्रभृति नाम लक्षणोदाहरण द्रव्यगुण रोगनिदानौषध स्मृत्युक्त व्यवस्थादिसंयुक्त सर्व्वदर्शन मतानुसारि संस्कृताभिधानग्रन्थः ॥

षष्ठकाण्डः

राजश्रीराधाकान्तबाहादुरेण विरचितः

१७७० सप्तत्यधिक सप्तदशशत शकाब्दे
कलिकाताख्यानगरे स्वीययन्त्रे
श्रीप्राणकृष्णनागेन मुद्राङ्कितः



श शकारः सतशवर्गीय प्रथ
मवर्णः यञ्जन विंशद्वर्णश्च अ
स्योच्चारणस्थानं तालु इतित
न्त्र व्याकरणे अस्य स्वरूपं यथा
शकारं परमेशानि शृणु वर्णं
शुचिस्मिते रक्तवर्णं प्रभाका
रं स्वयं परमकुण्डली चतुर्व
र्गप्रदं देवि शकारं ब्रह्मविग्र
हं पञ्चदेवमयं वर्णं पञ्चप्रा
णात्मकं प्रिये रजः सत्वत
मोयुक्तं त्रिविन्दु सहितं सदा
त्रिशक्ति सहितं वर्णं मात्मादि
तत्व संयुतं इति कामधेनुत
न्त्रं तल्लेखनप्रकारो यथा चत्र
कोणात्मिका रेखा वाम द
क्षिणतः क्रमात् वह्नीन्दुवि
ष्णव स्तासु तिष्ठन्ति क्रमतः
सदा ऊर्द्धमात्रा शक्तिरूपा महा
लक्ष्मी समा स्मृता मात्रा मध्य
गता यातु वाग्देवी सा परा
स्मृता इति वर्णोद्धारतन्त्रं ॥
तद्वाचकानि यथा शः सद्य
श्च कामरूपी कामरूपो महा
मतिः सेनान्यानामा कुमारो ऽ
क्षि श्रीकण्ठो वृषकेतनः ॥
वृषघ्नः शयनं शान्ता सुभगा
विस्फुलिङ्गिनी महादेवो महा

लक्ष्मी महेन्द्रः कुलकौलिनी ॥
वाकू हंसो वियद्वक्रं हृदनङ्गा
ङ्कुशाः खलः वामोरुः पुण्डरीका
त्मा कान्तिः कल्याणवाचकः ॥
इति योगिनीतन्त्रे ३ भागे ७
पटले वर्णाभिधानं ॥
शं क्ली शुभे इति त्रिकाण्डः
शेषशब्दरत्नावल्योः ॥
शंम व्य कल्याणं ॥ शुभे शा
इति शब्दरत्नावली ॥
शः पुं शिवः शस्त्रे । इति
शब्दरत्नावली ॥
शंयुः त्रि शुभान्वितः इति
त्रिकाण्डशेषः ॥
शंवः पुं मुषलाग्रस्थलौहमण्ड
लकः ॥ वज्रं इति धरणी ॥
शंवः त्रि शुभान्वितः । इति
त्रिकाण्डशेषः ॥
शंवरं क्ली जलं इत्यमरः ॥
शंस उ हिंसा स्तुत्योः । इति
कविकल्पद्रुमः ॥ तालव्यादिः ।
उ शंसित्वा शस्त्वा यः शंसतिस
ता मिति हलायुधः अनेकार्थ
त्वात् कथनेप्ययं यथा रघौ ॥
शशंस वाचा पुनरुक्तयेवेति ।
नमः क्रिया शंसति किञ्चिदीप्सित
मित्यादि च इति दुर्गादासः ॥

शंसा स्त्री वाक्ये ॥ वाञ्छा
इतिमेदिनी ॥ प्रशंसा । इति
शब्दरत्नावली ॥
शंसितः त्रि निश्चितः । इति
हलायुधः ॥ विंशितः ॥ स्तुतः
इति शंस्धातोः क्त प्रत्ययेननि
ष्पन्नः ॥
शंस्ता पुं स्तोता ॥ होता ।
इति संक्षिप्तसारोणादिवृत्तिः ॥
शंस्थः त्रि शुभान्वितः शंपूर्व
स्थाधातो ई प्रत्ययेन निष्पन्नः
शंस्था पुं स्त्री शुभान्विता शम
पूर्व स्थाधातोः क्विप् प्रत्ययेन
निष्पन्ना ॥
शंस्यः त्रि हिंस्यः ॥ स्तुत्यः ।
शंस धातो ण्यत् प्रत्ययेन
निष्पन्नः ॥
शक इ उ. त्रास शङ्कायोः इति
कविकल्पद्रुमः ॥ त्रासो भयं ।
शङ्का संशयारोपः इ शङ्क्य
ते व्याघ्राज्जनेन उ. शङ्कते
पुरुषत्वं स्थाणौ स्थाणुर्वा पुरुषो
वा इति संशय मारोपयतीत्य
र्थः इति दुर्गादासः ॥
शक य ञ शक्तौ इति कवि
कल्पद्रुमः ॥ शक्ति दिवादिपक्षेत्त
म स्वादिपक्षे सामर्थ्ये य
ञ शक्यति शक्यते दुःखं दीनः
इति दुर्गादासः ॥
शक न इर् क शक्तौ इति
कविकल्पद्रुमः नशक्नोत्यशक्य
मप्याजौ विजेतुं य इतिहला
युधः इर् अशकत् अशकीत्
अशाक्षीत् लृदित्त्वेनास्मान्नि
त्यं ङ. इत्यन्ये क शकिष्यति
शक्ष्यति पृथक् पाठादाद्यो न
म्वादिः द्वावेवानिमा वित्यनेन
षष्ठ स्वरानुबन्धः केषाञ्चिद्द्वमुतो
यात् द्वावेव सकर्म्मकौ तथा
च शक्यो ऽस्य मन्युर्भवता
विनेतु मिति रघुः ॥ रजः परि
णामभेदो न शक्यते प्रत्या
ख्यातु मिति तत्त्वकौमुद्यां वा
चस्पतिमिश्रः ॥ शक्या मयेना
पि मुदा ऽ मराणा मिति येनषधं
इति दुर्गादासः ॥
शकः पुं जातिभेदः ॥ नृप
भेदः इति मेदिनी ॥ देश
भेदः इति विश्वः स च नृपः
शाकादित्य इति शालिवाहन
इतिच नाम्ना ख्यातः तस्य मर
णादिनावधि वत् सरगणनाङ्कः
शकाब्देति नाम्ना पञ्जिकायां लि
ख्यते स च जातिभेदः म्लेच्छ


जातिविशेषः सत्ययुगे सग
रराजेनास्य मस्तकार्द्धं मुण्डयि
त्वा वेदवाह्यत्व मकारि यथा
ततः शकान् सयवनान् का
म्बोजान् पारदां स्तथा पह्लवां
श्चापि निःशेषान् कर्त्तुं व्यव
सितो नृपः ॥ ते हन्यमाना
वीरेण सगरेण महौजसा व
शिष्ठं शरणं जग्मुः सर्व्वेवा
पुरोहितं ॥ वशिष्ठः शरणाप
न्नान् समये स्थाप्य तान्मुनिः
सगरं वारयामास तेभ्यो द
त्वाभयं तदा सगरः स्वां प्र
तिज्ञान्तु निशाम्य स महावलः
धर्म्मं जघान तेषाञ्च वेशान
न्यो ऽकार ह अर्द्धं शिरः
शकानान्तु मुण्डयामास भू
पतिः जवनानां शिरः सर्व्वं का
म्बोजाना मपि द्विज पारदा
मुक्तकेशांस्तु पह्लवान् श्मश्रु
धारिणः ॥ निःस्वाध्याय वषट्
कारान् सर्व्वानेव चकार ह
इति पाद्मे स्वर्गखण्डे सगरो
पाख्याने १५ अध्यायः ॥
शकटः पुं क्ली यानविशेषः
गाड़ी इति भाषा तत् पर्य्यायः
अनः २ इत्यमरः अक्षः ३
इति शब्दरत्नावली ॥ विस्रुव ।
ध्यामुरुविशेषः द्विसहस्रपल प
रिमाणं तत् पर्य्यायः भारः
२ आचितः ३ शाकटीनः ४ शाला
टः ५ इति हेमचन्द्रः ॥ उक्तञ्च
शकटः शाकिनी गावो यान
मस्कन्दनं वने अन्तपः पर्व्वतो
राजा दुर्भिक्षेनवहृत्तयः ॥ इति
भरतः ॥ तिनिशवृक्षः । इति
राजनिर्घण्टः ॥
शकटहान् पुं श्रीकृष्णः इति
हेमचन्द्रः ॥ शकटनाशके त्रि ॥
शकटिका स्त्री रोहिणीनक्षत्रे ॥ रवि
तस्याः पञ्चताराभयशकटाकृति
त्वात् ॥
शकलं क्ली त्वक् खण्डं राग
वस्तु वल्कले इति मेदिनी ॥
शल्कं आँशि इति भाषा ।
इति शकली शब्ददर्शनात् ॥
शकलः पुं क्ली एकदेशः खण्डं
यथा भिन्ने शकल खण्डे वा
पुंस्यर्द्धोऽर्द्धं समेंशके । इत्य
मरः ॥
शकलीन पुं मत्स्यः इत्यमरः ॥
शकान्तकः पुं विक्रमादित्यराजः
इति केचित् ॥
शकारः पुं राज्ञः अनूढायाः

स्त्रियाः भ्राता यथा मदमूर्थ्यताभि
मानी दुष्कुलैश्वर्य्यैः संयुक्तः
सोऽयमनूढाभ्राता राज्ञः
श्यालः शकार इत्युक्तः ॥ इति
साहित्यदर्पणे ३ परिच्छेदः
शकारिः पुं विक्रमादित्यराजः ।
स तु उज्जयनीदेशाधिपतिः ।
यथा साहसाङ्कः शकारिः सा
हिक्रमादित्य इत्यपि इति ज
टाधरः ॥
शकुनं क्ली शुभाशुभसूचकनिमित्तं ।
सगुन इति हिन्दीभाषा इति
मेदिनी ॥ फललक्षणं । इत्य
जयपालः ॥ ॥ अथ शुभ शा
कुनानि कीर्त्तनात् श्रवणतो
विलोकनात् स्पर्शनात् समधि
के समीहिते मङ्गलाय दधि
चन्दनादिकं स्यात् प्रवासभवन
प्रवेशयोः ॥ दध्याज्य दूर्वाक्षत
पूर्णकुम्भाः सिद्धान्न सिद्धार्थकच
न्दनानि आदर्शशङ्खामिष मीन
मृत्स्ना गोरोचना गोमय गोम
धूलिः गीर्व्वाणा वीणा फलभद्र
पीठ पुष्पाञ्जनालङ्करणायुधा
नि ताम्बूल यानासन वर्द्धमान
ध्वजातपत्र व्यजनाम्बराणि प्र
स्तोज भृङ्गार समिद्धवह्नि गजा

जवाश्वाः कुशा चामराणि रत्ना
नि चामीकर रूप्य ताम्र वैदूर्य्या
ण्यौषधयः सुराम्बु ॥ वनस्पते
र्नूतनशाक मेवं माङ्गल्य पं
चाशादिदं प्रदिष्टं शुभेषु का
र्य्येष्वशुभेषु चैव कार्य्ये गता
नो शुभदाः सदैव ॥ एतानि
दृष्ट्वा शुभदर्शनानि कुर्वीत दृष्टः
पथि दक्षिणेन प्रदक्षिणीकृत्य हिलोका
द् शुभावहानि त्यक्तानि वामेन
शुभा भवन्ति गान्धारषड्जावृष
भस्तथान्ये स्वरेषु गम्भीर मनो
रमा ये वादित्र वेदध्वनि गीत
नृत्य मित्यादि शस्तं किल यत्र
सौख्यं ॥ आदाय रिक्तं कलशं
जलार्थी यदि व्रजेत् कोपि स
हाश्वयोन पूर्णं समादाय निवर्त
ते ऽसौ यथा कृतार्थः पथिकस्त
थैव ॥ अङ्गार भस्मेन्धन रज्जु
पङ्क पिण्याक कार्पास तुषास्थि
विष्ठाः कृष्णायसावस्कर कृष्णधा
न्यपाषाण केशा भुजगौषधानि
तैलं गुडं चर्म्मवशा विभिन्नं वि
कृच्च भाण्डं लवणं तृणञ्च तक्रा
र्गला शृङ्खल वृष्टि वाताः का
र्य्येष्वचिन्त्यादिदृष्टा न शस्ताः
स्वपादयान सवलनं तृणानां भ
ङ्गः

कश्चिद्धावन् पलायनञ्च हाराभि
घातावधूग शस्त्रपातः प्रस्थान
विघ्नं कथयन्तु यान्तः मार्ज्जारयु
द्धारव दर्शनानि कलिः कुटुम्ब
स्यपरस्परञ्च चित्तस्य कालुष्यक
रञ्च सर्व्वं गन्तुः प्रयाण प्रतिषेध
नाय दृष्टे शवे रोदनशब्दहीने
महार्थसिद्धिः कथितोद्यमेषु
गृहप्रवेशेषु शवः शवत्व रुजे
सदीर्घा मथवा ददाति गण्डूष
मावर्जयतां नराणां मद्यगिले चे
त्प्रविशत्यकस्मात् भवेत्तदाभी
प्सित सौख्यलाभो यः कौतुकी
तेन निरूप्य मेतत् उज्झितंक
टिति दन्तधावनं संमुखं पतति
यत्र वासरे भोजनं भवति तत्र
वीक्षिते व्यास भाषित मिदं हि
नान्यते इति वसन्तराज शाकु
ने विचारिताः शुभावहाः ॥ अ
थ नराङ्कित विचारः अथाभि
धास्ये द्विपदेषु तावत् प्रधानभा
वात् शकुनं नराणां नैमित्तिकं
यत् प्रविभाव्य सर्व्वं फलं शु
भाशुभं नयो ब्रवीति ॥ नरोभि
रूपः सितवस्त्र माल्यो वाचं प्र
शस्तां मधुराञ्च जल्पन् पवस्थि
धायोषदपि प्रयाणे प्रवेशका
ले

च करोति सिद्धिं ॥ वमन्
विकेशो हतमान गर्द्धा स्त्रिमाकु
लश्चान्यज्जनैतलदिग्धाः रजस्वला
गर्भवती रुदन्ती मलान्वितोन्मत्त
जरायवस्थ दीनो द्वियत् कृष्ण
विमुक्तकेशाः क्रमेलकस्थाः खर
सैरिभस्थाः सन्न्यासि साक्रन्द
नपुंसकाद्या दुःखावहाः सर्व्व स
मीहितेषु ॥ पृथ्वीपति र्ब्राह्मण
हर्षयुक्तो वेश्या कुमारी सुहृदः
सुकेशाः नार्य्यो नराश्चाम्य सु
धाधिरूढाः शुभाय दृष्टाः शकुनो
द्यमेषु ॥ कृष्णाम्बराः कृष्णवि
लेपनाढ्याः कृष्णां स्रजं मूर्द्धि
विधारयन्ती दृष्टा सकोपा यदि
कृष्णवर्णा नारी नरे स्त्राद्विपदो
भवन्ति ॥ श्वेताम्बरा श्वेतवि
लेपनाढ्या माल्यो सितं मूर्द्धि
विधारयन्ती दृष्टा प्रकृष्टा यदि
गौरवर्णा नारी नरैः स्यान्नदभी
ष्टसिद्धिः धृतातपत्रः सुविशुक्ल
वासाः पुष्पान्वितश्चन्दनचित्रिता
ङ्गः निस्त्रावयुक्तः कृतभोजनो वा
विप्रः पठन् यच्छति सर्व्वसिद्धिं
अभ्युपगच्छति यस्य हि याने
स्त्रीपुरुषोऽप्यथ वा फलहस्तः
सर्व्वं समीहित सिद्धिं स्वरूपं त
स्य



नरस्य भवत्यचिरेण ॥ इति वस
न्तराज शाकुने नराङ्किते ह्नितसं
ज्ञे ॥ गच्छेति रुष्ट पुरत स्त
थैव वामीरुपी केनचिदुच्यमा
ना सर्व्वाण्यपि स्मृतिशयेन ना
म्म स्थितस्य तुष्टि विजयाय पुं
सां सिद्धै विरावा जहि छिन्धि
भिन्धि चेत्यादयः शत्रुवधोद्यता
नां क्वापि मा गच्छत चैव मा
याः प्रयोजनात्स्तनिवारणार्थाः
स्थैर्य्ये स्थिरार्थागमनं तदर्थी
हात्क्यान्निवृत्ति र्विनिवर्त्तितार्थात्
लाभं जयं भङ्गः ममङ्गलं वा तु
ष्येत तस्मात् प्रतिपादनार्थात् ।
उग्रं भवेद्रोदन मग्रभागेभये
भवेद्धक्ति विभागे भूतेनैर्ऋ
त्यकोणे गृहमार्गे रोगोवाय
व्यकोणे रुदिते समृद्धौ ॥ मृ
गः स्तुतानां रुदितेन पृष्ठे
लाभो भवेत्तत्र निवर्त्तितेन ॥
मृत्यु स्तदाग्रे रुदितेन वङ्गः शि
र्द्धिं वियत्ने रुदिते विपूर्णा ॥
इतिवसन्तराज शाकुने नराङ्कि
ते उपश्रुति प्रकरणं ॥ बक
चक्रवाकटङ्क टिट्टिभकारण्डव
भास भारद्वाज मयूर कपिञ्ज
लनावक गृध्र उलूक कपोत गो

वत्स कुक्कुट कलविङ्कः भार
तीचास खञ्जन काक पिङ्गलाद्
पाणि शकुनानि घोटक वृष
महिषखर गो महिष्यजाज मेषैड
कउष्ट्र छुछुन्दरी मूषिक मार्ज्जा
रवानर मृग वराह कृकलास न
कुल वृश्चिक पिपीलिका पल्ली
कुक्कुरादिरूप शकुनानि च वस
न्तराजशाकुनेदृष्टव्यानि हस्ति
शशक शृगाल षट्पद शरभ स
र्पादिरूपाणि शकुनानि तत्रच्छेद्दृ
दृष्टव्यानि ॥
शकुनः पुं पक्षिमात्रे ॥ पक्षि
विशेषः गृध्र इति ख्यातः ॥
इतिमेदिनी ॥ कश्यपपत्नी ता
म्रायाः श्येन गृध्रादयः पुत्राः
इतिश्रीभागवते गृध्रस्याशुभफ
लं यथा वामे ऽपसव्ये पुरत
श्च पृष्ठे युद्धं विभेदं मरणं
क्षियश्च ॥ गृध्रः स्थितः सन् कु
रुते क्रमेण शाठ्योपसव्यो ऽथ वा
विपन्निहेतुः इति वसन्तराजशा
कुने ॥ विप्रभेदः तद्विवरणं ।
भागवते उक्तं इन्दुगणादिकोषः
गीतविशेषः तत्रउत्सवादिषु
मङ्गलार्थगेयं इत्यजयपालः
शुभशंसी इति

शब्दरत्नावली ॥
शकुनज्ञा स्त्री ज्योष्ठी इति त्रि
काण्डशेषः सकुनज्ञातरि त्रि
शकुनिः पुं पक्षी इत्यमरः ॥
चिल्लपक्षी इति हेमचन्द्रः
सौवलः सत्वकौरवमातुलः
ववाद्यैकादशकरणान्तर्गता
ष्टमकरणं इति मेदिनी तत्
करणजातफलं परजनयनहृ
तै वञ्चकः क्रूरचेष्टः करष्टत
करवालो व्याहतस्वामिपक्षः अ
तिशय परदाराशक्तचिंतः स
रोषो भवति शकुनि जन्मा
मानवः शीघ्रकर्मा इति कोष्ठी
प्रदीपः ॥ दुःसह पुत्रः य
था दुःसहस्याभवन् भार्य्यानि
र्म्माष्टि नाम ता सतः जाता
न्तेलेस्तु पार्थायां जातौ चण्डा
ल दर्शनात् ॥ तयोरपत्यान्य
भवन् जगद्व्यापीनि षोडश ।
अष्टौ कुमाराः कन्याश्च तथा
ष्टावतिभीषणाः ॥ दन्ता कृष्टि
स्तथोक्तिश्च परिवर्त्तस्तथा प
रः अङ्गध्रुक् शकुनिश्चैव ग
ण्डप्रान्त रति स्तथा ॥ तस्य पं
चपुत्राः यथा श्येन काक क
पोतांश्च गृध्रोलूकौ च वै

सुतान् अवाप शकुनिः पञ्च ज
गृहु स्तान् सुरास्तराः ॥ श्येनं
जग्राह वै मृत्युः काकं कालोगृ
हीतवान् उलूकं निर्ऋतिश्चापि
जग्राहातिभयावहं ॥ गृध्रंव्या
धि स्तदीशश्च कपोतञ्च स्वयं
यमः पतेषा मेव चैवोक्ताः कु
ताः पापोपपादने ॥ तस्मात्
श्येनाद्यो यस्य निलीयन्ते शि
रस्यथ तेनात्म रक्षणयाले शा
न्तिः कार्य्या द्विजोत्तम ॥ गोहेम
स्तूति रे तेषां तद्गृहे निवेश
ने नशास्तं वर्जयेद्ध्रे हे कपोता
क्रान्तं मस्तकं ॥ श्येनः कपो
तोता गृध्रो वा कौशिकोवा
गृहे द्विजः प्रविष्टः कथयेन्त
न्तं वसतां तत्र वेश्मनि ईदृक्
परित्यजेद्गेहं शान्तिं कुर्य्याद्द्वि
जोत्तम स्वप्नेपि हि कपोतस्य
दर्शनं न प्रशस्यते ॥ इति
मार्कण्डेयपुराणे दुःसहवंशा
त पत्नि नामाध्यायः ॥
विकुक्षिपुत्रः यथा वैवस्वत म
नो रासीदिक्ष्वाकुः पृथिवीपतिः
तस्य पुत्रशतं तासीद्विकुक्षि ज्ये
ष्ठ उच्यते सो ऽ योध्याधिपति
वीर स्तस्य पञ्चदश स्मृताः शकु

नि प्रभुतोः पुत्रा रक्षिता रोमहर्षिताः ॥ इति वह्निपुराणे सगरोपाख्यान नामाध्यायः ॥

शकुनिप्रपा स्त्री पक्षिणः पानीयशाला तत्पर्य्यायः प्रीग्रहः १ इतिहारावली ॥

शकुनी स्त्री श्यामापक्षी । इति राजनिर्घण्टः ॥ चटकी इति केचित् ॥

शकुनीश्वरः पुं गरुडः इति धनञ्जयः ॥

शकुन्तः पुं पक्षी इत्यमरः ॥ कीटभेदः भासपक्षी इति मेदिनी ॥

शकुन्तला स्त्री मेनकाप्सरःसु विश्वामित्रेण जनिता कन्या सा कण्वमुनिना प्रतिपालिता दुःषन्तराजेन विवाहिता अस्याः पुत्रो भरतः राजचक्रवर्त्ती । अस्या नामकारणं यथा निर्जने तु वने यस्मात् शकुन्तैः परिरक्षिता शकुन्तलेति नामास्याः कृतञ्चापि ततो मया इति महाभारते आदिपर्व्व ॥ अस्या विवरणं कालिदासकृताभिज्ञानशकुन्तलानाटके द्रष्टव्यं पाद्मे स्वर्गखण्डे प्रथमादिषड्ध्यायेषु ज्ञातव्यञ्च ॥

शकुन्तलात्मजः पुं भरतराजः यथा दौष्मन्ति भरतः सर्व्वदमः शाकुन्तलात्मजः इति हेमचन्द्रः शकुन्तिः पुं पक्षिमात्रे इत्यमरः भासपक्षी इत्युणादिकोषः ॥

शकुलः पुं मत्स्यविशेषः शाउल इति भाषा इत्यमरः अस्य गुणाः मधुरत्व हृद्यत्व ग्राहित्व पित्तामजित्व गुरुत्वञ्च इति राजवल्लभः ॥

शकुलगण्डः पुं शालमत्स्यः इति त्रिकाण्डशेषः ॥

शकुलादनी स्त्री चक्राङ्गी कट्की इति भाषा इत्यमरः ॥ कञ्चटशाकः काचडादाम इति भाषा इति मेदिनी ॥ मांसी किञ्चुलिका जलपिप्पली ॥ कट्फलः इति विश्वः ॥ गजोषणा इति राजनिर्घण्टः ॥

शकुलार्भकः पुं गडकमत्स्यः इत्यमरः ॥

शकुलाक्षकः पुं श्वेतदूर्व्वा इत्यमरः ॥

शकुलाक्षी स्त्री गण्डदूर्व्वा इति राजनिर्घण्टः ॥

शकुली स्त्री मत्स्यविशेषः मृगाल इति भाषा महाशकुल इति केचित् ॥ अस्या आकारो गुणाश्च शकुली रोहिताकारोऽल्पमा प्रायश्चरत्यसौ गुर्व्वी पाके च मधुरा भेदिका दोषकोपना ॥ इति राजवल्लभः पुस्तकान्तरे शकली इति च पाठः ॥

शकृत् क्ली विष्ठा इत्यमरः ॥

शकृत्करिः पुं स्त्री वत्सः इत्यमरः दन्त्यादि रिति विद्याविनोदः ॥


शकृत्कारः मलत्यागकारकः शकृत्करोतीत्यर्थे शकृत्शब्दात् कृधातोः यण प्रत्ययेन निष्पन्नः ॥

शकृद्द्वारं क्ली मलद्वारं तत्पर्य्यायः अपानं २ पायुः ३ गुदं ४ च्युतिः ५ अधोमर्म्म ६ त्रिवलीकः ७ वली ८ इति हेमचन्द्रः ॥

शक्करः पुं वृषः इति हेमचन्द्रः

शक्करिः पुं वृषः इति त्रिकाण्डशेषः ॥

शक्करी स्त्री छन्दोभेदः नदीभेदः मेखला इति मेदिनी सा च समवृत्त षड्विंशतिच्छन्दोऽन्तर्गत चतुर्द्दशाक्षरच्छन्दः यथा उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुपूर्व्विका गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च त्रिष्टुप् च जगती चैव तथातिजगती मता शक्करी सातिपूर्व्वा स्यादष्ट्यत्यष्टी तथा मता धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः विकृतिः संकृतिश्चापि तथा चैवातिशतकृतिः इत्याख्याः समवृत्तानां छन्दसां क्रमशः कृताः तत्र चतुर्द्दशाक्षरपादसमच्छन्दांसि सन्ति तेषां नामानि गणाश्च यथा मो रो गो नो मः षट् नवभि रसम्बाधा १ ज्ञेयं वसन्ततिलकं त भ जा जगौ गः २ न न र स लघु गैः स्वरैरपराजिता ३ न न भ न ल गीति प्रहरणकलिका ४ मस्तौ नो भो गौ यदि गदिता वासन्तीयं ५ द्विः सप्त च्छिदि लोला म्सौ म्भौ गौ चरणेचेत् ६ स्वरभिदि यदि नौ नौ च नान्दीमुखीयं ७ इति छन्दोमञ्जरी ॥ एतेषामुदाहरणानि बाहुल्यभिया नोक्तानि ॥



शक्तः त्रि शक्तिविशिष्टः सम
र्थः तत्पर्य्यायः सहः २ क्षमः
३ प्रभुः ४ अलुः ५ इति हेम
चन्द्रः ॥ प्रियम्वदः इति शक्त
शब्दटीकायां स्वामी ॥
शाक्तवः पुंभूम्नि अष्टपदादिष्
णां छात्रत्वमितिभाषा यथा या
तात्रष्टपदे भूम्नि स्त्रियां पुंभू
म्निशाक्तवः केचित्त शाक्तरश्मी
तिवन्ध्या भ्रमति स्त्रियां ॥ इति
जटाधरः अस्य विवरणं शाक्तः
शब्देद्रष्टव्यं ॥
शक्तिः स्त्री कार्य्यजननसामर्थ्यं
यथा या देवी सर्व्वभूतेषु श
क्तिरूपेण संस्थिता इति देवी
माहात्म्यस्य टीकायां नागोजी
भट्टः शक्यते जेतुं अनया ।
सा प्रभावोत्साह मन्त्रज भेदा
त्रिविधा तत्र प्रभुत्वे सायक
त्वात् कोष दण्डजा प्रभुशक्तिः
१ विक्रमेन स्वशक्त्या विस्फुरण
मुत्साहशक्तिः २ सन्ध्यादीनां
सामादीनाञ्च यथावस्थानं च
मन्त्रशक्तिः ३ सामर्थ्यमात्रे तत्
पर्य्यायः द्रविणं २ तरः ३ सहः
४ बलं ५ शौर्य्यं ६ स्थाम ७ शु
ष्मं ८ पराक्रमः ९ प्राणः १० इत्य

मरः शुष्म ११ महः १२ इति
शब्दरत्नावली ऊर्ज्जः १३ इति
जटाधरः कासूः सान्तु शक्तिला
नामास्त्रे इति नानार्थे अमर
भरतौ गौरी इति मे
दिनी लक्ष्मीः इति शब्दमा
ला ॥ त्रिशक्तयो यथा एषा
त्रिशक्ति रुद्दिष्टा नय सिद्धांत
गामिनी एषा सेता परा सृष्टिः
सात्विकी ब्रह्मसंस्थिता एषैव
रक्ता राजसि वैष्णवी परिकी
र्तिता एषैव कृष्णा तमसि रौ
द्रीदेवी प्रकीर्तिता परमात्मा
यथा देवो एक एव त्रिधा
स्थितः प्रयोजन वशाच्छक्ति रे
कैव त्रिविधाभवत् इति वाराहे
त्रिशक्तिमाहात्म्यानामाध्यायः ॥
अपिच । विन्दुः शिवात्मक स्त
स्य बीजं शक्त्यात्मकंस्मृतं तयो
र्योगेभवेन्नाद स्तेभ्यो जातास्त्रिश
क्तयः इति क्रियासारः अपरञ्च
इच्छा क्रिया तथा ज्ञानं गौरी
ब्राह्मी तु वैष्णवी त्रिधा शक्तिः
स्थिता यत्र तत्परं ज्योति रो
मिति ॥ इति गोरक्षसंहिता ॥
अष्टशक्तयो यथा इन्द्राणी वै
ष्णवी शान्ता ब्रह्माणी अस्तवा

दिनी कौमारी नारसिंही च
वाराही विकटाकृतिः माहेश्व
री महामाया भैरवी भीमरूपि
णी श्रेष्ठा च शक्तयः सर्वा स्थ
स्याः प्रयच्छ मुदा ॥ इति ब्रह्मवै
वर्त्ते श्रीकृष्णजन्मखण्डे वाणयु
द्धनाम ११९ अध्यायः ॥ नवश
क्तयो यथा तत्र पद्मे चाष्टदले
मध्ये च भुक्तिपूर्वकं ॥ वैष्ण
वीं चैव ब्रह्माणीं रौद्रीं माहे
श्वरीं तथा नारसिंहीञ्च वारा
हीमिन्द्राणीं कार्त्तिकीं तथा ।
सर्व्वशक्तिस्वरूपाञ्च प्रधानां सर्व्व
मङ्गलां ॥ नवशक्तीश्च संपूज्य
घटे देवांश्च पूजयेत् । इति
ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६१ अ
ध्यायः ॥ पञ्चाशाद्विष्णुशक्त
यो यथा । कीर्त्तिः कान्तिस्तुष्टिः
पुष्टी धृतिः शान्तिः क्रिया द
या मेधा सहर्षा श्रद्धा स्यालज्जा
लक्ष्मीः सरस्वती ॥ प्रीती रती र
माप्रोक्ताः क्रमेण सुरशक्तयः ज
या दुर्गा प्रभा सत्या चण्डा वाणी
विलासिनी ॥ विरजा विजया वि
श्वाविनदा सुनदा स्मृतिः ऋद्धिः
समृद्धिः शुद्धिस्तु भुक्तिर्मुक्ति र्म
तिः क्षमा रमोमा क्लेदिनी क्लिन्ना

वसुदा वसुधा परा परा पराय
णासूक्ष्मा सन्ध्या प्रज्ञा प्रभा निशा
अमोघा विद्युता चेति शक्तयः
सर्वकामदाः पत्नाः प्रियतमाङ्केषु
निषण्णाः सस्मितानना: विद्युद्दाम
समानाङ्गाः पङ्कजाभय वाहवः
पञ्चाशद्रुद्रशक्तयो यथा ॥
गुणोदरी सहिरजा शाल्मली
तदनन्तरं लोलाक्षी वर्त्तुलाक्षी
च दीर्घघोणा समीरिता सुदीर्घ
मुखी गोमुख्यो दीर्घजिह्वा तथै
व च कुण्डोदर्य्यूर्द्ध्वकेश्यपि च तथा
विकृतमुख्यपि ॥ ज्वालामुखी त
तो ज्ञेया पश्चादुल्कामुखी ततः
सुश्रीमुखीचैवविद्यामुख्यैताः स्व
रशक्तयः ॥ महाकाली सरस्वत्यौ
सर्व्वसिद्धि समन्वित गौरी त्रैलो
क्यविद्या स्यान्मन्त्रसिद्धि स्ततःप
रं ॥ आत्मशक्ति र्भूतमाता तथा
लम्बोदरी स्मृता द्राविणी नाग
री भूयः खेचरी चापि मञ्जरी ॥
रूपिणी वीरिणी पश्चात् काको
दर्य्यपि पूतना स्याद्भद्रकालीयो
गिन्यौ शङ्खिनी गर्जिनी तथा
कालरात्रिश्च कुब्जिका कपर्द्दि
न्यपि वज्रया जया च सुमुखे
श्वर्य्या रेवती माधवी ततः ॥

वारुणी वार्षवी प्रोक्ता पश्चाद्द्वेविदारिणी । ततश्च सहजा लक्ष्मी व्यापिनी माययान्विता एता रुद्राङ्कपीठस्थाः सिन्दूरारुणविग्रहाः रक्तोत्पलकपालाभ्यामलङ्कृतकराम्बुजाः ॥ इति प्रपञ्चसारः ॥ कुलशक्तयो यथा शक्तयः परमेशानि विरूपाः सर्व्वयोषितः । नटी कापालिकी वेश्या मालिनी कुङ्कमालिनी ॥ चाण्डाली च कुलाली च रजकी नापिताङ्गना गोपिनी योगिनी शुद्धा ब्राह्मणी राजकन्यका ॥ कौचाङ्गना च देवेशि तथैव शङ्खकारिणी एताः षट्त्रिंशतिः कन्या देवानामपि दुर्लभा दैवज्ञा ब्राह्मणा वामा च तथा मांसापहारिणी बौद्धा च जवनी देवि तथा रसपसारिणी वेश्या चतुर्व्विधा प्रोक्ता द्विविधा कुङ्कमालिनी धीवरी द्विविधा प्रोक्ता तथैव गणिकाङ्गना ॥ कुम्भकारी द्विधा प्रोक्ता तथैव गोपिनी स्मृता वातवेश्याङ्गना देवि जवनी द्विविधा स्मृता ॥ बौद्धकन्या त्रिधा देवि तथा कोचाङ्गनाद्विधा एताभिः सहैकत्र चतुःषष्टिश्च शक्तयः ॥ इति रेवतीतन्त्रे ३ पटलः ॥ अपि च पञ्चाचारेण देवेशि कुलशक्तिं प्रपूजयेत् नटी कापालिकी वेश्या रजकी नापिताङ्गना ॥ ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः ॥ विशेषवैदग्ध्ययुताः सर्व्वा एव कुलाङ्गनाः रूपयौवनसम्पन्ना शीलसौभाग्यशालिनी ॥ पूजनीया प्रयत्नेन ततः सिद्धिर्भवेत् ध्रुवं । इति गुप्तसाधनतन्त्रे १ पटलः ॥

तस्याः प्रशंसा यथा शक्तिं विना महेशानि सदाहं शवरूपकः शक्तियुक्तो यदा देवि शिवोहं सर्व्वकामदः ॥ शक्तियुक्ते जपेन्मन्त्रे न मन्त्रं केवलं जपेत् । सावित्रीसहितो ब्रह्मा सिद्धोऽभवज्जगन्नन्दिनि ॥ द्वारवत्यां कृष्णदेवः सिद्धोऽभूत् सत्यया सह तथा कोचवधूसङ्गान्मम सिद्धिर्वरानने ईश्वरोहं महादेवि केवलं शक्तियोगतः ॥ शक्तियोगेन देवेशि यदि सिद्धिर्न जायते तदैव परमेशानि मम वाक्यं वृथा भवेत् ॥ यद्वक्तं जलगण्डूषं शक्ति

वक्त्रे सुरेश्वरि सिन्धुरूपं महेशानि तज्जलं नात्र संशयः ॥ स्वीयेष्टदेवीभावेन भोजयेन्मन्त्री यत्नतः शक्तिश्च कथ्यते देवि शृणुष्व सुरसुन्दरि षोडशाब्दादूर्द्धं या पञ्चविंशति वार्षिकी अप्रसूता विशेषेण पंचमेपि भवेत् प्रिये ॥ सुन्दरी तु विशेषेण प्रसूता वाप्रसूतिका । अवश्यं पञ्चमं कुर्य्यात् शक्तिमात्रे महेश्वरि ॥ इति शक्तिकागमसर्व्वस्वं ॥ तस्य उत्पत्तिमाहात्म्यादि यथा नारायणउवाच सह बुद्धा बुद्धिमन्तो न वक्तुं शुचितं सुराः सर्व्वे शक्त्या त्वया विष्णुः शक्तिमन्तो हि जीविनः ॥ ब्रह्मादितृणपर्य्यन्तं सर्व्वं प्राकृतिकं जगत् सत्यं नित्यं विनाशाच्च मया शक्तिः प्रकाशिता ॥ आविर्भूता च सा मन्त्रः सृष्टौ देवी मदीच्छया । तिरोहिता च सा शेषे सृष्टिसंहारणे मयि सृष्टिकर्त्री च प्रकृतिः सर्व्वेषां जननी परा मम तुल्या च मन्माना तेन नारायणी स्मृता सुचिरञ्च तपः स्तम्भे शम्भुना ध्यायता च सा तेन तस्मै मया दत्ता तपसा फलरूपिणी ॥ व्रतञ्च लोकशिक्षार्थमस्या नस्यार्थमेव च स्वयं व्रतानां तपसां फलदात्री जगत्त्रये ॥ मायया मोहिताः सर्व्वे किमस्या वास्तवं व्रतं साध्यमस्या व्रतफलं कल्पे कल्पे पुनः पुनः ॥ सुरेश्वरा यदंशाश्च ब्रह्मविष्णुमहेश्वराः कलाः कलांशरूपास्ते जीविनश्च सुरादयः मृदा विना कुलालश्च घटं कर्त्तुं यथाक्षमः विना स्वर्णं स्वर्णकारः कुण्डलं कर्त्तुमक्षमः ॥ विना शक्त्या तथाहञ्च स्वसृष्टिं कर्त्तुमक्षमः शक्तिप्रधाना सृष्टिश्च सर्व्वदर्शनसम्मता अहमात्मा च निर्लिप्तोऽदृश्यः साक्षी च देहिनां देहाः प्राकृतिकाः सर्व्वे नश्वराः पाञ्चभौतिकाः ॥ अहं नित्यशरीरी च भानुविग्रहविग्रहः सर्व्वाधारश्च प्रकृतिः सर्व्वात्मा हे जगतस्त्व च ॥ अहमात्मा मनो ब्रह्मा ज्ञानरूपो महेश्वरः पञ्चप्राणाः स्वयं विष्णुर्बुद्धिः प्रकृतिरीश्वरी शक्त्यो निद्रादयश्चैताः सर्व्वाश्च प्रकृतेः कलाः । सा च शैलेन्द्रकन्यायं इति वेदनिरूपितं ॥ इति ब्रह्मवैवर्त्ते

गणेशखण्डे ७ अध्यायः ॥ अपि च सा शक्तिः सृष्टिकाले च पंचधा चेश्वरेच्छया यथा पद्मा च सावित्री दुर्गा देवी सरस्वती ॥ प्राणाधिष्ठातृदेवी या कृष्णस्य परमात्मनः प्राणाधिक प्रियतमा सा राधा परिकीर्त्तिता ऐश्वर्य्याधिष्ठातृदेवी सर्व्वमङ्गलकारिणी परमानन्दरूपा च सा लक्ष्मीः परिकीर्त्तिता विद्याधिष्ठातृ देवी या परमेशस्य दुर्लभा वेदशास्त्रयोगमाता सा सावित्री प्रकीर्त्तिता बुद्ध्याधिष्ठातृदेवी या सर्व्वशक्तिस्वरूपिणी ॥ सर्व्वज्ञानात्मिका सर्व्वा सा दुर्गा दुर्गनाशिनी । वागाधिष्ठातृदेवी या शास्त्रज्ञानप्रदा सदा कृष्णकण्ठोद्भवा या च सा च देवी सरस्वती पञ्चधादौ स्वयं देवी मूलप्रकृतिरीश्वरी ॥ ततः सृष्टिक्रमेणैव बहुधा कला या च सा योषितः प्रकृतेरंशाः पुंमांसः पुरुषस्य च इति च ब्रह्मवैवर्त्ते गणेशखण्डे ४० अध्यायः ॥ ब्रह्माणीशक्त्युत्पत्तिर्यथा ततो ब्रह्मादयो देवा भयं जग्मुः सवासवाः यदि सा निर्ज्जिता दैत्यैस्त्रयः सर्व्वदिवौकसः सोऽतस्मिन्नन्तरे शक्र ब्रह्माविन्नयते क्रियाः स्त्रीरूपधारिणी भूत्वा सहायत्वे महेश्वर ॥ त्रिपं कुरु स्वकार्य्यत्वं एवं विश्वस्वरे रणे ततो द्योतितवान् शम्भुः स्वशक्तिं किरणोज्ज्वलां ब्रह्मरूपधरां किन्तु ललनाकारविग्रहां हंसस्यन्दन मारूढां स्वकीयायुधधारिणीं तर्ज्जयन्तीं महौजेन दानवानां भयंकरीं ॥ तस्या घोराणि कर्म्माणि दृष्ट्वा स विस्मयन् शिवः का पुनः स्वहृः स्वस्नेहा सदातिप्रतिपक्षजित् तस्याः शक्तिं द्वितीयाञ्च स्वजामि अपराजितां इति देवीपुराणे वृत्रवधे ब्रह्माण्युत्पत्तिः

नन्दातीर्थे शक्तिमन्त्र

विचार निषेधो यथा योऽसावनादि मध्यान्त शिव शक्तिमयः परः तस्यैव परमानन्दा सर्व्वकिल्बिष नाशिनी ॥ तत् प्रभावेण प्राप्नोति तपो यज्ञादिकं फलं मन्त्राणां देवशक्तीनां न विचारो वरानने ॥ इति देवीपुराणे नन्दाकुण्डप्रवेशः प्रथमाध्यायः ॥ प्रकृतिः यथा प्रधानं प्रकृति शक्ति र्नित्या-

वाविकृतिस्तथा एतानि तस्या नामानि पुरुषे या समाश्रिता ॥ तस्या गुणात्रयं सत्वं रज स्तमस्त्रीणि विज्ञेयाः प्रकृते र्गुणाः इति भावप्रकाशः ॥ शक्तिविषक पुष्पाणि यथा अथ पुष्पं प्रवक्ष्यामि कर्म्मयोगे महेश्वरि । शृणुष्व परया भक्त्या यथोक्तं ब्रह्मणा पुरा ॥ कमले करवीरे हेकुरम्बेतुलसीद्वये जातपशोके केतकीद्वे कुमारी चम्पकोत् पलं ॥ कुन्द मन्दार पुन्नागपाटला नागचम्पकं आरग्वधं कर्णिकारं पावन्तीनवमल्लिका ॥ सौगन्धिकं शकारण्डं पलाशाशोक सञ्ज्ञकाः सिन्धुवार अपामार्ग वाप्रलीकञ्च कामजेव्याघ्रचेलं दमनकं मरुवकञ्च ततःपरं लवङ्गं जलकद्रूं नगरञ्च यवा तथा शिवपुष्पं द्रोणपुष्पं कामराजस्तुकेतकं अन्यानि वनपुष्पाणि जलजं स्थलजानि च । गिरिजानि देशजानि नानापुष्पाण्यतःपरं इति प्रपञ्चसारः ॥ शक्तिग्रहः पुं शिवः ॥ कार्त्तिकेयः शक्तिं गृह्णाति यः इत्यर्थे शक्तिशब्द पूर्व्वक ग्रहधातोरलं प्रत्ययेन निष्पन्न इति केचित् ॥ शब्दशक्तिज्ञाने ॥ यथा अस्मात् शब्दात् अयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति तार्किकाः तज्ज्ञानन्तु व्याकरणादिभ्यः अतएव शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृते र्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः ॥ इति शाब्द इति दुर्गादासः ॥ शक्तिग्राहकः पुं व्याकरणोपमानादि ॥ शक्तिग्रहीता च शक्तिं ग्राहयति गृह्णाति च इत्यर्थे ज्ञान्ताण्यन्त ग्रह धातो र्णक प्रत्ययेन निष्पन्नः ॥

शक्तिधरः पुं कार्त्तिकेयः इत्यमरः शक्तिधारके त्रि ॥

शक्तिपर्णः पुं सप्तपर्णवृक्षः इति जटाधरः ॥

शक्तिपाणिः पुं कार्त्तिकेयः । इति हलायुधः ॥

शक्तिभृत् पुं कार्त्तिकेयः ॥ इति हेमचन्द्रः ॥ शक्त्यस्त्रधारके त्रि ॥

शक्तिहेतिकः त्रि शक्त्यस्त्रधारि-

योऽस्त्रा तत्पर्य्यायः शस्त्रीकः २ इत्यमरः ॥ लक्षायुधधरः ३ इति शब्दरत्नावली ॥ शक्तुः पुं क्ली भर्जितयवादिचूर्णं । छातु इति भाषा यथा धाना भ्रष्टयवे भूम्नि स्त्रियां पुं भूम्नि शक्तवः केचित्तु शक्तु २ स्त्रीति वन्धुरा भूम्नि स्त्रियां इति जटाधरः ॥ अस्य गुणाः यवानां शक्तवो रूक्षा लेखना वह्निवर्द्धनाः वातलाः कफरोगघ्ना वात वर्चोनुलोमनाः ॥ धाना सेक्तास्तु तेनैव दुर्जरा लेखनाः स्मृताः गुर्वी पिण्डी कृतात्यर्थं लघ्वी सैव विपर्य्ययात् शक्तूना साशु जीर्य्येतस्य इत्याद्यवलेहिका ॥ इति राजवल्लभः ॥ अथ शक्तवः ॥ धान्यानि भ्राष्ट्रभृष्टानि यन्त्रपिष्टानि शक्तवः तत्र यव शक्तवः यवजाः शक्तवः शीता दीपना लघवः सराः कफपित्तहरा रूक्षा लेखनाश्च प्रकीर्त्तिताः ॥ ते पीता बलदा वृष्या वृंहणा भेदना स्तथा तर्पणा मधुरा रूच्याः परिणामे बलावहाः ॥ कफ पित्त श्रम क्षुत्तृड्व्रण नेत्रामयापहाः प्रशस्ताश्च संदा हृद्या व्यायामान्ते शरीरिणां ॥ अथ चणकयवशक्तवः निस्तुषैश्चणकैर्भृष्टैस्तुर्य्यांशेश्च यवैः कृताः ॥ शक्तवः शर्करा सर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ॥ अथ शालिशक्तवः शक्तवः शालिसम्भूता वह्निदा लघवो हिमाः मधुरा ग्राहिणो रूच्याः पथ्याश्च बलशुक्रदाः ॥ नभुक्त्वा न रदैश्छित्त्वा न निशायां न वा बहून् । नजलान्तरितान् नद्याः शक्तूनद्यान्नकेवलान् पृथक्पानं पुनर्दानं सामिषं पयसा निशि । दन्तच्छेदन मुष्णञ्च सप्त शक्तुषु वर्जयेत् ॥ इति भावप्रकाशः ॥ जन्मतिथौ तद्भक्षणे फलं । ज्योतिषे शक्तून् खादति यस्तु तस्य रिपवो नाशं प्रयान्ति ध्रुवं भुङ्क्ते यस्तु निरामिषं स हि भवेत् जन्मान्तरे पण्डितः इति तिथ्यादितत्त्वं ॥ मेषसंक्रान्त्यां तद्दान विधि र्यथा स्मृतिः मेषादौ शक्तवो देया वारिपूर्णाश्च गर्गरी महार्णवे यो ददाति हि मेषादौ शक्तूनम्बुघटान्वितान्

पितॄनुद्दिश्य विप्रेभ्यः सर्व्वपापैः प्रमुच्यते विप्रेभ्यः पातुके कुर्य्यं पितृभ्यो विषुवे शुभे इति तिथ्यादितत्त्वं ॥ चातुर्मास्यव्रते प्रातःस्नानस्य कृते शक्तवो दक्षिणा यथा नारदीये नित्यस्नाने हविर्द्द्याञ्चिह्नेहे घृतशक्तवः नित्यस्नाने प्रातःस्नाने इति मलमासतत्त्वे ॥

शक्तुकः पुं विषभेदः तस्य लक्षण स्वरूपे यथा यत्र स्थिः शक्तुकेनैव प्रणिमध्यः स शक्तुकः इतिभावप्रकाशः ॥

शक्तुफला स्त्री शमीवृक्षः इत्यमरः ॥

शक्तुफली स्त्री शमीवृक्षः इति शब्दरत्नावली ॥

शक्तुपर्द्दः पुं अश्वहारा कृत्ति ललाट ग्रीवा स्तन पत्रोद्दिष्मः दीर्घनिश्वासश्च यथा कृत्तौ ललाटे ग्रीवायां यदा दुर्मिः भवेत शक्तुपर्द्दं तं विजानीयाद्यतोच्छ्वास मेव च ॥ इति राजवल्लभः ॥

शक्तिः पुं वशिष्ठमुनेर्ज्येष्ठ पुत्रः इति पुराणं ॥

शक्नुः त्रि प्रियम्वदः इत्यमरटीकायांभरतः ॥

शक्तुः त्रियम्वदः इत्यमरः ॥

शक्मा[२] पुं शक्तिः शकयातेरोणादिक मनिन् प्रत्ययेन निष्पन्नः इति सिद्धान्तकौमुदी ॥

शक्यः त्रि समर्थनीयः शक्त्याश्रयः वाच्यः यथा शक्योऽर्थोऽभिधया ज्ञेयः लक्ष्यो लक्षणया मतः व्यङ्ग्यो व्यञ्जनया तेन स्त्रिस्वः शब्दस्य वृत्तयः इत्यलङ्कारशास्त्रं अन्यच्च शक्यसादृश्यबुद्धिस्तु भवेदुपमितेर्गुणः इति भाषापरिच्छेदः ॥ अपिच ईश्वर सङ्केतः शक्तिस्तया अर्थबोधकं पदंवाचकं यथा गोत्वादि विशिष्टबोधकं गवादिपदं तद्बोध्योऽर्थो गवादि वाच्यः सएव मुख्यार्थ इत्युच्यते । इति शक्तिवादः शक्यतावच्छेदक त्रि शक्यांशेऽभासमानधर्मः यथा पवन्त्र तादृशधर्म्मस्य शक्यतावच्छेदकत्वंदुर्व्वार मेव । इति शक्तिवादः ॥

शक्रः पुं इन्द्रः । इत्यमरः ॥ कुटजवृक्षः अर्ज्जुनवृक्षः ।

इति मेदिनी ॥ ज्योतिस्तत्त्वे ।
यथा शक्रो निर्ऋ ति स्तोयं
विष्णु विरिञ्ची हवि र्वसु र्वरुणः
अजपादोऽहिर्बुध्नः पूषा चेतीश्व
रा भान्ता इति ज्योतिस्तत्त्वं ॥
चतुर्दशेन्द्रा यथा विश्वभुकच्च
विपश्चिदः सुचित्तिः शिवि देव
च विभुर्मनोजवश्चैव तथोज्ज
स्वी वलि स्तथा ॥ अद्भुतश्च त
था शान्ति स्तथा देववरो वृषः
ऋतधामा दिवःस्वामी शुचिः
शक्रा श्चतुर्दश ॥ ब्राह्मदिनमासा
द्येषुइन्द्राणांनाश संख्यायथा ।
ब्राह्मे दिने वैनश्यन्तिचतुर्द
श पुरन्दराः शतानिमासिच
त्वारिविंशत्या सहितानि च ॥
अब्दे पञ्चसहस्राणि चत्वारिंश
च्छतानि च इत्याद्ये वह्निपुरा
णे गणभेदनामाध्यायः ॥
इन्द्रत्व प्राप्ति कारणं यथा इन्द्र
उवाच रमाकान्त भवत्प्रीत्यै
कृतं क्रतुशतं पुरा तेन पुण्ये
न सम्प्राप्तं मया पौरन्दरंपदं ॥
इदानीं नूतनः कोपिजातो ।
दिविपुरन्दरः न तेनधर्म्मो
विहितो न तेन क्रतवःकृ
ताः ॥ मम सिंहासनं दिव्यं

कथ माक्रान्त मच्युत इत्येवंव
दत स्तस्य श्रुत्वा वाक्यं रमा
पतिः उन्मीलितस्मितास्यो ऽस्मा
नुवाच मधुरं वचः श्रीभगवानु
वाच देवादयो मनुष्यान्ता मम
सेवापरायणाः महाजनरतालो
का मङ्गलि स्तुति पाठकाः ॥
मन्मूर्त्तिषु कृतध्याना मत्कथा
श्रावणा इह मत्पादोदक नैवेद्य
भोजिनोन्वह मेव ये ॥ मन्नाम
कीर्त्तनपरा मम स्तुति पराय
णाः मन्मंत्रजापका नित्य मनन्या
श्रयसम्पदः किं विधित्वं किमिंद्र
त्वदेवत्व मपरं किमु तेषा मल
भ्यं यत् किञ्चित् दुर्लभं ना
स्तिसंसृतौ किंदानै रल्पफलदैः
किं तपोभिः किमध्वरैः सेव्यमा
नैः क्षितितले स मम प्रीति
मान् कर्मणा केन स त्वत्प्री
तिपरो भवेत् तद्वदस्व महावा
हो प्रपन्न भय भञ्जन ॥ श्रीभग
वानुवाच अनेकधा मद्भजनं मम
प्रीतिकरं परं ॥ यद्भक्त्या
तत्पदं लेभे तत् शृणुष्व
पुरन्दर ॥
जपत्पश्चाद्गीताध्यायं गीतानां
श्लोक पञ्चकं तथा भक्त्या तु

संग्रामे तव साम्राज्य मुत्तमं ।
इति पाद्मोत्तरखण्डे ९८ ॥
अध्यायः ॥
शक्रक्रीडाचलः पुं सुमेरुपर्व्वतः
इतिहलायुधः ॥
शक्रगोपः पुं इन्द्रगोपकीटः ॥
इतिजटाधरः ॥
शक्रजः पुं काकः इति त्रिका
ण्डशेषः ॥ इन्द्रजाते त्रि ॥
शक्रजातः पुं काकः इति शब्द
रत्नावली इन्द्रजाते त्रि ॥
शक्रजित् पुं रावणपुत्रः इति ।
त्रिकाण्डशेषः इन्द्रजेतरि त्रि॥ श
क्रधनुः स्त्री इन्द्रधनुः गाण्डी
इति रामधनुक इति च भाषा
इत्यमरः इन्द्रायुधं शक्रधनुः
कौशिकायुध मित्यपि ऐरावतं
रोहिते स्यादवक्रे यदि तद्ध
नुः ॥ इति शब्दरत्नावली ॥
शक्रध्वजः पुं इन्द्रध्वजः । तद्वि
वरणं यथा नृपवाहन उवाच
भगवन् श्रोतु मिच्छामि तस्य
उत्थापनं यथा क्रियते दिन
मस्ते च द्रव्य मन्त्र विधिं वद ॥
अगस्त्य उवाच ब्रह्मणा कथितं
शक्र बृहस्पति समीपतः यथा
तथा प्रवक्ष्यामि विधिं केतोः

समुच्छ्रये ॥ बृहस्पति रुवाच ।
शुभाहे कृष्टे करणे मुहूर्त्ते
शुभ मङ्गले दैवज्ञः सूत्रधा
रश्च वनं गच्छेत् सहायवान्
देवी प्रतिष्ठा विधिना याजायां
या प्रचोदिता गत्वा वृन्तं शु
भं पुष्पं धवार्जुन प्रियङ्गुरं ॥
उडुम्बराजकर्णञ्च पद्मैते शोभ
ना हरेः ध्वजार्थे वर्जयेद्वत् स
देव उद्यानजान् द्रुमान् ॥ क
न्या मध्ये तु या यष्टीः करमा
नेनकल्पयेत् एकदेश करा वत्
सनव पञ्च करापरा अशालतां
क्रिमिचिन्नां तथा पक्षि निकेत
नां वल्मीक पितृवनजां समु
त्क कोटन्नरां ऊर्द्धाश्च चैटासि
कांश्च तथा स्त्रीनामगर्हितं ।
विद्युत् वज्रहता ञ्चैव दग्धाञ्च
परिवर्जयेत् ॥ अलाभे चन्दनेषा
मं शाल शाकमयं तथा क
नैव्यं शक्र चिक्रार्थे न चान्य
द्वृक्षजं क्वचित् ॥ शुभभूमिभवं
ग्राह्यं शुभतोये शुभावहे ।
ततः संपूजयेद्वृक्षं प्रागुखोद
ङ्मुखोपि वा ॥ नमो वृक्षपते
वृक्ष त्वामर्च्चयति पार्थिवः ध्वजा
र्थं तत्त्वतो नाथ अन्यथा उप



गमाते ॥ राज्ञो देयो बलिस्त
त्र युगवृत्ते तथैवच वासवान्तो·
महावृत्ते कृत्वा चाप्यत्र गम्यते
ध्वजार्थे देवराजस्य नक्तान्ति स्त
वस्त्रं च पूजयित्वा ततो वृक्षं
बलिं भूताय दापयेत् ॥ शुभा
ते छेदयेद्वृक्षं शुभस्वप्नादि द
र्शनैः शुक्लाम्बरधरस्त्वेव समुद्र
तरणं नदी वृक्षान्नयान् शुभान्
तीरानारोहेत् देवतालयं देवो
द्विज स्तथा साधुलिङ्ग· ब्रह्म·
हरे शपि ॥ प्रतिमा पूजिता स्व
प्ने क्षिप्रं सिद्धिफलप्रदा मत्स्य
मांस दधि लाभे रुधिरे मृत।
रोदनं ॥ अगाम्यगमनं दृष्ट्वाश्रा
ध्ये सिद्धिफलप्रदं । कुम्भोस्ति
तथा ले धान्ये शत्रुनाशे तथाशुभे
फले पुष्पे सिता दूर्वास्वप्ने
लब्धा जयावहाः शंखं शाद्व
स्तथा दन्तिलाभो राज्य प्रदा
यकाः ॥ गोः स्ववत्सा नवसूता
दृष्टा पुत्र फलप्रदा पङ्क·उद्ध
रणे कूपे ख्याति मोक्षकरं चि
रात् प्रवेशमान् शुभान् दृष्ट्वा
तथा छिन्देत पादपे उदङ्मु
खः प्राङ्मुखोवा मधु वज्राक्त प
र्श्ना एकांतरे च पतनं शास्त्रा·

ऽशाखो ऽव्रणः शुभः अलग्न पाद
पैश्चान्य अन्यथात परित्यजेत् ॥
अष्टाङ्गुलं त्यजेत् मूले अग्रे ततन्तु
जले क्षिपेत् तथा तमानये
दूत् स शकटेन वृषै रपि ॥
युवाने र्बलसम्पन्नै र्नयेतत् पु
रतः परं नीयमाना यदा पृथ्वी
समा वा चतुरस्रका रेखा वा भ
ङ्गमायाते राज्ञः पुत्रं पुरोहितं ।
आरभङ्गे· बले भिन्ने राज्यनाशो
तये तथा ॥ अर्थस्य अग्र भङ्गे·
न शान्तिं न्तेव तु कारयेत् इ
न्द्रं जेत्वक्षेत्र मन्त्रेण जातवेदसमा
पिवा ॥ तथा नीत्वा शुभे लग्ने पु
रस्तादुपवेशयेत् द्वार शोभांप
थ रथ्या गृहे हट्टेच कारयेत·
यदा पट्टे निनादाश्च वेश्यापण्ड
एव द्विजातयः संकुले र्वेदश
ब्दश्च तानेया यत्र उद्धरेत् ॥
ततस्या त्रिचकर्मावनिर्मिते स्त
म्भे वेष्टयेत् वस्त्रे रुद्रज रोमा
स्थैः शुभैः शुक्ले यथा क्रमं ।
नन्दोपनन्द संज्ञाश्च कुमार्यः
प्रथमाशाखाः देवा जय वि
जयाख्याः षोडशांश व्यवस्थिताः
अधिके शत्रुजायिनी तथार्धजा
देवैते रंगडाः ॥ ध्वज परिमाः

णार्थं सपरिधिः प्रथमे पिंर
षोडशांश विहीनानि कुर्य्या·
च्छेयानि बुद्धिमान् रसनो वि
चित्र वर्णो प्रथमो दद्यात् ।
स्वयम्भुः सुरक्तो चतुरस्रान्त्र वि
श्वकर्मा द्वितीयतः अष्टास्रात्तु
स्वयंशक्रो नीलरक्तो प्रदापयेत्
कलशं यमेन रज्जुञ्च वरुणेन
सहस्रिके ॥ मञ्जिष्ठा कलदा
कारंवासुदेवो मस्तकं नीलव
र्णञ्चते दद्यात्स्कन्दो वक्र विचि
त्रितं कुबेर दहनो दद्यात् स्व
र्णाभं तथाष्टमं वैदूर्य्य सदृश·
मिन्द्राग्रेवेयं दापयेत् बुधः ॥ च
क्रोकाकृतिन्तु सूर्य्यो विश्वेदेवाः
पद्मनिभं ऋषयो नियमं दद्यु
र्नीलं नीलोत्पलाभासं ॥ गु
रुणा शुक्रेण ततो विशालं·
मुद्गतो न्यस्तं गृहे विचित्राणि
वकुमारभिः स्थानि रूपाणि य
थेकेनैवदस्मन्तु केतो स्तनस्य
भूषणं तदेव तं विजानीया
घंटादिभि स्त समुच्छ्रयेत् प्रथ
मं प्रविशमाना भूमिं यष्टि हेति
राष्ट्रं वालानां तालशब्देन देश
विख्याते समाचष्टे नृपवधक
राविशीर्णा शुभावहा सर्वसंद्रा
च

शास्तु सूर्य्य यम शक्र सोम पवन
दवारुणैः ॥ वशिष्ठ ऋषि मंत्रा
श्चहोतव्याः दधि चाक्षताः शुक्र
स्कन्द गुरु रुद्र अप्सरादि प्रपाठ
येत् ॥ कृत्वा तु विधिवद्धक्तिज्वा
लो लक्षेत बुद्धिमान् सतेजाः स्नि
मनो दीप्तः संहतो रुचिरप्रभः
रक्ताशोक समाकारो रथभेरी·
स्वनःशुभः ॥ शंख दुंदुभिमे
घानां नादाःशस्तास्तु पावके ।
ततः स कदलीस्तु दण्डान् पता
कानि समुच्छ्रये ॥ अन्याश्च विवि
धा शोभाः शक्र केतु समुच्छ्र
ये प्रोष्ठपदे तु अष्टम्यां शुक्ला
यां शोभने ऋक्षे ॥ आश्विने·
नाथ शुक्लायां श्रवनेनाथ उच्छ्र
येत् पौरजनलग्न वृन्दैः पटभे
री निनादिते ॥ वितान भुजशो
भाढ्यं पताकाभिः समुज्वले वि
स्तीर्ण शक्र मन्त्रेण सिंहस्थाङ्क
नेन च ॥ दष्ठ मातृक रज्जुभ्यो
शुभ्रतोरण साकुले अविलम्बि
त सुखान मभग्न पिटकं समं ॥
न कृतं वा समुत्थाप्य केतुं वा
सवजे विभो उच्छ्रितं रक्षयेत्
प्राज्ञः काकोलूक कपोतयोः ॥
न समुत्थापनं दद्यात्तेषा· ।

मपि पतितं यन्त्रोद्देशेन तेऽकु
र्य्यात् सुरवे केतौ यथाविधि।
तथा सुसंस्थिते रज्जुं सुखयन्त्र
सुयन्त्रिते रात्रौ जागरणं कु
र्य्यादिन्द्र मन्त्रानुकीर्त्तनैः ॥ पुरो
हितः सदैवज्ञः शुभ शान्तिरतः
सदा । छत्रपातो नृपं हन्यात्
पताका महिषीवधं ॥ पिटके
युवराजस्य सचिव मनुकम्पते ।
राष्ट्रं तोरणपातेन ध्वजेष्वन्तर्द्व-
योभवेत् ॥ पतिते शाक्रदण्डे-
तु नृप मन्ये समादिशेत् कु
म्भिजालक उत्थाने शलभान्तस्क
राद्भयं ॥ सुक्षेमे संस्थिते शान्ति
र्नृपस्य नगरस्य च यावोच्छ्रित
स्तु तिष्ठन्ति तावत् पौराःसदा
हृष्टाः ॥ केतोर्निरता यज्ञेष्वभु-
क्तीयादिप्रकम्पाश्च ॥ पाते तु
तथैव कुर्य्यादुत्थाने यादृशी पू
जा । राज्ञो शुभकृत् पातनेतो
दृष्टे काक कपोतैः ॥ याति नृ
पं सहबाष्ट्रं यस्यैव कारयेत्
केतुं ॥ नगरे वा पुरे खेटे य
थावं कुर्वते पौराः ॥ पुरेन्द्रा
रस्य द्वारे नृप सिंह स्त्रियोत्थिते।
केतु समस्त चोराणांनाशनं
जयदं महत् ॥ एवं ऐर्न्द्र ।

हरिः केतुं प्राप्तवान् वृषवाह
नात् तथा ब्रह्मसुतेनैव ब्रह्म
णः शाक्र मागतः ॥ तेन सो
मस्य तद्धते ततो देवे समाग
ते । तदा प्रभृति कुर्वन्ति नृपा श्र
यापि उत्कृष्टं ॥ एवं यः कारये
द्राजा केतुं विजयकारकं ।
तस्य पृथ्वी बलोपेता सदी
पावणाभवेत् ॥ इत्याद्ये दे
वीपुराणे इन्द्रध्वज लक्षण २९
अध्यायः ॥

शाक्रनंदनः पुं अर्ज्जुनः । इति
जटाधरः इन्द्रानन्दकारके त्रि
शाक्रपर्य्यायः पुं कुटजवृक्षः
इतिरत्नमाला ॥ इन्द्रवाचकश्च
शाक्रपादपः पुं देवदारुवृक्षः
इत्यमरः ॥ कुटजवृक्षः इति
राजनिर्घण्टः ॥
शाक्रपुष्पिका स्त्री अग्निशिखा
वृक्षः । इतिरत्नमाला ॥
शाक्रपुष्पी स्त्री अग्निशिखावृ
क्षः इत्यमरः ॥
शाक्रभवनं क्ली स्वर्गः इति
त्रिकाण्डशेषः ॥
शाक्रभित्² पुं इंद्रजित् सचरा
वणपुत्रः इति शब्दरत्नावली
शाक्रभूभवा स्त्री इंद्रवारुणी ॥

इति शब्दचंद्रिका ॥
शाक्रमाता स्त्री भार्गी । इति
राजनिर्घण्टः ॥ इंद्रजननीच ॥
शाक्रमातृका स्त्री शाक्रध्वजांगष
ष्टिविशेषः यथा कालिकापुरा
णं कुमार्य्यः पंचकर्त्तव्याः शाक्र
स्यन्दपसत्तम शालमय्यस्तु ताः
सर्वा नृपवराः शाक्रमातृकाः के
तोः पाद प्रमाणेन कार्य्याःश्र
क्रकुमारिकाः मातृकार्द्धप्रमा
णात्तु यन्त्रं हस्तद्वयं तथा ए
वंकृत्वा कुमारीश्च मातृकां के
तुमेवच एकादश्यांशिते पक्षे
षष्ठीना मधिवासने ॥ इति-
तिथ्यादितत्वं
शाक्रमूर्द्धा² स्त्री वल्मीकः इ
तित्रिकाण्डशेषः ॥
शाक्रावल्ली स्त्री इंद्रवारुणी इ
तिराजनिर्घण्टः ॥
शाक्रवाहनः पुं मेघः । इति
शब्दचंद्रिका ॥
शाक्रवीजं क्ली इन्द्रयवः इति
राजनिर्घण्टः ॥
शाक्राशरासनं क्ली इंद्रधनुः
इति हलायुधः ॥
शाक्रशाखी² पुं कुटजवृक्षः
इति भावप्रकाशः ॥

शाक्रशाला स्त्री प्रतिश्रयः इति
भूरिप्रयोगः ॥ पुस्तकान्तरे स
त्रशाला इति पाठश्च ॥ इन्द्र
गृहञ्च ॥
शाक्रशिवः पुं वल्मीकः ॥ इति
राजनिर्घण्टः ॥ इंद्रमस्तकश्च ॥
शाक्रसारथिः पुं मातलिः । इति
हलायुधः ॥
शाक्रासुतः पुं वालिवानरः ॥
इतिहलायुधः इंद्रपुत्रमात्रञ्च
शाक्रसुधा स्त्री शल्लकी कुन्दु
रुखोटी इति भाषा इतिशब्द
चंद्रिका ॥
शाक्रसृष्टा स्त्री हरीतकी । इति
त्रिकाण्डशेषः ॥
शाक्राख्यः पुं पेचकः । इति
त्रिकाण्डशेषः ॥ इंद्रनामकेत्रि
शाक्रानी स्त्री सची । इति शब्द
माला ॥
शाक्राशनं क्ली भंगा भाङइति
भाषा अस्यगुणाः शाक्राशनंतु
तीक्ष्णोष्णं मोहकृत् कुष्ठनाशनं
वल मेधाग्निकृत् श्लेष्मादोष
हारि रसायनं ॥ इति राजवल्ल
भः ॥ अन्यत् विजया शब्दे
दृष्टव्यं ॥ इंद्रभोजनञ्च ॥
शाक्राशनः पुं कुजवृक्षः ॥



इति शक्रचंद्रिका ॥
शक्राह्वः पुं इंद्रयवः । इति रा
जनिर्घण्टः ॥ इन्द्रनामके त्रि ॥
शक्रिः पुं मेघः ॥ वज्रं ॥ हस्ती
पर्वतः ॥ इति संक्षिप्तसारोणा-
दिवृत्तिः ॥
शक्रोत्थानं क्ली शक्रध्वजोत्
सवः । अस्य विधि लिख्यते श्री
और्व उवाच । अथातः सम्प्रवक्ष्या-
म्येन्द्र शक्रोत्थान ध्वजोत्सवं ।
यत्कृत्वा नृपतिर्याति नो कदा
चित् पराभवः ॥ वैरो हरिस्ये
द्वादश्यां श्रवणे सितपक्षके
आरापयेन्नृपः सम्यक् सर्वविघ्नो
पशान्तये ॥ राज्ञोपरिचरो नाम
वसुनामापरस्तुयः ॥ नृपस्तेना
य भक्तो यत्नः प्रावर्तितः पु
रा ॥ प्राविट्कालेच नभसि द्वा
दश्यां भक्तितत्परे पुरोहितो-
वक्ष्यमाणे विधिना च समन्वि
तः ॥ प्रथमे शक्रकेत्वर्थे-
वृक्षं मार्गेण वर्द्धयेत् । स
न्त्वत्सरो बार्हकिश्च कृतकौतु
कमंगलः ॥ उद्यानं देवतागा
रे श्मशाने मार्ग सम्भवः ।
ये जाता स्तरव स्ता स्तु वर्जये
द्धास्तवध्वजे ॥ वक्रवल्लीयतंगुल्मकं

वक्रकण्टकसंयुतं कुब्जे हेत्वाद
नीयुक्तं लताच्छन्नं तरुं त्यजेत्
पत्तिवास समाकीर्णं कोटरै
र्बहुभि र्युतं । पवनानलविध्व
स्तं तरुं यत्नेन वर्जयेत् ॥ नारी
संज्ञाश्च ये वृक्षा प्रतिकूला प्र
तिकूष्णः । तान् सदा वर्जयेद्धी
रः सर्वदा शक्र पूजने ॥ अर्जु
नोप्यश्वकर्णश्च प्रियको धव
एवच उदुम्बरश्च पञ्चैते केतु
र्थे सत्तमाः स्मृता ॥ अन्ये च देव
दार्वाद्याः शालाद्या स्तरव स्त
था प्रशस्तास्तु परिग्राह्या नाप्र
शस्ताः कदाचन ॥ तत्र वृत्ते त
तो रात्रौ स्पृष्ट्वा मंत्र मिमं पठेत्
यानि वृक्षे तु भूतानि तेभ्यः
स्वस्ति नमो ॥ स्तवः ॥ उपहा
रं गृहीत्वेमं क्रियतां वासवध्वजः
पार्थिव स्त्वां वरयते स्वस्ति ते
स्तु नगोत्तम ॥ ध्वजार्थे देवरा
जस्य पूजेयं प्रतिगृह्यतां ॥
ततोपरेह्नि तं छित्वा मूल म
ष्टांगुले पुनः जलेक्षिपेत्तदग्र
स्य छित्वैवं चतुरंगुले । त
तो नीत्वा पुरद्वारे केतुं निर्मा
य तत्र वै शुक्लाष्टम्यां भाद्रप
दे केतुं वेदीं प्रवेशयेत् ॥

द्वाविंशत्समानस्तु अधमः केतु
रुच्यते ॥ द्वात्रिंशत्तु ततो ज्यायां
न् द्वाचत्वारिंशदेव च ततो-
धिकः समाख्यातो द्वापंचाश
त्तयोत्तमः ॥ कुमार्य्यः पंचकर्त
व्याः शक्रस्य नृपसत्तम शाल
मयस्तुताः सर्वा स्तथराः शक्र
मातृकाः ॥ केतोः पाद प्रमानेन
कार्य्याः शक्रकुमारिकाः । मातृ
कार्द्धप्रमाणान्तु यन्त्रं हस्तद्वयेत
था ॥ एवं कृत्वा कुमारीश्च मातृ
कां केतुमेवच एकादश्यां सिते
पक्षे वर्ष्टितामधिवासयेत् अधि
वास्यततो वर्ष्टिं गंधद्वारादिभिः
कैः । द्वादश्यां मण्डले कृत्वा वा
सवं विस्तृतात्मके ॥ अच्युतं पूज
यित्वा तु शक्रं पश्चात् प्रपूजयेत् ।
शक्रस्य प्रतिमां कुर्य्यात् कानकीं
दारवीं तथा ॥ अन्यतेजस भू
तानां सर्वाभावे तु मृन्मयीं-
तामण्डलस्य मध्ये तु पूजयित्वा
विशेषतः ॥ ततः शुभे मुहूर्तेतु
केतुं मुत्थापयन्नृपः वज्रहस्त स्
राविघ्न बहुनेत्र पुरन्दर ॥ क्षेमा
र्थं सर्वलोकानां पूजेयं प्रतिगृ
ह्यतां । एह्येहि सर्वामर सिद्धसं
घैरभिष्टुतो वज्रधरामरेश ॥

समुत्थित स्त्वं प्रवणाय पादे गृ
हाण पूजां भगवन्नम स्ते । एव
मुत्तरतंत्रोक्ते देहन स्तवनादिभिः
इति मंत्रेण तंत्रेण नानाने
वेद्य वेदनैः । आपूपैपायशैः
पाने गुडै र्धानाभिरेव च ॥
भक्ष्ये र्भोज्यैश्च विविधैः पूजयेत्
श्रीविवृद्धये । ध्वजेषुदशदिक
पालान् ग्रहांश्च परिपूजयेत् ॥
साध्यादीन् सकलान्देवान् मा
तृः सर्वा स्त्वनुक्रमात् ततः
शुभे मुहूर्तेतु तानि वर्द्धकिसंयु
तः ॥ केतो रुत्थान भूमिन्तु
यत्नवेधाश्च पश्चिमे विप्रैःपुरो
हितैः सार्द्धं गच्छेद्राजा समंगलैः
रज्जुभिः पंचभिर्बद्धं यंत्रश्लेषे समा
रूकं कुमारीभिश्च सेयुक्तं दिक्पाला
नाञ्च पेटकैः ॥
पेटकैः स्थाने पट्टकैरिति च
पाठः ॥ छत्रह्नि रैतिकान्तैश्च
नाना द्रव्य समन्वितैः । यथा
वर्णो यथादेशयोजितै र्वस्त्रवे
ष्टितैः ॥ युक्तं तं किंकिनीजा
ले र्दृहद्घण्टैश्च चामरैः ॥
भूषितं बहुवर्तैश्च माल्यै र्बहु
विधैस्तथा बहुपुष्पै स्तगन्धैश्च
भूषितं रत्नमालया । चित्र

माल्यास्वरपैरे श्वतुर्भि रपि तोर
णैः उत्थापयेन्महाकेतुं राजा-
मात्यैः शनैः शनैः तमुत्थाप्य
महाकेतुं पूजितं मण्डलान्त
रेव ॥ प्रतिमां तां नयेन्मूले के
तोः शक्रं विचिन्तयन् । यजे
त्तं एवंवतत्र शची मातलिमेव
च जयन्तं तनयं तस्य वज्र-
मैरावतं तथा । ग्रहांश्चाप्य-
थ दिक्पालान् सर्वांश्च गण
देवताः ॥ अर्घ्यपाद्यैः पूजये
त्तु बलिभिः पायसादिभिः पू
जितानाञ्च देवानां शक्रहोमं
समाचरेत् ॥ होमान्ते तु बलिं
दद्यात् वासवाय महात्मने । ति
लेहृते चाततञ्च पुष्पं दूर्वां त
थैव च ॥ पतेस्तु जुहुयाद्देवान्
स्वैः स्वै मंत्रै र्नरोत्तमः । ततो
होमावसाने तु भोजयेदपि ब्रा
ह्मणान् ॥ एवंसंपूजयेन्नित्यंस
प्तरात्रं दिने दिने । ब्राह्मणैः
सहितो राजा वेद वेदाङ्ग पार
गैः ॥ सर्वत्र शक्रपूजासु यज्ञेषु-
परिकीर्तितः ज्ञात्वा क्षिति मं
डये वासवस्य प्रियः सदा ॥ प
वे कृत्वा दिवाभागे शक्रोत्थापन
मादितः प्रवर्त्तयेत्तथाघ्व द्वाद

शभ्यां पार्थिवः स्वयं श्रुतपादेभर
णपास्तु निशि शक्रं विसर्जयेत्
सुप्तेषु सर्वलोकेषु यथा राजा
न पश्यति ॥ यन्मासान्मृत्युमा
प्नोति राजा दृष्टोविसर्जनं श
क्रस्य नृपशार्दूल तस्मान्नेत्तेन ते
नृपः विसर्जनस्य मंत्रोयं पुरावि
द्भिः रुदीरितः साहं सुरासुरगु
रोः पुरन्दर शतक्रतो ॥ उप
हारं गृहीत्वेमं महेन्द्रध्वजे ग
म्यतां सूतकेतु समुत्पन्ने वारो
भोमस्य वा शनेः भूमिकम्पा
दिकोत्पाते वासवं न विसर्ज
येत् उत्पाते सम्भवाच्चस्तु तथा
पल्लवदर्शने ॥ अतीत्यशानि-
भोमौ च सम्पर्तेपि विसर्जयेत्
सूतके तथ संप्राप्ते अतीतेसू
तके पुनः ॥ यस्मिन् तस्मिन्
दिने चैव सूतकान्ते विसर्जयेत्
तथा रजेन्नृपः केतुं पतति-
शाक्रुना यथा ॥ न केतो नृप
शार्दूल यावन्नहि विसर्जनं । श
नैः शनैः पातयेत्तु यथोत्थापन-
मादितः ॥ कृते तथान्यथा भग्ने
केतौ मृत्यु मवाप्नुयात् । वि
सृष्टे शक्रकेतुं तु सालंकारं त
था निशि ॥ त्रिपदेनेन मंत्रेण

त्वगाये शालिले नृपः निष्टके
तो महाभाग यावत्सम्वत्सरं ज
ले ॥ भवाय सर्वलोकानां म
न्नराष्ट्रविनाशक उत्थापयेत्तु
यमरवैः सर्वलोकस्यैव पुरः ॥
रहो विसर्जयेत् केतुं विशे-
षोयं प्रपूजने पवेयःकुरुते-
पूजां वासवस्य महात्मनः स
चिरं पृथिवीभुक्त्वा वासवलो
कमाप्नुयात् न तस्य राज्येपड
र्भिक्षं तेनेषा नाप्यधर्मकृत ॥
स्वाश्यन्ति मृत्यु नोकाले ज
नानां तत्र जायते तत्तुल्यः
कोपि नान्योस्ति प्रियः शक्र
स्य पार्थिव ॥ तस्य पूजा सर्व
पूजा कोशवाद्याश्च तत्रगाः स
कल कलुषहारि व्याधि दुर्भिक्ष
नाशि सकल भुवनवेशी सर्व
सौभाग्यकारि सुरपतिगृहगा
मीहार्द्दनं शक्रकेतोः प्रतिश
रद मनेके पूजयेत् श्रीवि
वृद्ध्यै ॥ इति श्रीकालिकापु
राणे ८८ अध्यायः ॥
शक्रोत्सवः पुं इन्द्रस्य उत्सवः
तत्पर्य्यायः ॥ ध्वजोत्थानं २
इति त्रिकाण्डशेषः ॥ अस्यविव-
रणं शक्रोत्थानशब्दे द्रष्टव्यं ॥

शल्कः पुं प्रियम्वदः । इति शब्द
शब्दटीकायां भरतः ॥
शङ्करः पुं वृषः इति सिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥
शङ्करी स्त्री शकुली । इति सि
द्धान्तकौमुद्यामुणादिवृत्तिः ॥
नदीविशेषः मेखला ॥ छंदोभे
दः । इति मेदिनी ॥ सततचतुर्द
शाक्षरपादवृत्तं । तद्भेदा य-
था असम्बाधा १ वसंततिलकं
२ सिंहोद्धता ३ अपराजिता ४
प्रहरणकालिका ५ वासन्ती ६
लोला ७ नान्दीमुखी ८ इति
छन्दोमञ्जरी ॥
शङ्का पुं हस्ती । इति सिद्धान्त
कौमुद्यामुणादिवृत्तिः ॥
शंकः पुं शकटोद्वाहकवृषभः
यथा स्कन्धवाहस्तु शंकश्च शृंगी
गौ रक्तकर्त्तिलः । इति हारा
वली ॥
शंकरः पुं शिवः इत्यमरः ॥
अस्य व्युत्पत्ति र्यथा सदा ध्या
नाञ्च भक्तानां पवनं यमिदं
मयं । भूतनाथत्व मप्यस्मान्ने
नाहं शंकरः स्मृतः ॥ इति स्कन्द
पुराणं ॥ अस्य भस्माश्रि धारण
कारणं यथा विसृज्य तान् ब्रह्म

विसृ मयान् वृषभवाहनः श्मा
दाय सगणान् सर्व्वान् कामरूपा
न्नवै ययौ ॥ उग्रतारो ततो दे
वी गणांश्च प्राह शंकरः ।
उत्सारयन्तु सकलान् युष्मान्
लोकान् गणा द्रुतं ॥ उग्रतारे
महादेवि त्वच्छापात् सारयन्तु
ते । ततो गणाः कामरूपादे
वी चाप्यपराजिता ॥ लोका
नुत्सारयामासुः पीठं कान्तेश्व
स्यकं उत्सार्य्यमाणे लोके च
तद्वैरो द्विजातिभिः ॥ संध्या
चलं गतो विप्रो वशिष्ठः कु
पितो मुनिः । सोऽप्युग्रतारया
देव्या उत्सारयितु मीशया ॥
गणैः सह धृतः प्राहशापं क्रु
द्धेन् सुदारुणं । यस्मादहं ए
तो वामे त्वयोत्सारयितुम्मुनिः
तस्मात्वं वाम्य भावेन पूज्या
भव सशंकिका । भर्त्स्यति म्ले
च्छवद्यस्माद्गणा स्ते मन्दबु
द्धयः ॥ भवन्तु म्लेच्छा स्तस्मा
दे भवन्त्याः कामरूपक । महा
देवोपि यस्मान्मां निःसारयितु
मुद्यतः ॥ तपोधने मुनिस्तान्ते
म्लेच्छवद्देहपातनः । तस्मात्म्ले
च्छप्रियो भूयात् शंकर श्चापि

भस्मदेहक ॥ इति कालिकापुरा
णे ७६ अध्यायः ॥ शंकर ।
गीता देवीपुराणे ७ अध्याय
द्रष्टव्या ॥ शिवावतारविशेषः
यथा तद्भवान् लोकरक्षार्थमुत्त
साय निखिलान् खलान् व
शमस्थापयत् प्रीते जगद्धेन स
खं ब्रजेत् ॥ इत्युक्तापरतान्देवा
नुवाच गिरिजाप्रियः । मनोर
थं एरयिष्ये मानुष्य मरलक्ष्य
वः ॥ इत्युक्त्वाच विनाशाय
धर्म्मसंस्थापनायच भाष्य कु
र्वेन्ब्रह्मसूत्र तात्पर्य्यार्थविनिर्ण
ये ॥ मोहयन् प्रकृतिं द्वैतध्वान्त
मध्याज्ञभ्रातृभिः चतुर्भिः सहितः
शिष्यैः ख्यातैः हरिवन्द्युजैः ॥
यतीन्द्रः शंकरो नाम्ना भवि
ष्यामिमहीतले मद्दृतया भवं
तोपि मानुषीं तनुमाश्रिताः ॥ ते
मामनुसरिष्यन्ति सर्व्वे त्रिदिव
वासिनः । तदा मनोरथः पूर्णो
भवतां स्यान्नसंशयः ॥ इतिमा
धवीय संक्षेपशंकरजये १ ॥
सर्गः ॥ मंगलकारकेत्रि ।
यथा क्षेमंकरो ऽरिष्टतातिः
स्यान्मङ्करः शंकरो । इति त्रि
काण्डशेषः ॥

शंकरप्रियः पुं तित्तिरिपक्षी
इति केचित् ॥ शिववल्लभे त्रि ॥
शंकराचार्य्यः पुं स्वनामख्या
ताचार्य्यः । स तु अद्वैतवादी वे
दान्तभाष्यकर्त्ता च यथा । श्री
शंकराचार्य्य नरावतारं शिवं
स्मरं विश्वगुरुं प्रणम्य वेदान्त
शास्त्र श्रवणालसानां बोधाय
कुर्वे कमपि प्रयत्नं ॥ इतिमधु
सूदनसरस्वतीकृत सिद्धान्तबि
न्दुप्रथमश्लोकः ॥
शंकरावासः पुं कर्पूरभेदः ।
इति राजनिर्घण्टः ॥ कैलाशश्च
शंकरी स्त्री मञ्जिष्ठा इति श
ब्दचन्द्रिका ॥ शमी । इति राज
निर्घण्टः ॥ शंकरभार्य्या यथा
शंकरी शम्भुपत्नी च शिवा
शतनिनादिनी शुभाशुभप्रदा
नित्या शतसूर्य्यसमप्रभा इति
रुद्रयामले अन्नपूर्णासहस्रना
मस्तोत्रं ॥
शंका स्त्री त्रासः ॥ वितर्कः ।
इति मेदिनी ॥
शंकितः त्रि भीतः । इति त्रिका
ण्डशेषः ॥ वितर्कित इति शंका
शब्दार्थ दर्शनात् चोरकनाम
गन्धद्रव्ये पुं इति राजनिर्घण्टः

शंकितवर्णकः पुं चौरः । इति
त्रिकाण्डशेषः ॥
शंकुः पुं स्थाणुः खुंटा इ
ति भाषा ॥ मत्स्यविशेषः शौं
कोच इति भाषा ॥ शल्यास्त्रं ।
शेल इति भाषा इत्यमरभरतौ ॥
संख्याविशेषः । स तु ली
लावतीमते दशलक्षकोटिः
कीलः गोंज इति भाषा ॥
ईशः ॥ कलुषः इति मेदिनी
पत्रशिराजालं ॥ मेढ्रः ।
इति हेमचन्द्रः ॥ राक्षसः । इति
शब्दमाला ॥ नखीनामगन्धद्रव्यं
इति जटाधरः दीप सूर्य्य
योश्छाया परिमाणार्थे काष्ठा
दिनिर्म्मितः क्रमेण सूक्ष्माग्र द्वा
दशांगुल परिमितः कीलकः
यथा अर्कांगुला तु सूच्याग्रा
काष्ठी द्व्यंगुल मूलिका शंकु
संज्ञा भवेत्सैव तच्छायां परिक
ल्पयेत् ॥ मध्याह्नहीने यदि
युक्ते छायांकुले हरेत् । यद्
दृष्टं दिवादण्डे लब्धं दण्डा
दिकं भवेत् ॥ एकोन्नकाय
यातीतं पराच्छायये भाके सू
त्रैक राम वाणेभ दिशाक
ङ्गाः ॥ १।२।३।५।८।१० ॥

११।कर्मांतकर्मैः। आषाढ्या
दियुमासेषुच्छाया माध्याह्नि
कीमता अयनांशज मासान्ते
अतकर्मेणादितो बुधैः। स
वेधाक्षात्प्रदिने भागहारे ह्व
ह्रेतरे तथा॥ इति ज्योतिस्त
त्वे॥ तस्य नामांतरं नरः।
यथा अथकरणसूत्रं शंकुः
प्रदीपतल शंकुतलांतरघ्नश्छा
याभवेद्विनरदीपशिखौच्च्य भ
क्तः। उदाहरणं। शंकु प्रदीपांत
रभूस्त्रिहस्ता दीपोच्छितिः सा
र्द्धकरत्रया चेत् शंकोस्तथा
र्कांगुलसंमितस्य तस्य प्रभा
स्यात्कियती वदाशु। न्यासः शं
कुः १२ भूः ३ दीपः ७ लब्धानि
च्छायांगुलानि १२ इति लीलाव
त्यां छायाव्यवहारः॥ द्वादशां
गुलपरिमाणं यथा विलुप्त
मौत्सरीय अथास्यकाण्डे द्वाद
शांगुलिकः शंकुस्तद्युगेन शा
षः स्मृतः नखंतुर्के यतुः प्रो
क्तं कोष्ठेन यतुः सहस्रिकः॥इ
ति तिथ्यादितत्वे॥
शंकुकर्णः पुं गर्दभः। इति
त्रिकाण्डशेषः॥
शंकुचिः पुं शंकुमत्स्यः। इति
शब्दरत्नावली॥
शंकुतरुः पुं शालवृक्षः। इति
शब्दरत्नावली॥
शंकुवृक्षः पुं शालवृक्षः इति
रत्नमाला॥
शंकुरः त्रि त्रासदायी। इति
हेमचन्द्रः॥
शंकुला स्त्री उत्पलपत्रिका।
इति संक्षिप्तसारोणादिवृत्तिः॥
पूगकर्त्तनी जांती इति भाषा।
इति केचित्॥
शंकोचः पुं शंकुमत्स्यः इति
जटाधरः॥
शंकोचिः पुं मत्स्यविशेषः॥
शंकोच इति भाषा। यथा।
अथ शंकुः शंकचिः स्यात् शंको
चि शंकुचीत्यपि इति शब्दरत्ना
वली॥
शंखः पुं क्ली समुद्रोद्भवजन्तु
विशेषः। शांख इति भाषा।
तत्पर्यायः कंबुः २ इत्यमरः॥
कम्बोजः ३ अब्जः ४ जलजः
५ इति शब्दरत्नावली॥
अर्णोभवः ६ पावनध्वनिः ७
अन्तःकुटिलः ८ महानादः ९
श्वेतः १० पूतः ११ मुखरः १२॥
दीर्घनादः १३ बहुनादः १४ हरि

प्रियः १५। अस्य गुणाः कटु
रसत्वं शीतत्वं पुष्टिवीर्य्यब
लप्रदत्वं गुल्म शूल कफ
श्वास विषदोष नाशित्वञ्च इति
राजनिर्घण्टः॥ अपिच कंबु शं
खनखश्चापि शुक्तिशम्बूक
कर्कटाः जीवा एवंविधा श्चा
न्ये कोशस्थाः परिकीर्तिताः॥
कोशस्थामधुराः स्निग्धाः पित्त
वातहराहिमाः बृंहणा बहुवर्च्च
स्का वृष्याश्च बलवर्द्धनाः॥इति
भावप्रकाशः॥ अन्यच्च शंखोद
धिमलौ शीतौ कषायावनिले
खितौ। इति राजवल्लभः॥
अस्योत्पत्त्यादिर्यथा। अथ शं
भुर्हरेः शूलं जग्राह दानवे प्रति
ग्रीष्म मध्याह्न मार्त्तण्ड शत
करञ्च सुप्रभं शूलञ्च भ्रमणं कृ
त्वा पपात दानवोपरि चकार
भस्मसात्तच्च सद्यश्चावलील
या शिवेन शूलेन दानवस्य
स्थिजालकं क्षेप्त्रा च प्रेरयामास
लवणोदे च सादरं॥ अस्थिभिः
शंखचूडस्य शंखजाति र्बभूव ह
नाना प्रकाररूपा च शश्वत्पूता
सुरार्च्चने॥ प्रशस्तं शंखतोयञ्च
देवानां प्रीतिदं परं॥ तीर्थ
तोय स्वरूपञ्च पवित्रञ्च शम्भुना वि
ना॥ शंखशब्दो भवेद्यत्र तत्र ल
क्ष्मीश्च सुस्थिरा स स्नातः सर्व
तीर्थेषु यः स्नातः शंखवारिणा॥
शंखे हरे रधिष्ठानं यतः शंख
स्ततो हरिः तत्रैव सततं लक्ष्मी
र्दूरीभूत ममङ्गलं॥ स्त्रीणाञ्च शं
खध्वनिभिः शूद्राणाञ्च विशेषतः
भीता रुष्टा याति लक्ष्मीः स्थलम
न्यत् स्थलान्ततः॥ इति ब्रह्मवैव
र्त्ते प्रकृतिखण्डे १८ अध्यायः॥
अथ शंखमाहात्म्यं। ब्रह्मो
वाच॥ शृणु शंखस्य माहात्म्यं
सर्वपापहरं शुभं। कपिलाक्षीर
मादाय शंखे कृत्वा जनार्द्दनं॥
यज्ञायुत सहस्रस्य स्नापयित्वाल
भेत्फलं पयस्विन्याः शुभं क्षीरं
शंखे कृत्वा तु नारद॥ यः स्ना
पयति देवेशं स गच्छेद्ब्रह्मणः
पदं दिव्यं गंगोदकं शंखे यः
स्नापयति माधवं॥ नमो नारा
यणेत्युक्त्वा मुच्यते योनिशंक
टात्। शंखस्थितं यत्तोयं भ्रामि
तं केशवोपरि॥ निःक्षिपेन्मूर्द्धि
सततं गंगास्नानेन तत्फलं।
कृत्वा पादोदकं शंखे वैष्णवाय
प्रयच्छति॥ तिलमिश्रं जलं

स्याच चन्द्रायण फलं लभेत् ।
नदी तडागजं वारि वापी कूपह्र
दोद्भवं ॥ गांगेयं तद्भवेत्सर्वं कृ
ते शंखे हरिप्रिय गृहीत्वाविस्नु
पादांबु शंखे कृत्वा च वैस्नवः ।
योवहेत् शिरसा नित्यं समुने
तापसात्तमः त्रैलोक्य यानि ती
र्थानि वासुदेवाज्ञया मुने ॥
शंखे तान्यधितिष्ठंति तस्मात्
शंखं सदार्च्चयेत् । त्वं पुरा साग
रोत्पन्नो विस्नुना विधृतः करे
नमितः सर्वदेवैश्च पाञ्चज
न्यनमोस्तुते पुरतो वासुदेवस्य
सपुष्प फल चन्दनैः ॥ शंखः
समर्च्चितो येन तस्य लक्ष्मीने
दुर्लभा दर्शनेनापि शंखस्याभि
पुनस्यार्च्चनेन च ॥ विलयं या
ति पापानि हिमः सूर्योदयेय·
था गर्भा देवारि नारीणां वि
नश्यंति सहस्रधा ॥ तव नादेन
पाताले पाञ्चजन्य नमोस्तुते ॥
तीर्थोदकं हरे मूर्द्ध्नि भ्रामयेत्
शंख संस्थिते ॥ ददाति मुक्तिं
देवेशः क्षीरसागरजाप्रियः ॥
यमदूताश्च कुष्माण्ड पिशाचो
रगराक्षसाः दृष्ट्वा शंखोदकं मूर्द्ध्नि
भीताः यान्ति दिशो दश ॥ नित्ये
नैमित्तिके काम्ये स्नानार्च्चनवि
लेपने शंखे समर्च्चयतियःस्थे
तद्वीपे वसेद्दिवः ॥ इतिपद्मो
त्तरखण्डे १२९ अध्यायः ॥
अथ दक्षिणावर्त्तशंखमाहात्म्य
दक्षिणावर्त्तशंखेन गत्वा प्रा
क् स्रोतसं नदीं ॥ कृत्वाभि
षेकं विधिवत् ततः पापैः प्र
मुच्यते ॥ दक्षिणावर्त्तशंखेन
तिलमिश्रोदकेन तु । उदके
नाभिमात्रेतु यः कुर्य्यादभिषे
चनं ॥ प्राक् स्रोतस्यां तदैवेन
यो नर स्तत्राम्भसास्तुतः । या
वज्जीव कृते पापं तत्क्षणादे
व नश्यति ॥ दक्षिणावर्त्तशं
खेन पात्र शोध्यं यदि स्थितं । उ
दकं यः प्रतीच्छेत शिवमाह
ह्मानसः ॥ तस्य जन्मकृतं
पापं तत्क्षणादेव नश्यति न
शंखेन पिबेत्तोयं न हन्यात्क
स्य शूकरी ॥ इति वाराहे प्रबो
धनीमाहात्म्याध्यायः ॥
शंखः पुं ललाटास्थि ॥ कुबेर
स्य निधिविशेषः ॥ नखीनाम
गंधद्रव्य इत्यमर मेदिनीकरौ ॥
कर्णसमीपास्थि । इति राज
निर्घण्टः ॥ अष्टनागनायकान्त

र्गतनागविशेषः ॥ हस्तिदन्तम
ध्यं । इति त्रिकाण्डशेषः ॥
दशनिखर्वसंख्या । लक्षकोटि
रिति यावत् यथा । एकं दश
शतञ्चैव सहस्र मयुतंतथा ल
क्षञ्च नियुतं चैव कोटि रर्बुद
मेवच ॥ वृंदः खर्वो निखर्वश्च
शंख पद्मौ च सागरः । अन्त्य
मध्यं परार्द्धंच दशवृद्ध्या यथा
क्रमं ॥ इति भरतधृत ब्रह्माण्ड
पुराणवचनं ॥ धर्म्मशास्त्रप्र
योजकमुनिविशेषः । यथा ।
मन्वत्रि विस्नुहारीत याज्ञवल्क्यो
शनोंगिराः । यमापस्तम्ब सं
वर्त्ताः कात्यायन बृहस्पती ॥ प
राशर व्यास शंख लिखिता दक्ष
गोतमौ । शातातपो वशिष्ठ
श्च धर्म्मशास्त्र प्रयोजकाः इति
याज्ञवल्क्य वचनं ॥ रणवाद्य
विशेषः यथा । भकतूर्य्यं गा
न्धतूर्य्यं रणतूर्य्यं महास्वनः
संग्रामपटहः शंख स्तथा चाभ
यडिण्डिमः ॥ महाढक्को न्यथा
भीरु भीरुः कोलाहलोपि च ।
युद्धवाद्यस्य पर्य्याय श्चान्ये भे
दाः शल्लादयः ॥ इति शब्द
रत्नावली ॥
शंखकं क्ली वलयः इति मेदिनी
शंखकः पुं क्ली कंबुः ॥ शिरोरो
गे पुं । इति मेदिनी ॥ तस्य ल
क्षणादि यथा । शंखकमाह ।
पित्तरक्तानिलाद्दुष्टाः शंखदेशे वि
मूर्छिताः । तीव्ररुग्दाह रागाहि
शोथं कुर्वन्ति दारुणं ॥ स शि
रो विषवद्वेगान्निरुध्याशु गलं
तथा । त्रिरात्राज्जीवितं हन्ति
शंखको नामनामतः ॥ त्र्यहा
ज्जीवति भेषज्यं प्रत्याख्येयस्य ।
कारयेत् । पित्त रक्तानिलाः त्र
य कफापि योज्यं कृतानुतापः
कफपित्तरक्तैरिति सुश्रुतवचना
त् विमूर्छिताः प्रदुष्टाः ।
त्रिरात्रात् त्रिरात्रमध्ये मारयति
इति भावप्रकाशः ॥
तस्य चिकित्सा शिरोरोगशब्दे
द्रष्टव्या ॥ शंखकारः पुं वर्ण
शंकरजाति विशेषः ॥
शांखारि इति भाषा । स तु शू
द्रागर्भे विश्वकर्म्मणो रसजातः ॥
इति । ब्रह्मवैवर्त्तपुराणं ॥
तत्पर्य्यायः । शांखिकः १
काम्बजकः २ इति शब्दरत्ना
वली ॥ शाम्बविकः ३ ॥
इति जटाधरः ॥

शंखचरी स्त्री ललाटिका। इति
त्रिकाण्डशेषः ॥
शंखचर्च्ची स्त्री ललाटिका। इति
शब्दरत्नावली ॥
शंखचूर्णं क्ली शंखजातचूर्णं।
शंखेरचूर्ण इति भाषा। अस्य गु
णाः शंखचूर्णं कटु क्षार शुच्चे
क्रिमिहरं परं। इति राजवल्लभः
शंखजः पुं कपोतडिम्बव
दृहन्मुक्ता। इति केचित्
शंखजातवस्तुनि त्रि ॥
शंखद्रावी न पुं अम्लवेतसः
इति राजनिर्घण्टः ॥
शंखधारा स्त्री हिल्लमोचिका।
इति रत्नमाला ॥
शंखध्मः पुं शंखवादकः।
तत्पर्य्यायः। शांखिकः २
इति जटाधरः ॥
शंखध्माः पुं शंखवादकः।
इति मुग्धबोधव्याकरणं ॥
शंखनखः पुं क्षुद्रशंखः जो
ङ्गा इति भाषा। इत्यमर
भरतौ ॥ नखीनामगन्धद्र
व्ये इति शब्दरत्नावली ॥
वृहन्नखी। यथा महो त्वसो
शंखनखः शंखाख्यो गंधसार
णः। इति रत्नमाला ॥

शंखनखा स्त्री शंखनखी यथा
द्विधा शंखनखाख्यान्या क्षुद्रा
ख्या वदरीच्छदः इति रत्नमाला
शंखपुष्पी स्त्री वृक्षविशेषः ॥
शंखाहुली इति शनकुली इति
चभाषा तत्पर्य्यायः। सुपुष्पी
२ शंखाह्वा ३ कंबुमालिनी ४
पीतपुष्पी ५ कंबुपुष्पी ६ मेध्या
७ मलविनाशिनी ८ किरीटी ९
शंखकुसुमा १० भूलग्ना ११ शं
खमालिनी १२ अस्या गुणाः। हि
मत्वं। तिक्तत्वं। मेधा स्वरकारि
त्वं ग्रह भूतादिदोष नाशित्वं
वशीकरण सिद्धिदातृत्वञ्च इ
ति राजनिर्घण्टः ॥ अपिच। शंख
पुष्पी तु तीक्ष्णोष्णा मेध्या कृ
मिविषापहा इति राजवल्लभः ॥
अन्यच्च। शंखपुष्पी तु शंखाह्वा
मंगल्या कुसुमापि च शंखपुष्पी
सरा मेध्या वृष्या मानसरोगनुत्
रसायनी कषायोष्णा स्मृति।
कान्ति बलाग्निदा। दोषापस्मा
र भूतास्रकुष्ठकिमि विषप्रणु
त् ॥ इति भावप्रकाशः ॥
शंखप्रस्थः पुं चंद्रस्यचिह्नं यथा
लिंग शृंगाच्च चिह्नाच्च शंखप्रस्था
विधो रथ इति शब्दमाला ॥

शंखभृत् पुं विष्णुः इति हेम
चंद्रः ॥
शंखमुखः पुं कुम्भीरः इति
हेमचन्द्रः ॥
शंखमूलं क्ली मूलकं इति
राजनिर्घण्टः ॥
शंखाख्यः पुं वृहन्नखी इति
रत्नमाला ॥
शंखाह्वा स्त्री शंखपुष्पी इ
ति राजनिर्घण्टः ॥
शंखिका स्त्री तृणविशेषः।
चोरवकुली इति भाषा यथा।
शंखिन्यां शंखिकाचोरा इति
शब्दचंद्रिका ॥
शंखिनी स्त्री चोरपुष्पी इत्यम
रः ॥ श्वेतपुन्नागः ॥ इति वि
श्वः ॥ श्वेतवृन्दा इति मेदिनी
श्वेतचुक्रा। इति शब्दरत्नाव
ली ॥ बुद्धशक्तिभेदः। इति
त्रिकाण्डशेषः ॥ यवतिक्ता
इति राजनिर्घण्टः ॥ चतुर्विध
स्त्रीमध्ये स्त्रीविशेषः। तल्लक्ष
णं यथा दीर्घा सुदीर्घनयना व
रसुंदरीया कामोपभोगरसिका
गुणशीलयुक्ता रेखात्रयेणच
विभूषितकण्ठदेशा सम्भोगके
लिरसिका किल शंखिनीसा श

शाके पद्मिनी तुष्टा चित्रिनी।
रमते मृगे। वृषभे शंखिनी तु
ष्टा हस्तिनी रमते हये ॥ पद्मि
नी पद्मगन्धा च मीनगंधा च चि
त्रिनी। शंखिनी क्षारगंधा स्यात्
मदगन्धा च हस्तिनी ॥ इति रति
मंजरी ॥ शंखयुक्ता यथा शं
खिनी चापिनी बाण भुशुण्डी
परिघायुधा। इति देवीमाहात्म्य
उपदेवताविशेषः। शंखिनीवा
सशाह्यार्थदर्शनात् ॥
शंखिनीफलः पुं शिरीषवृक्षः।
इति राजनिर्घण्टः ॥
शंखिनीवासः पुं शाखोटवृक्षः
इति शब्दचन्द्रिका ॥
शंखी न पुं विष्णुः समुद्रः। इति
मेदिनी ॥ शांखिकः ॥ शंखविशि
ष्टे त्रि इति शब्दरत्नावली ॥
शाच इ उ. गत्यां इति कविकल्प
द्रुमः ॥ उ. शाच्चते इति दुर्गा
दासः ॥
शच उ. वाचि इति कविकल्पद्रुमः
उ. शचते इति दुर्गादासः ॥
शचिः स्त्री इंद्रपत्नी इत्यमरटी
कायां भरतः ॥
शची स्त्री इंद्रपत्नी तत्पर्य्यायः
पुलोमजा २ इंद्राणी ३ ॥

इत्यमरः । शचिः ४ सची ५ स
चिः ६ इति भरतः । पुतक्रतायी ७
पौलोमी ८ इति जटाधरः ॥
माहेन्द्री ९ जयवाहिनी १० ॥
ऐन्द्री ११ शतावरी १२ इति ।
शब्दरत्नावली ॥ शतमूली ॥ स्त्री
करणान्तरं तत्र विष्टिकरण मि
ति केचित् ॥ इति मेदिनी ॥
शचीपतिः पुं इंद्रः । इत्यमरः ॥
शट क ङ श्लाघे । इति कविकल्प
द्रुमः ॥ क ङ शाटयते । इति
दुर्गादासः ॥
शट सादे ॥ शीर्णे ॥ गतौ ॥
रुजि । इति कविकल्पद्रुमः ॥
सादोऽवसादः । शीर्णि र्भेदः ।
शटति लोकः अवसीदति । वि
शृणाति । गच्छति । रुजति वा
इत्यर्थः । इतिदुर्गादासः ॥
शटः त्रि अम्लः । शट्यातो वर्णु
प्रत्ययेननिष्पन्नः । इति सिद्धांत
कौमुदी ॥
शटा स्त्री सटा । जटा इत्यमरः ।
टीका ॥
शटिः स्त्री शटी इति शब्दरत्ना
वली ॥
शटी स्त्री स्वनामख्यातौषधिः ॥
वनआदा इति भाषा कचूर इति ।
हिन्दी भाषा । तत्पर्य्यायः ।
गन्धमूली २ षड्ग्रन्थिका ३
कर्चूरः ४ पलाशः ५ इत्यमरः
सटी ६ षटी ७ गंधशटी ८ क
र्चूरः ९ कच्चूरः १० इति भरताद
यः ॥ सुगन्धा ११ सटि १२ शटिः १३
गंधमूला १४ गंधेलि १५ गंध
मूलकः १६ इति शब्दरत्नावली
गन्धसटा १७ वधूः १८ गन्ध
मूले १९ इति जटाधरः ॥ जी
मूतमूलं १६ कच्छोरं १७ हिम
जा १८ इति रत्नमाला ॥ हैमी
१९ षड्ग्रन्थिः २० सुव्रता २१
गंधाली २२ पलाशा २३ हिमा
२४ इति ग्रन्थान्तरं ॥ षड्ग्रन्था
२५ अम्लनिशा २६ सुगंधमूला
२७ गन्धाली २८ शटीका २९
पलाशिका ३० सुभद्रा ३१ तृणी
३२ दूर्वा ३३ गन्धा ३४ पृथुप
लाशिका ३५ सौम्या ३६ हिमो
द्भवा ३७ गंधवधूः ३८ अस्याग
णाः । तिक्तत्वं अम्लरसत्वं । ल
घुत्वं । उष्णत्वं । रुचिकारित्वं ।
ज्वर कफास्र कण्डुव्रणदोष र
क्तामयध्वंसकारित्वं सुघत्वञ्च ।
इति राजनिर्घण्टः अपिच अथ गं
धपलाशी सुगंधस्यो कापूमीरे·

प्रसिद्धं शटी पलाशी षड्ग्रन्था ।
स्यात्सुव्रता गन्धमूलिका गन्धा
रिका गंधवधूर्वधूः पृथुपलाशि
का ॥ भवेत्पलाशीत् कषाया
ग्राहिनीलघुः तिक्ता तीक्ष्णाचक
टुकात्रस्रास्यमलनाशिनी शोष
कास व्रण श्वास शूलाध्मान
ग्रहापहा इति भावप्रकाशः ॥
शट्टकं क्ली घृतजलमिश्रित
शालिचूर्णं मयदारशटा इति
भाषा यथा शालिचूर्णं घृतं तो
यं मिश्रितं शट्टकं वदेत् इ
ति भावप्रकाशः ॥
शठ क ङ श्लाघे इति कवि
कल्पद्रुमः ॥ क ङ शाठयते इ
ति दुर्गादासः ॥
शठ वध क्लेश कैतवे इति
कविकल्पद्रुमः ॥ क्लेशा दुःखा
नुभवः कैतवं मिथ्यावचनं श
ठति खलः साधुं वञ्चयतीत्यर्थः
इति दुर्गादासः ॥
शठ क आलस्ये ॥ गत्यसंस्कृ
तसंस्कृते इति कविकल्पद्रुमः
क शाठयति दृढः क्रियासु चे
दः स्यादित्यर्थः इति दुर्गादासः
शठ त्क दुर्वाचि इति कविक
ल्पद्रुमः शाठयति नीचः कुत्सितं
वदतीत्यर्थः रमानाथस्तु सम्यग्भा
षणे इति मत्वा शठयति सम्यग्व
दतीत्यर्थ इत्याह सम्यग्भाषणे इ
ति जौमराः सम्यग्भावे इत्येके इ
ति दुर्गादासः ॥
शठं क्ली तगरं ॥ कुंकुमे ॥
लोहं । इति राजनिर्घण्टः ॥
शठः पुं मध्यस्थपुरुषः धूर्त्तः ॥
धुस्तूरः इति मेदिनी ॥ अस्य लक्ष
णं प्रियं वक्ति पुरोऽन्यत्रविप्रियं
कुरुते भृशं । व्यक्तापराधचेष्ट
श्च शठोयं कथितो बुधैः ॥
इति विष्णुपुराणे ॥ इ श्रेशे १८
अध्यायः २१ श्लोकटीका ॥
चतुर्विधपत्यंतर्गतपतिविशेषः
तस्य लक्षणं । कामिनीवि
षयकपटपटुः । यथा ।
मौलौदाम विधाय भाल फल
के आलिख्य पत्त्रावली केयूरे
भुज्योर्निधाय कुचयो र्विन्य
स्य मुक्तास्त्रजं विन्यासं समु
पार्ज्जयन् मृगदृशः काञ्चीनिवे
शच्छलान्नीवी ग्रन्थि मपाकरो
तिमृदुना हस्तेन वामभ्रुवः । इ
[illegible]तिरत्नमाला ॥
शठता स्त्री शठस्य भावः तत्
पर्य्यायः माया १ शाठ्यं २ कुं ।



हृतिः ४ निकृतिः ५ इति हेमचन्द्रः ॥ अन्यच्च ॥ अस्त्रियां कपटो व्याज उपधि र्दम्भ एव च कूटं कल्कं छलं छद्म मिष कैतवकेतवे ॥ अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च सा। हिंसाफले चतुष्कं स्यात् शाठ्य पर्य्याय ईरितः ॥ एवं कपट पर्य्यायः। फले वञ्चन मात्रके उभयोरेक-पर्य्याय इति केचित् प्रचक्षते इति शब्दरत्नावली ॥

शाठाम्ला स्त्री अम्बष्ठा। इति राजनिर्घण्टः ॥

शाड इ ऊ. सेच्च रुजोः इति कविकल्पद्रुमः ॥ तालव्यादिः इ शाण्ढते। ऊ. शाण्डते काण्डो वीरं रुजतीत्यर्थः इति दुर्गादासः ॥

शाण च दाने इति कविकल्पद्रुमः ॥ च शाणयति इति दुर्गादासः ॥

शाणी स्त्री क्षुपविशेषः। तत्पर्य्यायः भङ्गा २ मातुलानी ३ इति हेमचन्द्रः ॥

शाणः पुं स्वनामख्यातक्षुपः तत्पर्य्यायः मालापुष्पः २ वमनः ३ कटुतिक्तकः ४ निशावनः ५ दीर्घशाखः ६ त्वक्सारः ७ दीर्घपल्लवः ८। अस्य गुणाः अम्लत्वं कषायत्वं मलगर्भास्त्र पातनत्वं वातकारित्वं पित्तकफतीव्राङ्गमर्दनाशित्वञ्च। इति राजनिर्घण्टः ॥

शाणघण्टिका स्त्री शाणपुष्पी इति राजनिर्घण्टः ॥

शाणपर्णी स्त्री अश्मन्तपर्णी। इति शब्दरत्नावली ॥

शाणपुष्पिका स्त्री चण्डारवा। झनझनिया इति वनशोन इति च भाषा इत्यमरभरतौ ॥

शाणपुष्पी स्त्री क्षुपविशेषः। शाणफुली इति शाणइ इति वनशाणइ इति च भाषा तत्पर्य्यायः बृहत्पुष्पी २ शाणिका ३ शणघण्टिका ४ पीतपुष्पी ५ स्थूलफला ६ लोमशा ७ माल्यपुष्पिका ८ अस्या गुणाः कटुतिक्तत्वं। वमिकारित्वं। रसनियामकत्वञ्च इति राजनिर्घण्टः ॥

शाणसूत्रं क्ली पवित्रकं इत्यमरः ॥ हे शाणसूत्रजाले शाणस्य सूत्रं शाणस्त्रं शाणानि ददाति सूत्रं शणाः शण गल्महोऽष्यन्। शणाः तालव्यशादिर्मूर्द्धन्यतान्तः इति वहवः सनोतेर्नप्यादि दैन्त्यान्तः इति के

चित् तन्मते षन दत्तु दाने इत्यस्य रूपं। शणो दन्त्यसादिर्मूर्द्धन्यनान्त इत्यपरे शाणाकिरणमणि काकणा कोण काणा इति मूर्द्धन्यनान्ते विद्याभरणं काशी मुपवीतं स्यादिप्रस्यार्द्धवृतं त्रिवृत्। सनसूत्रमयं राज्ञो वैश्यस्याविकसौत्रिकमिति मनुवचनात् पवित्रक मपि तदुच्यते ॥ आनाय इत्यादि चतुष्कं जाले इत्येके। आनाय इत्यादि श्लोकार्द्ध क्वचिद्दृश्यते तत् स्वाम्याद्युपेक्षित मपि ग्रन्थे दृष्ट मिति विवृते इति तट्टीकायां भरतः ॥

शाणालुकः पुं आरेवतवृक्षः शोणालु इति भाषा इति शब्दरत्नावली ॥

शाणिका स्त्री शाणपुष्पी इति राजनिर्घण्टः ॥

शाणीरं क्ली शोणामध्यस्थपुलिनं॥ दर्दरीतटं इति मेदिनी ॥

शाण्डं क्ली पद्मादिसमूहः। इति शब्दरत्नावली ॥

शाण्डः पुं नपुंसकं॥ गोपतिः इति भरतद्विरूपकोषः ॥

शाण्डता स्त्री षाण्डत्वं षाण्डशक्षात् भावे त प्रत्ययस्यानन्तरं आप् प्रत्ययेन निष्पन्ना ॥

शाण्डिलः पुं मुनिविशेषः शाण्डशब्दो घोषणादिक इलच् प्रत्ययेन निष्पन्नः इति सिद्धान्तकौमुदी ॥

शाण्ढः पुं अन्तर्महलिकः अभ्यन्तरस्त्रीरक्षकार्य्ये खोजा इति भाषा। तत्पर्य्यायः वर्षवरः २ तल्लिणं यथा ये त्वल्पसत्त्वाः प्रथमाः क्लीबाश्च स्त्रीस्वभाविनः जात्या न दुष्टाः कार्य्येषु ते वै वर्षवराः स्मृताः ॥ इति ॥ नपुंसकं हिजड़े इति भाषा। इत्यमरभरतौ ॥ गोपतिः ॥ साँड इति भाषा इति मेदिनी ॥ वन्ध्यावृषभः इति जटाधरः ॥ उन्मत्तः इति धनञ्जयः ॥

शतं क्ली दशगुणितदशसंख्या। एकशौ इति हिंदी भाषा तत्पर्य्यायः दशतिः २ इति पुराणं ॥ तद्वाचकानि धार्त्तराष्ट्रः १ शतभिषातारा २ पुरुषायुषः ३ रावणांगुलिः ४ पद्मदलं ५ इन्द्रयज्ञः ६ अब्धियोजनं ७ । इति कविकल्पलता ॥

शतकः त्रि शतसंख्याविशिष्टः ॥

यथा शांतिशतकामरुशतकादिः शतशब्दात् क प्रत्ययेन निष्पन्नः ॥ स्वार्थे के शतकञ्च ॥

शतकीर्त्तिः पुं भाव्यर्हद्विशेषः इति हेमचंद्रः ॥

शतकुंदः पुं करवीरः । इति राजनिर्घण्टः ॥

शतकुम्भः पुं पर्वतविशेषः इति शतकुम्भशब्द टीकायां भरतः ॥

शतकोटिः पुं वज्रं इत्यमरः ॥ वृन्दसंख्या ॥ लीलावतीमते अब्जसंख्या ॥

शतक्रतुः पुं इंद्रः इति धनञ्जयकोषः ॥

शतखण्डं क्ली स्वर्णं यथा मेरौ मेरुके महाधातुः शतखंडं मद्गुलकं । इति शब्दचंद्रिका शतभागश्च ॥

शतग्रन्थिः स्त्री दूर्वा इति राजनिर्घण्टः ॥

शतघ्नी स्त्री शस्त्रभेदः वृश्चिकाली करञ्जकः इति मेदिनी ॥ शस्त्रस्य लक्षणं अयःकण्टकः संच्छन्ना शतघ्नी महतीशिला इति विजयरक्षितः दुर्गेच्च परिक्षेपेते चषाहालकसंयुते शतघ्नी यंत्रगुल्मैश्च शतघ्नीश्च समाहृते ॥ गोपुरं सकपाटञ्च तत्र स्यात् सुमनोहरं सपताके गजारूढो येन राज्ञा विशेत् पुरं ॥ इति मात्स्ये राजधर्मे दुर्गसम्पत्तिर्नाम १९९ अध्यायः ॥ गलरोगविशेषः अस्य निदानलक्षण चिकित्साः रोहिणीशब्दे द्रष्टव्याः ॥

शतच्छदः पुं काष्ठकूटपक्षी । काट्ठोकरा इति भाषा इति त्रिकाण्डशेषः शतदलपद्मञ्च ॥

शततमः त्रि शतस्य पूरणः शतशब्दात्तमट् प्रत्ययेन निष्पन्नः ॥ शततारा स्त्री शतभिषानक्षत्रं इति केचित् ॥

शतदंतिका स्त्री नागदंती इति राजनिर्घण्टः ॥

शतद्रुः स्त्री नदीविशेषः शतलज इति हिन्दी भाषा सा हि मालयाद्रुत पत्रा विपाशाया मिलिता तत्पर्य्यायः शितद्रुः २ इत्यमरः शुतुद्रिः ३ शतद्रुः ४ पुत्रशोकसन्तप्तो वशिष्ठः कण्ठे शिला बद्धा नद्यां मस्यां प्रविष्टस्तेन भीत्या इयं शतधा द्रुता ॥ इति

शतद्रुः इति तट्टीकायां भरतः अस्या जलगुणाः शतद्रोर्विपाशायुजः सिंधुनद्याः सुशीतं । लघु स्वादु सर्व्वामयघ्नं ॥ जलं निर्म्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्च ॥ इति राजनिर्घण्टः ॥

शतधा स्त्री दूर्वा । इति शब्दचंद्रिका ॥

शतधा व्य शतप्रकारं यथा आस्तीक वचनं श्रुत्वा यः सर्पो न निवर्त्तते शतधा भिद्यते मूर्द्धा शिरीषस्य फलं यथा इति महाभारतं ॥

शतधामा पुं विष्णुः इति जटाधरः ॥

शतधारं क्ली वज्रं इति त्रिकाण्डशेषः ॥ शतधारायुक्ते त्रि यथा वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं वसोः पवित्रेण शतधारेण सुत्वा काममधुक्ष इति । पशुपतिपद्धतिः ॥

शतधृतिः पुं इंद्रः ब्रह्मा इति मेदिनी ॥ स्वर्गः इति विश्वः ॥

शतपत्रं क्ली पद्मं इत्यमरः ॥

शतपत्रः पुं मयूरः ॥ सारसः ॥ दार्व्वाघाटपक्षी इति मेदिनी । राजकीरः नरी इति भाषा ॥ इति हेमचंद्र राजनिर्घण्टौ ॥

शतपत्रकः पुं दार्व्वाघाटपक्षी काठोकरा इति भाषा इत्यमरः

शतपत्रनिवासः पुं ब्रह्मा । इति कविकल्पलता ॥ पद्मस्थे त्रि ।

शतपत्री स्त्री पुष्पविशेषः सेउती इति भाषा पाटलवर्णासौ गोलाव । इति वदन्ति तत्पर्य्यायः ॥ सुमनाः २ सुशीता ३ ॥ शिवल्लभा ४ सौम्यगन्धी ५ शतदला ६ सहला ७ शतपत्रिका ८ अस्या गुणाः हिमत्वं तिक्तत्वं कषायत्वं कुष्ठ मुखस्फोट पित्त दाह नाशित्वं रुचत्वं । सुरभित्वञ्च इति राजनिर्घण्टः ॥

शतपत्रिका स्त्री शतपत्री इति राजनिर्घण्टः ॥

शतपथिकः त्रि नानापथगामी नानामतावलम्बी यथा शतपथेः शिकन्पथः इत्यनेन शतशब्दात्पथिन् शब्दात् षिकन् प्रत्ययेन निष्पन्नः । इति सिद्धांतकौमुदी ॥



शतपदचक्रं क्ली नाम्ना नक्षत्र
ज्ञानार्थं चक्रं यथा चक्रं श
तपदं वक्ष्ये सूक्ष्मं शास्त्र स
म्भवं नामादिवर्णतो ज्ञेया
सूक्ष्मराशिः शका स्तथा तिथ्य श्
श्रेणगता रेखा रुद्रसंख्या लिखे
द्बुधः जायते कोष्ठकानाञ्च
शतैकं १०० नात्र संशयः॥ अ
व क ह डा इत्याद्या म ट प
र ता हरिति चाग्नेयां न य भ जे
खा नैर्ऋत्यां ग स द च ला वाय
व्यां पंच पञ्च क्रमेणैव विंश
वर्णान् प्रयोजयेत् पञ्चस्वर।
समायोगे एकैकं पञ्चधा क्रम
श्चवर्णाद्या स्वरा ज्ञेयाः स
न्धाक्षरयुता स्तथा गजातीये
का साम्याय पंचस्वर विनिर्णयः
ऋदृलृतो रफकारेण शेन स
स्यपरिग्रहः। कर्य्यात् ऊ घ धु
ङ स्थाने श्रीति श्रीएपत्तराणि च
ऊ च ऊ छा भवेत् स्तम्भे रौद्रे
त्वीशान गोचरे थ त्र ण ठा क्ष
वेत् स्तम्भे हस्ते चाग्नेय संज्ञके
शु ष फ ढा भवेत् स्तम्भए
वीयाढ्ठे च नैर्ऋते ङ थ क्ष
ढा भवेत् स्तम्भवायव्ये आर्द्र
उत्तरे॥ एवं स्तम्भस्वरस्थाञ्च ज्ञा

तव्यं स्वरवेदिभिः धिष्ण्यानि कृ
त्तिकादीनि प्रत्येकं चतुरक्षरैः॥
साभिजिन्मेषशाका स्तत्र शतैकं
द्वादशाधिकं यद्दृश्यते शाकं।
कोष्ठस्थः क्रूरः सौम्योपि वा
ग्रहः॥ तत्रैव वेधयेत् सम्य
क् पुंसो नामादिमाक्षरं सौ
म्ये विद्धं शुभं ज्ञेय मशुभं।
पाप खेचरे॥ मिश्रे मिश्रफ
लं तत्र निर्दिशेत शुभाशुभं।
यद्वाच्यं सर्वतोभद्रे ग्रहोपग्र
हे वेधतः शुभाशुभ फलं।
सर्वं तदिहापि विचिन्तयेत्।
पंचस्वरा अ इ उ ए ओ कारा
स्तेष्वंगो धिष्ण्यानि नक्षत्राणि
अत्र चतुर्भि वर्णे रेकनक्षत्रे
यथा अ इ उ ए इ ओ व वि
वु ४ वे वो क कि ५ कु घ ङ
छ ६ के को ह हि ७ हु हे
हो ड ८ डि डु डे डो ९ म मि
मु मे १० मो ट टि टु ११ टे
टो प पि १२ पु ष ण ठ १३
पे पो र रि १४ रु रे रो त १५
ति तु ते तो १६ ना नि नु
ने १७ नो य यि यु १८॥
ये यो भ भि १९ भु ध फ
ढ २० भे भा ज जि २१ जु जे

जो ख ११ खि खु खे खो २२
ग गि गु गे २३ गो श शि शु
२४ शे शो द दि २५ दु थ झ
ञ २६ दे दो च चि २७ चु चे
चो ल ८ लि लु ले ला २
ऋ लृ एतौ अकारयुक्तेनक्षत्रे
यः ह्रस्वेन दीर्घो ज्ञेयः।
तालव्यशकारेण दन्त्यसकारो
ज्ञेयः इति शतपदचक्रं॥
इति ज्योतिस्तत्वे॥

शतपदी स्त्री बहुपदयुक्तकी
टविशेषः। काणविछा इति
काणकोटारी इति च भाषा तत्
पर्य्यायः कर्णजलौका २ शत
मरः कर्णकीटी ३ भीरुः ४
शतपादिका ५ कर्णजलुका
६ इति शब्दरत्नावली शतपात्
७ शतपादी ८ इति जटाधरः॥
शतावरी इति राजनिर्घण्टः॥

शतपत्रं क्ली श्वेतकमले यथा
शतपत्रं महापद्मं पुण्डरीकं।
सिताम्बुजं इति रत्नमाला॥

शतपर्वा पुं वंशः इत्यमरः॥
इक्षुभेदः यथा शतपर्वा भवेत्
किञ्चित् कोषकार गुणान्वितः
विशेषात् किञ्चिदुष्णश्च शताह्वः
पवनापहः इति भावप्रकाशः॥

शतपर्वा स्त्री दूर्वा॥ वचा॥ भा
र्गवपत्नी इति मेदिनी॥ को
जागरपूर्णिमा इति शब्दरत्नाव
ली कटुका इति राजनिर्घण्टः

शतपर्विका स्त्री दूर्वा॥ व
चा। इति मेदिनी॥ यवः
इति शब्दरत्नावली॥

शतपर्वेशः पुं शुक्रग्रहः इ
ति त्रिकाण्डशेषः॥

शतपात् स्त्रीकर्णजलौकाः इ
ति शतपाद् जटाधरः॥

शतपादिका स्त्री काकोली इ
ति जटाधरः कर्णजलौकाः इ
ति शब्दरत्नावली॥

शतपुष्पं पुं भारविः स तु
किरातार्जुनीयग्रन्थकर्त्ता इति त्रि
काण्डशेषः॥

शतपुष्पा स्त्री शाकविशे
षः शलुफा इति ख्याता।
इति भरतः तत्पर्य्यायः॥
सितच्छत्रा २
अतिच्छत्रा ३ मधुरा ४ मिसिः ५
अवाकपुष्पी ६ कारवी ७ शत
मरः शताह्वा ८ शतपुष्पिका ९
मधुरिका १० शताका ११ छत्रा
१२ शिशिः १३ मिश्री १४ इति
शब्दरत्नावली माधवी १५ घो

षा १६ इति जटाधरः अस्या गु
णाः मधुरत्वं वात पित्त हरत्वं
गुरुत्वञ्च इति राजवल्लभः ॥
क्षुपविशेषः मौरी इति भाषा
तत्पर्य्यायः शताह्वा २ मिसिः
३ घोषा ४ पोतिका ५ ॥
अहिच्छत्रा ६ अवाक्पुष्पी ७ मा
धवी ८ कारवी ९ शिफा १० सं
शातपत्रिका ११ छत्रा १२ वज्रपु
ष्पा १३ सुपुष्पिका १४ शतप्र
सूना १५ बहुला १६ पुष्पाह्वा
१७ शतपत्रिका १८ वनपुष्पा १९
भूरिपुष्पा २० सुगन्धा २१ सूक्ष्म
पत्रिका २२ मधुरिका २३ अति
छत्रा २४ अस्या गुणाः कटुत्वं
तिक्तत्वं स्निग्धत्वं श्लेष्माति·
सार ज्वरः नेत्रव्रण नाशित्वं ।
वस्तिकर्म्माणि प्रशस्तत्वंच ॥
तद्दलगुणाः उष्णत्वं मधुरत्वं
गुल्म शूल वात नाशित्वं दीप
नत्वं पथ्यत्वं पित्तहारित्वं रुचि
दायकत्वञ्च इति राजनिर्घण्टः
अपिच शताह्वानि लदाहाम
शूल त्वङ्छर्दिनाशिनी । इ
ति द्रव्यगुणः अन्यच्च शतपु
ष्पा कटुः स्निग्धा तिक्तोष्णाक
फ वातकृत् रुच्या वस्तिहिता
नेत्र्या वह्निविट् कृमि शुक्रहृत्
संग्राही शीतला तिक्ता दाहनुत्
वातलालघुः इति भावप्रकाशः
अन्यन्मधुरिकाशब्दे द्रष्टव्यं ॥
शतपुष्पिका स्त्री शतपुष्पा ।
इति शब्दरत्नावली ॥
शतप्रसूना स्त्री शतपुष्पा ॥
इति राजनिर्घण्टः ॥
शतप्रासः पुं करवीरवृक्षः ॥
इत्यमरः ॥
शतभिषक् स्त्री शतभिषानक्ष
त्रे । इति शब्दरत्नावली ॥
शतभिषा स्त्री अश्विन्यादिसप्त
विंशतिनक्षत्रान्तर्गतचतुर्विंश
नक्षत्रं । तत्पर्य्यायः शतभिष
क् २ इति शब्दरत्नावली ॥
अस्या आकृतिः मण्डलाकार श
ततारामयी यथा मण्डलाभ श
ततारकाकुले मघाभाजि नभसः
प्रचेतसि वारुणेल धरणीमि·
ताः कलाः शशदेडशीति नाव
दे ययुः ॥ दं २१ पं ५५ ॥ इति का
लिदासकृत रात्रिलग्नमाननिरूप
णं ॥ अस्या अधिष्ठातृदेवता ।
वरुणः यथा अश्वि यमदहन
कमलज शशि शूलभृददिति
जीव फणि पितरः । योन्य ।

र्य्यम दिनकृत्त्वष्टृ पवन शक्राग्नि
मित्राः । शक्रो निर्ऋति तो
यं विश्व विरिञ्ची हरि वसु
वरुणाः अजपादो ऽहिर्बुध्नः पू
षाचेतीश्वरा भानां ॥ सा तु अ
धोमुखी यथा अश्लेष वह्नि
यमपित्र्य विशाखवरुणे पर्वा
ग्न्येशतभिषा च नवाम्बुद्वनि
पतानयोमुखगणानि शिवा
नि नित्ये विद्यार्थी भूमिखननेषु
च तुषितानि ॥ इति ज्योतिस्त
त्त्वं ॥ तत्रजात फलं शीत
भीति र्रतिसाहसी सदा विद्
रो हि चतुरो नरो भवेत् ।
वैरिणा मतिशयेन दारुणो वा
रुणोदुवदि यस्य सम्भवे इति
कोष्ठीप्रदीपः ॥ तत्र जात
स्य मिश्रगुणाः यथा शतान
लादिम विशाखमेव शक्राद्र
वा मिश्रगुणाः प्रदिष्टाः शिवा
जाहल्यादिभवा जघन्याः शेषो
द्भवाः समरूपा भवन्ति ॥
रविवारेषे शतभिषादियोगे
ज्वरोत्पत्ति फलं यथा शिव
शतभिषग्वातो याम्य सर्प त्रि
मूलाः शनि रवि कुज वारे भ
त षष्ठी नवम्यां द्रह हि मरण
योगे यो हि रोगोपयुक्तः प
शुपतिसमदेहः सोपिमृत्युप्रया
ति उत्तरेर्विंशति र्ज्ञेया दो मा
सौ श्रवणे तथा धनिष्ठायाम
र्द्धमासं वारुणेन दशाहकं ॥
इति ज्योतिःसारधृतकौशिक
वचनं ॥
शतभीरुः स्त्री मल्लिका इत्यम
रः ॥ शते बहवो विद्यामिनो ।
भीरवो ऽस्या इति शतभीरुः ॥
शीतभीरुः इति च पाठः त
दा ग्रैष्मिकत्वेन शीतद्विभेतीः
ति शीतभीरुः इति भरतः ।
शतमखः पुं इन्द्रः इति ह
लायुधः ॥
शतमन्युः पुं इन्द्रः इत्यमरः ॥
शतमानः पुं क्ली रूप्यपलं ॥
आण्ढकः इत्यमरभरतौ ॥
शतमार्जः पुं अस्त्रकारकः ।
इति केचित् ॥
शतमूला स्त्री दूर्वा वचा इति
राजनिर्घण्टः ॥
शतमूलिका स्त्री दन्ती इति
राजनिर्घण्टः ॥
शतमूली स्त्री स्वनामख्यातौष
धिविशेषः तत्पर्य्यायः वहुसु
ता २ अभीरुः ३ इन्दीवरी ४ ॥

वरी ५ ऋष्यप्रोक्ता ६ भीरुपत्री ७ नारायणी ८ शतावरी ९ अहेरुः १० इत्यमरः इंगिणी ११ शाढी १२ हीपिशत्रुः १३ इति जटाधरः ॥ ऋष्यगाता १४ इति शब्दरत्नावली शतपदी १४ ॥ पीवरी १५ धीवरी १६ वृष्या १७ दिव्या १८ दीपिका १९ दरकण्टिका २० सूक्ष्मपत्रा २१ सुपत्रा २२ बहुमूला २३ शताह्वया २४ स्वादुरसा २५ शताह्वा २६ लघुपर्णिका २७ आत्मगुप्ता २८ जेदा २९ मूला ३० शतवीर्य्या ३१ महौषधी ३२ मधुरा ३३ शतमूला ३४ कौशिका ३५ शतपत्रिका ३६ विश्वस्था ३७ वेसवी ३८ पार्श्वी ३९ वासुदेवप्रियंकरी ४० दुर्मना ४१ तैलवेल्ली ४२ अस्या गुणाः वृष्यत्वं मधुरत्वं हिमत्वं मेह कफ वात पित्त नाशित्वं तिक्तत्वं श्रेष्ठत्वं रसायनत्वञ्च इति राजनिर्घण्टः ॥ अपि च शतावरी बहुसुताभीरु रिंदीवरी वरी नारायणी शतपदी शतवीर्य्या च पीवरी । महाशतावरी त्वन्या शतमूलार्द्ध कण्टिका सहस्रवीर्य्या हेतुस्रू ऋष्यप्रोक्ता महोदरी ॥ शतावरी गुरुः शीता तिक्ता स्वाद्वी रसायनी मेधाग्नि पुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित् । शुक्र स्तन्यकरी बल्या वातपित्तास्र शोथजित् इति भावप्रकाशः ॥ अन्यच्च शतावरी वातपित्त मेह कुष्ठहरा स्मरा इतिराजवल्लभः ॥

शतयष्टिकः पुं शतलतिकाहारः तत्पर्य्यायः देवच्छन्दः २ इत्यमरः ॥

शतरुद्रीयं त्रि शतं रुद्रा देवता अस्य इति सिद्धांतकौमुदी ॥

शतरूपा स्त्री ब्रह्मणः कन्या पत्नी च यथा पवलत्वात्मकं कृत्वा जगद्देया स्वजीजनत् सावित्रीं लोक सिद्धार्थं हृदि कृत्वा समास्थितः ॥ ततसंजपतस्तस्य भित्वा देह सकल्मषं । स्त्री रूप मर्द्ध मकरोदर्द्ध पुरुष रूपवत् ॥ शतरूपा च सा ख्याता सावित्री च निगद्यते सरस्वत्यथ गायत्री ब्रह्माणी च परंतप दृष्ट्वा तां व्यथितस्तावत् कामबाणार्दितो विभुः उपयेमे स विश्वात्मा शतरूपा मनिंदितां ॥

ततः कालेनमहता ततःपुत्रो ३ भवन्मनुः स्वायम्भुव इति । ख्यातः स विराडिति नः श्रुतं इति मात्स्ये ३ अध्यायः ॥

शतलुम्पः पुं भारविः इति शतलुम्पकः त्रिकाण्डशेषः भूरिप्रयोगो ॥

शतवीर्य्या स्त्री सितदूर्वा इत्यमरः शतावरी कपिलद्राक्षा इति राजनिर्घण्टः ॥

शतवेधी पुं अम्लवेतसः इत्यमरः ॥

शतसहस्रं क्ली शतगुणित सहस्रं लक्षमिति यावत् यथा हारीतः माणि वासो गवादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत् यंच मध्यमे दशोत्तमे द्वादशरात्रं पयोव्रतं शतसहस्र मसत्प्रतिग्रहेष्विति इति शुद्धितत्त्वं ॥

शतह्रदा स्त्री विद्युत् इत्यमरः । वज्रं इति मेदिनी ॥ दक्षकन्याविशेषः यथा ददौ च बाहुपुत्राय द्वे तद्दिस्रु शतह्रदा तयोः पुत्राश्च विहोस श्री तत्त्वो विद्युतः शुभाः । इति वह्निपुराणे सर्गानुकीर्त्तनेस्ती देहत्यागो नामाध्यायः ॥

शतांगः पुं रथः इत्यमरः ॥ तिनिसवृक्षः इतिराजनिर्घण्टः

शतानकं क्ली श्मशाने इति त्रिकाण्डशेषः ॥

शतानंदः पुं मुनिभेदः स तु जनकराजपुरोहितः देवकीनन्दनः इति मेदिनी ब्रह्मा ॥ गौतममुनिः इति हेमचन्द्रः विष्णुरथः । इति त्रिकाण्डशेषः

शतानीकः पुं वृद्धः ॥ मुनिभेदः सतुव्यासशिष्यः ॥ राजभेदः स च चतुर्थयुगे चंद्रवंशीयद्वितीयराजः तस्य पिता जनमेजयः पुत्रं सहस्रानीकः इति मेदिनी सुदासराजपुत्रः इति श्रीभागवते ९ स्कन्धे २२ अध्यायः ॥

शतारं क्ली वज्रं इति त्रिकाण्डशेषः ॥

शतारुः क्ली कुष्ठभेदः इति शतारुषी स्त्री शब्दरत्नावली। तस्य रूपमाह रक्तं श्यावं सदाहार्त्ति शतारुः स्याद्बहुव्रणं । इति भावप्रकाशः ॥

शतावरी स्त्री शतमूली इत्यमरः इंद्रभार्या इति शब्द।

रत्नावली शाटी इति मेदिनी
शातावर्त्तः पुं विसुः इति हेम
चन्द्रः ॥
शातावर्त्ती पुं विसुः इति त्रि
काण्डशेषः ॥
शाताक्षा स्त्री शातपुष्पा । इति
जटाधरः ॥ शातावरी । इतिरा
जनिर्घण्टः ॥
शाताक्षी स्त्री रात्रिः ॥ शातपुष्पा
इति शब्दरत्नावली ॥ पार्व्वती
यथा भूयश्च शातवार्षिक्या म
नावृष्ट्या मनम्भसि । मुनिभिः
संस्तुता भूमौ सम्भविष्याम्ययो
निजा ॥ ततः शातेन नेत्राणां नि
रीक्षिष्यामि यन्मुनीन् कीर्त्तयि
ष्यन्ति मनुजाः शाताक्षी मिति
मां ततः ॥ इति मार्कण्डेयपुरा
णे देवीमाहात्म्ये देव्या स्तुति
र्न्नामैकादशोऽध्यायः ॥
शातिकः त्रि शातेन क्रीतः ॥ शा
तस्य विकारः ॥ शातसम्बन्धी इ
ति सिद्धान्तकौमुदी ॥
शातेयः पुं शत्रुः ॥ हिंसा इत्य
मरादिकोषः ॥
शात्यः त्रि शातस्य विकारः शा
तेन क्रीतः ॥ धनपतिसंयोगः
शातमस्मिन् वृद्धिः आयः लाभः
शुल्कः उपदा वा दीयते इत्यर्थे
शात्यः शातिकः । शात्यं शातिके
दक्षिणादिसम्बन्धे शातस्य नि
मित्तमित्यर्थः । इति सिद्धान्त
कौमुदी ॥
शात्रिः पुं हस्ती इति सिद्धा
न्तकौमुद्या मुणादिवृत्तिः ॥
शात्रुः पुं स्वदेशादनन्तरो ऽन्य
देशीतैकविषयाभिनिवेशिराजः
यथा विषयानन्तरो राजा शत्रु
मित्र मतः परमिति ॥ शातकः
निपातकारीत्यर्थः । तत्पर्य्यायः
रिपुः २ वैरिः ३ सपत्नः ४
अरिः ५ द्विषः ६ द्वेषणः ७
दुर्हृद् ८ द्विट् ९ विपक्षः १०
अहितः ११ अमित्रः १२ दस्युः १३
शात्रवः १४ अभिघाती १५ परः
१६ अरातिः १७ प्रत्यर्थी १८ प
रिपन्थी १९ इति चामरः ॥
द्रुषः २० प्रतिपक्षः २१ इति ज
टाधरः ॥ द्विषन् २२ घातकः
२३ द्वेषी २४ विद्विट् २५ हिंस
कः २६ विद्विट् २७ अभियः २८
अभिघातिः २९ अहितः ३० दो
र्हृदः ३१ इति शब्दरत्नावली
तस्य जयोपायो यथा ॥ म
त्स्य उवाच । सर्व्वेषा मप्युपा

यानां दानं श्रेष्ठतमं मतं ॥ सुदत्तेने
ह भवति दानेनोभयलोकजि
त् । न सोऽस्ति राजन् दानेन
वशयोग्यो न जायते दानेन व
शगा देवा भवन्तीह सदा नृणां
दान मेवोपजीवन्ति प्रजाः सर्व्वा
नृपोत्तम प्रियोहि दानवान्
लोके सर्व्वस्यैवोपजायते ॥
दानवानचिरेणैव तथा राजा
परान् जयेत् । दानवानेव
शक्नोति संहतान् भेदितुं प
रान् ॥ यद्यप्यलुब्धा गम्भीराः
पुरुषाः सागरोपमाः । न गृह्ण
न्ति तथाप्येते जायन्ते पक्षपाति
नः ॥ अन्यत्रापि कृतं दानं करो
त्यन्य तथा वशे उपायेभ्यः प्र
शंसन्ति दानं श्रेष्ठतमं जनाः ॥
दानं श्रेयस्करं श्रेष्ठं दानं श्रे
ष्ठकरं परं । दानवानेव लोके
षु पुत्रत्वे प्रियते सदा ॥
न केवलं दानपरा जयन्ति भू
र्लोक मेकं पुरुषाः सुवीराः ।
जयन्ति ते राजसुरेन्द्रलोकं सु
दुर्जयं यद्विबुधाधिवासं ॥ इति
मात्स्ये १४८ अध्यायः ॥ मत्स्य
उवाच । न शक्या ये वशीकर्त्तुमु
पायत्रितयेन तु । दण्डेन तान्
वशान् कुर्य्यात् दण्डो हि वशक
रः नृणां । सम्यक् प्रणयनं तस्य त
था कार्य्यं महीक्षिता धर्म्मशास्त्रा
नुसारेण सुसहायेन धीमता त
स्य सम्यक् प्रणयनं तथा कार्य्यं म
हीक्षिता वानप्रस्थांश्च धर्म्मज्ञान्
निर्म्ममान्निष्परिग्रहान् ॥ स्वदे
शे परदेशे च धर्म्मशास्त्रविशार
दान् । समीक्ष्य प्रणयेद्दण्डं सर्व्वं
दण्डे प्रतिष्ठितं ॥ आश्रमी यदि
वा वर्णी पूज्यो वाथ गुरुर्महान्
नादण्ड्यो नाम राज्ञो ऽस्ति यः स्व
धर्म्मे न तिष्ठति ॥ अदण्ड्यान् द
ण्डयेद्राजा दण्ड्यांश्चैवाप्यदण्ड
यन् । इह राज्यपरिभ्रष्टो नरकं प्र
तिपद्यते ॥ तस्माद्राजा विनीते
न धर्म्मशास्त्रानुसारतः । दण्डप्र
णयनं कार्य्यं लोकानुग्रह का
म्यया ॥ यत्र श्यामो लोहिता
क्षो दण्डश्चरति पापहा । प्रजा
स्तत्र न मुह्यन्ति नेता चेत् साधु
पश्यति ॥ बालवृद्धातुर यति द्वि
ज स्त्री विधवा यतः सर्व्वे बलिष्ठा
भक्षेरन् यदि दण्डं न पातयेत् ॥
देवदैत्योरगगणाः सिद्धभूतपत
त्रिणः । उत्क्रमेयुः स्वमर्य्यादां य
दि दण्डं न पातयेत् ॥ एष

ब्रह्माभिशापेषु सर्वप्रहरणेषु च
सर्वविक्रमकोपेषु व्यवसायेच तिष्ठति ॥ पूज्यन्ते दण्डिनो देवाः
पूज्यन्ते त्वदण्डिनः न ब्रह्माणं
विधातारं न पूषार्य्यमणावपि ॥ य
जन्ते मानवाः केचित् प्रशान्ताः
सर्वकर्म्मसु । रुद्रमग्निञ्च शक्र
ञ्च सूर्य्याचन्द्रमसौ तथा विष्णुं दे
वगणांश्चान्यान् दण्डिनः पूजय
न्ति च दण्डः शास्ति प्रजाः सर्व्वा
दण्ड एवाभिरक्षति ॥ दण्डः सु
प्तेषु जागर्त्ति दण्डं धर्म्मं विदुर्बुधाः
राजदण्डभयादेके पापाः पापं
न कुर्व्वते ॥ यमदण्डभयादेके
परस्पर भयादपि । एवं हि सां
सिद्धिके लोके सर्व्वं दण्डे प्रतिष्ठि
तं ॥ अन्धे तमसि मज्जेयु र्यदि
दण्डं न पालयेत् । तस्मात् द
ण्डो दमयति अदण्ड्यान् दण्डयत्य
पि ॥ दमनाद्दण्डनाच्चैव तस्मात्द
ण्डं विदुर्बुधाः दण्डस्य भीता स्त्रिदशैः
समेता भागो धृतः शूलधरस्य
यज्ञे । भवस्य पत्रं ध्वजिनीप
तिञ्च वरं पिनाकाञ्च भयान्तु रु
द्रं ॥ इति मात्स्ये २२५ अ
ध्यायः ॥ सामभेदौ ततश्छेद
दृष्टवौ ॥

शत्रुघ्नः पुं श्रीरामस्य भ्राता । तस्य
पर्य्यायः । अरिमर्द्दनः २ इति शब्द
रत्नावली ॥ स तु सुमित्रयास्त्रा
ताच्छिष्टभोजनाद्दस्याति । यथा
निष्ठां गते दशमिं सम्पनोषे वि
शिश्रिमे कर्म्मणि राजपत्न्यः ।
प्राश्य हुतोच्छिष्टमुदारवंश्या
स्तिस्रः प्रसूतं चतुरः सुपुत्रान्
कौशल्ययाऽसावि सुखेन रा
मः प्राक् केकयीतोभरतस्ततो
ऽभूत् । प्रासोष्ट शत्रुघ्नमुदार
चेष्टमेका सुमित्रा सह ल
क्ष्मणेन ॥ इति भट्टिकाव्ये
१ सर्गः ॥

शत्रुघ्नजननी स्त्री सुमित्रा । इति
शब्दरत्नावली ॥

शत्रुजित् पुं राजविशेषः । तस्य
पुत्रः ऋतध्वजः । स एव कुवलया
श्वः । इति मार्कण्डेयपुराणे ॥

शत्रुञ्जयः पुं विमलाद्रिः । इति
हेमचन्द्रः ॥ शत्रुजेतरि त्रि ॥

शत्रुन्तपः त्रि वैरितापकृत् ।
इति मुग्धबोधव्याकरणं ॥

अरिमर्द्दनः पुं शत्रुघ्नः । इति
शब्दरत्नावली ॥

शात्वरी स्त्री रात्रिः ॥ इति त्रि
काण्डशेषः ॥

शद ९ ज औ शाते । इति
कविकल्पद्रुमः ९ अशदत् जे
शादः शदः औ शत्स्यति शनः
पतने पातनञ्च । शीयते पत्रं
वृत्तात् वायुः । शदो ३ यिम मि
त्यविषये आत्मनेपदं केचि
दिमं तुदादौ पठित्वा तस्मा
र्थ्यात् आत्मनेपदानित्यत्वं शी
यता शीयन्तीत्युदाहरंति । इति
दुर्गादासः ॥

शद औ गतौ । आङ् एवीय
मितिकविकल्पद्रुमः ॥ तालं
व्यादि आशीयते । औ आशात्
सीत् । इति दुर्गादासः ॥

शदः पुं फलमूलादि शदधा
तोरच् प्रत्ययेन निष्पन्नः । इ
ति सिद्धान्तकौमुदी ॥

शद्रिः पुं मेघः ॥ जिष्णुः । इति
मेदिनी ॥ हस्ती । इत्युणादि
कोषः ॥

शद्रिः स्त्री विद्युत् । इति हेम
चन्द्रः । खण्डः इति सिद्धान्तकौ
मुद्यामुणादिवृत्तिः ॥

शद्रुः त्रि पतनकर्त्ता ॥ गन्ता
इति शदधातो रु प्रत्ययेन
निष्पन्नः । इति व्याकरणं ॥

शनकावलिः पुं राजपिप्पली
इति शब्दचन्द्रिका ॥

शनपर्णी स्त्री कटुकी । इति श
ब्दचन्द्रिका ॥

शनिः पुं रव्यादिनवग्रहान्तर्गतस
प्तमग्रहः । तत्पर्य्यायः ॥
सौरिः २ शनैश्चरः ३ इत्यमरः ।
नीलवासाः ४ मन्दः ५ छा
यात्मजः ६ इति त्रिकाण्डशेषः
पातङ्गिः ७ ग्रहनायकः ८ छा
यासुतः ९ भास्करिः १० नीला
म्बरः ११ । इति शब्दरत्नावली ॥
आरः १२ क्रोडः १३ वक्रः १४ को
लः १५ समोष्णुः १६ पङ्गुः १७ इ
ति जटाधरः ॥
कालः १८ सूर्य्यपुत्रः १९ असितः २०
इति ज्योतिस्तत्वं ॥ अस्य रूपम
वर्णः । पश्चिमदिङ् नपुंसकास्त
जन्माति तमोगुण कषायरस म
कर कुम्भराशि नीलकान्तमणि
सौराष्ट्रदेश शालानामधिपतिरयं
कश्यपसुत संतानः शूद्रवर्णः
सूर्य्यसुखः । चतुरङ्गुलपरिमा
णः कृष्णवर्णवस्त्रः गृध्रवाहनः
सूर्य्यपुत्रः चतुर्भुजः ॥ भगवा
ण वरशूल धनुर्धारी । अस्याधि
देवता यमः । प्रत्यधिदेवता
प्रजापतिः । इति ग्रहयागत

त्व वृहज्जातकादयः ॥ अपि च
शनि विहङ्गेऽनिल वत्स्वंध्या
मूढाङ्गना यातसमः स्थिरश्च ।
क्रूरः प्रतीची तवरोऽतिवृद्धः
करस्तितीट् दीर्घं सनीललोहं ॥
इति नीलकण्ठीयताजके ॥
अस्योत्पत्ति र्यथा । मरीचेः
कश्यपो जज्ञे तस्माज्जज्ञे विभाव
सुः । तस्य भार्य्याभवत् स
ञ्ज्ञा पुत्री त्वष्टुः प्रजापतेः ॥ ना
तितेजोमयं रूपं सोढुं शाले ·
विवस्वतः । मायामयीं ततश्छा
यां सवर्णां निर्ममे स्वतः ॥
संज्ञोवाच ततश्छायां सवर्णेऽत्र
एवं सेवचः ॥ अहं यास्यामि स
दने पितुस्त्वं पुनरत्र मे । भवने
वस कल्याणि निर्व्विशङ्कं ममाज्ञ
या ॥ इतिच्छायांगृहे स्थाप्य संज्ञा·
गात् पितुरालयं । मन्यमानोऽथ
तां संज्ञां सवर्णायां तथा रविः ॥
सावर्णिं जनयामास मनुश्रेष्ठं म
हीपते । शनैश्चरं द्वितीयञ्च स
ते भद्रां तृतीयिकां ॥ इति
पाद्मे स्वर्गखण्डे ९ अध्यायः ॥
तस्य क्रूरदृष्टेः कारणं यथा
एतस्मिन्नन्तरे तत्र दृष्टुं शङ्क
रनन्दनं । आजगाम महा·
योगी सूर्य्यपुत्रः शनैश्चरः ॥
अत्यन्तानम्रवदन ईषन्मीलि
त लोचनः । हरिं स्मरन् मूलहस्त
श्च विशालाक्ष उवाच ह ॥ शने
श्चर उवाच शिवाज्ञया शिशुं
द्रष्टुं यामि शङ्करकिङ्कर । विस्तु
प्रमुखदेवानां मुनीनां मनुरोध
तः ॥ विशालाक्ष उवाच । आज्ञा
वेदानदेवानां नाहं शङ्कर किं
करः हरेर्दासमहंकोऽहं विना
मत्प्रातराज्ञया ॥ ददौ वर्त्म शने
शायचक्षुः कोणस्याननः ।
शनि रभ्यन्तरे गत्वा ननामानम्र
कन्धरः ॥ रत्नसिंहासनस्थाञ्च पा
र्वतीं सस्मितां मुदा । नते सख्यौ
सते दृष्ट्वा दुर्गां संभाष्य यत्नतः
शुभा शिरं ददौ तस्मै पप्रच्छ तत्
कुशलं शुभा । पार्वत्युवाच क
थमानम्रवक्त्रस्त्वं श्रोतुमिच्छा
मि साम्प्रतं । कथं न पश्यसि मां
साध्वो बालकञ्च ग्रहेश्वर ॥ श
निरुवाच सर्वे स्वकर्म्मणः सा
क्षिभुञ्जते वाञ्छितफलं । शुभा
शुभं वा यत्कर्म्म कोटिकल्पेन
लभ्यते ॥ इतिहासं चातिगोप्यं
शृणु शङ्करवल्लभे अकथ्यं
जननीसार्द्धालज्जाजनककारणं

आबाल्यात् कृष्णभक्तोऽहं कृष्ण
ध्यानैकमानसः । तपस्यासक्त
तः शश्वद्विषये विरतः सदा ।
पिता ददौ विवाहेन कन्यांचि
त्ररथस्य च अतितेजस्विनी शश्व
त्तपस्यानुरता सती ॥ एकदा
सा ऋतुस्नाता स्ववेशं सं वि
धाय च । रत्नालंकार संयुक्ता
मुनिमानसमोहिनी ॥ हरिपादे
ध्यायमाने सामापश्यत्तुवाच ह
मत्समीपं समागत्य सस्मितान
ललोचना ॥ शशाप मामपश्य
न्तमृतुनष्टा स्वकोपतः । वाह्य
ज्ञानविहीनत्त्व ध्यानैकतानमान
सं ॥ न दृष्टाहं त्वया येन कृतं सु
वरक्षणं । त्वया दृष्टञ्च यद्यत्तु·
मूढ सर्वं विनश्यति ॥ अहञ्च वि
रतेध्याने तां मतोषं पुरा सतीं ।
शापं मोक्तुं न शक्ता सा पश्चा
त्तापं चकार ह ॥ तेन मातर्न प
श्यामि किंचिद्धिंसा स्वचक्षुषा
ततःप्रभृति नम्रास्यः प्राणिहिं·
सा भयाद्दह ॥ इति ब्रह्मवैवर्त्ते ग
णपतिखण्डे ११ अध्यायः ॥
अस्य भोगकालो यथा । रवि
मासं निशानाथः सपादं दिवस
द्वयं पक्षत्रयं भूमिपुत्रो बुधो ·
ऽष्टादश वासरान् ॥ वर्षमेकं सु
राचार्य्यो ह्यष्टाविंशति दिनं भृगुः ।
शनिः सार्द्धद्वयं वर्षं स्वर्भानुः सा
र्द्धवत्सरं ॥ इति ज्योतिषतत्त्वं ॥
तस्य जपमन्त्रो यथा । प्रणवं वा
ग्भवं मायां श्रीमुद्धृत्य शनैश्चरं ।
चतुर्थ्यन्तं मनुं प्रोक्तं रविसूनो
र्नवाक्षरं ॥ ॐ ऐं ह्रीं श्रीं श
नैश्चराय । इति रुद्रयामले ॥
ऊर्द्धपाणि स्तन्मंत्रं जपेत् यथा
सूर्य्यार राहु मन्दानां खड्गपाणौ
जपेद्बुधः सोम केत्वो रथःपा
णौ रन्येषां शुद्धपाणिकः ॥
इति च रुद्रयामले ॥ अस्यैव
समन्त्रा यथा । ॐ शन्नोदेवी र
भीष्टये शन्नो भवन्तु पीतये शं
यो रभिस्रवन्तु नः । यथा । श
नैश्चरायेति पुनः शन्नोदेवीति वै
मधेन इत्युदाहृतत्वप्रतमस्यपुरा
णं ॥ वारविशेषः ॥
तत्र वारवेला यथा । कृत मुनि
यम शर मङ्गल रामर्त्तु भास्करादि
यामार्द्धे । प्रभवति हि वारवेला न
शुभाशुभकार्य्यकरणाय ॥
तत्कालवेला यथा कालस्य वे
ला रविनः प्रशान्ति कालानलाया
स्तुभयो गजेन्द्र दिन निशायां·

मृतु वेद नेत्र नगेषु रामा विषु
दन्तिनैव ॥ अथ कुलिकवेला
यथा। षष्ठाष्टैकं दिनेशात् क
मशः रुद्र दिने मंत्रिचंद्रऐड्य
रोक्तः एवं वाराद्वयामः कुलि
क इहेपरो मध्यम श्रुतिकालः
तद्दिने एवंविधगमन नि
षेधो यथा। शुक्रादित्यदिने न
वारुणादिशं न चैव कुजे चोत्त-
रां। मन्देन्दोश्च दिने न शक्रक
कुभं याम्यां गुरौ न व्रजेत् ॥
तत्र प्रथम रजोयोगेदोषो य
था। आदित्ये विधवानारी।
सोमे चैव पतिव्रता। वेश्या
मङ्गलवारे च बुधे सौभाग्य
मेवच ॥ बृहस्पतौ पतिः श्री
मान् शुक्रे चाप्यस मेव च ॥ श
नौ वन्ध्यां विजानीयात् प्रथमे
स्त्री रजस्वला। इति ज्योतिस्त
त्वे ॥ अथ नवानां ग्रहाणां
दानानि। सूर्ये धेनुश्च ताम्रञ्च
गोधूमं रक्तचंदनं। चन्द्रे चन्दन
शंखौ च वस्त्रञ्च तिल तण्डुला
न् ॥ कुजे वृषः प्रदातव्यो रक्त
वस्त्रगुडोदनं बुधेकर्पूर मङ्गञ्च
हरिद्वस्त्रं हिरण्यकं। पीतवस्त्र
हयं जीवे हरिद्रा कनकानिच ॥

ग्रस्थः शुक्र सितोदेयः शुक्लो
यान्यानि याति च। शनौ च
सतिला देया कृष्णा गौ र्लौ ह
मुत्तमं ॥ राहौ च महिषीच्छा
गोमायाश्च तिल सर्षपाः अजा
मेषौ च दातव्यौ केतौ चान्न
ञ्च मिश्रितं। स्वर्णं गो विप्र ए
जाभिः सर्वेषां प्रीति रुत्तमा
इति ज्योतिस्तत्वे ॥
ग्रहाणां वलयो यथा। गुडोद
नं पायसञ्च हविष्यं क्षीर ष
ष्टिकं। दध्योदनं हविश्चूर्णं
मांसं चित्रान्न मेवच ॥ दद्यात्
ग्रहक्रमादेवं द्विजेभ्यो भोज
नेवुधः शक्तितोवायथालाभं
सत्कृत्य विधिपूर्वकं ॥
ग्रहाणां दक्षिणा यथा। धेनुः
शंखं ल्यानड्वान् हेमवासोह
यस्तथा। कृष्णा गौरायसं छा
ग एतावै दक्षिणाःक्रमात् ॥
इति संस्कारतत्वे ॥
शनिचक्रं स्त्री नराणां शुभाशु
भज्ञानार्थं शनिभोग्यनक्षत्रादि
सप्तविंशति नक्षत्रयुक्त नराका
रचक्रं। यथा। शनिचक्रं नरा
कारं लिखित्वा सौविभादितः
नाम ऋक्षं भवेयत्रफलं तत्र

शुभाशुभं ॥ एकं मुखे दक्ष
हस्ते चत्वारि षट् पदद्वये। द्व
दिपंच करे वामे चत्वारि मस्त
केत्रयं ॥ द्वयं नेत्रद्वये गुह्ये द्वयं
तत्र न्यसेद्बुधः मुखे हानि र्ज
योदक्षे भ्रमः पादे श्रियोह्य
दि ॥ वामे भी मस्तके राज्यं
नेत्रे सौख्यं स्मृति गुह्ये। तथ्या
ष्ट द्वादशे ऋक्षे यदा विघ्न-
करः शनिः ॥ तदा सौख्यव-
पुष्यंतु स्मृत् शीर्षे नेत्र दक्षयोः
तृतीयेकादशे षष्ठे यदा सौ
ख्यकरः शनिः ॥ तदा विघ्नः
शरीरस्था गुह्ये वक्त्रेऽङ्घ्रि वा
मयोः। यस्य पीडाकरः शनि
स्तस्य चक्रेफलन्विदं ॥ लिखि
त्वाकुसमद्व्येण तैलमध्ये क्षिपे
त्ततः। निक्षिप्य भूमिमध्यसं
कुसुमपुष्पैःप्रपूजयेत् ॥ तुष्टिं
याति न संदेहः पीडांत्यक्त्वा
शनैश्चरः इति ज्योतिस्तत्वे ॥
शनिप्रसूः स्त्री छाया सूर्य
पत्नी इति भूरिप्रयोगः ॥
शनिप्रिये स्त्री नीलमणिः
इति केचित् ॥
शनिवारः पुं शनिभोगासाव
तद्दिने तत्र उदयादोदयकालः

यथा। स्वतकादि परिच्छेदोदि
न मासाकृपा स्तथा। मध्यम
ग्रहभुक्तिश्च सावनेन प्रकीर्त्ति
ताः ॥ दिनाधिपस्य रव्यादे र्भोग्यं
दिनं वारमूपं सावनमानतोक्तं
उदयादोदयाज्ञातोभौ मसावन
वासरः इति तिथ्यादितत्वं ॥
शतभिषानक्षत्रयुक्त मधुकृ
सत्रयोदश्यां शनिवार योगे
महावारुणी स्यात्। यथा।
स्कन्दपुराणे। वारुणेनसमायु
क्ता मधौकृष्णा त्रयोदशी गं
गायां यदिलभ्येत सूर्यग्रहश
तैः समा ॥ शनिवार समायुक्ता
सामहावारुणीस्मृता। इति ति
थ्यादितत्वं ॥ तत्र जातफ
लं यथा। कृपः सुवेशः कुल
कीर्तिहीनो ज्वरायुतो मध्यध
नोऽङ्गहीनः। तमोगुणः क्लेश
करो नराणां मन्दस्य वारेप्रभ
वोऽतिमन्दः ॥ इति कोष्ठीप्र
दीपः ॥ तत्रयात्रा निषेधो य
था। संत्यजेद्दिवसेयात्रां सू
र्यार्कीन्तु वक्रिणां इति ज्यो
तिस्तत्वं ॥ वारवेलादि शनि
शब्दे द्रष्टव्यं ॥
शनैः स्व अद्भुते। इत्यमरः ॥

यथा। शनै र्विद्या शनैः कन्था
शनैः पर्वत मारुहेत्। शनैः
कामश्च धर्मश्च पंचैतानि शनैः
शनैः॥ इति गारुडे १०९ अ
ध्यायः॥ शनैश्चरः ॥ इति
मेदिनी॥
शनैश्चरः पुं शनिः। इत्यमरः
तस्य स्तोत्रं यथा। नीलाञ्ज
नचयप्रख्यं रविसुतं महाग्रहं
छायाया गर्भसंभूतं वंदे भ
क्त्या शनैश्चरं॥ व्यासेनोक्तमि
दं स्तोत्रं यः पठेत् प्रयतोनरः।
दिवा वा यदि वा रात्रौ पीडा
तस्य न संशयः॥ इति व्या
सभाषितस्तोत्रं॥ शाप् व्या स्वी
कारः। यथा शपूक रोति॥
इति सिद्धांतकौमुदी॥
शप य अ औ। क्रोशे इति क
शप औ अ कविकल्पद्रुमः॥ह्रौ
तालव्यादी। य अ शप्यति शा
पते। औ शप्ता औ अशाप्सीत्
अ शपति शपते क्रोशा उक्ति
विशेषः। निर्भर्त्सन मितिचत
र्भुजः। स्वरस्येण ३ सेट्। शाप
थानयशपत्। क्रोशे ब्रह्मादिपते
शालिदाने शपते। जिन्वेपि।
शपथाशी र्गत्यन्तुकारेति॥
नियमात् शपथे आत्मनेपदंश्च
न्यत्र परस्मैपदं। कृस्नायशप
ते गोपी। प्रजेति त्वाशशा
प सः। इति वैद्यौ। साव्यःशा
पामि यदि किञ्चिदनुस्मरामि
इति वाचा शरीरस्पर्शनाभावा
दिति पाणिनीयाः। केचित्तुश
पथे नित्य मात्मनेपदं अन्यत्र
विभाषया इत्याहुः। तेन प्रति
वाच मदत्त केशवः शपमाना
यन चेदि भूभृते। इति माघः
इति दुर्गादासः॥
शापः पुं शपथः। इति हेम॰
चंद्रः॥ निर्भर्त्सनं। गालिदा
नं। इति शापधात्वर्थदर्शनात्॥
शपथः पुं अन्तरे वदन् घोरं
नरके यास्यामि इत्येवं रूपं मि
थ्याभिरसनं॥ सत्यावधारणं
इति सारुकः। वाचा शरीरस्प
र्शनं इति गोयीचन्द्रः॥ शप
थो दिव्यं। इति रमानाथः॥
इति भरतः॥ तत्पर्यायः॥
शपनं २ इत्यमरः॥ शपः ३ इ
ति हेमचंद्रः॥ सत्यं ४ समयः
५ शपथः ६ प्रत्ययः ७ अभिषङ्गः
८। इति जटाधरः॥ चतुष्पा
द्व्यवहारस्य क्रियापादाङ्गं॥

यथा। अथ शपथः। उक्तिश्च
प्यवसन्नास्तु शपथैः तेन मर्दयेत्
अर्थ काल बलापेत्त मग्न्यम्बु
सुकृतादिभिः॥ अर्थस्यल्पत्ववाद
ल्पदस्य बले बहुल्पभावः। का
लस्य च बलेबहुल्पबहुल्पत्वं तद
पेत्त यथास्यादित्यर्थः। हस्तो
करत्वस्य उज्ञादिस्पर्शस्य चेत्रे
दर्शनीयत्वात्। अत्र मयैतत्
कृतंनवा इति प्रतिज्ञा मुच्चार्य्या
ग्नौजले वा हस्तं प्रक्षिपेत्। य
तन्मिथ्यात्वे मम सुकृतं नश्य
दितिवाक्ययात्। नत्वग्नि परीक्षां
जलपरीक्षां वा कुर्य्यात् उत्य॰
भिशापवर्णाने युक्तं। तस्या महा
भियोगविषयकत्वेन शपथस
मभिव्याहारानर्हत्वात्। सुकृता
दिभि रित्यादिना हवी सत्याभ्युप
ग्रहः। तथाच विष्णुः सर्वेष्वेवार्थ
जातेषुमूल्यं कनकं प्रकल्पयेत्
तत्रकृष्णलोने शूद्रं दूर्वाकरं पाय
येत्। द्विकृष्णलोने तिलकरं।
त्रिकृष्णलोने जलकरं। चतुः
कृष्णलोने स्वर्णकरं पंचकृष्ण
लोने सीतोद्धृत महीकरं। सु
वर्णार्द्धोने कोषो देयः। शूद्र
स्य यथा समये विहिता क्रियात
स्या द्विगुणेऽर्थे राजन्यस्य त्रिगु
णेऽर्थे वैश्यस्य चतुर्गुणेऽर्थे
ब्राह्मणस्येति। कृष्णलः काञ्च
नरक्तिका तन्न्यूनत्वे कृष्णलो
ने एव मन्यत्र मनुः। सत्येन शा
पयेद्विप्रं क्षत्रियं वाहनायुधैः।
गो बीज काञ्चनै वैश्यं शूद्रंस
र्वैस्तु पातकैः॥ पुत्र दारस्यवा
प्येवं शिरांस्यि स्पर्शयेत् पृथक्
ब्राह्मणेन मयैतत् कृतं नकृतं
वेतिप्रतिज्ञा मुच्चार्य्य सत्यमिति
वक्तव्यं। तथैव क्षत्रियेण वाह
नायुधे स्प्रष्टव्ये। तथैव वैश्येन
गो बीज काञ्चनाना मन्यतम स्प
ष्टव्यं। शूद्रेण तु सर्वाणि सर्व
मेव स्प्रष्टव्यं। तेषाहृत्याकृत
स्पर्शानां पातक हेतुत्वात् पा
तकशब्देन निर्देशः। हलायुधो
प्येवं देवक्रियाविषय माह ना
रदः। अरण्ये निर्जने रात्राव
न्तर्वेश्मनि साहसे न्यासापह्न
रणे चैव दिव्या सम्भवति क्रि
या॥ बृहस्पतिः। देवब्राह्म
ण पादांश्च पुत्रदार शिरांसिच
एते तु शपथाः प्रोक्तामनुना स्व
ल्पकारणे॥ साहसेष्वभिशापे।
च दिव्यानि तु विशोध ॥

ने। अत्र शपथ दिव्ययोः पृथक्
त्व प्रतीतेः शपथे न दिव्यध
र्म्माः। किन्तु वैधे कर्म्माणि तत्र
शौचार्थं स्नानाचमनादि कार्य्यं।
दिव्यानि तु दिव्यतत्त्वे कथितानि
नात्र लिखितानि। अनभियुक्तेन श
पथः कर्त्तव्य इत्युत्सर्गः। उभये
च्छया अभियोक्तापि। इत्याह
नारदः। अभियोक्ता शिरोवर
र्त्ती सर्वत्रैव प्रकीर्त्तितः। इच्छ
यान्यतरः कुर्य्यादितरो वर्त्तये
च्छिरः॥ इतरः शपथकर्त्तृभि
न्नः तथा कात्यायनः। आचवर्द्दे
शाकादत्तो यस्य नो राज दैवि
के। व्यसने जायते चौरं स स्तेयः
शपथे शुचिः॥ व्यसन मापत्
चौरमनिष्टाकरं। तथाच को
षाधिकारे यस्य पश्येद्दिनतुष्ट
नो विष्णुः। रोगोऽग्नि र्ज्ञातिमर
णं राजातंकमथापि वा। तम
शुद्धं विजानीयात्तथा शुद्धं विप
र्य्ययात्॥ कात्यायनः। तस्यैकस्य
न सर्वस्य जनस्य यदि तद्भवेत्।
रोगोऽग्नि र्ज्ञातिमरणं मृणं दद्या
त् दमश्च सः॥ ज्वरातिसारवि
स्फोट गात्रास्थि परिपीडनं। ने
त्ररुग्गलरोगश्च तथोन्मादः॥
प्रजायते॥ शिरोरुग्भुजभङ्गश्च
दैविका व्याधयो नृणां। तस्मै
कस्मैति न तु देशव्यापकमर
णादिः। मनुः। नवृथा शपथं
कुर्य्यात् स्वल्पेप्यर्थे नरो बुधः।
वृथा हि शपथं कुर्वन् प्रेत्यचे
ह च नश्यति॥ कामिनीषु वि
वाहेषु गवां भक्ष्ये तथेन्धने
ब्राह्मणाभ्युपपत्तौ च शपथे
नास्ति पातकं॥ कामिनीष्विति
रहसि कामिनी संतोषार्थं वृ
थाशपथः। एवं विवाह सिद्ध्य
र्थे गोग्रासार्थे आवश्यक होमे
न्धनार्थं ब्राह्मणरक्षार्थं मङ्गी
कृतधनादौ। यमः। वृथा तु श
पथं कृत्वा कीटस्य वधसंयुतं।
अन्तेनच युक्तेन वधेन च त
थानघः॥ तस्मान्न शपथं कुर्य्या
न्नरो मिथ्या वृथापि ते। कीटस्ये
ति प्राणिमात्रोपलक्षणं। तद्वध
पापेन वृथा शपथकर्त्ता युज्य
तेऽत्यर्थः। इति व्यवहारतत्त्वं॥
शपनं क्ली शपथः। इत्यमरः॥
गालिः। इति त्रिकाण्डशेषः॥
शफः पुं तृणविशेषः अङ्कः इ
ति भाषा। इति शब्दचंद्रिका॥
अभिशापशब्दे वि॥

शफं क्ली गवादीनां खुरः॥ वृत्त
मूले। इति मेदिनी॥ ॥
शफरः पुं स्त्री मत्स्यविशेषः।
पुंटी इति भाषा। इत्यमरः॥
शफराधिपः पुं इल्लीशमत्स्यः।
इति त्रिकाण्डशेषः॥ तत्पर्य्या
यः। इलिशः २ वारिकर्पूरः ३
गाङ्गेयः ४ जमनालः ५ इति
त्रिकाण्डशेषः॥
शब्द क शब्दकृतौ। इति कवि
कल्पद्रुमः। क शब्दयति। सो
पसर्गस्त्वाविष्कृतौ मतः। प्रश
ब्दयति गम्भीरमत्यर्थे शिष्यः
स्फुटीकरोतीत्यर्थः॥ इति।
दुर्गादासः॥
शब्दः पुं श्रोत्रग्राह्यगुणपदा
र्थविशेषः। तत्पर्य्यायः। निना
दः २ निनदः ३ ध्वनिः ४ ध्वानः
५ रवः ६ स्वनः ७ स्वानः ८ नि
र्घोषः ९ निर्ह्रादः १० नादः ११
निःस्वानः १२ निःस्वनः १३ आ
रवः १४ आरावः १५ संरावः १६
विरावः १७ इत्यमरः॥
आरवः १८ संरवः १९ रावः २०
इति शब्दचंद्रिका॥ घोषः २१
इति जटाधरः॥ स च द्वि ध्वन्या
त्मको वर्णात्मकश्च। यथा
कण्ठसंयोगादिजन्या वर्णा स्ते
कादयो मताः। सर्वः शब्दो न
भोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते
वीचीतरंगन्यायेन तदुत्पत्तिस्तु
कीर्त्तिता। कदंबगोलकन्याया
दुत्पत्तिः कस्यचिन्मते॥
उत्पन्नः को विनष्टः क इति बु
द्धेरनित्यता। सोयं क इति बु
द्धिस्तु साजात्यमवलंबते॥ त
देवौषध मित्यादौ सजातीये
पिदर्शनात्। इति भाषापरिच्छे
दः॥ शब्दं निरूपयति शब्दो ध्व
निश्च वर्णश्च मृदङ्गादिभवो ध्वनिः
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्न
स्तु गृह्यते इति॥ नभोवृत्ति
राकाशसमवेतः। दूरस्थश
ब्दस्याग्रहणादाह श्रोत्रोत्पन्न।
इति कण्ठसंयोगादिजन्या वर्णा
स्ते कादयो मता इति। ननुमृ
दङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रो
त्रे कथमुत्पत्ति रत आह वीची
तरङ्गन्यायेन तदुत्पत्तिस्तु की
र्त्तिता इति। आद्य शब्दस्य ब
हिर्दशादिगवच्छिन्नो ऽन्यः शब्द
स्तेनैव शब्देन जन्यते तेनचा
परस्तद्व्यापकः एवं क्रमेण श्रो
त्रोत्पन्नो गृह्यते इति॥

कदंवगोलकन्यायाडुत्पत्तिः के
स्यचिन्मते इति। आद्य शब्दात्
दशदिक्षु दशशब्दा उत्पद्यन्ते।
ततश्चान्ये दशशब्दा उत्पद्यन्ते इ
तिभावः। अस्मिन् कल्पे गौरवा
दुक्तं कस्यचिन्मते। इति। ननु
शब्दस्यानित्यत्वादुत्पत्तिः कथ-
मत आह उत्पन्नः को विनष्टः
क इति बुद्धे रनित्यता इति श
ब्दाना मुत्पाद विनाश प्रत्यय-
शालित्वादनित्यत्व मित्यर्थः। न
नु सएवायं ककार इत्यादि प्रत्यभि
ज्ञानाच्छब्दानां नित्यत्वे। इत्य-
श्चोत्पाद विनाश बुद्धि भ्रमरूपा
चेत्यत आह सोयं क इति बुद्धि
स्तुसाजात्य मवलंबते। तदेवौष
ध मित्यादौ सजातीयेति दर्शना
त् इति। तत्र प्रत्यभिज्ञानस्य त
त्सजातीयत्वे विषयः। ननु तद्य
क्त्यभेदो विषयः उक्त प्रतीतीति
विरोधात्। इत्यत्र द्वयो रपि-
बुद्ध्यो र्न भ्रमत्वमिति। ननु सजा
तीयत्वे सोय मिति प्रत्यभिज्ञा
या भासते इति उक्त दृष्ट मित्य
त आह तदेवेति। यदौषधं म
याकृते तदेवान्येनापि कृत मि-
त्यादि दर्शनादिति भावः। इति-

सिद्धान्तमुक्तावली॥ दशविध
शब्दा यथा। षड्जर्षभ सगान्धार
मध्यमः पञ्चम स्तथा। अतः पर
न्तुविज्ञेयो निषादो धैवतस्तथा॥
इष्ट स्यानिष्ट शब्दस्य संहतः प्र
विभागवान्। इत्यास्त्वेषि कप
है॥ शब्दविशेषाणां नामवि
शेषा यथा। शब्दो गुणानुरागो
त्थः प्रणादः सीत्कृते न्टणां। प
र्दने गुडज्जे शब्दे कर्दनं कृति
संभवे॥ क्ष्वेडा तु सिंहनादोथ
क्रंदने सुभटध्वनिः। कोलाहलः
कलकल स्तुमुलो। व्याकुलो र
वः॥ समरो वहु पर्णादे भूषणा
नान्तु शिञ्जितं। हेषा ह्रेषा तुरङ्गा
णांगजानां गर्जि बृंहिते॥ विस्फा
रो धनुषां हस्ता रक्ते गो जैले
दस्यच। स्तनितं गर्जितं गर्जिः
स्वनितं रसितादि च॥ कूजितं
स्यात्विहंगानां तिरश्चां रुतवा-
शिते। वृकस्य रेषणं रेवा वुक्के
नं भषणं शुनः॥ पीडितानान्तु क
णितं मणितं रतिकूजितं। प्रक्वा
णः प्रक्वणा स्तंत्र्या मर्दलस्य तु गु
न्दलः॥ स्त्रीजनेन्तु कीचकानां भे
र्यानादस्तु ढक्कः। तालो १ सप्ते र्ध
निस्यन्दो गम्भीरो मधुरः कलः॥

कंकली तु कलः सूक्ष्म एक।
तालोलयानुगः। काकुर्ध्वनि
विकारः स्यात् प्रतिश्रुद्ध प्रति।
ध्वनिः॥ इति हेमचंद्रः॥ अथै
कार्थानुलोम विलोम सम श
ब्दाः नयन १ नर्तन २ कनक ३
कण्ठक ४ महिम ५ कलेक ६
कालिका ७ सरस ८ सहास ९
मध्यम १० स्वदस्व ११ नवेन १२ ता
वता १३ तारता १४ विभवि १५ क
रक १६ कंबुक १७ काञ्चिका १८
नंदन १९ दंतद २० दम्भद २१ या
मयोः २२ लगल २३ तुततु २४
हारवहा २५ मनदानम २६ वरभे
रव २७ कलपुलक २८ वरकेरव
२९ वरपौरव ३० तरुणीकृत ३१
रदसोदर ३२ नदभेदन ३३ दे
पतीपदं ३४ लंकाकंकाल ३५
मापवबलववपमा ३६ नंदनंद
ने ३७ तहित ३८ समास ३९ का
दिका ४० पादपाः ४१ जलज
४२ नाना ४३ मम ४४॥ अथा
न्यार्थकानुलोमविलोम शब्दाः
वेदे १ देवे २ लेख ३ रवी ४
भानो ५ हंसा ६ जीवा ७ या
मा ८ वित्त ९ वद १० रम ११ यम
१२ कंप १३ गाथा १४ गायया १५

सत्रामा १६ नन्दक १७ मालिका
१८ कालिनी १९ राजते २० भार
ती २१ हासिका २२ गगन २३
कारका २४ भागीव २५ कटकं २६
हीनरत्ना २७ महोरगा २८ वाला
पिना २९ पिनाकिना ३० सदालि
का ३१ यमराज ३२ हरिदेवे ३३
सव्यायामा ३४ भोविकर्तन ३५
नंदनवन ३६ नलकूबर ३७ स
हसानुत ३८ रसविभवेन ३९
साहमहामिक ४० नवतमसम
द ४१ मार ४२ वत ४३ यु
वा ४४ सदा ४५ वशि ४६
मया ४७ लता ४८ तुत ४९ ल
व ५० विभा ५१॥ अथ संस्कृत
प्राकृत सम पुंलिङ्ग शब्दाः।
आहार १ हार २ विहार ३ सार ४
समर ५ सम्भोग ६ रोग ७ अ
सुर ८ संहार ९ अमर १० वार ११
वारण १२ गण १३ टंकार १४
भाव १५ आकर १६ लोल १७
उल्लोल १८ विलास १९ वायस २०
हर २१ अहंकार २२ हीर २३ अं
कुर २४ नीहार २५ उरग २६ ग
ग २७ भाल २८ तरल २९ गो
विन्द ३० कन्द ३१ उदर ३२ त
रुण ३३ तरणि ३४ दास ३५

मोह ३६ संदोह ३७ मास ३८
खुर ३९ खर ४० नर ४१ मल ४२
संगर ४३ आरम्भ ४४ हास ४५
कर ४६ कवि ४७ किरि ४८ कीर
४९ कोल ५० कन्दोल ५१ पीव
५२ मल ५३ मलय ५४ करीर ५५
वामदेव ५६ आसि ५७ वीर ५८
नरं ५९ नरक ६० करंक ६१ दंड
६२ चाण्डाल ६३ रंग ६४ दर ६५
मवल ६६ कलंक ६७ कंबल ६८
आकार ६९ पंक ७० खल ७१ व
कुल ७२ कुरंग ७३ देह ७४ स
न्देह ७५ संग ७६ पर ७७ कुरव
७८ तरंग ७९ चारु ८० सञ्चार ८१
भंग ८२ अरि ८३ हरि ८४ परि
नाह ८५ कण्ठ ८६ कुण्ठ ८७ अ
हि ८८ दाह ८९ परिसर ९० हवि
९१ हाहा ९२ मञ्जु ९३ मञ्जीर ९४
वाह ९५ अचल ९६ कुल ९७
कुमार ९८ कुम्भ ९९ कुम्भीर १००
सार १०१ विरल १०२ कवल १०३
ज्ञार १०४ कन्दर १०५ उदार १०६
पार १०७ जंबीर १०८ केसरि १०९
वराह ११० असुरारि १११ काल ११२
काकोल ११३ अंगल ११४ चमरु
११५ विराम ११६ वाल ११७ आ
लोल ११८ वारु ११९ रण १२०

संगर १२१ चोल १२२ भार १२३
संसार १२४ केरल १२५ समीर
ण १२६ टंक १२७ ताल १२८ आ
सार १२९ चामर १३० कुलीर १३१
तरंग १३२ सर १३३ कंकाल १३४
कन्दल १३५ कराल १३६ विका
स १३७ पूर १३८ हेरंब १३९ के
बु १४० विधु १४१ सिंधु १४२ उप
१४३ अनुबंध १४४ कुन्द १४५
वेडु १४६ चन्द्र १४७ समीर १४८
समूह १४९ गंध १५० भीम १५१
अंक १५२ संकार १५३ किरीट
१५४ तमाल १५५ गुञ्जा १५६ हि
न्ताल १५७ तोमर १५८ महीरुह
१५९ बिंब १६० पुञ्ज १६१ हिण्डीर
१६२ पिण्ड १६३ दव १६४ संवर १६५
कोण १६६ काण १६७ संरम्भ
१६८ सोम १६९ परिरम्भ १७० वि
कार १७१ वाण १७२ वसन्त १७३
आसव १७४ वेसन्त १७५ वास
१७६ वासव १७७ वासर १७८ का
सार १७९ सार १८० सरस १८१ कि
रण १८२ अरुण १८३ वारण १८४
अथ संस्कृत प्राकृत सम स्त्रीलिं
ग शब्दाः । हेला १ खिला २ कला
३ माला ४ रमाला ५ कारला ६
अचला ७ कीला ८ लीला ९ व

६

ला १० वाला ११ लोला १२ दो
ला १३ अलसा १४ मसी १५ धर
णी १६ धारणी १७ गोणी १८ रो
हिणी १९ रमणी २० मणी २१
वीणा २२ वाणी २३ वसा २४ वेणी
२५ दीप्ता २६ गंगा २७ तरंगिणी २८
कंदली २९ लहरी ३० नारी ३१
रामा ३२ भेरी ३३ वसुंधरा ३४
काली ३५ कराली ३६ चा
मुण्डा ३७ चण्डा ३८ खण्डा ३९
तुला ४० मही ४१ ॥ अथ
संस्कृत प्राकृत क्लीवलिंग
समशब्दाः । जल १ फल २ पल
३ मूल ४ वारि ५ कीलाल ६
कूल ७ वल ८ पल्लव ९ उकूल
१० लिंग ११ गम्भीर १२ तल १३ स
लिल १४ कमल १५ चीर १६ त
छ १७ राजीव १८ नीर १९ हल २०
कूजन २१ कुटीर २२ दारु २३ ला
ल २४ पटीर २५ कारण २६ तोर
ण २७ चेल २८ कहर २९ अंबर
३० मंदिर ३१ कुट्मल ३२ चेउल
३३ तामरस ३४ कुण्डल ३५ अं
गद ३६ उर ३७ अरविंद ३८ लो
ह ३९ अंग ४० तडाग ४१ कर
ण ४२ कुल ४३ तोरण ४४ म
रण ४५ लंग ४६ अंल ४७ आगा

भास्वर ४८ ॥ अथ संस्कृत प्रा
कृत सम क्रियापदानि । भण १
देहि २ गच्छ ३ संहर ४ कुरु ५
चोरय ६ मारय ७ अवगच्छ ८
अवलोकय ९ अवचिंतय १० खा
द ११ ॥ अथ निरोष्ठ्य पुंलिङ्ग
शब्दाः । नीहार १ हार २ हरिण
३ अंक ४ हर ५ अट्टहास ६
कैलास ७ कास ८ रुद्र ९ नार
द १० सिंह ११ शर १२ शेष १३
अहि १४ हंस १५ घनसार १६
हलि १७ इंद्र १८ नाग १९ हिरण्य
२० निर्झर २१ शरहुन २२ चं
द्रकांत २३ शृंगार २४ सागर
२५ तडाग २६ जलाशय २७
अग २८ हर्यक्ष २९ तलक ३०
नाल ३१ सत ३२ दीक्षित ३३
अक्ष ३४ नाराच ३५ काच ३६ क
च ३७ कीचक ३८ चञ्चरीक ३९
चाणाक्य ४० चारण ४१ गण ४२
त्राण ४३ काण ४४ शोण ४५ सं
सार ४६ सारस ४७ हस ४८ अरि ४९
रसाल ५० साल ५१ कंकाल ५२ का
ल ५३ कलि ५४ शील ५५ खल ५६
अनल ५७ अर्क ५८ किञ्जल्क ५९
कल्क ६० कर ६१ शंकर ६२ कीर ६३
हीर ६४ लंकेश ६५ केश ६६ ॥

गर ६७ केशव ६८ देश ६९
लेश ७० आनंद ७१ नंदन ७२ ध
नञ्जय ७३ खञ्जरीट ७४ कीट ७५
अग्नि ७६ कण्ठक ७७ कटाह ७८
कटाक्ष ७९ यक्ष ८० दक्ष ८१ अंग
८२ यज्ञ ८३ जनक ८४ अंजलि
८५ यंत्र ८६ यत्न ८७ रत्नाकर
८८ अन्धक ८९ धराधर ९० धी
र ९१ क्षीर ९२ नासीर ९३ नारा
यण ९४ हस्त ९५ हृषीकेश ९६
॥ अथ निरोष्ठ्य स्त्रीलिङ्गशब्दाः
गङ्गा १ गीता २ सती ३ सीता
४ सिद्धि ५ संध्या ६ गदा ७
गया ८ आशीः ९ काशी १०
निशा ११ नाशा १२ कान्ति १३
शान्ति १४ दया १५ रसा १६ श्री
१७ निद्रा १८ हरिद्रा १९ हक्का
२० ज्ञाता २१ लाक्षा २२ धृति २३
कृति २४ छाया २५ जाया २६
कथा २७ कोला २८ धात्री २९
रात्रि ३० रति ३१ गति ३२ क
न्धारा ३३ धारणा ३४ धारा ३५
तारा ३६ कारा ३७ जरा ३८
धरा ३९ आजि ४० राजि ४१
रजनी ४२ आर्त्ति ४३ कीर्त्ति ४४
कन्या ४५ नदी ४६ नटी ४७ ना
री ४८ साध्वी ४९ दरी ५० दासी ५१
घटिका ५२ खटिका ५३ जटा
५४ कला ५५ हेला ५६ शिखा ५७
संख्या ५८ कालिंदी ५९ कलि
का ६० कला ६१ काली ६२ करा
ली ६३ दुर्गा ६४ ॥ अथ निरोष्ठ्य
क्लीबलिङ्गशब्दाः । चरण १
करण २ चक्र ४ नक्षत्र ५
लक्ष ६ रजत ७ शात ८ शरीर ९
क्षीर १० नीर ११ अक्षि १२ तीर
१३ धन १४ कनक १५ निधान
१६ ध्यान १७ संस्थान १८ दान १९
नलिन २० नगर २१ गात्र २२
छत्र २३ नेत्र २४ अक्षि २५ दा
त्र २६ आलिंगन २७ स्नान २८
शिरः २९ छिद्र ३० जल ३१ स्था
ल ३२ स्थाल ३३ कलत्र ३४ चित्र
३५ कीलाल ३६ जाल ३७ अल
क ३८ नाल ३९ दैन्य ४० लिंग
४१ अंग ४२ लाविन्य ४३ हिरन्य
४४ सैन्य ४५ शत्रु ४६ अजिन
४७ यान ४८ अस्तक ४९ का
ञ्चन ५० आनन ५१ कानन ५२ हा
टक ५३ नाटक ५४ नाल ५५ तै
ल ५६ चेल ५७ रसातल ५८ अट
न ५९ सदन ६० ज्ञान ६१ निदान
६२ दधि ६३ चंदन ६४ अन्तर ६५
लक्षण ६६ लत ६७ शास्त्र ६८


शास्त्र ६९ दले ७० हल ७१ ॥
अथ निरोष्ठ्य क्रियापदानि ।
आशास्ते १ अस्ति २ चकास्ति ३
निंदति ४ सृजति ५ आशंसति
६ क्रीडति ७ ध्यायति ८ अञ्चति
९ याचते १० घति ११ वहति १२
आराधयति १३ अस्यति १४ शेते ।
१५ गच्छति १६ यच्छति १७ इच्छ
ति १८ नयति १९ आयाति २०
हंति २१ ईहते २२ अश्नाति २३
स्नाति २४ ददाति २५ याति
२६ जयति २७ हसति २८ क
रोति २९ । इति कविकल्पल
तायां १ स्तबके २ कुसुमं ॥
शब्दकारः त्रि शब्दकारोनियः
यथा । सता महत्कारं पत्नीवैरं
कारं नराधमे । हन्तु कलह
कारोऽसौ शब्दकारः प्रधान
ले । इति भट्टौ ५ सर्गः ॥
शब्दग्रहः पुं कर्णः । इत्यमरः ॥
शब्दस्य ज्ञानञ्च ॥
शब्दनः त्रि शब्दकर्त्ता । तत्पर्या
यः रवणः १ इत्यमरः ॥ शब्द
मात्रे स्त्री ॥
शब्दभेदी पुं अर्जुनः । इति त्रि
काण्डशेषः ॥ धायुः । इति
केचित् ॥ बाणविशेषः । इति
रामायणं पुं अर्जुनः ॥ इति
शब्दवेधी पुं अर्जुनः । इति
धनंजयः ॥ दशरथराजः । यथा
लब्धशब्देन कौशल्या कुमारे
ण धनुष्मता । कुमारः शब्दवे
धीति मया पापमिदं कृतं ॥ इति
वाल्मीकीये रामायणे ६३ अध्या
यः ॥ शब्दवेधी इत्यमरः लक्ष्मकी
र्तिनेतियावत् । इति तट्टीका ॥
शब्दाधिष्ठाने स्त्री कर्णः । इति
हेमचंद्रः ॥
शम उप इद् य शमे । इति
कविकल्पद्रुमः । उ शमित्वा
शान्त्वा । भय शाम्यति । इद् अ
शमत् अशमीत् । अस्मात् पु
षादित्वाङ्गिन्ने उ इमने शमः
शान्तीभावः । शाशाम बेह्यपि ·
विनाद्वयाग्नि विति बहुः । शम
इति पदस्य ज्ञानस्यापि सम्भ
वे शान्तीकरणोध्यय मिति धा
तुप्रदीपः । वरेण शमिते लोका
नले दयुं हि ततपः । इति कुमार
संभवः । वचो निशम्याधिपति
र्दिवौकसां मित्यादावनेकार्थ
त्वात् श्रुत्वेत्यर्थः । वाशम धम ३
स्य त्र बाणाद्वस्य धवस्यावाचित्वाद
स्य जैमिनिये कस्यः शमयति इति

दुर्गादासः ॥
शम उ क म आलोचे । इति
कविकल्पद्रुमः ॥ आलोचः प्र
णिधानं । वा शम यम इत्यत्र
वा शब्दस्य व्यवस्थावाचित्वात्
अस्यस्वार्थे णौ ह्रस्वाभावः । उ
कं शामयते कार्यं सुधीः । म
शामयति शमयते । निशामय
तदुत्पत्तिं विस्तराद्गदतो मम ।
अथ आत्मनेपदीत्यन्ये । इति ।
दुर्गादासः ॥
शमः पुं शान्तिः । इत्यमरः ॥
मोक्षः । इति त्रिकाण्डशेषः ॥
पाणिः । इति शब्द शब्द टीका
यां रामाश्रमः ॥ उपचारः । इति
राजनिर्घण्टः ॥ अन्तरिन्द्रियनि
ग्रहः । इति वेदान्तसारः ॥
अन्तःकरणसंयमः । इति भग
वद्गीतादशमाध्यायस्य ४ श्लो
कटीकायां श्रीधरस्वामी । वि
क्षेपकर्म्मोपरमः । इति च तत्रै
व ६ अध्यायस्य ३ श्लोकटी
कायां श्रीधरस्वामी ॥
शमकः त्रि शान्तिकारकः । अ
न्ते शमधातोर्णक प्रत्ययेनानि
ष्पन्नः शमथः पुं शान्तिः इत्यम
रः ॥ मंत्री इति मेदिनी ॥

शमनं क्ली यज्ञार्थपशुहननं ।
इत्यमरः ॥ शान्तिः । इति मेदि
नी ॥ चर्वणं । इति धरणिः ॥
हिंसा । इति हेमचन्द्रः ॥
शमनः पुं यमः इत्यमरः ॥
मृगभेदः ॥ इति शब्दचन्द्रिका ॥
कलायः । इति राजनिर्घण्टः ॥
शमनस्वसा स्त्री यमुना । इत्य
मरः ॥
शमनी स्त्री रात्रिः । इति शमनी
षद शब्ददर्शनात् ॥
शमनीषदः पुं निशाचरः । रा
क्षसः । इति त्रिकाण्डशेषः ॥
शमलं क्ली विष्ठा । इत्यमरः ॥
पापं । इति संक्षिप्तसारोणादिवृ
त्तिः ॥
शमान्तकः पुं कामदेवः ॥ इति
त्रिकाण्डशेषः ॥
शमिः स्त्री शिम्बा । इति हेम
चंद्रः ॥
शमितः त्रि शान्तः । इत्यमरः ।
शमिरः पुं शमीवृक्षः ॥ इति
शब्दरत्नावली ॥
शमिरोहः पुं शिवः । इति
त्रिकाण्डशेषः ॥
शमी स्त्री वृक्षविशेषः । शाँइ
इति भाषा । तत्पर्य्यायः शक्तु

फला २ शिवा ३ । इत्यमरः ॥
शक्तुफली ४ इति शब्दरत्नाव
ली ॥ शान्ता ५ छेगा ६ कच
रिपुफला ७ केशमथनी ८ ईशा
नी ९ लक्ष्मीः १० तपनतनया ११
इष्टा १२ शुभकरी १३ हविर्ग
न्धा १४ मेध्या १५ दुरितदमनी
१६ शक्तुफलिका १७ समुद्रा
१८ मङ्गल्या १९ सुरभिः २० पा
पशमनी २१ भद्रा २२ शङ्करी २३
केशहन्त्री २४ शिवाफला २५
सुपत्रा २६ सुखदा २७ अस्याः
गुणाः । रूक्षत्वं कषायत्वं । र
क्तपित्तातिसार नाशित्वञ्च । त
त्फलगुणाः । गुरुत्वं । स्वादुत्वं ।
रूक्षत्वं । उष्णत्वं । केशनाशित्व
ञ्च । इति राजनिर्घण्टः । अपि
च शमी शक्तुफला तुङ्गा के
शहंत्रीफला शिवा । मङ्गल्या
च तथा लक्ष्मीः शमीरः स्वल्पि
का स्मृता ॥ शमीलता कटुस्ति
क्ता कषायरेचनी लघुः । कफ
कास श्वासकुष्ठार्शः कृमि
जित् स्मृता ॥ इति भावप्रका
शः । शिम्बा । छिमडा इति भाषा
इत्यमरः ॥ वाग्जिः । इति मेदिनी
शमी त्रि शान्तः । शमो विद्यते

ऽस्य इत्यर्थे इन् प्रत्ययेनानि
ष्पन्नः ॥
शमीकः पुं मुनिविशेषः । य
था । जलार्थमचक्षाणः प्रवि
वेश तमाश्रमं । ददर्श मुनि मा
सीनं शान्तं मीलितलोचनं । इति
श्रीभागवते १ स्कंधे १८ अध्या
यः ॥ असाध्यः । अचक्षाणः अप्र
श्नन् । तं प्रसिद्ध माश्रमं त
स्मिन् मुनिं शमीकं । इति
श्रीधरस्वामी ॥
शमीगर्भः पुं ब्राह्मणः ॥ अग्निः
इति हेमचंद्रः ॥
शमीधान्यं क्ली माषादिः । इत्य
मरः ॥ तत्पर्य्यायगुणाः । शमी
जाः शिम्बिजाः शिम्बातरवः स
प्रपञ्च वैदलाः । वैदला मधु
रा रूक्षाः कषायाः कटुपाकिनः
वातलाः कफपित्तघ्ना बद्धमूत्र
मलाहिमाः । ऋते मुद्ग मसूरा
भ्यां मन्ये त्वाध्मानकारकाः ॥
मुद्ग मसूरयो राध्मानकारित्व
मन्यवैदलापेक्षया न तु सर्वथा
पत्तयो ऽपि किंचिदाध्मान का
रित्व दर्शनात् । इति भावप्रका
शः ॥ अपि च । मुकधान्यं श
मीधान्यं समातीतं प्रशस्यते ।



परतो वानकटुत्वं प्रायेण।
तिनवं गुरु ॥ यव गोधूम मा
षाश्च तिलाश्चातिनवा हिताः
पुराणा विरसा रूक्षा न तथार्थ
करा मताः॥ इति राजवल्लभः॥
शमीपत्रा स्त्री लज्जालुवृक्षः।
इति जटाधरः ॥
शमीरः पुं अल्पाशमी। इत्य
मरः ॥
शम्पा स्त्री विद्युत्। इत्यमरः
शम्पाकः पुं आरग्वधः इत्य
मरः॥ विपाकः॥ धावकः ॥
इति हेमचंद्रः ॥
शम्पातः पुं आरग्वधः। इति
शब्दरत्नावली ॥
शंब गतौ इति कविकल्पद्रुमः
शंबति। इति दुर्गादासः ॥
शंबः पुं वज्रे॥ मुषलाग्रस्य
लोहमण्डलके। इति मेदिनी
॥लोहकाञ्च्यां। इति हेमचंद्रः॥
अनुलोमकर्षणं। इति शंबा
कृत शब्दटीकायां भरतः। द
रिद्रः। इति संक्षिप्तसारोणादि
वृत्तिः॥ भाग्यवति त्रि। इति
शब्दाश्रमः [?] ॥
शंबरं क्ली सलिलं ॥ व्रते [?]।
चित्रे। इति नानार्थरत्नमाला।
चित्रे॥ बौद्धव्रतविशेषः॥ इति
विश्व हेमचंद्रौ ॥
शंबरः पुं मृगविशेषः॥दैत्य
विशेषः इति मेदिनी॥मत्स्य
विशेषः॥ शैलविशेषः ॥
जिनभेदः। इति विश्वः॥युद्धे
श्रेष्ठः। इति धरणी॥चित्रक
वृक्षः॥ लोध्रः॥अर्जुनवृक्षः
इति राजनिर्घण्टः।शंबरासु
रस्य वधोपाख्यानं॥श्रीभागव
ते १० [?] स्कन्धे ५५ अध्याये द्रष्टव्यं
शंबरकंदः पुं वाराहीकंदः॥
इति राजनिर्घण्टः॥
शंबरचंदनं क्ली चंदनविशेषः
तत्पर्यायः। केशरं १ बहल
गन्धं ३ वर्ण्यं ४ गंधकाष्ठं ५
कैरातकं ६ शैलगन्धं ७।अ
स्य गुणाः। शीतलत्वं। तिक्त
त्वं।उष्णत्वं। श्लेष्मानिलश्रम
पित्त विस्फोट पामादि कुष्ठद
मा ताप विमोह नाशित्वञ्च।
इति राजनिर्घण्टः ॥
शंबरसूदनः पुं कामदेवः॥
इति हलायुधः॥
शंबरारिः पुं कामदेवः ॥
इत्यमरः॥
शंबरी स्त्री आखुपर्णी॥इति

मेदिनी॥ माया। इति शब्द
रत्नावली ॥
शंबलः पुं क्ली कूलं॥पाथेयं
मत्सरः। इति मेदिनी॥
शम्बाकृतं त्रि द्विवारकृष्टक्षेत्रं
तत्पर्यायः। द्विगुणाकृतं २
द्वितीयाकृतं ३ द्विहल्यं ४ द्वि
सीत्यं ५ इत्यमरः ॥
शंबुः पुं शंबूकः यथा।शंबू
शंबुकः कः शांबुको ज्ञेयः एवं
कांतस्तु सर्वदा।ककारेण वि
नाशेषो दृश्यते ग्रन्थविस्तरे।
इति रुद्रचंद्रः। इत्यमरटीका
यां भरतः॥
शंबूकः पुं शम्बूकः इति श
ब्दरत्नावली ॥
शंबूकः पुं स्त्री जलजंतुविशेषः
शामुक् इति भाषा तत्पर्यायः
जलशुक्तिः २ इत्यमरः॥
शम्बूका ३ शंबुकः ४ शंबूकः
५ शांबुकः ६ शंबुः ७ शांबूकः
८ इति शब्दरत्नावली॥जलडि
म्ब ९ दुश्चरः १० पंकमण्डूकः ११
इति हारावली ॥
शंबूकः पुं गजकुंभांतभागः।
घोंगः। क्षुद्रशंखः ॥ इति
मेदिनी। दैत्यविशेषः ॥ शू
द्रः॥इति हेमचंद्रः॥क्षुद्र [?]
शंखः। इति राजनिर्घण्टः॥
शंबूका स्त्री जलशुक्तिः। इति
राजनिर्घण्टः ॥
शम्भलः पुं ग्रामविशेषः।अ
धुना सम्बलमोरदाबाद इति
नाम्ना ख्यातः। तत्र षष्टितीर्था
निसंति कल्की चाविर्भूय सह
स्रसमाः स्थास्यति। यथा शम्भ
ले वसतस्तस्य सहस्रपरिवत्सराः
अतीता भ्रातृ पुत्र स्व ज्ञाति
संबन्धिभिः सह॥ शम्भले
शुशुभे श्रेणी सभापणक च
त्वरैः।पताका ध्वज विद्योघै र्म
घेन्द्रस्यामरावती॥यत्रासे ष
ष्टितीर्थानां सम्भवः शम्भलेः
भवत्। मृत्यो मोक्षः क्षितौ क
ल्के रेकल्कस्य ह्याश्रयः॥
वनोपवन सन्तान नाना कु
सुम पंक्तिलैः शोभितं शम्भल
ग्रामे मध्ये मोक्षायतनं शुचिम [?]
ही माश्रास भगवान् निजज
नकुलोदामः।शम्भलग्राम वि
प्रर्षि मान्विवेश पराम्भकः [?] सम
सा विष्णुयशसा गर्भं माधव
वैष्णवं द्वादश्यां शुक्लपक्षस्य
माधवे मासि माधवः।जातो



दृष्टवान्तः पुत्रे पितरौ हृष्टमा
नसौ । धात्री माता महाषष्ठी
नाडीच्छेत्री तदाम्बिका ॥ ग
ङ्गोदक क्लेदमोक्त्री सावित्री।
मार्ज्जनोद्यता । तस्याविर्भावे र
नेतस्य मातृकादात् पयः सु
धां॥ समति स्ते सुते लब्ध्वा वि
ष्णुं जिष्णुं जगत्प्रभुं । पूर्णका
माविप्रमुख्यानां रूपादात् गवां
शते ॥ तेबालकं नराकारे वि
ष्णुं मत्वा मुनीश्वराः । कल्कि
कल्क विनाशार्थ माविर्भूतं
विदुर्बुधाः॥ नामाकुर्वंस्तत
स्तस्य कल्कि रित्यभिविश्रुते
इति कल्किपुराणे २ अध्यायः
शम्भुली स्त्री कुट्टनी। इत्यम
रः॥ शम्भुः पुं शिवः । इत्यमरः
ब्रह्मा ॥ अर्हन् इति मेदिनी ॥
विष्णुः॥ इति हलायुधः॥ सिद्धः
इति शब्दरत्नावली। श्वेतार्कः
इति शब्दचन्द्रिका ॥
शम्भुतनयः पुं कार्त्तिकेयः।
इति शब्दरत्नावली। गणेशश्च
शम्भुनन्दनः पुं गणेशः। इति
शब्दरत्नावली। कार्त्तिकेयश्च
शम्भुप्रिया स्त्री आमलकी ॥
इति शब्दचन्द्रिका ॥ दुर्गा च
शम्भुवल्लभं क्ली श्वेतकमलं।
इति राजनिर्घण्टः॥ शिवप्रिये वि
शम्या स्त्री युगकीलकः । इत्य
मरः॥ दक्षिणहस्ते गृहीत ताल
विशेषः। इति संगीतशास्त्रं ॥
शम्याक्षेपः पुं भ्रमितक्षिप्तयष्टि
प्राप्त यावत् भूप्रदेशः । यथा।
भ्रामयित्वा बहुगुणे यष्टिः क्षि
प्तासमाप्नुयात् भुवः प्रदेशं या
वन्तं शम्यापातः स उच्यते ॥ इ
ति मार्कण्डेयपुराणे ॥ विविं
शचविते नामाध्यायः ॥
शयः पुं हस्तः। इत्यमरः॥ श
य्या॥ सर्पः॥ इति मेदिनी ॥ नि
द्रा॥ पणः। इति विश्वः॥
शयण्डः त्रि निद्राशीलः ॥
इत्युणादिकोषः ॥
शयतः पुं निद्रालुः। इति सं
क्षिप्तसारोणादिवृत्तिः ॥
शयथः पुं अजगरः॥ मत्स्यः॥
निद्रालुः इति हेमचन्द्रः॥ वरा
हः॥ मत्स्यः। इति संक्षिप्तसारो
णादिवृत्तिः ॥
शयनं क्ली निद्रा॥ शय्या। इत्य
मरः ॥ मैथुने। इति मेदिनी ॥
अथ सर्वदेवशयनकालः ॥
पुलस्त्य उवाच। यदाषाढ़ी स

मायाति व्रजते चत्तरायणं।
तदा स्वपिति देवेशो भोगि
भोगे श्रियः पतिः ॥ प्रतिसु
प्ते विभौ तस्मिन् देव गन्धर्व
गुह्यकाः । देवानां मातर श्चा
पि प्रसुप्ता श्चाप्यनुक्रमात् ॥
नारद उवाच । कथयस्व सुरा
दीनां शयने विधिमुत्तमं । सर्वं
ह्यनुक्रमेणैव पुरस्कृत्य जना
र्द्दनं। पुलस्त्य उवाच। मिथुना
भिगते सूर्य्ये शुक्लपक्षे तपोध
न। एकादश्यां जगत्स्वामिशयनं
परिकल्पयेत् ॥ शेषाहि भोग
पर्य्यङ्कं कृत्वा सम्पूज्य केशवं ।
कृत्वोपवीतकञ्चैव सम्यक् सं
पूज्य च द्विजान् । अनुज्ञां ब्रा
ह्मणेभ्यश्च द्वादश्यां प्रयतः शु
चिः लब्ध्वा पीताम्बरधरं स्वस्ति
निद्रां समानयेत् ॥ त्रयोदश्यां
ततः कामः स्वपते शयनेषु
भे। कदम्बानां सुगन्धानां कु
सुमैः परिकल्पिते। चतुर्दश्यां
ततो यक्षाः स्वपन्ति सुखशीत
ले। सौवर्णपङ्कजकृते सुखास्ती
र्णोपधानके ॥ पौर्णमास्यां उमा
नाथः स्वपते चर्म्मसंस्तरे । वैया
घ्रेच जटाभारं समुद्ग्रथ्य ।
त्वचर्म्मणा ॥ ततो दिवाकरो
राशिं संप्रयाति च कर्कटं ।
ततो ऽमराणां रजनी भवते
दक्षिणायनं ॥ ब्रह्मा प्रतिप
दितिथ्यां नीलोत्पलदले ऽनघ
तल्पे स्वपिति देवानां दर्शय
न्मार्गं मुत्तमं। विश्वकर्म्मा द्वि
तीयायां तृतीयायां गिरेः सुता
विनायक श्चतुर्थ्यान्तु पंचम्या
मपि धर्म्मराट्। षष्ठ्यां स्कन्दश्च
स्वपिति सप्तम्यां भगवान्रविः
कात्यायनी तथाष्टम्यां नवम्यां
कमलालया। दशम्यां भुजगें
द्राश्च स्वपंति वायुभोजनाः। ए
कादश्यान्तु कृष्णायां साध्या
ब्रह्मन्स्वपन्ति हि। एवं क्रमेण वै
द्विजा निशायां शयने गते स्वप
त्स्वेतेषु देवेषु प्रावृट्कालः स
मायातौ। कङ्काः शैले बलाका
श्च रोहन्ति नगोत्तमान् । वा
यसा श्चापि कुर्वन्ति नीडानि
मुनिपुङ्गव । वायस्यश्च तथैवे
ताक्रान्ता गर्भभारालसाः। यस्यां
तिथ्यां प्रस्वपिति विश्वकर्म्मा
प्रजापतिः । द्वितीयायां शुभा
भूरूपा सुरूपा शयनोदिता।
तस्यां तिथावभ्यर्च्य शङ्खं श्रीवत्स

कृ चतुर्भुजे ॥ पर्य्यङ्कस्थं स
मेलक्ष्म्या गंधपुष्पादिभि र्मु
ने ततो देवाय शय्यायां फला
नि प्रतिपेत्क्रमात् । सुरभीणि
निवेद्येश्चं विज्ञाप्यामधुसूदनः
यथा हि लक्ष्म्या न वियुज्यसे त्वं
त्रिविक्रमानंत जगन्निवास । त
थास्त्वशून्यं शयनं सदैव त्व
स्माकमेवेह तव प्रसादात् । त
दा त्वशून्यं तव देव तल्पं स्वयं
हि लक्ष्म्या शयने सुरेश । सत्येन
तेनामितवीर्य्य विष्णो गार्हस्थ्यना
शो मम चास्तु देव ॥ इत्युच्चार्य्य
प्रणम्यैष प्रसाद्य च पुनः पुनः
नक्तं भुञ्जीत देवर्षे तैलक्षार
विवर्जितं ॥ द्वितीयेऽह्नि द्विजा
ग्राय फलं दद्याद्विचक्षणः ल
क्ष्मीधरः प्रीयतां मे इत्युच्चार्य्य नि
वेदयेत् ॥ अनेन तु विधानेन ।
चातुर्मास्यव्रतं चरेत् । यावद्वृ
श्चिकराशिस्थः प्रतिभाति दि
वाकरः ॥ ततो विबुध्यंति सुराः
क्रमशः क्रमशो मुने । नभस्य
मासि च तथा या स्यात् कृष्णा
ष्टमी शुभा । युक्ता मृगशिरेणैव
सा तु कामाष्टमी स्मृता तस्यामेवं
पुलिनेषु निद्रां स्वपिति शंकरः

वसते सन्निधाने तु तत्र रुद्राश
या स्मृता । इति वामने १६ अ
ध्यायः ॥ अथ हरिशयनादिव्य
वस्था । भविष्य नारदीययोः ॥
मैत्राद्यपादे स्वपितीह विष्णुर्वै
ष्णवमध्ये परिवर्त्तते च । पौ
ष्णावसाने च सुरारिहंता प्रबुध्य
ते मासचतुष्टयेन ॥ मैत्रमनुरा
धा । वैष्णवं श्रवणा । पौष्णं रेव
ती । भविष्ये । निशि स्वापो दि
वोत्थानं संध्यायां परिवर्त्तनं ।
अन्यत्र पादयोगे तु द्वादश्यामे
व कारयेत् ॥ इत्यत्र नक्षत्रयो
गः शोभा फलातिशयः । एतद्वि
धानं वामनपुराणे । एकादश्यां
जगत्स्वामिशयनं परिकल्पये
त् । शेषाहि भोगपर्य्यंके कृत्वा
संपूज्य केशवं ॥ अनुज्ञां ब्राह्म
णेभ्यश्च द्वादश्यां प्रयतः शुचिः
लब्ध्वा पीताम्बरधरं देवं निद्रां
समानयेत् । अनुज्ञां लब्ध्वा तु
इत्यन्वयः । एकादशीसमये दिवा
शयनीयकल्पनं रात्रौ द्वादशी
लग्ने निद्रेति । विष्णुधर्म्मोत्तरे ।
स्वास्तीर्णशयनं कृत्वा पीताये
द्रोणपुष्पार्च्चिते । आषाढ शुक्लद्वा
दश्यां विष्णुलोके महीयते ॥

स्वास्तीर्णशयने शोभनास्तरणे
युक्ते खट्वादि । वराहपुराणे श्री
भगवानुवाच । अन्यत्तु संप्रवक्ष्या
मि कर्म संसारमोचनं कदंब
कुटजं चैव यवकोर्ज्जुनकस्तथा
एभि रभ्यर्च्चने कुर्य्याद्धि विधि
ष्टेन कर्म्मणा । ततः संस्थापनं
कृत्वा मम मंत्रविधिः स्मृतः ।
नमो नारायणायेत्युक्त्वा इमं मंत्र
मुदीरयेत् पश्यन्तु मेघाश्चापि मे
चतुर्मासे सुपार्श्वे तु क्षिप्यमाणो
मही मिमां । निद्रां भगवान्रक्षा
तु लोकनाथ वर्षास्विमं पश्य
तु मेघवृन्दं ॥ ज्ञात्वैव पश्यैव च
लोकनाथ मामाश्रुतानि वैकुंठ
स्य च पश्य नाथ आषाढ शु
क्लद्वादश्यां सर्वशांतिकरं शिवे
यदृते विधानेन भूमि मे कर्म्म
कारयेत् ॥ सप्तमानन्तप्रमाणेष
संसारेषु युगे युगे । शायनेऽ
टज विधानात् विष्णुधर्म्मोत्तरी
यनिषेधो । सत्रा धवकः कपि
त्थः संस्थापनं समापनं भूमि
रिति पृथिव्याः संबोधनं । एवमु
क्तेन मंत्रेण कृत्से स्थापयेत्ततः
सुप्ते त्वयि जगन्नाथ जगत्सुप्तं
भवेदिदं ॥ विबुद्धे त्वयि

बुध्येत जगत्सर्वं चराचरं । इति
महेन्द्रेण पूजयेत् ॥ प्राप्ते भा
द्रपदे मासि एकादश्यां सि
तेऽहनि । कटदाने भवेद्विष्णो
र्महापूजा प्रवर्त्तते ॥ कटदाने
पार्श्वपरिवर्त्तनः । कामरूपीयानि
तन्ये । एवं संपूज्य विधिवत् भा
द्रस्य द्वादशीदिने । मंत्रेणानेन
देवेशं पार्श्वेन परिवर्त्तयेत् ॥
वासुदेव जगन्नाथ प्राप्तेयं द्वा
दशी तव । पार्श्वेन परिवर्त्तस्व
सुखं स्वपिहि माधव ॥ त्वयि
सुप्ते जगन्नाथ जगत्सुप्तं भवे
दिदं विबुद्धे त्वयि बुध्येत जग
त्सर्वं चराचरं ॥ ब्रह्मपुराणे ॥
एकादश्यां तु शुक्लायां कार्त्ति
के मासि केशवं । प्रसुप्तं बोध
येद्रात्रौ श्रद्धाभक्तिसमन्वितः ।
रात्रौ प्रसुप्तमासिन्यन्वयः बोधयेत्तु
दिवैव । कृत्वा वैष्णव कर्म्माणि
द्वादश्याममरानरः । मंत्रेण वै
धनार्थाय हेम चंद्रमुदीरयेत् ।
महेन्द्र रुद्रैरभिनूयमानो भवा
नृषिर्वंदित वंदनीयः । प्राप्ता त
वेयं किल कौमुदाख्या जागृहि जा
गृहि च लोकनाथ ॥ मेघा गतानि
र्मलपूर्णचंद्रः शारद्यपुष्पाणि च लो

कृताय अर्हे ददानीति चतुरण
हे तो जागृहि जागृहि च लोक
नाथ ॥ एवं कर्म्माणि कुर्व्वीर
न् द्वादश्यां ये यथाशक्ति मम भ
क्तानरश्रेष्ठ ते यान्ति परमां गतिं
अत्र मन्त्रद्वय पाठानन्तरं उत्ति
ष्ठोत्तिष्ठ गोविन्द त्यज निद्रां ज
गत्पते। त्वया चोत्थीयमानेन
उत्थितं भुवनत्रयं ॥ इति संप्र
दायागतस्तृतीयः श्लोक इति
वाचस्पतिमिश्राः। शयनोत्थान
मन्त्रास्तु कल्पतरु प्रभृतिग्रन्थ
संवादालिखिताः। तदेवं द्वाद
श्यां एकादश्यां वा रेवत्यन्तपाद
योगवशात् दिवोत्थाने नक्षत्रयो
गाभावे तु द्वादश्यामेव कार्य
मेवेति गुरुचरणाः ॥ जीमूतवा
हनस्तु भविष्ये। आ भा कार्त्तिक
पक्षेषु मैत्रश्रवण रेवती। आदि
मध्यावसानेषु प्रस्वापावर्त्तने दो
हने ॥ आ भा का सितपक्षेषु
आषाढ़भाद्रकार्त्तिक शुक्लपक्षे
षु मध्यान्तु द्वादश्यांशो धुवः
कृत्यः भविष्यपुराणे निषिद्धो
योऽदिवोत्थाने सन्ध्यायां परिवर्त्तने
शयने पादयोगे तु द्वादश्यामे
व कारयेत् ॥ विष्णुधर्म्मोत्तरे।

विष्णुर्दिवा न स्वपिति न रात्रौ प्र
तिबुध्यते। द्वादश्या मृक्ष संयो
गे पादयोगो न कारणं ॥ अ
प्राप्ते द्वादशीऋक्षे उत्थानशय
ने हरेः। पादयोगेन कर्त्तव्यं नाहो
रात्रे विचिन्तयेत् ॥ वचनान्तरं
रेवत्यन्ते यदा रात्रौ द्वादश्या
च समन्वितः। तदा विबुध्यते
विष्णुर्दिनान्ते प्राप्य रेवतीं ॥
दिनान्ते त्रिधाविभक्त दिन तृ
तीयभागे दिवोत्थानमित्यनु
रोधात्। अतएव रात्रौ विबोधो
विनिहन्ति पौरान् ॥ स्वापादि
वा राष्ट्र कुलं नृभर्त्तुः संध्या
द्वये स्वल्पफला धरित्री भवे
न्नराणामपि रोग दुःखं ॥ इति
स्मृतिः। वराहपुराणे। द्वादश्यां स
न्धिसमये नक्षत्राणामसम्भवे।
आ भा कासितपक्षेषु शयनावर्त्त
नादिके ॥ तदेवं शयनादौ काल
चतुष्टयं। द्वादश्यां निशादौ
नक्षत्रयोगः। तदभावेऽपि निशाद्य
न्तदेशेन निशान्ते पादयोगः
तस्याप्यभावेऽपि सन्ध्यायां नक्ष
त्रमात्रयोगः। तस्याप्यभावे द्वा
दश्यां सन्ध्यायामिति। वि
ष्णुधर्म्मोत्तरे। किं तन्मे ॥

आद्यपादेन दशांस्पर्शेन योगदि।
वा। पौष्णशेषेण किं तेन प्र
तिपद्यत्र यो निशि ॥ इति द्
वादशी प्रतिपद्ये निषेधादेकाद
श्यादि पौर्णमास्यन्तानां तिथी
नां सम्भवत्वात् ॥ पद्मपुराणे।
सर्व्वदेवशयनादिकमुक्तं यथा
प्रतिपद्धनदस्योक्ता पवित्रारो
हणे तिथिः। श्रिया देव्या द्वि-
तीया तु तिथीनामुत्तमा स्मृता
तृतीया तु भवान्याश्च चतुर्थी त
त्सुतस्य च। पञ्चमी सोमराज
स्य षष्ठी प्रोक्ता गुहस्य च ॥ सप्त
मी भास्करस्योक्ता दुर्गाया श्चा
ष्टमी स्मृता। मातॄणां नवमी प्रो
क्ता दशमी वासुकेस्तथा। एकाद
श्यृषीणान्तु द्वादशी चक्रपा
णिनः। चक्रपाणिन इति पाठ
श्चेव हार इत्यस्मात्। त्रयोदशी
त्वनङ्गस्य शिवस्योक्ता चतुर्दशी
मम चैव मुनिश्रेष्ठ पौर्णमासी ति
थिः स्मृता। यस्य यस्य तु देवस्य यन्
त्वं तिथिस्त्रिया। तस्य देवस्य त
स्मिंश्च शयनावर्त्तनादिकं। अत्र
हरिशयनादावाषाढ़ादि विधाना
त् तस्या हृच्चर्यादेर्षा अपि तथा
ज्ञेया इति शेषः। अजति यदा मिथु

नं विहायकर्कं राजा विवर्ज्जितो ति
थिं सूर्य्यः। भवति तदा नियतं हि
राषाढः सुरशयनादि विधि द्वि
तीये मासि ॥ राज्ञा चन्द्रेण विव
र्ज्जितो अमावास्या। एवं कृष्णपक्षे
मिथुने संक्रान्ते इति शेषः। इ
ति नाथोपाध्यायास्तु। यमः ॥
क्षीराब्धौ शेषपर्य्यङ्के आषाढ्यां
संविशेद्धरिः। निद्रां त्यजति का
र्त्तिक्यां तयोः संपूजयेत् सदा ॥
ब्रह्महत्यासमं पापं क्षिप्रमेव
व्यपोहति। हिंसात्मकैस्तु किं त
स्य यज्ञैः कार्य्यं महात्मनः ॥
प्रस्वापे च प्रबोधे च पूजितो ये
न केशवः। आषाढ़ शुक्लैका
दशीमारभ्य पौर्णमासी पर्य्यन्तं
विष्णोर्निद्रा ग्रहणरूप शयन
समयः। अतएव एकादश्यांपा
यन मभिधाय तदादि दिनपञ्च
के कर्म्म कथनं ब्रह्मपुराणे।
वराहपुराणीयेन तु। एकादशीका
लीन मंत्रे निद्राग्रहणाभिधानं।
यम स्मृतौ पौर्णमास्यां शयना
भिधानं। आषाढ्यामेकस्यानुपाये
स्यैव मन्तेः एवञ्च ब्रह्मपुरा
णे यद्येकादश्यां प्रबोधनम्
तं तथापि तदादि दिन पञ्चक

मेवच प्रबोध समयः तेनवाम
हपुराणे द्वादश्यां प्रबोधाभिधा
ने यमस्तैतो कार्त्तिकां प्रबोधा
भिधाने सर्वं समञ्जस मिति ।
एव मेव श्रीदत्तोपाध्यायाः । क
ल्पतरुस्तु एकादश्यामेव शयने
प्रबोधञ्च । यमस्मृतावाषाढी का
र्त्तिकीपद मेकादशी परं आ
षाढस्येयं कार्त्तिकस्येय मिति
श्रुत्यश्या न तत्सम्यगनुपपत्तेः
अपवाद विषयके क्वचिदुक्त
मे भवत्वे रित्याह । श्रीभगवद्धाक्
मत्सशयेन मद्रूस्थाने मत्पार्श्वे
परिवर्त्तने । फल मूल जला
हारी हृदि शल्यं समर्पयेत्
फलाहारपद मनशनपरं । ते
न सर्वथा अनशनपरत्वे इत्ये
कादशीतत्वे ॥ सर्ग्यानां ।
शयन विधि निषेधौ यथा ।
मनुरुवाच । उपास्य पश्चिमां
सन्ध्यां हुत्वाग्नीं स्तानुपास्य च
भृत्यैः परिवृतो भुक्त्वा नाति
तृप्तो ऽथ संविशेत् ॥ शुचिदे
शे विविक्ते तु गोमयेन तु ले
पयेत् प्रागुदक् प्रवणे चैव
संविशेत्सदा बुधः ॥ प्राक्शि
राश्च स्वपेद्विद्वान् तथा वै दक्षिणा

शिराः । स्वपेदुदक्शिरा नैव न
चाप्रत्यक्शिरा नच । नचानतर्हि
तहीने तु न तिर्य्यक् च कदाचन
शून्यालये श्मशाने तु एकवृ
क्षे चतुष्पथे । महादेवगृहे चापि
मातृवेश्मनि न स्वपेत् ॥ न य
क्षनागायतने स्कन्दस्यायतने
तथा दर्भगुच्छविनादीष्टो नस्व
पेच्चकथञ्चन ॥ धान्यगोहेचवि
प्राणां गुरूणाञ्च तथोपरि । ना
शुचौ पर्णकीर्णे तु नाशुचि र्नी
शिरस्तथा ॥ दिने सन्ध्ये न न
ग्नश्चनोत्तरापरमस्तकः । नाका
शेपर्वते शून्ये न च चैत्यद्रुमे त
था ॥ न तु द्वारे रक्तसाकीर्णे ना
र्द्रपादस्तथाविनः । पालाशे शय
ने नैव वङ्कादाहृते न च ॥ नदग्धे
विद्युता चैव क्लिष्टे जले त
था । न स्वपेत् संध्ययो र्नि
न शिरस्पासने कटे ॥ एवं स
मन् नरोनित्यं सुखस्येह पर
त्र भाक् अत्यथेच भवेद्दुःखीम
तो नरक मश्नुते ॥ इति वह्नि
पुराणे आह्निकतत्त्वनामाध्या
यः ॥ अपिच । सति सर्वेषा
ग्याच नपातनीया सर्वेष्वादयात्
सर्वे शुक्लोत्तानीया । तथाच स्मृतिः

भास्कराद्दह शय्यानि नित्याग्नि
सलिलानिच सर्वथावलोकि
दीपानि लक्ष्या वेश्मानि भाज
ने । आसने वसने शय्या जाया
पत्यक मंडलुः । आत्मनश्शुचि रे
तानि नपरेषां कदाचन ॥ न
कदाचनदस्यानुमतिं विना अन्य
शय्यातिथ्यानुपपत्तेः । व्यासः । शु
चौ देशे विविक्ते तु गोमयेनोप
लिप्तके । प्रागुदक्प्लवने चैव
संविशेत्तु सदा बुधः ॥ माङ्गल्यं
पूर्णकुम्भञ्च शिरःस्थाने निधा
पयेत् । वैदिकै गारुडै मंत्रै र
क्षां कृत्वा स्वपेत्ततः ॥ गर्गः ।
स्वगृहे प्राक्शिराः शेते आयुष्ये
दक्षिणशिराः । प्रत्यक्शिराः प्र
वासेतु न कदाचिदुदक्शिराः ।
मार्कण्डेयपुराणे । प्राक्शि
राः शयने विद्यात् धन मायुश्च
दक्षिणे । पश्चिमे प्रबलां चिंतां
हानिं मृत्युंतथोत्तरे ॥ तथा । न
मस्कृत्याव्यये विष्णुं समाधि
स्थः स्वपेन्निशि । मार्कण्डेयः । शू
न्यागारेश्मशानेच एकवृक्षे च
तुष्पथे । महादेवगृहेचापि मातृ
गृहे लेपङ्कपांशुषु । धान्यगो विप्र
देवानां गुरूणाञ्च तथोपरि । न

चापि भग्नशयने नाशुचौ ना
शुचिः स्वयं ॥ नार्द्रवासा ननग्नश्च
नोत्तरापरमस्तकः । नाकाशेस
र्व्वशून्येच नच चैत्यद्रुमे तथा ।
न स्वपेद्दिवसेपि ॥ इत्याह्निकाचा
रतत्वे ॥ अन्यच्च । भुक्त्वाच वि
प्रियतमेन हिंसा भुक्तावशिष्ट
कं । समुद्राद्योपवर्जने स्वपेत्
शुक्लपक्षो निशि ॥ नोत्तराभिमु
खः स्वप्यात् पश्चिमाभिमुखोन
च नचाकाशेननग्नो वा नाशु
चि र्नासने क्वचित् ॥ नशीर्णायां
तु खट्वायां शून्यागारे नचैव हि
नाग्निवंशे च पालाशे शयने
वा कदाचन ॥ इति कौर्म्मे उप
विभागे ए अध्यायः ॥ अपिच
कृतपादादिशौचश्च भुक्त्वासा
यंततो गृही । गच्छेत् शय्यांसम
ग्रां तु वारुदारुनिर्म्मितां ॥
पलाशस्य कदम्बस्य नीप चैव
हेत कस्यच किंशुकस्य वरस्याथ
तथा कुशमयस्यच ॥ आरोहणा
त्तमवेन्न पापं तस्मात्तेषु न च स्व
पेत् ॥ शयन शय्यां स्वे नाप्र
र्वोपवसेत्सरि ॥ न शुके ना
पविश्रे च न हते नच भर्त्तने ।
तलिकायां तथाचवे शय्याभावे

स्वपेद्गृही ॥ स्वपेन्न पटुवंशेच
कलंकी कंबलेषुच । इति म
त्स्यसूक्ते ४४ पटलः ॥
अपिच सूर्य्येणाभ्युदितो यस्तु
त्यक्तः सूर्य्येण यः स्वपन् । अ
न्यत्रातुरभावाच्च प्रायश्चित्तीय
ते नरः ॥ इति विष्णुपुराणे ३
अंशे ११ अध्यायः ॥ यस्मिन्
सुप्ते सूर्य्य उदेति स सूर्य्येणा
भ्युदितः ॥ यस्मिन् सुप्ते अस्तमेया
ति स सूर्य्येणाभ्यक्तः सूर्य्योद
यास्तसमययोः स्वपन् प्राय
श्चित्तीयते पातकी भवेदित्य
र्थः । इति तट्टीका च । विष्णु
श्चासीनश्चो सम्मुत्थान स्वान् हि
१८ पार्श्वे च दक्षिणे । ततः स्व
स्तिशयनात् ३२ वामे पश्चात् स्व
प्यात् यथासुखं ॥ वामदिशा
यामनलो नाभ्ये र्द्धमस्ति जंत
नो । तस्मात्तु वामपार्श्वे शयीत
भुक्तपाककाङ्क्षया ॥ इति भाव
प्रकाशः ॥
शयनीयं क्ली शय्या । इत्यमरः
शयनयोग्ये त्रि ॥
शयनीयकं क्ली शय्या । इति
शब्दरत्नावली ॥ शयानकः
पुं सर्पः । इत्युणादि ॥

कोषः ॥ कृकलासः । इति हे
मचन्द्रः ॥
शयालुः त्रि निद्रालुः । इत्यम
रः ॥ शयालुः पुं अजगरः ॥
कुक्कुरः । इति हारावली ॥
शयितः त्रि निद्रालुः । इत्यमरः
वसंतकुसुमे पुं । यथा । वसं
तकुसुमः शेलुः शयितो हि
जकुक्षितः । इति शब्दमाला
शयने क्ली ॥
शयितवान् त्रि निद्रालुः । शी
ङ्. धातोः क्तवतु प्रत्ययेन नि
ष्पन्नः ॥
शयुः पुं अजगरः । इत्यमरः ।
शयुनः पुं अजगरः । इत्युणा
दिकोषः ॥
शय्या स्त्री गुम्फनं । इति मेदि
नी । शीयते यस्यां । तत्पर्य्यायः
शयनीयं २ शयनं ३ । इत्यमरः
तल्पं ४ इति जटाधरः ॥
शयनीयकं ५ इति शब्दरत्ना
वली ॥ तस्या गुणाः । सुखश
य्यासने सेव्ये निद्रा पुष्टि धृति
प्रदे । श्रमानिलहरं प्रोक्तं वि
परीतं मतोऽन्यथा ॥ भूशय्यानि
लपित्तघ्नी बृंहणी शुक्रवर्द्धि
नी । खट्वा तु वातला प्रोक्ता पट्टो

दोषाति वातलः ॥ इति राज
वल्लभः ॥ अपि च त्रिदोष
शमनी खट्वा तूली वातक
फापहा । भूशय्या बृंहणी वृष्या
काष्ठपट्टी तु वातला ॥ अन्यत्
पुनराह । भूशय्या वातलातीव
रूक्षापित्तास्र नाशिनी । सुख
शय्याशयने हर्षपुष्टि निद्रा धृति
प्रदं ॥ श्रमानिलहरं वृष्यं विपरी
त मतोऽन्यथा । इति भावप्र
काशः ॥ तद्गमनविधानं यथा
कृतपादावशौचस्तु भुक्त्वा सा
ये ततो गृही । गच्छेच्छय्या
मस्फुटिता मेवदारुमयीं न्टप
नाविशाला नवै भग्नां नासमा
मलिनां नच । नच जन्तुमयीं श
य्या मधिगच्छेदनास्तृतां ॥
इति विष्णुपुराणे ३ अंशे ११
अध्यायः ॥ तद्दान फले य
था । याज्ञवल्क्यः गृह धान्या
भयोपानच्छत्रमाल्यानुलेपने
याने वृक्षे प्रिये शय्यां दत्वात्य
न्त सुखी भवेत् ॥ प्रियं यद्य
स्य हर्म्यादि । प्रतिग्रह सम
र्थेन शय्यान प्रतिग्राह्या ॥
यथा याज्ञवल्क्यः । कुशाः शाके
पयो मत्स्या गंधाः पुष्पं दधि

क्षितिः । मांसशय्यासनेधानाः
प्रत्याख्येयं नवारिच ॥
मृतोद्देशकदत्त शय्या ग्रहणे
दोषो यथा । ब्रह्मपुराणे । श
य्यालंकार वस्त्रादि प्रतिगृह्य मृ
तस्यच । नरकान्न निवर्त्तेत प्रेतं
तिलमयी तथा ॥ सा च उ
त्तानाङ्गिरोदेवताका । यथा ॥
छत्रे कृष्णाजिने शय्या रथमा
सन मेवच । उपानहौ तथाया
ने तथा यत् प्राणवर्जितं ॥
उत्तानाङ्गिरसस्त्वेतत् प्रतिग्राही
तमानवः । इति शुद्धितत्वं ॥
पुष्पाभिषेके शय्यापट्टकं य
था सर्वरत्न मलंकारं पट्ट
काञ्च हिरण्मकं । हस्तविस्ता
र उच्छ्रायेहस्तोगुल्फः सुशोभने
स्तनाढ्यं सार्द्धहस्तं तु पट्टं हे
मसमन्वितं । शय्यायांहित
णा दैर्घ्याद्धनुर्मानं सपीठकं
इति देवीपुराणे ॥ त्रैलोक्या
भ्युदयपादे पुष्पाभिषेकनामा
ध्यायः ॥
शरं क्ली जले । इति मेदिनी ॥
शरः पुं बाणः । इत्यमरः ॥
दध्यग्रभागः । इति मेदिनी ॥
दुग्धाग्रस्य नामान्तरं । संतालि



कः ॥ दधिशरस्य नामान्तरं । द
धिसारः । दधिस्नेहः कट्वरञ्च । इ
इति रत्नमालादयः ॥ तृणवि
शेषः । कौंडा इति हिंदीभाषा
तत्पर्य्यायः । इषुः २ काण्डः ३
बाणः ४ शुञ्जः ५ तेजनः ६ गु
न्द्रकः ७ इति रत्नमाला ॥ उत्
कटः ८ शायकः ९ क्षुरः १० इ
क्षुरः ११ क्षुरिकापत्रः १२ वि
शिखः १३ अस्य गुणाः । मधु
रत्वं । सतिक्तत्वं । कोमलत्वं । क
फश्रोति मदापहत्वं । बल
वीर्य्यकारित्वं । नित्यं निषेवि
तं चेत् किंचिद्वातकारित्वञ्च
इति राजनिर्घण्टः ॥ अपि च ।
भद्रमुञ्जः शरो बाणस्तेजनश्चे
क्षुवेष्टनः । मुञ्जो मुञ्जातको
बाणः स्थूलदर्भः सुमेधसः ॥
मुञ्जद्वयन्तु मधुरं तुवरं शिशि
रं तथा दाहतृष्णा विसर्पास्र मू
त्रवस्त्यक्षिरोगजित् ॥ दोषत्रय
हरं वृष्यं मेखलासूपयुज्य
ते । इति भावप्रकाशः । अपी
ह ॥ [illegible] ॥ इति
च राजनिर्घण्टः ॥ हिंसा । इ
ति शब्दार्थ्य दर्शनात् ॥
शरजं क्ली हैयंगवीनं । इति
हेमचन्द्रः ॥ नवनीतं । इति
केचित् ॥
शरजन्मा पुं कार्त्तिकेयः । इ
त्यमरः ॥
शरटः पुं कुसुम्भशाकः । इति
रत्नमाला ॥ कृकलासः ॥
इत्यमरटीका ॥
शरणं क्ली गृहं ॥ रक्षिता । इ
त्यमरः ॥ रक्षणं ॥ वधः । इति
मेदिनी ॥ घातकः । इति शब्द
रत्नावली ॥ शरणा स्त्री प्रसारणी । इति शब्दरत्नावली ॥
शरणागतः त्रि शरणापन्नः ।
तत्पर्य्यायः । शरणार्थकः १ अभि
पन्नः २ शरणार्थी ३ इति त्रिका
ण्डशेषः ॥ तद्रक्षणारक्षणयोः फ
लदोषौ यथा । शस्त्रहीनञ्च
भीतञ्च दीनञ्च शरणागतं । यो
न रक्षति धर्म्मिष्ठः कुम्भीपाके व
सेद्ध्रुवं ॥ राजसूयशतानाञ्च
रक्षिता लभते फलं ॥
परमैश्वर्य्ययुक्तश्च धर्म्मेण
सम्भवेदिह ॥ इति ब्र
ह्मवैवर्त्ते प्रकृतिखण्डे ५५
अध्यायः ॥
अपि च शरणागत रक्षां
यः प्राणैरपि धनैरपि ।
कुरुते मानवो ज्ञानी ॥

तस्य पुण्यं निशामय ॥ सर्व्वपा
पविनिर्म्मुक्तो ब्रह्महत्यासुखेऽपि
प्राप्नुयोऽन्ते ब्रह्मजेन्माद्यं योगिना
मपि दुर्लभं ॥ इति पाद्मे क्रि
यायोगसारे गंगामाहात्म्यं ना
म ८ अध्यायः अन्यच्च लोभा
द्द्वेषाद्भयाद्वापि यस्त्यजेत् श
रणागतं । ब्रह्महत्यासमं तस्य
पापमाहुर्मनीषिणः ॥ शा
स्त्रेषु निष्कृति दृष्टा महापात
किनामपि । शरणागतहन्तु
स्तु न दृष्टा निष्कृतिः क्वचित्
इति वह्निपुराणे ॥
दानावस्थानिर्णयनामाध्यायः ।
शरणार्थी त्रि शरणागतः । इति
हेमचन्द्रः ॥
शरणार्थकः त्रि शरणापन्नः । इ
ति त्रिकाण्डशेषः ॥
शरणिः स्त्री पन्थाः । इत्यमरः ॥
शरं वधं नयतीति शरणिः नान्नीति
अनिः इत्यनेन पक्षे ईपि शरणी
च । शरणिः श्रोणि वर्त्मनोरि
ति दन्त्यादौ रभसः शृणुतीति
शने इत्यस्मात् एवेवदन्तोऽपि
इति तालव्यादिश्च । अशुभे शुभे
प्रदीपे च शरणिः पथिचारि
ताविति तालव्यादावजयः ॥
इति नडीकायामभरतः ॥ पृथ्वी
इत्यजयः ॥
शरणी स्त्री पन्था प्रसारणी । इ
ति शब्दरत्नावली ॥ जयन्ती ।
इति शब्दचन्द्रिका ॥
शरण्डः पुं पक्षी ॥ कामुकः
इति शब्दरत्नावली ॥ धूर्त्तः ॥
शरटः ॥ भूषणभेदः । इति मे
दिनी ॥ चतुष्पात् । इति संक्षि
प्तसारोणादिवृत्तिः ॥
शरण्यः त्रि शरणीये । शरित
व्ये यथा । ध्येयं सदा परिभवघ्न
मभीष्टदोहं तीर्थास्पदं शिव
विरिंचिनुतं शरण्यं । भृत्यार्त्ति
हं प्रणतपाल भवाब्धिपोतं वन्दे
महापुरुष ते चरणारविन्दं ॥
इति श्रीभागवते ॥
शरण्या स्त्री दुर्गा यथा । वि
पाशिभय घोरेषु शरण्यं स्मर
णाद्धनः । शरण्यानेन सा देवी
पुराणे परिपठ्यते ॥ इति देवीपु
राणे देवीनिरुक्ताध्यायः ॥
शरण्युः पुं वारिदः ॥ वातः ॥
इति विश्वः ॥ मरण्युः । इति
शब्दमाला ॥
शरत् स्त्री वत्सरः ॥ ऋतुविशे
षः स चाश्विनकार्त्तिकमासद्वयात्म



कः । इत्यमरः ॥ तत्पर्य्यायः । शारदा २ कालप्रभातः ३ । इति शब्दरत्नावली ॥ कालप्रभाते ४ इति त्रिकाण्डशेषः । वर्षावसानः ५ मेघान्तः ६ घनात्ययः ७ तत्र जलगुणाः । वर्षासु नाभसं वारि सेवेतौद्भिद सेवया । सर्वं शारदि हेमन्ते तडागं सारसन्तु वा ॥ तत्र ग्राह्य वायु र्यथा । वसन्ते दक्षिणो वातो भवेत् वर्षासु पश्चिमः । उत्तरः शारदे काले पूर्वो हेमन्त शैशिरे ॥ इति राजनिर्घण्टः ॥ अपिच शारदञ्चानभिष्यन्दि लघुतत् परिकीर्तितं । हेमन्तिके जलं स्निग्धं बल्यं वृष्यं हितं गुरु । इति राजवल्लभः ॥ वैद्यकमते भाद्राश्विनमासात्मकः । केचित्तु ऋतु षट्कं समाख्याते रवेराशिषु संक्रमात् । ग्रीष्मो मेष वृषो प्रोक्तः प्रावृट् मिथुन कर्कटौ ॥ सिंह कन्ये स्मृता वर्षा तुला वृश्चिकयोः शरत् धनु ग्राहौच हेमन्तो वसन्तः कुम्भमीनकौ ॥ अन्येतु शिशिरः पुष्पसमयो ग्रीष्मा वर्षा शरद्धिमः । माघादि मासयुग्मैःस्युर् ऋतवः षट् क्रमादमी ॥ तस्य गुणाः । शरदुस्सा पित्तकर्त्री स्वर्ण्यो मध्यबलावहा । इति भाव प्रकाशः ॥ तत्र जात फले नवः शरत् संज्ञक लब्धजन्मा त्वेत् सकर्म्मा मनुज स्तपस्वी । शुचिः सुशीलो गुणवान् समानी धनान्वितो राजकुल प्रपन्नः इति कोष्ठीप्रदीपः ॥ तत्रवर्त्तनीयानि यथा । चन्द्रपटुता । रविपटुता । जलस्वच्छता । अगस्त्यः । हंसः । वृषः । सर्पः । सप्तच्छदः । पद्मं । स्वेतमेघ । धान्यं । शिखिपक्ष मदपातः । इति कविकल्पलता ॥

शरत्कामी पुं कुक्कुरः । इति शब्दरत्नावली ॥

शरत्पद्मं क्ली सिताम्भोजं । इति राजनिर्घण्टः ॥

शरत्पर्व्व क्ली कोजागरपूर्णिमा यथा । कोजागरः शरत्पर्व्व शारदी द्यूतपूर्णिमा ॥ इति जटाधरः ॥

शरत्पुष्पं क्ली आकुल्लं । इति राजनिर्घण्टः ॥

सवङ्गवकुलसमन्न ॥

शरद् स्त्री शरत् । इत्यमरः ॥

शारदंतः पुं हेमन्तः । इति राजनिर्घण्टः ॥

शरदा स्त्री वत्सरः ॥ शरदृतुः इति शब्दरत्नावली ॥

शारदिजे त्रि शरत्कालजाते । यथा । नद्यः प्रावृषिजास्तु पीनस कफ श्वासार्त्ति काशप्रदाः पथ्या वातकफापहाः शारदिजास्ते मन्दजा तुन्दिदा । सन्तापं शमयन्ति संविदधते शैशिर्य्यवासन्तजा । स्तृष्णा दाह वमि भ्रमार्त्ति शमदा ग्रीष्मे यथा स्वेगुणाः । इति राजनिर्घण्टः ॥

शरदुदाशयं क्ली शरत्कालीनसरोवरं । यथा शरदुदाशयेसाधुजात मत्स्यसिन्धोदर श्रीमुषा दृशा । सुरतनाथ ते ऽशुल्कदासिका वरद निघ्नतो नेह किं वधः । इति श्रीभागवते १० स्कन्धे ३१ अध्यायः ॥ शरदुदाशये शरत्कालीन सरसि । इति श्रीधरस्वामी ॥

शरधिः पुं तूणः । इति हेमचन्द्रः ॥

शरपुंखा स्त्री नीलीवृक्षाकृति वृक्षविशेषः । शरफोंका इति हिंदीभाषा । तत्पर्य्यायः । काण्डपुंखा २ बाणपुंखा ३ इषुपुंखिका ४ शायकपुंखा ५ इषुपुंखा ६ । तस्या गुणाः । कटुत्व उष्णत्व कृमि वात रुजापहत्व सेताया गुणाध्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । शरपुंखा यकृत् प्लीह गुल्म व्रण विषापहः तिक्तः कषायः कास ज्वर श्वासहरो लघुः ॥ इति भाव प्रकाशः ॥ बाणस्य मध्ये पुं ॥

शरभः पुं मृगेन्द्रविशेषः ॥ इत्यमरः तत्पर्य्यायः । महामृगः २ महास्कन्धी ३ महामनाः ४ अष्टपादः ५ महासिंहः ६ । मनस्वी ७ पर्वताश्रयः ८ इति राजनिर्घण्टः ॥ अस्य लक्षणं यथा । अष्टपादूर्द्ध्वनयन ऊर्द्ध्वपादचतुष्टयः । सिंहं हन्ते समायाति शरभो वनगोचरः । इति महाभारते ॥ करभः ॥ वानरविशेषः । इति मेदिनी उष्ट्रः । इति जटाधरः ॥ शलभश्च ॥

शरभूः पुं कार्त्तिकेयः । इति हेमचन्द्रः ॥

शरमयं त्रि शरनिर्म्मितं । यथा
शरमवर्हिषा ऊशमयवर्हिर्वाप
वत् इतिस्मृतिः ॥
शरमल्लः पुं पक्षिविशेषः गो
सालिक् । इतिभाषा । इति श
ब्दचंद्रिका ॥ वाणयोद्धा च ॥
शरयूः स्त्री नदीविशेषः । इ
ति शरयुः द्विरूपकोशः । देश
स्यादि रघेशब्दः । इति वक्रसम्म
तः । शरलः त्रि विनीतः । स्वच्छ
हृदयः ॥ वृक्षविशेषे पुं । इति
सारस्वताभिधानं । देशसादि
रप्यस्तीति वक्रुसम्मतः ॥
शरलकं क्ली जले । इति श
ब्दचंद्रिका ॥
शरवणोद्भवः पुं कार्तिकेयः
इति केचित् ॥
शरवाणिः पुं शरमुखं । पदा
तिः । शरजीवी । इति हेमचंद्रः
शरव्यं क्ली लक्ष्यं । इत्यमरः
शरव्रातः पुं वाणव्रातः । तत्प
र्य्यायः । प्रचलाकः २ इति
जटाधरः ॥
शराटिः स्त्री शरालिपक्षी इ
ति शब्दरत्नावली ॥
शराडिः स्त्री शरालिपक्षी ।
इति शब्दरत्नावली ॥

शरातिः स्त्री शरालिपक्षी । इत्य
मरटीकायां रामाश्रमः ॥
शराभ्यासः पुं वाणशिक्षा त
त्पर्य्यायः । उपासनं २ । इत्यमरः
विकर्षणं ३ खुरली ४ ।
शस्त्राभ्यासः ५ । इति शब्द
रत्नावली ॥
शरारिः पुं शरालिपक्षी । तत्प
र्य्यायः । आटिः २ आडिः ३ ।
इत्यमरः । आडी ४ शराडी ५
आडिका ६ शराली ७ शरालिः
८ शराटिः ९ शरालिका १० ॥
इति शब्दरत्नावली ॥ अस्य गु
णाः । पवनापहत्वं । स्निग्धत्वं
सृष्टमलत्वं । वृष्यत्वं । वातरक्त
हरत्वं । हिमत्वञ्च । इति राजव
ल्लभः ॥ अपि च । हंस सारस
काचाक्ष वक क्रौञ्च शरारिकाः
नंदीमुखी शकादम्बाः वलाका
द्याः प्लवाः स्मृताः । प्लवाः पित्त
हराः स्निग्धा मधुरा गुरवो हि
माः । वातश्लेष्मप्रदा श्चापि व
लशुक्रकराः सराः ॥ इति भा
वप्रकाशः ॥
शरारुः त्रि हिंस्रः । इत्यमरः
शरासनः पुं धनुः । इति ज
टाधरः ॥

शरालिः
शरालिका स्त्री शरारिपक्षी ।
शराली इति शब्दरत्नावली ॥
शरावः पुं क्ली मृत्पात्रविशेषः
शरा इति भाषा । तत्पर्य्यायः
वर्द्धमानकः २ इत्यमरः ॥
मार्त्तिकः ३ सरावः ४ शालाजि
रं ५ पार्थिवं ६ मृत्कांसं ७ इ
ति शब्दरत्नावली ॥ कुडवद्वय
परिमाणं । तत्तु चतुःषष्टितोल
कात्मकं । सेर इति भाषा ॥
तत्पर्य्यायः मानिका २ । इति
शब्दमालादेवद्यकपरिभाषा
च । शरावती स्त्री नदीविशेषः
इत्यमरः ॥
शरावार्द्धं क्ली कुडवपरिमाणं
तत्तु द्वात्रिंशत्तोलकात्मकं ।
आधसेर इति भाषा । इति
वैद्यकपरिभाषा ॥
शराश्रयः पुं तूणः । इति हे
मचन्द्रः ॥
शरासनं क्ली धनुः । इत्यमरः ।
शरास्यं क्ली धनुः । यथा । चि
च्छेद तस्य तान् वाणान् शरा
स्यञ्च महामुने । युयुधाते तिसं
रब्धौ परस्पर वधैषिणौ ॥ इति
मार्कंडेयपुराणे । जैमिनि ।

खंडपुराणं परिशुल्कं ॥
शरिमा पुं प्रसवः । इति सिद्धा
न्तकौमुद्यां गुणादिवृत्तिः ॥
शरी स्त्री एरकातृणं । इति भा
वप्रकाशः ॥
शरीरं क्ली शीर्य्यते रोगादिना
यत् । तत्पर्य्यायः । कलेवरं २
गात्रं ३ वपुः ४ संहननं ५ व
र्ष्म ६ विग्रहः ७ कायः ८ देहः
९ मूर्त्तिः १० तनुः ११ तनूः १२
इत्यमरः ॥ क्षेत्रं १३ पुरं १४
घनः १५ अंगं १६ पिण्डं १७
इति राजनिर्घण्टः ॥ भूतात्मा
स्वर्गलोकेशः १९ स्कंधः २०
पंजरः २१ कुलं २२ वलं २३ आ
त्मा २४ इतिजटाधरः ॥ कन्धं
२५ इति शब्दरत्नावली । इन्द्रिा
यतनं २६ भूः २७ मूर्त्तिमत्
२८ करणं २९ वेरं ३० सञ्चरः
३१ वंधः ३२ पुद्गलं ३३ इति
हेमचंद्रः ॥ शरीरस्थमर्म्माणि
यथा । शरीरे भस्मसाद्भूते प्रति
विंवः स चात्मनः । जीव स्त
दान्तरीतस्य उवाच विनयं वि
भुं । जीव उवाच । सद्भक्ति वो क
द्भक्तिर्वा कोपः संताप एव च
लोभो मोहश्च कामश्च ज्ञात

९

पिपासादिकञ्च यत् । स्थौल्यं
कार्श्यञ्च नाशाश्च दृश्यन्ते यं ।
समुद्भवे । सर्वं शारीरधर्मञ्च न
जीवस्य न चात्मनः ॥ सत्त्वं रज
स्तम इति शारीरं त्रिगुणात्मकं
तच्च नानाप्रकारञ्च प्रबोधक
थयामि ते ॥ किञ्चित् सत्त्वाति
रिक्तञ्च किञ्चिदेव रजोधिकं
तमोतिरिक्तं किञ्चिच्च न सर्वं
ऊत्रचिन्त्यते ॥ सत्त्वाद्दया च मु
क्तीच्छा कर्मेच्छा च रजोगुणा
त् । तमोगुणाज्जीवहिंसा कोपोऽ
हंकार एव च ॥ कोपात्कटूक्ति
र्नियतं कटूक्त्या शत्रुता भवेत् ।
तथा चाप्रियता मध्यः शत्रुः कः
कस्य भूतले ॥ को वा प्रियोऽ
प्रियो वाक्यः कोऽमित्रः कोऽपि
भुवि । इन्द्रियाणि च जीवानि
सर्वत्र शत्रुमित्रयोः ॥ इति ब्रह्म
वैवर्ते श्रीकृष्णजन्मखण्डे ४४
अध्यायः ॥ अथ स्त्रीपुंसयोः
सर्वाङ्गाणि पादाद्यादिशिरः प
र्य्यन्तानि । प्रपदं १ अङ्घ्रिः २ गु
ल्फः ३ पार्ष्णिः ४ जङ्घा ५ जानु
६ ऊरुः ७ वंक्षणः ८ कटिः ९
त्रिकं १० नितम्बः ११ स्फिक् १२ वलिः
१३ उपस्थः १४ कक्षंदरं १५ जघनं
१६ जठरं १७ नाभिः १८ वलिः
१९ स्तनः २० चूचुकं २१ क्रोड २२
रोम २३ कक्ष २४ अंसः २५ व
त्तः २६ दोः २७ पार्श्वः २८ प्र
गण्डः २९ कूर्परः ३० हस्तः ३१
प्रकोष्ठः ३२ मणिबन्धः ३३ अ
ङ्गुलिः ३४ अङ्गुष्ठः ३५ करभः
३६ नखः ३७ पर्व ३८ चपेटकः
३९ कण्ठः ४० शिरोधिः ४१ श्म
श्रुः ४२ मुखं ४३ ओष्ठ ४४ चिबु
कं ४५ हनुः ४६ सृक्कं ५० तालु
४८ रदः ४९ जिह्वा ५० नासा ५१
ऊः ५२ गण्डः ५३ लोचनं ५४ अ
पाङ्गः ५५ तारा ५६ कर्णः ५७ भा
लः ५८ मस्तकं ५९ केशाः ६० ॥ इ
तिकविकल्पलता ॥ परमेश्वरे
शरीरतो देवाना मुत्पत्ति र्यथा
सर्वे देवाः सपितरो ब्रह्माद्याश्च
ऽऽन्पमगाः । विष्णोः सकाशा
दुत्पन्ना इतीयं देवकी श्रुतिः ॥
अग्निस्तथाश्विनौ गौरी गजवक्त्रो
भुजङ्गमः । कार्त्तिकेयस्तथादि
त्या मातरो दुर्गया सह ॥ दिशो
धनपति र्विष्णुः धर्म्मो रुद्रः प्र
भी तथा पितरश्चेति संभृताः
शाखास्पेन जगत्पतेः ॥ हि
रण्यगर्भस्य. ततो सर्व एव स ॥

मुद्भवाः । पृथक् पृथक् ततो गर्वं
वहमानाः समन्ततः ॥ अहं योग्य
स्त्वहं याज्य इति तेषां स्वनो महा
न् । श्रूयते देवसमितौ क्षुब्ध ।
सागर सन्निभः ॥ तेषां विवद
मानानां वह्निरुत्थाय पार्थिव
उवाच मां यज स्वेति ध्यायध्वं
मामिति ब्रुवन् । प्राजापत्य मि
दं नूनं शरीरं महिना कृतं । वि
नाश शुपपद्येत यतो नाहंमहा
नहं ॥ एव मुक्त्वा शरीरन्तु त्यक्त्वा
वह्निर्विनिर्ययौ । निर्गतेपि तत
स्तस्मिं स्तच्छरीरं नशीर्य्यते ।
ततोऽश्विनौ मूर्त्तिमन्तौ प्राण
पान शरीरगौ । आवां प्रधाना
वित्येवमूचतु र्योजपवतेरौ ॥ एव
मुक्त्वा शरीरं तौ विहाय क्वचिदा
स्थितौ । तयो रपित्तयेक्कृत्वा
स्तीणं तन्मुर् मास्थितः ॥ ततः
श्रेवाब्रवीद्गौरी प्राधान्यमपि.
संस्थिते सा प्येवमुक्त्वादेवात्
निष्क्रामबहिः शुभा ॥ तथा
विनापि तद्देहं वागरं व्यवतिष्ठ
ति । ततो गणपति वीक्य मा
काशाख्योऽब्रवीत्तदा ॥ नम
या रहितं किंचिच्छरीरस्यापि स्व
तः । कालान्तरेणैव मुक्त्वा ॥
सोपि निष्क्रम्य देहतः ॥ पृथग्भू
ते स्तथाप्येतच्छरीरं नाप्यनीन
शात् विना सोऽप्यत्र तत्त्वेन त
थापि न विशीर्य्यते ॥ स्वाधिष्ठै
स्तुविहीनं तद् दृष्ट्वा देवं व्यवस्थि
तं शारीर धातवः सर्वे तेन्नुयुक्ता
क्यमेव हि ॥ अस्माभिर्व्यतिरि
क्तस्य न शरीरस्य धारणं । भवती
त्येव मुक्त्वाते जग्मुः सर्वे शरी
रिणः ॥ तेर्व्यपेतमपि ह्येवं वृ
क्षेण प्रपाल्यते । तद्दृष्ट्वा त्वब्र
वीत् स्कन्दः सोऽहंकारः प्रकी
र्त्तितः । मया विना शरीरस्य
संभूति रपि नेष्यते । एव मु
क्त्वाशरीरं तु सोऽप्यपेतः पृथक्
स्थितः ॥ तेनाप्येतेन तत् दे
हं विना मुक्तवदास्थितं । तद्
दृष्ट्वाऽपितो भानुः स आदित्यः प्र
कीर्त्तितः । मया विनाकथं हे
त्वमिमं त्वत्र न पीड्यते एव
मुक्त्वाथयातः स तच्छरीरं न
शीर्य्यते । ततः कामादि स्तथाय
गेण मात्रकसंज्ञितः । न मयाम
तिरिक्तस्य शरीरस्य व्यवस्थितिः
एवमुक्त्वा स यातस्तु शरीरं त
न्नशीर्य्यते ॥ ततो मायाब्रवीत्को
पात् सा च दुर्गा प्रकीर्त्तिता नम

यास्य विना भूतिं विसृज्यान्त
र्द्दधेऽवतः ॥ ततो दिशः समुत्तस्थु
रुच्चैश्चैव वचो महत् । नाम्ना भीर
हितं कार्य्यं भवतीति न संशयः ॥
चतस्र आगताः काष्ठा अपयाः
ताः तत्क्षणात्तदा । ततो धनपतिर्व्वी
र्य्यर्भिष्यते तत् पङ्कसंभवः ॥ शरीर
स्येति सोऽप्येवमुक्त्वा मद्धीन
रोऽभवत् । ततो विसो मनो
ब्रुयात् नायं देहो मया विना ।
त्वया मप्युत्सृहेत्स्यान्तु मिसृक्ता
न्नदेवे पुनः । ततो धर्म्मोऽब्रवी
त्सर्व्वं मिदं पालितवानहं ॥ इ
दानीं मय्युपगते कथमेतद्भ
विष्यति । एवमुक्त्वा गते धर्म्मे
तच्छरीरं नशीर्य्यते ॥ ततोऽब्र
वीन्महादेव श्चयक्तोऽभूतनायु·
कः महत्स्तेतो मया हीनं शरीरं
तो भवेद्यथा ॥ एवमुक्त्वा ग
तः पुंस्त्व तच्छरीरं नशीर्य्यते
तद्दृष्ट्वापितरेष्वाशु तत्त्वाज्ञाया
मदत्सभिः ॥ प्राणान्तरेऽस्मि दे
नस्य शरीरं धीर्य्यते ध्रुवं । एवमु
क्त्वा ततो देहं सक्कोनद्धान मा
गताः ॥ अग्निः प्राणो अपान
श्चाकाशश्चैव धातवः । देहंत
द्भुदेतास्मे मातुः कायादयो·

मया ॥ काष्ठा वायुर्व्विसु धर्म्मा
शंभु श्चैवेन्द्रियार्थकाः । एतैस्तु
क्तैर तत्तैरं मुक्ताविव ससेवि
ते ॥ सोमेन पाल्यमानं तु पुरुष
त्वेऽतिपिण्डापवं व्यवस्थिते सोमे
षोडशात्मन्यथात्वरे ॥ प्रागवन्न
त्र गुणोपेतं देवं मुस्थापयन्नवे
त् । प्रागवस्य शरीरं तु दृष्ट्वा सर्व्व
समालिते । ताः देवदेवताः सर्व्वा
देवत्वं भाव माश्रिताः ॥ तमे
वेतुष्टुवुः सर्व्वा स्तं देवपरमेश्वरं
इति वाराहे महातपोपाख्याने
नामाध्यायः ॥
शरीरान्तंयथा ॥ शरीर मापः
सोमस्त्र विविधं चान्नमुच्यते । प्रा
णेन हाग्नि स्तथादित्य स्त्रिभोक्ता
यकपवत् ॥ इति मार्कण्डे २१५
अध्यायः ॥ मानस कायिक
क्लेशसाध्य व्रतं यथा । धरन्तु
वाच । कथमाराध्यसे देव भक्ति
मद्भि र्नरै र्व्विभो स्त्रीभिर्व्वा सर्व्व
भेतन्मे शंसत्वे भूतभावन ॥
वाराह उवाच भावसाध्यस्त्वहं दे
वि न वित्तैर्न जपैर्महे । साध्य
स्तथापि भूतानां कायक्लेशैव
दाशिते ॥ कर्म्मणा मनसा वाचा
मच्चित्तो यो नरो भवेत् । तस्य

व्रतानि वदेष्यहं विविधानि निबो
धमे ॥ अहिंसा सत्य मस्तेयं ब्र
ह्मचर्य्य मकल्कता । एतानि·
मानसान्याहु र्व्रतानि तु धराधरे
एकभक्तं तथानक्त मुपवासादि
कञ्च यत् । तत् सर्व्वं कायिकं
पुंसां व्रतं भवति नान्यथा ॥
इति वाराहे सत्यतपोपाख्या
न नामाध्यायः ॥
शरीरजः पुं रोगः ॥ कामदेवः ।
पुत्रः । इति धरणिः ॥ देहजा
ते त्रि । यथा । शरीरजैः कर्म्मदो
षैर्याति स्थावरतां नरः । वाचि
कैः पक्षि मृगतां मानसै रन्त्य
जातितां ॥ इति प्रायश्चि
त्ततत्त्वं ॥
शरीरसंस्कारः पुं देहसंस्कार
कर्म्म ॥ शरीरस्य शोभने मा
र्जनञ्च ॥
शरीरावरणं क्ली चर्म्म । इत्यम
रटीकायां भरतः ॥ कायवेष्टनञ्च ॥
शरीरी पुं शरीरविशिष्टः । तत्प
र्य्यायः । भवोद्भवो च प्राणी तु·
शरीरि जन्तु जन्तवः । प्राण·
भृच्चेतनो जन्मी चित्तेत्तु हृद
र्य्यमनः । इति जटाधरः ॥ शारी
रि लक्षणं यथा । गर्भाशयगते

शुक्र मार्त्तवं जीव संज्ञकः ।
प्रकृतिः सविकाराच तत्सर्व्वं
गर्भसंज्ञकं । कालेन वर्द्धितो
गर्भो यदंगोपांग संयुतः । भ
वेत्तदा समुनिभिः शरीरीति
निगद्यते ॥ अंगोपांग संयुतः
यस्तांगोपांगाः ॥ अस्य त्वङ्गा
न्युपांगानि ज्ञात्वा सुश्रुत शास्त्र
तः । मस्तकादभिधीयन्ते शिष्याः
शृणुत यत्नतः ॥ आद्यं मेकं शि
रः प्रोक्तं तदुपांगानि कुन्तलाः त
स्यान्त मस्तुलुङ्गश्च ललाटं द्रुयु
गे तथा ॥ नेत्रद्वयं तयो रन्तर्व्वर्त्म
नेहे कणीनिके दृष्टिद्वयं कृष्ण
गोलौ श्वेतभागौ च वर्त्मनि ॥
पक्ष्माण्यपांगौ पांगौ च कर्णौ तु
च्छकुलीद्वयं । पाणिद्वयं कपो
लौ च नासिका च प्रकीर्त्तिता उ
ष्ठाधरौ च सृक्कण्यौ मुखं ता
लु हनुद्वयं । दन्ताश्च दन्तवेष्टा
श्च रसना चिबुकं गलः ॥ द्वितीय
मंगं ग्रीवा तु यया मूर्द्धा विधार्य्य
ते तृतीयं बाहुयुगलं तदुपांगान्य
थो ब्रुवे ॥ तस्योपरि मतोंऽसक
स्यो प्रगण्डा भवत स्तथः क
फोणियुग्मं तदधः प्रकोष्ठयु
गलं तथा । मणिबन्धौ तले हस्तौ

तयोर्ह्यंगुलयोर्दश । नराणामुर
श ते ख्याप्या दशाच्छेद्याः प्रकी
र्त्तिताः ॥ चतुर्थं मर्म्म वक्त्रस्ते तद
र्पणामयथ ब्रुवे । स्तनौ पुंसस्त
था नार्य्या विशेष उभयोरयं
यौवनागमनेनार्य्याः पीवरौ भ
वत स्तनौ गर्भवत्याः प्रसूता
या स्तावेतौ क्षीरपूरितौ ॥
हृदयं पुण्डरीकेण सदृशं स्या
दधोमुखं जाग्रत स्तद्विकस
ति स्वपतस्तु निमीलति । प्राण
यस्तु जीवस्य चेतनास्थानमु
त्तमं । अतस्तस्मिं स्तमोव्याप्ते प्रा
णिनः प्रस्वपन्ति हि ॥ चेतनास्था
नमुत्तम मिति अथ सभिप्रायः
चेतनाना मधिष्ठाने मनो देह
स्य सेन्द्रियः । केश लोम नख
ग्रान्त मलं द्रव्यगुणैर्विना । इ
त्युक्तवता चरकेण सकलश
रीरं चेतना स्थानमुक्तं तदपे
क्षया हृदयं विशेषत श्चेतनाया
स्थानमिति ॥ कक्षयो र्वक्षसोः
सन्धी जत्रुणी परिकीर्त्तिते कवेः
भेसमाख्याते तयोः स्थानान्तु बं
क्षणे ॥ उदरं पंचमं भागं षष्ठे
पार्श्वद्वयं मतं । सपृष्ठवंशा पृ
ष्ठन्तु सप्तमं सप्तमे स्मृतं ॥

उपांगानि च कथ्यन्ते तानि जा
नीहि यत्नतः ॥ शोणिताज्जायते
प्लीहा वामतो हृदयादधः । रक्त
वाहि शिराणां स मूलं ख्यातो
महर्षिभिः ॥ हृदयाद्वामतोऽधश्च
फुप्फुसो रक्तफेनजः । अधोद
क्षिणत श्चापि हृदयाद्यकृतः
स्थितिः ॥ तत्तु रञ्जक पित्तस्य
स्थानं शोणितजं मतं । अधस्तु
दक्षिणे भागे हृदयात् क्लोमति
ष्ठति ॥ जलवाहि शिरा मूले तृ
ष्णाच्छादनकृन्मतं । क्लोम तिल
कं पत्तत्र वातरक्तजं । प्रवाह च
हृद्वाग्भटः । रक्तादनिल सं
युक्तात् कालीयक समुद्भव इ
ति भेदः शोणितयोः सारादुक्को
यो वृषणे भवेत् ॥ तौ तु पुष्टिक
रौ प्रोक्तौ जठरस्थस्य मेदसः ॥
उक्ताः सार्द्धा स्त्रियो व्यामाः पुंसा
मंगानि सूरिभिः ॥ अर्द्धव्यामेन शी
र्षाणि श्रोणिर्गात्राणि निर्द्दिशेत्
अर्द्ध कक्ष्या कटी चापि त्रिकं बस्ति
स्तु वंक्षणौ । कण्डराणां प्ररोहः
स्यात् स्फिजावेतौ वीर्य्यस्रवयोः ।
स एव गर्भस्थापाने कुर्य्यात् कूर्म्मी
प्राये स्त्रियः ॥ योनिनाभ्याकृ
ति योनि स्थावर्त्ता सा च त्री ।

र्त्तिता तस्यास्तृतीये त्वावर्त्ते गर्भ
शय्या प्रतिष्ठिता ॥ वृषणौ
भवतः सारात् कफासृङ्मांस
मेदसां । वीर्य्यवाहि शिराधारौ
तौ मतौ पौरुषावहौ ॥ गुदस्य
मानसर्वस्य सर्व्वं स्यात् तुर्य्यंगुले
तत्रस्य वलय स्त्रिस्रः संखाव
र्त्तनिभास्तु ताः ॥ प्रवाहिणी
भवेत् पूर्वा सार्द्धांगुलमिता
मता उत्सर्जिनी तु तदधः सा
सार्द्धांगुलसम्मिता ॥ तस्या अ
धः संवरणी स्यादेकांगुल स
म्मिता । अर्द्धांगुलप्रमाणं तत्र
धेर्गुदस्य मतं ॥ मलोत्सर्गस्य
मार्गोऽयं पायुर्देहे विनिर्म्मितः
पुंसः श्रोण्यौ स्तनौ योन्ये नौ
नितम्बौ च योषितः ॥ तयोः
कुकुन्दरे स्यातां शाकुन्थिनी
त्वंश महत्तमं । तदुपांगानि च
क्रमो जानुनी पिण्डिका द्वयं
जंघे द्वे घुटिके पार्ष्णी तलेच
प्रपदे तथा । पादांगुलयस्त
त्र दश तासां नखा दश ॥
इति भावप्रकाशः ॥
शारुः पुं क्रोधः ॥ वज्रं ॥ इति
मेदिनी ॥ बाणः । इति हेमचं
द्रः ॥ आयुधं । इति सिद्धान्त

कौमुदी मुनादिवृत्तिः ॥
शारेष्टः पुं आम्रः । इति जटा
धरः ॥
शार्करकः पुं मधुरजंबीरः । इति
राजनिर्घण्टः ॥
शार्करजा स्त्री सिताखण्डः ॥
इति राजनिर्घण्टः ॥
शार्करा स्त्री खण्डविकृतिः ।
चिनी । इति भाषा तत्पर्य्यायः सि
ता २ इत्यमरः ॥ शुक्लोपला ३
शुक्ला ४ सितोपला ५ । इति
रत्नमाला । मीनाण्डी ६ श्वेता
७ मत्स्याण्डिका ८ अहिच्छत्रा ९
सिकता १० गुडोद्भवा ११ अ
स्या गुणाः । मधुरत्वं । शीतत्वं
पित्तदाह श्रम रक्तदोष भ्रां
ति कृमिकोप नाशित्वञ्च । इ
ति सायरणा शर्करा गुणाः ॥
अथ शर्कराविशेष गुणाः स्नि
ग्धा पुण्ड्रक शर्करा हितकरी
क्षीणे क्षये शोषके चक्षुष्या
बलवर्द्धनी सुमधुरा हृद्या च
वंशोद्भवा । वृष्या त्वपि वल्य
दाहभ्रमहरा धूपामेक्षुजा प्रीत
लाक्षिप्या कान्तिकरी रसाल
जनिता वक्रेक्षुजा पित्तजित् ॥
इति पञ्चेक्षुशर्करा गुणाः या

वनाली हिमोत्था हिमाली हिम
शर्करा । क्षुद्रशर्करिका क्षुद्र
गुडजा जलविन्दुजा ॥ हिमजा
शर्करा रोगघ्नी सोष्णा तिक्ताति
पिच्छिला । वातघ्नी सारिका रु
च्यादाहपित्तास्रदायिनी । इति
यावनालशर्करागुणाः ॥
प्रीतजाम्या कर्कटजा माधवीम
धुशर्करा । मालिका शर्करा प्रो
क्ता सितातखण्डश्च खण्डकः ॥ सि
ताखण्डोऽतिमधुर श्चक्षुष्य श्छर्दि
नाशनः । कुष्ठ व्रण कफ श्वास
हिक्कापित्तास्रदोषनुत् । यवास
शर्करा त्वस्या सुधामोदक मोद
कः । नवराजः खण्डसारः खण्डजा
खण्डमोदकः । इति राजनिर्घण्टः ॥
अपिच ॥ मत्स्यण्डिकाः खण्ड
सिता गुणश्रेष्ठा यथोत्तरं । वि
मलाः शीतलाः स्निग्धा गुर्व्वः
स्वादुतराः सराः ॥ वृष्या क्षुधा
तक्षीण रक्तपित्तानिलापहाः
मत्स्यण्डी भेदिनी बल्या कफ
वातान्निजित् गुरुः ॥ खण्डं गुरु सरं
रुच्यं वातघ्नं बलबृंहिदं । सि
तोपला सरा गुर्व्वी वातघ्नी न
कफप्रदा ॥ इति पथ्यापथ्य
विवेकः ॥ अन्यच्च । शर्करा ।
ज्वर पित्तास्रक मूर्च्छा छर्द्दि त
षापहा । तस्याश्च नवराजस्तु ज्व
रदाहास्र पित्तनुत् । लसिका फा
णित गुड खण्ड मत्स्यण्डिकासि
ताः निर्म्मला लघवो ज्ञेयाः सी
तवीर्य्या यथोत्तरं । यथा यथैषां
वैमल्यं भवेच्छैत्यं तथा तथा
इति राजवल्लभः ॥ किञ्च खण्डं
तु सिकताकूपं सुश्वेतं शर्क
रा सिता । सिता सुमधुरा रुच्या
वातपित्तास्रदाहजित् मूर्च्छा
छर्द्दि ज्वरान् हन्ति सुशीता शुक्र
कारिणी ॥ भवेन्मधुसिता सी
ता रक्तपित्तहरी लघुः । सितोप
ला सरा लघ्वी वात पित्तहरी हि
मा ॥ मधुजा शर्करा रूक्षा क
फ पित्तहरी गुरुः । छर्द्यतीसा
रतृड्दाह रक्तहृत्तुवरा हिमा ।
यथा यथैषां नैर्म्मल्यं मधुरत्वं
तथा तथा ॥ स्नेह लाघववृष्य
त्वानि शैत्यन्त्वञ्च तथा तथा ॥
इति भावप्रकाशः ॥ उपला ॥
कर्परांशः । शर्करान्वितदेशः ॥
रोगभेदः ॥ शकलं । इति मे
दिनी ॥ शर्करा रोगस्य निदा
न चिकित्सादि मूत्रकृच्छ्र श
ब्दे द्रष्टव्यः ॥

शर्कराचलः पुं दानार्थकृत्रिम
शर्करामयाचलविशेषः । अस्य
विवरणं पर्व्वतशब्दे द्रष्टव्यं ॥
शर्कराधेनुः स्त्री दानार्थशर्करा
निर्म्मितधेनुः । तद्विधिः यथा ।
श्रीहोतोवाच तद्वत्स शर्करा
धेनुं शृणु राजन् यथार्थतः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिन
कुशोत्तरे ॥ धेनुं शर्करया राज
न् कृत्वा भारचतुष्टयं उत्तमा ।
कथ्यते सद्भिः भारार्द्धेन तु वत
सकं । तदर्द्धं मध्यमा प्रोक्ता
कनिष्ठा भारकेण तु ॥ तद
र्द्ध वत्सं प्रकुर्व्वीत चतुर्थांशे
न तत्त्वतः । अथ कुर्य्याद्दक्ष
शौते रुद्धं त्वपनिक्षत्तम ॥ स्व
शक्त्या कारयेद्धेनुं यथात्मानं
नपीडयेत् । सर्व्वबीजानि संस्था
प्य चतुर्द्दिक्षु समन्ततः ॥
सौवर्णमुखे शृङ्गाणि मौक्तिका
नयने तथा । गुडेन तु मुखं का
र्य्यं जिह्वा पिष्टमयी तथा ॥
कम्बले पट्टसूत्रेण कण्ठाभरणभू
षितं । इक्षुपादां रौप्यखुरां नवनी
तमयस्तनीं ॥ प्रशस्त पत्रश्रव
णां सितचामर भूषितां । पंच
रत्न समायुक्तां वस्त्रेणाच्छा
दितां तथा ॥ गंधपुष्पैर्बलिं
कृत्य ब्राह्मणाय कुटुम्बिने ।
श्रोत्रियाय दरिद्राय साधुवृत्ता
य धीमते ॥ वेद वेदाङ्ग विदुषे
आहिताग्नेर्विशेषतः । अदुष्टाय प्र
दातव्या न तु मत्सरिणे नृप ॥
अयने विषुवे पुण्ये व्यतीपा
ते शशिक्षये । एषु पुण्येषु काले
षु यदृच्छा वा सदार्पयेत् । स
न्ताने तु द्विजे दृष्ट्वा आगते श्रोत्रि
ये गृहे । तादृशाय प्रदातव्या पु
ण्यदेशे विमृश्य च ॥ पूर्व्वाभि
मुख मास्थाय अथ वा स उदङ्मु
खः । गां पूर्व्वाभिमुखीं कृत्वा व
त्सपुच्छवतोम्पसेत् । दानकाले तु
ये मंत्रा स्नान पठित्वा समर्पयेत् ।
सेवज्य विधिवद्दिमं मुद्रिका क
र्णाभरणोः ॥ स्वशक्त्या दक्षिणां
दत्वा वित्तशाठ्य विवर्ज्जितः । इ
त्येतु दक्षिणां दत्वा गंधपुष्प स
चन्दनं ॥ धेनुं समर्प्पयेत्तस्य मुख
स्तु न विलोकयेत् । एकाहं शर्करा
हारो ब्राह्मण स्त्रिदिनं वसेत्
सर्व्वपापहरा धेनुः सर्व्वकामप्र
दायिनी । सर्व्वकामसमृद्धस्तु
जायते नात्र संशयः ॥ दीयमानां
प्रपश्यन्ति ते यान्ति परमां गतिं ।

य इदं शृणुयाद्भक्त्या पठते-
द्वापि मानवः ॥ मुच्यते सर्व्वपा-
पेभ्यो विष्णुलोकं स गच्छति ॥
इति वाराहे शार्कराधेनुमाहा-
त्म्यनामाध्यायः ॥
शार्कराप्रभा स्त्री जिनानां नर-
कविशेषः । यथा । रत्न शार्करा
वालुका पङ्क धूम तमः प्रभा । म-
हातमःप्रभाविशेषोऽयो नरकभू-
मयः ॥ इति हेमचन्द्रः ॥
शार्करावान् त्रि कर्पराशवकुले-
दृशाः । तत्पर्य्यायः । शार्करा २
शार्करिलः ३ शार्करः ४ इत्यम-
रः । शार्करासप्तमी स्त्री वैशाखी
शुक्लासप्तमी । तत्र व्रतविधिर्य-
था । ईश्वर उवाच । शार्करास-
प्तमीं वक्ष्ये तद्वत्कल्मषनाशि-
नीं । आयुरारोग्यमैश्वर्य्यं यया-
नन्ते प्रजायते ॥ माधवस्य सि-
ते पक्षे सप्तम्यां शुक्लपक्षतः
प्रातः स्नात्वा तिलैः शुक्लैः शु-
क्लमाल्यानुलेपनैः ॥ स्थण्डिले
पद्ममालिख्य कुङ्कुमेन सकर्णि-
कम् । तस्मै नमः सवित्रेतु गन्धपुष्पं
निवेदयेत् ॥ स्थापयेदुदकुम्भ-
ञ्च शार्करापात्रसंयुतं शुक्लवस्त्रै-
रलङ्कृत्य शुक्लमाल्यानुलेपनैः
सवर्णेन्तु समायुक्तं मन्त्रेणानेन
पूजयेत् । विश्ववेदमयो यस्मा-
त्वेदवादीति पठ्यते ॥ त्वमेवामृ-
तसर्वस्व मतः कान्तिं प्रयच्छ मे ।
पञ्चगव्यं ततः पीत्वा स्वपेत्तत्पा-
र्श्वतः क्षितौ ॥ सौरसूक्तं स्मरन्ना-
स्ते पुराणश्रवणेन च । अहोरा-
त्रे गते पश्चात् अष्टम्यां कृतनैत्ति-
कः ॥ तत्सर्व्वं वेदविदुषे ब्रा-
ह्मणाय निवेदयेत् । भोजये-
च्छक्तितो विप्रान् शार्करा घृत-
पायसैः ॥ भुञ्जीतातैल लवणं
स्वयं मध्यश्च वाग्यतः । अनेन वि-
धिना सर्व्वं मासि मासि समाचरे-
त् ॥ सम्वत्सरान्ते शयने शार्करा-
कलसान्वितं । सर्व्वोपस्कर संयु-
क्तं तथैकां गां पयस्विनीं ॥ गृ-
हञ्च शक्तितो दद्यात् समस्तोप-
स्करान्वितं । सहस्रेणाथ निष्का-
णां कृत्वा दद्यात् शतेन वा ॥ द-
शभिर्व्वाथ निष्काणां तदर्द्धेनाथ
शक्तितः स्वर्णाश्वः प्रदातव्यः
पूर्व्ववन्मन्त्रवाचनं ॥ विप्रशाठ्यं
न कुर्व्वीत कुर्व्वन् दोषं समश्नुते
अमृतं पिबतो वक्त्रात् सूर्य्यस्या-
मृत बिन्दवः ॥ निपेतुर्ये ततु
स्ताभी शालि मुद्गेक्षवः स्मृताः

शार्करापरमस्तस्मादिक्षुसारोऽमृ-
तात्मकः ॥ इष्टा रवेरतः पुण्या शार्क-
राहव्य कव्ययोः । शार्करासप्त-
मी चैषा वाजपेयफलप्रदा ॥
सर्व्वदुःखोपशमनी पुत्त्र सन्ततिव-
र्द्धनी । यः कुर्य्यात् परया भक्त्या
स परं ब्रह्म गच्छति ॥ कल्पमे-
कं वसेत्स्वर्गे ततो याति महत्
पदं । इद मनन्दं शृणोति यः
स्मरेद्वा परिपठतीह दिवाकर-
स्य लोके । मतिमपि च ददा-
ति सोऽपि देवै रमरवधूजन-
मालया च पूज्यः ॥ इति मा-
त्स्ये ७२ अध्यायः ॥
शार्करिकः त्रि कर्करावान् । इति
सिद्धान्तकौमुदी ॥
शार्करिलः त्रि शार्करावान् इत्य-
मरः ॥
शार्करी स्त्री छन्दोविशेषः ॥
नदी ॥ मेखला । इति हलालि-
खित मेदिनी ॥ लेखनी । इति
धरणिः ॥ मुद्रांकित मेदिनी हे-
मचन्द्रयोः रेफ मध्यादि ककार-
मध्यपाठः ॥ मुखा विवरणे शा-
करीपाठे दृश्यते ॥
शार्करोदकं क्ली शार्करायुक्तज-
लं । चिनिपाना इति पारवत ।
इति च भाषा । यथा । जलेन
शीतलेनैव घोलिता शुभ्र शा-
र्करा । एला लवङ्ग कर्पूर मरि-
चैश्च समन्विता ॥ शार्करोदक
नाम्नेतत् प्रसिद्धं विदुषां मुखे ।
शार्करोदक माख्यातं शुक्लं
शिशिरं सरं ॥ वल्यं रुच्यं ल-
घु स्वादु वात पित्तास्र नाशनं ।
मूर्च्छा छर्द्दि तृषा दाह ज्वर शा-
न्तिकरं परं ॥ इति भावप्रकाशः
शार्द्धः पुं अपानोत्सर्गः शृधधा-
तो र्घञ्प्रत्ययेन निष्पन्नः ॥
शार्द्धजहः पुं माषः । यथा ।
शार्द्धं शार्द्धत्वं जहाति इति शा-
र्द्धजहो माषः । इति मुग्धबोध-
व्याकरणटीकायां दुर्गादासः ॥
शार्द्धनं क्ली अधोवायुः । बात-
कर्म इति भाषा । इति मनुटी-
कायां कुल्लूकभट्टः ॥
शार्व हिंसे ॥ शर्व्वति । इति कवि-
कल्पद्रुमः ॥ शार्हति । इति दु-
र्गादासः ॥
शार्म्म क्ली सुखं । इत्यमरः ॥
तद्वति त्रि ॥
शार्म्मा पुं ब्राह्मणस्योपाधिवि-
शेषः । यथा । शार्म्मवद्ब्राह्मणादिके
कार्य्यं शार्म्मा तथैव कर्म्मणि शा

र्म्मणो ॰ तथा कालेच पितृणां
दत्त मन्तये शार्म्मत्रिसमेन गोत्र
संबन्ध नामानि पितृणां परि
कल्पय त्रिसेकवाक्यतया श
र्म्मान्ते नाम प्रतीयते तथाच वि
ष्णुपुराणे । ततश्च नामकुर्वीत
पितैव दशमेहनि । देव पूर्व्वं
नराख्यंहि शार्म्म वर्म्मादि संयु
तं । देवात्त्वंनराख्यं नरनाम
तत्त्व विशिष्टं शार्म्मयुतं । पत॰
च्चविप्रपरं । शार्म्मा देवश्च विप्र
स्यवर्म्म त्राता च भूभुजः । भूतिर्द
त्तश्चवैश्यस्यदासः शूद्रस्य कार
येत् ॥ इति यमवचनात् । अत्र
चकारेण देव शार्म्मणा समुच्च
यः । अत्रापिशार्म्माद्युन्तता माह
शातातपः शार्म्मान्तं ब्राह्मणस्य
स्याद्वर्म्मान्तं क्षत्रियस्य च गुप्तान्त
वैस्यत्व वैश्यस्य दासान्तं चान्त्य॰
जन्मनः ॥ इति श्राद्धतत्त्वे ॥
शार्म्मरः पुं वस्त्रभेदः । इति
धरणिः ॥
शार्म्मरा स्त्री दारुहरिद्रा ॥
इतिधरणिः ॥
शार्य्या स्त्री रात्रिः । यथा । त्रिया॰
मा शार्व्वरी शार्य्या तमस्वी तम
दालपा । इति भरतधृतवाचस्पतिः

शार्य्याति पुं वैवस्वतमनुपुत्रः ॥
तस्यपुत्र आनर्त्तः । यथा । आनर्त्तो
नाम शार्य्यातेः सुकन्यानामदारि
का । आनर्त्तस्याभवत्पुत्रो रो
चमानः प्रतापवान् ॥ आनर्त्तो
नाम देशो ॰ भूभवारीच कुश
स्थली ॥ इति मात्स्य १२
अध्यायः ॥
शार्व्व हिंसे । इति कविकल्पद्रुमः
शार्व्वति । दुर्गादासः ॥
शार्व्वः पुं शिवः । इति हेमचंद्रः
क्षितिमूर्त्तिं रथे । यथा । विसर्ज्ज
नात् शार्व्वं भविष्य पुराणोक्तंस्व
भाव सिद्ध प्रोक्षेप्यामादिदित्त
वामावर्त्तेन पूजनं । यथा सर्व्वा
य क्षितिमूर्त्तये नम इत्यादि ॰
तिथ्यादितत्त्वे ॥ दंत्यसादिरप्यत्र
विश्वः । यथा शार्व्वः सर्व्वः शिवः
स्थाणु र्भूतादि र्निधिरव्ययः ॥
इति तस्यसहस्रनामस्तोत्रं
शार्व्वरं क्लीं तमः ॥ कन्दर्पः
इति संक्षिप्तसारोणादिवृत्तिः
शार्व्वरी स्त्री रात्रिः । इत्यमरः ।
योषित् । इति मेदिनी ॥
हरिद्रा । इति विश्वः ॥
संध्या । इति संक्षिप्तसारोणा
दिवृत्तिः ॥

शार्व्वला स्त्री तोमराख्ये । इत्य
मरटीकायां रायमुकुटः ॥ दं
त्यसादि रप्ययं ॥
शार्व्वाणी स्त्री पार्व्वती । इति हेम
चंद्रः ॥ दंत्यसादि रप्ययं शाह्ः
शार्शरीकः पुं हिंस्रः ॥ खलः
इत्युणादिकोशः ॥ अस्त्रः ॥ मं
गलाभरणं ॥ अग्निः । इति सं
क्षिप्तसारोणादिवृत्तिः ॥
शाल उ॰ चलने ॥ स्तुतौ । इति
कवि कल्पद्रुमः ॥ उ. शालते ।
चलने कल्पः । स्तुति रिह संव
रणं । इति दुर्गादासः ॥
शाल ज गते । इति कविकल्प
द्रुमः ज शालः शालः । इति
दुर्गादासः ॥
शाल इ॰ क श्लाघे । इति कविक
ल्पद्रुमः ॥ क इ॰ शालयते धैरि
तेधीरः ॥ इतिदुर्गादासः ॥
शाल वेगे । इति कविकल्पद्रुमः
शालति । इति दुर्गादासः ॥
शाले क्लीं शलकीलोम । सजा
रुकाँटा इति भाषा । तत्पर्य्या
यः । शालली २ शललं ३ इत्य
मरः
शालः पुं शलले ॥ भृंगी ॥ ते
जभेदः ॥ ब्रह्मा । इति मेदिनी॰

शाहूरत्नावल्या ॥ कुंतास्त्रं ॥
इति त्रिकांडशेषः ॥ उष्ट्रः ।
इति हेमचंद्रः ॥
शालकः पुं मर्कटः । माकड्सा
इति भाषा । इति त्रिकांडशेषः
शालंगः पुं लोकपालः ॥ लव
णविशेषः ॥ इत्युणादिकोशः ॥
शालभः पुं कीटविशेषः । फ
ड़िं इति पंतपाल इति च भाषा
तत्पर्य्यायः । पतंगः २ । इत्य
मरः ॥ पञ्जागः ३ पञ्जाकः ४ ।
इति शाहूरत्नावली । सत्व इति
विशेषः । यथा । अतिवृष्टिरना
वृष्टिः शालभा मूषिकाः खगाः
प्रत्यासन्नाश्च राजानः षडेतेईत
यः स्मृताः ॥ इति ज्योति
स्तत्त्वे ॥
शालले क्लीं शले इत्यमरः ॥
शालली स्त्री शले । इत्यमरः
शाली । इति शब्दविवेकः ॥
शालाका स्त्री शल्य ॥ मदनवृत्तः
शारिका ॥ शलकी ॥ छत्रादि
काष्ठी ॥ शरः । इति मेदिनी
आलेख्यकूर्चिका । इति हेमचं
द्रः ॥ सूचि । इति शब्दचंद्रिका
शालाकापरि व्य शलाकाक्रीडा
योषकाजयः । यथा । अक्षशलाका

संख्याः परिणा। द्यूतव्यवहारे
पराजये प्रवर्त्ते समासः अक्षे
विपरीतं वृत्तं। अक्षपरि एवं
शलाकापरि। एकपरि। इ-
ति सिद्धान्तकौमुदी॥ अपि च
नन्वेकस्याक्षस्य शलाकाया-
वा द्युते ऽन्यथापातन मित्यर्थे
अक्षपरि शलाकापरि इत्यव्य-
यीभावे ऽव्याप्ति स्तयो रव्यय
गर्भत्वेपि अव्यय एवत्वाभावात्
इति शब्दशक्तिप्रकाशिका॥
शलाकापुरुषाः पुं बौद्धानां-
त्रिषष्टिदेवपुरुषाः। तत्र द्वाद
शचक्रवर्त्तिनः चतुर्विंशतिर्जि
नाः। नववासुदेवाः। नवबलदेवाः
नव प्रतिवासुदेवाश्च यथा।
यः सर्व्वमण्डलस्येशो राजसूय
श्च यो ऽयजत्। चक्रवर्त्ती सार्व
भौमस्ते तु द्वादश भारते॥
आर्षभि र्भरत स्तत्र सगरस्तु सु
मित्रभूः। मघवा वैजयिरथा
श्वसेन नृपनन्दनः॥ सनत्कुमा
रोथ शान्ति कुन्थुर रोजिनाव
पि। सुभूमस्तु कार्त्तवीर्यः प
द्मः पद्मोत्तरात्मजः॥ हरिषे-
णो हरिसुतो जयो विजयन
न्दनः। ब्रह्मसूनुर्ब्रह्मदत्तः सर्व्वेचे

क्ष्वाकुवंशजाः॥ प्रजापत्य स्त्रि
पृष्ठोथ द्विपृष्ठो ब्रह्मसंभवः
स्वयंभू रुद्रतनयः सोमभूः
पुरुषोत्तमः॥ शैविः पुरुषसिं
होथ महासीरः समुद्भवः॥
स्यात् पुरुषपुण्डरीको दत्तो-
ग्निः सिंहनन्दनः। नारायणो
दाशरथिः कृष्णस्तु वसुदेवभूः
वासुदेवा अमी कृष्ण नव शु
क्लावला स्त्वमी अचलो विजयो
भद्रः सुप्रभश्च सुदर्शनः। आ
नन्दो नन्दनः पद्मो रामो विष्णु-
द्विषस्त्वमी। अश्वग्रीवस्तारक
श्च मेरको मधु रेव च। निशुम्भ
बलिप्रह्लादलंकेश मगधेश्वराः
जिनैः सह त्रिषष्टिः स्युः शला
कापुरुषा अमी। इति हेमचं-
द्रः॥
शलाटः पुं शाकटपरिमाणं।
यथा। तुला पलशते तासां-
विंशत्या भार आचितः शाकटः
शाकटीनश्च शलाट स्ते दशा
चितः॥ इति हेमचन्द्रः॥
शलाटुः त्रि अपक्वफले। इत्य
मरः॥
शलाटुः पुं मूलविशेषः। इत्यु
णादिकोषः॥ बिल्वः॥ इति

राजनिर्घण्टः॥
शलाभोलिः पुं उष्ट्रः। इति
हेमचन्द्रः॥
शलालुः स्त्री सुगन्धिद्रव्यविशे
षः॥ इति सिद्धान्तकौमुदी॥
शलालुकः त्रि शलालुकी तेन
तु। यथा। शलालुनो ऽन्यत
रस्यां ष्ठन् स्यात् पक्षे ठक्।
शलालुकः। शलालुकी। शा
लालुकः। शालालुकी। शलालुः सु
गन्धिद्रव्यविशेषः॥ इति सिद्धा
न्तकौमुदी॥
शली स्त्री स्वल्पशल्यकः। तत्
पर्य्यायः शललो २ श्वावित् ३
अस्य मांसगुणाः गुरुत्वं स्नि-
ग्धत्वं। शीतलत्वं। कफ पित्त-
नाशित्वञ्च। इति राजनिर्घण्टः
शल्कं क्ली खण्डं॥ वल्कले। इ
त्यमरः॥ मत्स्यत्वक् आंशि इति
भाषा। यथा। शल्कं स्यात् वल्क
ले खण्डे शुल्कन्तु मत्स्यवल्कले
इति भरतधृतकोषः॥
शल्कलं क्ली मत्स्यवल्कलं। हृ
तत्वक्। शलधातोः कलच् प्र-
त्ययेन निष्पन्नं। इति सिद्धान्त-
कौमुदी॥
शल्कली पुं मत्स्यः। इति शब्द

रत्नावली॥
शल्की पुं मत्स्यः। इति हेम
चन्द्रः॥
शल्यदा (स्त्री मेदा। इति रा
शल्यपर्णिका) जनिर्घण्टः॥
शल्भ उ॰ कत्थने। इति कवि
कल्पद्रुमः॥ उ॰ शल्भते। कत्थ
ने प्रशंसा। इति दुर्गादासः॥
शल्मलिः पुं } शल्मलिवृक्षः यथा
शल्मली स्त्री } शल्मलिः स्यात्
शाल्मलिश्च शाल्मली शल्मली त
था। इति भरतद्विरूपकोषः॥
शल्यं क्ली श्वेडः॥ इषुः। तोमरे
इति मेदिनी॥ वंशकाष्ठिका
इति विश्वः॥ दुःसहे॥ इत्येके
इति शब्दरत्नावली॥ पापं।
इति त्रिकाण्डशेषः॥
अस्थि। यथा। अश्वत्थाम्नोहारवि
पिः। स्खलितैर्जित्वा भेदित्व भूमिमा
द्दे निखाय तोयावधि यन्नत
स्तः। कूर्म्मादिशल्या अथवा त्व
माणे रवाताथ वा प्रश्नवशा
द्विचिन्त्यः॥ हर्म्ये प्रवालादनपुष्प
पाणिःस्फुटिः शुचिर्देवविदे समे
त्य। प्रच्छदिनीतो मधुरस्वरेण
शल्यस्य तत्त्वे भवने तदीयः॥
ततः प्रश्नादिमो वर्णः संख्या॥

ऐर्या यत्नतो ऽथवा । क्रमात्
पुष्पापगमादेव फलानां ग्रास्य-
णाद्भितः । भरणो भरणी धारि
णीकरो च तदनंतरं । न मेत्रेन
स इत्येष मंत्रो वह्निप्रियांतकः ॥
वह्निप्रिया स्वाहा । मन्त्रेण
तेन कठिनी मभिमंत्र्य विभा
जयेत् । तदथा सदनक्षेत्रं तथा
पश्चाद्विलेखयेत् । व क च त श
प हाः श प या तव चेत् सम्भाव
तात्रिजायते । प्रागादिकोष्ठेनव
केवलं स्ते शल्य माप्नोति ॥
प्रश्ने वकारः प्रश्नतो नराख्यिव
दीति शल्यं नरकप्रदायि । लो
लीपादेशेवरहेतुमत्प्रदं क
कारः खरशास्य मेश्मि ॥ या
स्यां चकारः सवशास्य वेश्म
प्रभो विनाशं प्रकरोति शल्यं
रसोदिशि धाख्य शशस्य
तानां महद्भयं वह्नि स्तनिष्ठि
ते तत्र ॥ पः वारिदिशस्थि
पिशोः जेवीति मृत्युं प्रवासाद्
ह सेव शल्यं । हो वायुकोणेन
रहूप स्थिः दारिद्र्य मित्र स्यय
कल्पिते ॥ यनपदिशि शाका
रः प्राह विभास्थि विन स्यपहेद
शापकारो वह्निकरत्वाख्यिशोणो न

दिह कुलविनाशं गोमुनानाश्च
हानिं वितरति गृहनाथस्यापि
गुप्तस्य दैवैः ॥ योमध्यभागोऽभासि
तंकपाले कालायसे चारुकुल
त्तयाय । रत्नादयास्यान्ययता
प्रमाणं सर्वत्र तथ्यं कथयामि
शल्ये । इंद्रवेश्मा ज्ञेलेशाने शा
ल्ये साईं करे करो ॥ वज्रा
तक ऊर्ध्वेषु पुरुषे मध्यवात
यो ॥ देवीपुराणे । पुरुषाधः
स्थितं शल्यं नगृहे दोषदंभवेत्
प्रासादे दोषदं शल्यं भवेद्यावत्
जलांतकं ॥ गृहारम्भेतिकण्डू
तिः स्वाम्यंगे यदिजायते ॥
शल्यं त्वपनयेत्तत्र प्रासादे भ
वनेपिवा ॥ इति ज्योतिस्तत्वे
समस्तशल्यानि यथा ॥ न्टेपो
न हरिः सेवकोऽप्ययनो न
कुलार्थकः कविनैषुरजित्
कवि शुक्रगुरु न सहैस्तवः
गुरणी न भगवन् परोरसिक
पी नं कलाश्चयः सत न्नजन
तानुगो जगति समस्तशल्यानि
च ॥ इति पाद्मोत्तरखण्डे ९०
अध्यायः ॥
शल्यः पुं मदनवृक्षः ॥ श्वावि
त् ॥ इत्यमरः ॥ नृपभेदः । स तु ।

युधिष्ठिरमातुलः ॥ सीमा ॥
शलकाः । इति हेमचन्द्रः ॥ बिल्व
वृक्षः ॥ मत्स्यभेदः । इति राज
निर्घण्टः ॥ शल्यनिःसरणो
पायं यथा । रुद्रलोगलिका
मूले हिङ्गुलस्य तथैव च तेन
व्रण मुखं लिप्तं शल्यानिःसर
तिव्रणात् ॥ चिरकाल प्रवि
ष्टोपि तेन मार्गेण शङ्कर । इ
ति गारुडे १९२ अध्यायः ॥
शल्यः पुं स्त्री शस्त्रविशेषः । शे
ल इति भाषा । तत्पर्यायः । शं
कुः २ इत्यमरः ॥ दीर्घायुधः ३
शलः ४ कुंतः ५ विषांकुरः ६
इति त्रिकाण्डशेषः ॥
शल्यकः पुं मदनवृक्षः ॥ इति
शब्दरत्नावली ॥ शल्लकीजन्तुः
इति राजनिर्घण्टः ॥
शल्यकण्ठः पुं शल्लकी । इति
शब्दचन्द्रिका ॥
शल्यलोम स्त्री शल्लली । इति
राजनिर्घण्टः ॥
शल्यारिः पुं युधिष्ठिरराजः ।
इति हेमचन्द्रः ॥
शल गत्यां । इति कविकल्पद्रु
मः ॥ शल्लकी । इति दुर्गादासः
सौत्रधातुरयं ॥

शलं स्त्री त्वक् । इति शब्दर
त्नावली ॥
शलः पुं भेकः ॥ इति श
ब्दरत्नावली ॥
शलकं स्त्री त्वक् । इति शब्द
रत्नावली ॥
शलकः पुं शोणवृक्षः । इ
तिजटाधरः ॥
शलकी स्त्री पशुविशेषः । शा
जारु इति वंगभाषा । साहिल
इति हिंदीभाषा । तत्पर्यायः ।
श्वावित् २ शलका ३ शल्यः ४
इति जटाधरः ॥ क्रकचपादः ५
छेदारः ६ इति शब्दरत्नावली ।
शल्यकः ७ शल्यमृगः ८ वज्रश
ल्यः ९ बिलेशयः १० अस्या
मांस गुणाः । शल्यमांसं गुरु
स्निग्धं शीतलं कफपित्तजित्
इति राजनिर्घण्टः ॥ भावप्रकाशो
क्त गुणाः विलेशयवद्बोध्
याः ॥ वृक्षविशेषः । तत्पर्या
यः । गजभक्ष्या २ सुवहा ३
सुरभिः ४ रसा ५ महेरणा ६
कुंदुरुकी ७ ह्लादिनी ८ इत्य
मरः । गजभक्ता ९ सुरभी १०
महेरुणा ११ महारणा १२ ह्लादि
नी १३ सिलकी १४ सलकी १५

इति भरतः ॥ सरभीरसा ९६
शिलकी ९७ इति टीकान्तरं ॥
सिह्लकी ९८ सिह्लभूमिका
इति शब्दरत्नावली ॥ अश्वमूत्री
१० कुंती ११ इति जटाधरः ॥
शल्लकीद्रवः पुं सिह्लकः । इ
ति जटाधरः ॥
शाल्वः पुं शाल्वदेशः । इत्यु
णादिकोषः ॥
शव विकारे ॥ गतौ । इति कवि
कल्पद्रुमः ॥ शवति चित्तं कामः
इति दुर्गादासः ॥
शवं क्ली जले । इति मेदिनी
शवः पुं क्ली मृतशरीरं । तत्
पर्य्यायः । कुणपः २ इत्यमरः ।
क्षितिवर्द्धनः ३ इति शब्दरत्ना
वली ॥ मृतकं ४ इति वराहपु
राणं ॥ तद्दाहविधि र्यथा । न
ष्टसंज्ञो मदुद्दिश्य ज्ञात्वा मृत्यु
वशंगतं महावनस्पतिं गत्वा
गंधांश्च विविधानपि ॥ घृ
तेन समायुक्तं कृत्वा वै देह
शोधनं । तेजो व्यापकरं वास्य
तत्सर्वं परिकल्पयेच्च ॥ दक्षि
णायां शिरः कृत्वा सलिलेनं
निधाय च । तीर्थावाहनं
कृत्वा स्नापनं तस्य कारयेत् ॥

गयादीनि च तीर्थानि येच पु
ण्याः शिलोच्चयाः । कुरुक्षेत्रञ्च गं
गा च यमुना च सरिद्वरा ॥ कौ
शिकी चन्द्रभागा च सर्वपापप्र
णाशिनी । गण्डकी भद्रनामा च
सरयूर्बलदा तथा ॥ वनानि न
व वाराहं तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि चत्वारः
सागरास्तथा ॥ सर्वाणि मनसा
ध्यात्वा स्नानमेवन्तु कारयेत् । श्म
शानं तत्र नेतव्यं चितां कृत्वा वि
धानतः ॥ तस्या उपरि तं स्थाप्य
दक्षिणाग्रं शिरं तथा । देवान
ग्निमुखान् ध्यात्वा गृह्य हस्ते हु
ताशनं ॥ प्रज्वाल्य विधिवत्तत्र मंत्र
मेतदुदीरयेत् । कृत्वा सुदुष्करं क
र्म जानता वाप्यजानता ॥ मृत्यु
कालवशं प्राप्य नरं पंचत्वमागतं
धर्म्माधर्म्मसमायुक्तो लोभमोहस
माहृतः ॥ दह सर्व्वगात्राणि दि
व्यलोकाय गच्छतु । एवमुक्त्वा
ततः शीघ्रं कृत्वा चैव प्रदक्षिणं ।
ज्वलमाने तदा वह्नौ शिरःस्थाने
प्रदापयेत् । चातुर्वर्ण्येषु संस्कार
मेवं भवति पुत्रक ॥ गात्राणि
तामसीचैव अत्यात्म विनिवर्त्तये
त् । मृतनामतत्तो दिश्य दद्यात् पिं

ण्डं महीतले ॥ तदा प्रभृति चा
शौचं दैवकर्म्म न कारयेत् । इति
वाराहे श्राद्धोत्पत्ति नामाध्या
यः ॥ अन्यत् दाह शवे दृष्टव्यं
तस्पर्शे दोषो यथा । वाराह
उवाच स्पृष्ट्वा तु मृतकं भद्रे
नरं पंचत्वमागतं । समश्मा
नं वह्निः कृत्वा यः श्मशाने प्र
पद्यते । पितरस्तस्य सर्व्वाणि
आत्मानञ्च पितामहाः श्मशाने
जंबुका भूत्वा भक्षयंतः शवो
स्तथा ॥ ततो हरेर्वचः श्रुत्वा क
मकामा वसुन्धरा । उवाच मधुरं
वाक्यं सर्वलोकहिताय वै । धर
ण्युवाच तव नाथ प्रपन्नानां के
पापं विद्यते प्रभो । प्रायश्चि
त्तञ्च मे ब्रूहि येन मुच्यति कि
ल्विषात् । वाराह उवाच । शृणु
सुंदरि तत्त्वेन यन्मां त्वं परिपृच्छ
सि । कथयिष्यामि ते हीदं प्रा
मनं पापनाशनं । एकाहारं दि
नान् सप्त त्रिहारं चाप्युपोषितः
पंचगव्यं ततः पीत्वा शीघ्रं मु
च्यति किल्विषात् ॥ शवस्पर्शे
ऽपराधस्य एष ते कथितो विधिः
सर्व्वथा वर्जनीयो वै मद्भा
गवतेन तु ॥ य एतेन विधानेन

प्रायश्चित्तं समाचरेत् । विमुक्तः
सर्वपापेभ्यो मत्परायोन विद्य
ते ॥ अपिच वराह उवाच ॥
स्पृष्ट्वा तु मृतकं देवि यो मत
ह्वेमेषु तिष्ठति । शते वर्षे स
हस्राणि गर्भेषु परिवर्त्तते ॥ द
शवर्षसहस्राणि चंडालश्च वजा
यते । अन्यः सप्तसहस्राणि मंडुक
श्च शते समाः । मक्षिका त्रीणि
वर्षाणि टिट्टिभैकादश समाः
दशवै सप्तचान्यानि कृकलाशो
भवेत्समाः । हस्ती वर्षशतञ्चै
व खरो द्वात्रिंशको भवेत् ॥ मा
र्ज्जारो नव वर्षाणि वानरो दश
पंचच । एवं स चात्मदोषेण म
त्कर्म्मपरायणः । प्राप्नोति सम
हद्दुःखं देवि एवं न संशयः त
तो हरेर्वचः श्रुत्वा दुःखेन परि
शुष्यति । सर्वसंसार मोक्षाय प्र
ह्वोवाच वसुन्धरा । किमिदं भाष
से देव मानुषाणां दुरासदं ॥
कार्य्यं भीषणकं त्वेवमस्मत्कर्म्म
प्रेतदं । आचारञ्च परिभ्रष्ट
स्तव कर्म्मपरायणः ॥ तरंति येन
दुर्गाणि प्रायश्चित्तं तथा वद ।
श्रुत्वा धरण्यास्ततो वाक्यं लोक
नाथो जनार्दनः ॥ धर्म्मसंरत

णार्थाय प्रभुवाच वसुन्धरां वा
राह उवाच । स्पृष्ट्वा तु मृतकं भू-
मे मम कर्म्मपरायणः । एका-
हारं तत स्तिष्ठेत् दिनानि दश
पंचच । ततएवं विधिं कृत्वा पं-
चगव्ये तु प्राशयेत् ॥ शुद्धभावे
विशुद्धात्मा कर्म्मणाच न लिप्य-
ते एतत्ते कथितं देवि स्पृष्ट्वा मृ-
तक मेवच । दोषश्चैव विशुद्ध्यर्थ
यत्तया एवं पृच्छते । य एतेन-
विधानेन प्रायश्चित्तं समाचरेत्
अपराध विनिर्मुक्तो मम लो-
कं स गच्छति । इतिवाराहे मृत
दर्शने स्पर्शने प्रायश्चित्तं ना-
माध्यायः ॥ शवानुगमनाशौ-
चं यथा । कूर्म्मपुराणे । प्रेतीभू-
तं द्विजं विप्रो योऽनुगच्छति का-
मतः । स्नात्वा सचेलं स्पृष्ट्वाग्निं घृ-
तं प्राश्य विशुद्ध्यति । एकाहात्
क्षत्रिये शुद्धि र्वैश्ये च स्यात् द्व्य-
हेन तु । शूद्रे दिनत्रयं प्रोक्तं प्रा-
णायामशतं पुनः ॥ एतच्च शवानु-
गमने शुद्धिहेतुत्वाभिधान-
परं । न तु प्रायश्चित्तवदोज-
ताभावपरं । तत्र तपस्त्वात्तथा-
श्रुतेः स्वहार्थः । यत्तु याज्ञव-
ल्क्यवचनं । ब्राह्मणेनानुगन्तव्यो
न तु शूद्रः कथंचन अनुगम्या-
म्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभु-
क् शुचिः । तत् प्रमादादनुगम-
ने कथन्त्वेनेत्यभिधानात् । ग्रभ-
क्षि न तु कृतोदके । शूद्रस्य ब्रा-
ह्मणशव दहने दोषो यथा ॥
स्तनब्राह्मण देहांश्च दैवात् शूद्र
वहेत्ति चेत् । पदप्रमाणवर्षञ्च
तेषांच नरके स्थितिः ॥ ततस्तेषा-
ञ्च साहाय्यं करोति हरिरूपिणी
ददाति मुक्तिं तेभ्योऽपि क्रमेणाच
कृपामयी । जन्म पुण्यवतां गे-
हे कारयित्वा च भारते । स्थाने
ददाति वैकुण्ठे निश्चितं जन्मभि-
स्त्रिभिः । इति ब्रह्मवैवर्त्ते श्रीकृ-
ष्णजन्मखण्डे ४४ अध्यायः । शव-
दूषित गृहजलाशयादीनां शुद्धि-
र्यथा । ब्रह्मपुराणे । योषा मम्भसि
सांसञ्च तच्छरीरे यंतञ्च यत्
वापी कूप तडागेषु जले सर्वञ्च
दूष्यति । तच्छरीरे मृत शरीरैः
उद्धर वचने कुणप ग्रहणात्
यथा ॥ सकूपं सकर्दमं ते-
भ्योऽप्यपास्य ततः । प्रक्षिपे-
त् पंचगव्यंच समंत्रं सर्वशुद्धिकृ-
त् । अथवाप्य कुणपं तेभ्यो बहुतो-
येष्व एव वा । शते घटेषु वा-

त्रिंशत् तोयकुम्भान् समुद्धरेत्
वापी ससोपाना । निःसोपानः
कूपः । तडागः पद्माकरः । घाता-
द्विजलाल्पत्वापेक्षया अस्य
स्पर्शेऽप्युद्धरणाभिधानात् एवं म-
रण समये गृहान्निःसार्य्यते अ-
न्यथा गृहस्य दुष्टता स्यात् य-
था दूहन्तुः सशूद्र पतिता-
श्चान्त्यामृता यो द्विजमंदिरे । शौ-
चंतत्र प्रवक्ष्यामि मनुना भाषितं
यथा ॥ दशरात्राच्छुनि प्रेते मा-
सात् शूद्रे भवेच्छुचिः ॥ द्वाभ्यांतु
पतिते गेहे अन्त्ये मासचतुष्ट-
यात् ॥ अत्यन्ते वर्जयेद्गेहं मि-
त्येवं मनुरब्रवीत् । द्वाभ्यामासा-
भ्यां मासषट्क पाठात् । अ-
न्त्यो म्लेच्छः ॥ अत्यन्तः श्वपाकः
इति वाचस्पतिमिश्राः । यमः ।
द्विजस्य मरणे वेश्म विशुद्ध्यति
दिनत्रयात् । दिनैकेन बहिर्भू-
मि रग्नि प्रोक्षण लेपनैः ॥
यथोक्तकालानन्तरे कर्त्तव्य मा-
ह संवर्त्तः । गृह शुद्धिं प्रवक्ष्यामि
अन्तस्थ शवदूषिते । प्रोत्सृज्य मृ-
न्मयं पात्रं सिद्धमन्नं तथैवच ॥
गृहादपास्य तत् सर्वं गोमये-
नोपलेपयेत् । गोमयेनो ॥
पालिप्याथ छागेनाघ्रापयेद्बुधः ॥
ब्राह्मणै र्मंत्रपूतैश्च हिरण्य कुश
वारिभिः । सर्वमभ्युक्षयेद्वेश्म ततः
शुद्ध्यत्यसंशयः ॥ अत्र मंत्रानादे-
शे गायत्री । देवलः । पंचधा वा
चतुर्धा वा भूरमेध्या विशुद्ध्यति
उष्णाद्विधा त्रिधा वापि शुद्ध्यते म-
लिनैकधा ॥ दहनं खननं भू-
मे रुपलेपन वापने ॥ पर्ज्जन्य
वर्षणाच्चापि शौचं पंचविधं स्मृ-
तं ॥ प्रसूते गर्भिणी यत्र म्रियते
यत्र मानुषः । चंडाले दूषिते य-
त्र यत्र विन्यस्यते शवः । विण्मू-
त्रोपहते यत्र कुणपो यत्र दृश्य-
ते ॥ एवं कश्मलभूयिष्ठा भूर-
मेध्या निकथ्यते । कृमिकीटपद-
क्षेपै र्दूषिता यत्र मेदिनी ॥ प-
क्षया कर्षणैः सिक्ता वाते गोड-
हता व्रजेत् । नखदंत तनूजत्व-
क् तुष पांशु रजो मलैः ॥ भ-
स्मपंक तृणै र्वापि प्रच्छन्ना म-
लिना भवेत् । वापनं मृदन्तरेणाव-
रणं कुषितं वासः । प्रक्षालनी
भूतश्लेष्मादि । चतुर्द्दशी पंचा-
नां मध्ये यथासम्भवं ग्रहणं ।
अङ्गिराः । शौचं सहस्रलोमानां
वाय्वग्न्यर्केन्दुरश्मिभिः । रेतः ।

स्तूहं शवस्तूह् सार्विके नैवड्डष्य
ति ॥ सहस्र रोमानां कंबला
नां । इति शुद्धितत्त्वे ॥
शवकाम्यः पुं कुक्कुरः । इति श
ब्दरत्नावली ॥
शवयाने स्त्री शववहनार्थरथ-
हा मडारखाट इति भाषा तत्
पर्य्यायः । काष्टमलः २ इति-
हारावली खेटः ३ खाटी ४
खाटिका ५ शवरथः ६ इति
शब्दरत्नावली ॥
शवरः पुं म्लेच्छजातिविशेषः
इत्यमरः । मयूरपुच्छपरिधानो
म्लेच्छः किरातः । पत्रपरिधानः
शवरः । इति तट्टीकायां भरतः
पानीयं ॥ शिवः । इति मेदिनी
शास्त्रविशेषः ॥ हस्तः ३
स्थानादिकोशः ॥
शवरथः पुं शवयाने । इति श
ब्दरत्नावली ॥
शवलोध्रः पुं श्वेतलोध्रः ॥
इतिरत्नमाला ॥
शवरालयः पुं शवरगृहे । तत्प
र्य्यायः । पक्कणः २ इत्यमरः ॥
पक्कणः ३ इति शब्दरत्नावली
शवरावासः ४ इति हेमचंद्रः ॥
शवरावासः पुं शवरालयः । इति
हेमचंद्रः ॥
शवलः पुं कर्बुरवर्णः । तद्वति त्रि
इत्यमरः ॥
शवला } स्त्री शवलवर्णगोः
शवली } इत्यमरभरतौ ॥
शवसानः पुं पथिकः ॥ इति
सिद्धांतकौमुदी । वैदिकपदोयं
शवयातो रोगादिकसानच्
प्रत्ययेन निष्पन्नः ॥
शश प्लवने । इतिकविकल्पद्रु
मः । शशति शशि सुशीः शश
त्रिति किरातयमकात् । शशति
भेकः प्लवनेन गच्छतीत्यर्थः । र
फलभज इत्यत्र वर्ज्जेन मसेयवा
दंत्यान्त्याय मपीत्येके । इति
दुर्गादासः ॥
शशः पुं मृगविशेषः । शशाक
इति खरगोश इति च भाषा ।
इत्यमरः ॥ अस्य मांस गुणाः ॥
स्वादुत्वं । कषायत्वं । मलवद्धका
रित्वं । शीतलत्वं । लघुत्वं । शो
षश्वासपित्तरक्त नाशनत्वं । रु
च्यत्वञ्च । इति राजवल्लभः ॥
अपिच । शशमांसे विशेषश्चेदी
पने श्वासकासनुत् ॥ इति रा
जनिर्घण्टः ॥ अन्यच्च । शशः स्त्री
लीलोमकर्णो विलेशयः प्रकी

र्त्तितः । शशः शीतो लघुर्ग्राही
रूक्षः स्वादुः सदा हितः ॥ वह्नि
कृत् कफपित्तघ्नो वात साधा
रणः स्मृतः ज्वरातीसार शोषा
स्रश्वासामयहरश्च सः ॥ इति-
भावप्रकाशः ॥ श्राद्धे स्य मांस
स्य दान फलं यथा । हविष्या-
न्नेन वै मासं पायसेन च वत्सरं-
मात्स्य हारिनकौरभ्रशाकु-
नि च्छाग पार्षतैः ॥ ऐणरौ
रव वाराह शाशैर्मांसैर्यथाक्र
मं मासवृद्धाभितृप्यंतिदत्तेने
ह पितामहाः ॥ इति श्रा
द्धतत्त्वे ॥ विल्वे एतन्मांस
स्य देयत्वं यथा । मार्गमांसं
तथा च्छागं शाशं समनुयुज्य
ते । एतानि हि प्रियाण्यस्य प्र
योज्यानि वसुंधरे ॥
इत्येकादशीतत्त्वे ॥ चंद्र-
लाञ्छनः । इति धरणिः । वोलः
लोध्रः ॥ मनुष्यविशेषः ॥ इति
मेदिनी ॥ सतु चतुर्विधपुरु-
षांतर्गतपुरुषविशेषः । तस्य
लक्षणं यथा । मृदुवचन शशी
लः कोमलांगः सुकेशः सकल-
गुणविधानः सत्यवादी शशो-
यं ॥ इति रति मंजरी ॥
शशकः पुं शशः । यथा श
शकः शल्लकी गोधा खड्गी कू
र्म्मश्च पंचमः । भक्ष्याः पंचनखे
ष्वेते नभक्ष्या ग्राम्यजातयः ॥
इति स्मृतिः
शशधरः पुं चंद्रः ॥ कर्पूरः ॥
इत्यमरः ॥
शशप्लुतकं स्त्री नखाघातः
इति शब्दमाला ॥
शशभृत् पुं चंद्रः ॥ इति
हेमचंद्रः ॥
शशभृद्भृतः पुं शिवः । यथा
श्मशाने योगनिद्रां च चिंतयि
त्वा मनस्विनी । द्वितीयस्य श
रीरस्य भागार्द्धे शशभृद्भृतः ॥ इ
ति कालिकापुराणे ४४ अध्यायः
शशलोम स्त्री शशकस्य रो
मतत्पर्य्यायः । शशोर्णं २
इत्यमरः ॥
शशबिंदुः पुं विष्णुः । राजवि
शेषः । इति मेदिनी ॥ स तु
चित्ररथपुत्रः । इति पुराणं
शशशिंबिका स्त्री जीवंती । इ
ति राजनिर्घण्टः ॥
शशस्थली स्त्री अंतर्वेदी । इति
त्रिकांडशेषः ॥ साच गंगा यमु
नयो मध्यदेशः । अधुना दो-

ग्राव इति नाम्ना ख्यातः ॥
शशाङ्कः पुं चन्द्रः । इतिहला
युधः । कर्पूरः । इति राजनिर्घण्टः
शशाण्डुलिः स्त्री कर्कटीभेदः
तत्पर्यायः । वृक्षफला २ तण्डु
ली ३ सेव्यसम्भावा ४ स्वसाम्ना
५ लोमशफला ६ हस्वा ७ वृत्त
फला ८ अस्या गुणाः । शशाण्ड
ली तिक्तकटुश्च कोमला कटु
म्लयुक्ता मधुरा कफापहा पाके
तु साम्लामधुरा विदाहकृत् क
फेतु शुक्रारुचिकृच्च दीपनी
इति राजनिर्घण्टः ॥
शशादः पुं श्येनपक्षी । इति
राजनिर्घण्टः ॥
शशादनः पुं श्येनपक्षी । इ
त्यमरः ॥
शशिकला स्त्री पञ्चदशाक्षर
पादच्छन्दोविशेषः । यथा गुरु
निधन मनु लघु मिह शशिक
ला मलयज तिलक समुदित
शशिकला व्रजयुवति ललाट
तिलक गगनगतालकलित न
यन हृदयसलिलनिधि ममल
तुल विमल कमल परिमले ।
इति छन्दोमञ्जरी ॥
शशिकान्तं क्ली कुमुदं । इति
राजनिर्घण्टः ॥
शशिकान्तः पुं चन्द्रकान्तमणिः
इति राजनिर्घण्टः
शशिदेवः पुं रन्तिदेवः । इति
शब्दरत्नावली ॥
शशिध्वजः पुं भल्लाटपुरराजः
यथा ततः शशिध्वजो राजापु
द्धादाकृत्य पुत्रकान् सप्रान्ताया
मति शुक्षा रमां प्रादात् सक
ल्कये । विशाखयूप भूपाश्च कृ
चिरागस्य संयुगे । शय्याकर्ण
न्तरेणापि भल्लाटं पुर मायुधः
इति कल्किपुराणे २५ अध्यायः
शशिप्रभं क्ली कुमुदं । इति
शब्दमाला मुक्ता । इति राजनि
र्घण्टः ॥ चन्द्रप्रभायुक्ते त्रि ॥
शशिप्रभा स्त्री ज्योत्स्ना । इति
जटाधरः ॥
शशिभूषणः पुं शिवः इति श
शिशेखरशब्ददर्शनात् ॥
शशिलेखा स्त्री चन्द्रकला । गुडू
ची ॥ वृत्तभेदः । इति मेदिनी ॥
तद्वृत्तस्य लक्षणादि यथा । श्रो
मो यो चेत् भवेतां सप्ताष्टके
शुद्धलेखा विच्छेदे नेपुरावे ।
पाणौ प्रकाशं कृशाङ्गीमत्वा
नत्यैयं उडूलं न भ्राजते ।

बिभ्रती सा यथाम्भोदस्य मध्ये
लीना यथा चन्द्रलेखा किंचालो
त्वा स्मरन्ती यत्ते भवे जीवयो
तं ॥ इति छन्दोमञ्जरी ॥
शशिवाटिका स्त्री पुनर्नवा । इ
ति राजनिर्घण्टः ॥
शशिशेखरः पुं शिवः । इति
हलायुधः ॥ बुद्धभेदः ॥ तत्प
र्यायः । हेरम्बः २ हेरुकः ३ च
क्रसम्बरः ४ देवः ५ वज्रकपा
ली ६ निशुम्भी ७ वज्रटीकः ८
इति त्रिकाण्डशेषः ॥
शशी पुं चन्द्रः । यथा हिमांशु
श्चन्द्रमाश्चन्द्रः शशी चन्द्रो हि
मद्युतिः ॥ इति भरतधृत शाश्व
तः ॥ अर्हद्वजाविशेषः । इति
हेमचन्द्रः ॥
शशोर्णं क्ली शशस्य लोम इ
त्यमरः ॥
शश्वत् अव्य पुनःपुनः । इत्यमरः
शष वधे । इति कविकल्पद्रुमः
शषति इति दुर्गादासः ॥
शष्कुलः पुं छिलिः उडकमच्छा
इति भाषा इति शब्दचन्द्रिका ॥
शष्कुली स्त्री तिलतण्डुलमाष
मिश्रितयवागूः । इति शब्दचन्द्रिका
कर्णरन्ध्रं । इति शब्दरत्नावली ॥
मत्स्यभेदः । सौरी इति हिन्दीभा
षा । अस्या गुणाः शष्कुलीग्रा
हिनी हृद्या मधुरा तुवरा स्मृता
इति भावप्रकाशः ॥
शष्पं क्ली बालतृणं । इत्यमरः ॥
प्रतिभाहानौ पुं । इति मेदिनी ॥
शस उ वधे । इति कविकल्पद्रुमः
उ शसित्वा शस्त्वा ॥ इति दु
र्गादासः ॥
शस इ उ. आशिषि आ उ. ए
वेको ऽये इति कविकल्पद्रुमः
ई आशंस्यते उ. आशंसते ।
आशी विशार्थेशंसने । इच्छाया
मित्यन्ये । इति दुर्गादासः ॥
शसनं क्ली यज्ञार्थपशुहननं ।
इति शमनशब्दटीकायां रामा
श्रमः ॥
शष्कुली स्त्री पिष्टकविशेषः ॥
पुलिपिठा इति भाषा । अस्या
गुणाः पर्पटा लघवो रूक्षाः श
स्कुल्यः कफपित्तलाः ॥ कांजिक
युक्तं तिलशष्कुलीसाध्या यथा
मांसे विना विकाराश्च कांजिके
तिलशष्कुली । मूलकं माषसू
पेन मधुना च न भक्षयेत् ॥ इ
ति राजनिर्घण्टः ॥ वृथानड़
तूणप्रायश्चित्तं यथा । वृथा ।

पायस एष शष्कुलीकृशरं सं-
याव शिग्रु लोहितवृक्षनिर्यासा
मेध्यप्रभवानां भक्षणे कामतस्त्र्य-
होपवासः अकामतस्त्वहोरात्रं ।
क्षत्रियादीनां पादपादहानिः ।
इति प्रायश्चित्तविवेकः ॥
शस्त इ ङ लु स्तम्भे । इति कवि-
कल्पद्रुमः । इ शंस्यते न मध्य-
पाठेऽपि तस्य उपधात्वाभावात्
लोपाभावे इदनुबन्धो वेदेषु ।
क्कारण भेदार्थः लु शंस्तिर
वैदिकः ॥ इति दुर्गादासः ॥
शस्तं क्ली कल्याणं । इत्यमरः
शरीरं । इति त्रिकाण्डशेषः ॥
शस्तः त्रि कल्याणयुक्तः । स्तुतः
इत्यमरः । प्रशस्तः ॥ इति मे-
दिनी ॥
शस्तकं क्ली अङ्गुलित्राणं । य-
था अङ्गुलित्रे शस्तकञ्चतथाचो-
गुह्यवस्त्रकं । इति शब्दरत्नावली ।
शस्तकोशाकः त्रि प्रशस्तकोश-
युक्तः । इति शब्दरत्नावली ॥
शस्त्रं क्ली लौहं ॥ अस्त्रं । इत्य-
मरः ॥ शस्त्रास्त्रे बहुधा सुश्रुते-
त्यादि दर्शनात् शस्त्रास्त्रयोः
कश्चिद्भेदमाह । येन करस्थेन
हन्यते तत् शस्त्रं खड्गादि ।
येन क्षिप्तेन हन्यते तदस्त्रं काण्डा-
दि । इति तट्टीकायां भरतः ॥
तत्पर्य्यायः अस्त्रं शस्त्रं प्रहरणं
मुद्गालो हेति रायुधः । इति श-
ब्दरत्नावली । एकैकमस्त्रं श-
स्त्रञ्च देवै र्युक्तं महस्तथा । वि-
च्छेद लीलयैवेषां जगतां म-
धुसूदनः ॥ इति विष्णुपुराणे ५
अंशे ३० अध्यायः ॥ अस्त्रमंत्रा-
भिमन्त्रितं । शस्त्रं तदितरत् ।
इति तट्टीका ॥ राज्ञां अस्त्राचार्य्यो
यथा । यन्त्रयुक्ते पाणियुक्तेऽ-
मुक्ते मुक्तधारिते । अस्त्राचा-
र्य्यो निरुद्वेगः कुशलश्च विशि-
ष्यते ॥ आयुधागारनियुक्तस्य ल-
क्षणं यथा । स्थापना जाति त-
त्त्वज्ञः सततं प्रतिजागृता राज्ञः
स्यादायुधागारे दक्षः कर्मसु चो-
द्यतः । इति मात्स्ये १८९ अध्या-
यः ॥ शस्त्रचिकित्सा यथा ।
अथातो ऽग्रोपहरणीय मध्या-
यं व्याख्यास्यामः त्रिविधं कर्म
पूर्वकर्म प्रधानकर्म पश्चात्क-
र्मेति । तद्व्याधिं प्रत्युपदेक्ष्यामः
अस्मिन् शास्त्रे शस्त्रकर्म प्राधा-
न्यात् शस्त्रकर्म्मैव तावत् पूर्व-
मुपदेक्ष्याम स्तत्सम्भारांश्च ॥

तच्च शस्त्रकर्म्माष्टविधं । तद्यथा
छेद्यं भेद्यं लेख्यं वेध्य मेष्यमा-
हार्य्यं विस्राव्यं सीव्य मिति ॥
अतो ऽन्यतमं कर्म चिकीर्षता
वैद्येन पूर्व मेवोपकल्पयितव्या-
नि तद्यथा । यन्त्र शस्त्रक्षारा-
ग्नि शलाका शृङ्ग जलौका-
लाबूजाम्बवौष्ठपिचुप्रोतसूत्रप-
त्र पट्ट मधु घृत वसा पय स्तैल
तर्पणकषायालेपनकल्कव्य-
जनशीतोष्णोदककटाहादीनि परि-
कर्म्मिणश्च स्निग्धाः स्थिरा बलव-
न्तः । ततः प्रशस्तेषु तिथिकरणमुहू-
र्त्तनक्षत्रेषु दध्यक्षतान्नपान रत्नै-
रग्निं विप्रान् भिषजश्चार्च्चयित्वा कृ-
तबलि मंगल स्वस्तिवाचने लघु-
भुक्तवन्तं प्राङ्मुख मातुर मुपवे-
श्य यन्त्रयित्वा प्रत्यङ्मुखो वैद्यो
मर्म्म सिरा स्नायु सन्ध्यस्थि ध-
मनीः परिहरन्ननुलोमं शस्त्रं नि-
दध्यादापूयदर्शनात् सकृदेवा-
पहरेच्छस्त्र माशु च । महत्स्वपि
च पाकेषु द्व्यङ्गुलं त्र्यङ्गुलं वा शस्त्र-
पद मुक्तं । तत्रायतो विशालः
समः सुविभक्त इति व्रणगु-
णाः ॥ भवतश्चात्र । आयतश्च वि-
शालश्च सुविभक्तो निराश्रयः ।
प्राप्तकाल कृतश्चापि व्रणः कर्म्म-
णि शस्यते ॥ शौर्य्य माशुक्रि-
या शस्त्रतैक्ष्ण्य मस्वेद वेपथू
असम्मोहश्च वैद्यस्य शस्त्रकर्म्म-
णि शस्यते । एकेन वा व्रणेना-
शुध्यमानेनान्तरा बुद्ध्यावेक्ष्यापरा-
न् व्रणान्कुर्य्यात् । भवन्ति चात्र ।
यतो यतो गतिं विद्यादुत्सङ्गो यत्र
यत्र च । तत्र तत्र व्रणं कुर्य्याद्यथा
दोषो न तिष्ठति ॥ तत्र भ्रू गण्ड
शंख ललाटाक्षिपुटौष्ठ दन्तवे-
ष्ट कक्षा कुक्षि वङ्क्षणेषु ति-
र्य्यक् छेद उक्तः । चन्द्रमण्डलवच्छे-
दान् पाणि पादेषु कारयेत् । अ-
र्द्धचन्द्राकृतींश्चापि गुदे मेढ्रे च बु-
द्धिमान् । अन्यथा तु सिरास्नायु-
च्छेदन मतिमात्रं वेदना चिरा-
द्व्रणसंरोहो मांसकन्दी प्रादुर्भा-
वश्चेति । मूढगर्भोदरार्शोऽ-
श्मरी भगन्दर मुखरोगेष्वभुक्त-
वतः कर्म कुर्वीत ततः शस्त्रमव-
चार्य्य शीताभिरद्भिरातुरमाश्वा-
स्य समन्तात् परिपीड्याङ्गुल्या व्र-
ण मभिमृज्य प्रक्षाल्य कषाये-
ण प्लोतेनोदक मादाय तिलक-
ल्कमधु सर्पिः प्रगाढा मौषधयु-
क्तां वर्त्तिं प्रणिदध्यात् ततः कल्कं

नाच्छाद्य नातिस्निग्धं नाति
रूक्षं नातिघनं कवलिकां द
त्त्वावस्त्रपट्टेन वध्नीयाद्वेदना र
क्षोघ्नैर्धूपैर्धूपयेद्रक्षोघ्नैश्च मन्त्रै
रक्षां कुर्व्वीत । ततो गुग्गुल्वगु
रु सर्ज्जरस वचा गौरसर्षपचू
र्णैर्लवण निम्बपत्रमिश्रैरा
ज्ययुक्तैर्धूपैर्धूपयेत् । आज्य
शेषेण चास्य प्राणान् समाल
भेत । उदकुम्भाच्चापो गृहीत्वा प्रो
क्षयन् रक्षाकर्म्म कुर्य्यात्तद्वक्ष्या
मः ॥ कृत्यानां प्रतिघातार्थं त
था रक्षाभयस्य च । रक्षाकर्म्म
करिष्यामि ब्रह्मा तदनुमन्य
तां । नागाः पिशाचा गन्धर्व्वाः पि
तरो यक्षराक्षसाः । अभिद्रवन्ति ये
ये त्वां ब्रह्माद्या घ्नन्तु तान् सदा ॥
पृथिव्यां अन्तरीक्षे च ये चरन्ति
निशाचराः । दिक्षु वास्तुनिवा
साश्च पान्तु त्वां ते नमस्कृताः ।
पान्तु त्वां मुनयो ब्राह्म्या दि
व्या राजर्षयस्तथा । पर्व्वताश्चैव न
द्यश्च सर्व्वाः सर्व्वेऽपि सागराः ॥
अग्नी रक्षतु ते जिह्वां प्राणान्
वायुस्तथैव च । सोमो व्यानम
पानन्ते पर्ज्जन्यः परिरक्षतु ॥
उदानं विद्युतः पान्तु समानं स्त

नयितव्यः । वलमिन्द्रो वलपति
र्मनुर्मन्ये मतिं तथा ॥ कामांस्ते
पान्तु गन्धर्व्वाः सत्त्वमिन्द्रोऽभिरक्ष
तु । प्रज्ञां ते वरुणो राजा समुद्रो
नाभिमण्डलं ॥ चक्षुः सूर्य्यो दि
शः श्रोत्रे चन्द्रमाः पातु ते मनः ।
नक्षत्राणि सदा रूपं छायां पा
तु निशा तव ॥ रेतस्त्वाप्या
ययन्त्वापो रोमाण्योषधयस्तथा ।
आकाशं खानि ते पातु देहं त
व वसुन्धरा ॥ वैश्वानरः शिरः
पातु विष्णुस्तव पराक्रमं । पौरु
षं पुरुषश्रेष्ठो ब्रह्मात्मानं ध्रु
वो भ्रुवौ ॥ एता देहे विशेषेण त
व नित्या हि देवताः । एतास्त्वां सत
तं पान्तु दीर्घमायुरवाप्नुहि ॥
स्वस्ति ते भगवान् ब्रह्मा स्वस्ति दे
वाश्च कुर्व्वतां । स्वस्ति ते चन्द्रसूर्य्यौ
च स्वस्ति नारदपर्व्वतौ । स्वस्त्य
ग्निश्चैव वायुश्च स्वस्ति देवाः स
हेन्द्रगाः । पितामहकृता रक्षा स्व
स्त्यायुर्वर्द्धतां तव । ईतयस्ते प्रशा
म्यन्तु सदा भव गतव्यथः । इति
स्वाहा । एते वेदात्मकैर्मन्त्रैः कृत्या
व्याधिविनाशनैः । मयैवं कृतर
क्षस्त्वं दीर्घमायुरवाप्नुहि ॥
ततः कृतरक्षमातुरमागारे ॥

प्रवेश्याचारिकमादिशेत् ।
ततस्तृतीयेऽहनि विमुच्यैवं व
ध्नीयाद्वस्त्रपट्टेन । न चैनं त्वरमा
णोऽपरेद्युर्मोक्षयेत् । द्वितीय
दिवसे परिमोक्षणाद्विग्रथितो
व्रणश्चिरादुपसंरोहति तीव्ररु
जश्च भवति । अत ऊर्द्ध्वं दोष
काल वलादीनवेक्ष्य कषायालेप
न वन्धाहाराचारान् विदध्यात् ।
न चैनं त्वरमाणः शान्तदोषं
रोपयेत् सह्यन्तेनाप्यपचारेण
भ्यन्तरमुत्सङ्गं कृत्वा भूयोऽपि
विकरोति । भवन्ति चात्र ॥
तस्मादन्तर्वहिश्चैव सुशुद्धं रो
पयेद्व्रणं । रूढेऽप्यजीर्णव्याया
म व्यवायादीन् विवर्जयेत् ॥
हर्षं क्रोधं भयञ्चापि यावदास्थै
र्य्यसम्भवात् । मासान् षट् स
मवान्हणां विधिरेषः प्रशस्यते
हेमन्ते शिशिरे चैव वसन्ते चापि
मोक्षयेत् । त्र्यहात् द्व्यहाच्छ
रद्ग्रीष्म वर्षास्वपि च बुद्धिमान्
अतिपातिषु रोगेषु नेच्छेद्विधि
मिमं भिषक् । प्रदीप्तागार
वच्छीघ्रं तत्र कुर्य्यात् प्रतिक्रि
यां ॥ या वेदना शस्त्रनिपा
तजाता तीव्राः शरी ॥

रं प्रदहति जन्तोः । घृतेन सा
शान्तिमुपैति सिक्ता कोष्णेन य
ष्टीमधुकान्वितेन ॥ इति सुश्रु
ते ५ अध्यायः ॥
शस्त्रः पुं खड्गः । यथा । रिष्टिः
खड्गस्तरवारिः शस्त्रो महात्म
जस्त्रसः । इति त्रिकाण्डशेषः ॥
शस्त्रकं क्ली लौहं । इत्यमरः ॥
शस्त्रकोपतरुः पुं महापिण्डी
तरुः । इति राजनिर्घण्टः ॥
शस्त्रजीवी पुं शस्त्राजीवः । इ
ति हेमचन्द्रः ॥
शस्त्रधारणजीवकः त्रि शस्त्रा
जीवः । इति शब्दरत्नावली ॥
शस्त्रपाणिः पुं शस्त्रहस्तः । यथा ।
उल्काहस्तोऽग्निदो ज्ञेयः शस्त्र
पाणिस्तु घातकः । केशाके
शि गृहीतश्च युगपत् पारदारि
कः । इति व्यवहारतत्त्वं ॥ अ
पि च । अग्निदो गरदश्चैव शा
स्त्रपाणिर्धनापहः । क्षेत्रदा
रापहारी च षडेते ह्याततायिनः
इति प्रायश्चित्तविवेकः ॥
शस्त्रभृत् पुं शस्त्रधारी । शस्त्रं
विभर्त्तीति क्विप् प्रत्ययेन नि
ष्पन्नः ॥
शस्त्रमार्ज्जः पुं शस्त्रमार्ज्जनकर्त्ता

सिकलगर इति भाषा । तत्
पर्य्यायः । असिधावकः २ अस
मरः ॥ अस्त्रमार्जः ३ असिधा
वः ४ इति शब्दरत्नावली ॥
शाणाजीवः ५ भ्रमासक्तः ६
इति हेमचन्द्रः ॥

शस्त्रहतः त्रि शस्त्राघातेन मृ
तः । अस्याशौचादि यथा । व्या
घ्रः । हतेन म्रियते यस्तु तस्या
शौचं भवेत् त्रिधा । आसप्ताहात् त्रि
रात्रं स्यात् दशरात्रं मतः परं ॥
शस्त्राघाते महाहत्ते यदि क
श्चित् प्रमीयते । अशौचे प्रा
कृते तत्र सर्ववर्णेषु नित्यशः
अत्र शस्त्राघातपदे हतेतर प्र
त्त्याघातपरं पारिभाषिक शस्त्र
घात परमपि । यथा देवीपुरा
णे । पतितमन्त्य मृतो ये त दे
हि मृते नैवे हताः । पतन्नान
शनं शौचे दंष्ट्राग्निविषवन्धनैः
मृता जलप्रवेशेन नैवे शस्त्र
हताः स्मृताः । अन्यथा हते
विना पतनादिभि र्विलंब मृ
तानां दिन ग्रहणे अनध्यवसायः
स्यात् । न च शास्त्रीय व्यवहारे
ऽन्तरंगत्वेन पारिभाषिकस्यैव
ग्रहणमिति वाच्यं आहेपा
रिभाषिकापारिभाषिक शस्त्र
घात ग्रहणवदत्रापि तथा युक्त
त्वात् पारिभाषिकत्वादेव न प्र
करण नियमः ॥ क्रोधात् प्रा
यं विषं वह्निं शस्त्र मुद्बन्धनं ज
लं । गिरि वृक्ष प्रपातञ्च येऽर्च्छे
ति नराधमाः । महापातकिनो ये
च पतिता स्ते प्रकीर्त्तिताः । प
तितानां न दाहः स्यान्नान्त्येष्टिर्ना
स्थिसंचयः ॥ न चाश्रुपातः
पिण्डो वा कार्य्यं श्राद्धादिकं
क्वचित् ॥ एतानि पतितानां
तु यः करोति विमोहितः ॥
तप्तकृच्छ्र द्वयेनैव तस्य शुद्धिर्न
चान्यथा ॥ तदितरत्र मरीचिः
विष शस्त्रश्वापदाहि तिर्य्यक्
ब्राह्मण घातिनां । चतुर्दश्यां
क्रिया कार्य्या अन्येषान्तु विग
र्हिता ॥ इति शुद्धितत्त्वं ॥

शस्त्रहस्तः पुं शस्त्रं हस्ते यस्यसः
इति शस्त्रपाणिशब्ददर्शनात्

शस्त्राजीवः त्रि असिजीवी । तत्
पर्य्यायः । काण्डपृष्ठः २ आयु
धीयः ३ आयुधिकः ४ इत्यमरः
काण्डस्पृष्टः ५ इति तट्टीका ॥
काण्डपृष्ठः ६ शस्त्रधारणजीवकः
७ इति शब्दरत्नावली ॥

शस्त्राभ्यासः पुं अस्त्रशिक्षा ॥
तत्पर्य्यायः । खुरली २ इति त्रि
काण्डशेषः ॥

शस्त्रायसं क्ली लोहं । इति रा
जनिर्घण्टः ॥

शस्त्री स्त्री छुरिका । इति मेदिनी

शस्त्री त्रि शस्त्रविशिष्टः । अस्त्र
धारी । शस्त्रशब्दादिन् प्रत्यये
न निष्पन्नः ॥

शस्यं क्ली वालतृणं । इत्यमरः
टीकायां भरतः ॥ प्रतिभाहानिः
इति जटाधरः ॥

शस्यं क्ली वृक्षादिनिष्पन्नं । तत्प
र्य्यायः । फलं २ इत्यमरः ॥
वृक्षाणां लतादीनाञ्च फले नि
ष्पन्नत्व मागते धान्यादिकं श
स्यं शस्यपदवाच्य इत्यन्वयः ॥
फलति निष्पाद्यते फलं फल
निष्पत्तौ पचादित्वादच् । शक्ति
हापिति शस्यं शसत्तुर स्तेने हृ
ष्टो रिति यः शस्य द्विदन्त्यं ।
ग्राम्यकविकृष्यानुबन्ध इव नीर
सस्य मनोहरो देश इति तल
दृयन्ती प्रयोगात् । अनसंसी
सकं सस्यं ग्रस्तं सान्द्रा च सा
पुमं इत्युष्मविवेकाच्च ताल·
व्यादि दंत्यान्तश्च तथा हि शा·
न्तस्त्र हिंसा स्तुत्यो रित्यस्मात्
कृतृष मृजेति क्यपि यत् श
स्यतत् क्रिया वाच्योऽपि फलेऽपि
दृश्यते तालव्या अपि दंत्याश्च
शस्य शूकर पाशेव इत्युष्मभेदः
इति तट्टीकायां भरतः ॥
तेजस्य धान्यादि । यथा । शस्यं
क्षेत्रगते प्राहुः सतुषं धान्यमु
च्यते । आमं वितुष मित्युक्तं
स्विन्नं भक्त मुदाहृतं । इति स्मृ
तिः ॥ ग्राम्य शस्यानि यथा ।
व्रीहयश्च यवा श्चैव गोधूमा
श्चाणव स्तिलाः । प्रियंगवो कु
दालाश्च कोरदूषाः सचीनकाः
उडाबाः दीर्घशालयः । माषाश्च
ह्ना मकुष्ठाश्च निष्पावाः सकुल
त्थकाः । आढकाश्चणका श्चैव
शणाः सप्तदश स्मृताः । इमे
ता ओषधीनां ग्राम्याणां जा
तयो मुने । ग्राम्यारण्यशस्या
नि यथा । ओषध्यो यज्ञिया श्चै
व ग्राम्यारण्या श्चतुर्दश । व्रीह
यश्च यवा माषा गोधूमाश्चाणव
स्तिलाः । प्रियंगुसप्तमा ह्येते अष्ट
माश्च कुलत्थकाः । श्यामाकास्त्व
थ नीवारा जर्तिलाः सगवेधुकाः
तथा वेणुयवाः प्रोक्ता स्तथा मर्कटका

शुने ॥ ग्रासाश्चापाः स्मृता होता
ऽध्वर्युस्तु चतुर्दश । इति विष्णु
पुराणे ५ अंशे ९ अध्यायः ॥
नवशस्य सम्भोग नक्षत्राणि य
था अनुराधा मृगशिरो रेवती
चोत्तरात्रयं । हस्ता चित्रा मघा
पुष्याश्रवणाश्च पुनर्वसुः रोहि
णी नवशस्यादि नवद्रव्याशना
दिषु । प्रशस्तं नवपीठादिसम्भो
गे ग्रहविद्वदेत् । नवशस्यश्रा
द्धादि काले यथा । शरद्वसन्तयोः
केचिन्नवयज्ञं प्रचक्षते धान्यपा
कवशादन्ये श्यामाको वनिनः
स्मृतः ॥ इत्यनेन शरद्वसन्त विहि
त नवशस्येष्टः श्यामाके व्रीहि
भिश्चैव यवैः स्वस्वकालतः
प्रावृच्छे युज्यते । वसन्ते नव
शाग्रयणमाह ॥ इति कालात
वदर्शनात् श्राद्धेपि तथा । श्रा
द्धार्थं नवशस्यैहि ॥ वृश्चिके
शुक्लपक्षे तु नवान्नं प्रशस्यते
वुधैः । अपरेकियतांहितुष्यैव
कृतं भवेत् । अनुष्ठितं कृते श्रा
द्धं मृगनेत्रा स्वदारिषु । पितर
स्तत्र गृह्णन्ति नवान्नाभिषेको
क्षिणः । अपरे कृष्णपक्षे । पोषेचे
वे कृष्णपक्षे नवान्नं नाचरेत्तु ।

पः । भवेत् जन्मान्तरे रोगीपितॄ
णां नोपतिष्ठते ॥ यद्यपि व्रीहि
पाकेच कर्त्तव्यं यवपाकेच पार्थि
व । तत्रवाद्यो महाराज विना
श्राद्धं कथञ्चन ॥ इति विष्णु
धर्मोत्तरवचने श्राद्धं प्रति व्री
हि यव पाकयो निमित्तत्वं प्र
तीयते । तथापि नवोदके न
वान्नेच इति शातातपवचने ए
वोक्त बहुष बचनेषु चनवान्न
स्य श्रुतेर्नवान्नत्वेनैवाभय सा
धार । निमित्ते लाघवात् । अ
भिलाप वाक्ये नवा न्नागमनि
मित्त मिति नियोज्यं । ननुयवा
न्नागमादि । वृश्चिके शुक्लप
क्षे च इति तु धनुरादि पर्युद
सेतर मेषकाल मध्ये वृश्चि
कस्य प्राशस्त्य मात्रार्थे न तु
आद्यान्तरार्थं मिति इति मलमा
सतत्वं ॥ अन्यत् नवान्नशब्दे
द्रष्टव्यं ॥

शस्यध्वंसी पुं नलवृक्षः ॥ इति
शब्दचन्द्रिका ॥ शस्यनाशकेवि
शस्यमञ्जरी स्त्री अभिनवनिर्गत
धान्यादिशीर्षके । शीष । इति
भाषा । तत्पर्य्यायः । कणिशं २
इत्यमरः । कणिशः ३ कणिशः ४

इति तट्टीका ॥

शस्यशूकं स्त्री शस्यस्य तीक्ष्णा
ग्रेऽशुः इति भाषा । तत्पर्य्यायः
किंशारुः २ । इत्यमरः ॥

शस्यसम्बरः पुं सालवृक्षः ॥
इत्यमरः ॥

शस्यात् त्रि शस्यभक्षकः । शस्यं
अत्ति इत्यर्थे कर्त्तरि क्विप् प्रत्य
येन निष्पन्नः । इति मुग्धबो
धव्याकरणं ॥

शस्यारुः पुं क्षुद्रशमीवृक्षः । इति
शब्दरत्नावली ॥

शांशपः पुं शिंशपापा विकार
श्चमसः । शिंशपाशब्दात् अण प्रत्य
ये हेकारस्य आकारादेशेन निष्प
न्नः । इति सिद्धान्तकौमुदी ॥

शांशपायनः पुं मुनिविशेषः ।
इति पुराणं ॥

शाकं क्ली पुं पत्रपुष्पादि । साग
इति हिन्दीभाषा । शाकाते भो
क्तुं शाकं ल्वेन प्रत्ययः । तत्प
र्य्यायः । हरितकं २ शिग्रुः ३
इत्यमरः ॥ शिग्रुः ४ । इति तट्टी
का । हारितकं ५ इति शब्दर
त्नावली ॥ अथ शाकवर्गः ।
तत्रशाकनिरूपणं । पत्रं पुष्पं
फलं नालं कन्दं संस्वेदजं ।

तथा । शाकं षड्विधं मुद्दिष्टं गु
रु विद्यात् यथोत्तरं ॥ अथ
शाकानां गुणाः । प्रायः शाका
नि सर्वाणि विष्टम्भीनि गुरूणि
च । रूक्षाणि बहुवर्च्चांसि सृष्ट
विण्मारुतानि च ॥ शाकं भिनत्ति
वपुरस्थिनिहन्ति नेत्रे वर्णं विना
शयति रक्तं मथापि शुक्रं ।
प्रज्ञाक्षयञ्च कुरुते पलितञ्च
नूनं हंति स्मृतिं गति मिति प्र
वदंति तज्ज्ञाः ॥ शाकेषु सर्वे
निवसंति रोगाः सहेतवो देह
विनाशनाय । तस्माद्बुधः शाक
विवर्जनञ्च कुर्य्यात्तथाम्लेषु स
एव दोषः ॥ इति भावप्रकाशः ॥
अपि च । सर्वशाक मचाक्षुष्य
मजस्रेष समैषुनं । ऋते पटो
ल वास्तूक काकमाची पुनर्न
वाः । इति राजवल्लभः ॥

शाकः पुं वृक्षविशेषः । सेगोन्
इति भाषा । तत्पर्य्यायः ॥ शा
कवृक्षः २ शाकाख्यः ३ खरप
त्रः ४ अर्जुनोपमः ५ । इति रत्न
माला ॥ ककचपत्रः ६ शरपत्रः
७ अतिपत्रः ८ महीरुहः ९
श्रेष्ठकाष्ठः १० स्थिरसारः ११ गृ
हद्रुमः १२ । अस्य गुणाः । सार



कत्वं पित्तदाहश्रमापहत्वञ्च। अस्य वल्कलगुणाः। कफनाशित्वं मधुरत्वं रूक्षत्वं कषायत्वञ्च। इति राजनिर्घण्टः॥ शाकिः। इति मेदिनी॥ शिरीषवृक्षः। इति शब्दरत्नावली। नृपभेदः। इति विश्वः॥ द्वीपविशेषः। तस्य विवरणं यथा। सूत उवाच। शाकद्वीपस्य वक्ष्यामि यथावदिह निश्चयं कथ्यमानं निबोधध्वं शाकद्वीपं द्विजोत्तमाः। जम्बुद्वीपस्य विस्ताराद्द्विगुणस्तस्य विस्तरः विस्ताराद्द्विगुणश्चापि परिणाहः समन्ततः। तेनावृतः समुद्रोऽयं द्वीपेन लवणोदधिः। तत्र पुण्या जनपदाश्चिराच्च म्रियते जनः। कुत एव च दुर्भिक्षं क्षमा तेजोयुतेष्विह। तत्रापि पर्व्वताः शुभ्राः सप्तैव मणिभूषिताः। शाकद्वीपादि द्वीपेषु सप्तसप्तनगास्त्रिषु। ऋज्वायताः प्रतिदिशं निविष्टा वर्षपर्व्वताः। रत्नाकराद्रिनामानः सानुमन्तो महाचिताः समाचिताः प्रतिदिशं द्वीपविस्तरमानतः। उभयत्रावगाढाश्च लवणक्षीरसागरौ। शाकद्वीपे तु वक्ष्यामि सप्तदिव्यान् महाचलान्। देवर्षिगन्धर्व्वयुतः प्रथमो मेरुरुच्यते। प्रागायतः स सौवर्ण उदयो नाम पर्व्वतः॥ तत्र मेघास्तु वृष्ट्यर्थं प्रभवन्ति च यान्ति च। तस्यापरेण सुमहान् जलधारो महागिरिः॥ स वै चन्द्रः समाख्यातः सर्व्वौषधिसमन्वितः। तस्मान्नित्यमुपादत्ते वासवः परमं जलं॥ नारदो नाम सैवोक्तो दुर्गशैलो महाचितः। तत्राचले समुत्पन्नौ पूर्व्वं नारदपर्व्वतौ॥ तस्यापरेण सुमहान् श्यामो नाम महागिरिः। यत्र श्यामत्वमापन्नाः प्रजाः पूर्व्वमिमाः किल॥ स एव दुन्दुभिर्नाम श्यामः पर्व्वतसत्तमः। शब्दमृत्युः पुरा तस्मिन् दुन्दुभिस्ताडितः सुरैः॥ रत्नज्वालान्तरमयः शाल्मलश्चान्तरालकृत्। तस्यापरेण रजतो महानस्तो गिरिः स्मृतः। स एव सोमकः प्रोक्तो देवैर्यत्राहृतं पुरा॥ सम्भृतञ्च हृतञ्चैव मातुरर्थे गरुत्मता॥ तस्यापरे चाम्बिकेयः सुमनाश्चैव स स्मृतः। हिरण्याक्षो वराहेण तस्मिन् शैले निषूदितः॥ आम्बिकेयात् परो रम्यः

सर्व्वौषधिसमन्वितः। विभ्राजस्तु समाख्यातः स्फाटिकः स महागिरिः। यस्माद्विभ्राजते नित्यं विभ्राजस्तेन स स्मृतः। सैवेह केशवेत्युक्तो यतो वायुः प्रवायति। तेषां वर्षाणि वक्ष्यामि पर्व्वतानां द्विजोत्तमाः। शृणुध्वं नामतस्तानि यथावदनुपूर्व्वशः। द्विनामान्येव वर्षाणि यथैव गिरयस्तथा। उदयस्योदयं वर्षं जलधारेति विश्रुतं। नाम्ना शान्तभयं नाम वर्षं तत्प्रथमं स्मृतं। द्वितीयं जलधारस्य सुकुमारमिति स्मृतं तदेव शैशिरं नाम वर्षं सम्परिकीर्त्तितं॥ रैवतस्य तु कौमारं तथैव च सुखोदयं। श्यामपर्व्वतवर्षन्तु मनीचकमिति स्मृतं। आनन्दकमिति प्रोक्तं तदेव मुनिभिः शुभं। सोमकस्य शुभं वर्षं विज्ञेयं कुसुमोत्तरं। तदेव शिवमित्युक्तं वर्षं सोमकसंज्ञितं। आम्बिकेयस्य मेदाकिं क्षेमकञ्चैव तत् स्मृतं॥ सैव पर्व्वतकस्यापि महाद्रुममिति स्मृतं। तदेव ध्रुवमित्युक्तं वर्षं विभ्राजसंज्ञितं॥ द्वीपस्य परिणाहञ्च ह्रस्वदीर्घत्वमेव च जम्बुद्वीपेन संख्यातस्तस्य मध्ये वनस्पतिः। शाको नाम महावृक्षस्तस्य प्रजा महानुगाः। एतेषु देवगन्धर्व्वाः सिद्धाश्च सह चारणैः विहरन्ति रमन्ते च दृश्यमानाश्च तैः सह। तत्र पुण्या जनपदाश्चातुर्व्वर्ण्यसमन्विताः। तेषां नद्यस्तु वै सप्त प्रतिवर्षं समुद्रगाः। द्विनाम्न्यश्चैव ताः सर्व्वा गङ्गाः सप्तविधाः स्मृताः। प्रथमा सुकुमारीति गङ्गा शिवजला शुभा अनुतप्ता च नाम्नैषा नदी सम्परिकीर्त्तिता। सुकुमारी तपःसिद्धा द्वितीया नामतः सती। नन्दा च पावनी चैव तृतीया परिकीर्त्तिता शिवलोका चतुर्थी स्यात् त्रिदिवा च पुनः स्मृता। इक्षुश्च पञ्चमी ज्ञेया तथैव च पुनः क्रतुः॥ धेनुका च स्मृता चैव षष्ठी सम्परिकीर्त्तिता। सुकृता च गभस्ती च सप्तमी परिकीर्त्तिता॥ एताः सप्त महाभागाः प्रतिवर्षं शिवोदकाः। पावयन्ति जनं सर्व्वं शाकद्वीपनिवासिनं। अभिगच्छन्ति ता ह्यन्या नद्यो नद्यः सरांसि च बहूदकपरिस्रावा यतो वर्षति वासवः। आसां तु नामधेयानि

परिमाणं तथैव च । न शाकं परि
संख्याता पुण्यास्ताः सरिद्वराः
ताः पिबन्ति महाहृष्टा नदीर्जनप
दास्तु ते । ये ते शान्तभया प्रो-
क्ताः प्रमोदा श्रुति वै पिवाः । आ
नन्दाश्च सुखाश्चैव क्षेमकेश्च श्च
वैः सह । वर्णाश्रमाचारयुक्ता
देशास्ते सप्त विश्रुताः ॥ अ
रोगा बलिनश्चैव सर्वे मरण
वर्जिताः । अवसर्पिणी न ते
ष्वस्ति तथैवोत्सर्पिणी पुनः
न तत्रास्ति युगावस्था चतुर्युगकृ
ता क्वचित् । त्रेतायुग समः काल
स्तथा तत्र प्रवर्त्तते । शाकद्वीपा
दिषु ज्ञेयं पंचस्वेतेषु सर्वशः
देशस्य तु विचारेण कालः स्वा
भाविकः स्मृतः ॥ न तेषु शंकरः
कश्चिद्वर्णाश्रमकृतः क्वचित् । ध
र्म्मस्याव्यभिचारेण एकान्त सुखि
ताः प्रजाः । न तेषु माया लोभो-
वा ईर्षासूया भयं तथा । विप
र्य्ययो न तेष्वस्ति तद्वै स्वाभावि
कं स्मृतं । कालो नैव तेष्वस्ति
न दोषा न च शास्तिकः । स्वधर्मे
णैव धर्मज्ञास्ते रक्षन्ति परस्परं
इति मात्स्ये १२२ अध्यायः ॥
अपि च । एवं परस्तात् क्षीरो
दात् परित उपवेशितः शाक
द्वीपो द्वात्रिंशल्लक्षयोजनायामः
समानेन दधिमण्डोदेन परी
तः । यस्मिन्हि शाको नाम मही
रुहः स्वक्षेत्रव्यपदेशकः । यस्य
हि महासुरभिगन्धस्तं द्वीपमनु
वासयति । तस्यापि प्रैयव्रत एवा
धिपतिर्नाम्ना मेधातिथिः सो
पि विभज्य सप्त वर्षाणि पुत्रना
मानि तेषु स्वात्मजान् पुरोजव
मनोजव वेपमान धूम्रानीकचि
त्ररेफ बहुरूप विश्वाधार संज्ञान्नि
धाप्याधिपतीन् स्वयं भगवत्य
नन्त आवेशितमतिस्तपोवनं प्र
विवेश । एतेषां वर्षमर्य्यादागि
रयो नद्यश्च सप्त सप्तैव ॥ ई
शान उरुशृङ्गो बलभद्रः शत
केशरः सहस्रस्रोतो देवपालो
महानस इति । अनघायुर्दा
उभयस्पृष्टिरपराजिता पंचप
दी सहस्रस्रुतिर्निजधृतिरिति
तद्वर्ष पुरुषा ऋतव्रत सत्यव्रत
दानव्रतानुव्रत नामानो भगवन्तं
वाय्वात्मकं प्राणायाम विधूत
रजस्तमसः परम समाधिना य
जन्ते । इति श्रीभागवते ५ स्कन्धे
२० अध्यायः ॥ युधिष्ठिर ।

विक्रमादित्य शालिवाहनादि श
कनरपतीनां मताब्दः । तस्य
प्रमाणं दिनपत्रिकायां द्रष्टव्यं ।
शाकचुक्रिका स्त्री चिञ्चा । इति
राजनिर्घण्टः ॥
शाकटं त्रि शाकटस्येदं । शाकट
वोढा । इति मेदिनी ॥
शाकटः पुं श्लेष्मान्तकवृक्षः
इति राजनिर्घण्टः । शकटादिवो-
ढा । तत्पर्य्यायः । धुर्य्याः २ प्रासं
गाः ३ इत्यमरः ॥
शाकटाख्यः पुं धववृक्षः । इति
रत्नमाला ॥
शाकटायनः पुं अष्टशाब्दि-
कान्तर्गतशाब्दिकविशेषः । यथा
इन्द्रश्चन्द्रः काशकृत्स्नापिशली-
शाकटायनः । पाणिन्यमर जै
नेन्द्रा जयन्त्यष्टादि शाब्दिकाः ।
इति कविकल्पद्रुमः ॥
शाकटिकः त्रि शकटगामी ।
शाकटेन गच्छतीत्यर्थे ठक् प्र
त्ययेन निष्पन्नः ॥ इति सिद्धान्त
कौमुदी ॥
शाकटीनः पुं विंशतितुलाप
रिमाणं । तत्पर्य्यायः भारः २
आचितः ३ शाकटः ४ पालटः
५ इति हेमचन्द्रः ॥
शाकतरुः पुं शाकवृक्षः सागो
न इति हिन्दीभाषा । इति शब्द
माला ॥
शाकपत्रः पुं शिग्रुः । इति रा
जनिर्घण्टः ॥
शाकबालेयः पुं ब्रह्मयष्टिः ॥
इति शब्दरत्नावली ॥
शाकम्भरी स्त्री दुर्गा । यथा ।
ततोऽहमखिलं लोकमात्मदेह
समुद्भवैः । भरिष्यामि सुराः शा
कैरावृष्टेः प्राणधारकैः ॥ शा
कम्भरीति विख्यातिं तदा या
स्याम्यहं भुवि । तत्रैव च वधि
ष्यामि दुर्गमाख्यं महासुरं ॥
इति मार्कण्डेयपुराणे नारायणी
स्तुतिः । अपि च । भूयः सुतास्ति
च्युते तिरोधानान्निरीश्वमारी
च गृहे समाश्रिता । लोकान्
भरिष्यामि तत्र शाकैस्तदा
भविष्यामि शाकम्भरीति ॥
इति वामने ५२ अध्यायः - ५
नगरविशेषः । साम्भरी इति ख्यातः
इति केचित् ॥
शाकम्भरीयं क्ली आजमेरान्त
र्देशान्तर्गत शाम्भरनगरीय ज
लाशयशेषोद्भव लवणं शाम्भ
रि इति ख्यातं । तत्पर्य्याय ॥

गुणा यथा । शाकंभरीयं कथितं गुडाख्यं रोमकं तथा । गाडाख्यं लघु वातघ्नं मलघ्नं भेदि पित्तलं ॥ तीक्ष्णं व्यवायि सूक्ष्मञ्चाभिष्यन्दि कटुपाकि च । इति भावप्रकाशः ॥

शाकयोग्यः पुं धान्यकं । इति राजनिर्घण्टः ॥

शाकराजः पुं वास्तूके । इति राजनिर्घण्टः ॥

शाकलः | शाकलकः | पुं शाकलेन प्रोक्तमधीयते शाकलाः शिष्याः संघो ऽङ्को घोषो वा । परस्परसम्बन्धी अङ्कः ॥ इति सिद्धान्तकौमुदी ॥

शाकलिकः त्रि शाकलस्येदं । शाकल कर्दमाभ्यामुपसंख्यानं । शाकलिकः कार्दमिकः आभ्यामणपीतिकारः । शाकलः कार्दमः ॥ इति सिद्धान्तकौमुदी । शाकबिल्वः पुं वार्त्ताकुः इति जटाधरः ॥

शाकबिल्वकः पुं वार्त्ताकुः ॥ इति त्रिकाण्डशेषः ॥

शाकवीरः पुं वास्तूकशाकः इति त्रिकाण्डशेषः ॥ जीवशाकः ॥ इति राजनिर्घण्टः ॥

शाकवृक्षः पुं तरुविशेषः । सेगोन इति भाषा । इति रत्नमाला । अस्य पर्य्याय गुणौ शाकशब्दे द्रष्टव्यौ ॥

शाकशाकटं | शाकशाकिनं | क्ली शाकक्षेत्रं ॥ इति हेमचन्द्रः ॥

शाकश्रेष्ठः पुं वास्तूकशाकं इति शब्दरत्नावली ॥

शाकश्रेष्ठा स्त्री जीवन्ती ॥ डोडीक्षुपः ॥ वार्त्ताकुः ॥ इति राजनिर्घण्टः ॥

शाका स्त्री हरीतकी ॥ इति केचित् ॥

शाकाख्यं क्ली पत्रपुष्पादि । इत्यमरः ॥ व्यञ्जनयोग्यं पत्रपुष्पादि शाकपदवाच्यं । आदिना फलमूलादि ग्रहः यदुक्तं । मूलपत्र करीराग्र फल काण्डाधिरूढकं । त्वक् पुष्पं कवकञ्चैव शाकं दशविधं स्मृतं । तत्र मूलं मूलकादेः । पत्रं पटोलादेः ॥ करीरं वंशाङ्कुरादि । अग्रं वेत्रादेः । फलं कुष्माण्डादेः । काण्डं उत्पलादिनाडी । अधिरूढं तालास्थिमज्जा । अधिरूढो ऽङ्कुरः इति केचित् । त्वक् मातुलुङ्गादेः । पुष्पं कोविदारा ॥

देः कवकं छत्रिका । शक्यते भोक्तुमनेनेति शाकं । शक्नोति सामर्थ्यं तनूकरोति शोषं तनूकरणे वा कुत्सितात् कः शाकमित्यमे इति तट्टीकायां भरतः ॥

शाकाख्यः पुं शाकवृक्षः । इति रत्नमाला । अस्य पर्य्याय गुणौ शाकशब्दे द्रष्टव्यौ ॥


शाकाङ्गं क्ली मरिचं । इति राजनिर्घण्टः ॥

शाकाम्लं क्ली वृक्षाम्लं । इति राजनिर्घण्टः ॥

शाकाम्लभेदनं क्ली चुक्रं । इति राजनिर्घण्टः ॥

शाकालाबुः स्त्री राजालाबुः इति राजनिर्घण्टः ॥

शाकिनी स्त्री शाकयुक्ता भूमिः । यथा शाकटः शाकिनी गावो जाल मत्स्यंदने वने । अनूपपर्वतो राजा दुर्भिक्षे नव वृत्तयः शाकटो धान्यादिवहनद्वारेणोपजीव्यः । पत्रं पुष्पं फलं कंदं नालं संस्वेदजं तथा । शाकं षड्विध मुद्दिष्टं गुरु विद्यात् यथोत्तरं ॥ इति वैद्योक्त शाकयोगात् शाकिनी शकटवाहिका शाकाद्याहरणेन । गावो दुग्धादिना । जाले मत्स्याद्याहरणेन । मत्स्यन्दने सस्यानादत्यागः ऋणादिलाभेन व्ययाधिक्यनिवृत्त्या च । वने फलपुष्पाद्याहरणेन । अनूपे बहूदकदेशः सन्मृणाल शालूकाद्याहरणेन । पर्वतो गैरिक मृदाद्याहरणेन । राजा भेत्तादिना । इत्याह्निकतत्त्वे ॥ दुर्गाया अनुचरी विशेषः । यथा । डाकिनी योगिनी चैव खेचरी शाकिनी तथा दिव्यपूज्या इमा देव्यः सुसिद्धाः फलदायिकाः ॥ इति कात्यायनीकल्पः ॥ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः । ततः परशिवो देवि षट् शिवाः परिकीर्त्तिताः । मूलाधारे तु ब्रह्माणं डाकिनी सहितं न्यसेत् । स देवं अहरीमुक्ता वादि सान्तं सविंदुकं स्वाधिष्ठानाख्ये चक्रेतु सविष्णुं राकिणीं तथा । वादिलान्तं प्रविन्यस्य नाभौ तु मणिपूरके ॥ डादि फान्तानि सहितं रुद्रञ्च लाकिनीं तथा अनाहते कादिठान्तं ईश्वरं काकिनीं तथा ॥ विशुद्धाख्ये महाचक्रे षोडशस्वरसंयुते । सदाशिवं शाकिनीञ्च ।



विन्यसेत् एवंक्रमतः ॥ शाक्ता
चक्रेतु देवेशि ऽक्षवर्णसमन्वि
ते । परं शिवं ब्रह्मरूपं शाकि
नीसहिते न्यसेत् ॥ इति तारा-
न्यासभेदः । इति तंत्रसारः ॥
शाकुनः त्रि परोत्तापी । इति
शब्दमाला ॥
शाकुनः पुं पश्चुपक्ष्यादिरूप
शकुनद्वारा मनुष्यशुभाशुभ-
ज्ञापकग्रन्थः । तस्येमौ श्लो
कौ । शुभाशुभ ज्ञान विनिर्ण
याय हेतुर्नृणां यः शकुनः स
उक्तः । गतिस्वरालोकन भाव
चेष्टां संकीर्तयाम्यो द्विपदा
दिकानां । लोकोऽमुना शाकु
न संज्ञकेन ज्ञानेन विज्ञातस
मस्तकार्यः । नापायकूपे प
तति प्रसर्पन् शास्त्रे स्थिरद्धा
ह्यतीन्द्रियेषु ॥ इति वसंतरा
जशाकुने १ वर्गः ॥
शाकुनिकः पुं पक्षिहंता । पा
क्षिमारा इति खिदिमार इति च
भाषा । तत्पर्यायः । जीवांतकः
शकुन्त्यसरः ॥
शाकुनेयः पुं उलूकपक्षी ।
इति राजनिर्घण्टः ॥ शाकुन
संबंधिनि त्रि ॥

शाकुंतलेयः पुं भरतराजः ॥
इति जटाधरः ॥ शाकुंतलासंब
न्धिनि त्रि ॥
शाकुलिकः त्रि शकुलान्हंतियः
शकुलशब्दात् ठक् प्रत्ययेन नि
ष्पन्नः । इति सिद्धांतकौमुदी ॥
शाक्करः पुं अनड्वान् । इति
हेमचंद्रः ॥
शाक्तः त्रि शक्तिर्देवता यस्य सः
शक्त्युपासकः । अस्य प्रशंसाय
था । स्वर्गे मर्त्ये च पाताले ना
स्ति शाक्तात् परः प्रियः ॥ सौ
रगाणां गाणपत्यानां वैष्णवा-
नां तथैव च ॥ तदन्ते चैव शा
क्ताः स्युः क्रमशः क्रमशः प्रि-
ये । शृणु देवि वरारोहे ना
स्ति शाक्तात् परो जनः ॥
शाक्तोपि शंकरः साक्षात्परब्र
ह्म स्वरूपभाक् । आराधिताये
न काली तारा त्रिभुवनेश्वरी ॥
षोडशीचैव मातंगी छिन्ना च
बगलामुखी । आराधिता म
हेशानि स शिवो नात्र संशयः
ब्रतितोप्य महेशानि शाक्ता-
तो परसंपदे । योजा नाति
भक्तिमध्ये स शिवो नात्र संश
यः ॥ ब्रह्माद्यर्चित पादा

ब्जं यो भजेत् सततं मुदा ॥
स यात्यचिरकालेन मुक्ति म
न्दिर मेव हि ॥ पार्वतीचरणद्वंद्व
भजना किंकरो भवेत् । स्वर्ग
भोगस्य मोक्षस्य शाक्तानां न
भवेत् किमु ॥ शाक्तानाञ्चैव-
निंदां ये कुर्वंति हि नराधमाः
तेषां लोहितपानं वै कुर्वंति भै
रवीगणाः ॥ भैरवाश्चैव भै
रवाः सदा हिंसंतिपामरान् ।
शाक्तान् हिंसंति गर्जंति नि
दंति वक्रजल्पकाः ॥ छिन्दं-
ति तेषां देवेशि शिरांसि हरव
ल्लभा । शाक्ताना मुत्तमो ना-
स्ति स्वर्गे मर्त्ये रसातले । शा
क्तस्तु शंकरो ज्ञेय स्त्रिनेत्र श्रेष्ठ
प्रेश्वरः । स्वयं गंगाधरो भूत्वा
विहरेत् क्षितिमण्डले ॥ देवी
प्रति शिववाक्यं । मदंशाश्चैव
ये भूता स्तेषेवानात्र संशयः
त्वदंशा श्चैव शाक्ताश्च सत्यं वै
गिरिनंदिनि ॥ क्रूरवर्ष सहस्रांते
ष्टोताः शाक्ति परायणाः । शाक्ता
वै शंकरा देवि यस्य कस्य कुलो
द्भवाः ॥ चाण्डाला ब्राह्मणाः शू
द्राः क्षत्रिया वैश्य संभवाः । एतेषा
ञ्चा जगद्धात्रि न मनुष्याः कदा-

चन ॥ पश्यंति मानुषान् लोके
केवलं कर्म्म चक्षुषा । ब्राह्मणाः क्ष
त्रियैर्वैश्याः शूद्रैरेव च जातिभिः
वाममार्गे प्रभावेण कर्तव्यं जप
पूजने । ये शाक्ता ब्राह्मणा दे
वि क्षत्रिया ब्राह्मणाः स्मृताः ॥
वैश्याश्च ब्राह्मणा देवि सर्वे शूद्रा
श्च ब्राह्मणाः । ब्राह्मणाः शाक
राश्चैव नित्येशा शुद्धशेखराः ॥
इति मुण्डमालातंत्रे २ ॥ ३ ॥
४ । ७ । पटलाः ॥ शाक्ता
एव द्विजाः सर्वे नशैवा न च वै
ष्णवाः । उपासते यतो देवीं गाय
त्रीं परमाक्षरीं ॥ इति निर्वाण
तंत्रे ३ पटलः ॥ शक्त्युपासना
नंतर मन्योपासन निषेधो यथा
शक्त्याराधनं कृत्वा नान्य-
स्याराधनं चरेत् । अन्यस्यस्मर
णाद्देवि योगिनी शापमाप्नुया
त् ॥ इति गंधर्वतंत्रे १ पटलः ॥
यस्य आभ्यंतर स्नानं यथा ॥
शाक्त माभ्यंतर स्नान मुत्तमं
पंचमी मते । स्नान प्रकारो द्वि
विधो बाह्याभ्यंतर भेदतः ॥
आंतरं स्नान मर्यंत सहस्रमपि
सादरात् । कथयामि भयघ्नं ते
चतुर्वर्ग फलाप्तये ॥ स-

स्विज्ञयमनुस्मृत्य चरणं द्वयम-
म्मतः। स्वकं सच्चिदानंद प्रा
ह्मभावगोचरे। विमुक्तिसाधनेषु
सा स्मरणादेव योगिनां ॥ ते
नसाविन्त मात्मानं भावयेत्स
यशांतये। इति विश्वसारतंत्रे
२ पटलः ॥ तस्य ध्यानविशे
षो यथा। तर्जन्या रजतेथा
र्थं स्वर्णे धार्य्य मन्तामृताय
स एव कुशः शाक्ते न दर्भो व
नसंभवः॥ इति शाक्तारहस्यं।
शाक्तीकः पुं शक्तिधारकः तत्
पर्य्यायः। शाक्तिहेतिकः २
इत्यमरः ॥
शाक्त्यः त्रि शक्त्युपासकः। इ
ति शक्तिशब्दात् ष्य प्रत्ययेन
निष्पन्नः ॥
शाक्यः पुं बुद्धः ॥ इति
हलायुधः ॥
शाक्यमुनिः पुं शाक्यवंशाव
तीर्णबुद्धमुनिविशेषः। इत्यम
रः। अस्य सप्तपर्य्याया गौतम
शौद्धोदन्याद्याः। पर्य्यायांतरं यथा
मारजित् २ सेनकेतुः ३ धर्मके
तुः ४ महामुनिः ५ पंचज्ञानः
६ सर्व्वदर्शी ७ महाबोधिः ८ म
हाबलः ९ वज्रासनः १० त्रिमूर्त्तिः ॥
सिद्धार्थः ११ शाकः १२ इति श
ब्दरत्नावली शाक्यवंशत्वात्।
शाक्यः शाका स्सांसो इति श्रु
ति शाक्यमुनिः। तथाहि शाको
वृक्षविशेषः तत्रभवा विद्यमानाः
शाक्याः। पितुः शापेनकेचिदि
क्ष्वाकुवंश्या गौतमवंशजा क
पिलमुने राश्रमे शाकवृक्ष
कृतवासाश्च शाक्या उच्यंते।
तदुक्तं। शाकवृक्ष प्रतिच्छन्नं
वासं यस्मात् प्रचक्रिरे। तस्मा
दिक्ष्वाकुवंश्यास्ते भुवि शाक्याः।
इति स्मृताः ॥ इत्यमरटीका-
यां भरतः ॥
शाक्यसिंहः पुं शाक्यमुनिः
इत्यमरः ॥
शाक्री स्त्री दुर्गा। यथा। इंद्रा
णी इंद्रजननी शाक्री शक्रपराक्र
मा। वज्रांकुशकरा देवी वज्रा
नोपमीयते। इति देवीपुराणे
देवीनिरुक्ताध्यायः ॥
शक्रपत्नी च ॥
शाख ऋ व्याप्तौ। इति कवि
कल्पद्रुमः॥ ऋ अशशाखत्।
इति दुर्गादासः ॥
शाखः पुं कार्त्तिकेयः। यथा
अवाप चानिलात् पुत्रं महित

स्वगुणांशुनः अग्निपुत्रः कुमार
स्तु शरस्तंबे व्यजायत। तस्य
शाखो विशाखश्च नैगमेयश्च
पृष्ठजाः। अपत्यं कृत्तिकानाञ्च
कार्त्तिकेयस्ततः स्मृतः॥ इति
मात्स्ये ५ अध्यायः ॥ छिन्निः।
इति शब्दचंद्रिका ॥
शाखा स्त्री वृक्षांगविशेषः। डाल
इति भाषा तत्पर्य्यायः ॥ लता
२। इत्यमरः। लंका ३। इति
जटाधरः। शिखा ४ इति भर
तधृत मेदिनी ॥ पक्षांतरं ॥
बाहुः॥ वेदभागः। इति मेदि
नी॥ ग्रन्थभेदः। इति धरणिः
अन्तिकः। इति विश्वः ॥
शाखाकंटः पुं स्नुहीवृक्षः ॥
इति राजनिर्घण्टः ॥
शाखानगरं क्ली मूलनगराद
न्यत् पुरं इत्यमरः मूलनगरे ऽस्म
स्मिन्तस्य जनौघस्य स्थानाय मू
लनगरस्य समीपे ऽद्भे वा यद
न्यत् पुरं नगरांतरं क्रियते तत्
तु शाखानगरं मूलनगरस्य त
रुस्थानीयस्य शाखेव। अभिधा
न्दि रमणामप्यत्र। स्यादभिधानि
रमणे शाखानगरमित्यपि इति
त्रिकांडशेषः ॥ इति तट्टीका-
यां भरतः ॥ अपिच आरभ्यमू
लनगरादपरं नगरं हि यत्।
तदभिधानिदि रमणे शाखानग
रमित्यपि। इति शब्दरत्नावली
शाखापित्तः पुं पाणिपादांसम
लदाहः। इति राजनिर्घण्टः ॥
शाखापुरं क्ली शाखानगरं ॥
तत्पर्य्यायः उपपुरं २ इति हे
मचंद्रः ॥
शाखाम्ला स्त्री वृक्षाम्ला। इति
राजनिर्घण्टः ॥
शाखामृगः पुं वानरः। इत्य
मरः ॥
शाखारण्डः पुं स्वशाखोपरि
त्यज्य शाखांतराध्ययनकर्त्ता। त
त्पर्य्यायः। अन्यशाखकः २ ॥
इति हेमचंद्रः ॥
शाखारथ्या स्त्री षोडशहस्तप्र
स्थपथः। यथा। यन्नांकिरेव च
त्वादिशाखारथ्यास्तु निर्मिताः
द्विकरा ब्रह्मपथ्यास्तु द्विकरा
श्च परस्परकाः। इति देवीपुराणे
गोपुरद्वारलक्षण नामाध्यायः
शाखालः पुं वानीरवृक्षः। इ
ति राजनिर्घण्टः ॥
शाखाशिफा स्त्री वटादीनां
शाखासंबंधिशिफा नाम्ना इति
ख्याता ॥

ता। ततो मूलादारभ्य अग्रंयाव
त् गता लता गुडूच्यादिः ॥
इति भरतः ॥ तत्पर्य्यायः ॥
अवरोहः २ इत्यमरः ॥
शाखी पुं वृक्षः। इत्यमरः ॥
वेदः॥ तुरुष्काख्यजनः। इति
मेदिनी ॥ राजभेदः। इति
हेमचंद्रः ॥
शाखोटः पुं वृक्षविशेषः श्या
ओड़ा इति भाषा। तत्पर्य्यायः॥
पिशाचद्रुः २ पीतफलः ३ कर्क
शच्छदः ४। इति त्रिकांडशेषः।
भूतवृक्षः ५ सकटः ६ अक्षधरः
७ इति भूरिप्रयोगः। गवाक्षी
८ चूकावासः ९ क्षुद्रपत्रः १०
पीतः ११ कैशिकेयाजः १२ ती
व्रणाशनः १३ अस्य गुणाः ति
क्तत्वं। उष्णत्वं। पित्तकारित्वं
वातहारित्वञ्च। इति राजनि
र्घण्टः॥ अपि च। शाखोटः
पीतफलको भूतावासः खर
च्छदः। शाखोटो रक्तपित्त
र्शोवातश्लेष्मातिसारजित्॥ इति
भावप्रकाशः॥
शाख्यः त्रि शाखासंबंधी शा
खा शब्दात् स्य प्रत्ययेन निष्प
न्नः शांकरं क्ली छंदोभेदः। इति
मेदिनी॥ अस्य रूपांतरं शाक्क
रं शाक्वरञ्च ॥
शांकरः पुं वलीवर्द्दः ॥ इति
मेदिनी ॥
शांकरिः पुं कार्त्तिकेयः। गणे
शः। इति मेदिनी ॥
शांकुची स्त्री शंकोचमत्स्यः।
इति शब्दरत्नावली ॥
शांखः त्रि शंखसंबन्धि। शंखश
ब्दात् स्न प्रत्ययेन निष्पन्नः ॥
शांखिकः पुं जातिविशेषः।
शांखारि इति भाषा। तत्पर्य्यायः
कांबविकः २ इत्यमरः ॥
शंखकारः ३ कांबुजकः ४ इति
शब्दरत्नावली॥ शंखवादकः।
तत्पर्य्यायः। शांखध्माः २ इति
जटाधरः ॥
शांकुष्टा स्त्री गुञ्जा। इति रत्न
माला ॥
शाटः पुं वस्त्रभेदः। इत्यमरः
भरतौ। यथा। दूरतः शोभते
मूर्खो लंबशाट पटावृतः ॥
तावच्च शोभते मूर्खो यावत्कि
ञ्चिन्नभाषते इति चाणक्य ॥
शाटकः पुं क्ली पटः। नाटकभे
दः। इत्यमरभरतौ ॥
शाटिका स्त्री शाटी। इत्यमरः ॥

टीकायां भरतः ॥
शाटी पुं स्त्री वस्त्रभेदः। शा
ड़ी इति भाषा। इत्यमरः। अस्या
निर्माल्यत्वे निर्माल्य शब्दे द्र
ष्टव्यं ॥
शाट्यायनं क्ली प्रकृतकर्म
वैगुण्यप्रशमनार्थहोमः। यथा
यत्र प्रकृतकर्म वैगुण्य प्रशम
नाय शाट्यायन होमाभिधानं
भवदेव भट्ट सम्मतं तन्न प्रामा
णिकं तस्मादपि महाप्रामाणि
कैर्भट्टनारायण चरणै गोभिल
भाष्ये तदप्रमाणीकृतत्वात् छ
न्दोगपरिशिष्टेपि प्रायश्चित्ता
र्थे प्रकारत्रय मात्र मुक्तं यथा
यत्र व्याहृतिभि र्होमः प्राय
श्चित्तात्मको भवेत्। चतस्र
स्तत्र विज्ञेया स्त्रीपाणिग्रह
णे यथा। अपि दाज्ञात मित्य
स्यामाज्ञातपस्यापि वाकृतिः। हि
तव्या त्रि र्विकल्पाय प्रायश्चित्त
विधिः स्मृतः। त्रि र्विकल्प इत्य
नेन कल्पान्तर निषेधात् गोभि
लीयकर्मणि शाट्यायन होमो
न युक्तः। किंतु अस्त समस्त म
हाव्याहृतिभि स्तत्सृष्टिभिः प्राय
श्चित्त होमो युक्तः। विशारद
प्रभृतयो पेत्रं शाट्यायनहो
मस्य समूलत्वेपि शाखांतरी
यत्वं। इति तिथ्यादितत्त्वं ॥
शाट्यायनं पुं मुनिविशेषः ॥
इति पुराणं ॥
शाठ्यं क्ली शठता। तत्पर्य्यायः
कपटः २ व्याजः ३ दंभः ४ उप
धिः ५ छद्म ६ कैतवं ७ कुसृतिः
८ निकृतिः ९ इत्यमरः। नवग्र
यथार्थव्यवहारे। शठ वधे ल्के
शा कैतवे तालव्यादिः अलत
स्य कर्मशाठ्यं स्यः। कपटादि
षट्कः छद्मानि कुसृत्यादि त्रयं
चित्तकौटिल्ये इत्येके। कप
टादि षट्कं वञ्चन मात्र फले
कुसृत्यादि त्रिकं तु हिंसाफलमि
ति भेदः। इति सर्वानंदो मथुश्च
नैवैकार्थ्या। इति वक्षः ॥
इति भरतः ॥ अपि च ॥
अस्त्रियां कपटो व्याज उपधिं
न च च। कूटेकल्कं छले छद्म
मिषकैरवकैतवं। अथ शाठ्य
न्त्रे शठता कुसृति र्निकृतिश्च
सा। हिंसाफले चतुष्कं स्यात्
शाठ्य पर्य्याय ईरितः॥ एहिः
कपटपर्य्यायः फले वञ्चनमा
त्रे। उभयो रेक पर्य्याय इति



केचित् प्रचक्षते ॥ इति शब्द-
रत्नावली ॥
शाड ऋ उ श्लाघे । इति क-
विकल्पद्रुमः । ऋ अशशाडत् ।
उ शाडते गुणिनं गुणी । अन्त-
स्थतीय वर्गादि रय मिति
कस्यचिन्मतः । इति दुर्गादासः ।
शाड्वलः पुं शाद्वलः । इति ·
केचित् ॥
शाणं क्ली शाणनिर्म्मितवस्त्रं ।
यथा क्षौमं शाणं वा ब्राह्मण-
स्य कार्पासं क्षत्रियस्य आविकं
वैश्यस्य तत्र अतसी तस्या इ-
दं क्षौमं तस्मादि शाणं शणत-
न्तुभवं तदुभयं ब्राह्मणस्य ।
इति संस्कारतत्त्वं ॥
शाणः पुं कषपट्टिका । कष्टिपा-
तर इति भाषा । तत्पर्य्यायः ॥
निकषः २ कषः ३ इत्यमरः ॥
शानः ४ निकसः ५ कसः ६
इति भरतः । आकषः ७ इति
शब्दरत्नावली । माषचतुष्टये ·
चारिमाषा इति भाषा । तत्प-
र्य्यायः । निष्कः २ टंकः ३ इति
वैद्यकपरिभाषा ॥
लौहादीनां निकषः । शानपाथर
इति भाषा । इति मेदिनी ॥
करपत्रं । करात् इति भाषा ॥
इति विश्वः ॥
शाणाजीवः पुं अस्त्रमार्ज्जकः ।
यथा । शाणाजीवः शस्त्रमार्जो
भ्रमासक्तो ऽसिधावकः । इति
हेमचंद्रः ॥
शाणिः पुं पट्टवृक्षः । यथा ।
पट्टवाजशाणः शाणि स्त्रिभिः क-
कुष्टपत्रकः । इति शब्दमाला
शाणितः त्रि तीक्ष्णीकृतः । निशि-
तः । कृतशाणः । शाणशब्दादि
तप्रत्ययेन निष्पन्नः ॥
शाणी स्त्री शाणसूत्रमयीपट्टि-
का । यथा । शाणीप्रायाणि वस्त्रा-
णि शमीप्राया महीरुहाः । शूद्रप्रा-
यास्तथा वर्णा भविष्यन्ति क-
लौयुगे ॥ इति विष्णुपुराणे ६
अंशे १ अध्यायः ॥ शाणी शण-
सूत्रमयी पट्टिका तन्मयानि व-
स्त्राणि । इति तट्टीका । चावट्
शणान्तरे । तांतु इति भाषा । इति
मेदिनी । छिद्रवस्त्रे । यथा शा-
णी गोणी छिद्रवस्त्रे । इति हे-
मचंद्रः ॥ हस्तकटाक्षादिसूचना
ईशारा इति पारस्यभाषा । इति
शब्दरत्नावली ॥
शाणीरं क्ली शोणनदमध्यस्थतटः

द्दर्दरीनदीतटः । इति विश्वः
शाण्डिल्यः पुं बिल्ववृक्षः । इ-
त्यमरः । वह्निभेदः । मुनिविशे-
षः । इति मेदिनी ॥ सतु गोत्र-
कारः भक्तिसूत्रकारश्च । तत्सू-
त्रभाष्याद्यश्लोको यथा । प्रपद्य
परमं देवं श्रीस्वप्नेश्वरसूरि-
णा । शाण्डिल्य शतसूत्रीय
भाष्यमाभाष्यते ऽमुना ॥
शातं क्ली सुखं । तद्वति त्रि· ।
इत्यमरः ॥ कृशः । इति विश्वः ॥
शातः त्रि दुर्बलः ॥ निशितः ।
इति मेदिनी ॥ दुर्बलः ॥ इत्य-
मरः ॥
शातकुम्भं क्ली काञ्चनं । सुवर्णं ।
इत्यमरः
शातकुम्भः पुं करवीरवृक्षः ॥
इति मेदिनी ॥
शातकौम्भं क्ली स्वर्णं । इतिभ-
रत द्विरूपकोषः ॥
शातनं क्ली कार्श्यं ॥ विनाशने
यथा । वसन्ते सर्वशस्यानां जा-
यते पत्रशातनं । मोदमानाश्च
तिष्ठंति यवाः कणिशशालि-
नः । इति सारमञ्जरी ॥
शातपत्रकः पुं चंद्रप्रकाशः ॥
यथा । चंद्रिका कौमुदी ज्योत्-
स्ना प्रकाशो द्योतश्चातपः । अ-
कल्का चंद्रिकायाञ्च प्रकाशे
शातपत्रकः ॥ इति शब्दचंद्रिका
शातभीरुः पुं मदनमाली । म-
ल्लिकाभेदः । यथा । शातभीरु
र्मद्दवल्ली भूमिमण्डा ऽष्टपादिका
इति रत्नमाला ॥
शातमानं त्रि शतमानेनक्रीतं ।
इति सिद्धान्तकौमुदी ॥
शातला स्त्री सातला । चर्मकषा
इति ख्याता । इत्यमरटीकायां ॥
भरतः ॥
शात्रवं क्ली शत्रुभावः । शात्रुसं-
हतिः ॥ इतिमेदिनी ॥
शात्रवः पुं शत्रुः । इत्यमरः ॥
शादः पुं कर्दमः । शस्यं । इत्य-
मरः ॥
शादहरितः त्रि शाद्वलः । इत्य-
मरः ॥
शाद्वलः त्रि नवतृणवत्स्थलदेशः
इत्यमरः । शादो नवतृणं वि-
द्यते ऽत्र शाद्वलः । शस्यवाचिनएव
शादशब्दाद्वलः स्यात् नतुपंक-
वाचिनात् ऽनभिधानात् ॥
इति तट्टीकायां भरतः ॥
शान म तेजे । इति कविकल्प-
द्रुमः ॥ शान निशाणीकरणे म

शीशृंग्लसति शीशृंगस्तते करङ्कं
कर्मकारः । इतिदुर्गादासः ॥
शान्तः पुं शरणः । इत्यमरटीका
यां भरतः ॥
शान्तपादः पुं पारिपात्रपर्वतः ॥
चंदनचर्चणपाषाणः । चंदनपिति
इति भाषा । इति महाभारते ॥
हविशेषः ॥
शान्ती स्त्री इंद्रवारुणी । इति
शब्दचंद्रिका ॥
शांतः त्रि उपशमप्रापितः ॥
शमोपशमः । इति भरतः ॥
तत्पर्यायः । शमितः २ इत्यमरः
शांतः ३ जितेंद्रियः ४ ॥
इति हेमचंद्रः ॥ शमान्वितः ५
इति मेदिनी ॥
शांतः पुं ऋषिपुत्रः । रसभेदः
इति मेदिनी ॥ शांतरसस्यल
क्षणादि । यथा शांतः शमः
स्थायिभाव उत्तमप्रकृति र्मतः
कुन्देन्दु सुन्दरच्छायः श्रीनारायण
दैवतः अनित्यत्वादिनाशेषव
स्तुनिःसारता तु या ॥ परमार्थ
स्वरूपं वा तस्यालंबन मिष्यते ।
पुण्याश्रम हरिक्षेत्र तीर्थरम्यव
नादयः । महापुरुष संगाद्या
स्तस्योद्दीपनरूपिणः । रोमा
ञ्चाद्या श्चानुभावा स्तथा स्युर्व्य
भिचारिणः ॥ निर्वेद हर्ष स्मरण
मतिभूतदयादयः । यथा । रथ्या
न्ते श्चरत स्तथा धृतजरत्कन्था
नवस्याध्वगैः सत्रासञ्च सकौतु
कञ्च सदयं दृष्टस्य ते नागरैः
निर्व्याजीकृत चित्सुधा रसमु
दा निद्रायमाणस्य मे निःशं
के करटः कदा करपुटी भिक्षां
विलुण्ठिष्यति ॥ युधिष्ठिरस्तु महा
भारताद्यो द्रष्टव्या । निरहंकार
रूपत्वात् दयावीरादि रेष नो द
यावीरादौ हि जीमूतवाहनादौ
अंतरा मलयवत्याद्यनुराग देर
न्ते च विद्याधर चक्रवर्तित्वा
द्यामे र्दर्शनादहंकारोपशमेन
दृश्यते शांतस्तु सर्वप्रकारे
णाहंकार प्रशमैक रूपत्वान्न
तत्रांतर्भाव मर्हति । अतश्च नागा
नंदे शांतरस्य प्रधानत्व मपास्तं
ननु न यत्र दुःखं न सुखं न
चिंता न द्वेष रागौ नच काचि
दिच्छा । रसः स शांतः कथितो
मुनीन्द्रैः सर्वेषु भावेषु समप्रमा
णः । इत्येवं रूपस्य शांतस्यमो
क्षावस्थाया मेवात्म स्वरूपाप
त्ति लक्षणायां प्रादुर्भावात् तत्र

संचार्यादीना मभावात् कथंर
सत्व मित्युच्यते युक्त वियुक्तद
शाया मवस्थितो यः शमः सएव
यतः रसता मेति तदस्मिन् सं
चार्य्यादेः स्थितिश्च नविरुद्धा । य
च्चास्मिन् सुखाभावोऽप्युक्तस्त
स्य वैषयिक सुखपरत्वान्न वि
रोधः ॥ उक्तं हि यच्च कामसुखं
लोके यच्च दिव्यं महत्सुखं
तृष्णाक्षय सुखस्यैते नार्हतः
षोडशीं कलां ॥ सर्वाकार म
हंकार रहितत्वं व्रजेतिचेत् ।
अत्रान्तर्भाव मर्हति दयावीराद
यस्तदा ॥ आदिशब्दात् धर्म
वीर दानवीर देवताविषयरति
प्रभृतयः । तत्र देवता विषया
रति र्यथा । कदा वाराणस्यामि
ह सुरधुनी रोधसि वसन् वसा
नः कौपीनं शिरसि निदधानो
ऽञ्जलि पुटं । अये गौरीनाथ त्रि
पुरहर शम्भो त्रिनयनप्रसीदे
ति क्रोशन्निमिष मिवनेष्या
मि दिवसान् ॥ इति साहित्यद
र्पणे ३ परिच्छेदः ॥
शांतं क्लि वारणं । इति मेदिनी ।
शांतनवः पुं शांतनुराजपुत्रः
भीष्मः । इति त्रिकांडशेषः ॥
शांतनुः पुं द्वापरयुगस्य चंद्र
वंशीयैकविंशराजः । सतु गं
गायां भीष्मंजनयामास । तस्य
पिता प्रतीपः । यथा जयसेन
स्तत्तनयो राधिकोऽतो ऽयुताय्व
भूत् । ततश्चाक्रोधन स्तस्मात्
देवातिथिरमुष्यच । ऋक्षस्तस्य
दिलीपोऽभूत् प्रतीप स्तस्य
चात्मजः । देवापिः शांतनु स्त
स्य बाह्लीक इति चात्मजाः ।
यं यं कराभ्यां स्पृशति जीर्णं
यौवन मेष्यति । शांतिमाप्नो
ति चैवाग्र्यां कर्म्मणा तेन शां
तनुः ॥ बाह्लीकात् सोमदत्तो
ऽभूत् भूरि भूरिश्रवा स्ततः
शलश्च शांतनो रासीत् गंगा
यां भीष्म आत्मवान् ॥ इति
श्रीभागवते ९ स्कंधे २२ अध्या
यः । तत्पर्यायः । महाभीष्मः २
इति जटाधरः ॥ प्रातीपः ३
इति त्रिकांडशेषः ॥ प्रतीपः ४
प्रतिपः ५ । इति शब्दरत्नाव
ली ॥ कर्कटी ॥
इति रत्नमाला ॥
शांता स्त्री लोमपादराजकन्या
सा च ऋष्यशृंगभार्य्या । इति रा
मायणं । शमीभेदः । तत्पर्यायः

शुभा २ तंद्रा ३ अपराजि
ता ४ जया ५ विजया ६
अस्या गुणाः शमीवत् । इति
राजनिर्घण्टः ॥
शान्तिः स्त्री कामक्रोधादिप्रश
मः चित्तोपशमः । इति भरतः ॥
विषयेभ्य इन्द्रियोपरमः । इति
चंडीटीकायां नागोजीभट्टः ॥
तत्पर्य्यायः । शमथः २ शमः ३
इत्यमरः ॥ प्रशमः ४ उपशमः
५ प्रशान्तिः ६ इति शब्दरत्ना
वली ॥ तत्साक्षयः ७ इति हे
मचंद्रः ॥ तल्लक्षणं । यथा य
त्किंचिद्वस्तु संप्राप्य स्वल्पं वा
यदि वा बहु । या तुष्टिर्जायते चि
त्ते शान्तिः सा गद्यते बुधैः ॥ इति प
द्मपुराणे क्रियायोगसारे १५
अध्यायः ॥ भद्रं । इति हेमचं
द्रः ॥ गोपीविशेषः । यथा । रा
धिकोवाच । शान्त्या गोप्यायुत
स्त्वञ्च दृष्टोऽहं रासमंडले । व
सन्तपुष्पशय्यायां माल्यवान्
चन्दनोक्षितः ॥ रत्नप्रदीपे शुक्ल
श्च रत्ननिर्माणमन्दिरे । रत्नभू
षितभूषाढ्यो रत्नभूषितया स
ह ॥ तया दत्तञ्च ताम्बूलं भु
क्तवांश्च पुरा विभो ॥ सद्यो
मत्कृतमात्रेण तिरोधाने कृते त्व
या ॥ शान्ति देहं परित्यज्य भया
द्भीता त्वयि प्रभो । ततस्तस्याः
शरीरञ्च गुणश्रेष्ठं बभूव ह ॥
संविभज्य त्वया दत्तं प्रेम्णा प्रकृत
तं पुरा विश्वे विषयिणे किंचि
त् सत्त्वरूपाय विष्णवे ॥ शुद्धस
त्त्वस्वरूपायै महालक्ष्म्यै पुरा वि
भो । त्वन्मंत्रोपासकेभ्यश्च वैष्णवे
भ्यश्च किञ्चन । तपस्विभ्यश्च
धर्माय धर्मिष्ठेभ्यश्च किञ्चन ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४
अध्यायः ॥ दुर्गा ॥ यथा उत्प
त्ति स्थिति नाशेषु रजादित्रि
गुणा मता । सर्वज्ञा सर्ववेत्तृत्वा
च्छांतित्वाच्छांति रुच्यते ॥ इ
ति देवीपुराणे देवीनिरुक्ताध्या
यः ॥ यस्मिन्हारा ग्रहघोरस्य दुः
स्वप्नादिसूचितैहिकानिष्टहेतु
दुरितनिवृत्तिः ॥ यथा । यथा
शस्त्रप्रहाराणां कवचं विनिवा
रकं । तथा दैवोपघातानां शा
न्ति र्भवति वारणं ॥ बालग्रह
भूत ग्रह नराधिप प्रबलतरशा
त्रु दुःस्वप्नरोगाभिभवाद्भुत दुःस्व
प्नग्रहदोषादि निमित्तकं शान्ति
कर्म्मापि मलमासे कर्त्तव्यं ॥

शुद्धकाल प्रतीक्षाया असहत्वेना
नन्यगतिकत्वात् । अतएवात्मानं
सततं गोपायीत इति श्रुतेरस
तत्र मित्युक्तं । इति मलमासत
त्त्वं ॥ उपसर्गशान्तिर्यथा ।
यथा । एषा सिंहो महावीर्य्यासे
लोकस्यास्येश्वरो भवेत् । शान्तेश्च
तृना माहात्म्य सुशान्तिं नामना
मतः ॥ तस्योपसर्गनाशायना
मात्तरविभूषिता । यथापिमा
नवैर्गीयते ध्वमहीतले
सुशान्ति दैवराशान्तः सुशान्ति
नः प्रयच्छति । सहितः शिव स
त्याद्ये स्तथैव वशवर्त्तिभिः ॥
इति मार्कण्डेयपुराणे ॥
उत्तममन्वन्तरे समाप्ताध्यायः ॥
अथाद्भुतशान्तिः ॥ तत्राद्भुतनि
रूपणं । अद्भुतसागरे आथर्वण
द्भुतवचनं । प्रकृति विरुद्धमद्भु
तमापदः प्राक्प्रबोधाय देवाः सृ
जन्तीति । तेनाद्भुतानाम् भूम्या
स्यादीनां एवं स्वभाव अन्यथा
देव कर्त्तृकोऽद्भुत इति एवंच
धूमोदयपर्वणि ग्रहादीनां गति
भाजनितत्वेन प्रकृतानामपि
यदुत्पातत्वं तदुक्तं । तत्कारण
ञ्च गर्गसंहिता बार्हस्पत्ययोः ।
अतिलोभादसत्याद्वा नास्तिक्या
द्वाप्यधर्म्मतः । नरापचारान्नियत
मुपसर्गः प्रवर्त्तते ॥ ततो
पचारान्नियत मपवर्ज्जन्ति देव
ताः । ताः सृजन्त्यद्भुतांल्लोका
न्दिव्य नाभस भूमिजान् ॥ तए
व त्रिविधा लोके उत्पाता देवनि
र्म्मिताः । विचरन्ति विनाशाय
रूपैः संबोधयन्ति च ॥
लोकस्थपर्व न दृश्यादित्याहवि
स्तुः । नोत्पातं दर्शयेदिति तत्र
वेला नक्षत्रमंडलनिरूपणं ॥
यथा दीपिकायां । प्राग्हिवि
चतुर्भागे द्युनिशा रजुतेषु स
वैषु । अनिलाग्नि शक्र वरुण
मंडलपतयः शुभाशुभेष्वावेला
माण्डलः अर्थस्मादि चतुष्कचं
द्रदस्मादिनेषु वायु भवेत् देवे
ज्याजविशारवयाम्य युगले पि
त्र्यद्वये चामलः । विष्णादि त्रय
धान्त्येषु युगले क्षितेर्भवेन्मंड
लः सर्वेषामपि शान्तस्य मलय
गतेष्वानेष्वपामीश्वरः पवनदह
नौनैषं योगस्तयो रतिदोषदः
सुरपतिवरुणयोः शान्तो योगस्त
यो रतिशोभनः ॥ सवरुण म
हान्मिश्राः शक्र तथाग्निसमायुताः

फलविवर्जितः सेंद्रा वायुस्तथा
ग्निर्युतोबुधः ॥ यन्मण्डलेद्भुते
जाते शांति स्तद्देवताश्रया
तथा शांतिद्वयं कार्य्यं मण्ड
लद्वयजाद्भुते ॥ विष्णुधर्मोत्त
रे । ग्रहर्क्षे वैकृते दिव्यं शांत
रीक्षं निबोध मे । उल्कापातो
दिग्दाहः परिवेषस्तथैव
च ॥ गंधर्वनगरञ्चैव वृष्टिश्च
विकृतातथा । एवमादीनि लो
केस्मिन्नाभसानि विनिर्दिशेत्
चरस्थिरभवं भौमं भूकंपम
पि भूमिजं । जलाशयानां वैकृ
त्यं भौमं तदपि कीर्तितं ॥
भौमं चाल्पफलं ज्ञेयं चिरेण
परिपच्यते । नाभसं मध्यफल
दं मध्यकालफलप्रदं । दिव्यंती
व्रफलं ज्ञेयं शीघ्रकारि तथैव
च ॥ ऋतोरनृता विपर्य्यासो कृ
तेनो विपुले भयं ॥ पुष्पे फले
च विकृते राज्ञो मृत्युं तथादि
शेत् । अकालप्रभवा नार्य्यः
कालतीताः प्रजास्तथा । वि
कृताः प्रसवाश्चैव युग्मप्रसवने
तथा ॥ हीनांगा अधिकांगाश्च
जायंते यदि वा नृपः । पशवः
पक्षिणश्चैव तथैव च सरीसृपाः

विनाशं तस्य देहस्य कुलस्य च
विनिर्दिशेत् ॥ प्रदोषे कुक्कुटा
रावो हेमंते चापि कोकिलाः ।
अर्कोदये ऽर्काभिमुखः श्वा रौ
ति भयं दिशेत् ॥ उलूको वसते
यत्र निपतेद्वा तथा गृहे । ज्ञेयो
गृहपतेर्मृत्युः धननाशस्तथैव
च ॥ गृध्रः कंकः कपोतश्च उ
लूकः श्येन एव च विलश्च
चर्मचिलश्च भासः पांडुर एव च
गृहे यस्य पतंत्येते गेहे तस्यापि
पद्यते । षण्मासात्तथा वर्षा
न्मृत्युः स्याद्गृहमेधिनः ॥ पत्याः
पुत्रस्य वा मृत्युः [illegible] विन
श्यति ब्राह्मणाय गृहे दत्वा द
त्वा तत्स्वल्पमेव वा ॥ गृह्णीया
द्यदि [illegible] शांतिं चेमां प्रयोज
येत् । इमां वक्ष्यमाणां ॥ मा
साष्टानि समादाय प्रमशाना
द्भुदवायसाः ॥ श्वा शृगालोथ
ग्राममध्ये प्रवसन् प्रविशंति चेत् ।
विक्रियंति गृहादेच श्मशानेषा
महीभवेत् ॥ चौरेण हन्यते
लोकः परचक्रसमागमः । स
ग्रामश्च महाघोरो दुर्भिक्षं मर
कंतथा ॥ अद्भुतानि प्रसूयेतेत
नु देशस्य विद्रवः ॥ अकाले ।

फलपुष्पाणि देशविद्रवकारणं
मत्स्यपुराणे । अतिवृष्टि रनावृ
ष्टि र्दुर्भिक्षादि भयंमतं । अन्ह
तो तदिनाइर्दृं वृष्टि र्नैया भया
यच निमेषे वाध्य रोगो वा स्मृते
यस्तस्यात्तरेण तु । इंद्रायुधं ततो
दृष्ट्वा उल्कापातं तथैवच ॥
दिग्दाह परिवेषौच गंधर्वनग
रंतथा । परचक्रभयं विद्याद्देशो
पद्रव मेव च ॥ भासो वनकुक्कु
टः ॥ कंस निधनमूचने हरि
वंशः । वक्रमंगारकश्चक्रे चित्रा
यां घोरदर्शनः । चलंत्यपर्व
णि महीगिरीणां शिखराणि
च । वाताहताने सपद । दंति
नां दिशमास्थाय धूमकेतुः स्थि
तोऽभवेत् वक्रमंगारकश्चक्रे
कृत्तिकासु भयंकरः ॥ कृत्या
वितामघेण । सप्ताश्चैव विवेक
तत्र वसुधा लोकाः स्तुपापी हिता
तावत्कारिणो दुःखिता [illegible]
द्दफला नृपाश्च विकलाः संग्राम
श्चौरा मही भेतार्चात दुर्वंतपीडि
तनरा देवेज्य राज्ञो धृतौ ॥
रोके शस्त्रोद्योगो मांसास्थि
वसादिभि मेदुरः ॥ पाता

हिरण्यत्वक्फलकुसुमाद्येव
र्षिते भयं विद्यात् । अंगारपांशु
वर्षे विनाश मुपयाति तन्नगरं
उपले विना जलधरै विकृता
वा यदा प्राणिनो वृष्टा । छिद्रं
वाप्यतिवृष्टिं शस्यानां ईति सं
जननं ॥ बुधकौशिकसंवादे
वल्याः प्रपातेच फले शरटस्य
प्ररोहणे । शीर्षे राजश्रियो वा
प्ति भाले चैश्वर्य्यमेवच ॥ क
र्णयो भूषणावाप्तिर्नेत्रयो बंधु
दर्शने । नासिकायांच सौगंध्यं
वक्त्रे मिष्टान्न भोजनं । कण्ठ
चैव स्त्रियो ऽवाप्ति र्भुजयोर्वि
भवो भवेत् । धनलाभो बाहुमू
ले करयो र्धनवृद्धयः ॥ स्तन
मूले च सौभाग्यं हृदि सौख्य
विवर्द्धनं । पृष्ठे नित्यं महीला
भः पार्श्वयोर्बंधुदर्शनं ॥ कटि
द्वये वस्त्रलाभो गुह्ये मित्र समा
गमः । जंघेवोर्धंस्तयो निंद्यगु
देरोगभयं भवेत् ॥ ऊर्वोस्तु वा
हनावाप्ति र्जानु जंघयोः संक्षयः
वाम दक्षिणयोः पादेभ्रमणं
नियतं भवेत् ॥ वल्याः प्ररोहणे
चैव पतने शरटस्य च । यस्या
स्यास्तु फलञ्चैव तद्वदेव प्रजा ।

यते ॥ वल्यः प्ररोहणंराज्ञो ।
राष्ट्रस्य प्रपातने । नियतार्था
यभवति व्याधि पीडा विपर्य्य
ये ॥ पतनानंतरं चैवारोहणं
यदि जायते । पतने फलमु
त्कृष्टं रोहणे ऽन्यत् फलंभवे
त् । आरोहणच्चोर्ध्वं वृक्षे अधो
वृक्षेच पातने ॥ भवेदिष्टफ
ले तस्य तत् काले जायते
ध्रुवं ॥ स्पृष्टमात्रे तयोः स
द्यः सचेलं जल माविशेत् ।
पंचगव्य प्राशनञ्च कुर्य्यादर्का
वलोकनं ॥ वल्लीरूपे सुवर्णस्य
रक्तवस्त्रेण वेष्टयेत् । रुद्रजपेद्
त्र्यब्याद्ये सूदये स्वर्णकुंभके
पंचगव्यं पंचरत्नं पंचामृतं स
पल्लवं । पंचवृक्षकषायञ्च नि
क्षिप्यावाहयेत्ततः ॥ रुद्रजपेत्त्र्यं
पुष्याद्ये लोकपालांस्तथा ग्र.
हान् । रस्तंजयेन मंत्रेण समि
द्भिः खादिरैः शुभैः ॥ तिलैर्वा
हुतिभिर्होम अष्टोत्तर सहस्र
कं । वल्ली गृहेऽधिका । मृत्युं
जयमंत्र त्र्यंबकमंत्रः इति विधा
नकः ॥ गर्गसंहिता वार्हस्पत्य
योः । येतेषु शांतिं कुर्वन्ति
न ते यांति पराभवं । ये तु न

प्रतिकुर्वंति क्रियया श्रद्धयान्वि
ताः ॥ दंतिकाद्या विमोहाहा
विनश्यंत्येवते ऽचिरात् ॥
अत्र निमित्तनिश्चयवतो ऽधिका
रो ऽन्यथा दोष इत्याह मत्स्यपु
राणे । छिन्नमण्डल वेलायांये
भवन्त्यद्भुताः क्वचित् ॥ अत्रशां
तिद्वयं कार्य्यं निमित्ते सतिना
न्यथा ॥ निर्निमित्तकृता शांति
र्निमित्त मुपपादयेत् । एतच्चत
त्राद्विशेष विहित शांति विषयं
अन्यथा वेला मंडल सन्देहे शां
तिर्नस्यात् ॥ अतएवोक्तं योगि
याज्ञवल्क्येन ॥ यत्र यत्र च
संकीर्णं मात्मानं मन्यते द्विजः
तत्र तत्र तिलै र्होमो गायत्र्या
समुदाहृतः ॥ गायत्र्यास्त्र्य
तः शुद्धः सर्वपापैः प्रमुच्यते ॥
शांतिकामस्तु जुहुयात् गाय
त्री मन्त्रतैः शुचिः ॥ हंतुकामस्तु
स्पते घृतेन जुहुयात् शुचिः ॥
सावित्र्या शांतिहोमांश्च कुर्य्या
त् पर्वसु नित्यशः ॥ प्रणवव्या
हृतिभ्याञ्च स्वाहांतो होमक
र्मणि ॥ प्रतिलोमा प्रयोक्तव्या
फट्कारांताभिचारिके ॥
मार्कण्डेयपुराणे । दिग्देश जन

सामान्यं त्वपसामान्य मात्मनि
नक्षत्र ग्रह सामान्यं नरो भुं
क्ते शुभाशुभं ॥ परस्पराभिरक्ता
च ग्रहदोषेषु जायते । तथा ।
तस्माच्छांतिमरः प्रोक्ता लोक
वादरतस्तथा । लोकवादेश्च
शांतिश्च ग्रहपीडास्तु कारयेत्
अद्रोहात्तुपरासांश्च शास्त्रंचैवा
दिवेदनं । कुर्य्यात् होमं त
था दानं श्राद्धं क्रोध विवर्जि
तं ॥ अद्रोहं सर्वभूतेषु मैत्री
कुर्वंति पण्डिताः । वर्जयेद्
षंतीवाच मतिवादं तथैवच
ग्रह पूजांचकुर्वीत सर्वपीडासु
मानवः । एवं शाम्यंत्यशेषाणि
घोराणि द्विजसत्तम ॥ प्रयतानां
मनुष्याणां ग्रहर्क्षोत्थान्यनेक
शः ॥ लोकवादाश्च तैरेवोक्ता
यथा आकाशाद्देवतानाञ्च दे
व्यादीनाञ्च सौहृदात् । पृथि
व्यां प्रतिलोकेच लोकवादाः इ
ति स्मृताः ॥ तेच सर्वे अत ऊ
किम्याद्यभिभव शांत्यर्थं लो
किकौषध मंत्रादयः । विषहरी
मंगलचंडिका शीतलादयः । क्षेम
वृद्धादौ क्षेत्रपाल कुलदेवता
पूजाच ॥ तथाचापस्तंबः स्त्री

भ्यो ऽवरवर्णेभ्यो धर्मशेषा
न् प्रतीयादित्येक इति । ध
र्मशेषान् श्रुतिस्मृति सदाचा
रेष्वप्रसिद्धान् इति नारायणो
पाध्यायाः । अद्रोहस्तु पात्रे ति
नाभूमौ गोस्तने निष्पीडः दु
ग्धोत्सर्गः । चैत्यः पूज्यत्वेन ख्या
तोग्रामप्रधानवृक्षः । तथा च
वासिष्ठातेहरिवंशः । अनेक
शाखं चैत्यस्य निपपात महीत
ले । अर्चितः सर्वकन्याभि दीन
वानां महात्मनां । उषंती अक
ल्याणी । अतिवादश्च पूज्यम
तिक्रम्य भाषणं ॥ मत्स्यपुराणे
काकस्यैकरवश्रावः प्रभातेऽ
स्विहायकः । काको मैथुनका
सक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेत् वा
तथा गृहे । श्येनो गृहपते मू
र्ध्नि धनतापस्तथैवच ॥ व
राहसंहितायां । क्रीडामुदन्तो
ह्यतिमांसलुब्धा भीतो रुजार्तः
पतितो विहगः । नाशो गृह
स्वास्य विनाशहेतु शेयः सशु
साद्यत आशु सर्वाः । गृहे प
क्षिविकारेषु कुर्य्याच्छामव तर्प
णं देवाः कपोता इति वाजसनेय

समभि र्द्विजैः ॥ गावश्च देव
विविधा द्विजानां सकांचनाव
स्त्रयुग्मोत्तरीयाः । एवंकृते पाप
मुपैति शांतिं सूर्ये द्विजैर्वापि
निवेदिते यत् ॥ द्विजैः पवि
भिः । अपिना अमैरपि ॥
भुजवलभीमे । एको वृष स्त
योगावः समाख्या नवदंतिनः
सिंहप्रसूतिकाश्चैव कपिलाः
स्वामिघातकाः ॥ सिंहप्रसूति
कागावः ॥ मत्स्यपुराणे अंगे द
क्षिणभागेतुशस्तं विस्फुरणं
भवेत् । अप्रशस्तं तथा वामे पृ
ष्ठस्य हृदयस्य च । लाञ्छनेपिट
कश्चैवज्ञेयंविस्फुरितं तथा वि
पर्य्ययेण विहितं सर्वेस्त्रीणां
फलंतथा । अनिष्टचिह्नोपशमे
द्विजानां कार्यंसुवर्णेन च त
र्पणंस्यात् । [illegible]
ष्ट दर्शनाद्यो हृते हिरण्यञ्च द
द्यादिति ॥ मात्स्ये । नमस्ते सर्व
लोकेश नमस्ते भृगुनंदन ।
कवे सर्वार्थ सिद्धार्थं गृहाण
र्घ्यंनमोस्तुते ॥ एवं शुक्रार्द्ये
कुर्वन् यात्रादिषु च भार्गव सर्वा
न्कामानवाप्नोति विष्णुलोके म
हीयते ॥ नमस्तेऽङ्गिरसांनाथ
वाक्पतेच बृहस्पते । क्रूरग्रहैः
पीडितानां ममामृताय नमो नमः
संक्रांतावपि कौंतेय यात्रास्वभ्यु
दयेषु च कुर्वन् बृहस्पतेःपूजां
सर्वान् कामान् समश्नुते ॥
वैशंपायनः (?) । ग्रहयज्ञैः
शांतिकैश्च किं क्रियते नरा
द्विज । महाशांतिकरः श्रीमान्
तत्रस्था ह्यजितो हरिः । उत्पाता
न् दारुणान् पुंसो हंति नित्यान
नेकशः । तत्रस्था ह्यजितोभ
ता महाशांतिकरो हरिः ॥
अत्र ब्रह्मपुराणीयो मंत्रः । नम
स्तेवरूरूपाय विश्वे परमात्म
ने स्वाहेति ॥ छंदोगपरिशिष्टे
गृध्रालो रजस्वलाभिगमने गो
सभार्थायाश्च गमने च मज्जनने
विजातीयजनने वाकाक कं
क गृध्र दक्ष पेषण भोमचि
ल कपोतानां गृहप्रवेशे मानु
षस्योपरिविश्रामणे पश्चा मेव
क्रियमाणे गृहदाहादिके अ
नेषु चाद्भुतेषु कल्पदृष्टेन वि
धिनाऽग्निमुपसमाधाय प्रायश्चि
त्ताज्याहुती र्जुहोति अद्भुताय
अग्नये स्वाहा सोमाय विश्वेभ्यो
न्द्राय वायवे सूर्याय मृत्यवे ।

विश्वेभ्यो देवेभ्यः स्वाहेतिस्था
लीपाकाहुतान्यदिति ॥
कपोतं विशेषयति शौनकः ।
रक्तपादः कपोताख्या अवेणा
काःशुकवच्छविः । सचेच्छालां
विशेच्छालासमीपेचव्रजेद्यदि
अन्येषु गृहमध्येवा वल्मीकस्या
द्रुमादिषु । कल्पदृष्टेन विधिना
गृह्योक्तेन प्रायश्चित्ताज्याहुतीः
अद्भुतदोषप्रशमनार्थाः समा
ज्याहुतीःअद्भुतायाग्नयेस्वाहा
इत्यादि मंत्रै तत्स्थालीपाकेति
कर्तव्यतया पापस्वरूपमि देते
भ्योदेवेभ्योजुहुयात् । छंदोग
परिशिष्टं । पश्चात् घृतपायसे
न ब्राह्मणान् भोजयित्वा गो
वरं दत्वा शांति भवतीति गोव
रंगोश्रेष्ठं । दक्षिणांतोमां कृत्वा
दोषशांति भवतीति । तथाचो
क्तं । गो विशिष्टतमा लोकेवेदे
ष्वपि निगद्यते । न ततोऽन्य
द्वरं यस्मात्तस्माद्गौ र्वर उच्य
ते ॥ छंदोगपरिशिष्टे । यद्ये
षा मम्मत मापन्नः प्रायश्चि
त्तं न कुर्य्यात्तस्य गृहपते र्मरणं
सर्वस्वनाशो वा भवति तस्मात्
प्रायश्चित्तं कर्तव्यं कर्म्मापवर्गे
वामदेव्यगानं शांतिः शांति रिति
अपवर्गे समाप्तौ । वामदेव्यगानं
शांतिः कार्य्या । आवृत्तिः प्रकर
ण समाप्त्यर्थो वार्हस्पत्ये ॥
समयंत्याक्षत्राहात् कस्मादित्कृते
निमित्त मात्रेव । अतिवर्षिणेप
वास व्रत दीक्षा जप हवनानि ।
वराहः । ये च न दोषं जनय
न्त्युत्पातां स्तान्स्वभावकृता
न् । ऋषिपुत्रकृतैः श्लोकैर्विद्या
देभिः समासोक्तैः । तथाचम
त्स्यपुराणे । वज्राशनि महीक
म्प संध्या निर्घात निस्वनाः । प
रिवेषा रजो धूम रक्तार्कास्तम
योदयाः । द्रुमेभ्योऽथ रसस्नेह
मधु पुष्पफलोद्गमाः । गोप
क्षि मदवृद्धिश्च शिवाय मधुमा
धवे ॥ तारोल्कापातकलुषक
पिलार्केंदुमंडले । अनग्नि ज्वल
नं स्फोटं धूम रेण्वनिलाकुले ॥
रक्तपद्मारुणासंध्या नभःक्षुब्धा
र्णवोपमं । सरितांचैव संशोष
दृष्टा ग्रीष्मे शुभं वदेत् ॥
शक्रायुध परीवेषा विद्युच्छुष्क
विरोहणं कम्पोद्वर्तन वैकृत्यं र
सनं दरणं क्षितेः । नद्युदपान
सरसां वृद्धि भवन स्रवाः ॥

पतनञ्चाद्रिगेहानां वर्षासु न
भयावहं ॥ हरिवंशेवर्षावर्णना
यां । क्वचित् कंदरहासाढ्या शि
लीन्ध्राभरणं क्वचित् । इति दर्श
नात् वर्षासु शिलीन्ध्रोद्गमो न
भयावहः ॥ दिवसेऽस्तगते गा
न्धर्व विमानाद्भुतदर्शने । ग्रहन
क्षत्र ताराणां दर्शनञ्च दिवाम्ब
रे । गीतवादित्र निर्घोषा वनप
र्वतसानुषु । शस्यवृद्धी रसोत्पत्ति
रपापाः शरदिस्मृताः ॥
शीतानिल तुषारत्वं नर्दनंमृग
पक्षिणां ॥ रक्षोयक्षादि सत्वा
नां दर्शने वागमानुषी ॥ दिशो
धूमान्धकाराश्च शलभा वनप
र्वताः । उच्चैः सूर्योदयास्तत्वे हे
मंते शोभना मताः ॥ हिम
पातानिलोत्पात विरूपाद्भुत
दर्शनं । कृष्णञ्जनाभ माकाशं
तारोल्कापात पिंजरं ॥ चित्रा
गर्भोद्भवाः स्त्रीषु गोऽजाश्वमृग
पक्षिणां । पत्रांकुरलतानाञ्च वि
काराः शिशिरे शुभाः ॥
ऋतुस्वभावजा ह्येते दृष्टाःस्व
र्त्तौ शुभावहाः ॥ ऋतावस्व
चोत्पाता दृष्टास्ते भयदारु
णाः ॥ उन्मत्तानाञ्च या गाथा
शिशूनां चेष्टितञ्च यत् । स्त्रियो
यच्च प्रभाषंते तत्र नास्ति व्यति
क्रमः ॥ पूर्वञ्चरति देवेषु पश्चा
द्गच्छति मानुषान् । नाचोदिता
वाग्वदति सत्या ह्येषा सरस्वती
बृहस्पतिः । ज्योतिर्ज्ञानं तथोत्
पात मविदित्वा तु ये नराणां
श्रावयन्त्यर्थलोभेन विनेयास्ते
पियन्तुतः ॥ विनेया दंडनीयाः
इति ज्योतिस्तत्वे ॥
भौमदिव्यांतरीक्षोत्पातशांतिर्म
त्स्ये २०२ अध्यायावधि २१२
अध्यायपर्य्यन्ते द्रष्टव्या । तथा
देवीपुराणे महाभ्युदयपादेस
वैदेवकी सर्वोत्पातशांतिसमा
प्ताध्याये चंडीशाद्धे च द्रष्टव्या ।
तंत्रोक्ता शांतिः षट्कर्मशद्धे
द्रष्टव्या ॥ अथ शांतिकपौष्टि
ककर्मदिनं ॥ तत्र वारारवि
सोम बुध बृहस्पति शुक्राणां
तत्र नक्षत्राणि उत्तराषाढा उ
त्तरफाल्गुणी उत्तरभाद्रपत् रोहि
णी चित्रा अनुराधा मृगशिरः ॥
रेवती पुष्य अश्विनी हस्ता । तत्र
चंद्रःशोभनः । लग्नं शोभनं ॥
इति ज्योतिषतत्वे ॥
शांतिः पुं वृत्तार्हद्विशेषः ॥

जिनचक्रवर्त्तिविशेषः । इति हे
मचंद्रः । दशममन्वंतरीयेन्द्रः
यथा । धर्म्मपुत्रस्य पुत्रोस्तुदश
मस्य मनोःशृणु । सत्वेत्र श्चा
तमौजाश्च भूमिश्रेन्यश्च वीर्य्य
वान् ॥ शतानीको निरमित्रो
वृषसेनो जयद्रथः । भूरिद्यु
म्नः सवर्चाश्च शान्ति रिन्द्रः
प्रतापवान् ॥ आपो मूर्ति र्ह
विष्मांश्च सुकृतिश्चाव्यय स्त
था । नाभागो ऽप्रतिमश्चैव सौ
रभा ऋषयस्तथा ॥ प्राणा
ख्याः शतसंख्याश्च देवतानांग
णास्तथा । वालिशत्रु स्तु हरि
श्च गदयाञ्जातयिष्यति ॥ इति
गारुडे ८७ अध्यायः ॥
शांतिकामः त्रि शांत्यभिलाषी
यथा । श्रीकामः शांतिकामो
वा ग्रहयज्ञंसमाचरेत् वृष्ट्या
युः पुष्टिकामो वा तथैवाभि
चरन्नपि ॥ इति संस्कारतत्वे
शांतिगृहं स्त्री शांत्यालयः । य
त्रोते शांतिकुंभजलेन स्नान
सागृहं । तत्पर्य्यायः । आथर्वणं
१ इति हेमचंद्रः ॥
शांत्वं क्ली शान्त्वे । इत्यमर
टीकासारसुन्दरी ॥
शांत्ववृत्तिः स्त्री ब्राह्मणयष्टिका
इति शब्दचंद्रिका ॥ पुस्तकांत
रे श्यान्तति रिति च पाठः ॥
शापः पुं आक्रोशः ॥ दिव्य
इति मेदिनी ॥ आपस्य पर्य्या
यः । अकरणिः २ इत्यमरः ॥
अजीवनिः ३ अजननिः ४ अ
वग्रहः ५ निग्रहः ६ इति भ
रतः ॥ अभिसम्पातः ७ इति
ग्रन्थांतरं ॥ शेषस्यपर्य्यायः ॥
शपनं २ शपथः ३ इत्यमरः
मिथ्याभिशंसने ४ इति शब्द
रत्नावली ॥ शापटिकः ॥
पुं मयूरः ॥
इति केचित् ॥
शापास्त्रः पुं मुनिः । इति
त्रिकाण्डशेषः ॥
शाफरिकः पुं मत्स्यधारकः
इति केचित् ॥
शाब्दः त्रि शब्दसंबन्धी । यथा
पक्षःशाब्दोःपरस्मार्थः । इति
दायभागः । सरस्वत्यां स्त्री
शाब्दी । इतिकेचित् ॥
शाब्दबोधः पुं शब्दार्थज्ञानं ॥
न्यायमते पदार्थज्ञानजन्यज्ञा
नं । तस्य करणं पदज्ञानं ॥
तस्य कारणं पदशक्तिज्ञानं ।

कदाचित् लक्षणाज्ञाने। एवं
आकांक्षा योग्यतासत्ति तात्पर्य्य
ज्ञानञ्च। यथा। पदज्ञानन्तु कर
णं द्वारं तत्र पदार्थधीः। शाब्दबो
धः फलं तत्र शक्तिधीः सहका
रिणी ॥ इति भाषापरिच्छेदः ॥
शाब्दबोधप्रकारं दर्शयति पद
ज्ञानन्त्विति। नतु ज्ञायमानं पदं
करणं पदाभावेऽपि मौनि·
श्लोकादौ शाब्दबोधात्। पदा
र्थधीरिति पदजन्यपदार्थस्म
रणं व्यापारः। अन्यथा पदज्ञा
नवतः प्रत्यक्षादिना पदार्थोप
स्थितावपि शाब्दबोधापत्तेः ॥
तथापि वृत्त्या पदजन्यत्वं बो·
ध्यं अन्यथा घटादिपदात् सम
वायसम्बन्धेन आकाशस्मरणे जा
ते आकाशस्यापि शाब्दबोधाप
त्तेः। वृत्तिः शक्तिलक्षणान्यत
रसम्बन्धः। अत एव शक्तिज्ञान
स्य उपयोगः। एवं शक्तिग्रहा
भावे पदज्ञानेऽपि तत्सम्बन्धे
न स्मरणानुपपत्तेः। पदज्ञान
स्य हि सम्बन्धिज्ञानविधयार्थस्म
रणत्वे। शक्तिश्च पदेन सह प
दार्थस्य सम्बन्धः। अस्माच्छब्दादय
मर्थो बोद्धव्य इतीश्वरेच्छारूपा·
आधुनिके नाम्नि शक्तिरस्त्येव
एकादशेऽहनि पिता नाम कुर्य्यादि
तीश्वरेच्छायाः सत्त्वात्। आधुनि
केतु संकेतेन शक्ति रिति संप्र
दायः। नव्यास्तु ईश्वरेच्छा न
शक्तिः किन्त्विच्छैव तेनाधुनि
कसंकेतेऽपि शक्तिरस्तीति वदं
ति ॥ शक्तिग्रहश्च व्याकरणा
दितः तथाहि। शक्तिग्रहं व्याक
रणोपमानकोषाप्तवाक्याद्व्यवहा
रतश्च वाक्यस्य शेषाद्विवृते र्व
दन्ति सान्निध्यतः सिद्धपदस्य वृ
द्धाः ॥ धातु प्रकृति प्रत्ययादी
नां शक्तिग्रहो व्याकरणाद्भवति
क्वचित्तु सति बाधके त्यज्यतेऽपि।
यथा। वैयाकरणैः। आख्यातस्य
कर्त्तरि शक्तिरुच्यते। चैत्रः पचती
त्यादौ कर्त्रा सह चैत्रस्याभेदान्व
यस्तत्र गौरवान्नत्यज्यते किंतु कृ
तौ शक्तिग्रहो लाघवात्। कृतिश्च
आदौ प्रकारीभूय भासते। तत्र
कर्त्तर्य्यनभिधानात् चैत्रादिपदान्
तरं तृतीया स्यादिति वाच्यं
ते संख्यानभिधानस्य तत्र तन्त्र
त्वात् संख्याभिधानयोग्यस्य
कर्म्मत्वाद्यनवरुद्धं प्रथमान्तप
दोपस्थाप्यकर्म्मत्वादीन्यस्य विशे

षणत्व तात्पर्य्याविषयत्वमर्थः
तेन चैत्र इव गच्छतीत्यादौ न चैत्रे
संख्यान्वयः। यत्र कर्म्मादौ न वि
शेषणत्व तात्पर्य्यं तद्वारणाय प्र
थमान्तेति। यत्र धात्वर्थातिरि
क्ताविशेषणत्वे प्रथमदलार्थः ते
न चैत्र इव गच्छतीत्यत्र चैत्रादे
र्वारणं स्तोकं पचतीत्यादौ स्तो
कादे र्वारणाय च द्वितीयदलं
तस्य द्वितीयान्तोपस्थाप्यत्वाद्वा
रणं। एवं व्यापारेऽपि न शक्ति
गौरवात्। रथो गच्छति इत्या
दौ तु स्वव्यापारे आश्रयत्वे·
वा लक्षणा जानाति इत्यादौ तु
आश्रयत्वे नश्यतीत्यादौ प्रति
योगित्वे निरूढलक्षणा। उ
पमानाद्यथा शक्तिग्रहस्तथो
क्तं ॥ एवं कोषादपि शक्तिग्र
हः सति बाधके क्वचित्त्यज्यते य
था नीलादि पदानां नीलरूपादौ
नीलादि विशिष्टे च शक्तिः
कोषे व्युत्पादिता तथापि लाघ
वात् नीलादौ शक्तिः नीलादि
विशिष्टे लक्षणेति ॥ एवमाप्त
वाक्यादपि। यथा। कोकिलः
पिकपदवाच्यः इत्यादिशाब्दा·
त् पिकादि शक्तिग्रहः ॥
एवं व्यवहारादपि यथा। प्रयोज
कवृद्धेन घटमानयेत्युक्तं तत्
श्रुत्वा प्रयोज्यवृद्धेन घट आ
नीत स्तदवधार्य्य पार्श्वस्थो बा
लो घटानयनरूपकार्य्यं घटमान
य इति शब्दप्रयोज्यमवधारय
ति ततश्च घटमानय गामानय
इत्यादौ आवापोद्वापाभ्यां घटा
दिपदानां कार्य्यान्वितघटादौ
शक्तिं गृह्णाति ॥ एवं वाक्य
शेषादपि शक्तिग्रहः। यथा य
वमयश्चरु र्भवतीत्यत्र यवपद
स्य दीर्घशूकविशिष्टे आर्य्याणां
प्रयोगः कंगौ च म्लेच्छानां त
त्र हि यथान्या ओषधयो म्लायं
न्ते तथैते मोदमाना इवोत्तिष्ठं
न्ति। वसन्ते सर्वशस्यानां जाय
ते पत्रशातनं। मोदमानाश्च ति
ष्ठन्ति यवाः कणिशशालिनः।
इति वाक्यशेषात् दीर्घशूके श
क्ति र्निर्णीयते कंगौ तु शक्तिभ्र
मात् प्रयोगः। नानाशक्तिकल्प
नेगौरवात्। हरिपदादौ तु वि
निगमकाभावान्नाना शक्तिक
ल्पनं ॥ एवं विवरणादपि श
क्तिग्रहः। विवरणन्तु तत्समाना
र्थपदान्तरेण तदर्थकथनं यथा य

टोऽस्ति इत्यस्य कलसोऽस्तीत्य
नेन विवरणात्घटपदस्य कल
से शक्तिग्रहः । एवं पचति इत्य
स्य पाकं करोति इत्यनेन विव
रणाद्व्याख्यानस्य यत्नार्थकत्वे
कल्प्यते ॥ एवं प्रसिद्धपद सान्नि
ध्यादपि शक्तिग्रहः । यथा इ
ह सहकारतरौ मधुरं पिको रौ
ति इत्यादौ पिकपदस्य शक्ति
ग्रह इति । तच्च जातावेव शक्ति
र्नैव व्यक्तौ व्यभिचारादानन्त्या
च्च ॥ शक्तंपदंतच्चतुर्विधं क्वचिद्यौगिकं
क्वचिद्रूढं क्वचिद्योगरूढं क्व
चिद्यौगिकरूढं । यत्रावयवा
र्थ एव बुध्यते तद्यौगिकं यथा
पाचकादिपदं । यत्रावयवशक्ति
नैरपेक्ष्येण समुदायशक्तिमात्रे
ण बुध्यते तद्रूढं यथा गोपद
मण्डपादिपदं । यत्र तु अवयव
शक्ति विषये समुदायशक्तिर
प्यस्ति तद्योगरूढं यथा पंकजा
दिपदं । तथाहि पंकजपदमव
यव शक्त्या पंकजनिकर्तृरूपम
र्थं बोधयति समुदायशक्त्या च पद्म
त्वेन रूपेण पद्मं बोधयति । यत्र
अवयवार्थ रूढ्यर्थयोः स्वातंत्र्ये
ण बोधस्तद्यौगिकरूढं यथोद्भि

दादिपदं तत्र हि ऊर्द्धं भेदनक
र्त्ता तरु गुल्मादि रपि बुध्यते
इति सिद्धांतमुक्तावली ॥
शाब्दिकः पुं शब्दशास्त्रवेत्ता ।
वैयाकरणः आदिशाब्दिका य
था । इंद्र श्चंद्रः काशकृत्स्नापि
शली शाकटायनः । पाणिन्य
मर जैनेंद्रा जयंत्यष्टादिशाब्दि
काः ॥ इति कविकल्पद्रुमः ॥
नव्यशाब्दिका यथा । क्रमदी
श्वरः । सर्ववर्म्मा । पद्मनाभमिश्रः
बोपदेवः । सतसर्वानंदः ॥ भर
तमल्लिक प्रभृतयः । शब्दकार
कः । शब्दं करोतीत्यर्थे ठञ्
प्रत्ययेन निष्पन्नः ॥ इति सि
द्धांतकौमुदी ॥ शब्दसंबंधिनि
त्रि ॥
शाम नै क्ली साम । इत्यमरटी
कायां सारसुंदरी ॥
शामनं क्ली मारणं । शांतिः
इति केचित् ॥
शामनः पुं शमनः । इति पु
राणं ॥
शामनी स्त्री दक्षिणादिक् । इति
राजनिर्घण्टः ॥
शामित्रं क्ली यज्ञे ॥ पशुबंधनं
यज्ञपात्रं । इति केचित् ॥

शामीलं क्ली भस्म । इतिसिद्धा
न्तकौमुदी ॥
शामीली स्त्री स्रुक् । इतिसिद्धा
न्तकौमुदी ॥
शांवरी स्त्री शम्बरदैत्यनिर्मित
माया । इंद्रजालादिमाया इत्य
मरभरतौ ॥
शांबविकः पुं शांखिकः इति
जटाधरः ॥
शांबुकः पुं शंबूकः । शामुक
इतिभाषा । इतिशब्दरत्नावली ॥
शांबूकः पुं शंबूकः । इत्यमर
टीकायां भरतः ॥
शांभरं क्ली देवदारु । इति रा
जनिर्घण्टः ॥
शांभवः पुं कर्पूरः ॥ शिवमल्ली
गुग्गुलुः । इति राजनिर्घण्टः ।
विषभेदः । इति शब्दचंद्रिका ॥
शंभुपुत्रः ॥ शंभुपूजकः । शंभु
संबन्धिनि त्रि ॥
शांभवी स्त्री नीलदूर्वा । इति
राजनिर्घण्टः ॥ दुर्गा ॥ यथा
शांभवी देवमाता च चिंता बन्ध
प्रिया सदा । इति तंत्रसारे दुर्गा
शतनामस्तोत्रं ॥
शायकः पुं बाणः । इति जटा
धरः ॥ खड्गः । इत्यमरटीकायां

स्वामी ॥
शार त्रि क योर्द्वल्ये । इति कवि
कल्पद्रुमः ॥ अपशारत् इति
दुर्गादासः ॥
शारे त्रि कर्बुरवर्णः । इत्यमरः
शारः पुं वायुः । इत्यमरः ॥
अक्षोपकरणं । इति मेदिनी ।
हिंसनं ॥ कर्बुरवर्णः । कुशोह्नी
इति केचित् ॥
शारंगः पुं चातकः हरिणः ॥
हस्ती । भृंगः ॥ मयूरः कर्बुरव
र्णविशिष्टे त्रि । इत्यमरटीकायां
मुकुटादयः ॥
शारंगी स्त्री वाद्ययंत्रविशेषः
इति शब्दरत्नावली ॥
शारदं क्ली श्वेतकमलं । इति
राजनिर्घण्टः । सस्यं । इति मेदि
नी शब्दरत्नावल्यौ ॥
शारदः पुं कासः ॥ बकुलः ॥
हरिन्मुद्गः । इति राजनिर्घण्टः
वत्सरः ॥ इति मेदिनी ॥
पीतमुद्गः । इति हेमचंद्रः ॥
रोगः । इति सिद्धांतकौमुदी ॥
शारदः त्रि शरज्जातः । नूतनः
अप्रतिभः । इति मेदिनी ॥
शालीनः । इति विश्वः ॥
शारदा स्त्री सरस्वती । इति



विकारएवशेषः दुर्गा ॥ वीणावि
शेषः ॥ इति शब्दरत्नावली ॥
ब्राह्मी ॥ सावित्री । इति राजनि
र्घण्टः ॥ शारदापदव्युत्पत्तिर्य
था शरत्काले पुरा यस्मात्
नवम्यां बोधिता सुरैः । शारदा
सा समाख्याता पीठे लोके च
नामतः ॥ इति तिथ्यादितत्त्वं ।
शारदिकं क्ली श्राद्धे । यथा
श्राद्धे शरदः इत्यनेन ठञ्प्र
त्ययेन निष्पन्नः ॥ इति सिद्धा
न्तकौमुदी ॥
शारदिकः पुं रोगः । विभाषा
रोगातपयोः । इति ठञ् प्रत्य
येन निष्पन्नः । इति सिद्धान्त
कौमुदी ॥
शारदी स्त्री तोयपिप्पली । सप्त
पर्णः । इति मेदिनी कोजागर
पूर्णिमा । इति शब्दरत्नावली
शरत्कालीने त्रि । यथा । स्का
न्दे भविष्ययोः । शारदी चण्डि
कापूजा त्रिविधा परिगीयते
सात्विकी राजसी चैव तामसी
चेति तां शृणु ॥ सात्विकी जप
यज्ञाद्यैर्नैवेद्यैश्च निरामिषैः
माहात्म्यं भगवत्याश्च पुरा
णादिषु कीर्तितं । पाठस्तस्य
जपः प्रोक्तः पठेद्देवीमनाः श्रि
ये । राजसी बलिदानेन नैवेद्यैः
सामिषैस्तथा ॥ सुरामांसाद्यु
पहारैर्जप यज्ञैर्विना तु या ।
विना मन्त्रैस्तामसी स्यात् कि
रातानाञ्च सम्मता ॥ इति
तिथ्यादितत्त्वं ॥
शारदीयमहापूजा स्त्री शरत्का
लीनदुर्गामहापूजा यथा । शा
रदीया महापूजा चतुःकर्मम
यी शुभा । तां तिथित्रय मासा
द्य कुर्य्यात् भक्त्या विधानतः ।
इति तिथ्यादितत्त्वं ॥ अपिच
हते चोरे महावीरे सुरासुर
भयंकरे । देवी उपासका देवाः
प्रभूता ब्रह्मसात्तथा । समेताः
सर्वदेवास्ते देवीं भक्त्या तुतो
षिरे । बलिञ्च ददु र्भक्तानां म
हिषाजामिषैस्तथा । पर्वतास्मि
न् दिने वत्स प्रेत भूतसमाकु
ले । कृतवान् सर्वदेवश्च पू
जाञ्च शाश्वतीं महान् ॥ जल
दान्ते श्विने मासि महिषासुरनि
बर्हिणीं । देवीं संपूजयित्वा तु
शुम्भी यद्वराजिषु ॥ येचानयं
ति सदा भक्त्या ते भवन्ति म
हाबलाः । बलिञ्च ये प्रयच्छन्ति

सर्वभूत विनाशने तेषान्तु तुष्य
ते देवी यावत् कल्पन्तु शांकरे
क्रीडन्ते विविधैर्भोगैर्देवलोके
सुदुर्लभे ॥ यावद्दुर्वीपुराका
ष्ठं जलं वह्नि शशिग्रहाः ।
तावच्च चण्डिकापूजा भविष्यति
सदा भुवि । प्रावृट्काले विशे
षेण आश्विने ह्यष्टमीषु च । म
हाशब्दो नवम्याञ्च लोकख्या
तिं गमिष्यति । इन्द्र उवाच ॥
आश्विने घातिते चोरे नवमी
प्रतिवत्सरं । श्रोतुमिच्छाम्यहं
तात उपवास व्रतादिकं ॥
महाव्रते महापुण्ये शंकराद्यै
रनुष्ठितं कर्त्तव्यं देवराजेन्द्र दे
वीभक्तिसमन्वितैः ॥ कन्यासं
स्थे रवौ शक्र शुक्लामारभ्य
नन्दिकां । अयाची त्वथवैका
शी नक्ताशी वाथ वायुदः ॥
प्रातःस्नायी जितद्वन्द्वः त्रिका
ले शिवपूजकः । जप होम स
मायुक्तः कन्यकां भोजयेत् स
दा । अष्टम्यां नवमे हानि दारु
जानि शुभानि च । पर्ववाचित
भावेन कारयेत् सुरसत्तम ॥
आश्विनदेवी प्रकर्त्तव्या हैमीवा
राजतीपिवा [illegible] लवणा
पेन खड्गे शूलेथ पूजयेत् ॥
सर्वोपहार सम्पन्नो वस्त्र रत्नफ
लादिभिः । कारयेद्रथ दोला
दीन् पूजाञ्च बलि दैवकीं । पु
ष्पादि घ्राण बिल्वाम्र जातीपु
न्नाग चम्पकैः । विचित्रां कार
येत् पूजां अष्टम्यामुपवासयेत्
दुर्गाग्रतो जपेन्मन्त्र मेकचित्तः
समाहितः । तदर्द्धयामिनीशे
ष विजयार्थे नृपोत्तमैः ॥ पं
चाङ्ग लक्षणोपेत गंध धूपस्त्र
गर्च्चिते । विधिवत् कालिका
लीति जप्त्वा खड्गेन घातयेत्
तस्योत्थं रुधिरं मांसं गृहीत्वा
पूतनादिषु । नैर्ऋताय प्रदा
तव्या महाकौशिक मन्त्रितं ॥
तस्याग्रतो नृपः स्नायाच्छत्रुं कृ
त्वा तु पिष्टजं । खड्गेन घातयि
त्वा तु दद्यात् स्कंद विशाख
योः ततो देवीं स्नापयेत् प्रा
ज्ञः क्षीर सर्पि र्जलादिभिः कुं
कुमागुरु कर्पूर चंदनैः श्च रूप
पकैः । हैमानि पुष्परत्नानि वा
सांसि स्वाहृतानि च । निवेद्य
सुप्रभूतं तु देयं देव्याः सभाति
तेः ॥ अश्वमेध मवाप्नोति भ
क्तिमान् सुरसत्तम । महानवमी

पूजेयं सर्वकामप्रदायिका ॥
सर्वेषु सर्ववर्णेषु तव भक्त्या प्र
कीर्तिता । कृत्वाप्नोति यशोराज्ञ
जो पुत्रायुर्धनसम्पदः ॥ इ
ति देवीपुराणे ४९ अः ॥ अथ्या
याक्षैकलितेनतत्सक्रमके ॥
शारिः पुं अक्षोपकरणं । पा
शकादे वले । गुटिका । इति
मेदिनी ॥ तत्पर्य्यायः ॥ शारः
२ खेलनी ३ इति हेमचन्द्रः ॥
शारिः स्त्री शकुनिकाभेदः ॥
युद्धार्थगजपर्य्याणं । व्यवहारा
न्तरे ॥ इति मेदिनी । कपटः
इति धरणिः ॥
शारिका स्त्री पक्षिविशेषः
मयना इति भाषा । तत्पर्य्या
यः । पीतपादा २ गोराटी ३ गो
किराटिका ४ इति हेमचन्द्रः ॥
शारिका ५ शारी ६ चित्रला
चना ७ शारिः ८ । इति शब्द
रत्नावली । मदनशारिका ९
शलाका १० इति जटाधरः ॥
वीणादिवादनं । तत्पर्य्यायः ॥
कोणः २ इति हेमचन्द्रः ॥
शारिफले क्ली पुं शारिपट्टः
शारिखेलनाधारः । छक इति
भाषा । तत्पर्य्यायः । अष्टापद
२ इत्यमरः ॥ फलकः ३ । इति
शब्दरत्नावली । आकर्षः ४ शा
रिफलकः ५ विड्डतेत्रः ६ अस्त
पीठी ७ इति जटाधरः ॥
शारिफलकः पुं क्ली शारिफ
ले ॥ इति जटाधरः ॥
शारिवा स्त्री श्यामलता । तत्
पर्य्यायः । गोपी २ श्यामा ३
अनन्ता ४ उत्पलशारिवा ५ ॥
इत्यमरः । पंचश्यामलतायां ।
नागजिह्वायामिति केचित्
गोप्यादित्रयं । श्यामलतायां ॥
अनन्तादिद्वयं अनन्तमूले । इति
केचित् । गुप वर्णेन श्यामा
दित्वादीप् गोपा च । पायीश्या
मा गोपपत्नी गोपा गोपालि
कापि चेति वाचस्पतिः । एके
वा शारिवाद्वयं सर्वत्रपावि
शोधने । इति वैद्यकं ॥ इति
भरतः ॥ अस्या गुणाः । वा
युपित्त रक्त तृष्णा छर्दि ज्वर
नाशित्वं । इति राजवल्लभः ॥
शारिशृंखला स्त्री पाशकवि
शेषः । यथा चुसुरी तिंतिडीशृ
तपंचमी शारिशृंखला । नयपी
ठीचाष्टकाले नयः साजयपुत्र
कः ॥ एते पाशकभेदाः सु.

जयकोलाहलोऽपि च । इति
शब्दरत्नावली ॥
शारी स्त्री कुशा । इति केचि
त् । शारीरं क्ली वृषः । शरीरजा
ते त्रि । इति मेदिनी ॥ शारी
रदण्डो यथा । त्रिदण्डं प्रथ
मे कुर्य्यात् वाग्दण्डं तदनन्तरं ।
तृतीयं धनदण्डं च वधदण्डमतः पर
मिति ॥ वधदण्डोऽपि शारीरो
ब्राह्मणव्यतिरिक्तानां । इति
मिताक्षरायां व्यवहारकाण्डे ॥
शारीर दुःखं यथा । आध्या
त्मिको वै द्विविधः शारीरो मान
सस्तथा । शारीरो बहुभिर्भेदै
र्भिद्यते श्रूयतां च सः । शिरो
रोग प्रतिश्याय ज्वर शूल भ
गंदरैः । गुल्मार्शः श्वयथु श्वा
सच्छर्द्यादिभिरनेकधा । तथा
क्षिरोगातीसारकुष्ठांगामय
संज्ञकैः । भिद्यते देहजस्तापो
मानसं श्रोतुमर्हसि । काम
क्रोध भय द्वेष लोभ मोहवि
षादजः । शोकासूयापमाने
र्ष्या मात्सर्य्यादि भय स्तथा
मानसोऽपि द्विजश्रेष्ठ तापो
भवत्यनेकधा । इत्येवमादि
भिर्भेदैस्तापो ह्याध्यात्मिकः ।
स्मृतः । दुःखं सहस्रशो भेदै
र्भिद्यते मुनिसत्तम सुकुमार
तनु गर्भे जन्तु र्बहुमलावृते ।
उल्व संवेष्टितो भुग्न पृष्ठ ग्रीवा
स्थिसंहतिः । अत्यम्ल कटु तीक्ष्ण
स लवणैर्मातृभोजनैः ॥ अ
तितापिभि रत्यर्थं वर्द्धमानाति
वेदनः । प्रसारणाकुंचनाद्यौ
नांगानां प्रभु रात्मनः । शकृ
न्मूत्र महापंकशायी सर्वत्र पीडि
तः । निरुच्छ्वासः सचैतन्यः स्मर
न् जन्मशतान्यथ । आस्ते गर्भे
ति दुःखेन निजकर्म निबंधनः
जायमानः पुरीषासृङ्मूत्र शु
क्राविलाननः । प्राजापत्येन वाते
न पीड्यमानास्थिबंधनः । अधो
मुखो वै क्रियते प्रबलैः सूति
मारुतैः ॥ क्लेशैर्निष्क्रांति मा
प्नोति जठरान्मातु रातुरः । मू
र्छा मवाप्य महतीं संस्पृष्टो
बाह्यवायुना ॥ विज्ञानभ्रंशमा
प्नोति जातश्च मुनिसत्तम क
ण्टकै रिव तुन्नांगः क्रकचै रि
व दारितः ॥ पूतिव्रणान्निपतितो
धरण्यां क्रमिको यथा । कंडू
यनेऽपि वा शक्तः परिवर्त्तेऽप्य
नीश्वरः ॥ स्नान पानादिकाहार

मप्नोति परेच्छया। प्रसुविः
वस्त्रेवे स्मः कीटदंशादिभि
स्तथा। उस्यमानोपि नैवेशक्त
स्यर्थो विनिवारणे। जन्मदुःखा
न्यनेकानि जन्मनो ऽनंतराणि च
बालभावे यदाप्नोति आधिभौ
तादिकानि च। अज्ञान तमसा
च्छन्नो मूढांतःकरणो नरः।
न जानाति कुतः कोहं कुवागं
ता किमात्मकः। इति विसुप
शारीरे ६ ग्रंथे ५ अध्यायः ॥
अथातः शारीरसंख्या व्याकर
णं। शारीरं व्याख्यास्यामः। शुक्र
शोणितं गर्भाशयस्थमात्मप्र
कृतिविकारसंमूर्छितं गर्भ
इत्युच्यते। तच्च चेतनावस्थितं वा
युर्विभजति। तेज एनं पचति। आ
प क्लेदयंति। पृथिवी संहंति आ
काशं विवर्धयति एवं विवर्द्धि
तः स यदा हस्त पाद जिह्वा
घ्राणकर्ण नितंबादिभि रंगैरु
पेतस्तदा शारीरमिति संज्ञां ल
भते। तच्च षडंगं शाखाश्चत
स्रो मध्यं पंचमं षष्ठं शिर इति
अतः परं प्रत्यंगानि वक्ष्यंते।
मस्तकोदर पृष्ठ नाभि लला
टनासा चिबुक वस्ति ग्रीवा इत्येता

एकैकाः कर्ण नेत्र नासा भ्रू
शंखांस गण्ड कक्ष स्तन वृष
ण पार्श्व स्फिक जानु बाहूरु प्र
भृतयो द्वे द्वे। विंशति रंगुलयः।
स्रोतांसि च वक्ष्यमाणानि एष
प्रत्यंगविभाग उक्तः॥ तस्य पुनः
संख्यानं। त्वचः कला धातवो
मला दोषा यकृत प्लीहानौ फु
प्फुस उण्डुको हृदय माशया
अंत्राणि वृक्कौ स्रोतांसि कंडरा
जालानि कूर्चा रज्जवः सेवन्यः सं
घाताः सीमंता अस्थीनि संधयः
स्नायवः पेश्यो मर्माणि सिरा
धमन्यो योगवहानि स्रोतांसि
च। त्वचः सप्त। कलाः सप्त। आ
शयाः सप्त। धातवः सप्त। सप्त
शिराशतानि। पंच पेशीशतानि
नव स्नायुशतानि त्रीण्यस्थिश
तानि। द्वे दशोत्तरे संधिशते।
सप्तोत्तरमर्मशतं। चतुर्विंशति
र्धमन्यः। त्रयो दोषा त्रयो
मलाः। नव स्रोतांसि इति स
मासः॥ विस्तारो ऽत ऊर्द्ध्वं॥
त्वचो ऽभिहिताः कला धातवो
मला दोषा यकृत प्लीहानौ फुप्
फुस उण्डुको हृदयं वृक्कौ च॥
आशयास्तु वाताशयः पित्ताशयः

श्लेष्माशयो रक्ताशय आमाशयः
पक्वाशयो मूत्राशयः स्त्रीणां गर्भा
शयो ऽष्टम इति॥ सार्द्धत्रिव्या
मान्त्राणि पुंसां स्त्रीणाम
र्द्धव्यामहीनानि। श्रवण नयन व
दन घ्राण गुद मेढ्राणि नव
स्रोतांसि नराणां बहिर्मुखान्येता
न्येव स्त्रीणा मपराणि च त्रीणि द्वे
स्तनयो रधस्ताद्रक्तवहं च॥
षोडश कण्डराः। तासां चत
स्रः पादयो स्तावत्यो हस्त ग्रीवा
पृष्ठेषु। तत्र हस्त पाद गतानां
कण्डराणां नखाः प्ररोहाः। ग्री
वा हृदय निबंधिनीना मधोभा
गगतानां मेढ्रं श्रोणि पृष्ठ नि
बंधिनीना मधोभाग गतानां बि
म्बः मूर्द्धोरु वक्षो ऽस पिण्डा
दीनां च मांस सिरा स्नाय्वस्थि
जालानि प्रत्येकं चत्वारि चत्वारि
तानि मणिबंध गुल्फसंश्रितानि
परस्परं निबद्धानि परस्पर सं
श्लिष्टानि परस्पर गवाक्षितानि
चेति। यैर्गवाक्षित मिदं शरीरं
षट् कूर्चा स्ते हस्तपाद ग्रीवा
मेढ्रेषु। हस्तयो र्द्वौ पादयो
र्द्वौ ग्रीवा मेढ्रयो रेकैकः॥
महत्यो मांस रज्जव ॥


श्चतस्रः पृष्ठवंश मुभयतः पेशी
निबंधनार्थं द्वे बाह्ये आभ्यंतरे च
द्वे॥ सप्त सेवन्यः। शिरसि वि
भक्ताः पंच जिह्वा शेफसो
रेकैका ताः परिहर्तव्याः शस्त्रे
ण॥ चतुर्दशास्थ्नां संघाताः
तेषां त्रयो गुल्फ जानु वंक्षणे
षु। एतेनेतर सक्थि बाहू च
व्याख्यातौ त्रिक शिरसो रेकैकः
चतुर्दशैव सीमंताः॥ ते चा
स्थि संघातवद्गणनीया यत
स्तैर्युक्ता अस्थि संघाताः।
ये प्रोक्ताः संघातास्तु खल्व
ष्टादशैकेषां॥ त्रीणि सष
ष्ट्यान्यस्थिशतानि वेदवादिनो
भाषयंते शल्यतंत्रे तु त्रीण्येव
शतानि तेषां सविंश मस्थिश
तं शाखासु सप्तदशोत्तरं शतं
श्रोणि पार्श्व पृष्ठोदरोरःसु
ग्रीवां प्रत्यूर्द्ध्वं त्रिषष्टिः। एव
मस्थ्नां त्रीणि शतानि पूर्यंते
एकैकस्यां तु पादांगुल्यां त्रीणि
त्रीणि तानि पंचदश। तलकू
र्चगुल्फसंश्रितानि दश पार्ष्ण्या
मेकं। जंघायो द्वे जानुन्येकं
एकमूराविति त्रिंशदेव मेक
स्मिन् सक्थ्नि भवंति। एतेने

तर सक्थि बाहू च व्याख्यातौ
श्रोण्यां पंच तेषां गुद भगनि
तंबेषु चत्वारि। त्रिकसंश्रितमे
कं। पार्श्वे षट्त्रिंशदेव मेकस्मि
न् द्वितीयेप्येवं। पृष्ठे त्रिंशत्
अष्टावुरसि। द्वे अक्षक संज्ञे।
ग्रीवायां नवकं। कण्ठनाड्यां
चत्वारि द्वे हन्वोः। दन्ता द्वा
त्रिंशत्। नासायां त्रीणि। ए
कं तालुनि। गण्ड कर्ण शंखे
ष्वेकैकं। षट् शिरसि। एतानि
पंचविधानि भवंति तद्यथा।
कपाल रुचक तरुण वलय
नलकसंज्ञानि। तेषां जानु नितं
बांस गण्ड तालु शंख शिरःसु
कपालानि दशनास्तु रुचकानि
घ्राणकर्ण ग्रीवाक्षि कोषेषु त
रुणानि। पाणि पाद पार्श्व पृष्ठोद
रोरःसु वलयानि। शेषाणि नल
क संज्ञानि। भवंति चात्र। अभ्यंत
रगतैः सारैर्यथा तिष्ठंति भूरु
हाः। अस्थिसारैस्तथा देहाधि
यंते देहिनां ध्रुवं॥ तस्माच्चिर
विनष्टेषु त्वङ्मांसेषु शरीरिणां
अस्थीनि न विनश्यंति सारा
ण्येतानि देहिनां॥ मांसान्यत्र
निबद्धानि शिराभिः स्नायु

भिस्तथा। अस्थीन्यालंबनं कृ
त्वा न शीर्यंते पतंति वा॥ सं
धयस्तु द्विविधाश्चेष्टावंतः स्थि
राश्च॥ शाखासु हन्वोः कट्यां
च चेष्टावंतस्तु संधयः। शेषास्तु
संधयः सर्वे विज्ञेया हि स्थिरा बु
धैः। संख्यातस्तु दशोत्तरे द्वे श
ते। तेषां शाखास्वष्टषष्टिरेको
नषष्टिः कोष्ठे ग्रीवां प्रत्यूर्ध्वं त्र्य
शीतिः। एकैकस्यां पादांगुल्यां
त्रयस्त्रयः द्वावंगुष्ठे ते चतुर्दश
जानु गुल्फ वंक्षणेष्वेकैकः।
एवं सप्तदशैकस्मिन् सक्थ्नि
भवंति। एतेनेतर सक्थि बाहू
च व्याख्यातौ। त्रयः कटीकपा
लेषु। चतुर्विंशतिः पृष्ठवंशे।
तावंत एव पार्श्वयोः। उरस्यष्टौ
तावंत एव ग्रीवायां। त्रयः कं
ठे। नाडीषु हृदय क्लोमनिब
द्धास्त्वष्टादश। दंत परिमाणा
स्तन्मूलेषु। एकः काकलके ना
सायां च। द्वौ वर्त्म मण्डलजौ
नेत्राश्रयौ। गण्ड कर्ण शंखेष्वे
कैकः। द्वौ हनुसंधी। द्वावुप
रिष्टाद्भ्रुवोः शंखयोश्च। पंचशि
रः कपालेषु। एको मूर्द्धि॥
त एते संधयोऽष्टविधाः॥

कोरोदूखल सामुद्ग प्रतर तुन्न
सेवनी वायसतुंड मंडल शं
खावर्ताः। तेषामंगुलि मणिबं
ध गुल्फ जानु कूर्परेषु कोराः सं
धयः कक्षा वंक्षण दशनेषूद्
खलाः अंसपीठ गुद भग नितं
बेषु सामुद्गाः। ग्रीवा पृष्ठवंश
योः प्रतराः। शिरः कटी कपा
लेषु तुन्नसेवनी। हन्वोरुभ
यतस्तु वायसतुंडाः कंठ हृद
यनेत्र क्लोम नाडीषु मंडलाः
श्रोत्र शृंगाटकेषु शंखावर्ताः
तेषां नामभिरेवाकृतयः प्र
योण व्याख्याताः। अस्थ्नां तु सं
धयो ह्येते केवलाः परिकीर्ति
ताः। पेशीस्नायुशिराणां तु सं
धिसंख्यानविद्यते॥ नवस्ना
युशतानि। तासां शाखासु ष
ट् शतानि। द्वेशते त्रिंशच्च कोष्ठे
ग्रीवां प्रत्यूर्द्धं सप्ततिः। एकै
कस्यां तु पादांगुल्यां षट् नि
चितास्ता स्त्रिंशत्। तावंत्य
एव तल कूर्च गुल्फेषु। तावत्य
एव जंघायां। दश जानूनि। चत्वा
रिंशदूरौ। दश वंक्षणे। शतम
ध्यर्द्धमेवमेकस्मिन् सक्थ्नि भवं
ति एतेनेतर सक्थि बाहू च व्या

ख्यातौ षष्टिः कट्यां अशीतिः
पृष्ठे पार्श्वयोः षष्टिः उरसि त्रिं
शत् षट्त्रिंशत् ग्रीवायां मू
र्द्ध्नि चतुस्त्रिंशत् एवं नवस्ना
युशतानि व्याख्यातानि॥
भवंति चात्र। स्नायूंश्चतुर्विधा
विद्यात्तांस्तु सर्वान्निबोध मे प्र
तानवत्यो वृत्ताश्च पृथ्व्यश्च शु
षिरास्तथा। प्रतानवत्यः शा
खासु सर्वसंधिषु चाप्यथ वृ
त्तास्तु कंडराः सर्वा विज्ञेयाः
कुशलैरिह॥ आम पक्वाशयांतेषु
बस्तौ च शुषिराः खलु। पार्श्वोर
सि तथा पृष्ठे पृथुलाश्च शिरस्त
था। नौर्यथा फलकास्तीर्णा बं
धनैर्बहुभिर्युता। भारक्षमा भवे
दप्सु नृयुक्ता सुसमाहिता। एवमे
व शरीरेऽस्मिन् यावंतः संधयः स्मृ
ताः। स्नायुभिर्बहुभिर्बद्धा स्तेन
भारसहा नराः। न ह्यस्थीनि न वा
पेश्यो न शिरा न च संधयः॥
व्यापादितास्तथा हन्युर्यथा स्ना
युः शरीरिणां॥ यः स्नायूः प्रविजा
नाति बाह्या श्चाभ्यंतरा स्तथा
स गूढं शल्यमाहर्तुं देहाच्छ
क्नोति देहिनां॥ पंच पेशी
शतानि भवंति। तासां चत्वा



रि शतानि शाखासु। कोष्ठे ष
ट् षष्टिः। ग्रीवां प्रत्यूर्द्ध्वं चत
स्त्रिंशत्। एकैकस्यां तु पादा
ङ्गुल्यां तिस्रस्तिस्रस्ताः पंचदश
प्रपदे। पादोपरि कूर्च्चस
न्निविष्टास्तावत्य एव दश गु
ल्फतलयोः। गुल्फजान्वंतरे विं
शतिः। पंच जानुनि विंशति
रूर्वोः। दश वंक्षणे। शतमेव
मेकस्मिन् सक्थ्नि भवंति ए
तेनेतरसक्थि बाहू च व्याख्या
तौ। तिस्रः पायौ। एका मेढ्रे
सेवन्यां चापरा द्वे वृषणयोः
स्फिचोः पंच पंच द्वे बस्ति
शिरसि पंचोदरे। नाभ्यामे
का पृष्ठोर्द्ध्वं संनिविष्टाः पंच
पंच दीर्घाः पार्श्वयोः। दश
वक्षसि। अक्षकांसौ प्रति सम
न्तात् सप्त द्वे हृदयामाशययोः
षट् यकृत्प्लीहोण्डुकेषु। ग्री
वायां चतस्रः। अष्टौ हन्वोः।
एकैका काकलकगलयोः द्वे
तालुनि। एका जिह्वायां। ओष्ठ
योर्द्वे घ्राणयोर्द्वे। द्वे नेत्रयोः
गंडयोश्चतस्रः। कर्णयोर्द्वे
चतस्रो ललाटे। एका शिर
सीत्येवमेतानि पंचपेशीशता
नि॥ सिरा स्नाय्वस्थि पर्वाणि
संधयश्च शरीरिणां। पेशीभिः
संवृतान्यत्र बलवंति भवंत्यतः॥
स्त्रीणां तु विंशतिरधिका दश
तासां स्तनयोरेकैकस्मिन्। पंच
पंच यौवने तासां परिवृद्धिः॥
अपत्यपथे चतस्रस्तासां प्रसृ
तेऽभ्यंतरतो द्वे मुखाश्रिते बा
ह्ये च प्रवृत्ते द्वे। गर्भच्छिद्रसं
श्रितास्तिस्रः। शुक्रार्त्तवप्रवे
शिन्यस्तिस्रः एव। पित्तपक्वाश
यमध्ये गर्भाशयो यत्र गर्भस्ति
ष्ठति। तासां बहल पेलव स्थूला
णुपृथुवृत्त ह्रस्व दीर्घ स्थिर मृदु
श्लक्ष्ण कर्कशभावाः संध्यस्थि
सिरास्नायुप्रच्छादका यथा देश
स्वभावत एव भवंति॥ भवति चा
त्र। पुंसां पेश्यः पुरस्ताद्याः प्रो
क्ता लक्षणमुष्कजाः। स्त्रीणा
मावृत्य तिष्ठंति फलमंतर्गतं हि
ताः॥ मर्मसिरा धमनी स्रोतसा
मन्यत्र प्रविभागः॥ शंखनाभ्या
कृतिर्योनिः त्र्यावर्त्ता सा प्रकी
र्त्तिता। तस्यास्तृतीये त्वावर्त्ते
गर्भशय्या प्रतिष्ठिता। यथारो
हितमत्स्यस्य मुखं भवति रू
पतः। तत्संस्थानां तथारूपां।


गर्भशय्यां विदुर्बुधाः। आभुग्नो
ऽभिमुखः शेते गर्भो गर्भाशये
स्त्रियाः। सयोनिं शिरसायाति
स्वभावात् प्रसवं प्रति॥ त्वक्प
र्यंतस्य देहस्य योऽयं मंगवि
निश्चयः शल्यज्ञानादृते नैष व
र्ण्यतेऽङ्गेषु केषुचित्॥ तस्मा
न्निःसंशयं ज्ञानं हर्त्रा शल्यस्य
वांछता। शोधयित्वा मृतं स
म्यक् द्रष्टव्यांगविनिश्चयः। प्र
त्यक्षतो हि यद्दृष्टं शास्त्रदृष्टं च
यद्भवेत्। समासतस्तदुभयं भू
यो ज्ञानविवर्द्धनं। तस्मात् स
मस्तगात्रमविषोपहतमदीर्घ
व्याधिपीडितमवर्षशतिकं निः
सृष्टांत्र पुरीषं पुरुषमवहंत्या
मापगायां निबद्धं पंजरस्थं मुंज
वल्कल कुश शणादीनामन्य
तमेनावेष्टितांगमप्रकाशे देशे
कोथयेत्। सम्यक्प्रकुथितं चो
द्धृत्य ततो देहं सप्तरात्रादुशी
रवालवेणु वल्कल कूर्चानाम
न्यतमेन शनैः शनैरवघर्षयं
स्त्वगादीन् सर्वानेव बाह्याभ्यंतरा
नंगप्रत्यंगविशेषान् यथोक्तान्
लक्षयेच्चक्षुषा। श्लोकौ चात्र भव
तः। न शक्यश्चक्षुषा द्रष्टुं देहे सूक्ष्मत
मो विभुः। दृश्यते ज्ञानचक्षुर्भि
स्तपश्चक्षुर्भिरेव च॥ शारीरे
चैव शास्त्रे च दृष्टार्थः स्याद्विशा
रदः। दृष्टश्रुताभ्यां संदेहम
वापोह्याचरेत्क्रियाः॥ षष्ठा
ध्यायः। अथातः प्रत्येकमर्म्म
निर्देशं शारीरं व्याख्यास्यामः
सप्तोत्तरं मर्म्मशतं। तानि म
र्म्माणि पंचात्मकानि। तद्य
था। मांसमर्म्माणि। शिरामर्म्मा
णि। स्नायुमर्म्माणि अस्थिमर्म्मा
णि संधिमर्म्माणि चेति। न ख
लु मांससिरास्नाय्वस्थिसंधि
व्यतिरेकेणान्यानि मर्म्माणि भ
वंति यस्मान्नोपलभ्यंते॥ तत्रैका
दश मांसमर्म्माणि। एकचत्वारिं
शत्सिरामर्म्माणि। सप्तविंशतिः
स्नायुमर्म्माणि। अष्टावस्थिमर्म्माणि
विंशतिः संधिमर्म्माणि। तदेतत्
सप्तोत्तरं मर्म्मशतं॥ तेषा
मेकादशैकस्मिन् सक्थ्नि भवं
ति। एतेनेतरसक्थि बाहू च
व्याख्यातौ। उदरोरसोर्द्वादश
चतुर्दश पृष्ठे। ग्रीवां प्रत्यूर्द्ध्वं
सप्तत्रिंशत्। तत्र सक्थिम
र्म्माणि क्षिप्रतलहृदय कूर्च्च कू
र्च्चशिरो गुल्फेंद्रबस्ति जान्वाण्युर्वीलो

हितान्यानि विटपंचेति। एतेने
तर सक्‌ सक्थि व्याख्यातं ॥
उदरोरसोस्तु। गुदवस्ति नाभि
हृदय स्तनमूल स्तन रोहिता
पलापास्त्यपस्तंभौ चेति। पृष्ठ
मर्म्माणि तु कटीक तरुण कु
दरनितंब पार्श्व संधि बृहत्यंस-
फलकान्यंसौ चेति। बाहु मर्म्मा
णि तु क्षिप्रतल हृदय कूर्च्च कू
र्च्चशिरोमणिबंधेन्द्रवस्ति कूर्पर
पृष्ठीलोहिताक्षाणि कक्षधरंचेति
एतेनेतरो बाहु र्व्याख्यातः। जत्रू
र्द्ध्वं मर्म्माणि। चतस्रो धमन्योऽष्टौ
मातृकाः द्वे कृकाटिके द्वे वि
धुरे। द्वौ फणौ। द्वावपांगौ।
द्वावावर्त्तौ द्वावुत्क्षेपौ। द्वौ शं
खावेका स्थपनी। पंचसीमं
ताः चत्वारि शृंगाटकान्येको
ऽधिपति रिति। तत्र तलहृ
दयेन्द्रवस्ति गुद स्तन रोहि
तानि मांसमर्म्माणि नील धम
नी मातृका शृंगाटकापांग स्थ
पनी फण स्तनमूलापलापापस्त
म्भ हृदय नाभि पार्श्व संधि बृह
ती लोहिताक्षोर्व्यः शिरामर्म्माणि
आणि विटप कक्षधर कूर्च्च कूर्च्च
शिरो वस्तिक्षिप्रांस विधुरोत्क्षे-

पाः स्नायु मर्म्माणि कटीकत
रुणानितम्बांस फलक शंखाल्य शि
मर्म्माणि। जानु कूर्पर सीमंता
धिपति गुल्फ मणिबंध कुकुं
दरावर्त्त कृकाटिका श्चेति संधि
मर्म्माणि। तान्येतानि पंच विक
ल्पानि मर्म्माणि भवंति तद्यथा स
द्यःप्राणहराणि। कालांतरप्राणह
राणि रुजाकराणीति। तत्र सद्यः
प्राणहराण्येकोनविंशतिः। काला
न्तरप्राणहराणि त्रयस्त्रिंशत्।
त्रीणि विशल्यघ्नानि। चतुश्चत्वा
रिंशद्वैकल्यकराणि अष्टौ रुजा
कराणीति ॥ भवंति चात्र ॥
शृंगाटकान्यधिपतिः शंखौ क
ण्ठशिरो गुदं। हृदयं वस्ति ना
भीच घ्नंति सद्यो हतानि तु ॥
वक्षोमर्म्माणि सीमंत तलक्षिप्रेंद्र
वस्तयः। कटीक तरुणे संधी
पार्श्वजौ बृहतीच या ॥ नितंबा
विति चैतानि कालांतरहराणि
तु। उत्क्षेपौ स्थपनी चैव विश
ल्यघ्नानि निर्दिशेत्। लोहिता
क्षाणि जान्वूर्वी कूर्च्चा विटप
कूर्पराः। कुकुन्दर कक्षधरे
विधुरे सकृकाटिके। अंसां
स फलकापांगा नीले मन्ये फ

णापांगौ तथा। वैकल्यकराण्याहु
रावर्त्तौ द्वौ तथैव च ॥ गुल्फौ द्वौ
मणिबंधौ द्वे द्वे कूर्च्चशिरांसि च। रुजा
कराणि जानीयादष्टौ वैता
नि बुद्धिमान् ॥ क्षिप्राणि वि
द्धमात्राणि घ्नन्ति कालांतरेण
च। मर्म्माणि नाम मांस शि
रा स्नाय्वस्थि संधिसन्निपाता
स्तेषु स्वभावत एव विशेषेण
प्राणास्तिष्ठंति। तस्मान्मर्म्म-
स्वभिहतास्तांस्तान् भावानाप
द्यंते। तत्र सद्यःप्राणहराण्या
ग्नेयान्याग्नि गुणेष्वाशुक्षीणेषु
ह्रापयंति। कालांतरप्राणहराणि
सौम्याग्नेयान्याग्निगुणेष्वाशुक्षीणे
षु क्रमेणच सोम गुणेषु काला
न्तरेण क्षपयंति। विशल्य प्राण
हराणि वायव्यानि शल्यमुख
निरुद्धो यावदंत र्वायुस्तिष्ठति
तावज्जीवत्युद्धृतमात्रे तु शल्ये
मर्म्मस्थानाश्रितो वायु र्निष्क्राम
ति तस्मात् सशल्यो जीवत्युद्धृत
शल्यो म्रियते। वैकल्यकराणि
सौम्यानि सोमो हि स्थिरत्वाच्छै
त्याच्च प्राणावलंबनं करोति।
रुजाकराण्याग्नेय वायु गुण भूयि
ष्ठानि विशेषतस्तु तौ रुजाकरौ।

पांचभौतिकीं च रुजामाहुरेके
केचिद् मांसादीनां पंचानां ८
मपि समस्तानां विद्धानां
त्वसमवायात् सद्यःप्राणहरा
णि। एकहीनानामल्पानां वा का
लांतर प्राणहराणि। द्विहीनानां
विशल्य प्राणहराणि। त्रिहीना
नां वैकल्यकराणि। एकस्मिन्ने
व रुजाकराणीति। यतश्चैव म
तोऽस्थि मर्म्मस्वप्यभिहतेषु शोणि
तागमनं भवति ॥ चतुर्विधा
यास्तु शिराः शरीरे प्रायेण
ता मर्म्मसु सन्निविष्टाः। स्नाय्व
स्थिमांसानि तथैव संधीन् संत
र्प्य देहं प्रतिपालयंति। ततः क्ष
ते मर्म्मणि ताः प्रवृद्धः समंततो
वायु रभिस्तृणोति विवर्द्धमानस्
स मातरिश्वा रुजः सुतीव्राः प्रत
नोति काये ॥ रुजाभिभूतन्तु
नः शरीरं प्रलीयते नश्यति
चास्य संज्ञा। अतो हि शल्यं
विनिर्हरेत मिच्छन् मर्म्माणि य
त्नेन परीक्ष्य कर्षेत्। एतेन शेषं
व्याख्यातं। तत्र सद्यःप्राणहर
मंते विद्धकालांतरेण मारयति
कालांतर प्राणहर मंते विद्धं वै
कल्य मापादयति विशल्य प्रा



णहर संते विद्धं कालांतरेण क्ले
शयति रुजांच करोति। रुजा
कर मतीत्रवदने भवति। तत्र
सद्यःप्राणहराणि सप्तरात्राभ्यंत
रान्मारयंति। कालांतरप्राणह
राणि पक्षान्मासाद्वा। तेष्वपि तु
क्षिप्राणि कदाचिदाशुमारयंति
विशल्यप्राणहराणि वैकल्यक
राणिच कदाचिदत्यभिहतानि
मारयंति॥ अत ऊर्द्धं प्रत्येक
शो मर्मस्थानान्यनुव्याख्यास्या
मः। तत्र पादांगुष्ठांगुल्यो र्मध्ये
क्षिप्रं नाम मर्म तत्र विद्धस्या
क्षेपकेण मरणं। मध्यमांगुली
मनुपूर्वेण मध्ये पादतलस्य त
लहृदयं नाम तत्रापि रुजाभि र्म
रणं। क्षिप्रस्योपरिष्टादुभयतः कू
र्चो नाम तत्र पादस्य भ्रमण वे
पने भवतः। गुल्फ संधे रध उभ
यतः कूर्चशिरो नाम तत्र रुजा
शोफौ। पाद जंघयोः संधाने
गुल्फो नाम तत्र रुज स्तब्धपा
दता खंजता वा पार्ष्णिं प्रति जंघा
मध्ये इंद्रवस्ति नाम तत्र शोणि
तक्षये मरणं। जंघोर्वोः संधाने
जानु नाम तत्र खंजता। जानु
न ऊर्द्धं मुभयत स्त्र्यंगुल माणि

नाम तत्र शोफाभिवृद्धिः स्तब्ध
सक्थिताच। ऊरुमध्ये ऊर्वी ना
म तत्र शोणितक्षयात् सक्थिशो
षः। ऊर्व्या ऊर्द्धं मधो वंक्षण संधे
रूरुमूले लोहिताक्षो नाम तत्रलो
हित क्षयेण पक्षाघातः। वंक्ष
ण वृषणयो रंतरे विटपं नाम
तत्र षाण्ड्य मल्प शुक्रता वा भ
वति। एवमेतान्येकादश सक्थिम
र्म्माणि व्याख्यातानि। एतेनेतर
सक्थि बाहू च व्याख्यातौ। वि
शेषतस्तु यानि सक्थ्नि गुल्फ
जानु विटपानि तानि बाहौ मणि
बंधकूर्पर कक्षधराणि। यथा वं
क्षण वृषणयो रंतरे विटप मेवं व
क्षःकक्षयो र्मध्ये कक्षधरं तस्मि
न्विद्धे तएवोपद्रवाः विशेषत
स्तु मणिबंधे कुंठता। कूर्पराख्ये
कुणिः। कक्षधरे कक्षघातः ए
वमेतानि चतुश्चत्वारिंशच्छा
खासमर्म्माणि व्याख्यातानि॥
अत ऊर्द्धं मुदरोरसो र्मर्मस्थाना
न्यनुव्याख्यास्यामः। तत्र वात वर्चो
निरसनं स्थूलांत्र प्रतिबद्धं गुदं ना
म मर्म तत्र सद्यो मरणं। अ
ल्पमांस शोणितो ऽभ्यंतरतः
कटी मूत्राशयो वस्ति नाम।

तत्रापि सद्योमरण मश्मरी व्र
णादृते। तत्राप्युभयतोभिन्ने नजी
वत्येकतो भिन्ने मूत्रस्रावी व्रणो
भवति। स तु यत्नेनोपक्रांतो रो
हति। पक्वामाशययो र्मध्ये सि
रा प्रभवा नाभि नाम तत्रापि
सद्य एव मरणं। स्तनयो र्मध्य म
धिष्ठायोरस्यामाशय द्वारं सत्व र
जस्तमसा मधिष्ठानं हृदयं नाम
तत्र सद्य एव मरणं। स्तनयोरध
स्तात् द्व्यंगुल मुभयत स्तनमू
ले नाम मर्म्मणी तत्र कफपूर्ण
कोष्ठतया कास श्वासाभ्यां म्रिय
ते। स्तनचूचुकयो रूर्द्धं द्व्यंगुल
मुभयतः स्तन रोहितो नाम तत्र
लोहितपूर्ण कोष्ठतया कासश्वा
साभ्यां च म्रियते। अंसकूटयो रध
स्तात्पार्श्वोपरिभागयो रपलापो
नाम तत्र रक्तेन पूयभावं गतेन
मरणं। उभयत्रोरसो नाड्यौ
वातवहे अपस्तंभौ नाम तत्र वा
तपूर्णकोष्ठतया कासश्वासाभ्या
ञ्च मरणं। एव मेतान्युदरोरसो
र्द्वादश मर्म्माणि व्याख्यातानि
अत ऊर्द्धं पृष्ठ मर्म्माण्यनुव्याख्या
स्यामः। तत्र पृष्ठवंश मुभयतः
प्रतिश्रोणी काण्ड मस्थीनि क

टीक तरुणे नाम मर्म्मणी तत्र
शोणित क्षयात् पाण्डु विवर्णो
हीनरूपश्च म्रियते। पार्श्व जघन
बहिर्भागे पृष्ठवंश मुभयतो ना
तिनिम्ने कुकुंदरे नाम मर्म्मणी
तत्र स्पर्शाज्ञान मधःकाये चेष्टो
पघातश्च। श्रोणीकाण्डयो रु
पर्य्याशयाच्छादनौ पार्श्वांतर
प्रतिबद्धौ नितंबौ नाम तत्राधः
कायशोषो दौर्बल्याच्च मरणं
अधः पार्श्वांतर प्रतिबद्धौ जघ
न पार्श्व मध्ययो स्तिर्यगूर्द्धंच
जघनात् पार्श्वसंधी नाम तत्र
लोहितपूर्ण कोष्ठतया म्रियते
स्तनमूलादुभयतः पृष्ठवंशस्य
बृहती नाम तत्र शोणितातिप्र
वृत्ति निमित्तै रुपद्रवै र्म्रियते
पृष्ठोपरि पृष्ठवंश मुभयतस्त्रि
कसंबद्धे अंस फलके नाम तत्र
बाह्वोः स्वापः शोषो वा। बाहु
मूर्द्ध ग्रीवा मध्ये ऽसपीठस्कंध
निबंधना वंसौ नाम तत्र स्तब्ध
बाहुता। एव मेतानि चतुर्दश
पृष्ठमर्म्माणि व्याख्यातानि। अ
तऊर्द्धं जत्रुगतानि व्याख्या
स्यामः। तत्र कंठ नाडी मुभयत
स्रतस्रो धमन्यो द्वे नीले द्वे च

सन्धेयस्तासेन तत्र सकलता स्व
रवैकृत रसग्राहिता च। ग्री
वाया उभयतः स्वतस्तः शिरामा
तृका स्तत्र सद्यो मरणं। शिरो
ग्रीवयोः संधाने कृकाटिके ना
म तत्र चलमूर्द्धता। कर्णपृष्ठतो
ऽधः संश्रिते विधुरे नाम तत्र
बाधिर्य्यं। घ्राणमार्गमुभय
तःस्रोतो मार्ग प्रतिबद्धे अभ्यंतरे
तः फणे नाम तत्र गन्धाज्ञानं
भ्रू पुच्छान्तयो रधो ऽक्ष्णो र्बाह्य
तो ऽपांगौ नाम तत्रान्ध्यं दृष्टु
पघातो वा। भ्रुवो रुपरि नि
म्नयो रावर्त्तौ नाम तत्राप्यंध्य
मुपघातश्च ॥ भ्रुवोः पुच्छांत
योरुपरि कर्ण ललाटयो र्म
ध्ये शंखौ नाम तत्र सद्यो मरणं
शंखयो रुपरि केशांत उत्क्षेपौ
नाम तत्र सशल्यो जीवतिपा
कात् पतितशल्यो वा नोद्धृत
शल्यः भ्रुवो र्मध्ये स्थपनीना
म तत्रोत्क्षेपवत्। पंच सन्ध
यः शिरसि विभक्ताः सीमंता
नाम तत्रोन्माद भय चित्त नाशै
र्मरणं। घ्राण श्रोत्राक्षिजिह्वा
संतर्पणीनां सिराणां मध्ये सि
रासन्निपातः शृंगाटकानि तानि च

त्वारि चर्म्माणि तत्रापि सद्योम
रणं। मस्तकाभ्यंतरोपरिष्टात्
सिरासंधि सन्निपातो रोमावर्त्तो
ऽधिपति स्तत्रापि सद्योमरणं॥
एव मेतानि सप्तत्रिंशदूर्द्धजत्रुग
तानि मर्म्माणि व्याख्यातानि॥
भवंति चात्र। ऊर्व्यः शिरांसि वि
टपेच सकक्षपार्श्वे एकैक मं
गुलमितं स्तन एवमूले। विद्यादं
गुलद्वय मितं मणिबंध गुल्फ
त्रीण्येव जानु सपरं सह कूर्पराभ्यां
हृद्वस्ति कूर्च गुद नाभि वदंति
मूर्द्धि चत्वारि पंचच गले दशया
निचद्वे। तानि स्वपाणितल
कुंचितसंमितानि शेषाण्यवेहि
परिविस्तरतो ऽङ्गुलार्द्धं। एतत्प्र
माण मभिवीक्ष्य वदंति तज्ज्ञाः
शस्त्रेण कर्म्मकरणं परिहृत्य
मर्म्म पार्श्वाभिघातितं मपीह
निहंतिमर्म्म तस्माद्धि मर्म्म सद
ने परिवर्जनीयं। छिन्नेषु पाणि
चरणेषु सिरा नराणां संकोचमी
युरस्रूगल्पमतो निरेति प्राप्य
क्षितव्यसनमुग्र मतो मनुष्याः
संछिन्नशाख तरुवन्निधनं नयां
ति शिरेषु तत्र सतलेषु हतेषु र
क्तमत्यर्थमेति पवनश्च रुजं क

रोति। एवं विनाश मुपयाति हि
तत्र विद्धा वृत्ता इवायुध विद्याने
निकृंतमूलाः॥ तस्मात्तयो रभि
हतस्य तु पाणि पादे छेत्तव्य
मासु मणिबंधन गुल्फदेशे। मर्म्मा
णि शल्य विषयार्द्ध मुदाहरंति य
स्माच्च मर्म्मसु हतान भवंति सद्यः
जीवंति तत्र यदि वैद्य गुणेन के
चित् ते प्राप्नुवंति विकलत्व मसं
शयं हि। संभिन्न जर्ज्जरित कोष्ट
शिरःकपाला जीवंति शस्त्र वि
हतैश्च शरीरदेशैः॥ छिन्नैश्च स
क्थि भुजपाद करै रशेषैर्येषां
न मर्म्मपतिता विविधाः प्रहा
राः। सोम मारुत तेजांसि रजः
सत्व तमांसिच। मर्म्मसु प्राय
शः पुंसां भूतात्मा चावतिष्टते।
मर्म्मस्वभिहता स्तस्मान्नजीवंति
शरीरिणः। इंद्रियार्थेष्व संप्रा
प्तिर्मनो बुद्धि विपर्य्ययः। रुज
श्च विविधा स्तीव्रा भवंत्याशु ह
रे हते। हते कालांतरघ्ने तु ध्रु
वो धातुक्षयो न्दणां। ततो धा
तु क्षयाज्जंतु र्वेदनाभिश्च नश्य
ति। हते वैकल्य जनने केवलं
वैद्य नैपुनात् ॥ शरीरंक्रिय
या युक्तं विकलत्व मवाप्नु

यात्। विशल्यघ्नेषु विज्ञेयं ए
तदेव पंचकारणं। रुजाकराणि
मर्म्माणि ह्यतानि विविधा रुजः
कुर्व्वत्यंते च वैकल्यं कुवैद्य वश
गो यदि। छेद भेदाभिघातेभ्यो
दहनाद्दारणादपि। उपघातं
विजानीयान्मर्म्मणां तुल्य लक्ष
णं। मर्म्माभिघातस्तु न कश्चिद
स्ति यो ऽल्पात्ययो वापि निरत्य
यो वा। प्रायेण मर्म्मस्वभिताडि
तास्तु वैकल्य मृच्छंत्यथ वा म्रि
यंते। मर्म्मान्यधिष्ठाय हि ये वि
कारा मूर्छंति काये विविधा न
राणां प्रायेणते कृच्छ्रतमा भ
वंति नरस्य यत्नैरपि साध्यमा
नाः॥ सप्तमोऽध्यायः। अथातः सि
रावर्णन विभक्तिनाम शारीरं व्या
ख्यास्यामः। सप्तसिराशतानि भ
वंति। याभि रिदं शरीर माराम
इव जलहारिणीभिः केदार इ
वच कुल्याभि रुपस्निह्यतेऽनु
गृह्यते चाकुंचन प्रसारणादि
भिर्विशेषैः। द्रुमपत्र सेवनीना
मिवच तासां प्रतानाः तासां ना
भिर्मूलं ततश्च प्रसरंत्यूर्द्ध मध
स्तिर्यक्च॥ भवंतश्चात्र याव
त्यस्तु सिराः काये संभवंति प्रा

रीरिणां। नाभ्यां सर्वा निबद्धाः
स्ता प्रतन्वंति समंततः। नाभि
स्थाः प्राणिनां प्राणाः प्राणा
न्नाभिर्व्युपाश्रिता सिराभिरवृ
ता नाभिश्चक्रनाभिरिवारकैः
तासां मूलसिराश्चत्वारिंशत्
तासां वातवाहिन्यो दश। पित्त
वाहिन्यो दश। कफवाहिन्यो
दश रक्तवाहिन्यः। तासां तु वात
वाहिनीनां वातस्थानगतानां पं
चसप्ततिशतं भवति तावत्य ए
व पित्तवाहिन्यः। पित्तस्थाने कफ
वाहिन्यश्च। कफस्थाने रक्तवाहि
न्यश्च। यकृत्प्लीह्नोरेवमेता
नि सप्त सिराशतानि। तत्र वात
वाहिन्यः सिरा एकस्मिन् सक्थ्नि
पंचविंशतिः। एतेनेतरसक्थि
बाहू च व्याख्यातौ। विशेषतस्तु
कोष्ठे चतुस्त्रिंशत्तासां गुदमेढ्रा
श्रिताः। श्रोण्यामष्टौ। द्वे द्वे पा
र्श्वयोः षट् पृष्ठे। तावत्य एवचो
दरे। दश वक्षसि। एकचत्वा
रिंशज्जत्रुण ऊर्द्ध्वं। तासां चतु
र्दश ग्रीवायां। कर्णयोश्चतस्रः
नव जिह्वायां। षट् नासिकायां।
अष्टौ नेत्रयोः। एवमेतत्पंचस
प्ततिशतं वातवहानां।

सिराणां व्याख्यातं। एष एव वि
भागः शेषाणामपि। विशेषत
स्तु पित्तवाहिन्यो नेत्रयोर्दश।
कर्णयोर्द्वे। एवं रक्तवहा कफ
वहाश्च। एवमेतानि सप्त सिरा
शतानि सविभागानि व्याख्याता
नि॥ भवंति चात्र। क्रियाणाम
प्रतीघातममोहं बुद्धिकर्मणां॥
करोत्यन्यान् गुणांश्चापि स्वाः
सिराः पवनश्चरन्॥ यदा तु कु
पितो वायुः स्वाः सिराः प्रतिपद्य
ते। तदास्य विविधारोगा जायंते
वातसंभवाः॥ भ्राजिष्णुतामन्न
रुचिमग्निदीप्तिमरोगतां॥
संसर्पत् स्वाः सिराः पित्तं कुर्या
च्चान्यान् गुणानपि॥ यदा प्रकु
पितं पित्तं सेवते स्ववहाः सिराः
तदास्य विविधा रोगा जायंते
पित्तसंभवाः॥ स्नेहमंगेषु संधी
नां स्थैर्यं बलमुदीर्णतां। क
रोत्यन्यान् गुणांश्चापि बलासः
स्वाः सिराश्चरन्। यदा तु कुपि
तः श्लेष्मा स्वाः सिराः प्रतिपद्य
ते। तदास्य विविधा रोगा जा
यंते श्लेष्मसंभवाः॥ धातूनां
पूरणं वर्णस्पर्शज्ञानमसंशयं।
स्वाः सिराः संचरद्रक्तं कुर्याच्चा

न्यान्गुणानपि॥ यदा तु कुपितं
रक्तं सेवते स्ववहाः सिराः। त
दास्य विविधारोगा जायंते रक्त
संभवाः॥ नहि वातं सिराः का
श्चिन्न पित्तं केवलं तथा श्लेष्मा
णं वा वहंत्येता अतः सर्ववहाः
स्मृताः। प्रदुष्टानां हि दोषाणामु
च्छ्रितानां प्रधावतां। ध्रुवमुन्मा
र्गगमनमतः सर्ववहाः स्मृताः
तत्रारुणा वातवहाः पूर्यंते वा
युना सिराः। पित्तादुष्णाश्च नी
लाश्च शीता गौर्यः स्थिराः क
फात्। असृग्वहास्तु रोहिण्यः
सिरा नात्युष्णशीतलाः॥
अत ऊर्द्ध्वं प्रवक्ष्यामि न विद्धव्याः
सिरा भिषक्॥ वैकल्यं मरणं
श्चापि व्यधात्तासां ध्रुवं भवेत्।
सिराशतानि चत्वारि विद्याच्छा
खासु बुद्धिमान्॥ षट्त्रिंशच्च
शतं कोष्ठे चतुःषष्टिश्च मूर्द्ध
नि। शाखासु षोडश सिराः
कोष्ठे द्वात्रिंशदेव तु॥ पञ्चाश
ज्जत्रुण ऊर्द्ध्वं मवेध्याः परिकी
र्तिताः। तत्र सिराशतमेकैक
स्मिन् सक्थ्नि भवति तासां जा
लधरा त्वेका तिस्रश्चाभ्यंतराः त
ऊर्वीः संज्ञे द्वे लोहिताक्ष

संज्ञा चैकेत्यवेध्याः॥ एते
नेतरसक्थि बाहू च व्याख्याता
वेवमशस्त्रकृत्याः षोडशशाखा
सु। द्वात्रिंशत् श्रोण्यां तासाम
ष्टावशस्त्रकृत्याः द्वे द्वे विटप
योः कटीकतरुणयोश्च। अष्टा
वष्टावेकैकस्मिन् पार्श्वे तासा
मेकैका मूर्द्ध्वगां परिहरेत्। पा
र्श्वसंधिगते च द्वे। चतस्रो विं
शतिश्च पृष्ठवंशमुभयतस्ता
सामूर्द्ध्वगामिन्यो द्वे द्वे परिहरेद्बृ
हती सिरे। तावत्य एवोदरे ता
सां मेढ्रोपरि रोमराजीमुभय
तो द्वे द्वे परिहरेत्। चत्वारिं
शद्वक्षसि तासां चतुर्दश शास्त्र
कृत्या हृदये द्वे द्वे द्वे स्तनमूले
स्तनरोहितापलापस्तंभेषूभयतो
ऽष्टौ। एवं द्वात्रिंशदशस्त्रकृत्याः
पृष्ठोदरोरःसु भवंति। चतुःष
ष्टिं सिराशतं जत्रुण ऊर्द्ध्वं भ
वति॥ तत्र षट्पंचाशच्छिरो
धरायां तासामष्टौ चतस्रश्च
मर्म्मसंज्ञाः परिहरेत्। द्वे कृका
टिकयोः द्वे विधुरयोः॥ एवं
ग्रीवायां षोडशावेध्याः॥ ह
न्वोरुभयतोऽष्टावष्टौ तासान्तु
॥ संधिधमन्यौ द्वे द्वे परिहरेत्॥



षट्त्रिंशज्जिह्वायां तासा मधः
षोडशाशस्त्रकृत्याः रसवहे द्वे
वाग्वहे च द्वे। द्विर्द्वादश नासा
यां तासा मौपनासिक्य श्चतस्रः
परिहरेत्। तासामेव च तालुन्ये
कां मृदावुद्देशे। अष्टात्रिंशदुभ
यो र्नेत्रयो स्तासा मेकैका म
पांगयोः परिहरेत्। कर्णयो
र्दश तासां शब्दवाहिनीनामेकै
कां परिहरेत्। नासा नेत्रगता
स्तु ललाटे षष्टि स्तासां केशान्ता
नुगता श्चतस्रः। आवर्त्तयो रे
कैका स्थपन्या श्चैका परिहर्त्त
व्या। शंखयो र्दश तासां शं
खसंधिगता मेकैकां परिहरे
त्। द्वादश मूर्द्ध्नि तासा मुत्क्षे
पयो र्द्वे परिहरेत्। सीमंतेष्वेकै
कां मेकामधिपताविति। एव
मशस्त्रकृत्याः पंचाशज्जत्रुण ऊ
र्द्ध्वमिति। भवति चात्र। व्याप्नुवं
त्यभितो देहं नाभितः प्रसृताः
सिराः। प्रतानाः पद्मिनीकन्दा
द्बिसादीनां यथा जले॥
अष्टमो ऽध्यायः। अथातः सिरा
व्यधविधि शारीरं व्याख्यास्यामः
बाल स्थविर रूक्ष क्षत क्षीण
भीरु परिश्रान्त स्त्री मद्या
ध्वकर्षित मद्य वान्त विरिक्तास्था
पितानुवासित जागरित क्लीव
कृशगर्भिणीनां कास श्वासशो
षप्रवृद्धज्वराक्षेपक पक्षाघातो
पवास पिपासा मूर्छा प्रपीडि
तानाञ्च सिरां न विध्येत्। या
श्चाव्यध्या व्यध्याश्चादृष्टा दृष्टा
श्चायंत्रिताश्चानुत्थिता इति॥
शोणितावसेक साध्याश्च विका
राः प्रागभिहिता स्तेषु चापक्वेष
न्येषु चानुक्तेषु यथाभ्यासं यथा
न्यायञ्च सिरां विध्येत् प्रतिषि
द्धाना मपि च विषोपसर्गे आत्य
यिकेषु सिराव्यधन मप्रतिषिद्धं
तत्र स्निग्ध स्विन्न मातुरं यथा
दोष प्रत्यनीक द्रवप्राय मन्नं भु
क्तवंतं यवागूं पीतवंतं वा यथा
काल मुपस्थाप्यासीनं स्थितं वा
प्राणानबाधमानो वस्त्रपट्ट च
र्मान्तर्वल्कल लतानां मन्य त
मेन यंत्रयित्वा नातिगाढं ना
तिशिथिले शरीर प्रदेशे मासा
द्य यथोक्तं शस्त्रं गृहीत्वा सिरां
विध्येत्॥ नैवाति शीते नात्यु
ष्णे न प्रवाते न चाभ्रिते। सिरा
णां व्यधनं कार्य्य मरोगे वा क
दाचन॥ तत्र व्याध्यसिरं पुरुषं

प्रत्यादित्यमुख मरत्निमात्रोच्छ्रि
ते उपवेश्यासने सक्थ्नो राकु
ञ्चितयो र्निवेश्य कूर्परसंधिद्वय
स्योपरि हस्तावंतर्गूढांगुष्ठ कृतमु
ष्टी मन्ययोः स्थापयित्वा यंत्रणशा
टकं ग्रीवा मुष्ट्यो रुपरि परिक्षि
प्यान्येन पुरुषेण पश्चात् स्थिते
न वामहस्तेनोत्तानेन शाटका
न्तद्वये ग्राहयित्वा ततो वैद्यो
ब्रूयाद्दक्षिणहस्तेन सिरोत्थाप
नार्थं नात्यायत शिथिलं यंत्रमा
वेष्टयस्वैकं स्रावणार्थं यंत्रेष्ट
हमध्ये च पीडयेदिति कर्म्म पुरु
षञ्च वायुपूर्णमुखं स्थापयेदे
ष उत्तमांगगतानामंतर्मुख व
र्ज्जानां सिराणां व्यधने यंत्रण
विधिः। तत्र पादव्यध्यसिरस्य पादं
समे स्थाने सुस्थिरं स्थापयित्वा
न्यपादं मीषत् संकुचितमुच्चैः
कृत्वा व्यध्यपादं जानुसंधेरधः
शाटकेनावेष्ट्य हस्ताभ्यां प्रपीड्य
गुल्फः व्यधप्रदेशस्योपरि चतु
रंगुले प्लोतादीना मन्यतमेन ब
द्ध्वा पादसिरां विध्येत्। अथाप
विष्टाहस्तौ गूढांगुष्ठ कृतमुष्टी
समागासने स्थापयित्वा सुखो
पविष्टस्य एवं वयं वद्धा ह.
स्तासिरा विध्येत्। गृध्रसी वि
श्वाच्योः संकुचितजानु कूर्परस्या
त्। श्रोणी पृष्ठ स्कंधेषून्नामि
तपृष्ठस्यावाक् शिरस्कस्योपवि
ष्टस्य विस्फूर्जितपृष्ठस्य विध्येत्
उदरोरसोः प्रसारितोरस्कस्योन्न
मितशिरस्कस्य विस्फूर्जितदेह
स्य बाहुभ्या मवलंबमानदेह
स्य पार्श्वयोः। अवनामितमे
ढ्रस्य मेढ्रे। उन्नामित विद
ष्टजिह्वाग्रस्याधो जिह्वायां।
अतिव्यात्ताननस्य तालुनि दंत
मूलेषु च। एवं यंत्रोपायानन्यां
श्च सिरोत्थापन हेतून् बुद्ध्या
वेक्ष्य शरीरवशेन व्याधिवशे
न च विदध्यात्। मांसलेष्ववका
शेषु यवमात्रं शस्त्रं निदध्या
त्तो ऽन्येष्वर्द्धयवमात्रं व्रीहिमा
त्रं वा व्रीहिमुखेन अस्थ्नामुप
रि कुठारिकया विध्येदर्द्धयव
मात्रं॥ भवति चात्र। व्यभ्रेवर्षा
सु विध्येत ग्रीष्मकाले तु शीत
ले। हेमंतकाले मध्याह्ने शस्त्र
कालास्त्रयः स्मृताः॥ सम्यक्
शस्त्र निपातेन धारया यास्र
वेदसृक्। मुहूर्त्तं रुद्ध्वा तिष्ठेच्च सु
विद्धां तां विनिर्दिशेत्। यथा कु

सूक्ष्म पुच्छेभ्यः एवं स्रवति पी
तिका। तथा सिरास्तु विद्धास्तु
तुष्टमध्ये प्रवर्त्तते। मूर्छितस्या
तिभीतस्य श्रान्तस्य तृषितस्य च
न वहंति सिरा विद्धा स्तथानु-
त्थित यंत्रिताः। क्षीणस्य बहुदो
षस्य मूर्च्छया विहुतस्य च भूयोः
पराह्ने विस्राव्या सापरेद्यु स्त्र्य
हेऽपि वा। एवं सशेष दोषन्तु
कुर्यात्सृपि विचक्षणः। न चा
तिप्रस्रुते कुर्याच्छेषं संशमनैः
र्जयेत्। बलिनो बहुदोषस्य वय
स्थस्य शरीरिणः। परं प्रमाण
मिच्छंति प्रस्थं शोणित मोक्ष
णे। तत्र पाददाह पाददाह पा
दहर्षावबाहुक चिप्प विसर्प वा
तशोणित वातकण्टक विचर्चि
का पाददारी प्रभृतिषु क्षिप्रमर्म
ण उपरि द्व्यंगुले व्रीहिमुखेन
सिरां विध्येत्। श्लीपदे तच्चिकित्
सिते यथा वक्ष्यते। क्रोष्टुकशिरः
खंज पंगुल वातवेदनासु जंघायां
गुल्फस्योपरि चतुरंगुले। अपचा
चिंद्रवस्ते रधस्तात् द्व्यंगुले। जा
नुसंधे रुपर्यधो वा चतुरंगुले
गृध्रस्यां ऊरुमूल संश्रितां गल
गंडे। एते नेतर सक्थि बाहुच

व्याख्यातो॥ विशेषतस्तु वाम
बाहौ कूर्परसंधे रभ्यंतरतो बाहु
मध्ये प्लीह्नि कनिष्ठिकानामिक
यो र्मध्ये वा। एवं दक्षिणबाहौ
यकृद्दाल्ये कफोदरे चैतामेव
च कास श्वासयो रप्यादिशं
ति। गृध्रस्या मिव विश्वाच्यां।
श्रोणिप्रति समंतात् द्व्यंगुले प्र
वाहिकायां शूलिन्यां परिक
र्त्तिकोपदंश शूकदोष शुक्रव्या
पन्न मेढ्रमध्ये। वृषणयोः पा
र्श्वमूल हृद्यां। नाभेरधस्तु चतुरंगु
ले सेवन्या वामपार्श्वे दकोदरे
वामपार्श्वे कक्षा स्तनयोरंतरे
अन्तर्विद्रधौ पार्श्वशूले च। बा
हु शोषावबाहुकयो रप्येके
वदंत्यंसयो रंतरे। त्रिकसंधि
मध्यगतां तृतीयके चतुर्थके
प संधिगतां मन्यतर पार्श्वसं
स्थितामवतृष्टके। हनुसंधि म
ध्यगतां अपस्मारे। शंख केशा
त संधिगतां उरोऽपांगे ललाटे
वोन्मादेऽपस्मारे च जिह्वारोगे
ष्वधोजिह्विकायां दंतव्याधिषु च
तालुनि तालव्येषु। कर्णयो रु
परि समंतात् कर्णशूले तद्रोगे
षु च। गंधाग्रहणे नासा ॥

रोगेषु च नासाग्रे तिमिराक्षि
पाक प्रभृतिष्वक्षिरोगेषूपनासिके
ललाटस्था मपांगया ह्यैता प्रवाशि
रोरोगाधिमंथ प्रभृतिषु रोगेषु
ति॥ अतऊर्द्ध्वं दुष्टव्यधन मनुव्या
ख्यास्यामः। तत्र दुर्विद्धातिवि
द्धा कुंचिता पिच्चिता कुट्टि
ताप्रस्रुता अत्युदीर्णा अंतेः
भिहता परिशुष्का कूणिता वे
पिताऽनुत्थित विद्धा शस्त्रहता
तिर्य्यग्विद्धा अविद्धा अव्याध्याविद्ध
ता धेनुका पुनःपुनर्विद्धा सिरास्ना
युस्थिसंधि मर्म्मसु चेति विंशति
र्दुष्टव्यधाः। तत्र या सूक्ष्म शस्त्र वि
द्धानव्यक्त मसृक् स्रवति रुजा
शोफवती च सा दुर्विद्धा। प्रमाणा
तिरिक्त विद्धाया मंतः प्रविशति
शोणितं शोणितातिप्रवृत्ति र्वा
सातिविद्धा। कुंचिताया मप्येवं।
कुंठशस्त्रप्रमथिता पृथुलीभाव
मापन्ना पिच्चिता। अनासादिता
पुनःपुनर्व्यधनयोश्च बहुशः शस्त्रा
भिहता कुट्टिता। शीतभयमूर्च्छा
भिरप्रवृत्त शोणिता अप्रस्रुता। ती
क्ष्णा महामुख शस्त्र विद्धा अत्युदी
र्णा। अल्परक्तस्राविण्यन्ते विद्धा अंते
भिहता। क्षीण शोणितस्यानिल

पूर्णा परिशुष्का। चतुर्भागाव
सादिता किंचित्प्रवृत्त शोणिता
कूणिता। दुःस्थान बंधनाद्वेप
मानायाः शोणित संमोहो भव
ति सा वेपिता। अनुत्थितविद्धा
यामप्येवं। छिन्नातिप्रवृत्त शोणि
ता क्रियासंगकरी शस्त्रहता। ति
र्यक् प्रणिहितशस्त्रा किंचिच्छे
षा तिर्यक् विद्धा। बहुशः क्षता
हीनशस्त्रप्रणिधानेनाविद्धा।
अशास्त्रकृत्याप्यव्याध्या। अनव
स्थितविद्धा विद्रुता प्रदेशस्य बहु
शोऽवपीडनाद्रोहत्यथा मुहुर्मुहुः
शोणितस्रावा धेनुका। सूक्ष्मशस्त्र
व्यधनादत्कृशा विच्छिन्ना पुनःपुनः
र्विद्धा। स्नाय्वस्थि सिरा संधि मर्म
सु विद्धा वा रुजां शोषं वैकल्य म
रणं वापादयति॥ भवंति चात्र।
सिरासु शिक्षितो नास्ति चलाह्ये
ताः स्वभावतः। मत्स्यवत्परिव
र्त्तंते तस्माद्यत्नेन ताडयेत्॥
अजानता गृहीते तु शस्त्रे काय
निपातिते। भवंति व्यापदश्चैता
बहवश्चाप्युपद्रवाः॥ स्नेहादिभिः
क्रियायोगै र्न तथा लेपनैरपि
यात्याशु व्याधयः शांतिं यथा
सम्यक् सिराव्यधात्॥ सिरा

य श्चिकित्सार्द्धं शल्यतंत्रे प्र
कीर्त्तितः ॥ यथा प्रणिहितः
सम्यक् वस्तिः कायचिकित्सिते
तत्र स्निग्ध स्विन्न वांत विरिक्ता
स्थापितानुवासित सिराविद्धैःप
रिहर्त्तव्यानि । क्रोधायास मैथुन
दिवास्वप्न वाग्व्यायाम यानाध्या
नासनचंक्रमणशीतवातातप
विरुद्धासात्म्याजीर्णान्यावललाभ
भात्मासं मेके मन्यंते ॥ एतेषां
विस्तर मुपरिष्टाद्वक्ष्यामः । भव
तश्चात्र सिराविषाणं तुम्बैस्तुज
लौकाभिः पदै स्तथा । अवगा
ढं यथा पूर्वं निर्हरेद्दुष्ट शोणि
तं । अवगाढे जलौका स्यात्प्र
च्छन्नं पिंडिते हितं । सिरांगव्या
पके रक्ते श्रृंगालाबु त्वचिस्थि
ते ॥ नवमोध्यायः ॥ अथातो
धमनीव्याकरणं शारीरं व्या॰
ख्यास्यामः । चतुर्विंशति धम
न्यो नाभिप्रभवा अभिहिताः
तत्र केचिदाहुः सिरा धमनी
स्रोतसा मविभागः सिरा विका
रा एव धमन्यः स्रोतांसि चेति
तत्तु न सम्यक् । अन्या एव हि
धमन्यः स्रोतांसिचसिराभ्यः क
स्माद्व्यंजनान्यत्वान्मूल सन्नियमा

त्कर्म्मवैशेष्यादागमाच्च केवलंतु
परस्पर सन्निकर्षात् सदृशागम
कर्म्मत्वात् सौक्ष्म्याच्च विभक्तक
र्म्मणा मप्यविभाग इव कर्म्मसु
भवति । तासांतु नाभि प्रभवाणां
धमनीनां मूर्द्धगा दश दश चा
धोगामिन्य श्चतस्र स्तिर्य्यग्गाः
ऊर्द्धगाः शब्द स्पर्श रूप रस गंध
प्रश्वासोच्छ्वास जृंभित क्षुद्धसित
कथित रुदितादीन्विशेषानभि
वहंत्यः शरीरं धारयंति । तास्तु
हृदय मभिप्रपन्ना स्त्रिधा जायंतेता
स्त्रिंशत् । तासांतु वात पित्तक
फ शोणित रसान् द्वे द्वे वहत
स्ता दश शब्द रूप रस गंधानष्टा
भि र्गृहीते । द्वाभ्यां भाषतेचद्वा
भ्यांघोषं करोति द्वाभ्यांस्वपिति
द्वाभ्यां प्रतिबुध्यते ॥ द्वे चा
श्रु वाहिन्यौ । द्वे स्तन्यंस्त्रिया
वहतः स्तन संश्रिते तएव शु
क्रं नरस्य स्तनाभ्या मभिव
हतः । ता स्त्वेता स्त्रिंशत् सवि
भागा व्याख्याताः । एताभि रू
र्द्धं नाभे रुदर पार्श्व पृष्ठोरः स्कं
धग्रीवा बाहवो धार्य्यन्ते याप्य
तेच ॥ भवति चात्र ऊर्द्धं गतास्तु
कुर्वंति कर्म्माण्येतानि सर्वशः

अधोगमास्तुवक्ष्यामिकर्म्मतासां
यथायथं । अधोगमास्तु वात
मूत्र पुरीष शुक्रार्त्तवादीन्यधोव
हंति । तास्तु पित्ताशय मभिप्र
तिपन्ना स्तत्रस्थ मेवान्नपानरसं
विपक्व मौष्म्याद्विवेचयंत्यो ऽभि
वहंत्यः शरीरं तर्पयंत्यर्पयंतिचो
र्द्धगतानां तिर्य्यग्गतानां रसस्था
नञ्चाभिपूरयंति मूत्र पुरीषस्वे
दांश्च विवेचयंत्यामपक्वाशयां
तरेच त्रिधा जायंतेतास्त्रिंशत्
तासांतु वात पित्त कफशो
णित रसान् द्वे द्वे वहतःतादश
श द्वे अन्नवाहिन्यावन्त्राश्रिते
तोयवहे द्वे मूत्रवस्ति मभिप्र
पन्ने मूत्रवहे द्वे शुक्रवहे द्वे शु
क्रप्रादुर्भावाय द्वे विसर्गाय तेए
वरक्त मभिवहतो नारीणामार्त्त
वसंज्ञं । द्वे वर्च्चो निरसन्यौ स्थूला
न्त्र प्रतिबद्धे । अष्टावन्या स्तिर्य्य
ग्गानां धमनीनां स्वेद मर्पयंति
ता स्त्वेता स्त्रिंशत् सविभागाव्या
ख्याताः । एताभिरधोनाभेः प
क्वाशय कटी मूत्र पुरीष गुद
वस्तिमेढ्र सक्थीनि धार्य्यंते या
प्यंतेच ॥ भवतिचात्र । अधोगमा
स्तु कुर्वंति कर्म्माण्येतानि सर्वशः

तिर्य्यग्गाः संप्रवक्ष्यामि कर्म्मता
सां यथायथं ॥ तिर्य्यग्गानान्तु
चतसृणां धमनीनां मेकैका श
तधा सहस्रधा चोत्तरोत्तरं विभ
ज्यंते तास्त्वसंख्येया स्ताभि रिदं
शरीरं गवाक्षितं विवद्धं मात
तञ्च । तासां मुखानि रोमकूप
प्रतिबद्धानि यैः स्वेद मभिव
हंतिरसंचापि संतर्पयंत्यंतर्वहि
श्चतैरेवचाभ्यंग परिषेकावगा
हालेपन वीर्याण्यंतः शरीर म
भिपद्यंते त्वचि विपक्वानि । तै
रेवचस्पर्शसुखंवा गृह्णाति । ता
स्त्वेता श्चतस्रो धमन्यः सर्वांग
ताः सविभागा व्याख्याताः । भ
वंतश्चात्र । यथा स्वभावतः खा
नि मृणालेषु विसेषु च । धमनी
नां तथा खानि रसो यैरुपचीय
ते । पंचाभिभूतास्त्वथ पंचकृ
त्वः पंचेंद्रियं पंचसुभावयंति ।
पंचेंद्रियं पंचसु भावयित्वा पंच
त्वमायांति विनाशकाले ॥ अत
ऊर्द्धं स्रोतसां मूलविद्धलक्षण
मुपदेक्ष्यामः । तानितु प्राणान्न
उदक रस रक्त मांस मेदो मूत्र
पुरीष शुक्रार्त्तव वहानि येषु
विकार एकेषां बहूनि । एतेषां



विशेषावहवः॥ तत्र प्राणवहे
द्वे तयोर्मूलं हृदयं रसवाहि
न्यश्च धमन्यः। तत्र विद्धस्य क्रो
शनविनमन मोहन भ्रमण वे
पनानि मरणं वा भवति अन्नवहे
द्वे तयोर्मूलं मामाशयो अन्नवा
हिन्यश्च धमन्यः तत्र विद्धस्या
ध्मानं शूलान्नद्वेषो छर्दिः पिपा
सान्ध्यं मरणं वा उदकवहे द्वे तयो
र्मूलं तालु क्लोम च। तत्र विद्ध
स्य पिपासा सद्यो मरणञ्च। रस
वहे द्वे तयोर्मूलं हृदयं रसवा
हिन्यश्च धमन्यः तत्र विद्धस्य
शोषः प्राणवह विद्धवच्च मरणं
तल्लिंगानि च। रक्तवहे द्वे तयो
र्मूलं यकृत् प्लीहानौ रक्तवाहि
न्यश्च धमन्यः तत्र विद्धस्य श्यावां
गता ज्वरो दाहः पाण्डुता शोणि
तागमनं रक्तनेत्रता चेति।
मांसवहे द्वे तयोर्मूलं स्नायुत्व
चं रक्तवहाश्च धमन्यः तत्र वि
द्धस्य स्वयथुर्मांसशोषः सिरा
ग्रन्थयो मरणं। मेदोवहे द्वे तयो
र्मूलं कटी वृक्कौ च तत्र विद्धस्य
स्वेदागमनं स्निग्धाङ्गता तालु
शोषः स्थूलशोफता पिपासा च
मूत्रवहे द्वे तयोर्मूलं वस्ति मेढ्रं च

तत्र विद्धस्यानद्ध वस्तिता मूत्र
रोधः स्तब्धमेढ्रता च। पुरीषव
हे द्वे तयोर्मूलं पक्वाशयो गु
दं च तत्र विद्धस्यानाहो दुर्गंधता
ग्रथितान्त्रता च। शुक्रवहे द्वे त
योर्मूलं स्तनौ वृषणौ च तत्र
विद्धस्य क्लीवता चिरात् प्रसे
कोरक्त शुक्रता च। आर्तववहे
द्वे तयोर्मूलं गर्भाशयः आर्तव
वाहिन्यश्च धमन्यः तत्र विद्धाया
वंध्यात्वं मैथुनासहिष्णुत्वमार्त
वनाशश्च। सेवनी छेदाद्रुजा प्रा
दुर्भावः। वस्ति गुद विद्ध लक्ष
णं प्रागुक्तमिति। स्रोतो विद्धं
तु प्रत्याख्यायोपचरेदुद्धृत शल्यं
तु क्षत विधानेनोपचरेत्। मू
लात् स्रोतांसि देहे प्रसृतानि
वाहयेत्। स्रोत इति विशे
षत् सिरा धमनि वर्जितं ॥ दश
मोध्यायः। अथातो गर्भिणी
व्याकरणं शारीरं व्याख्यास्यामः
गर्भिणी प्रथम दिवसात् प्रभृ
ति नित्यं प्रहृष्टा शुक्लालंकृता
शुक्लवसना शांति मंगल देव
ब्राह्मण गुरुपरा च भवेन्मलिनवि
कृतहीनगात्राणि न स्पृशेद्दुर्गंधदु
र्दर्शनानि परिहरेदुद्वेजनीयाश्च

कथाः शुष्कं पर्युषितं क्वथितं
क्लिन्नं चान्नं नोपभुंजीत। बहि
र्निष्क्रमणं शून्यागार चैत्य श्म
शानवृक्षा श्रयान् क्रोध भय शो
करांश्च भारानुच्चैर्भाष्यादिकं परि
हरेद्यानि च गर्भं व्यापादयंति। न
चाभीक्ष्णं तैलाभ्यंगोत्सादना
दीनि निषेवेत न चायासयेच्छ
रीरं पूर्वोक्तानि च परिहरेत्।
शयनासने मृद्वास्तरणे नात्यु
च्चमपाश्रयोपेत मसंबाधे विद
ध्यात्। हृद्यं द्रवं मधुरप्रायं स्नि
ग्धं दीपनीय संस्कृतञ्च भोजनं
भोजयेत् सामान्य मेतदाप्रस
वात्॥ विशेषतस्तु गर्भिणी प्र
थम द्वितीय तृतीय मासेषु
मधुरशीत द्रवप्राय माहारमुपसे
वेत। विशेषतस्तु तृतीये षष्टि
कौदनं पयसा भोजयेच्चतुर्थे द
ध्नापंचमे पयसा षष्ठे सर्पिषा चे
त्येके। चतुर्थे पयो नवनीत सं
सृष्ट माहारयेज्जांगल मांसस
हितं हृद्यमन्नं भोजयेत् पंच
मे क्षीरसर्पिः संसृष्टं। षष्ठे श्व
दंष्ट्रा सिद्धस्य सर्पिषो मात्रां पा
ययेद्यवागूं वा। सप्तमे सर्पिः पृ
थक्पर्ण्यादि सिद्ध मेव माप्या

यते गर्भः अष्टमे बदरोदकेन
बलातिबला शतपुष्प पललप
योदधि मस्तुतैललवण मदन
फल मधु घृत मिश्रेणास्थाप
येत् पुराणपुरीष शुद्ध्यर्थ मनु
लोमनार्थं च वायोः। ततः पयोम
धुरकषाय सिद्धेन तैलेनानुवास
येदनुलोमे हि वायौ सुखं प्रसू
यते निरुपद्रवा च भवति अत
ऊर्द्ध्वं स्निग्धाभिर्यवागूभिर्जांग
लरसै श्चोपक्रमेदाप्रसवकाला
देव मुपक्रान्ता स्निग्धा बलवती
सुख मनुपद्रवा प्रसूयते। नवमे
मासि सूतिकागारमेनां प्रवेश
येत् प्रशस्ततिथ्यादौ। तत्रारि
ष्टं ब्राह्मण क्षत्रिय वैश्य शूद्रा
णां श्वेत रक्त पीत कृष्णेषु भूमि
प्रदेशेषु बिल्वन्यग्रोध तिंदुकभ
ल्लातक निर्मितं सर्वागारं यथा
संख्यं तन्मयपर्यंक मुपलि
प्तभित्तिं सुविभक्त परिच्छदं प्रा
ग्द्वारं मुदग्द्वारं दक्षिणद्वारं वा
अष्टहस्तायतं चतुर्हस्तविस्तृतं
रक्षामंगलसम्पन्नं विधेयं॥
जाते हि शिथिले कुक्षौ मुक्ते
हृदयबंधने। सशूले जघने
नारी ज्ञेया सा तु प्रजायिनी॥

तत्रोपस्थित प्रसवायाः कटीपृष्ठं
प्रति समंताद्वेदना भवत्यभीक्ष्णं
पुरीषप्रवृत्ति मूत्रं प्रसिच्यतेयो
निमुखात् श्लेष्मा च। प्रजनयि
ष्यमाणां कृत मंगल स्वस्ति
वाचनां कुमार परिवृतां पुन्नाम
फलहस्तां स्वभ्यक्तां मुष्णोदक·
परिषिक्तां मेथ्यनां सच्छृतां य
वागूमाकण्ठात् पाययेत्। ततः
कृतोपधाने मृदु विस्तीर्णे शय
ने स्थितामाभुग्नसक्थी मुत्ताना
मशेकनीयां चतस्रः स्त्रियः प
रिणतवयसः प्रजननकुशलाः क
र्तितनखाः परिचरेयुरिति। अथा
स्या विशिखान्तर मनुलोम मनुसु
खमभ्यज्यात् कयाश्चैना मेकाह
भगे प्रवाहस्वेति न चाप्राप्तावी
प्रवाहस्व। विशिखान्तर मपत
व्यां। ततो विमुक्ते गर्भनाडीप्र
बंधे सशूलेषु श्रोणि वंक्षण
वस्ति शिरःसु प्रवाहेथाः शनैः
पूर्वैः। ततो गर्भ निर्गमे प्रगा
ढं ततो गर्भे योनिमुखं प्रपन्ने
गाढतरं मा विशल्यभावात् ॥
मकालप्रवाहणात् बधिरं मू
कं व्यस्तहनुं मूर्धाभिघातिनं
कास श्वास शोषोपद्रुतं कुब्जं

विकटं वा जनयति। तत्र प्रति
लोम मनुलोमयेत्। गर्भसंगो
तु योनिं धूपयेत् कृष्णसर्प नि
र्मोकेण पिण्डीतकेन वा बध्नी
याद्धिरण्यपुष्पीमूलं हस्त पाद
योर्धारयेत् सुवर्चलां विशल्यां
वा। अथ जातस्योल्वं मुखं च
सैंधव सर्पिषा विशोध्य घृताक्तं
मूर्ध्नि पिचुं दद्यात्ततो नाभिना
डी मष्टांगुल मायम्य सूत्रेण
बद्ध्वा छेदयेत् तत्सूत्रैकदेशं च
कुमारस्य ग्रीवायां सम्यग्बध्नी
यात्॥ अथ कुमारं शीताभि
रद्भिः समाश्वास्य जातकर्मणि
कृते मधुसर्पिरनंता ब्राह्मीर
सेन सुवर्णचूर्णं मंगुल्यानामि
कया लेहयेत्ततो बलातैलेना
भ्यज्य क्षीरवृक्षकषायेण सर्व
गंधोदकेन वा रूप्य हेम प्रतप्तेन
वा वारिणा स्नापयेदेनं कपि
त्थपत्र कषायेण वा कोष्णेन
यथाकालं यथादेशं यथाविभ
वं च। धमनीनां हृदिस्थानां विवृ
तत्वादनंतरं। चतूरात्रात्त्रिरात्राद्वा
स्त्रीणां स्तन्यं प्रवर्तते। तस्मात्प्र
थमेऽह्नि मधु सर्पि रनंतामि
श्रं मंत्रपूतं त्रिकालं पाययेद्द्वि।

तीये लक्ष्मणासिद्धं सर्पि स्तनी
येच। ततः प्रादुर्निवारितस्तन्यं म
धुसर्पिः स्वपाणितल सम्मितं द्वि
कालं पाययेत्॥ अथ सूतिका
बलातैलाभ्यक्ता वातहरौषध
निःक्वाथेनोपचरेत् सशेषदो
षां तु तदहः पिप्पली पिप्पली
मूलहस्तिपिप्पलीचित्रक शृंग
वेर चव्यचूर्णं गुडोदकेनोष्णेन
पाययेत्। एवं द्विरात्रं त्रिरात्रं वा
कुर्यादादुष्ट शोणितात्। विशु
द्धे ततो विदारिगंधादि सिद्धां
स्नेहयवागूं क्षीरयवागूं वा पा
ययेत् त्रिरात्रं। ततोयव कोल
कुलत्थ सिद्धेन जांगल रसेन शा
ल्योदनं भोजयेद्बल मग्निबलं चा
वेक्ष्य। अनेन विधिना अध्यर्धमा
स मुपसंस्कृता विमुक्ताहारा
चारा विगत सूतिकाभिधाना
स्यात्। पुन रार्तवदर्शनादित्ये
के। थलं भूमिज्जातां सूतिकोच्छ्र
ततैलयो रन्यतरस्य मात्रां पाय
येत्। पिप्पल्यादि कषायानुपाना
स्नेह निस्या चस्मात्त्रिरात्रं पंचरात्रं
वा बलवती। अबला यवागूपा
ययेत्त्रिरात्रं पंचरात्रं वा। अनन्त
हं स्निग्धेनान्न संसर्गेनो ॥

पचरेत्। प्रायश श्चैनां प्रभूतेनो
ष्णोदकेन परिषिंचेत् क्रोधाया
स मैथुनादीन् परिहरेत्॥
भवतश्चात्र मिथ्याचारात्सू
तिकाया यो व्याधिरुपजायते
सकृच्छ्रसाध्यो ऽसाध्योवा भवे
दत्यय तर्पणात्। तस्मात्तां दे
शकालौ च व्याधि सात्म्येन
कर्मणा। परीक्ष्योपचरेदेवं ने
यमत्यय माप्नुयात्॥ अथापरा
पतंत्यानाहाध्मानौ कुरुतेतस्मा
त् कण्ठमस्याः केशवेष्टितया
ङ्गुल्या प्रमृज्जेत्। कटुकालाबुकृ
त वेधन सर्षप सर्पनिर्मोकैर्वा
कटुतैल विमिश्रै र्योनिमुखं धूप
येत्। लांगलीमूलकल्केन वा
स्याः पाणिपादतल मालिम्पेत्
मूर्ध्नि वास्या महावृक्षक्षीर म
नुषेचयेत्। कुष्ठ लांगलीमूल
कल्कं वा मद्य मूत्रयो रन्यतरेण
पाययेत्। शालिमूल कल्कंवा
पिप्पल्यादिं वा मद्येन सिद्धार्थ
क कुष्ठलांगली महावृक्षक्षीर मि
श्रेण सुरामण्डेन वास्थापयेत्। ए
तेनैव सिद्धेन सिद्धार्थकतैले
नोत्तर वस्तिं दद्यात्। स्निग्धेन
वा कृत्तनखेन हस्तेनापहरेत्



प्रजातायाश्चनार्या रूक्षशरी
राया स्तीक्ष्णैरविशोधितं रक्तं
वायुना तद्देशगेनातिसंरुद्धं ना
भेरधः पार्श्वयो र्बस्तौ वा बस्ति
वा शिरसि वा ग्रंथिं करोति ।
ततश्चनाभिबस्त्युदर एष्शूला
निभवंति । सूचीभिरिव निस्तु
द्यते भिद्यते दीर्यत इव च पक्वा
शयः । समंतादाध्मान मुदरे मूत्र
संगश्च भवतीति मक्कल लक्षणं
तत्र वीरतर्वाद्दिसिद्धे जलमुषका
दिप्रतीवापं पाययेत् । यवक्षार
चूर्णं वा सर्पिषा सुखोदकेन वा
लवण चूर्णं वा पिप्पल्यादि क्वा
थेनापिप्पल्यादिचूर्णं वा सुरामंडे
न वरुणादिक्वाथं वा पंचकोले
लाप्रतीवापं पृथक् पर्णादिक्वा
थं वा भद्रदारु मरिच संसृष्टं पु
राणगुडं वा त्रिकटुक चतुर्जा
तक कुस्तुंबुरु मिश्रं खादेदरिष्टं
वा पिबेदरिष्टमिति । अथ बाल
क्षौम परिवृतं क्षौमवस्त्रास्तृता
यां शय्यायां शाययेत् । पीलु
बदरी निम्ब परूषक शाखा
भिश्चैनं वीजयेत् । मूर्ध्नि चा
स्याहरह तैलपिचु मवचार
येत् । धूपयेच्चैनं रक्षोघ्नै र्धूपैः ।

रक्षोघ्नानि चास्य पाणि पाद
शिरो ग्रीवास्ववसृजेत् । ति
लातसी सर्षप कणांश्चात्र प्र
किरेत् । अधिष्ठाने चाग्निं प्रज्व
लयेत् । सूतिकोपासनीयं चावे
क्षेत । ततो दशमेऽहनि मातापि
तरौ कृतमंगल कौतुकौ स्व
स्ति वाचनं कृत्वा नाम कुर्या
तां यदभिप्रेतं नक्षत्रनाम वा ॥
ततो यथावर्णं धात्रीमुपेया
न्मध्यमप्रमाणां मध्यमवयसं म
रोगां शीलवती मचपला मलो
लुपा मकृशा मस्थूला प्रसन्न
क्षीरामलंबौष्ठी मलंबोर्ध्वस्तनी
मव्यंगामव्यसनिनीं जीवद्वत्सां
दोग्ध्रीं वत्सला मक्षुद्रकर्म्मिणीं
कुलेजाता मतो भूयिष्ठैश्च गुणै
रन्वितां श्यामामारोग्य बलवृद्ध
ये बालस्य तथोर्ध्वस्तनी करालं
कुर्यात् । लंबस्तनी नासिका
मुखं छादयित्वा मरणमापाद
येत् ततः प्रशस्तायां तिथौ शिरः
स्नातामहतवाससमुदङ्मुखीं शि
शुं पूर्वशिरसं धात्रीं प्राङ्मुखीमुप
वेश्य दक्षिणं स्तनं धौत मीषत्
परिस्रुतमभिमंत्र्य मंत्रेणानेन पा
ययेत् ॥ चत्वारः सागराः स्तन्यं

स्तनयोः क्षीरवाहिणः । भवंत
सुभगे नित्यं बालस्य बलवृद्ध
ये । पयोऽमृतरसं पीत्वा कुमार
स्ते शुभानने । दीर्घ मायु रवा
प्नोतु देवाः प्राश्यामृतं यथा ॥
अतोऽन्यथा नाना स्तन्योपयोग
स्यासात्म्याद्व्याधिजन्म भवति ।
अपरिस्रुतेप्यतिस्तब्ध स्तन्यपूर्णे
स्तनपानादुत्स्नुहित स्रोतसः
शिशोः कास श्वास वमी प्रादुर्भा
वः । तस्मादेवं विधानं स्तन्यं न
पाययेत् । क्रोध शोकावात्सल्या
दिभिश्च स्त्रियाः स्तन्यनाशो भव
ति ॥ अथास्याः क्षीर जननार्थं
सौमनस्य मुत्पाद्य यवगोधूम
शालि षष्टिक मांसरससुरा
सौवीरक पिण्याक लशुन म
त्स्य कसेरुक शृंगाटक बिस
विदारिकंद मधुक शतावरीना
लिकालाबू कालशाक प्रभृती
नि विदध्यात् ॥ अथास्याः स्तन्य
मप्सु परीक्षेत । तच्चेच्छीतल
ममलं तनु शंखावभास मप्सु
न्यस्तमेकीभावं गच्छत्यफेनिल
मतंतुमन्नोत्प्लवते न सीदति वा
तच्छुद्धमिति विद्यात् तेन कुमारस्या
रोग्य शरीरोपचयो बलवृद्धि

श्च भवति । न च क्षुधित शोकार्त
श्रांत प्रदुष्टधातु गर्भिणी ज्वरि
तातिक्षीणातिस्थूल विदग्धभ
क्त विरुद्धाहार तर्पितायाः स्त
न्यं पाययेन्नाजीर्णौषधं च बाले द
द्यादोषध मलाभात्तीव्र वेगोत्पत्ति
भयात् ॥ भवंति चात्र धात्र्यास्तु
गुरुभि र्भोज्यै र्विषमै र्दोषलैस्त
था । दोषा देहे प्रकुप्यंति ततः
स्तन्यं प्रदुष्यति ॥ मिथ्याहा
र विहारिण्या दुष्टा वातादयः
स्त्रियाः । दूषयंति पय स्तेन शा
रीरा व्याधयः शिशोः । भवंति
कुशल स्तांश्च भिषक् सम्यग्वि
भावयेत् । अंग प्रत्यंग देशे तु
रुजा यत्रास्य जायते ॥ मुहुर्मु
हुः स्पृशति तं स्पृश्यमाने च रो
दिति । निमीलिताक्षो मूर्द्धस्थे
शिरोरोगेन धारयेत् । बस्तिस्थे
मूत्रसंगार्तो रुजा तृष्यति मू
र्च्छति विण्मूत्रसंग वैवर्ण्यच्छ
र्द्याध्मानांत्रकूजनैः ॥ कोष्ठे दो
षान् विजानीयात् सर्वत्रस्था
ञ्च रोदनैः । तेषु च यथाभिहि
तं मृदुच्छेदनीय मौषधं मात्र
या क्षीरपस्य क्षीर सर्पिषा धात्र्या
श्चकेवलमेव विदध्यात् क्षीरा

ज्ञादस्यात्मनि धात्र्या स्तन्यादस्य
कषायादीनात्मन्येव न धात्र्याः।
तत्र मासादूर्ध्वं क्षीरपाथांगुलिप
र्वद्वय ग्रहणं स सिता मोक्षयमा
त्रं विद्ध्यात् कोलास्थि सस्मितां
कल्कमभ्रं क्षीरान्नादाय कोलक्ष
सिता मन्नादायेति ॥ येषां गदा
नां ये योगाः प्रवक्ष्यंते ऽगदंकराः
तेषु तत्कल्क संलिप्तौ पाय
येत् शिशुं स्तनौ ॥ एकं द्वे
क्षीरिणाहानि वात पित्त कफ
ज्वरे। स्तन्यपायाहिते सर्पिर्वि
द्याभ्यां यथार्थतः ॥ तत्र त
क्षामपादत्र पाययेत शिशुंस्त
नौ ॥ विरेक वस्ति वमनान्यृते
कुर्याच्च नात्ययात्। मस्तुलुं
गत्वयाघस्य वायु स्तालवस्थि
नामयेत् ॥ तस्य स्तुद्वेदन्यपु
कस्य सर्पि मधुरैकैः शृतं।
पानाभ्यंजनयोः योज्यं शीतांश्च
हेजनं तथा ॥ वातेनाध्मापि
तो नाभिं स्तब्धं तु हरिद्रसंति
तो। मारुतघ्नैः प्रशमयेत् स्ने
ह स्वेदोपनाहनैः ॥ गुदपाके
तु बालानां पित्तघ्नीं कारयेत्
क्रियां। रसांजनं विशेषेण
पानालेपनयोर्हितं ॥

क्षीराहाराय सर्पिः पाययेत् सि
द्धार्थकवचा मांसी पयस्यापामा
र्ग शतावरी सारिवा ब्राह्मी पि
प्पली हरिद्रा कुष्ठ सैंधव सिद्धं
क्षीरान्नादाय मधुक वचा पि
प्पलीचित्रक त्रिफला सिद्धं। प्र
न्नादायद्विपंचमूली क्षीर तगार भ
द्रदारुमरिच मधु विडंग द्राक्षा
द्विब्राह्मीसिद्धं। तेनारोग्य बल मे
धायूंषि शिशोर्भवंति ॥ बाले
पुन गोदसत्व गृह्णीयान्नैवैनं
तर्जयेत् सहसान प्रतिबोधये
द्वित्रास भयात्। सहसा नाप
हरेदुत्क्षिपेद्वा वातादि विघा
त भयात्। नोपवेशयेत् कौब्ज
भयान्नित्यं चैन मनुवर्तेत प्रिय
शतैरजिघांसुः। एवमनभिह
तमना स्त्वभिवर्द्धते नित्य मुद
ग्रसत्व सम्पन्नो नीरोगः सुप्रसन्न
मनाश्च भवति। वातातप विद्यु
त्प्रभा पादपलता दर्शन दीपा
वलोकन शून्यागार निम्नस्थान
शुष्कच्छायादिभ्यो दुर्ग्रहोपसर्गात्
श्च बालरक्षेत ॥ नाशुचौ विसृ
जेद्बालं नाकाशे विषमेनच ॥
नोष्ण मारुत वर्षेषु रजो धूमो
दकेषुच ॥ क्षीर सात्म्यतयाक्षी

र माजं गव्य मथापि वा। द
द्यादास्तन्यपर्याप्ते र्बालानां वी
क्ष्य मात्रया ॥ षण्मासं चैनम
न्नं प्राशयेल्लघु हितंच। नित्यम
न्तरोत्थरतस्य स्यात् कृतरक्षस्य उप
सर्गभयात्। प्रयत्नतस्य ग्रहोप
सर्गेभ्यो रक्षा बाला भवंति ॥
यथा कुमार उद्विजते त्रस्यतिरो
दिति नष्टसंज्ञो भवति नखद
शने धात्री मात्मानञ्च परितु
दति दंतान् खादति कूजति जृं
भते भ्रुवौ विक्षिपत्यूर्द्ध्वं निरीक्ष
ते फेन मुद्वमति संदष्टोष्ठः क्रू
रोभिन्नामवर्चा दीनार्त्तस्वरो नि
शि जागर्ति दुर्बलो म्लानांगो
मत्स्यछुछुंदरी मत्कुणगंधो
यथा पुराधात्र्याः स्तन्य मभिलष
ति तथानाभिलषतीति सामान्ये
न ग्रहोपसृष्ट लक्षणमुक्तं वि
स्तरेणोत्तरे वक्ष्यामः ॥ शास्त्रम
तश्चैनं ज्ञात्वा यथावर्णं विद्यां
ग्राहयेत्। अथास्मै पंचविंशति
वर्षाय द्वादशवर्षां पत्नी माव
हेत् पित्र्य धर्मार्थ कामप्रजा प्रा
प्स्यतीति ॥ ऊनषोडश वर्षायां
मप्राप्तः पंचविंशतिं। यद्याधत्ते
पुमान् गर्भं कुक्षिस्थः स विपद्य

ते। जातो वा नचिरं जीवेत्जी
वेद्वा दुर्बलेंद्रियः। तस्मादत्यं
तबालायां गर्भाधानं नकार
येत् ॥ प्रतिवृद्धायां दीर्घरोगि
ण्या मन्येन वा विकारेणोप
सृष्टायां गर्भाधानं नैव कुर्वीत
पुरुषस्याप्येवंविधस्यतएव दो
षाः संभवंति। तत्र पूर्वोक्तैः का
रणैः पतिष्यति गर्भे गर्भाशय क
टी वंक्षण बस्ति शूलानि रक्त
दर्शनंच। तत्र शीतैः परिषेका
वगाह प्रदेहादिभि रुपचरेज्जी
वनीय शृत शीत क्षीर पानै
श्च। गर्भस्फुरणे मुक्त शुक्र
स्तंभ धारणार्थं क्षीर मुत्पलादि
सिद्धं पाययेत्। प्रसंसमाने सदा
हपार्श्व पृष्ठ शूलासृग्दरानाह
मूत्रसंगाः। स्थानात्स्थानञ्चोपक्रा
मति गर्भे कोष्ठे संरंभ स्नेह कि
याः शीताः क्रियाः वेदनायाम
हासहा क्षुद्रसहा मधुक श्वदं
ष्ट्राकण्टकारिका सिद्धं पयः श
र्करा क्षौद्र मिश्रं पाययेत्। मूत्रसं
गे दर्भादि सिद्धं। आनाहे हिंगुसौ
वर्चल लशुन वचा सिद्धं अप
स्रवति रक्ते कोशकारिका
सार कुशेरुक समंगा धातकी

कुसुम नवमालिका गैरिक
सर्जरस रसांजन चूर्णं मधुना
वा लिह्यात्। यथालाभं न्यग्रोधा
दित्वक्प्रवालकल्कं वा। पयसा
पाययेदुत्पलादिकल्कं। कशेरु
शृंगाटक शालूक कल्कं वा।
शृतेन पयसोदुंबर फलोदक
कंद क्वाथेन वा शर्करा मधु म
धुरेण शालिपिष्टं न्यग्रोधादि
स्वरस परिपीतं वा। वस्त्रावयवे
योन्यां धारयेत्॥ अथादृष्टशू
लिनायां वेदनायां मधुक देवदा
रु पयसा सिद्धं पयः पाययेत् त
दैवाश्मंतक शतावरी पयस्या
सिद्धं विदारि गंधादि सिद्धं वा ह
स्तीहयोत्पल शतावरी सारि
वा पयस्या मधुक सिद्धं पयसा
र्कपुष्पी सिद्धं वा पयः पाययेदि
ति। एवं क्षिप्र शुष्ककांतायाउपा
वर्तते हन्तो गर्भे आप्यायते।
अवस्थितेच गर्भे गतेनेतुर्वर
शालाटुसिद्धेन पयसा भोजये
त्। क्षीणे लवण स्नेह वर्ज्यां
सिद्धवास्पूभि रुद्दलकादीनां
पाचनीयापसंस्कृताभिरूपकमे
त यावंतो मासा गर्भस्य तावंत्य
हानि वस्तुपरस्थलेषु शुद्धगाय
हंदी ॥

पतीय संयुक्तं पाययेदरिष्टं वा
वातोपद्रव गृहीतत्वात्। स्रोत
सां लीयते गर्भः सोऽतिकाल
मवतिष्ठमानो व्यापद्यते तदृउ
ना स्नेहादि क्रमेणोपचरेत्॥
उत्क्रोश रससंसिद्धां मनल्पस्ने
हां यवागूं पाययेत्। माषति
ल बिल्व शलाटु सिद्धान् वा
कुल्माषान् भक्षयेन्मधुमाध्वी
कं चानुपिबेत् सप्तरात्रं। काला
तीत स्थायिनि गर्भे विशेषतः
सधान्य मुद्गले मुषलेनाभिह
न्यात् विषमेवा यानासने से
वेत। वातातिपन्नपन्न शुष्यति
गर्भः। समातः कुक्षिं न पूरयति
मंदं स्यन्दतेच तं बृंहणीयैः प
योभिर्मांसरसैश्चोपचरेत् शु
क्र शोणिते वायुनाभिपन्नम
वक्रांतजीव माध्मापयत्युदरं।
तत्कदाचित् यदृच्छयोपशांतं
नैगमेषापहृत मिति भाषंते। त
मेव कदाचित् प्रलीयमाने ना
गोदर मित्याहुः तस्यापि लीनव
त्प्रतीकारः॥ अतऊर्द्धं मासानु
मासिकं वक्ष्यामः। मधुकशाक
बीजंच पयस्या सुरदारुच। अ
श्मंतकः तिलाः कृष्णास्तथावल्ली

शतावरी॥ वृक्षादनी पयस्याच
लता चोत्पलसारिवा। अनंता
सारिवा रास्ना पद्मा मधुक मेव
च॥ बृहत्यौ काश्मरी चापि क्षी
रिशुंगा स्त्वचो घृतं। पृश्निपर्णी
बला शिग्रु श्वदंष्ट्रा मधुपर्णि
का। शृंगाटकं बिसं द्राक्षा कसे
रु मधुकं सिताः। वत्सैते सप्त
योगाः स्युरर्द्धश्लोक समापनाः
यथासंख्यं प्रयोक्तव्या गर्भस्रा
वे पयोयुताः। कपित्थ बृह
ती बिल्व पटोलेक्षु निदिग्धि
काः। मूलानि क्षीर सिद्धानि पा
ययेद्भिषगष्टमे। नवमे मधुका
नंता पयस्या सारिवाः पिबेत्॥
क्षीरं शुंठी पयस्याभ्यां सिद्धं स्या
द्दशमेहिते। सक्षीरा वा हिता
शुंठी मधुकं सुरदारुच। ए
वमाप्यायते गर्भः तीव्रा रुक्
चोपशाम्यति। निवृत्तप्रसवा
यास्तु पुनः षड्भ्यो वर्षेभ्य ऊर्द्धं प
सवमानाया नार्याः कुमारोऽ
ल्पायु र्भवति॥ अथगर्भिणी
माप्युतप्रजातावस्थये छर्दयेन्मधु
राम्लेनान्नोपहितेनानुलोमयेच्च
संशमनीयञ्च मृदु विदध्याद
न्नपानेषु शमीधान्यं मृदुवीर्यमधु

रप्रायं गर्भाविरुद्धं च गर्भो विरुद्धा
श्च क्रिया यथायोगं विदधीत
मृदुप्रायाः॥ भवंतिचात्र श्लो
वर्णे सहृते चूर्णं कुष्ठं मधु
घृतन्त्वच वा। मत्स्याक्षकः शंख
पुष्पी मधु सर्पि सकाञ्चनं॥
अर्कपुष्पी मधुघृतं चूर्णितंकन
कंवचा। हेमचूर्णानि कैटर्यः श्वे
ता दूर्वा घृतं मधु॥ चत्वारोऽ
भिहिताः प्राशाः श्लोकार्द्धेषु चतुर्ष्व
पि कुमाराणां वपुर्मेधा बल
बुद्धि विवर्द्धनाः॥ इति सुश्रु
ते आयुर्वेदशास्त्रे तृतीयं शा
रीरस्थाने समाप्तं॥ इंगरेजी
भाषायां पनेटोमीत्युक्तमेतत्
शारीरं तपोयथा॥ देव द्वि
ज गुरुप्राज्ञ पूजनं शौचं
मार्ज्जवं॥ ब्रह्मचर्यमहिंसा
च शारीरं तप उच्यते॥
इति भगवद्गीतायां १७॥
अध्यायः॥
शारीरके श्री शंकराचार्यकृ
तवेदांतमीमांसाभाष्ये। यथा
तथाच वयमस्या शारीरकमी
मांसायां प्रदर्शयिष्यामः। वेदां
त मीमांसाशास्त्रस्य व्याचिख्या
सितस्येदमादिमं सूत्रं।

अथातो ब्रह्मजिज्ञासेति। इति
नड्डेय्यलिखनं ॥
शारीरिकः त्रि शारीरसंबंधि
तत्पर्य्यायः। कालेवरिकः २
गात्रिकः ३ वापुषिकः ४ सांह
ननिकः ५ वार्ष्मिकः ६ दैवग्रहि
कः ७ कायिकः ८ दैहिकः ९
मौर्त्तिकः १० तानविकः ११
इत्यमरोक्त शरीरपर्य्याय श
ब्दात् ठिक प्रत्ययेननिष्पन्नः
शारुकः त्रि हिंसकः। शॄ हिंसा
यां कम गमेत्यादिना उक प्र
त्ययेन निष्पन्नः। इति मुग्ध
बोधव्याकरणं ॥
शार्क्कः पुं शर्करा। इति श
ब्दरत्नावली ॥
शार्क्ककः पुं दुग्धफेनः। श
र्करापिण्डं। इति मेदिनी ॥
शार्क्करः पुं दुग्धफेनः॥ शर्क
रान्वितदेशः। इति मेदिनी। श
र्करासंबंधिनि त्रि ॥
शार्क्करकः } त्रि शर्करादू
शार्क्करिकः } रदेशः शर्करा
शब्दात् काण् ठिक प्रत्यया
भ्यां निष्पन्नौ शार्क्करीयः त्रि
शर्करायुक्तदेशः शर्कराशब्दा
त् छीय प्रत्ययेन निष्पन्नः ॥

शार्ङ्गं क्ली आर्द्रकं। इति राज
निर्घण्टः ॥
शार्ङ्गः पुं विष्णुधनुः। धनुर्मात्रे
इति मेदिनी॥ शृङ्गसंबंधिनि त्रि
शार्ङ्गेष्टा स्त्री महाकरञ्जः इति
राजनिर्घण्टः॥ पुस्तकान्तरे शा
र्ङ्गेष्टा इति च पाठः ॥
शार्ङ्गी न् पुं विष्णुः। इत्यमरः॥
धन्विमात्रे। इति शार्ङ्गशब्दार्थ
दर्शनात् ॥
शार्दूलः पुं व्याघ्रः॥ उत्तरप
दे श्रेष्ठार्थवाचकः। इत्यमरः।
राक्षसः॥ पशुभेदः। स तु
सरभः। इति मेदिनी॥ पक्षि
विशेषः। इति धरणि चित्रकः
इति राजनिर्घण्टः ॥
शार्दूल ललितं क्ली प्रतिचरणे
अष्टादशाक्षरपादच्छन्दोविशे
षः। यथा। मः सो जः स तसा
दिनेश ऋतुभिः शार्दूलललि
तं हत्वा केसमृगे पराक्रम वि
धिं शार्दूलललितं य श्चके ति
लिम्भारकादिषु सङ्ग्रामातिरिक्तिर
दे। संतोषं परमेत देव निवहे त्रै
लोक्यशरणं श्रेयो वः स त
नोतु पारमहिमा लक्ष्मीप्रियतमः
इति छन्दोमञ्जरी २ स्तवकः॥

शार्दूलवाहनः पुं पञ्चविंशति
पूर्वजिनान्तर्गतजिनविशेषः।
इति त्रिकाण्डशेषः॥
शार्दूलविक्रीडितं क्ली अतिधृति
वृत्तौ ऊनविंशतिपादच्छन्दोवि
शेषः। यथा। सूर्य्याश्वैर्मसजस्त
ताः सगुरवः शार्दूल-
विक्रीडितं। गोविन्दं प्रणमोत्त
माङ्ग रसने त्वं घोषयाहर्निशं।
पाणी पूजयतं मनः स्मर पदे
तस्यालयं गच्छतं एवञ्चेत् कृ
रुताखिलं मम हितं शीर्षादय
स्तद्ध्रुवं न प्रेक्षे भवतां कृते-
भवमहाशार्दूलविक्रीडितं॥
इति छन्दोमञ्जरी २ स्तवकः॥
शार्वरं क्ली सन्तमसं। घात
के त्रि। इति मेदिनी॥ शार्वरीस
म्बंधिनि च त्रि॥
शार्वरी स्त्री रात्रिः। इत्यमरटी
कायां भरतधृत वाचस्पतिः
शाल ऊ ङ कत्थने। इति क
विकल्पद्रुमः॥ कत्थने प्रशंसा
यां। ऊ. शालते गुणिनं गुणी।
ङ अशशालत्। इति दुर्गादासः
शालः पुं मत्स्यभेदः॥ शालाउ
इति ख्यातः। प्रकारः। वृक्ष-
विशेषः। तत्पर्य्यायः। सर्जः

२ कार्श्यः ३ अश्वकर्णकः ४
शस्यसंवरः ५ इत्यमरः। शंकुवृक्षः
६ इति रत्नमाला॥ नदभेदः॥
इति शब्दरत्नावली ॥ शालन्नृ
पः। स तु शालिवाहनराजः।
इति विश्वः॥ वृक्षमात्रे। इति
राजनिर्घण्टः॥ शालो कसे
धीवर पवहाश इत्युक्तभेदात्त
लव्यादिः दन्त्यादिश्च। केवलं
इव वह रञ्जीवोत्पल सालो
वसंतकाल आजगाम। इति वा
सवदत्त श्लेषात्। केवलं पद्ये
सालो मत्स्यविशेषः॥ वसंत
पद्ये सालस्य पुष्पं साले ॥
इति भरतः ॥
शालग्रामः पुं विष्णुमूर्त्तिविशेषः
स च गण्डकीनद्युद्भववज्रकीटकृत
चक्रयुक्तशिलाद्वारकोद्भवतादृश
शिलाच। तस्य माहात्म्य लक्ष
णादि यथा प्रसंगात् कथयि
ष्यामि शालग्रामशिलार्च्चनं।
निष्कामो मुक्तिमाप्नोति मूर्त्तिं
ध्यायन् स्तुवन् जपन्। शंख च
क्रगदा पद्मे केशवाख्यो गदाधरः
शाङ्ख कौमोदकी चक्र शंखी
नारायणोविभुः॥ स च शंखा
ब्जपद्मो माधवः श्रीगदाधरः॥ग

दाङ्कशंखचक्रीवा गोविंदाख्या
गदाधरः ॥ पद्म शंखादिगादिने
विष्णु शंखायवेनमः । सशंखा
ङ्कगदाचक्र मधुसूदनमूर्तये । न
मोगदासि चक्राङ्क युक्त त्रैविक्र
मायच । सापि कौमोदकी पद्म
शंखवामनमूर्तये ॥ शंखाङ्कचक्र
गादिने नमः श्रीधरमूर्तये । हृषी
केशस्सापि गदा शंख पद्मिनमो
स्तु ते । साङ्कशंखगदाचक्र पद्म
नाभस्वरूपिणे । दामोदरः शंख
गदा चक्र पद्मिनमोऽस्तुते । सा
पि शंख गदाङ्काय वासुदेव न
मोनमः । शंखाङ्क चक्रगादिने न
मः शंकर्षणायच ॥ शंख चक्र ग
दाङ्काय ध्रत प्रद्युम्न मूर्तये । नमो
ऽनिरुद्धाय गदा शंखा ङ्क वरधा
रिणे । साङ्क शंख गदा चक्र पुरु
षोत्तम मूर्तये । नमो ऽधोक्षज रू
पाय गदाशंख विधारिणे ॥
नृसिंह मूर्तये पद्म गदा शंख
विधारिणे ॥ पद्मापिशंखगादिने
नमोऽस्त्वच्युतमूर्तये । सशंखचक्रा
ङ्कगदे जनार्दन सिहो नमः । उ
पेंद्र गादिने सापि पद्म शंखव
तोऽस्तुते ॥ सचक्राङ्क गदाशंख
युक्तायहरिमूर्तये । सगदाङ्कापि

शंखायनमः श्रीकृष्ण मूर्तये ।
शालग्रामशिलाद्वारगतलग्नद्वि
चक्रधृक् । शुक्लाभाव्यस्य सोऽ
व्यक्तः सदैव श्रीगदाधरः । लग्न
द्विचक्रो रक्ताभः पूर्वभागस्तु पु
ष्कलः । शंकर्षणोथ प्रद्युम्नः सूक्ष्म
चक्रस्तु पीतकः ॥ सदीर्घः स शि
रश्छिद्रो यो ऽनिरुद्धस्तु वर्तुलः ।
नानाद्वारद्विरेखश्च अथ नाराय
णोऽसितः । मध्ये गदाकृता रे
खा नाभिपद्म महोन्नतः । पृथु
चक्रो नृसिंहोवः कपिलोव्याद्वि
बिंदुकः । अथ वा पंच बिंदुस्तत्पू
जनं चक्रचारिणः । वराह शक्ति
लिंगो ऽव्यादिषमद्वयचक्रकः ॥
नीलस्त्रिरेखः स्थूलोथ कूर्ममूर्तिः
सबिंदुमान् । कृष्णः सवर्तुलावर्तः
पांडरोन्नत पृष्ठकः । श्रीधरः पंच
रेखोऽव्याद्वनमाला गदांकितः ।
वामनो वर्तुलो नाम वामचक्रः
सुरेश्वरः ॥ नानावर्णो ऽनेकमू
र्तिं नागभोगी त्वनंतकः ॥
स्थूलो दामोदरो नीलो मध्येच
क्रः सुनीलकः । संकीर्णद्वारको
वोऽव्यादथ ब्रह्मा समाहितः ॥
सदीर्घरेखा शुषिर एकचक्रा
म्बुजः पृथुः ॥ प्रसृच्छिद्रस्थूल

चक्रः कृष्णोऽविंदुश्च विंदुमत् ।
हयग्रीवो ऽङ्कुशाकारः पंचरेखः
सकौस्तुभः ॥ वैकुंठो ऽमलवज्ज्ञाति
एकचक्रात्मको ऽसितः । मत्
स्यो दीर्घांबुजाकारो द्वाररेख
स्तु पांडुरः । वामचक्रो दक्षरेखः
श्यामो वो ऽव्यात्त्रिविक्रमः ।
शालग्रामे द्वारकायाः स्थिताय
गादिने नमः । एकेनलांछितो वो
ऽव्याद्गदाधारी सुदर्शनः । लक्ष्मी
नारायणो द्वाभ्यां त्रिभि र्मूर्ति
स्त्रिविक्रमः ॥ चतुर्भिश्च चतुर्व्यू
होवासुदेवश्च पंचभिः । प्रद्युम्नः
षड्भिरेवाव्यात् शंकर्षण स्त
स्ततः ॥ पुरुषोत्तमो ऽष्टभिः स्या
न्न नवव्यूहो नवान्वितः । दशा
वतारो दशाभि रनिरुद्धो ऽवता
द्य ॥ द्वादशात्मा द्वादशाभि
नरूर्ध्वं ह्यनंतकः । इति पाद्मे
पातालखंडे ९ अध्यायः ॥
अपि च । ईश्वर उवाच शाल
ग्रामे मनो येन मण्डले प्रति
मासुच । नित्यं तु श्रीहरेः पूजा
केवलेन जलेन तु ॥ गंडक्या
मेकदेशेतु शालग्रामस्थलं म
हत् । पाषाणं तद्भवं यत्तु शाल
ग्रामामितिस्मृतं ॥ शालग्रामशि

लास्पर्शनात् कोटिजन्माघनाशने
किं पुन र्जनने तत्र हरेः सान्नि
ध्य कारणं । शालग्रामैक यज
नात् शतलिंग फलं लभेत् ॥
बहुभिर्जन्मभिः पुण्यै यदि कृ
ष्णशिलां लभेत् । गोष्पदेनच
चिह्नेन तेन वैशायते नरः ॥
आदौ शिलां परीक्षेत स्निग्धां
कृष्णांच मेचकां । अकृष्णा म
ध्यमा प्रोक्ता मिश्रा मिश्रफ
लप्रदा । सर्वकामप्रदा सौम्या
कराला भयदुःखदा ॥ स्निग्धा
च श्रीकरी नित्यं रूक्षा दारिद्र्यदा
यिका । लघ्वी लघुफला प्रोक्ता
स्थूलास्थूलफलप्रदा ॥ सदा का
ष्टे स्थितो वह्नि र्मंथनेच प्रकाश
ते यथा तथा हरिर्व्यापीशालग्रा
मे प्रकाशते ॥ प्रत्यहं द्वादश
शिलाः शालग्रामस्य योऽर्चये
त् । द्वारवत्याः शिलायुक्ताः सवै
कुंठे महीयते । शालग्रामशिला
यांतु गाकरे लक्षपेन्नरः । पितरस्त
स्य तिष्ठंति तृप्ताः कल्पांतरं दिवि
शालिग्रामशिला यत्र यत्र द्वा
रवती शिला । मते विष्णु पुरंया
तिष्ठतार्थे योजन त्रयं । जप इ
ज्याच होमश्च सर्वं कोटिगुणं ।

भवेत्। मनस्कामः सदाभीष्टं
कोशमात्रं समंततः कीकटेपि
मृतोयाति वैकुंठभवनं नरः।
शालग्रामशिलायां यो मूल्य
मुत्पादयेन्नरः। विक्रेता चानु
मंताच यः परीक्षानुमोदकः
सर्वेते नरकेयांति यावदाहूत
संप्लवं। अतस्तं वर्जयेद्विह
रि विक्रयणक्रये। शालग्रामो
द्भवो देवो यो देवो द्वारकोद्भ
वः॥ उभयोः संगमो यत्र मुक्ति
स्तत्र नसंशयः। द्वारकोद्भवः।
शुक्लश्च वज्रचक्रेण चिह्नितः
चक्रामासीत् शिलाकार चित्स्व
रूप निरंजनं। नमोस्त्वोंकार रूपा
य सदानंदस्वरूपिणे॥ शाल-
ग्राम महाभाग भक्तस्यानुग्रहं
कुरु। त्वया युतस्य धर्मस्य क्व
णाग्रस्तस्य सेप्रभो। इति तत्रैव
१९ अध्यायः॥ अपरञ्च। ब्र
ह्माण उवाच गण्डकीयं नदी
राजन् सदास्तु निषेविता। प
ापादक परीवारे हेतपातक
संचया॥ दर्शनात्स्नानसं पापं
स्पर्शनात् कर्मजंदहेत्। वाचि
केत्तीयत्नायस्य पानतः पापसं
चयं। एवं उक्ताः प्रजानाथः
प्रजाः सर्वा विपाप्मनः। स्वगात्रा
द्विप्रुयो ऽनेकपापघ्नीः सृष्टवान्
इमां॥ एतां नदीं ये शुभोपादो
स्पृशंति सुतरंगिणीं तेगर्भभा
जो नैव स्यु रपि पापकृतो न
राः॥ तस्यां भवा येचाश्मान
श्चक्रचिह्नैरलंकृताः॥ ये
साक्षाद्भगवंतो हि स्व स्वरूपध
राः पराः॥ शिलाः संपूजये
द्यस्तु नित्यं चक्रयुताः सदा।
नजातु चिद्भजननस्यावै जठरे स
मुपाविशेत्। पूजयेद्यो नरोधी
मान् शालग्रामशिलां वरां।
तेनाचारवता भाव्यं दंभ मोह
वियोगिना॥ परदार परद्रव्य
विमुखेन नरेणच। पूजनीयः
प्रयत्नेन शालग्रामः सचक्रकः
द्वारवत्यां भवं चक्रं शिला वै
गंडकीभवा पुंसां क्षणाद्धरेत
वै पापं जन्मशतार्जितं॥ अपि
पापसहस्राणां कर्ता तावन्नरो
भवेत्। शालग्रामशिलाम्भः
पःपीत्वा पूयेत तत्क्षणात्॥
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वे
दपथे स्थितः। शालग्रामं पूज
यित्वा गृहस्थो मोक्ष माप्नुयात्
नजातु चित् स्त्रिया कार्यं शा

लग्रामस्य पूजनं। भर्तृहीनाथ
सुभगा सर्वलोकहितैषया॥
मोहात्स्पृशेतमहिला जन्मशी
ल गुणान्विता हित्वा पुण्य सम्
हं तत्क्षत्वरं नरकं व्रजेत्॥ स्त्रीपा
णिमुक्तपुष्पाणि शालग्रामशि
लोपरि। पवे रथिकपापानि वदं
ति ब्राह्मणोत्तमाः। चंदनं विष
पंकाभं कुंकुमं वज्रसन्निभं। नैवे
द्यं कालकूटाभं भवेद्भगवतः कृ
ते॥ तस्मात्सर्वात्मना त्याज्यः स्त्रि
याः स्पर्शः शिलोपरि। कुर्वती
याति नरकं यावदिंद्राश्चतुर्द
श॥ अपि पापसमाचारो ब्रह्म
हत्यायुतोपिवा। शालग्रामशि
लातोयं पीत्वा याति परांगतिं
तुलसी चंदनं चक्रं शंखोघण्टा
घ चक्रकं। शिला ताम्रस्य पा
त्रंतु विष्णोर्नाम पदामृतं॥
पदामृतेन नवभिः पापराशि प्र
दाहकं। वदंति मुनयः शांताः
सर्वशास्त्रार्थकोविदाः। सर्वती
र्थपरिस्नानात् सर्वक्रतु समर्चनात्
पुण्यंभवति यद्राजन् बिन्दौ वि
न्दो तदद्भुतं॥ शालग्रामशि
लायत्र पूज्यते पुरुषोत्तमः। तत्र
योजनमात्रेतु तीर्थकोटि समन्वि
ते॥ शालग्रामाः समाः पूज्याः
समेषु द्वितयं नहि। विषमाप
व पूज्यावै विषमेषु त्रयं न हि
द्वारवती भवं चक्रं तथा वै ग
ण्डकीभवं। उभयोः संगमो यत्र
तत्र गंगा समुद्रगा॥ रूक्षाः कुर्व
ति पुरुषान् आयुः श्रीभि र्वि
वर्जितान्। तस्मात् स्निग्धा म
नोहारि रूपेण ददति श्रियं॥
आयुष्कामो नरोयस्तु धनकामो
पिवः पुमान्। पूजयन् सर्व मा
प्नोति पापं लौकिक मैहिकं॥
प्राणांतकाले तु यस्य भवेद्वा
क्यवल्लारूप। वाचि नाम हरेः
पुण्यं शिलाहृति स्वदंतिके॥
गच्छत्स्तु प्राणमार्गेषु यस्य वि
श्रमेता अपि चेत्। शालग्रामशि
लाम्मूर्ति स्तदा मुक्ति र्नसंशयः
पुराभगवता प्रोक्तं अंबरीषाय
धीमते। ब्राह्मणो न्यासिनो भ
क्ताः शालग्रामशिला मम। स्वरूप
त्रितयं मम मेतद्धि क्षितिमण्ड
ले। पापिनां पाप निर्वारे कर्तृ
भूत सुदुर्जनं। निंदंति पापिनो
ये वा शालग्रामशिलामहत्
कुंभीपाके पचंत्याशु यावदाहूत
संप्लवं॥ पूजांसकुर्यतेकंठे या

वारयति स्वरूधीः। तस्यमाता
पिता वंधुः सर्वे नरक गामिनः
योभवे कथयति श्रेष्ठे शालग्रा
माश्चैव कुरु। स कृतार्थो नय
स्माञ्च वैकुंठं स्वंत सर्वजैः ॥
इति चतुर्वेद ४ अध्यायः ॥
अन्यच्च श्रीईश्वर उवाच ॥ शा
लग्रामशिलायांतु त्रैलोक्यंस
चराचरं ॥ सदा वसति तेनात्र
विश्व स्तिष्ठति सर्वदा॥ शालग्रा
मशिला स्पृष्टा सकृद्रक्ष अज्ञानत
गंगाभिवमहापुण्यं चतुर्वर्गफ
लप्रदां ॥ स्नेहेन मनसा येन
स्थापिता पूजिता तथा। यज्ञको
टिसमं पुण्यं प्राप्नु तस्य प्रयच्छ
ति ॥ छिन्न स्नेन सहास्नेन गर्भवा
सः सुदारुणः। पीतं येन सदावि
ष्णोः शालग्रामशिलाजलं। का
माप्राकोपि यो नित्यं भक्तिभा
वविवर्जितः। शालग्रामशिलां
पश्येत् तस्यपापक्षयोभवेत् ॥
शालग्रामशिला विप्रहत्याको
टिविनाशिनी। स्मृता संकीर्ति
ताध्याता पूजिता चनमस्कृता
शालग्रामशिलां दृष्ट्वा यांति
पापानि देहिनां। सिंहं दृष्ट्वा यथा
यांतिवने मृगगणा भयात् तम

स्नात्वा तु यः कुर्य्यात् शालग्रा
मशिलार्च्चनं। भक्त्या वा यदि
वाभक्त्या समुक्तिं समवाप्नुयात्
यः सेवां कुरुते नित्यं शालग्राम
शिलाग्रतः। वैवस्वतान्नमयं तस्य
तस्यात्मरण जन्मनी ॥ शालग्राम
शिलाचक्रे पयो दधि घृतादिकैः
यः स्नापयति नूनं स कल्पको
टिं वसेद्दिवि॥ शालग्रामेनमस्का
रो भावेनापिचयैः कृतः। मान
वाः किं करिष्यंति महत्पापानिमही
तले ॥ महान्ति रणादपिष्टा स
त्सभुंत नमंतिये। वेसवा स्नेन
विज्ञेयास्तेषां महतः पापमो।
हिताः॥ शालग्रामशिला यत्र
तत्र पुत्र वसाम्यहं पूजितोऽहं
तेते मर्त्ये स्थापितश्चनतैर्नवैः
नकृतं मर्त्यलोकेयैः शालग्राम
शिलार्च्चनं ॥ किमर्च्चितेर्लिं
गाद्यैर्विलसभक्तिवहिष्कृतैः
शालग्रामशिलाचक्रं नार्च्चितं
यदि पुत्रक ॥ जन्मकोटिसह
स्रेण पूजितमपि यत्फलं ॥
तत्फलंसमवाप्नोति शालग्राम
शिलार्च्चनात्। अनर्घसमनैवे
द्यं पत्रं पुष्पं फलंजलं ॥ शाल
ग्रामशिलाद्वष्टं सर्वं यातिपवि।

त्तं नैवेद्यं मे न भोक्तव्यं शु
क्ता चंद्रायणं चरेत् ॥ भुक्त्वा
केशव नैवेद्यं कोटिभक्ति फ
लंलभेत्। सकृदभ्यर्च्चितो वि
ष्णुः शालग्रामशिलास्थितः ॥
ददाति विपुलां मुक्तिं सर्वसंगवि
वर्जितां। मल्लिंग कोटिभिर्दृष्टे
र्यत्फलं पूजितैः स्तुतैः ॥ तत्फ
लं समवाप्नोति शालग्रामैक
पूजनात्। शालग्रामशिलाचक्रे
योविद्वान् पश्यति ध्रुवं ॥ अ
ह्वैयेहसवो नित्यं तस्यपुण्यं नि
वोधमे। कोटिलिंगसहस्रैर्यै
स्पूजितैः जाह्नवीतटे ॥ काशी
वासाद्युगान्यष्टौ दिनेनैकेन त
द्भवेत्। तस्मात्कैवमद्भक्तैः
प्रीत्यर्थे मम पुत्रक ॥ कर्त्तव्यं स
र्वदा मर्त्यैः शालग्रामशिलार्च्चनं
शालग्रामशिलारूपी यत्र तिष्ठ
ति केशवः ॥ तत्र देवाः सुरा य
क्षा भुवनानिचतुर्दश ॥ शाल
ग्रामशिलाग्रे यैः सकृ[illegible]कृतं
भवेत् ॥ वसंति पितरस्तेषां वि
ष्णुलोकेन संशयः। येपिवंति
नरा नित्यं शालग्रामशिलाज
लं। पंचगव्यसहस्रैस्तुप्राशितैः
किं प्रयोजनं ॥ प्राय

श्चित्तसमुत्पत्ते किं दानैः किम
पोषणैः॥ चंद्रायणैः किंहि
तादृक् पीत्वा पादोदकं शुचिः
इति पाद्मे उत्तरखंडे ९२ अ
ध्यायः ॥ कलेर्दशसहस्रव
र्षानंतरं सच भारतं त्यक्त्वा
यास्यति। यथा। शालग्रामो ह
रेर्मूर्ति जगन्नाथश्च भारतं। क
लेर्दशसहस्रांते ययौ त्यक्त्वा ह
रेः पदं ॥ इति ब्रह्मवैवर्त्ते प्रकृति
खंडे ६ अध्यायः ॥ तस्योत्पत्ति
लक्षणादि यथा। तुलस्युवाच
हे नाथ ते दया नास्ति पाषाण
सदृशस्यच। छलेन धर्मभंगेन
मम स्वामी त्वया हतः। पाषा
णहृदयस्त्वं च दयाहीनो यतः प्रभो
तस्मात्पाषाणरूपस्त्वं भवेह
हे प्रभुना ॥ श्रीभगवानुवाच ॥
अहञ्च शैलरूपी च गण्डकीती
रसन्निधौ। अधिष्ठानं करिष्यामि
भारते तव शापतः ॥ वज्रकीटा
श्च कृमयो वज्रादंष्ट्राश्च तत्र वै।
तत् शिला कुहरे चक्रं करिष्यंति
मदीयकं। एकद्वारे चतुश्चक्रं
वनमाला विभूषितं। नवीनजी
रदाकारं लक्ष्मीनारायणाभिधं
। एकद्वारे चतुश्चक्रं नवीननीर

दीपनं लक्ष्मीजनार्दनं ज्ञेयंर
हितं वनमालया । हारहृये च
वत्सुकं गोष्पदेन समन्वितं
रघुनाथाभिधं ज्ञेयं वेष्टितं व
नमालया ॥ अतिक्षुद्रं द्विचक्रं
तु नवीननीरदप्रभं । दधिवामन
ञ्चविज्ञेयं गृहिणांचसुखप्रदं
अतिक्षुद्रं द्विचक्रंच वनमाला
विभूषितं । श्रीधरं देवि विज्ञेयं
श्रीप्रदं गृहिणां सदा । स्थूलञ्च
वर्त्तुलाकारं रहितं वनमालया
द्विचक्रंस्फुटमस्तं ज्ञेयं दामो
दराभिधं ॥ मध्यमे वर्त्तुलाकारे
द्विचक्रं वाण विक्षतं । रणरा
माभिधं ज्ञेयं शरतूण समन्वि
तं । चतुर्दश स्थूलञ्च नवीनज
लदप्रभं । अनन्ताख्यंच विज्ञेयं
चतुर्वर्गफलप्रदं । मध्यमं सम्च
क्रंच छत्रतूण समन्वितं राजराजे
श्वरं ज्ञेयं राजसंपत्करं नृणां ॥
चक्राकारं द्विचक्रञ्च सश्रीकं
जलदप्रभं । सगोष्पदं मध्यमे
च विज्ञेयं मधुसूदनं ॥ सुदर्शनं
म्बैकचक्रं शुभ्रचक्रं गदाधरं ।
द्विचक्रं हयवक्त्राभं हयग्रीवं
प्रकीर्त्तितं ॥ अतीवविस्तृतास्यं
च द्विचक्रं विकटं सति । नर ।

चक्रं

सिंहाभिधं ज्ञेयं सद्यो वैराग्य
दं नृणां ॥ द्विचक्रं विस्तृतास्यञ्च
वनमाला समन्वितं लक्ष्मीनृसिं
हं विज्ञेयं गृहिणां सुखदं सदा
द्वारदेशे द्विचक्रंच सश्रीकञ्च स
मस्फुटं । वासुदेवञ्च विज्ञेयं
सर्वकाम फलप्रदं । प्रद्युम्नं
सूक्ष्मचक्रंच नवीननीरदप्रभं ।
सुषिरे छिद्र बहुलं गृहिणाञ्च
सुखप्रदं । द्वे चक्रे चैकलग्ने तु
पृष्ठे यत्र तु पुष्कलं संकर्षणन्तु
विज्ञेयं सुखदं गृहिणां सदा ॥
अनिरुद्धंच पीताभं वर्त्तुलञ्चाति
शोभनं । सुखप्रदं गृहस्थानाम्
वदंतिमनीषिणः ॥ शालग्राम
शिलायत्र तत्र सन्निहितो हरिः ॥
तत्रैव लक्ष्मीर्वसति सर्वतीर्थसम
न्विता । यानि कानि च पापानि ब्र
ह्महत्यादिकानिच । तानिसर्वा
णि नश्यंति शालग्रामशिलार्च्च
नात् । छत्राकारे भवेद्राज्यं वर्त्तुले
च भवेत् श्रियः ॥ दुःखञ्च शक
टाकारे शूलाग्रे मरणं ध्रुवं ॥
विकृतास्ये च दारिद्र्यं पिङ्गले
हानिरेवच । लग्नचक्रे भवेद्धानि
र्विदीर्णे मरणं ध्रुवं ॥ व्रते
दाने प्रतिष्ठाच श्राद्धञ्च देवपूजने

शालग्रामशिलायाश्चैवाधिष्ठा
नात् पुष्कलं ॥ स्नातः सर्वती
र्थेषु सर्वयज्ञेषु दीक्षितः । सर्व
दानेच यत्पुण्यं प्रादक्षिण्ये भुव
स्तथा । सर्वयज्ञेषु तीर्थेषु व्रतेष्व
नशनेषुच । पाठेचतुर्णां वेदा
नां तपसां करणेसति । तत्पु
ण्यं लभते नूनं शालग्रामशि
लार्च्चनात् । शालग्रामशिला
तोयं नित्यं भुंक्तेच यो नरः ॥
सुरप्सितं प्रसादञ्च जन्म मृत्यु
जराहरं । तस्य स्पर्शञ्च वाञ्छंति
तीर्थानि निखिलानिच । जीव
न्मुक्तो महाशुद्धोऽन्ते याति ह
रेः पदं । तत्रैव हरिणा सार्द्धम
संख्यं प्राकृते लयं ॥ पश्यंत्येव
हि दास्येच नियुक्तो दास्यकर्म
णि । यानि कानि च पाप
नि ब्रह्महत्यादिकानिच ॥
तं दृष्ट्वाच भिया यांति वैनतेयमि
वोरगाः । तत्पादपद्म रजसा
सद्यः पूता वसुंधरा ॥ पुंसां ल
क्षं तत्पितृणां निस्तरेत्तस्य जन्म
नि । शालग्रामशिलातोयं मृत्यु
काले च यो लभेत् ॥ सर्वपा
प विनिर्मुक्तो विष्णुलोकं स ग
च्छति । निर्वाण मुक्तिं लभते

कर्मभोगाद्विमुच्यते । विष्णुपा
दप्रलीनश्च भविष्यति नसंश
यः । शालग्रामशिलां धृत्वामि
थ्यावाक्यं वदेत्तुयः । स याति
कूर्मदंष्ट्रञ्च यावद्वै ब्रह्मणोव
यः शालग्रामशिलां धृत्वा स्वी
कारं यो न पालयेत् । स प्रया
त्यसिपत्रञ्च लक्ष मन्वंतरावधि
तुलसीपत्र विच्छेदं शालग्रा
मे करोतियः । तस्य जन्मांतरे
कांतेस्त्रीविच्छेदो भविष्यति । तु
लसीपत्रविच्छेदं शंखे योहि
करोतिच । भार्य्याहीनो भवेत्सो
पि रोगीच सप्तजन्मसु । शाल
ग्रामंच तुलसीं शंखंचैकत्र एव
च । यो रक्षति महा ज्ञानी स भ
वेत् श्रीहरिप्रियः ॥ इति ब्रह्म
वैवर्त्ते प्रकृतिखंडे ९ अध्यायः
शूद्राणां तत्स्पर्शनेऽनधिकारो
यथा ॥ विप्र क्षत्रिय वैश्या
नां शालग्रामशिलार्च्चने ॥
अधिकारो नशूद्राणां हरेरर्च्चा
र्च्चने तथा ॥ इति तत्रैव जन्म
खंडे २१ अध्यायः ॥ शालग्रा
मे सदाविष्णोः स्थितिस्तत्पूज
ने विशेषश्च यथा । भूमि रु
वाच । उक्ता याः प्रतिमाः सर्वाः

सुवर्णादिविनिर्म्मिताः तास्तु ति
ष्ठन्ति सर्वास्तु शालग्रामेच सर्वदा
कलि पूज्या गृहादौच अविशेष
स्तु पूजने । विशेषो वाभवेत्त
न्मे रहस्यं वदमाधव ॥ वराह
उवाच गृहे लिंगद्वयंनार्च्यं
शालग्रामद्वयं तथा । द्वेचक्रे
द्वारकायास्तु नार्च्ये सूर्यद्व
यं तथा ॥ शालग्रामशिला
भग्ना पूजनीया सचक्रका । खं
डिता स्फुटिता वापि शालग्राम
शिलाशुभा । शिला द्वादश वै
देवि शालग्राम समुद्भवाः । विधि
वत्पूजिता येन तस्य पुण्यं वदा
मिते । कोटि द्वादश लिंगैस्तु पू
जितैः स्वर्णपंकजैः । यत्स्यात्
द्वादश कल्पस्तु दिनेनैकेन त
द्भवेत् । यः पुनः पूजयेद्भक्त्या शा
लग्रामशिलाशतं । तत्फलंने
वशक्तोहं वक्तुं वर्षशतैरपि ॥
शालग्रामो नस्प्रष्टव्यो हीनव
र्णै र्वसुंधरे । स्त्री शूद्र कर संस्प
र्शो वज्रस्पर्शाधिको मतः
मोहाद्यः संस्पृशेत् शूद्रो योषि
द्वापि कदाचन । सपतेन्नरकेघो
रे यावदाहूतसंप्लवं । यदिभक्ति
र्भवेत्तस्य स्त्रीणां वापिवसुंधरे

दूरादेवास्पृशन् पूजांकारयेत्
सुसमाहितः ॥ चरणामृतपा
नेन सर्वपापक्षयो भवेत् । अ
भक्ष्यं शिवनिर्माल्यं पत्रं पुष्पं
फलंजलं ॥ शालग्रामशिला
योगात् पावनं तद्भवेत् सदा ।
दद्याद्भक्तायोदेवि शालग्रा
मशिलां नरः सवर्णांसहितांसि
न्धुः सपर्वत वनाकरा । समस्
द्दाभवेद्दत्ता सत्यंयंवसुंधरे ॥
शालग्रामशिलायास्तु मौल्य
मुद्दिश्य यत्किंचित् । विक्रेता क्रय
कर्त्तावा नरकेनैव पतेत् ध्रुवं ॥
पूजाफलं न शक्यते वक्तुं वर्ष
शतैरपि । एतत्ते कथितं गुह्यं संप्र
तिमा स्थापनंप्रति ॥ शालग्रामे
विशेषस्य लिंगादीनाञ्च योभ
वेत् । पूजनादौ विधिश्चापि कि
मन्यच्छ्रोतुमिच्छसि । इत्यादि
वाराहे रौप्य सौवर्णार्च्चा स्था
पन नामाध्यायः ॥ अथशा
लग्रामशिलामूर्त्ति निरूपणं ॥
चतुर्विंशति मूर्त्तिः स शालग्रा
मशिलास्थिति । द्वारकादि शि
लासंख्या ध्येयः पूज्यो ऽपि वा
हरिः । मनसोऽभीप्सितं प्राप्य
देवो वैमानिको भवेत् ॥

निष्कामो मुक्तिमाप्नोति मूर्ती
र्ध्यायं स्तवन् जपन् ॥ इत्यादि
गारुडे मूर्त्तिमूर्त्तिध्याने षष अ
ध्यायः । अपिच शंख चक्र ग
दापद्मी केशवाख्यो गदाधरः
साब्ज कौमोदकी चक्र शंखीना
रायणोविभुः ॥ सचक्रशंखाब्जग
दोमाधवः श्रीगदाधरः । गदाब्ज
शंख चक्रीवा गोविंदाख्यो गदा
धरः ॥ पद्मशंखासि गदिने विष्णु
रूपाय वैनमः । शंखाब्ज चक्रग
दिने नमः संकर्षणायच । सुशं
खसुगदाब्जाविष्टते प्रद्युम्नमूर्तये
नमोऽनिरुद्धाय गदा शंखाब्ज
विधिधारिणे । नमो गदासि शं
खाब्जयुक्तस्त्रैविक्रमायच । सासि
कौमोदकीपद्म गदिने वामनमू
र्तये ॥ चक्राब्ज शंखगदिने नमः
श्रीधर मूर्तये । हृषीकेश सासि
गदा शंख पद्मिन्नमोनमः ॥ सा
ब्ज शंख गदा चक्र पद्मनाभस्व
रूपिणे । दामोदरः शंख गदा च
क्र पद्मिन्नमोनमः ॥ सासि शंख
गदाब्जाय वासुदेवाय वै नमः ।
शंखाब्जचक्र गदिने नमः संकर्ष
णायच । साब्ज शंख गदा चक्र
पुरुषोत्तम मूर्तये । नमो ऽधो ·

क्षज रूपाय गदा शंखासिप
द्मिने ॥ नृसिंह मूर्तये पद्मग
दाशंखाब्ज धारिणे । पद्माब्ज
शंखगदिने नमोस्त्वच्युत मूर्त
ये । सशंख चक्राब्ज गदं जना
र्दन मिहानमे । उपेंद्र सगदं सासिं
पद्म शंखिन्नमोनमः । सचक्राब्ज
गदा शंख युक्ताय हरिमूर्तये
सगदाब्जासिशंखाय नमः श्रीकृ
ष्णमूर्तये । शालग्राम शिला द्वार
गत लग्न द्विचक्रयुक् । शुक्ला
भोवासुदेवाख्यः सोऽव्याद्वः श्री
गदाधरः । लग्न द्विचक्रो रक्ताभः
पूर्वभागे तु पुष्कलः । संकर्षणो
ऽथप्रद्युम्नः सूक्ष्म चक्रस्तु पीतकः
सदीर्घ शुषिर छिद्रो योऽनिरुद्ध
स्तु वर्तुलः । नीलो द्वारि त्रिरेख
श्च अथ नारायणोऽसितः ॥
मध्ये गदाकृती रेखा नाभि च
क्रमहोन्नतः । पृथुचक्रो नृसिं
होय कपिलोऽव्यात् त्रिबिंदुकः
अथवा पंचबिंदुस्तत् पूजनं ब्र
ह्मचारिणः । वराहः शक्तिलिंगो
ऽव्याद्विषमद्वयचक्रकः । नील
स्त्रीरेखः स्थूलाथकूर्ममूर्तिः स
बिंदुमान् । कृष्णः सवर्तुलावर्तः पा
तुवोन्नत पृष्ठकः । श्रीधरः पंचरे

खोऽव्याहतमाली गदान्वितः ॥ वामनो वर्तुलो ह्रस्वो वामचक्रः सुरेश्वरः । नानावर्णोऽनेकमूर्त्तिर्नागभोगी त्वनंतकः । स्थूलो दामोदरो नीलो मध्ये चक्रः सुनीलकः । संकीर्णो द्वारको वोः व्यादय ब्रह्मा स्वलोहितः । सुदीर्घरेखः सुषिर एकचक्रांबुजेऽपृथुः । पृथुच्छिद्रस्थूलचक्रः कृष्णो बिन्दुश्च विन्दुवत् । हयग्रीवोंऽकुशाकारः पंचरेखः सकौस्तुभः । वैकुंठामणिरत्नाभ एकचक्रांबुजोऽसितः । मत्स्यो दीर्घोऽम्बुजाकारो द्वाररेखश्च पातु वः । वामचक्रो दक्षरेखः श्यामो यो ऽव्यात्त्रिविक्रमः । शालग्रामे द्वारकायां स्थिताय गदिने नमः । एकेन लक्षितो योऽव्याद्गदाधारी सुदर्शनः । एकद्वारे चतुश्चक्रे वनमालाविभूषिते । स्वर्णरेखा समायुक्ते गोष्पदेन विराजिते । कदंबकुसुमाकारे लक्ष्मीनारायणं विदुः । लक्ष्मीनारायणोऽव्यान्मां विभिर्मूर्त्ति स्त्रिविक्रमः । चतुर्भुजश्चतुर्व्यूहो वासुदेवश्च पंचभिः प्रद्युम्नः षड्भिरेव स्यात् संकर्षणाद्गत स्ततः । पुरुषोत्तमो ऽष्टभिः स्यान्नवव्यूहो नरोन्नतः ॥ दशावतारो दशभि रनिरुद्धो ऽवनादश द्वादशात्मा द्वादशभि रत ऊर्द्ध्वमनंतकः ॥ विष्णो र्मूर्त्तिमयं स्तोत्रं यः पठेत् स दिवं ब्रजेत् । इति गारुडे ४५ अध्यायः ॥ अपरंच हरिरुवाच । निलक्षणा शुभा स्याच्च चक्रांकित शिलार्चनात् आदौ सुदर्शनो मूर्त्तिर्लक्ष्मीनारायणो ऽपरः । त्रिचक्रोऽसावच्युतः स्याच्चतुश्चक्र श्चतुर्भुजः ॥ वासुदेवश्च प्रद्युम्न स्ततः संकर्षणः स्मृतः । पुरुषोत्तमोऽष्टमः स्यान्नवव्यूहो दशात्मकः । एकादशो ऽनिरुद्धः स्याद् द्वादशो द्वादशात्मकः । अत ऊर्द्ध्व मनंतः स्याच्चक्रे रेकादिके क्रमः ॥ सुदर्शनाद्या लक्षिताश्च पूजिताः सर्वकामदाः । शालग्रामशिला यत्र देव द्वारवती भव । उभयोः संगमो यत्र तत्र मुक्ति र्न संशयः ॥ इति गारुडे ६५ अध्यायः ॥ शालग्रामः पुं क्षेत्रविशेषः । यथा । धरण्युवाच । भगवन् देवदेवेश शालंकायनो मुनिः । किं चकार तपः कुर्वन् तव क्षेत्रे विमुक्तिदे । वाराह उवाच । अथ

दीर्घेण कालेन स ऋषिः संशितव्रतः । तप्यमानो यथान्यायं यद्यपते शालमुत्तमं । विश्रामे कुरुते तत्र दृष्टकामोऽयमो मुनिः । मायया मम मूढात्मा शक्तो दृष्टुंनमा मभूत् ॥ ततः पूर्वेण पार्श्वेन तस्य शालस्य सुन्दरि । वैशाखमास द्वादश्यां मद्दर्शनमुपागतः ॥ दृष्टमांतत्र समुनिस्तपस्वी संशितव्रतः । तुष्टाव वैदिकैः सूक्तैः प्रणम्य च पुनः पुनः । ततोऽहं स्तूयमानो वै ऋषिमुख्येन सुन्दरि । प्राप्तोऽस्मि परमां प्रीतिं तमवोचं ततोऽनृषिं ॥ तवाश्रमे महाभाग स्थित्वा ह्ये तपसोनिधे । मन्त्रेण परमप्रीतो मत्क्षेत्रे मत्समो भव । अमच्च गृहेऽवसामि शालंकायन तद्गुणे । तवप्रीत्या प्रवसामि येनैतत्क्षेत्र मुत्तमं ॥ शालग्राम मिति ख्यातं तत्रैवोप मुने शुभे । योऽयं वृक्षस्तथाद्दृष्टः सोऽहमेव न संशयः एतत् कोपिन जानाति विनादेवं महेश्वरः । एवं तस्मै वरं दत्वा शालंकायनकाय वै । पश्यत स्तस्य वसुधे तत्रैवांतर्हितोऽभवं । वृक्षं दक्षिणतः कृत्वा जगाम स्वाश्रमं मुनिः मम तत्रोचते स्थाने गिरिकूट शिलोच्चये । शालग्राम इति ख्यातं भक्त संसारमोक्षणं इति वाराहे शालग्रामक्षेत्रमाहात्म्यवर्णन नामाध्यायः ॥ शालग्रामगिरिः पुं शालग्रामोत्पादकपर्वतः । यथा । वाराह उवाच । कथयिष्यामि ते गुह्यं शालग्राम मिति श्रुते । तस्मिन् क्षेत्रे हरो देवो मत्स्वरूपेण संयुतः । शालग्रामगिरौ तस्मिन् शिलारूपेण तिष्ठति । अहं तिष्ठामि तत्रैवाहि विरूपेण निम्नदा । तस्मिन् शिलाः समग्रास्तु मत्स्वरूपा न संशयः । पूजनीयाः प्रयत्नेन किं पुन श्चक्रलाञ्छिताः लिंगरूपेण तु हर स्तत्र देवालयेगिरौ । शिवनाभाः शिला स्तत्र चक्रनाभा स्तथा शिलाः ॥ सोमेश्वराधिष्ठितस्तु शिवरूपोगिरिः स्मृतः । शालग्रामगिरि र्विष्णु र्हरे सोमेश्वराधिपः ॥




तयोः पर्वतयो र्यौ वै शिलावि
सुशिलाभिधाः। देवयाचकृतं
एवं तपःशिव सुदुष्करं। मम
त्वत्सदृशः पुत्रो भूयादिति वि
यो तया। अहं कस्यापि न सुतः
किं करिष्यामि चिंतयन्। देवाया
स्तु वरो देयस्त्वया यं मया लाञ्छ
न निश्चिन्तैवं तदा प्रोक्तं प्रसन्ने
नांतरात्मना। लिंगरूपेण ते
देवि गंडान्तः पुरस्कृतः गर्भेत
व वसिष्यामि पुत्रो भूत्वा शिव
प्रिये। मम त्वमपरा मूर्त्तिः ख्या
ता जलमयी शिवा। शिवश
क्ति विभेदेन श्रावामेकत्र संस्थि
तौ। एवं दत्तवरा देवा मत्वा
त्रिधा सिहागता। देवा स्वण्ड
मिति ख्यातं ततः प्रभृति गोप
ते। गंडकापि पुरा तप्त्वा वर्षा
णां मयुतं द्विये। शीर्णपर्णाशना
मेकृत्वा वायुभक्षाप्यनंतरं दिव्य
वर्षशते तेपे चिंतयन्ती तदा। त
तः साक्षाज्जगन्नाथो हरि र्भक्त
जनप्रियः॥ उवाच मधुरं वा
क्यं प्रीतः प्रणतवत्सलः॥ ग
गंडकि त्वं प्रसन्नोऽस्मि तपसा वि
स्मिते ऽनघे॥ अनवच्छिन्नया
शक्त्या वरं वरय सुव्रते। किं

देयं तदहं त्वाशु प्रीतोऽस्मि वरव
र्णिनि। गंडकापि पुरो दृष्ट्वा
शंखचक्रगदाधरं। दंडवत् प्रण
ता भूत्वा तत स्तोत्रं प्रचक्रमे॥
अहो देव मया दृष्टो दुर्दर्शो यो
गिनामपि। त्वया सर्वं मिदं सृ
ष्टं जगत्स्थावरजंगमं। ततो हि
संतुष्टा सा देवी गंडकी लोक
तारिणी। प्राञ्जलिः प्रणताभू
त्वा मधुरं वाक्य मब्रवीत्। यदि
देव प्रसन्नोऽसि देयो मे वाञ्छितो
वरः। मम गर्भगतो भूत्वा विष्णो
मत्सुतो भव। ततः प्रसन्नो भ
गवान् चिंतयामास गोपते॥
किं याचितं निम्नगया निःसंशयत
संगात्लुब्धया। दास्यामि याचि
तं येन लोकानां भवमोचनं।
इत्येवं कृपया देवो निश्चित्य स
नसा स्वयं॥ गंडकी सम्भव
त्वीतः शृणु देवि वचो मम शा
लग्रामशिलारूपी तव गर्भग
तः सदा। तिष्ठामि तव पुत्रत्वे
भक्तानुग्रहकारणात्। मत्सा
न्निध्यान्नदीनां त्वं मतिश्रेष्ठा भवि
ष्यसि। दर्शनात् स्पर्शनात् स्ना
नात् पानाच्चैवावगाहनात्। ह
रिष्यसि महापापं वाङ्मनःकाय

संभवे॥ इति वाराहे सोमेश्वरा
दिलिंगमहिमांमुक्तिक्षेत्रविवे
णादिमहिमानामाध्यायः॥
शालंकटकटः पुं सुकेशी रा
क्षसः। स विद्युत्केशिभार्य्या
शालंकटकटायाः पुत्रः॥ इति
वामनपुराणं॥
शालंकायनः पुं मुनिविशेषः
नंदी। इति मेदिनी॥
शालंकायनजीवसूः स्त्री व्यास
माता। यथा व्यासस्याम्बा सत्य
वती वासवी गंधकालिका। यो
जनगंधा दासेयी शालंकायन
जीवसूः। इति हेमचंद्रः।
शालंकिः पुं मुनिभेदः। यथा
वशिष्ठः कृष्णनीलाख्या मैत्राव
रुणिरित्यपि। शालातुरीयः
शालंकि दाक्षीपुत्रस्तु पाणिनिः
इति जटाधरः॥
शालजः पुं शालमत्स्यः। य
था शालः शालज गर्जकौ।
इति शब्दरत्नावली॥
शालनिर्यासः पुं सर्जरसः। धु
ना इति भाषा। तत्पर्यायः।
शालनः २ सर्जः ३ सर्जरसः ४
इति रत्नमाला। धूनकः ५ वह्निव
ल्लभः ६ सर्जमणिः ७ इति त्रिकांड

शेषः॥
शालपर्णी स्त्री वृक्षविशेषः
शालपाणी इति भाषा। तत्प
र्यायः। सुदला २ सुपत्री ३
स्थिरा ४ सौम्या ५ कुमुदा ६
गुहा ७ ध्रुवा ८ विदारिगंधा ९
अंशुमती १० सुपर्णिका ११ दीर्घ
मूला १२ दीर्घपत्रिका १३ वातघ्नी
पीतनी १५ तन्वी १६ सुधा १७ स
वानुकारिणी १८ सोफघ्नी १९
सुभगा २० देवी २१ निश्चला २२
त्रीहिपर्णिका २३ सुमूला २४ सु
रूपा २५ शुभपत्रिका २६ सुपर्णी
शालिपत्री २८ शालिदला २९
इति राजनिर्घण्टः। विदारी ३०
सालपर्णी ३१ इत्यमरटीकायां
भरतः। अस्या गुणाः। ग्राहित्वं
कफ पित्त नाशित्वञ्च। इति
राजवल्लभः। तिक्तत्वं। गुरु
त्वं। उष्णत्वं। वातदोष विष
मज्वर मेहार्शः शोफ संता
पनाशित्वञ्च। इति राजनिर्घ
ण्टः॥ अपिच। शालपर्णी स्थि
रा सौम्या त्रिपर्णी पीवरा गु
हा। विदारिगंधा दीर्घाङ्घ्री दी
र्घपत्रांशुमत्यपि। शालपर्णी
गुरुश्छर्दिज्वर श्वासातिसारजि
त्। शोष



दोष यत्र हरी बृंहणशुक्रा रसा
यनी। तिक्ता विषहरी स्वादुः च
त कास क्रमि प्रणुत्। इति
भावप्रकाशः ॥
शालभञ्जिका स्त्री वेश्या। का
ष्ठादिनिर्म्मितपुत्त्रिका। इति ज
टाधरः ॥
शालभञ्जी स्त्री काष्ठादिनिर्म्मि
तपुत्त्रिका। इति हेमचन्द्रः ॥
शालवः पुं लोध्रः। इति श
ब्दरत्नावली ॥
शालवेष्टः पुं शालनिर्य्यासः।
इति त्रिकाण्डशेषः ॥
शालसारः पुं क्रमः ॥ हिङ्गुः
इति विश्वः ॥
शाला स्त्री गृहं। इत्यमरः ॥
वृक्षस्य स्कन्धशाखा। गृहैकदे
शः। इति मेदिनी ॥
शालाकी पुं शस्त्रवैद्यः। नापि
तः ॥ शैलधारी ॥ इति
केचित् ॥
शालाङ्की स्त्री पुत्तलिका। इति
शब्दरत्नावली ॥
शालाजिरः पुं क्ली शरावः। इति
हेमचन्द्रः शब्दरत्नावली च ॥
शालाञ्चिः शाकभेदः ॥ इति
शब्दरत्नावली ॥

शालानी स्त्री विदारी। इति शब्द
रत्नावली ॥
शालामृगः पुं शृगालः। इति
हारावली ॥
शालारं क्ली हस्तिनखः। सो
पानं ॥ पक्षिपञ्जरः। इति मे
दिनी ॥
शालावृकः पुं वानरः। कुक्कुरः
शृगालः। इत्यमरः ॥ मृगः
इति शब्दरत्नावली। विडालः
इति राजनिर्घण्टः ॥
शालिः पुं गन्धमार्ज्जारः। इति
मेदिनी। कलमादिधान्यं ॥
षष्टिकादिधान्यं। इत्यमरः ॥
तत्पर्य्यायः। मधुरः २ रुच्यः ३
व्रीहिश्रेष्ठः ४ नृपप्रियः ५ धा
न्योत्तमः ६ कैदारः ७ सुकुमार
कः ८। पुस्तकान्तरे मधुरस्थाने
कलम इति पाठः। स तु द
शविधः। यथा। राजान्नषष्टिक
सितेतर रक्त मुण्ड स्थूलाण्ड गौ
धर्त्तिर्यादिक शालिसंज्ञाः व्री
हि स्थ्येति दशधा भुवि शाल
यः स्युः लेषां क्रमेण गुण नाम ग
णं ब्रवीमि। इति राजनिर्घण्टः॥
अस्य गुणाः। शालयो मधुराः
शीता लघुपाका बलावहाः ॥

पित्तघ्ना स्वानिल कफाः स्नि
ग्धा बद्धाल्पवर्च्चसः ॥ इति राजव
ल्लभः ॥ अथ शालिधान्यलक्ष
णं। कण्डनेन विना शुक्ला हैमन्ताः
शालयः स्मृताः। शालीनां ना
मानि यथा रक्तशालिः सकल
मः पाण्डुकः शकुनाहृतः। सुग
न्धकः कर्द्दमको महाशालिश्च दूष
कः ॥ पुष्पाण्डकः पुण्डरीकस्तथा
महिषमस्तकः। दीर्घशूकः काञ्च
नको हायनो लोध्रपुष्पकः ॥ इ
त्याद्याः शालयः सन्ति बहवो बहुदे
शजाः ॥ अथ तेषां गुणाः ॥
शालयो मधुराः स्निग्धा बल्या
बद्धाल्पवर्च्चसः। कषाया लघवो
रुच्याः स्वर्य्या वृष्याश्च बृंहणाः।
अल्पानिल कफाः शीताः पित्त
घ्ना मूत्रला स्तथा। शालयो दग्धभू
जाताः कषाया लघुपाकिनः ॥
सृष्ट मूत्र पुरीषाश्च रूक्षाः श्ले
ष्मापकर्षणाः। केदारा वातपि
त्तघ्ना गुरवः कफ शुक्रलाः। क
षाया अल्पवर्च्चस्का मेधाश्चैव ब
लावहाः। केदाराः कृष्टक्षेत्रजा
उप्ताः। स्थलजाः स्वादवः पित्त
कफघ्ना वात वह्निदाः। किंचित्ति
क्ताः कषायाश्च विपाके कटुका

अपि। स्थलजा अकृष्टभूमिजाः
स्वयं जाताः। वापिता मधुरा
वृष्या बल्याः पित्त प्रणाशनाः।
श्लेष्मलाश्चाल्पवर्च्चस्काः कषा
या गुरवो हिमाः वापिताः कृष्ट
क्षेत्रे अकृष्टक्षेत्रे च। वापितेभ्यो
गुणैः किञ्चिद्धीनाः प्रोक्ता अ
वापिताः ॥ कृष्टक्षेत्रे अकृष्ट
क्षेत्रेच ॥ रोपितास्तु नवा
वृष्याः पुराणा लघवः स्मृताः
रोपितारोपिता भूयः शीघ्रपा
का गुणाधिकाः ॥ छिन्नरू
ढा हिमा रूक्षा बल्याः पित्त क
फापहा। बद्धविट्काः कषाया
श्च लघवः श्चाल्पतिक्तकाः ॥
अथ रक्तशालेर्गुणाः। रक्तशा
लिर्वरः स्तेषु बल्यो वर्ण्यस्त्रिदो
षजित्। चक्षुष्यो मूत्रलः स्वर्य्यः
शुक्रलः तृट् ज्वरापहः ॥ विष
व्रण श्वास कास दाहनुद्वह्नि
पुष्टिदः। तस्मादल्पान्तर गुणाः
शालयो महदादयः। रक्तशा
लिः दाउदखानी इति भाषायां प्र
सिद्धः। इति भावप्रकाशः ॥
शालिका स्त्री विदारिका। इ
ति शब्दरत्नावली ॥
शालिंचः पुं शाकविशेषः। शा



ख्या इति भाषा । तत्पर्य्यायः
शालञ्चः २ शितसारः ३ पत्र
केषः ४ लोहमारकः ५ अस्य
गुणाः दीपनत्वं तिक्तत्वं । प्ली
हार्शः कफ वात नाशित्वञ्च
इति राजनिर्घण्टः ॥

शालिनीकरणं क्ली न्यग्भावने
इति त्रिकाण्डशेषः । तिरस्का
र इति यावत् ॥

शालिपर्णी स्त्री माषपर्णी ।
इति राजनिर्घण्टः ॥

शालिपिष्टं क्ली स्फटिकं । इति
त्रिकाण्डशेषः ॥

शालिवाहनः पुं राजविशेषः
स तु शककर्त्ता विक्रमादित्य
शत्रुश्च ॥

शालिहोत्रः पुं घोटकः । इति
त्रिकाण्डशेषः ॥

शाली न त्रि शालासंबंधिः ॥ य
द्योते युक्तवाचकः । यथा चंद
न चर्च्चितनीलकलेवर पीतवस
न नवमाली । केलि चलन्मणि
कुण्डल मण्डित गण्डयुगस्मित
शाली । इति जयदेवः ॥

शाली स्त्री कृष्णजीरकः ॥
इति राजनिर्घण्टः ॥

शालीनः त्रि अधृष्टः । इत्यमरः
शालासम्बन्धीच ॥

शालीना स्त्री मिश्रेया । इति
राजनिर्घण्टः ॥

शालु क्ली शालूकं । इति शब्द
रत्नावली ॥

शालुः पुं कषायद्रव्यं । चोर
काख्यौषधिः । इति मेदिनी ॥
भेकः । इति हेमचन्द्रः ॥

शालूकं क्ली कुमुदादिमूलं । त
त्पर्य्यायः । पंकसूरणं २ शालूकः
३ शालु ४ इति शब्दरत्नावली ।

शालूकं क्ली कुमुदादिमूलं । इत्य
मरः ॥ जातीफलं । इति राज
निर्घण्टः ॥

शालूकः पुं मण्डूकः इति राज
निर्घण्टः । कुमुदादिमूलं । इति
त्रिकाण्डशेषः ॥

शालूरः पुं भेकः । इत्यमरः ॥

शालेयः पुं मधुरिका ॥ इत्य
मरः ॥

शालेया स्त्री मिश्रेया । इति
राजनिर्घण्टः ॥

शालेयं त्रि शाल्युद्भवक्षेत्रं ॥
इत्यमरः शालसंबंधि शालस्य
स्वन्धिच ॥

शालोत्तरीयः पुं पाणिनिमुनिः
इति त्रिकाण्डशेषः ॥

शाल्मलः पुं शाल्मलीवृक्षः । इ
ति शब्दरत्नावली । द्वीपविशेषः
इति शब्दमाला । तद्विवरणं
यथा । अत ऊर्द्ध्वं प्रवक्ष्यामि शा
ल्मलस्य निबोधत । शाल्मलो
द्विगुणो द्वीपः क्रौंचद्वीपस्य
विस्तरात् । परिवार्य्य समुद्रन्तु
दधिमंडोदकं स्थितः । तत्र पु
ण्यजनपदा श्चिराच्च म्रियते ज
नः । कुत एवं सदुर्भिक्षं क्षमा
तेजोयुता हिते । प्रथमः सूर्य्य
संकाशः सुमना नाम पर्वतः
पीतस्तु मध्यम स्तत्र शातकौ
म्भमयो गिरिः । नाम्ना सर्व
सुखोनाम दिव्यौषधि समन्वि
तः ॥ तृतीयश्चैव सौवर्णो भृ
ङ्गपत्रनिभो गिरिः । स नाम्ना
रोहितो नाम दिव्यो गिरिव
रो महान् ॥ सुमनाः कुशलो
देशः सुखोदर्कः सुखोदयः
रोहितस्तु तृतीयस्तु रोहिणी
नाम विश्रुतः । तत्र रत्नान्य
नेकानि स्वयं रक्षति वासवः
प्रजापतिमुपादाय प्रसन्नो वि
धिवत्स्वयं । न तत्र नद्यो वर्ष
न्वा प्रीतोऽसमस्त्रैव तद्धितं । वर्णा
श्रमाणां वार्त्ता वा त्रिषु द्वीपेषु
विद्यते । न गृहे नचदंडोऽस्ति
ईर्ष्यासूया भये तथा । उद्भिदा
न्युदकान्यत्र गिरि प्रस्रवणानि
च । भोजनं षड्रसं तत्र तेषांस्वय
मुपस्थितं । अधमोत्तमो न तेष्व
स्ति न लोभो न परिग्रहः ॥ आ
रोग्याबलवंतश्च एकांत सुखि
ताः प्रजाः । त्रिंशद्वर्षसहस्राणि
मानसी सिद्धि मास्थिताः । सुख
मायुः स्वरूपंच धर्म्माधर्म्मौ तथै
वच शाल्मलाद्येषु विज्ञेयं द्वी
पेषु त्रिषु सर्वशः । व्याख्यातः
शाल्मलाद्यानां द्वीपानांतु वि
धिः शुभः । परिमंडलस्तु सद्वीपश्च
क्रवत् परिवेष्टितः ॥ सुरोदेन
समुद्रेण द्विगुणेन समन्वितः
इति मत्स्यपुराणे भुवनकोषे
सप्तद्वीपनिवेशानं नाम ९० अ
ध्यायः ॥ अपिच प्लक्षद्वीपप्र
माणाच्च द्विगुणेन समन्ततः
संवेष्टितः सुरासाम्भोधिं शाल्म
लिः संव्यवस्थितः । सप्त वर्षाणि
तत्रैव तत्रैव कुलपर्वताः । ज्ञ
ज्ञायताः सुपर्वाणः सप्त नद्य
श्चसप्तताः । कुमुद श्चोन्नत श्चै
व द्वितीयश्च बलाहकः । द्रोणः क
ङ्कस्तुमहिषः ककुद्वान्सप्तपर्वताः

ल

यो नितेया विश्वहाच चन्द्रा-
शुक्ला विमोचनी। निवृत्तिः श्चे-
ति ता नद्यः स्मृताः पापहराः
शिवाः। न तेषु विद्यते लोभः
क्रोधो वा द्विजसत्तमाः। न चै-
वास्ति युगावस्था जनाजीवेंस-
नामयाः। यजंति सततं तत्र
वर्णा वायुं सनातनं। तेषां त-
स्याश्च सायुज्यं सारूप्यंच स
लोकता। कपिला ब्राह्मणाः
प्रोक्ता राजानश्चारुणास्तथा
पीता वैश्या स्तथा कृष्णा द्वीपे
अस्मिन् वृषला द्विजाः। इति
कौर्म्मे भुवनविन्यासे ४९ अ-
ध्यायः। मोचरसः॥ इति
रत्नमाला॥

शाल्मलिः पुं स्त्री वृक्षविशेषः
शिमुल इति भाषा तत्पर्य्यायः
पिच्छिला २ पूरणी ३ मोचा ४
स्थिरायुः ५ इत्यमरः दुरारोहा
६ शाल्मलिनी ७ शाल्मलः
८ इति शब्दरत्नावली तूलि-
नी ९ कुक्कुटी १० रक्तपुष्पा ११
कंटकारी १२ मोचनी १३ इ-
ति जटाधरः। चिरजीवी १४
पिच्छिलः १५ रक्तपुष्पकः
१६ तूलवृक्षः १७ मोचाख्यः १८
कण्टकद्रुमः १९ रक्तोत्पलः २०
रम्यपुष्पः २१ बहुवीर्य्यः २२ यम-
द्रुमः २३ दीर्घद्रुमः २४ स्थूलफ-
लः २५ दीर्घायुः २६ इति राज-
निर्घण्टः। कण्टकाष्ठः २७ इ-
ति भावप्रकाशः। अस्य गुणाः
पिच्छिलत्वं। वृष्यत्वं। बल्यत्वं।
मधुरत्वं शीतलत्वं कषायत्वं।
लघुत्वं। स्निग्धत्वं। शुक्र श्ले-
ष्मवर्द्धनत्वञ्च तद्रस गुणाः ग्रा-
हित्वं। कषायत्वं कफनाशित्वं
च तत्पुष्पं फलञ्च तद्विधं। इति
राजनिर्घण्टः। शाल्मली शीत-
ला स्वाद्वी रसे पाके रसायनी
श्लेष्मला स्निग्ध वीजा चेद्वृं-
हणीरजपित्तजित्॥ शाल्मली-
पुष्पशाकन्तु घृत सैंधव साधि-
तं प्रदरं नाशयेत्यव दुःसाध्यंच
नसंशयः। रसे पाकेच मधुरं
कषायं शीतलं गुरु॥ कफ-
पित्तास्रजिद्ग्राहि वातलंच प्र-
कीर्त्तितं। इति भावप्रकाशः
नरकविशेषः॥ यत्र शाल्म-
लिकण्टकैः पीड्यंते॥

शाल्मलिकः पुं रोहितकवृक्षः
इति राजनिर्घण्टः॥

शाल्मलिनी स्त्री शाल्मलिवृक्षः

इति शब्दरत्नावली॥

शाल्मलिपत्रकः पुं सप्तच्छद-
वृक्षः॥ इति राजनिर्घण्टः॥

शाल्मलिस्थः पुं गरुडः। इति
राजनिर्घण्टः॥

शाल्मली स्त्री शाल्मलिवृक्षः
इत्यमरः। शालति देशात् दूरं
गच्छति शाल्मलिः। शालज्वा
लौनाद्यीति मलिन वृद्धिः। द्वयो
स्त्रिके स्त्रीपक्षेपाक्षेणादौ
ति ईपि शाल्मलीच्च शाल्मलिश्च
तिकेचित् तन्मते विभाषयावृ-
द्धिः। शाल्मली रक्तपुष्पाच कुक्कु-
टी चिरजीविका इति कोषांतर-
मिति मुकुटः। इत्यमरटीकायां
भरतः॥

शाल्मलीस्थः पुं गरुडः। इति त्रि-
काण्डशेषः॥

शाल्मलीकन्दः पुं शाल्मलिवृ-
क्षमूले। तत्पर्य्यायः। विज्जुलः २
वनवासकः ३ वनवासी ४ मल-
घ्नः ५ मलहंता ६ अस्यगुणाः॥
मधुरत्वं मलसंग्रहरोधजयका-
रित्वं शिशिरत्वं। पित्तदाहार्त्ति
शोफ संतापनाशित्वञ्च।
इति राजनिर्घण्टः॥

शाल्मलीफलः पुं तेजःफलवृक्षः
इति राजनिर्घण्टः॥

शाल्मलीवेष्टः पुं शाल्मलिनि-
र्यासः। शिमुलआठा इति भाषा
तत्पर्य्यायः पिच्छा २ इत्यमरः
मोचरसः ३ शाल्मलः ४ शा-
ल्मलीवेष्टकः ५ इति रत्नमा-
ला॥ मोचस्रावः ६ मोचनि-
र्यासः ७ अस्यगुणाः। मोच-
स्रावो हिमो ग्राही स्निग्धो
वृष्यः कषायकः। प्रवाहिका-
तिसारामकफ पित्तास्रदाहनु-
त्॥ इति भावप्रकाशः॥

शाल्मलीवेष्टकः पुं शाल्मलीवे-
ष्टः। इति रत्नमाला॥

शाल्वः पुं देशविशेषः। यथा
शाल्वास्तु काकुत्सीया मरव-
स्तदेशबकाः। इति हेमचंद्रः॥
राजविशेषः। इति महाभारतं
शावः पुं शिशुः। इति शब्द-
रत्नावली। शावसंबोधिनि त्रि
यथा गृहाणे शाव मोक्षेणचे वि-
मुक्तो सौतिके स्मृतं तयोःस-
म्यति मासेन उपसृष्य कि-
याक्रमः। इति तिथ्यादितत्त्वे ब्र-
ह्माण्डपुराणं॥

शावकः पुं शिशुः। इत्यमरः

शावरः पुं पापं। अपराधः॥

लोध्रवृक्षः इति मेदिनी ॥
शाबरस्वामिकृतभाष्यविशेषः
शिवकृततन्त्रविशेषश्च । शाबर
सम्बन्धिनि त्रि यथा संप्रेष्य
प्रेषणं कुर्य्यात् दशम्यां शाव
रोत्सवे इति तिथ्यादितत्त्वं ॥
शाबरभेदाख्यं क्ली ताम्रे इति
हेमचन्द्रः ॥
शाबरी स्त्री शूकशिम्बी इति
मेदिनी ॥
शाबरोत्सवः पुं म्लेच्छकृतो
त्सवः यथा । एकयित्वा म
हाष्टम्यां नवम्यां बलिभिस्तथा
विसर्ज्जयेत् दशम्यां तु श्रवणे
शाबरोत्सवैः धूलिः पादादि
वाभ्यासे श्रवणस्य यदा भवे
त् तदा संप्रेषणं देव्या दशम्यां
शाबरोत्सवैः । कामिनीभिः कु
मारीभिः वेश्याभिर्नर्त्तकैस्त
था । शङ्खतूर्य्यनिनादैश्च
मृदङ्गैः पटहैस्तथा । ध्वजै
र्वस्त्रैर्विविधैर्लाजपुष्पप्र
कीर्णकैः धूली कर्द्दमविक्षे
पैः क्रीडाकौतुकमङ्गलैः ।
भगलिङ्गाभिधानैश्च भगलिङ्ग
प्रगीतकैः भगलिङ्गादि श
ब्दैश्च क्रीडयेयुरलं जनाः ॥
यो वै निन्दिष्यते यस्तु यः परं
नातिपद्यपि क्रुद्धा भगवती
तस्य शापं दद्यात् सुदारुणं
इति कालिकापुराणे उत्तरत
न्त्रे ६० अध्यायः ॥
शाश्वतं त्रि नित्यं इत्यमरः ॥
पारिभाषिक शाश्वते यथा ।
शाश्वतं देव एकादि विप्रदा
नन्तु शाश्वते । शाश्वतं सम्प्रग
विद्याः सहन्मित्रञ्च शाश्वतं
इति गारुडे नीतिसारे ९९ ।
अध्यायः ॥
शाश्वतः पुं वेदव्यासः । इति
शब्दरत्नावली ॥
शाष्कुलः त्रि मांसाशी । इति
हेमचन्द्रः ॥
शाष्कुलिकं क्ली शष्कुलिसमू
हः । इत्यमरः ॥
शास उ ङ } आशिषि इतिकवि
शास ल ङ } कल्पद्रुमः । आङ्.
पूर्व्वो इति केवलात्मनेपदी
दात्तु प्रयोग निरासार्थं किंत
इदं गुरुभ्यः सर्व्वेभ्यो । नमोवा
कं प्रशास्महे इत्युत्तरचरिते
प्रशस्तोपि दृश्यते । ङ. आशा
स्ते । उ आशासित्वा आशा
स्त्वा । पंचमस्वरानुबंध साम

र्थ्यात् क्त्वा प्रत्ययस्य नपुं समा
साभावादिति गोविन्दभट्टः ।
किन्तु ग्रस्य तदनुबन्धफलं छेद
स्येवेति धातुप्रदीपः । ल ङ.
आशास्ते शास्तु ङिङ्स ङे. इ
त्यत्र जक्षादीय शास्ते देव ग्रह
णादस्योपधाया इकारो नस्या
त् । आशीर्विहायोपासनं । इ
च्छाया मित्यन्ये । इति दुर्गा
दासः ॥
शास उ ह लु शासने । इति
कविकल्पद्रुमः उशासित्वा शि
ष्ट्वा । ह्ल शासति । लु शासि
शासिय आज्ञया राज्ञः स स
शादित्यमरः । इति दुर्गादासः ॥
शासनं क्ली आज्ञा तत्पर्य्यायः
अववादः २ निर्देशः ३ निदेशः
४ शिष्टिः ५ इत्यमरः ॥
शास्तिः ६ इति भरतः । आ
देशः ७ आदेशनं ८ । इति
शब्दरत्नावली । शास्त्रं ९ इति
जटाधरः । राजदत्तभूमिः ॥
लेख्यं । शास्त्रं । शास्तिः । इति
मेदिनी ॥
शासनहरः पुं राजदूतः । आ
ज्ञावाहकः इति केचित् ।
शासितः त्रि कृतशासनः यथा
सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवि
तः । सुचिन्त्य चोक्तं सुविचार्य्य
यत् कृतं सुदीर्घकालेपि नया
ति विक्रियां । इति पंचतन्त्रं ॥
शासिता [ऋ] त्रि शास्ता । इति त्रि
काण्डशेषः ॥
शास्ता [ऋ] त्रि शासनकर्त्ता । त
त्पर्य्यायः । देशकः २ शासिता ३
इति त्रिकाण्डशेषः । द्वौ या
ता च विधाता च पोता नेता जग
तः पती । द्वौ शास्तारौ त्रिलो
केस्मिन् धर्म्माधर्म्मौ प्रकीर्त्ति
तौ । इति वह्निपुराणे गणभे
दनामाध्यायः ॥
शास्ता [ऋ] पुं बुद्धः । इत्यमरः ॥
उपाध्यायः ॥ राजा ॥ पिता ।
इति संक्षिप्तसारोणादिवृत्तिः ।
शास्तिः स्त्री शासनं । इति श
ब्दरत्नावली ॥
शास्त्रं क्ली निदेशः ॥ ग्रन्थः
इत्यमरः । स च ग्रन्थः अष्टाद
शविधः । तस्य विवरणं विद्याश
ब्दे द्रष्टव्यं । शास्त्रोत्पत्ति र्यथा ।
मत्स्य उवाच । तपश्चचार प्रथम
ममराणां पितामहः । आविर्भू
ता स्ततो वेदाः साङ्गोपाङ्गपद

दक्रमाः । पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतं नित्यशब्दमयं पुण्यं शतकोटिप्रविस्तरं । अनन्तरञ्च वक्त्रेभ्यो वेदा स्तस्य विनिःसृताः मीमांसा न्याय विद्याश्च प्रमाणं तर्कसंयुताः ॥ वेदाभ्यासरतस्यास्य प्रजाकामस्य मानसाः मनसः पूर्वसृष्टा वै जाता ये तेन मानसा ॥ इति मात्स्ये ३ अध्यायः ॥ शास्त्रोक्तकर्म्मकर्त्तव्यं न तु शास्त्र विरुद्धं । यथा । श्रुति स्मृति सदाचार विहितं कर्म केवलं सेवितव्यं चतुर्वर्णै र्भद्राङ्क्षिः केशवं सदा । अन्यथा विरुध्यं यांति कुमार्गागमसेवनात् । अतो वेद विरुद्धार्थं शास्त्रोक्तं कर्म संत्यजेत् । स्वबुद्धि रचितैः शास्त्रैः प्रतार्य्येह च वालिशान् विघ्नंति श्रेयसो मार्गं लोकनाशाय केवलं । निंदंति देवता वेदौ स्तपोनिंदंति सद्द्विजान् । तेन ते निरयं यांति ह्यसत्शास्त्र निषेवणात् । श्रुति स्मृति सदाचार विहितं कर्म शाश्वतं । स्वस्वधर्म प्रयत्नेन श्रेयोर्थीह समाचरेत् स्व बुद्धिरचितैः शास्त्रैः मोहयित्वा जनेन्नराः तेन ते निरयं यांति युगानां सप्तविंशतिः ॥ इति पाद्मे उत्तरखण्डे ७० अध्यायः । अथान्य शास्त्रातिरिक्त शास्त्र निंदा यथा । पुराणं भारतं वेद धर्मशास्त्राणि यानि च आयुःसद्रूपाण्येव धर्मतस्तच्चाचरेत् । पुत्र दारादि संसारः पुंसां संमूढचेतसां ॥ विदुषां शास्त्रसंसारः सद्योगाभ्यास विघ्नकृत् । इदं ज्ञेय मिदं ज्ञेयं यः सर्वं ज्ञातुमिच्छति अपि वर्षसहस्रेणापि शास्त्रांतं नाधिगच्छति विज्ञायाक्षर तन्मात्रं जीवितं चापि चञ्चलं विहाय शास्त्रजालानि पारलौकिक माचरेत् । पिण्डितोपि हि मूढोऽसौ शास्त्रियुक्तोऽप्यशक्तिकः । यः संसारान्न चात्मानं समुद्धारयितुं क्षमः । इति वह्निपुराणे सप्तम द्वादशो नामाध्यायः । वेदविरुद्धशास्त्राणि यथा अन्यानि चैव शास्त्राणि लोकेस्मिन्मोहनानि च । वेदवाद विरुद्धानि मयैव कथितानि तु । वामं पाशुपतं सोमं नाकुलं चै

वं भैरवं अश्रेव्य मेतत् कथितं वेदबाह्यं तथेतरत् ॥ वेदमूर्त्ति रहं विप्रा नान्यशास्त्रार्थवादिभिः । ज्ञायते मत्स्वरूपन्तु त्यक्त्वा वेदं सनातनं ॥ इति कौर्म्मे उपरिभागे ३६ अध्यायः ॥ अपि च । कूर्म्मपुराणे हिमालयं प्रति देवीवाक्यं । यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुति स्मृति विरुद्धानि निष्ठा तेषां हि तामसी कपालभैरवञ्चापि यामलं वाम मार्हतं । एवं विधानि चान्यानि मोहनार्थानि तानि तु । मया सृष्टानि चान्यानि मोहायैषां भवार्णवे । तस्मात् सद्भिः श्रुति स्मृति विरुद्धे वर्त्मनि. न कदाचित् पदं न्यस्तव्यं । इति मलमासतत्त्वे । स्थित्यंतेत्र शास्त्रावतरणं यथा । शिव उवाच । लंबोदर महाभाग शृणु मे परमं वचः । इदं महास्त्र संदर्भं मम वक्त्राद्धि निर्गतं ॥ निर्गतं पार्वतीवक्त्रात्तन्त्रं परम दुर्लभं । विलिख्य बहुयत्नेन गच्छ सिद्धाश्रमं सुत । यत्र तिष्ठंति मुनयो वेद वेदांग पारगाः । अणिमादिगुणो युक्तः शीघ्रं त्वं भव मे सुत ॥ इत्युक्तः शंकरेणासौ चाष्टवाहुरभूत्ततः । चतुर्भि र्हस्तैः संलिख्य शिवाय विनिवेदयत् । शिव उवाच । गच्छ पुत्र महाबाहो तन्त्र मादाय सत्वरं । सिद्धाश्रमे वनं रम्यं यत्र इस्य च नन्दने प्राणप्रियो शीघ्रं तन्त्र मादाय तद्वने । इत्युपक्रम्य । मुने वीक्ष्य ततः श्रुत्वा तन्त्रं मुनेय ददौ । एवं तन्त्राणि सर्वाणि विलिख्य विनिवेदयेत् इति गायत्रीतन्त्रे दशमस्त्रासग पटलः ॥ शैवपाशुपतादि शास्त्रोत्पत्ति र्यथा । प्रथमं हि मया प्रोक्तं शैवं पाशुपतादिकं । मच्छक्त्यावेशितैर्विप्रैः संप्रोक्तानि ततः परं ॥ कणादेन च संप्रोक्तं शास्त्रं वैशेषिकं महत् । गौतमेन तथा न्यायं सांख्यं तु कपिलेन तु । धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितं । दैत्यानां नाश नार्थाय विष्णुना बुद्धरूपिणा ॥ बौद्धशास्त्रं तथा प्रोक्तं नग्ननीलपटादिकं । अपसंश्रुतिवाक्यानां दर्शयन् लोकगर्हितं ॥

त


कर्म्म स्वरूप साज्यत्व मत्र वै
प्रतिपद्यते । सर्व्वकर्म्म परिभ्रष्टे
कल्मषं तत्र उच्यते । गोतम प्रो
क्त शास्त्रार्थ निरताः सर्व्व एव
हि । शार्गाली योनिमापन्नाः
सन्दिग्धाः सर्व्वकर्म्मसु । इति
गान्धर्व्वतन्त्रे प्रथमपटलः ॥
शास्त्रकृत् पुं ऋषिः । इति
त्रिकाण्डशेषः । शास्त्रकर्त्तरि त्रि
शास्त्रगण्डः त्रि प्रचण्डावित् । इ
ति त्रिकाण्डशेषः । हारावल्यां
छात्रगण्ड इति पाठः ॥
शास्त्रचक्षुः[स] क्ली व्याकरणं इ
ति केचित् ॥
शास्त्रचारणः त्रि शास्त्रदर्शी
इति शब्दरत्नावली ॥
शास्त्रज्ञः त्रि शास्त्रवेत्ता यथा
अनियुक्तो नियुक्तो वा शास्त्र
ज्ञो वक्तुमर्हति । दैवीं वाचं
स वदति यः शास्त्रमुपजीवति
इति व्यवहारतत्त्वधृत नारद
वचनं ॥
शास्त्रतत्त्वज्ञः पुं गणकः यथा
दैवज्ञो गणको ज्ञानी मोहू
र्त्तो दैवलेखकः । वार्त्तान्तिको
ज्यौतिषिको मौहूर्त्तिक प्रश्न
चक्रो । सांवत्सरो वर्षको ।
षो रेखाजीवी गणकभुक्
तान्त्रिको ज्ञातसिद्धान्तः शास्त्र
तत्त्वज्ञ ईरितः । इति शब्दर
त्नावली ॥
शास्त्रदर्शी[न] त्रि शास्त्रज्ञः । त
त्पर्य्यायः । अन्तर्व्वाणिः २ शा
स्त्रवित् ३ शास्त्रचारणः ४ इति
शब्दरत्नावली ॥
शास्त्रवित्[द] त्रि शास्त्रदर्शी ।
इत्यमरः ॥
शास्त्रविप्रतिषिद्धः त्रि शास्त्रनि
षिद्धः । शास्त्रशब्द पूर्व्वक वि
पूर्व्वक षिध धातोः कर्म्मणि क्त
प्रत्ययेन निष्पन्नः ॥
शास्त्रशिल्पी[न] पुं काश्मीरदेशः
तद्देशस्थे पुं भूम्नि ॥ इति
त्रिकाण्डशेषः ॥
शास्त्री[न] त्रि शास्त्रज्ञः । शास्त्रं वे
त्त्यर्थे णिन प्रत्ययेन निष्पन्नः
शास्यः त्रि शासनीयः । शासि
तव्यः शास धातोः य प्रत्ययेन
निष्पन्नः ॥
शि न ञ निशाने । इति क
विकल्पद्रुमः । निशानमिति शप
तेरूपं । शान ञ तेजे इत्यस्यानि
स्यसन्तत्वात् । अनेकार्थत्वात्
निशान मिह तीक्ष्णीकरणं न

ञ शिनोति शिनुते स्वङ्गं क
र्म्मकः । इति दुर्गादासः ॥
शिंशपा स्त्री वृक्षविशेषः । शि
सु इति भाषा तत्पर्य्यायः । पि
च्छिला २ अगुरुः ३ कपिला ४
भस्मगर्भा ५ इत्यमरः । अगुरु
शिंशपा ६ । इति भरतः ॥
कुसुमसारा ७ इति जटाधरः ॥
पिंगला ८ पिच्छिला ९ वीरा १०
इति रत्नमाला ॥ शिंशपा गु
रुसारा च पिच्छिला गुरुशिं
शपा । सा चेत् कपिलवर्णा
स्यात् भस्मगर्भा निगद्यते । क
पिला कपिला भस्मगर्भा चागुरु
शिंशपा पिच्छिला शिंशपा पा
रमपत्रिकागुरुचेत्यपि । इति श
ब्दरत्नावली । अस्या गुणाः शिं
शपा वातनाशिनी । इति राज
वल्लभः । अपि च शिंशपा क
टुका तिक्ता कषाया शोषका
रिणी उष्णवीर्य्या हरेन्मेदः कु
ष्ठश्वित्र वमि क्रिमीन् । वस्तिव्र
णदाहास्र वलासान् गर्भपाति
नी । इति भावप्रकाशः ॥
शिक[च] स्त्री शिक्यं । इति शब्द
रत्नावली ॥
शिक्कः त्रि अग्रवशायी । इति
त्रिकाण्डशेषः ॥
शिक्थं क्ली मधुजातद्रव्यवि
शेषः मोम इति भाषा । तत्पर्य्या
यः । शिक्थकं २ मधुजं ३ वि
घसं ४ मधुसम्भवं ५ मोदनं ६
काचं ७ उच्छिष्टमोदनं ८ मल
कामलं ९ द्रोहेयं १० पीतरागं
११ स्निग्धं १२ माक्षिकजं १३
द्रोहजं १४ मधुशेषं १५ द्राव
कं १६ माक्षिकाश्रयं १७ मधू
च्छिष्टं १८ मधूत्थं १९ अस्य गु
णाः । पिच्छिलत्वं । स्वादुत्वं
कुष्ठ वातास्र नाशित्वं । मृदु
त्वं कटुत्वं स्निग्धत्वं । लेपेन
स्फुटिताङ्गविलोपनत्वञ्च । इति
राजनिर्घण्टः ॥
शिक्थकं क्ली शिक्थं । इति
राजनिर्घण्टः ॥
शिक्यं क्ली द्रव्यस्थापनार्थ रज्जुम
याधारविशेषः शिका इति भा
षा तत्पर्य्यायः । काचः २ शिक्या
३ शिक ४ इति शब्दरत्नावली
शिक्या स्त्री शिक्यं । इति शब्द
रत्नावली ॥
शिक्यितं त्रि शिक्यस्थापितव
स्तु । तत्पर्य्यायः काचितः २
इत्यमरः ॥



शिखकः पुं लेखकः । इति
संक्षिप्तसारोणादिवृत्तिः ॥
शिखण्डः पुं मयूरपुच्छः । इत्य
मरः । यथा । शिखण्डः २ स्त्री
पिच्छ बर्हे शिखिपुच्छे शिखण्ड
के । इति शब्दरत्नावली । चूडा
इति मेदिनी ॥
शिखण्डकः पुं काकपक्षः । जु
लुपी इति भाषा । इत्यमरः ॥
हे क्षत्रिय कुमाराणां शिखाभ
ये । उक्तञ्च । बालानाञ्च शिरः
कार्य्यं त्रिशिखं शुण्ड मेव चे
ति । शिखापञ्चके इत्यन्ये । सामा
न्येन चूडया मित्यन्ये । काक
पक्षाकारत्वात् काकपक्षः ।
शिरसि खण्डते शिखण्डकः म
नीषादिः तालव्यादिः शिखण्डे
नशिखावर्हे इति तालव्यादौ
रभसः । शिखाण्डकश्च । शिखं
डकशिखाण्डकाविति वाचस्प
तिः । इतितट्टीकायां भरतः ॥
मयूरपुच्छे क्ली । इति शब्दरत्नाव
ली ॥ शिखण्डिकः पुं कुक्कुटः ।
इति हेमचन्द्रः ॥
शिखण्डिका स्त्री शिखा । यथा
चूडा केशी केशपाशी शिखा
शिखण्डिका समाः । इति हेम
चन्द्रः ॥
शिखण्डिनी स्त्री यूथिका । गु
ञ्जा । इति मेदिनी । द्रुपदराज
कन्या । सा यक्षस्य पुंस्त्वग्रहणे
न पुरुषो भूत्वा शिखण्डीतिना
म्ना ख्यातः । इति महाभारतं ॥
मयूरी शिखण्डिन् शब्दात्
स्त्रियां ईप् प्रत्ययेन निष्पन्ना ॥
शिखण्डी [न्] पुं मयूरपुच्छः ॥ मो
गोयादिः । स तु द्रुपदराजपुत्रः
मयूरः । इति मेदिनी ॥
कुक्कुटः । बाणः इति हेमचन्द्रः
गुञ्जा । स्वर्णयूथिका । इति
राजनिर्घण्टः । विष्णुः । यथा
शिखण्डी नहुषो वृषेति तस्य
सहस्रनामस्तोत्रं ॥
शिखरं क्ली पर्वताग्रं । तत्प
र्य्यायः । कूटं २ शृङ्गं ३ इत्यमरः
शैलाग्रदेशकं ४ । इति
शब्दरत्नावली ॥
शिखरः पुं क्ली वृक्षाग्रं । तत्प
र्य्यायः । शिखः २ अग्रं । ३ । इ
त्यमरः ॥ शिखं ४ । इति शब्द
रत्नावली । साग्रं ५ । इति रा
जनिर्घण्टः ॥ पर्वतशृङ्गं ॥
पुलकः । कक्षः । पक्वदाडिमवी
जाभमाणिक्यं ॥ सकलाग्रं ॥

इति मेदिनी । कोटिः । इति
त्रिकाण्डशेषः ॥
शिखरवासिनी स्त्री दुर्गा । इति
त्रिकाण्डशेषः ॥
शिखरा स्त्री मूर्वा । इति शब्द
चन्द्रिका ॥
शिखरिणी स्त्री रसाला । वृत्त
भेदः । नारीरत्नं ॥ मल्लिका ॥
रोमावली । इति मेदिनी ॥
वृत्तभेदो यथा । रसै रुद्रैश्छि
न्ना य म न स भला गः शिख
रिणी । कराट्टस्य प्रेष्ठे नतु शि
खरिणीदृष्यति शिशो र्विलीनाः
सः सत्यं नियत मवधेयं तद
खिलैः इति त्र्यस्याङ्गोपालुचित
निभृतालापजनितं स्मितं वि
भ्रत् देवो जगदवतु गोवर्द्धन
धरः । इति छन्दोमञ्जर्य्यां २
स्तवकः । नवमालिका । द्राक्षा
विशेषः । इति राजनिर्घण्टः ॥
मूर्वा । इति शब्दचन्द्रिका ॥
शिखरी [न्] पुं पर्वतः ॥ वृक्षः
अपामार्गः । इति मेदिनी ॥
कोट्टः ॥ कोषष्टिः । इति हेम
चन्द्रः । वन्दाकः ॥ कर्कटशृङ्गी ।
कुन्दुरुकः ॥ यावनालः । इति
राजनिर्घण्टः ॥
शिखलोहितः पुं वृक्षविशेषः
कुकुरमुत्ता इति भाषा । इति
शब्दचन्द्रिका ॥
शिखा स्त्री अग्निज्वाला । तत्प
र्य्यायः । ज्वालः २ कीलः ३ अ
र्चिः ४ हेतिः ५ शिखा ६ इत्य
मरः ॥ पिण्डितशिखाग्नेः शु
भमचकत्वं यथा वायुपुराणे
अर्चिष्मान् पिण्डितशिखः स
र्पिःकाञ्चन सन्निभः स्निग्धः प्रद
क्षिणश्चैव वह्निः स्यात् कार्य्य
सिद्धये ॥ अग्ने रशुभलक्षणं य
था । ब्रह्मपुराणे । अल्पे रूक्षे स
स्फुलिङ्गे वामावर्त्ते भयानके
आर्द्रकाष्ठेश्च सम्पन्ने फुत्कार
वति पावके । कृष्णार्चिषि सदुर्ग
न्धे तथा लिहति मेदिनीं । आ
कृती र्जुहुयात् यस्तु तस्य ना
शो भवेत् ध्रुवं । इति तिथितत्त्वे
शिरोमध्यस्थकेशाः । तत्पर्य्यायः
चूडा २ केशपाशी ३ इत्यमरः
जुटिका ४ जूटिका ५ ॥
इति शब्दरत्नावली । केशी ६
शिखण्डिका ७ इति हेमचन्द्रः
गायत्र्या शिखाबन्धने यथा ॥
गायत्र्या तु शिखां बद्धा नैर्ऋ
त्यां ब्रह्मरन्ध्रतः जुटिकाञ्च त



नो बद्धा ततः कर्म समारभेत्
शूद्रस्य शिखाबंधे मंत्रोयथा
ब्रह्म वाणी सहस्राणि शिव
वाणी शतानि च । विष्णो र्ना
मसहस्रेण शिखाबंधं करोम्यहं
शिखामोचन मंत्रोयथा ॥
गच्छंतुसकला देवा ब्रह्मविष्णु
महेश्वराः। तिष्ठत्वत्राचला ल
क्ष्मीः शिखामुक्तंकरोम्यहं । शि
खाबंधनानंतर माचमनं।यथा
निबद्धशिखआसीनो द्विज आ
चमनं चरेत्। कृतोपवीत सव्यो
ऽंशो वाङ्मनः काय संयतः ॥
मुक्तशिखस्याचमने दोषो ·
यथा । शिरः प्रावृत्य कण्ठं
वा मुक्तकच्छ शिखोपिवा। अ
कृत्वा पादयोः शौचं आचा
न्तोप्यशुचि र्भवेत् । इति आ
ह्निकतत्वं ॥ शाखा । बर्हि
चूडा । लांगलिकी । अग्रमात्रे
चूडामात्रे ॥ प्रपदे । इति मे
दिनी । प्रधाने । शिफा ॥
ज्योतिः । इति हेमचंद्रः । ज्वर
ज्वरः । इति शब्दरत्नावली।
शिखाकंदं क्ली शृञ्जनं । इति
राजनिर्घण्टः ॥
शिखाण्डकः पुं काकपक्षः इति

हेमचंद्रः। शिखातरुः पुं दीपवृ
क्षः ॥ पिलसूज इतिभाषा
इति त्रिकाण्डशेषः ॥
शिखाधरः पुं मयूरः । इ
ति शब्दमाला ॥
मञ्जुघोषः ॥
इति त्रिकाण्डशेषः ॥
शिखाधारः पुं मयूरः।इति श
ब्दरत्नावली ॥
शिखामूलं क्ली शृञ्जनं।इति
राजनिर्घण्टः ॥।
शिखालुः पुं मयूरशिखा। इ
तिराजनिर्घण्टः ॥
शिखावती स्त्री मूर्वा।इति श
ब्दचंद्रिका ॥
शिखावरः पुं पनसवृक्षः ॥
इतिशब्दमाला ॥
शिखावलः पुं मयूरः। इत्यमरः
शिखावला स्त्री मयूरशिखा
इतिराजनिर्घण्टः ॥
शिखावान् पुं अग्निः चित्रकवृ
क्षः। इत्यमरः। केतुग्रहः। इति
शब्दरत्नावली। शिखायुक्ते त्रि
शिखावृद्धिः स्त्री कालिकावृद्धिः
स्वाहिकदेवलाभः। इति स्मृतिः
शिखावृक्षः पुं दीपवृक्षः। इति
शिखातरुशब्ददर्शनात् ॥

शिखिकण्ठं क्ली तुत्थं। इतिर
त्नमाला ॥
शिखिग्रीवं क्ली तुत्थं इत्यमरः।
शिखिध्वजः पुं धूमः।इति त्रि
काण्डशेषः।कार्तिकेयः ॥ इति
शब्दरत्नावली ॥
शिखिनी स्त्री मयूरशिखा। इ
ति राजनिर्घण्टः ॥
शिखिपुच्छं क्ली मयूरपिच्छं।
यथा शिखण्डःस्त्री पिच्छ बर्हे
शिखिपुच्छ शिखण्डके इति·
शब्दरत्नावली ॥
शिखिप्रियः पुं लघुबदरः। इति
राजनिर्घण्टः ॥ शिखिमण्डलः
पुं वरुणवृक्षः ॥ इति श
ब्दरत्नावली ॥
शिखिमोदा स्त्री अजमोदा।
इतिराजनिर्घण्टः ॥
शिखियूपः पुं श्रीकारीमृगः।इ
तिराजनिर्घण्टः ॥
शिखिवर्द्धकः पुं कुष्माण्डः। इति
शब्दरत्नावली ॥
शिखिवाहनः पुं कार्तिकेयः ॥
इत्यमरः ॥
शिखिव्रतं क्ली व्रतविशेषः। य
था। ब्रह्मोवाच वत्से प्रति पदा
दीनि व्रतानि व्यास कथ्यतो ॥

प्रतिपद्येकभक्ताशी समाप्तेक
पिलाप्रदः । वैश्वानरपदंयाति
शिखिव्रत मिदं स्मृतं । इ
ति गारुडे १२९ अध्यायः ॥
शिखी पुं मयूरः। अग्निः चि
त्रकवृक्षः।इत्यमरः।बलीवर्द्दः॥
शरः। केतुग्रहः ॥ द्रुमः ॥
कुक्कुटः । इति मेदिनी । बोट
कः । इति हेमचंद्रः । अज
लोमा । इति रत्नमाला। सि
तावरः ॥ मेथिका। इति राज
निर्घण्टः। पर्वतः ॥ ब्राह्मणः
दीपः । इति केचित्। शिखा
युक्ते त्रि । इति मेदिनी ॥
शिग्रुः पुं शाकं इत्यमरः ॥
वृक्षविशेषः।शजिना इति भा
षा। तत्पर्यायः। हरितशाकः
२ शाकपत्रः ३ सुपत्रकः ४ अ
पदंशः ५ तमोदंशः ६ कोम
लपत्रकः ७ बहुमूलः ८ दश
मूलः ९ तीक्ष्णमूलः १० अस्य
गुणाः । कटुत्वं । तिक्तत्वं । उष्णत्वं
तीक्ष्णत्वं। वात कफ मूत्रकृच्छ्रा
र्शोव्रणदोषहरत्वं दीपनत्वं रु
च्यत्वंच। अस्य पत्रशाक गुणाः
रुच्यत्वं वात कफ कृमिनाशित्वं
कटुत्वं। उष्णत्वं। दीपनत्वं ॥

पथ्यातं। पाचनत्वञ्च ॥ अ
पि च शोभाञ्जनो नीलशिग्रु
स्तीक्ष्णगन्धो जनप्रियः। मुख
मोदः कृष्णशिग्रुः स्यात्तीक्ष्णा रु
चिराञ्जनः। शोभाञ्जन स्तीक्ष्ण
कटुःस्वादूरसः पिच्छिल स्तथा
जंतवातार्त्ति शूलघ्नस्तीक्ष्णा
रोचनंपरः ॥ श्वेत शिग्रुःसु
तीक्ष्णाः स्यान्मुखभंगाः सित
कायः। समलः श्वेतमरिचो बो
चनो मधुशिग्रुकः। श्वेतशिग्रुः
कटुस्तीक्ष्णाः शोफानिलनिकृ
न्तनः। अंगव्यथाहरो रुच्योदी
पनो मुखजाड्यनुत्। रक्त
को रक्तशिग्रुः स्यान्मधुरो व
कलच्छदः सुगंधिः केशरी सिं
हो मृगारिश्च प्रकीर्त्तितः। रक्त
शिग्रु महावीर्य्यो मधुरश्च र
सायनः। शोफाध्मान शामी
वार्ति पित्त श्लेष्मापसारकः।
इति राजनिर्घण्टः ॥
शिग्रुजं क्ली शोभाञ्जनवीजं।
तत्पर्य्यायः। श्वेतमरिचं २।
इत्यमरः शिग्रुभवे त्रि ॥
शिग्रुवीजे क्ली शोभांजनवी
जं। इति शब्दचंद्रिका ॥
शिच इ आघ्राणे इति कवि
कल्पद्रुमः। इ शिङ्घ्यते। इति
दुर्गादासः ॥
शिङ्घाणं क्ली काचपात्रे। लोह
मले। नासिकामले। शिकनि
इति भाषा इति मेदिनी ॥
शिङ्घाणकः पुं श्लेष्मा। इत्यु
णादिकोषः ॥
शिङ्घाणकः पुं क्ली नासिका
मले। इत्युणादिकोषः ॥
शिंघितं त्रि घ्रातं। इति शब्दर
त्नावली ॥
शिज इ ल कि ङ अस्फुटध्वनौ
इति कविकल्पद्रुमः। अस्फुटध
नि रिह भूषण कर्त्तृक एव भूष
णानां शिञ्जित मित्यमरात्
इ शिञ्जाते। ल ङ शिंक्ते। कि
ङ शिञ्जयते शिञ्जति मञ्जीरं
तालैः शिञ्जकलय सभेनो नर्त्ति
तः कान्तयाने इत्यत्र शिञ्जादिति
गणकृतानित्यत्वादिति रमान
थः ॥ वस्तुतस्तु शिंक्ते शि
ञ्जः पचादित्वादच् ततः शिञ्जइ
वाचरतीति क्वौ शत्रन्तं। इति
दुर्गादासः ॥
शिञ्जा स्त्री भूषणशब्दः। इति
शब्दरत्नावली धनुर्गुणः। इति
हेमचंद्रः ॥

शिञ्जितं क्ली भूषणध्वनिः। इ
त्यमरः ॥
शिञ्जिनी स्त्री धनुर्गुणः। इत्य
मरः। नूपुरः। इति हेमचंद्रः ॥
शिञ्जी त्रि भूषणशब्दविशिष्टः
शिञ्जाविद्यतेऽस्य इत्यर्थे इन्
प्रत्ययेननिष्पन्नः ॥
शिट् अनादरे। इति कविक
ल्पद्रुमः ॥ शेटति खलं लो
कः। इति दुर्गादासः ॥
शिण्डाकी स्त्री खाद्यद्रव्यवि
शेषः। यथा। शिण्डाकी राजि
कायुक्तैः स्यान्मूलकदलद्रवैः
सर्षपं स्वरसे वापि शालिपिष्ट
क संयुतैः। शिण्डाकी रोचनी
गुर्वीपित्त श्लेष्मकरी स्मृता
इतिराजनिर्घण्टः ॥
शितं त्रि दुर्बलः। निशितः।
इति मेदिनी। कृशः। इति
विश्वः ॥
शितद्रुः स्त्री शतद्रुनदी। शत
लज्। इति ख्यातः। इत्यमरः ॥
नीरमोरटः। इति रत्नमाला।
शितशूकः पुं यवः। इत्यमरः
दंस्यादि त्रिलोके इति भरतः ॥
गोधूमः। इति त्रिकाण्डशेषः।
शितिः त्रि शुक्लः ॥ कृष्णः भूर्ज
वृक्षे पुं। इति मेदिनी। शिति
स्त्विषु सिते कृष्णे भूर्जे सारेपि
च द्वयोः। इति। शब्दरत्ना
वली ॥
शितिकण्ठः पुं शिवः। इत्य
मरः। दात्यूहपक्षी। इति त्रिका
ण्डशेषः ॥
शितिचारः पुं शाकविशेषः
यथा। शितिचारः स्वतपत्रो वि
तन्ने सुनिषण्णके। इति जटाधरः
शितिच्छदः } पुं हंसः। इति शब्द
शितिपक्षः } रत्नावली ॥
शितिसारकः पुं तिन्दुकवृक्षः ॥
इत्यमरः ॥
शिथिलं त्रि श्लथः। इति
हेमचंद्रः ॥
शिथिलं क्ली मन्दवंधनं। मेत्र
रत्ने। इति संक्षिप्तसारोणादि
वृत्तिः। संयोगविशेषः। यथा
प्रचयः शिथिलाख्योयः संयो
गस्तेन जन्यते। इति भाषा
परिच्छेदः ॥ प्रचय इति मूले
शिथिलाख्य इति किंचिदवय
वावच्छेदेनावयवान्तर संयोगि
नि महत्ववति प्रवयवे वर्त्तमानः
संयोगः प्रचय इत्येके। अत्रम
हत्त्वपदं न देयं परमाणौ सं

योगस्य प्रचयत्वेपि न त्वतिरि
क्तो। भूयोऽवयवावच्छेदेनाव
यवान्तर संयोगित्वमवयवेवर्त्त
मानः संयोगः प्रचयः तेनपरमा
णु संयोगो द्व्यणुक संयोगो वा
न प्रचय इत्यपरे। इति सि
द्धान्तमुक्तावली ॥ । टीका
दिनकरी ॥

शिनिः पुं क्षत्रियभेदः। इस
मादिकोषः ॥

शनेर्नप्ता पुं सात्यकिः। इति
त्रिकाण्डशेषः ॥

शिपविष्टः पुं शिपिविष्टः। इ
त्यमरटीकायां रमानाथः ॥

शिपिः पुं रश्मिः ॥ यथा शे
मात्त्शयन तोयोश्च शिपिवाचि
प्रचक्षते तत्प्रानात्तत्प्राणेश्च व।
शिपयो रश्मयो मताः ॥ तेषु
प्रवेशात् विष्णुः शिपिविष्ट
इहोच्यते इति व्यासवचनं ॥

शिपिविष्टः पुं खलतिः। दुश्च
र्म्मा। महेश्वरः। इत्यमरः। वि
ष्णुः यथा नेकरूपो बृहद्भुपः
शिपिविष्टः प्रकाशनः। इति
तस्य सहस्रनामस्तोत्रं रमाना
थश्च। कुष्ठी। इत्यमरटीकायां।
रायमुकुटः ॥ अस्य रूपान्तरं।
शिपविष्टः। शिविपिष्टः। इत्य
मरटीका ॥

शिप्रः पुं सरोवरविशेषः ॥
यथा। एवं विवाह्य विधिवत् सौ
दर्श्यो मानसाचले। अरुन्धतीं।
वसिष्ठस्तु मोदमाप तया सह
तत्र यत् पतितं तोयं मानसाच
ले कन्दरे। विवाहावभृतार्थाय
यशोन्यर्थं वसुधाकृते। ब्रह्म
विष्णुमहादेव पाणिभिः समुदी
रितं। तत्तोयं समया भूत्वाप
तितं मानसाचलात् ॥ हिमाद्रेः
कंदरे स्रोतो सरस्याञ्च पृथक्
पृथक्। तत्तोये पतितं शिप्रे
देवभोग्ये सरोवरे ॥ तेन शिप्रा
नदी जाता विष्णुनाप्रेरिता क्षि
तिं। इति कालिकापुराणे
२२ अध्यायः ॥

शिप्रा स्त्री नदीविशेषः य
था ततो हिमवतः प्रस्थे प्रती
च्यां ततरस्य च शिप्रं नामस
रः पूर्णं ददृशुर्द्रुहिणादयः ॥
तत्र हस्त्यानमासाद्य ब्रह्म शक्रा
दयः सुराः। उपविष्टा यथान्या
यं पुरस्कृत्य महेश्वरं। तं शिप्र
संकाशारं मनोज्ञं सर्वदेहिनां
पीतामलजलं सर्वैर्गुणै ।

मीनस सस्मितं हृष्टात्तलांगहर
स्तस्मिन् सौनत्शाकोः भूदेवेत
लो। शिप्रां नाम नदी तस्मान्निः
सृतां दक्षिणोदधिं। गच्छ
न्तीं च ददर्शासौ पावयन्तीं ज
गज्जनान्। इति कालिकापुरा
णे ९९ अध्यायः ॥

शिफः पुं शिफा इत्यमरटीका
यां विद्याविनोदः ॥

शिफा स्त्री वृक्षाणां जटाकार
मूले। शिकड़ इति ख्याते। तत्प
र्य्यायः। जटा २ इत्यमरः ॥
मूलं ३ इति जटाधरः ॥ नदी
मांसिका ॥ माता इति मेदि
नी। शतपुष्पा। हरिद्रा ॥
इति राजनिर्घण्टः ॥ पद्मकंदः
इति मुकुटधृतस्वामी ॥

शिफाकः पुं पद्ममूलं। इति
शब्दरत्नावली ॥

शिफाकन्दः पुं पद्ममूले तत्
पर्य्यायः। करहाटः २ इत्य
मरः। शिफाकः ३ इति शब्द
रत्नावली। पद्मकन्दः ४ कर्कटः
५ इति जटाधरः। शिफा ६
कंदः ७ इति मुकुटधृतस्वामी

शिफाधरः। पुं शाखा इति श
ब्दचंद्रिका ॥

शिफारुहः पुं वटवृक्षः। इति
राजनिर्घण्टः ॥

शिमृडी स्त्री क्षुपविशेषः च
ह्रोनि इति हिंदीभाषा। तत्प
र्य्यायः। मतिदा २ वल्पा ३ पंगु
सहारिणी ४ द्रवन्ती ५ वात
घ्नी ६ शुक्लपुष्पी ७ अस्या गुणाः
कटुत्वं। उष्णत्वं। वात शूल
नाशित्वं। रसायने युक्ता चेत्
देह दार्ढ्य कारित्वञ्च। इति
राजनिर्घण्टः ॥


शिम्बः पुं चक्रमर्दकः। इति
शब्दचन्द्रिका ॥

शिम्बा स्त्री कलायादिव्वकसँ
टी। इति छिमड़ा इति च भाषा।
तत्पर्य्यायः। शमी २ इत्यमरः ॥
सिम्बा ३ सिम्बी ४ शिम्बी ५
शिम्बिका ६ शमी ७ सिम्बिका
शिम्बिः ९। इति शब्दरत्नावली
शमिः १० इति हेमचन्द्रः ॥

शिम्बिः स्त्री शिम्बा। इति हेमचं
द्रः। फलिका इति भावप्रकाशः

शिम्बिकः पुं कृष्णमुद्गः। यथा
कृष्णे प्रवर वासन हरिमंथज
शिम्बिकाः इति हेमचंद्रः ॥

शिम्बिका स्त्री शिम्बा। इति
शब्दरत्नावली ॥



शिम्बिपर्णिका स्त्री मुद्गपर्णी इति रत्नमाला ॥

शिम्बिपर्णी स्त्री मुद्गपर्णी । इति शब्दचन्द्रिका ॥

शिम्बी स्त्री शिम्बा । इति शब्दरत्नावली । मुद्गपर्णी । कपिकच्छुः । इति राजनिर्घण्टः ॥

शिरः पुं पिप्पलीमूले । इति मेदिनी । मस्तके इति जटाधरः । शय्या । अजगरः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शिरः[३] क्ली शिखरे । मस्तके इत्यमरः तच्च मासमात्रेण भवति । इति सुखबोधः । तद्रोगनाशकौषधं यथा शिरोरोगहरं लेपात् शशमूलं सकाञ्जिकं । इति गारुडे १९८ अध्यायः । प्रधाने सेनाग्रे इति मेदिनी ॥

शिरःकपाली[२] पुं नरमस्तकपालधारीसन्यासी इति केचित् ॥ शिरःफलः पुं नारिकेलः इति त्रिकाण्डशेषः ॥

शिरःशूलं क्ली मस्तकवेदनारोगः । तदौषधं यथा श्वेतापराजितामूलं पिप्पली शुण्ठिसंयुतं परिपिष्टं शिरोलेपात् शिरःशूलविनाशनः ॥ इति गारुडे १९८ अध्यायः ॥

शिरजः पुं केशः । इति शब्दरत्नावली ॥

शिरसिजः पुं केशः । इति जटाधरः ॥

शिरसिरुहः पुं केशः । इति शब्दरत्नावली ॥

शिरस्कं क्ली शिरस्त्राणं । इति हेमचन्द्रः ॥ शिरःसंबंधिनि त्रि ॥

शिरस्त्रं क्ली शिरोरक्षणसन्नाहः । टोप् इति ख्यातः । इत्यमरभरतौ ॥

शिरस्त्राणं क्ली शिरोरक्षणसन्नाहः । खोपड़ा इति टोप् इति च भाषा । तत्पर्यायः । शीर्षण्यं २ शीर्षकं ३ शिरस्कं ४ इति हेमचन्द्रः । शिरस्त्रं ५ इत्यमरः ॥

शिरस्यः पुं विशदकचः । तत्पर्यायः । शीर्षण्यः २ इत्यमरः । द्वे स्नानादिना विनिर्मले अन्योन्यासंपृक्ते केशे । इति भरतः ॥

शिरा स्त्री धमनिः शिर् इति भाषा । इति मेदिनी ॥ अस्याः पर्यायादिकं नाडीशब्दे द्रष्टव्यं ॥

शिरापत्रः पुं हिन्तालवृक्षः । इति राजनिर्घण्टः । कपित्थः इति शब्दचन्द्रिका ॥

शिरालं क्ली कर्मरङ्गं । इति शब्दचन्द्रिका ॥

शिरालकः पुं अस्थिसंगवृक्षः हाड़भांगा इति भाषा । इति शब्दचन्द्रिका ॥

शिरावृत्तं क्ली सीसकं । इति राजनिर्घण्टः ॥

शिरिः पुं खड्गः । शरः ॥ हिंस्रः इत्युणादिकोषः । शलभः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

शिरीषः पुं स्वनामख्यातवृक्षः तत्पर्यायः कपीतनः २ भण्डिलः ३ इत्यमरः । भण्डिरः ४ भण्डीरः ५ भण्डीलः ६ इति तट्टीका । मृदुपुष्पः ७ शुकतरुः ८ विषनाशनः ९ इति रत्नमाला । शीतपुष्पः १० भण्डिकः ११ स्वर्णपुष्पकः १२ सुकेशः १३ बर्हपुष्पः १४ विषहन्ता १५ सुपुष्पकः १६ उद्दानकः १७ शुकतरुः १८ लोमशपुष्पकः १९ कपीतकः २० कलिङ्गः २१ श्यामलः २२ शंखिनीफलः २३ मधुपुष्पः २४ वृत्तपुष्पः २५ शुक्लकोतरे शिखिनीफलः २६ भण्डी २७ लवणः २८ शुकपुष्पः २९ अस्य गुणाः कटुत्वं । शीतत्वं । विषवातपामास्रकुष्ठकण्डूतित्वग्दोषनाशित्वञ्च । इति राजनिर्घण्टः । अपि च । शिरीषो भण्डिलो भण्डी भण्डीरश्च कपीतनः । शुकपुष्पः शुकतरुर्मृदुपुष्पः शुकप्रियः । शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः । दोषशोथविसर्पघ्नः कासव्रणविषापहः । इति भावप्रकाशः ॥ कण्टकशिरीषस्य पर्यायः । कटभी किणिही श्वेता महाश्वेता च रोहिणी इति रत्नमाला । अस्य गुणाः शिरीषो विषवीसर्पस्वेदत्वग्दोषशोथजित् । इति राजवल्लभः ॥

शिरीषपत्रिका स्त्री श्वेतकिणिही । इति राजनिर्घण्टः ॥

शिरोगृहं क्ली अट्टालिकोपरिगृहे । तत्पर्यायः । चन्द्रशाला २ इति हेमचन्द्रः ॥

शिरोग्रीवं क्ली शिरश्च ग्रीवा च द्वयोः समाहारः । यथा । ह

न्नैकत्वं अव्ययीभावश्च क्लीवे स्यात् द्वन्द्वस्य समासस्य एकत्वे समाहारद्वंद्व इत्यर्थः । यथा वाक्त्वचं श्रीस्रजं पाणिपदं शिरोग्रीवं । इति क्लीवलिङ्गसंग्रहटीकायां भरतः ॥

शिरोधरा स्त्री ग्रीवा । इति हेमचन्द्रः ॥

शिरोधिः स्त्री ग्रीवा इत्यमरः ॥

शिरोमणिः पुं स्त्री मस्तकधार्य्यरत्ने तत्पर्य्यायः । चूडामणिः २ शिरोरत्नं ३ । इति शब्दरत्नावली । पण्डितस्य उपाधिविशेषश्च ॥

शिरोमर्म्मा पुं शूकरः । इति हेमचन्द्रः ॥

शिरोरत्नं क्ली शिरोमणिः इत्यमरः ॥

शिरोरुजा स्त्री सप्तपर्णवृक्षः इति त्रिकाण्डशेषः ॥ मस्तकरोगश्च ॥

शिरोरुट् पुं केशः । इति शब्दरत्नावली ॥

शिरोरुहः पुं केशः । इत्यमरः ॥

शिरोरोगः पुं मस्तकपीडा । यथा । अथ शिरोरोगाधिकारः अत्र शिरोरोगस्य निदाने संख्यामाह । शिरोरोगास्तु जायन्ते वातपित्तकफैस्त्रिभिः । सन्निपातेन रक्तेन क्षयेण कृमिभिस्तथा ॥ सूर्य्यावर्त्तानन्तवातशङ्खकार्द्धावभेदकैः । एकादशविधस्यास्य लक्षणानि प्रचक्षते । शिरोरोगा अत्र शिरोरोगाः शूलरूपा रुगभिधीयते वातपित्तकफैस्त्रिभिः । ननु वातपित्तकफे विमुक्ते तत्त्रित्वबोधात् । किमर्थं त्रिभिरिति पदं । वातपित्तकफानां पृथक् कारणत्वबोधनार्थं । तर्हि सर्व्व एव शिरोरोगाः सन्निपातसमुद्भवा इति कथं । तत्र वातादय उल्वणतया पृथक् कारणानि बोद्धव्यानि सहेल रक्तादि क्षयेण ॥ वातिकस्य लक्षणमाह । यस्यानिमित्तं शिरसो रुजश्च भवन्ति तीव्रा निशि चातिमात्रं । बन्धोपतापैः प्रशमश्च यत्र शिरोभितापः स समीरणेन । भवेदिति विशेषः अनिमित्तं अतर्कित विप्रकृष्टनिमित्तं निशि चातिमात्रं वातस्य शैत्येन रोगाधिक्यात् । प्रतापः स्वेदनं । शिरोभितापः

शिरःपीडा ॥ पैत्तिकमाह । यस्योष्णमङ्गारचितं यथैव भवेच्छिरो दह्यति चाक्षिनासं । शीतेन रात्रौ च भवेच्छमश्च शिरोभितापः स तु पित्तकोपात् दह्यतीत्यार्षत्वात् । श्लैष्मिकमाह । शिरो भवेद्यस्य कफोपदिग्धं गुरु प्रतिष्टब्धमथो हिमञ्च । शूनाक्षिकूटं वदनञ्च यस्य शिरोभितापः स कफप्रकोपात् । कफोपदिग्धं श्वेतकफालिप्तं । प्रतिष्टब्धं स्तब्धं । सान्निपातकमाह शिरोभितापे त्रितय प्रवृत्ते सर्व्वाणि लिङ्गानि समुद्भवन्ति । रक्तजमाह । रक्तात्मकः पित्तसमानलिङ्गः स्पर्शासहत्वं शिरसो भवेच्च । पैत्तिकादधिकलिङ्गमाह । शिरःस्पर्शासहत्वमिति । क्षयजमाह । वसावलासक्षतसम्भवानां शिरोगतानामतिसंक्षयेण क्षयप्रवृत्तः शिरसोभितापः कष्टो भवेदुग्ररुजोऽतिमात्रं । क्षतसम्भवं रुधिरं । कष्टः कृच्छ्रसाध्यः । भ्रमो भ्रमति तद्धेतु शिरो विभ्रान्तनेत्रता । मूर्च्छा गात्रावसादश्च शिरोरोगे क्षयात्मके ॥ कृमिजमाह । निस्तुद्यते यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुरतीव चान्तः । घ्राणाच्च गच्छेद्रुधिरं सपूयं शिरोभितापः कृमिभिः स घोरः संभक्ष्यमाणं कृमिभिर्विनिशेषः । घ्राणाच्चेति चकारेण कृमिनिर्गमोऽपि बोध्यते । सूर्य्यावर्त्तमाह । सूर्य्योदयं या प्रति मन्दमन्दमक्षिभ्रुवं रुक् समुपैति गाढं । विवर्द्धते चांशुमता सहैव सूर्य्यापवृत्तौ विनिवर्त्तते च । शीतेन शान्तिं लभते कदाचिदुष्णेन जन्तुः सुखमाप्नुयाच्च सर्व्वात्मकं कष्टतमं विकारं सूर्य्यापवर्त्तं तमुदाहरन्ति । सूर्य्योदयमिति लक्षीकृत्य आरभ्येति यावत् । सूर्य्यस्यापवृत्तौ सूर्य्यस्याधोगतौ ॥ अनन्तवातमाह । दोषास्तु दुष्टास्त्रयमेव मन्यां संपीड्य घाटां सरुजां सुतीव्रां कुर्व्वन्ति सोऽक्षिणि भ्रुवि शङ्खदेशे स्थितिं करोत्याशु विशेषतस्तु ॥ गण्डस्य पार्श्वे तु करोति कम्पं हनुग्रहं लोचनजान् विकारान् । अनन्तवातं तमुदाहरन्ति दोषत्रयोत्थं शिरसो विकारं



एवशब्दो ऽप्यर्थः। अर्द्धयाना
मनेकार्थत्वात्। स्वरुजा स्वस
रुजा व्यथा दाह गौरवादिरू
पां दोषाः कुर्वन्ति। अथ मन्त
नवातः। स अनन्तवातः अवटा
दिषु स्थितिं करोति विशेषतः
गण्डपार्श्वे स्थितिं करोति।
पीडया स्थितिं कृत्वा कम्पादी
न्करोति। शंखक माह पित्त
रक्तानिला दुष्टाः शंखदेशे वि
मूर्च्छिताः। तीव्ररुग्दाह रागं
हि शोथं कुर्वन्ति दारुणं स शि
रो विषवद्वेगान् निरुध्याशु
गलं तथा। त्रिरात्राज्जीवितं हं
ति शंखको नामनामतः। त्र्यहा
ज्जीवति भेषज्यं प्रत्याख्येयस्य•
कारयेत्। पित्तरक्तानिलाश्च
शंखकेऽपि योज्यः। कृतानुता
पः कफ पित्त रक्ते ति तत्रस्थ
तद्वचनात्। विमूर्च्छिताः मंदू
ढाः। स शोथः। त्रिरात्रात् त्रि
र मध्ये मारयति। अर्द्धावभेदक
माह। रूक्षाशनाध्यशनपूर्ववात
प्राग्वात मैथुनैः। वेगसंधारणा
यासव्यायामैः कुपितोऽनिलः। के
वलः सकफो वार्द्धं गृहीत्वा शिर
सो बली। मन्या भ्रू शंखकर्णाक्षि
ललाटार्द्धेषु वेदनां। शस्त्राशनि
निभां कुर्यात्तीव्रां सोऽर्द्धावभेद
कः। नयनं वाथ वा श्रोत्रम
भिवृद्धो विनाशयेत्। अवश्या
अवश्यायः। आयासः अतिव
लेन भारोद्वहनादिभिः। व्या
यामः स्वल्पश्रमः। शस्त्राशनि
निभां शस्त्रपातेनेव वज्रपातेने
व वेदनां। अथ शिरोरोगाणां
चिकित्सा वातजाते शिरोरो
गे स्नेह स्वेद विमर्द्दनं। पा
नाहारोपनाहांश्च कुर्य्याद्वात
मयापहं। कुष्ठमेरण्डमूले
च नागरे तत्र पेषिते कदुस्ने
शिरसः पीडां भाले लेपनेना
हरेत्। रसः श्वासकुठारोऽस्य
स्नस्य नस्यं विशेषतः। शिरः
शूले हरेत्येव विधेया नात्र सं
शयः। अथ शिरोवस्ति विधिः
आशिरो व्यापि तच्चर्म्मषोड
शांगुलमुच्छ्रितं। तेनावेष्ट्य
शिरोधस्तान्माषकल्केन लेप
येत्। निश्चलस्योपविष्टस्य तै
लैः कोष्णैः प्रपूरयेत्। धारयेदा
रुजः शान्तेः यामं यामार्द्धमे
व च। शिरोवस्ति हरत्येषशिरो
रोगं मरुद्भवं। हनुमन्या ॥

क्षि कर्णार्त्तिं मर्दितं मूर्द्धकम्प
नं। विना भोजन मेवैष शिरोव
स्त्याः प्रयुज्यते। दिनानि पञ्च
वा सप्त रुजितत्वरतोऽपि वा।
ततोपनीतस्नेहस्तु मोचयेद्व
स्तिबंधनं। शिरो ललाट वद
नग्रीवादीनि विमर्दयेत् सुखो
ष्णेनाम्भसा गात्रं प्रक्षाल्याश्ना
तियद्धितं। आमिषं जांगलेप
थ्यं तत्र शाल्यादयोऽपि च॥
मुद्गान् माषान् कुलत्थांश्च खा
देद्वा निशि केवलान्। कटुको
ष्णान् ससर्पिष्कांस्तुल्यं क्षीरं पि
वेत्तथा। पित्तात्मके शिरोरो
गे शीतानां चंदनांभसां ॥ कु
मुदोत्पल पद्मानां स्पर्शाः स
व्यास्त्रमारुताः। सर्पिषः शत
धौतस्य शिरसा धारणं हितं।
रसः श्वासकुठारोऽस्यः कर्पूरं कु
ङ्कुमेनवे। शीतं क्षीरपयः सर्वं
वदनेनानुवर्षयेत्। तस्य नस्याभि
षवदधात् पित्तलायां शिरोरुजि
किंत मस्तक मूलेषु सर्वेष्वेवं हि
तं मतं। गुड नागर कल्कस्य न
स्यमस्तकमूलनुत्। रक्तजेऽपि
तवत्सर्वं भोजनालेप सेवनं॥
शीतोष्णयोश्च विन्यासो ।
विशेषो रक्तमोक्षणं। कफजे लं
घनं स्वेदो रूक्षोष्णैः पाचकात्मकैः
सन्निपातभवे कार्य्यः सन्निपात
हरी क्रिया घृतस्य सर्पिषः पा
नं विशेषेण दिश्यन्ति हि ॥
एरण्डमूलं तगरं शताह्वा जीव
न्तिका सैंधव रास्निके च भृंग
विडंगे मधुयष्टिका च विश्वौष
धं कृष्णतिलस्य तैलं। अजापय
स्तैल विमिश्रितञ्च चतुर्गुणं भृं
गरसे विपक्वं। षड्बिंदवो नासि
कयोः प्रदेयाः सर्वाणि हन्युः
शिरसो विकारान्। च्युतांश्च के
शान् पलितांश्च दंतान् निर्वं
धमूलान् प्रकटीकरोति। सु
पर्णगृध्र प्रतिमञ्च चक्षुः कुर्वं
ति बाह्वो रधिकं वलञ्च जीवंति
का अग्रहरीतकी शाकविशेषश्चा
षड्बिंदुतैलं ॥ क्षयजे क्षयना
शाय कर्तव्यो बृंहणो विधिः।
पाने नस्ये च सर्पिः स्याद्वातघ्नैर्म
धुरैः शृतं ॥ क्रिमिजे व्योषनक्ता
ह्वः शिग्रुबीजैश्च लावणं। अ
जामूत्र युतं नस्यं कर्तव्यं कृमि
नुत्परं सूर्य्यावर्ते विधातव्यं न
स्य कर्म्मादि भेषजं। योजयेत्क्षी
रं सर्पिः क्षेत प्रधांश्च भक्षयेत् ॥



लावणं क्षीरसर्पिर्भ्यांपानञ्च
क्षीरसर्पिषोः क्षीरपिष्टै स्तिलैः
स्वेदो जीवनीयैश्च शस्यते ॥
भृङ्गराजरसः छागक्षीरसमन्वि
र्के तापितः । सूर्य्यावर्त्ते निहि
तश्च नस्येनैव प्रयोगराट् ॥
अर्द्धावभेदकेऽप्येवं स्नेह स्वेदो
हि भेषजं ॥ विरेकः काय
शुद्धिश्च धूप स्निग्धो सुभो
जनं। विरूढानि तिलान् कृत्वा
तत्समान् पिष्ट्वा विलेपयेत् । न
स्यं वाप्याचरेत्तस्मादर्द्धभेदं व्य
पोहति पिवेत्सशर्करं क्षीरं
नीरं वा नारिकेलजं । सर्पी
तस्यापि पानीयं सर्पिर्वा नस्तत
स्तयोः। नस्तः नासिकया पि
बेदित्यन्वयः। तयोः सूर्य्यावर्त्ता
र्द्धभेदयोः ॥ अनन्तवातेकर्त्तव्यः
सूर्य्यावर्त्तहितो विधिः । शि
राव्यधश्च कर्त्तव्यः अनन्तवातप्र
शान्तये। आहारश्च प्रदातव्यो
वात पित्तविनाशनः । मधूक
सारकसंयावघृतपूरै र्विशेषतः
संयावः पक्वान्नविशेषः । पत
किया इति लोके । सच मधुम
स्तकः मधुनापलिप्तः। घृतपूरो
घृतपः॥ पर्य्यायश्च धात्री रजनी

गुडूचीभूनिम्ब निम्बैः सगुडः क
षायः। कुशाख्य कर्णाखि शिरो
हेमूलं निहन्ति नासानिहितः
क्षणेन। पथ्यादिकाषायः। दा
र्वीहरिद्रा मञ्जिष्ठा सनिम्बोशी
रपद्मकं । एतत् प्रलेपनं कुर्य्या
च्छङ्खकस्य विनाशयेत्। पीत
तोयाभिषेकश्च शीतल क्षीर
सेवनं । कल्केश्च क्षीर वृक्षा
णां शंखके लेपनं हितं ॥
सर्वेषु । यष्टीमधुक माषःस्यात्
तुर्य्यांशांतु विषम्भवेत् । तयो
श्चूर्णेन तु सूक्ष्मं स्यात्तच्चूर्णं सुषिरे
स्थितं नासिकाभ्यंतरे न्यस्तस
र्वशीर्षव्यथां हरेत् इष्टप्रयो
गो योगोयं मनुभाविभिर्वारि
तः ॥ अपि यच्छिक्किकाचूर्णं
चूर्णिते नवसादरे । उभयंयो
जितं गांधानस्य नश्यतिशी
र्षरुक् । इति भावप्रकाशे शि
रोरोगाधिकारः॥
शिरोर्त्तिः स्त्री शिरःपीडा। इति
लोकप्रसिद्धिः ॥
शिरोवल्ली स्त्री बर्हिचूडा। इति
शब्दचन्द्रिका ॥
शिरोरुहं क्ली मरिचे। इति
राजनिर्घण्टः ॥

शिरोरुहफलः पुं रक्तापामार्गः
इति भावप्रकाशः ॥
शिरोवेष्टः पुं उष्णीषः ॥ इति
त्रिकाण्डशेषः ॥
शिरोवेष्टनं क्ली शिरःप्रावरणं
पागडी इति भाषा । तत्पर्य्या
यः। उष्णीषः २ वेष्टनं ३ वे
ष्टकं ४ इति शब्दरत्नावली।
शिरोवेष्टः ५ चेलाण्डुकः ६
इति त्रिकाण्डशेषः ॥
शिरोस्थि क्ली मस्तकास्थि मा
थार खुली इतिभाषा। तत्प-
र्य्यायः। करोटिः २ शिरस्त्राणं ३
शीर्षकं ४ इतिराजनिर्घण्टः॥
शिल शा उञ्छे। इति कविक
ल्पद्रुमः। उञ्छ उद्धृतशस्य शेषा
हरणं । श शिलति धान्यंदीनः
शेलिता इति दुर्गादासः ॥
शिलं क्ली पुं उञ्छः इति मे
दिनी। जीवनोपायविशेषः ।
यथा। ऋतामृताभ्यां जीवेत्तु
मृतेन प्रमृतेन वा सत्यानृता
भ्या मपिवानश्ववृत्त्या कदाच
न । ऋत मुञ्छशिलं ज्ञेय म
मृतंस्यादयाचितं । मृतंतु याचि
तं भैक्षं प्रमृतं कर्षणं स्मृतं ।
इति मानवे ४ अध्यायः। अवा

प्तिस्थानेषुपथिवा क्षेत्रेषु वा
अप्रतिहतावकाशेषु यत्र यत्रौ
षधयो विद्यन्ते तत्र तत्राङ्गुली
भ्यां एकैकं कणं समुच्चयित्वा
इति बौधायन दर्शनात् एकै
क धान्यादि गुडकोच्चयन मु
ञ्छः । मञ्जर्य्यात्मकानेक धान्याद्य
र्यनं शिलः उञ्छश्च शिलश्च ऋ
तेकवद्भावः । तत्सत्यसमानफ
लत्वादृत मित्युच्यते । इति
तट्टीकायां कुल्लूकभट्टः ॥
शिलगर्भजः पुं पाषाणभेदनः
इति राजनिर्घण्टः ॥
शिला स्त्री पाषाणः॥ द्वाराधः
स्थितदारु । इत्यमरः। स्तम्भशी
र्षं । मनःशिला। इति मेदिनी
कर्पूरः। इति राजनिर्घण्टः ॥
शिलाकर्णी स्त्री शल्लकीवृ
क्षः। इति शब्दचन्द्रिका॥
शिलाकुट्टकः पुं टङ्कः। इति
शब्दरत्नावली॥
शिलाजं क्ली शैलेयं। इति
शब्दचन्द्रिका लोहं। इति रा
जनिर्घण्टः ॥
शिलाजतु क्ली पर्वतजातोप
धातुविशेषः। शिलाजित् इति
हिंदीभाषा तत्पर्य्यायः गैरेयं

अश्मं ३ गिरिजं ४ अश्मजं ५ इत्यमरः ॥ शिलाजं ६ अश्म जं ७ शैलं ८ अद्रिजं ९ इति रत्नमाला ॥ शैलेयं १० पीत पुष्पकं ११ इति शब्दचन्द्रिका शिलाव्याधिः १२ ॥ इति त्रिकाण्डशेषः। अश्मोत्थं १३ अश्मलाक्षा १४ अश्मजतुकं १५ जत्वश्मकं १६ अस्य गुणाः तिक्तत्वं कटुत्वं। उष्णत्वं ॥ रसायनत्वं। मेहोन्मादाश्मरीश्लेष्म कृम्यपस्मार नाशित्वञ्च ॥ इति राजनिर्घण्टः ॥ अपि च शर्करा सर्व्वरोगहरत्वं। योगवा हित्वं अम्लस्य शीतकत्वञ्च ॥ इति राजवल्लभः। अस्योत्पत्ति नाम लक्षण गुणाः निदाघे घर्म्म सन्तप्ता धातुसारं धराधराः निर्य्यासवत् प्रमुञ्चन्ति तच्छिला जतु कीर्त्तितं। सौवर्णं राजतं ताम्रं आयसं तच्चतुर्विधं शि लाजत्वद्रिजतु च शैलनिर्य्या साह्यपि। गैरेय मश्मजञ्चा पि गिरिजं शैलधातुजं। शिला जं कटु तिक्तोष्णं कटुपाकं र सायनं। छेदि योगवहं हन्ति कफ मेदाश्मशर्करा मूत्रकृ।

च्छ्रं क्षयं श्वासं वातार्शांसि पाण्डुतां। अपस्मारं तथोन्मादं शोथ कुष्ठोदर कृमीन्। सौव र्णन्तु जवापुष्पवर्णं भवति त द्रसात्। मधुरं कटु तिक्तञ्च शी तलं कटुपाकि च। राजतं पाण्डु रं शीतं कटुकं स्वादुपाकि च ताम्रं मयूरकण्ठाभं तीक्ष्णमु ष्णञ्च जायते लौहं जटायुप क्षाभं तत्तिक्तं लवणं भवेत् विपाके कटुकं शीतं सर्व्वश्रे ष्ठमुदाहृतं। इति भावप्रका शः ॥

शिलाञ्जनी स्त्री कालाञ्जनीवृ क्षः इति राजनिर्घण्टः ॥

शिलाटकः पुं अट्टः। विले इति मेदिनी ॥

शिलात्मजं क्ली लौहं ॥ इति राजनिर्घण्टः ॥

शिलात्मिका स्त्री मूषा। इति शब्दचन्द्रिका ॥

शिलाद्रुः पुं शैलेयं। इति राजनिर्घण्टः ॥

शिलाधातुः पुं शितोपलः॥ खड़ी इति भाषा इति त्रिकाण्ड शेषः। गैरिकभेदः। स तु पी तवर्णः। इति राजनिर्घण्टः॥

सितोपलः शिलाधातु र्वर्णिके खा च मकूले। शिलाधातुवि शेषस्तु विज्ञेयो लोक शास्त्र तः॥ इति शब्दरत्नावली॥

शिलापट्टः पुं पेषणार्थशिला शिल् इति भाषा इति केचित्

शिलापुत्रः पुं पेषणयोग्यशि ला। लोड़ा इति भाषा। तत्प र्य्यायः। वर्षणालः २ शिलापु त्रकः ३ इति शब्दरत्नावली॥

शिलापुष्पं क्ली शैलेयं। इति राजनिर्घण्टः॥

शिलाभवं क्ली शैलेयं। इति जटाधरः॥

शिलाभेदः पुं पाषाणभेदी वृक्षः। इति रत्नमाला। प्रस्त रभेदकश्च॥

शिलारम्भा स्त्री काष्ठकदली इति राजनिर्घण्टः॥

शिलावल्का स्त्री औषधवृक्ष विशेषः। शिलावाक् इति हिं दीभाषा। तत्पर्य्यायः। शिलजा २ शैलवल्कला ३ वल्कला ४ शै लगर्भाह्वा ५ शिलात्वक् ६ शै ला ७ अस्या गुणाः। हिमत्वं। स्वा दुत्वं कृच्छ्र मेह मूत्राश्मरी मू लज्वर पित्त नाशित्वंच। इति राज निर्घण्टः॥

शिलाव्याधिः पुं शिलाजतु। इ ति त्रिकाण्डशेषः॥

शिलासनं क्ली शैलेयं। इति शब्दरत्नावली॥ प्रस्तरनिर्म्मि तासनञ्च॥

शिलासारः क्ली लौहं। इति हेमचन्द्रः॥

शिलाह्वं क्ली शिलाजतु। इति भावप्रकाशः॥

शिलिः पुं भूर्जपत्रवृक्षः। इति शब्दमाला॥

शिलिः स्त्री द्वाराधःस्थितकाष्ठे गोवराह् इति भाषा। इति शब्दरत्नावली॥

शिलिन्दः पुं मत्स्यविशेषः॥ यथा। शिलिन्दः श्लेष्मलो बल्यो विपाके मधुरो गुरुः। आमवा तकरो हृद्यो वात पित्त हरो म तः॥ इति राजवल्लभः॥

शिली स्त्री द्वाराधःस्थितकाष्ठं इति शब्दरत्नावली। गण्डूपदी स्तम्भशीर्षं। इति मेदिनी॥

शिलीन्ध्रं क्ली कदलीपुष्पं। क रका। इति मेदिनी॥ त्रिपुटा इति विश्वः॥

शिलीन्ध्रः पुं वृक्षविशेषः। इति

मेदिनी । मत्स्यविशेषः । स तु चित्रफलकमत्स्यः । इति जटाधरः ॥

शिलीन्ध्रकं क्ली गोमयच्छत्रिका । यथा गोमयच्छत्रिका माऽदिलीयच्च शिलीन्ध्रकं । इति हारावली ॥

शिलीन्ध्री स्त्री विहगीभेदः । गण्डूपदी । मृत्तिका । इति मेदिनी ॥

शिलीपदः पुं पादरोगविशेषः गोद इति भाषा । तत्पर्यायः ॥ पदवाएडीरः २ श्लीपदः ३ ॥ इति शब्दरत्नावली पादवल्मीकः ४ इति हेमचन्द्रः ॥ श्लीपदस्य विप्रकृष्ट निदानमाह पुराणोदक भूयिष्ठाः सर्वर्त्तुषु च शीतलाः ये देशास्तेषु जायन्ते श्लीपदानि विशेषतः । विशेषत इति वचनेनान्यत्रापि श्लीपदानि भवन्ति इति बोध्यते सामान्यलक्षणमाह । यः सज्वरो वंक्षणजो भृशार्त्तिः शोथो नृणां पादगतः क्रमेण । तच्छ्लीपदं स्यात् करकर्णनेत्रशिश्नोष्ठनासास्वपि केचिदाहुः तत्त्रिविधं । वातिकं पैत्तिकं श्लैष्मिकञ्चेति । तेषां लक्षणमाह ॥ वातजं कृष्णरूक्षञ्च स्फुटितं तीव्रवेदनं । अनिमित्तरुजं तस्य बहुशो ज्वरएव च ॥ पित्तजं पीतसंकाशं दाहज्वरयुतं भृशं ॥ श्लैष्मिकं तु भवेत् स्निग्धं तथा पाण्डु गुरु स्थिरं । त्रीण्यप्येतानि जानीयात् श्लीपदानि कफोच्छ्रयात् गुरुत्वञ्च महत्वञ्च यस्मान्नास्ति विना कफात् ॥ असाध्यमाह वल्मीकमिव संजातं कण्टकैरुपचीयते ॥ अब्दात्मकं महत्तच्च वर्जनीयं विशेषतः । यत् श्लेष्मलाहारविहारजातं जातं तथा भूरिकफस्य पुंसः । सास्रावमत्युन्नतसर्वलिङ्गं सकण्डुकं वापि विवर्जनीयं ॥ अस्य चिकित्सा ॥ लंघनालेपनस्वेदरेचनै रक्तमोक्षणैः । प्रायः श्लेष्महरैरुष्णैः श्लीपदं समुपाचरेत् ॥ सिद्धार्थ शोभाञ्जन देवदारुविश्वौषधैः संयुतैः प्रलिम्पेत् पुनर्नवा नागर सर्षपाणां कल्केनवा काञ्जिकमिश्रितेन । श्लीपदमिति शेषः । धत्तूरैरण्डनिर्गुण्डीवर्षाभूशिग्रु सर्षपैः । प्रलेपः श्लीपदं हन्ति चिरोत्थमपि दारुणं ॥

असाध्यमपि यातं तं श्लीपदं चिरकालजं । मूलेन सहचरायाः तालमिश्रेण लेपनात् ॥ तालस्य फलरसो ग्राह्यः ॥ समूलास्थलपद्मानां कल्केन मेनवारिणा संसृष्टं लवणोपेतं सेवितं श्लीपदं हरेत् ॥ पूगखोट वल्कल क्वाथं गोमूत्रेण युतं पिबेत् । श्लीपदानां विनाशाय मेदोदोष निवृत्तये ॥ रज्जनी गुडसंयुक्ता गोमूत्रेण पिबेन्नरः । वर्षोत्थं श्लीपदं हन्ति दद्रु कुष्ठं विशेषतः ॥ वर्षभूत्रिफलाचूर्णं पिप्पल्या सह योजितं । सत्तोरं श्लीपदं लि॰ ह्याच्चिरोत्थं श्लीपदं जयेत् ॥ गंधर्वतैलसिद्धां हरीतकीं गोम्बुना पिबति । श्लीपद विबन्ध मुक्तो भवत्यसौ सप्तरात्रेण ॥ गंधर्वतैले एरण्डतैले । गोम्बुना गोमूत्रेण । इति भावप्रकाशः ॥

शिलीमुखः पुं भ्रमरः । बाणः इत्यमरः युद्धं जाडीभूतः ॥ इति शब्दरत्नावली ॥

शिलेयं क्ली शैलजं । इति शब्दरत्नावली । शिलासंबन्धिनि त्रि

शिलोच्चयः पुं पर्वतः इत्यमरः ॥


शिलोञ्छः पुं उञ्छशिले उपात्तशस्यात् क्षेत्रात् शेषावचने उञ्छेन पति चणकाद्यादानवकुरणेन शिष्यते सञ्चीयते उञ्छशिले । उञ्छिपुञ्छे शिलपुञ्छे हृष्टो रित्युक्ते कृ गृ इति इजुड़त्वात् कः उञ्छशिलं संज्ञानविशेषे हीने विपर्यस्ते । शकानचेडुञ्छशिलेन वृत्तिः फलेनमूलेनच वारिणाच । इति समाहारद्वन्द्वे । उञ्छं शिलञ्च उञ्छभेदश्च यच्चान्यत्कृत्यपरिग्रहेण न्यूते इति निगमाभिधाने क्लीवं पुमानुञ्छ इत्ते शिलं इति वोपालिते पुंसञ्छः । रत्नकाशसतसारे परिणत वाक् कुलकोदारे भुवभूतिकृत शिलाञ्छेतलल पतितं वयं चिनुमः इति गोवर्द्धनः । कोचिदुञ्छ शिलयो भेद माह । प्रतिग्रहात् शिलं श्रेय स्ततोप्युञ्छः प्रशस्यते इति । तत्र शाल्यादे निपातित परित्यक्त मञ्जरीणां आदाने शिलं । शिले धान्य मञ्जरीसंग्रह इति स्वामी च

पक्षैकशः कपोतवक्त्राम्य कणो
ह्यारुण मुञ्जुः। तद्वत् उज्झा
धाम्य कणोच्चयः इति। शिले
तालव्यादि दन्त्यादि च। इत्यम
रटीकायां भरतः ॥
शिलोत्थं क्ली शैलेयं। इति
राजनिर्घण्टः ॥
शिलोद्भवं क्ली शैलेयं। इति
राजनिर्घण्टः ॥ चन्दनविशेषः
यथा। सुशीतलं चन्दनं यत्
तैलपर्णिक मुच्यते। उभयो
तस्य पर्य्यायो सोमयोनि शि
लोद्भवे। इति शब्दचन्द्रिका॥
शिलौकाः पुं गरुडः ॥ इति
त्रिकाण्डशेषः ॥
शिल्पं क्ली कलादिकं कर्म्म।
हुनर् इति पारसीकभाषा। का
रिगरी इति हिन्दीभाषा। इत्यम
रः वात्स्यायनोक्तं नृत्यगीत वा
द्यादि चतुःषष्टि वाह्यक्रियाः
तथा आलिङ्गन चुम्बनादि चतुः
षष्टि अभ्यन्तरक्रियाः कलाः ॥
आदिना स्वर्णकारादि कारुक
र्म्मग्रहः। एतत्सर्व्वं शिल्पं कथ्य
ते। इति तट्टीकायां भरतः ॥
स्रुवः ॥ इति मेदिनी ॥
शिल्पकारः पुं शिल्पी शिल्पवि
या

व्यवसायी कारिकर इति भाषा
शिल्पं करोति इत्यर्थे षन्प्रत्य
येन निष्पन्नः ॥
शिल्पकारी[२] त्रि शिल्पकर्म्मकर्त्ता
तेस्यात्मजादि यथा। विश्वकर्म्मा
च शूद्रायां वीर्य्याधानं चकार
सः ततो बभूवुः पुत्राश्च नवै
ते शिल्पकारिणः ॥ माला
कारः कर्म्मकारः शङ्खकारः कु
विन्दकः। कुम्भकारः कंसकारः
षडेते शिल्पिनां वराः। सूत्रधा
र श्चित्रकरः स्वर्णकारस्तथैव
च। पतिता स्ते ब्रह्मशापादया
ज्या वर्णसंकराः ॥ स्वर्णका
रः स्वर्णचौर्य्यात् ब्राह्मणानां
द्विजोत्तम बभूव सद्यःपतितो
ब्रह्मशापेन कर्म्मणा ॥
सूत्रधारो द्विजातीनां शापेनप
तितो भुवि। शीघ्रञ्च यज्ञका
ष्ठञ्च न ददौ तेन हेतुना ॥
व्यतिक्रमेण चित्राणां सद्यश्चि
त्रकर स्तथा। पतितो ब्रह्मशा
पेन ब्राह्मणानाञ्च कोपतः॥
कश्चिद्वणिक् विशेषश्च संसर्गा
त् स्वर्णकारिणः। स्वर्णचौर्य्यादि
दोषेण पतितो ब्रह्मशापतः ॥
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १०।

ध्यायः ॥
शिल्पशाला स्त्री क्ली स्वर्णका
रादीनां कर्म्मगृहं। कारखाना
इतिपारसीकभाषा। तत्पर्य्यायः
आवेशनं २ इत्यमरः ॥ शि
ल्पिशाला ३ शिल्पशालं ४ शि
ल्पिशालं ५ इति तट्टीका ॥
शिल्पशास्त्रं क्ली शिल्पकर्म्मग्र
न्थः। तत्र शास्त्राणि बहूनि सन्ति
तन्मध्ये वास्तुशास्त्रैक लिख्यते।
यथा स्त्रीपुत्रादिक भोग सौख्य
जनकं धर्म्मार्थ कामप्रदं जन्तू
नामयनं सुखास्पद मिदं शी
ताम्बुघर्म्मापहं। वापी देवगृ
हादि पुण्य मखिलं गेहात् समु
त्पद्यते गेहं पूर्व्वमुशन्ति तेन वि
बुधाः श्रीविश्वकर्म्मादयः। सि
द्धे गृहारम्भ शुभानि हृष्टा यथो
दिते मासि बलक्षपक्षे। शशा
ङ्कवीर्य्ये सुदिने निमित्ते शुभे
हेतौ सौम्यगते प्रवेशः ॥
चैत्रे शोककरं गृहादिरचितं
स्यान्माधवेर्थप्रदं ज्यैष्ठे मृत्यु
करं शुचौ पशुहरं तद्वृद्धिदं
श्रावणे। शून्यं भाद्रपदे त्वाश्विने
कलिकरं भृत्यक्षयं कार्त्तिके
धान्यं मार्ग सहस्ययोर्दहनभी

र्माघे श्रियः फाल्गुने
आदित्ये हरि कर्क नक्र घटगे
पूर्व्वापरास्यं गृहं कर्त्तव्यं तुल
मेष वृश्चिक वृषे याम्योत्तरा
स्यं तथा। द्वारं भिन्नतया क
रोति कुमती रोगार्थ नाशं
स्तदा कन्या मीन धनुर्गते
मिथुनगे चास्मिन् कार्य्यं गृहं
कन्यादि त्रिषु पूर्व्वतो यमदिशि
सृष्टिञ्च चापादितो द्वारं प
श्चिमतस्त्रिके जलचरात् सौ
म्ये रवौ युग्मतः। यस्माद्वत्स
मुखं दिशास्तु भवनं द्वारादिकं
हानिकृत् सिंहे वापि वृषश्च वृ
श्चिक घटे वाते हिते सर्व्वतः। प्रा
ची मेषतुला रवावुदयति स्याद्वैष्ण
वे दक्षिणे चित्रा स्वातिभ मध्यगा
निगदिता प्राची बुधैः पञ्चधा।
प्रासादे भवनं करोति नगरं दि
क्सूत्र मर्थस्त्वयं हर्म्ये देवगृहे
पुरेच नितरां मायुर्ध्वजे दिक्सुखे
तारे मार्कटिके ध्रुवस्य ममता
नीते बले वैनते दीपाग्रेण तदे
कान्तश्च कथितः सूत्रेण सौ
म्या दिशा। शङ्कौ नैत्र गुणे
न ३६ मण्डलवरे छाया तयो
र्मत्स्ययो र्जाता पञ्चगुणितस्त शंकु



तलतो याम्यान्तरे स्तत्ततुरैः ॥
राशीना मलि मीन सिंह भवने
पूर्वास्यत्वं शुभं कन्या कर्क
टनक्रराशि गृहिणां याम्यानने
मंदिरं । राशौ धन्वि तुला युग
स्मसदनं शुभं प्रतीचीमुखं पुं
सां कुंभ वृषाज राशि भजतां
सौम्याननं स्याद्गृहं ॥ अथ भू
परिग्रहः ॥ श्वेता ब्राह्मणभू
मिकाच घृतवद्गंधा शुभंबा
दिनी रक्ता शोणितगंधिनी
नृपतिभूः स्वादे कषाया च सा
स्वादेस्त्वा तिलतैल गंधि हरि
तापीताच वैश्या मही कृष्णा म
त्स्यसगंधिनीच कटुका शूद्रेति
भूलक्षणं । स्वादे भवेद्या मधुरा
सिताभा चतुर्षु वर्णेषु मही प्र
शस्ता । स्नेहान्विता वेत्रु भूजेग
योर्वा सोहादेवत्याखु विशलयो
र्वा ॥ परीक्षितायां भुवि विघ्न
राजं समर्चयेत् चंडिकया स
मेतं देवाधिपं वाहृदिशाधिना
थान् सपुष्प धूपे र्वलिभिः स्व
होय- खाते भूमि परीक्षणे क
थिते तत् पूरयेन्तरद्दा हीने
हीन फलं समे समफलं लाभो
रजो वर्द्धिते । तत्कृत्वा जलपूर्ण

माशतपदं गत्वा परीक्ष पुनः
पादोनेह विहीनकेश्च निस्तेम
ध्यायमेष्ठास्तुनि । भूमेः प्राक्
प्रवणाच्च शंकर ककुप् सौम्या
श्रितं सौख्यदं वन्हौ वन्हिभयं
यमेचमरणं चौरादयं रक्षसि ।
वायव्ये प्रवणाच्च धान्यहरणं
स्याच्छोकदं वारुणं विप्रादे स्तु
वर्णतश्च सुखदं स्त्रक्ष्विक्रमात्
सौम्यतः । अग्नी रक्षस वायु शं
कर दिशि स्थाप्याः क्रमात् कील
काश्चेचम्पात् खदिरात् शिरीष
ककुभात् वृक्षात् क्रमेण द्विजैः
वर्णानां कुशा मुञ्ज काश शणजं
सूत्रं क्रमात्स्त्रणानिस्त्राभूः स्फटि
कोवरा विल्ववती शाल्मलैर्नाना शु
भा । ककुभादित्यत्र वकुलादिति
च पाठः ॥ प्रथममयंवापि शुद्धा
थिपेन देवस्य वृक्षस्य फलस्य
वापि । कार्ये हि कोष्ठान्तर संपु
तेन सत्यं विलोक्य भवनेषु सूक्ष्मा
वा का चा टा ता प ह सा पाप
वर्गाः प्राच्यादिषु कोष्ठके स्यु
मुक्तं । केशांगारा तुः काष्ठ लोहास्थि
कार्य तस्मात् कार्य्यं शोधनं भू
मिकायाः ॥ शल्यं गवां भूपभयं
हयानां रुजं श्वनोत्थाः कलह

प्रणाशो । खरोष्ट्रयो हॉति म
त्स्यनाशं स्त्रीणां मजस्याग्निभ
यंतनोति ॥ कन्यादौ रवितस्त्रये
फणिमुखं पूर्वादि सृष्टिक्रमं
ख्यातं वास्तुवपु दिशात्रयगतं
लांगूल पृष्ठे शिवः । द्वारं तस्य
मुखे गृहादि भयदं उत्सिहये
सौख्यदं दुःखप्राक् खनने शि
रोग्नि वपुषः क्रोडे सुखं दक्षि
णे ॥ प्राच्यां नागमुखं बुधे लिं
गादिते भाद्राश्विने कार्त्तिके मा
गात् फाल्गुण शुक्रतः क्रमत
याम्यायां जले चोत्तरे । दोर्ब्बा
हु विभाजिते ; दिनकरा हारा
लिखित् कोष्ठगात् शान्यगार
कयोश्च तत्र फणिनः शारीर
कंनो खनेत् ॥ शीर्षे मातृपि
तृक्षयः प्रथमतो खाते रुजा
पुच्छके पृष्ठे हानिभयेच क्रोडि
खनने स्यात् पुत्र धान्यादिकं
पूर्वास्ये ग्निलखातते यमसु
खिखाते शिरे कारयेत् शीर्षप
श्चिमगे च वह्नि खनने सौम्य
खनेत्रैर्ऋते । दक्षिणकोणपूर्व
विभागे पूजनपूर्वं शिला सम
र्प्या । स्थाप्या शेषशिला दक्षिण,
तस्तस्याः समर्प्या विधानेन ॥

ब्रह्मशंभुर्यथा सूत्रं भिन्निशि ·
लान्यासे लग्नस्यारोपणं तथा
पूर्वदक्षिणयो मध्ये ऊर्ध्वादिस्था
हेकाष्टपथः । नारदः । नभस्यादि
षु मासेषु त्रिषु त्रिषु यथाक्रमेण
वांदिदिक् शिरो वामपार्श्वाशा
यो प्रदक्षिणं । वास्तुप्रासेषु कं
वास्तोः शिरसि पुच्छे च वामक्रो
डे च पृष्ठतः । आयुः कामःख
नेन्नैव दन्तक्रोडो खनिः शुभा
भित्ते मूले स्थापनीयं जलां
ते पाषाणे वाहेम रत्नैः स
गर्भं । शीर्षे गुर्वी लेपहीना
धिका वा संधिस्थाणि पादही
नाधिकास्थे ॥ भवन पर सराणां
सूत्रेण पूर्वमुक्तः कथित इह
पृथिव्याः शोधनेपि द्वितीयः
तदनुभवनिवेशो लग्न संशो
धनेस्यादथ वसनकाले पंच
धा वास्तुयज्ञः । वृक्षा उपस
कंटकाश्च फलिन स्याज्या गृ
हाद् दूरतः पालेचम्पकपाटले च
कदलीजाती तथा केतकी या
माहर्दूमपोष वृक्षस्तु रजा च्छा
यानशस्ता गृहे पार्श्वकस्थहरेरकी
श पुरतोज्ञेनाग चंद्राः क्वचित्
सद्गृहवृक्षा द्रविणस्य नाशो ऊ

वैतिते कण्टकिनो ऽरिभीतिं । प्र
जाविनाशं फलिनः समीपे गृ
ह वर्ज्याः कलधौतपुष्पाः ॥
दुष्टो भूतसमाश्रितोपि विटपी
नोच्छिद्यते शाकितः तद्विल्वी
वशमी मशोक वकुलौ पुन्नाग
सच्चम्पके । द्राक्षापुष्पक मण्ड
पंचतिलकान् कृत्वा वपेद्दाडि
मीसोम्पादेः शुभदौ कपीतनव
टावौदुंबराश्वत्थकौ ॥ उत्संग
नामाभिमुखः प्रवेशः स्यात्
पृष्ठभंगो भवनस्य पृष्ठात् विना
शहेतुः कथितो ऽपसव्यः स
व्यापसव्ये भवने ऽरिकिले ऽसौ
प्रवेशः प्रतिकायको वरुण
दिग्वक्त्रो भवेत् भवेत् सुहितो
नाम्नावर्त उदाहृतो यमसुरे ऽसौ
हीनबाहुर्बुधैः । उत्संगो नरवा
हनाभिवदनः स्तुत्या यथा नि
र्मितः प्रागवक्त्रोपि च पूर्णबाहु
रुदितो गेहे चतुर्दा पुरे ॥ ह
स्तः पूर्वोत्तरयुक्तो मुनिवरचि
तः पर्वचैकं विमाने मात्रा प
र्यायवाना मुदर विमिलिता नि
स्त्राचानुक्रमानां । पुष्टं स्थूलतरि
पूर्वं तरचुच विभजेदंकुलैः पर्व
पुष्पिर्निर्गमीरक्तवाष्टा मधुमप

उदितः खादिरो वंशधात्वोः ॥
ज्येष्ठो ऽशमि यवोदयैस्तु मुनि
भि मेध्यस्तु षट् कन्यसो माध्य
वोत्तमकेन ग्राम नगरे कोशा
दिके योजने । प्रासाद प्रतिमेन्द्र
पस्य भवने मध्येन हर्म्यादिकंया
ने षड्यव संभवेन शयने च
द्वासनासादिके ॥ रुद्रो वायु वि
श्वकर्मा कृतान्तो ब्रह्मा काले
स्तोयपः सोम विष्णुः । षष्ठो
देवा मूलतो ऽस्मिंस्तु मध्यात्
पंचाशान्ते ह्यग्नि वेदैर्विभज्य
ईशो मारुत विश्ववह्नि विध
यः सूर्यश्च रुद्रो यमो वैरूपा
वसवोष्ट इति वरुणो षड्व
क्र इच्छा क्रिया । हाने वि
नयति निशाकर जयो श्रीवा
सुदेवो हली कामो विष्णु रिति
क्रमेण मरुतो हस्ते चयोविंशा
तिः ॥ उच्छ्राहने योग भयं च
दुःखं वक्र भयपीडनकं प्रजा
याः स्तम्भविनाशोपि यनस्त्र
यः स्यात्मोहः क्रमाद्देवतपीड
नेन ॥ हस्तो यत्नात् पुष्य
यो रेतसाले लक्ष्ण पार्श्वोमदि
शो निवेश । हस्ताङ्गुलीया
स्यकस्मात् दोषो कार्ष्णाविज्ञे

दुःख माविष्करोति ॥ तालो
द्वादशमात्रिका परिमित स्ताल
द्वयं स्यात् करः पादोन द्विक
रोपि किष्कु रुदित स्त्राप श्च
तुर्भिः करैः । कोपोदण्ड सहस्र
युग्म मुदितो द्वाभ्यां च गव्यूति
कातान्यां योजन मेव भूमि र
थिता कोटीशतं योजनैः । स
प्ताष्टकं हष्टि त्वहस्त मोज्ञं का
यौसज्ञे स्यादवलेव संज्ञः । का
ष्ठञ्च तच्छायौ मतोपि लेख्य
मित्यष्ट सूत्राणि वदंति संतः ॥
इति वास्तुशास्त्रे राजवल्लभमंड
ने मिश्रकलक्षणवर्णनं नाम ।
अध्यायः । संग्रामेपक रुद्रयो
स्तु पतितः स्वेदो महेशात् स्थि
तो तस्माद्भूत मभूच्च भीतिजन
नं द्यावापृथिव्यौ महत् । तद्दे
वैर भक्ता विधृत्य निहितं भूमा
वधोवक्त्रकं देवानां वसनाच्च
वास्तुपुरुष स्तेनैव पूज्यो बुधैः
प्रासादे भवने तडाग खननेकू
पे च वापीवने जीर्णोद्धारपुरे
च यागभवे प्रारंभ निर्वर्तने
वास्तोः पूजनकं सुरालयकृ
थितं पूजां विना हानये पादो
त्तानसि कं शिवे ऽग्निं कर

योः संधीच कोणद्वये । वेश्मा
कृति वास्तु विहाञ्छनीय चैकाशी
तो भागसहस्रयुक्तः । साधा
रणा ह्यष्टपदो पि तेषु चैकाधि
काशीतिपद स्तथैव ॥ ग्रामे
भूपति मंदिरे च नगरे पूज्या
श्चतुःषष्टिके रेकाशीतिपदैः
समस्त भवने जीर्णे नवाब्धं
शकैः । प्रासादेषु शतांशकै
स्तु सकले पूज्यास्तथा मंडपे कू
पेषस्व चंद्रभागसहिते र्वदवा
पीतडागे वने । ईशो मूर्ध्नि स
मास्थितः श्रवणयोः पर्जन्यना
मादिति राप स्तस्य गले तदं
शयुगले प्रोक्तो जय स्वादि
ति उरसि अर्यमा भूधरो स्तन
युगेस्यादापवत्सो हृदि पंचेन्द्रा
दिसूर्यश्च दक्षिण भुजे वामे च
नागादयः । सावित्रः सविता
च दक्षिणकरे वामे द्वये रुद्र
नो मृत्यु मैत्रगण स्तथोरु विध
ये स्यान्नाभि पृष्ठे विधि मेढ्र
शक्रजयौ च जानुयुगले तो
वह्निरोगौ स्मृतौ पूषा नन्दि
गणाश्च सप्तविबुधाः कल्पाः
पदेशोपत्रकः ॥ ईशस्तु पर्जन्य
जयेंद्र सूर्याः सत्या भृशाकाशा

शाकपव पूर्वे । वशिष्ठ एषावि
तथ्याभिधानो गृहक्षतः प्रेतप
तिः क्रमेण । गंधर्व भृंगो मृग
पितृ संज्ञो द्वारस्य सुग्रीवकपु
ष्पदंताः । जलाधिनाथो ऽप्यसुर
श्च शोषः सपापयक्ष्मापिच रो
गनागौ ॥ मुख्यश्च भल्लाट ऊर्वे
शैला स्तथैव बाह्ये दितिनोः
दितिश्च । द्वात्रिंशदेवं क्रमतो
ऽर्चनीयास्त्रयोदशैव त्रिदशा
श्च मध्ये । प्रागार्यमा दक्षिण
तो विवस्वान्मित्रोऽपरे सौम्य
दिशा विभागे । पृथ्वीधरोसाव
घमध्यतोपि ब्रह्मार्चनीयः स
कलेषु मध्ये । आपापवत्सौ शि
वकोणमध्ये सावित्रकोप्यस
विता तथैव । कोणे महेंद्रेन्द्रज
योऽन्तरीये रुद्रोऽनिलेऽप्यापिच
रुद्रदासः । ईशान बाह्येच चरकी
द्वितीये विदारिका पूतनिका
तृतीये । पापाभिधा मारुतको
णके च पूज्याः सुरा उक्त विधा
नतस्तु ॥ ब्रह्मा वेद पदस्तु तेन
ममका देवार्यमाद्या स्तमी को
णे ऽष्टौ द्विपदा स्तथाष्ट मरुतः
कोणेर्द्धभागाः हरिः । शेषा एक
पदाः सुरास्तु कथिता वेदर्ध ·

के दश ध्यो नव ब्रह्मा षट्पदि
नोर्यमादि विवुधा ईशाद्य वै
कशाः ॥ ब्रह्मा कलांशो वसतो
र्यमाद्याः कोणेष्ट वाह्येपिचसा
र्द्धभागाः । विधात्रकोणे द्विपदा
स्तथाष्टौ शेषाः सुरा एकपदाः
शतांशे ॥ ब्रह्मार्जिनांशा रुध
उदितः शिवनोर्यमाद्याः कोणे
षु सार्द्ध पदतोपि तथैकवाह्ये
शेषा द्विभागा समकारविभाग
कोष्ठं पूज्या रथ्यास्थराज वाहन
के ऽस्तुयंत्रे ॥ यंत्रेत्रयोदशपदे
रवि पूजनीय स्तत्पंचविंशति
रजोदशानोर्यमाद्याः । कोणेः
ष्वयो ऽ मरगणावहिके वला
पूा भद्रे ऽधिकं रविविभागपरे
द्विभागाः ॥ द्वात्रिंशत् कम
लासनो ऽर्यमसुखोः सुः स
र्धभागाः क्रमात् । कोणे ऽ
ष्टौ सुरा द्विभाग सहिता
वाह्येषु सार्द्धांशकाः । अष्टौ
द्वादशपदाः पुन द्विपदकाः स्युर्
भागिनो ऽष्टौ सुराः त्रयोदश
व चंद्रभाग सहिते ऽर्द्ध सा
द्वेवतानोक्रमः ॥ वेदांशो वि
धि सूर्यम प्रभृतय स्त्र्यंशानव
स्वष्टके कोणेऽ ष्टपदा ॥

द्धगाः परसुराः षड्भागहीने
पदे । वाह्ये नेन्द्र युगांश एवं
एव मध्यनाष्टांशे स्वतः षष्टिके
संयेः सुरामितान् सावीः पशि
हरेक्षिमी स्तलाःस्तम्भकान् ॥
रेखाद्वयं कोणगतं विधेयमे
शांतरेणैव तु कर्णसूत्रात् । य
दष्टसूत्रैः कथितं तु पद्मं तत्सी
उत्नात् स्वामि धन प्रणाशः ॥
प्रोक्ते चतुर्विंशति लांगले य
त्पदार्द्धगं हानिकरं प्रजायाः
यड्भिस्तु सूत्रे मरणाय वज्रे
कोणे त्रिशूलन्त्र विपो भयाय
य । पर्वेस भूमी सवसेचये
तो सुपंचगाख्येन ततो विले
ख्या । रेखा सुवर्णेन मणिप्र
वालेष्टिशाव्हतैर्वापि युन स्तदु
र्द्धे । द्वात्रिंशदंशाः पृथुले च दे
र्घे कोणेषु वज्री जिन सं
ख्या ष भागाः पतत्पद्मालोक
यितं सहस्रं तेनश्च सर्वोत्तम
मेववास्तोः ॥ मध्ये ब्रह्मा प
जनीयः शतांशे स्वस्तिशङ्खैः
पदे वोह्यवीथी । प्रोक्ता देवा ष्ट
र्यमाद्या अशीत्या मध्ये को
णेष्टौ शते चाष्टषष्टा । कोणे
ष्वेयानंदपदैः सवोश्च शोषाश्च

वाह्येवसुभागिनश्च । वीथीच
वाह्येरविभागयुक्तं शतंपदानां
कथितं मुनींद्रैः ॥ दुर्गं प्रतिष्ठा
विषयेनिवेशो तथा महाञ्चास्त्र
चकादिहोमे । मेरौ च राष्ट्रेष्व
पिज्येष्ट लिंगे वास्तुः सहस्रेण
पदेः प्रपूज्यः ॥ त्रिमेखलं शंक
रदिग्विभागे कुण्डं प्रकुर्यात्कर
तोद्युगास्रं । होमे सहस्रांणाश
तमष्टयुक्तं प्रत्येक मष्टाधिक
विंशतिर्वा । मध्वाज्य दुग्धे दधि
शर्करा भ्या कैसे तिले व्रीहि
यवे नेवान्नैः । पालाश दुर्वांकु
रगुग्गुलैर्वा होमं तदंते सुवर्ण
जनेच ईशे चूतान्न मपरे सद्दू
तोदनञ्च दध्याज्ययाय हरिता
म्बर मेव कुर्म्म । वस्त्राणि पिष्ट
कमथ कुलिशं सुवेद्र स्तत्र वि
तान मुदितञ्च दिवाकरस्य गो
धूमयुक्तं घृत मेव सत्य मत
स्यान् भृंगेपि शष्कुलि मंतरीचे
चक्रा सुचे एति तथैं लाजा व
दध्यादपमें चाणकोदनञ्च । मध्य
नेत्रे गृहक्षताय यमतो मांसौ
दनं दापयेत् गंधर्वे शतपत्र मो
दनयुतं भृंगे ऽ जजिव्हां तथा
प्रोक्ता नीलजावा मृगायपित्र

नो देयाश्च सन्मोदकाः पेष्टके
सवर्तिं तथैव विधिवद्द्याच्च
दौवारिके। सुग्रीवाय च पूप
का गणवरे श्वेतप्रसूनं पयः
पद्मे वारुणके सुरापसवके
तैले तिला शोषके॥ पापा
ख्येपि च पक्वमास मुदिते रो
गाय सर्वौषधीः। गोक्षीरं फ
णिने च मुख्यविबुधे श्रीखंड
भक्तं तथा॥ भल्लाटाय सुवर्ण
कं धनपतेः मत्स्याज्य दुग्धं त
था। शाकान्नपर्वतके ऽदितेस्त ल
पिका दध्यादितो दितिकां सत्यौरे
दीर्घकं कृसरां विहितं त्वापाप
वत्से तथार्यम्णे ऽकृष्णान्नचंदर
मेच्च पयसायुक्ता तथा शार्करा
सावित्रेपिच लड्डुकाश्च सवितुः
पूपा गुडाः सहुता देयं वाय
विवस्वते घृतयुतं दुग्धं तथा
मोदकाः। इन्द्राख्ये कुसुमस्र
गिन्द्रजयके देयं चम्पके मैत्रेऽ
रप घृतच्च गुग्गुलयुतो गंधस्त
थारुद्रके॥ तत्र सिद्ध मतेन्त्वपि
रुद्रदासे रक्तकमाला पृथिवीध
राय पयस्तला गा सवृतं ओदनं
दद्यादिषौ स्वर्णमतो विलेपः
सुराशिमांसं विहितं चरकैरतथै

तथा

व पीतोदनको विदार्यै। र
क्तोदनैः पूतनिकाड्वैनीयाम
स्पासवेनापितथैव पापाः॥
मांसं पक्वं पिलिपिञ्जाय त
जम्भाये विहितं सघाः स्कंदा
य तस्मादिरायुक्तं चार्यम्णे दि
पिएर्वादो॥ यः एजयेद्वास्तु
मनन्यबुद्ध्या न तस्य दुःखं भ
वतीह किंचित्। जीवत्यसौ व
र्षशतं सुखेन स्वर्गे नराणामिह
तिकल्पमेकं। इति श्रीसूत्रधा
र मण्डनविरचिते वास्तुशास्त्रे
राजवल्लभे वास्तुलक्षणं २ अध्या
यः॥ अथायत्तं व्यय तारकांशका
दिधुवाग्निगृहायत प्राधान्ये सौ
ख्यपथाभिवृद्धि रथिका यस्मा
दतः कथ्यते। आयास्तु ध्वजधू
म्र सिंहश्वानका गोखरसभेभाः
क्रमात् धांक्षः स्त्वष्टम आयमेषु
विषमाः श्रेष्ठाः समाः न शुभे॥
मानेदेवगृहादिमण्डपमठे प्रा
सादकरे लेन तत गेहे कर्मका
स्यनाय करतः प्राग्देण देयं गृ
हे। आयो दैव करोंगुलादि भपि
तेहस्ताङ्गुलै रंशतः सेवसर्पाउ
सानतोपि नगरे दंडेन मानेष
रे। प्रायः कल्प्या हस्त मेयैः

करैश्च देवे मात्रा निर्मितेमा
त्रकाभिः॥ मध्ये पर्यंकाशने
मंदिरेच देवागारे मण्डपे भित्ति
वाह्ये॥ छत्रे देव गृहे द्विजस्य
भवने स्याद्वेदिकायां जलेवि
स्तारोच्छ्र्य वस्त्र भूषण मठा
गारेषु शस्तो ध्वजः। धूम्रो वह्नि
पचजीविना मपि गृहे कुण्डेऽश्वहो
मोद्भवे सिंहद्वार नृपालयेस्व
निचये सिंहस्य सिंहासने। च
ण्डाले श्वनको विशांतु वृषभो
हर्म्ये हयानां हितो वाणिज्येथ
न भोजनस्य भवने ऽथो वाह्य
गेहे खरः वादित्रे स्वजीविना
मपिगृहे शोद्रे गजो योजितो
याने स्त्री गृह वाहने च शय
ने शस्तो गृहे हस्तिनो। धांक्षः
शिल्पितपस्विनां हितकरः शेषा
सु वेनामवत्। धांक्षः काकमु
लो विडालवदनो धूम्रो ध्वजो मा
नुषः। सर्वे पक्षिपदा हरेर्विव
गलो हस्तो नरस्येव तु प्राच्याः
स्युर्दिशात्क्रमेणपतयो ह्यष्टौ
चते मन्मुखा॥ देयाः सिंहगज
ध्वजादि वृषभे सिंहध्वजो कुंजरे
सिंहो वै ध्वजश्च पतेन वृषभो ऽ
प्यत्रापि देयो बुधैः ॥

सिंहो हस्ति वृषालये सुतिकर
स्त्वायस्य वक्रे गृहेतस्मिन्नेवचवा
मदक्षिणादिशा द्वारे स प्रायः शु
भः॥ ध्वाक्षे देवगृहे ऽग्निभि वि
भजिते शेषो ध्वजाद्यायकोऽष्टघ्ने
तत्कुणिते च पिण्ड भजितेस्याद
त्र मन्त्रादिकं। नक्षत्रे वसुभि
र्युधापि भजिते हीनत्वलक्ष्मी
मद स्त्वल्पायश्च पिशाचकोध्वज
मृते संवर्द्धितो राक्षसः॥ न
क्ष्मेलक्ष्य हर्म्य नाम सहिते भ
क्ते त्रिभिस्त्वशकः स्याद्दिक्षोपम
भूपति क्रमवशाद्देवे सुरेशोहि
तः। वेधा मेव यमस्त पुण्य भ
वने नागो तथा भैरव राजेशो
गजवाजि यान नगरे राजालये
मंदिरे॥ यावद्गृहेशो गणयेत
स्वधिष्ण्यान्तरा विभक्तेनवभिश्च
शेषाः। त्रुटे स्तृतीयासकले
विवर्ज्या या पंचमी सप्तमिका
ने शस्ता॥ धिष्ण्यानीह च स
प्तषः क्रमतया वक्रेत्तु पूर्वादि
तः स्पष्टा तानि भवंति यत्र गृह
भंतत्रैव चंद्रो भवेत्। हानि प्रह
रतः करोति पुरत स्वायुः स
यंचेद्धमाः पार्श्वे दक्षिणा वामके
शुभकरो ऽग्रेदेव भूपालये॥



प्रीतिः स्यात् सम सप्तमीच दश
मी चैकादशी शोभना द्वादिश्नं
युगला करोति मरणं षष्ठी क
लिः पंचमी। मेषो ऽश्विनितये हृ
रिश्लपित्रभाद्वापस्त्वये मूलतः पो
षेः स्तुर्नवराशयः परमते नन्दा
शाकैस्त पृथक्। भौमो वृश्चिक
मेषयो वृष तुले शुक्रस्य वाशि
हयं कन्या युग्म बुधस्य कर्कस
दनं चंद्रस्य सिंहो रवेः। जीवो
मीन धनुःपति शृं गा चृटो मन्द
स्यगोहं स्मृतं मित्रगणपर्ककुजेन्दु
देव गुरवो ऽन्ये चारय स्त मिथः
देवहते कृति पुष्यभेऽश्विभ मृ
गे मैत्रानिलं पौसभं हस्तादि
त्र मघोत्तरं तत्क विधौ पुर्वोत्त
रारुद्रभे। रक्तो मूल विशाखि
काग्नि पित्रभं चित्रा धनिष्ठाह
ये ज्येष्ठाश्लेष मघीरह देत्य मनु
जे मृत्युस्त देवे कालिः॥ वैरंचो
त्तरफल्गुनी युगलयोः स्वाती
भरेष्या हेयो रोहिण्युत्तरषाढ
योः कृति पुनर्वसौ विरोधं
तया। चित्रा हस्तभयोश्च पू
ष्यफाल्गुनो ज्येष्ठा विशाखयो
र्योः प्रासाद भवनासने च शयने
नक्षत्र वैरं त्यजेत्॥ वि

प्राः कर्कझषालिनो निगादिताः
सिंहाज चाप न्यथा विट् कन्या
मकरो वृषो ऽथ वृषला युग्मश्च
कुम्भस्तुला वर्णोनोत्तमकामिनी
चभवने वर्जपं बुधे यत्नतः श्रे
ष्ठाद्वादश नन्द राम गुणतो वि
प्रक्रमाद्राशयः॥ अश्वाश्विनी
शतभयो यंम एषि हस्ती छा
गोऽग्नि पुष्प अजगोपि विपार सौ
म्प। मूलार्द्रयोः श्वनक ओतुरह
त्वदित्ये पूर्वी मघासु मत उन्दु
रु देव योनिः॥ गो भद्रोत्तरफ
ल्गुनीत अदिता स्वाती करेमा
हिषी व्याघ्रा स्वाघ्र विशाखयो
श्च हरिणा ज्येष्ठानुराधा भयोः
पूषाढ श्रवणे कपिर्निगादितो
वैश्वाभिजित्राकुले प्रभायां व
सते मृगेंद्र अदितो वैरं त्यजेलो
कतः॥ आयरत्नाराव्यय मंश
कंच होकत्र कृत्वा विभजेत्
क्रमेण। तिथ्याच वारेणात
थैव लग्नैः शेषैस्तु भावेवभवे
सु रंकैः॥ दैर्घ्यपृथुत्वेनचताडनी
ये तथो यदेकं पुनरुक्तच्छेये
ण। शेषेधिनाद्यो वसुभाजि
तेस्मिन् समः प्रणाक्तो विष
मस्तु नेव॥ वर्गाष्टकस्य॥

पतयो गरुडो विडालः सिंह
स्त्वथैव श्वनकोरग मूषकेणाः
मेष्ठा ककार च टताः पयशा
श्चवर्गा यः पंचमः सरिपुरेव
बुधैर्विवर्ज्यः। प्राश्विन्यादिकभ
त्रयेफलानिभं चक्रं त्रिनाडयुरू
वं हैकस्था वरकन्ययोश्चयदि
भंतन्मृत्यदं चांशतः। नाडी से
वक सिंह गेह पुरत स्तेका पु
भास्त्वथा आयादित्रिकपंचस
प्तनवभिस्त्वैस्ते गृहं सौख्यदं॥
गुणगणलघुदोष समन्विते भ
वन देव गृहादिक मिष्यते। जल
लवेनशिखी वरुणापवाभ्रशम
मेति गुणैरधिको यतः। अनिशी
सूत्रधारमण्डन विरचिते वास्तु
शास्त्रे राजवल्लभे प्रासादिलक्षणे
३ अध्यायः॥ वापी कूप तडा
गदेव भवनाद्यारामयागादिके
तीर्थानामवगाहनञ्च विधिवत्
कन्याप्रदानादिकं। सर्वं पुण्य
मिदं नृपः सलभते यः कारयेत्पार्थ
ते दुर्गसर्वजनाय धर्मजननं दि
व्याम मेकं परं॥ सिंहो वैरिप
राभवं प्रकुरुते तिष्ठन् गिरौ गौ
रवे दुर्गस्था नृपतिः प्रभूत्तक
टकं शत्रुं जयेत् संगरे॥

कैलासे नगरं शिवेन रचितं
गौर्य्यादिसंरक्षणे दुर्गं पश्चि
मसागरेचहरिणान्येषा कि
मत्रोच्यते। भूदुर्गंजलदुर्ग मद्रि
विषये दुर्गं भवेद्गह्वरे तेषा मु
त्तम मद्रिसंह्विं रचितं तद्वैरिणां
दुर्गमं। अन्नाद्ये वृत तोय ते
लवर्णैः काष्टे स्तृणाद्ये स्त
था यंत्रोपस्कर वाणशस्त्र सम
हैः संपूरयेद्भूमिपः। माहेंद्र चत्व
रस्त माषनपुरं तत्सर्वतो भद्रके
शृंगे सिंहवलोकनं सुइनत नाम
ते तथा वारुणं। नंदाख्यंच वि
मुक्तकोन मयनन्दावर्तिकस्त्या
कृति प्राकं तध्ववज्रयेन मपि
तद्विध्ये गिरे मस्तके। पुष्पं
चाष्टदलोपमश्च पुरुषाकारं
पुरं पौरुषं सेतंहृ कृत्तिगुभ्भय
स्य कथितं दंडाभियं दैर्घ्यके
ग्रामं प्राक् सविता परत्र कम
लं यास्य नदी धर्मिकं ह्यभ्यां
चैव महाजयश्च धनदाशायां
नदी सौम्यके॥ दुर्गेकेन युते
युते श्रियाख्य नगरं ह्याभ्यां
त्रिपुञ्च पुरं त्वष्टासं कथयंति
स्वस्तिकमिति प्रोक्ता पुराण
विंशतिः। भूपानां स्वत्वदायशा

र्यं फलदाः कीर्त्ति प्रतापो
द्भवाल्लोकानांच निवासतोवि
रचिताः प्राक् शंभुनैते गुणाः
इति पुराणं विंशतिगुणाः ॥ व
श्मीतिकरं त्रिकोणं नगरं षट्
कोणकं क्लेशदं वज्रे वज्रभय
चशकटपुरे रोग त्रिशूले क
लिः । प्रोक्तं तस्करं भीतये द्विश
कटं कार्णायिके यस्तयो दोषाःस
म्भयावहाः प्रकटिता ये वि
श्वकर्म्मादिनाः ॥ इति पुराणं
सप्तदोषाः ॥ वर्त्तुलाद्याविविधं
पुरे सुनिमतं मध्योत्तमं कन्यसे
तेषां हस्तसहस्र संनिमपुरंमध्य
ततः सार्द्धकं । ज्येष्ठे पुरमस्तह
स्र मेषु चरमे भागाष्टकेनाचि
तेमध्यं द्वादशभागतः प्राग्नि
कत्वेज्येष्ठं विदध्यात् सुधीः
मार्गाः सप्तद्वयो वतादिम पुरेही
ने चतुर्भिः पुरे प्रोक्तं कन्यसे मे
वमार्गा नवभिर्द्वैर्ध्येतथाविस्तरे
ग्रामस्यैव पुराद्धेता हि तदनु
ग्रामाद्धेतः खेटकं खेटार्द्धेन तु
कूटमेव विदुर्पैः प्रोक्तं ततः
खर्वटं ॥ हस्तानाञ्च पुराण्येषा
दुर्गस्तहस्रं भूपतीनां पुरे तन्म
ध्ये दशधा वदंति मुनयो हृद्या

सहस्रेण तत् । आयामे वसु
पादसार्द्धवसुतो भागाः प्रशस्ता
धिकस्तैकेकस्त्र चतुर्विधं निग
दितेकार्य्यं समं कर्णयोः । षट्त्रिं
शतः षट् क्रमतो विहस्ता देवे
पुरे चतस्रके क्रमेण यदृच्छ
यामान सुपाति केचित् प्राका
रं कोष्ठस्यच भित्तिकायाः । प्र
तोपरास्याः पुर सन्मुखाश्च दे
वाः शुभालोकनदत्तिणाश्च । मे
रुपुरास्यापि पराङ्मुखास्ते ऊर्ध्वे
तियाञ्चकेज्ञानादेने शाः । ब्रह्मा
विष्णुशिवेन्द्र भास्कर गृहाः एवा
परास्याः शुभाः प्रोक्ता सर्वदि
शामुखो शिवजिनो विष्णु विं
धातानथा । चामुण्डा गृहमात
रोथनपति र्हेमातुरो भैरवो देवा
दक्षिण दिङ्मुखाःकपिवरो नैर्ऋतस
वक्त्रो भवेत् ॥ मार्गाः सप्तदशा
कंपेच शिखिनो युगं पुरातरव
र्द्धं मार्गाः षोडशसंख्या विंश
तिकराः कार्य्या हि पाविस्तरे ॥
प्राकारोदय विंशहस्त सभितो
द्वाभ्यां विहीनोऽधिको व्यासा
र्द्धेन तदर्द्धतश्च कपिशीर्षाणि
हेमाद्यांतरे । प्राकारेषिच कोष्ठ
का दशकराः सार्द्धेन्दुहस्ता स

था प्रोक्ता स्तेन समैवकोणास
हिता विद्याधरी मध्यमा । तस्या
वाद्य सहस्रकेच विविधं गृहास
नंकारयेत् प्राकारोदयतो विधा
य परिखा विस्तार उक्तो बुधैः
विद्याधरी कोष्ठकयोश्च मध्येवा
कुप्रमाणां शरसप्तहस्ते ॥ पंचा
धिके पंचकरेणहीन मित्तित्रि
धा वास्तु मतो हितश्च ॥ दुर्गो
दयं नंदकर प्रमाणं तिष्ठास
मंसमदशैव केचित् । एकोनविं
शा दृशुलंइयाणं दिक् कालस
ख्योष्टकरा वदंति ॥ तोद्भलफ
ल दंत गंध कुसुमं शुक्रादिकं
पङ्कवेन राजद्वार सुदाग्रतो हि
सुधिया कार्य्यं पुरे सर्वतः प्रा
रिवशाश्वन्त्याहिदक्षिणादिशि
स्थः सोम्यतः शूद्रकाः कर्त्तव्याः पु
रमध्यतोपि वणिजो वेश्या विवि
धे गृहैः ॥ ईशे रंगकराः कुवि
दरजका वैश्याच तज्जीविनः प्रा
ग्नौ प्रेमज चर्म्मकारवरटाःस्युः
पूर्वोंडिकारा सते । पशुपक्षी नि
र्ऋते च मारुतयुते कोणेऽन्यसे
लुब्धकान् वापी कूप तडाग कुं
ड मालिले तोयं तथा वारुणे
सिंहद्वार चतुष्टयं च खटकी

द्वाराणि चाष्टौ तथा कर्त्तव्यानि
दृष्टार्गलानि रुचिरैः कापाट
कैः सुदृढैः । कीर्त्ति स्तम्भ स्तथा
लयामरगृहे हे हैः स्तथानिर्म्मि
तैः हर्म्यै प्रापवने जलाश्रययु
तैः कार्य्यपुरे शोभने ॥ इति न
गर प्रमाणं ॥ यंत्राः पुराण
मथ रक्षणाय संग्राम वज्रायु
समीरणाख्या ॥ विनिर्मिता ले
जयदा नृपाणां भवंति दृश्याः
सुरया च सौख्येः ॥ हस्ता श्र
ष्टचभैरवो नवकर श्चाष्टो दशा
द्यो भवेद्रुद्रो भीमाजो पिभा
स्करकैरे शुभंत विक्षेःशिली
प्रोक्तोसो यमदंड एव मुनि
भि स्त्रिष्या महाभैरवो सृष्टो
शंकर निर्म्मिताश्च समरे देवा
सुरे भैरवे । यंत्रेचाष्टकरेष्टह
स्त फणिनी सूर्य्यांगुला विस्त
रे स्तम्भा मर्कटिकाच पंजरम
तः षट्त्रिंशहस्ता क्रमात् ष
ष्ठा एष विभागतोपि रदने स
ल्पाष्टमांगुलैः प्रोक्ता कुंडल
वलयी च वर्त्तिता मध्याद्भृषी
तांगुलैः । यष्टा दृष्ठा मर्कटि
कां विदध्यालोहस्य कीलेन च
चर्म्मणापि । यंत्रं प्रकुर्य्याद्दृष्ठ

काष्ठकंच तन्मानया ज्येष्ठतिक
या समेतं। करांगुलैः पंजरक
स्य दैर्घ्यं केषां मते हस्तमिते च
येत्। चाटी कुली वक्रि जलानि
लाख्याते लत्तनतैः परिकल्प
नीयाः॥ इति पंजरक प्रमाणा
नि॥ नीराश्रयपुण्यवतां विधेयं
मध्ये पुरस्यापि तथैव बाह्ये।
वाप्य स्ततस्तापि तथैव कूपा
श्चत्वारि कुंडानि च षट् तडागाः
कूपाः श्रीमुखवैजयौ च नंद
नु प्रांतस्तथाडुंडुभि स्तस्मादे
व मनोहरश्च परतः प्रोक्तस्त
चूडामणिः। दिग्भद्रो जयनं
दशंकरमतो वेदादि हस्तैर्मि
ता विस्तारैः क्रमवर्द्धितैश्चकथि
ता वेदादयः कूपिका॥ वापीच
नन्दिकमुखा त्रिकूटा षट्कूटदि
कायुग्ममुखाच भद्रा। जया विव
क्रोनवकूट युक्ता स्वकुलकू
टे विजयामतासा॥ सरोजचंद्र
श्च महा सरश्च वृत्तं चतुष्कोण
कमेव भद्रं भद्रैः सुभद्रं परिघि
कयुग्मं वकस्यलेक हय मेव
यस्मिन्। ज्येष्ठंमिते दण्डसह
स्त्रकैस्तु मध्यं तदर्द्धेन ततः क
निष्ठं ज्येष्ठं करैः पंचशतानि।

दैर्घ्यं स्त्वर्द्धं मध्यं तु ततः क
निष्ठं॥ तडाग्य कुण्डं चतुरस्र
कंच सुभद्रकं भद्रयुतं द्वितीयं
नंदाख्यकं स्यात् प्रतिभद्रयुक्तं
मध्ये सुभद्रं परिघिचतुर्थं॥
कराष्टतो हस्तशतंप्रमाणं द्वा
वै श्चतुर्भिः सहितानि कुर्य्यात्
मध्ये गवाक्षस्य दिशो विभा
गो कोणे चतुष्का स्तपि पट्ट
शालाः॥ गंगाद्या देवता ह
रेश्च दशांके रुद्रा दशोकाधिका
दुर्गा भैरव मातृका गणपति
वैकं सिके चंडिका। हर्वासा
मुनि नारद स्त सकला द्वारावती
लीलिका लोकाः पंचपितामहा
दिविबुधाः स्य संध्याभिनोसदा॥
नस्याहं तत्क्षीयरमातृकास्य सत्
फलात् एवंफलश्च काश्यपः स्ना
नाश्च गंगाश्रवनस्य पुण्य कृते
भवेच्चे द्विपिवद्धि पिंस्तैः। विधाति
तं जीवन मेव येन तज्ज्ञापदेकेन
शतं पृथिव्यां। सप्तर्षिसंख्याच
सहस्रवर्षं स्वर्लोक सौख्यान्यपि
लानि भुंक्ते। ग्रामे वाष्य पुरे नरें
द्र भवने तत् षोडशांशं भवेत्
मध्यात् पश्चिमदिक् समाश्रि
त मिदं दुर्गे भवेद्वप्रात्॥

हारं दक्षिणवामतश्च पुरतः का
र्याश्चय श्चत्वरः सर्वे वलभूशृहा
दिवास रचना भूपेच्छया कार
येत्॥ इति सूत्रधारमंडन विर।
चिते वास्तुशास्त्रे राजवल्लभे प्रा
कारयंत्र वापी कूप तडाग लक्ष
णं ष अध्यायः॥ अथो नृपाणा
भवनानि वक्ष्ये त्वेकांतपञ्चावनि
पालकस्य॥ शतं च हस्ताष्टसम
न्वितश्च व्यासे गृहे चोत्तम मेव
तस्य॥ येद्वापरे भूमिभुजो बभू
वु स्तेषां गृहे हस्तशतं द्विहीनं
तज्ञेश भूमी स्वरकोत्तनाथ स्त
स्यांधिकाशीतिकरं गृहंस्यात्॥
ग्रामैकलक्षद्वय मस्ति यस्य
प्रोक्तो महामण्डलिको नरेशः
अशीति हस्तं द्विकरेणहीनं ऊ
र्ध्वां गृहं प्रोणभन मेव तस्य। पंचा
युतेशो नृपमंडलीको भवेद्गृहं
तस्य कराष्टषष्टिः॥ सामंतमु
ख्या ह्ययुतधिपोऽसौ तद्गेहस
प्तैकरप्रमाणं॥ तद्गेह पंचा
शदपि द्विहीनं सामंत संज्ञोः यु
तनाथ एव। तथा तृतीयोपि
ततो द्विहीनं त्रिंशत्कराष्टाधि
क मेव गेहं। प्रोक्तः प्रवीणे शु
तयाप्रिकासौ ग्रामा द्वियस्येव

सहस्र मेके। अष्टाधिकं विंश
तिहस्त हर्म्यं सिद्धे समस्ता
नि यथोदितानि॥ ग्रामाधि
पायेत शताधिपाश्च ते स्वल्प
राष्ट्रा अपि सैनिकाश्च तेषां ग्
हा अष्टदशाधिकैश्च करैः समा
ना मुनिभिर्मतश्च। भूपाल
कोर्द्धेन च मंत्रिगेहं यथाधि
कारेण भवंति हीना व्यासाद्
शांशाधिक मेव दैर्घ्यं कुर्यात्
पंचम भाग मिष्टं। गृहे चतु
र्हस्त मितं कराद्विवृद्ध्या द्वि
मांतमिति प्रमाणं ततः परं भू
पतिमंदिराणि यावच्छतेचाष्ट
करादियुक्तं। स्यान्मूमिरेकावस
हस्तगेहे दशाभिवृद्ध्या द्वितया
पुनश्च। प्रासाद पवामरभूपयो
श्च हर्म्याणि लोके मुनिनोदिता
नि॥ शालायानरथाच पंचक
रतो मानञ्च विस्तारके भित्ते
रेव चतुर्दशांगुलमिति थावत्स
पादंकरं। आगारस्यतु षोडशां
शवहितोः पादेन हीनोथवा
भित्ते र्मान मिदं द्विधा विरचि
ते कल्प्य यथायोगतः॥ देहो
देहकलांगुलोत्तमशिला मध्यां
गुलोनांतिमा व्यासे दिद्वृ बभ्रू

भूङ्क्ष्विति रूप त्रिंशेन विला
रतः । हस्तादे क्षिकरोदयंनव
विधं पीठं गृहे सर्वतो विष्ठा
दे रस भूत वेद गुणकाः सुः
पीठके मेखलाः ॥ षट्या वा
यशालाद्दे समत्रिगुने व्यासस्पह
स्ताशैले ह्रीभस्पादयको भवेद्ध
भवने मध्यःकनिष्ठात्तमेः ॥ दे
ध्यार्द्धेन तुविस्तरःशशिकला
भागाधिकः समने दैर्घ्यं मेषा
विहीन मद्दरहिते मध्ये कनि
ष्ठकमात् । ज्येष्ठा प्रतोली ति
थिहस्तसंख्या प्रोक्तोदये वि
सुकरा च मध्या । कनिष्ठिका
रुद्रकराक्रमेण व्यासेः ष्ट समे
वच रागसंख्या । वेषम व्यासक
लाशके गुणगुणो हस्ते क्षितार्द्धे
गुैतेः हर्म्यस्याविविधोदयः त्रि
तितलाधावस्त्र पद्दाह्नकं । एके
कोपिगुन क्षिधानिगदितःसर्वेत
एकादश सेषाःयस्मवेनो नवोः
शशिकला अष्टादशाधक्षिधा
त्रिधाने गुणा पर्वताः ७४ क्षिति
गुणाधिष्टैककविंशाक्षिला मध्योः
योचिकरे स्तदंशसहितैःप्रोक्तःक
निष्ट क्षिधा ॥ हस्ते तुरूप विक्षुक्ष
कण्ठकयुते नीडेस्ल चेत्पदमे ।

स्तीरं मारुत पातितेच भवने
चिंचा विभीते त्यजेत् ॥ शाकः
शालमधूकसर्जखदिरा रक्ता
सनाःशुभना एकोऽसो सरलो
र्जुनश्च पनसःश्रीपर्णिनी शिंशा
पा । हारिद्रः पिचुमर्दचंदनतरुः प
द्मास्थक क्षिंडकी वेतेस्पेन गुला
भवंति फलदाः शाकादयः शो
भनाः ॥ गेहोदयेन नवधाविभ
जेत् षडंशे स्तंभोर्द्ध भागसमके
भवणे शिखश्च । कुंभी स्युदस्त
दसमेक विभाग तुल्या पट्टश्च त
त्रिकपुलोषा समान एव ॥ शा
लालींद उदाहृतो हि विदुषेवी
राष्ठ सुवंशाशकः समांशेषुग्
रोष्ठ नेदपदतो वेदांशानुलास
षा ॥ कपाटे गृह दक्षिणनिग
दितेवामेभवेदर्गला स्तृष्णानिष्क्र
मणे कृते सुनिवरे द्वारेषुसर्वेषु
यत् ॥ शालाजिलांशे मनुरेव
मध्ये ज्ञेया ह्रयांते ह्रयमस्पष्ठा
शें । द्वारोत्तमांगेन समानक
र्णाः शाला न शाला भवनाभि
वृद्धोः ॥ दीपालयोदक्षिणदि ।
क्षिभागे सदा विधेयो भौलया
समानः । वामेच मध्ये न शुभाय
। गेहे स्नानालये वामदिगीष्ट सि

द्धौ वामाग्रे रवटकीशुखेच त
दयोद्धाः षोडशांशाधिके सर्वं
वा शुभ मिच्छता च सततं का
र्यंत् पद्दादयः । तत्पृते न शुभं
तलातलगतं ऊर्ध्वे तथाधःरुतं
काष्टंपंचक एवनीत रहितं यत्न
लपूर्वांतरे । द्वारोर्द्ध यद्वार मस्य
प्रमाणं संकीर्णं वा शोभने ना
धिकंतत् । ह्रस्व द्वारोपवया
निष्ठानि तेषा शीर्षाण्पकस
माणिकुर्य्यात् ॥ सर्वद्वारेनीचमा
नेकृजाये यद्धाः हस्वतत कारोस
ध्यनाशं । गेहाग्रे यत्र एर्वंवास्त
स्वरूपं तेषां भंगानैव सोद्धांक
दाचित् ॥ द्वारव्यास रदांशतोः
धिक मिदं कार्ष्यं गृहे दक्षिणे
तस्य हस्ति गृहस्त्व वाजि भवने
तेनाधिकं वामतः । शुद्धांशोयत
वांशके च वितथे तोये जयेन्द्र
हिते द्वारे सौम्य गृहस्ततेच ऊ
र्द्ध्वे भल्लाटके शस्यते ॥ प्रा
ह्वाराष्टक मध्यतोपि नशुभं
सूर्येशा पर्जन्यतो याम्यायांच
यमाग्नि पौष्ण मपरे शोषास्वरे
पापकं । सौम्यायां मध्यरी ना
गाशिविजे मार्ज्यं तथाम
शुभं कश्चिद्द्वारुणा सौम्यकेन

हि हिते प्रोक्तञ्च वातायने ॥
द्वारे विद्ध मशोभनंच तरुणा
कोण भ्रम स्तंभकैः कूपेना
पिचमार्गा देव भवने विद्धं न
या कीलकैः । उच्छ्रायाद्द्विगु
णं विहायपृथिवी वेधोन भि
त्त्यंतरे प्राकारांतर राजमार्ग प
रतो वेधोन कोणद्वये । दैर्घ्य
मार्द्धशताङ्गुलेच दशाभि हीने
१४० । १३० । १२० । ९० चतुर्द्धावि
धिप्रोक्तवाद्य शतं त्वशीति स
हिते ८० शुभे ७० नवत्याशा ते
९० नहत् षोडशाभिः शतेच ११
नवभि र्युक्त तथाशीतिके ८९
द्वारे मत्स्य मतानुसारि दशके
योरंप विधेयं बुधैः ॥ स्वय
मपिच कपाटोद्घाटने वापिधा
ने भयद मधिकहीने प्राग्व
धोर्वा विचाले पुरुष युवति
नाशस्तंभ शाखाविहीने भ
वदमथिलकाछ्यग्य यदाः शि
तंस्पात् । देवालयस्या भवने मठ
स्थ भानोः करे वांशुभि स्त्र भिन्ने
तन्मूल भूमौ पविवर्जनीया छाया
गतायस्य गृहस्य कंपे । नैकोत
स्तु दीर्घदिशा विभागे मध्येहि
पट दारुण वर्णगेहे । स्तम्भास



ने हीन मपि हयाय यदाधिकं
रोगकरं तदा स्यात् ॥ स्तम्भो
हास्त सवृत्त भद्रसहितो द्रूपे
ण्चालंकृतो गुरुः पल्लवैकेल
घ्याभरणकं यत् पल्लवेनावृतं
कुंभी भद्रयुता कुमार सहितश्री
यं तथा किन्नराः पत्रैरिति गृहे
न शोभन मिदं प्रासादकेशस्य
ते ॥ स्तम्भो द्वयोर्मध्यगतो न
शस्तो शुभंकरो पट्टयुगोपश
तो हि । गृहे प्रशस्ता श्चतुर
स्रका स्ते स्तम्भा न कंदेन विना
प्रशस्ताः ॥ हानि स्तु लाभमथवा
नावेनस्य स्तंभेभवंतालय भि
त्तिमूले संलग्न चतुर्थपिहाने
ये स्युः स्तम्भासने स्तम्भशिरस्थ
शीर्षं । उत्सेधार्द्ध विनिर्गते श्रव
युक्तशीलाधिकं शस्यते ह्यायेप
हस्यमानकेस्त खकरं नाशयति
नोन्नते । तत्काकस्य चपूर्तकस्य
कुमदाभं सूक्ष्म कालीयकं प्रा
लम्बस्य करालकस्य विद्युधः
प्रोक्तस्य तत् षड्विधं । भद्रमा
रोहन महुं तत्तदुपरि प्रादक्षिणं
शस्यते द्वारं तद्दैभवस्त्रप्रसिरप
रा कस्तार्कभागैः क्रमात् । प्रासा
देच मठे नरेंद्र भवने शैलस्य

मो नो गृहे तस्मिन् भित्तिषु
वाद्यका स्तु शुभदाः प्रासम्
मिकुंभ्यां तथा ॥ पृष्ठे स्तणाने
नर मेव वाद्यात् गृहप्रवेशान
शुभंकरोस्ते । गृहस्य पृष्ठे यदि
राजमार्गो स्तदादिभूमेनं हिपृष्ठ
मीस्ते ॥ जीर्णं गेहं भित्तिभग्नं
विशीर्णं तत् पातयं स्वर्ण ना
गास्वदंतैः । गोश्रृंगैर्वापि शिल्पिना
निश्चयेन पूजां कृत्वा वास्तु दो
षान्तस्य ॥ हर्म्यस्यापि समंततो
गृहपति हेर्द्धि यदापीहते सर्वो
शास्त्र विवर्द्धितस्य फलदं दृश्यते
देकचच । प्राङ्मुखे रपि वेश्मन
र दिशाभागो मनस्तापकृत्
पश्चादर्थविनाश दक्षिणादिशि
शाकोभयं वर्द्धते ॥ वामांग धन
वस्त देवभवनं धातुः श्रियो वा
जिनो नार्ध्यस्तोषधिभोजनस्य
भवनं स्याद्वाटिकावासतः । व
के गं जल देति शास्त्र सदनं
स्त्रीसंगंतथा रक्षिणा स्थानं मा
हिष माज गोणिक मिद याम्या
निमध्ये शुभे । सुग्रीवे स्तंणे
कर्ण गगनवे स्याद्वाटकानांगृ
हे हाख्ये युद्ध शहस्य त्स्य रम
णं गांधर्वं देवाश्रितं । राज्ञो ·

मानगृहं गजेंद्र जयके ह्येम
हिषागृहं सखे धर्मगृहं रैवोष्य
यगृहं प्रोक्तं जये श्रीगृहं ॥
ईशः प्राच्या रनेरे गर्दभानाम्
ष्ट्राणांवा स्थान मेवात्र कार्यं
धान्यागारं स्यात्तथा प्राणको
णोभूंगोप्येवं शंभुकोणे शिवा
स्त्री ॥ प्राकाश्रमेस्मा कृतवक्तिको
णेप्रोक्ता प्रवीणै रपिन्द्रसभाला
वद्वोगृहं राक्षिचरस्य कोणेस्या
त्माग्नेमे भोजनशालिकाच ॥
प्राक् शोभा न्वपमंदिरेच पुर
तः स्याद्यं तथा पुत्रके वामां
गे त्वपते स्तथाशुपधराः कु
र्यानपत्राणिच । छत्रं चामर·
लापकाः स्वगृहेव स्तोहलस्यर
क्षिणे गोहाधीशः यदञ्छयाच
श्रायनं सर्वास्तु भूमीसुच । विव
स्तराख्यशयनं प्रशस्तं वारुणे गे
हं सवित्र विधेयं । एषाश्रिते भो
जनमंदिरंच महानसं वह्निदिशा
विभागे । माहेंद्राख्ये गोपुरं हि
दि भूमि मानोः सोख्या तस्य
मध्ये विधेया । उक्तानुकंमंदि
रादे निवेशो त्वष्टा कार्यंचा
तया भूपतीनां ॥ दिक्शाला
ते होक शालादि गेहे ज्येष्ठ

मथा कन्यसादृग्दिशिणांगतः प्रा
ला कार्या लोकरोरे युगंतात्
त्रि श्लोकाः स्यु भैमयल्लेषुकूने
इति श्रीमयपार मंडन विरचि
ते वास्तुशास्त्रे राजवल्लभे राज
गृहनिवेशादि लक्षणं ५ अध्या
यः ॥ प्रत्येकशाले हिगुणांश्चि
शाले प्रस्तारतो लक्षण मेव
तेषां । यथोदितं वास्तु मते
तथैव ब्रवीमि राज्ञा मथ सा
न वानां ॥ चत्वारो गुरवस्तु ए
वंगुरुतो ऽथो लघवोनो समाः
भूयः पश्चिम पूर्वतस्तु गुरु
भिर्यावल्लघुत्वं भवेत् । उद्दिष्टे
हिगुणांकके लघुभवैः संख्ये
कामिश्रीकृते नष्टे स्ता विषमे
समेगुरुलघूर्द्रूपे तदहेर्ह्हेतः ।
स्थाने लघोः सम गुवादलिंदे
प्रदक्षिणे तेक्रमतो दिशस्थान्
प्रस्तारतः षोडशकं गृहाणां
प्रोक्तं तथाख्यां कथयामि ते
षां ॥ ध्रुवस्त्र धान्यं जयनंद
संज्ञे खराख्य कांतस्त्र मनो
रमाख्यं । सवक्त्र मस्मात्किल
दुर्मुखाख्यं क्रूरं विपक्षं धनदं
क्षयस्त्र ॥ आक्रंदकं वैपुल वैज
यस्त्र फलानि नाम्ना सदृशा

नितेषां ॥ इति ध्रुवादि षोडश
गृहाणि ॥ याम्यादित्योद्वैविज
यान्तके हि त्वलिन्दयुग्मं मु
खतो विदध्यात् । रंध्र ग्रीपर
मादिते च परतः स्तद्दहुमानेद्
हे कारालञ्च सुनाभमेव तद
नु धांक्षमहं तथा । इति र
म्याहके ॥ सर्वाणि ध्रुववद्
वेति नियते षड्दारुकैःसदं
प्रोक्ते तदुरदंच भद्र कुमुदेः
ध्या वैश्रवाख्ये शिवे ॥ तस्
वलाभंच विशालसंज्ञे तथा
विलते त्वसुभे ध्वजञ्च । उद्यो
तमेव त्वथ भीषणञ्च सौम्या
जितेस्तः कुलनंदनंच । इति हंद
सादिषोडश गृहाणि । पूर्वालिंद
मुमस्तकेषु युवाले पहस्य शा
लानते हंसश्चैव सुलक्षणाच प
वतःसौम्य हयं माउकं । तस्मा
दुमस्ररोचिरे च सततं सेम त
थान्तपके चोदूतं भूषस्थिन
श्च यापमानंदं सुनंदं कुमान
इति हंसादि षोडश गृहाणि
मध्ये गपर्वर्ण ध्रुवरूपकाणा
मलंकृताद्र प्रयमञ्च तत्र ।
तथासलेकावमिति क्रमेणाख्या
तनदस्य रमणञ्चप्रदं ॥ ततेस्नवं·

तदनु पुण्यमतः सुवाभं प्रोक्तं
गृहे कलसदुर्गतमेव विद्धि ।
स्यादीक्षितं तदनु भद्र वञ्चि
तेच दीनं गृहे विभव कामद
मेव संख्या । इत्यलंकृतादि षो
डशगृहाणि ॥ षड्दारुसर्वेष
पवर्गकेषु प्रभाव संज्ञे त्वथ
भावितञ्च । रुक्मं तथान्यानिल
कंच तत्र सतक्रीडनं सौख्यम
तोयशेषं ॥ कुमुदमपिचका
लंभास्वरं भूषणञ्च वल्लभम
थ्यो हे यान्यनापोतदस्पत् । कु
पितमपिच विते हृष्टिदं प्रोक्त
मेतन्नदनु कुलसहड षोडश
प्रोक्तमाद्यैः ॥ इति पम्मवादि
षोडश गृहाणि ॥ सर्वेसु
खालिंद समन्वितास्तु दारुहि
षट्कं त्र्यपवर्गमध्ये । ततश्च
डासणिकं प्रभद्रं सेमं तथा
पोष समृद्धितञ्च विशालसं
ज्ञंत्वथ भूतिदञ्च हृष्टे विरोधक
थितं क्रमेण । तत्र कालपाशं
हि निरामयंत सुपाल रौद्रेषु
ति सम्मताश्च । वेघे गृहे चैव
मनोरमञ्च सुभद्र संत्तकापि
ताच संख्या ॥ इत्येकशाला
नि गृहाणि विधाङ्क्षुतश्चतना

ध्यथिकं ध्रुवादि ॥ अपवरकं
यत्कथितं तहामे धीमता
गृहेकार्य्यं । यत षड्दारुक मु
दितं तेया सा पहुजा श्रेणी । इ
तिहूडमसणादि षोडश गृहाणि
इति चतुरुत्तरं शत मेकशाल
गृहाणि ॥ अथ द्विशालालय
लक्षणानि यैद क्षितिभिः कोष्ठक
रंध्र संख्या । तन्मध्य कोष्ठ प
विहस्पयुग्मे शाला स्युतस्ताहि
भवेतिदिञ्च ॥ याम्याग्निशा च
करिणी धनदाभिवक्ता एवा
तना चमहिषी पित्तवारुणाख्या
गावी यमाभिवदनापिच रोग
सौम्येच्छागीमहेंद्र शिवयोर्वरु
णाभिवक्ता । हस्तिन्यामहिषी
द्विशालभवनं सिद्धार्थकंतच्छु
भं गावीमाहिष संज्ञकं मृतिक
रं तथामसर्व्यं भवेत् । दंडेच्छाग
गवांवितं धनहरं हस्तिन्यजाभ्यां
तथा काचंमो करिणीयुतं तन्हि
शुभंचुलीचपूर्वापरे । नामान्य
तःसंततमप्यांतिदंच स्याहड्डमानं
तथ ऊक्र्द्राख्यं । हस्त्यादितो ना
मचतुष्ट्यंच हर्म्ये द्विशालेमप्यमे
तथैव । यत्त्वालिंदं तदसदारुम
ध्ये लिंदत्वयाग्रे कथितं हि

शाले । हंसाख्यके स्यादथ व
हंमानं कीर्तं विनाशं भवनेच
तुर्थं । अलिंदयुग्मं पुरतो वि
दध्यात् षड्दारुमध्येपिच शा
लसंज्ञे । तस्माद्गृहे हर्षणवेष्
लेच तथाचतुर्थ्यं कथितं करा
ले ॥ तस्मिन्गृहे दक्षिणतो ह्य
लिन्द विनंच चित्ते धनकालदं
डे । वामे पुनर्वन्धुद पुत्रदस्या
त्सर्वेतु तस्मिन्नपि कालचक्रे
लेञ्च श्रुपश्चाप्पुरतोपि युग्मं
स्यात्दक्षिणेका रसदारुमध्ये
तेत्रेपुरं हंदर मेव नीलं स्या
त्कोटिलेचैव यथाक्रमेण प्र
दक्षिणकः पुरतोपि युग्मं ष
ट्कंगृहांतः किल शाम्बराख्ये
ततो द्विनीयेखलु शास्त्रदं स्या
च्छीले तथा कोटरमेव संज्ञे
सौम्यं गृहे मंडप संयुतेच त
तल्प रूपं विरुपै विधेयं । सु
भद्रमस्मादपि वर्द्धमाने कूर्चेच
सर्वेषशुभे चतुर्थं । मुखे वये
दक्षिण पश्चिमेकः षड्दारुके
श्रीधरनामधेयं । प्रोक्ते गृहेका
मद पुष्टिदेच चतुर्थकं कीर्ति
विनाशमेव ॥ वामे तथा दक्षि
णपश्चिमेको युग्मंत्वाव मंडप

मथतश्च श्रीवसनं ततश्च श्री
शोभ कीर्तिसंज्ञयमेव तद्वत्।
एकोपरे दक्षिण वामतश्च यन्म
ध्यगेश्रीधरयुग्म पूर्वे। सर्वार्थ
देस्यान्मुखतत्र स्वयच्चैव लक्ष्मी
निवासं कुपितश्च नाम्ना। युग्मं
मुखमंडप मेव चाग्रे युग्मं तथा
दक्षिणतोऽन्त्यभित्तिः। एवेत उ
द्योतक वाकुतेजः स्वलेज एवं
कलहावहं स्यात्। उद्योतकेप
श्चिमभागतो द्वेकुर्यात द्विशा
लेच वहि निवासे। तत्र प्रविष्टे
कोपसमानमेत्र मतुक्रमषट्कं
क्रमतो विधेयं। लघुत्रिके एवं
दिशा विभागे एको भवेद्दक्षि
णवाम पश्चात्। महान्त मेतन्म
हितश्च दत्ते कुलत्तय मंडप से
युतं स्यात्। अमहयं दिक त्रित
येविभागे मुखे त्रिके मंडपमग्र
तश्च। प्रताप वर्द्धन्य मिदंच दि
व्यमुखाधिके सौम्यहर्वं चतुर्थे
तस्यैव रूपे रक्षदाहयुग्मं पुन
स्त्रलिंदे जगजन्तनश्च स्यात्
सिंहनादे त्वथ हस्तियाने ज्ञेयं
तथा कण्टक मेतदेवं। यां ता
द्विशाहानिचषोडशैव द्विशाल
कानीहयथाक्रमेण नामानिच

त्वायथापि रूप मेकं हस्त्यादिमे
दैःक्रमतो विधेयं॥ इति सर्व
धार मण्डन विरचिते वास्तुशा
स्त्रेराजवल्लभे एक द्विशालगृ
हलक्षण ६ अध्यायः॥ द्विशा
ल गेहानि तु षोडशैव वास्तद
येः सान्तरं पुनश्च। वक्ष्याम्य
लिन्दोपि षण्णा लघुश्च द्वे ति
नुकोष्ठ्या कथिता वलिन्दा॥
सर्व्वे द्विशाले लघुरस्यवामे मुखे
त्रिकं दक्षिणत स्तथैकः। वेदा
मुखेवासव मेवगेहे वामेऽप्यस्ये
लघुरेकएव॥ प्रासाद संज्ञे मुख
त स्वयच्चैव प्रदक्षिण त्रिकुक
वेष्टित स्यात्। अलिन्द युक्तं वि
मले द्विशाले तद्वीथ्यवन्ते सह
मण्डपेन। अथ द्विशालेषु सम
स्तकेषु मध्येविदध्यात् सहारु चे
कं। तदा भवेद्वासर मग्रयुग्म मे
कोलघुर्दक्षिण दिग्विभागे। ए
को लघुर्दक्षिण एवगः स्यात्तु
दुम्भाके स्तदमण्डपेन। द्वे पूर्वतोद
क्षिणतस्तथैको युग्मं भवेन्मंडप
गेह तेजः। मुखे युग्म दक्षिणत
स्तथैको द्वे मंडपस्मिन् हयजा
भिधाने। महान्तगेहे स्वलजोत्रि
के तु युग्मान्विते मण्डप मेत

देव। मुखेतथा मंडपकेच युग्मं
वामेऽप्यस्ये युगले लघोश्च।
लोकत्रयाडम्बर मस्य नामष
डुत्तरं षोड्ग गणेशयोश्च॥ युग्मं
मुखे मण्डपगं द्वयं स्यात्तथा द्वयं
दक्षिणवामतश्च। एकाहिपश्चा
द्वरदाभिधाने श्रीविष्णुकमौक्त
मताद्विशाले॥ शालीन संज्ञे
मुखेऽप्यस्ववर्पि युग्मं भवेद्दक्षि
णवामभागे। युग्मं तथा पश्चि
मदिग्विभागे तस्याग्रतो मण्डप
एक एव। प्रायामा लघवो वि
लास भवने वामे लघु दक्षिणे
तत्वेन्मण्डल संयुतश्च कमले
स्याद्द्विष्टे सौम्यदं। वेदालिंद
केमुखे च सतते वामेक्षणे द
क्षिणे तस्याग्रे मुखमंडपस्य फ
लदानेवं गृहान् षोडशा॥ इति
सूर्यादि षोडशगृहाणि॥
अथ त्रिशाले त्रिदशास्तथैकं स्या
द्वेदशावास मतुष्यसंज्ञे॥ तथा
चतुर्थं कुमुदाभिधानं हस्त्यादि
भेदे क्रमतो विधेयं॥ सुवर्णशालि
न्यश्च तथैव पूर्वे हरश्च कामन्त्व
पक्रस्व भद्रे षट्कश्च मध्ये स्व
धने कुबेरे पक्षे तथा कामद
मेतदेवं। अलिंदयुग्मं त्वथ भ

द्मयुक्ते मध्ये कपाटे जलजाभि
धाने। स्यान्मचजे चैव गजे क्र
पञ्च षट्दारु मध्ये सकले य
थातः॥ साहेजयं मंडप क्रस्व
भद्रंजये निनादे त्वथ कीर्तिज
श्च। भद्रेन क्रस्वाधिक साकला
द्धे निलांभकेवासदकोशलेच
श्चेकं कुमादीश्वर वारदाख्ये श्री
मन्त्रकोशल्य मतः क्रमेण। त
देदवुद्ध्वजने तृतीय स्यात् को
शले नील भिदे चतुर्थे। मुखव
णलघु वामे दक्षिणे चैक एतद
दशारद मुक्ते देडके काकपक्षे
इद भिद हि निनादे मण्डपेना
धिकं स्यानदनु च गजनादे वा
कुलकीर्ति जाड्ये। सुप्रसादिकपञ्च
खमंडप मेव सिंहे ज्ञेये गृहेद्व
ष गजे अपि कोशसंज्ञे। वामे
धिकश्च लघुना कथित सुभ
द्रे स्यान्मानिभर मपि वर्त्तज को
चनाख्ये। युगमुख मथैको भ
द्रेवं दक्षिणे च भवन नरेज भ
वन स्याच्चतुर्थं कुबेरं। पुनरपि
लघु वामे हस्तियाने विधाने क्र
यज कृपजगेहे तच्चतुर्थं क्रमे
ण॥ दर्गान्ते शुभदश्च सागरगृ
हंपैव क्रसा मुखे प्रोक्त दीरद

रत्नदाक्षय सिंदे कोलाहलस्त्वा
पं। षड्दारु द्वय भद्र सम लघु
वास्तिथ्यकयुतेशालया गांधर्वं
त्विति भषणाच्च कथिते सर्वस्तके
दर्पके। धाम्न वृद्धिकरे त्रिशाल
मुदिते शाला विना पाविनीया
कृषणाला रहिते शुभे निराटि
तंसत्तेव मध्यपदे ॥ चुल्लीसंज्ञ
सिंदे करोति मरणं हीने तथा
याम्यया पत्तन्न महिषी सूतेच
भवने तत पुत्र वंधुत्तयं। इति
त्रिदशादि षोडश गृहाणि ॥
त्रैशालानि च षोडश प्रथमतः
सामञ्च षड्दारुकं तच्चैकेन
घरोपि शांकरं सिंदे मध्ये क्रमा
त एवंवत। कृद्रे द्वौ मुखतोपि
दलिण लघु स्वकाधिकसाव
रं चत्वारोन्ध्पशोभितञ्च पुरतः
शाखदिशोको लघुः॥ पंचाग्र
सकलं भ्रमञ्च लघुना सर्वस्य
तत सौख्यदं राराख्य भ्रम स
युतञ्च भवने तत्सर्वशालभवे
त्। शाखाणा कुलनंदनं क्रम
तथा त्विकद्वयैकान्विते तस्मि
न्दलिण संयुतेच लघुके क
साणासंज्ञे तथा। सर्वा शास्तलेच
द्वयंशश्रलितमहद्युग्मक्रमात् तत्
सौभाग्य विवर्द्धनञ्च भवने राज्ञो
सदा निर्म्मिते। आनंदे सखरा
जि दलिण लघु वामेच पृष्ठेद्व
यं रागास्य जन शोभने गुणा
णोकेनान्वितं स्थितः॥ स्याद्रो
वर्द्धन मग्रतो रजयुतं युग्माग्नि
नेत्रैः क्रमात् समाग्रेग्रिगुणं त्रि
कञ्च लघवो लोकत्रिके सद
ने। गेहे श्रीतिलकंच भद्र
सहितं कृत्स्नेन हीने मुखे त
युक्ते लघुनाच भद्र साहितवि
स्तृषिये भूपतेः॥ इति सौमादि
षोडशगृहाणि ॥ षड्दारुकं
श्रीत्रिदश त्रिशाले तते श्री
निवासं मुख कृत्स्नयुक्तं श्रीव
त्सतः श्रीधर मेव कृष्णा श्रीभूष
णं वेदमुखञ्च गेहे। वाणैः श्री
जयमग्रतोपि कृतुभिः श्रीतलि
कंमंदिरे रोगाग्रे रसदारु युग्मस
हितं तत श्रीविलासं भवेत् ॥
श्रीतेजो जय मग्रतश्च मुनिभिः
षड्दारु युग्मान्विते सौमादित्रि
दशादि भूपतिगृहाः पंचाधिका
विंशतिः ॥ इति त्रिदशादिनवगृहा
नि ॥ भवन नवक मुक्तंयच्चतुः
शालमध्यात् नयन लघुमुखे
स्यादलिणेकेन चंद्र। भवतिस


दन मध्ये सर्वतो दारुषट्कंद्वि
तय मपिच तोषा सास्लिंसुगम
युक्तं। मलय मथच गेहेवाम कृ
स्वाधिकं स्यात् भवतिचगुणकृ
त्स्वेशोभने एवंतोपि त्रिभि रपि
वह्न कोणे पृष्ठयाम्य तथैक स्त
दधिकमपि वामे वेश्मनागेद्रसं
ज्ञे। चक्रंचवह्वयमुखं सकलेषु
शास्त्रग्राम्याग्रेरहितलघुनापिज
यावहंस्यात्। भद्राढ्यञ्चमकरा
ढ्यमेवतस्मिन् पृष्ठाग्रकृत्स्नमपि
कामद मग्रभद्रं ॥ इति विजया
दिनवचतुःशालगृहाणि॥ शुद्धा
दयोमुनिमतेश्घविधा च शाला
स्तासां षडेव कथिता भवन प्रसं
गे। शालालि मध्य रचितोपित
दुःसुखाय यद्वा तदग्ररचिताः
पृथगेव शालाः। इति सूत्रधारमं
डनाविरचिते वास्तुशास्त्रे राजव
ल्लभेद्विशालत्रिशालचतुःशाल
गृहलक्षणं वर्णनं सप्तमोध्या
यः ॥ शयनमथ नृपानां लग
लानां प्रतेके नवति रपि स
तानां संविशाः षड्विहीनंवलप
ति गुणहस्तं अंगुलाने रगोष्ठ
तदनु युगलहीने ब्राह्मणादेः प
शस्तं॥ व्यासोर्द्धभागे तत दे
र्घ्यंतश्च कलांश मात्राधिक
पवशस्तः। अंशेन पादेन सम
च्छ्रयः स्यात् द्विअंगुलाना म
धिकोनकार्य्यः॥ श्रीपर्णीचन
दासनेपि गदहा विजयदा ति
न्दुकी वृद्धिः शिंशपयाच्च शाक
शायनेशास्मापि शालैः कृते। आ
युःपद्मकजे च चंदनमये शत्रु
क्षयः स्यात्स्वेव श्रेष्ठं चैकमले
शिरीषजनिते पर्य्यंकयानासने
इति शयने ॥ सिंहासनेचोत्तम
मंगुलानां षष्ठा दशानञ्चप
रं तथैव। दशांशपादस्वशमतो
विहीने व्यासे च दैर्घ्यार्द्ध सम
च्छ्रयःस्यात्। मुनिभि रघाशि
वैवा भद्रभागत्रयं स्याद्रदय
इहविभागे भाजिते पीठमेषो
कनकमपि रसांश समधा यास
पद्दी शिव नव मुनि रत्ने दं
तिवास्ते निवेश्या। ह्यर्धेस्याद्
सभागमेव तिथितो भागेनक
न्तासनं युक्तं स्तम्भयुगेन तो
रणयुतं रत्नै शुभे राजितं। क
तंव्यं नृपवल्लभे मतिमता जे
ष्ठञ्च सिंहासनं ज्ञातव्यञ्च य
शोभिवर्द्धनं सिंभेः सिंहै रेक
न्तासनं। नवैकलुवेदी पुन देव

छाद्यं सुखासनं तोरणसंयुतं
स्यात् पीठञ्च कुंभः कलसं वि
टंकमुत्तंगसंज्ञं सह छाद्यकेन
पीठे गोष्ठरि वेदिकेच सुपश
छाद्येन सिंहासनं हस्ती मार
क वेदिकासनयुतं तद्वीपचित्रं
भवेत् । छत्रे ज्येष्ठ मणीति वेद
सहितं हासमति मध्यमं षष्ठा
कृत्यस मंगलेनेवृपते दैवं शाला
र्द्धं शुभं ॥ इति सिंहासन छत्र
लक्षणानि ॥ वातायनो ल
त्विकया विहीनो बुधे स्तदीन
श्चिपत्राकपव । हिलुत्विकश्री
भयसंज्ञकञ्च यःस्वस्तिकोऽसौ
युगलुत्वियुक्तः ॥ स्वाहाणःशि
यवक्रपव स्तम्भैः षड्भिःप्रवेश्च
तिच छाद्यकेन युतः श्रवक्र उ
हिलोद्वाभ्यां श्रियंगो भवेत्
पंकानः षविषघ्नानाम उदितस्त
द्वीपश्चित्रो युगो वैचित्रैःशावयं
क्रिभिस्तु विविधाकारैर्युतःप
चच ॥ सिंहो द्वैर्घ्यं द्विवर्द्धितो
द्विहस्तुले हंसो गवाक्षो भवेत्
कुंभोःसौ मतिदोपि भद्रसाहि
तो लेयस्तु बृहन्नविः । द्वावेतौ
व युगाक्षकेशा गरुडः पक्षह
यजालकं सोऽक्काःपंचदशेववप

मदला वेद्यादि कक्षासनैः ॥ इति
पंचदश गवाक्षाः ॥ सभा च न
न्दा परतोथ भद्रा जया च पूर्णा
क्रमतोपि दिव्या । पद्मी स्वरत्नाद्र
विकोत्पलाश्चेति बुधे विधेयाः व
तिपाल गेहे ॥ क्षेत्रे चतुष्टयप
दे तु पि षोडशांशे मध्ये तुरीयप
द मेकपदो लघुञ्च नन्देति भद्रा
सहिता च पदेन भद्रा तदेदत
श्च जयदालघुना च पूर्णा ॥
दिव्या सभाकेवल नंदभागा भ
द्रै युतैर्भिः सहिताच पद्मी ॥
वेलाद्भवा स्याद्युगतोपि तद्वत्
त्पलोत्पलाख्याप्रतिभद्रतश्च
तस्मै स्तोरणराजितेञ्च मदला
नित्यं द्वैवतानके स्तुच्छाद्ये गे
जे सिंहराजविविधे स्तम्भान्वितैः
पुष्पाभिते वस्त्र स्फाटिक रंगभ
मि न्टपतेः क्रीडास्पदं मण्डपे
कुर्यात्दक्षिणभद्रकेच रुचिरां
तन्मध्यतो वेदिकां ॥ इति
सभाष्टकं ॥
वेदी कोण चतुष्टयेन सकलेषा
णिग्रहे स्वस्तिका कल्याणं रति
कोणकञ्च न्टपतेः सा भद्रिका
सर्वदा । कोणेः श्रीधरिकाच विं
शति भित्ते स्तितेऽम्बराणां गृहे

कोणे रहसि रंभिता च शुभदा
चण्डस्वने पद्मिनी ॥ त्रिस्र स्तम
कराश्च भूपभवने षट्पंचवेदप्र
तथा कुर्यात्कुक्ल चतुष्टयाच्चवेद
घले त्रिद्विकतो हीनके । तस्या
र्द्धेच नरेश्वरासनमतो माण्ड च
तुस्तम्भकं हेम्ना मौक्तिक पट्ट
कूलमणिभिः सोम्पानकं राजि
तं ॥ इति वेदिका चतुष्टयं ॥
दीपस्तम्भं त्रिकरमुदये षड्भि
र्युतं क्रमेण हस्तान्तं तं विहित
मपि तैःपीठ कुंभान्वितञ्च । दी
पस्याद्धं कनक कलसं शोभितं
कंकनाद्यैः कुर्याद्द्वातो मध्यतक
मतो नागरंगे विचित्रं ॥ इति
श्रीसूत्रधार मण्डन विरचिते वा
स्तुशास्त्रे राजवल्लभे शयनसिंहा
सन छत्र गवाक्ष सभाष्टक वेदि
का चतुष्टय दीपस्तम्भ लक्षणं ८
म्ध्यायः ॥ गृहा वास्तुशास्त्रोद
धोराजयोग्या प्रतेना हि सन्त्य
ज तेभ्यः कियंतः । मयोक्ताश्च
योग्या न्टपाणां समस्ते स्तु भा
भान्विता ते च कल्याणदाश्च ।
त्रिशाले गृहे दिकत्रये कुस्तभ
सम्मुखे वीथिकाश्चैव यद्दाक्रम
र्षे । गुणालिन्द चातुर्दिशं चैक

वक्त्रं गवाक्षञ्च कोणे च भद्रेवि
धेयं । गृहे भद्रके श्रीधरं माण्ड
युक्तं तथा भूमिका पञ्च सप्तैक
भूम्यां । वितानच्छादने मण्डपं वे
दवक्त्रे रिपुघ्ने गृहे राज्य वर्द्धन्य
मेतत् । मध्ये निम्नस्तंग नाग्रत
योर्द्वेःशाले दैवं पत्र नाशाय गे
हं । स्तम्भ श्रेणी मध्यमानेन का
र्यास्तुनाधिक्य नैव पूजा नच
श्रीः । हीन स्तम्भे शालयो वीथि
पट्टैनो वेधःस्यादमतो वेद एव
भूमे जैये रुद्र संख्या प्रमाणं
तुल्या नेष्टा वर्द्धमानाःशुभाःस्युः
सार्द्धत्रयेण विभजेत् करे तत्
संख्या मध्ये नवांशा मुदितञ्च
करार्द्धभित्तिः । स्तम्भाञ्च षोड
शगृहेपि च भद्रकेषु दन्तैःसिं
ताञ्च सकलाश्च चतुर्मुखेस्या
त् भद्रेचभूमिद्वय मर्द्धमाण्ड
सार्द्धत्रिभूमं कथितञ्च गेहं । प्र
तापवर्द्धन्य मिदं न्टपाणां लक्ष्मी
विलासञ्च वदामि तस्मात् । स्त
म्भादशा दश भद्रैकं षोडश
भ्येतत् समहूपं । मदन शाव
नि माण्ड समेते लक्ष्मीः कर्मक
तेति चनिर्मं । भागाः पंचगुणाञ्च
पंचभवने षट्शाला स्तम्भकैः कु



उंचाईपदेचनन्दपदके भद्रेच
त्वेहारकेः। भद्रे वै गुणभद्रका
णि सकलेष्टाप्रीतिका स्तम्भ
कामाण्डे भूषितये च सार्द्धशार
भूःस्याच्छ्री निवासः गृहं। मध्ये
स्तम्भ शतञ्च भाग समके भि
त्तिश्चत्वेहारकं सप्तांशादि शारो
णाराम सहितं भद्रं चतुस्त्रिंश
ता। षट्विंशत द्विशती चेत्
सकलाः स्तम्भाः स्थितास्त्वेतो
नाम्नानत कमलोद्भवञ्च कथि
तंभूम्यार्द्धसमान्वितं। हर्म्यस्योदय
के विभज्य नवधा कुम्भी भवेद्भा
गतःपादोनं भरणं शिरश्च कथि
तेपट्टः सपादो भवेत। स्तम्भः पं
चपदोनभाग उदितः कोणाष्ट
चूर्णे स्तथा भागार्द्धेन जयंतिका
स्थितादिता सा तंत्रकस्योपरि॥
गृहस्योदयं द्विविभागे विभा
ज्य द्विभागेन कक्षासनं वेदिका
स्यात त्रिभागेन तत कण्ठतो
स्त्रि भेदं गृहस्योदयार्द्धेनपीठं
त्वपाणां। उत्तान पट्टो त्वपमन्दि
रेऽस्मौ हस्तेच हस्ते द्विपबोन
तःस्यात। प्रासादानां द्वौ च
कतो त्वपाणां धनहाये सोपिक
रोति गेहे॥ त्वपेष्टके शर्करया

विमुक्ते सकर्करे स्तैः स्वदशा
गृहे भूः शाला नशास्तभवने
सुचिरे कपोत गृभाः कपिका
करोद्रे॥ गृहोः लिन्दविशेष
तस्त्वसकला भूमोच्चरमण्डपान्वि
ता छायेनाप्यथमुत्तवारणाय
तं माण्डे तथार्द्धोदयं सोऽपभ
द्रे चतुष्किकाभिर्हादितो माण्डे
नयुक्त स्तथा मेले स्तुल्य स
पादकेस्त शुकेतो वाशीयकैः
शोखरः। राज्ञो गृहे छन्द चतु
ष्ट्यंस्यात तथैव चेटा कलसेन
युक्तं तेमावसेत्तस्तथा शिरकाः
प्रासादके तेपिषडेव शास्ताः। ष
डुजाति गेहे त्वण पर्ण पट्टैर्वंशैः
कटेवीपिमृदा शिलाभिः। छ
द्मै प्रकारैः कथितञ्च षड्विला
कर्प्रसिद्धा च परीक्षणीयं॥
इतिराजगृहादि॥ वामभागे
दक्षिणेवा त्वपाणां ज्ञेया का
र्या वाटिका क्रीडनार्थं। एक
द्विद्विदिशण संख्या शते स्यान्मध्ये
धारामण्डपेतोय यंत्रैः। क्षेत्रंस
प्रविभाग भाजितं मतो भंस्व
भागत्रयं तन्मध्ये जलवापिका
जनपदे रेकांशतो वेदिका॥
स्तम्भे द्वादशाभिश्च मध्य रचितः

कोणेषु कूपान्वितः कर्तव्योज
लयंत्र एष विधिवत भोगाय
भूमीभुजो। तस्मा चम्पक कुन्द
जाति सुमनो वल्पः मल्लिकाल
का जाती हेमसमानकेतकि र
पि स्वेता तथा पाटला। नारंगः
करणा वसन्तलतिका चारुक
पुष्पादिकं जाम्बीरो वदरी च
एरा मधुका जम्बूश्च चूतद्रुमाः
मालूरः कदली च चन्दन वटा
वश्वत्थ पथ्या शिवा चिंचाशा
ककदंब निम्बतरवः खर्जूरिका
दाडिमी। कर्पूरागुरु किंशुकारु
यदिपुः पुन्नागकोलिस्तुकी प्रो
क्ता नागलताच वीजनिम्बूतास्या
तिंडुकी लांगली। झातेला श
तपत्रिका च वकुलाधत्तूर कंके
लेको पुगल स्तालतमालकोम्र
निवेरो मंदार पारिद्रुमो मुमोभो
ज्य विचित्रखाद्य सुफला सेवो
पणीया बुधैः यथाशोति न भूत
ले शुभतरं स्तद्धम्मकान वाप
येत॥ आस्थाने प्रतिसेचनायच
हटीयंत्र स्तसारोद्भवे दोला स्त्री
जनखेलनाय रुचिरे वर्षा वस
न्तोत्सवे। वाला प्रोष्ठ वधू स्तु
मध्य वनिता गानैर्मनोहारिभि

श्रीष्मशारदकेथ शीतलजल
क्रीडा शुभे मंडपे॥ इति वाटि
का तदेगमाणं गृह वामभागे
शाला चतुःषष्टिकरा विधेया
शतार्द्धतो मध्यमिका चेदेष्ठा
कनीयसी ते दशभि र्विहीना
व्यासेचज्येष्ठा तिथि हस्तमाना
श्रेयादशैका दशकैः क्रमेण।
तदाश्च भित्तिश्च कर प्रमाण
पञ्चार्द्ध पञ्चाधिकरोदयास्या
त तेजोहानि मपी हया विद
धते एवाप रास्या त्वरणं तेषा
स्योत्तरतो मुखादि सततं की
र्तिं ये शाधाम्यके कर्तव्या धिय
णा प्रतीहकलसस्थानं द्विहस्ता
दयं तस्या स्तोरण मुच्छ्रितञ्च
निभिर्हस्तैः स्वशोभान्वितं। षष्ठा
साधुहयांगुले निगदितो वेदी
गुलेनाधिकः श्रीवत्स स्तहि ला
ले एव वमनोहारी द्विसप्तांगुलः
रागांगुलकेस्तु वाजि विज्ञेया
श्रीम्या तथा भैरवः प्रांशुरव्य
स्त गुणाश्च मात्र उदये मानं ह
देः समधा॥ इत्यश्वशाला॥
सिंहद्वारे एकमानेन कार्या त्रि
द्वेका वा मालिका स्तम्भशीर्षे
स्यात्ते मध्ये नाडको रत्नाणं



तुल्या भागेनाधिकेनापि सा
हि ॥ भागे हस्तिन वामके चक
विंशं शाला हरे हीरतः कर्त
व्या स्वदृष्टोन्नता च कलसै चैरा
दिभि भूषिता। संकीर्णे रसेना
नेन निगदितो मदा महाप्रासा
तः सर्वेषूत्तम भद्रजाति रुदि
तो नेन्द्रैः करे रुक्मितः ॥ ३
तिराजशाला ॥ अष्टोत्तर हस्त
शते एषुत्वे नृपालये चोत्तम
मेव तस्मात्। अष्टाभि रष्टाभि र
तो विहीने पंचैव भागाधिक
तोपि दैर्घ्ये ॥ अशीतितो राग
करेषु हीनाः पञ्चालया भूप
सुतप्रियासु। त्रिभाग दैर्घ्येऽधि
कतो विधेया गृहाः क्रमेणैव य
थोदितासु। प्रोक्तं चतुः षष्टि
करं एषुत्वे क्रमेण षड्भिश्च क
रै विहीने षड्भागतो दैर्घ्य मतो
ऽधिकं स्याद्धलाधिपस्यैव च प
ञ्चवृन्दैः ॥ षष्ठा हस्तैर्मन्त्रिणो
र्दैर्घ्यपृथुत्वे हीने हीने पञ्चकं वे
द वेदैः। ऊर्ध्वादस्त्तरष्टमांशेनाऽ
धिकासौ व्यासाद्दैर्घ्ये वर्द्धितो
दैर्घ्य एव। सामंतादिक भू
पतेषु भवने विप्रादिहस्तैः
समं हस्ते वेदविहीनकैः क्रम

तया भागाधिकं दैर्घ्यतः। दै
वज्ञस्य सभासदस्य गुरुतः पौ
रोधसे भेषजे विंशत्यष्टकरं हि
हस्तरहितं दैर्घ्योऽधिपा तद्वेत्
वेश्या कञ्चुकिशिल्पिनामपि
गृहे वेदाधिका विंशति मानं
हस्त चतुष्टये विरहिते दैर्घ्ये
धिका व्यासतः ॥ हर्म्यप्रसूतक
शंतिकस्परचितो हस्तैः समैर्वि
स्तरे हीने त्वष्टकरेण पंचक
मिदं तुर्यांश दैर्घ्याधिकं ॥ द्वा
त्रिंशता मान मिदं द्विजादे ही
नं चतुर्भिः क्रमतो विधेयं ॥ द्वि
गष्ट रामाब्धि विभागतश्चक्र
मेण तद्दृणं चतुष्टयेपि। कर्णा
धिकं विस्तरतोऽधिकश्च श्री
र्द्धं विनाशं समुपैति गेहे। द्वारेनमै
मूर्द्धि यदाग्रतस्तत संततेर्हा
निकरं प्रदिष्टं। व्यासे सप्ततिर
स्तु विप्रके शाला मानमिदं म
नुभक्ते। पंचविंशति पुन रंगैस्त
सितमान शुभांति लद्वो विदद्ध
द्धाः ॥ एकं द्वारं प्राग्मुखं ब्राह्म
णे स्यात् चातुर्वर्ण्ये चात्र भूपेश
जैने। शूद्रे प्राच्या पश्चिमस्यादि
क्षु मूलं द्वारं दक्षिणं वर्जनी
यं। इति वास्तुशास्त्रे ॥

राजवल्लभमण्डने राजगृहादि
लक्षणं नाम नवमोऽध्यायः ॥
शिल्पिका स्त्री तृणविशेषः ल
हानक्षिपी इति हिंदीभाषा ॥
तत्पर्यायः। शिल्पिनी २ शीता
३ तेजना ४ मृदुच्छदा ५ अस्या
गुणाः। मत्रकृरोधाश्मरी शूल ज्वर
पित्तापहारकत्वं। इति राजनि
र्घण्टः ॥ शिल्पिनी स्त्री को
लदलौषधिः ॥ इति
मेदिनी ॥
शिल्पिशाला स्त्री क्ली शिल्प
शाला। इत्यमरटीकायां स्वामी।
शिल्पी [न्] त्रि शिल्पकर्त्ता। तत्प
र्य्यायः कारुः २ इत्यमरः ॥
अस्याविवरणं शिल्पकारशब्दे
द्रष्टव्यं शिल्पसंबंधीच ॥
शिवं क्ली मंगलं। इत्यमरः ॥
सुखं ॥ जलं। इत्युणादिकोषः ॥
सैंधवं। समुद्रलवणं श्वेतटंक
णं। इति राजनिर्घण्टः ॥
शिवः पुं ब्रह्मणः संज्ञाविशे
षः। अस्य व्युत्पत्ति र्यथा। शिवं
कल्याणं विद्यतेऽस्य शिवः
शपति अशुभ मितिवा। शेरतेऽ
वतिष्ठन्ते अणिमादयोऽष्टौगुणा
अस्मिन् इति वा शिवः ॥

इत्यमर टीकायां भरतः ॥ तत्पर्या
यः। शंभुः २ ईशः ३ पशुपतिः ४
शूली ५ महेश्वरः ६ ईश्वरः ७
सर्वः ८ ईशानः ९ शंकरः १०
चंद्रशेखरः ११ भूतेशः १२ खण्ड
परशुः १३ गिरीशः १४ गिरिशः
१५ मृडः १६ मृत्युञ्जयः १७ कृत्ति
वासाः १८ पिनाकी १९ प्रम
थाधिपः २० उग्रः २१ कपर्दी २२
श्रीकण्ठः २३ शितिकण्ठः २४
कपालभृत् २५ वामदेवः २६
महादेवः २७ विरूपाक्षः २८ त्रि
लोचनः २९ कृशानुरेताः ३० स
र्वज्ञः ३१ धूर्जटिः ३२ नीललोहि
तः ३३ हरः ३४ स्मरहरः ३५
भर्गः ३६ त्र्यम्बकः ३७ त्रिपुरान्त
कः ३८ गंगाधरः ३९ अन्धकरि
पुः ४० क्रतुध्वंसी ४१ वृषध्वजः ४२
व्योमकेशः ४३ भवः ४४ भीमः
४५ स्थाणुः ४६ रुद्रः ४७ उमाप
तिः ४८ इत्यमरः ॥ वृषपर्वा ४९
रेविहाणः ५० भंगाली ५१ पां
शुचंदनः ५२ दिगंबरः ५३ अट्ट
हासः ५४ कालञ्जरः ५५ पुरहि
ट् ५६ वृषाकपिः ५७ महाकालः ५८
वराकः ५९ नन्दिवर्द्धनः ६० हीरः
६१ वीरः ६२ खरुः ६३ भूरिः ६४



कटपुः ६५ भैरवः ६६ ध्रुवः ६७
शितिपिष्टः ६८ गुडाकेशः ६९ दे
वदेवः ७० महानटः ७१ ॥ इति ज
टाधरः ॥ तीव्रः ७२ खण्डपर्शुः प
ञ्चाननः ७४ कण्ठकालः ७५ भ
रुः ७६ भीरुः ७७ भीषणः ७८ कं
कालमाली ७९ जटाधरः ८० व्यो
मदेवः ८१ सिद्धदेवः ८२ धरणी-
श्वरः ८३ विशेषः ८४ जयन्तः ८५
हरिरूपः ८६ संध्यानाटी ८७ सु
प्रसादः ८८ चन्द्रापीडः ८९ शू
लधरः ९० वृषाङ्कः ९१ वृषभ
ध्वजः ९२ भूतनाथः ९३ शिपि
विष्टः ९४ वरेश्वरः ९५ विश्वेश्व
रः ९६ विश्वनाथः ९७ काशी
नाथः ९८ कुलेश्वरः ९९ अस्थिमा
ली १०० विशालाक्षः १०१ हिण्डी १०२
प्रियतमः १०३ विषमाक्षः १०४ भद्रः
१०५ ऊर्द्ध्वरेताः १०६ महाकालः १०७
यमान्तकः १०८ नन्दीश्वरः १०९
अष्टमूर्त्तिः ११० अर्च्चीशः १११ खे
चरः ११२ भृङ्गीशः ११३ अर्द्धनारी
शः ११४ रसनायकः ११५ इति
शब्दरत्नावली ॥ उः ११६ पिनाक
पाणिः ११७ फणधरधरः ११८
कैलासनिकेतनः ११९ हिमाद्रि
तनयापतिः १२० इति कविकल्प
लता ॥ तस्य सहस्रनामानि श्री
महाभारते अनुशासनपर्व्वणि
द्रष्टव्यानि ॥ अस्य कपालिनाम
कारणं यथा । ईश्वर उवाच ॥
आसीत्तत्र वरारोहे ब्रह्मणस्तुशि
रोऽपरं । पंचमं शृणु सुश्रोणि
जाते कांचन सुप्रभं ज्वलत्तेज
स्तं शीर्षं जाते तस्य महात्मनः
सएव मब्रवीद्देवि जन्म जाना
मि तेऽस्म्यहं । अतः कोपपरीतेन
संरक्तनयनेनच ॥ वामांगुष्ठ न
खाग्रेण छिन्नं तस्य शिरो म
या । ब्रह्मोवाच यस्मादनपरा
धेन शिरश्छिन्नं त्वयामम । त
स्माच्छापसमायुक्तः कपाली
त्वंभविष्यसि इति मात्स्ये १५८
अध्यायः ॥ अथ शिव मंत्राः
तत्र एकाक्षर मंत्रो यथा । सांत
मोकार संयुक्तं विंदुभूषित म
न्तकं । प्रासादाख्यो मन्त्रः प्रो
क्तो भजतो कामदो मणिः ॥
हौं ॥ अस्य पूजा प्रातः कृत्या
दि मातृकान्यासं प्राणायामंच
विधाय श्रीकण्ठादि न्यासं मा
तृकास्थानेषु कुर्य्यात् ततः सा
मान्यपूजापद्धत्युक्त पीठन्यासं
कृत्वा पीठशक्ती र्न्यसेत् । ततः

ऋष्यादिन्यासः ॥ ततः करांग
न्यासौ ॥ ततः ईशानाद्याः पं
चमूर्त्ती र्न्यसेत् । मूर्द्धस्य पत
त्पर्य्यन्तं न्यासं कृत्वा ध्यायेत्
अस्यध्यानपिकारात् । तत ऊर्द्ध्वप्रा
ग्दक्षिणोत्तर पश्चिमेषु मुखेषु
ईशानस्य पंचकलाः पंचब्रह्म
ऋचः पदादिकाः प्रणवाद्या नमो
न्तान्यसेत् । ततः पूर्व्व पश्चिम द
क्षिणोत्तरेषु तत्पुरुषस्य चत
स्रकला विन्यसेत् । ततो हृदये
ग्रीवायां अंशद्वये नाभौ कुक्षौ
पृष्ठे वक्षसि अघोरस्याष्टौकलाः
न्यसेत् । ततो गुह्ये अण्डको
षे ऊरुद्वये जानुद्वये जंघा
द्वये स्फिग्द्वये कट्यां पार्श्व
योः वामदेवस्य त्रयोदशकलाः
विन्यसेत् । ततः पार्श्वयोः स्त
नयो र्नासिकायां मूर्द्ध्नि बाहु
युग्मे सद्योजातस्याष्टौकलाः
न्यसेत् । ततः पंचांगुलीषु ई
शानाद्याः पञ्चऋचो न्यसेत् ।
एवंमूर्द्धास्य हृदय गुह्य पादे
ष्वेता ऋचो न्यसेत् । ततोऽङ्ग
न्यासांतरं कुर्य्यात् । एवं वि
न्यस्य ध्यायेत् । मुक्तापीतप
योद मौक्तिक जवा वर्णैर्मुखैः
पंचभिस्त्र्यक्षैः रंजित मीशमिंदु
मुकुटं पूर्णेन्दु कोटिप्रभं शूलं
टंक कृपाण वज्रदहनान्नागेन्द्र
घण्टांकुशान् पाशं भीतिहरं
दधानममिताकल्पोज्ज्वलांगं
भजे ॥ एवं ध्यात्वा मानसैः सं
पूज्य अर्घ्य स्थापनं कृत्वा शै
वोक्त पीठपूजां विधाय पुन
र्ध्यात्वा आवाहनादि पंच पुष्पा
ञ्जलि दान पर्य्यंतं कृत्वा आवर
णपूजां विधाय धूपादि विसर्ज
नांतं कर्म्म समापयेत् । अस्य
पुरश्चरणं पंच लक्षजपः १
अस्याष्टाक्षरमंत्रो । यथाषडक्ष
रः शांभवः कथितोऽष्टाक्ष
रो मन्त्रः । ह्रौं ॐ नमः शिवाय
ह्रौं । अस्य पूजा प्रातः कृत्यादि
शैवोक्त पीठ मन्त्रांतं न्यासं वि
धाय ऋष्यादिन्यास करांगन्या
सान् प्राणायामंच कृत्वा ध्या
येत् । बंधूकाभं त्रिनेत्रं श
शिसकलधरं स्मेरवक्त्रं वहन्त
हस्तैः शूलं कपालं वरद मभ
यदं चाक्षहारं भजामि । वा
मोरुस्थम्भगायाः करतल वि
लसत् चारु रक्तोत्पलाया ह
स्तेनाश्लिष्टदेहं मणिमय विल

मङ्गलरूपायाः प्रियायाः ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा शैवोक्त पीठ पूजां विधाय पुन र्ध्यात्वावाह्य पंचपुष्पांजलि दान पर्य्यन्ते विधायावरण पूजां कृत्वा धूपदानादि विसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं चतुर्द्दशलक्षजपः २ ॥ अस्याष्टाक्षर मंत्रान्तरं यथा। तारो मायाविंदुयुक्ता मनुस्वर विभूषितं। पंचाक्षर समायुक्तो वसुवर्णो मनु स्मृतः ओं ह्रीं ह्रौं नमः शिवाय। अस्य पूजाप्रातःकृत्यादि शैवोक्त पीठ न्यासान्तं विधाय पूर्ववदृष्यादि न्यासं करांगन्यासौ च कृत्वा ध्यायेत् वंदे सिंदूरवर्णं मणिमुकुटलसत्स्वाकचंद्रावतंसं भालोद्यन्नेत्रमीशं स्मितमुखकमलं दिव्यभूषाङ्गरागं। वामोरु न्यस्त पाणेररुण कुवलयं संदधत्याः प्रियायाः शुभ्रोत्तुंग स्तनाग्रे निहितकरतटं वेद टंकेष्टहस्तं। एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदान पर्य्यन्तं विधायावरणपूजां कृत्वा धूपादि विसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः ३। अथास्य मृत्युञ्जयाख्य मंत्रः। तारं स्थिर सकोणेंदु भृगुः सर्व समन्वितः त्र्यक्षरात्मा त्रिगादितो मंत्रो मृत्युंजयात्मकः ओं जुं सः। अस्य पूजाप्रातःकृत्यादि शैवोक्तपीठन्यासान्तं विधाय ऋष्यादिन्यासं करांगन्यासौ च कृत्वा ध्यायेत् चंद्रार्क्काग्नि विलोचनं स्मितमुखं पद्मद्वयान्तः स्थितं मुद्रा पाश मृगाक्षसूत्र विलसत्पाणिं हिमांशुप्रभं। कोटीन्दु गलत् सुधा प्लुत तनुं हारादिभूषोज्वलं। कान्त्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पीठमन्वन्तां पीठपूजां विधाय पुन र्ध्यात्वावाहनादि पंच पुष्पांजलि दान पर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादि विसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षत्रयजपः ॥ ४। अथास्यापरद्वादशाक्षर मृत्युंजय मंत्रः। मृत्युंजय स्वस्वा क्षी पालय द्वितयं वदेत् मृत्यु

ञ्जयः समुच्चार्य्य पुन रेव विलोमतः ॥ द्वादशाक्षरोऽयं मंत्रः स्यात् मृत्युंजयाभिधोऽपरः ॥ ओं जूं सः पालय पालय ओं जूं सः अस्य ध्यान पूजादिकं सर्वं पूर्ववत् ५ ॥ अस्य द्वाविंशत्यक्षर मंत्रः। प्रणवो हृदयं पश्चात् ततो भगवते पदं ङें तन्त्रे दक्षिणा मूर्त्ति मह्यं मेधा मुदीरयेत् प्रयच्छ ठ द्वयान्तोयं द्वाविंशत्यक्षरो मनुः। ओं नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा। अस्य पूजाप्रातःकृत्यादि शैवोक्त पीठमन्वन्तं विधाय ऋष्यादि न्यासं करांगन्यासौ च कृत्वा ध्यायेत्। वटमूले महाच्छाये पद्मरागफलोज्वले। रत्नमण्डपमध्ये पद्मे विचित्रे रूपशोभिते। नवरत्न महाकल्पे लंबमाने स्थले कृते। विचित्र वरमूलस्थं चिन्तयेल्लोकनायकं। स्फटिकरजतवर्णं मौक्तिकी मक्षमाला ममृतकलस विद्या ज्ञानमुद्रा कराग्रैः दधतमुरगकक्षं चंद्रचूडं त्रिनेत्रं विधृत विविधभूषं दक्षिणामूर्त्तिमीडे ॥ एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनादि शैवोक्त पीठपूजां विधाय पुन र्ध्यात्वा वाहनादि पंचपुष्पाञ्जलिदान पर्य्यन्तं विधायावरण पूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् अस्य पुरश्चरणं लक्षजपः ६। अथास्य मंत्रान्तरं। अग्निसंवर्त्तकारिस्थ शान्तिलो ष्ठ विंदुमत् चिंतामणिरितिख्यातो बीजं सर्व समृद्धिदं। र क्ष म र य ऊं ङ्रुं। प्रपंचसारे। अनल कष मरेफ प्राण ससांत वामश्रुतिहिमरुचि खण्डैः र्मण्डितो मंत्रराजः। अस्य पूजाप्रातःकृत्यादि शैवोक्त पीठ मन्वंतं विधाय ऋष्यादिन्यासं करांगन्यासौ च कृत्वा ध्यायेत्। नीलप्रवालरुचिरं विलसत्त्रिनेत्रं पाशारुणोत्पलकपालक शूलहस्तं। अर्द्धाम्बिकेशं मनिशं प्रविभक्तभूषं बालेन्दु बद्ध मुकुटं प्रणमामि रूपं। एवं ध्यात्वा मानसैः संपूज्यार्घ्यं संस्थाप्य शैवोक्त पीठपूजां विधाय पुनर्ध्यात्वावाहनादि पंचपुष्पांजलिदान पर्य्यन्तं कृत्वा आवरण पूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म स

मापयेत्।अस्यपुरश्चरणं लक्ष
जपः।अयंअर्द्धनारीश्वरः ७॥पा
शांवाक्रि समारूढ स्तारवानाघ
मीरिते।थांतो वह्निसमारूढस्त
थ स्वरसमन्वितः विंदुमांस्तु द्वि
तीयःस्यात् हांतः सर्गी तृतीयकः
नीलकंठात्मको मंत्रो विषहृय
हरःपरः। प्रमाणांतरे।लोहि
तोग्रासनःसत्यो विन्दुमानप्र
थमे पुनः द्वितीया वह्निबीज
स्यादीर्घो थांतोऽ भूषिता स्तती
याल्लांगली सर्गी मंत्रो बीजत्रया
त्मकः।नीलकंठात्मको मंत्रो
विषहृयहरः प्रों नीं ठः इति
मंत्रः।अस्यपूजा प्रातःकृत्यादि
शैवोक्त पीठन्यासांते कृत्वा ऋ
ष्यादिन्यासं करांगन्यासौ चवि
धाय ध्यानं कुर्यात् बालार्का
युततेजसं धृतजटाजूटेंदुखं
डोज्वलं नागेंद्रैः कृतशेख
रं जपवटीं शूलं कपालं करैः
खट्वांगं बिभृतं त्रिनेत्रविलस
त्पञ्चाननं सुंदरं व्याघ्रत्वकपरि
धानमब्जनिलयं श्रीनीलकंठं
भजे। एवंध्यात्वा मानसैः संपू
ज्यार्घ्यस्थापनादि शैवोक्त पी
ठपूजां विधाय पुनर्ध्यात्वा आ
वाहनादि पंचपुष्पांजलिदान
पर्यंतं कृत्वा आवरणपूजां
विधायधूपादि विसर्जनांतं क
र्मसमापयेत्। अस्य पुरश्चरणं
त्रिलक्षजपः। अयं नीलकंठः ८
अस्याघाक्षरमंत्रो यथा।
तारो हंनीलकंठाय मंत्रश्चाघ
हरःपरः॥ ॐनमो नीलकंठाय
अस्यपूजादिकं सर्वं पूर्ववत्॥
९॥ अस्य पंचाक्षरमंत्रः षड
क्षरमंत्रश्च यथा। हृदये चप
रे सात्विन् लोतोः नेतान्वितो
मरुत् पंचाक्षरो मनुः प्रोक्त
स्ताराद्योऽयं षडक्षरः। नमः
शिवाय। ॐनमः शिवाय॥
अस्यपूजा प्रातःकृत्यादि शैवो
क्तपीठ मन्वंते न्यासं विधाय
ऋष्यादिन्यासं कुर्यात्। ततो मू
र्तिन्यासः। ततः करांगन्यासौ॥
ततो गोलकन्यासः॥ ततोव्या
पकन्यासं प्राणायामंच कृत्वा
ध्यायेत्। ध्यायेन्नित्यं महेशंरज
तगिरिनिभं चारुचंद्रावतंसं र
त्नाकल्पोज्वलांगं परशुमृगा
वराभीति हस्तं प्रसन्नं। पद्मासी
नं समंतात् स्तुत ममरगणैर्व्या
घ्रकृत्तिं वसानं विश्वाद्यंविश्ववी

जं निखिल भयहरं पंचवक्त्रं
त्रिनेत्रं॥ एवंध्यात्वा मानसैः
संपूज्यार्घ्य स्थापनं कृत्वा.
शैवोक्त पीठपूजां विधाय
पुनर्ध्यात्वावाहनादि पंचपुष्पां
जलिदानपर्यंतं विधायावरण
पूजांकृत्वा धूपादि विसर्जनांते
कर्मसमापयेत्।अस्य पुरश्चर
णं षट्त्रिंशल्लक्षजपः ९॥अथा
स्य अघोरमंत्रः।अर्द्धीशेन व
ह्निशिखरो लांतस्यांतः ईरी
तः। फडन्त अस्त्रमंत्रोऽयं शिव
शास्त्रसमीरितः।ऊर्ध्वफट् इति
मंत्रः॥ अस्य पूजा प्रातःकृत्या
दि शैवोक्त पीठन्यासांतं विधा
य ऋष्यादिन्यासं करांगन्यासौ
च कृत्वा ध्यायेत्। चंद्रसूर्यं रक्त
तनुं त्रिनेत्रं रक्तांशुकाढ्यं हृदि
भावयामि।टंकं त्रिशूलं स्फटि
काक्षमालां कमंडलुं बिभ्रतमि
दुचूडं॥ एवंध्यात्वा मानसैः संपू
ज्यार्घ्यस्थापनादि शैवोक्तपीठ
पूजांते विधाय ठ मिति बीजेन
मूर्तिं संकल्प्य पुनर्ध्यात्वावा
हनादि पंच पुष्पांजलिदान पर्यं
तं विधायावरणपूजां कृत्वा धू
पादिविसर्जनांते कर्म समापयेत्
अस्य पुरश्चरणं त्रिलक्षजपः
अयं चंडेश्वरः॥ १०॥ इति त
न्त्रसारे शिवमंत्राः॥
विष्णुशिवयो रभेदो यथा॥
वराह उवाच। शिवो मे दक्षि
ण स्थाने तिष्ठते विगतज्वरः
लोकानां प्रवरः श्रेष्ठः सर्वलो
क वरोहरः। तं ये विदंतिते
देवि नूनं मामेव विंदति॥
ये मां विदंति देवेशि ते वि
दंति शिवं परं॥ अहं यत्र
शिव स्तत्र शिवो यत्र वसुंधरे
अहं तत्रापि तिष्ठामि आवयो
रंतरं क्वचित्। शिवं योऽवमन्
ते भूमे सहि मामेव निंदते।ल
भते पुष्कलां सिद्धिं मंत्रं योऽवे
त्ति तत्त्वतः।इति वाराहे श्वेत
ग्रामतेत्र माहात्म्य वर्णन ना
माध्यायः॥ देवी विष्णु शिवाना
मभेदो यथा। अयं नाराय
णोगौरी जगन्माता सनातनः
विभज्य संस्थितो देवः स्वात्मा
नं बहुधेश्वरः। नमेविष्णुः परंत
त्वं देवाधान महर्षयः। एकोयं
देव देवात्मा भवानी विष्णुरेव च
अहं त्रिनिष्क्रियाः प्रोक्तः केव
लो निष्परिग्रहः। मामेव केश

वं देव मार्कंडेयो मध्यात्विकां
इति कौर्म्मे ८ अध्यायः॥
शिवनिंदा निषेधो यथा। परा
त्परतरं याति नारायणपरा ज
नाः। न ते तत्र गमिष्यंति ये
द्विषंति महेश्वरं। ध्याने होम
तप स्तप्ते ज्ञाने यज्ञादिकावि
धिः। तेषां विनश्यति क्षिप्रं ये
निंदंति पिनाकिनं। यो मां
समाश्रयेन्नित्यं एकांते भाव
माश्रितः। विनिन्दन्नेव ईशानं
स याति नरकायुतं। तस्मात्सा
परिहर्त्तव्या निन्दा पशुपतेर्द्वि
ज। कर्मणा मनसा वाचा तद्
भक्तेष्वपि यत्नतः। इति कौर्म्मे २५
अध्यायः॥ अस्य प्रलयकारक
त्वे यथा। गते परार्द्ध द्वितये
काले लोकप्रकालकः। का
लाग्नि र्भस्मसात्कर्तुं करोति
निखिलं मतिं। स्वात्मन्यात्मा
नमावेश्य भूत्वा देवो महेश्व
रः। दहेदशेषं ब्रह्माण्डं सदेवासु
रमानुषं॥ तमाविश्य महादेवो
भगवान्नीललोहितः। करोति
लोकसंहारं भीषणं लोकमा
श्रितः॥ प्रविश्य मंडलं सौरं
कृत्वाऽसौ बहुधा पुनः॥ निर्दह

त्यखिलं लोकं सप्तमूर्तिस्वरू
पकः। स दग्ध्वा सकलं सत्व
मस्त्रं ब्रह्म शिरो महत्। देवता
नां शरीरेषु क्षिपत्यखिलदाहकः
दग्धेष्वशेषदेहेषु देवी गिरिव
रात्मजा। एषा सा साक्षिणः श
म्भोस्तिष्ठते वैदिकी श्रुतिः॥
शिवः कपालै र्देवानां कृतस्र
ग्वरभूषणः। आदित्य चंद्रादि
गणैः पूरयन् व्योममण्डलं। सहस्र
नयनो देवः सहस्राकृतिरीश्वरः
सहस्रहस्त चरणः सहस्रार्च्चि र्म
हाभुजः। दंष्ट्रा करालवदनः प्र
दीप्तानललोचनः। त्रिशूलं कृत्ति
वसनो योग मैश्वर माश्रितः॥
पीत्वा तत् परमानंदं प्रभूत म
मृतं स्वकं। करोति ताण्डवं देव
मालोक्य परमेश्वरः। पीत्वा तत्सा
मृते देवी भर्तुः परम मंगला॥
योग मास्थाय देवस्य देह माया
ति शूलिनः। स भुक्त्वा तांडव रसं
स्वेच्छयैव पिनाकधृक। याति
स्वभावं भगवान् दग्ध्वा ब्रह्माण्ड
मण्डलं। संस्थितेष्वथ देवेषु ब्र
ह्मविष्णु पिनाकिषु। गुणै रशेषैः
पृथिवी विलयं याति वारिषु॥
सवारि तत्त्वं सगुणं ग्रसते॥

हव्यवाहनः। तेजः सगुणसंयु
क्तं वायौ संयाति संक्ष
यं॥ आकाशे सगुणो वायुः प्र
लयं याति संक्षयं। भूतादौ च
तथाकाशं लीयते गुणसंयु
तं। इन्द्रियाणि च सर्वाणि तैज
से यांति संक्षये। वैकारिके देव
गणाः प्रलयं यांति सत्तमाः। वै
कारिकं तैजसश्च भूतादिश्च
ति सत्तमाः। त्रिविधोऽयमहंका
रो महति प्रलयं व्रजेत्। महांत
मेभिः सहितं ब्रह्माणं मति
तेजसं। अव्यक्तं जगतो योनिः
संहरे देक मव्ययः॥ एवं
संहृत्य भूतानि तत्त्वानि च म
हेश्वरः। वियोजयति चान्योन्यं
प्रधानं पुरुषं परं॥ प्रधान पुं
सो रजयो रेष संहार ईरितः
महेश्वरेच्छा जनितो न स्व
यं विद्यते लयः॥ गुणसाम्यं
तदव्यक्तं प्रकृतिः परिगीयते
प्रधानं जगतो योनि र्मायात
त्व मचेतनं कूटस्थ श्चिन्मयो
ह्यात्मा केवलः पंचविंशकः
गीयते मुनिभिः साक्षी महा
नेकः पितामहः। एवं संहारक
रणी शक्तिं माहेश्वरी ध्रुवा प्रधा
नेत्य

विशेषांतं देहेऽद्य इति श्रुतिः
योगिनां मथ सर्वेषां ज्ञानविन्य
स्त चेतसां। आत्यंतिकश्चैव ल
यं विदधातीह शंकरः। इति
कौर्म्मे उपरिभागे ४२ अध्यायः
ब्रह्म विष्णु शिवाना मभेदो
यथा॥ श्रीभगवानुवाच॥
न ब्रह्मा भवतो भिन्नो न शम्भु
र्ब्रह्मणस्तथा। न चाहं युव
यो र्भिन्नो ह्यभिन्नत्वं सनातन
प्रधानस्याप्रधानस्य भागाभा
गस्वरूपिणः। ज्योतिर्मयस्य
भागोमे ऽनेकोऽनेको हमंशकः
कस्त्वं कोऽहं च कोब्रह्मा ममै
व परमात्मनः अंशत्रय मिदं
भिन्नं सृष्टि स्थित्यंतकारणं।
चिंतयन् स्वात्मनात्मानं स्वभावे
रूपचात्मनि। एकत्वे ब्रह्म वैकु
ण्ठ शम्भूनां सङ्गते ऽरु॥
शिरो ग्रीवादि भेदेन यथैवैक
स्य धर्मिणः। अंगानि सन्त्येव
कस्य भागत्रय मिदं हर॥ य
ज्ज्योति र्यत्स्वपर प्रकाशं कू
टस्थ मव्यक्त मनंतरूपं। नित्य
न्दीर्घादि विशेषणाद्यैर्हीनं परं
तत्त्व वयं न भिन्नाः॥ इति का
लिका पुराणे ४ अध्यायः॥

अपि च। ततो ब्रह्मा च शारीरं
त्रिधा चक्रे महेश्वर। प्रधानेच्छा
वलाच्छम्भो त्रिगुणे त्रिगुणीकृ
ते। तदूर्द्ध्वभागः संजात श्चतुर्वक्त्र
श्चतुर्भुजः। पद्मकेशर गौरांग
कायो ब्रह्मा महेश्वर तन्मध्य
भागो नीलांग एकवक्त्र श्चतु
र्भुजः। शंखचक्रगदापद्मपाणिः
कायः सवैस्नवः। अभवत्तदधो
भागः पंचवक्त्र श्चतुर्भुजः। स्फ
टिकाभ्रसमः कायः शुक्लः स च
द्रूपोरवः। ईशा स्ततो ब्रह्मकाये
सृष्टिशक्तिं न्ययोजयत्। स्वय
मेवाभवत्तस्य ब्रह्मरूपेण लो
कभृत्। स्थितिशक्तिं निजांया
यां प्रकृत्याख्यं न्ययोजयत्।
महेशो वैस्नवे काये ज्ञान श
क्तिं निजांतथा॥ स्थितिकर्ता
भवेद्विस्नुरह मेव महेश्वरः स
र्वेशक्तिनियोगेन सदा तद्रूप
तामम। अंतशक्तिं तथा काये
शांभवे संन्ययोजयत्। अंतक
र्ताभवच्छम्भुः स एव परमेश्वरः
ततस्त्रिषु शरीरेषु स्वय मेवप्र
काशते। ज्ञानरूपं परंज्योति र
नादि र्भगवान्प्रभुः॥ सृष्टिस्थि
त्यंतकरणादेक एव महेश्वरः

ब्रह्मा विस्नुः शिव श्चेतिसंज्ञा
माप पृथक् पृथक्। अत स्त्रैव
विधानाच तथाह मपि न पृथ
क्॥ एवं शारीरं रूपंच ज्ञान मस्मा
कमेतरे। इति तत्रैव ८८ अध्यायः
मार्कण्डेय उवाच। ततो ब्रह्मां
ड संस्थाने दर्शयामास शांभ
वे। वपुषे तोयराशिस्थ ब्रह्मा
ण्डञ्च यथा पुरा। तन्मध्ये पद्म
गर्भाभं ब्रह्माण्डं जगतः पतिं
ज्योतीरूपं प्रकाशार्थं सृष्टस्थ
ञ्च पृथग्गतं। शारीरेण सद
रूपो ब्रह्माण्डान्तर्गते शुक्रः।
चतुर्भुजे प्रकाशांते ज्योतिर्भिः
कमलासने। तत्रैव च त्रिधा भ
ते वपु र्ब्राह्मं ददर्शासः। ऊर्द्ध्व
मध्यांत भागेस्तु ब्रह्मविस्नुशि
वात्मके। अधोर्द्धभागे वपुषो
ब्रह्मान्त मगमत्तथा॥ मध्यस्त
दा विस्नु भूतो ददर्श स्तस्त्तभे
भूतं। एक मेव शारीरं त्रिधा
भूतं महार्मुकुः। हरो ददर्श
स्वे गर्भे तथा सर्वं स्थिरं जग
त्। कदाचिद्वैस्नवे काये ब्रा
ह्मेकाये लयं व्रजेत्। ब्राह्मं
तथा वैस्नवे च शांभवे वैस्नवे
तथा॥ शांभवे वैस्नवे काये।

ब्राह्मे चाप्यथ शांभवे। गच्छंते
लीनतां शंभु रेकतांच महर्षुकः
ददर्श कामदेवोपि भिन्नंचाप्य
पृथग्गतं। परमात्मनि गच्छंते
लीनतां तद्वपुश्च यत्। इति का
लिकापुराणे ५ अध्यायः॥
अस्य सरभरूप धारणे कारणं
यथा। इति तेषां निनादतो श्रु
त्वावाक्यं जनार्दनः। उवाच शं
करं देवं ब्रह्माणञ्च विशेषतः॥
यत्कृते देवताः सर्वाः प्रजाश्च स
कलाप्रमाः। प्राप्नुवंति महद्दुःखं
शीघ्रंतेसकलंजगत्। वाराहंस
कले काये त्यक्तुं मिच्छामि शं
कर। त्वंप्रार्जयस्व तत्काये य
त्नात्मा शंकरायुना॥ त्वमाप्या
यस्व तेजोभि र्ब्रह्मान्मम हरे शुकः
आप्यायंते तदा देवाः शंकरो हं
तु योविणे। वासुदेवोपि तान्स
र्वान् विसृज्य त्रिदशांस्तदा।
वाराहे तेजसा हर्वे स्वयं ध्यान
परो भवत्॥ शनैः शनै र्यदा
तेज आहरत्येष माधवः। त
दा देहं तु वाराहं सत्वहीनं व्य
जायत॥ तेजोहीने यदा देहं सा
तं सर्वे दृष्टामरैः॥ अथास्या
द महादेवो यत्र वाराह म

हतं। ब्रह्माद्या स्त्रिदशाः सर्वे
महादेव मुमापतिं। अनुजग्मु
स्तदा तेज आयातं सबनाश
ने। ततः सर्वे देवगणाः स्वस्व
तेजो वृषध्वजो आदधे तेन व
लवान् सोतीव समजायत। त
तः सरभरूपी स तत्क्षणाद्धिवि
शेषोऽभवत्। ऊर्द्धाधोभागतश्चा
ष्टपादयुक्तः सुभैरवः। द्विलक्षयो
जनोच्छायः सार्द्धलक्षैकविस्त
तः। इति कालिकापुराणे ३१ अ
ध्यायः॥ अस्य विवाहो यथा।
ईश्वर उवाच। हिताय सर्वजग
तां सम्भोगायात्मन स्तथा। दा
रान्गृहीतु मिच्छामि तथा संता
नवृद्धये। साहाय्यं तत्र कुर्वंतु
भवन्तो मम साम्प्रतं। मदर्थं त
तथा काली याचन्तां तु हिमाच
ले। मार्कण्डेय उवाच। हरस्यैवा
थ मुनयो प्रयाच्छन् गिरिराड्गृह
तेन संपूजिता स्ते तु प्रोचुर्म
मुनयो गिरिं। यत्संदर्शी शरवो
देवो देवदेवश्च योगतः। शा
पानुग्रहणे शक्तो यत्रको जग
तां पतिः। यःसंहरति सर्वाणि
जगंति प्रलयोद्भवे। यो विभू
ति प्रदो भक्ते नानारूपो मनो

हरः। सतेदुहितरं कालीमा
ध्यामादातुमिच्छति यदिप
प्यपासि तयोग्यं वरत्वं दुहितुः
समे॥ तदा प्रयच्छ तनयांका
लीं शर्वशिवभृते गिरे। मार्कण्डेय
उवाच। इत्युक्ते तेन गिरिपति र्व
रे यद्धृदयास्थितं दुहितुश्च प्रिये
ज्ञात्वा प्राप्य मुद मगात्तदा॥
दास्यामि शम्भवे पुत्री पुत्रा
भिः प्रार्थितस्त्विह। एवमेव तप
स्तप्त्वा तयेशः पति रीहितः।
धातुर्नियोजनमिदं कोन्यथा
कर्तुमुत्सहेत्। कोन्यः प्रार्थयि
तुं शक्तः सुतां मम विना हरात्
हरेणानुगृहीतायां तां ममः
कः समुत्सहेत्। इदं गृहीत्वा
मनसा नान्यं सापीह वाञ्छति
इत्युक्त्वा मेनया सार्द्धं सुतां दा
तुञ्च शम्भवे। अंगीकृत्य विस
ष्टास्ते मुनयोऽथ महेश्वरं॥ ते
गत्वा मुनयः सर्वे मरीचि प्रमु
खा द्विजाः। शैलराजो यदाचष्टु
तद्धृत्तु मिदमातरेय। हिमवांस्त
नयांदातुं तस्मै मुत्सहते हर य
द्दिहाद्यी त्वया कार्य्यं युज्यते कि
यतां तत्। ब्रह्मा प्राप्यानुज्ञा
नीहि हरंतं निजास्पदं। सि
द्धं ज्ञात्वा हरः सार्थं मुदितस्ता
न्विसृष्टवान्। यथायोग्यं समा
भाष्य कमादेकैकशो मुनीन्॥
कालीविवाह दिवसे एव मासा
तस्मा प्रति। इति चापि हरेणो
क्ते प्रतिक्रमर्षयो ययुः॥
अथायोन्य प्रियतया ज्ञात्वा
कृत्वागतागते। समयं कारया
मास विवाहाय हरो गिरिः। मा
धवे मासि पंचम्यां सितपक्षे गु
रोर्दिने। चंद्रे चोत्तरफल्गुण्यां भ
रणपादोस्थिते रवौ। आगता
मुन यस्तत्र मरीचि प्रमुखास्तु
हरेण चिंतिताः सर्वे तथा ब्र
ह्मादयः सुराः। तथा च सर्वे दि
कपालाश्च मुनयो ये तपोधनाः।
शच्या सह तदा शक्रो ब्रह्माण्या
यात् मातरः। नारदश्च गतस्त
त्र देवर्षिर्ब्रह्मणः सुतः। एतैः प
रिकरैः सार्द्धं गणैः सम्प्रार्थितः स्व
कैः॥ कन्याविवाह विधिना गि
रिपुत्री हरोऽग्रहीत्। विवाहे गिरि
राजस्य भोः सर्पा ये ऽष्टौ ततो स्थि
ताः। तेजाम्बूनद सन्नद्धा अलं
कारास्तदा भवन्। द्विभुजोऽभू
न्महादेवो जटाः केशात्व मागताः
शिवः स्थित चंद्रखण्डः शोभिता

ज्वलितोऽभवेत्। ललाटनेत्र
मभवत्तदारत्नं महार्घकं। वि
चित्रवसनेष्वाघ्रकृत्तिरासीत्तदा
द्विजाः। विभूतिलेपोऽभवत्स
सुगंधिमलयोद्भवः। दारुरूपो
हरस्तत्र वभूवाद्भुतदर्शनः। ततो
देवाः सगंधर्वाः सिद्धा विद्याधरो
रगाः। विस्मयं परमंप्रापुर्हरं द
ष्ट्वा तथाविधं। हिमवान् स
दितः ष्वाभूत् सह पुत्रैश्च मेन
या। ज्ञातयश्चास्य मुदा हरं
दृष्ट्वा तथाविधं। इदं त्रैलोक्य
ब्रजेगो हरं दृष्ट्वा मनोहरं॥ स
र्वं शिवकरं यस्मादस्माद्यस्मा
भवत् सुराः। तस्मात् शिवोऽयं
लोकेषु नास्मादन्योधिकः शि
वः। महेश्वर समायुक्ता मीदृशी
यः स्मरेद्धृदा। सततं तस्य क
ल्याणं वाञ्छितंच भविष्यति
एवं काली महामाया योगनि
द्रा जगत्प्रसूः। पूर्वं दाक्षायणी
भूत्वा पश्चात् गिरिसुताभवत्
स्वयंसमर्थापि सती काली स
मोहितुंहरं। तथाप्युग्रं तपस्ते
पे हिताय जगतां शिवा। एवं
सम्मोहयामास कालिका चंद्रशे
खरं। इत्येतत् कथितं सर्वं
त्यक्तदेहा सती यथा। हिमव
त्तनया भूत्वा पुनः प्रापमहेश्व
रं। इति कालिकापुराणे ४२
अध्यायः। ब्रह्मपुराणे यथा। व
लल उवाच। हरोपि शम्भवेया
ते समारुह्याशु नंदिनं। प्राहामं
गय शैलादौ यः स्थितो स्तव
शासने। ततो महेश वचना
न्नंदी सर्वगणाधिपः। उपस्पृ
श्य जलं धीमान्सस्मार गणना
यकान्॥ नन्दिना संस्मृताः सर्वे
गणनाथाः सहस्रशः। सम्प्राप्त
त्वरायुक्ताः प्रणता त्रिदशेश्वरं
आगतांश्च गणान्नंदी कृतांजलि
पुटोऽव्ययः। सर्वान्निवेदयामा
स शंकराय महात्मने। नन्द्युवाच
यानेतान्पश्यसि शम्भो त्रिनेत्रान्
जटिलान् शुचीन्। एते रुद्रा इ
ति ख्याताः कोट्य एकादशैव च
वानरास्यान् पश्यसि यान् शार्दू
ल समविक्रमान्। एते वैहार
पाला स्ते मन्नामानो यशोधनाः
षण्मुखान् पश्यसि यांश्च शा
क्तिपाणीन् शिखिध्वजान् षट्
च षष्ठिलक्षा कोट्यः स्कंदनाम्नः
कुमारकान्। एतावन्त्य सख्या को
ट्यः शाखा नाम षडाननाः। विशा

ग्रोस्तु वदेवोक्ता नैगमेयाश्च
शंकर। सप्तकोटि शताः शम्भो
रुमी वै प्रमथोत्तमाः। एकैके
प्रतिदेवेश तावन्तो ह्यपि मात
रः। भग्नारुणित देहाश्च त्रिने
त्राः शूलपाणयः। एते शैवाइ
ति प्रोक्ता स्तव भक्ता गणेश्व
राः। तथा पाशुपता श्चान्ये
भस्मप्रहरणा विभो। एते ग
णाः स्त्वसंख्याताः साहाय्यार्थं
समागताः। पिनाकधारिणो रौ
द्रागणाः कालमुखाः परे। तवभ
क्ताः समायाताः जटामण्डलि
नोद्भुताः खट्वांगयोधिनो वीरा
रक्तचर्मसमावृताः। इमे प्राप्ता
गणा योद्धुं महाव्रतिन उत्त
माः। दिग्वाससो मौनिनश्च घं
टाप्रहरणास्तथा। निराश्रया
नामगणाः समायाता जगद्गु
रो। शार्ङ्ग द्विनेत्राः पद्मास्ताः श्री
वत्सांकितवक्षसः। समायाताः
खगारूढा वृषभध्वजिनोऽव्य
याः। महापाशुपता नामचक्र
शूलधरास्तथा भैरवो विष्णुना
सार्द्धमभेदेनार्च्चितो हि यैः। इमे
मृगेन्द्रवदनाः शूलवाणधनुर्धराः
गणा स्त्वद्रोम सम्भूता वीरभद्र
पुरोगमाः। एते चान्ये च बहू
वः शतशोऽथ सहस्रशः। सा
हाय्यार्थं तवायाता यथाप्री
त्यादिशस्व तान्। ततोऽभ्येत्य गणाः
सर्वे प्रणेमु र्वृषकेतनं॥ इति
वामन पुराणे ६७ अध्यायः॥
अस्य लिंगपूजादि शिवलिंग
शब्दे द्रष्टव्यं॥
शिवः पुं मोक्षः॥ कीलकग्रहः
वालुकं। गुग्गुलुः॥ वेदः॥
पुण्डरीकद्रुमः। इति मेदिनी
कृष्णधुस्तूरः। पारदः। इति
राजनिर्घण्टः॥ देवः। इति
शब्दरत्नावली। लिंगः। इत्य
नादिकोषः। विष्कम्भादिसप्त
विंशतियोगान्तर्गतविंशतित
मयोगः। तत्र जातफलं। महा
शाम्भवः श्रुतिपारदृश्वा जितें
द्रिय श्चारुतनु र्महात्मा॥
शिवाभिधानः खलु योगराजः
प्रसूतिकालेयदि मानवानां॥
इति कोष्ठप्रदीपः॥
शिवकः पुं कीलकः इत्यमरः
हे खोटा इति ख्याते॥
गवां गात्रकण्डूनार्थं गोष्ठेति
खातस्तम्भे इति सुभूतिः॥
कण्डूयनार्थ काष्ठे इति केचित्

वन्धनखण्डे इति केचित्। य
त्र वध्वा गो ईयते इति केचित्
शिवति गात्रकण्डूं शिवः शोण
तूकरणे नाम्नीति शिवः स्वार्थे
कः शिवकस्तालव्यादिः। कीला
नेवध्यते ऽस्मिन् कीलः कील
बंधे घञ् स्वार्थे कः कीलकः
इति भरतः॥
शिवकरः पुं चतुर्विंशतिभूता
र्हदंतर्गतजिनविशेषः। इति
हेमचंद्रः मंगलकारकेत्रि॥
शिवकाञ्ची स्त्री पुरीविशेषः
यथा। शिवकाञ्ची विष्णुकां
ची काञ्चीयुग्मंच संमतं। एत
त्पृथिवीमध्येनगरंप्रतेकदा
चन। काशी शिवत्रिशूलस्था
काञ्ची हरिहरात्मिका। वामद
क्षिणहस्ताभ्यां धार्य्यं द्विजपुंग
वाः॥ इति भूतशुद्धितंत्रं॥
शिवकीर्त्तनः पुं भृंगरीटः॥
विष्णुः। इति मेदिनी शेषः।
इति शब्दरत्नावली॥
शिवगतिः पुं भूतार्हद्विशेषः
इति हेमचंद्रः॥
शिवचम्मजः पुं मंगलग्रहः। अ
स्य प्रमाणं मंगलशब्दे द्रष्टव्यं।
शिवंकरः त्रि मंगलकर्त्ता तत्
पर्य्यायः। क्षेमंकरः २ अरिष्टता
तिः ३ शिवतातिः ४ इति हे
मचंद्रः॥
शिवचतुर्द्दशी स्त्री चतुर्द्दशी
कर्त्तव्यशिवव्रतविशेषः। यथा
नंदिकेश्वर उवाच शृणुष्वावहि
तो ब्रह्मन् वक्ष्ये माहेश्वरंव्रतं
त्रिषु लोकेषु विख्याता नाम्ना
शिवचतुर्द्दशी। मार्गशीर्षे
त्रयोदश्यां सितायामेकभक्त
कं। प्रार्थयेद्देवदेवेशं त्वामहं
शरणंगतः॥ चतुर्द्दश्यां नि
राहारः सम्यगभ्यर्च्य शंकरं
सुवर्णं वृषभं दत्वा भोक्ष्या
मीति परे ह्यनि॥ एवं निय
मकृत् सुप्त्वा प्रातरुत्थाय
मानवः कृतस्नान जपः पश्चा
दुमया सह शंकरं। पूजयेत्क
मलैः शुक्लै र्गन्ध धूपानुलेप
नैः। पादौ नमः शिवायेति
शिरः सर्वात्मने नमः ललाटं
वामदेवाय नेत्राणि हरये नमः
मुखं त्रिनेत्रायेति श्रीकंठा
येति कंधरं। सद्योजाताय क
र्णौ तु वामदेवाय वै भुजौ। अ
घोरहृदयायेति हृदयञ्चापि
पूजयेत्। स्तनौ तत्पुरुषाये

ति तथेशायेति चोदरं ॥ पा
र्श्वे चानेनतत्पुरुषाय ज्ञानभूता
य वैकटिं ॥ ऊरू चानेन वैरा
ज सिंहायेति च पूजयेत् ॥
अनंतेश्वरथेनाघाय जानुनीचा
र्च्चयेद्बुधः ॥ प्रधानाय नमो जं
घे गुल्फौ व्योमात्मने नमः।
व्योमकेशात्मरूपाय पृष्ठ मर्च
येन्नरः ॥ नमः पुष्ट्यै नमस्तु
ष्ट्यै पार्वतीश्चापि पूजयेत्तत
स्तु वृषभं हैम शुद्धकुंभेसमन्वि
ते। शुक्लमाल्याम्बरयुतं पंचर
त्नपरिष्कृतं। भक्ष्यै नानाविधैर्यु
क्तं ब्राह्मणाय निवेदयेत्। प्री
यतां देवदेवोऽत्र सद्योजातःपि
नाकधृक्. तत्रस्तु विप्रानन्नेनत
र्पयेच्छक्तितः शुभान्। एषदा
ज्यत्रं सम्प्राप्य स्वपेद्भूमावुदङ्मु
खः। पंचदश्यां ततः पूज्य वि
प्रान् भुंजीतवाग्यतः ॥ तद्वत्
कृष्णचतुर्दश्या मेतत् सर्वं समा
चरेत्। चतुर्दशीषु सर्वासु कुर्य्या
त्पूर्ववच्चैवं। ये तु मासविशेषाः
स्युः स्ताविबोध क्रमादिह। मा
र्गशीर्षादिमासेषु स्व वमेतदु
दीरयेत्। शंकराय नमस्तुभ्यं न
मस्ते करवीरके। त्र्यंबकाय न

मस्तेऽस्तु महेश्वर नमः परं ॥
नमस्तेस्तु महादेव स्थाणवेच
ततःपरं। नमःपशुपतेनाथ नम
स्ते शम्भवे पुनः ॥ नमस्ते परमा
नंद नमः सोमार्द्धधारिणे। न
मो भीमाय उग्राय त्वामहं शर
णंगतः। गोमूत्रं गोमयं क्षी
रं दधि सर्पिः कुशोदकं। पंच
गव्यं तथा बिल्वं यवान् गो
शृंगवारि च। तिलांश्च कृष्णान्
विधिवत् प्राशने क्रमशः स्मृतं
प्रतिमासं चतुर्दश्यां वेकैकं प्रा
शनं स्मृतं। मंदारै र्मालतीभि
श्च तथा धत्तूरकैरपि। सिं
धुवारै रशोकैश्च मल्लिकाभि
श्च पाटलैः। अर्कपुष्पकदंबै
श्च शतपत्रै स्तथोत्पलैः। एकै
केन चतुर्दश्यां मर्च्चयेत्पार्व
तीपतिं ॥ पुनश्च कार्त्तिके मा
सि संप्राप्ते तर्पयेत् द्विजान्।
शतैर्नानाविधै भक्ष्यै वस्त्रमा
ल्य विभूषणैः। कृत्वा नील
वृषोत्सर्गं श्रुत्युक्त विधिनान
रः। उमा महेश्वरं हैमं वृषभंच
गवा सह। मुक्ताफलाष्टकयुतं
सितनेत्रसमावृतं। सर्वोपस्क
रसंयुक्तायां शय्यायामुदकुम्भयोः

ताम्रपात्रोपरि पुनः शालितण्डुल
संयुतं स्थाप्य विप्राय शांताय
वेदव्रतपराय च। ज्येष्ठ सामवि
दे देयं नवकव्रतिने क्वचित्।
गुणज्ञे श्रोत्रिये दद्यादाचार्ये
तत्ववेदिनि अव्यंगांगाय सौ
म्याय सदा कल्याणकारिणि
सपत्नीकाय संपूज्य माल्य व
स्त्रविभूषणैः। गुरौ सति गुरो
र्देयं तदभावे द्विजातये। न वि
त्तशाठ्यं कुर्वीत कुर्वन् मोहा
त् पतत्यधः। अनेन विधिना
यस्तु कुर्य्यात् शिवचतुर्दशीं
सोऽश्वमेध सहस्रस्य फलमा
प्नोति मानवः। ब्रह्महत्यादिकं
किंचिद्यदत्रामुत्र वा कृतं। पितृ
भिर्भ्रातृभिश्चैव तत्सर्वं नाशमा
प्नुयात्। दीर्घायु रारोग्य कुला
भिवृद्धि रत्राक्षयामुत्र चतुर्भुज
त्वं। गणाधिपत्यं दिवि कल्प
कोटिशतं वसित्वा पदमेतिशं
भोः। न बृहस्पति रप्यनंतमस्याः
फल मिन्द्रो न पितामहोपिव
क्तुं। न च सिद्धगणोप्यलं न
चाहं यदि जिह्वायुतकोटयो
पि वक्त्रे। भवत्यमरवल्लभः पठ
तियः स्मरेद्वा सदा शृणोति च

विमत्सरः सकल पाप विध्वंसि
नी। इमां शिवचतुर्दशीं मम
रकामिनी कोटयः स्तुवंति त
मनंदिते किमु समाचरेद्यः सदा
या वाथ नारी कुरुते हि भक्त्या
भर्तार मापृच्छ्य व्रतं। गुरुंवा
सापि प्रसादात् परमेश्वरस्य
परंपदं याति पिनाकपाणेः
इति मात्स्ये शिव चतुर्दशी
व्रते ८० अध्यायः ॥ फाल्गु
नी कृष्ण चतुर्दशी। तत्राशि
वव्रतं कर्तव्यं। तस्य विवर
णं शिवरात्रिशब्दे द्रष्टव्यं ॥
शिवज्ञा स्त्री शिवोपासिका
मंगलज्ञाती। शिवं जानाति
या इत्यर्थेउ प्रत्ययनिष्पन्ना ॥
शिवज्ञाने क्लीं शुभाशुभका
ले बोधकशास्त्रे। यदा यात्रा
दिक्रिया अवश्य कर्तव्या ज्यो
तिः शास्त्रोक्त शुभलग्न प्राप्ति
श्च नभवति तदा शिवज्ञानोक्त
शुभसमये कर्म कर्तुमुचितं
भवति तच्छिवज्ञानोक्त मार्गं
रुपोगे होत यात्रादि ज्ञेयं अस्य
तयोगे कार्यसिद्धिं वक्ते का
र्य्यनाशे शून्ये मृत्युं अपमानं
वा प्राप्नोति ॥ दिवा रात्रौ ॥

माघ फाल्गुन चैत्र वैशाख श्रावण भाद्रेषु एते योगा एकरूपाः आश्विन कार्तिक अग्रहायन पौषेषु एकप्रकाराः ज्येष्ठाषाढयो रेकरूपा भवंति ॥

माघ फाल्गुन चैत्र वैशाख श्रावण भाद्रेषु

दिवा दण्डा यथा।

रविवारे मा २ अ ८ मू ८ मा २ व १०।
सोमवारे अ ४ व ८ अ ६ व ६ मा ४ मू २।
मंगलवारे व ४ मू २ अ ६ व ४ मू २ अ ४ मू २ अ ४ मू २।
बुधवारे अ ४ व ६ अ ४ मू २ व ४ मा ४ अ ४ मू २।
गुरुवारे मा ४ मू २ व ६ मा ६ मू ४ व ४ मू ४।
शुक्रवारे अ २ व २ अ ६ व ६ अ ६ मू ४ अ ४।
शनिवारे मू ४ व ४ मू २ अ ८ मू ४ व ४ मू ४

तेषु रात्रि दण्डा यथा।

रविवारे मू २ मा २ अ ४ व ८ मा ८ मू ६।
सोमवारे व २ अ ६ व ६ अ ८ मू ८।
मंगलवारे अ २ व ४ मू २ अ ६ व ६ अ ४ व ४ मू २।
बुधवारे मू २ अ ६ मा ४ व ४ मू ४ अ १०।
गुरुवारे व ४ मू ४ व ४ अ २ मू ६।
शुक्रवारे व ४ अ ४ मू ४ मा २ व ६ मू ४ अ २ मा २ मू २
शनिवारे मू २ व ४ अ ६ व ४ अ ४ व २ अ ४ मू ४।

आश्विन कार्तिक अग्रहायण पौषेषु

दिवा दण्डा यथा।

रविवारे मू २ अ ६ व ८ अ ८ मू २ मा २ मू २।
सोमवारे अ ४ मू ४ अ ६ व १६।
मंगलवारे अ २ व २ अ १० व ६ मू ६ व ४।
बुधवारे अ २ मा २ अ २ व ६ अ ६ मू २ मा ६ व ४।
गुरुवारे अ ४ व ४ मू ४ व ६ मू २ अ ४ व ६।

शुक्रवारे अ २ व २ अ ६ व ६ मू २ अ ८ अ ४।
शनिवारे अ २ व २ अ ६ व ६ अ ८ मू २ अ ४।

तेषु रात्रि दण्डा यथा।

रविवारे मू २ व ४ अ ४ व ६ अ ४ मू २ अ ८।
सोमवारे व ६ अ ८ व ८ अ २ व ६।
मंगलवारे मा ६ अ २ मू २ अ ६ व ४ मा ४ मू २ अ ४।
बुधवारे व २ अ २ व ४ अ १६ व २ मू ४।
गुरुवारे मू २ अ ८ व ६ अ ८ मू २ अ ४।
शुक्रवारे व २ अ ८ व ६ अ ८ मू २ अ ४।
शनिवारे व १४ मू ४ व ४ अ २ मू ६।

ज्येष्ठाषाढयो

दिवा दण्डा यथा।

रविवारे मू ४ अ ६ व ६ अ ६ व ४ मा २ मू २।
सोमवारे व ८ अ ४ मू ६ व ८ मू २।
मंगलवारे अ ६ मू ४ अ ६ व ६ मा २ अ २ मा २ मू २।
बुधवारे मू २ व ४ अ ८ व ६ अ ८ मू २।
गुरुवारे मा २ मू २ व ६ मा ४ मू ४ व ६ अ ६।
शुक्रवारे मू २ मा २ व ६ मा २ मू ४ अ ६ व ४ मू ४।
शनिवारे मा २ मू २ व ६ मा ६ मू ४ व ४ अ ६।

तेषु रात्रि दण्डा यथा।

रविवारे अ ४ मू ४ व ४ अ ६ व ८ मू ४।
सोमवारे व ८ अ ८ मू ४ अ ४ मू २ मा २ मू २।
मंगलवारे अ २ व ४ मा ४ मू ४ व २ अ ६ मू २ व ६।
बुधवारे अ १० मू २ व ४ अ ४ मू १०।
गुरुवारे मू २ अ ६ मा २ व ४ मू २ अ ६ मू ४ अ ४।
शुक्रवारे अ ६ मू २ व ४ मू ६ अ ६ मू २ अ ४।
शनिवारे मू २ अ २ व ८ मू २ अ ६ मू ४ अ ६।

मतान्तरे अस्य प्रमाणं यथा दत्ते द्व्यमात्रञ्च ॥
माहेन्द्रे विजयो नित्यं अमृते·
कार्य्यशोभने । वज्रेकार्य्यविले
वः स्यात्कुत्त्वेचमरणंध्रुवे । वै
शाखादि श्रावणान्ते पक्षभावे
न संवहेत् । अमृतादि दिवारा
त्रौ चतुर्मासे यथाक्रमे ॥ या
मभाने दिवामाने ज्ञेयं सर्वत्र
मासके । तत् प्रमाणेनज्ञा
तव्यं दण्डमाने विचक्षणैः ॥
रात्रिमानप्रमाणेन ज्ञेयो दण्ड
प्रमाणकः । नवार तिथि नक्षत्रं
नयोग करणं तथा । शिवज्ञा
नेसमासाद्य सर्वं शुभि विंचा
रयेत् । तथा भाद्रादि मार्गान्प
र्य्यन्तं समवारे समादिशेत् ॥
शून्यवक्रादियोगं हि पौषादि
चैत्रत स्तथा । इति ज्योतिषेशि
वज्ञाने ॥ अनेक-प्रकारं शि
वज्ञानं शिवाज्ञा शिवालि·
खितं अमृतचटीच दृष्टं किंतु
परस्पर मनैक्यं ज्ञातं ॥
शिवतातिः स्त्री कल्याणकारि
णी । इति हेमचन्द्रः । अस्यपर्य्या
यः । शिवंकरशब्दे द्रष्टव्यः ।
शिवदन्नं क्ली विश्वचक्रं । इति
केचित् । शिवेन शिवाय वा

शिवदारु क्ली देवदारुवृक्षः ॥
इति राजनिर्घण्टः ॥
शिवदूतिका स्त्री मातृकावि
शेषः । इति शब्दरत्नावली ॥
शिवदूती स्त्री दुर्गा इति त्रिका
ण्डशेषः । योगिनीविशेषः ।
यथा । ब्रह्माणी प्रथमा प्रोक्ता
ततो माहेश्वरी परा । कौमारी
वैष्णवी चैव वाराहीपंचमीत
था ॥ नारसिंही तथैवैन्द्री शि
वदूती तथाष्टमी । एताः प्र
ज्ञा महाभागा योगिनीः का
मदायिनीः । तस्या उत्पत्तिमत्र
ध्यानादि यथा कौशिकाख्य
दयाद्देवी निःसृता ध्यानतोऽह
वेः । शिवदूतीति विख्याता
शिवाशतसमंहृता ॥ मंत्रं म
स्याः प्रवक्ष्यामि धर्मकामार्थदा
यकं यत् कृत्वा साधको याति
दुर्लभं शिवमंदिरं । येनाराध्य म
हादेवी शिवदूती शिवात्मिका
नचिरालभते कामान्नरः सर्वं ज
यी भवेत् । अंतः समाप्ति सहि
तो विद्विन्दुभ्यां दशाक्षरा ॥
सर्वेण पार्श्व दक्षेन संसृष्टेः
न्तेन पर्वशः । स एव विन्दु

गल एवंस्थापयेत्स पावकः ।
षष्ठस्वर कलामूर्द्धः संहितः
प्रथमेरितः । मंत्रो ऽयं शिवद
त्याख्य शिवदूती जयप्रदः । दू
पमस्याः प्रवक्ष्यामि शृणु वत्स
कसंमते । चतुर्भुजे महाकाये
सिंहस्कन्धशुद्ध्युतिं । रक्तदंतेषु
मालां जटाजूटार्द्धचंद्रकं
नागकुंडल हाराभ्यां शोभिते
नखरोज्वले । व्याघ्रचर्मपरी
धाने दक्षिणे शूल चक्रष्टक
वामे पाशं तथाचर्म विभ्रहं
परिक्रमात् । स्थूलवक्रांच पीनो
द्दं तेजस्विनं भयंकरं । निति
म्बदक्षिणपादे संतिष्ठेत् कुण
पोपरि । वामपादं शृगालस्य
पृष्ठे फेरुशतैर्वृते । ईदृशं शि
वदूत्यास्तु मूर्तिं ध्यायेद्धि भक्त
ये । ध्यानमात्राद्देवेतस्या नरःक
ल्याण माप्नुयात् । पूजानात्
चिरादेवी सर्वान्कामान्ददातिच
यः शिवा विरुते कृत्वा शिवद
ती शिवप्रदा । प्रणमेत् साध
को भक्त्या तस्य कामाः करे·
स्थिताः । यदा जयानजन्ता र
क्तवीजे हिताय वै । महादेवीम
हामाया तदास्याः कायतःसृता

इतंप्रस्थापयामास शिवं शुभा
यसांविका । तेनसा शिवदूती
तिदेवैः सर्वैः प्रगीयते । हेमक
ची च शान्ताच वेदमाता महो
दरी । कराला कामदा देवी भ
गास्या भगमालिनी । भगोदरी
भगाहारा भगाजिह्वा भगा त
था । एता द्वादश योगिन्यः प्र
ज्ञने परिकीर्तिताः । एता द्वाद
शयोगिन्यः शिवदूत्याः सदैवहि
विचरंति स्वयं देवी यत्र यत्रै
वगच्छति ॥ इति कालिका
पुराणे उत्तरतंत्रे ८· अध्यायः
प्रमाणान्तरं वामने ५३ अ
ध्यायमार्कंडेयपुराणे देवी
माहात्म्ये रक्तवीजवधाध्याये
चद्रष्टव्यं ॥
शिवद्रुमः पुं बिल्ववृक्षः । इति
राजनिर्घण्टः ॥
शिवद्विष्टा स्त्री केतकी । इति
राजनिर्घण्टः ॥
शिवधातुः पुं पारदं । पारदं
शिवबीजं स्यादिति दर्शनात्
गोदन्तमणिः । इति केचित् ॥
शिवनाभिः पुं शिवलिंगविशे
षः । यथा । उत्तमं मध्यमं कनि
ष्ठं लिंग मीरितं । चतुरंगुल

मुक्तये रम्यवेदिक मुत्तमं ॥
उत्तमं लिंग माख्यातं मुनिभिः
शास्त्रकोविदैः। तदर्द्धं मध्यमं प्रो
क्तं तदर्द्धं मधमं स्मृतं ॥ शि
वनाभिमयं लिंगं प्रतिपूज्य म
हर्षिभिः। श्रेष्ठन्तु सर्वलिंगे
भ्य स्तस्मात् पूज्यं विधानतः
इति वीरमित्रोदयः ॥
शिवपुरी स्त्री काशी। इति हे
मचन्द्रः ॥
शिवप्रियं क्ली रुद्राक्षे। इति रा
जनिर्घण्टः। शिवस्य प्रियद्र
व्ये त्रि ॥
शिवप्रियः पुं बकवृक्षः। इति
जटाधरः। स्फटिकः। धुस्तूरः
इति राजनिर्घण्टः ॥
शिवप्रिया स्त्री दुर्गा। इति श
ब्दमाला ॥
शिवमल्लकः पुं अर्ज्जनवृक्षः
इति राजनिर्घण्टः ॥
शिवमल्लिका स्त्री वकः। इति
राजनिर्घण्टः ॥
शिवमल्ली स्त्री वकवृक्षः। इत्य
मरः ॥
शिवरसः पुं महात्पर्य्युषितर
सः। तत्पर्य्यायः। अन्नोदकजः
२। अस्य गुणाः। दीपनत्वं।
मधुरत्वं। अम्लत्वं। अरुग्दाह
दत्वं। लघुतर्पणत्वञ्च। इति
राजनिर्घण्टः ॥
शिवरात्रिः स्त्री शिवचतुर्द्दशी
यथा कालमाधवीये स्कान्दे
नागरखण्डे। माघमासस्य शे
षेया प्रथमे फाल्गुनस्य च। कृ
ष्णाचतुर्द्दशी सा तु शिवरात्रिः
प्रकीर्त्तिता। अथैकस्या स्तिथेर्म्मा
घीयत्व फाल्गुनीयत्वे मुख्य गौ
णावृत्तिभ्यां अविरुद्धे। ततस्त
माघानन्तरा चतुर्द्दशी शिवरा
त्रिः तस्या मुपवासः प्रधानं।
तत्स्नानेन न वस्त्रेण न धूपेन न
चार्च्चया। तुष्यामि न तथा पु
ष्पैर्यथा तत्रोपवासतः। इति
शंकरोक्तेः ॥ स्कान्दे। ततो
रात्रौ प्रकर्त्तव्यं शिवप्रीणनत
त्परैः। प्रहरे प्रहरे स्नानं पू
जाञ्चैव विशेषतः ॥ अत्र
वीप्सया प्रहरचतुष्टयसाध्यं
व्रतं प्रतीयते। नरसिंहाचार्य्य
धृतेश्वर संहितायां। शैवोवा
वैष्णवो वापि यो वा स्यात्
न्यपूजकः। सर्वं पूजा फलं
हन्ति शिवरात्रि बहिर्म्मुखः ॥
सम्वत्सरप्रदीपे। दुग्धेन प्रथ

मं स्नानं दध्ना चैव द्वितीयके
तृतीये च तथा ज्येन चतुर्थे म
धुनातथा। ईशान संहितायां।
माघे कृष्णचतुर्द्दश्यां रविवारो
यदाभवेत्। भौमो वापि भवेद्दे
वि कर्त्तव्यं व्रतमुत्तमं। शिव
योगस्य योगेन तद्भवेदुत्तमो
त्तमं। शिवरात्रिव्रतंनाम सर्व
पाप प्रणाशनं। आचाण्डालम
नुष्याणां भुक्ति मुक्ति प्रदायकं
नागरखण्डे। उपवासप्रभावेन
वलादपि च जागरात्। शिवरा
त्रेस्तथातस्य लिंगस्यापि प्रपूज
या। अक्षयान् लभते लोकान्
शिवसायुज्य माप्नुयात्। पाद्मे
वर्षे वर्षे महादेवि नरो नारी
पतिव्रता। शिवरात्रौ महादेवं
कामंभक्त्या प्रपूजयेत्। ईशा
नसंहितायां। एव मेव व्रतं कु
र्य्यात् प्रति संवत्सरं। व्रती। द्वा
दशाब्दिक मेतद्धि चतुर्विंशा
ब्दिकं तथा। सर्वान् कामानवा
प्नोति प्रेत्य चेह च मानवः ॥
हेमाद्रिधृता स्मृतिः। प्रदोष
व्यापिनी ग्राह्या शिवरात्रि च
तुर्द्दशी। प्रदोष माह वत्सः। प्र
दोषो ऽस्तमयादूर्द्धं घटिकाद्वय
मिष्यते ऊर्द्धं मनन्तरं। वायुपुरा
णे। त्रयोदश्यस्तगे सूर्य्ये च
तसृष्वपि नाडिषु। भूतविद्धा
तुया तत्र शिवरात्रिव्रतं चरेत्
ईशानसंहितायां। माघे कृष्ण
चतुर्द्दश्यां मादिदेवो महानिशि
शिवलिंगतयोद्भूतः कोटिसूर्य्य
समप्रभः। तत्काल व्यापिनी
ग्राह्या शिवरात्रि व्रते तिथिः
अर्द्धरात्रादध श्चोर्द्धं युक्ता यत्र
चतुर्द्दशी। व्याप्ता साहश्यते य
स्यां तस्यां कुर्य्याद्व्रतं नरः।
अत्र महानिशा द्वे घटिके रात्रे
र्मध्यम यामयोः। इति देवलो
क्ता महानिशा ग्राह्या। घटिका
एकदेशः। परन्तु यद्दिने प्रदोष
निशीथोभयव्यापिनी चतुर्द्दशी
तद्दिने व्रतं उभय व्याप्त्यनुरोधा
त्। कालमाधवीयेऽप्येवं। यत्ते
न परदिने उभयव्यापित्वेपि पू
र्वदिवसीय रात्रि द्वितीयाम
प्रभृति चतुर्द्दशी सत्वे वहुप्रह
रव्यापित्वेन पूर्वदिन एव व्रत
मितिनिरस्तं। यदा तु पूर्वेद्यु र्नि
शीथमात्र व्याप्तिः परेद्युः प्रदो
षमात्रव्याप्ति स्तदा पूर्वेद्यु र्व्रतं
प्रधान कालव्याप्त्यनुरोधात्। पू

वेंषु रुपरेषु वा महानिशिचतु
र्दशी। व्याप्ता सा दृश्यते यस्यां
तस्यां कुर्य्याद्व्रतं नरः। इतिई
शानसंहिता वचनाच्च। एत
द्विषय एव भविष्यपुराणं। अ
र्द्धरात्रात् पुरस्तात्तु जयायोगो
भवेद्यदि। पूर्वविद्धैव कर्तव्या
शिवरात्रिः शिवप्रियैः। विलुप
र्मैन्नात्रे। जयंती शिवरात्रिश्चका
र्य्या भद्रजयान्विते। कृत्वोपवासं
तिथ्यंते तदा कुर्य्याच्च पारणं। ति
थ्यंते पारणं जयंती मात्रपरं प्र
वे चतुर्दश्यामेव तत्। ब्रह्मा
एडोदर मध्ये तु यानि तीर्थानि
सन्ति वै। पूजितानि भवंती
ह भूतायां पारणे कृते। इति
स्कान्दात्। दिनमान प्रमाणेन
यातु रात्रौ चतुर्दशी शिवरात्रि
स्तु सा ज्ञेया चतुर्दश्यांतु पार
णं। इति गौतमीयाच्च। यदा तु
पूर्वदिने न निशीथव्याप्तिः पर
दिने प्रदोष मात्र व्यापिनी तदा
परैवग्राह्या। प्रदोषव्यापिनी ति ग्रा
ह्यत्वात् तिथि स्त्रिसंध्य व्यापि
त्वाच्च। एतद्विषय एव लिंगपुरा
णं। शिवरात्रिव्रते भूतं कामवि
द्धं विवर्जयेत्। यत्केनैवो ॥

पवासेन ब्रह्महत्यां व्यपोहति
ग्रहणमावास्याया मेव पारणं
शिवा चोरा तथा प्रेता सावि
त्रीच चतुर्दशी। कुरुयुक्तैव क
र्तव्या कुर्याद्वा मेवहि पारणं। इति
वचनात्। तदयं संक्षेपः यद्दिने
प्रदोष निशीथोभयव्यापिनी
चतुर्दशी तद्दिने व्रतं। यदा
तु पूर्वेद्यु निशीथ व्यापिनी
परेद्युः प्रदोष मात्र व्यापिनी
तदा पूर्वेद्यु र्व्रतं। यदा तु न
पूर्वेद्यु निंशीथव्याप्तिः परेद्युः
प्रदोष व्यापिनी तदा परदिने
पारणान्तु परदिने चतुर्दशी
लाभे चतुर्दश्यां तदलाभे अ
मावस्यायां। तत्रप्रयोगः। आ
दत्युक्तमुखःतत् संदिग्धस्वाध्य
सूर्यः सोम इति पठित्वा जला
दीन्यादाय संकल्पयेत्। मंत्रेण
नेनशृङ्गीयानियमं भक्ति मा
न्नरः। शिवरात्रिव्रते ह्येतत् क
रिष्ये हं महाफले। निर्विघ्नम
स्तुमेचात्र त्वत् प्रसादाज्जगत्
पते। इति शिवरहस्यात् शिवरा
त्रि इत्यादिना निषम्य। चतुर्द
श्यां निराहारोभूत्वा शंभोपरेह
नि। भोक्ष्येहं भुक्तिमुक्त्यर्थं शरणं

मेभवेश्वर॥ इति गरुडपुरा
णीयं पठेत्। रात्रौ प्रथम
प्रहरे प्रतिष्ठिते लिंगे अप्रति
ष्ठिते वा प्रतिष्ठां विधाय पूजां
कुर्य्यात्। ह्रौं अस्त्राय फडिति
पादघातत्रयेण विघ्नान्निःसा
र्य तेनैव तालत्रयेण करच्छो
टिकया च दशादिग्बंधनं कृ
त्वा भूतशुद्धिं विधाय ह्रां हृदया
य नम इत्यादिना षडंगानि न्यस्य
ह्रौं इति मंत्रेण प्राणायामं
विधाय पूजयेत्। पार्थिवलिंगे
चेत्तदा वक्ष्यमाण पूजाविधि
ना पूजयेत्। तत्रायं विशेषः ह्रौं
ईशानाय नम इति प्रथमप्रह
रे दुग्धेन स्नापयित्वा पुनर्जलेन
स्नापयित्वा। शिवरात्रिव्रतं देव
पूजाजप परायणः। करोमिवि
धिवद्दत्तं गृहाणार्घ्यं महेश्वर
इत्यनेनार्घ्यं दत्वागंधादिभिः सं
पूज्य मूलमंत्रं जपित्वा प्रणम्य
गीतनृत्यादिभि स्तं प्रहरं नयेत्
तद्ध्याने तज्जपः स्नाने तत् क
थाश्रवणादिकं। उपवासकृतो
ह्येते गुणाः प्रोक्ता मनीषिभिः
इति देवीपुराणे सामान्यतः
श्रवणात् अत्रापि तथा॥

द्वितीयप्रहरे तु विशेषः। ह्रौं
अघोराय नम इति दध्ना स्ना
नं अर्घ्यमंत्रस्तु। नमः शिवाय
शांताय सर्वपापहरायच। शि
वरात्रौ ददाम्यर्घ्यं प्रसीद उमया
सह। तृतीयप्रहरे तु। ह्रौं वाम
देवाय नम इति घृतेन स्ना
नं अर्घ्यमंत्रस्तु। दुःखदारिद्र्य
शोकेन दग्धोहं पार्वतीश्वर
शिवरात्रौ ददाम्यर्घ्यमुमाकां
त गृहाण मे। चतुर्थप्रहरे तु
ह्रौं सद्योजाताय नम इति म
धुना स्नानं। अर्घ्यमंत्रस्तु। म
या कृतान्यनेकानि पापानि हृ
र शंकर। शिवरात्रौ ददाम्यर्घ्यं
उमाकांत गृहाण मे। ततो नमः
शिवाय इति मूलमंत्रं जपित्वा
प्रभाते। विघ्नेन इत्यादि वक्ष्य
माणमंत्रान् पठेत्। तथाच ग
रुडपुराणे मूलमंत्रं ततो जप्त्वा
प्रभाते तत्समापयेत्। अविघ्ने
न व्रतं देव त्वत्प्रसादात् समर्पि
तं। क्षमस्व जगतां नाथ त्रैलो
क्याधिपते हर। यन्मयाद्य कृतं
पुण्यं तद्रुद्रस्य निवेदितं। त्वत्
प्रसादान्मया देव व्रत मद्य स
मर्पितं। प्रसन्नो भव मे श्रीमन्

मङ्गतिं प्रतिपद्यते । तदालोक
नमारेण पवित्रोस्मि नसंशयः ।
परदिने ब्राह्मणान् भोजयि
त्वा चतुर्दशीलाभे तत्र तद्ला
भे अमावस्यायां पारणंकुर्य्यात्
तत्र मंत्रः । संसार क्लेशदग्धस्य
व्रतेनानेन शंकर प्रसीद सुमु
खो नाथ ज्ञानदृष्टिप्रदो भव ।
तत्र पार्थिव शिव लिंगपूजा
विधिः । तत्र शिववाक्यं स्कां
दे । विप्रस्य तु सदैवाहं शूद्रे
ष्वप्युच्चेष्वपि । गृह्णन् बलिं प्र
त्यक्षामि विप्राणामिव दर्शी
नात् ॥ बलिं पूजांतथा ॥
शूद्रः कर्म्माणि यो नित्यानी
यानि कुरुते प्रिये । तस्याहं
मन्त्रो गृह्णामि चंद्रखंडविभू
षिते । तथा नमोन्तेन शिवे
नैव स्त्रीणां पूजा विधीयते ।
पञ्चाक्षरेण प्रणव निवृत्तिः प
दम्पूरस्यापि । तथा नृसिंहताप
नीये सावित्रीं प्रणवं यजुर्ल
क्ष्मीं स्त्री शूद्रयो नेच्छन्ति ॥
सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्री
शूद्रो यदि जानीयात् समृतोः
धो गच्छति । नेच्छंतिपरंचैतं ·
पराशरश्चाप्येष लिखितं ।

गोविंदभट्टश्चैतं । स्वाहा प्रणव
संयुक्तं शूद्रे मंत्रं ददद्द्विजः ।
शूद्रो निरयमाप्नोति ब्राह्म
णः शूद्रतामियात् । गौतमः
रात्रावुदङ्मुखः कुर्य्यात् दैवका
र्य्यं सदैव हि । शिवार्चनं सदाप्य
वं शुचिः कुर्य्यादुदङ्मुखः ।
सदादिवारात्रौ । अत्र हेतु माह
रुद्रयामले न प्राचीमग्रतः श
म्भोर्नोदीचीं शक्ति संस्थितां ।
नप्रतीचीं यतः पृष्ठ मतो दक्षं
समाश्रयेत् । यजमानः शंभोः
प्राची मवस्थितयेन समाश्र
येत् शम्भो जगत्संहारकस्या
ग्रतः संमुख्यात् । पंचवक्त्रपक्षे
प्रधाने वक्त्रे प्राच्यवस्थिते । एक
वक्त्रपक्षे सुतरां तथा । तदुप
माह भविष्यपुराणे । सोमंमो
लीकृत मस्ते एकवक्त्रे चतु
र्भुजे । शिवरूपे गृहे कुर्य्यात्
प्रासादे वाप्यनिंदिते ॥ अत्रा
ग्रे पूजा विधेयात् देवाग्रे
स्वस्य चाप्यग्रे प्राची प्रोक्ता
गुरुक्रमैः इत्यस्य नविषयः
किंत्वभिधानादि प्रसिद्धा प्रा
चीग्राह्या एतदनुसाराद्धसमा
णां एवाग्रेग्यत्पूजा । अतएव

तेत्रांतरं । यत्रैव भानुरुदिय
त्युदेति प्राचीति तां वेदविदो
वदंति । तथा श्रुतः पूजकस्य
ज्यायोऽग्र सदागमज्ञाः प्रवदं
ति तांत ॥ एवंच देवतांतरपू
जा एवांके प्राङ्मुखेन सायंप
श्चिमाभिमुखेन रात्रावुदङ्मुखेन
न कार्य्या । प्राक् पश्चिमोदङ्मु
खस्तु प्रातः सायं निशासु च
इति वचनात् । इति वाचस्पति
मिश्राः । सैवं पूजा रत्नाकरेऽपि
भविष्यपुराणीय समाचार स
र्व्वमेवमस्ताव एव प्रागादिदि
ङ् नियमाभिधानात् । शाखहारो
पि अत्र ननश्यति । लिंगपुराणे
विना भस्म त्रिपुण्ड्रेण विनाक्षरु
क्षमालया । पूजितोपि महादेवो
नस्यात्तस्य फलप्रदः । तस्मात्मृ
दापि कर्तव्यं ललाटेपित्रिपुण्ड्र
कं । नंदिपुराणे । आयुष्मान्बल
वान् श्रीमान् पुत्रवान् धनवान्
सुखी । वरमिष्टं लभेल्लिंगं पार्थि
वं यः समर्चयेत् । तस्मात्पा
र्थिवलिंगं ज्ञेयं सर्वार्थसाध
कं । भविष्ये । मृद्भस्म गोशकृ
त्पिंडं ताम्रकांस्यमयं तथा
कृत्वा लिंगं सकृत्पूज्य वसेत्क ।

ल्पायुतं दिवि ॥ वार्क्षे विन्ध्यप्र
दे लिंगं स्फाटिके सर्वकाम
दं । नर्म्मदा गिरिजे श्रेष्ठ मन्यद
पिहिलिंगवत् । लिंगवत् लिं
गाकारं कालकोमुद्यां । अहा
दल्प परिमाणे न लिंगं कुर्वा चि
मेरः । कुर्वीतांगुष्ठतो न्यूनं न
कदाचित् समाचरेत् । अङ्गो
ष्ठीति रत्निका । अंगुष्ठतः कृत्त
सर्वत्रैषितः । अंगुष्ठांगुलिमा
नेन यत्र यत्रोपदिश्यते । तत्र त
त्रबृहत्पर्व ग्रंथिभि र्मिनुयात्स
दा । इति छंदोगपरिशिष्टात्
शिवधर्मे । सहस्र मर्च्चयेल्लिं
गं नित्यं स नगच्छति । रुद्र
लोकं सदा मानिर्भुक्ता भोगा
ननुत्तमान् । तथा बालकान्नि
लिंगानि सहस्राणि च कारये
त् । सहस्र मर्च्चनात्सोपि लभते
वाञ्छितं फलं । तत्स्थाशुकति
षा [illegible] भागुक लाभकामः स
हस्तमितपार्थिवशिवलिंगप
ञ्जनमिति यथास्थाने वक्ष्य
ते । ब्रह्मपुराणे । यावज्जीव
ते चांत्रे भास्कराय निवेदितं
तावत् पूजयेद्दिसं शंकरं वा
महेश्वरी । राघवभट्टश्चैतं सर्व

ष्ठे प्रशस्तोऽङ्गः शिव सूर्य्यार्च्च
ने विना अङ्गःऽऽशांखः। अग्निपुरा
णे। तल्लिङ्गेः पूजयेन्मन्त्रैः सर्वदे
वान्पृथक्पृथक्। ध्यात्वा प्रणव
पूर्वन्तु तन्नाम्ना सुसमाहितः॥
नमस्कारेण मंत्रेण पुष्पाणि वि
न्यसेत्पृथक्॥ देवीपुराणे। महा
हरण संचद्द प्रतिष्ठाक्रान मेव
च स्नपने पूजनेश्चैव विसर्ज्जन
मतःपरं। हरो महेश्वरश्चैव शू
लपाणिः पिनाकधृक्। पशुपतिः
शिवश्चैव महादेव इति क्रमात्
अत्र एकोक्त सप्तकर्म्माणि यद्व
चनोक्तसप्तनामभिः क्रियानुक्र
प्रविभक्तिमद्भिः यथायथं का
र्य्याणि अत्रषष्ठ्यर्थयो र्यथाक्रमा
सम्भवेन पाठक्रमादेवा आवाह
नात् प्राक्प्रतिष्ठा आदौ कृता
सन स्नानवत्॥ तत्रानुष्ठाने। ह
राय नम इति मृदाहरणं महेश्व
राय नम इति संघट्टने शूलपाणे
ईह सुप्रतिष्ठितो भव इति प्रति
ष्ठा। पशुपतिरित्यादिना ध्या
त्वा पिनाकधृक् ईहागच्छ इत्या
वाहने पशुपतये नम इति स्न
पनं पशुपतये नमः शिवाय नम
प्रणमर्च्यादिक्रमपूजयेत्। विसर्ज्ज

नात् एतं भविष्यपुराणोक्तं शुभा
वसिष्ठ प्राच्येशान्यादि दिक्षु वासा
वर्त्तेन पूजनं। यथा। सर्वाय क्षि
ति मूर्त्तये नमः। रुद्राय अग्निमूर्त्त
ये नमः। उग्राय वायुमूर्त्तये नमः
भीमाय आकाशमूर्त्तये नमः प
शुपतये यजमानमूर्त्तये नमः।
महादेवाय सोममूर्त्तये नमः। ई
शानाय सूर्य्यमूर्त्तये नमः। मूर्त्त
यो ह्यष्टौ शिवस्यैताः पूर्वादि क्रमयो
गतः। अग्नेयन्ताः प्रपूज्यास्तावे
द्यां लिङ्गे शिवं यजेत्। ततो महा
देव क्षमस्व इति संहार मुद्रया
ऽविसर्जयेत्। नंदिपुराणे।
गो भूतिल हिरण्यादि बलिपु
ष्पनिवेदने। ज्ञेयो नमः शिवा
येति मंत्रः सर्वार्थसाधकः॥ स
र्वमंत्राधिकश्चाय मोंकाराद्यः
षडक्षरः। तन्मंत्रजापी तत्कर्म्म
संतत्क्रतमानसः॥ निष्कामः पु
रुषो राजन्सरुद्रपदमश्नुते भ
विष्ये पंचाक्षर मुपक्रम्य अप
वः पवित्रो वा सर्वावस्थां गतोऽपि
वा। महापातकयुक्तो वा मंत्रमा
त्रं जपेद्यथा। अधिकारी भवेत्त
दं इति देवोऽब्रवीच्छिवः। इति

अथेत्यर्थः पूर्वोक्त यथा पदात्तु
ऽधात्। तेन यथाधिकारी भवे
त्तथाब्रवीदित्यर्थः। तथा सर्वेषा
मेव पात्राणां परं पात्रं महेश्वरः
पतन्तं त्रायते यस्माद्दत्तीवनर
कार्णवात्। शिवमुद्दिश्य यद्द
त्तं सर्वकारणकारणे तदनन्त
फले दातृ भवतीह किमद्भुतं।
दत्वा नैवेद्य वस्त्रादि नाददीत
कदाचन त्यक्तं शिवमुद्दिश्य
तदादाने न तत्फलं॥ आदाने
ग्रहणे। शिवधर्मे। तस्मात्प
त्रैः फलैः पत्रैः स्तोयैरपिच य
त्फलं। तदनन्त फलं ज्ञेयं भ
क्ति रेवात्र कारणं॥ भविष्ये।
लिङ्गानुलेपनं कार्य्यं दिव्यगन्धैः
सुगन्धिभिः। वर्षकोटिशतं दि
वं शिवलोके महीयते॥ शि
वधर्मे। तस्मात् पुष्प प्रदाने
तल्लिङ्गेषु प्रतिमासुच। प्रष्टी
तिवर्षकोटीनां दुर्गतिं न नरो
व्रजेत्। स्कान्दे। पुष्पाण्यपि
चपद्मानि श्रीवृक्षस्य सदैवहि
दातव्यानीति शेषः। भविष्ये।
धुस्तूरकैश्च यो लिङ्गं सकृत्पू
जयते नरः। सगोलक्षफलं प्रा
प्य शिवलोके महीयते विल्वपत्रै

रखण्डैश्च यो लिङ्गं पूजयेत्स
कृत्। सर्वपापैर्विनिर्मुक्तः शि
वलोके महीयते। तथा सर्वका
मप्रदं विल्वं दारिद्र्यस्य प्रणाश
नं। विल्वपत्रात्परं नास्ति येन तु
ष्यति शंकरः। तथा केश कीट
परिहीनानि शीर्णपर्य्युषितानि च
स्वयंपतित पुष्पाणि त्यजेदुप
हतानि च॥ तथा देवदारु समे
तञ्च सर्ज्जश्रीवास कुन्दुरु श्रीफ
लेचाज्यमिश्रन्तु दत्वाप्नोतिप
रांगतिं॥ सर्ज्जः शालरसः। श्री
वासः सरलद्रवः। कुन्दुरुः प्रोले
यं। पद्मः सौगन्धिकं धूपं सद्
सहस्र गुणोत्तरं। अगुरुं शतसा
हस्रं हिरण्यमासिताणुरुकात्तु
गुलंघृतसंयुक्तं साक्षात्तुष्टा
तिशंकरः। तथा। तैलेनापि हि
यो दद्यात् घृताभावेन मानवः
तेनदीप प्रदानेन शिवब्राज
ते भुवि। नंदिकेश्वरः। अथ भ
क्त्या शिव पूज्य नैवेद्य मुप
कल्पयेत्। यद्यदेवात्मनः श्रे
ष्ठन्तद्दीशाय कल्पयेत्। पा
लितण्डुल प्रस्थस्य कुर्य्यादन्नं स
संस्कृतं। शिवाय तं चरुं दद्यात्त
तद्दिपंण विशेषतः। प्रस्थमानं

प्राप्नुक्तं । शिवसर्वस्वे स्कान्दे । एक माम्रफलं पक्वं यः शंभोर्विनिवेदयेत् वर्षाणा मयुतं भोगैः क्रीडते स शिवे पुरे ॥ पक्वं मोचाफलं पक्वं यः शिवाय निवेदयेत् । वर्षलक्षं तथा भोगैः शिवलोके महीयते ॥ शिवपुराणे । नैवेद्यं घृतसंयुक्तं मधुपर्कं निवेदयेत् । अग्निष्टोमस्य यज्ञस्य फलमाप्नोति मानवः ॥ शिवसर्वस्वे स्कान्दे । परिपक्वं सुसंमृष्टं मांसमिक्षं सुसंस्कृतं । शिवाय मांसं दत्वा तु शृणु यत्फलमाप्नुयात् । अशेषफलदानेन यत्फलं परिकीर्त्तितं । तत्फलं प्राप्नुयान्नित्यं सर्वमांसनिवेदनात् ॥ शिवधर्मे । लिंगवेदी भवेद्देवी लिंगसाक्षात् महेश्वरः ॥ तयोः संपूजनान्नित्यं देवी देवश्च पूजितौ । देवीपुराणे । सव्यं सृजेत्ततोः सव्यं प्रणालं नैव लंघयेत् । एकीकृतमना रुद्रे यः कुर्य्यात्त्रिः प्रदक्षिणां । छिन्नस्तेन भवग्रन्थिर्नतस्य पुनरुद्भवः । भविष्ये । जानुभ्यां चैव पाणिभ्यां शिरसा च विचक्षणः । कृत्वा प्रणामं देवेशे सर्वान्कामानवाप्नुयात् । लिंगपुराणे गन्धपुष्पनमस्कारैर्मुखवाद्यैश्च सर्वशः । यो मां सञ्चयते तत्र तदा तुष्याम्यहं सदा । महाभारते सर्वलक्षणहीनोऽपि युक्तो वा सर्वपातकैः । सर्वं भवति तत्पापं भावयन् शिवमात्मना । राद्धवभट्टधृते । अधोमुखेवामहस्ते ऊर्द्ध्वास्ये दक्षहस्तके ॥ क्षिप्त्वांकुलीरंगुलीभिः संगृह्य परिवर्त्तयेत् । प्रोक्ता संहार मुद्रेयं अर्पणे तु प्रशस्यते । अपणे आत्मनीति शेषः स्कान्दे । निर्म्माल्यं यो हि मद्भक्त्या शिरसा धारयिष्यति । अशुचिर्भिन्नमर्य्यादो नरः पापसमन्वितः । नरकेपच्यते घोरे तिर्य्यक्योनौ च जायते । ब्रह्महापि शुचिर्भूत्वा निर्म्माल्यं यस्तु धारयेत् । तस्य पापं महच्छीघ्रं नाशयिष्ये महाव्रते । शुचिः स्नानादिनेति शेषः । एवञ्च । स्पृष्ट्वा रुद्रस्य निर्म्माल्यं सवासा आप्लुतः शुचिः इति कालिकापुराणीय मशुचिविषये अनुपनीत विषय मितिश्रीदत्तः । वस्तुच गृह्यपरिशिष्टे अग्रा

ह्योः शिवनैवेद्यं पत्रं पुष्पं फलं जलं । शालग्राम शिलास्पर्शात् सर्वं याति पवित्रतां । कालिकापुराणे । यो यद्देवार्चनरतः स तन्नैवेद्य भक्षकः । केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत् इति तिथ्यादितत्त्वे ॥ अन्यच्च ब्रह्मोवाच । शिवरात्रिव्रतं वक्ष्ये कथ्यन्तु सर्वकामदं । यथा च गौरी भूतेशं पृष्टवत्युत्तमं परं व्रतं । श्रीमहादेव उवाच । माघ फाल्गुनयोर्मध्ये या च कृष्णा चतुर्द्दशी । तस्यां जागरणाद्रुद्रः पूजितो भक्तिमुक्तिदः । कामयुक्तो हरः पूज्यो द्वादश्यामेव केशवः उपोषितैः पूजितः सन्नरकात्तारयेत्तथा । निषादश्चार्बुदे राजा पापी सुन्दरसेनकः । स कुक्कुरैक संयुक्तो मृगान् हन्तुं वनं गतः । मृगादिकमसंप्राप्य सक्षुत्पिपासार्द्दितो गिरौ । रात्रौ तडागतीरेषु सनिकुञ्जे जागरास्थितः । तत्रास्ति लिङ्गं स्वशरीरच्छरीरं चातिपत्रतः ॥ पर्णानि चापतन्मूर्द्ध्नि लिङ्गस्यैवैनज्ञानतः तेन धूलि निरोधाय क्षिप्तं नीरं च लिंगके । शरः प्रमादेनैकस्तु प्रच्युतः करपल्लवात् । जानुभ्यामवनीं गत्वा लिंगं स्पृष्ट्वा गृहीतवान् । एवं स्नानं स्पर्शनञ्च पूजनं जागरोऽभवत् । प्रातर्गृहागतो भार्य्यादत्तान्नं भुक्तवान् स च काले मृतो यमभटैः पाशैर्बद्ध्वा तु नीयते । तदा ममगणैर्युद्धे जित्वा मुक्तीकृतः स च । कुक्कुरेण सहैवाभूद्गणो मत्पार्श्वगः फलं । एवमज्ञानतः पुण्यं ज्ञानात् पुण्यमथाक्षयं । त्रयोदश्यां शिवं पूज्य कुर्य्यात्तन्नियमं व्रती । प्रातर्देव चतुर्द्दश्यां जागरिष्याम्यहं निशि पूजां दानं जपं होमं करिष्याम्यात्मशक्तितः । चतुर्द्दश्यां निराहारो भूत्वा शम्भो परेऽहनि भोक्ष्येऽहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वर । पञ्चगव्यामृतैः स्नात्वा अस्तकाले गुरूक्तितः ओं नमो नमः शिवाय गंधाद्यैः पूजयेद्धरं । तिलतण्डुलव्रीहीश्च जुहुयात् स्व श्रुतं चरुं । कृत्वा पूर्णाहुतिं दद्यात् शृणुयाद्गीतसत्कथां । अर्द्धरात्रे त्रियामे च चतुर्थे च पुनर्यजेत् । मूलमन्त्रेण याज

स्नाप्रभातेच समापयेत्। अवि
घ्नेन व्रतं देव त्वत्प्रसादान्मम
र्पितं। समस्तजगतां नाथत्रै
लोक्याधिपते शिव॥ यन्मया
य कृतं पुण्यं तच्छिवस्य निवे
दितं। त्वत्प्रसादान्मयादेव व्र
तमद्य समर्पितं। प्रसन्नोभव
मे श्रीमन् मद्गृहं प्रतिगम्यतां
त्वदालोकन मात्रेण पवित्रो
स्मिनसंशयः। भोजयेद्यान
निष्ठांश्च वस्त्रच्छत्रादिकं ददे
त्। देवादिदेव भूतेशा लोका
नुग्रहकारक। यन्मयाश्रद्धया
दत्तं प्रीयतां तेन मे प्रभुः॥
इति क्षमाप्य च यतीन् कुर्या
त् द्वादशवार्षिके। कीर्तिश्री
पुत्र राज्यादि प्राप्य शैवं पुरं
व्रजेत्॥ द्वादशास्वपि मासेषु
प्रकुर्यादिह जागरं। यतीन्
द्वादशसंपूज्य दीपदः स्वर्गमाप्नु
यात्॥ इति स्कान्दे शिवरात्रि
व्रतकथा १२४ अध्यायः॥ शि
वलिंगं स्त्री महादेवस्य शेफः
प्रस्रोत्पतति येषा। तत्रापिगता
मदनो ददर्श वृषकेतनं॥ द
ष्ट्वा प्रहर्तुकामोऽस्य ततः सम्रा
द्रवद्धरः। ततो दारुवनं घोरं

मदनाभिहतो हरः। विवेश
ऋषयो यत्र सपत्नीकाश्च
वस्थिताः। तेचापि ऋषयःस
र्वे दृष्ट्वा सद्वीनताभवन्। तत
स्तान् प्राह भगवान् भिक्षां मे
प्रतिदीयतां। ततस्तेमौनिन
स्तस्थुः सर्व एव महर्षयः। तदा
श्रमाणिपुण्यानि परिचक्रामना
रद। तं प्रविष्टं तदा दृष्ट्वा भार्गा
वात्रेययोषितः। प्रक्षोभमगमं
स्सर्वाहीनसत्वाः समंततः। ऋते
त्वरुंधतीमेकां अनसूयाञ्च भा
मिनीं। एताभ्यां भर्तृपूजासु
कृतेनैव हि स्थिरं मनः। ततः
संक्षुभिताः सर्वा यत्र याति म
हेश्वरः। तत्र प्रयाति कामार्ता
मदविह्वलितेंद्रियाः। त्यक्त्वाश्र
माणिशून्यानि स्वानितामुनि
योषितः। अनुजग्मुर्यथामत्तं क
रिण्य इव कुंजरं। ततस्तु ऋष
यो दृष्ट्वा भार्गवांगिरसो मुने।
क्रोधान्विता ब्रुवन् सर्वे लिंगोऽस्य
पततां भुवि। ततः पपात देवस्य
लिंगं पृथ्वीं विदारयन्। अ
न्तर्धानं जगामाथ त्रिशूली
नीललोहितः। ततः स पति
तो लिंगो विभिद्य वसुधातलं

रसातलं विवेशाशु ब्रह्मांडं चो
र्द्ध्वतोऽभिनत्। ततश्चचाल पृ
थिवी गिरयः सरितो नगाः॥
पाताल भुवनाः सर्वे जंगमाजं
गमाः स्थिताः संक्षुब्धान्भुवनान्
दृष्ट्वा भूर्लोकादीन्पितामहः॥
जगाम माधवं द्रष्टुं क्षीरोदं ना
म सागरं। तत्र दृष्ट्वा हृषीके
शं प्रणिपत्य च भक्तितः॥
उवाच देव भुवनाः किमर्थं क्षु
भिता विभो। अथोवाच हरिर्ब्र
ह्मन् शार्वो लिंगो महर्षिभिः
पतितस्तस्य भारार्त्ता संचचाल
वसुंधरा। ततस्तदद्भुततमं
श्रुत्वा देवः पितामहः। तत्र ग
च्छामि देवेश एव माह पुनः पु
नः। ततः पितामहो देवः केश
वश्च जगत्पतिः॥ आजग्मतुस्त
मुद्देशं यत्र लिंगं भवस्य तत्।
ततोऽनंतं हरिर्लिंगं दृष्ट्वारुह्य
खगेश्वरं॥ पातालं प्रविवेशा
थ विस्मयाविष्टितो विभुः। ब्र
ह्मा पद्म विमानेन ऊर्ध्वमाक्र
मत्सर्वगः॥ नैवान्तमलभद्ब्रह्मा
विस्मितः पुनरागतः॥ विष्णु
श्चापि पाताले सप्तलोक परा
यणः। चक्रपाणिर्विनिष्क्रांतो

लोभेंतं न महामुने। विष्णुपि
तामहश्चात्र हरिर्ब्रह्माण माह
च। नमोऽस्तुते शूलपाणे नमोऽ
स्तु वृषभध्वज। जीमूत वाहनक
वे सर्व त्र्यंबक शंकर॥ महेश्व
र हरेशान सुवर्णाक्ष वृषाक
पे। दक्षयज्ञक्षयकर कालरू
द्र नमोऽस्तुते॥ त्वमादि रस्य
जगतं स्त्वं मध्यं परमेश्वरः। भ
गवानंतश्च भगवान् सर्वगस्त्वं न
मोऽस्तुते। पुलस्त्य उवाच॥ ए
वं संस्तूयमानस्तु तस्मिन् दारु
वने हरः। स्वरूपी ताविदं वा
क्य मुवाच वदतांवरः॥ हर उ
वाच। किमर्थं देवतानाथौ परि
भूत क्रमान्विह। मांस्तुवातेभृ
शास्तस्वं कामतापितविग्रहे
देवावूचतुः। त्वदंगपातितेलिं
गे यदेतद्भुवि शंकर। एतत्प्र
ग्रांतो भूय स्ततोदेव वदावहे
हर उवाच यद्यर्चयंति त्रिदशा
ममलिंगं सुरोत्तमौ॥ तदेतत्
प्रतिगृह्णीयां नान्यथेति कथं
चन। ततः प्रोवाच भगवानेवम
स्त्विति केशवः। ब्रह्मा स्वयं च
जग्राह लिंगं कनक पिंगलं।
ततश्चकार भगवान् चातुर्वर्ण्यं

रुद्रार्च्चने। शास्त्राणिचैषांप्रसु-
ख्यानि नानोक्ति विदितानिच
आद्यं शैवं परिख्यातं मन्यत्पा
शुपतं मुने तृतीयं कालवद
नं चतुर्थञ्च कपालिनं। शैव
आसीत् स्वयं शक्तिर्वशिष्ठस्य
प्रियः सुतः। तस्य शिष्यो बभूवा
ऋषभोपायन इति श्रुतः। महापा
शुपतस्त्वासीद्भारद्वाज स्तपोध
नः॥ तस्य शिष्योऽप्यभूद्राजा ऋ
षभः सोमकेश्वरः। कालास्यो भ
गवानासीदापस्तम्ब स्तपोधनः
तस्य शिष्योऽवकोचेश्वरो नाम्ना
क्राथेश्वरो मुने। महाव्रती च
धनद स्तस्य शिष्यश्च वीर्य्यवा
न्। कुन्दोदर इति ख्यातो जातो
शूद्रो महातपाः। एवं सभग-
वान् ब्रह्मा पूजनाय शिवस्य च
कृत्वा तु चातुराश्रम्यं स्वमेव
भवनं गतः। गते ब्रह्मणि सर्व्वो
पि तपःसंहृत्य तेनदा। लिङ्गञ्च
ब्रवने स्वकं प्रतिष्ठाप्य चचार
ह। इति वामनपुराणे ६ अध्या
यः॥ अपिच ततः स्तुर्त्तिं चितं
यतो ब्रह्मणो मोहितस्य च।
वालिखिल्याः सुसुत् पञ्चाङ्ग
प स्तस्थे समाश्रमन्। दिव्य-
वर्षसहस्रं वैतेषु स्वेडखरं तपः
ततः कालेन महता पार्व्वतीच
पतिव्रता। तेषां तपः समालो
क्य चाति देवी सुदुःखिता। प्र
साद्य देवदेवेशं शङ्करं प्राह सु
व्रता॥ किं पूर्वोतिवालिखिल्या
स्य प्रसादार्थं तव प्रभो। पतेभ्यो
पि प्रियं देव विधिवत् कुरुसे
वृथा। तच्छ्रुत्वा वचनं देव्याः
पिनाकी परिचिन्तकः। प्रो
वाच कान्ते कालस्त्वं वचनेपि
ययासह॥ न वेत्सि देवितत्त्वे
न धर्म्मस्य गहना गतिः। नैते
धर्म्मं विजानन्ति यथार्थं प
र्म्मचारिणः। नदास्यामि वरं
तेभ्यो यस्माते चुल्लुहृदयः पत
त् श्रुत्वाऽब्रवीत् देवी मा मैवं स
शितव्रता। ततो रुद्रउवाचेदं दे
वी देवः स्मिताननः तिष्ठ त्व
मवयास्यामि यत्रैते मुनिसत्त
माः। इत्युक्त्वा ततो देवीश
करेणमहात्मना। गच्छेत्सा
समुदिता भर्त्तारं भुवनेश्वरी। यत्र
तेमुनयः सर्व्वे काष्ठलोष्टसमा
श्रिताः। तान् विलोक्य ततोदे
वो नग्नः सर्व्वांगसुन्दरः॥ वन
मालाकृतापीडो युवा भिक्षा

कपालभृत्। आश्रमे पर्य्यटन् वै
भिक्षां मुनीनां नियतात्मनां॥
देहि भिक्षां तत श्चोक्त्वा सत्व
मन्वाश्रमं ययौ। तं विलोक्या
श्रमगतं योषितो ब्रह्मवादि
नां। सकौतुक स्वभावेन तस्य
रूपेण मोहिताः प्रोचुः परस्प
रं कार्य्य मस्ति पश्यामभिक्षु
कं। परस्परं मितीवोक्त्वा गृह्य
मूलफलं बहु। गृहाण भिक्षां
त्वा मूचुस्ता स्तं देवं मुनियो
षितः॥ तं सम्यग्दत्त्वैव तां भिक्षां
पप्रच्छु स्ताः स्मरातुराः। नाथ
ऊचुः। कोऽसौ नाम व्रतविधि
स्त्वया तापस सेव्यते। यत्र नग्ने
न लिङ्गेन वनमाला विभूषितः
भवान् वै तापसो हृद्यो हृद्याः
स्मो यदि मन्यसे। इत्युक्त्वा ताप
सस्ताभिः प्रोवाच हसिताननः
इदं मम व्रतं किञ्चिन्न रहस्यं प्र
काश्यते। शृण्वन्ति बहवो यत्र
तत्रतत्रनविद्यते। तस्य व्रतस्य सु
भगा इति मत्वा गमिष्याम्यप
वमुक्ता स्तदा तेन ताः प्रत्युचुस्त
ा मुनिं। ततः भेत्स्य गमिष्यामो
मुनेन कौतुकं महत्। इत्युक्त्वा
तास्तदातीव जगृहुः पाणिपल
वैः। काचिच्चकर्ष बाहुभ्यां का
चित्कामपरा तथा जानुभ्या
मपरा नाभ्यां कचेषुललना
परा। अपरा तु कटीवस्त्रे चा
परा पादयो रपि क्षोभं विलो
क्य मुनय आश्रमेषु स्वयोषि
तां। हन्यता मिति संभाष्य का
ष्ठपाषाणपाणयः। पातयंति
च देवेशस्य लिङ्गमुग्रं सुभीषणं।
पातितेतु ततो लिङ्गे गतोऽन्त
र्द्धानमीश्वरः। देव्या स भगवा
न् रुद्रः कैलाशनगमाश्रितः।
पतिते देवदेवस्य लिङ्गे नष्टे च
राचरे। क्षोभो बभूव सुमहान्
ऋषीणां भावितात्मनां। उवाचैको
मुनिवर स्तत्र बुद्धिमतां वरः। वि
रिञ्चिंशरणं यामः सहि ज्ञास्यति
चेष्टितं। एव मुक्ता सर्व्व एवऋष
यो लज्जिताभृशं। ब्रह्मणः सद
नं जग्मु र्देवैः सह निषेवितं॥
ऋषयऊचुः। प्रस्तावाच्च कोपन्न
श्रवत्स्माभिर्नाभिरुद्धैर्बलैः। तेषा
पणामने यत्नं कुरुसर्वोपकार
क। ब्रह्मोवाच गच्छामः शरणं
देवं शूलपाणिं त्रिलोचनं। प्रसा
दाद्देवदेवस्य भविष्यथ यथा
पुरा॥ इत्युक्त्वा ब्रह्मणासार्द्धं के



लासे गिरिसुतमं। दृष्ट्वा तस
मासीन मुमयासहितं हरं। तत
स्तोतुं समारब्धो ब्रह्मा लोक
पितामहः। अनंताय नमस्तुभ्यं
वरदाय पिनाकिने। एवं स्तुतो म
हादेवो ब्रह्मणा ऋषिभिस्तथा
उवाच मां प्राव्रजतु लिंगे मेऽ
रतः पुनः। क्रियतां मद्वचः
प्रीत्यर्थं येन मे प्रीति रुत्तमाः
भविष्यति मत्कृपाया लिंगा
स्यात्र न संशयः। ये लिंगं पूज
यिष्यंति मम भक्ति समाश्रिताः
न तेषां दुर्लभं किञ्चित् भवि
ष्यति हितफले। इति वामने
धर् प्रध्यायः। कुरुक्षेत्र स्थिता
नि लिंगानि यथा। सनत्कु
मार उवाच। वटस्य दक्षिणे
भागे चक्रतीर्थं प्रकीर्तितं॥
स्थाने वटस्य पूर्वेण सप्ततीर्थं
प्रकीर्तितं। स्थाने वटस्योत्तर
तस्तीर्थं गणेश्वरं मतं। स्थाने
वटस्य पश्चिमतः स्कन्दतीर्थं
प्रकीर्तितं इमानि पुण्यतीर्था
नि मध्ये रुद्रवटः स्थितः। महादेवं
समभ्यर्च्य प्राप्नोति परमं पदं।
वटस्य चोत्तरे पार्श्वे तत्तकेण
महात्मना प्रतिष्ठितं महालिंगं

सर्वकामप्रदायकं वटस्य पूर्वे
दिग्भागे विश्वकर्मकृतं महत्
लिंगं प्रत्यक्षमेवं दृष्ट्वा सिद्धि मा
प्नोति मानवः॥ तत्रैव लिंगरूपे
ण संस्थिता या सरस्वती। तां प्र
णम्य प्रयत्नेन बुद्धिं मेधाञ्च विं
दति। वटपार्श्वे स्थितं लिंगं ब्र
ह्मणा तत् प्रतिष्ठितं। दृष्ट्वा व
टेश्वरं देवं प्रयाति परमं पदं॥
ततः स्थाणुवटं दृष्ट्वा कृत्वा चापि
प्रदक्षिणं। प्रदक्षिणीकृता तेन
सप्तद्वीपा वसुंधरा। स्थाणोः प
श्चिमदिग्भागे नकुलीशो ग
णः स्मृतः। तमभ्यर्च्य प्रयत्नेन स
र्वपापैः प्रमुच्यते। तस्य दक्षिण
दिग्भागे तीर्थं रुद्राकरं स्मृतं
तस्मिन्स्नातः सर्वतीर्थे स्नातो भ
वति मानवः। तस्य चोत्तर दिग्भा
गे रावणेन महात्मना। प्रति
ष्ठितं महालिंगं गोकर्णं नाम
नामतः॥ आषाढमासे या कृ
ष्णा भविष्यति चतुर्दशी तस्यां
पशुपति गोकर्णं तस्य पुण्यफ
लं स्मृतम्। कामतोऽकामतो वापि
यत् पापं तेन संचितं। तस्मा
द्विमुच्यते पापात् पूजयित्वा ह
रं शुचिः। कौमार ब्रह्मचर्येण

यत्पुण्यं प्राप्यते नरैः। तत्पुण्यं
सकलं तेषां सहस्रं योऽर्च्चये
च्छिवं॥ यदीच्छेत् परमं रूप
सौभाग्यं धनसम्पदं। कुमारेश्व
र माहात्म्यात् सिद्ध्यते नात्र संश
यः॥ तस्य चोत्तर दिग्भागे लिं
गपूजां विभीषणः। अजरश्चा
मरश्चैव कल्पयित्वा बभूव ह।
आषाढस्य तु मासस्य शुक्ला
या चाष्टमी भवेत्। तस्यां सज्ज
सोपवास स्नातस्तत्र प्रवाप्नुया
त्। एवैश्च पूजिते लिंगे तस्मि
न्स्थाने द्विजोत्तम। पूजयित्वा प्र
यत्नेन सर्वकामफलं प्राप्नुयात् ह
षणाद्विशिरा श्चैव तत्र पूज्य म
हेश्वरं। यथाभिलषितान् का
मानवाप्नु मुदान्वितौ। चैत्रमा
सि सिते पक्षे यो नरस्तत्र पूजये
त्। तस्य तौ वरदौ देवौ प्रय
च्छतो हि वाञ्छितं॥ स्था
णोर्वटस्य पूर्वेण हस्तिपादे
श्वरः स्थितः। तं दृष्ट्वा मुच्यते
पापैरपापजन्म सम्भवैः॥ त
स्य दक्षिणतो लिंगं हारीतस्य
ऋषेः स्थितं। यं प्रणम्य प्रयत्नेन
सिद्धिमाप्नोति मानवः। तस्य
दक्षिण पार्श्वे तु हारीतस्य महा

त्मनः। लिंगं त्रैलोक्य विख्या
तं सर्वपापहरं शिवं कंकाल
रूपिणा चापि रुद्रेणात्र महा
त्मना। प्रतिष्ठितं महालिंगं स
र्वपापविनाशनं। भक्ति मुक्ति
प्रदं प्रोक्तं सर्व किल्बिष नाश
नं। तल्लिंग स्पर्शनादेव अग्नि
ष्टोमफलं लभेत्। तस्य पश्चि
मदिग्भागे लिंगं सिद्ध प्रतिष्ठि
तं। सिद्धेश्वरं अविख्यातं सर्व
सिद्धिप्रदायकं। तद्दर्शनात्स्पर्श
नाच्च सर्वसिद्धिं हि विंदति तस्य
दक्षिण दिग्भागे मृकण्डेन महा
त्मना। प्रतिष्ठितं यत्तु लिंगं दर्श
नात्सिद्धिदायकं। तस्य पूर्वे च दि
ग्भागे आदित्येन महात्मना।
प्रतिष्ठितं लिंगवरं सर्वकिल्बि
षनाशनं। चित्रांगदस्तु गंधर्वो
रंभा चाप्सरसां वरा। परस्परं स
नुरागेण स्थाणुदर्शनकांक्षिणौ
दृष्ट्वा स्थाणुं पूजयित्वा सानुरा
गौ परस्परं। आगम्य वरदं देवं
प्रतिष्ठाप्य महेश्वरं। चित्रांग
देश्वरं दृष्ट्वा तथा रंभेश्वरं द्विज
सुभगो दर्शनीयश्च कुले जन्म
समाप्नुयात्। तस्य दक्षिणतो
लिंगं शुक्रिणा स्थापितं पुरा।

तस्यप्रसादात्संप्राप्तं मनसाचिं
तितंफलं पराशरेण मुनिना त
थैवाराध्य शंकरं। प्राप्तं कवि
त्वं परमं दर्शनाच्छंकरस्य च
वेदव्यासेन मुनिना चाराध्य
परमेश्वरं। सर्वज्ञत्वं ब्रह्मज्ञानं
प्राप्तं देव प्रसादतः। स्थाणोः
पश्चिमदिग्भागे वायुना जग
दायुना। प्रतिष्ठितं महालिंगं
दर्शनात् पापनाशनं। तस्या
पिदक्षिणेभागे लिंगं हैमवते
श्वरं। प्रतिष्ठितंपुण्यकृतादर्शी
नात्सिद्धिदायकं। तस्यापिपश्चि
मेभागे कार्तवीर्येणस्थापितं
लिंगंपापहरं सद्यो दर्शनात्
पुण्यमाप्नुयात्। तस्याप्युत्तर
दिग्भागे तस्यार्थे स्थापितंपुनः
आराध्य हनुमंतंप्राप्तसिद्धिं दे
वप्रसादतः। तस्यैव पूर्वदिग्भा
गे विष्णुना प्रभविष्णुना आ
राध्य वरदं देवंचक्रंलब्धंसुद
र्शनं। तस्यापि पूर्वदिग्भागेऽ
न्येन वरुणेनच। प्रतिष्ठितौ
लिंगावेतौ सर्वकामप्रदायकौ।
एतानि मुनिभिःस्थापितानि दे
वैर्वसुभिस्तथा सेवितानि प्रय
त्नेन सर्वपापहराणिवै स्थाणु

लिंगस्यपरितः ऋषिभिस्तत्वद
र्शिभिः। प्रतिष्ठितानि लिंगानि
येषांसंख्या नविद्यते। तथाप्युत्त
रत श्चैव यावदोघवतीनदी॥ स
हस्रमेकंलिंगानां देव पश्चिम
तःस्थितं। तस्यापि पूर्वदिग्भागे
बालखिल्यै र्महर्षिभिः। प्रति
ष्ठिता रुद्रकोटि र्यावत् सनि
हिते सरः। दक्षिणेनतु देवस्य
गंधर्वै र्यक्ष किन्नरैः। प्रतिष्ठिता
नि लिंगानि तेषां संख्या नविद्य
ते। तिस्रः कोट्यर्द्ध कोटीचलिं
गानांवायु रब्रवीत्॥ असंख्या
ताःसहस्राणि येरुद्राःस्थाणुमा
श्रिताः। एतज्ज्ञात्वा श्रद्धया
नः स्थाणुलिंगं समाश्रयेत्।
यस्यप्रसादात्प्राप्नोति मनसा
चिंतितं फलं। अकामो वासका
मो वाप्रविशेत्स्थाणुमंदिरं॥ वि
मुक्तः पातकै र्घोरैः प्राप्नोतिपर
मंपदं। चैत्रमासे त्रयोदश्यां दि
ने पुण्यतमे शुभे॥ प्रतिष्ठिते
स्थाणुलिंगं ब्रह्मणालोकधा
रिणा। ऋषिभि र्देव संघैश्च पू
जितं शाश्वतीःसमाः॥ तस्मिन्
कालेनिराहाराः मानवाः श्रद्ध
यान्विताः। पूजयंति शिवं ये वै

ते यान्ति परमं पदं स्थाणुती
र्थमिदंज्ञात्वा येऽकुर्वंति प्रदक्षि
णं। प्रदक्षिणीकृता तैस्तुसप्त
द्वीपावसुंधरा। इति वामनपुरा
णे ५२ अध्यायः॥ एकगृहे
लिंगद्वयार्च्चननिषेधो यथा।
गेहे लिंगद्वयं नार्च्यं शालग्रा
मद्वयंतथा। द्वेचक्रे द्वारकाया
स्तु नार्च्यं सूर्यद्वयं तथा॥
तन्निर्माल्यभक्षणविधिनिषेधौ
यथा। अभक्ष्यं शिवनिर्माल्यप
त्रंपुष्पंफलंजलं। शालग्रामशि
लायोगात् पावनं तद्भवेत्सदा
इति वाराहे रौप्य सौवर्ण
श्चिस्थापन नामाध्यायः॥ लिं
गपूजां विनान्यपूजाकरणनि
षेधो यथा। लिंगपूजां विना
देवि अन्यपूजांकरोतियः। वि
फलातस्यपूजास्याद्दंतेनरक
माप्नुयात्। तस्मा लिंगं महे
शानि प्रथमं परिपूजयेत्।
तत्पूजन प्रकारो यथा। यद्ग
हे लिंगपूजायां रहिते सतते
प्रिये। तद्गृहं पतितं सत्यं वि
ष्ठा भूमिसमं स्मृतं। ब्रह्म स
त्विय विट् देवि यदि लिंगं नपू
जयेत्। तस्मात् परमेशानि

त्रयश्चाञ्जलतो व्रजेत्। शूद्रश्च
परमेशानि सदा शूकरवत्प्रि
ये। पूजयेत्परमेशानि चत्वा
रो ब्राह्मणादयः। शिवार्चनंतु
पूजास्तु यद्गृहे वर्जितंसदा॥
विष्ठागर्तसमं देवि तद्गृहं वि
द्धि पार्वति शाक्तो वा वैष्णवो
वापि शैवो वा परमेश्वरि।
आदौ लिंगं समभ्यर्च्य विल्व
पत्रै र्वरानने। पश्चादन्यमहे
शानि शिवंप्रार्थ्य प्रपूजये
त्। शिवपूजां विनादेवि अन्य
पूजां करोतियः। सप्तवरसना
हीनः कुम्भीरजायते प्रिये नि
र्मायपार्थिवंलिंगंकृत्वसंहार
रूपिणं आशुतोषं महादेवंशं
करं वृषभध्वजं निर्माय पार्थि
वंलिंगं विधिवत् पूजयेत्शि
वं। शिवपूजामहेशानि यद्गृहे
सततं प्रिये। काशीपुरं महेशा
नि तद्गृहं वरवर्णिनि। शिवलिं
गंप्रपूज्याथ सर्वपूजाफलंलभे
त्॥ चतुर्विधलिंगं यथा। चतु
र्द्धापार्थिवं लिंगं स्मृतं भेदे
न पार्वति। शुक्लं रक्तं तथा
पीतं कृष्णंच परमेश्वरि ब्राह्म
णब्राह्मणेशस्तं क्षत्रियेरक्तं

सिध्यते। हरितं वैश्यजातीनां
कृष्णे शूद्रे प्रकीर्तितं। चंदनेन च
महेशानि सर्वजातिषु शस्यते
इति लिंगार्च्चनतंत्रे १।२।३
पटलाः॥ अस्य पंचवक्त्राणि
यथा। तत्सर्वं शृणु चार्वंगि प
शिवस्य मुखं प्रिये। विभाव्य मु
खपंचकं हि शिवस्य वरवर्णिनि
सद्योजातं वामदेव मघोरश्च
ततः परं। तत्पुरुषं तथेशानं
पंचवक्त्रं प्रकीर्तितं॥ सद्योजात
श्चैव शुक्लं शुद्ध स्फटिकसन्नि
भं पीतवर्णं तथासौम्यं कामदे
वं मनोहरं। कृष्णवर्णमघोरं
च्चसम भीम विकटं। रक्तं
तत् पुरुषं देवं दिव्यमूर्तिम
नोहरं। शुद्धमलञ्च तथेशा
नं सर्वदेव शिवात्मकं। चिंत
येत्पश्चिमवाद्यं द्वितीयेत्तु त
थोत्तरे। अघोरं दक्षिणे देवं
पूर्वे तत्पुरुषं तथा। ईशानं
मध्यतो ध्येयं चिंतयेत् भक्ति
तत्परः॥ इति तंत्रेव ६ पटलः
अस्य पूजायां मुखवाद्यकर
णावश्यकत्वं यथा स्वरूपया
शिवं लिंगं परं ब्रह्मस्वरूपं प्रिये
तत्सद्यु लिंगकवचं पठित्वाक
म

ठानने। मुखवाद्यं सन्त्यज्य हि
कृत्वा तु परमेश्वरि मातृकाम
न्त्रसहितं मुखवाद्यं समुल्लभं।
अकारादि क्षकारान्तं अनुलोम
विलोमतः। उच्चार्य परमेशा
नि मुखवाद्यं शुचिस्मिते। सवि
न्दुवर्णं समुच्चार्य पंचाशन्मातृ
काः प्रिये अनुलोम विलोमतः
वैतालवरानने। अनेनैव विधाने
न मुखवाद्यं करोति यः॥ स सि
द्धः साधकाः सोपि सशिवो ना
त्र संशयः। मृत्युंजयोऽहं देवे
शि मुखवाद्यप्रसादतः यस्मि
न्काले महेशानि अस्तुवा नेल
वर्द्धयेत्। तस्मिन्काले महेशानि
मुखवाद्यं करोम्यहं। तत् अ
न्यापरमेशानि अष्टादशात्मना
श्रये। पलायंते महेशानि त
त्क्षणात्परमेश्वरि। येनराभ्
विविष्टंति मुखवाद्यं विना प्रि
ये। सर्वदैव तदा भोगी शोते
कुम्भी रक्ताञ्जनेत्। इति च तंत्रे
व ८ पटलः। अस्य निर्माल्य
भोजनदोषकारणं यथा दे
व्युवाच। इल्मेतत्व निर्माल्यं
ब्रह्मादीनां कृपानिधे। तत्कथं
परमेशान निर्माल्यं तवर्पितं

ईश्वर उवाच। मध्यस्थानस्थितं
यत्तु तन्मुखे परमेश्वरि। प्रणाम
ले तन्तु ईशानं सदा ऊर्द्ध्वं शुचि
स्मिते। कालाग्निरूपिणं तत्तु स
र्वशक्तिमयं सदा। तेजोमयं महे
शानि मुखमूर्ध्वं वरानने। स्त्री
रोदमथने देवि उत्थितं गर
ले महत्। ततः करतलीकृत्य
तद्विषं सहसा नीत्वा तु स्वाङ्ग

तद्विषं परमे
श्वरि। निपीतं

नापानं। तद्विषं कण्ठदेशान्तु
स्थितं हि सर्वदा मम। ततः प्रभृ
ति देवेशि मुखं ज्वालायते स
दा। पत्रं वा यदि वा पुष्पं फलं
वा वरवर्णिनि। अन्यं हि परमे
शानि उपचारं मनोहरं। योद
द्यात्परमेशानि मन्मुखोपरि
पार्वति। अग्राह्यं तत्तु निर्माल्यं
सत्यं सत्यं मयेरितः। एतत्तु पर
मेशानि निर्माल्यं यस्तु धारये
त्। स भ्रष्टो जायते देवि निष्कृ
तिर्नास्ति तत्र वै। अग्राह्यं मम
निर्माल्यं अतएव वरानने य
द्दत्तं सन्मुखे देवि पुष्पं चापरं
मुत्तमं तन्निर्माल्यं महेशानि
गृह्णीयात् शिवसा सदा। अस्य
मे विल्वदत्वा विरासंज्ञेण पार्व

ति निर्माल्यं मम देवेशि विष्णो
र्ग्राह्यं वरानने। देवासुर मनुष्या
श्च गन्धर्वाः किन्नरादयः। ते सर्वे
परमेशानि वराकाः रुद्र रूढ
यः। निर्माल्यभुच देवेशि अधि
कारी कथं भवेत्। इति च तंत्रे
व १२।१४ पटलौ। चतुर्दशपा
महेशानि शुक्लायां वरवर्णि
नि। कृष्णायां वा महेशानि
अमावस्या विशेषतः। निर्माय
च चतुर्दशपं लिंगं भक्त्या च पूज
येत्। एकहस्ते महेशानि नि
र्माय पार्थिवं शिवं। दक्षिणे
वामहस्ते वा निर्माय ये च पा
र्थिवं। तत्फलं परमेशानि ल
क्षलिंगसमं भवेत्। इति लिंगा
र्च्चनतंत्रे॥ बाणलिंगलक्षणा
दिकं बाणलिंग शब्दे द्रष्टव्यं॥
अथ रौद्रलिंगलक्षणं वीरमि
त्रोदयधृते। नदीसमुद्रवं रौ
द्रसंज्ञान्यस्य विचूर्णनात् न
दीवेगात् समं स्निग्धं संजातं रौ
द्रमुच्यते। समुद्रेपि। सरित्सु
वाह संज्ञानं बाणलिंग समाकृ
ति। तदन्यदपि रौद्रं रौद्रलिं
गं सुखावहं। नदीसार नर्म
दायां बाणलिंगसमाकृति तदन्य



दपि बोद्धव्यं लिंगं रौद्रं भवि
ष्यति । रौद्रलिंगं तथाख्या
तं बाणलिंग समाकृति से
तरक्तं तथा पीतं कृसविप्रा·
दिग्जितं । स्वभावात्कृष्णवर्णं
वा सर्वज्ञातिषु सिद्धिदं । नर्मदा
संभवं रौद्रं बाणलिंगवदीरितं
इति रौद्रलिंग लक्षणं । शिव
नाभि लक्षणं तत् शाक्तं द्रष्ट
व्यं । अथ दैवलिंग लक्षणं दै
वलिंग मधिकृत्य सिद्धान्तशे·
खरे । करसंपुट संस्पर्शी मूलदं
केंडुभूषितं । रेखाकोटर संयु
क्तं निम्नोन्नत समन्वितं । दीर्घो
कारन्तु यल्लिंगं ब्रह्म भागादि
वर्जितं । अथ गोललिंगलक्ष
णं । लिंगं गोल मिति प्रोक्तं·
गोलकं प्रोच्यते बुना । कृष्मा
ण्डस्य फलाकारं नागरंगफला
यम् । काकडिम्ब फलाकारं
गोललिंगं मितीरितं । इति
गोललिंग लक्षणं । अथार्ष
लिंग लक्षणं । तत्रैव नाना
कोल फलाकारं ब्रह्मसूत्रवि
वर्जितं । मूले स्थूलेच यल्लिंगं
कपित्थफलसन्निभं । तालस्य
वा फलाकारं मध्ये स्थूलंचयद्
वेत् ॥

मध्ये स्थूलं वरं लिंगं ऋषिवा
णमुदीरितं । इत्यार्षलिंग लक्ष
णं । लिंगं हि द्विविध मकृत्रि
मे कृत्रिमन्तु अकृत्रिमं स्वय
म्भूतं स्वयंभु बाणलिंगादि कृ
त्रिमं निर्मितं धातुलिंगादि ।
सिद्धान्तशेखरे । तल्लिंग द्विविधं
ज्ञेयं मचलन्तु चलं तथा । प्र
त्येकं त्रिविधं ज्ञेयं लिंगं तद्
भयात्मकं । प्रासादे स्थापितं
लिंग मचलं तच्छिलादिजं ।
स्थापितं अचलं गेहे स्थिरं लिं
ग मथोदितं । पंचधा तत्स्थि
तं लिंगं स्वयम्भू दैव पालकं
आर्षन्तु मानवं लिंगं तेषां
लक्षण मुच्यते ॥ सिद्धान्तशे
खरे । नानाच्छिद्र समायुक्तं ना
नावर्ण समन्वितं । अदृष्टमू
लयल्लिंगं कर्कपार्श्वविदृश्यते
तल्लिंगन्तु स्वयंभूत मपरंल
क्षणाच्छुतं स्वयंभु लिंगमित्यु
क्तंतच्च नानाविधं मतं । शंखा
भमस्तके लिंगं वैष्णवं तदुदा
हृतं । पद्माभ मस्तकं ब्राह्मं
छत्राभं शाक्त मुच्यते शिरोपु
त्रसंतथाग्नेयं त्रिपदं यास्य
मीरितं खड्गाभं नैरृतं लिंगं

वारुणं कलशाकृति ॥ वायव्यं ध्व
जवल्लिंगं कौवेरन्तु गदान्वितं
ईशानस्य त्रिशूलाभं लोकपा
लादि निःसृतं । स्वयंभुलिंग मा
ख्यातं सर्वशास्त्र विशारदैः । इ
ति स्वयम्भुलिंग लक्षणं ॥
मत्स्यसूक्ते । दृष्ट्वा लिंगं महेश
स्य स्वयम्भूतस्य पार्वति । सर्व
पाप विनिर्मुक्तः परेब्रह्मणिली
यते ॥ एतेषां पूजाफलन्तत्रैव
विशेषाच्छैलजं । भुक्त्यै मुक्त्यै
ये शास्तं मुक्तये चानुषंगतः
एवं वैदान्तजं ज्ञेयं त्रिकालिं
गं तथा पुनः । स्थिरलक्ष्मी
प्रदं ज्ञेयं हैमं राज्यप्रदन्तु तत्
पुत्र वृद्धिकरं ताम्रं हांगमायुः
प्रवर्द्धनं ॥ पद्मरागं । पा
रदन्तु महाभूत्यै सौभाग्याय
च मौक्तिकं । चेन्द्रकान्तं मृत्यु
जित् स्फाटिकं सर्वकामदं
वीरमित्रोदयधृत कल्पान्तरेपि
सर्वा फलप्रदा भूमि स्मरणा
ल्लदेव हि । अनन्ताद्याः स्व
ता ह्येषा मणयोविद्रुमज्व·
लाः राजो प्रकाशकाः सर्वे वि
चाद्या ज्ञातकारिणः ॥

नानावर्णास्तु विज्ञेया रसे गं
न्धेश्च रूपतः । वज्राद्याः स्फटि
काद्यास्तु गुडान्नादि विनिर्मितं
सर्वकामप्रदं प्रोक्तं लिंगं तात्
कालिकं मतं ॥ लक्षणसमुच्च
ये । गान्धं सौभाग्यदं लिंगं पौ
ष्ठं मुक्तिप्रदायकं । तथा नाना
गुणोद्भवं लिंगं नानाकाम प्र
दायकं सैकतं गुणदं लिंगं सौ
भाग्याय च लावण्यं ॥ उद्भा
टने तु पाशाग्ने मोलेशानुत्त
यावहे । तात्कालिकं दविद्र
व्य कृत्वा भक्त्या समर्चयेत्
तथा । कस्तूरिकाया द्वौ भागौ
चत्वार श्चन्दनस्य च । कुंकुमस्य
त्रयश्चैव शशिना च चतुःसमं
एतद्धि गन्धलिंगन्तु कृत्वा संपू
ज्य भक्तितः । शिवसायुज्यमाप्नो
ति बंधुभिः सहितो नरः । का
र्यं पुष्पमयं लिंगं द्रव्यगंधस
मन्वितं । नवखंडी धनी भक्त्या
गणेशा॰धिपतिर्भवेत् रजो
भिर्निर्मितं लिंगं यः पूजयति
भक्तितः । विद्याधरपदं प्राप्य
स्थात् शिवसमो भवेत् । श्रीका
मो गोशाकृलिंगं कृत्वा भक्त्या
प्रपूजयेत् । स्वर्णेन कापिले

नैव गोमयेन प्रकल्पयेत् ॥
कार्य्यषष्टिक्रमे लिंगं यव गो
धुम शालिजं । श्रीकामःपुष्टि
कामश्च पुत्रकाम स्तदर्च्चयेत् ॥
सिताखण्डमयं लिंगं कार्य्यमा
रोग्य वर्द्धनं । वंशपल्लवनंजं लि
गं तालविकटकान्वितं । गव्यचू
तमयं लिंगं सेव्यं बुद्धिवर्द्धनं
लवणेनचसौभाग्यंपार्थिवं स
र्वकामदं । कामदं तिलपिष्टो
त्थं तुषोत्थंमारणे स्मृतं भस्मो
त्थं सर्वफलदं गुडोत्थं प्रीति
वर्द्धनं । गन्धोत्थं गुणदं भूरि
शर्करोत्थंसुखप्रदं वंशाङ्कुरो-
त्थं वंशकरं गोमयं सर्वरोगदं
केशास्थि सम्भवं लिंगंसर्वश
त्रुविनाशनं सोभने मारणे पि
ष्टसंभवं लिंगमुत्तमं । दारिद्र
दंतुसोद्भूतंपिष्टं सारस्वतप्रदं
दधिदुग्धोद्भवं लिंगं कीर्ति
लक्ष्मीसुखप्रदं । धान्यदं धा
न्यजं लिंगं फलोत्थं फलदं
भवेत् । पुष्पोत्थं दिव्यभोगा
पुष्ट्यै धात्रीफलोद्भवं । नव
नीतोद्भवंलिंगं कीर्ति सौभा
ग्यवर्द्धनं । दूर्वाकाण्ड समु
द्भूतं मपमृत्युविनाशनं कर्पूर

सम्भवं लिंगं चला वैश्रुक्ति मु
क्तिदा । अयस्कांतं चतुष्ठो तजे
यंसामान्य सिद्धिदं । इति गरु
डपुराणं ॥ सर्वं मणिभवंश्रे
ष्ठं तत्र वज्रमविच्छिदं । यमलि
गंमहाभूत्यै सौभाग्याय चमौ
क्तिकं । पुष्टिमूलं महानीलं
ज्योतिर्हीर समुद्भवं । स्पर्शांके
ज्वलसन्तत्यै तैजसं सूर्य्यकान्त
जं ॥ चन्द्रापीडं मृत्युजितं
स्फाटिकं सर्वकामदं । मूला
ख्य मणिजं शत्रुक्षयार्थं मौक्ति
कंतथा । आयत्यं हीरकंज्ञेयं गो
गदन्मौक्तिकोद्भवं ॥ शुभक्त
न्तु पक्वल्ले तीर्थं वैदुर्य्यंशत्रुद
र्पहृत् ॥नीलं लक्ष्मीप्रदंज्ञेयं
स्फाटिकं सर्वकामदं इति सा
रसंग्रहः ॥ महाभुक्तिप्रदं है
मं राजतं भूतिवर्द्धनं ॥ ताम्रकं
दं तथा कांस्यं मृण्मयसामान्य
मुक्तिदं । त्रपुसीसायसंलिंगं
शत्रुणां नाशने हितं । कीर्ति
दं कांस्यजं लिंगं राजतं पुत्रव
र्द्धनं । पैत्तलं भुक्ति मुक्त्यर्थं
मिश्रजं सर्वसिद्धिदं । इति
कालोत्तरतन्त्रे ॥ तंत्रेवापि
व नारदसंवादे ॥ पित्तलं

भुक्तये लिंगं पूज्यं रजत संभ
वं । हैमजं सत्यलोकस्य प्राप्तये
पूजयेत् धुमान् । पूजयेत्ता ।
म्रजं लिंगं पुष्टिकामो हिमा
नवः ॥ मत्स्यसूक्ते ताम्रलिंगं
कलौ नार्च्चयेत् वैत्यस्यसीसकस्य
च । रक्तचंदन लिंगंचशंखकां
स्यायसंतथा ॥ मातृकाभे
दतंत्रे ९ पटले । पार्थिवे शि
वपूजायां सर्वसिद्धियुतोभवेत्
पाषाणे शिवपूजायां द्विगुणं
फलमीरितं ॥ स्वर्णलिंगेच
पूजायां शत्रूणां नाशनं मतं
सर्वसिद्धीश्वरो देव्येफलं त
स्मात्शतगुणं ॥ ताम्रेपुष्टिंवि
जानीयात् कांस्येच भनसंत
यः ॥ गंगायाश्च लक्षगुणं स्ना
नायां रोगवान् भवेत् । स्फा
टिके सर्वसिद्धिःस्यात्तथा मर
कते प्रिये । लौहलिंगे रिपो
र्नाशं कामदं भस्मलिंगकं ॥
वालुकायां काम्यसिद्धि गोमयेरि
पुहिंसनं । सर्वलिंगस्यमाहात्म्य
धर्म्म कामार्थ मोक्षदं । संस्का
रेण विना देवि पाषाणादौ न
पूजयेत् ॥ तत् संस्कारस्तमै
व यथा । रौप्यञ्च स्वर्णलिंग

ञ्च स्वर्णपात्रे निधायच त
स्माडतोल्प तल्लिंगं डपमध्ये
दिनत्रयं । अंबकेन स्नापयित्वा
कालरुद्रं प्रपूजयेत् । षोडशो
नोपचारेण वेदतत्पावैतीयजे
त् । तस्माडतोल्प तल्लिंगं
गंगातोये दिनत्रयं । ततोवे
दोक्त विधिना संस्कार माच
रेत् सुधीः ॥ लक्षणहीन लिं
गपूजने दोषो यथा । लिंगं
सुलक्षणं कुर्य्यात् त्यजेल्लिंग
मलक्षणं । दैर्घ्यहीने भवेन्मृ
त्युरधिके शत्रुवर्द्धनं । मान
हीने विनाशःस्यादधिकेच
शिशुक्षयः । विस्तारे चाधिके
हीने राष्ट्रनाशोभवेत् ध्रुवं ॥
पीठहीने त्वदारिद्रं शिरोहीने
कुलक्षयः । त्वसुत्र विहीने
च राज्ञो राष्ट्रंच नष्टपति । तस्मा
त् सर्वप्रयत्नेन लिंगंकुर्य्यात्सुल
क्षणं । अथ लिंगप्रमाणं । देव्यु
वाच लिंगप्रमाणं देवेशकथ
यस्व मयिप्रभो । पार्थिवेचशि
लादौवाविशेषो यत्र यत्नवत्
श्रीशिवउवाच । मृत्तिका तोल
कंग्रासमथवातोलकद्वयं एत
दन्यन्नकुर्वीत कदाचिदपिपार्व

ति इति मातृकाभेदतंत्रे ७ प
टलः। अपिच मृत्तिका तोलकं
ग्राह्यमथवा तोलकद्वयं। वि
स्तरस्यप्रमाणेन यद्वनं कारये
द्बुधः। अंगुष्ठपर्वमानेन कृत्वा
लिंगंप्रपूजयेत्। इति षट्क
र्मदीपिकाधृतविश्वसारतंत्रे॥
त्रिसूत्रीकरणं प्रोक्तं कालोत्तरे
लिंगे वेद्या तथा पीठे सम
सूत्र निपातनात्। समस्त्रैवि
जानीयात् त्रिसूत्रीकरणं त्वि
दं। मृत्तिकाभेदेन ब्राह्मणा
दीनां पूजाफलस्यप्रशस्तत्वमु
क्तंतत्रैव। शुक्लं द्विजः पार्थिवं।
लिंगंनिर्माय यस्तु पूजयेत्
सएवपरमेशानि त्रिवर्गफल
भाग्भवेत्। क्षत्रियस्तु वरारोहे
रक्तंनिर्माय पार्थिवं। पूजयेत्त
त्तेयस्तु त्रिवर्गफलभाग्भवेत्
हरितं पार्थिवं देवि निर्माय य
स्तु पूजयेत्। सचवैश्यो महे
शानि त्रिवर्गफलभाग्भवेत्
कृष्णं द्विजः पार्थिवं लिंगं निर्माय
यस्तु पूजयेत्। स शूद्रः परमे
शानि त्रिवर्गफलभाग्भवेत्। शि
लायांच महेशानि स्थूलंचफल
दायकं। अंगुष्ठमानेदेवेशि यद्वा
हेमा

द्विमानकं। क्रमेण देवदेवेशि
फलंवक्ष्यविधं लभेत्। स्थूलात्
स्थूलतरं लिंगं कृष्णते परमेश्व
रि पूजनात्कारणाद्देवि फलंव
ऋद्विधंस्मृतं। स्थूलात्स्थूलतरं
मिति पार्थिवलिंगे तत्परं। मृ
त्तिका तोलकं ग्राह्य मित्यादि
वचनात्। शिला स्फाटिकम
रकतादीनां पंचसूत्रीकरणमु
क्तं। यथा शिवलिंगस्य यन्मा
नंतन्मानं हस्त मध्ययोः। योन्यग्र
मपि यन्मानं तदधोपि तथा भ
वेत्। इति लैंगे। लिंगस्ययाद्द
विस्तारः परिणाहोपि तादृशः
लिंगस्य द्विगुणा वेदी योनिस्त
दर्द्ध संमिता। ऊर्ध्वीतांगुष्ठतोह
स्तं नकदाचिदपिक्वचित्। रत्ना
दिशिवनिर्माणे मानमिच्छावशा
द्भवेत्। इतितंत्रांतरे। लिंगशब्द
व्युत्पत्ति र्यथा। आकाशं लिंगमि
त्याहुः पृथिवी तस्यपीठिका॥
आलयः सर्वदेवानां लयनाल्लिं
गमुच्यते। इति स्कंदपुराणं॥
लिंगमहिमा यथा। शिवउवा
च। नतुष्यामि वर्चितो ऽर्चायां
पुष्पस्य निवेदनैः। लिंगेऽर्चि
ते तथात्यर्थं परं तुष्यामि॥

पार्वति। एष देवि पुरा ह्यर्चि
तोऽहं सर्वदेवतैः। लिंगात्मा लिंग
मिश्रकैः सदेवासुरकिन्नरैः॥
प्रयच्छामिदिवं देवि योमल्लिं
गार्च्चनेरतः। त्यक्त्वा सर्वाणि
पापानि निर्गतो दग्धकल्मषः
मन्मना मन्नमस्कारो मामेवप्र
तिपद्यते। इति वीरमित्रोदय
धृत स्कंदपुराणं। इत्थं विशे
षेण पूजादिफलमपि तत्रैव। व
स्त्रपूतजले लिंगं स्नापित्वा मम
मानवाः। लक्षणाश्वमेधानां
फल माप्नोति सत्तमः। स्नांगंधि
चंदनवसैलिंगा मालिप्य भक्ति
तः। आलिप्यते सुरस्त्रीभिः सु
गन्धैर्यक्षकर्दमैः॥ लिंगपू
जनाकरणे दोष स्तत्पूजाफल
ञ्च तत्रैव शिवनारद सम्वादे।
विना लिंगार्च्चनं यस्य कालो
गच्छति नित्यशः। महाहानिर्भ
वेत्तस्य दुर्गतस्य दुरात्मनः। य
कृतः सर्वदानानि व्रतानि विवि
धानिच। तीर्थानि नियमायज्ञा
लिंगाराधन मेकतः। न लिंगारा
धनादन्यत् पुरा वेदे चतुर्ष्वपि।
विद्यते सर्वशास्त्राणां मेष एव
विनिश्चितः। भुक्ति मुक्तिप्रदे

लिंगं विविधापन्निवारणं। पूज
यित्वा नरो नित्यं शिवसायुज्य
माप्नुयात्। सर्वमन्यत्परित्यज्य
क्रियाजाल मशेषतः। भक्त्याप
रमया विद्वान् लिंग मेकंप्रपूज
येत्। इति स्कंदपुराणं॥ अश्व
मेध सहस्राणि वाजपेय शता
नि च। महेशार्च्चन पुण्यस्य क
लां नार्हंति षोडशीं। इति म
त्स्यसूक्ते ४९ पटलः॥ स्वयंना
रायणः प्रोक्तो यदि शम्भुं प्रपूज
येत्। स्वर्गे मर्त्येच पाताले ये
देवाः संस्थिताः सदा। तेषां
पूजा भवेद्देवि शम्भुनाथस्य पू
जनात्। इति मातृकाभेदतं
त्रे॥ षट्कर्मदीपिकायां॥
असारे खलु संसारे सारमेतच्च
तुष्टयं। काश्यां वासः सतां संगो
गंगाम्भः शम्भुसेवनं॥ अथ
पारदशिवलिंग माहात्म्यं॥
ज्ञेया निर्माय महालिंगं कैलास
नगरे प्रिये। तस्यैव षोडशांशो
कः काश्यां विश्वेश्वरः स्थितः॥
स्फाटिलिंगं महेशानि शिववीजे
नचान्यथा। शिलामयं यथाच
क्रं लक्ष्मीनारायणः परं। पारद
स्य शतांशेको लक्ष्मीनारायणेन

हि। पकारे विस्नुरूपञ्च आकारं
कालिका स्वयं। रेफ शिवं दका
रंच ब्रह्मरूपंनचान्यथा पारदेप
रमेशानि ब्रह्म विस्नुशिवात्म
कं। यो यजेत्पारदे लिंगे सएव
शंभु रव्ययः॥ इति मात्रिकाभेद
तंत्रे ८ पटलः॥ तस्य निर्म्माण
विधानंपारदशाहे द्रष्टव्यं॥ प्र
कारांतर शिवलिंगात् पति
येथा। ततो विवाहं निर्वर्त्यकु
तकृत्यास्थागताः। गताः सर्वे
महेशोपि सत्यासह तदागृहं
जगाम रेमे सत्याच चिरं निर्भ
र मानसः अथकालेकदाचित्त
सत्या सह महेश्वरः रेमेन शे
के तं सोढुं सती श्रान्ताभवत्तदा
उवाच दीनया वाचा देव देवं
जगद्गुरुं। भगवन्नहि शक्नो
मितवभावं सुदुःसहं। त्वमे
ष्वसौ महादेव कृपांकुरुतज
गत्पते। निशम्य वचनंतस्याभ
गवान् वृषभध्वजः। निर्भरं रम
णंचक्रे गाढं निर्दय मानसः क्री
डासंरम्भे रमणं सतीच त्यक्तमे
थुना। उत्थानाय मनश्चक्रे उभ
यो स्तेज उत्तमं। पपातधरणी
पृष्ठे तेनैव भविलं जगत्।

पाताले भूतले स्वर्गे शिवलिंगा
स्तदाभवन्। तेनभूता भविष्या
श्च शिवलिंगाः सयोनयः। यत्रलि
गं तत्र योनि यत्र योनि स्ततः
शिवः। उभयोश्चैव तेजोभिः शि
वलिंगं व्यजायत। इति नारद
पंचरात्रे ३ रात्रे॥ कामनाभे
दे पार्थिव शिवलिंगसंख्या य
था। संख्या पार्थिव लिंगस्य
यथाकामं निगद्यते। मृल्लिंगं
पार्थिवं नामभुक्तिकरंपरं। देश मुक्ति
कालादिकं ज्ञात्वा कुर्य्यात् लिं
गं फलप्रदं। नकरोति यदा
ज्ञात्वा नकार्य्यं तस्यसिद्ध्यति॥
विद्यार्थी शतसाहस्रं धनार्थी
चतदर्द्धकं। पुत्रार्थीसार्द्धसाह
स्रं कन्यार्थीच शतत्रयं॥ वि
द्वान् लिंगायुतं कुर्य्यात् सर्व
पापहरंपरं। राज्यार्थीशतसा
हस्रं कान्तार्थी शतपंचकं। मो
क्षार्थीकोटिगुणितं भूति
कामः सहस्रकं रूपार्थी त्रिसह
स्रं तु तीर्थार्थी द्विसहस्रकं॥
सुहृत्कामः सहस्रंतु वश्यार्थे श
तमष्टकं। मारणार्थे सप्तशत
मोहनार्थे शताष्टकं॥ उच्चाटन
तणार्थेव सहस्रन्तु यथोक्ततः

स्तम्भनेच सहस्रंतु दारणेच त
दर्द्धकं। महाराजभये मत्युशत
स्त्वापदि शंकटे। सहस्र मयुतं
सर्व कामदं परिकीर्तितं। एकं
पापहरं प्रोक्तं द्विलिंगंचार्थसि
द्धिदं। त्रिलिंगे सर्वकामानां
कारणं परमीरितं। तथा। लिं
गानामयुतं कृत्वा पूजा राजभ
यंहरेत्। सहस्राणिचलिंगानां
निगडान्मोचयेद्ध्रुवं। कारागृह
विमुक्त्यर्थे मयुतंकारयेद्बुधः
डाकिन्यादिभये पंचसहस्रका
रयेत्तथा। सहस्राणाञ्च पंचा
शद्युक्तो हिप्रकारयेत्। इति
वीरसिद्धोदयप्रते। अनेन च
क्रमाद्देवि लक्षे यस्तुप्रपूजये
त्। सर्वाभीष्ट फलं देवि लभते
नात्रसंशयः॥ एकीकृत्य लिंग
पूजा विधि निषेधो यथा ए
कीकृत्य महेशानि युगलेन
तुपूजयेत्। एकीकृत्यमहेशा
नि दशपंचशतानिच। प्रत्येकेना
थवा देवि बिल्वपत्रैः प्रपूजयेत्
एकैकं पूजयेल्लिंगं युगलेन
तुपूजयेत् दरिद्रो जायतेदेवि
युगलस्यचपूजनात्। इति।
लिंगार्च्चनतंत्रे॥ शिवलिंग

मृत्तिकादि निरूपणं यथा तीर्थ
मृत्स्नां समाहृत्य निर्म्मायलिंग
मद्भुतं। तीर्थाभावे महेशानि त्व
रस मृत्तिका प्रिये। पर्वतप्र
भवा देवि नदीनाम्नेसुदाहृतं
एतद्भिन्ना महेशानि नदीत्वुरा
इति प्रिये। निर्झरस्यच देवे
शि नदीसम्यक् प्रदायिनी।
सर्वाभावे महेशानि गोष्पद
स्याञ्च मृत्तिका। अथवा परमे
शानि यत्रचित्तप्रसीदति स्थापीने
सुंदरं रम्यं शर्करा रहितं सदा
निर्म्मायपार्थिवं लिंगं कुण्डली
सहितं प्रिये। योलिंगं परमे
शानि सरुद्रःपरमेश्वरः। कुं
डली वेष्टनी तस्य सादेवीपर
मेश्वरी। शिवस्य पूजनात्दे
वि देवी देवो च पूजितो॥ इ
तिमत्स्यसूक्तं॥ वाणलिंग
निर्माल्य ग्रहणे प्रतिप्रसवो
यथा। वाण लिंगेनचाप्येशे
नचनिर्म्माल्यकल्पना। सर्वदा
तदर्पितं ग्राह्यंभक्त्या भक्तैश्च
तान्यथा ग्राह्याग्राह्यविचारोय
वाणलिंगेन विद्यते तदर्पितं
जलंपत्रं ग्राह्यं प्रसादसंज्ञया
बाणलिंगेस्वयंभूतेचंद्रकांते

दंसंस्थिते। चंद्रायणसमं ज्ञेयं
शान्तो नैवेद्य भक्षणे: ॥ इति
शिवनारदसंवादः ॥
शिवलोकः पुं कैलासः। यथा
विल्वपत्रे रखण्डेश्च यो लिंगं
पूजयेत् सकृत्। सर्वपापै र्वि
निर्म्मुक्तः शिवलोके महीयते
इति तिथ्यादितत्त्वधृत भवि
ष्यपुराणं। शिवस्य भुवनेऽन्यत्र
ञ्च। शिववल्लभा स्त्री शतपत्री
इति राजनिर्घण्टः शिवप्रिये।
त्रि शिववल्लिका स्त्री लिंगिनी
इति राजनिर्घण्टः ॥
शिववल्ली स्त्री लिंगिनी श्री
वल्ली इति राजनिर्घण्टः॥
शिववाहनः पुं अनड्वान्। इति
राजनिर्घण्टः ॥
शिवबीजं क्ली पारदः। इति
राजनिर्घण्टः ॥
शिवशेखरः पुं वकवृक्षः। इ
तिजटाधरः। भक्तृरः। इतिराज
निर्घण्टः। शिवस्य मस्तकञ्च
शिवसायुज्यं क्ली मोक्षविशे
षः। सचशिवेन सहयोगः यथा
नागरखण्डे। उपवास प्रभावेन
न बलादपिच जागरात् शिव
रात्रे स्तथा तस्य लिंगस्यापि
प्रपूजया। अक्षयान् लभते लो
कान् शिवसायुज्यमाप्नुयात्।
इति तिथ्यादितत्त्वं ॥
शिवसुन्दरी स्त्री दुर्गा। इति
तंत्रशास्त्रं ॥
शिवा स्त्री दुर्गा। मुक्तिः। यथा
शिवामुक्तिः समाख्याता योगि
नो मोक्षगामिनी। शिवाय यो
जपेद्देवी शिवा लोके ततः स्मृ
ता। इति देवीपुराणे ४५ अ
ध्यायः। अपि च। शिवा कल्या
णरूपा च शिवदा च शिव
प्रिया। प्रिये दातरि चा शब्दः
शिवा तेन प्रकीर्त्तिता ॥ इति
ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४
अध्यायः अपरं च। शाश्चक
ल्याण वचन इवेवान् कृष्टवा
चकः। समूहवाचकश्चैव वा
कारो दातृवाचकः। श्रेयःसंघो
त्कृष्टदात्री शिवा तेन प्रकीर्त्ति
ता। शिव राशि मूर्त्ति मती
शिवा तेन प्रकीर्त्तिता। शिवो
हि मोक्षवचन श्चाकारो दातृ
वाचकः। स्वयं निर्वाणदात्री या
सा शिवा परिकीर्त्तिता। इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मख
ण्डे २२ अध्यायः ॥

शमीवृक्षः। हरीतकी। शृगा
लः। आमलकी इत्यमरः आम
लकी इति मेदिनी। बुद्धिशक्ति
विशेषः। सततदारिंशज्जिनमा
ता। इति त्रिकाण्डशेषः ॥ हरि
द्रा॥ दूर्वा। गोरोचना। इति
राजनिर्घण्टः ॥ शृगालस्य
ध्वनेः शुभाशुभं यथा। शोभ
ने शुभफलानि सूचकेकथ्या
तेसविनिश्च शिवारुते। शान्त
दीप्तककुभो विशेषतो ज्ञान
मत्रचसदोपयुज्यते। दग्धा दि
गुक्तादिनवाप्य युक्ता विवस्व
ताप्ता भवति प्रदीप्ता। साधुमि
ता यास्यविताप्रयाताः शेषादि
शान्ताः किलपंचशान्ताः दग्धादि
गोप्तीज्वलिता दिगैन्द्री प्रथमि
नाचानलादिक् क्रमेण। प्रत्ये
कमेकंप्रहराष्टकेन भुंक्ते दिशो
ह्यस्तविताक्रमेण। आद्ये दिन
स्य प्रहरे प्रवृत्ते महेश देवेश
ताश्र दिक्षु। शिवा रटन्ती कु
रुते नराणां संत्रास कायव्यय
बंधनानि। आग्नेयी द्वितीये प्रह
रस्य भागे सहस्रनेत्रानलका
लदिक्षु। शिवारटन्ती कुरुते न
राणां संत्रास कायव्ययबंधना
नि। याम्ये तृतीये प्रहरे दि
नस्य कृताशवैवस्वत यातु दि
क्षु। शिवा रटन्ती कुरुते नरा
णां संत्रास कायव्यय बंधनानि
समागते ऽन्त्ये प्रहरे तुरीये प्र
तेश रक्षः पति पाशि दिक्षु ॥
शिवा रटन्ती कुरुते नराणां सं
त्रास काय व्यय बंधनानि। आ
द्ये निशायाः प्रहरे प्रवृत्ते रक्षोधि
पादःपतिवातदिक्षु। शिवा र
टन्ती कुरुते नराणां संत्रास का
यव्यय बन्धनानि। ततो द्वितीय
प्रहरे रजन्या स्तोयाधिनाथानि
ल सोमदिक्षु। शिवारटन्ती कु
रुते नराणां संत्रासकाय व्यय
बंधनानि। याम्ये तृतीये ऽपि च
यामवृत्ताः समीरदोषाकरश
म्भु दिक्षु। शिवा रटन्ती कुरु
ते नराणां संत्रास कायव्यय
बंधनानि समागते रात्रितुरी
ययामे निशाकरेशान सुरेश
दिक्षु। शिवारटन्ती कुरुतेन
राणां संत्रास कायव्ययबंधना
नि। इति शिवारुते दग्धदीप्तप्र
मितदिक् त्रययामप्रकरणं प्र
थमं। अतीतिते दिक्त्रययामयो
गात् फले विरुद्धे विकृतेः शि

वायाः क्रमो ग्यादिकपंचकया-
मयोगात् फलानि पुंसां क्रम
तः शुभानि । कुसंत रक्तोवरु
णानिलेन्दु दिक्षाद्ययामे रटैनैः
मृगाल्याः । स्यादिष्टवार्त्तामु
ति रिष्टसिद्धि र्लाभः सुभिक्षं
प्रियलोकसंगः । रक्तःप्रचेतोः
निल सोम शंत दिक्षु द्वितीये
प्रहरे रुतेन । स्यादिष्टवार्त्तामु
ति रिष्टसिद्धि र्लाभःसुभिक्षं
प्रियलोकसंगः । जलेशा वाते
न्दुशिवामरेशा दिक्षाववेण प्र
हरे तृतीये । स्यादिष्टवार्त्ताश्रु
तिरिष्टसिद्धिर्लाभःसुभिक्षंप्रि
यलोकसंगः । समीर सोमेश
सुरेश वाह्नि दिक्षु स्वरेण प्रह
रेचतुर्थे । स्यादिष्टवार्त्ताश्रुति-
रिष्टसिद्धिर्लाभःसुभिक्षंप्रियलो
कसंगः । शशांक रुद्रेंद्र हुताश
काल दिक्षाववैः पंचमयाम-
भागे । स्यादिष्टवार्त्ता श्रुतिरिष्ट-
सिद्धि र्लाभः सुभिक्षं प्रियलो
कसंगः । ईशान शक्राग्नि कृतांत
रक्षोदिक्षु स्वरेण प्रहरेच षष्ठे
स्यादिष्टवार्त्ताश्रुति रिष्टसिद्धि
र्लाभः सुभिक्षं प्रियलोकसंगः
इंद्राग्नि कालासुप पाशपाणि
दिक्षाववैः सप्तमयामकाले ॥
स्यादिष्टवार्त्ताश्रुति रिष्टसिद्धि
र्लाभः सुभिक्षं प्रियलोकसंगः
प्रशांतरुतैर्नैर्ऋत पाशि वातदि
क्ष्वष्टमे च प्रहरे रवेण । स्यादि
ष्टवार्त्ताश्रुति रिष्टसिद्धि र्लाभः
सुभिक्षं प्रियलोकसंगः ॥ इति
श्रीवसंतराजे शिवारुते दि
ग्यामप्रकरणं द्वितीयं ॥
एकादिकानां । निपनाष्टमा
नां शिवारुतानां मधुनायदर्थं
प्राच्यादिकास्वष्टसुदिक्षुशेषं य
थाफलं नगडदीरयामः । धनाप्त
भीःप्राप्ति समीष्टलाभं ध्रुवं त
तो ग्रस्यफले शुभञ्च । भयंप्र
लाभं सकलञ्च सौख्य मेका
दिशब्दैः कुरुते प्रयाते । भया
र्त्तिरिष्टश्रुति र्थ्यहानि रिष्टे-
र्वियोगो महतीचभीतिः । स्या
द्विग्रहाप्ति स्वजनाञ्च दीप्ते त्वेका
दिना चेत् कुतसप्तकेन । ऐं
द्र्यां निनादे प्रथमेर्थलाभो
भवेद्द्वितीये निधिदर्शनञ्च । क
न्या तृतीये लभते चतुर्थे प्रधा
नस्य पंचमके र्थसिद्धिः ॥ षष्ठे
रवे कुप्यति भूमिनाथोभीःस
प्तमे स्याद्विफलाष्टमेषु ॥

ग्रासोग्निभागे प्रथमे द्वितीये
नराधिपः कुप्यतिभी स्तृतीये
ज्ञातश्चतुर्थे नगरस्य दाहे शि
वकृते पंचमके च युद्धं । वदं
तितज्ज्ञाःकलहञ्च षष्ठेभीःसप्त
मेस्याद्विफलोःष्टमस्तु । याम्या
शुभे स्यादशुभं द्वितीये याम्ये
महाव्याधिभयं तृतीये स्वरेच
तुर्थे स्वजनागमःस्यात् प्रवृत्ते
भवेत् पंचमस्तु फलकनेषु । जा
येत कन्या रटिते च षष्ठे भीः
सप्तमे स्याद्विफलोःष्टमस्तु ॥
ग्रामस्य दाहो दिशिराक्षसाना
माद्या द्वितीये पिचशाकुल-
सा । मृत्यु स्तृतीये द्विचतुष्पदा
नांहानि श्चतुर्थेपिचपंचमेःम्ब ।
चौराद्भयं राजभयञ्च षष्ठे भीः
सप्तमे स्याद्विफलोःष्टमस्तु
शब्दे शिवाया वरुणस्य भागे
आद्ये भयं हानि रथ द्वितीये
स्याद्राजदूतागमनं तृतीयेद्रा
हश्चतुर्थे खलु चौरभीतिः स्या
त्पंचमे राजभयेच षष्ठे भीःस
प्तमे स्याद्विफलोःष्टमस्तु । वा
यव्यभागे भय मेकशब्दे भया
निवेका भवति द्वितीये वृष्टि
स्तृतीये महती चतुर्थेमज्ञागमो
वर्षति पंचमेच । क्रोधं विपन्नेन
पतेश्च षष्ठे भीः सप्तमे स्याद्विफ
लोःष्टमस्तु । दिश्युत्तरस्यामवि
हिते विरावे म्रियेत कश्चित्प्र
थमे द्वितीये । महाभयं विप्र
वध स्तृतीये त्वंग चतुर्थे खलु
हन्यतेच ॥ विट् पंचमे षष्ठरवे
चमूहे भीःसप्तमे स्याद्विफलोः
ष्टमस्तु । राहो स्तथा दर्शनमा
द्यशब्दे केतो द्वितीयेचनयात
वेण ॥ उल्काप्रपात स्त्रिषु तुर्द्दि
नेच चतुर्षु भंग खलु पंचमेच
संगो भवेद्धेविजनेषु षष्ठेभीः
सप्तमे स्याद्विफलोःष्टमस्तु ॥
आद्ये भवेद्दुर्दिन सीशदेशे दृ
ष्टि द्वितीये च रवे शिवायाः
वात स्तृतीये त्वशनि श्चतुर्थे
म्रियेतकश्चित् खलुपंचमेच
लभेत पृथ्वीं निनदे च षष्ठे
भीः सप्तमेस्याद्विफलोःष्टमस्तु
इति शिवारुते क्षेत्रक
प्रकरणं तृतीयं ॥ क्षेमलाभ
पुनरागमनानां निश्चयंगमाप
नस्य विपाकः । येन यातिप
थिकः परदेशं ते शिवा रुत
मध्य मयामः । यं यं देशं
गंतु मत्युद्यतानां पुंसां शब्दा



वञ्चयन्ती सृगाली। शान्तायां
सास्मिद्वये वाञ्छितानां दीप्तायां
तस्मादभीष्टक्षयाय। प्राचीदिशं
सन्मुखभानुबिम्बः प्रतिष्ठमान
स्य नरस्य यस्य। शान्तं सृगाली
पुरतः करोति वधं वधं वा प्रक
रोति तस्य॥ प्राचीदिशीशाभि
मुखस्य पुंसः प्रस्थानकामस्य
शिवासशब्दा। भियेऽर्थनाशा
य च दक्षिणा स्याद्वामा पुनर्वा
ञ्छितकार्यसिद्ध्यै। प्रत्यक्प्रभाशां
चलितस्य एकां शिवा विरावं पुरु
षस्य यस्य। करोति पृष्ठे प्रकरोति
तस्य सर्वप्रकारामभिलाससि
द्धिं। प्रस्थापिनो यस्य च दक्षि
णाशां शिवा रवं मुञ्चति दक्षि
णेन। आदित्यमुक्ता यदि नोत
रासौ ध्रुवं भवेत्तस्य महीपतित्वं
नैर्ऋत्याशां चलितस्य यस्य
दिवाकराक्लिष्टदिदक्षिणेन
शिवा च वामा कुरुते विरावं स
म्पद्यते तस्य समस्तसिद्धिः। प्र
माद्यदा यास्यककुप् प्रवासी
करोति प्राह्णे पुरतः सृगाली प्रा
ह्ने दिवस्वानपि सन्मुखेसन्नभ
वेत्तदानी महिरेण मृत्युः। नर
स्य यामां ककुभं प्रियासोः सृ
गालभाष्या यदि पृष्ठभागे के
त्कार मामुञ्चति मानवस्य मृ
त्युप्रबन्धेन भवत्यवश्यं। दिशं
प्रतीचीं व्रजतः सृगाली नरस्य य
स्याभिमुखी विरौति। शान्ता क्षि
ताशान्तफलप्रदात्री दीप्ता तु दी
प्तफलं मातनोति। प्राचेतसीं प्र
चलितस्य काष्ठां सृगालिका
जल्पति दक्षिणेन यदा तदानीं
सुबहूनवर्थान् करोति वार्था
नपि हन्ति पुंसः। दिशं प्रचेतःपरि
पाल्यमानां नरस्य यस्य व्रजतः
सृगाली। वामा विरावं प्रकरो
ति शान्ता भवेत्तदभिमतकला
तितस्य। यो वारुणीं याति दिशं
मनुष्यः सृण्वन् शिवाया र
दितानि पृष्ठे। गतस्य तस्याशु
कृताशाभीति रसेनाथ स्यात्तद्
विलक्षयश्च। यस्यानिलाशां च
लितस्य पुंसः प्राच्यां शिवा मुञ्च
ति फेत्कृतानि। भानुः प्रतीच्या
विदितस्थितिश्चेद्रूपोतितसिद्धि
ति तत्क्षणेन। कुवेरमुदीचीं
चलितस्य पृष्ठे शिवा विरावं पु
रुषस्य यस्य। आस्ते च मध्येन
भसो विवस्वांस्तस्यार्थहानिर्भ
वति प्रदिष्टे कुवेरकाष्ठां प्र।

तियः प्रयाति ज्वालामुखी वा।
भिमुखी विरौति। तस्याधुनास्या
भिमतार्थसिद्धिर्भवेच्च सम्पत्त
नरागमश्च। तिष्ठति तीव्रकरो
दिशि यस्यां फेत् कुरुते यदि त
त्र सृगाली तद्व्रजतः पथिकस्य
त्वरितं निश्चयतो धन जीवित
नाशः॥ दक्षिणतः प्रथमे य
दि पश्चात् वामगता पथिकस्य
सृगाली। फेत् कुरुते कुरुते त
दवश्यं क्षेम धनाप्ति गृहागमना
नि। प्रथमस्य शान्ता ककुभे नर
स्य वामा सृगाली यदि वा रटं
ती। तदार्थलाभे वितनोत्यवश्य
मर्थक्षयं दक्षिणतो रटन्ती। वामा
प्रदीप्ते ककुभः प्रदेशे लाभं त
थानर्थमुपादिशन्ति। शिवा रटं
ती पथि दक्षिणा तु क्षिप्रं मनर्था
न यशस्संकटेषु शान्ते दिशेते यदि
वा प्रदीप्ते पृष्ठप्रयाणे प्रतिषेध
सिद्धिः। शान्तायमाना तु शिवा पु
रस्तात् निमज्जयत्यापदगाध
सिन्धौ। वामे पदस्थे प्रयातो
ष्पृष्ठे पुंसः शिवा जल्पति
यत्र तत्र। आयाति चौरा भय
मे विरावे हयो भवेत्तस्करद
र्शनञ्च। त्वमादरोऽध्यागमनेत
नीये तेऽर्थलाभः। पंचमके
ऽर्थलाभः। वाणिज्यसेवादि फ
लाय षष्ठे भीः सप्तमे स्यादिफ
लाऽष्टमस्तु। हाहारवं मुञ्चति य
एभावा हासातु तस्या स्तद्दा
रवेति। अग्रेसरा वा पथि याथि
यासोः सा हिमकारापि मनो
रथाप्ते। नृपस्य यात्रासमये
पुरस्तात् प्रयाति चेद्दन्मि निवे
दयन्ती। कुर्याच्छिवा वैरि परा
भवे तज्जयश्रियश्चाभिमते वि
दध्यात्। कार्येतरेष्वप्यनुगम्य
माना श्रेयःप्रदा शान्तदिशि प्र
दिष्टा। शिवा प्रदीप्तेन दिशि
प्रदेशे समारटन्ती भयदं भया
य। तयोः क्रमे दीप्त दिशि प्रदी
प्तेनोदेरन्त्यां हेति भयानि दे
वी। महान्ति सर्वाण्यपि शान्ततना
दः शान्तस्थिता सर्वभयप्रदात्री
यदा च नष्टश्रवणा नराणां प्राह्णे
सृगाली कुरुते कदाचित् नेद
हेय तत्परिदिक्षणीये महद्भयं
भावि जलेचरेभ्यः। इति शि
वारुतेयात्रा प्रकरणं चतुर्थं।
स्यात शिवानामपि योगभावो
नैमित्तिकानामुपदिश्यते त
शिवाविरावे शकुनेभवच स

विस्मृतार्थे मुनिसम्मतेन। क
रोति फे फे इति सर्व्वदिक्षपरा
नदा स्थानविज्ञान सुद्दे। शिवा
विधत्ते स्तुपिता त्वसंख्यानरो
दन स्वान् सुत्रति चेद्रुपेण
निरन्तरं रौति विदिक्षु दिक्षु
समन्दकारूपण रवान्तराचेत्
प्रपन्नमोहेन यदा शृगालीम
हस्ताह सा कथितेह तज्ज्ञैः
स्थिता प्रदीप्ते ककुभो विभा
गे ज्वालामुखी फेत्कुरुतेऽति
रौद्रं। ग्रामस्य तस्य प्रकरोति
नाशं तस्याधवाति ह तिथस्य
मध्ये। ग्रामस्य मध्यं समवाप्य
यस्य ज्वालामुखी मुञ्चति फे
त्कृतानि। सम्भ्रान्ता गच्छति
निस्स्वयं लोकस्य वासादस्त
प्रभूतं। ग्रामान्तिके समदिशा
निया तम्नु हाभयो प्रसादितफे
त्कृतानि विरौति चेत्तत्कुरुते प्र
णाली तदा सिद्धलोकस्य भयं प्रभ
वे। मध्यंदिने यावद्दशाविपञ्च
शिवा समीपे नगरस्य यस्य। वि
रौति ज्ञाते विदधाति तस्य भयं च
बलिप्रभवं प्रभूतं। पंचार्द्धरात्रा
ति कश्चिद्देवा कूरस्वराश्चात्र
ते शृगाली। यस्यान्तिके तौ रहदो

हठेन मुष्णंति चौरा जनसन्नि
वेशे। स्थानस्य यस्योपगतास
मीपे दिनानि पञ्चोद्धरतिप्र
भाते। स्वरेण रौद्रेण शृगाल
भार्य्या स्यान्महाहानिमहत्तो नरा
णां। स्ववर्त्तिनस्यापि मनुष्यल
स्वैर्योमस्यप्रतीच्यं यहणं विधत्ते
प्रवेदिनानां दिवसावसाने शिवा
वदन्ती परुषस्वरेण। दिक्षार्दरं
तीक्ष्णकलास्वरोद्रे भ्रमत्यविज्ञा
यतिः प्रभूत। शृगालभार्य्या
ललनद्रुवीति युद्धं सहस्य महा
भिजाते। ज्वाला विमुञ्चन्ति निरोद
नादा समागता धावति या स
मेतान्। कौमारकं याजनयस
कस्मात्कुर्य्यो च्छिवासा प्रवरान्न
पाते। रोमोद्गमे याजनयस्य क
स्मात् फेत्कतिक्रूररवानरात्रौ
मन्त्रं प्रतीपन्तु तु वेदमार्गेणोस्ता
सर्व्वदा स्यादपि शिवा शिवेह॥
नैरंगिणी रौथसि सौम्यरूपां
स्त्रीन पंचवाप्नुवन्ति यानिनारा
न्। शिवांशिवांतान्नृपतिस्तदा
भीर्वदे तद्देवी मभिवन्दनीया॥
श्मशानभूमौ दिनमध्यभागे समे
वजन्याः स्वगृहप्रदेशा। या रौ
ति तस्यै बलि मर्च्चयुक्तमस्या

प्रदद्याद्यदि भद्रमिच्छेत्। सैवं
शुकार्य्येषु समुद्यतेषु बलिः शि
वायाश्च निवेदनीयः। गृह्णाति
यस्मिन् विषये स्वरूपेण देवीव
लिं जल्पति तत्र सिद्धिं। इति शि
वारुते स्थानस्थित प्रकरणं पञ्च
मं। कथ्यते बलिविधानमिदा
नीं प्राक्कनाराममतेन शिवा-
याः। दिक्संसैव बलिर्वा विनेदो
ये साधिताखिल समुद्यत कार्य्य
शृगालयं रुद्रगृहे ज्वलन्तीं वे
श्याव निस्वनरमेव माया बलि
प्रदानाय मताः प्रदेशाः। तेषाञ्च
मध्यादुचितप्रदेशे विशोधिते
मण्डलिकं विदध्यात्। पौराणि
कक्षाकपरीक्षितायाः संगृह्य
गोगोमयमंतरीक्ष्यात् प्रत्येकजी
र्णदेहाया वेश्यायाश्च विशेषतः
गोमांतनवसूतायान् गोगोमय
माहरेत्। तस्मिन्विचित्रे विलते
विदध्यात् पिण्डकेनाष्टदले
सरोजे संपूजयेन्मन्त्रवराधिपा
दीन्। क्रमेण सर्व्वानपि लोकपा
लान्। मध्ये ततः पंचशिरस्यरूपे
तो शिवान्विता पितृमयी प्रशस्ता
पूज्या शिवा लप्स्यति भक्तियोगा

श्मशानं
चतुष्पथं
मातृगृहं

न्मन्त्रपूतान्न धूप दीपैः। मा
ज्यगुडौदन माष कुल्माष याव
क एपालिकामिष मद्यैः। संस्कृ
ति रत्न नरासन मात्रे बुद्धिमता
बलिकर्म्मणि कार्य्या। प्राप्याष्टमी
वाथ चतुर्द्दशीं वा संक्रममंत्रे
ण च सम्यक्त्वतः। बलिं शिवाया
निशि निश्चयेन दद्यात्सुबुद्धि
र्यदि भद्रमिच्छेत्॥ अत्र मंत्रः ॐ
शिवे ज्वालामुखि बलिं गृहाण
हुँ फट् स्वाहा ॐ शिवे शिवे इति
भगवति चण्डे रुद्र मंत्रे बलिली
लासमुचिते गृहाण गृहाण आ
गच्छ वायुवेगेन शुभं कुरु कु
रु स्वाहा। इमं संमंत्रः। बलि
दानाय मंत्रान्तरं ॐ नमो भगव
ति धने धने बलिं गृह्ण गृह्ण
गन्ध पुष्प धूप दीपादिकं दह
दह पच पच सर्व्वरूपिणि भीम
गर्व्वति पिबत पिबत स्वाहा। ए
तन्मंत्रं हितमस्य मध्यादेके
केनाप्यभिमन्त्रणीयः। बलिः शि
वायाः सुमहाप्रभावे पृथक्पृथ
क्मंत्रयुतो यदेतत् ताम्बूलवस्त्रा
सनदक्षिणाभिर्नैमित्तिकं शाक्त
नेपाररत्नैः प्रपूजयेत्तत्र भवेत
भीष्टं साधयत्येव परितोषि।



तेहि ॥ श्लेष्मिका वह्निकृता
न्तकृद् यानि ह्यर्च्चितयेन
सार्द्धं। जपहोमं समस्तञ्च विधी-
तियेह श्रेयस्करी जम्बुक गेहि
नीसा। हितैषिणी सर्व्वसमीहि
तेषु देवी भवानी भुवि फेरवा
च। कृताधिवासा कृपयासदेव
शिवारुते तेन यतेत विद्वान्। इ
ति श्रीवसन्तराजशाकुने सहाग
माथ्येषोऽभेन समस्तसत्त्वकोला
केविरचिते शिवारुते षष्ठः ॥
अथ तान्त्रिकशिवाबलिः। तन्त्र
के कुलचूडामणौ। बिल्वमूले
प्रान्तरे वा श्मशाने वाथ साधकः
मांसप्रधानेन नैवेद्यं सन्ध्याकाले
निवेदयेत्। कालि कालीति
वक्तव्यं ततः सा शिवरूपिणी
पशुरूपा समायाति परिवारका
नैः सह॥ भुक्त्वा रौति यदेशा-
न्यां सुखं भूयोऽन्यसुखं वै। त
देव मंगलं तस्य अन्यथा कु
लक्षणं। अवश्यं मन्त्रसिद्धि
नैव नियतं तोषयेच्छिवां। नित्य
श्राद्धं तथा संध्यावन्दनं पितृत-
र्पणं। तथैव कुलसेवा या नि
त्या कुलपूजने। पशुरूपा-
शिवादेवी योनाश्रयति निर्ज-
ने। शिवारावेण तस्याशु सर्वं
नश्यति निश्चितं। जप पूजा
विधिनाति यत्किंचित् सकृ
तानि च। गृहीत्वा श्रय माता
यशिवारावादि तिनिर्जने। एकाय
तु जायते यत्र शिवया देवभैरव
तेनैव सर्वशक्तीनां प्रीतिः प
रमा लेभा। पशुशक्तिः पशि
शक्तिर्वेव शक्तिर्यथाक्रमात्
पूजिता द्विगुणं कर्म्मसन्तोषात्
साधयेद्यतः। तेन सर्वप्रयत्ने
न कर्तव्यं पूजनं महत्। राजा
दि भयसम्पन्ने देशान्तरभया
दिके। शुभाशुभानि कर्म्मा
णि विचिन्त्य बलिमाहरेत्
शृणु देवि महाभागे शिवे का
लाग्निरूपिणि। शुभाशुभफले
व्यक्तं ब्रूहि शृणु बलिं तव ॥
पलशुद्धार्थं दातव्यो बलिः कुल
जनप्रियः। यदि ना भुज्यते व
स्तु तदा नैव शुभं भवेत् ॥
शुभं यदि भवेत्तत्र भुज्यते तद
शेषतः। एवं ज्ञात्वा महादे
व प्राप्नोति स्वस्त्ययनं चरेत् ॥
इति मेरुसारः ॥
शिवादिका स्त्री वेशपत्री ॥
इति भावप्रकाशः ॥

शिवात्मकं क्ली सैन्धवे। इति
राजनिर्घण्टः ॥ शिवमये त्रि ॥
शिवानी स्त्री जयन्तीवृक्षः। इति
शब्दचन्द्रिका। दुर्गा। इति लो
कप्रसिद्धा ॥
शिवाप्रियः पुं छागः। इति
त्रिकाण्डशेषः। शिवस्य शिवाया
श्च प्रियवस्तुनि त्रिलिङ्गभवति ॥
शिवापीडः पुं वकवृक्षः। इति
राजनिर्घण्टः ॥ शिवाशिवयोः
शेखरश्च ॥
शिवाफला स्त्री शमीवृक्षः। इ
ति राजनिर्घण्टः ॥
शिवारातिः पुं कुक्कुरः। इति
शब्दमाला ॥ शिवाशिवयोः श
त्रुश्च ॥
शिवालयं क्ली श्मशानं। इति
हारावली ॥
शिवालयः पुं रक्ततुलसी। इति
शब्दचन्द्रिका। शिवस्य गृहे ॥
यथा। रामार्ज्जुनचन्द्रिकायां। चं
द्रस्त्य गृहे तीर्थे सिद्धक्षेत्रे शि
वालये। मन्त्रमात्र प्रकथन मु
पदेशः स उच्यते ॥ इति ति
थ्यादितत्त्वे ॥
शिवालुः पुं शृगालः ॥ इति
राजनिर्घण्टः ॥
शिवास्मृतिः स्त्री जयन्तीवृक्षः
इति शब्दचन्द्रिका ॥
शिवाह्लादः पुं वकवृक्षः। इति
राजनिर्घण्टः ॥ शिवस्यानन्दश्च ॥
शिवाह्वा स्त्री रुद्रजटा। इति
राजनिर्घण्टः। शिवनामके त्रि ॥
शिवाक्षं क्ली रुद्राक्षे। इति
राजनिर्घण्टः ॥
शिविः पुं हिंस्रपशुः। इति
त्रिकाण्डशेषः ॥ भूर्जवृक्षः ॥
राजविशेषः। स च उशीनररा
जपुत्रः। इति मेदिनी। तस्य च
रितं यथा। मैत्रेय उवाच ॥
शृणु राजन् प्रवक्ष्यामि समासं
शिविना यथा। हुताशं दत्तवा
न्तस्य प्रवाहोशीनरो युवा ॥
समसदानवते हत्वा शिविं मि
ह्वाश्रुसहसा। जिज्ञासार्थं स
भयार्त्तो वर्त्तमाने महाध्वरे ॥
वह्निर्भूत्वा कपोतस्तु हरिषेप
नात पुरःसरः। शरणार्थी म
हीपालं निनिन्ये भयविक्लवः
नाहिमा पृथिवीपाल त्वदन्
ते श्येनजाद्भयात्। सन्तमाश्वा
सयामास कपोतं शरणागतं
राजानं मुपगम्याशु श्येनःप्रो
वाच संसदि। वचनं शृणु मे

राजन् क्षुधार्तस्य क्षुदार्दितः धर्म्मात्मानं त्वा माहुर्वै एषि योसर्व्वपार्थिवाः । तद्विरुद्धंकर्यकर्म्म कर्त्तुमिच्छसि पार्थिव । सर्व्वस्य संपदः स्वार्थाः स्वपरार्थास्तु कस्यचित् । परार्था भवतो नित्यं सफलस्य तरोरिव । नोपकारपरेऽप्येव मुपकारपरो जनः । अपकारपरेऽपि त्व मुपकारपरः सदा । ममैव विहितो धात्रा भक्ष्योयं ते सत्तुत्सृज । सुषेण नाहं संग्रामस्त्वाणार्थी सन्निधौ मम । तस्मान्नैवाहं न समर्पयिष्ये कपोतकं श्येन यदत्र युक्तं । त्वमन्यस्तेन त्करवाणि सर्व्वं मृते कपोतत्वतुल्यस्य मम । तुभ्यं हिंस्रमहं राज्यं प्रयच्छामि विहंगम । यथाकामयसे चान्यद्धं त्यक्त्वा कपोतकं । श्येनः प्राह किमेतन्मे प्रीतिं राशीत्यत्रोद्ग्वपा । कथत्विदस्य तत्स्थानि स्वमांसानि प्रयच्छ मे । राजा तमब्रवीद् श्येनमे मांसानि याचसे । यतयच्छामि ते सद्यः स्वमांसं तुलया धृते । यत मुक्त्वा स्वमांसानि कपोतेन समंत्स्वयं । उत्कृत्य । तोलयामास प्रहृष्टमनसा ततः । तुलया ध्रियमानस्तु कपोतो ह्यतिरिच्यते । पुनश्चोत्कृत्य मांसानि ततः प्रादात् सपार्थिवः ॥ नविद्यते यदा मांसंकपोतेन समं क्वचित् । ततः प्रत्युत्तमांसोपि साधुः स्मरयतेपरे यदा तेन न तुल्यं तस्य तुलामारुरोह स्वयं ॥ श्रेतः पुरवरः स्त्रीषु न राज्ये न च जीविते ॥ करुणाक्रान्तचित्तेन तेनापेक्षा कृता क्वचित् । परदुःखातुराणि स्युः स्वसुखानि महान्त्यपि । नापेक्षन्ते महात्मानः सर्व्वभूतहितेरताः । परार्थं मुद्यताः संतः संतः किं किं न कुर्व्वते । प्रदत्तापयन्तु ये नीरं जलदैः समुपीयते । एकपक्षसतांमार्गोयदंगीकृतपालनं । इहन्त मकरो क्रोडेपादके यदपांपतिः । आत्मानं । पीडयित्वापि साधुं सुखयते परं ॥ ह्लादयन्त्नापितान् वृक्षाः सः स्वेन सहन्तेऽस्वयं ॥ अथ तस्मिन् समारूढे पुष्पवर्षं पपात च । देवदुन्दुभयो नेदुः स्तुत्वा मौशीनरे नृपे ॥ ततस्तस्य तदा ज्ञात्वा वाक्यं ।

चैतदभाषत । शक्रः स्वरूपमास्थाय धर्म्मराज्ञः परिस्थितिं । इन्द्रोहमस्मि भद्रं ते कपोतो हव्यवाहनः । जिज्ञासमानौ त्वां राजन्निमं यज्ञमुपागतौ महाकारुणिके नेह यत्कृतं तत्सुदुष्करं नैवपूर्व्वैस्तथा स्वकुर्नैकरिष्यन्ति चापरे । यत्ते मांसानि गात्रेभ्यः समुत्कृत्तानि पार्थिव । यथा ते शाश्वती कीर्त्तिं लोकानन्नु भविष्यति । दिव्यरूपधरश्चैव पालयित्वा महीं चिरं ॥ सर्व्वान् लोकानतिक्रम्य ब्रह्मलोकं गमिष्यति ॥ एवमुक्त्वा तमिन्द्राग्नी जग्मतुस्त्रिदशालयं । राजा तु कृत्वा मिष्टान्त मुमुदे देवतां तदा । इति वह्निपुराणे शिवे कृपाख्यानन्नामाध्यायः ॥

शिविका स्त्री यानविशेषः । झाँपान इति ख्यातः । इति भरतः डुली इति पालकी इति च भाषा । तत्पर्य्यायः । याप्ययानं २ इत्यमरः । शिवीरथः ३ इति हारावली । तद्दानविधिर्यथा वह्निरुवाच शृणु तावन्महीपाल महादानमनुत्तमं ॥ येन वै दत्तमात्रेण मुच्यते नरकार्णवात् । मार्गशीर्षे सुभे पक्षे समये चोत्तरे दिने । माघे फाल्गुनयोर्व्वापि वैशाखस्य शरत्स्वच ॥ द्वादश्यां हरिमभ्यर्च्य कलसोपरिसंस्थितं शिविकां चक्रवंशाढ्यां मृदुदारुमयीं तथा । प्रालीयसन्निधिं विशा शुभ्रछत्रसमन्वितां । संभूष्य च सगण्डु कोजागारं तत्र कारयेत् । विधिभिज्ञनसंपन्नंविदग्धंब्राह्मणविदमं ग्रामसारं शुचिं दत्तं कलग्रापत्य भूषितं । प्रातः समाधौ मभ्यर्च्य वासोभिः स्वर्णभूषणैः उपानच्छत्रिकांखड्गां पटकेतु कवेष्टकं । आदर्शं स्वर्गिकां पानीयपात्रं कांस्यभाजनं । चन्द्रातपवृषभा देया यनवः शुभलक्षणाः । शिविकावाहकानामु तथा छत्रस्य धारके । वृत्तिर्देया तथान्नं वर्षमेकं ब्राह्मणस्य तु वर्षे वर्षे पुन र्देयं ब्राह्मणस्य तदैव तु । वृत्तिर्देवत्वसंपन्नौ वर्षे वर्षे पि वार्षिकी । इत्थम् स्नातपराणां कुरु केशव मे प्रभो त्वत्पीणिनायमे दत्ते प्राप्स्यामि



ब्राह्मणाय वै । यस्त्वभोः शिवि
कां देव प्रीतो भव जनार्दन ।
दत्तवान् ज्ञानविद्बेषे सपत्नी
कायप्रहिते । सुराप स्तेय
कृतघ्नी ब्रह्महा गुरुतल्पगः
शिविकादानमाहात्म्यात्तस्य
तेनात्र संशयः । पितृपक्षान्मा
तृपक्षान्पत्नीपक्षांस्तथैव च
श्वात्मानं बंधुपक्षांश्च तारये
न्नरकार्णवात् भुक्त्वा स विपु
लान् भोगान् इहामुत्र सुरोत्तम
दान । सपत्नीकः सपितृको
विष्णुसायुज्यमश्नुते । इति व
ह्निपुराणे । शिविकादानाख्या
यः । शिविपिष्टः पुं महादेवः ।
इति शब्दरत्नावली ॥ शिपि
विष्टशब्दार्थोऽप्यत्र ॥
शिविरं क्ली निवेशः । इत्यम
रः ॥ हे शोभांतक सैन्यवासे ।
कटके इत्यन्ये । न्टपस्य सल
स्थाने इत्येके । इति भरतः ॥
शिविरं तु निवेशे च क्लीबं वप्रद्व
वेष्टके । इत्यनादिकोषः ॥
अथ शिविरलक्षणं श्रीभग
वानुवाच । शिविरं परिखायु
क्तमुच्चैः प्राकारवेष्टितं । युक्तं
द्वादशप्राकारं सिंहद्वार प्रउ

क्तं । युक्तं चित्रैर्विचित्रैश्च कु
त्रिमैश्च कपाटकैः । निषिद्धवृ
क्ष रहितं प्रसिद्धैश्च शुभ्रकेते
सुलक्षणं चेद्वेधं प्रांगणन्तु
तथैव च ॥ तत्र विहितनिषि
द्धकाष्ठं यथा । विश्वकर्मो
वाच । कस्य कस्य तरो काष्ठं प्र
शस्तं शिविरे प्रभो । श्रमेतत
च्छ्रुकेषां सर्वं मां वक्तुमर्हसि
श्रीभगवानुवाच । आम्रो ना
रिकेलश्च गृहिणामर्थनप्रदः
शिविरस्य यदीशाने एवं प्र
प्रदः स्मृतः । सर्वत्र मंगलार्हश्च
तरुराजो मनोहरः । रसालवृ
क्षः एवस्मिन्नागामेपत्यदस्तथा
शुभप्रदश्च सर्वत्रस्त्वरकारो नि
श्रामय विल्वश्च पनसश्चैव ज
म्बीरो वदरी तथा ॥ प्रजाप्रद
श्च एवस्मिन् दक्षिणे धनद ।
स्तथा । सम्पत्प्रदश्च सर्वत्रयतो
हि वर्द्धते गृही । जंबुवृक्षश्च दाडि
म्बः कदल्याम्रातक स्तथा ॥
बंधुप्रदश्च सर्वस्मिन् दक्षिणेऽपि
प्रद स्तथा । सर्वत्र शुभदश्चैव ध
नप्रद शुभप्रदः । हर्षप्रदो गुवा
कश्च दक्षिणे पश्चिमे तथा ॥ ई
शाने स्वादश्चैव सर्वत्रैव निषा

प्रदः । सर्वत्र चम्पकः शुभदोऽश्व
सिद्धिप्रदस्तथा । अलावुश्चा
पि कुष्माण्ड मायाबुश्च मुका
शुकः खर्जुरी कर्कटी चापि
शिविरे मंगलप्रदाः । वास्तूकः
कारवेलश्च वार्ताकुश्च शुभ
प्रदाः । लताफलं च शुभदं सर्वं
सर्वत्र निश्चितं ॥ प्रशस्तक
थितं कर्मो निषिद्धञ्च निशा
मय वत्सा वृक्षो निषिद्धश्च शि
विरे नगरे पि च । वटो निषिद्धः
शिविरे नित्यं चौरभयं ततः । न
गरेषु प्रसिद्धश्च दर्शनात् शुभप्रद
स्तथा । हेकारो तिंतिडीवृक्षो
यत्नात्तं परिवर्जयेत् । शेरणञ्च
नेहानिः स्यात्प्रजाहानिर्भवेत्
ध्रुवं । शिविरे गतिनिषिद्धश्च न
गरे किञ्चिदेव च न निषिद्धः प्र
सिद्धश्च नगरेषु तथापुरे वा
स्तामतिनिषिद्धश्च आरुह्यपरि
वर्जयेत् । खर्जुरश्च इक्षुश्चैव
निषिद्धः शिविरे तथा । नानिषि
द्धः प्रसिद्धश्च ग्रामेषु नगरेषु च
वृक्षश्च चनकादीनां धान्यं च मं
गलप्रदं ग्रामेषु नगरे चापि
शिविरे च तथैव च । इक्षुदंत
स्त्राशुभदः सततं शुभदस्तथा अ

शोकश्च शिरीषश्च कदम्बश्च
शुभप्रदः । कर्त्तौ हरिद्राशुभदा
शुभदश्चार्द्रकस्तथा । हरीतकी
च शुभदा ग्रामेषु नगरेषु च । नवा
सो भद्रदानित्य तथा चामलकी
ध्रुवं ॥ राजानामास्य शुभद म
स्थानाञ्च तथैव च । कल्याण
शुद्धेश्चवसां वासोस्थापनका
रिणां । तच्छुभप्रदमन्येषां शुक्ल
नेकारणं परं । वानराणां न
राणाञ्च गर्द्दभानां गवामपि
कुक्कुराणां शृगालानां मार्जारा
णामभद्रके भेरकाणां शूकरा
णां सर्वेषाञ्चाशुभप्रदं ईशा
ने चापि एवंस्मिन् पश्चिमे च
तथोत्तरे शिविरस्य जलं भ
वेदन्यत्राशुभमेव च । दीर्घप्र
स्थे समानञ्च न कुर्यान्मदिरे
बुधः । चतुरस्रे गृहे कारो गृहि
णां धननाशने । दीर्घप्रस्थः परि
मितो नेत्रकेनापि संहितं । शू
न्येन रहितं भद्रं शून्यं शून्य
प्रदं नृणां । प्रस्थे हस्तद्वयात्
पूर्वं दीर्घं हस्तत्रयं तथा । गृ
हिणां शुभदं द्वारं प्राकारस्य गृ
हस्य च । न मध्यदेशे कर्त्तव्यं
किञ्चिन्न्यूनाधिके शुभं । चतु

रसं चंद्रवेधं शिविरं मंगल प्र
दं। अभद्रं स्तम्भवेधञ्च शिविरं
मंगल प्रदं। अभद्रदं स्तम्भवेधं
प्रांगणञ्च तथैवच। शिविरा-
भ्यंतरे भद्रा स्थापिता तुलसी
नराणां। धन पुत्रप्रदात्री च पुण्य
दा हरिभक्तिदा॥ प्रभाते तुल
सीं दृष्ट्वा स्वर्णदान फलं लभे
त्। मालती यूथिका कुंद माध
वी केतकी तथा। नागेश्वरं म
ल्लिकाच काञ्चनं वकुलं शुभं॥
अपराजिता चम्पाभद्रा तेषां सु
स्थानमीप्सितं। पूर्वे च दक्षिणे
चैव शुभदं नात्र संशयः। उर्द्धं
षोडशहस्तेभ्यो नैवं कुर्य्यात्कु
हे गृही। ऊर्द्ध्वं विंशतिहस्तेभ्यः
प्राकारं न शुभप्रदं। स्तम्भपार्श्वे-
तैलकारं स्वर्णकारञ्च हीरकं
वाटीमूले ग्राममध्ये न कुर्य्या
त्स्थापनं बुधः। ब्राह्मणं क्ष
त्रियं वैश्यं सत्शूद्रं गणकं शुभं
भट्टं वैद्यं पुष्पकारं स्थापयेत्
शिविरान्तिके॥ प्रकोष्ठपरि
माणे सार्द्धहस्ते प्रमाणके
परितः शिविरमानञ्च गम्भीरं
दशहस्तके। सेकेन पूर्व्वं वै
वपित्वा वृक्षमीप्सितं। शोभार्थं

स्य निम्बस्य गम्यमेवसुखेनच
शाल्मलीनां तिन्तिडीनां हि
न्तालानां तथैवच। निम्बानां
सिंधुवाराणां उदुम्बराणां सभ
द्रकं। धुस्तूराणां वटानाञ्च
पीरशाखानां सर्वाञ्छितं। एतेषा
मतिरिक्तानां शिविरे कांक्षी
प्सितं। वृक्षञ्च वज्रहतं केद
दतो वर्जयेद्बुधः। पुत्रदारध
नेष्टघ्नादिभ्यो हंकमलोद्भवे॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डे १०२ अध्यायः॥
शिवीरथः पुं याप्ययाने॥
इति हारावली॥
शिवेष्टः पुं वकवृक्षः। इति
राजनिर्घण्टः। शिवप्रिये ति
शिवेष्टा स्त्री दूर्वा। इति रा
जनिर्घण्टः॥
शिशिरः पुं हिमः। इति मेदि
नी। शिशिरः पुं क्ली ऋतुविशे
षः। इत्यमरः॥ स तु माघ फा
ल्गुनमासद्वयात्मकः। तत्पर्य्या
यः कम्पनः २ शीतः ३ हिमकू
टः ४ कोरनः ५ कचित् पुस्तके
कोरनस्थाने कोउव इति पाठः
इति राजनिर्घण्टः। तत्काली
न जलगुणा जलशब्दे द्रष्टव्याः

तत्र जातफलं मिष्टान्नभोगी
मधुरप्रमाणदी कलत्र पुत्रादि
युतः सुधार्त्तः। क्रोधी सुधी-
ख्यातकलेवरश्च यस्य प्रसूतिः
शिशिराभिधाने॥ इति कोष्ठी
प्रदीपः॥ तत्र वर्ज्जनीयानि।
करीषधूमः कुन्दः पद्मदाहः॥
शिशिरोत्कर्षश्च। इति कवि
कल्पलता॥ अस्य गुणाः।
शिशिरं शीतले दृष्यं शीतं
वातप्रकोपनं। इति राजवल्ल
भः॥ अपिच। शिशिरः शीत
लोऽतीव रूक्षो वाताग्निवर्द्ध
नः। इति भावप्रकाशः॥
शिशिरः त्रि शीतगुणयुक्तः। य
था। शीतेगुणे तद्वदर्थाः सुषी
मः शिशिरो जडः तुषारः शीत
लः शीतो हिमः सप्तान्यलिङ्गकाः
इत्यमरः॥
शिशुः पुं बालकः। तत्पर्य्यायः
पोतः २ पाकः ३ अर्भकः ४
डिम्भः ५ पृथुकः ६ शावकः ७
इत्यमरः। शावः ८ अर्भः ९ शि
शुकः १० पोतकः ११ शिशुकः
१२। इति शब्दरत्नावली गर्भः
१३। इति जटाधरः॥
तस्य लक्षणादि यथा वृद्धमाता

तपः। शिशोरम्भुचाणां प्रोक्तं
वालस्याचमने स्मृतं। रजस्वला
दि संस्पर्शपतनात्तनयः कुमारकैः
प्राक् चूडाकरणाद्बालः प्राग
प्राशनाच्छिशुः। कुमारस्तु स
विज्ञेयो यावन्मौञ्जी न वध्यते
इति गोपालन्यायपञ्चाननकृत
स्मृतिनिर्णयः। अपि च चतु
र्थीहत् सप्ताहंद्धं यावदष्टौसमा
वयः। शिशोव्रतं प्रकुर्वीत त
न्मसंबोधि वांधवाः। इति ब्रह्म
पुराणवचनं। ज्ञातमात्रः शि
शुस्तावत्यावदष्टौ समावयः
सहिगर्भसमोज्ञेयो व्यक्तिमा
त्र प्रदर्शकः। भक्ष्याभक्ष्ये तथा
पेयेवाच्यावाच्ये तथानृते। तस्मि
न्कालेन दोषःस्यात् सयावन्नोप
नीयते। इति मनुवचनं॥
तस्याध्यापनक्रमो यथा शास्त्र
देवा गुरू वासीनो वरुणाभिमु
खं शिशुः। अध्यापयेच्च प्रथमं
द्विजाशाभिः प्रपूजितं। इतिम
लमासतत्वे वृहस्पतिवचनं॥
शिशुपुत्रे सक्ता प्रव्रज्याश्रम
निषेधो यथा। मातरं पितरं दे
हं भार्य्याञ्चैव पतिव्रतां। शिशु
चतनये हित्वा नावसन्नाश्रमं




व्रजेत्। इति महानिर्वाणतन्त्रे
ग्रन्थहाल शब्दे द्रष्टव्यं। शिशु
कः पुं जलजन्तुविशेषः। शुशु
क इति भाषा। तत्पर्य्यायः॥
उलूपी २ इत्यमरः। हे उपल
इति ख्याते अतिचञ्चलेमत्स्ये
शिशुमाराकृति मत्स्यभेदः
उलूपी। इति कलिङ्गादयः
शोशु इतिख्यातो मत्स्यवि
शेषः उलूपीत्यन्ये। भौगाल
इति ख्याते इत्येके। शिशु
मार एव उच्यते इति सर्वस्व
तथा च रत्नकोषादौ चुलु
पी शिशुमारः स्यादुलूपी शि
शुक स्तथा। उडुंलम्पति आ
म्पति उलूपी लुप शप औ
छेदे अत्त्वं ग्रहादित्वाणिन्
गणीयादित्वात् न लोपः लो
दीर्घश्च इति क्लोकापि। शि
शुक स्तलूपी वालः प्रोष्ठी तु
सफरी द्वयोरितिवाचस्पतिः
चुलुपीति चवर्गादिः पीठ इ
तिकेचित्। शिशु रिव शिशु
कः। शिशुकः शिशुमारेऽपि ना
लकोलूपिनोरपि। इति रुद्रः
इति भरतः। अपिच। उलूपी
स्यादुलूपीव चुलुम्पी चुलकी

तथा शिशुक इति पर्य्यायः
शिशुमाराकृतौ कसे। केचि
दुक्तमत्स्ये तु पर्य्यायोऽयं नि
गद्यते। इति शब्दरत्नावली॥
शिशुकः शिशुमारस्य सदृशा
हो वराहकः। इति राजनिर्घण्टः
शिशुमारः॥ बालकः॥
इति मेदिनी॥ वृक्षविशेषः
इति हेमचन्द्रः॥
शिशुगन्धा स्त्री मल्लिकाविशेषः
यथा। लक्ष्मीपति लेवंगी स्यात्
लोमाली नवमालिका। शिशु
गन्धा मधुमल्ली तथा करुणम
ल्लय। इतिशब्दमाला॥
शिशुचान्द्रायणं क्ली व्रतविशे
षः। यथा। चतुरः प्रातरश्नीया
त्पिण्डान् विप्रः समाहितः। चतु
रोऽस्तमिते सूर्य्ये शिशुचान्द्रा
यणं स्मृतं॥ इतिमनुः॥
शिशुता स्त्री शिशुत्वं शिशोः
भावः। शिशोरवस्था॥ इति
जटाधरः॥
शिशुत्वं क्ली शैशवं। इत्यमरः
तत्पर्य्यायः बाल्यशब्दे द्रष्टव्यः
शिशुपालः पुं चेदिदेशीयरा
जः। सतु कृष्णेनहतः। शिशु
पालवधकाव्यमाघेन कृतं॥

तत्पर्य्यायः। दमघोषसुतः २
चैद्यः ३ चेदिराट् ४। इतिज
टाधरः शिशुपालकः ५ इति
त्रिकाण्डशेषः॥
शिशुपालकः पुं दमघोषसु
तः। इतित्रिकाण्डशेषः। केलिक
दम्बवृक्षः। इति शब्दचन्द्रिका
बालकपालके त्रि॥
शिशुपालहा पुं श्रीकृष्णः
इति हेमचन्द्रः॥
शिशुभावः पुं शिशुत्वं। तान्त्रि
कभावविशेषः। यथा उक्तानु
क्तञ्च यत्किञ्चित् क्रियते सर्वदा
प्रिये। शिशुभाव इति ख्या
तः सर्वतन्त्रेषु गोपितः॥ इति
तन्त्रे॥
शिशुमारः पुं जलजन्तुभेदः
शोंष इतिशुशुक इति च ख्यातः
इत्यमरभरतौ। अस्य पर्य्यायः॥
शिशुकशब्दे द्रष्टव्यः॥ ग्र
स्य नगाना श्रयणस्य पादि
शब्दे द्रष्टव्याः। तारात्मकाच्युतः
इति मेदिनी। तद्विवरणं यथा
शिशुमारस्तु यः प्रोक्तः सतु
वै यत्र तिष्ठति सन्निवेशञ्च
तस्यापि शृणुष्व मुनिसत्तम य
दृष्ट्वा कुरुते पापं दृष्ट्वा तत्रि

शिशुच्यते तावत् ध्रुवतारा
ख्यः शिशुमाराश्रिता दिवि।
तावन्त्येव तु वर्षाणि जीवत्य
भ्यधिकानि तु। उत्तानपाद
तस्याथ विज्ञेयो पुत्रको हनुः
यज्ञोऽधरश्च विज्ञेयो धर्म्मोम
र्द्धानमाश्रितः। हृदि नारायण
स्त्वास्ते अश्विनौ पूर्व्वपादयोः
वरुणश्चार्य्यमा चैव पश्चिमेत
स्य सक्थिनी शिश्ने संवत्स
रस्य मित्रोऽपाने समाश्रितः
पुच्छेऽग्निश्च महेन्द्रश्च कश्यपो
ऽथ ततो ध्रुवः। तारका शिशुमा
रस्य नास्तमेति चतुष्टयं। इत्ये
ष सन्निवेशोऽयं पृथिव्यां ज्योति
षां तथा। द्वीपानां मुदधीनां
च पर्वतानाञ्च कीर्त्तितः वर्षा
णाञ्च नदीनाञ्च ये च तेषु वस
न्ति वै तेषां स्वरूपमाख्यातं सं
क्षेपः श्रूयतां पुनः। यदम्बु वैष्णवः
काय स्ततो विप्र वसुन्धरा पद्मा
काराससमुद्भूता पर्वताब्ध्यादि
संयुता ज्योतींषि विष्णुर्भुवनानि
विष्णुर्वनानि विष्णुर्गिरयो
दिशश्च। नद्यः समुद्रा स एव स
र्व्वं यदस्ति यन्नास्ति च विप्रवर्य्य
ज्ञानस्वरूपो भगवान् यतोऽसावशे



यन्मूर्त्ति तेन वस्तुभूतः। ततोऽद्रि
शैलाब्धि धरादि भेदान् जानी
हि विज्ञान विजृम्भितानि यदा
हि शुद्धं निजरूप सर्वं कर्मक्ष
ये ज्ञानमपास्तदोषे। तदा हि
संकल्पतरोः फलानि भवन्ति नो
वस्तुषु वस्तुभेदाः। महीघटत्वं
घटतः कपालिका कपालिका
चूर्णरजस्ततोऽणुः। जनैः स्व
कर्मस्तिमितात्म निश्चयै रा ल
क्ष्यते वस्तु किमत्र वस्तु। इति
विष्णुपुराणे २ अंशे १२ अध्यायः
अपि च। केचिदेतज्ज्योति रनी
कं शिशुमार संस्थानेन भग
वतो वासुदेवस्य योगधारणया
मनुवर्णयन्ति। यस्य पुच्छा
ग्रेऽवाक्शिरसः कुण्डलीभूतदेह
स्य ध्रुव उपकल्पितः तस्य लाङ्गूले
प्रजापतिरग्नि रिन्द्रो धर्म इति
पुच्छमूले धाता विधाता च क
ट्यां सप्तर्षयः। तस्य दक्षिणावर्त्त
कुण्डलीभूतशरीरस्य यान्युदग
यनानि दक्षिणपार्श्वे नक्षत्राणि
उपकल्पयन्ति। दक्षिणायनानि
तु सव्ये यथा शिशुमारस्य कुण्ड
लाभोग सन्निवेशस्य पार्श्वयो
रुभयो रप्यवयवाः समसंख्या
भवन्ति पृष्ठे

त्वजवीथी आकाशगंगा चो
दरतः। पुनर्वसु पुष्यौ दक्षिण
वामयोः श्रोण्या आर्द्राश्लेषा च
दक्षिणवामयोः पादयोरभिजि
दुत्तराषाढे दक्षिणवामयो र्ना
सिकयोर्यथासंख्यं श्रवणपूर्वा
षाढे दक्षिणवामयो र्लोचनयो
र्धनिष्ठा मूलञ्च दक्षिणवामयोः
कर्णयो र्मघादीन्यष्ट नक्षत्राणि
दक्षिणायनानि वामपार्श्ववङ्क्रिषु
युञ्जीत। तथैव मृगशीर्षादीन्युदगयनानि दक्षि
णपार्श्ववङ्क्रिषु प्रातिलोम्येन प्रयुञ्जीत
शतभिषा ज्येष्ठे स्कन्धयो र्दक्षिण
वामयो र्न्यसेत्। उत्तराहनावगस्त्यः
अधराहनौ यमः मुखेषु चाङ्गारकः
शनैश्चर उपस्थे बृहस्पतिः ककु
दि वक्षस्यादित्यो हृदये नाराय
णो मनसि चन्द्रो नाभ्या मुशना स्त
नयो रश्विनौ बुधः प्राणापानयो
राहुर्गले केतवः सर्वाङ्गेषु रो
मसु सर्वे तारागणाः। एतदु हैव भ
गवतो विष्णोः सर्वदेवतामयं रू
पमहरहः सन्ध्यायां प्रयतो वा
ग्यतो निरीक्षमाण उपतिष्ठेत
नमो ज्योतिर्लोकाय का
लायनायानिमिषां पतये महा

पुरुषायाभिधीमहीति। ग्रहर्क्ष
ताराभय माधिदैविकं पापाप
हं मन्त्रकृतां त्रिकाले। नमस्य
तः स्मरतो वा त्रिकाले नश्येत
तत्कालजं माशु पापं इति।
श्रीभागवते ५ स्कन्धे शिशु
मार संस्थाने २३ अध्यायः॥
शिशुवाहकः पुं वनच्छागलः
इति हेमचन्द्रः॥ बालकवो
ढरि त्रि॥
शिशुवाह्यकः पुं वनच्छागः।
इति त्रिकाण्डशेषः॥
शिश्नः पुं मेढ्रः। इत्यमरः॥
अस्य पर्य्यायाः शिश्नशब्दे द्र
ष्टव्याः॥
शिश्विदानः त्रि पापकर्म्मा तत्
पर्य्यायः। कृष्णकर्म्मा २ इत्य
मरः। हे पापाचार। प्रश्न
न्निन्दते। सो शिश्विदानो सखी
षादिः हि तालव्यः॥ कृष्णपाप
चारत्वात् मलिनं कर्म्मास्य कृ
ष्णकर्म्मा। केचित्तु अकृष्णक
र्म्मा इति पठन्ति। हे निष्पापेष्वि
दि पैशाचे अस्मस्य काले शिश्वि
दानः। अकृष्णं निष्पापत्वात् शु
क्लं कर्म्मास्य अकृष्णकर्म्मा शुक्ल
कर्म्मा इत्यर्थः। इति व्याचक्षते।

च। इति भरतः॥ निष्विदा
नः कृष्णकर्म्मा शुक्लकर्मेति
कस्यचित्। इति जटाधरः
शिष वधे। इति कविकल्प
द्रुमः। शेषति। इति दुर्गादासः
शिष कि असर्वोपयोगे। इति
कविकल्पद्रुमः। असर्वोप
योगः परिशेषीकरणं। कि
शेषयति शेषति यशोराशिं
लोकः। अवशिष्टं करोति इत्य
र्थः। वे रतिशायने शिषकिर
नुवर्त्तते। कि विशेषयति वि
शेषति संपत्ता भूपं विधिः
इति दुर्गादासः॥
शिष ऌ ई ओ विशेषे। इति
कविकल्पद्रुमः। विशेष उप
रंजनं ई अशिषत्। ओ विशिन
ष्टि स्वांसूर्यायः। इति हलायु
धः मति विशिष्टं करोति इत्य
र्थः। ओ शेष्टा। इति दुर्गादासः।
शिष्टः त्रि शान्तः। सुबुद्धिः।
धीरः। तस्य लक्षणं यथा। न
पाणि पाद चपलो न नेत्रच
पलो मुनिः। न च वागङ्ग चप
ल इति शिष्टस्य लक्षणं इ
ति महाभारते अश्वमेधपर्व। अ
पि च। धर्मो नाभिमतो येन

देवः सपरिवृहगणः । ते शिष्टा
ब्राह्मणाः प्रोक्ता नित्यमात्म
गुणान्विताः ॥ इति कौर्म्मे उप
विभागे २४ अध्यायः ॥ अ
न्यच्च विशेष शब्द निरुक्तशे
षः शिष्टः प्रचक्ष्यते मन्वन्तरे
ष्वेये शिष्टा इह तिष्ठन्ति धार्मि
काः । मनुः सप्तर्षयश्चैव लोक
सन्तान कारणात् । तिष्ठन्तीह
च धर्म्मार्थन्तान् शिष्टान् परि
चक्षते ॥ तैः शिष्टैः पालितो
धर्म्मः स्थाप्यते वै युगे युगे ।
इति मात्स्ये १२० अध्यायः ॥
शिष्टाचारः पुं साधुव्यवहारः
यथा । ततः स्मार्त्तैः स्मृतो धर्म्मो
वर्णाश्रम विभागशः । एवं वै
द्विविधो धर्म्मः शिष्टाचारः स उ
च्यते ॥ त्रयी वार्त्ता दण्डनीतिः
प्रजा वर्णाश्रमेज्यया । शिष्टै
राचर्य्यते यस्मात् शिष्टाचारः
स शाश्वतः । दानं सत्यं तपो
ऽलोभो विद्येज्याप्रजनं दमः
अष्टौ तानि चरित्राणि शि
ष्टाचारस्य लक्षणम् । शिष्टाय
स्मात्तु वर्त्तन्ते मनुः सप्तर्षयश्च
ये मन्वन्तरेषु सर्व्वेषु शिष्टाचारस्त
तः स्मृतः । श्रुतिस्मृतिभ्यां वि
हितो धर्म्मो वर्णाश्रमात्मकः ।
शिष्टाचार विरुद्धस्तु धर्म्मः सत्सा
धुसम्मतः । इति मात्स्ये १२० ॥
अध्यायः ॥
शिष्टिः स्त्री आज्ञा शासने । इ
त्यमरः ॥
शिष्यः त्रि उपदिश्यः । तत्पर्य्यायः
छात्रः २ अन्तेवासी ३ ॥
इत्यमरः ॥ अन्तेसत् ४ ।
इति जटाधरः । तस्य लक्षणं ॥
यथा । वाङ्मनः काय वस्तुभिर्गुरुशु
श्रूषणे रतः एतादृशो गुणोपे
तः शिष्यो भवति नारद ॥
देवताचार्य्य शुश्रूषां मनोवाक्
कायकर्म्मभिः । शुद्धात्मा मेधा
साहो बोद्धा शिष्य इति स्मृतः
इति दीक्षातत्त्वे ॥ अपि च ॥
शान्तो विनीतः शुद्धात्मा श्रद्धा
वान् धारणाक्षमः । समर्थश्च कु
लीनश्च प्राज्ञः सच्चरितो व्रती ॥
एवमादिगुणैर्युक्तः शिष्यो भव
ति नान्यथा ॥ निषिद्धशिष्य
लक्षणमाह पापिने क्रूरचेष्टा
य शठाय कृपणाय च ॥
दीनायाधारशून्याय मंत्रद्वेषपरा
य च । निन्दकाय च मूर्खाय तीर्थ
द्वेषपराय च ॥ भक्तिहीनाय.

देवर्षि न देया मलिनाय च
गुरुता शिष्यता वापि तयोर्व
त्सर वासतः । तथा चोक्तं सार
संग्रहे । सद्गुरुः स्वाश्रितं शिष्यं
वर्षमेकं परीक्षयेत् । वर्षैके
ण भवेद्योग्या विप्रे गुणसम
न्विते । वर्षद्वयेन राजन्यो वै
श्यस्तु वत्सरैस्त्रिभिः । चतु
र्भिर्वत्सरैः शूद्रः कथिता शि
ष्ययोग्यता । इति तंत्रसारः ॥
अन्यच्च । आचार्य शासनीयस्तु
स आचार्य्य उदाहृतः । यस्त्वा
चार्य्यपराधीनस्तद्वाक्य शास
नेरतः । शासने स्थिरबुद्धिस्तु
शिष्यः सद्भिरुदाहृतः । एवंल
क्षणसंयुक्तं शिष्यं सर्व्वगुणा
न्वितं । अध्यापयेद्विधानेन मंत्र
रत्नमनुत्तमं । इति पाद्मोत्तरखण्डे
२५ अध्यायः । पुत्र शिष्ययो स्तु
ल्यत्वं यथा । यथा पुत्रस्तथा शि
ष्यो न भेदः पुत्र शिष्ययोः । तयो
र्णोपिण्डदानेच पालने पो
षणे । यथा श्रिदानाप्रमस्य त
था शिष्यस्य निश्चितं । इतीदं का
एवंशास्त्रया शुवाच कमलोद्भ
वः । इति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डे ८० अध्यायः । पुत्रशिष्या
भ्यां विशेषो यथा सनत्कुमा
र उवाच पुत्र एवास्ति देवेश य
तः शिष्यास्म्यहं विभो । नवि
शेषोस्ति पुत्रस्य शिष्यस्य च
पितामह । ब्रह्मोवाच विशेषः
शिष्यपुत्राभ्यां विद्यते धर्म्मन
न्दन । धर्म्मकर्म्मसमायोगो न
चापि गदतः शृणु । पुन्नाम्नो
नरकात्त्राति पुत्र स्तेनेह गीय
ते शेषपापहरः शिष्य इतीयं
वैदिकी श्रुतिः ॥ सनत्कुमा
र उवाच । कोयं पुन्नामको देव
नरकात्त्राति पुत्रकः कस्माच्छे
षं ततः पापं हरेच्छिष्यस्तदुद
इति वामने ७० अध्यायः । ब्र
ह्मोवाच । अतः परं प्रवक्ष्यामि शे
षपापस्य लक्षणं । ऋणं देवर्षि
भूतानां मनुष्याणां विशेषतः ।
पितृणाञ्च द्विजश्रेष्ठ सर्व्ववर्णे
ष्वचेकतः । ओङ्कारादि निवृत्तिश्च
पापकार्य्यकृतिश्च या । इत्यादि
कं महापापं त्वगम्यागमनं तथा
चूतादि विक्रियं चौरं चंडाला
दिष्वति ग्रहे । स्वदोषरोपणे पापं
परदोषप्रकाशनं । ईर्षाविद्वे
षाकाङ्क्षेष्ट निष्फलत्वे षडङ्गके ॥
ष्णाकिले तालवादित्रे नाज्ञावा

चाप्यधर्म्मजे मारणाद्व मयार्पितं नरकावह मुच्यते। पतेत्पापैश्च संयुक्तः पात्यते यदि शंकरे। न्यूनाधिक मशेषेणाशेषात् पापात् जयेत्ततः॥ शारीरं वाचिकं यत्तु मानसं त्रिविधं तथा। पितृ मातृकृतं यच्च कृतं यज्ञाश्रितैर्नवैः। ज्ञातिभिर्बान्धवैश्चापि तस्मिन्नन्यानि धर्म्मज। तत्सर्वं विलयं याति कर्म्मणा तेन शिष्ययोः तस्मात् पुत्रश्च शिष्यश्च विधातव्यो विपश्चिता। कृत मर्थ मभिध्याय शिष्यात् श्रेष्ठतमः स्मृतः। पोषणात्तारयते शिष्यः सदैवैव हि पुत्रकः। इति वामने ५८ अध्यायः॥

शिह्लः पुं शिह्लकः। इति शब्दचन्द्रिका॥

शिह्लकः पुं गंधद्रव्यविशेषः शिलारसः। शिह्लाइति लोकान् इति भाषा। तत्पर्य्यायः॥ कपिनामा २ कपिः ३ तैलं ४ कृत्रिमं ५ कपिलः ६ चला ७ तुरुष्कः ८ मुक्तिसुतः ९ पिण्डितः १० वनः ११। इति रत्नमाला पिण्याकः १२ शिह्लः १३ यावनः १४ इत्यमरः। अस्यानुलेपनगुणाः। शिह्लकः परमा मांसी देवदारु सुरानते। सर्वमीप रमा लक्ष्मी रक्षोघ्ना ज्वरनाशनाः॥ रोक्षघ्ना इति वा पाठः इति राजवल्लभः॥ अन्यत् तुरुष्कशब्दे द्रष्टव्यं॥

शिक्ष उ. शिक्षणे। इति कविकल्पद्रुमः। शिक्षी उ. शिक्षते॥ शिक्षणं विद्याग्रहणं। आशीस्तावत् पितृ देव मंत्रविदिति रघुः। इति दुर्गादासः॥

शिक्षणं क्ली विद्योपादाने। इति शिक्षाशब्दटीकायां भरतः॥

शिक्षा स्त्री शिक्षणं। शेषानां कवृत्तः॥ इति शब्दमाला वेदाङ्गशास्त्रविशेषः। इत्यमरः॥ यथा शिक्षा कल्पो व्याकरणं निरुक्तं ज्यौतिषं गणः। छन्दोविचितिरित्येतैः षडङ्गो वेद उच्यते॥ इति। तत्र अकारादि वर्णानां स्थानकरण प्रयत्न बोधिका अ कु प ह विसर्जनीयाः कण्ठ्या इत्यादिका शिक्षा। इति टीकायां भरतः॥ अथ शिक्षाशास्त्रं लिख्यते। अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं

यथा। शास्त्रानुपूर्व्वं तद्विद्याद्यथोक्तं लोक वेदयोः। प्रसिद्ध मपि शब्दार्थ मविज्ञात मबुद्धिभिः। पुन र्व्यक्तीकरिष्यामि वाच उच्चारणे विधिं। त्रिषष्टि श्चतुः षष्टिर्वा वर्णाः शम्भुमते मताः प्राकृते संस्कृते चापि स्वयंप्रोक्ताः स्वयम्भुवा॥ स्वराविंशति रेकश्च स्पर्शानां पंचविंशतिः। यदादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च कपौ चापि पराश्रितौ॥ दुस्पृष्ट श्चेति विज्ञेयो लृकारः प्लुत एव च। आत्मा बुद्ध्या समेत्यार्थान्मनो युंक्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतं। मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरं। प्रातः सवनयोगं तं छन्दो गायत्र माश्रितं॥ कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगं। तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगं सोदीर्णो मूर्ध्न्यभिहतो वक्त्र मापद्य मारुतः। वर्णान् जनयते तेषां विभागः पंचधा स्मृतः। स्वरतः कालतः स्थानात् प्रयत्नानुप्रदानतः इति वर्णविदः प्राहुर्निपुणं तं निबोधत॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वराः त्रयः। ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि। उदात्ते निषाद गान्धारावनुदात्ते ऋषभ धैवतौ। स्वरितप्रभवा ह्येते षड्ज मध्यम पंचमाः अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा। जिह्वामूलं च दन्ताश्च नासिकौष्ठौ च तालु च। ओभावश्च विवृत्तिश्च शषसा रेफ एव च जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः। यद्योभावप्रसन्धानमुकारादिपरं पदं। स्वरान्तं तादृशं विद्याद्यदन्यद्व्यक्तमूष्मणः। हकारं पंचमैर्युक्तमन्तःस्थाभिश्च संयुतं। औरस्यं तं विजानीयात् कण्ठ्यमाहुरसंयुतं। कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू। स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः। जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः। ए ऐ तु कण्ठतालव्या ओ औ कण्ठोष्ठजौ स्मृतौ। अर्द्धमात्रा तु कण्ठस्य एकारैकारयोर्भवेत्। ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतं॥ संवृतं मात्रकं ज्ञेयं वि

हृतन्नु हिमागके। घोषा वा
संवृताः सर्वे अघोषा विवृताः
स्मृताः। स्वराणां मूष्मणाञ्चैव
विवृतं करणं स्मृतं। तेभ्योऽपि वि
वृतावेङौ ताभ्यामैचौ तथैव च
अनुस्वार यमानाञ्च नासिका
स्था+न मुच्यते। अयोगवाहा विज्ञे
या आश्रयस्थानभागिनः॥
अलावुवीणानिर्घोषो दन्त्यमू
ल्य स्वरानतु। अनुस्वारस्तु क
र्तव्या नित्यं ह्रोः शषसेषु च॥
अनुस्वारो विवृत्यां तु विरामे
चाक्षरद्वये। द्विरोष्ठ्यौ तु विगृ
ह्णीयाद्यत्रौकार वकारयोः॥
व्याघ्री यथा हरेत्पुत्रान् दं
ष्ट्राभ्यां न च पीडयेत् भीता पत
नभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत्
त्। यथा सौराष्ट्रिका नारीत
क्रँ इत्यभिभाषते। एवं रंगाः
प्रयोक्तव्याः खे अराँ इव खेदया
य। रंगवर्णं प्रयुञ्जीरन् नो ग्र
सेत् पूर्वं सत्वरं दीर्घस्वरं प्र
ञ्जीयात् पश्चान्नासिक्यमाचरेत्
हृदये चैकमात्रः स्यादर्द्धमात्र
स्तु मूर्द्धनि। नासिकायां तथा
र्द्धञ्च रंगस्यैवं द्विमात्रता। हृद
याद्युत्क्रमे विद्यात् कांस्येन स

मनुस्वरं माइंवञ्च हिमावञ्च मे
धम्या इति निदर्शनं। मध्ये तु क
म्पयेत् कम्पमुभौ पार्श्वौ समौ
भवेत्। सरंगं कम्पयेत् कम्पं र
थीवेति निदर्शनं। एवं वर्णाः
प्रयोक्तव्या नाव्यक्ता न च पीड
येत्। सम्यग्वर्णप्रयोगेण ब्र
ह्मलोके महीयते। गीती शीघ्री
शिरःकम्पी तथा लिखितपाठ
कः। अनर्थज्ञोऽल्पकण्ठश्च षडेते
पाठकाधमाः। माधुर्यमक्षरव्य
क्तिः पदच्छेदस्तु सुस्वरः। धैर्यं
लयसमर्थञ्च षडेते पाठका गु
णाः। शंकितं भीतमुद्घृष्टमव्य
क्तमनुनासिकं। काकस्वरं शिर
सि गतं। तथा स्थानविवर्जितं। उ
पांशुदष्टं त्वरितं निरस्तं विलंबि
तं गद्गदितं प्रगीतं। निष्पीडि
तं ग्रस्तपदाक्षरञ्च वदेन्नदीनं
न तु सानुनास्यं। प्रातःपठे
न्नित्यमुरःस्थितेन स्वरेण शा
र्दूलरुतोपमेन। मध्यंदिने क
ण्ठगतेन चैव चक्राह्वसंकूजि
तसन्निभेन। तारं तु विद्यात् स
वनं तृतीयं शिरोगतं तच्च सदा
प्रयोज्यं। मयूरहंसान्यभृत
स्वराणां तुल्येन नादेन शिरः

स्थितेन। अचोऽस्पृष्टा यण
स्त्वीषन्नेमस्पृष्टाः शलः स्मृताः। शे
षास्पृष्टा हलः प्रोक्ता निबोधानु
प्रदानतः। यमोऽनुनासिका नह्रौ
नादिनो हझषः स्मृताः। ईषन्नादा
यणजश्च श्वासिनस्तु खफादयः
ईषच्छ्वासांश्चरो विद्यात् गोर्धामै
तत् प्रचक्षते। दाक्षीपुत्रः पाणि
निना येनेदं व्यापितं भुवि। छ
न्दः पादौ तु वेदस्य हस्तौ क
ल्पोऽथ पठ्यते। ज्योतिषामयनं
चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्या
करणं स्मृतं। तस्मात्साङ्गमधी
त्यैव ब्रह्मलोके महीयते। उदा
त्तमाख्याति वृषोऽङ्गुलीनां प्रदेशि
नी मूलनिविष्टमूर्धा। उपां
त्तमध्ये स्वरितं धृतञ्च कनिष्ठि
कायामनुदात्तमेव। उदात्तं प्र
देशिनीं विद्यात् प्रचयं मध्य
तोऽङ्गुलिं। निहतं तु कनिष्ठि
कायां स्वरितोपकनिष्ठिकां। अ
न्तोदात्तमाद्युदात्तमुदात्तमनु
दात्तं नीचस्वरितं। मध्योदात्तं स्व
रितं द्व्युदात्तं त्र्युदात्तमिति नवपद
शय्या। अग्निः सोमः प्रवो वीर्यं
हविषां स्वर्बृहस्पति रिन्द्राबृहस्प

ती। अग्निरित्यन्तोदात्तं सोम इ
त्याद्युदात्तं प्र इत्युदात्तं व इत्यनु
दात्तं वीर्यं नीचस्वरितं हविषां
मध्योदात्तं स्वरिति स्वरितं बृह
स्पति रिति द्व्युदात्तं मिन्द्राबृ
हस्पती इति त्र्युदात्तं। अनुदा
त्तो हृदि ज्ञेयो मूर्ध्न्युदात्त उदा
हृतः। स्वरितः कर्णमूले तु
सर्वास्ये प्रचयः स्मृतः। चाष
स्तु वदते मात्रां द्विमात्रं त्वेव वाय
सः। शिखी रौति त्रिमात्रन्तु नकु
लस्त्वर्द्धमात्रकं। कुतीर्थादागतं
दग्धमपवर्णञ्च भक्षितं। न तस्य
पाठे मोक्षोऽस्ति पापाहेरिव किल्बि
षात्। सुतीर्थादागतं व्यक्तं
स्वाम्नायं सुव्यवस्थितं। सुस्वरे
ण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते
मन्त्रो हीनः स्वरतो वर्णतो वा मि
थ्याप्रयुक्तो न तमर्थमाह। स
वाग्वज्रो यजमानं हिनस्ति यथेन्द्र
शत्रुः स्वरतोऽपराधात्। अनक्ष
रं हतायुष्यं विस्वरं व्याधिपीडि
तं अक्षता शस्त्ररूपेण वज्रं प
तति मस्तके। हस्तहीनन्तु योऽ
धीते स्वरवर्णविवर्जितं। ऋग्य
जुःसामभिर्दग्धो वियोनिमधिग
च्छति। हस्तेन वेदं योऽधीते स्वर

वर्णार्थं संवृतं । ऋग्यजुःसाम
भिःपूतो ब्रह्मलोके महीयते ॥
शंकरः शांकरीं प्रादाद्दाक्षीपु
त्राय धीमते । वाङ्मयेभ्यः समा
हृत्य देवीं वाचमिति स्थितिः । येना
क्षरसमाम्नायमधिगम्य महेश्व
रात् । कृत्स्नं व्याकरणं प्रोक्तं त
स्मै पाणिनये नमः । येन धौता
गिरः पुंसां विमलैः शब्दवारि
भिः । तमश्चाज्ञानजं भिन्नं तस्मै
पाणिनये नमः ॥ अज्ञानान्ध
स्य लोकस्य ज्ञानाञ्जनशलाक
या । चक्षुरुन्मीलितं येन त
स्मै पाणिनये नमः । त्रिनयन
मुखनिःसृतामिमां य इह पठेत्
प्रयतश्च सदा द्विजः । स भवति
धनधान्यपशुपुत्रकीर्त्तिमानतु
लञ्च सुखं समश्नुते । दिवीति
दिवीति । अथ शिक्षासात्म्यादात्र
स्युरुकारस्वराणां यथा सौरा
ष्ट्रिका । गीम्यचोस्पृष्टासन्ने चा
यत्र शंकरपकादश । इति वेद
शिक्षा समाप्तिमगमत् । अपि
च । अग्निरुवाच । वक्ष्ये शिक्षां त्रि
षष्टिः स्युर्वर्णा वा चतुःषष्टिकाः
स्वरा विंशतिरेकश्च स्पर्शानां पं
चविंशतिः । यादयश्च स्मृता ह्यष्टौ

चत्वारश्च यमाः स्मृताः । अनुस्वारो
विसर्गश्च ᳲ पौ चापि पराश्रि
तौ । दुःस्पृष्टश्चेति विज्ञेयो ऌ
कारः प्लुत एव च । रंगश्च खेस
वे प्रोक्ते हकारः पंचमैर्युतः ॥
अंतस्थाभिः समायुक्तः औरसः
कण्ठ्य एकलः । आत्मा बुद्ध्या स
मेत्यार्थान्मनो युंक्ते विवक्षया ॥
मनः कायाग्निमाहन्ति स प्रेरयति
मारुतं । मारुतस्तूरसि चरन्
मन्द्रं जनयति स्वरं । प्रातःसवनयो
गं तं छन्दो गायत्रमाश्रितं । कण्ठे
माध्यन्दिनयुगं मध्यमं त्रैष्टुभानु
गं । तारं तार्तीयसवनं शीर्षण्यं ज
गतानुगं । सोदीर्णो मूर्द्ध्न्यभिहतो
वक्त्रमापद्य मारुतः । वर्णान् ज
नयते तेषां विभागाः पंचधा
स्मृताः । स्वरः कालतः स्थाना
त् प्रयत्नानुप्रदानतः ॥ अष्टौ
स्थानानि वर्णानामुरः कण्ठः
शिरस्तथा । जिह्वामूलञ्च दन्ता
श्च नासिकोष्ठौ च तालु च । ओ भा
वश्च विवृत्तिश्च शषसा रेफ एव
च । जिह्वामूलमुपध्मा च गतिरष्ट
विधोष्मणः । यद्योभाव प्रसंधा
नमुकारादि परं पदं । स्वरान्तं
तादृशं विद्यात् यदन्यद्व्यक्त ।

मुष्मणः । ऊतीभादागते द्वय
मपवर्णञ्च भक्ष्यते । एवमुच्चार
णीयमेवमुच्चारणमशुभं । सूत्री
भादागतेद्वयं स्थानार्थमेव
स्थितं । सुस्वरेण सुवक्त्रेण प्रयु
क्तं ब्रह्म राजते । न करालो न
लम्बोष्ठो नाव्यक्तो नानुनासि
कः । गद्गदो बद्धजिह्वश्च न वर्णा
न् वक्तुमर्हति । उदात्तश्चानुदा
त्तश्च स्वरितश्च स्वरास्त्रयः । ह्र
स्वो दीर्घः प्लुत इति कालतो नि
यमा अचि । कण्ठ्यावहाविचुयशा
स्तालव्या ओष्ठजावुपू । स्युर्मूर्द्ध
न्या ऋटुरषा दन्त्या ऌतुलसाः
स्मृताः ॥ जिह्वामूले तु कुः
प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः
एऐ तु कण्ठतालव्यौ ओ औ
कण्ठोष्ठजौ स्मृतौ । अर्द्धमात्रा
तु कण्ठ्या स्यादेकारैकार
यो भवेत् । अयोगवाहा विज्ञे
या आश्रयस्थानभागिनः । अ
चोऽस्पृष्टा यणस्त्वीषन्नेम स्पृ
ष्टाः शलः स्मृताः । शेषाः स्पृष्टा ह
लः प्रोक्ता निबोधानुप्रदानतः ॥
यमोऽनुनासिका न ह्रो नादि
नो हझषः स्मृताः । ईषन्नादो य
णजशः श्वासिनस्तु खफादयः । ईष

च्छ्वासं स्वरो विद्याद् गोर्धामेत
त्प्रचक्षते । इत्याग्नेये शिक्षा
ध्यायः ॥
शिक्षाकरः पुं व्यासः । इति
शब्दमाला । शिक्षाकर्त्तरि त्रि
शिक्षागुरुः पुं विद्यादाताग
रुः । मन्त्राद्युपदेशकर्त्तादीक्षागु
रुः । यथा इये हि रसभाववि
शेषदीक्षागुरो र्विक्रमादित्य
स्याभिरूपभूयिष्ठा परिषत् ॥
इत्यभिज्ञानशाकुन्तलायां १ अ
ङ्कः । शिक्षितः त्रि विज्ञः । इत्य
मरः । शिक्षायुक्तः । यथा । आप
रितोषाद्विदुषां न साधु मन्ये प्रयो
गविज्ञानं । बलवदपि शिक्षिता
नामात्मन्यप्रत्ययं चेतः । इत्यभि
ज्ञानशाकुन्तलायां १ अङ्कः ॥
शिक्षिताक्षरः पुं शिक्षाकारी
छात्रः । यथा । स्यादक्षरखरवः
कालाक्षरिकः शिक्षिताक्षरः ॥
इति त्रिकाण्डशेषः ॥
शी ङ ल ञि स्वप्ने । इति क
विकल्पद्रुमः ॥ ङ ल शेते । ञि
शयितोऽस्ति । सत्वेपि शयामी
ति गणकृतानित्यत्वात् परस्मै
पदे शपो लुगभावे चेति रमा
नाथः । वस्तुतस्तु शेते शयः

पश्चात् शाय इवाचरतीति क्को
साधे। इति दुर्गादासः ॥
शीः स्त्री शान्तिः। शयने। इति
शब्दरत्नावली ॥
शीक ऋ ङ. सेके। सर्पे। इति
कविकल्पद्रुमः ॥ ऋ अशिशी
कत। ङ. शीकते। इति दुर्गादा
सः। शीकक्ति आमर्षे। सेके॥
इति कविकल्पद्रुमः। कि शीक
यति शीकति आमर्षः स्पर्शः।
तथा च। चेरावतीतरंगार्द्रैः शी
कयंति च यद्वपुः। इति हला
युधः। वायवः स्पृशन्तीत्यर्थः
भट्टमल्लस्तु आमर्षणम् इति म
हेंस्य यमर्थं पठित्वा सन्माध्य
माह। इति दुर्गादासः ॥
शीकरं क्ली शल्लद्रवः ॥
इति मेदिनी ॥
शीकरः पुं वातादिप्रेरितज
लकणाः। इत्यमरः। वायुः
इति मेदिनी ॥
शीघ्रं क्ली विलम्बाभावः। त
त्पर्य्यायः। त्वरितं २ लघु ३ क्षि
प्रं ४ अरं ५ द्रुतं ६ सत्वरं ७
चपलं ८ तूर्णं ९ अविलंबितं
१० आशु ११ अव्ययाः शीघ्रवा
चकाः यथा। स्राक् १२ झटिति
१३ अञ्जसा १४ अह्नाय १५ सप
दि १६ द्राक् १७ मंक्षु १८। तद्व
ति त्रि इत्यमरः ॥ लामज्जके।
इति राजनिर्घण्टः ॥
शीघ्रगः त्रि द्रुतगामी। यथा
हरिते रोगातुरतापः शस्याना
मीतिभिश्च विध्वंसः। कपिलेशी
घ्रगमत्व देवच्छंसो ऽथ दुर्भि
क्षं ॥ इति तिथ्यादितत्त्वं ॥
वायौ पुं। इत्यमरे आशुगश
ब्द दर्शनात् ॥
शीघ्रगामी त्रि आशुगमनशी
लः शीघ्रं गच्छतीत्यर्थे शीघ्र
शब्दपूर्वक गमधातोर्णिन् प्रत्य
येन निष्पन्नः ॥
शीघ्रचेतनः पुं कुक्कुरः। इति श
ब्दमाला ॥ द्रुतचेतनायुक्ते त्रि
शीघ्रजन्मा पुं करञ्जविशेषः।
कांटाकरञ्ज इति भाषा। यथा
पूतीकः पाशुलः पोशः शीघ्र
जन्मा कृतमालकः। इति श
ब्दचंद्रिका ॥
शीघ्रपुष्पः पुं अगस्त्यवृक्षः॥
इतिराजनिर्घण्टः ॥
शीघ्रवेधी त्रि शीघ्रशरवेधकर्त्ता
तत्पर्य्यायः। लघुहस्तः २।
इति हेमचन्द्रः ॥

शीघ्रा स्त्री दंतीवृक्षः। इति रा
जनिर्घण्टः ॥
शीघ्रीयं त्रि द्रुतसंबधि शीघ्र
भवं शीघ्रशब्दात् तीय प्रत्य
येन निष्पन्नं ॥
शीतं क्ली हिमगुणः। इत्यम
रः। जलं। इति शब्दमाला। त्व
चं। इति राजनिर्घण्टः। शीतं
तुषार वानीर बहुवारद्रुमेषु च
इति भरतधृताजयः ॥
शीतः पुं वेतसवृक्षः। बहुवा
रकवृक्षः। इत्यमरः ॥ अशन
पर्णी। इति शब्दरत्नावली।
पटलः। निम्बः। कर्पूरः। इति
राजनिर्घण्टः। हिमर्त्तुः। अ
स्यविवरणं हेमंतशब्दे द्रष्ट
व्यं शीतः त्रि शीतलः। इत्यम
रः। अलसः। इति मेदिनी। क्व
थितः। इति शब्दचंद्रिका। शीत
लद्रव्यगुणाः। पित्तनाशित्वं।
बल कफ वायु कारित्वं। गुरु
त्वञ्च। इति राजवल्लभः ॥
शीतकः पुं शीतकालः। सुस्थि
तः। दीर्घसूत्री। इति मेदिनी ॥
अशनपर्णी। इति शब्दरत्नावली
वृश्चिकः। इति शब्दमाला ॥
शीतकरः पुं चंद्रः। इति हेम
करशब्द दर्शनात् शीतलपा
निपुके शीतकारिणि च त्रि।
शीतकषायः पुं हिमकषायः
यथा। क्षुण्णं द्रव्यपलं सम्यक्
षड्भिर्जलपलैः प्लुतं। शार्वरी
मुषितः स्यात्तद्धिम शीतकषा
यकः। इति वैद्यकं ॥
शीतकालः पुं हिमर्त्तुः।
सतु अग्रहायणपौषमासद्वय
कालात्मकः। तत्पर्य्यायः शीत
कः २। इति मेदिनी हेमन्तः ३
इत्यमरः। सहाः ४ इतिजटा
धरः ॥ हैमनः ५ इति शब्दर
त्नावली। कूपोदकं वटच्छा
या श्यामा स्त्री इष्टकागृहं।
शीतकाले भवेदुष्णमुष्णकाले
च शीतलं। इति चाणक्यः ॥
शीतकिरणः पुं चंद्रः। यथा
कांतेकोऽय मुदेति शीतकिर
णोजातः कुतो वारिधेः कस्ते
सुन्दरि सोदरः कर सखे दत्ते
त्वदीये स्तने। यस्या त्वं शुभ
शीलवती कुलवती भ्रातापि यस्य
स्तव इत्थं श्रीपरिहास कौतुक
लया मुग्धो हरिः पातु वः ॥
इत्युद्भटः ॥
शीतकुम्भः पुं करवीरः। इति

वा।



रत्नमाला ॥
शीतकुम्भी स्त्री जलजवृक्षवि
शेषः। शीउलिकुप् इति भा
षा। यथा। शीतली शीतकुम्भीच
शुक्लपुष्पा जलोद्भवा।
इतिरत्नमाला ॥
शीतकृच्छ्रः पुं व्रतविशेषः। य
था। यदातुशीतं क्षीरादिपीयते
तदा शीतकृच्छ्रः। त्र्यहं शीतं
पिवेत्तोयं त्र्यहं शीतं पयःपिवे
त्। त्र्यहंशीतंघृतंपीत्वावायुभ
क्षः परत्र्यहे। इति यमस्मर
णात्। इति मिताक्षरा ॥
शीतगन्धं क्ली श्वेतचन्दनं ॥
इति राजनिर्घण्टः ॥
शीतगुः पुं चन्द्रः। इति वोप
देवः ॥
शीतचम्पकः पुं दर्पणः ॥ प्र
दीपः। इति मेदिनी शब्दरत्ना
वल्यौ ॥
शीतपर्णी स्त्री अर्कपुष्पिका
अर्कफुली इतिभाषा। इतिरत्न
माला ॥
शीतपल्लवा स्त्री भूमिजम्बुः।
इति रत्नमाला ॥
शीतपाकिनी स्त्री काकोली
इति शब्दमाला। महासमङ्गा
इति राजनिर्घण्टः ॥
शीतपाकी स्त्री वाट्यालकः ॥
इति शब्दरत्नावली। काकोली
इति रत्नमाला। गुञ्जा। इति
राजनिर्घण्टः ॥
शीतपुष्पं क्ली परिपेलं। इति
राजनिर्घण्टः ॥
शीतपुष्पः पुं शिरीषवृक्षः।
इतिराजनिर्घण्टः ॥
शीतपुष्पकं क्ली शैलेयं। इ
ति शब्दचन्द्रिका ॥
शीतपुष्पकः पुं अर्कवृक्षः। इ
ति राजनिर्घण्टः ॥
शीतपुष्पा स्त्री अतिवला। इति
राजनिर्घण्टः ॥
शीतप्रभः पुं कर्पूरः। इतिराज
निर्घण्टः ॥ शीतलप्रभायुक्ते त्रि
शीतप्रियः पुं पर्पटः ॥ इति
राजनिर्घण्टः ॥
शीतफलः पुं उडुम्बरः। पीलुः
इतिराजनिर्घण्टः ॥
शीतवला स्त्री महासमङ्गा।
इतिराजनिर्घण्टः ॥
शीतभानुः पुं चन्द्रः। इति शब्द
रत्नावली ॥
शीतभीरुः स्त्री मल्लिका। इत्य
मरः। शीतभीते त्रि ॥

शीतमञ्जरी स्त्री शेफाली। इति
राजनिर्घण्टः ॥
शीतमयूखः पुं चन्द्रः। कर्पूरः
इति मेदिनी ॥
शीतमरीचिः पुं चन्द्रः। कर्पूरः।
इतिशब्दरत्नावली ॥
शीतमूलकं क्ली उशीरं। इतिरा
जनिर्घण्टः। शीतलमूलयुक्ते त्रि
शीतरम्यः पुं प्रदीपः। इति ज
टाधरः। शीतरमणीये त्रि। शी
तरश्मिः पुं चन्द्रः। यथा हेलिः
सूर्य्यश्चन्द्रमाः शीतरश्मिः ॥
इति ज्योतिस्तत्त्वं। कर्पूरश्च। शी
तलं क्ली पुष्पकासीसं। शै
लजं। मलयोद्भवे। तन्नेचन्दने
इति मेदिनी। पद्मकं ॥
मौक्तिकं। इति राजनिर्घण्टः ॥
शैलं। इति शब्दरत्नावली ॥
वीरणमूले। इतिशब्दचन्द्रिका
शीतलः पुं अशनपर्णी। इत्य
मरः ॥ अर्हद्विशेषः। स तच्च
विंशतितीर्थंकरमध्ये। दशमती
र्थंकरः। इति हेमचन्द्रः। व्रतवि
शेषः। सत्त्व मेष संक्रान्त्यां क
र्त्तव्यः ॥ चन्द्रः। इति शब्दरत्ना
वली। बहुवारवृक्षः। इति शब्द
चन्द्रिका। चम्पकः। कर्पूरभे।
दः रालः। इतिराजनिर्घण्टः ॥
शीतलः त्रि शीतगुणविशिष्टः
तत्पर्य्यायः। सुषीमः २ शिशिरः
३ जडः ४ तुषारः ५ शीतः ६
हिमः ७ इत्यमरः ॥
शीतलकं क्ली सितोत्पलं ॥
इति राजनिर्घण्टः ॥
शीतलकः पुं मरुवकः। इति
राजनिर्घण्टः ॥
शीतलच्छदः पुं चम्पकः। इ
तिराजनिर्घण्टः। शीतलपत्त्र
त्रि। शीतलजं क्ली उत्पलं। इति
राजनिर्घण्टः। हिमवारिच ॥
शीतलता स्त्री शीतलत्वं। शी
तलस्वभाव इत्यर्थे तद्वते तान्त
मिति संक्षिप्तसारसूत्रेण त्वप्र
त्ययनिषेधः ॥
शीतलत्वं क्ली जडता। इति
राजनिर्घण्टः। शीतलताच ॥
शीतलप्रदः पुं चन्दनं। इति
केचित्। हिमदातरि त्रि ॥
शीतलवातकः पुं अशनपर्णी।
इति शब्दरत्नावली ॥
शीतलवायुयुक्ते त्रि ॥
शीतला स्त्री शीतलीवृक्षः। य
था। शीतला शीतली शीतकुम्भी
पाण्डुरपुष्पिका। इति शब्दचन्द्रिका



देवीविशेषः। साच वसन्तविस्फो
टकादे रधिष्ठात्री देवता। यथा
स्कन्द उवाच भगवन् देव देवे
श शीतलायाः स्तवं शुभं। व
क्तु महसि शेषेण विस्फोटक
भयापहं। ईश्वर उवाच। नमा
मि शीतलां देवीं रासभस्थां दि
गम्बरीं। मार्ज्जनीकलसोपेतां
सूर्पालङ्कृत मस्तकां। इति स्क
न्दपुराणं। अस्या विवरणं म
सूरिकाशब्दे द्रष्टव्यं। कुटुम्बि
नी। ग्रामशीतला॥ बालु
का। इति राजनिर्घण्टः॥
शीतली स्त्री जलजवृक्षविशे
षः। शिउलीच्छाप् इति भाषा।
तत्पर्य्यायः। शीतकुम्भी २ शुक्ल
पुष्पा ३ जलोद्भवा ४ कालानुसा
रिवा ५ इति रत्नमाला॥
शीतवल्कः पुं उडुम्बरः। इति
राजनिर्घण्टः। शीतलवल्क
लेऽपि शीतवीर्य्यकः पुं प्लक्षवृ
क्षः। इति राजनिर्घण्टः॥
शीतलवीर्य्ययुक्ते त्रि॥
शीतशिवं क्ली सैन्धवलवणं॥
शैलेयनामगन्धद्रव्यं। इत्यमरः
शीतशिवः पुं मधुरिका। इत्यम
रः। शक्तुफलावृक्षः। इति।
मेदिनी।
शीतशिवा स्त्री मिश्रेया। इति
राजनिर्घण्टः॥ शमीवृक्षः॥
इति रत्नमाला॥
शीतशूकः पुं यवः। इति के
चित्। शीतलशूकयुक्ते त्रि॥
शीतसहः पुं पीलुवृक्षः। इति
जटाधरः। शीतसहनीये त्रि॥
शीतसहा स्त्री नीलसिन्धुवारः॥
वासन्ती। इति राजनिर्घण्टः॥
शीतस्फारं क्ली श्वेतटङ्कणं। इ
ति राजनिर्घण्टः॥
शीता स्त्री रामपत्नी। इति शब्द
रत्नावली। लाङ्गलपद्धतिः। इत्यम
रटीकायां भरतः। यथा शीता
नभःसरिदिति लाङ्गलपद्धतौ च
शीता दशाननरिपोः सहधर्म्मिणी
च॥ शीतं स्मृतं हिमगुणे च त
दन्विते च। शीतोऽलसे च बहुवा
रवृक्षे च दृष्टः॥ इति तालव्यादौ
धरणिः। अतिबला॥
कुटुम्बिनी दूर्वा॥
शिल्पिकातृणं। इति राजनिर्घण्टः
शीतांशुः पुं कर्पूरः। इति राज
निर्घण्टः॥ चन्द्रः। यथा।
शीतांशु सिंह मकरे जनयति स
तते जन्मराशौ नराणां॥

इति ज्योतिस्तत्त्वं॥
शीतांशुतैलं क्ली कर्पूरतैलं।
इति राजनिर्घण्टः॥
शीताङ्गी स्त्री हंसपदीवृक्षः।
इति राजनिर्घण्टः। शीतलाङ्गे त्रि
शीतादः पुं दन्तरोगविशेषः॥
तस्य निदानं दन्तशब्दे द्रष्टव्यं।
तदौषधं यथा। शीतादे हृत
रक्ते तु तोय नागर सर्षपान्।
निष्क्वाथ्य त्रिफलाञ्चापि कुर्य्या
द्गण्डूषधारणं। कासीस लोध्र
कृष्णा मनःशिला सप्रियङ्गु ते
जोह्वा। एतच्चूर्णं मधुयुक् शी
तादे हन्ति मांसहरं। तेजोह्वा
तेजवला। तैलं घृतं वाथवा
तद्वत् शीतादे सम्प्रशस्यते।
इति भावप्रकाशः॥
शीताद्रिः पुं हिमालयपर्वतः
इति केचित्॥
शीतार्त्तः त्रि शीतेन पीडितः।
तत्पर्य्यायः। शीतलुः २। इति
जटाधरः॥
शीतालुः त्रि शीतार्त्तः। इति
जटाधरः॥
शीतावल्ला स्त्री महासमङ्गा
इति राजनिर्घण्टः॥
शीताश्मा पुं चन्द्रकान्तमणिः
इति
राजनिर्घण्टः। शीतलप्रस्तरश्च
शीतीभावः पुं मोक्षः। इति
त्रिकाण्डशेषः। शीतलत्वञ्च
शीतोत्तमं क्ली जलं। इति श
ब्दचन्द्रिका॥
शीत्यं त्रि सीत्यं कृष्टं। इत्यम
रटीकायां रमानाथः। शीत
योग्यञ्च॥
शीत्कारः पुं वरस्त्रीणां रति
कालध्वनिः। यथा। शीत्कारो
रतनारीचः सुरते वरयोषितां।
इति जटाधरः॥
शीत्कृतं क्ली शीत्कारः॥
इति धरणिः॥
शीधुः पुं क्ली पक्वेक्षुरसकृत
मद्यं। इत्यमरभरतौ॥
शीधुपः त्रि शीधुपानकर्त्ता।
इति प्राह्निकाः॥
शीधुगन्धः पुं बकुलवृक्षः। इ
ति त्रिकाण्डशेषः। मद्यगन्धश्च।
शीनं त्रि घनीभूतघृतादि। इति
मुग्धबोधव्याकरणं॥
शीनः पुं मूर्खः अजगरः
इति मेदिनी॥
शीफालिका स्त्री शेफालि
का। इत्यमरटीकायां भरतः।
शीभ ऋ ङ कत्थने इति कवि



कल्पद्रुमः ॥ त्र प्रशंसि शीभृ ङ. शीभते कत्थने प्रशंसा। इति दुर्गादासः ॥
शीभवः पुं शीकरः। इति शब्दरत्नावली ॥
शीभ्यः पुं शिवः। वृषः। इति केचित् ॥
शीरः पुं अजगरसर्पः। इति शब्दरत्नावली ॥
शीरी पुं हरिदर्भः। इतिराजनिर्घण्टः ॥ हरिद्दर्भ इति वा पाठः ॥ शीर्णं क्ली स्थौणेयके ॥
इतिभावप्रकाशः ॥
शीर्णो त्रि कृशः ॥ विशीर्णः इति मेदिनी ॥
शीर्णमाला स्त्री शालिपर्णी। इति शब्दचंद्रिका विशीर्णमालाच्च। शीर्णपत्रः पुं कर्णिकाररूक्षः। इति शब्दचंद्रिका। पट्टिकालोध्रः। निम्बः। इति राजनिर्घण्टः। विशीर्णपत्रे क्ली ॥
शीर्णपर्णः पुं निम्बवृक्षः। इति राजनिर्घण्टः। विशीर्णपत्रे क्ली
शीर्णपादः पुं यमः। इति त्रिकांडशेषः कृशचरणश्च ॥
शीर्णपुष्पिका स्त्री मधुराकुची इति शब्दचंद्रिका ॥
शीर्णवृन्तं क्ली वृहत्खोले तरमुज इति भाषा। इति शब्दचंद्रिका। तत्पर्यायः ॥ खरवासः २ इति रत्नमाला ॥ खरवाशः ३ इति केचित्। अस्यगुणाः कफ मेदाग्नि रुचि शुक्रकारित्वं। क्षारत्वं। मधुरत्वं आनाह प्लीहनाशित्वं लघुपाकित्वञ्च इतिराजवल्लभः ॥ शीर्णांघ्रिः पुं यमः। इति हेमचंद्रः॥ कृशपादे त्रि ॥
शीर्त्तिः त्रि अपकारकः। हिंसकः। इति शृधातोः औणादिक क्तिन् प्रत्ययेन निष्पन्नः। इति सिद्धांतकौमुदी ॥
शीर्षं क्ली मस्तकं। इत्यमरः। कृष्णागुरुः। इति राजनिर्घण्टः॥
शीर्षकं क्ली शिरस्त्राणम्। साहः टोप् इति भाषा। तत्पर्यायः। शीर्षण्यं २ शिरस्कं ३ इत्यमरः शिरोस्थि। इतिराजनिर्घण्टः॥ जयपराजयपत्रे ॥ यथा याज्ञवल्क्यः। तुलाग्न्यापोविषं कोषोदित्यानीह विशुद्धये। महाभियोगेष्वेतानि शीर्षकस्थेभियोक्तरि ॥

विशुद्धये सन्दिग्धार्थस्य सन्देहनिवृत्तये। महाभियोगेषु महापातकादि गुरुतराभियोगेषु। शीर्षकस्थे शीर्षकं प्रधाने शिरो व्यवहारस्य चतुष्पादः जयपराजय लक्षणः। तेन दण्डो लक्ष्यते तत्र तिष्ठतीति शीर्षकस्थः तत्स्थयुक्तदण्डभागीत्यर्थः इतिदिव्यतत्वं ॥
शीर्षकः पुं राहुग्रहः। इति शब्दरत्नावली। मस्तके क्ली। शीर्षघाती त्रि मस्तकच्छेदकः। शीर्षशब्दपूर्वक हन धातोः कर्म्मण्यां कुमारशीर्षाभ्यां हनः। इतिसंक्षिप्तसारसूत्रेण णिन् प्रत्ययेन निष्पन्नः ॥
शीर्षच्छेदिकः त्रि वधार्हः। यथा। स शीर्षच्छेदिकः शीर्षच्छेद्योयोवधमर्हति। इति हेमचंद्रः
शीर्षच्छेद्यः त्रि मस्तकच्छेदनोपयुक्तः। वध्यः। इत्यमरः ॥
शीर्षण्यं क्ली शीर्षकं। शिरस्त्रं इत्यमरः। शीर्णि शिरोरक्षणाय साहे टोप् इति ख्याते। शीर्षके खरत्वमस्मात्। शीर्षकं। शीर्षमारोहति शीर्षण्यं च्छे इ कादिति यः। शिवत्वायने शिरस्त्रे उः। इति भरतः ॥
शीर्षण्यः पुं विशदकचः। तस्यर्य्यायः शिरस्यः २ इत्यमरः। हे शेतः स्नानादिना वा निर्म्मले अन्योन्यासंपृक्ते केशे। शीर्षे भवे शीर्षण्यं च्छेकादिति यः। पाददंतेत्यादिना शीर्षस्य शीर्षन्नादेशः। इति भरतः ॥
शीर्षरक्षं क्ली शिरस्त्राणं। यथा। शिरस्त्रं शीर्षरक्षञ्च शीर्षण्यं शीर्षकञ्च तत् इतिहारावली
शील त्रि समाधौ। इति कविकल्पद्रुमः। त्रि शीलितोः लि समाधिः सेवानुभावनं प्रवृत्तिर्वा। यः शीलति सदा धर्ममिति हलायुधः। इति दुर्गादासः ॥
शील न क अभ्यासे। अतिशायने। इति कविकल्पद्रुमः ॥ अतिशायनं अतिशयकरणं तालव्यादि। अशिशीलत्। उपधारणे इत्यन्ये। शीलय नीलनिचोल मिति जयदेवः। इतिदुर्गादासः ॥
शीलं क्ली स्वभावः ॥ सद्वृत्ते इत्यमरमेदिन्यौ ॥
शीलः पुं अजगरसर्पः। इति शब्दरत्नावली। चरित्रे। इत्य-



मरटीकायांनयनानंदः।
शीलनं क्ली अभ्यासेनाप्रति
शायनं।उपधारणं सेवानुभा
वने।प्रवर्तनं। इति शीलधातो
र्ल्युट् प्रत्ययेन निष्पन्नं। पाठ
निश्चयः। यथा। भविता श्र
णानी शीलनं स्मृतं॥ इति
ब्रह्मवर्गे त्रिकाण्डशेषः॥
शीलवान् त्रि शीलविशिष्टः।
सत्वभावः। यथा। पश्याश्विनो
शीलवतां नराणां सद्वृत्तभाजां
विजितेंद्रियाणां पवित्रिथाना
मिद मायु स्वं चिन्तं सदाहु
ष्णुनिसंवादः॥ इति मल
मासतत्वे। सद्वृत्तः। इति शी
लपाल्यार्थदर्शनात्॥
शीला स्त्री कौण्डिन्यमुनिप
त्नी।यथा।मध्याह्ने भोजनवेलायां
समुत्तीर्य सरित्तटे। ददर्श शी
ला सा स्त्रीणां समूहं रक्तवा
ससां। इति तिथ्यादितत्वं॥
शीलितं क्ली चीर्णं। इति त्रि
काण्डशेषः।अभ्यस्ते त्रि॥
शीवलं क्ली शैवलं।शैवाले
इति मेदिनी॥
शीवा पुं अजगरसर्पः।शीभा
तो शेवादिक कनिप्रत्ययेन
निष्पन्नः।इति सिद्धांतकौमुदी।
शुक सर्पे।इति कविकल्पद्रुमः
शुकति। सर्पो गमने। इति
दुर्गादासः॥
शुक स्त्री शोणकः। इत्यमरः
शुकं क्ली ग्रन्थिपर्णी।इत्यमरः
वस्त्रं॥ वस्त्राञ्चलं।शिरस्त्राणं।
इति हेमचंद्रः। श्योणाकवृक्षः
इति विश्वः॥
शुकः पुं पक्षिविशेषः। शुया।
इति वंगभाषा शुगा इति हिंदी
भाषा।तत्पर्यायः॥ कीरः २
इत्यमरः। वक्रतुण्डः ३ मेधा
वी ४ दाडिमप्रियः ५ रक्ततुण्डः
६ वक्रचञ्चुः ७ चिमिः ८
चिमिकः ९ ।इति शब्दरत्नावली
शुकः १० प्रियदर्शनः ११ ॥
इति जटाधरः। मञ्जुपाठकः॥
१२ अस्य मांसगुणाः। परमवृ
ष्यत्वं। विपाके गुरुत्वं। शीत
लत्वं।कासक्षयवात हरत्वं॥
संग्राहित्वं। लघुत्वं।दीपनत्वञ्च
इति राजनिर्घण्टः॥ तस्य शुभ
सूचकत्वं यथा।वामः पठन्
राजशुकः प्रयाणे शुभं भवेद्
क्षितिपतेः प्रवेशे। वनेचराः का
ष्ठशुकाः प्रयातुः स्युः सिद्धि।


दाः संमुख मापतंतः॥ इति व
संतराजशाकुने ८ वर्गः॥
व्याससुतः। सच परीक्षिताय श्री
मद्भागवतं श्रावयामास।अस्यो
त्पत्यादिर्यथा। हरिवंशे वायवी
ये च। पराशर कुलोत्पन्नः शु
को नाम महायशाः।व्यासाद
रण्यां सम्भूतो विधूमोऽग्निरिव
ज्वलन्। स तस्यां पितृकन्यायां
पीवर्यां जनयिष्यति। कृष्णं
गौरं प्रभुं शम्भुं तथा भूरि
श्रुतं जयं। कन्यां कीर्तिमती
षष्ठीं योगिनीं योगमातरं।
ब्रह्मदत्तस्य जननीं गृहिणीम
नुहस्य च। इति विष्णुपुराणीय
अंशे १४ अध्यायटीकायां श्री
धरस्वामी।वह्निपुराणे प्रजाप
तिसर्गनामाध्यायेप्येवं॥
अपिच। द्वैपायनाच्छुको जज्ञे
भगवानेव शंकरः अंशेनैवा
वतीर्योर्व्यां संप्राप परमंपदं
शुकस्यापि भवन् पुत्राः पञ्चा
त्यंततपस्विनः। भूरिश्रवाः प्र
भुः शम्भुः कृष्णो गौरश्च पंच
मः।कन्या कीर्तिमती चैव यो
गमाता धृतव्रता। इति कौर्मे
१२ अध्यायः॥ सच श्रीकृष्णस्य
कौमारे वृंदावने उपनंदस्य क
न्या अभूत्। इति पाद्मे पाता
लखण्डे। रावणमंत्री शिरीषवृ
क्षः। इति मेदिनी। वृक्षविशे
षः। शोषालकोंटा। इति भा
षा। इति रत्नमाला॥
शुकच्छदं क्ली ग्रंथिपर्णी।इ
ति जटाधरः॥
शुकजिह्वा स्त्री वृक्षविशेषः
शुयाठँ।टी इति भाषा यथा
शुकाख्या शुकनामा च शुक
जिह्वा शुकानना। इति रत्नमा
शुकतरुः पुं शिरीषवृक्षः।इति
रत्नमाला॥
शुकद्रुमः पुं शिरीषवृक्षः॥
इति शब्दमाला॥
शुकनामा स्त्री शुकजिह्वा
इति रत्नमाला। शूकसंज्ञके त्रि
शुकनाशनः पुं दद्रुघ्नः।इति
राजनिर्घण्टः। शूकनाशके त्रि
शुकनासः पुं श्योणाकवृक्षः।
इत्यमरः। शुकवन्नासायुक्ते त्रि
शुकपिण्डिः स्त्री शूकशिम्बी
इति शब्दरत्नावली॥
शुकपुच्छः पुं गंधकः।इति हे
मचंद्रः शुकस्य लांगूलञ्च॥शु
कपुच्छकं क्ली स्थौणेयं। इति

राजनिर्घण्टः । शुकवत् पुच्छ
युक्ते त्रि ॥
शुकपुष्पं क्ली स्थौणेयं । इति
भावप्रकाशः ॥
शुकपुष्पः पुं शिरीषवृक्षः । इति
राजनिर्घण्टः ॥
शुकप्रियः पुं शिरीषवृक्षः । इति
भावप्रकाशः । शुकवल्लभे त्रि ।
शुकप्रिया स्त्री जम्बुः । इति रा
जनिर्घण्टः ॥
शुकफलः पुं अर्कवृक्षः
इति राजनिर्घण्टः ॥
शुकम् व्य ग्रीत्रे । इति केचित्
शुकवर्हं क्ली गन्धद्रव्यविशेषः
गाँठियाला इति भाषा । इति
शब्दरत्नावली ॥
शुकवल्लभः पुं दाडिमः । इति
राजनिर्घण्टः । शुकप्रिये त्रि
शुकवाहः पुं कामदेवः । इति
केचित् । शुकपक्षिवाहके त्रि
शुकशिम्बा } स्त्री कपिकच्छुः
शुकशिम्बिः } इति शब्दरत्नावली
शुकाख्या स्त्री वृक्षविशेषः । शु
कहुँडी इति भाषा तत्पर्य्यायः
शुकनासा २ शुकशिका ३
शुकानना ४ इति रत्नमाला
शुकादनः पुं दाडिमः । इति

शब्दचन्द्रिका । शुकस्यादनीयर
समात्रे त्रि ॥
शुकानना स्त्री शुकाख्यावृक्षः
इति रत्नमाला । शुकतुल्यमुखे
त्रि शुकी स्त्री कश्यपपत्नी । यथा
शुकी श्येनी च भासी च सुग्रीवा
शुचिगृध्रिका । अश्वशुचिभाषिका
इत्यपि पाठः । शुकी शुकानजन
यदुलूकी प्रत्युलूककान् ॥
इति गारुडे ६ अध्यायः । शुक
पत्नी च ॥
शुकोदरं क्ली तालीशपत्रं ॥
इति राजनिर्घण्टः । कीरजठरे च
शुक्तं क्ली मांसं । इति शब्दच
न्द्रिका । काञ्जिकं इति हाराव
ली ॥ द्रवद्रव्यविशेषः ॥
यथा कन्दमूलफलादीनि स
स्नेहलवणानि च । यत्रद्रवे
भिषूयन्ते तच्छुक्तमभिधीयते
अस्य गुणाः । शुक्तं तीक्ष्णोष्ण
लवणं पित्तकृत् कटुकं लघु
रुच्यं कृम्युदरानाह शोथार्शो
विष ऊष्मनुत् । इति राजनिर्घ
ण्टः ॥ शुक्तं यन्मधुरं कालव
शादम्लतां गतं । इति प्राय
श्चित्तविवेकः । तस्य भक्षणनि
षेधो यथा । यमः । अपूपाश्च


करम्भाश्च धाना वटक शक्तवः ।
शाकं मांसमपूपं च सूपं कृषर
मेव च । यवागूं पायसं चैव यच्चा
न्यत् स्नेहसम्भवं । सर्वं पर्युषितं
भक्ष्यं शुक्तञ्च परिवर्जयेत् ॥ त
त् प्रतिप्रसवो यथा । मनुः
दधिभक्ष्यञ्च शुक्तेषु सर्वञ्च
दधिसम्भवं ॥
इति तिथ्यादितत्त्वं ॥
शुक्तं त्रि निष्ठुरं । इति मेदिनी ।
पूतं । अम्लं । इति विश्वः ॥
श्लिष्टं । निर्जनं । इति शब्दरत्ना
वली ॥
शुक्ता स्त्री चुक्रिका । इति श
ब्दरत्नावली ॥
शुक्तिः स्त्री जलजन्तुविशेषः ।
सितुक इति भाषा । तत्पर्य्या
यः । मुक्तास्फोटः २ इत्यमरः
शुक्तिका ३ इति जटाधरः ॥
मुक्तिप्रसूः ४ महाशुक्तिः ५ लौ
तिकः ६ मौक्तिकप्रसवा ७ मौ
क्तिकशुक्तिः ८ मुक्तामाता ९ ।
अस्या गुणाः । कटुत्वं । स्निग्धत्वं
श्वासहृद्रुग्हारित्वं । शूलप्र
शमनत्वं । रुच्यत्वं । मधुरत्वं । दी
पनत्वञ्च । इति राजनिर्घण्टः ।
कपालखण्डं शंखः । शंखनखः

नखी । अश्वावर्त्तः अर्शोरोगः
इति मेदिनी । चक्षुरोगविशे
षः । इति हेमचन्द्रः । तद्विव
रणं यथा । प्रस्तारिशुक्लं तत
ज्जोऽधिमांसस्नायवर्म्मसंज्ञाः ख
लु पञ्च रोगाः । स्याच्छुक्तिकासा
र्ज्जुन पिष्टकाख्या जालं शि
राणां पिडिकाश्च तासां । रो
गा बलास ग्रथितेन सार्द्धमेका
दशैवाः खलु शुक्लभागे । शु
क्तिमाह । श्यावाः स्युः पिशित
निभाश्च बिन्दवो ये शुक्लाभाः शि
तनिचिताः स शुक्तिसंज्ञः । श्यावा
इत्यादि वर्णत्रय विकल्पा लोह
द्याः ॥ अथास्याश्चिकित्सा
सेक आश्च्योतनं पिण्डीबिडा
लस्तर्पणं तथा । पुटपाकोऽञ्ज
नं चैभिः कल्पैर्नेत्रमुपाचरे
त् । इति कल्पविधिः । तत्र से
कविधिर्यथा सेकस्तु दिवसे
कार्य्यो रात्रौ चात्यन्तिके गदे से
कस्तु सूक्ष्मधाराभिः सर्वस्मि
न्नयने हितः । मीलिताक्षस्य मर्त्य
स्य प्रदेयश्चतुरङ्गुलं । पत्राण्डदल
मूलत्वकश्रृत माजं पयो हितं
सेकोऽसे नेत्रयोः पिल्लवाताभि
ष्यन्दनाशनं । यष्टी गैरिका



सिंहास्यः द्राक्षी नारिकेलैः समांस
कैः। जलपिष्टैर्वहिर्लेपः सर्व
नेत्रामयापहः २ इति भाव॰
प्रकाशः ॥ कर्षद्वयपरिमा
णे। इति शब्दमाला। चत्व
स्तोलकपरिमाणे। तत्पर्य्यायः
अक्षमिका २ इति वैद्यकप
रिभाषा ॥
शुक्तिका स्त्री शुक्तास्फोटः।
इति जटाधरः चक्रिका। इति
शब्दरत्नावली ॥
शुक्तिजं क्ली मुक्ता। इति हेम
चन्द्रः ॥
शुक्तिमान् पुं पर्व्वतविशेषः।
यथा महेन्द्रो मलयः सह्यःशु
क्तिमान् गन्धमादनः। विन्ध्य
श्च पारिपात्रश्च सप्तैते चकुला
चलाः। इति त्रिकाण्डशेषः ॥
शुक्तिवीजं क्ली मुक्ता। इति
त्रिकाण्डशेषः ॥
शुक्रं क्ली मज्जजातधातुः। तत्
पर्य्यायः। पुंस्त्वं २ तेजः ३ वीजं
४ वीर्य्यं ५ पौरुषं ६ तेजः
७ इन्द्रियं ८ मूत्रविकारः ९
मज्जारसः १० रोहणं ११ बलं
१२ इति राजनिर्घण्टः ॥ त
स्योत्पत्तिर्यथा रसाद्रक्तं त
तो मांसो मांसान्मेदः प्रजाय
ते। मेदसोऽस्थि ततो मज्जाम
ज्ज्ञात् शुक्रस्य सम्भवः ॥ तस्य
स्वरूपं यथा। शुक्रं सौम्यं
सितं स्निग्धं बलपुष्टिकरं स्मृ
तं। गर्भवीजं वपुःसारो जी
वस्याश्रय उत्तमः। जीवस्याश्र
य उत्तम इति। यत्र आह। जी
वो वसति सर्व्वस्मिन् देहे तत्र
विशेषतः। वीर्य्ये रक्ते मले च
स्मिन् क्षीणे याति क्षयं क्षणा
त् ॥ गर्भसंजननशुक्रस्य ल
क्षणं। यथा स्फाटिकाभं द्रवं
स्निग्धं मधुरं मधुगन्धि च शु
क्रमिच्छन्ति केचित्तु तैलक्षौद्र
निभन्त्वतत् ॥ तस्य स्थानं मोह
यथा पयसि सर्पिस्तु गूढश्चेक्षौ
रसो। यथा। एवं हि सकलेका
ये शुक्रं तिष्ठति देहिनां ॥ अ
थ सर्पि ईषणतो वक्रशुक्रैःस
मथनेन सर्पिः शुक्रयो लाभा
त्। इक्षुरस दृष्टान्तस्तु स्वल्प
शुक्रे पुंसि अतिपीडनेनेक्षुरस
शुक्रयो लाभात् ॥ तस्य स्र
णमार्गो यथा। द्व्यङ्गुले दक्षिणे
पार्श्वे वस्तिद्वारस्य चाप्यधः
मूत्रस्रोतः पथे शुक्रं पुरुषस्य

प्रवर्त्तते ॥ अथ शुक्रस्य स्रव
णकारणमाह। कृत्स्ने देहाश्रि
तं शुक्रं प्रसन्नमनसस्तथा। स्त्री
षु व्यायच्छतश्चापि हर्षात्तत् संप्र
वर्त्तते। स्त्रीषु व्यायच्छतः स्मरत
रूपं व्यायामं कुर्व्वतः। अन्यच्च।
शुक्रं कामेन कामिन्या दर्शना
त् स्पर्शनादपि। शब्द संश्रवणा
त् ध्यानात्संभोगाच्च प्रवर्त्तते।
इति भावप्रकाशः। शुक्रक्षय
करद्रव्याणि यथा। सार्षपतैलं
१ राजमाषः २ तिलः ३ पटोल
वास्तूक काकमाची पुनर्नवा
शाकभिन्न सर्व्वशाकं ४ लावद
न्तद्रव्यं ५ कारवेल्लकफलं ६ क
र्कोटकफलं ७ वार्त्ताकं ८ लिकुचं
९ शुष्कमरिचं १० गुडत्वक् ११
पिप्पलीशुण्ठी भिन्न कटुरसः
१२ इति राजवल्लभात् संगृहीतं ॥
अपि च। वीजक्षयकरं नित्यम
सं भोजनञ्च पानकं। वर्ज्जयेत्
ताव शाकाद्यानत्यन्तु वर्ज्जति
रुकं। कोषपराजन रसास्ततो
मं पानेष्ववर्द्धनं। सूक्ष्मानेमूत्र
वद्वीजक्षयकारि विवर्ज्जयेत्
शुक्रवृद्धिकरजलं यथान्ता
प्रायः स्वर्णं सीसानां पात्रस्थं
फलचर्म्मणोः। शुक्रवृद्धिकरं तो
यं तत्तु पेयं प्रयत्नतः ॥ इति
कालिकापुराणे ८९ अध्यायः।
शुक्रवर्द्धकद्रव्याणि यथा पानी
यं १ विशेषतः हैमन्तिकजलं २
तालाम्बु ३ चन्दनादिद्रव्यानुलेप
नं ४ रक्तशालिधान्यं ५ हैम
न्तिकषष्टिकधान्यं ६ गोधूमः
७ माषः ८ सामान्यशुक्लनारी
चपत्रशाकं ९ सामान्यालिकमशु
क्लनारीचपत्रशाकजलं १० कल
म्बीशाकं ११ काकमाचीशाकं १२
गोक्षुरशाकं १३ मुञ्जातकः १४
वार्त्ताकः १५ विदारी १६ हस्त्यालु
कं १७ मधालुकं १८ पक्वाम्रं १९
दुग्धाम्रं २० नागरङ्गं २१ वकुलार
फलं २२ पक्वकण्ठाफलं २३
कण्ठाफलास्थि २४ पक्वताल
२५ पक्वकदलं २६ चम्पककद
लं २७ द्राक्षा २८ खर्ज्जूरं २९ धा
त्री ३० कुष्माण्डमज्जा ३१ लाव
मत्स्याः ३२ वृहन्मत्स्याः ३३
समुद्रमत्स्याः ३४ रोहितमत्स्याः
३५ भाकूटमत्स्याः ३६ पाठीन
मत्स्याः ३७ सेकलिमत्स्याः ३८
चित्रफलमत्स्याः ३९ वाडशाम
त्स्याः ४० मद्गुरमत्स्याः ४१ वर्म्मि



मत्स्यः ४२ फलीमत्स्यः ४३ चिं
गटमत्स्यः ४४ पर्वतमत्स्यः ४५
पलेगामत्स्यः ४६ शकलीमत्स्यः
४७ चम्पकुल्दमत्स्यः ४८ प्रोष्ठी
मत्स्यः ४९ दग्धमत्स्यः ५० मा
ममांसे ५१ प्रसहामांसे ५२
भूषयामांसे ५३ प्रनूपमांसे ५४
जलजमांसे ५५ जलेचरमांसे
५६ छागमांसे ५७ वाराहमांसे
५८ कूर्ममांसे ५९ तित्तिरि ६०
कुलिंग ६१ चटकानां मांसे ६२
हंसमांसे ६३ हंसवीजे ६४ शु
कपालिमांसे ६५ मयूरे ६६ प्रा
रावि ६७ शुकु ६८ कादम्ब ६९
वलाका ७० वकमांसे ७१ जीर्ण
मधे ७२ समस्तक्षीरे ७३ गोदु
ग्धे ७४ हस्तिनीदुग्धे ७५ नाव
नीतकंतालिका ७६ माहिषद
धि ७७ दधिमस्तुः ७८ दधिमस्तु
७९ नवनीते ८० नावकूते ८१ ता
वदिस्तुः ८२ विशेषतः पौण्ड्रके
क्षुः ८३ दैवनिष्पीडितेक्षुरसः ८४
यंत्रनिष्पीडितेक्षुरसः ८५ शुशि
पक्वेक्षुरसः ८६ इक्षुफाणिते
८७ इक्षुगुडः ८८ इक्षुखण्डे ८९ म
धुरी ९० शुष्कपिप्पली ९१ शुण्ठी
९२ आर्द्रकं ९३ लशुने ९४ मत्स्याण्डः


९५ सैंधवे ९६ ग्रन्ते ९७ सौवे
ल लवणान्वित दग्धमत्स्यः ९८
तैल लवणयुक्त पलालवेष्टित
कर्दमलेपित अंगारदग्ध लव
णवेशवार भरस्तुत सार्द्रक
कटुतैलसंतालितमत्स्यः ९९ शा
कमत्स्याख्यव्यंजनं १०० मांसर
सः १०१ परिशुष्कमांसे १०२
शूलकृत्यः १०३ मधुमस्तके १०४
कुल्माषफेनकः १०५ भृष्टधान्या १०६
१०७ पलाण्डुमूले १०८ गोक्षुरः १०९
सामान्यवला ११० विशेषतः ।
पीतवला १११ अश्वगंधा ११२
प्रसारणी ११३ माषपर्णी ११४
कटेलीहरः ११५ राजवृक्षफले
११६ शिलाजतु ११७ । इति राज
वल्लभात् संगृहीते ॥
नेत्ररोगविशेषः । इति मेदिनी
ग्रस्य विवरणे शुक्रशब्दे
द्रष्टव्यं ॥
शुक्रः पुं ग्रहविशेषः तत्प
र्यायः । दैत्यगुरुः २ काव्यः ३
उशना ४ भार्गवः ५ कविः ६ म
घाभवः । सितः ७ आस्फुजित ८
शतपर्वशः ९ भृगुसुतः १० भृगुः
११ षोडशार्चिः १२ मघाभूः १३
श्वेतः १४ श्वेतरथः १५ इति श

हारावली ॥ षोडशांशुः १६
इति जटाधरः ॥
तस्य शुक्रेति नामकारणं । य
था निकुंभादिषु दैत्येषु भूयप
योऽत्पितेष्वथ । युद्धायाभ्यागतेष्व
वनन्दी शंकरमब्रवीत् । महा
देववचोऽस्माकं शृणु त्वं परमा
द्भुतं । अविविंस मसहेच मृता
ना जीवने पुनः । ये हताः प्रम
थैर्देव्या यथाशक्त्या रणाजिरे
ते सर्वे जीविता भूयो भार्ग
वेणाद्य विद्यया । तदिदं देव
ह्यादेव महत्कर्मकृतं रणे
ज्ञातमफलं देव शुक्रविद्याब
लाश्रयात् । इत्येवमुक्ते वचने
नंदिना कुलनंदिना । प्रमथा
चमभुः प्रीत्या स्वार्थसम्यनयुक्त
मे गच्छ शुक्रं गणपते समानीति
कमुपानय । अहं तं संयमिष्या
मि यथा योगं समेत्य ति इत्येव
मुक्ते रुद्रेण नंदी गणपतिस्त
तः । तमनन्त सुपादाय नंदी से
गृहेष्वेवावान् रथादागमन
निमेषितः स्वरूपं तं यथा । त
मादाय हरस्याम मानुजनामवि
नायकः । निपात्यरक्तिणः सदा
नयच्छुक्रमग्नवेदयत् तमानीत

वैः प्रासिमहदनेमभुः । सशाम्भु
ना कविश्रेष्ठो ग्रस्तो जठर मा
श्रितः । तत्रैव भार्गवस्तेनवान्मी
वारिम यथादरात् । शुक्र उवाच
नमोऽस्तु ते शंकर सर्व शम्भो स
हस्रनेत्राङ्घ्रि शिरो नमस्ते । त्व
य्येव सर्वं भुवनं तवोदरे भ्रान्तो
भवंते शरणं प्रपन्नः । इत्येव
मुक्ते वचने महात्मा शम्भुर्वचः
प्राह ततो विहस्य । निर्गच्छ पु
त्रोऽपि ममाधुनात्व शिश्नेन भो
भार्गवं प्राचेन्द्रः । नाम्ना तु शुक्रे
ति चराचरत्वा लोकांनिवेकाल
विचारणाति । इत्येवमुक्त्वा भग
वान् मुमोच शिश्नेन शुक्रो सच
विनिर्जगाम विनिर्गतो भार्गव
वंशचन्द्रः शुक्रत्वमापद्य म
हानुभावः । इति वामने ६६
अध्यायः । अथैषामवर्णादि
कोण स्त्रीब्राह्मणजाति यजु
र्वेद बक्षोगुणाश्चरस दूपरापी
हीरक रत्न भोजकटदेशानास
धिपतिः । भृगुमुनिसंतानः । नवां
गुलशरीरः पद्मस्थः सर्वसुखः
श्वेतवर्णः चतुर्भुजः । सदाजप
माला वर कमण्डलु दंडधारी स्व
णवस्त्रः । इन्द्राधिदेवताकः ॥

सचीप्रत्यधिदेवताकः । शुभग्रहः अपराह्णकाले प्रबलः । जलचारी । कफप्रकृतिः । रूपाद्रव्य धान्यादि स्वामी मध्यवयः रतीश्वरः । जलभूमिचारी स्निग्धरुचिः द्विपद मनुष्याणां स्वामी च । इति बृहज्जातक ग्रहयामलत्वादयः । तस्यभोग्ये दिने शुक्रवारः । तत्र जातफलं । प्रसन्नचित्तो मतिमान् गुणज्ञः सकेशाधेशः सितवस्त्र माल्यः । बन्धुप्रियो भार्गववारजातः धीह्युप्रसादःकुशलो नरःस्यात् ॥ तस्यक्षेत्रजात फलं शुक्रोलग्ने· काव्यकलाविद्वेषादातालिधेयः कृतशास्त्रदत्तः । कलिप्रियोवातकफान्वितः स्यात्मेधान्वितो हृष्टपदु सर्वशाग्धः ॥ तस्य द्रेक्काणजातफलं । द्रेक्काणे भृगुनंदनस्यमनुजः प्राप्ते धरित्रीपतेःसर्वज्ञः स्वजनानुरागकुशलो दाता सतो वल्लभः । संग्रामेष्वचलोगता स्त्रजयनैःस्फीतःकृपालुःशुचिः प्रीतः सत्यरतोभियुक्त हृदयो धर्म्मानुरक्तोनरः ॥ तस्यनवांशजातफलं । नारीरक्तोलसितनयनो मञ्जुकेशः कृशांगः । कम्बुग्रीवो भवति कनकशपामवर्णः सकेशः क्रूरः स्त्रैणः कविरतिधनो दानशीलो गुणज्ञोध्यानप्राप्तो विमलयशसा मानवो भार्गवांशे ॥ तस्य द्वादशांशजात फलं । शूरो वक्रयनो भोगीन्द्रस्य गीतप्रियः सराशुचि र्दाता त्यागी भोक्ताहारश्रांशेभृगोनिरः ॥ तस्य त्रिंशांशजातफलं । बहुगुणपरिपूर्णः सुंदर प्राकृष्टपुत्रतिजनविनोदी लब्धसौख्यो र्थभोगः । द्विजसुर गुरुभक्तो दानशीलःकृपालु रसरपतिशुतेः स्थानमानव त्रिंशकांशे इति कोष्ठीप्रदीपः ॥ विक्रमादि सप्तविंशति योगान्तर्गतचतुर्विंशयोगः । तत्र जात फलं हास्ये विवादे विजयीसभायां सक्षेप माल्याम्बर रत्नयुक्तः । जितेन्द्रियः स्यात्सुजनो महौजा शुक्राभिधाने जनने हियस्य । इति कोष्ठीप्रदीपः शुचिः ॥ चित्रहृतः ॥ श्वेतभासः । इत्यमरः ॥
शुक्रकरः पुं मज्जा । इतिहेमचन्द्रः । वीर्यकारकेत्रि ॥

शुक्रभुक् पुं मयूरः । इति शब्दचंद्रिका ॥ रेतोभोजके त्रि
शुक्रभुः पुं मज्जा । इति शब्द चंद्रिका । वीर्य्यजातमात्रे त्रि ॥
शुक्रला स्त्री उच्चटा । इति वकुलाशब्दटीकायां भरतः ॥ वीर्य्यदातरि त्रि ॥
शुक्रवारः पुं शुक्रग्रहभोग्यदिने । यथा । तीर्थेतरत्र प्रतिप्रसवमोहे स्मृतिःप्रयतेविषुवेचैव संक्रान्तौ ग्रहणेषुच । उपाकर्म्माणि चोत्सर्गे युगादौ मृतवासरे । सूर्य्य शुक्रादिवारेपि न दोष स्तिलतर्पणे ॥ इति प्रायश्चित्ततत्वे ॥
शुक्रशिष्यः पुं असुरः । इत्यमरः ॥
शुक्रांगः पुं मयूरः । इति जटाधरः ॥
शुक्रियः त्रि शुक्रसंबंधी । शुक्रशब्दात् इयं प्रत्यय निष्पन्नः
शुक्लं क्ली रजतं । इति मेदिनी नवनीतं । इति शब्दचंद्रिका ॥ अक्षिरोगविशेषः । इति जटाधरः । अत्र चक्षुःशुक्लभागजरोगः तद्विवरणं । यथा प्रस्तारिशुक्लक्षतजाधिमांस स्नायर्म्मसंज्ञाः खल्वपंचरोगाः । तत्रशुक्लमाह स्वेतं मृदुशक्लमाशु शुक्लंतदहंतेचिरात् । अस्य चिकित्सा । भुक्त्वापाणितलेघृष्ट्वाचक्षुषो र्यदि दीयते । अचिरेणैव तद्वारि तिमिराणि व्यपोहति । स्नाने कृष्णतिले वापि चक्षुष्यामानिलापहं । आमले सततं स्नानं परंदृष्टिबलावहं । शुंठीनिम्बदलैःपिण्डी सुखोष्णा स्वल्पसैन्धवा । धार्य्या नेत्रेऽनिलश्लेष्म शोथ कण्डू व्यथाहरी त्रिफला पिण्डिका नेत्रे वातपित्त कफापहा ॥ अन्यदौषधं शुक्तिशुक्रशब्दयोर्द्दष्टव्यं ॥
शुक्लः पुं वर्णविशेषः । सादा इति भाषा । तत्पर्य्यायः । शुभ्रः २ शुचिः ३ श्वेतः ४ विशदः ५ श्येतः ६ पाण्डरः ७ अवदातः ८ सितः ९ गौरः १० वलक्षः ११ धवलः १२ अर्जुनः १३ इत्यमरः । श्येता १४ श्येनी १५ धवेनी १६ विषदः १७ सिता १८ अवलक्षः १९ इति तट्टीका ॥ शितिः २० पाण्डुः २१ इतिशब्दरत्नावली शुक्तः २२ शुभः २३ इति जटाधरः । शाकयोगः



इति मेदिनी । श्वेतरङ्गः ॥
इति राजनिर्घण्टः । शुक्लपक्षः
यथा षट्त्रिंशन्मते । तत्र पक्षा
वुभौ मासे शुक्ल कृष्णौ क्रमेण
हि । चन्द्रवृद्धिकरः शुक्लः कृष्ण
श्चन्द्रक्षयात्मकः । इति तिथ्यादि
तत्त्वं । शुक्लगुणयुक्ते त्रि । शुक्ल
वस्तूनि । यथा सर्पाम्बुजैः श्रवाः
शंभुकीर्त्तिज्योत्स्नाशरद्घनाः । मा
सादसोत्पलतारमंदारकुन्दहिमाद्र
यः । सूर्य्येन्दुकान्तकर्प्पूर कम्बुभा व
जेन्द्र हली । निर्मोकभस्महीरकौ
वेचंदने करका हिमे । हारोर्म्मिना
भतत्त्वस्थिस्वर्गगोक्षरदाभ्रके ।
शेषाहिः शर्करा दुग्धं दधिगंगा
सुधा जले मृणालं सिकता हंस
बक कैरव चामरं । रम्भागर्भपु
ण्डरीक केतकी शंख निर्झराः
लोध्र सिंह ध्वज च्छत्र चूर्णं शु
क्तिकपर्दकाः शुक्ला कुसुमन
खदंत पुरोषाशनो गुणाः । कै
लासकाशकार्पासहासवासव
कुञ्जराः । नारदः पारदः कुंदरवदि
का स्फटिकादयः । इतिश्वेतानि
शुक्लकृष्ण वाचकानि वस्तूनि
यथा शितिकृष्णौ विधुहरी शिति
तारा कृष्ण नागराजकेसराः । रा
म ।

पयोराशिपर्ज्जन्य सिंहीजानेत्रचं
द्रहासाद्याः । विधु शुभ्रो विधु
श्च । हरिः कृष्णः सिंहश्च । शिती
धवल मेचकौ । तारा नक्षत्रे ग्र
हाः कनीनिकाच । शुभ्रके गिरि
जे मेचश्च । नागराजः शेषोगज
श्च । घनसारः कर्पूरं मेघश्रेष्ठ
श्च । रामो बलभद्रो दाशरथिश्च
पयोराशिः क्षीरसमुद्रः । समुद्र
श्च । अर्ज्जुनः शुभ्रः पार्थश्च । सिं
हीजः सिंहो राहुश्च । घनेनो व
लभद्रः कृष्णश्च । चन्द्रहासः चन्द्र
हासः खड्गश्च । शंखकर तारके
शा सदाकाश व्योमकेश ताला
काः । नीलाम्बुकापिके शारिह
सदासिचय कलकण्ठाः ॥ शं
खकरः कम्बुकान्तिः कृष्णश्च
तारकेश श्चन्द्रः उज्ज्वलवालश्च
सदाकाशः सर्वदाकाशः संकुग
वश्च । व्योमकेशः शिवोनभोवा
लोच । तालांको बलभद्रस्ताल
कलंकोच । नीलाम्बुको बलभ
द्रः कृष्णकान्तिश्च । शपिके
शो शपिकशिवो शपिकबाल
श्च शपिष्ट लकं काकश्च । सदा
सिचयः सिचयो वस्त्रं असिच
यः खड्गसमरश्च । कलकण्ठो

हंसः पिकश्च । कलकंठः पिके
पारावते हंसे कलध्वनौ । हरि
जिष्णुच्चनाब्धिभ्यो गजाः सिंधु
मूरारितः । अश्वा वाहोङ्गानिक
स्वाग्रमुना कुम्भिनो श्रियः । शु
क्लाः पर्य्यायाभिधायका भवंतीति
संबंधः । हरिराजपैरावतः । एवं
जिष्णुगजः । अब्धिगजः । घनगजः
एते हरि विष्णु गीजो हस्ती । एवं
सर्वत्र । गजा इति बहुवचनानि
र्देशात् गजपर्य्यायो गृह्यते । स
रित्सिंधु गंगा कृष्ण समुद्रौच
अश्वुवाहः उच्चैःश्रवाः मेचश्च ।
कृष्णाङ्कं नाभीपुण्डरीके नीला
ञ्जस्त्र । यमुनारि बलभद्रोयमु
नाद्वेषी च । कृष्णाभ्राङ्गनटिनी
वाचकशब्दात् परो वर्गोऽल्पः
नीरद् चलोपलसितसहाहिम
कर सिंधुवेणि पृथुलाजाभाः
सित पयामवाचका इतिएवं
वत् । कृष्णाभ्राङ्गनटिनी वाच
कशब्दहरो यथा । कृष्णनदीव
रकांतिः गंगाश्रेष्ठकांतिः । एते
कृष्णनदीवरस्य समुद्रस्येव का
न्तिः । नीरदो निस्त्रिंशो दंतोस्ये
चस्य । चलोपलसितः चलोप
लः करका तद्वत् सितः चलो

मेघः तद्वदुपलसितः कांतः । स
दाहिमकरः चंद्रः सर्पमकरोच
सिंधुवेणि नदीप्रवाहः समुद्र
कशाविन्यासोच । पृथुलाजाभः
महती धूष्टपाम्पसेवाभा यस्य
कृष्णस्येव च । तथाच वहलक
लभवच्छाय मन्यकारानिदीपि
तिः । सदापिकेशवच्छायो ने
कपोयसमच्छविः । वपुर्मेहोदपि
च्छायं बिभ्रत सैंधव कांतिमान्
स्फाटिकीच लक्ष्मलक्ष्मीः पद्मांशुक
कांटे वहन् । तेनतावर श्रियं य
ते धकाटिकांत श्रियान्वितः । अ
र्ज्जुनद्युति विद्योती स्वव मादि
समुन्नयेत् ॥ रक्त श्वेतवाच
कानि वस्तूनि यथा । बकश्वेतौ
हरिशुचि पङ्कररातपत्रसूर्य्य
कांताङ्गाः । नवहंसमहापद्मार्क
कृष्णोदराः कमल कीलालेहरि
श्चंद्र सूर्य्ययोः । शुचिः श्वेत वैश्वा
नरयोः । पुष्करंजल पद्मयोः ॥
शातपत्रे हंस पद्मयोः । सूर्य
कांतः स्फाटिके सूर्य्यकांत च
अङ्गः शंखांबुजयोः । नवहंसः
नवहंसे प्रत्यग्रसूर्य्ये च । महा
पद्मः श्वेतनागे पद्मेच अर्कः
स्फाटिक सूर्य्ययोः । कंमलेज

लांबुजयोः कीलालं जलरक्त
योः। सुहृद्रत्नादिभि र्मनोरत्ने
नाम्नि रत्नांशके। जलेभ्योजन्म
शोभाभिः सरोज कुमुदादि-
भिः। भानोः परस्मात् सुहृद्र
त्नादिभिः सित रक्तौ यथा। रवि
मित्रं चंद्रः रविरत्नं पद्मः। भानुरत्नं
सूर्यकांतो रवि पद्मरागौ च
अग्निरत्नं सूर्यकांतो अग्निपद्म
रागौ च। रत्नांशुके दंत वस्त्रेश्च
यरश्च। जलजशोभा जलजा
चासौ शोभा चेति पक्षे पद्म
कांतिः। पद्मे सरोजादिशोभा
सरोजस्पर्द्धिशोभा पक्षे सरो
जादि शुभ्रः। कुमुदादि शोभा
कुमुदस्पर्द्धिशोभा। पक्षे कुमु-
दादि शादिल्यः॥ पीतश्वेत
वाच कानि वस्तूनि यथा॥
पीतश्वेतौ गौर द्विजराजकप
र्दे शम्भु हरि तार्क्ष्याः। हेमस्ता
माष्टापद महारजतचंद्रकलधौ
ताः। गौरः श्वेत पीतयोः॥
द्विजराजो गुरु चंद्रयोः। क
पर्दः शंभुजटाजूट वराटयोः
शंभुर्ब्रह्म त्रिलोचनयोः हरिः
पिंगल सिंहयोः। तार्क्ष्यो ग
रुडः पक्षे उच्चैःश्रवाः। हे
मस्ताम्रः हेम्नो ध्ये हेमः पक्षे
हिमस्यायं। अष्टापदं सुवर्णं स
रभयोः। महारजतं सुवर्णं रूप्य
योः। चंद्रः स्वर्णं शशांकयोः
कलधौतं हेम रूप्ययोः। सुशो
भितावकुटश्रीः स्वर्णस्तोमसम
द्युतिः। दहनोपलक्षतकांतिर्गौ
रेयच्छवि पेशालः। तारकूटो
रूप्यसमूहः। पक्षे शारकूटो।
रीतिः सुशोभन मणिः कनक
श्च॥ अथश्लोकोलीर्णतिः।
गोपति तार्क्ष्यकांतिः रवि ग
रुडच्छविः। पक्षे गोपति दिंद्र
स्तस्य तार्क्ष्यस्तुरगः। वामदेव
गिरि मनोज्ञमेरुः कैलासश्च
इति कविकल्पलतायां २॥
श्लेषे उद्दिष्टवर्णने १॥
कुसुमे ॥
शुक्लकः पुं शुक्लपक्षः। यथा
पक्षमासाद्यास्तु तिथयः क्रमात्
पंचदश स्मृताः। दर्शांताः कृष्ण
पक्षे ताः पूर्णिमांतास्तु शुक्लके
इति तिथ्यादितत्त्वं॥
श्वेतवर्णश्च॥
शुक्लकालकः पुं दात्यूहपक्षी।
इति शब्दमाला श्वेतगलयुक्ते त्रि
शुक्लकंदः पुं महिषकंदः। इति

राजनिर्घण्टः। श्वेतमूलश्च।
शुक्लकन्दा स्त्री अतिविषा।
इति राजनिर्घण्टः॥
शुक्लकर्म्मन् त्रि शुक्लसत्कर्मा
सत्कर्मशीलः। इति जटाधरः
शुक्लकुष्ठं स्त्री श्वेतवर्णकुष्ठ
रोगः। तस्यौषधं यथा। सोमरा
जस्य बीजानि नवनीतयुतानि
च मधुना स्वादितानि स्युः
शुक्लकुष्ठहराणि वै। इति गा
रुडे १९५ अध्यायः॥
शुक्लत्वं स्त्री शुक्लता शुक्लभा
व इत्यर्थे त्व प्रत्ययेन निष्पन्नं।
शुक्लदुग्धः पुं शृंगाटकः। इ
ति शब्दचंद्रिका। श्वेतदुग्धयुक्ते
त्रि शुक्लधातुः पुं कठिनी। इति
हेमचंद्रः। श्वेतवर्णधातुश्च च
शुक्लपक्षः पुं सितपक्षः। चंद्रस्य
वृद्धिरूप्य शुक्लपंचदशकला
क्रियाप्रचयः। तत्पर्यायः। सि
तश्वा पूर्यमाणः स्यात् शुक्ल
श्च विशादः शुचिः। शुक्लपक्षः
कृष्णपक्षो बहुलो वलिकृतः
इति राजनिर्घण्टः। सतु शुक्लप
तिपदादि पौर्णमास्यन्तपंचदशा
तिथ्यात्मकः। यथा। तत्रपक्षाद
यौ मासे शुक्ल कृष्णौ क्रमेण हि
चंद्रवृद्धिकरः शुक्लः कृष्ण श्चंद्र
क्षयात्मकः। इति तिथ्यादितत्त्वं
कर्म्मविशेष तदोदयगामिति
थि र्ग्राह्या। यथा। शुक्लपक्षे
तिथि र्ग्राह्या यस्याममभ्युदि
तो रविः। कृष्णपक्षे तिथि र्ग्राह्या
यस्या मस्तमितो रविः। इति वि
ष्णुधर्मोत्तरं॥ संस्कारकर्मणः
शुक्लपक्षकर्तव्यता यथा आ
श्वलायनः। उदगयने आपूर्य्य
माणपक्षे कल्याणे नक्षत्रे चौ
डकर्मोपनयन गोदानविवाहाः
विवाहः सार्वकालिक इत्येके॥
विद्यारम्भस्य शुक्लपक्षकर्त
व्यता यथा मदन पारिजाते
देवे गेहे सौम्ये लग्ने तस्योर्केषी
नु दृष्टितः शर्वकेन्दु शुद्धौ च
विद्यारंभः प्रशस्यते॥ शुक्ल
शिल्पारंभस्य शुक्लपक्षकर्तव्य
ता। यथा। मत्स्यपुराणे। आप
पक्षे शुभे शुक्लमतीते चोत्तराय
णे। इत्यादि॥ देवप्रतिष्ठायाः।
शुक्लपक्षवर्तव्यता यथा। ब्रह्म
व समुच्चये। प्रतिष्ठा सर्वदेवानां
केशवस्य विशेषतः। उत्तरायण
आपन्ने शुक्लपक्षे शुभे दिने॥
गृहारम्भ गृहप्रवेशयोः शुक्लप



त्वकर्त्तव्यता यथा। मत्स्यपुरा
णे। शुक्लपक्षे भवेत्सौख्यं कृ
ष्णेतस्करतो भयं। इति ज्यो
तिस्तत्त्वं॥ नवान्नश्राद्धस्य शु
क्लपक्षकर्त्तव्यता यथा। आ
श्विनाधिकारे। शुक्लपक्षेन
वं धान्यं पक्वं ज्ञात्वा सुशोभ
ने। गच्छेत् सेत्री विधानेन
गीतवाद्य पुरःसरं। तेन दे
वान् पितॄंश्चैव तर्पयेदर्च्चये
त्तथा। अपिच। वृश्चिके शुक्ल
पक्षेतु नवान्नं शस्यते बुधैः
इति तिथ्यादितत्त्वं॥
शुक्लपुष्पः पुं छत्रकवृक्षः कुं
दपुष्पवृक्षः। मरुवकः इतिरत्न
माला। श्वेतकुसुमयुक्ते त्रि॥
शुक्लपुष्पा स्त्री नागदन्ती। शी
तकुम्भी। इति रत्नमाला॥
शुक्लपुष्पी स्त्री नागदन्ती। इ
तिराजनिर्घण्टः॥
शुक्लपृष्ठकः पुं सिंधुकवृक्षः
इति शब्दचन्द्रिका। श्वेतवर्णपृ
ष्ठयुक्ते त्रि॥ शुक्लबलः पुं
जिनविशेषः यथा। वासुदे
वा अमीकृष्णा नव शुक्लब
लास्त्वमी। अचला विजयोभ
द्रः सुप्रभश्च सुदर्शनः। आ
नंदो नंदनः पद्मो रामोविष्णु
द्विषस्त्वमी। इति हेमचन्द्रः॥
शुक्लमण्डलं क्ली चक्षुःश्वेत
देशं। इति केचित्। श्वेतवर्ण
गोलकञ्च॥
शुक्लरोहितः पुं श्वेतरोहित
वृक्षः। इति राजनिर्घण्टः॥
शुभ्ररोहितमत्स्यश्च॥
शुक्ला स्त्री उञ्चटा। इति र
त्नमाला। श्वेतदातरि त्रि॥
शुक्लवर्गः पुं श्वेतवर्णसजाती
यद्रव्यं। यथा शंख शुक्ति क
पर्दकादि। इति राजनिर्घण्टः
शुक्लवायसः पुं वकः। इतित्रि
काण्डशेषः। श्वेतकाकश्च॥
शुक्लशालः पुं शितिनिम्बः। इ
तिराजनिर्घण्टः। श्वेतशालवृक्ष
श्च शुक्लक्षीरा स्त्री काकोली।
इतिराजनिर्घण्टः। श्वेतदुग्धयु
क्ते त्रि शुक्ला स्त्री सरस्वती। इति
त्रिकाण्डशेषः। शर्करा। इति
शब्दचन्द्रिका। काकोली। वि
दारी। स्नुही। इतिराजनिर्घण्टः
श्वेतवर्णाच॥
शुक्लाङ्गी स्त्री शेफालिका।
इति राजनिर्घण्टः श्वेतावयव
युक्ते त्रि॥

शुक्लापाङ्गः पुं मयूरः। इति हे
मचन्द्रः। श्वेतवर्णनेत्रान्ते त्रि॥
शुक्लाम्लं क्ली अम्लशाकः। इ
तिराजनिर्घण्टः॥
शुक्लार्म्म न क्ली नेत्ररोगभेदः।
यथा। अथ शुक्लभागजा रोगाः
तेषां नामानि संख्याञ्चाह। प्र
स्तारि शुक्ल क्षतजाधिमांस
स्नाय्वर्म्म संज्ञाः खलु पञ्चरोगाः
स्याच्छुक्तिका सार्ज्जुन पिष्टका
ख्यौ जालं शिराणां पिडिकाश्च
जाताः। रोगा बलास ग्रथितेनसा
र्द्धमेकादशोक्ताः खलु शुक्ल
भागे॥ तेषु प्रस्तार्य्यर्म्मणो।
लक्षणमाह। प्रस्तार्य्यर्म्मतनु
स्तीर्णं श्यावं रक्तनिभं सित
तनुः शुक्लं स्तीर्णं विस्तीर्णं।
श्यावरक्त मिश्रव विकल्पो वो
द्धव्यः॥ शुक्लार्म्माह। सश्वेत
मृदु शुक्लार्म्म शुक्ले तद्वर्द्धते
चिरात्॥ रक्तार्म्माह। पद्माभं
मृदु रक्तार्म्म यन्मांसं चीयते
सितं। पद्माभं वर्णेन रक्तासि।
सर्वतः। चीयते उपचीयते॥
अधिमांसार्म्माह। पृथु मृद्वधि
मांसार्म्म बहुलञ्च यकृन्निभं।
श्यावं विस्तीर्णं बहले स्थूले। य
कृन्निभं ईषत् कृष्णलोहितं॥
स्नाय्वर्म्माह स्थिरं प्रसारि मांसा
द्यं शुक्ले स्नाय्वर्म्म पञ्चमं स्थि
रं कठिनं। शुक्लं स्नावरहितं॥
शुक्तिमाह। श्यावाः स्युःपिशित
निभाश्च बिन्दवो ये शुक्त्याभाः
सित निचिताः स शुक्ति संज्ञः
श्यावा इत्यादि वर्णद्वये विकल्पो
बोद्धव्यः॥ अर्ज्जुनमाह॥ एको
यः शशरुधिरप्रभस्तु बिन्दुः शु
क्लेस्मा भवति तमर्ज्जुनं वद
न्ति॥ पिष्टकमाह श्लेष्ममारु
तकोपेन शुक्ले मांसं समुन्न
तं। पिष्टवत् पिष्टकं विद्धि
मलाक्तादर्शसन्निभं॥ पिष्टवत्
श्वेतं॥ सिराजालमाह॥
जालाभः कठिनः सिरोरुणः
सिराणां सन्तानो भवति सि
रादिजाल संज्ञः। सिरादि जा
लसंज्ञः सिराजालसंज्ञः। सिरा
पिडिकामाह शुक्लस्थाः सि
तपिडकाः सिरावृता यास्ता
विद्यादसित समीपजाः सिरा
जाः॥ बलासग्रथितमाह। कां
स्याभो मृदु रथ वारिबिन्दु क
ल्पो विज्ञेयो नयनसिते बला
ससंज्ञः। कांस्याभः श्वेत इव

शुः। अन्द्रः कठिनः। वारिविंद्र
कल्पः एतेन मनागुन्नतत्वेना
च्यते। वलाससंज्ञः वलासग्रथि
तसंज्ञः। क्वचिदेकदेशेनापि
समुदायावगमात्। यथाभी
मो भीमसेन इति। अतएवस्व
श्रुते। नामसंग्रहे वलासग्रथि
तपदं निर्दिष्टं॥
इति भावप्रकाशः॥
शुक्लिमा, [न्] पुं शुक्लता शुक्ल
शब्दादिमन् प्रत्ययेन निष्पन्नः।
शुक्लोपला, स्त्री शर्करा। इति
रत्नमाला। श्वेतप्रस्तरे पुं॥
शुङ्गः, पुं वटवृक्षः। आम्रातक
वृक्षः। इति मेदिनी शूकः॥
शुया इति भाषा। इति शूक
शब्दार्थे मेदिन्यादिकोषौ॥
शुङ्गा, स्त्री पर्कटीवृक्षः। इति
मेदिनी। नवपल्लवकोषी। इ
ति हेमचन्द्रः॥ धान्यादिशूकश्च
शुया यस्य प्रसिद्धिः॥
शुङ्गाकर्म्म, [न्] क्ली पुंसवनसं
स्कारविशेषः। यथा आग्निस्तम्भा
न्तो नाम गर्भाधाने विधीयते
पुंसवने चेदं नाम शुङ्गाकर्म्म
शिशोर्भवः। इति निष्पादितन्ते
तत्कर्म्मानुष्ठानं यथा॥ शो.
मननामानं मन्त्रं संस्थाप्य विरू
पाक्षजपान्ते कुशण्डिकां समा
प्य वटवृक्षस्य पूर्वोत्तरशाखाया
फलयुगलशालिनीं कृमिभिर
नुपहतां वटशुङ्गां यवानां माषा
णाम्वा त्रिभिस्त्रिभिः गुडकैः सप्त
वारान् सप्तभिर्म्मन्त्रैः क्रीणीयात्।
सप्तानां मन्त्राणां मृष्यादयः साधा
रणाः। प्रजापतिर्ऋषिः सोमव
रुण वस्वादित्य मरुद्विश्वे
देवा देवता न्यग्रोधशुङ्गा परिक्रय
णे विनियोगः। ओं यदसि सौमी
सोमाय त्वा राज्ञे परिक्रीणामि
इति गुडकत्रयेण प्रथमं परिक्र
यणं। यदसि वारुणी वरुणाय
त्वा राज्ञे परिक्रीणामि। इति गुड
कत्रयेण द्वितीयं परिक्रयणं॥
यदसि वसुभ्यो वसुभ्य त्वा रा
ज्ञे परिक्रीणामि। इति गुडकत्रये
ण तृतीयं परिक्रयणं। यदसि रु
द्रेभ्यो रुद्रेभ्य त्वा राज्ञे परिक्री
णामि। इति गुडकत्रयेण चतु
र्थं परिक्रयणं। यदसि आदि
त्येभ्यः आदित्येभ्य त्वा राज्ञे प
रिक्रीणामि। इति गुडकत्रयेण
पञ्चमं परिक्रयणं। यदसि मरु
द्भ्यो मरुद्भ्य त्वा राज्ञे परिक्री

णामि। इति गुडकत्रयेण ष
ष्ठं परिक्रयणं॥ यदसि विश्वेभ्यो
देवेभ्यो विश्वेभ्यो देवेभ्यस्त्वा रा
ज्ञे परिक्रीणामि। इति गुडक
त्रयेण सप्तमं परिक्रयणं॥
ततः क्रीतां वटशुङ्गां अनेनमं
त्रेण हस्ताद्दानयेत्। प्रजापति
र्ऋषिः ओषध्यो देवता न्यग्रो
धशुङ्गाच्छेदने विनियोगः।
ओषधयः सुमनसो भूत्वा अ
स्यां वीर्य्यं समाधत्त इयं कर्म्म
करिष्यति। ततस्तां वटशुङ्गां व
स्त्रेण वेष्टितां अन्तरीक्षे आनीय
अन्तरीक्षे स्थापयेत्। ततः कृत
स्नाभनतास्त्रो अग्रे कृतवतः प
हालितपिल्लया ब्रह्मचारी कु
मारी भगवती वा स्नातस्वा
ध्यायशीलो वा ब्राह्मणः आचा
र्य्यो नीहारजलेनानाहतलोष्टे
ण पुनः पुनः पेषयेत्। ततोऽग्नेः
पश्चिमतः उत्तराग्रेषु कुशेषु प
श्चिमाभिमुखीं वधूं उपवेश्य
नतमस्तकां कृत्वा दक्षदेशेषि
तः पतिर्दक्षिणपाणेः अंगुष्ठाना
मिकाभ्यां वस्त्रवद्ध पेषितवटशु
ङ्गां गृहीत्वा गर्भवत्या दक्षिणना
सापुटे शुङ्गारसं निःक्षिपति।
अनेन मन्त्रेण प्रजापति ऋषिर्विराड्
छन्दो अग्नीन्द्र वृहस्पतयो देव
ता न्यग्रोधशुङ्गारसस्य दाने विनि
योगः। पुमानग्निः पुमानिन्द्रः पुमा
न् देवो वृहस्पतिः। पुमांसं पुत्रं
विन्दस्व तं पुमाननुजायतां ततो
महाव्याहृति होमं कृत्वा प्राद
श प्रमाणां घृताक्तां समिधं तू
ष्णीं मन्त्रं कृत्वा प्रकृतं कर्म्म।
समाप्य उदीच्य शाट्यायन होमा
दि वामदेव्य गानान्तं कर्म स
माप्य कर्म्मकारयितृ ब्राह्मणा
य दक्षिणां दद्यात्॥
इति भवदेवः॥
शुङ्गी, [न्] पुं प्लक्षवृक्षः वटवृक्षः
इति जटाधरः॥
शुङ्गाविशिष्टे त्रि॥
शुच, अ य अ ई शौचे। विश
रणे। क्लेदे। इति कविकल्प
द्रुमः। शौचं शुद्धिः। विशरणं
विभेदः क्लेदः आर्द्रभावः॥
अ, अशुचत् अशोचीत्॥
यत्र शुच्यते लोकः स्नानात्
शुच्यति गात्रं व्रणः। शुच्यति
वस्त्रं सम्भवात्॥ ई, शुक्तः॥
शुचिर पूतीभावे इति क्रमः
इमानामस्य पतदन्तरोपादेतान



शीन् आप्नोति । इति दुर्गा-
दासः ॥
शुच शोके । इति कविकल्पद्रु
मः । तालव्यादिः । शोचति शोकः
पुत्रादेरदर्शनाद्दुःखानुभवः । किं
शोचसेऽहमुदये वनात् स्यामिति
भट्टिः ॥ प्रियतमा मां शोच
ते शोचते । इति महानाटके
गणकृतानित्यत्वादात्मनेपदं ।
इति दुर्गादासः ॥
शुचा स्त्री शोकः ॥
इति शब्दरत्नावली ॥
शुचिः पुं अग्निः । चित्रकवृक्षः ॥
आषाढमासः ॥ शुक्लवर्णः ॥
शृङ्गाररसः । इत्यमरः ॥ ग्रीष्मः
शुक्रमंत्री । ज्येष्ठमासः ॥
इति मेदिनी सौराग्निः । यथा
पावकः पवमानश्च शुचि रग्नि
स्त्रयस्तु यः । निर्मथ्यः पवमानः
स्यात् वैद्युतः पावकः स्मृतः ॥
यश्चासौ तपते सूर्यः शुचि
रग्निस्त्वसौ स्मृतः तेषां तु संत
तावन्ये चत्वारिंशत्तु पंच च ॥
पावकः पवमानश्च शुचिरेते पि
पितामहाः । एतेचैकोनपंचाशद
ग्नयः परिकीर्तिताः । इति
कौर्मे १२ अध्यायः । सूर्यः
यथा । तपन तापन सैव च
विःसमाप्लवाहनः । इति शास्त्र
पुराणं । चंद्रः । शुक्रः । ब्राह्मणः
इति केचित् ॥
शुचिः स्त्री कश्यपपत्न्याः ता
म्रायाः सुता । यथा । षट् सुता
स्तु महासत्वास्ताम्रायाः परि
कीर्तिताः । शुकी श्येनी च भा
सी च सुग्रीवा शुचि गृध्रिका
इति गारुडे ६ अध्यायः ॥
शुचिः त्रि शुक्लगुणविशिष्टः
इत्यमरः । शुद्धः । अनुपहतः ।
इति मेदिनी । यस्त्वात्मस्पृहे ह
स्तप्रक्षालनात् शुचिर्यथा । दे
वान् परशिवं दृष्ट्वा विरमेद्य
हरिं स्मरन् । स्पृष्ट्वा परस्त्रीणां
ख्रुहस्त प्रक्षालनात् शुचिः ।
इति ब्रह्मवैवर्ते श्रीकृष्णजन्म
खंडे ३५ अध्यायः ॥
शुचिता स्त्री शुचित्वं । यथा ।
शौचं नाम गुणः स्वैव सहजः
स्वाभाविकी स्वच्छता किं क्र
मः शुचितां भवंति शुचयः स
र्वे नद्यस्यापरे । किंचान्यत्किमथा
मिते स्थितिपदे त्वं जीवितं जी
वनं त्वंचेन्नीच पथेन यासि
पयः कस्त्वां निषेद्धुं क्षमः ॥

इति लक्ष्मणसेनः ॥
शुचिद्रुमः पुं अश्वत्थवृक्षः । इति
राजनिर्घण्टः ॥ शुद्धवृक्षश्च ॥
शुचिषदनीः त्रि आचमनं । यथा
आचामः स्यादाचमनमुपस्पर्शः
शुचिषदनीः । इति शब्दरत्नावली
शुचिमल्लिका स्त्री नवमालिका
इति राजनिर्घण्टः ॥
शुचिरोचिः पुं चंद्रः ॥ इति
केचित् । शुक्लकिरणे त्रि ॥
शुचि ई अभिषवे । इति कवि
कल्पद्रुमः । तालव्यादिः । पञ्च
मस्वरी । तालव्यवर्गाद्योपधः ॥
ई शुक्तः । यद्वा षान्तोऽयमि
त्येके । अभिषवः स्नाने मन्थ
ने पीडने संधानेच । इति दुर्गा
दासः ॥
शुटीरता स्त्री वीर्यं । इति त्रि
काण्डशेषः ॥
शुटीर्यं क्ली वीर्यं । इति शब्द
रत्नावली ॥
शुठ ऊ खोटने । इति कविक-
ल्पद्रुमः । खोटनमिह प्रत्याघातः
ऊ शुठित्वा । इति दुर्गादासः ॥
शुठ खोटने । इति कविकल्प
द्रुमः । खोटनमिह प्रत्याघातः
शुठति पयः सेतुना । इति ।
दुर्गादासः ॥
शुठ क आलस्ये । इति कविक
ल्पद्रुमः । क शोठयति चूडः कि
याम मन्दः स्यादित्यर्थः । इति
दुर्गादासः ॥
शुठ इकि शोषणे । इति कवि
कल्पद्रुमः । इ शुण्ठते । कि शु
ण्ठयति शुण्ठति पङ्कमातपा
त् रमानाथस्तु भ्वादिपक्षे शुष्की
भावे चुरादिपक्षे शुष्कीकरणेऽ
यमिति मत्वा भ्वादौ शुण्ठीति
पङ्कं चरादौ शुण्ठयति काष्ठमा
तप इत्युदाहृतवान् वस्तुतस्तु
उभयत्र शुष्कीभावः अन्यथा भौ
वादिकस्यैव प्रेरणा वाचित्वाच्चु
रादिपाठो नर्थकः स्यात् ॥
इति दुर्गादासः ॥
शुण्ठिः स्त्री शुण्ठी । इत्यमरटी
का शुण्ठी स्त्री शुष्कार्द्रकं । सुंठ
इति भाषा । तत्पर्य्यायः । महौषधं
१ विश्वं २ नागरं ३ विश्वभेष
जं ४ । इत्यमरः । शुण्ठिः ५ ॥
विश्वा ७ महौषधी ८ । इति र
त्नीका । इन्द्रभेषजं ९ भेषजं १०
इति शब्दरत्नावली ॥ विश्वौ
षधं ११ कटुग्रन्थिः १२ कटुभ
द्रं १३ कटूत्पणं १४ सोपणं




१५ शृङ्गवेरं १६ कफारिः १७ वोदकं १८ शोषणं १९ नागराह्वं २०। अस्या गुणाः। कटुत्वं। उष्णत्वं। स्निग्धत्वं। कफशोफानिल शूल वन्धोदराध्मान श्वास श्लीपदनाशित्वञ्च। इति राजनिर्घण्टः॥ अपिच॥
शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः। स्निग्धोष्णा मधुरा पाके कफ वात विवन्धनुत्। वृष्या स्वर्य्याच निःश्वास शूल कास हृदामयान् हन्ति श्लीपद शोथार्शो आनाहोदर मारुतान्। आग्नेयगुण भूयिष्ठे तोयांशे परिशोषयेत्। संगृह्णाति मलं तत्तु ग्राहि शुण्ठ्यादयो यथा। विवंध भेदिनी याच सा कथं ग्राहिणी भवेत्। शक्तिर्विवंध भेदे स्याद्यतो न मलपातने। इति भावप्रकाशः॥
अन्यच्च। शुण्ठीतु कफवातघ्नी सस्नेहा लघुदीपनी। विपाके मधुरा वृष्या रुच्योष्णा कटु रोचनी। इति राजवल्लभः
शुण्ठ्कं क्ली शुण्ठी। इति शब्दचन्द्रिका॥
शुण्डः। पुं मदनिर्झरः। इतिहेमचन्द्रः। करिकरश्च॥
शुण्डकः पुं शौण्डिकः। इति शब्दरत्नावली। युद्धवेणुः। इति शब्दमाला॥
शुण्डरोहः पुं भल्लूकः। इति राजनिर्घण्टः। पुस्तकान्तरे शृङ्गरोह इति पाठः॥
शुण्डा स्त्री मद्यपानगृहं। ओंडुहस्तिनी। वेश्या। सुरा। हस्तिहस्तः। शुंड इति भाषा। इति मेदिनी। नालिनी। इति विश्वः कुट्टनी। इति शब्दमाला॥
शुण्डापानं क्ली मदपानगृहं॥ तत्पर्य्यायः मदस्थानं २। इत्यमरः। मदस्थलं ३ इति शब्दरत्नावली॥
शुण्डारः पुं शौण्डिकः। इति शब्दरत्नावली॥
शुण्डालः पुं हस्ती। इति धनञ्जयः॥
शुण्डिका स्त्री अलिजिह्वा। इति केचित्। शुण्डाशब्दार्थोप्येषा।
शुण्डिमूषिका स्त्री छुछुन्दरी इति राजनिर्घण्टः॥
शुण्डी पुं शौण्डिकः। इति शब्दरत्नावली॥ हस्ती च॥
शुण्डी स्त्री हस्तिपिप्पलीवृक्षः। इति राजनिर्घण्टः॥

शुतद्रिः स्त्री शतद्रुनदी। इत्यमरटीकायां भरतः॥
शुतद्रुः स्त्री शतद्रुनदी। इति भरतद्विरूपकोषः॥
शुद्धं क्ली सैन्धवे। मरिचे। इति राजनिर्घण्टः॥ मरिच पर्य्याये शुद्धं यल्लिखितं तदशुद्धं॥
शुद्धः त्रि केवले निर्दोषः॥ पवित्रः। इति मेदिनी। शुक्लः इति भरतः॥ रागान्तरासंश्लिष्टरागः। इति संगीतशास्त्रं॥
शरीरस्य शुद्धताकारणं यथा। श्रीनारद उवाच। मानवानां हि जातीनां शरीरस्यापवित्रता॥ भवेत् केनप्रकारेणकथ्यतां तत्सदाशिव। सर्ववेदपुराणादि शास्त्रज्ञानां द्विजन्मनां॥ जितेन्द्रियस्मृतिविदां तत्ताः कथ्यतां। श्रीसदाशिव उवाच यथा देहापवित्रत्वं विप्रादीनां यतोभवेत्॥ देवर्षे शृणु तत्सर्वं नराणामानुपूर्विकं जातके मृतके स्याते जलौकोभिः क्षतेतथा। अपवित्रो द्विजादीनां देहः संध्यादिकर्मसु। शृगालचाण्डालकाकानां स्पर्शने चैवमस्पृश्यस्य जपादिषु। रक्तपाते तथा शृङ्ग दन्त खङ्गादिभिः क्षते विषादे वृश्चिकादिकायः शस्त्राद्यैः काष्ठकादिभिः भक्षाहरणतोच्छिष्टैः पविचैः कृतमैथुने। शयने आस्यनाडीनां शरीरे क्षुरकर्म्मणि ज्वरादिभि स्नातः पाहि रोगैर्ग्रस्तद्विजन्मनां। वपुरशुद्ध्यते पूजादान होम जपादिषु॥ धूमोद्गारे वमौ श्राद्ध पतितान्नादिभोजनैः। तथा चरेतः स्खलने मर्त्यदेहापवित्रता॥ अपवित्रद्विजादीनां वपुः स्नानजलपाने। गर्हितदानग्रहणे पतिते पातकादिभिः अशौचान्तेन शुद्धिः स्यात् जातके मृतकेपिच। सर्ववर्णाश्रमादीनां तत्ताः सत्यादिकमेसु॥ इतिपाद्मोत्तरखण्डे ९९ अध्यायः॥
शुद्धजङ्घः पुं गर्दभः। इति त्रिकाण्डशेषः॥ पवित्रजानुके त्रि॥
शुद्धदत् त्रि शुद्धादन्ता यस्य सः शुक्लदन्तयुक्तः। यथा गते त



स्मिन् जलशुचिः शुद्धदन्तावलाः
शिखी जंजपूकोऽशमाला
वान् धारयो मृदलावुनः। इति
नैषधे ५ सर्गः ॥
शुद्धमति पुं चतुर्विंशतिभूत-
हेदंतशीतलजिनविशेषः। इति
हेमचन्द्रः। पवित्रबुद्धौ स्त्री। त
द्वतिवि। यथा। तदन्वये शुद्ध-
मतिः प्रसूतः शुद्धिमत्तरः।
दिलीप इति राजेन्दुरिन्दुः क्षीरनि-
धाविव। इति रघौ १ सर्गः॥
शुद्धमांस क्ली मांसव्यञ्जनवि-
शेषः। यथा। पाकपात्रे घृते तद्-
घोले वा तदभावतः। तत्र हि
गृहविद्दोच भर्जयेत्तदनन्तरं ॥
छागादेः रुधिररहिते मांसखण्ड-
लेऽखण्डिते। धौत निर्गालिते
तस्मिन् घृते तद्भर्जयेच्छनैः॥
सिद्धयोग्यं जलं दत्वा लवणं
चूर्णचेत्ततः। सिद्धे जलेन सोऽपि
च वेसवारं परिक्षिपेत् ॥
कृष्णामरिचवेसवारस्य नागर-
शीदलानि हि। तगरुलाशुलेव
धानियमिचानि समांशतः। कृते
नविधिना सिद्धं शुद्धमांसमिति
स्मृतं। शुद्धमांसं परं वृष्यं ब-
ल्यं रुच्यञ्च वृंहणं। त्रिदोष-
शमनं श्रेष्ठं दीपनं धातुवर्द्ध-
नं। इति भावप्रकाशः ॥
शुद्धवल्लिका स्त्री गुडूची। इति
शब्दचन्द्रिका पवित्रलता च ॥
शुद्धान्तः पुं अन्तःपुरं। नृपस्य
सर्वेषामचरकक्षान्तरं। इत्यमरमे-
दिन्यौ राजयोषित् ॥
इत्यजयः। अशौचान्तः। इति
धरणिः ॥
शुद्धान्तपालकः पुं अन्तःपुर-
रक्षकः। तत्पर्यायः ॥ गृह-
दौवारिकः २ कञ्चुकः ३
सौविदल्लकः ४ इति शब्दमा-
ला। तस्य लक्षणं यथा।
वृद्धः कुलोद्गतः स्नातः पितृ-
पैतामहः शुचिः। राज्ञां सततः
प्रकृत्या विनीतश्च तदीष्य-
ते। इति कालिका ८९ ॥
अध्यायः ॥
शुद्धान्ता स्त्री राज्ञी। यथा। शु-
द्धान्तश्च विशुद्धान्ते शुद्धान्ता
नृपयोषितः। इति धरणिः ॥
शुद्धापह्नुतिः स्त्री अलङ्कारवि-
शेषः। यथा। शुद्धापह्नुतिरन्यस्या-
रोपार्थो धर्मनिह्नवः। नायं
सुधांशुः किं तर्हि व्योमगङ्गा-
सरोरुहं। इति चन्द्रालोकः ॥

शुद्धिः स्त्री दुर्गा। यथा। स्मर-
णाच्चिन्तनाद्वापि पूयन्ते शुद्धि
पातकात्। तेन शुद्धिः समा-
ख्याता देवी रुद्रतनौ स्थिता॥
इति देवीपुराणे देवीनिरुक्ता-
ध्यायः ४५ मार्जना। इति ज-
टाधरः। वैदिककर्मार्हत्वप्रयो-
जकसंस्कारविशेषः। यथा।
शुद्ध्यशुद्ध्योः संस्काररूपत्वेन
एकपुरुषस्यैकदोभयासम्भवाति
चेद्ते। अशुद्धेर्भावरूपत्वे शुद्धे-
स्तदभावरूपत्वे नैतद्विरोधा-
त्। अतएव शङ्खः। ततश्चा-
शुद्धौ न कुर्यादेकादशी
तथा। कर्तुस्तात्कालिकी
शुद्धिः अशुद्धः पुनरेव सः॥
अशुद्धौ चतुर्थ्यादौ। कथम-
शुद्धौ श्राद्धं कालाशौचस्यापि
कालविशेषणत्वादत आह क-
र्तुस्तात्कालिकीति। श्राद्धविधा-
नोद्देशमात्रनिष्ठा शुद्धिरव-
श्यते। समुनः अशुद्ध एव कर्मा-
न्तर एव। इति श्राद्धविवेकः।
एवं शुद्धेर्भावरूपत्वे अशौच-
स्य तदभावरूपत्वे विरोधः न
घात्वे अशौच शङ्कापि न
स्यात्। एकस्मिन् शुद्ध्यभावरूप-
अशौचे सम्पन्नस्य तदुपस्य
तदानीं तत्प्रकर्षीय शुद्धिरूप-
प्रतियोग्यन्तराभावादनुत्पत्तेः।
तस्मात् शुद्ध्यशुद्धी भावरूप-
त्वे। इति शुद्धितत्त्वं। अथाशौ-
चविशुद्धिः। अथ वृद्धिमदाशौच-
मद्ध्ये त्र्यहेन शुध्यति। अथ चे-
त् पञ्चमीरात्रिमतीत्य परतो
भवेत्। अथ वृद्धिमदाशौचं तदा
पूर्वेण शुध्यति। अथ वृद्धिम-
त्येन सपिण्डजननाशौचापे-
तया स्वपुत्रजननाशौचस्यस-
पिण्डमरणाशौचापेक्षया पि-
तृमातृभर्तृमरणाशौचस्य ॥
जाते पुत्रे पितुः स्नानं सचेलन्तु वि-
धीयते। माता शुध्येद्दशाहेन
स्नानात्तु स्पर्शनं पितुः। शुध्येत्
स्पर्शमात्रे उभयत्राकेचित् तथा
दर्शनात्। जननाशौच मध्ये
तु यद्यपरं जननं स्यात् तदा
पूर्वाशौचव्यपगमे शुद्धिः ए-
विशेषे दिनद्वयेन प्रभाते दि-
नत्रयेण मरणाशौचमध्ये ज्ञा-
तिमरणेप्येवमिति। यस्य यस्य
तत्तस्य यद्यतः स्यात् पश्चिम-
त्वहः। सतत्रवलि शुद्धिश्च गृहस्थ
हि करोत्यपि समाप्य दशमेऽपि



णे यथाशास्त्रमुदाहृते । ग्रामाद्ब
हिः स्नात्वा गत्वा प्रेतस्पृष्टेचवास
सी । अन्त्यानां माश्रितानाञ्च
त्यक्त्वा स्नानं करोत्यपि । श्मश्रु
लोम नखानाञ्च यत्त्याज्यं तज्ज
हात्यपि । गौर सर्षप कल्केन
तिलतैलेन संयुतः । शिरः स्ना
नं ततः कृत्वा तोयेनाचम्य वा
ग्यतः ॥ वासो युगं नवं शुभ्र
मव्रणं शुद्ध मेवच । गृहीत्वा
गोमयं चैव मङ्गलानि शुभानि
च । स्पृष्ट्वा संकीर्तयित्वा च पश्चा
च्छुद्धो भवेन्नरः । गृहशुद्धिः प्र
कर्तव्या पाकभाण्ड परित्यागः उ
पलेपादिना त्याज्यं त्यागार्हं
ग्रागार्हैः सन्निवृत्तेषु स्वस्त्यानाः
कृत मङ्गलाः । शास्त्रज्ञादि प्रशु
चेतब्राह्मणान् स्वस्तिवाच्यच
स्वल्पाशौचस्यमध्ये तु दीर्घाशौ
चं भवेद्यदि न तु पूर्वेण शुद्धिः
स्यात् स्वकालेनैव शुध्यति ॥
समाने लघुचाशौचे पूर्वेणैव
विशुध्यति यदि स्यात् सूतके
सूति र्मृतके च मृतिर्भवेत् । शे
षेणैव भवेच्छुद्धि रहःशेषे द्विरा
त्रके । मरणोत्पत्ति योगेन
मरणाच्छुद्धि रिष्यते ॥

अर्वाक् षण्मासतः स्त्रीणां यदि
स्यात् गर्भसंस्रवः । तदा मास
समै स्तासां दिवसैः शुद्धिरिष्य
ते । गर्भस्रुत्यां यथामास मचि
रे तूत्तमे त्र्यहः राजन्येतुचतु
रात्रे वैश्यपंचाहमेवच । अ
ष्टाहेन तु शूद्रस्य शुद्धि रेषा
प्रकीर्तिता । रात्रिभि र्मासतु
ल्याभि र्गर्भस्रावे विशुध्यति
रजस्युपरते साध्वी स्नानेन स्त्री
रजस्वला । शुद्धा भर्तुः चतुर्थे
ह्नि शुद्धा स्याद्दैवपैत्रयोः । दैवक
र्माणि पैत्रे च पंचमेहनि शुद्ध्य
ति । दत्ता नारी पितुर्गेहे सू
यते म्रियतेऽथवा ॥ स्वसमे
चंचरेत् सम्यक् पृथक् स्थान
व्यवस्थिता तद्बन्धुवर्गे स्त्वेके
न शुध्येत् जनकस्त्रिभिः ॥
यस्तैः सहासनेऽकुर्यात् शयना
दीनि चैव हि बान्धवो वा परोवा
पि सदशाहेन शुध्यति ॥ स्त्री
णां मसंस्कृतानांतु त्र्यहात् शुध्य
न्ति बान्धवाः । यथोक्तेनैव कल्पे
न शुध्यंति हि सनाभयः ॥
षण्मासाभ्यन्तरे शूद्रे मृते बाले
ग्रहं विदुः । अनतीते द्विवर्षेवे
मृते शुध्येत पञ्चभिः ॥

बाल स्त्वन्तर्दशाहेतु प्रेतत्वंय
दि गच्छति । सद्य एव विशुद्धिः
स्यान्नाशौचं नैवसूतकं । न्दाणाम
कृतचूडानां मशुद्धि र्नैशिकी स्मृ
ता निवृत्तचूडकानांतु त्रिरात्रा
च्छुद्धि रिष्यते । दशाहेन सपिण्डा
स्तु शुध्यंति प्रेतसूतके । त्रिरा
त्रेण सकुल्यास्तु स्नात्वा शुध्यंति
गोत्रजाः शुध्येद्विप्रो दशाहेन
द्वादशाहेन भूमिपः । वैश्यः
पंचदशाहेन शूद्रो मासेनशुध्य
ति । दशाहेःहानि शूद्रस्य कार्यं
संस्पर्शनं बुधैः । मासेनैवविशु
द्धिः स्यात् सूतके सूतकेऽपिवा
संस्थिते पक्षिणीरात्रिं दौहित्रे
भगिनीसुते संस्कृतेतु त्रिरा
त्रं स्यादिति धर्मोव्यवस्थितः
पित्रोरुपरमे स्त्रीणामूढानां
तु कथं भवेत् त्रिरात्रेणैव शुद्धिः
स्यादित्याह भगवान् शिवः ॥
यदा भोजन कालेतु अशुचि
र्भवति द्विजः । भूमौ निःक्षि
प्य तद्ग्रासं स्नात्वाचैव विशु
ध्यति ॥ चिकित्सको यत्कुरु
ते तदन्येन न शक्यते । तस्मात्
चिकित्सकस्पर्शी शुद्धो भवतीति नि
श्चयः ॥ गर्भिणी सूतिका

नक्तं कुमारीच रजस्वला यदा
शुद्धा तदान्येन कारयेत्क्रि
यते सदा ॥ प्रेतीभूते द्विजे वि
प्रो योऽनुगच्छति कामतः
स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं
प्राश्य विशुध्यति ॥ एकाहा
त् क्षत्रिये शुद्धि र्वैश्ये च स्या
द्विहेन तु । शूद्रे दिनत्रयं प्रोक्तं
प्राणायामशतं पुनः । नारस्पृ
ष्ट्वास्थि सस्नेहं स्नात्वा विप्रो वि
शुध्यति । आचम्यैव तु निःस्ने
हं गा मालभ्यार्कमीक्ष्य वा ॥
असपिण्डं द्विजं प्रेतं विप्रो नि
र्हृत्य बन्धुवत् । विशुध्यति त्रि
रात्रेण मातुराप्तांश्च बान्धवा
न् । यद्यन्न मत्ति तेषान्तु सद
शाहेन शुध्यति । अन्नदन्नन्नम
ह्नैव नचेत्तस्मिन् गृहे वसेत्
अस्थिसंचयनादर्वाक् यदि वि
प्रोऽश्रुपातयेत् । मृते शूद्रे गृहं
गत्वा त्रिरात्रेण विशुध्यति ॥
अस्थिसंचयनादूर्ध्वं यावन्मासं
द्विजातयः दिवसेनैव शुद्धिः
स्यात् सचेलाप्लवनेन च ॥ स्व
जाते दिवसेनैव त्र्यहात् क्षत्रिय
वैश्ययोः स्पर्शादिना नु गमने
शूद्रो नक्तेन शुध्यति ॥



5446

अजा गावो महिष्यश्च ब्राह्मणी
च प्रसूतिका । दशरात्रेण शुद्ध्य
ति भूमिष्ठञ्च नवोदकं ॥
उदक्या सूतिका वापि अन्त्यजं
संस्पृशेद्यदि । त्रिरात्रेणैव शुद्धिः
स्यादिति शातातपोऽब्रवीत् ॥
नवखातजलं गावो महिष्यश्छा
गयोनयः । अश्नन्ति दिवसे दे
व दशाभिर्न्न संशयः ॥ काले न
वोदकं शुद्धं नपातव्यं तु तत्त्र्यहं ॥
अथ द्रव्यशुद्धिः । ब्राह्मे । सुव
र्णरूप्यशंखाश्म शुक्ति रत्नम
यानि च । कांस्यायस्ताम्र रैत्या
नि त्रपुसीसमयानि च । निर्लेपा
नि विशुद्ध्यन्ति केवलेन जलेन तु
शूद्रोच्छिष्टानि शुध्यन्ति त्रिधा
तास्त्र वारिभिः ॥ सूतिका श
व विण्मूत्र रजस्वला हतानि च ॥
प्रक्षेप्यान्यानि तान्यग्नौ यच्च याव
त्सहेदपि रैत्यं पित्तलं ॥ त्रप
रंग । यत्पात्रं यावत्कालमग्निं सहे
त तत्पात्रं प्रक्षालनानन्तरं ताव
त्तापनीयमित्यर्थः ॥
बृहस्पतिः ॥ अम्भसा हेमरूप्या
यःकांस्यं शुद्ध्येत भस्मना ॥
अम्लैस्ताम्रञ्च रैत्यञ्च पुनःपाके
न मृन्मयं ॥ राजधर्म्मे ॥

पञ्चलोच्छिष्टं कांस्यं यत् गवा
घ्रात मथापि वा । गण्डूषोच्छि
ष्ट मपि च विशुद्ध्येद्दशभिस्तु
तत् । दशाभि र्दिनै रितिशेषः
तथाच । कांस्येन धावयेत् पा
दौ यत्र स्यादपि भोजन मिति
यत्र पात्रान्तरे भोजनं तत्र स्र
तस्यैव तस्य साहचर्य्यात् कां
स्यवच्छुद्धिः ॥ बौधायनः ॥
भिन्नकांस्ये तु योऽश्नीयात् न
ह्यात्वा जपेद्द्विजः । गाय
त्र्यष्टसहस्रन्तु एकभक्तः स्त
तः शुचिः । देवलः । ताम्ररज
त सुवर्णाश्मस्फाटिकानां भिन्न
मभिन्नं । इति भिन्नत्वेपि न दोष
इत्यर्थः ॥ विष्णुः । शारीरैर्मलैः
सुराभि र्मद्यैर्वा यदुपहतं तद
त्यन्तोपहतं सर्वं लोहभाण्ड
मग्नौ प्रतप्तं शुद्ध्येत । मणि
मय मश्ममय मब्जमयञ्च स
प्तरात्रं महीखननेन शृङ्गदन्ता
स्थिमयञ्च तक्षणेन दारुमयं मृ
न्मयं जह्यादिति । लोहपदं सुवर्णा
द्यष्टक परं ॥ मनुः । त्रीणि देवाः
पवित्राणि ब्राह्मणानामकल्पय
न् । अदृष्ट मद्भि र्निर्णिक्तं यच्च
वाचा प्रशस्यते । अदृष्ट मुप ।

5447

घ्रात शंकादिभि रज्ञातं । अज्ञा
तञ्च सदा शुचि इति याज्ञवल्क्यो
क्तवाक्यत्वात् । वाचेति उपघात
शंकायां पवित्रं भवत्विति ब्राह्म
णै र्यद्वाचा प्रशस्यते इति मूल
पाणि महामहोपाध्याय कुल्लू
कभट्टौ ॥ शातातपः । गोकु
ले कंदुशालायां तैलयंत्रेक्षुयं
त्रयोः । अमीमांस्यानि शौचानि
स्त्रीषु बालातुरेषु च ॥ मनुः । मक्षि
का विप्रुषश्छाया गौरश्वः सू
र्य्यरश्मयः । रजो भूर्वायु रग्नि
श्च स्पर्शे मेध्यानि निर्दिशेत् ॥
बौधायनः । अक्रुद्धाः संततधा
रा वातोद्धूताश्च रेणवः । आकराः
शुचयः सर्वे वर्जयित्वा सुराक
रं । शंखलिखितौ । आकरद्र
व्याणि प्रोक्षितानि शुचीनि ॥
आममांसे घृते क्षौद्रे स्नेहाश्च
फलसंभवाः । म्लेच्छभाण्डस्थि
ता दुष्टा निष्क्रान्ताः शुचयः स्मृ
ताः । विष्णुधर्मोत्तरे । शुष्कवर्ज्ज
न्तु गोः शुष्कशाकाम्बुकमेष्वपि शुचिः
पुष्पाणाञ्च फलानाञ्च प्रोक्ष
णाच्छुद्धिरिष्यते ॥ शङ्खः ।
मक्षिकाः संततधारा भूमिस्तो
ये कृताशनः मार्जारश्चापि द

र्वीच मारुतश्च सदाशुचिः ॥
बौधायनः । अन्ने कोद्रवे दा
ह शिले भूमिसमे इष्टकाशुसं
कीर्णीभूता । इति । संकीर्णीभू
ताः परस्परसंबद्धाः । विष्णुः प्रो
क्षणेन पुस्तके इति । शातात
पः तापनेन घृत तैलानां प्लावनं
गोरसस्य च । तन्मात्र मुद्धृत्य शु
द्ध्येत् कठिनं तु पयो दधि । अवि
लीने तथा सर्पि र्विलीने श्रप
णेन तु । अविलीनं कठिनं ॥
मनुः द्रव्याणाञ्चैव सर्वेषां शुद्धि
रुत्प्लवनं स्मृतं । प्रोक्षणं संहता
नाञ्च दारवाणाञ्च तक्षणं । इद
मुच्छिष्टाद्यल्पदोष । उत्प्लवनं
वस्त्रान्तर निर्वापणेन कीटाद्यप
नयनं । शातातपः क्लीवाभिश
स्तपतितैः सूतिकोदक्यानास्ति
कैः । दृष्टं वा स्यात् यदन्नन्तु
तस्य निष्कृति रुच्यते । अस्य सु
किञ्चिदुद्धृत्य भुंजीत यदाविशं
कितः ॥ देवलः । चाण्डालेनश्व
ना वापि दृष्टे हविषु यानिये ॥
विडालादिभि रुच्छिष्टे दुष्टमन्नं
विवर्जयेत्तत्र हिरण्योदक स
मुद्रादिति ॥ मनुः । अशित्वास्यो
हंता शौचे वरूंतायास वासतो

प्रक्षालनेनत्वल्पानां मद्भिः शौ
चं विधीयते ॥ शुद्धि विवेकधृत
न्नो विष्णुः । गुडानामिक्षु विका
राणां प्रभूतानां वाप्यग्निदानेन
सर्वलवणानाञ्चेति ॥ अङ्गिराः
यथा यत्र स्नातो स्नापः शुद्धिं
यातिनदीगताः ॥ शूद्राद्विप्र
गृहेष्वन्ने प्रविष्टन्तु सदा शुचि
प्रविष्टं स्वल्पापादक प्रतिग्राह्य
दिनेति शेषः ॥ संवर्त्तः सक
दंसं तेभ्य स्तोय मपास्यतत् ॥
प्रक्षिपेत् पंचगव्यञ्च समंत्रंस
वेशुद्धिकृत् । अपास्य कुणपं
तेभ्यो वहूलोयेभ्य एवता ॥
शतं घटस्य वा विंशत् तोयकुं
भान् समुद्धरेत् । पंचगव्यं तत
स्तेषु प्रक्षिपेत्सर्वशैके शतादि
अल्पत्वाद्यपेक्षया अल्पत्वमस
वीक्षणाभिधानात् । बृहस्पतिः
सु शूद्रपतिता श्वोत्सा मृता श्व
द्विजमन्दिरे । शौचं तत्र प्रवक्ष्या
मि मनुना भाषितं यथा । दश
रात्रात् कुनि प्रेते मासात् शूद्रेभ
वेत्सूचिः । द्वाभ्यां तु पतितेगेहे
श्वे मासचतुष्टयात् । अत्यन्ते
वर्जयेद्गेह मित्येवं मनुरब्रवीत् ।
यमः । द्विजस्यमरणे वेश्म वि

शुद्ध्यति दिनत्रयात् दिनैकेन व
हिर्भूमि रग्नि लेपणलेपनैः ॥
यथोक्त कालानन्तरं कर्तव्यमा
ह सम्वर्त्तः । गृहशुद्धिं प्रवक्ष्या
मि अन्तःस्थ शवदूषिते । प्रोत्
सृज्य मृन्मयं पात्रं सिद्धमन्नं
तथैवच । गृहादपास्यतत्सर्वं
गोमयेनानुलेपयेत् गोमयेना
नुलिप्याथछागेनाघ्रापयेद्बुधः
ब्राह्मणै मन्त्रपूतैश्च हिरण्य कु
श वारिभिः । सर्वमभ्युक्षयेद्वेश्म
ततः शुध्यत्यसंशयः । मंत्रानां
देशे गायत्री ॥ देवलः । पं
चधावा चतुर्था वा भस्मेध्या वि
शुध्यति । कुष्ठा द्विधात्रिधा वा
पि शुध्यते मलिनैकधा ॥
दहनं खननं भूमे रुपलेपनवा
पने । पर्जन्यवर्षनञ्चापि शौचं
पंचविधं स्मृतं । प्रसूतेवाभिनी
यत्र म्रियते यत्र मानुषः । चाण्डा
लै रुषितं यत्र यत्र विन्यस्यते
शवः विन्मूत्रोपहतं यच्चकुणपो
यत्र दृश्यते । एवंकश्मलभूयि
ष्ठा भूरमेध्यातिकथ्यते ॥ कृ
मिकीटपदक्षेपैर्दूषिता यत्र मेदि
नी । प्रायस्या कर्षणैः क्षिप्रा वा
त्रे वीरुपतां व्रजेत् ॥

नाव दंत तनुज त्वक् तृषपांशु
रजो मलैः । भस्म पंकतृणैर्वापि
प्रच्छन्ना मालिना भवेत् । वाय
ने मृदंतरेण स्पर्शे यथा ह्य
नीभूतश्लेष्मादि । इति शुद्धितत्वे
अपिच । याज्ञवल्क्य उवाच ॥
द्रव्यशुद्धिं प्रवक्ष्यामि तान्निबोध
तस्ततमाः । सौवर्ण राजताब्जानां
शाक वस्त्रादिचर्मणां पात्राणां
चमसानाञ्च वारिणा शुद्धिरिष्य
ते । उष्णवारिभिः स्रुक्स्रुवयोर्धान्या
देः प्रोक्षणेनच तक्षणात् दारु
शृंगादे यंत्रपात्रस्य मार्जनात्
सोमे हृदक गोमूत्रैः शुद्ध्य
माविक कौषिके । भेतं यो
षिन्मुखं पुण्यं पुनः पाकान्महो
मयं । गोघ्राते च तथा केश म
क्षिका कीटदूषिते । भस्मलेप
हि शुद्धिः स्याच्छुद्धि मार्जना
दिना । त्रपुसीसक ताम्राणां
क्षाराम्लोदक वारिभिः भस्मा
द्भि लौह कांस्यानां मरुतात्त्व
सदा शुचि । अमेध्याक्तस्य मृ
त्तोयै र्गंधलेपापकर्षणात् ।
शुचि गौ स्तृप्तिदं तोयं प्रकृति
स्थं महीगतं । तथा मांसं श्व
चाण्डाल क्रव्यादादिनिपातितं

रश्मि रग्नी रजश्छाया गौरश्वो
वसुधानिलः । अश्वाज विप्रुषो
मेध्या स्तथा चामलविन्दवः स्ना
त्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्या
पसर्पणे आचान्तः पुनराचामेत्
वासो विपरिधायच । क्षुते निष्ठी
विते स्वापे परिधाने ऽश्रुपातने
पंचस्वेतेषु नाचामेत् दक्षिणं
श्रवणं स्पृशेत् । तिष्ठन्त्यग्न्या
दयो देवा विप्रकर्णे तु दक्षि
णे । इति गारुडे ९६ अध्यायः
अपिच । मणि वज्रप्रवालानां
तद्वन्मुक्ताफलस्यच । शैल दा
रुमयाणाञ्च तृण गुल्मौषध
स्यच । शाक धान्याजिनानाञ्च
संहतानाञ्च वाससां । वल्कला
नामशेषाणां संतुना शुद्धि रि
ष्यते सस्नेहानां मयोक्तेन तैल
कल्केन शोधने । कार्पासिका
नां वस्त्राणां शुद्धिः स्यात् सह
भस्मना । नागदन्तास्थि शृंगा
णां तक्षणाच्छुद्धि रिष्यते । पुनः
पाकेन भाण्डानां मृन्मयानाञ्च
शुद्धता । शुद्धं भैक्ष्यं कारुहस्तः
पण्यं योषिन्मुखं तथा रथ्याग
तमविज्ञातं दासवर्गेण यत्कृतं
वाक्प्रशस्तं चिरातीत मनेका



ताधिते लघु चेष्टिते बाल वृ
द्धानां बालस्य तु मुखं शुचि
म्लेच्छानामपि गोशाला स्त
नंधयस्तथा स्त्रियः वारिविप्रुषो
द्विजेन्द्राणां पाठवागम्बुबिंदवः
भूमिर्विशुध्यते खात दाह गो
क्रमसेचनैः। लेपादुल्लेखनात्
सेकात् वेश्म सम्मार्ज्जनाज्जला
त्। केशकीटावपन्ने गोघ्रा
ते मक्षिकान्विते। मृद्वारि भ
स्मक्षाराणि प्रक्षेप्तव्यानि शुद्धये
उदुम्बराणामम्लेन क्षारेण
त्रपुसीसयोः। कांस्यानां भस्म
ना शुद्धिस्ताम्राणां शुद्धिर्द्रवस्य च
अमेध्याक्तस्य मृत्तोयैर्गन्धापहर
णेन च। अन्येषामपि तद्द्रव्यैः शु
द्धिर्गन्धापहारतः। मातुः प्रस
वने वत्सः शकुनिः फलपातने
गर्दभो भारहारित्वे श्वा मृग
ग्रहणे शुचिः। रथ्याकर्द्दम
तोयानि नावः पथि तृणानि च
मारुतेनैव शुध्यन्ति पक्वेष्टकचि
तानि च। मृते शौचात् शुक्लपोत
सैरेध्याभिप्लुतं भवेत्। अशुचि
हस्त संस्पृष्टं पेयस्य भाजनं
स्मृतं। उपवासं त्रिरात्रं वा दूषि
तान्नस्य भोजने। अज्ञाते

ज्ञानपूर्वे च तेनैव शुद्धिर्विधीयते।
उदक्या श्वान नग्नांश्च सूतिकां
शावधारिणः। स्पृष्ट्वा स्नायीत
शौचार्थं तथैव मृतहारिणः। स
स्नेह मस्थिसंस्पृश्य सवासाः स्ना
नमाचरेत्। आचम्यैव तु निःस्नेहं
गामालभ्यार्कमीक्ष्य च। इति वा
मनपुराणे १४ अध्यायः। अम
न्मार्कण्डेयपुराणे सदाचाराध्या
ये द्रष्टव्यं॥ जलशुद्धिर्यथा। गंगे
च यमुने चैव गोदावरि सरस्व
ति। नर्म्मदे सिन्धु कावेरि जलेऽ
स्मिन् सन्निधिं कुरु। भूतशु
द्धिस्तत्कक्षे द्रष्टव्या॥ आ
सनशुद्धिर्यथा। पृथ्वीगन्धपृष्ठे
आधार शक्ति कमलासनाय न
मः। आसन मन्त्रस्य मेरुपृष्ठ ऋ
षिः सुतलं छन्दः कूर्म्मो देवता आ
सन परिग्रहे विनियोगः। पृ
थ्वि त्वया धृता लोका देवि त्वं वि
ष्णुना धृता। त्वञ्च धारय मां नि
त्यं पवित्रं कुरु चासनं। भाण्ड
शुद्धिर्यथा। पंचगव्येन तु ले
न मण्डपं परिशोधयेत्। गो
नमीये। पंचगव्यैर्नतन्देहं
मण्डलञ्च विशोधयेत्। पंच
गव्य प्रमाणन्तु तत्रैव पलमात्रं

कुशपानीयं गोमूत्रं तावदिष्यते
घृतञ्च पलमात्रं स्यात् गोमयं
तोलकद्वयं। दधिप्रसृतिमात्रं
स्यात् पंचगव्यमिदं स्मृतं। अ
थवा पंचगव्यानां समानो भाग
इष्यते मूलमन्त्रेण संमन्त्र्य तेनै
व परिशोधयेत्। तेन सर्व
विशुद्धिः स्यात् सर्वपाप नि
कृन्तनं। इति तन्त्रसारः॥
गृहशुद्धिर्गोचरशब्दे द्रष्टव्या॥
शुद्धोदनसुतः पुं बुद्धभेदः॥
इति हेमचन्द्रः॥
शुध लृ य ओ शौचे। इति क
विकल्पद्रुमः लृ अशुधत्। यशु
ध्यति लोकः स्नानात्। ओ शो
द्धा। रजसा शुध्यते नारीत्यत्र शु
ध्यतीति क्विपि शुधं करोतीति
णौ कर्म्मणि यकि रूपं। इति
दुर्गादासः॥
शुन श गत्यां। इति कविक
ल्पद्रुमः। श शुनति शोनिता
इति। दुर्गादासः॥
शुनः पुं कुक्कुरः। यथा। कुक्कु
रस्तु शुनिः श्वानः कपिलो म
ण्डलः शुनः। इत्यमरटीकायां
भरतधृत वाचस्पतिः॥
शुनःशेफः पुं मुनिविशेषः॥

स तु ऋचीक मुनिपुत्रः अंबरी
षेण यज्ञार्थं क्रीतः विश्वामित्रे
ण रक्षितश्च इति रामायणे वा
ल्मीकीये बालकाण्डे ६१ सर्गः
कुक्कुरशिशौ स्त्री॥
शुनकः पुं कुक्कुरः॥ इति रा
जनिर्घण्टः॥
शुनकचञ्चुका स्त्री लघुचञ्चुक्ष
पः। इति राजनिर्घण्टः॥
शुनकचिल्ली स्त्री शाकविशे
षः। तत्पर्य्यायः श्वचिल्ली २ श्वान
चिल्लिका ३ अस्या गुणाः। क
टुत्वं तीक्ष्णत्वं। कण्डूव्रणनाशि
त्वञ्च। इति राजनिर्घण्टः।
शुनाशीरः पुं इन्द्रः। इति भ
रतद्विरूपकोशः॥
शुनासीरः पुं इन्द्रः। यथा। शु
नाशीरो दन्त्यतालव्यः सुनासी
रो दन्त्यकः। तालव्यादि द
न्त्यमध्यः शुनासीरश्च दृश्यते
इत्यमरटीकायां भरतः॥
शुनिः पुं कुक्कुरः। इति हेम
चन्द्रः॥
शुनी स्त्री कुक्कुरी। इत्यमरः॥
कूष्माण्डी। इति राजनिर्घण्टः
शुनीरः पुं कुक्कुरीसमूहः॥
इति त्रिकाण्डशेषः॥



शुन्ध क शुद्धौ इति कविकल्प
द्रुमः। क शुन्धयति। अय मा
त्मनेपदीत्येके। इति दुर्गादासः
शुन्ध ञ शुद्धौ। इति कविक
ल्पद्रुमः॥
शुद्धि स्त्रि शुद्धीभावः शुद्धी
करणञ्च। ञ शुन्धति शुंध
ते जलेन लोकः। यो गांशु
न्धति सत्येनेति हलायुधः॥
गांवाचं। इति दुर्गादासः॥
शुन्ध्युः पुं अग्निः। इत्युणादि
कोषः॥
शुंभ शा दीप्तिहिंसनयोः। इति
कविकल्पद्रुमः। श शुभति
शुम्भति शुशोभ शुशुम्भ। इति
दुर्गादासः॥
शुम्बे स्त्री शुनीसमूहः। इति
त्रिकाण्डशेषः॥ विके त्रि॥
इतिजटाधरः॥
शुभ प श दीप्ति हिंसनयोः।
इति कविकल्पद्रुमः पश शुंभ
ति शुशोभ। प्राञ्चस्तुकादौ च
शुभ शुन्भ भासन हिंसनयो रि
तिपठंति। इति दुर्गादासः॥
शुभ ऌ ङ दीप्तौ। इति कवि
कल्पद्रुमः। ऌ अशुभत्। ङ
शोभते। न शोभति सभामध्ये

इति नञ्जुतानित्यत्वादिति रमा
नाथः। वस्तुतस्तु शोभते शो
भः पचादित्वादच् ततः शोभ
इवाचरतीति क्वौ साध्यं॥
इति दुर्गादासः॥
शुभं स्त्री मंगलं। इत्यमरः।
पद्मकाष्टं। इतिराजनिर्घण्टः
शुभः पुं विष्कम्भादिसप्तविंश
ति योगान्तर्गतत्रयोविंशयोगः
तत्रजातफलं। शुभप्रसूतः शु
भकृन्नराणां शुभोदयोऽपि वि
दुषां समाजे करोति नित्यं
शुभकर्म धीमान् शोभादिकः
शोभन वेशधारी॥ इति
कोष्ठीप्रदीपः॥
शुभः त्रि क्षेमशाली स्वस्त्या
दियुक्त। इति मेदिनी॥
शुभंयुः त्रि मंगलान्वितः।
इत्यमरः॥
शुभगन्धकं स्त्री बोलं। इतिरा
जनिर्घण्टः मंगलगन्धयुक्तेऽपि
शुभग्रहः पुं सौम्यग्रहः। सतगु
रुः शुक्रः पापायुतबुधः। अ
क्षीणिकचंद्रश्च। यथा। अष्टोने
न्दुः कुजो राहुःशनि र्भानु र्युत इंदु
जः। रविः पापा भवन्त्येते शुभा
श्चान्ये प्रकीर्तिताः॥

इतिसारसंग्रहः। तद्वारे शुभक
र्म करणं यथा शुभग्रहार्क
वारेच मृद्र स्थिर ध्रुवेषु च॥
शुभराशि विलग्ने च शुभे शा
न्तिक पौष्टिकं॥ इति संस्का
रतत्त्वं॥
शुभंकरः त्रि मंगलकारकः।
यथा क्षेमंकरः क्षेमकारो भद्रंक
रशुभंकरौ। इतिमुग्धबोधः॥
स्वनामख्यातोंकशास्त्रकारके पुं
शुभंकरी स्त्री पार्वती। इति श
ब्दरत्नावली॥
शुभदः पुं अश्वत्थवृक्षः। इति
राजनिर्घण्टः॥ शुभदातरि त्रि
शुभदंती स्त्री पुष्पदंतभयोषि
त्। सुदती इति मेदिनी॥
शुभपत्रिका स्त्री शालपर्णी।
इति राजनिर्घण्टः। मंगलपत्रि
का च शुभवासनः पुं मुखवास
करगंधः यथा। मुखवासकरो
गंध आमोदी मुखवासनः। मु
खवासन इत्येके शुभवासन इत्य
पि। इति शब्दरत्नावली॥
शुभस्थली स्त्री यज्ञभूमिः इति
केचित्॥ मंगलभूमिश्च॥
शुभा स्त्री शोभा। कांतिः॥
इच्छा। इति मेदिनी। वंशरो

चना गोरोचना शमी। प्रियंगुः
श्वेतदूर्वा। इतिराजनिर्घण्टः॥
देवसभा इति शब्दरत्नावली
उमासखीविशेषः। इति शब्दमा
ला॥ मंगलजनिका च॥
शुभांगी स्त्री कुवेरपत्नी। कामदे
वपत्नी। इति केचित्॥
मंगलावयवयुक्ते त्रि॥
शुभाचारा स्त्री उमासखी। इति
शब्दमाला शोभनाचारवतीच
शुभाञ्जनः पुं शोभाञ्जनवृक्षः
इति शब्दरत्नावली॥
शुभान्वितः त्रि मंगलयुक्तः
तत्पर्य्यायः। शुभंयुः २ इत्य
मरः॥
शुभ्रं स्त्री अभ्रकं। इति मे
दिनी॥
गडलवणं। रौप्यं। कासीसं।
इति राजनिर्घण्टः
शुभ्रः पुं शुक्लवर्णः इत्यमरः
चंदनं इति शब्दचंद्रिका॥
शुभ्रः त्रि उद्दीप्तः शुक्लगुणयु
क्तः। इत्यमरः॥
शुभ्रदंती स्त्री शुभदंती सा त
पुष्पदंतनामदिग्गजकरिणी इ
त्यमरटीका॥
शुभ्ररश्मिः पुं चंद्रः। इति।



केचित् श्वेतकिरणश्च ॥
शुभ्रांशुः पुं चन्द्रः इत्यमरः ॥ कर्पूरः । इति राजनिर्घण्टः ॥
शुभ्रालुः पुं महिषकन्दः ॥ इति राजनिर्घण्टः । श्वेतालुश्च ॥
शुम्भिः पुं ब्रह्मा । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
शुम्भः पुं दानवविशेषः । स तु गवेष्ठीपुत्रः प्रह्लादपौत्रः अस्य कायाहृतश्च । यथा । विरोचनस्तु प्राह्लादिः पञ्च तस्यात्मजाः स्मृताः । गवेष्ठी कालनेमिश्च जम्भो वाष्कल एव च । शम्भुस्तेषामनुजस्तेषां पुत्रानेषां मतः शृणु । शुम्भश्चैव निशुम्भश्च विष्वक्सेनो महौजसः ॥ गवेष्ठिनः सुता ह्येते जम्भस्य शतदुन्दुभिः । इत्याद्ये वह्निपुराणे कश्यपीयप्रजासर्गोऽध्यायः अन्यच्च । पुलस्त्य उवाच ॥ कश्यपस्य दनुर्नाम भार्य्यासीत् द्विजसत्तम । तस्यास्तु शतसुता नासंख्या सहस्राद्दलाधिको ॥ ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः । इति वामनपुराणे ५२ अध्यायः । अपरश्चोक्तापि हि वाच । निशुम्भे निहते दृष्ट्वा भ्रातरं प्राणसम्मितं । हन्यमाने बले चैव शुम्भः क्रुद्धोऽब्रवीद्वचः । बलावलेपदुष्टे त्वं मा दुर्गे गर्वमावह । इत्यादि सहितो यवर्णा प्राप्य मुष्टिमुद्यम्य वेगितः । अभ्यधावत दुष्टात्मा चण्डिका निधनेच्छया ॥ तमायान्तं ततो देवी सर्वदैत्यजनेश्वरं । जगत्यां पातयामास भित्त्वा शूलेन वक्षसि । सगतासुः पपातोर्व्यां देवीशूलाग्रविक्षतः । इति मार्कण्डेयपुराणे देवीमाहात्म्ये शुम्भवधः ९० अध्यायः ॥
शुम्भघातिनी स्त्री दुर्गा । इति शब्दरत्नावली ॥
शुम्भपुरं क्ली शुम्भदैत्यस्य पुरी तत्पर्यायः एकचक्रं २ हरिगृहं ३ इति भूरिप्रयोगः ॥ अधुना शम्भलपुर इति ख्यातं
शुम्भपुरी स्त्री शुम्भपुरं । इति त्रिकाण्डशेषः ॥
शुम्भमर्द्दिनी स्त्री दुर्गा । इति हेमचन्द्रः ॥
शुल्क क भाषे सर्जने । वर्जने इति कविकल्पद्रुमः ॥ क शुल्कयति शुल्कमाख्यानतया

देतावर्थौ कौश्चिन्नमन्यते । भाषः कथने । इति दुर्गादासः ॥
शुल्कः पुं क्ली घट्टादिदेयं । माशुल इति भाषा इत्यमरः घट्टः पन्थाः तत्र आदिना हट्ट क्रय विक्रय स्थानादौ चयद्देय दीयते स शुल्को जगात् इति घटी इति राज इति च ख्यातः शलति प्रतिवध्नात्यनेनेति शुल्कः । शल गतौ नालस्यादिः नाम्नीति कः निपातनादत्त उत्वं । घट्ट चाले घट्टाते ग्र । इति चनि घट्टः । घट्टो वर्त्मेति माधवी घट्टो राजग्राह्याग्रहणस्थानादि रिति मुकुटः । घट्टो घाट इति ख्याते । इति रमानाथः । इति तट्टीकायां भरतः ॥ वराद्यर्थग्रहणं । इति मेदिनी ॥
शुल्वं क्ली रज्जुः ताम्रं । इत्यमरटीका ॥
शुल्व क माने सर्गे । इति कविकल्पद्रुमः । पञ्चमस्वरयुक्तलालव्यादि रेतस्य तृतीयोपधः सर्गः सृष्टिः । क शुल्वयति वेधाः पृथिवीं परिमाति सृजति वा इत्यर्थः । इति दुर्गादासः ॥
शुल्वं क्ली ताम्रं । रज्जुः । इत्यमरः । ताम्रपात्रपक्वान्नभोजनदोषो यथा । ताम्रपक्वा चत्वर्हीनि मर्णो भवति वैत्तये इति मत्स्यसूक्ते ५४ पटलः यज्ञकर्म । आचारः । जलसन्निधिः । इति मेदिनी ॥
शुल्वारिः पुं गन्धकः ॥ इति हेमचन्द्रः ॥
शुशुमा स्त्री शुक्रपत्नी ॥ इति केचित् ॥
शुश्रुवान् त्रि श्रवणविशिष्टः । श्रुधातोः क्वसुप्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥
शुश्रूः स्त्री माता । यथा शिशोः शुश्रूयमाणान् शुश्रूः । इति महाभारते मोक्षधर्मः ॥
शुश्रूषणं क्ली सेवा यथा शुश्रूषोपासनं च सेवोपास्तिरुपासना । इति शब्दरत्नावली ॥
शुश्रूषा स्त्री उपासने कथने श्रोतुमिच्छा इति मेदिनी ॥
शुष य ऊ ल शोषे । इति कविकल्पद्रुमः शोषः स्नेहरहितिभावः । य शुष्यति धान्यमातपेन ऊ शोषित्वा लृ अशुषत् इति दुर्गादासः ॥



शुषः पुं शोषणं । गर्त्तः । इत्य जयपालः ॥

शुषिः स्त्री शोषः बिलः । इति मेदिनी ॥

शुषिरं क्ली विवरं ॥ वेणुवादि वाद्यं । सर्वमेवेदं इत्यमरः ॥

शुषिरः पुं मूषिकः । इति मेदिनी ॥ अग्निः । इति विश्वः ।

शुषिरा स्त्री नदी इति धरणी नलीनामगन्धद्रव्ये इत्यमरः ॥

शुषिलः पुं वायुः इत्युणादिकोषः ॥

शुष्कः त्रि निःस्नेहः शुकना इति भाषा यथा शुष्कं पर्युषितं वापि नीतेन दूरदेशतः कुक्कुरस्य मुखाद्भ्रष्टं तदेवं पावनं स्मृतम् । इति स्कन्दे उत्कलखण्डे ।

शुष्कपत्रं क्ली स्नेहरहितदलं । आतपादिशोषितपत्रशाके । नालिता इति शुका इति च भाषा तस्य गुणाः । शुष्कपत्रं प्रकोपिस्त्रं पित्त श्लेष्मज्वरापहं तत्शुष्कपत्रं जलदोषनाशने विशेषतः पित्तकफज्वरापहं । जलस्थं तस्यापि च पित्तहारकं सदा चनेव्यञ्जन योगकारकं । इति राजवल्लभः ॥

शुष्कमत्स्यः पुं आतपादिना निःस्नेहीकृतमीनः शुकटीमाछ् इति भाषा तस्य गुणा मत्स्यशब्दे द्रष्टव्याः ॥

शुष्कमांसं क्ली आतपादिनातिस्नेहीकृतमांसं तत्पर्य्यायः ॥ उत्तप्तं १ वल्लूरं २ इत्यमरः ॥ वल्लूरः ३ शुष्कली ४ इति तट्टीका । अस्य गुणाः हृद्यानां दोषले मांसे बालानां बलदे लघु ॥ त्रिदोषकृद्वालयुष्टं शुष्कं शूलकरं गुरु । इति भावप्रकाशः ॥

शुष्करेवती स्त्री मातृकाविशेषः यथा । अस्थिमत्या तथा काली रूहा एवं महात्मना तथा तद्विरुद्धीत संयकालो महात्मनो या चास्मिन् कथिता लोकेन मतः शुष्करेवती । इति मत्स्यपुराणे १७४ अध्यायः ॥

शुष्कलः त्रि आमिषे इत्युणादिकोषः । आमिषाशी इत्यमरटीकायां भरतः ।

शुष्कली स्त्री शुष्कमांसे मांसमात्रे । यथा । शुष्कली । शुष्कमांसे स्यान्मांसमात्रेपि दृश्यते इति शौष्कलशब्दटीकायां भरतः ॥

शुष्कवृक्षः पुं धववृक्षः । इति राजनिर्घण्टः ॥

शुष्कव्रणः पुं किणः । इति त्रिकाण्डशेषः ॥

शुष्काङ्गः पुं धववृक्षः । इति वैद्यकं । स्नेहशून्यावयवे त्रि शुष्काङ्गी स्त्री गोधिका । इति शब्दचन्द्रिका ॥

शुष्कार्द्रं क्ली शुण्ठी इति शब्दचन्द्रिका ॥

शुष्मः पुं सूर्यः । इत्युणादिकोशः । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शुष्मं क्ली तेजः । इति मेदिनी पराक्रमः । इति हेमचन्द्रः ॥


शुष्मः पुं सूर्यः । इति मेदिनी अग्निः । इति त्रिकाण्डशेषः ॥ वायुः । पक्षी । इति संक्षिप्तसारोणादिवृत्तिः । अग्निः ॥ यथा शुष्माः क्षितिषि कृताशने इति शुभाकः । इत्यमरटीकायां भरतः ॥

शुष्म क्ली तेजः इति जटाधरः सोढं इति हेमचन्द्रः ॥

शुष्मा पुं अग्निः चित्रकवृक्षः इत्यमरः अंशेतापि शुष्मेति सवैरुं इति भरतः ॥

शुष्णिः पुं वायुः । तेजः चित्रं । इति संक्षिप्तसारोणादिवृत्तिः ॥

शूकः पुं क्ली शूकधान्यादीनामग्रे । शूया । इति भाषा तत्पर्य्यायः किंशारुः २ इत्यमरः । शूगा ३ कोशी ४ इति हेमचन्द्रः । दया इति मेदिनी सविषात्पतुण्डुभादिजलमलोद्भवजन्तु शूकप्रधानलिङ्गवृद्धिकरयोगः तद्विवरणं यथा अथ शूकदोषाधिकारः । तत्र शूकदोषस्य निदान माह । अक्रमाच्छेफसो वृद्धिं योभिवाञ्छति मूढधीः व्याधय स्तस्य जायन्ते दशचाष्टौ च शूकजाः । अक्रमात् अनुचितवृद्धिक्रमात् अनुचितात् च वृद्धिः भूरिविकारजनकस्य शूकस्य योगेन शूकजाः । शूको जलशूकः सविषो जलजन्तुविशेषः । स तु जलमलोद्भवः । अल्पतुण्डुभ इत्यादिकः तस्मा शूकप्रधानो लिङ्गवृद्धिकरो वात्स्यायनाद्युक्तो योगः शूक उच्यते । यथा भल्लातकास्थि जलशूक सध्याश्वपत्रं संतविदद्य मासिमान् सहसैव



वेन। एतच्छिन्नं बृहतीफलतो
यापिष्टं मालेपितं महिषवि-
ड्डिमल्लीकृतेऽङ्गे। स्थूलं मह
हत्त्वेनाम लिङ्गतुल्यं शोफः
करोतीत्यभिमते न हि संशयो
ऽस्ति इत्यादि यत्र जलशूकर
हित मस्तुरोगादितैलं तद्वि
तमेव लिङ्गवर्द्धने। अश्वगन्धा
वरीकुष्ठं मांसी सिंहीफलान्वि
तैः चतुर्गुणेन दुग्धेन तिलतैलं
विपाचयेत्। तत्तैलं मेढ्रवक्षो
जकर्णपालि विवर्द्धनं ते च
शूकदोषा दश चाष्टौ च भवे
न्ति। तेष्वादौ सर्षपिका माह
गौरसर्षप संस्थाना शूकदुर्भ
गहेतुका पिडिका श्लेष्मवाता
भ्यां ज्ञेया सर्षपिका तु सा।
शूकदुर्भग्न हेतुका शूकानि
मिलादुष्टयोनिनिमित्ताच। अ
ष्ठीलिका माह कठिना विषमै
र्भग्नैर्वायुनाष्ठीलिका भवेत्।
अष्ठीला लोहकारस्य भाण्डवि
शेषः। निहाई इति लोके तद्वत्
कठिना इत्यष्ठीलिका विषमैर्भग्नै
रितिवक्ष्यमान शूकविशेषणं।
विषमैः कुटिलदीर्घैः। भग्नैः वक्रैः
ग्रथितमाह ॥ शूकैर्यत्

पूरितं शश्वत् ग्रथितं नाम तत्
कफात् यल्लिङ्गं सदा शूकैः पू
रितं तद्ग्रथितत्वाद्ग्रथितं ॥
कुम्भिका माह कुम्भिका रक्तपि
त्तोत्था जाम्बूकास्थिनिभा सिता
कुम्भिका कुम्भतुल्य फलत्वात्
अलजी माह अलजी स्यात्तथा
यादृक् प्रमेह पिडिकालजी।
सा च रक्ता सिता स्फोटदारुणा
कथिता च सा। त्वया रक्तपित्त
निमित्ता ज्ञेया। मृदितमाह ॥
मृदिते पीडिते यत्तु संरब्धं वात
कोपतः। पाणिभ्यां भृश संमू
ढे संमूढ पिडिका भवेत् ॥
शूकदोषे जाते पाणिभ्यां भृश
संमूढे पिच्छिते लिङ्गे अत्रापि
वात कोपत इत्यनुवर्त्तते ॥
अवमन्थ माह दीर्घा बह्व्यश्च
पिडिका दीर्यन्ते मध्यमस्तु याः
सोऽवमन्थः कफासृग्भ्यां वेदना
रोमहर्षकृत्। दीर्घा दीर्घाकाराः
पुष्करिका माह पिडिका पि
डकाव्याप्ता पित्तशोणित संभवा
पद्मकर्णिक संस्थाना ज्ञेया पु
ष्करिकेति सा पिडिकाव्याप्ता
क्षुद्रपिडिकाव्याप्ता अतएव प
द्मकर्णिकासंस्थाना ॥ स्पर्श-

हानि माह स्पर्शहानिन्तु जन
येच्छोणितं शूकदूषितं अत्रस्प
र्शासहत्वमेव लक्षणं ॥ उत्त
मा माह। मुद्गमाषोपमा रक्ता र
क्तपित्तोद्भवा च सा एषोत्तमा
ख्या पिडिका शूके जीर्णसमु
द्भवा। शतपोनक माह।
छिद्रैरणुमुखैर्लिङ्गं चितं यस्य
समन्ततः वात शोणितजो व्या
धिर्विज्ञेयः शतपोनकः। शत
पोनिके चालनी तत्तुल्यत्वाच्छ
तपोनकः। त्वक्पाक माह वा
तपित्त कृतं ज्ञेय त्वक्पाकोज्व
रदाहकृत्। एतस्य लिङ्गे त्वक्
पाकलक्षणं। शोणितार्बुद
माहा कृष्णैः स्फोटैः सरक्ताभिः
पिडकाभिः प्रपीडितं लिङ्गं वा
स्तरुजश्चोग्रा ज्ञेयं तत् शोणि
तार्बुदं। वास्तरुजः स्फोटकाधि
ष्ठाने वेदना। मांसार्बुदमाह
मांसदुष्टया विजानीयादर्बुदं मां
स संभवं ॥ मांसपाकमाह
शीर्य्यंते यस्य मांसानि यस्य
सर्वाश्च वेदनाः। विद्यात्तं मां
सपाकन्तु सर्वदोष कृतं भिष
क्। शीर्य्यंते गलंति। सर्वा
वेदनाः वात पित्त कफजाः

विद्रधि माह। विद्रधिं सन्नि
पातेन यथोक्त मभिनिर्द्दिशे
त्। उक्तं सान्निपातिकविद्रधि
तुल्यं कथयेत्। तिलकाल
क माह कृष्णानि चित्राण्यथवा
शूकानि सविषाणि तु पति
तानि पचन्त्याशु मेढ्रं निरव
शेषतः। कालानि भूत्वा मांसा
नि शीर्य्यंते यस्य देहिनः सन्नि
पातसमुत्थांश्च विद्यात्तां तिल
कालकान्। चित्राणि नानाव
र्णानि। शूकानि शूकव्रणानि
मत्स्याः क्रोशन्तीतिवत्। सविषा
णि सविष शूकाख्य जन्तु विशे
ष कृतानि। शीर्य्यंते गलंति।
कृष्ण तिल तुल्यत्वात् तिलका
लकाः। अत्रस्य माह तत्र मांसा
र्बुदे यच्च मांसपाकस्य यः स्मृ
तः विद्रधिश्च न सिध्यंति ये च
स्युस्तिलकालकाः। अथ शूक
दोषस्य चिकित्सा। शूकदोषे
षु सर्वेषु विषघ्नीं कारयेत् क्रि
यां। जलौकाभिर्हरेद्रक्तं रेचये
ल्लघुभोजयेत् गुग्गुलं पाययेच्चा
पि त्रिफलाक्वाथ संयुतं दी
रेण लेप सेकाश्च शीतानेव हि
कारयेत्। दार्वी सुरस यष्ट्या



के गृहधूम निशायुतैः । स
मार्कं तैलं समभ्यंगान्मेढ्र रोगं
विनाशयेत् । सरसं तुलसी ।
दार्वीतैलं । रसाञ्जनं साक्षय
मेक मेव प्रलेप मात्रेणानयेत्
प्रशांतिं सद्यति एवञ्चाण शो
थ कण्डू शूलान्विते सर्वम
नेगरोगं । साक्षय मित्यनेन
रोगस्य विशेषणं । शूनंगरो
गस्य नामापि हरीकरोति ।
इति शूकदोषाधिकारः । इति
भावप्रकाशः ॥

शूककः पुं मावटः । रसः ।
इति मेदिनी ॥

शूककीटः पुं शूकयुक्तकीट
विशेषः । झुयापोका इति भाषा
तत्पर्यायः वृश्चिकः २ ऊर्ण
मरः शूककीटकः ३ इति
शब्दरत्नावली ॥

शूककीटकः पुं शूककीटः
इति शब्दरत्नावली ॥

शूकतरुणं स्त्री तृणविशेषः ।
फीकडी इति हिंदीभाषा तत्पर्या
यः शूकं २ शूकाख्यं ३ कनिष्ठ
कं ४ अस्य गुणाः । दुर्मरत्नप
शूलाच्च शूकाभावे हितच्चैतत्
इति राजनिर्घण्टः । दुर्मरन्तु

स्याने दुर्जरन्तु इति च पाठः ॥

शूकधान्यं क्ली शुंगायुक्तशस्य
मात्रं । तत्तुधान्य यवादिः । इत्य
मरः । यथा । व्रीह्यादिके यदिह
शूकसमन्विते स्यात् तत्शूक
धान्यमथ मुद्ग संराष्ट्रकादि ।
शिम्बीनिगूढ मिति तत्पवदं
तिशिम्बीधान्ये तृणोद्भव मथो
तृणधान्य मन्यत् । अस्य गुणाः
तत्र त्रिदोष शमनं लघु शूक
धान्यं तेजो बलातिशयवीर्य्य
विवृद्धिदायि देशे देशे शूक
धान्येषु संख्या ज्ञातुं शक्यते
व तैर्दैवतै वा । इति राजनिर्घ
ण्टः ॥ अपिच । शूकधान्यं शा
मीधान्यं समातीतं प्रशस्यते
पक्वा वातकृद्रूक्षं प्रायेणाभि
नवं गुरु । इति राजवल्लभः
अन्यच्च । यवस्तु सित शूकः
स्यात् निःशूकोतियवः स्मृतः
तोकम स्वहरितः स्मृतः
स्वल्प कीर्तितः ॥ यवः कषा
यो मधुरः शीतलोलेखनो
मृदुः । व्रणेषु तिलवत्प
थ्यो रूक्षो मेधाग्नि वर्द्धनः ।
कटुपाकोऽनभिष्यन्दी स्वर्य्यो
बलहरो गुरुः बहुवात मलो

वर्णं स्थैर्य्यकारी च पिच्छिलः
कण्ठत्वगामय श्लेष्मपित्त मेद
प्रनाशनः पीनस श्वास कासो
रुस्तम्भ लोहित तृट् प्रणुत् ।
अस्मादतियवो न्यून स्तोकमा
न्नतत्र स्मृतः । इति भावप्र
काशः ॥

शूकपिण्डिः } स्त्री शूकशि
शूकपिण्डी } म्बिः इति शब्द
माला शब्दरत्नावल्यौ ॥

शूकरः पुं पशुविशेषः सूअ
र । इति भाषा तत्पर्य्यायः । वरा
हः २ स्तब्धरोमा ३ रोमशः ४
किरिः ५ चक्रदंष्ट्रः ६ किटिः ७
दंष्ट्री ८ क्रोडः ९ दंतायुधः १०
वली ११ पृथुस्कंधः १२ पोत्री
१३ घोणी १४ भेदनः १५ कोलः
१६ पोत्रायुधः १७ शूरः १८ ब
हुप्रजः १९ रदायुधः २० वन्य
स्य तस्य मांसगुणाः गुरुत्वं ।
वातहारित्वं वृष्यत्वं । बल स्वे
दकरत्वञ्च । ग्राम्यस्य तस्य मां
सगुणाः । वन्यवराहमांसादेऽ
त्वं । मेदो बल वीर्य्य वृद्धि
कारित्वंच । इति राजनिर्घण्टः
अपिच । लुलायशाण्ड वाराह च
मरी वारणादयः । यत्र कूले ।

चराः प्रोक्ता यतः कूले च र
न्त्यमी । कूलेचरा मरुत् पित्त
हरा वृष्या बलावहाः मधुराः
शीतलाः स्निग्धा मूत्रलाः श्ले
ष्मवर्द्धनाः । इति भावप्रकाशः ॥

शूकरकन्दः पुं वाराहीकन्दः
इति राजनिर्घण्टः ॥

शूकरपादिका स्त्री कोलशिम्बी
इति राजनिर्घण्टः ॥

शूकराक्रांता स्त्री वराहक्रांता
इति शब्दचंद्रिका ॥

शूकरी स्त्री वराहक्रांता । इति
शब्दरत्नावली । शूकरपत्नीच

शूकरेष्टः पुं कसेरुः । इति रा
जनिर्घण्टः । शूकरप्रियरस्थे त्रि

शूलेकः पुं दुर्विनीताश्वः । इति
हेमचंद्रः ॥

शूकवती स्त्री कपिकच्छूः । इ
ति शब्दचंद्रिका । शूकयुक्ते त्रि

शूकशिम्बा स्त्री कपिकच्छूः ॥
इति शब्दचंद्रिका ॥

शूकशिम्बिः } स्त्री कपिकच्छूः
शूकशिम्बिका } इत्यमरः तट्टी
शूकशिम्बी } का च ॥

शूका स्त्री कपिकच्छूः इति श
ब्द चंद्रिका ॥

शूकाह्वः पुं तृणमणिः का



फुरदाना इति काहरोवा इति
च पारस्यभाषा। इति हारावली
शूद्रतिपर्णः पुं आरग्वधः। इति
शब्दरत्नावली॥
शूद्रः पुं चतुर्वर्णान्तर्गत चतु
र्थवर्णः। तत्पर्य्यायः। अवरव
र्णः १ वृषलः २ जघन्यजः ३ इ
त्यमरः। दासः ४ पादजः ५
अन्त्यजन्मा ६ जघन्यः ७ द्विज
सेवकः ८। इति शब्दरत्नाव-
ली। पद्यः ९ इति जटाधरः।
अन्त्यवर्णः १० पज्जः ११॥
इति हेमचन्द्रः चतुर्थः १२॥
द्विजदासः १३ उपासकः १४।
इति राजनिर्घण्टः॥ प्लक्ष
द्वीपे तस्य संज्ञा सत्याङ्गः। शा
ल्मलद्वीपे इभुन्धरः। कुशद्वी
पे ऊलकः। क्रौञ्चद्वीपे सेवकः।
शाकद्वीपे अनुव्रतः। पुष्कर
द्वीपे सर्वे एकवर्णाः अस्योत्
पत्तिः ब्रह्मणः पादात्। अस्य शा
स्त्रनिरूपितो धर्मः जीविका
च ब्राह्मणक्षत्रिय वैश्य शुश्रूषा
अस्यैकाश्रमो गार्हस्थ्यः। इति
श्रीभागवते। अथ शूद्रधर्मा
दि विप्राणां सच्चिनं नित्यं शू
द्रधर्मो विधीयते तद्द्वेषी ।
तद्धनग्राही शूद्रश्चाण्डालतां
व्रजेत्। शूद्रः कोटिसहस्राणि
शतजन्मानि शूद्रो विप्रधनाप
हा॥ यः शूद्रो ब्राह्मणीगामी
मातृगामी सपातकी कुम्भीपा
के पच्यते यावद्वै ब्रह्मणः श
तं। कुम्भीपाके तप्ततैल भुक्तः
सर्पैर्दहर्निशं शश्वच्च विकृता
कारं कुरुते यमताडनात्। त
दा चाण्डालयोनिः स्यात् सप्तज
न्मसु पातकी। सप्तजन्मसु सर्प
श्च जलौका सप्तजन्मसु। जन्म
कोटि सहस्रञ्च विष्ठायां जाय
ते कृमिः। योनिकृमिः पुंश्चली
नां च भवेत् सप्तजन्मसु॥
गवां व्रणकृमिः स्याच्च पात
की सप्तजन्मसु। योनौ यो
नौ भ्रमत्येवं नपुनर्जायते
नरः॥ इति ब्रह्मवैवर्ते श्री
कृष्णजन्मखण्डे ८० अध्यायः
अपिच द्विजातिपाद शुश्रू
षा शूद्रैः कार्या सदा त्विह
पादप्रक्षालनं गन्धे भोज्यमु
च्छिष्टमार्जके। तेन चक्रुस्त
दा चैव तेभ्यो भूयः पितामहः
शुश्रूषार्थमया सृष्टे तरीयेत
पदेकृताः। द्विजानां त्वतः

वर्णानां वैश्यानाञ्च भवद्विधाः
त्रिभ्यः शुश्रूषणं कार्य्यं इत्य
वाहीद्व लदा। इति पाद्मे सृ
ष्टिखण्डे ४६ अध्यायः। किञ्च
शुश्रूषैव द्विजातीनां शूद्राणां
धर्मसाधनं। कारुकर्म तथाजी
वः पाकयज्ञोपि धर्मतः। इति गा
रुडे ४९ अध्यायः॥ शूद्रराज्ये·
वासनिषेधो यथा। धार्म्मिकै
रावृते ग्रामे नव्याधिबहुले भृ
शं न शूद्रराज्ये निवसेन्न पा
षण्डजनै र्वृते। शूद्रायमति
दान निषेधो यथा। न शूद्रा
यमतिं दद्यात् कृषरं पायसं
दधि नोच्छिष्टं मधुघृतं
नच कृष्णाजिनं हविः। नचैवा
स्मै व्रतं कुर्यात् नच धर्म्मान् व
देद्बुधः। इति कौर्म्मे उपविभागे
१५ अध्यायः॥ शूद्राणां वे·
दाधिकार निषेधो यथा। त्र
योवर्णा महाभागा यज्ञसाधना
सम्भागिनः। शूद्रा वेद पवित्रे
भ्यो ब्राह्मणैस्तु वहिष्कृताः॥
इति वाराहे संसारचक्रनामा
ध्यायः। कलौ ते धर्म्माः य
था। कलिः साध्विति यत्प्रोक्तं
शूद्रः साध्विति योषितः तत्राह
भगवान् साधु धन्या स्त्रीति पुनः
पुनः। इति विष्णुपुराणे ६ अं
शे २ अध्यायः। तस्य मद्यपाना
दौ दोषो यथा। तथा मद्यस्य
पानेन ब्राह्मणी गमनेन च।
वेदाक्षरविचारेण शूद्रश्चाण्डा
लतां व्रजेत्। इति शूद्रकमला
कर धृतपराशरवचनं॥ ब्राह्म
णस्य तदन्नभोजननिषेधो यथा
शूद्रान्ने ब्राह्मणोऽश्नन्वै मासं
मासार्द्धमेव वा। तेनान्नेनाभि
जायेत सम्मेतद्धि दृढव्रताः
अथोदरस्थशूद्रान्नो मृतः श्वा
नोपि जायते। द्वादश दश
वाष्टौ च गृध्र शूकर पुक्कसाः
उदरस्थितशूद्रान्नो ह्यधीयानो
पि नित्यशः जुह्वन् वापि जप
न् वापि गतिमूर्द्ध्वां न विन्दति। अ
मृतं ब्राह्मणस्यान्नं क्षत्रियान्नं
पयः स्मृतं वैश्यस्य चान्नमेवा
न्नं शूद्रान्नं रुधिरं स्मृतं तस्मा
त् शूद्रं न भिक्षेत यज्ञार्थं सद्वि
जातयः श्मशानमिव सङ्क्रुद्ध
स्तस्मात् परिवर्जयेत् कदाचना
मम वाभिक्षां कुर्य्याद्यदि ति
कथितः। सच्छूद्राणां गृहे कृते
न तत्पापेन लिप्यते विप्र




हात्रय संज्ञातो निवृत्तो मद्य
मांसतः । द्विजभक्तो वणिग्वृत्तिः
शूद्रः स परिकीर्त्तितः । इति वृ
हत्पराशरसंहितायां ५ अध्या
यः । अपिच हारीतः । शूद्रान्ने
न तु भुक्तेन उदरस्थेन यो मृतः
स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चा
धिगच्छति । शूद्रान्नं शूद्रस्वा
मिकान्नं तद्दत्तमपि भोजन
काले तद्गृहावस्थिते यत्तदपि
शूद्रान्नं तदाहाङ्गिराः । शूद्र
वेश्मनि विप्रेण क्षीरं वा यदि
वा दधि । निवृत्तेन न भोक्तव्यं
शूद्रान्नं तदपि स्मृतं । अपि शू
द्रात् साक्षात्तद्गृहे तण्डुला
दि । ननु तद्दत्तकपर्दकादिना
क्रीतमपि स्वगृहागते पुनरङ्गिरा
यथा यतस्ततो ह्यापः शुद्धिं
यान्ति नदीं गताः शूद्राद्विप्रगृ
हेष्वन्नं प्रविष्टन्तु सदा शुचि ।
प्रविष्टे स्वत्वापादक प्रतिग्रहा
दिनेति शेषः । अतएव पराशरः
तावद्भवति शूद्रान्नं यावन्न स्पृ
शति द्विजः । द्विजातिकरसंस्पृ
ष्टं सर्वं तद्धविरुच्यते स्पृशति
प्रतिगृह्णातीति कल्पतरुः । त
त्रैव मांसयागसमाह विष्णुपुराणे

संप्रोक्षयित्वा गृह्णीयाच्छूद्रा
न्नं गृहमागतं तत्पाकान्तरेण
तु माहाङ्गिराः । स्वपात्रे यत्तु
विन्यस्तं शूद्रो यच्छति नित्य
शः पात्रान्तरगतं ग्राह्यं दुग्धं स्व
गृहमागतं एतेन स्वगृहमाग
तस्यैव शुद्धत्वे तद्गृहगतस्य
शूद्रान्नदोषभागित्वं प्रतीयते
ततश्च तादृशापि शुद्धेणास
वेश्या शूद्रान्नं न भोक्तव्यं । इति
शुद्धितत्त्वं ॥ कलौ शूद्रविशे
षान्न भोजन निषेधो यथा ।
शूद्रेषु दास गोपाल कुलमि
त्रार्द्धसीरिणां भोज्यान्नता गृ
हस्थस्य तीर्थसेवातिदूरतः ।
एतानि लोकगुप्त्यर्थं कलेरादौ
महात्मभिः निवर्त्तितानि कर्म्मा
णि व्यवस्थापूर्वकं बुधैः । इति
तिथ्यादितत्त्वं । अपरञ्च व्यास
उवाच । नाद्यात् शूद्रस्य विप्रो
ऽन्नं मोहाद्वा यदि वान्यतः । स शू
द्रयोनिं व्रजति यस्तु भुङ्क्ते ह्य
नापदि । षण्मासान् यो द्विजो
भुङ्क्ते शूद्रस्यान्नं विगर्हितं जी
वन्नेव भवेत् शूद्रो मृतः श्वा
चाभिजायते । ब्राह्मणः क्षत्रि
यविशां शूद्रस्य च मुनीश्वराः ।

यस्यान्नेनोदरस्थेन मृतस्तद्यो
निमाप्नुयात् । कलौ तत्र शू
द्रविशेषान्न भोजनविधिर्य
था । आर्द्धिकः कुलमित्रञ्च गोपा
लो दास नापितौ एतेषु शूद्रेषु भो
ज्यान्नं यश्चात्मानं निवेदयेत्
कुशीलवः कुम्भकारः क्षेत्रकर्म्म
कएवच । एते शूद्रेषु भोज्या
न्ना दत्त्वा स्वल्पं पणं बुधैः ।
पायसं स्नेहपक्वञ्च यावकञ्चै
व शाक्तवः पिण्याकञ्चैव तैलञ्च
शूद्राद्ग्राह्यं द्विजातिभिः । इति
कौर्म्मे उपविभागे १६ अध्यायः
अपिच कन्दुपक्वानि तैलेन पाय
सं दधि शक्तवः । द्विजैरेतानि भो
ज्यानि शूद्रगेहकृतान्यपि ॥
अन्यच्च शूद्रास्तु ये दानपरा
भवन्ति व्रतान्विता विप्रपरा
यणास्तु । अन्नं हि तेषां सत
तं सुभोज्यं भवेद्द्विजैरिष्ट मि
ष्टं पुरातनैः । तस्माद्दाने प्रक
र्त्तव्ये व्रतस्थेन प्रयत्नतः । स
र्वपाप विनाशाय महत्स्वव
विवृद्धये । इति वह्निपुराणे
वृषदानाध्यायः । वैदिकेतर
मन्त्रपाठे शूद्रादेरप्यधिकारः
वेदमन्त्रवर्ज्जं शूद्रस्येतिच्छ ·

न्दोगाह्निकाचार चिन्तामणि
धृतस्मृतौ वेदेति विशेषणा
त् एवञ्च पुराणमधिकृत्य प्र
योतव्येन वचान्येन ब्राह्मणेन विप्रे
विना श्रोतव्यमिह शूद्रेणनाध्ये
तव्यं कदाचन । इति भविष्यपुरा
णवचने पुराणमेवेतरपरं पञ्च
यज्ञस्नान श्राद्धेषु पौराणिक
मन्त्रोऽपि निषिद्धः शूद्रमधिकृत्य
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न
हापयेत् । इति याज्ञवल्क्येन
ब्रह्म क्षत्र विशामेव मन्त्रवत्स्ना
नमिष्यते तूष्णीमेव हि शूद्रस्य
सनमस्कारकं मतं । इति यो
गियाज्ञवल्क्येन श्राद्धमधि
कृत्य अयमेव विधिः प्रोक्तः शू
द्राणां मन्त्रवर्जितः अमन्त्रस्य
तु शूद्रस्य विप्रो मन्त्रेण गृह्य
ते इति वराहपुराणेन च नम
स्कारेणेति तूष्णीमिति मन्त्र
वर्ज्जितमिति चाभिधानात्तन्म
न्त्रे वैदिकपरञ्च शूद्राधिकारे
गौतमवचनं अनुमतोऽस्य नम
स्कारो मन्त्र इति । सावित्रीं प्र
णवं यजुर्लक्ष्मीं स्त्रीशूद्रयोर्नेच्छ
ति सावित्रीं प्रणवं यजुर्लक्ष्मीं
स्त्रीशूद्रो यदि जानीयात्स्स



तेऽयो गच्छतीति । इति ति
ष्यादितत्त्वे । प्रसङ्गादत्र का
यस्थोत्पत्ति र्लिख्यते पाद्मे सृ
ष्टिखण्डे स्कन्दोऽसदसत्क
र्मसमये प्राणिनां विधिः स्व
र्णध्याने स्थितस्यास्य सर्वका
याद्विनिर्गतः दिव्यरूपः पुमान्
हस्तमसीपात्रञ्च लेखनीं चित्र
गुप्त इति ख्यातो धर्मराजसमीपतः
प्राणिनां सदसत्कर्मलेख्याय स
निरूपितः ब्रह्मणातीन्द्रियज्ञानी
देवाग्नौ यज्ञभुक्तये । भोजना
च्च सदा तस्मादाहुतिर्दीयते हि
जैः ब्रह्मकायोद्भवो यस्मात्
कायस्थो जातिरुच्यते नाना
गोत्राश्च तद्वंश्याः कायस्था भु
वि सन्ति वै ॥ प्रकारान्तरं यथा
स्कान्दे रेणुकामाहात्म्ये एवं
हत्वार्जुनं रामः संधाय निशि
तान् शरान् । एक एव ययौ
हन्तुं सर्वानेवान्तवान्नृपान्
केचिद्गहनमाश्रित्य केचित्स्त्री
त्वलमाविशन् तत्राभूच्चन्द्रसे
नस्य भार्य्या दाल्भ्याश्रमे यतो ।
ततो रामः समायातो दाल्भ्याश्र
ममनुत्तमं पूजितो मुनिना स
घोऽत्यर्घ्यपाद्यासनादिभिः ॥

ददौ मध्याह्नसमये तस्मै भोज्य
नमादरात् । रामस्तु भावयामा
स हृदि स्वमनोरथं । याच
यामास रामश्च कामं दाल्भ्यं म
हामुनिः । ततो द्वौ परमप्रीतो
भोजनं चक्रतुर्मुदा भोजनान्त
रं दाल्भ्यः पप्रच्छ भार्गवं प्रति
यत्त्वया प्रार्थितं देव तत्त्वं से
शित मर्हसि । राम उवाच ।
तवाश्रमे महाभाग सगर्भा स्त्री
समागता । चन्द्रसेनस्य राजर्षेः
क्षत्रियस्य महात्मनः । तन्मे त्वं
प्रार्थितं देहि हिंसेयं तां महाम
ते । ततो दाल्भ्यः प्रत्युवाच द
दामि तव वाञ्छितं । दाल्भ्य उ
वाच । स्त्रिय गर्भं मङ्गेवालं त
न्मे त्वं दातुमर्हसि ततो रामोऽ
ब्रवीद्दाल्भ्यं यदर्थमहमागतः
क्षत्रियान्तकरं सूत्रं तत्त्वं याचि
तवानसि प्रार्थितश्च त्वया विप्र
कायस्थो गर्भ उत्तमः तस्मात्
कायस्थ इत्याख्या भविष्यति शि
शोः शुभा एवं रामो महाबाहु
र्हित्वा तं गर्भमुत्तमं निर्जगाम
स्म आश्रमात्तस्मात् क्षत्रियान्तकरः प्र
भुः कायस्थ एष उत्पन्नः क्षत्रि
याणां क्षत्रियात्ततः रामाज्ञया

स दाल्भ्येन क्षत्रधर्माद्बहिष्कृतः
कायस्थधर्मोऽस्मै दत्तश्चित्रगु
प्तस्य यः स्मृतः तद्गोत्रजाश्च
कायस्था दाल्भ्यगोत्रा स्ततो
भवन् । दाल्भ्योपदेशतस्ते वै
धर्मिष्ठाः सत्यवादिनः । सदा
चारपरा नित्यं रता हरिहरार्च
ने देव विप्र पितृणाञ्चाति
थीनाञ्च पूजकाः ॥
प्रकारान्तरं । माहिष्यवनितासु
न् वैदेहात् यः प्रसूयते । स
कायस्थ इति प्रोक्तः तस्य ध
र्म्मो विधीयते । सद्गोहेषणा
यं माहिष्या वैश्याहिभाजो
वैदेहः लिपीनां देशजाना
नां लेखने स समाचरेत् ॥
गणकत्वं विचित्रञ्च वीजपा
ठी प्रभेदतः । अधमः शूद्र
जातिभ्यः पञ्चसंस्कारवानसौ
चातुर्वर्ण्यस्य सेवां हि लिपि
लेखन साधनो व्यवसायः
शिल्पकर्म तज्जीवन मुदाहृ
तं । शिखा यज्ञोपवीतञ्च न
हि मारक्तमम्भसा । स्पर्श
नं देवतानाञ्च कायस्थो हि
विवर्जयेत् । इति कमलाक
रभट्टकृतशूद्रधर्मतत्त्वं ॥

शूद्रकृत्यं स्त्री शूद्रकर्त्तव्यक
र्म यथा प्रणम्य सच्चिदानन्दं
शूद्राणामपवर्गिणो श्राद्धाह्नि
कृत्ययोस्तत्त्वं वक्ति श्रीरघुनं
दनः । तत्र मत्स्यपुराणं एवं शू
द्रोपि सामान्यैर्वहिश्राद्धं तु स
दा नमस्कारेण मन्त्रेण कुर्य्या
दामान्नवद्वुधः दानप्रधानः शू
द्रः स्यादित्याह भगवान् प्रभुः
दानेन सर्वकामाप्तिरस्य सं
जायते यतः ततो दानमेवा
पेक्षितेन तु भोजनमपि स
मान्यं सर्वजन कर्त्तव्यत्वेनत्र
ति सा सकुल पञ्चादि विहित
श्राद्धं आभ्युदयिकश्राद्धञ्च प
र्वेद्विजातिवत् शूद्रोपि कुर्य्या
दित्यन्वयः नमस्कारेण मन्त्रे
णानेन स्वयं पठितमन्त्रेण आ
मान्नवदित्यनेन जलसेक सि
द्धान्नमाकृतिः स्विन्न मन्न मुद्या
हृते । इति वशिष्ठेन स्विन्नस्ये
वान्नत्वाभिधानात् कन्दुपक्व
स भृष्टत्वेनत्वस्विन्नत्वे हारीते
न स्वेदन भर्ज्जनयोः पृथक्त्वमु
क्ते यथा आदीपन तापन स्वे
दन भर्ज्जन पचनादिभिः पञ्चमी
ति व्रस्यार्थः आदीपनं काष्ठानां



तापने तोयादेः स्वेदने धान्या
देः भर्जने यवादेः । पचने तण्डु
लादेः । इति पंचमी सप्तमी इ
ति कल्पतरुः अतएव स्निग्धा
न्नेन अवक्रियते । कन्दुपक्वानि
तैलेन पायसं दधि शक्तवः ।
द्विजै रेतानि भोज्यानि शूद्र
गेहकृतान्यपि इति कूर्म्मपु
राणवचनेन शूद्रकर्त्तृक कंदु
पक्वादेर्ब्राह्मणस्य भक्ष्यत्वेन
श्राद्धेदेयत्वे युक्ते कंडुपक्वे ज
लोपसेके विना केवल पात्रे
णायद्दह्निना पक्वे पायसेपा
केनकाठिन्य विकारापन्नेऽप्ये
परमान्नपरत्वे पुंलिङ्गनिर्द्देशा
पत्तेः तथा चामरः परमान्नन्तु
पायसः इति दिने ग्रेयादृशं
श्राद्धे पाकेन भोजयेद्द्विजान्
अयं विधिः प्रयोक्तव्यः शूद्रा
णां मन्त्रवर्ज्जितः । इति श्राद्ध
चिन्तामणिधृत वराहपुराण
वचनमपि कंडुपक्वपरं पक्वेतत्
तद्वचनं सक्तुद्रपरं मैथिलोक्तं
हेयं पक्वमामेनासम्पादिश्राद्धे
देयत्व साम्यात् श्राद्धतत्त्वः तुम
धेयं अत्रद्रव्य देवता प्रका
शार्थं ब्राह्मणेन मन्त्राः पाठ्याः

अयमेव विधिः प्रोक्तः शूद्राणां
मन्त्रवर्ज्जितः अमन्त्रस्य तु शूद्रस्य
विप्रो मन्त्रेण गृह्यते इति वरा
हपुराणात् अयं श्राद्धेतिक
र्त्तव्यताको विधिः शूद्रकर्त्तृक
मन्त्रपाठरहितः शूद्रस्य मन्त्रपा
ठानधिकारसिद्धो यदमन्त्रस्ये
ति पुनर्वचनेनत्तिक्रियाग्रहणार्थं
परिभाषार्थञ्च ततश्च तत्कर्म
सम्बधिमन्त्रेण विप्र स्तदीयकर्म्म
कारयितृब्राह्मणेन गृह्यते तेन
ब्राह्मणेन तत्र मन्त्रः पठनीय इ
तितात्पर्य्यं । तत्र यजुर्वेदिकोम
न्त्रः । तथाच स्मृतिः आर्षक्रमे
णासर्वत्र शूद्रा वाजसनेयिनः । त
स्मात्शूद्रः स्वयं कर्मयजुर्वेदीव
कारयेत् । आर्षक्रमेण मुख्य
क्रमेण यजुर्वेदिसंवेधिगृह्या
दिना चतुर्णां वेधसा धर्म्मशास्त्रा
णि राज्ञेन्द्र शूद्रस्य तानि त्वेषा नम
विशेषं तत्तु शूद्राणां पावना
नि मनीषिभिः अष्टादशपुराणा
नि चरितं राघवस्यच रामस्य कु
रुश्रेष्ठ धर्म्मं कामार्थंसि
द्धये । तथोक्तं भारते वीर
पाराशर्य्येणधीमता ॥
वेदार्थं सकलंयोज्य धर्म्म

शास्त्राणि च प्रभो । इति भ
विष्यपुराण वचनात्तेषांपौ
राणिकादि विधि र्योज्ञेया यो
जयिता अत्रच श्राद्धे वेदमन्त्र
वर्ज्जं शूद्रस्येति वचने वेदस्य
पादानात् श्राद्धे पुराणमन्त्रः
शूद्रेण पठनीय इति मैथि
लोक्तं । तत्र वराहपुराणे शू
द्राणां मन्त्रवर्ज्जित इत्यनेन मं
त्रमात्र निषेधात् मत्स्यपुराणे
च नमस्कारेण मन्त्रेण इत्युपा
दानाच्च पौराणिकस्यापि श्रा
द्धे निषेधः प्रतीयते पवेस्नाने
पि । ब्रह्म क्षत्र विशामेव मन्त्र
वत्स्नानमिष्यते तूष्णीमेव हि
शूद्रस्य सनमस्कारकं मतं । इ
त्यनेन नमस्कार विधानात् पं
चयज्ञेपि शूद्रस्य द्विज शुश्रू
षा तयाजीवन्वानभवेत् शि
ल्पैर्वा विविधैर्जीवेत् द्विजाति
हितमाचरन् । कुर्य्यादरतिः श्र
विर्भृत्यभर्त्ता श्राद्धक्रियावतः
नमस्कारेणमन्त्रेण पंचयज्ञान्न
हापयेत् इति नमस्कारमात्र
विधानात्श्राद्धादिषु पौराणिक
मन्त्रनिषेधः ततश्च स्नानश्राद्धपं
चयज्ञेतरत्र शूद्रस्य पौराणिकम
न्त्र ।

पाठः प्रतीयते अत्रषष्ठेत्वप्रा
प्ते मासि यद्वेष्टंमङ्गलेकुले
इति मनुवचनात् चूडाकार्य्या
यथाकुले इति याज्ञवल्क्यव
चनाच्च संस्कारमात्रे कुलधर्मा
नुरोधेन कालांतरस्य नामवि
शेषोच्चारणस्याभिधानाच्च शू
द्रादीनां नामकरणे वसिष्ठोपा
दिकपद्धतियुक्तनामकरणस्य
चप्रतीतेर्वैदिक कर्म्माणि शूद्रा
णांपद्धतियुक्तनामभिधाने क्रि
यते इति । शूद्रस्याचमने देवती
र्थेनऊष्ठे जले सकृत् क्षिपेत्
न पिबेत् । तथाच याज्ञवल्क्यः
हृत्कंठ तालुगाभिस्तुयथासं
ख्यं द्विजातयः । शुद्धेरन् स्त्रीचशू
द्रश्चसकृत् स्पृष्टाभिरन्ततः अं
ततोहृदयादि समीपेन ऊष्ठेन
ऊतरेणत्तरमपकर्षात् अतएव
स्पृष्टाभि रित्युक्तं नतु भाहिताभि
रिति स्त्री शूद्रः शुद्ध्यते निःसृता
लनाच्च करोष्ठयोः । इति ब्र
ह्मपुराण वचनञ्च याज्ञवल्क्यः
आचान्त ब्राह्मण तीर्थेन द्विजो
नित्य मुपस्पृशेत् । अत्र द्विज
स्यैव आचमने ब्राह्मतीर्थोपा
दानात् स्त्री शूद्रयो र्न तेनाचम

ने। एव मेव मिताक्षरायांश्च-
क्त शुक्ते मरीचिना। स्त्रिया
श्चैवर्णिकं तीर्थं शूद्रजाते स-
येवच। सकृदाचमनाच्छुद्धिरे
तयो रेव चोभयो रिति॥ एत
दनंतरं इंद्रियादिस्पर्शनंतत्रा
प्युभयवदेव प्रामाणांतरंतत्त्वा
जसनेयि माध्यन्दिनाह्निकत
त्वयो र्बनुसंधेयं। इति वंद्यघ
टीय श्रीहरिहरभट्टाचार्य्यात्म
जश्रीरघुनंदनभट्टाचार्य्य विर
चिते शूद्रकृत्यविचारणातत्त्वे
समाप्तं। शूद्रधर्मः पुं शूद्रस्य शा
स्त्रविहिताचारः। तस्य विवरणं
शूद्रकृत्यशब्दे द्रष्टव्यं॥
शूद्रप्रियः पुं पलाण्डुः। इति
राजनिर्घण्टः॥ शूद्रस्य प्रि
यश्चेद्ये त्रि॥
शूद्रप्रेष्यः पुं शूद्रस्यपरिचार
कब्राह्मणादिः इति केचित्।
शूद्रप्रासनं क्ली शूद्रस्याधि-
कारोतेष्यपश्चादि वा यथा स्मा
द्रभिषेकदिव्यसने प्रापगान्तरार्गसि
त्वपि प्रासने धर्मकीलः स्मा
त्वकृतिः शूद्रप्रासने इति पुर
चर्या त्रिकाण्डशेषः॥
शूद्रा स्त्री शूद्रजातिस्त्री इत्यमरः

शूद्रान्नं क्ली शूद्रस्वामिकान्नं
यथा शूद्रान्नेन तु भुक्तेन उ
दरस्थेन यो मृतः। स वै खर
त्वमुष्ट्रत्वं शूद्रत्वञ्चापि गच्छति
शूद्रान्नं शूद्रस्वामिकान्नं। इति
शुद्धितत्त्वं। अन्यत् शूद्रशब्दे
द्रष्टव्यं॥
शूद्राभार्य्यः पुं शूद्राभार्य्याय
स्यसः। शूद्रास्वामी। इति व्या
करणं शूद्राणी स्त्री प्रियंऊहतः
इतिशब्दचंद्रिका॥
शूद्रावेदी पुं शूद्राविवाहक
र्ता। यथा शूद्रावेदी पतत्यत्रे
रुतथ्य तनयस्यच शौनकस्य
सुतोत्पत्त्या तदपत्यतया भृ
गोः। इति दायभागः॥
शूद्री स्त्री शूद्रस्यभार्य्या॥
इत्यमरः॥
शूनः / शूनवान् } त्रि वर्द्धितः इतिश्वि
धातोः क्त क्तवतु
प्रत्ययाभ्यां निष्पन्नो इतिव्याक
रणं शूना स्त्री प्राणिवधस्था
ने इतिहलायुधः अधोजिह्वि
का इतिहारावली। पंचविधा
शूना यथा पंच शूना गृहस्थ
स्यचुल्ली पेषण्युपस्करः कंडनी
चोदकुंभश्च बध्यते यास्तु वाह

यन् पंचशूनापापनाशो यथा
मनुः अध्यापनं ब्रह्मयज्ञः पितृ
यज्ञस्तु तर्पणं होमो दैवोब
लि र्भौतो नृयज्ञोऽतिथिपूजनं
पंचैतान् यो महायज्ञान् न
हापयति शक्तितः। सगृहे
पि वसन्नित्यं शूनादोषैर्न लि
प्यते॥ इति प्रायश्चि
त्ततत्त्वं॥
शूनावान् पुं शूनाविद्यतेय
स्यसः। कसाइ इति भाषा।
इतिकेचित्॥
शून्यं क्ली आकाशं इतिशब्द
चंद्रिका॥ विंदुः इति हे
मचंद्रः॥
शून्यः त्रि अतिशयेन ऊनः।
अभावविशिष्टः असम्पूर्णः
खालि इति पारस्यभाषा त
त्पर्य्यायः वशिकः २ तुच्छः
३ विरक्तकः ४ इत्यमरः शून्यं
५ इति तट्टीकायां भरतः नि
र्जनः इति मेदिनी॥ अवि
द्यजीवनं शून्यं दिक्शून्या
चेदबांधवा मूर्खहीनं गृहं शू
न्यं सर्वशून्यादरिद्रता। इति
चाणक्यं॥
शून्यमध्यः पुं नलः इतिराज

निर्घण्टः। शून्यगर्भस्तुनि त्रि
शून्यवादी पुं सौगतः। इति
जटाधरः नास्तिकश्च॥
शून्या स्त्री नाली इति विश्व
मेदिन्यौ महाकण्ठकिनी।
फणीमनसा इति रत्नमाला इ
तिशब्दचंद्रिका। वेश्या इति
राजनिर्घण्टः॥
शून्यालयः पुं निर्जनगृहं अ
ध्यायननिषेधो यथा मार्क
ण्डेयः शून्यालये श्मशानेच
एकवृक्षे चतुष्पथे। महादेव
गृहेचापि शर्करा लोष्टपांशुषु
धान्य गो विप्र देवानां गुरूणा
ञ्च तथोपरि नचापि भग्नश
यने नाशुचौ नाशुचिः स्वयं
नार्द्रवासा नैनग्नश्च नोत्तरा
परमस्तकः नाकाशेसर्वशू
न्येच नचैवेत्यदुमेतथा नस्व
पेदित्यर्थः इत्याह्निकतत्त्वं॥
शूपकारः पुं शूद्राणांपाचकः
यथा शूद्रपाकोपजीवी यः
शूपकार इति स्मृतः। इति ब्र
ह्मवैवर्त्ते प्रकृतिखंडे १२ अध्या
यः। अन्यत् दंतपत्रकारादेर्द्र
ष्टव्यं॥
शूरः उ ई य लाभे हिंसे इति



कविकल्पद्रुमः उ० य शूर्य्यते
ऊ शूर्णः। स्तम्भो जडीभावः।
इति दुर्गादासः॥
शूर न् क उ० विक्रमे इति क
विकल्पद्रुमः उ० अशुशूरत् वि
क्रमः उद्यमः। इति दुर्गादासः॥
शूरः पुं वीरः। इत्यमरः॥
यादवः स तु श्रीकृष्णस्य पिता
महः। इति मेदिनी। सूर्य्यः।
इति त्रिकाण्डशेषः। सिंहः।
शूकरः चित्रकः सालः॥
लकुचः मसूरः इति राज-
निर्घण्टः॥
शूरणः पुं मूलविशेषः ओल
इति भाषा तत्पर्य्यायः। अ
र्शोघ्नः २ कन्दः ३ इत्यमरः॥
सूरणः ४ इति तट्टीका ओलः
५ इति जटाधरः ओलः ६ इ
ति मेदिनी कण्डुलः ७ कन्दी
८ स्थूलकन्दी ९ स्थूलकन्दकः १० दु
र्नामारिः ११ सुवृत्तः १२ वाता
रिः १३ कन्दशूरणः १४ तीव्रक
ण्ठः १५ कन्दार्हः १६ कन्दवर्द्धनः
१७ लकुचकन्दः १८ रुच्यकन्दः १९
शूरणकन्दः २० अस्य गुणाः।
कटुत्वं रुच्यत्वं दीपनत्वं पा
चनत्वं कृमिकफानिलश्वास

कासवमनार्शःशूलगुल्मनाशि
त्वं असृग्दोषकारित्वञ्च। इति
राजनिर्घण्टः। अपिच शूरणो
दीपनो रूक्षः कषायः कण्डुकृ
त्कटुः विष्टम्भी विशदो रुच्यः
कफार्शःकृन्तनो लघुः। विशे
षादर्शसे पथ्यः प्लीहगुल्मवि
नाशनः। सर्वेषां कन्दशाकानां
शूरणः श्रेष्ठ उच्यते दद्रूणां र
क्तपित्तानां कुष्ठानां न हितो हि
सः। सन्धान योग संप्राप्तः शू
रणो गुणवत्तमः। इति भाव
प्रकाशः। अन्यच्च शूरणो दी
पनो रुच्यः कफघ्नो विशदो
लघुः। विशेषादर्शसां पथ्यो
ग्राम्यकन्दस्तु दोषलः। इति
राजवल्लभः। पेणाकहस्तः
इति शब्दमाला॥
शूरणोद्भजः पुं हरिद्रांगपत्री
इति शब्दचन्द्रिका॥
शूरदेवः पुं चतुर्विंशतिभाव्य
र्हदन्तर्गतार्हद्विशेषः इति हे
मचन्द्रः॥
शूरसेनः पुं राज विशेषः
देशविशेषः यथा शूरसेनो
यदुपति र्मथुरा मावसन्पुरीं
माथुरान् शूरसेनांश्च विषया

न् बुभुजे पुरा। इति श्रीभाग
वते ९ स्कन्धे १ अध्यायः॥
शूर्प कमाने। इति कविकल्प
द्रुमः। चुरा० पर० सक० शूर्पयति।
धान्यं गृही इति दुर्गादासः॥
शूर्पः पुं क्ली तण्डुलादिस्फोट
नार्थं वंशादिनिर्मितपात्रवि
शेषः कुला इति भाषा तत्प
र्य्यायः प्रस्फोटनं २ इत्यमरः
सूर्पः ३ कुल्यः ४ प्रस्फोटनी
५ इति शब्दरत्नावली॥
द्रोणद्वयपरिमाणं॥ इति
शब्दमाला॥
शूर्पकः पुं असुरविशेषः स
च कामदेवशत्रुः॥ इति हे
मचन्द्रः॥
शूर्पकर्णः पुं हस्ती इति त्रि
काण्डशेषः शूर्पतुल्यश्रुतियुक्ते
शूर्पकारातिः) त्रि पुं कामदेवः
शूर्पकारिः) इति हलायुधः॥
शूर्पणखा) स्त्री रावणभगिनी
शूर्पणखी) इति शब्दमाला श
ब्दरत्नावल्यौ शूर्पपर्णी स्त्री
शिम्बीविशेषः इति शब्दचन्द्रिका
शूर्पवातः पुं शूर्पस्य वायुः।
कुलार बातास इति भाषा तत्
पर्य्यायः फलफालः २ इति

त्रिकाण्डशेषः॥
शूर्पश्रुतिः पुं हस्ती इति हा
रावली॥
शूर्पी स्त्री चतुरसर्पः इत्युणा
दिकोषः शूर्पणखा। इति
शब्दमाला॥
शूर्म्मः पुं लौहप्रतिमा इत्य
मरटीकायां रायमुकुटः॥
शूर्म्मिः स्त्री लौहप्रतिमा
इति भरत द्विरूपकोषः॥
शूर्म्मिका) स्त्री लौहप्रतिमा
शूर्म्मी) इति शब्दरत्नावली
शूल रुजायां इति कविकल्प
द्रुमः दीर्घी शूलति लोकं रो
गः। इति दुर्गादासः॥
शूलः पुं क्ली रोगविशेषः॥
अस्त्रविशेषः बर्शा इतिभाषा
इति च भाषा इत्यमरः मृत्युः
केतनः विष्कम्भादि सप्तविं
शतियोगान्तर्गतनवम योगः
इति मेदिनी। तद्योगजातफ
लं भीतो दरिद्रो दयितापि
यश्च शूलोद्भवः शूलरव स
वंशोः विद्यामयाभ्यां रहितो
ग्र शूली करोति लोके नहि
तं कदाचित्। इति कोष्ठीप्र
दीपः स्त्रीलिङ्गः॥ अयः



कीलः । इति भरतः । यथा
इति केचित् । विक्रेतव्यं । य
था । अट्टशूला जनपदाः शि
वशूला चतुष्पथाः प्रमदाः के
शशूलिन्यो भविष्यन्ति कलौ
युगे । इति महाभारते आदि
पर्व्व । अथ शूलाधिकारः
तत्र शूलस्य सन्निकृष्टं निदा
नमाह दोषैः पृथक्समस्ता
मद्वन्द्वैः शूलोऽष्टधा भवेत् स
र्व्वेष्वेतेषु शूलेषु प्रायेण पव
नः प्रभुः । प्रभुः कर्त्ता ॥ वा
तिकस्य विप्रकृष्टं निदान सं
प्राप्ति लक्षणमाह व्यायाम
यानादतिमैथुनाच्च प्रजागरा
च्छीतजलातिपानात् कलाय
मुद्गाढकि कोरदूषात् अत्य
र्थ रूक्षाध्यशनाभिघातात् ॥
कषाय तिक्तातिविरूढजान्न
विरूढवल्लूरकशुष्कशाकैः वि
ड्शुक्र मूत्रानिलसन्निरोधात्
शोकोपवासादतिहास्यभाषा
त् । वायुः प्रवृद्धो जनयेद्धि शूलं
हृत्पृष्ठपार्श्व त्रिकवस्तिदेशे ।
जीर्णे प्रदोषे च घनागमे च शी
ते च कोपं समुपैति गाढं । मुहु
र्मुहु श्चोपशम प्रकोपौ विण्मू
त्रसंस्तम्भन तोदभेदैः । संस्वेदना
भ्यञ्जन मर्दनाद्यैः स्निग्धोष्णभो
ज्यैश्च शमं प्रयाति व्यायामो
मल्लयुद्धादिः । याने गुरुतरया
दि । मैथुने स्त्रीसेवा प्रजागरे
रात्रौ यत्ना मतियोगात् कला
य त्रिपुटः आढकी तुवरी को
रदूषकः कोद्रवः अत्यर्थ रूक्ष
द्रव्यसेवा । अध्यशने भुक्तस्या
परिभोजने अभिघातो लोष्टा
दिभिः कषायतिक्त रससेवा
विरूढजान्ने विरूढ मङ्कुरित
मन्ने कलाय शाकादिजन्
मन्ने भक्ते । वल्लूरं शुष्कमां
से तस्य शूलस्य देश माह
हृत्पृष्ठादिषु । तस्य हृच्छूल
स्य स्पष्टमपि लक्षणं पठति ।
कफपित्तावरुद्धस्तु मारुतो रस
मूर्च्छितः हृदिस्थः कुरुते शूल
मुच्छ्वासस्यावरोधकं । स हृच्छू
ल इति ख्यातो रस मारुत को
पजः । पार्श्वशूलस्यापि लक्षण
माह कफं निगृह्य पवनः सूचीभि
रिव निस्तुदन् । पार्श्वस्थः पार्श्वयोः
शूलं कुर्य्यादाध्मानसंयुतं । तेनो
च्छ्वसिति वक्त्रेण नरोजन्तुस्तु का
न्तति । निद्राञ्च नाप्नुयादेष

पार्श्वशूलः प्रकीर्त्तितः ॥
वस्तिशूलस्यापि लक्षणमाह
संरोधात् कुपितो वायुर्वस्तिमा
श्रित्य तिष्ठति । वस्तिवङ्क्षणना
डीषु ततः शूलस्तु जायते वि
ण्मूत्र वात संरोधी वस्तिशूलः
स उच्यते । प्रकृतमनुसरति जी
र्णे भुक्ते प्रदोषे राज्यागमे रात्रि
भव शीतेन वातप्रकोपात् । घ
नागमे वर्षासु मेघोदये च ॥
तथैव पैत्तिकमाह ॥ क्षारातित
क्ष्णोष्ण विदाहि तैलनि
ष्पाव पिण्याक कुलत्थयूषैः
कट्वम्लसौवीर सुराविकारैः क्रो
धानलायास रविप्रतापैः । ग्रा
म्यातियोगादशनैर्विदग्धैः पि
त्तं प्रकुप्याशु करोति शूलं ।
तृष्णामोहदाहार्त्तिकरं हि नाभ्यां
संस्वेदमूर्च्छा भ्रम शोषयुक्तं
मध्यं दिने कुप्यति चार्द्धरात्रे
निदाघकाले जलदात्यये च
शीतैः सुशीतैः समुपैति शां
ति सुस्वादु शीतैरपि भोजनै
श्च । निष्पावो राजमाषः सौ
वीरं संधानभेदः । सुराविका
रैः । परिपक्वान्न सन्धान सम
त्पन्ना सुरा मता तस्या विकारैः
रविप्रताप आतपः ग्राम्यातियो
गो मैथुनाधिक्यं । विदाहीत्यु
क्तापि अशनैर्विदग्धैरिति वा
ययति अविदाहि वस्तुनोऽपि वि
दग्धशाद्विदाहित्वं भवति जलदा
त्यये शरदि शीते शीतकाले
शीतैर्वातादिभिः ॥ श्लैष्मिक
माह आनूप वारिज किलाट
पयोविकारैर्मांसेक्षुपिष्ट कृ
शरा तिलशष्कुलीभिः अन्यैर्ब्ब
लासजनकैरपि हेतुभिश्च श्ले
ष्मा प्रकोप मुपगम्य करोति
शूलं । हृल्लासकासदनारुचि
संप्रसेकैः आमाशये स्तिमित को
ष्ठ शिरो गुरुत्वैः भुक्ते सदैव
हि रुजं कुरुतेऽतिमात्रं सूर्यो
दये च शिशिरे कुसुमागमे
च । आनूपे बहुजलदेशजे
भक्ष्ये । वारिजे शालूकादि
किलाटः । पक्वं दुग्धसमं दध्नी
ई विज्ञेया दधिकूर्च्चिका ॥
तक्रेण तक्रकूर्च्ची स्यात्तयोः पि
ण्डः किलाटकः पयोविकारैः
पायसादिः पिष्टं माषादिः अ
न्यैः गुर्वादिभिः स्तिमित मार्द्र
चर्म्मावगुण्ठितमिव यत् को
ष्ठं शिरश्च तयोर्गुरुत्वैः सह ॥



सूर्य्योदय इति त्रिधाविभक्त
दिवस प्रथमभागस्योपलक्ष
णं। शिशिरे तत्र कफस्यातिसञ्च
यात् कुसुमागमे वसन्ते। द्वन्द्व
जमाह। द्विदोष लक्षणै रेतैर्वि
द्याच्छूलं द्विदोषजं ॥ त्रिदोष
जमाह सर्व्वेषु देशेषु समस्त
लिङ्गं विन्द्याद्भिषक् सर्व्वभवं
हि शूलं। सुकष्ट मेनं विष
वज्रतुल्यं विवर्ज्जनीयञ्च वदन्ति
तज्ज्ञाः। सर्व्वेषु देशेषु हृत् पृ
ष्ठपार्श्व त्रिक वस्ति नाभ्यामाश
येषु। सर्व्वभवं त्रिदोषजं शूलं
विद्यात् सुकष्टमसाध्यं विषवज्र
तुल्यं मारणात्मकत्वात्। आ
मजमाह आटोप हृल्लास व
मी गुरुत्व स्तैमित्य मानाहक
फप्रसेकैः कफस्य लिङ्गेन समा
नलिङ्गं आमोद्भवं शूलमुदाह
रन्ति कफस्य कफशूलस्य आ
मोद्भवं आमादुद्भवो यस्य तं
शूलं आमाच्छूलं जातेपश्चा
दोष संबन्धः अतएव शूलस्या
मत्वमुक्तं। सच प्रथममामाश
ये भवति पश्चात् सर्व्वत्रिदोषैर्व
स्तिनाभि हृत् पार्श्व कुक्षिषु भ
वति यथा दोषसंबन्धः ॥ आम

शूलस्य दोषविशेषेण देशावि
शेष माह। वातात्मके वस्तिगतं
वदन्ति पित्तात्मकं चापि वदन्ति
नाभ्यां। हृत्पार्श्व कुक्षौ कफस
न्निविष्टं सर्व्वेषु देशेषु च सन्निपा
तात्। हृत्पार्श्वे कुक्षौ हृत्पा
र्श्वाभ्यां सहिते कुक्षौ कफस
न्निविष्टं कफेनाविष्टं ॥ तेजो
नरोक्त मामशूल माह शूलि
मार्गे यदा भुक्ते पावकेमृदुतां
गते। स्थिरीकृतं तु तत्को
ष्ठे वायुनावृत्य तिष्ठति यदा
न्नं नगते पाके तच्छूलं कुरुते
भृशं। मूर्च्छाध्मान विदाहश्च
हृत्क्लेशो सविलम्बिके। क
म्पवात मतीसारं प्रमोहं जनये
दपि। अविपाकोद्भवं शूलमे
तमाहु र्मनीषिणः अविपाको
द्भवं आमोद्भवमित्यर्थः। शूल
स्योपद्रवानाह। वेदनातितृषा
मूर्च्छा आनाहो गौरवं ज्वरः॥
भ्रमोऽरुचिः कृशत्वञ्च बलहा
निस्तथैवच। उपद्रवा दशैवैते
यस्य शूलस्य नास्ति सः॥ शू
लस्यैव भेदं परिणाममाह
स्वै र्निदानैः प्रकुपितो वायुः
सन्निहितो यदा कफ पि।

त्ते समावृत्य शूलकारी भवेद्बली
भुक्ते जीर्य्यति यच्छूलं तदेव प
रिणामजं स्वै र्निदानैरित्यादि
ना निदान पूर्व्विका संप्राप्ति रु
क्ता। भुक्ते जीर्य्यतीत्यादिना ल
क्षणमुक्तं समावृत्य व्याप्य॥
अथान्नद्रव नामानं शूलविशे
षमाह जीर्णे जीर्य्यत्यजीर्णे वा
यच्छूलमुपजायते पथ्यापथ्य
प्रयोगेन भोजनाभोजनेन वा
नशमं याति नियमात् सोऽन्नद्रव
उदाहृतः नेदं शूलमसाध्यं चि
कित्साभिधानात् ॥ अथशूल
स्य चिकित्सा। वमनं लङ्घनं स्वे
दं पाचनं फलवर्त्तयः क्षारश्चूर्णा
नि गुटिकाः शस्यन्ते शूलशान्तये
वित्ताय वातशूलेतु स्नेह स्वेदै
रुपाचरेत् शूल शल्याकुलस्य
स्यात् स्वेद पद्मसुखावहः ॥
मृत्तिका सजला पाकायनीभ्र
ता पटे क्षिपेत्। कृत्वा तत्पो
टलीं शूली तयास्वेदं विधापये
त् मृत्तिकास्वेदः ॥ कार्पासा
स्थि कुलत्थिका तिल यवै रे
रण्डमूलातसी वर्षाभ्र शण
वीज काञ्जिकयुतै रेकीकृतै
र्वा पृथक्। स्वेदः स्याद्व्यथकृप

रोदरपार्श्वः स्फिग् जानुपादांगु
ली गुल्फ स्कंध कटीरुजाश्च वि
जयते निःशेष वातार्त्तिहा ॥
कार्पासास्थ्यादिस्वेदः। तिलै
स्तु गुटिकां कृत्वा भ्रामयेज्जठरो
परि। शूले सद्यस्तरं तेनशा
न्तिं गच्छति सत्वरं। नाभिले
पाज्जयेच्छूलं मदनं काञ्जिका
न्वितं मदनं मयनफलं ॥
विश्वमेरण्डमूलञ्च क्वाथं कृत्वा
शूलवान् पिबेत् हिङ्गु सौवर्च्चलोपेतं
सद्यः शूलनिवारणं ॥ गुडशा
लियवाः क्षीरं सर्पिः पानं विरेच
नं। जाङ्गलानि च मांसानि भेष
जं पित्तशूलिनां। सर्व्वीरज
तताम्राणां भाजनानि गुरूणि च
तोयेन परिपूर्णानि शूलस्योपरि
धारयेत्। विरेचनं पित्तहरं प्र
शंसन्ति रसाश्च शस्ताः शशलाव
कानां ॥ मधुना हृतसंयुक्तां भ
क्षयेद्वा हरीतकीं। पलिहा
च्छेलपुनर्नवयोः धात्रीचूर्णं समा
क्षिकं॥ शाल्यन्नं जाङ्गलं मां
समविदं कटुकं रसं मधुनिर्जी
र्णं मद्यं कफशूले प्रयोजये
त्। अरिष्टं भेषजं काथं स्विन्नं भ
र्ये॥ लवणत्रयसंयुक्तं पञ्च

कोलं सरामठं सौवर्चलेनान्वि
ता पीतं कफ शूलं प्रणाशयेत्
आमशूले क्रियाकार्य्या कफशू
ल प्रणाशिनी सेव्या सामहरं
सर्व्वं मद्य मग्निविवर्द्धनं ॥
तीक्ष्णायश्चूर्णसंयुक्तं त्रिफला
चूर्णं सुत्तमं । प्रयोज्यं मधुस
र्पिर्भ्यां सर्व्वशूल निवारणं ॥
तीक्ष्णा राजिका । दारुहैमव
ती कुष्ठ शताह्वा हिङ्गु सैन्धवैः
अम्लपिष्टैः सुखोष्णैः शूलिनस्य
कुलयेतोदरं । सलवेल्लं त
थैरण्डं चित्रकं विश्वभेषजं ·
हिङ्गु सैन्धव संयुक्तं सद्यः शूल
निवारणं । वात रोगान्तरोक्तायां
न चिकित्सायां लिखितो ना
राचनामा रसोऽस्यच्च विरेचनं
शूलेहितं । कूष्माण्डं तनुकृ
त्वा तच्छित्वा धर्म्मे विशोषयेत्
स्थाल्यां निक्षिप्य तत् सर्व्वंपि
धानेन विधाप्यच चुल्ल्यां निवे
श्य वह्निञ्च ज्वालयेत् कुश
लो जनः यथा तत्र भवेद्भस्म
किं त्वङ्गारो दृष्टो भवेत् तदा
निर्व्वापयेच्छीतं चूर्णितं चूर्णं
येच्चते माषद्वयमिते नारिकेली
दुग्धेच मिश्रिते जलेन भक्षयेन्नि

त्यं महाशूलो नवः । असाध्य
मपि यच्छूलं तदप्येतेन शाम्य
ति कूष्माण्डक्षारः ॥ अथ
परिणामशूलस्य चिकित्सालं
च्यते प्रथमं कुर्य्याद्वमनं तद्वि
रेचनं पक्तिशूलोपशान्त्यर्थं त
द्योगैर्विविधैर्यथा । पीत्वात
तीक्ष्णाकण्ठ मदनक्वाथसंयु
तं कोलारकस्य पौण्ड्रस्य कोशा
कारस्य वा रसं कषायं वाथ
निम्बस्य कटुतुम्बीरसं वचा । य
थाविधि वमेद्धीमान् पक्तिशू
लार्हितोजनः त्रिवृता च तथाद
न्त्या तैलेनैरण्डजेन वा । दत्ते
विरेचने सद्यः पक्तिशूलं नि
वारयेत् । विडङ्गं तण्डुलं धान्यं
त्रिवृद्दन्ति सचित्रकं सर्व्वाण्येता
नि संगृह्य सूक्ष्मचूर्णानि कारये
त् गुडेन मोदकान् कृत्वा खा
देदुष्णेन वारिणा जयेत्त्रिदोष
जं शूलं परिणाम समुद्भवं वि
डङ्गादि मोदकः ॥ नागरतिल
गुडकल्कं पयसा संपिष्य यःपु
मान् लिह्यात् उग्रपरिणामशूले
नपेयतस्य त्रिरात्रेण पीत पो
तुकजं भस्म जलेनोष्णेन तत्त
णात् । पक्तिजं नाशयत्येव ।

शूलं विल्व शिवासुरान् लोह
पथ्या कणा शुण्ठी चूर्णंसम
धुसर्पिषा विलिहन् विनिहन्त्ये
व शूलं हि परिणामजं पथ्यादि
लोहं । नारिकेलं सतोयं च लव
णेन सुपूरितं मृदावेष्टितं शु
ष्कं पक्वं गोमयवह्निना पिप्प
ल्या भक्षितं हन्ति शूलं हि परि
णामजं वातिकं पैत्तिकञ्चा
पि श्लैष्मिकं सान्निपातिकं ॥
नारिकेलक्षारः । अथान्नद्रव
स्य चिकित्सा अन्नद्रवाख्यशू
ले तु न तावत् स्वास्थ्यमश्नु
ते यावत् कटुक पीताम्ल मन्नेन
छर्दयेद्द्रुवं जातमात्रे जरत्यपि
तच्छूलं साधु विनाशयेत् पि
त्तार्त्ते वमनं कृत्वा कफार्त्तेच
विरेचनं । अन्न द्रवेच तत्कार्य्यं
जरत्पित्ते यदीरितं जरत्पित्तेपि
तत्पथ्यं प्रोक्तमन्नद्रवे तथा
आमपक्वाशयेशुद्धे गच्छेदन्न
द्रवः शमं माषेण्डरी सलव
णं सुस्विन्नां तैलपाचितां ता
दृशीं सर्पिषा खादेदन्नद्रवार्त्ति
पीडितः धात्रीफलभवं चूर्णम
यश्चूर्णं समन्वितं यष्टीचूर्णेन
वायुक्तं लिह्यात् दोद्रेणान्नकृते

श्यामाकतण्डुलैः सिद्धं सिद्धं
कोद्रव तण्डुलैः । प्रियंगुतण्डु
लैः सिद्धं पायसं ससितं हितं
प्रियंगुः कंगुविशेषः गोडिकं
शैवलं कंदं कूष्माण्ड मपि
भक्षयेत् कलाययवशक्तून्
वाशक्तून् वा लाजसंयुतान्
गोडिकं गुडेन संस्कृतं पक्वा
न्नं ॥ कुलत्थशक्तूनथवादध्ना
याद्दधिकंतथा । चणकानाम
थी शक्तून् कोद्रवस्योदनं तथा
दधिकं दध्नासंस्कृतं भक्तं । महे
रि इति लोके ॥ गोधूममण्ड
कं तत्र सर्पिषा गुड संयुतं ससि
तं शीतदुग्धेन मर्द्दितं क्वथितं
हितं । अन्नद्रवो दुश्चिकित्स्यो
दुर्व्विज्ञेयो महागदः । तस्मात्त
स्य प्रशमने परं यत्नं समाचरे
त् । अन्नद्रवे जरत्पित्ते वह्नि
मन्दो भवेद्यतः तस्मादत्र
पानानि मात्राहीनानि कार
येत् ॥ कलाय यव गोधूमाः
श्यामाकाः कोरदूषकाः राज
माषाश्च माषाश्च कुलत्थाः
कङ्कुपाल्यः दधिक्षमदन्तीरं
सर्पि र्गव्यं समाहिषं वास्तुकं
कारवल्लीच कर्कोटकफलानिच

श



बर्हिणो हरिणा मत्स्या रोहिता घाः कपिञ्जलाः । एतान्मिश्रानमये शूला मता मुनिचिकित्सकैः ॥ दधिलुप्तरसं दध्ना लुप्तः कृतो रसो यस्य तत् क्षीवं दधियुक्तं क्षीवमित्यर्थः ॥ गुडामलक पथ्यानां चूर्णं प्रत्येकशः पले त्रिपले लोहकिट्टस्य तत्सर्वं मधु सर्पिषा समालोड्य समश्नीयादक्षमात्रं प्रमाणतः आदिमध्यावसानेषु भोजनस्याति हन्ति तत् अन्नद्रवं जरत्पित्तमम्लपित्तं सुदारुणं । परिणामसमुत्पन्नं शूलं संवत्सरोत्थितं गुडमण्डूरं । व्यायाममैथुनमद्यं लवणं कटुकं रसं । वेगरोधमुचे क्रोधं विदले शूलवान् त्यजेत् ॥ इति शूलाम परिणामशूलान्नद्रव जरत्पित्ताधिकारः । इति भावप्रकाशः ॥ अपिच । अर्कपत्रं गृहीत्वा तु मन्दाग्नौ तापयेच्छनैः पिष्टीकृत्य श्लेषयेत् कर्णे कर्णशूलं विनश्यति । साज्जुनञ्च चूर्णं तो हं लवणं ताम्रभाजने चूर्णप यः समायुक्तं चक्षुःशूलहरं परं सांजनञ्च इत्येव तांबूलञ्च इति वा पाठः ॥ चूर्णमामलकस्येव पीतं शूलहरं परं ॥ इति गारुडे १८३ १८५ ॥ अध्यायाः ॥ किञ्च ॥ सामुद्रं सैन्धवं क्षारो राजिका लवणं विडं । कटु लौहरजः किट्टं त्रिवृत् शूरणकं समं ॥ दधि गोमूत्रपयसा मन्दपावकपाचितं । पतञ्चाग्निबलं चूर्णं पिबेदुष्णेन वारिणा जीर्णे जीर्णे च भुञ्जीत मायादिघृत भोजनं नाभिशूलं मूत्रशूलं गुल्मं प्लीहमवेचयत् सर्वशूलहरं चूर्णं जठरानलदीपनं ॥ परिणामसमुत्थस्य शूलस्य च हितं परं ॥ इति गारुडे ॥ १८८ अध्यायः ॥ तस्य उपपातकत्वं । यथा जलोदरं यकृत् प्लीह शूलरोगव्रणानि च श्वासाजीर्ण ज्वरच्छर्दिर्भ्रम मोह गलग्रहाः रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः इति शातातपीय कर्म्मविपाकः ॥

शूलकः पुं दुर्दान्तघोटकः । इति हलायुधः । अत्र शूकल इत्यपि पाठोदृश्यते यथा विनीतस्तु

साधुवाही दुर्विनीतस्तु शूकलः इति हेमचन्द्रः ॥

शूलग्रन्थिः स्त्री मालादूर्वा इति राजनिर्घण्टः ॥

शूलघातनं क्ली मण्डूरं । इति शब्दचन्द्रिका ॥

शूलघ्नः पुं तम्बुरुवृक्षः । इति रत्नमाला ॥ शूलघातकेऽपि ॥

शूलद्विट् पुं हिंगुः इति रत्नमाला ॥

शूलधन्वा पुं शिवः । इति शब्दरत्नावली ॥

शूलधरः पुं शिवः । इति शब्दरत्नावली ॥

शूलधरा स्त्री दुर्गा । इति शब्दरत्नावली ॥

शूलधारिणी स्त्री दुर्गा । यथा सती साध्वी भवप्रीता भवानी भवमोचनी आर्य्या दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी इति तन्त्रसार धृत तदष्टशतनामस्तोत्रं ॥

शूलधृक् स्त्री दुर्गा इति त्रिकाण्डशेषः महादेवे पुं ॥

शूलनाशनं क्ली सौवर्च्चललवणं इति हेमचन्द्रः ॥

शूलपत्री स्त्री शूलीतृणं इति राजनिर्घण्टः ॥

शूलशत्रुः पुं एरण्डवृक्षः ॥ इति शब्दचन्द्रिका ॥

शूलहन्त्री स्त्री यवानी इति राजनिर्घण्टः

शूलहृत् पुं हिंगुः इति त्रिकाण्डशेषः ॥

शूला स्त्री दुष्टवधार्थकीलकः वेश्या इति विश्वः ॥

शूलाकृतं त्रि लौहादिशलाकयाविद्धं पक्वमांसं कवाव इति पारस्यभाषा तत्पर्य्यायः भटित्रं २ शूल्यं ३ इत्यमरः ॥ वासितागं ४ इति जटाधरः ॥ शूलिकं ५ इति शब्दचन्द्रिका अस्य गुणाः शूल्यशब्दे द्रष्टव्याः शूलिकं क्ली शूलाकृतं इति शब्दचन्द्रिका ॥

शूलिकः पुं शशकः । इति हेमचन्द्रः शूलयुक्ते त्रि ॥

शूलिनः पुं भांडीरवृक्षः । इति शब्दमाला ॥

शूलिनी स्त्री दुर्गा यथा । खड्गिनी शूलिनी घोरा गदिनी चक्रिणी तथा । शंखिनी चापिनी बाणभुशुण्डी परिघायुधा । इति देवीमाहात्म्यं ॥



शूली पुं शिवः। इत्यमरः ॥
प्राशः। इति भावप्रकाशः ॥
शूलास्त्रधारके शूलरोगयुक्ते च त्रि यथा वर्जयेद्विदलं शूली कुष्ठी मांसं ज्वरी स्त्रियं। इति वैद्यके। तस्य कारणं प्रायश्चित्तञ्च यथा शूली परोपतापेन जायते तत्र प्रमार्जकः सोऽन्नदानं प्रकुर्वीत तथा रुद्रजपेश्वरः। इति शातातपीयकर्मविपाकः ॥
शूली स्त्री तृणभेदः तत्पर्य्यायः। शूलपत्री २ अरुणाली ३ सुमूलिका ४ जलाश्रया ५ मसृणा ६ पिच्छिला ७ महिषीप्रिया ८ अस्यागुणाः पिच्छिलत्वं। कोमलत्वं। गुरुत्वं। शीतत्वं। बलपुष्टत्वं पित्तदाहहरत्वं रुच्यत्वं दुग्धवृद्धिकारित्वंच। इति राजनिर्घण्टः ॥
शूलोत्खा स्त्री सोमराजी। इति शब्दचन्द्रिका ॥
शूल्यं त्रि शूलाकृतं कबाब् इति पारस्य भाषा इत्यमरः॥ तत्पाकप्रकारो यथा कालखण्डादि मांसानि ग्रथितानि शलाकया। घृतेन लवणं दत्त्वा निर्धूमे दहने पचेत् ॥ तच्छूल्यमिति प्रोक्तं पाककर्मविचक्षणैः। अस्य गुणाः। शूल्यं बल्यं सुधातुल्यं रुच्यं वह्निकरं लघु। कफवातहरं वृष्यं किंचित् पित्तहरं हितम्। इति भावप्रकाशः। अस्य पर्य्यायाः शूलाकृतशब्दे द्रष्टव्याः ॥
शृध प्रसवे। इति कविकल्पद्रुमः। शृधयति इति दुर्गादासः ॥
शृतं त्रि पक्वे। इत्युणादिकोषः अस्थिरे। सरु इति सिद्धि इति च भाषा। यथा वकुलतस्तसमाक्तं पट्टसूत्रादिनिर्मितं वासो देवि सुशृतंच गृहाण परमेश्वरि। इति कालिकापुराणे।
शृतः पुं कृतकः। अश्वात्मा इत्युणादिकोषः ॥
शृकालः पुं शृगालः। इति शब्दचन्द्रिका ॥
शृगालः पुं पशुविशेषः शेयाल् इति भाषा तत्पर्य्यायः शिवा २ भूरिमायः ३ गोमायुः ४ मृगधूर्त्तकः ५ वंचकः ६ क्रोष्टुः ७ फेरुः ८ फेरवः ९ जंबुकः १० इत्यमरः सृगालः ११ जंबूकः १२ स्वरमनः १३ ऊरवः १४ ॥

घोररासनः १५ वनश्वा १६ फेरः १७ मृगधूर्त्तः १८ इति शब्दरत्नावली ॥ शालावृकः १९ गोमी २० कटखादकः २१ इति जटाधरः शिवालुः २२ फेरण्डः २३ श्वाजम्बुकः २४ इति राजनिर्घण्टः। दैत्यभेदः ॥ इति मेदिनी वासुदेवः ॥ निष्ठुरः। खलः इति सारस्वताभिधाने भीरुः। इत्यनेकार्थकोषः ॥
शृगालशब्दादीनां शुभाशुभसूचकत्वं यथा अनर्थदं तु रौति शब्दहीनः सदा शृगालः खलु दृष्टमात्रः शान्ता हिताय रौति यस्य शब्दो वा मोऽभिनादो निशियो बहूनां ज्वलन् कुर्वन्ति प्रथमे ततस्तु दद्यात् दीर्घः स्वरतो रवोऽयः। स्याज्जंबुकानां समतः प्रशस्तस्तदन्यरूपः कथितः प्रदीप्तः ॥ शृगालशब्दो भवने निशायामुच्चाटनार्थे दिशि पश्चिमायां प्राच्यां भयायोत्तरतः शिवाय भवत्यवाच्यां भयनाशनाय। इति वसन्तराजशाकुने शृगा-
लकंटकः पुं क्षुपविशेषः ॥ शेयालकांटा इति भाषा इति शब्दचन्द्रिका ॥
शृगालकोलिः पुं क्षुद्रकोलिवृक्षः शेयाकुल् इति भाषा। तत्पर्य्यायः। कर्कन्धुः २ इति रत्नमाला। अपिच। अथ घोण्टा ३ गोपघोण्टा ४ वदरं ५ वादरञ्च ६ तत् वदरीसदृशे स्वल्पफले वृक्षे चतुष्टये इति शब्दरत्नावली ॥ शृगालघण्टी स्त्री कोकिलाक्षः ॥ इति राजनिर्घण्टः ॥
शृगालजंबुः स्त्री गोडुंबः घोण्टाफले इति मेदिनी ॥
शृगालविन्ना स्त्री पृश्निपर्णी इतिराजनिर्घण्टः ॥
शृगालिका स्त्री शृगालपत्नी। अपसारपलायने इति मेदिनी। भूमिकुष्माण्डः इति जटाधरः। क्षुद्रशृगालः खेंकसेयाली इति भाषा। तत्पर्य्यायः लोमालिका २ दीप्तजिका ३ किखिः ४ उल्कामुखी ५। इति त्रिकाण्डशेषः ॥
शृगाली स्त्री विद्रवः पलायनमिति यावत् इति त्रिकाण्डशेषः कोकिलाक्षः। विदारी इति राजनिर्घण्टः ॥

शृगालिकाच ॥
शृंखलः त्रि पुंसो कटाभरणं
गोट् इति भाषा हस्त्यादीनां लौ
हमयपादबन्धोपकरणं । शि
कड़ इति दोड़का इति च भाषा
तत्पर्य्यायः अन्दुकः २ निगडः
३ इत्यमरः । शृंखला ४ इति
तट्टीकायां भरतः ॥
लौहरज्जुः शिकल बेडि इत्या
दिभाषा ॥ बंधने ॥
इति हेमचंद्रः ॥
शृंखलकः पुं उष्ट्रः इति राजनि
र्घण्टः ॥ पलायने निषेधाय
पादेषु दारुमय लाञ्छलातिलक
रभः इत्यमरभरतौ ॥
शृंखलश्च ॥
शृंखला त्रि निगडः पुंस्कटी
वस्त्रबंधः । इति मेदिनी । अय
न्तु शृंखलशब्दे द्रष्टव्यं ॥
शृंखलितः त्रि शृंखलायुक्तः
निगडितः ॥ इति धनञ्जयः ॥
शृंखली स्त्री कोकिलाक्षः ॥
इति राजनिर्घण्टः ॥
शृंगं क्ली पर्वतोपरिभागः त
त्पर्य्यायः कूटं २ कूटः ३ शिख
रं ४ इत्यमरः । टंकः ५ प्रा
ग्भारः ६ इति जटाधरः ॥

शैलाग्रे ७ इति त्रिकाण्डशेषः
सानुः इति नानार्थे अमरः प्र
भुत्वं चिह्नं । क्रीडाजलयंत्रं । वि
षाणं उत्कर्षः इति मेदिनी ।
ऊर्द्धं । तीक्ष्णं ॥ पंकजं । इति
शब्दरत्नावली महिषादि
शृंगनिर्म्मितवाद्यविशेषः । शिं
गा इति भाषा यथा कश्चिदना
घ्रायमनो दधद्गुञ्जान् मातःसु
त्यायवयस्य वत्सपान् । प्रबोधय
न् शृंगरवेणचारुणा विनिर्गतो
वत्सपुरःसरो हरिः ॥ इति श्री
भागवते १० स्कंधे १२ अध्यायः
कामोद्रेकः यथा शृंगं हि मन्म
थोद्भेद स्तदागमन हेतुकः ॥
उत्तमप्रकृतिप्रायो रसः शृंगार
इष्यते । इति साहित्यदर्पणः ॥
ॐ शृंगभंगप्रायश्चित्तं यथा ।
भवदेवभट्टधृते यमवचने अ
स्थिभंगे गवां कृत्वा लांगूलच्छे
दने तथा पातने कर्णशृंगाणां
मासार्द्धं तु यवान् पिबेत् । शृंगि
णः शृंगभंगे अस्थिभंगे च चर्म्मनि
र्म्मोचनेपि वा दशरात्रं चरेद्ब्रह्म
स्तस्मात् स्याद्यदि गो भवेत् ॥
भवदेवभट्टः हरिनाथोपाध्यायः
धृते संवर्त्त वचने शृंगभंगोस्थि

भंगो च कटिभंगो तथैव च ॥
यदि जीवति षण्मासान्प्राय
श्चित्तं न विद्यते अत्र षण्मासो
त्तरं वैण्णं तद्दोष शमनाय प्रा
यश्चित्तं नास्ति तदभ्यंतरमरणे
वै प्रायश्चित्तं भवति । एवञ्च
शृंगभंगादि निमित्तक पापेऽ
पृथक् प्रायश्चित्तं न कर्त्तव्यं । व
धप्रायश्चित्तेनैव गतत्वात्प्रसं
गात्तदपगमसिद्धेः । षण्मासो
त्तरेतु शृंगभंगादि निमित्तक
पूर्व्वोक्त मासार्द्ध यावकपानं
प्राजापत्यं वा कर्त्तव्यं । इति
प्रायश्चित्ततत्त्वं ॥
शृंगः पुं कूर्च्चशीर्षकवृक्षः ॥
इति मेदिनी मुनिभेदः ॥ इति
शब्दरत्नावली ॥
शृंगकः पुं जीवकवृक्षः । इति
जटाधरः ॥
शृंगकंदः पुं शृंगाटकः ॥
इति राजनिर्घण्टः ॥
शृंगजं क्ली अगुरुः । इति रत्न
माला । शरे पुं यथा शृंगाच्छ
रो जायते इति संक्षिप्तसारका
रकपादः शृंगजाते त्रि ॥
शृंगमूलः पुं शृंगाटकः । इ
ति राजनिर्घण्टः ॥

शृंगमोही पुं चम्पकः इति
राजनिर्घण्टः ॥
शृंगला स्त्री अजशृंगी । इति
शब्दचंद्रिका ॥
शृंगवान् पुं कुरुवर्षीयसीमा
पर्वतः । सतु दीर्घे ८०००० अ
शीतिसहस्रयोजनानि । प्रस्थे
२००० द्विसहस्रयोजनानि । वि
स्तारेतथैव यथा हिमवत्
हेमकूटश्च निषधश्चास्य दक्षि
णे । नीलः श्वेतश्च शृंगीच उ
त्तरेवर्षपर्वताः । लक्षप्रमाणौ
द्वौमध्यौ दशहीनास्तथापरे
सहस्रद्वितयोच्छ्रायास्तावद्वि
स्तारिणश्चते । इति विष्णुपुराणे २
अंशे २ अध्यायः लक्षप्रमा
णौ द्वौ प्राक् पश्चिमतो दैर्घ्ये
ण निषधनीलौ यद्यपि जं
बुद्वीप मंडलाकारस्य लक्ष
योजन प्रमाणत्वात्मध्यरेखा
या मेरुमुख्ये लक्ष प्रमाणत्वं ।
निषधनीलौ तु तन्मध्यरेखातो
दक्षिणत श्चोत्तरतश्च समदश
योजनसहस्रांतरितत्वादीषन्न्यू
नौ तथापि स्थूलदृष्ट्या लक्षप्रमा
णावित्युक्तं । अपरे तु हेमकूटाद
यो दशहीना दश दश न्यूनाः




हेमकूट स्थितो नवतियोजन
सहस्र प्रमाणौ हिमवच्छृङ्गि
णावशीति योजनप्रमाणौ त
दुक्तं वाराहे द्वीपस्य मण्डली
भावात् ह्रासः वृद्धी प्रकीर्त्तिते।
इति नदीकायां श्रीधरस्वामी॰
भागवतमतेदैर्घ्यं १०००० द॰
शसहस्रयोजनानि प्रस्थे २०००
द्विसहस्रयोजनानि यथा उ
त्तरोत्तरेणेलावृतं नीलः श्वे
तः शृङ्गवान् इति त्रयोरम्यक
हिरण्मय कुरूणां वर्षाणां म
र्यादागिरयः प्रागायता उभय
तःक्षारोदावधयो द्विसहस्र यो
जनपृथव एकैकशः पूर्वस्मात्
पूर्वस्मादुत्तरोत्तरो दशांशाधि॰
कांशेन दैर्घ्ये एव ह्रसन्ति एवं
दक्षिणेनेलावृतं निषधो हेम
कूटो हिमालय इति प्रागा॰
यता यथा नीलादयः अयुत
योजनोत्सेधा हरिवर्ष किंपुरु
षभारतानां यथासंख्यं। इति
श्रीभागवते ५ स्कन्धे १६ अध्या
यः। शृङ्गवेरं क्लीं आर्द्रकं इत्य
मरः। शुण्ठी इति राजनिर्घण्टः
गुहचण्डालपुरं यथा भारते
गच्छ शीघ्रं त्व मयोध्यामभवते

प्रति जानीहि कुशलीकश्चि
त् जनो नृपतिमन्दिरे शृङ्गवे
रपुरं गत्वा ब्रूहि मित्रंगुहमम
जानकीलक्ष्मणोपेत मागतं॰
मां निवेदय ॥ इत्यध्यात्म॰
रामायणे। लङ्काकाण्डे १४।
अध्यायः ॥
शृङ्गवेरकं क्लीं आर्द्रकं। इति
हेमचन्द्रः ॥
शृङ्गवेराभमूलकः पुं पक्का।
इति भावप्रकाशः ॥
शृङ्गाटं क्लीं चतुष्पथे। इति
हेमचन्द्रः धरणीच ॥
शृङ्गाटः पुं जलकण्टकः इति
भूरिप्रयोग त्रिकाण्डशेषौ ॥
स्वादुकण्टकः इति शब्दरत्नाव
ली कामाख्यादेशस्य पर्वतः ॥
यथा दीपवत्याः पूर्वतस्तु शृङ्गा
टो नाम पर्वतः तत्र भर्गस्य देव
स्य लिंग मेकं प्रतिष्ठितं। स
त्रिन्तु सिद्धा त्रिस्रोतादक्षिणाद
प्यशामिनी शृङ्गाटकस्य सन्ते त
स्तन्ती ग्रावाणपादतः दक्षिणं
सागरं याति भर्गस्य प्रियकारि
णी। सलिले योनतः स्नाति त्रि
स्रोतायां नरोत्तमः ॥ शृङ्गा
टकं समारुह्य पूजयेल्लिंग॰

शंकरं सदीक्षकायः शुद्धात्माश
प्य कामानिहाखिलान् अन्तेग
र्भगृहं याति ततो मोक्षमवा
प्नुयात्। इति कालिकापुरा
णे ८२ अध्यायः ॥
शृङ्गाटकं क्लीं चतुष्पथं इत्य
मरः। जलजलताफलविशेषः
पानिफल इति शिंगाडा इति च
भाषा। तत्पर्यायः। जलसूचिः २
शृङ्गाटिका ३ वारिकण्टकः ४
इति जटाधरः शृङ्गाटः ५ वा
रिकुब्जकः ६ इति त्रिकाण्डशे
षः। नीरशुक्तः ७ जलक
ण्टकः ८ इति शब्दमाला ॥
शृङ्गाटकः ९ शृङ्गरुहः १० ज
लवल्ली ११ जलाशयः १२ शृङ्गक
टः १३ शृङ्गमूलः १४ विषाणी
१५ अस्य गुणाः शीतलत्वपित्तह
रत्व लघुत्व सरत्व वृष्यत्व
विशेषात् त्रिदोष वात भ्रम॰
शोफ नाशित्व रुचिप्रदत्व।
मेहनदाहहेतुत्वच। इति रा
जनिर्घण्टः। अपिच गुरुत्व।
विष्टम्भित्व शीतलत्वञ्च। इति
राजवल्लभः ॥ खाद्यविशेषः
समुसा इति हिन्दीभाषा। य
था शुद्धमांसं तत्कृतपकार्त्ते

ते स्विदिते जले लवङ्ग हिङ्गु
सहिते लवणार्द्रकसंयुते प
लाजीरकधन्याकनिंबूरससम
न्विते। घृते समीपे तह्रष्टे पूर
णे प्रोच्यते बुधैः। शृङ्गाटकं
समितया कृते पूरणपूरिते
पुनः सर्पिषि संभृष्टे संशृ
ङ्गाटकं वदेत्। मांसं शृङ्गा
टकं रुच्यं बृंहणं बलकृत्
गुरु। वात पित्तहरं वृष्यं क
फघ्नं वीर्यवर्द्धनं। इति भा
वप्रकाशः ॥
शृङ्गाटकः पुं जलकण्टकः
इति राजवल्लभः॥ शृङ्गारं क्लीं
लवङ्गं सिन्दूरं ॥ चूर्णं। इ
ति मेदिनी। आर्द्रकं इति
शब्दचन्द्रिका ॥ कालागुरुः।
इति राजनिर्घण्टः ॥
शृङ्गारः पुं सुरतः। नाट्यरसः
गजभूषणं इति मेदिनी ॥
नाट्यरसस्य लक्षणं यथा।
पुंसः स्त्रियां स्त्रियाः पुंसि संयो
गं प्रति यास्पृहा। सशृङ्गार इ
ति ख्यातो रति क्रीडादिकार
णं इत्यमरटीकायां भरतः। अ
पिच शृङ्गं हि मन्मथोद्भेदस्त
दागमनहेतुकः उत्तमप्रकृति



यो रसः शृङ्गार इष्यते । परो
ढां वर्जयित्वात्र वेश्या चाननु
रागिणीं आलम्बनं नायिकाः
स्युः दक्षिणाद्याश्च नायकाः ।
चन्द्र चन्दन रोलम्ब रुताद्युद्दी
पनं मतं । भ्रूविक्षेप कटाक्षा
दि रनुभावः प्रकीर्तितः । त्य
क्त्वौग्र्य मरणालस्य जुगुप्सा
व्यभिचारिणः । स्थायीभावो
रतिः श्यामवर्णोऽयं विष्णुदेव
तः सचद्विधा विप्रलम्भः सम्भो
गश्च । इति साहित्यदर्पणः
अस्यान्न मैथुनपाठे दृष्टव्यं ।
शृङ्गारादिभ्रंशो नरकोयथा
शृङ्गाराहार निद्राणां यश्च
भङ्गं करोति च । सव्रजेत् ।
कालसूत्रञ्च स्वामिनश्च वि
शेषतः । इति ब्रह्मवैवर्ते १
प्रकृतिखण्डे ५८ अध्यायः ।
शृङ्गारकं क्ली सिन्दूरं । इति
राजनिर्घण्टः शृङ्गारविशिष्टे त्रि
शृङ्गशाबान् आरक्तान् प्रसवे
न निष्पन्नः । इति सिद्धान्तकौमु
दी स्वार्थे कन् शृङ्गारस्यान्तरं पुं ।
शृङ्गारभूषणं क्ली सिन्दूरं । इ
ति हेमचन्द्रः ॥
शृङ्गारयोनिः पुं कामदेवः
इति हलायुध हेमचन्द्रौ ॥
शृङ्गारी पुं शृङ्गः गजः । स
शृङ्गारः । सवेषः । इति मेदि
नी माणिक्यं ॥ इति रा
जनिर्घण्टः ॥
शृङ्गिः स्त्री मत्स्यविशेषः सिं
गीमाछ् । इति भाषा यथा सु
श्रुतस्य प्रिया शृङ्गी शृङ्गिरिम
पिङ्क्रच्चित् स्यात् प्रिया मद्गुर
सीति च नामद्वयं क्वचित् इ
ति शब्दरत्नावली ॥
शृङ्गिकं क्ली विषभेदः इति
हलायुधः ॥
शृङ्गिका स्त्री अतिविषा । इ
ति शब्दरत्नावली ॥
शृङ्गिणः पुं मेषः । इति हे
मचन्द्रः ॥
शृङ्गिणी स्त्री गौः इत्यमरः ॥
श्लेष्मच्छीवृक्षः । मल्लिकावृक्षः
ज्योतिष्मतीवृक्षः ॥ इति मे
दिनी ॥
शृङ्गी २ पुं हस्ती वृक्षः पर्वतः
शृङ्गयुक्ते त्रि । इति मेदिनी ॥
शृङ्गी स्त्री मत्स्यविशेषः सिं
गी इति सिंघल इति च भाषा
तत्पर्यायः मद्गुरप्रिया २ ॥
इत्यमरः मधुरा मद्गुरी ३ ॥

इति कलिङ्गः मद्गुरसी ४ आमि
षा ५ शृङ्गिः ६ इति केचिदि
ति भरतः । अस्या गुणाः । स्वा
दुरसत्वं स्निग्धत्वं देहदार्ढ्यं । क
फ कोपनत्वं । शोथ पाण्डुमरु
त्पित्तनाशित्वञ्च इति राज
वल्लभः अतिविषा ॥ ऋषभौ
षधं इत्यमरः । कर्कटशृङ्गी
स्मृतः । वटः । विषं इति रा
जनिर्घण्टः अलङ्कारसुवर्णं
यथा स्त्री शृङ्गी मदनसरणी
इति भरतधृत रत्नकोषः ॥
शृङ्गीकनकं क्ली अलङ्कारसु
वर्णं इत्यमरः अलङ्कारस्य कुण्ड
लादेर्यत्सुवर्णं तत् शृङ्गीकनकं
मुच्यते शृङ्गी अलङ्कारः तदर्थं
कनकं शृङ्गीकनकं अलङ्कार
सुवर्णस्य शृङ्गीतिच नाम स्त्री ।
शृङ्गीमदनसरणी इति रत्नकोषः
शृङ्गी कस्यां नाच शृङ्गालिकायां
हीन शृङ्गिः स्वर्णं श्रमे नवे ना
म्नीतिङ्ः निपातनात् ङीः शाङ्गो
णादीति कृपि शृङ्गी । इति भरतः
शृणिः स्त्री अङ्कुशः इत्यमरः ।
शृणाति मर्मस्थानं शृणिः । शॄ
हिंसने वृश्चिपृत्या मां हा
लादेर्नि रिति स्वादित्वात् ने
निः निपातनादित् ह्रस्वः । ना
म्नीति ङीः शृणी वा सृणि दन्त्यादि
श्चेच कोशस्य रूपवाचकः । इति
मुरारि । तालव्यादिः । सरतिम
र्मस्थाने गच्छति सृणि दंत्यादि
रित्यन्ये स्त्रिया मित्यत्र ह्यो
रिति पाठः । इति मेदिनी ॥
आवत्सु मग्न मवमत्य सृणिं
शितांश्च मिति माघः स्त्रिया
मिति प्रायिकत्वादुक्त मिति
मुकुटः । इति भरतः ॥
शृतं त्रि पक्वक्षीराज्यपयांसि
इत्यमरः शृतं मतं विवर्जयेदि
ति त्वाषं । इति भरतः ॥
क्वथिते । इति शब्दचन्द्रिका रत्न
मालाच । अथ क्वाथ विधिः
पानीये षोडश गुणे क्षुण्णे द्र
व्यपले क्षिपेत् मृत्पात्रे क्वाथ
येत् ग्राह्य मष्टमांशावशेषि
ते । कर्षादौ तु पले यावत् द
द्यात् षोडशिकं जलं तत्ज्ञे
प्राथयेदीमान् कोले मृद्वग्नि
साधितं शृतः क्वाथः कषाय
श्च निर्यूहः स निगद्यते ॥
क्वाथपानमात्रा माह मात्रोत्त
मा पलेन स्यात्त्रिभि रक्षैश्च
मध्यमा जघन्या च पलार्द्धेन

स्नेह क्वाथावशेषेण च तैलोत्तरे
क्वाथ इत्यपले वारि द्विरष्टगु
णामिष्यते चतुर्भागावशिष्टं तु
पेयं पल चतुष्टयं दीप्तानले
महाकाये पाययेत् द्व्यञ्जलि
जले। अन्येत्वष्टं परित्यज्य म
हतेन्तु चिकित्सकाः ॥ क्वा
थ्य भाग मनिच्छेन स्वष्टभा
गावशेषितं पारंपर्य्योपदेशे
न वृद्ध वैद्याः पलद्वयं। अष्ट
भागावशेषितस्य चतुर्भागा
वशिष्टापेक्षया गुरुत्वाद्दीप्तान
ले महाकाये पलद्वयं पाय
येन्मध्यमाग्नि मध्यकाये पल
मात्रं पाययेत् मात्रेणात्मा पलेन
मन्दाग्न्यादि वचनात्। क्वाथे
क्षिपेत् सिता मंशैः चतुर्थाष्ट
म षोडशैः। वात पित्त कफा
तङ्के विपरीतं मधु स्मृतं। जी
रकं गुग्गुलुं क्षारं लवणञ्च
शिलाजतु। हिङ्गु त्रिकटुकञ्चैव
क्वाथे शाणोन्मितं क्षिपेत्।
क्षीरं घृतं गुडं तैलं मूत्रं चा
न्यत् द्रवं तथा। कल्कं चूर्णा
दिकं क्वाथे निक्षिपेत् कर्षस
म्मितं। तन्नोपविश्य विश्रान्तः
प्रसन्नवदनेक्षणः। औषधं
हेम राजते मृद्भाजन परिश्रि
ते पिबेत् प्रसन्नहृदयः पीत्वा
पात्र मधोमुखं। विधायाचम
सलिलं ताम्बूलाद्युपयोजयेत्
इति भावप्रकाशः ॥ अन्यच्च
इत्यादावपि स्थितत्वाद्येवक्लिन्ना
परितापित्वात् निःसृतो यो
रसः सृतः सशृतः समुदाह
तः ॥ इति वैद्यके ॥

शृध व ल्ल ङ॰ उ पर्द्दे। इति
कविकल्पद्रुमः। वशास्यति शि
शृत्सति ल्ट अशृधत् ङ॰ शर्द्धते
उ शर्द्धित्वा शृद्धा पर्द्दोऽपानो
त्सर्गः। शृध प्रहसने इति चुरा
दि परस्मैपदी धात्वर्थेन म
न्ने प्रहसने विद्रवः। इति
गोविन्दभट्टः। शर्द्धयति हेङ्कु
स्तितशर्द्धे वालः। इति रमा
नाथः इति दुर्गादासः ॥

शृध उ म क्लेदने। इति कविक
ल्पद्रुमः ॥ उ शर्द्धित्वा शृद्धा ॥
म शर्द्धयति शर्द्धते क्लेदनं मा
र्द्दवभावः। इति दुर्गादासः ॥

शृधुः पुं बुद्धिः। गुदं। इति
विश्वः ॥

शृधूः पुं कुत्सितः अपाने।
इति संक्षिप्तसारोणादिवृत्तिः ॥

अंगस्नेपिवात गुदवातादिदोष
नाशित्वं च। इति राजनिर्घण्टः ॥

शेफाली स्त्री शेफालिका। इ
ति शब्दरत्नावली। नीलसिन्धु
वारः। इति भावप्रकाशः ॥

शेमुषी स्त्री बुद्धिः। इत्यमरः।

शेल अ र चाल गत्योः। इति
कविकल्पद्रुमः। अ अशेलीशे
लत् इति दुर्गादासः ॥

शेलुः पुं बहुवारकवृक्षः ॥
इत्यमरः ॥

शेवः पुं मेढ्रः उन्नतः। अहिः
इत्युणादिकोषः ॥

शेवधिः पुं निधिः। इत्यमरः।

शेवलं क्ली शैवालं। इति
शब्दरत्नावली ॥

शेवलिनी स्त्री नदी। इति
राजनिर्घण्टः ॥

शेवालं क्ली शैवालं। इति
शब्दरत्नावली ॥

शेवाली स्त्री आकाशमांसी
इति राजनिर्घण्टः ॥

शेषं क्ली प्रसादः। इति मेदि
नी शेषः पुं संकर्षणः। अनन्त
देवः। वधः। अनन्तः। स च
सर्प राजः। इति मेदिनी ॥
तस्य ध्यानं यथा फणासहस्र
सेवकं चतुर्बाहुं किरीटिनं।
नवाम्रपल्लवाकारं पिङ्गलश्म
श्रुलोचनं पीताम्बरधरं देवं
शंख चक्र गदाधरं कराग्रेऽ
लिंगे पद्मं गदां तस्याप्यधःक
रे। ध्यानं सर्वलोकेशं सर्वा
भरणभूषितं। क्षीराब्धि मध्ये
श्रीमंत मनन्तं पूजयेन्नतः। इति
भविष्यपुराणे। गजः। नागः
स्त्रीकृतेतरवस्तु। इत्यजयपालः
भगवतो द्वितीया मूर्त्तिः यथा
एका भगवतो मूर्त्ति र्ज्ञानरू
पा शिवामला। वासुदेवाभि
धाना सा गुणातीता सुनिष्क
ला। द्वितीया कालसंज्ञान्या ता
मसी शेषसंज्ञिता। निहन्ति स
कलां श्चान्ते वैष्णवी परमात
नुः। इति कौर्म्मे ४८ अध्यायः ॥
शेष शयन प्रकारो यथा। अ
नन्तस्तत्र गत्वा तु यत्र क्षीरो
दसागरः। तत्र स्वयं शिवायुक्तं
सुसुप्सतं जनार्दनं तस्योपधा
न मकरोद्देहेनैव दन्तिशोक
णा अनेन पादयोः शुके उप
धाने महाबलः। तालवृन्तेन
दाचके सशेषः पञ्चशतकफणा
स्वयंभुवीजयामास शेषरूपी

शृ शि हिंसने। इति कविकल्पद्रुमः। शि शृणाति शीर्य्यतेः शीर्णिः। इति दुर्गादासः ॥

शेखरं क्ली लवङ्गं। इति राजनिर्घण्टः शिग्रुमूले इति शब्दचन्द्रिका ॥

शेखरः पुं शिखावस्थितमाल्यं। इत्यमरः। यथा शिखावितस्तमालाया मापीडः शेखरोपि च। इति शब्दरत्नावली। गीतस्य ध्रुवविशेषः तल्लक्षणं यथा द्वादशाक्षरपादः स्यात् स चाल्पगुरुकत् प्रभोः। हंसकेच रसे वीरे गीयते शेखरो ध्रुवः इति संगीतदामोदरः ॥

लघुशेखरो यथा। लघुर्गुरुर्भवेद्यत्र सभवेल्लघुशेखरः॥ इति तत्रैव॥

शेखरी स्त्री वन्दा। इति शब्दरत्नावली ॥

शेपः पुं शेफः। इति शब्दरत्नावली ॥

शेपालः पुं शेवालः ॥ इति शब्दरत्नावली ॥

शेफः पुं शिश्नः। इति शब्दरत्नावली ॥

शेफः स क्ली शिश्नः इत्यमरः। शुक्रपाते सति शेते पतति इति शेफः। शीङ् धातो नाम्नीति फस प्रत्ययः। शेफस शेफसी शेफ शेफौ शेफश्चेति पंचरूपाणि भवन्तीत्याचार्य्याः इति भरतः ॥

शेफालिः स्त्री शेफालिका। इति शब्दरत्नावली ॥

शेफालिका स्त्री पुष्पवृक्षविशेषः। शिउली इति भाषा। तत्पर्य्यायः सुवहा २ निर्गुण्डी ३ नीलिका ४ इत्यमरः। चत्वारि शेफालिकामात्रे शियलीति ख्यात नीलपुष्पायां शेफालिकायामिति केचित् शेफालि कादि द्वयं शेफालिकामात्रे निर्गुण्ड्यादि द्वयं नीलपुष्पशेफालिकायामिति केचित् इति तट्टीकायां भरतः शेफाली ४ मलिका ५ रजनीहासा ६ निशिपुष्पिका ७ सा शुक्ला चेत् श्वेतसुरसा ८ भूतवेशी ९ इति शब्दरत्नावली शुक्लाङ्गी १० शीतमञ्जरी ११ विजया १२ वातारिः १३ भूतकेशी १४ अस्या गुणाः कटुत्वं तिक्तत्वं उष्णत्वं। रूक्षत्वं। वात कफ ।

जनार्द्दने। शंखे चक्रं गदां कासिं भिषृती हे महाबलः शेषानया पफणया सदृशे गरुडे तदा ॥ गदो पद्मञ्च शार्ङ्गञ्च तथैव विविधायुधं यानि चान्यानि तस्यास्त्रयाग्नेय्या फणया दधौ। एवं कृत्वा स्वकं कार्य्यं शयनीयं तदा हरेः भूत भव्य जगन्नाथ परात्परपतिं हरिं। दधार शिरसानन्तः स्वयमेव स्वकां तनुं ॥ एवं ब्रह्मदिनस्यैव प्रमाणेन निःशेषं हरिः ॥ संध्याञ्च समयिप्रष्यशेते नारायणोऽव्ययः ॥ इति कालिकापुराणे। २२। अध्यायः ॥

शेषः पुं क्ली उपयुक्तेतरवस्तु। इति मेदिनी। शेषोः वशिष्टम वशिष्टताच शेषः शेषश्चेत्यादि। अनंततु शेषः पुं लिङ्ग एव शिष्टप्रयोगात्। उक्तादन्यः शेषः। यथा। शेषलेपौ निधि वाचकौ पुंलिङ्गौ जलजे त्वभयलिङ्गौ। इति सर्वानन्दः इत्यमरटीकायां भरतः ॥ स्मरणादिशेषलक्षणनिषेधो यथा। स्मरणशेषं चाग्निशेषं ऋणशेषं तथैवच पुनः पुनः प्रवर्द्धन्ते तस्मात् शेषं न कारयेत् इति गारुडे ११६ ॥ अध्यायः ॥

शेषत्वं क्ली उपकारित्वं। पारार्थ्यं। परोद्देश्यप्रवृत्तिकत्वं। यथा। शेषत्वमुपकारित्वं द्रव्यादावाह बादरिः पारार्थ्यशेषता तच्च सर्वेषस्तीति जैमिनिः। इत्यधिकरणमालायां माधवाचार्य्यः ॥ शेषस्य भावः। इति व्याकरणं ॥

शेषरात्रिः स्त्री रात्रिशेषः तत्पर्य्यायः उषः २ अपररात्रः ३। इति शब्दरत्नावली ॥

शेषा स्त्री स्वनिर्माल्यार्पणं इति मेदिनी ॥

शैखरिकः पुं अपामार्गः इत्यमरः ॥

शैखरेयः पुं अपामार्गः। इति भरतधृतरत्नकोषः ॥

शैत्यं क्ली शीतलत्वं। यथा शैत्यं नाम गुण स्तवैव सहजः स्वाभाविकी स्वच्छता किंब्रूमः शुचितां भवन्ति शुचयः स्पर्शेन यस्यापरे किंवान्यत् कथयामि ते स्तुतिपदं त्वं जीविनां जीवनं त्वञ्चेन्नीचपथेन गच्छसि



पयः कस्त्वां नियंतुं क्षमः ।
इति लक्ष्मणसेनः ॥
शैथिल्यं क्ली शिथिलत्वं शि
थिलस्य भावइत्यर्थेष्यप्रत्यये
नलिष्पन्नं ॥
शैनेयः पुं सात्यकिः । सत्तु
श्रीकृष्णसारथिः । इति त्रि
काण्डशेषः ॥
शैरीयकः पुं नीलझिण्टी ॥
इति रत्नमाला शैरेयकोऽपि
पाठः । दंत्यसादिश्च ॥
शैलं । क्ली शैलेयं तार्क्ष्य
शैलं इति मेदिनी शिलाज
तु । इति राजनिर्घण्टः ॥
शैलः पुं पर्वतः । इत्यमरः ॥
शैलकं क्ली शैलजं । इति
शब्दरत्नावली ॥
शैलगंधं क्ली श्यावरचंदनं
इति राजनिर्घण्टः ॥
शैलगर्भाह्वा स्त्री शिलाव
ल्का । इति राजनिर्घण्टः ॥
शैलजं क्ली सुगंधिद्रव्यविशेषः
तत्पर्यायः शीतशिवं २ शै
लेयं ३ शिलासनं ४ शिलेयं
५ शीतलं ६ शैलं ७ कालानु
सार्य्यं ८ शैलकं ९ वृद्धं १०
कालानुसारि ११ अश्मपुष्पं १२

शैलाख्यं १३ शिलापुष्पं १४ ।
वृद्धे १५ इति रत्नमाला ॥
अस्यगुणाः शैलेयशब्दे द्रष्ट
व्याः पर्वतजाते त्रि ॥
शैलजा स्त्री सैंहली गजपि
प्पली । इति राजनिर्घण्टः ॥
दुर्गा हिमशैलजत्वात् यथा
ततः श्रुत्वा भगवद्वाक्यं विस्मि
ताहिमशैलजा । इति शिव
रात्रिव्रतकथा ॥
शैलधन्वा पुं महादेवः । इति
त्रिकाण्डशेषः ॥
शैलधरः पुं श्रीकृष्णः । इति
धनंजयः ॥
शैलनिर्यासं क्ली शैलेयं ।
इति केचित् ॥
शैलपत्रः पुं विल्ववृक्षः । इति
राजनिर्घण्टः ॥
शैलभित्तिः स्त्री टंकः । इति
जटाधरः
शैलराजः पुं हिमालयपर्वतः ।
इति वस्यमाणशब्ददर्शनात्
शैलराजसुता स्त्री दुर्गा यथा
अरूपा परभावत्वाद्रूपाक्रि
यात्मिका जाता शैलेंद्रगेहे
सा शैलराजसुता ततः । इति
देवी पुराणे ४५ अध्यायः ॥

शैलवल्कला पुं शिलावल्कला
इति राजनिर्घण्टः ॥
शैलबीजः पुं भल्लातकवृक्षः
इति राजनिर्घण्टः ॥
शैलशिविरं क्ली समुद्रः । इति
त्रिकाण्डशेषः ॥
शैलसुता स्त्री पार्वती । यथा
मातः शैलसुतासपत्नि वसुधा
शृंगारहारावलि स्वर्गारोहणवै
जयंति भवतीं भागीरथीं प्रा
र्थये । इति वाल्मिकीयगंगा
ष्टकं ज्योतिष्मती ॥ इति
राजनिर्घण्टः ॥
शैलाख्यं क्ली शैलजं । इति
रत्नमाला ॥
शैलाग्रं क्ली शिखरं ॥ इति
त्रिकांडशेषः ॥
शैलाजं क्ली शैलेयं । इति
राजनिर्घण्टः ॥
शैलाटः पुं देवलः ॥ सिंहः ।
श्वेतकाचः किरातः । इति
मेदिनी ॥
शैलादिः पुं नंदी । यथा नि
मित्तानीदृशान् दृष्ट्वा भूतभ
र्त्तभवो विभुः शैलादिं प्राह
वचनं सस्मितं शशिशेखरः ॥
हरउवाच नंदिन् जयोऽद्य भा

वी नो न कथञ्चित् पराजयः
निमित्तानीह दृश्यंते शुभदा
निगणेश्वर तच्छंभुवचनं श्रुत्वा
शैलादिः प्राहशंकरं कः संदेहो
महादेव यत् त्वं जयसिशात्रु
वान् । इति वामने ६५ ॥
अध्यायः ॥
शैलाली पुं नटः इत्यमरः ॥
शैलिकः पुं सर्वलिंगी । इ
ति जटाधरः ॥
शैली स्त्री संकेतः यथा प
दानि परिभाषा शैली संके
तसमयकाराश्च इति त्रिकांड
शेषः । आचार्य्याणां शिये शै
लीयत् सामान्येनाभिधाय वि
शेषेण विवृणोति । इति सुप
द्मटीकायां दुर्गादासः ॥
शैलूषः पुं विल्ववृक्षः । नटः
इत्यमरः । धूर्त्तः तालधारकः
इति शब्दरत्नावली ॥
शैलूषिकः पुं नटवृत्त्यन्वेषी
यथा वृत्त्यन्वेषी नटानेन स तु
शैलूषिकः स्मृतः । इति ब्रह्मपु
राणोक्तं । इति प्रायश्चित्तवि
वेकः ॥
शैलूषिकी स्त्री शैलूषिकजा
ति स्त्री तद्गमन प्रायश्चित्ते यथा

सम्वर्त्तः। नंदी शैलादिरेकोचैव
सनकी वेणुगीतिनी गत्वा चा
न्द्रायणं कुर्य्यात् यथा चैमि
पजीविनी कामतस्तु यदाग
च्छेच्चरेच्चांद्रायणद्वयं तत्तस्या
ज्ञानतः स्थोद्रायणं। चांद्रायणं
ष्यैल्वष्टके इति प्रायश्चित्तत
त्वे ॥
शैलेंद्रः पुं हिमालयः यथा
ददृशुस्ते ततो देवीमीषद्धा
सां व्यवस्थितां। सिंहस्योपरि-
शैलेंद्रशृंगमहति काञ्चने।
इति देवीमाहात्म्यं ॥
शैलेंद्रस्थः पुं भूर्जवृक्षः। इति
राजनिर्घण्टः ॥
शैलेयं क्ली शैलजाख्यगंध
द्रव्यं। शैलेयक इति रत्नच।
इति छरिला इति च ख्याते।
तत्पर्य्यायाः यथा शैलेयं।
शैलजं वृद्धं शिलापुष्पं शि
लोद्भवं। स्थविरं पलितं जीर्णं
तथा कालानुसार्य्यकं। शिला
त्वचं शिलादद्रुः शैलजं गि
रिपुष्पकं शिलाप्रसूनं स्म
तं शैलकं धातुपुष्पकं ॥
अस्यगुणाः। शैलेयं शिशिरं
तिक्तं सुगंधि कफपित्तजित्
दाहतृष्णा वमि श्वास व्रणदोष
विनाशनं। इति राजनिर्घण्टः
अपिच शैलेयन्तु शिलापुष्पं
वृद्धं कालानुसार्य्यकं शैलेयं
शीतलं हृद्यं कफपित्तहरं ल
घुः। कण्डू कुष्ठाश्मरीदाहवि
षहृद्रक्षोहरं। इति भावप्रका
शः ॥ तालपर्णी ॥
सैंधवं। इति मेदिनी ॥
शैलेयं त्रि शैलसंभवं। इति
हेमचंद्रः ॥ शिलातुल्यं। इति
शब्दरत्नावली ॥
शैलेयः पुं सिंहः ॥ भ्रमरः ॥
इति शब्दरत्नावली ॥
शैलेयी स्त्री पार्वती। इति त्रि
काण्डशेषः ॥
शैलोद्भवा स्त्री क्षुद्रपाषाणभे
दी। इति राजनिर्घण्टः ॥
शैल्य त्रि शिलासंबंधि। शिला
या इदं इत्यर्थे ष्य प्रत्ययेन
निष्पन्नं ॥
शैवं क्ली शैवालः। इति शब्द
चंद्रिका शिवपुराणं। यथा।
अष्टादशपुराणानि पुराणज्ञाः
प्रचक्षते। ब्राह्मं पाद्मं वैष्णवंच
शैवं भागवतं तथा ॥ इति मत्स
मात्स्यतत्त्वे विष्णुपुराणे ॥ शिव

संबंधिनि त्रि ॥
शैवः पुं वस्तकः ॥ धुस्तूरः
इति राजनिर्घण्टः। आचार
विशेषः। यथा। अष्टांगयोगसं
युक्तो यजेद्देवी विधानतः। ध्या
नस्थाने समाधिंच तावत् शैवः
प्रचक्षते। इत्याचारभेदतंत्रे ॥
शिवोपासकः। तत्पर्य्यायः ॥
ऊर्द्धश्रोतसिकः २ ॥ इति
त्रिकाण्डशेषः ॥ एतद्भेदा य
था। ततश्चकार भगवान् चा
तुर्वर्ण्य हराचनं। शास्त्राणि
वैषां मुख्यानि नानोक्तिविदि
तानिच। आद्यं शैवंपरिख्या
तं मन्यत् पाशुपतंमुने तत्सौध
कालवदने चतुर्थंच कपालि
नं। शैव आसीत् स्वयंशक्ति
वसिष्ठस्य प्रियः सुतः ॥
तस्य शिष्यो बभूवाथ गोपा
यन इति श्रुतः। महापाशुपत
स्वासीद्भारद्वाज स्तपोधनः ॥
तस्य शिष्योप्यभूद्राजा ऋषभः
सोमकेश्वरः। कालास्यो भगवा
नासीदापस्तंब स्तपोधनः ॥
तस्य शिष्यो वरो वैश्य नाम्ना
क्राथेश्वरो मुने। महाव्रती च ध
नद स्तस्य शिष्यश्चवीर्य्य. ।
वान्। कूलोदर इति ख्यातो
जात्या शूद्रो महातपाः एवं स
भगवान् ब्रह्मा पूजनाय शि
वस्यच। कृत्वा तु चातुराश्रम्य
स्वमेवभवनंगतः। इति वामने
६ अध्यायः ॥ तस्यस्वरूपंय
था। आपादं शैवमालोक्या
ह। श्रीमानसावेति जटाल
मौलि र्व्याघ्रत्वगालंबितम
ध्यभागः। विभूति संभूषित
भास्वदंगो रुद्राक्षमाला क
लितोर्द्धदेहः। इति विद्वन्मोदत
रंगिण्यां २ तरंगः ॥
शैवलं क्ली पद्मकाष्ठं। शैवा
लं पुं। इति मेदिनी ॥
शैवलिनी स्त्री नदी इत्यमरः
शैवालं क्ली जलजद्रव्यविशे
षः। शेयाला इति भाषा। तत्
पर्य्यायः। जलनीली २ शैव
लः ३ इत्यमरः। शैपालं ४ शे
वलं ५ शीवलं ६ शैवलः ७
जलनीलिका ८ इति वाचस्प
तिः। जलनीलः ९। इति मु
कुटादयः इति भरतः। सै
वालं १० शैवालं ११ वारिचाम
रं १२ शैवलं १३ सलिलकु
न्तलं १४ हटपर्णी १५ अंबुताले

१९ इति शब्दरत्नावली ॥ अर
कः १ जलेकेशः २ कावारं १९
इति हारावली । जलजे १ ।
अस्य गुणाः । शीतलत्वं ॥ स्नि
ग्धत्वं । सन्तापव्रणनाशित्वञ्च
इति राजनिर्घण्टः ॥

शैब्यः पुं श्रीकृष्णस्य घोटक
विशेषः । यथा तुरगाः शैब्य
सुग्रीव मेघपुष्प बलाहकाः
इति त्रिकाण्डशेषः । पाण्डव
सेनापतिविशेषः । यथा धृष्ट
केतुश्चेकितानः काशिराज
श्च वीर्य्यवान् । पुरुजित् कुन्ति
भोजश्च शैब्यश्च नरपुङ्गवः ॥
इति भगवद्गीतायां १ अध्या
यः । शिवसंबन्धिनि त्रि ॥

शैशवं क्ली शिशोर्भावः बाल्य
मित्यमरः । यथा शैशवेऽभ्य
स्तविद्यानां यौवने विषयै
षिणां वार्द्धके मुनिवृत्तीनां
योगेनान्ते तनुत्यजां ॥
इति रघुवंशे १ सर्गः ॥

शैशिरः पुं कृष्णचटकः । इ
ति राजनिर्घण्टः । शिशिरसम्ब
न्धिनि त्रि यथा श्रुतिः तपस्तप
स्यौ शैशिरावृतुः । इति तिथ्या
दितत्त्वं ॥

शैष्योपाध्यायिका स्त्री शिष्या
ध्यापना । इति सिद्धान्तकौमुदी

शैक्षः पुं प्राथमकल्पिकः ॥
इत्यमरः हे प्रथममारभ्य वेदा
ध्ययने शिक्षाणि शिक्षा । सेय
स्मात् सोऽस्ति अः । शिक्षा
प्रथमोपदेशः तत्साहचर्या
त् ग्रन्थोऽपि शिक्षा तामधीयते
शैक्षा छन्दकादित्वात् । प्रथमे
शिक्षणीये कल्पे शास्त्रे अधी
यते प्राथमकल्पिकाः । इति भ
रतः । शैक्षिकः त्रि शिक्षाशास्त्र
वेत्ता । शिक्षां वेत्ति अधीते वा इ
त्यर्थे ष्णिक प्रत्ययेन निष्पन्नः ॥

शोक निशाने । इति कविकल्प
द्रुमः । निशानं तीक्ष्णीकरणं
य शोकति शस्त्रं शूरः । इति दुर्गा
दासः ॥

शोकः पुं चित्तविकलता । इ
ष्टवियोगानुचिन्तनं । इति ना
गोजीभट्टः । बन्ध्वादिवियोगज
नितमनःपीडा । इति भावप्र
काशः । तत्पर्य्यायः । मन्युः २
शुक् ३ इत्यमरः । शुचा ४ निः
समः ५ इति शब्दरत्नावली ॥
शोचनं ६ खेदः ७ इति हेमच
न्द्रः ॥ तन्निवारणहेतुर्यथा ॥

भरतं पतितं दीनं शोचन्तं
सम्भ्रेशो तदा शोचमानं वशि
ष्ठस्तु वादयाम्भास हेतुभिः ।
शोचमानान्तु सस्नेहान्बान्धवाः
सुहृदस्तथा । पातयन्ति गतं
स्वर्गादश्रुपातेन राघव ॥
भुविशुद्धो गतः स्वर्गं पुत्रेण
पतितः पुनः । शोचितो वंश
वंशेऽस्य मृतस्नेहं परित्यज ।
इति वह्निपुराणं । अपिच ।
अथ शोकापनोदनं । याज्ञव
ल्क्यः । श्लोकात्कान् समुत्तीर्णा
न् मृदुशाड्वल संस्थितान् ।
स्नातानपनुदेयुस्तानितिहासैः
पुरातनैः । मानुष्ये कदलीस्तम्भे
निःसारे सारमार्गणं । यः करो
ति स संमूढो जलबुद्बुदसन्नि
भे । पञ्चधा सम्भृतः कायो य
दि पञ्चत्वमागतः कर्म्मभिः
स्वशरीरोत्थैस्तत्र का परिदे
वना । गंगीवसुमती नाशं सुद
धिर्दैवतानि च फेनप्रख्यः क
थं नाशं मर्त्यलोको न यास्यति
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भु
ङ्क्ते यतोऽवशः ॥ अतो नरोदि
तव्यं हि क्रियाः कार्य्या विधानतः
इति शुद्धि ॥

तत्वं ॥ अन्यच्च श्रीभगवानु
वाच । अशोच्यानन्वशोचस्त्वं
प्रज्ञावादांश्च भाषसे । गता
सूनगतासूंश्च नानुशोचन्ति
पण्डिताः । अव्यक्तोऽयमचिन्त्यो
यमविकार्य्योऽयमुच्यते । त
स्मादेवं विदित्वैनं नानुशोचि
तुमर्हसि । अथ चैनं नित्यजा
तं नित्यं वा मन्यसे मृतं । त
थापि त्वं महाबाहो नैनं शो
चितुमर्हसि । जातस्य हि ध्रु
वो मृत्युर्ध्रुवं जन्म मृतस्य च
तस्मादपरिहार्य्येऽर्थे न त्वं शो
चितुमर्हसि । देही नित्यमव
ध्योऽयं देहे सर्वस्य भारत ॥
तस्मात् सर्व्वाणि भूतानि न
त्वं शोचितुमर्हसि । इति श्री
भगवद्गीतायां २ अध्यायः ॥

शोकनाशः पुं अशोकवृक्षः
इति राजनिर्घण्टः ॥

शोकहारी स्त्री वनबर्ब्बरिका
इति राजनिर्घण्टः ॥

शोकाग्निः पुं कदम्बवृक्षः । इ
ति शब्दचन्द्रिका ॥

शोचनं क्ली शोकः इति हेम
चन्द्रः ॥

शोचना स्त्री शोकोत्पादना

शोचिष्णु. तात उ. नप्रत्ययो ताछील्यप्रत्ययनिष्पन्ना इति सं क्षिप्तसारव्याकरणं ॥
शोचिः स्त्री प्रभा इत्यमरः ॥
शोचिष्केशः पुं अग्निः चित्र कवृक्षः । इत्यमरः ॥
शोच्यकः त्रि अधमः । क्षुद्रः इति शब्दमाला ॥
शोटीर्य्य क्ली वीर्य्यं । इति शब्दरत्नावली ॥
शोठः त्रि मूर्खः । अलसः । इति मेदिनी । धूर्त्तः । नीचः । पाप रतः । इति शब्दरत्नावली ॥
शोण ऋ गतौ । वर्णे । इति कविकल्पद्रुमः ॥ वर्णश्चेह रक्तीभावः । शोणति सन्ध्याः सं ध्यायां । इति दुर्गादासः ॥
शोणं क्ली सिन्दूरं । रुधिरं ॥ इति राजनिर्घण्टः ॥
शोणः पुं रक्तोत्पलतुल्यव र्णः । तत्पर्य्यायः । कोकनदच्छ विः २ इत्यमरः । रक्तोत्पलनि भः ३ इति शब्दरत्नावली ॥ रक्तोत्पलाभः ४ इति जटा धरः । नदविशेषः । तत्पर्य्या यः । हिरण्यवाहः २ इत्यमरः हिरण्यबाहुः ३ इति भरतः सतु अमरकण्टक देशात् पाटलि पुत्रे गङ्गया मिलितः तज्जलगु णाः । रुचिदत्वं सन्तापशोषाप हत्वं । पथ्यत्वं । वह्निकारित्वं ब लत्वं अंगपुष्टिप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अग्निः । श्यो नाकः । लोहिताश्वः ॥ कोकनदच्छदये त्रि इति मे दिनी । समुद्रविशेषः । इति धरणिः । रक्तेक्षुः । श्योनाक प्रभेदः । इति राजनिर्घण्टः ॥
शोणकः पुं श्योनाकवृक्षः ॥ इत्यमरः ॥
शोणकिणिहिका स्त्री रक्तसे हेयः । इति राजनिर्घण्टः ॥
शोणझिण्टी स्त्री कुरुबकः ॥ कण्टकिनी । इति राजनिर्घण्टः ॥
शोणपत्रः पुं रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
शोणपद्मकं क्ली रक्तकमलं इति राजनिर्घण्टः ॥
शोणपुष्पकः पुं कोविदारः ॥ इति राजनिर्घण्टः ॥
शोणपुष्पी स्त्री सिंहपुष्पी । इति राजनिर्घण्टः ॥
शोणरत्नं क्ली पद्मरागमणिः इत्यमरः ॥

शोणा स्त्री शोणवर्णयुक्ता इति जटाधरः ॥
शोणकः पुं वृक्षविशेषः । शो णा इति ख्यातः । तत्पर्य्यायः । श्योनाकः २ शुकनासः ३ ऋ क्षः ४ दीर्घवृन्तः ५ कुटन्नटः ६ अरलुः ७ स्वर्णवल्कलः ८ पूतिशाखवः ९ इति शब्दमाला मण्डूकपर्णः १० पत्रोर्णः ११ नटः १२ कट्वङ्गः १३ टुण्टुकः १४ श्योनाकः १५ अरलुः १६ इत्यमरः ॥ स्योनाकः १७ अरटुः १८ इति टीका ॥
शोणितं क्ली रक्तं । इत्यमरः ॥ तस्योत्पत्तिः गर्भस्यास्य पंचमे मासि भवति । इति सुखबोधः ॥ कुङ्कुमं । इति राजनिर्घण्टः ॥
शोणितचन्दनं क्ली रक्तचन्दनं इति राजनिर्घण्टः ॥
शोणितपुरं क्ली बाणपुरं । इति त्रिकाण्डशेषः ॥
शोणिताह्वयं क्ली कुङ्कुमं । इति रत्नमाला ॥
शोणितोत्पलं क्ली रक्तोत्पलं इति केचित् ॥
शोणी स्त्री रक्तोत्पलतुल्यवर्णा स्त्री । इति व्याकरणं जटाधरश्च ॥
शोणोपलः पुं माणिक्यं । इति राजनिर्घण्टः ॥
शोथः पुं रोगविशेषः । तत्पर्य्यायः । शोफः २ श्वयथुः ३ इत्यमरः । शोथकः ४ इति शब्दरत्नावली । अथ शोथाधिकारः । तत्र शोथस्य विप्रकृष्टनिदानमाह । शुद्ध्यामयाभक्तकृशाबलानां क्षाराम्लतीक्ष्णोष्णगुरूपसेवा । दध्याममृच्छाकविरोधिदुष्टगरोपसृष्टान्ननिषेवनञ्च । अर्शांस्यचेष्टा वपुषो ह्यशुद्धिः मर्म्मोपघातो विषमाप्रसूतिः । मिथ्योपचारः प्रतिकर्मणाञ्च निजस्य हेतुः श्वयथोः प्रदिष्टः ॥ शुद्धिर्वमनविरेकादिः । आमयाः पाण्डुरोगादयः । शाकं अभोजने आमः अपक्वो शुक्तस्यासः विष्टगरोपसृष्टान्ने पिष्टो यो गरः संयोगजं विषं तेन संसृष्टमन्नं । वपुषो ह्यशुद्धिः शोधनार्हस्य वपुषोऽशोधनं । मर्म्मोपघातः दोषकृत एव ज्ञेयः बाह्यहेतुकृतस्तु मर्म्मोपघातः आगन्तुजशोथहेतुरेव विषमाप्रसूतिः आमगर्भ ।



पतनादिका। प्रतिकर्म्मणां व
मनादिना पञ्चकर्म्मणां। मि
थ्योपचारः असम्यक्करणं
श्वयथोः शोथस्य निजस्य आ
न्तीयस्य सन्निकृष्टस्य हेतोर्वा
तादेः। हेतुः दूरेत्यसम्यगुक्तादि।
सन्निकृष्ट निदान माह दोषैः
पृथक्द्वयैः सर्वैरभिघातादि
षादपि सर्वो हेतुविशेषैस्तु रू
पभेदो नवात्मकः। संप्राप्ति
पूर्वकं सामान्यं लक्षण माह
रक्तपित्त कफान् वायुर्दुष्टो दु
ष्टान् बहिःशिराः नीत्वा रुद्धग
तिस्तैर्हि कुर्य्यात् त्वङ्मांससं
श्रयं। उत्सेधं संहतं शोथं तमा
हुर्निचयादतः। सगौरवे स्यादन
वस्थितत्वे सोत्सेध मुष्माथापि
शान्तत्वं सलोमहर्षञ्च विवर्ण
ताच सामान्यलिङ्गं श्वयथोः प
दिष्टं। उत्सेधः उन्नतत्वं किं वि
शिष्ट मुत्सेधं अतः पूर्व्वोक्ता·
न्निचयात् रक्तपित्तकफवाता
नांसमुदायात्। संहतत्वे। तनु
त्वेयं शोथ माहु निरुक्तयः॥
तस्य शोथस्य किं स्यादित्याकां
क्षायामाह। अनवस्थितत्वस्था
नानियता स्थितिः स्यादित्यर्थः

चिकित्सा व्यतिरेकेणापि निवृत्तेः
तत्स्थानवस्थितत्वे सगौरवे स्यात्
गौरव मप्यनवस्थितेस्यात् ॥
अथच सोत्सेधं स्यात् उन्नतत्व
मप्यनवस्थिते स्यादित्यर्थः॥
वातिकं शोथ माह। चरस्त
नुत्वक्परुषोऽरुणोऽसितः प्र
सुप्ति हर्षार्त्तियुतो निमित्ततः
प्रशाम्यति प्रोन्नत मेतिपीडि
तो दिवा बली स्यात् श्वयथुः
समीरणात्। चरः संचारी। प्रसु
प्तिः स्पर्शाज्ञता। हर्षोऽत्र किंचि
त्किञ्चिद्रोमाञ्चो वा आर्त्तिः पीडा।
एतद्युतः दिवाबली विकृतिविष
म समवायारब्धात्। अतएवो
क्तं चरकेण। स्नेहोष्ण मर्दनाद्यै
र्यः प्रशाम्येत् सच वातिकः। य
श्चाप्यरुणवर्णः स्यात् शोथो
नक्तं प्रशाम्यति। पैत्तिकमाह
मृदुः सगन्धोऽसित पीतरागवा
न् भ्रमज्वरस्वेदतृषा मदान्वि
तः य उष्यते स्पर्शरुगक्षिरागा
कृत् सपित्तशोथो भृशदाह
पाकवान् उष्यते संतप्यते भृश
दाह पाकवान् भृशदाहो।
सः पाकसंयुक्तः ॥
श्लैष्मिकमाह। गुरुः स्थिरः पाण्डु

रवाचकान्वितः प्रसेकनिद्रा
वमिवह्निमान्द्यकृत् सकृच्छ्र
जन्मप्रशमो निपीडितो नचोन्न
मेद्रात्रिबली कफात्मकः। द्वन्द्व
जमाह। निदानाकृति संसर्गा
द्द्वन्द्वेयः शोथो द्विदोषजः॥
सान्निपातिक माह सर्वाकृतिः
सन्निपाताच्छोथो व्यामिश्रल
क्षणः व्यामिश्रलक्षण इत्युक्ते
सर्वाकृति रिति उक्तेवातजादि
शोथसकललक्षण नियमार्थं
अभिघातज माह। अभिघाते
न शस्त्रादि च्छेद भेद क्षतादि
भिः हिमानिलोदध्यनिलै र्भ
ल्लात कपिकच्छुजे रसैः स्पृ
केश्च संस्पर्शात् श्वयथुः स्या
द्विसर्पवान् भृशोष्मा लोहिता
भासः प्रायशः पित्तलक्षणः छे
दः खड्गादिना भेदः पाषाणादि
ना क्षतं शरादिना नाडीव्रणादि
च। आदि शब्देन लगुड प्रहारा
दि गृह्यते भल्लातजे रसैः। क
पिकच्छुजैः स्पृक्कैः। विसर्पवा
न् प्रसरणशीलः पित्तलक्षणः
पैत्तिकशोथलक्षणः। विषज
माह विषजः सविषप्राणिप्र·
विसर्पणा मूत्रणात् दंष्ट्रा दंत·

नखाघातात् विषप्राणिना मपि
विण्मूत्र शुक्रोपहत मलवद्वस्त्र
संकटात् विषवृक्षानिलस्पर्शा
त् गरयोगावचूर्णनात् मृदुश्च
लोऽवलम्बी च शीघ्रो वक्रुरुगा
करः परिसर्पणं शरीरोपरि संच
रणं। दंष्ट्रा दंष्ट्रणी कृता दंताव
ली चौं ह इति लोके दंता अग्रे
भवाः। अविष प्राणिना मपीत्य
नेन दंष्ट्रादंत नखानां स्वभावा
देव सविषत्वमुक्तं किंतु सर्पा
दिविषं मारकं भवति अविष
प्राणिनां दंष्ट्रादिविषं शोथस्य
घातकं भवतीति विशेषः
विण्मूत्रेत्यादि विडाद्युपहतं म
लिनञ्च यद्वस्त्रं। तथा संकरः
संमार्जनीनिःक्षिप्तो धूल्यादिः
तेषां संपर्कात् गरयोगावचू
र्णनात् गरः संयोगजं विषं त
स्य योगो यस्तेन वस्त्रेनाव
धूननात् अवलम्बी लम्बमानः
अत्र मप्यागन्तुज स्यापि सा
मान्यागन्तुजशोथ चिकित्सातोः
सविशेषचिकित्साभिधानात्
पृथक् पठितः। यत्र स्थिता दो
षाः यत्र शोथं कुर्वन्ति तदाह दो
षाः श्वयथुं मूर्द्धि कुर्वन्त्यामा



शयेस्थिताः पित्ताशयस्था मध्ये
त्वर्द्धस्थानगतास्त्वधः कृत्स्ने दे
हस्थानुगाः कुर्य्युः सर्व्वसरं तथा
ऊर्द्ध उरः प्रभृत्यूर्द्ध । मध्ये पक्वा
शयमध्ये । अधः पक्वाशयाद
धः । उपद्रवानाह । श्वासः पि
पासा च्छर्दिश्च दौर्ब्बल्यं ज्वर
एव च । यस्य चान्ने रुचि र्नास्ति
शोथिनं तं विवर्ज्जयेत् ॥ क
ष्टसाध्यत्वादिकमाह । योमध्य
देशे श्वयथुः सकष्टः सर्व्वगश्चयः
अर्द्धाङ्गगः रिष्टभूतस्तु यश्चोर्द्ध
परिसर्पति । मध्यदेशः उरः प
क्वाशयमध्ये । सर्व्वगः सकल
शरीरभवः । सर्व्वत्र इति पाठे
सान्निपातिकः । अर्द्धाङ्गे अर्द्धना
रीश्वराकारे यश्चोर्द्धं परिसर्प
तीति पुरुषविषये । तथा च
ऊर्द्धगामी नरं पद्भ्यां मध्यगा
मी प्रत्यात् स्त्रियं । उभयं वस्ति
संजातः शोथो हन्ति न संशयः ।
ऊर्द्धगामी मुखगामी तथा च
तेजोऽन्तरे पादप्रवृत्तः श्वयथु र्न
णं यः प्राप्नुयान्मुखं इति । स
नरं हन्तीति शेषः । मुखगामी
पादगामी तथा च तेजोऽन्तरे ।
स्त्रीणां वक्त्रात् पदं याति वस्ति
जस्तु न सिध्यतीति । उभयं नरं
नारीञ्च अपरञ्च । अनन्योपद्रव
कृतः शोथः पदात्समुत्थितः ।
पुरुषं हन्ति नारीं मुखजो वस्ति
जो द्वयं । अयमर्थः । पादसमु
त्थितः पादाभ्यां समुत्थितो मुख
गामीति यावत् शोथः पुरुषं
हन्ति सर्व्वविशिष्टः अनन्योप
द्रवकृतः शोथादन्ये व्याधयो
नोक्तारे अहरणाद्याः प्रभृतयः
तेषामुपद्रवैः कृतः । तदुपद्र
वेणाजात इत्यर्थः । अन्योपद्रवकृ
तः । अनन्योपद्रवकृतः । अर्थात्
स्वहेतुभि रेव जातः । शोथव्या
धिरेव न तु मल ज्वरजः अथवा
जातः पदगामीति यावत् ना
रीं हन्ति सोप्यनन्योपद्रवकृतए
व ॥ वस्तिजः द्वयं पुरुषं नारीं
च हन्ति सोप्यनन्योपद्रवकृत
एव । अथ शोथस्य चिकि
त्सा । शुण्ठी पुनर्नवैरण्डपञ्च
मूली शृतं जलं । वातिकस्य
शोथस्य शस्तं पानाहार परिग्रहैः
पटोल त्रिफलारिष्टदार्वीक्वा
थः सगुग्गुलुः हन्ति पित्तकृ
तं शोथं तृष्णा ज्वर समन्वितं
स्नुक्क्षीर भावितां कृत्वा ।

पथ्यां स्नुहेणा वा मूत्रः योजि
ताः शमयेत्साशु शोथं श्लेष्मस
मुत्थिते । मिश्रे मिश्रक्रिया
कुर्य्यात् सर्व्वजे सर्व्वमेव हि
विल्वपत्ररसे पूते शोषणं त्रि
भेद पिवेत् । शोथे त्वागन्तुजे
कुर्य्यात् सेक लेपादि शीत
ले भल्लातकाहते कोष्ठस्त
तिला कृष्णमृत्तिका । महि
षानवनीतञ्च लेपात् शमयति
तान्वितं । अत्र दुग्धं माहिषा
एव । यत्नाह । महिषीक्षीर सं
पिष्टे नवनीत समन्वितैः तिलै
र्लिप्तः शमं याति शोथो भल्लात
कोत्थितः ॥ यष्टि दुग्ध तिलै
र्लेपो नवनीतेन संयुतः ॥
शोथं मारुष्करं हन्ति चूर्णैः शा
लदहस्य च । विषजशोथचि
कित्सा तु विषचिकित्सायां द्र
ष्टव्या । अथ सामान्यचिकि
त्सा । पथ्या निशा भार्गीमृता
ग्नि दार्वी पुनर्नवादारुमहौष
धञ्च । क्वाथं पिबेदोदरपाणि
पादमुखाश्रितं हंसि चिरेण शो
थं पथ्यादिक्वाथः । फलत्रिको
द्भवं क्वाथं गोमूत्रेणैव साधये
त् वातश्लेष्मभवं शोथं हन्याद्दूष
गा
संभवे । वृश्चीव देवद्रुमनागरे
ण्डैस्ती त्रिवृद्वूषणचूर्णकैर्वा
दुग्धं सुसिद्धं विधिना निपीतं
गीतं परं शोथहरं भिषग्भिः
वृश्चीवः वर्षाभूः । केश स्तथा
के वर्षाभू । निम्बक्वाथेन शोथ
हृत् । गोमूत्रेणापि कुर्व्वीतस्व
दोस्सेनावसेचने । पुनर्नवाद
शुण्ठी त्रिवृत्सिद्धार्थकास्तथा
अर्कपिष्टः सर्व्वसोऽयं प्रलेपः
सर्व्वशोथप्रहृत् । गुडार्द्रकं वा
गुडनागरं वा गुडाभयां वा गुडपि
प्पलीं वा । कर्षाभिवृद्ध्या त्रिप
लप्रमाणं खादेन्नरः पक्ष मथा
पि मासं शोथ प्रतिश्याय ग
लास्यरोगान् सश्वास कासा
रुचि पीनसादीन् जीर्णज्वरा
र्शोग्रहणी विकारान् हन्यात्त
थान्यान् कफवात रोगान् ॥
विसं गुडेन तुल्यं वृश्चीवकस्तु
पानमभ्यस्तं । विनिहन्ति सर्व्वशो
थं सनतं वाणवायुरिव । कणा
नागरजे चूर्णं सगुडे शोथ ना
शने आमाजीर्ण प्रशमने शूल
घ्ने वस्तिशोधने । गुडात्पलत्र
यं ग्राह्यं शृङ्गवेरं पलत्रयं ।
शृङ्गवेरसमा कृष्णा लोहकिट्ट

तिलयोः पले। चूर्णमेतत्समु
द्दिष्टं सर्व्वश्वयथुनाशनं गुडा
दिवटिका। मानकक्वाथक
ल्काभ्यां घृतप्रस्थं विपाचयेत्
एकजं द्वन्द्वजं शोथं त्रिदोष
ञ्च व्यपोहति। मानकघृतं॥
शुष्कमूलक वर्षाभू दारुरा
स्ना महौषधैः पक्वमभ्यञ्ज
नात्तैलं सशूलं श्वयथुं हरेत्
शुष्कमूलकतैलं इति शोथा
धिकारः इति भावप्रकाशः।
शोथकः पुं शोथः। इति
शब्दरत्नावली॥
शोथघ्नी स्त्री पुनर्णवा इत्य
मरः। शालपर्णी इति राज
निर्घण्टः। शोथनाशके त्रि।
शोथजित् पुं भल्लातकः॥
इति त्रिकाण्डशेषः॥
शोथजिह्वः पुं पुलकिका इति
त्रिकाण्डशेषः॥
शोथहृत् पुं भल्लातकः। इति
रत्नमाला। शोथहारके त्रि।
शोधकं क्ली कङ्कुष्ठं इति राज
निर्घण्टः। शुद्धिकारके त्रि।
यथा। महाकालपत्रः शुद्धेन
मेरुकूलसु यावनः शालेभ
वाककुक्कुलकर्केन्तु शोधकः हरीतकी शोधने ॥

इति प्रायश्चित्ततत्त्वधृत वि
श्वामित्रवचनं॥
शोधनं क्ली शोधे। इति शु
यथार्थ्य दर्शनात्। विष्ठा।
इति शब्दचन्द्रिका। काशीसे।
इति राजनिर्घण्टः। विहिता वि
हितमासादिविचारणं। यथा।
सूर्य्यग्रहणकालेन समानोनास्ति
कश्चन। तत्र यत्कृतं सर्व्व
मनन्तफलदं भवेत्। नमासति
थिवारादि शोधनं सूर्य्यपर्व्वणि
इति मलमासतत्त्वं। धातुनि
र्दोषीकरणं। यथा पत्तलीकृ
तपत्राणि हेम्नो वह्नौ प्रता
पयेत्। निषिञ्चेत्तप्ततप्तानि
तैले तक्रे च काञ्जिके गोमूत्रे
च कुलत्थानां कषाये तु त्रि
धा त्रिधा। एवं हेम्नः परेषाञ्च
धातूनां शोधनं भवेत्॥
व्रणादिपरिष्करणं। यथा व्रण
स्य विशुद्धस्य क्वाथः शुद्धि
करः परः। पटोल निम्बपत्रस्य
क्वाथेनैव प्रयुज्यते। नालिकेरदश
मूलानां क्षीरिणां पैत्तिके व्रणे
आरग्वधादेः कफजे कषायः
शोधने हितः॥ अपिच प्र

वर्त्तैर्नाडिकेन वा। अथवा
क्वाथनैनेव क्लिन्नमुस्तोदके
वदेत्। श्लेष्मामवात मेदोघ्नञ्च
स्निशोधनं दीपनं। इति चभा
वप्रकाशः। लिखितपत्रादेः
प्रमाणीकरणं। यथा। ले
ख्यं शोधनमाह कात्यायनः
स्वहस्तलेख्यं सन्देहे जीवतो
ह्यात्मनश्च तत् स्वहस्तकृतै
श्चैः पत्रैर्लेख्यं निर्णयः॥
विरुद्धलिखितस्य शुद्धीकरणं
यथा। तच्छोधनमाह बृहस्प
तिः न्यूनाधिके पूर्वपक्षेनाव
द्धादौ विशोधयेत्। न दद्यादु
त्तरं यावत् प्रत्यर्थी सभ्यसन्नि
धौ। कात्यायनः शोधयेत् पू
र्वपक्षन्तु यावन्नोत्तरदर्शने॥
उत्तरेणावरुद्धस्य निवृत्ते शो
धनं भवेत्। इति व्यवहार
तत्त्वं॥ ऋणकस्य हरणं यथा
भाज्याहरः शुद्धाति यद्गुणः
स्यादृण्मात् फलेनैत् रविसुभा
गाहारे समेन केनाप्यपवर्त्त्य
हार भाज्यौ भवेद्वा सति।
सम्भवे तु॥ इति ली
लावती। अथन् शुद्धि
शब्दे द्रष्टव्यं॥

शोधनः पुं निकुञ्चकः। इति राज
निर्घण्टः॥
शोधनः त्रि शुद्धिकारकः। य
था। तैल सैन्धव षष्टाक निव
पत्र निष्क्रयगैः। त्रिवृद्यवयुतैः
निष्टैः प्रलेपो व्रणशोधनः।
इति भावप्रकाशः॥
शोधनी स्त्री संमार्ज्जनी। इत्य
मरः। ताम्रवल्ली। नीली। इति
राजनिर्घण्टः॥
शोधनीयः त्रि शोधितव्यः
शोध्यः। शुध्यातो रनीय प्र
त्ययेन निष्पन्नः॥
शोधनीबीजं क्ली जयपालः
इति राजनिर्घण्टः॥
शोधितं त्रि मलिकाद्यपनय
नेनकृतशोधनं धौजनादिः। त
न्यर्थ्यायः। संसृष्टं २ इत्यमरः
भरतो ग्रपिच धौजनेनकणकी
टादि शुद्धे संसृष्ट शोधिते।
इति शब्दरत्नावली। अपनी
तमले तत्पर्य्यायः निर्णिक्तं २
स्पष्टं ३ निःशोध्यं ४ अनव
स्करं ५ इत्यमरभरतौ॥
शोफः पुं शोथः। इत्यमरः॥
शोफघ्नी स्त्री शालपर्णी रक्त
पुनर्णवा इति राजनिर्घण्टः॥

शोफनाशनः पुं नीलवृक्षः ॥ इति राजनिर्घण्टः । शोथघ्ना शाकेऽपि ॥

शोफहृत् पुं भल्लातकः इति भावप्रकाशः । शोथहारकेऽपि ॥

शोभने क्ली पद्मे । इति शब्दचन्द्रिका ॥

शोभनः पुं ग्रहः । इति धरणी ॥ विष्कम्भादि सप्तविंशतियोगान्तर्गत पञ्चमयोगः । इति मेदिनी तज्जातफलं स्याच्छोभनः शोभनयोगजन्मा दक्षो विपक्षप्रतिलब्धवित्तः ॥ सद्गन्धरक्षाकृतवपुः सुधीरः सम्मानयुक्तो मनुजः प्रवीणः । इति कोष्ठीप्रदीपः ॥

शोभनः त्रि सुन्दरः । इति मेदिनी । अस्य पर्यायो मनोज्ञशब्दे द्रष्टव्यः ॥

शोभनकः पुं शोभाञ्जनवृक्षः इति शब्दचन्द्रिका । शोभनकारकेऽपि ॥

शोभना स्त्री हरिद्रा गोरोचना इति राजनिर्घण्टः ॥

शोभा स्त्री शोभतेऽनया । दीप्तिः तत्पर्यायः कान्तिः २ द्युतिः ३ छविः ४ इत्यमरः । द्युती ५ छवी ६ इति तट्टीका अभिख्या ७ इति जटाधरः ॥ सुषमा ८ भाः ९ श्रीः १० भासा ११ भा १२ इति शब्दरत्नावली ॥ सुषमा १३ छाया १४ विभा १५ दृक्प्रिया १६ भानं १७ भातिः १८ कमा १९ रमा २० इति राजनिर्घण्टः ॥ तस्या लक्षणं सा शोभा रूपभोगाद्यैर्यत् स्यादङ्गविभूषणम् । शोभैव कान्तिराख्याता मन्मथाप्यायनोज्ज्वला । इत्युज्ज्वलनीलमणिः ॥ गोपीविशेषः । यथा दृष्ट्वैव शोभया गोप्या कृष्णश्चन्दनकानने सद्यो मूर्च्छामवाप ह तिरोधाने कृते तया शोभा देहं परित्यज्य जगाम चन्द्रमण्डलं । ततस्तस्याः शरीरस्थं स्निग्धं तेजो बभूव ह सविभज्य त्वयादत्तं हृदयेन विदूयता रत्नाय किञ्चित् स्वर्णाय किञ्चिन्मणिवराय च । किञ्चित् स्त्रीणां मुखाब्जेभ्यः किञ्चिद्राज्ञे च किञ्चन । किञ्चित् किसलयेभ्यश्च पुष्पेभ्यश्चापि किञ्चन । किञ्चिच्चन्दनपङ्केभ्यस्तोयेभ्यश्चापि किञ्चन किञ्चित् फलेभ्यः । शस्येभ्यः सुपक्वेभ्यश्च किञ्चन किञ्चिन्नूतनवस्त्रेभ्यो दुग्धेभ्यश्चापि किञ्चन इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ९ अध्यायः ॥ हरिद्रा गोरोचना ॥ इति राजनिर्घण्टः ॥

शोभाञ्जनः पुं वृक्षविशेषः सजिना इति भाषा तत्पर्यायः शिग्रुः २ तीक्ष्णगन्धकः ३ अक्षीवः ४ मोचकः ५ । इत्यमरः । तीक्ष्णगन्धः ६ सुतीक्ष्णः ७ स्वनपल्लवः ८ श्वेतमरिचः ९ इति जटाधरः तीक्ष्णः १० गन्धः ११ गन्धकः १२ कालीवकः १३ अक्षीवः १४ शुभाञ्जनः १५ ह्रीचित्तहारी १६ अवणनाशनः १७ इति शब्दरत्नावली कृष्णगन्धा १८ मूलकपर्णी १९ इति रत्नमाला नीलशिग्रुः २० जनप्रियः २१ मुखमोदः २२ कृष्णशिग्रुः २३ चक्षुष्यः २४ कालिकाञ्जनः २५ अस्य गुणाः तीक्ष्णत्वं कटुत्वं स्वादुत्वं उष्णत्वं पिच्छिलत्वं जन्तुवातातिशूलनाशित्वं चक्षुर्हितत्वं रोचनत्वं च । इति राजनिर्घण्टः ॥ अपि च शोभाञ्जनः कटु तिक्तः शोथ विद्रधि गुल्मनुत् इति राजवल्लभः । अन्यच्च । अथ शोभाञ्जनः श्यामः श्वेतः रक्तस्तु शोभाञ्जनः शिग्रु तीक्ष्णगन्धकाक्षीवमोचकाः तद्बीजं श्वेतमरिचं मधुशिग्रुः सलोहितः शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः । दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् । संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः चक्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन् । मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत् प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत् मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः शिग्रुवल्कलपत्राणां स्वरसः परमार्तिहृत् चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनं । अवृष्यं कफवातघ्नं तन्नस्येन शिरोर्त्तिनुत् शिग्रुशाकं हिमं स्वादु चक्षुष्यं वातपित्तहृत् तद्धरणं शुक्रहृत् स्निग्धकं च मदकृदभिसरणुत् । अस्य पुष्पगुणाः शिग्रोः पुष्पन्तु कटुकं तीक्ष्णोष्णं



से स्वादु शोथघ्नं । कृमिहृ
त्कफवातघ्नं विद्रधिप्लीहगु
ल्मजित् ॥ अस्य फलगुणाः
शोभाञ्जनफलं स्वादु कषायं
कफपित्तनुत् शूलकुष्ठक्ष
यश्वासगुल्मघ्नं दीपनं परं
इति भावप्रकाशः । अपर
क्तशोभाञ्जनपर्य्यायः । स्वा
दुशिग्रुः स्वादुगन्धा च मधुरस्तम्भु
भाञ्जनः इति रत्नमाला ॥
अन्यच्च रक्तशोभाञ्जने तस्या
मधुशिग्रु मधुद्रुमौ । इति शा
ब्दरत्नावली ॥ अस्य गुणा
णाः मधुशिग्रुः स्वदीपनः सर
कफपित्तप्रसादनः । इति भाव
प्रकाशः ॥ अन्यत् रक्तशि
ग्रुशब्दे द्रष्टव्यं ॥
शोभाली स्त्री वनहरिद्रा । इति
राजनिर्घण्टः ॥
शोषः पुं यक्ष्मरोगः क्षयामयः
शोषणं । इति मेदिनी ॥
तद्रोगस्यौषधं । यथा वचा
त्रिकटुकञ्चैव करञ्जं देवदा
रु च मञ्जिष्ठा त्रिफला श्वेताशि
रीषरजनीद्वयं हिङ्गु निम्ब
त्रिकटु गोमूत्रेणावघर्षितं । न
स्यमालेपनञ्चैव स्नानमुद्व
र्त्तनं तथा अपस्मारविषो
न्मादशोषालक्ष्मीज्वरापहं
भूतेभ्यश्च भयं हन्ति राजद्वा
रे च शस्यते । इति गारुडे
१९६ अध्यायः ॥
शोषणं क्ली रसाकर्षणं शो
षणं इति भाषा तत्पर्य्यायः ।
रसादानं २ इति हेमचन्द्रः । स्वेद
राहित्यकरणं यथा शोषणे
न शरीरस्य तपसाध्ययनेन च
पापकृन्मुच्यते पापाद्दानेन च
दमेन च । इति प्रायश्चित्ततत्त्वे
शुण्ठी इति राजनिर्घण्टः ॥
शोषणः पुं कामदेवस्य बाण
विशेषः यथा उन्मादनः शोष
णश्च तापनः स्तम्भनस्तथा
इति जटाधरः श्योनाकवृक्षः
इति भावप्रकाशः ॥
शोषसम्भवं क्ली पिप्पलीमू
लं । इति राजनिर्घण्टः ॥
शोषापहा स्त्री क्षीरतनके । इ
ति राजनिर्घण्टः शोषनाशके
त्रि शोषितः त्रि कृतशोषणः ।
यथा आतापिर्भक्षितो येन वा
तापिश्च महासुरः समुद्रः शो
षितो येन स मेऽगस्त्यः प्रसी
दतु इति मलमासतत्त्वे ॥

शौकरं क्ली शूकराणां समूहः
स्त्री शौकरणं । इति मेदिनी ।
शौकरवं क्ली तीर्थविशेषः ।
शौकरवे यथा । वराह उवाच ।
शृणु मे परमं गुह्यं यत्त्वयापरि
पृच्छितं । स्नानं तत्र परञ्चैव शुद्धे
भागीरथि प्रिये । परं कोकामु
खे स्थाने तथा कुब्जाम्रकेप
रे । परं शौकरवे स्थाने सर्वसं
सारमोक्षणं । यत्र संस्था च
मे देवि समुद्धृता रसातलात्
अत्र भागीरथी गङ्गा मम शौकर
वे स्थिता धरण्युवाच ॥
देवलोकेषु यानीह शौकरवे
ये मृताः प्रभो । किं वा पुण्य
भवेत्तेन स्नातस्य पिबतस्तथा
कति तीर्थानि शालास्तेत्रे शौ
करवे तव । यस्मिन् संस्थापनाश्चा
प नहि लोकमर्हसि ॥ वरा
ह उवाच ॥ शृणु तत्त्वेन मे देवि
यन्मां परिपृच्छसि ॥ कान
ति ते प्रपद्यन्ते नराः शौकरवे
मृताः ॥ तेषां स्नानस्यैव पुण्य
गतस्यैव मृतस्य वा तत्र योनि
च तीर्थानि मम संस्थान संस्थि
ताः । शृणु पुण्यं महाभागे म
म चैतेषु सुन्दरि ॥
प्राप्नुवन्ति महाभागे गत्वा शौ
करवे प्रति । दश पूर्वापरांश्चा
पि पुरुषान् सप्तपञ्च च । स्वर्गं
गच्छन्ति तेनत्र ये मृतास्तेषु ज
नवः गमनादेव शौकरत्व
स्य मदर्शनात् सप्तजन्मान्त
रे श्रेष्ठे जायते विपुले कुले ।
धनधान्यसमृद्धेषु रूपवान्
गुणवान् शुचिः । मद्भक्तश्चै
व जायेत मम कर्मपरायणः
एवं वै मानुषो भूत्वा अपराधवि
वर्जितः गमनं तस्य क्षेत्रस्य
मरणेन तु कारणं ॥ ये मृता
स्तत्र सुश्रोणि क्षेत्रे शौकर
वे मम । शङ्खचक्रगदापद्म
चतुर्हस्ताश्चतुर्भुजाः ॥ त्यक्त्वा
कलेवरं तत्र मम लोकाय ग
च्छन्ति इति वाराहे शौकरव
तीर्थमाहात्म्य आदित्यवर
प्रदान गृध्र जम्बुकोपाख्या
नं नामाध्यायः ॥
शौक्तिकेयं क्ली मुक्ता इति
राजनिर्घण्टः ॥
शौक्तेयं क्ली मुक्ता इति रा
जनिर्घण्टः शुक्तिसम्बन्धिनि
त्रि शौक्ल्यं क्ली शुक्लता य
था पलितं जरसा शौक्ल्यं के

प्रणादौ विस्रसा जरा इत्यमरः ॥
शौचं क्ली शुचिता शुचित्वं ।
शुद्धिः । तस्य लक्षणादि यथा
अभक्ष्य परिहारश्च संसर्गश्चाप्य
निन्दितैः । स्वधर्म्मे च व्यव
स्थानं शौचमेतत् प्रकीर्त्तितं ॥
इत्येकादशीतत्त्वे बृहस्पतिव
चनं ॥ अन्यच्च । सर्वेषामेव
शौचानामर्थशौचं विशि
ष्यते योऽर्थे स शुचिः शौ
चान्न मृदा वारिणा शुचिः ॥
सत्यशौचं मनःशौचं शौच
मिन्द्रियनिग्रहः । सर्वभूतदया
शौचं जलशौचन्तु पञ्चमं ॥
यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो
न दुर्लभः । इति गारुडे ९९
अध्यायः । अपिच यावता शु
द्धिं मन्येत तावच्छौचं समा
चरेत् । प्रमाणं शौचसंख्या
या न शिष्टैरुपदिश्यते ॥
शौचञ्च द्विविधं प्रोक्तं बाह्य
माभ्यन्तरं तथा । मृज्जलाभ्यां
स्मृतं बाह्यं भावशुद्धिस्तथान्त
रं ॥ इति गारुडे २२४ अ
ध्यायः ॥ मृदादि शौचगुणा
यथा शौचं पवित्रमायुष्य
मलक्ष्मीकलिनाशनं पादयो

र्मलमार्गाणां शौचाधानमग्नी
नाञ्च । इति राजवल्लभः ॥
अपिच उद्धृताम्भो मृत्तिकाभ्या
मिन्द्ये नारद यत्नतः कृत्वास्त
गे ततः कुर्य्यात् शौचं मूत्रपु
रीषयोः । इति पद्मोत्तरखण्डे ।
९९ अध्यायः ॥ अशौचादशौ
चेऽत्राह लिख्यते व्यास उवाच ।
दशाहं प्राहुराशौचं सपिण्डेषु
विपश्चितः । मृतेषु वाथ जातेषु
ब्राह्मणानां द्विजोत्तमाः । नि
त्यानि चैव कर्म्माणि काम्यानि
च विशेषतः । न कुर्य्याद्विहितं
किञ्चित् स्वाध्यायं मनसापि च
शुचीननियतांस्त्वस्मान् शाला
ग्नौ हावयेद्द्विजान् ॥ शुष्कान्ने
न फलैर्वापि वैतानान् जुहुया
त्ततः । न स्पृशेयुरिमानन्ये
न च तेभ्यः समाहरेत् । चतुर्थे प
ञ्चमे वाह्नि संस्पर्शः कथितो बु
धैः । सूतके तु सपिण्डानां संस्प
र्शो न प्रदुष्यति । सूतकं सू
तिकां चैव वर्ज्जयित्वा नृणां पु
नः ॥ दशाहं निर्गुणे प्रोक्तं म
शौचं चाति निर्गुणे । एक द्वि
त्रिगुणैर्युक्ते चतुस्त्र्येकदिनैः
शुचिः ॥ दशाहादनुपरं सम्यग्

स्वध्यायीयीत जुहोति च चतुर्थे
तस्य संस्पर्शो मनुः प्राह प्रजाप
तिः । क्रियाहीनस्य मूर्खस्य म
हारोगिण एव च यथेष्टाचरण
स्याहुर्मरणान्तमशौचकं ॥
त्रिरात्रे दशरात्रे वा ब्राह्मणानां तु
शावके प्राक्संस्कारात् त्रिरा
त्रे स्याद्दशस्युर्दशाहकं ॥ ऊन
द्विवार्षिके प्रेते मातापित्रोस्त
दिष्यते । त्रिरात्रेण शुचिस्त्वन्यो
यदि ह्यत्यन्तनिर्गुणः । आदन्त
जातमरणे पित्रोरेकाहमिष्य
ते । जातदन्ते त्रिरात्रं स्याद्यदि
स्यातां तु निर्गुणौ । आदन्तज
ननात् सद्य आचूडादेकरात्रकं
त्रिरात्रमोपनयनात् सपिण्डा
नामुदाहृतं जातमात्रस्य बाल
स्य यदि स्यान्मरणं पितुः । सद्यः
शौचं सपिण्डानां कर्त्तव्यं सोद
रस्य च ऊर्द्ध्वं दशाहादेकाहं सो
दरो यदि निर्गुणः ॥ अथो
र्द्ध्वं दन्तजननात् सपिण्डानाम
शौचकं एकाहं निर्गुणानां तु
चूडार्द्ध्वं त्रिरात्रिकं । अदन्त
जातमरणं सम्भवेद्यदि सत्तमाः
एकरात्रं सपिण्डानां यदि ते
ऽत्यन्तनिर्गुणाः । व्रतादेशात्

सपिण्डानामर्वाक् स्नानं वि
धीयते सर्वेषामेव गुणिनामूर्द्ध्व
न्तु विषमं पुनः ॥ अर्वाक् षण्मा
सतः स्त्रीणां यदि स्याद्गर्भसंस्र
वः । तदा माससमैस्तासामशौ
चं दिवसैः स्मृतं अत ऊर्द्ध्वं तु पत
ने स्त्रीणां स्याद्दशरात्रकं । सद्यः
शौचं सपिण्डानां गर्भस्राव
स्य वा ततः । गर्भच्युतावहोरात्रं
सपिण्डेऽत्यन्तनिर्गुणे । यथेष्ट
चारिणो ज्ञाता त्रिरात्रमिति नि
श्चयः ॥ यदि स्यात् सूतके
सूतिर्म्मरणे वा मृतिर्भवेत्
शेषेणैव भवेच्छुद्धिरहः शेषे
त्रिरात्रकं मरणोत्पत्तियोगे
तु मरणाच्छुद्धिरिष्यते ॥
अथ वृद्धिमदाशौचमूर्द्ध्वं चेन्मे
न शुद्ध्यति । अथ चेत् पञ्चमीरा
त्रिमतीत्य परतो भवेत् अ
घवृद्धिमदाशौचं तदा पूर्व्वेण
शुद्ध्यति । देशान्तरगतं श्रुत्वा
सूतकं शावमेव तु । तावद
प्रयतो मर्त्यो यावच्छेषः समा
प्यते । अतीते सूतके प्रोक्तं
सपिण्डानां त्रिरात्रकं तथै
व मरणे स्नानमूर्द्ध्वं संवत्सरा
द्यदि वेदार्थविद्योपासनो




ग्निमान् वृत्तिकर्षितः सद्यःशौ
चे भवेत्तस्य सर्व्वस्यात् सर्व्व
दा। स्त्रीणामसंस्कृतानान्तु प्रदा
नात् परतः सदा सपिण्डानां त्रि
रात्रं स्यात् संस्कारो भर्तुरेव च
अहस्त्वदत्तकन्यानामशौचं म
रणे स्मृतं ऊनद्विवर्षान्मरणे
सद्यःशौचमुदाहृतं। आदन्त
जन्मादेकमथ आचौलादेकरात्र
कं। आप्रदानात् त्रिरात्रं स्या
द्दशरात्रं मतः परं॥ मा
तामहानां मरणे त्रिरात्रं स्या
दशौचकं। एकोदकानां मर
णे सूतके चैतदेव हि पक्षि
णी योनिसम्बन्धे बान्धवेषु तथै
व च एकरात्रं समुद्दिष्टं गुरौ स
ब्रह्मचारिणि। प्रेते राजनि स
ज्योतिर्यस्य स्याद्विषये स्थितिः
गृहे मृतासु दत्तासु कन्यका
सु त्र्यहं पितुः। परपूर्वासु भार्य्यासु
पुत्त्रेषु कृतकेषु च। त्रिरात्रं
स्यात्तथाचार्य्ये स्वभार्य्यास्वन्य
गासु च। आचार्य्यपुत्त्रे पत्न्यां च
अहोरात्रमुदाहृतं एकाहं
स्यादुपाध्याये स्वग्रामे श्रोत्रियेऽ
पि च त्रिरात्रमसपिण्डेषु स्व
गृहे संस्थितेषु च एकाहस्त्वस्व

श्रुते स्यादेकरात्रं च शिष्यके
त्रिरात्रं श्वश्रुमरणे श्वशुरे चैत
देव हि सद्यःशौचं समुद्दिष्टं स्व
गोत्रे संस्थिते सति॥ शुद्ध्येद्वि
प्रो दशाहेन द्वादशाहेन भूमि
पः। वैश्यः पञ्चदशाहेन शूद्रो
मासेन शुद्ध्यति॥ क्षत्त्र वि
ट्शूद्रदायादा ये स्युर्विप्रस्य बा
न्धवाः। तेषां सशौचे विप्रस्य
दशाहाच्छुद्धिरिष्यते॥ राज
न्यवैश्यावप्येवं हीनवर्णासु यो
निषु। स्वमेव शौचं कुर्व्वीतां
विशुद्ध्यर्थमसंशयः सर्व्वे तूत्त
मवर्णानां शौचं कुर्य्युरतन्द्रि
ताः तद्वर्णविधिदृष्टेन स्वन्तु
शौचं स्वयोनिषु। षड्रात्रं वा त्रि
रात्रं स्यादेकरात्रं क्रमेण तु वै
श्य क्षत्त्रिय विप्राणां शूद्रेष्वा
शौचमेव तु। अर्द्धमासोऽथ ष
ड्रात्रं त्रिरात्रं द्विजपुङ्गवाः शूद्र
क्षत्त्रिय विप्राणां वैश्येष्वाशौ
चमिष्यते षड्रात्रं द्वादशाहं च
विप्राणां वैश्य शूद्रयोः॥ अ
शौचं क्षत्त्रिये प्रोक्तं क्रमेणा द्विज
पुङ्गव। शूद्र विट् क्षत्त्रियाणान्तु
तु ब्राह्मणे संस्थिते सति दश
रात्रेण शुद्धिः स्यादित्याह काम

लोद्भवः॥ असपिण्डं द्विजं प्रे
तं विप्रो निर्हृत्य बन्धुवत् अ
शित्वा च सहोषित्वा दशरात्रे
ण शुद्ध्यति। यद्यन्नमत्ति
तेषान्तु त्रिरात्रेण ततः शुचिः। अ
न्नदन्नन्नमह्नैव न च तस्मिन् गृ
हे वसेत्। सोदकेष्वेतदेव स्या
न्मातुराप्तेषु बन्धुषु। दशाहेन
शवस्पर्शी सपिण्डश्चैव शुद्ध्य
ति षड्रात्रेणाथवा सर्व्वे त्रिरात्रे
णाथवा पुनः। अनाथञ्चैव
निर्हृत्य ब्राह्मणं धनवर्जितं॥
स्नात्वा संप्राश्य तु घृतं शुद्ध्यन्ति
ब्राह्मणादयः॥ अवरश्चेद्वरं व
र्णमवरं वा वरो यदि। अशौ
चे संस्पृशेत् स्नेहात्तदाशौचेन
शुद्ध्यति॥ प्रेतीभूतं द्विजं विप्रो यो
ऽनुगच्छति कामतः। स्नात्वा सचै
लं स्पृष्ट्वाग्निं घृतं प्राश्य विशुद्ध्य
ति एकाहात् क्षत्त्रिये शुद्धिर्वै
श्ये स्याद् द्व्यहेन तु। शूद्रे दि
नत्रयं प्रोक्तं प्राणायामशतं
पुनः॥ अनस्थिसञ्चिते
शूद्रे रौति चेद्ब्राह्मणः स्वकैः
त्रिरात्रं स्यात्तथाशौचं मेका
हं त्वन्यथा स्मृतं। अस्थि

सञ्चयनादर्व्वागेकाहं वैश्यशू
द्रयोः अन्यथा चैव सज्योति
र्ब्राह्मणे स्नानमेव तु अनस्थि
सञ्चिते विप्रे ब्राह्मणो रौति
चेत्तदा स्नानेनैव भवेच्छुद्धिः
सचैलेन न संशयः॥ यस्तैः
सहाशनं कुर्य्याच्छयनादीनि
चैव हि बान्धवो वा परो वापि
स दशाहेन शुद्ध्यति॥ य
स्तेषामन्नमश्नाति सकृदेवा
पि कामतः तदाशौचे निवृत्ते
सौ स्नानं कृत्वा विशुद्ध्यति। या
वत्तदन्नमश्नाति दुर्भिक्षोपहृ
तो नरः तावन्त्यहान्यशौचं स्या
त् प्रायश्चित्तं ततश्चरेत्॥ दाहा
द्यशौचं कर्त्तव्यं द्विजानामग्नि
होत्रिणां सपिण्डानान्तु मर
णे मरणादितरेषु च। सपि
ण्डता तु पुरुषे सप्तमे विनिव
र्त्तते। समानोदकभावस्तु ज
न्मनाम्नोरवेदने। पिता
पितामहश्चैव तथैव प्रपि
तामहः। लेपभाजश्चतुर्थाद्याः
सापिण्ड्यं साप्तपौरुषं। अप्र
त्तानां तथा स्त्रीणां सापिण्ड्यं सा
प्तपौरुषं ऊढानां भर्तृसापि
ण्ड्यं प्राह देवः पितामहः। ये चै



कजाता बहवो भिन्नयोनय
एवच भिन्नवर्णास्तु सापिण्ड्यं
भवेत्तेषां त्रिपौरुषं । कारवः
शिल्पिनो वैद्या दासी दास
स्तथैवच दातारो नियमी चै
व ब्रह्मविद्ब्रह्मचारिणौ सत्रि
णो व्रतिनस्तावत् सद्यःशौचा
उदाहृताः राजा चैवाभिषिक्त
श्च विप्राः सत्रिण एवच यज्ञे वि
वाहकाले च देवयोगे तथैव
च सद्यःशौचं समाख्यातं उ
पप्लवे चाप्युपद्रवे डिम्बाहवहता
नां च विद्युता पार्थिवैर्द्वि
जैः । सद्यःशौचं समाख्यातं
सर्पादिमरणे तथा अग्नौ म
रुत्प्रपतने वीराध्वन्यप्यनाशके
ब्राह्मणार्थे च संन्यस्ते सद्यः
शौचं विधीयते । नैष्ठिका
नां वनस्थानां यतीनां ब्रह्मचा
रिणां । नाशौचं कीर्त्यते सद्भिः
पतिते च तथा मृते । पतिता
नां न दाहः स्यान्नान्त्येष्टि
र्नास्थिसञ्चयः न चाश्रुपातः पि
ण्डौ वा कार्य्यं श्राद्धादिकं क्व
चित् । व्यापादयेत्तथात्मानं स्व
यं योऽग्निविषादिभिः । विहितं
तस्य नाशौचं नाग्निर्नाप्युद-
कादिकं ॥ अथ कश्चित् प्रमादेन
म्रियतेऽग्निविषादिभिः । तस्या
शौचं विधातव्यं कार्य्यं चैवोद
कादिकं । जाते कुमारे तदहः
कामं कुर्य्यात् प्रतिग्रहं हिरण्य
धान्य गो वासस्तिलान्न गुड
सर्पिषां । फलानि पुष्पं शा
कञ्च लवणं काष्ठमेव च तोयं
दधि घृतं तैलमौषधं क्षीरमेव
च । आशौचिनां गृहाद्ग्राह्यं शु
ष्कान्नमेव नित्यशः ॥
इति कौर्म्मे उपविभागे २२ ॥
अध्यायः । अन्यत् पाद्मोत्तरखण्डे
१०९ अध्याये द्रष्टव्यं ॥

शौचाचारः पुं शुद्धिकर्म्म । यथा
शौचाचारविहीनस्य समस्ता नि
ष्फलाः क्रियाः । इत्याह्निकाचा
रतत्त्वे ब्रह्मपुराणं । अन्यच्च उ
पनीय गुरुः शिष्यं महाव्याहृ
ति पूर्ब्बकं । वेदमध्यापयेदेनं
शौचाचारांश्च शिक्षयेत् ॥
इति याज्ञवल्क्यः ॥

शौचिकः पुं वर्णसङ्करविशे
षः । यथा केवर्त्तस्य च ।
कन्यायां शौण्डिकादेव शौचि
कः ॥ इति पराश
रपद्धतिः ॥

शौचेयः पुं रजकः । इति
शब्दरत्नावली ॥

शौट क्ली गर्व्वे । इति कविक
ल्पद्रुमः । चरादिं परस्मै क्लं अणु
शौटत् । शौटति वीरः । इति
दुर्गादासः ॥

शौटीरः पुं त्यागी । वीरः ॥
इत्युणादिकोषः गर्व्वान्विते त्रि
शौटयतेर्बा ईरण् प्रत्ययेन नि
पात्यः । इति सिद्धान्तकौमु-
दी उणादिवृत्तिः ॥

शौटीर्य्यं क्ली वीर्य्यं । इति शब्द
रत्नावली गर्व्वः शौटीर शा
ब्दात् भावे ष्यञ् प्रत्ययेन नि-
ष्पन्नं ॥

शौड क्ली गर्व्वे । इति कविक-
ल्पद्रुमः । चरादिं परस्मै क्लं अणु
शौडत् । इति दुर्गादासः ॥

शौण्डः त्रि मत्तः । इत्यमरः ॥

शौण्डीर्य्यं क्ली अहङ्कारः । इ
ति केचित् ॥

शौण्डिकः पुं जातिविशेषः
शुँड़ी इति भाषा । तत्पर्य्यायः ।
मण्डहारकः २ इत्यमरः ॥
शुण्डारः ३ शौण्डी ४ शुण्डकः
५ इति शब्दरत्नावली । ध्वजः ६
पानः ७ पणः ८ इति जटाध
रः । कल्यपालः ९ सुराजीवी
१० वारिवासः ११ पानवणिक्
१२ ध्वजी १३ आसुतीवलः १४
इति हेमचन्द्रः । तस्योत्पत्तिर्य
था तत्तो गान्धिककन्यायां कै
वर्त्तादेव शौण्डिकः । कैव
र्त्तस्य च कन्यायां शौण्डिका
देव शौचिकः । इति पराशर
पद्धतिः ॥

शौण्डी पुं शौण्डिकः । इति
शब्दरत्नावली ॥

शौण्डी स्त्री पिप्पली । चव्यं ।
इति विश्वः ॥

शौण्डीरः त्रि अहङ्कारी । य
था । शौण्डीरो गर्व्वितः स्तब्धो
मानी चाहङ्कृत उद्धतः उन्नीव उद्ध
तोऽहङ्कारो नीचश्च पिशुनोऽध
मः । इति धनञ्जयकोषः ॥

शौद्रः पुं द्वादशविधपुत्रान्तर्ग
तपुत्रविशेषः । सतु ब्राह्मण
क्षत्रिय वैश्यानामन्यतमात् शूद्रा
यां जातः । यथा औरसः क्षेत्र
जो दत्तो गूढोत्पन्नः कृत्रिमः
क्रीतापविद्ध कानीन शौद्र
पौनर्भवा अपि स्वयंदत्तः
सहोढोपि द्वादशैते सुताः स्म
ताः । इति जटाधरः ॥



शुद्धसंबंधिनि त्रि।
शौद्धोदनिः पुं शाक्यवंशाव
तीर्णबुद्धमुनिविशेषः। इत्य-
मरः। शुद्ध मोदनमस्य इति
मनीषादिः शुद्धोदनो नाम
राजा। तथा हि शुद्धोदनोय
तोऽथ केल्पायवत् शुद्धमोदनं
इत्यार्षाभिधाने शुद्धोदनस्या
पत्यं शौद्धोदनिः बाह्वादित्वात्
इति सिः इति भरतः॥
शौपिका स्त्री वलककणः। इ
ति हेमचंद्रः॥
शौनकः पुं मुनिविशेषः॥
यथा। सपिण्डीकरणादूर्द्धं न
दद्यात् प्रतिमासिकं। एकोद्दि
ष्टविधानेन दद्यादित्याह शौ
नकः। इति तिथ्यादितत्त्वं॥
शौण्डिकः पुं मांसविक्रयक
र्त्ता यथा वैतंसिकः कौटिक
श्च मांसिकः शौण्डिकः समाः
इति जटाधरः हेमचंद्रश्च॥
मृगया इति शब्दमाला॥
शौभं क्ली हरिश्चंद्रपुरं। इति
त्रिकाण्डशेषः। तत्पर्य्यायः।
खेचरपुरं २ इति भूरि
प्रयोगः॥
शौभः पुं देवता इति त्रि
काण्डशेषः॥ गुरुवाकः। इति
शब्दमाला॥
शौभनेयः त्रि शोभनसंबंधी।
शोभनशब्दात् स्य प्रत्ययेन-
निष्पन्नः॥
शौभाञ्जनः पुं शोभाञ्जनवृक्षः
इति भरत द्विरूपकोषः॥
शौभिकः पुं इन्द्रजालिकः॥
इति शब्दमाला॥
शौभ्रेयः त्रि शुभ्राया अपत्यं
इति मुग्धबोधव्याकरणं। शुभ्र
संबंधिनि च॥
शौरिः पुं विष्णुः। शूरस्यापत्यः
इत्यमरभरतौ॥
शौर्पिकः) त्रि शूर्पपरिमिते।
शौर्पः) शूर्पशब्दात् ठिक
प्रत्ययेन अण्प्रत्ययेनच निष्पन्नौ॥
शौर्य्यं क्ली आरभटी। शक्तिः॥
इति मेदिनी॥
शौल्कं त्रि शुल्कसंबंधी शुल्क
शब्दात् अण् प्रत्ययेन निष्पन्नं॥
शौल्किकः पुं शुल्काध्यक्षः॥
इति हेमचंद्रः॥
शौल्किकेयः पुं विषभेदः। इत्य
मरः। शुल्किका देशभेदस्तत्र
भवः शौल्किकेयः। ढेयः ता
लव्यादिः इति भरतः॥

शौल्विकः पुं कंशकारः कां
सारि इति भाषा तत्पर्य्यायः॥
ताम्रकुट्टकः २ इत्यमरः कांस
कमी ३ कांस्यकारः ४ इति ज
टाधरः। ताम्रिकः ५ ताम्रका
रकः ६ इति शब्दरत्नावली॥
शौवं क्ली शुनः संकोचः। शु
नां वृन्दं। श्वाभवे इति संक्षि
प्तसारव्याकरणं॥
शौवनं क्ली शुनोभावः। शुनो
ऽपत्यं। इति संक्षिप्तसारव्या
करणं॥
शौवस्तिके त्रि श्वोविदिनस्था
यि वस्तु यथा श्वात्मक्षयिते-
पिशिते नैराण्णफलेग्रहीन् हे
ह्रिवनस्पतीनां। शौवस्तिकत्वं
विभवा नयेषां व्रजंति तेषां द
यसे न कस्मात्। इति भट्टौ
२ सर्गः। येषां विभवाः सम्पदः
शौवस्तिकत्वं श्वोविदिनस्थि
तत्वं न व्रजंति तेषां कस्मात्
दयसे श्वोभवः शौवस्तिकः
श्वसो भवार्थे ठञ् विधानात्
कालि मनीषादित्वात् तुडागमः
हृस्वश्वेति उम् तिते द्विविति-
द्विः त्वतौ भावे इति त्वं। इ
ति तट्टीका॥
शौवापदं त्रि श्वापदसंबंधि
श्वापदशब्दात् अण् प्रत्ययेन नि
ष्पन्नं। इति मुग्धबोधव्याकर
णं शौष्कलः पुं शुष्कमांस
स्यपणकः। इति मेदिनी॥
शौष्कलः त्रि आमिषाशी इत्य
मरः मत्स्यमांसभोजनशी
लः आमिषं अश्नाति आमि
षाशी ग्रहादित्वात् मिन् शुष्क
ली शुष्कमांसेस्यात् मांसमात्रे
पि दृश्यते। तमत्ति शौष्कले
सः तालव्यादि मूर्द्धन्यमध्यः
शुष्कं मांसं लाति इति शुष्क
लः प्रज्ञादित्वात् ष्णि शौष्क
लः। इति विद्याविनोदः शाष्क
लः इति पाठः इति स्वामी। इ
ति भरतः॥
श्चुत (क्षर) क्षरणे। इति कवि
श्चुत) कल्पद्रुमः। ह्रौतालव्य
वर्गाद्यशुक्र तालव्यादी श्चो
ऽन्त्यस्यादिमुक्तश्च नकारजा
वनुस्वार पंचमाविस्यादि निष
ेधःपन्नयो तालव्यादित्वे तदु
च्चनस्य व्यभिचार सत्वनार्थेन
तेन्तुलस्य लोपे इत्यादिना श्चो
ऽन्त्यवर्गशेषापथत्वे संगच्छेते
तेनाकिपि संयोगांत लोपे-

चुलुम्प् इत्यादिसिद्धं किन्तु द्वौ
ट्टंस्यादी इति धातुप्रदीप क्रम
दीस्थसे तेन दूते श्मशानमि इ
ति वृतस्तुत् तस्याचष्टे इतिश्मी
मीमंसेति डित्वाद्विलोपे वृत
स्यति पुनः क्विपि जेली
पे वृतस्क इति स्थिते सं
योगादेः सस्य लोपे वृतक
इति केचित् ईइ सस्तुतत्त्व
श्मीलीत् प्रस्तुतत् अश्मा
नीत्। तत्र इति श्मसेचने
त्वरणत्व। वृत्तमाश्मालति त्व
र इति। इदं कवच मश्मा
नीदिति। निश्माते तस्मतनुक
वी विल्वो याचदेते इति।
मालस्मी गणकृतानित्यत्वे
इति दुर्गादासः॥
श्मशानः पुं प्रायाः। इत्य
मरः॥
श्म[न] क्ली मुखे। इति शमश्रुश
टटीकायां भरतः॥
श्मशानं क्ली प्रावदाहस्थानं।
तत्पर्यायः पितृवनं २ कुणप
वः। शातानकं ४ रुद्राक्रीडः॥
४ दाहसरः ५ इति त्रिकाण्ड
शेषः। अन्तशय्या ६ पितृका
ननं ७ इति जटाधरः॥

तस्मृतमिति यथा। शाशाहेनश्मा
व प्रोक्तः शानं शयनमुच्यते
निर्वचन्ति श्मशानार्थं मुने शा
स्त्रार्थकोविदाः। महान्त्यपि च
भूतानि प्रलये समुपस्थिते॥
शेरतेऽत्र शवा भूत्वा श्मशानं
ततो भवेत्। महाश्मशानं
यथा वाराणसीति विख्याता
रुद्रावास इति द्विजाः। महाश्मशा
नमित्येवं प्रोक्तमानन्दकाननं। इ
ति श्रीस्कान्दे काशीखण्डे ३० अध्या
यः। उत्सवे व्यसने चैव दुर्भिक्षे
शत्रुविग्रहे राजद्वारे श्मशाने च
यस्तिष्ठति स बान्धवः॥
इति चाणक्यः॥ श्मशाने गत्वा
विस्मृत्यस्पर्शे दोषा यथा। वराह
उवाच। श्मशाने योऽनरो गत्वा
अस्नात्वैव तु मां स्पृशेत्। मम
दोषापराधस्य शृणु तत्त्वेन य
तत्फलं जम्बुको जायते भूमौ व
र्षाणां नव पञ्च च गृध्रस्तस्मा
द्वर्षाणि जायते त्वचलेश्वरः।
चरेत्तो मानुषमांसं उक्षोतोगृ
ध्र जम्बुको पिशाचो जायते
तत्र वर्षाणि नव पञ्च च॥
ततस्तु कृमयोऽप्यन्ते विशाद्वर्षा
णि षाट्दश तितो नारायणस्मृता

धरणीवाक्य मब्रवीत्। पतत्ते
परमं गुह्यं लोकनाथ जनार्दन
यं कौतूहलं देव निखिलं वक्तु
महसि। श्मशाने पुण्डरीकाक्ष
ईश्वरेणाप्रशंसिते। तत्र किं वि
गुणं देव पावित्रं शिवभाषिते
मतत्र रमते नित्यमगाधोऽल्प
महाद्युतिः। कपालेशूद्रदे
वोऽत्र दीप्यन्ते महौजसः। प्र
शंसितञ्च रुद्रेण भवता किं
विनिन्दितं। श्मशानेऽपृष्ट
ज्ञानरुद्रस्यच निशापिये॥
वराह उवाच॥ शृणु तत्त्वेन मे
देवि इह माहात्म्यमनुत्तमं अस्था
पितेन जायेते श्मशाने प्रशंसित
वन्तः। कृत्वा रुद्रकोऽकर्मसु
वेभूतपति हेतुः। हत्वा चैवा
लहरानि विप्रे भूषितागः स्वि
यः तेन पापे सं वको नशाको
तिष्ठिचेष्टितं ततईशो मया
चोक्तो वाक्यमेव सुखावहे।
किमिदं तिष्ठसे रुद्र कश्मले
तस्माहूतः। तत्रैव प्रियार्था
यथेनाह मिदमागतः ततो म
मवच श्रुत्वा लब्धसंज्ञो महे
श्वरः। उवाच मधुरं वाक्यं पाप
संतमलोचनः नवविलोप्रसा

देन मया नचिपुत्रं रहते। विह
ता दानवास्तत्र गर्भिणपरमुलि
पातिताः बालवृद्धाहतास्तत्र
विश्रुतेनो दिशोदश। तस्य
पापस्य दोषेण न शक्रामि वि
चेष्टितुं। श्रणुष्योगमायश्च
नष्टैश्वर्यस्य माधव। किमया
विप्रकर्तव्य मेनोवशेन नाथ
व विशालत्वेन मे ब्रूहि शोध
नेशापनाशनं। येन वैकृतमा
त्रेण पीडितं मुक्तेन किल्विषात्
पवे चिन्तात्मनस्तत्र मयाक
इत्यभाषितं। कपालमालां
संगृह्य समलेगच्छ शंकरं
मसैवं वचनं श्रुत्वा भगवान्
परमेश्वरः उवाच मांपुनर्ब्रह्मके
मांवापयजगत्पते कीदृशाः
समलो विसो यत्र गच्छामहे
वयं। ततस्तस्य वचः श्रुत्वा शं
करस्य यशस्विनि। ततपापेन
पतार्थाय मयावासे प्रभाषितं
श्मशानं समलो रुद्र इत्येकोत्र
णार्थिकः। स्वयं तिष्ठति वैत
त्र मनुजा विगतस्पृहाः तत्र
गृह्य कपालानि रमतेऽत्र शंक
र। तत्र वर्षसहस्राणि दिव्यान्य
दृष्टव्रतः ततोभक्ष्यमांसानि




पापत्त्रयविकीर्षुकः । हिंसमा
नानि भोज्यानि येच भोज्यास्त
वप्रिया । एवंसर्वे गौतेः स्पृष्टे-
श्मशानस्तु सुविनिश्चितः । एतेन्द्वर्ष
सहस्रेतु स्थित्वा तं श्मशानेऽप
नः । एष्यसि स्वाश्रमं पुण्यं
गौतमस्य महामुनेः । तत्रस्था-
स्यसि चाल्याने आश्रमे विपिने
स्थिते । प्रसादात् गौतमस्या-
प्यभविता गतकिल्बिषः । एवं
तस्य वरंदत्वा तत्रैवान्तरधीयत
कदाचिन्नमते तत्र श्मशाने पा
पसंवृते । एवं नरोचते भद्रे श्म
शाने मे कदाचन । यत्र रुद्र
कृतेपापे स्थिते किलभयावहे
पतते कथिते भद्रे श्मशानेमे
जुगुप्सिते । विष्णापि कृतसं
स्कारो मम कर्मपरायणः ।
प्रायश्चित्तं प्रवक्ष्यामि येनस्तु
ष्यति किल्विषात् कृत्वाचतु
र्थभक्तेन दिनानिदशपंचच प्रा
काशशयने कुर्यात् एकभक्तः
कृष्णस्तरे प्रभातेपंचगव्येनपा
नं कर्मशेषायने प्रमुक्तः सर्व
पापेभ्यो मम लोकायगच्छति-
इति वाराहे श्मशानप्रवेशप्रा
यश्चित्तनामाध्यायः ॥

श्मशानकाली स्त्री कालिकावि
शेषः । अथश्मशानकाली तन्त्रं
कालीतन्त्रे । वाग्बीं मायांततोल
क्ष्मीकामबीजमतः परं कालि
केसंपुटत्वेन चतुष्कंबीजमालि
खेत् एकादशाक्षरी देवेशि
चतुर्वर्ग प्रदायिनी ॥ अस्यायं
त्रे ॥ पद्म मष्टदलं कृत्वा तद्वा
ह्ये धरणीतले ॥ चतुर्द्वार
समायुक्तं मध्ये मूलेन मालिखे
त् । दलेष्वष्टसु विलिखेत् क
वर्गाद्यष्टवर्गकं । धरण्यांवि
लिखेदाद्यं चतुष्कं च चतुष्कके
पूर्वादिक्रमशो तंच मध्ये देवीं प्र
पूजयेत् ॥ अस्याः पूजाक्र
मः । प्रातःकृत्यादि प्राणा
यामांतं कर्मकृत्वाष्यादि
न्यासं कुर्यात् यथा ॥
शिरसि भृगुऋषयेनमः । हृदि
श्मशानकालिकायै देवतायै
नमः । गुह्ये वाग्बीजायनमः ॥
पादयो मायाशक्तये नमः । स
र्वांगे कामबीजकीलकायनमः
ततः करांगन्यासौ । ऐं अंगुष्ठा
भ्यांनमः । ह्रीं तर्जनीभ्यांस्वा
हा । श्रीं मध्यमाभ्यांवषट् ॥
क्लीं अनामिकाभ्यां हुं ॥

कालिके कनिष्ठाभ्यां वौषट्
क्रीमादि वाग्भवांते करतलपृ
ष्ठाभ्यांफट् एवं हृदयादिषु ॥
ततोध्यानं । अंजनाद्रिनिभांदे
वीं श्मशानालयवासिनीं । रक्त
नेत्रां मुक्तकेशीं शुष्कमांसाति
भैरवां । पिंगाक्षीं वामहस्तेन
मद्यः कुम्भशिरो दक्षहस्तेन द
धतीं शिवां । स्मितवक्त्रां सदा
चाममांसचर्वणतत्परां । नाना
लंकारभूषांगीं नग्नां मत्तांसदा
सवैः एवंध्यात्वा जपेद्देवीं श्म
शाने तु विशेषतः गृहे वापिगृ
हस्थोपि मत्स्यमांसैः सुभोज
नैः । नग्नो भूत्वा महापूजां कु
र्यात्साधो विशेषतः । पूजनेतु
ध्यात्वामानसैः संपूज्यार्घ्यस्था
पनं कुर्यात् पुनर्ध्यात्वायथो
पचारैः संपूज्य पंचेषुब्राह्म्या-
दिकं पूजयेत् तद्बहिरसितां
गादिकं पूजयेत् । अस्याः पुर
श्चरणं एकादशलक्षजपः ॥
तथाच वर्णलक्षंजपेन्मंत्रं तद्
दशांशेन होमयेत् । मंत्रान्तरं ॥
तत्रैव कामबीजं समालिख्य
कालिकायै समालिखेत् । न
मोन्तेनच देवेशि समाख्यो म

नुरुत्तमः सर्वोसौ कालिकादेवी
अन्यत् सर्वंतु पूर्ववत् ॥ इति
तंत्रसारः ॥
श्मशानवासी पुं शिवः यथा
क्षेत्रज्ञः क्षेत्रपालश्च क्षेत्रज्ञः क्षे
त्रियो विराट् श्मशानवासीमां
साशी खर्पराशी मखान्तकृ
त् । इति वटुकभैरवस्तोत्रं ॥
श्मशाने वासकर्त्तरि त्रि । य
था शिवसंबोधे वराहादिकं
श्मशानवासि चाण्डालादि
भ्यो दद्यात् इतिस्मृतितत्वं ॥
श्मशानवेश्म पुं महादेवः ।
इति हेमचन्द्रः ॥
श्मशानवासिनी स्त्री काली ।
यथा श्मशानवासिनी सौ
म्यापिनाकी शिववल्लभा । इ
ति कालिकाशतनामस्तोत्रं ।
श्मशानालयवासिनी स्त्री का
ली यथा घोररावा महारौ
द्री । श्मशानालयवासिनी ॥
इति तंत्रसारे दक्षिणकालि
काध्याने ॥ श्मश्रु क्ली पुंअ
खवर्द्धितलोमदाड़ी इतिभाषा
इत्यमरः ॥
श्मश्रुःखिष्टपकाशेष तेषां हृदेश
स्मा तलोम श्मश्रु उच्यते ॥



श्मन्निति मुखनामेतिस्मृतिः श्म
निमुखे श्रयते उपलभ्यते श्मश्रु
नास्त्रीति नुः श्मश्रु क्लीव मुद्दंते।
श्म मुखे श्रयति श्मनः श्रूयते
डुन्निति डुनि श्मश्रुनांत निमित्ते
इति भरतः ॥ तस्य शुभाशुभ
लक्षणं यथा। निम्नवक्त्र मप
ग्राणं कृपणानान्न कस्वकं।
संएरो भोगिनो कांतं श्मश्रु
स्निग्धं शुभं मृदु ॥
संहतं चास्फुटिताग्रं रक्तश्म·
श्रुश्च चौरकः रक्तात्मपरुष
श्मश्रु कर्णाः स्युःपापकृत्सदः
इति गारुडे ६६ अध्यायः ॥
क्षौपानस्यावर्जने यथा ॥
मार्कण्डेयउवाच। इति प्रति·
ज्ञाय तदा नविध्यत सत्तोदमः
क्षौपामर्षविदृत्तात्तःश्मश्रुमा
तुर्यपाणिना हाहतोस्मीतिपि
तरं ध्यात्वा देवे विनिंघच पो
वाचमंत्रिणः सर्वानानिनायपु
रोहितं इतिमार्कण्डेयपुराणे·
क्षेपाध्यायः । यस्यधारणा फ
लंयथा हातधर्मकेशा श्मश्रु
धारणा सख्या भवतिसंततिः
श्मश्रुचौरकर्मा यथा वराहपु
राणे ॥श्मश्रुकर्मम कारयित्वा
नरवच्छेदमनंतरं। गोभिलः।
केशश्मश्रुलोम नखानि वाप
यीत शिखावर्ज्जं। इति शुद्धि
तत्वं ॥

श्मश्रुमुखी स्त्री श्मश्रुयुक्ता
नारी तत्पर्य्यायः। पालिः २ पा
ली ३ इतिशब्दरत्नावली। पौरा
ष इति जटाधरः ॥

श्मील निमेषणे। इतिकविक
ल्पद्रुमः। ऊष्मवर्गीयोपधयुक्तः ॥
श्मीलति चक्षुः पक्ष्माभि राहते
स्यादित्यर्थः। इतिदुर्गादासः ॥

श्यानः त्रि गतः। श्यैङ गतौ क्त
प्रत्ययेन निष्पन्नः ॥

श्यामं क्ली मरिचं। सिंधुलव
णं। इतिमेदिनी ॥

श्यामः त्रि कृष्णगुणविशिष्टः ॥
हरित्गुणविशिष्टः। इत्यमरः ॥
श्यामः पुं प्रयागस्यवटः। मेघः
वृद्धदारकः कोकिलः ॥ कृष्ण
वर्णः। हरिद्वर्णः। इति मेदिनी
धुस्तूरः। पीलवृक्षः ॥
श्यामकः। इति राजनिर्घण्टः ॥
दमनवृक्षः। गंधतृणं। इतिवि
श्वः ॥ श्यामवस्तूनि यथा ॥
कृष्णानि केशवः सीविदीवं चेंद्र
क गरुडः। विंध्यांजनादि ॥

वृक्षादि वन भैरव राक्षसाः ॥
शिवकण्ठवन द्वैपायनरामघन
द्रुमाः शनिःकृमदङ्ग्रा कालीक
लिकोलयमासुराः। केशकज्ज
ल कस्तूरी राजपट्ट विहङ्गजे वि
षकोष कुरू शस्त्रागुरुपापत
मोनिशाः। मसीपंकमदाम्भो
पियमुना भ्रमकोकिलाः। गो
लांगुलास्य गुंजास्य कण्ठःख
द्रुन कोकिलाः ॥ श्यावेल ता
लतापिंज तिलेन्दीवर वलयः
रसविद्ध शृंगारो कटाक्षांगलिः
कणीनिका ॥ नीली जंबूफ
लेमुस्ता काक कृष्णा कुकीर्त
यः ॥ निरच्छाया गजोगार·
खलांतःकरणादयः ॥
इति कविकल्पलतायां २ स्तव·
स्तवके ४ कुसुमे ॥

श्यामकं क्ली रोहिषतृणं इति
राजनिर्घण्टः ॥

श्यामकः पुं श्यामाकः। इति·
हेमचन्द्रः ॥

श्यामकण्ठः पुं मयूरः। इति
हलायुधः। शिवः पक्षिविशेषः
इति नीलकण्ठशब्दर्शनात्

श्यामकंदा स्त्री अतिविषा।
इति राजनिर्घण्टः ॥

श्यामकाण्डा स्त्री गण्डदूर्वा। इ
ति राजनिर्घण्टः ॥

श्यामग्रन्थिः स्त्री गण्डदूर्वा। इ
तिराजनिर्घण्टः ॥

श्यामपत्रः पुं तमालवृक्षः। इति
शब्दचंद्रिका ॥

श्यामलः पुं कृष्णवर्णः। पिप्पलः
इति मेदिनी ॥ कृष्णगुणवति
त्रि इत्यमरः ॥

श्यामलचूडा स्त्री गुञ्जा। इति
राजनिर्घण्टः ॥

श्यामलता स्त्री स्वनामख्यात
लता। तत्पर्य्यायः गोपी गोपा
गोपवल्ली सारिवोत्पलसारि
वा अनंता शारिवा श्यामाख्य
ष्टा श्यामलताह्वये। इति श
ब्दरत्नावली। अपिच कालपे
षी महाश्यामा सुभद्रोत्पल
सारिवा दीर्घमूलाच पालिंदी
मसूरविदलाचसा। इति रत्न
माला ॥ राजनिर्घण्टोक्तप
र्य्याय गुणौ सारिवाशब्दे द्र
ष्टव्यौ ॥

श्यामला स्त्री पार्वती श्यामे
श्रीकृष्ण लाति ददातीति श्रुत
पति सिद्धा। इति केचित् ॥
अश्वगंधा कटभी ॥ जम्बूः ॥



कस्तूरी । इति राजनिर्घण्टः ॥
श्यामलिका स्त्री नीली इति-
राजनिर्घण्टः ॥
श्यामलेक्षुः पुं कृष्णेक्षुः । इति
राजनिर्घण्टः ॥
श्यामसुन्दरः पुं श्रीकृष्णः यथा
यावन्ति च शरीराणि भोगार्हा-
णि महामुने । प्राकृतानि च स-
र्वाणि श्रीकृष्ण विग्रहे विना
ध्यायन्ते योगिनश्च लक्ष्मु सुन्दं-
ज्योतिःस्वरूपिणं । हस्तपादा-
दिरहितं निर्गुणं प्रकृतेः परं ॥
वैष्णवास्तं न मन्यन्ते तद्भक्ताः
सूक्ष्मदर्शिनः । कुतो बभूव त-
ज्ज्योतिर्हो तेजस्विनं विना ।
ज्योतिरभ्यन्तरे नित्यशरीरं श्या-
मसुन्दरं । इति ब्रह्मवैवर्त्ते ग-
णपतिखण्डे ५१ अध्यायः ॥
अन्यच्च श्यामसुन्दरते दास्यः
करवाम तवोदितं । देहि वा-
सांसि धर्मज्ञ नोचेद्राज्ञे ब्रु-
वामहे । इति श्रीभागवते द-
शमस्कन्धे २२ अध्यायः ॥
अपि च ददर्श श्रीहरिं ब्रह्मा
शीकरस्थं सुरैः सह । वसन्तं
तन्मध्यदेशे यथेन्दुं तारकावृ-
ते । अमूल्यरत्ननिर्माण से-

वेशभूषणभूषिते किरीटिने कुण्ड-
लिने वनमालाविभूषिते । शङ्ख
चक्रगदापद्मधारिणा चतुर्भुजे
नवीननीरदश्यामसुन्दरे समनो-
हरे । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे
४४ अध्यायः ॥
श्यामा स्त्री शारिवौषधी । अन्य-
मूलोत्पला । प्रियङ्गुः ॥ वाकुचिः
यमुना रात्रिः । कृष्णत्रिवृतिका
नीलिका । इति मेदिनी ॥
गुग्गुलुः । सोमलता ॥
गुन्द्रा । कृष्णा । अम्बिका । इति
विश्वः । गुडूची कस्तूरी ॥
वटपत्री ॥ वन्दा । नीलपुन-
र्नवा । पिप्पली । हरिद्रा ॥
नीलदूर्वा । तुलसी पद्मबीजे
गोः । स्त्री । छाया ॥
कृष्णसारिवा । शिंशपा । इति
राजनिर्घण्टः ॥ पक्षिविशेषः ॥
श्यामा इति भाषा । तत्पर्य्यायः ।
वराही २ शकुनी ३ कुमारी ४
दुर्गा ५ देवी ६ चटका ७ कृ-
ष्णा ८ पोतकी ९ पाण्डविका
१० वामा ११ कालिका १२ शिति
शिखिनी १३ इति राजनिर्घण्टः ॥
श्यामाया उत्पत्तिर्यथा । ततः
सा कालिकादेवी योगनिद्रा ज-

गन्मयी पूर्व्वसत्यसतीरूपा
जन्मार्थं मेनकां ययौ । सम-
यस्यानुरूपेण मेनकाजठरे शि-
वा सम्भूय च सम्भूता सा त-
स्मीदिवसागमात् वसन्तसमये
देवी नवम्यां मृगयोगतः अर्द्ध-
रात्रे समुत्पन्ना गङ्गेव शशिम-
ण्डलात् ॥ ततस्तस्यां तु जाता-
यां प्रसन्ना ह्यभवन् दिशः ।
सानुकूलो ववौ वायुर्गम्भीरो-
ऽनिलः शुभः । बभूव पुष्प-
वृष्टिश्च तोयवृष्टिः समं तया ।
जज्वलुश्चाग्नयः शान्ता जगा-
र्जुश्च घना शुभे । तस्यां तु जा-
यमानायां सर्व्वे लावण्यमप्य-
त कोलाहला यथा जाता नीलो-
त्पलदलानुगा । श्यामा सा मे-
नका देवी शुद्धमाधाति हर्षिता
देवाश्च हर्षमतुलं प्रापुस्तत्र
मुद्युताः । तुष्टुवुस्तां मन-
सि ये गन्धर्वा अप्सरोगणाः
ताम्नुनीलोत्पलश्यामां हिमव-
तः सुतां । कालीति नाम्ना हिमवा-
नाहूय वक्षसेदिने तां पत्नीभ्यां
समेतोनां नाम्ना तां प्राहेति
च । कालीति च तथा नाम्ना की-
र्त्तितां गिरिनन्दिनी इति कालिकापु-

राणे ४० अध्यायः । अस्या ध्या-
नमन्त्राः । क्रीं क्रीं क्रीं हूं हूं
ह्रीं ह्रीं दक्षिणे कालिके क्रीं
क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वाहा । य-
था कालीतन्त्रे । कालत्रये वह्नि-
संस्थं रति बिन्दु समन्वितं कूर्च्चं
युग्मं तथा लज्जायुगलं तदनन्त-
रं । दक्षिणे कालिके चेति पूर्व्ववी-
जानि चोच्चरेत् अन्ते वह्निवधूं
दद्यात् विद्या राज्ञी प्रकीर्त्तिता
मन्त्रं च माह यामले । कका-
राजलरूपत्वात् केवलं मोक्ष-
दायिनी ज्वलनार्णसमायोगा-
त् सर्व्वतेजोमयी शुभा । माया-
द्वयेन देवेशि सृष्टिस्थितिस्थित-
कारिणी विन्दुना निष्कलत्वा-
च्च कैवल्य फलदायिनी बीज-
त्रया शाम्भवी सा केवलं ज्ञान-
चित्कला शक्तिबीजद्वयेनैव भा-
रूपापि प्रबोधिनी । लज्जाबीज-
द्वयेनैव सृष्टिस्थित्यन्तकारिणी
सम्बोधन पदेनैव सर्व्वसन्निधि-
कारिणी । स्वाहया जगतां मा-
ता सर्व्वपाप प्रणाशिनी ॥
अस्याः पूजाप्रयोगः प्रातःकृत्या-
दिकं कृत्वा मन्त्राचमनं कुर्य्यात्
यथा कालिकाभिः श्रिभिः पी-

त्वा कान्यादिभिरुपस्पृशेत् ता
भ्यां तोष्ठौ दक्षिणकृष्णचैकेन
क्षालयेत् करं मुखञ्चाणितलं
श्रोत्रं नाभ्युरस्कंधजौ क्रमात्
प्राचम्येवं भवेत्काली वल्लभा
तो ग्रपश्यति । कं शिवः तद्य
था । क्रीमिति त्रिराचामेत्
ॐ काल्यैनमः कपालिन्यैनमः
इति ओष्ठौ हि कृष्णज्जेत् ॐ कु
लायैनमः । इतिकरं क्षालये
त् ॐ कुरुकुल्लायैनमः । इति
मुखे । ॐ विरोधिन्यैनमः । इ
ति दक्षिणनासायां । ॐ विप्र
चित्तायै नमः इतिवामनासायां
ॐ उग्रायै नमः ॐ उग्रप्रभायै
नमः इति नेत्रयोः । ॐ दीप्ता
यैनमः ॐ नीलायैनमः इति
श्रोत्रयोः ॐ घनायैनमः ॥
इति नाभौ । ॐ बलाकायैन
मः इति वक्षसि ॐ मात्रायै
नमः इति शिरसि ॐ मुद्रा
यैनमः ॐ मितायैनमः ॥
इत्यंसयोः इति मंत्राचमने ॥
ततो भूतशुद्ध्यंते विधायमाया
वीजेन यथाविधि प्राणायामत्र
यंकुर्यात् ॥ ऋष्यादिन्यासः
यथा अस्यमंत्रस्य भैरवऋषि

रुष्णिकछंदो दक्षिणकालिका
देवता क्रीं वीजं हूं शक्तिः क्रीं
कीलकं पुरुषार्थ चतुष्टय सि
द्ध्यर्थे विनियोगः । तथा च का
लीकल्पे । कीलकं चाद्यवीजं स्या
त् चतुर्वर्गफलप्रदं शिरसिभैर
वायऋषये नमः । मुखेउष्णिक
छंदसे नमः । हृदि दक्षिणका
लिकायै देवतायै नमः । गुह्ये
क्रीं वीजाय नमः । पादयोः हूं
शक्तये नमः । सर्वांगे क्रीं की
लकायनमः ॥ ततः करांगन्या
सौ । तदुक्तं कालीतंत्रे अंगन्या
स करन्यासौ यथावदभिधीय
ते । भैरवोऽस्य ऋषिः प्रोक्तो उ
ष्णिकछन्द उदाहृते । देवता
कालिका प्रोक्ता लज्जा वीजं त
वीजकं । कीलकं चाद्यवीजं स्या
च्चतुर्वर्गफलप्रदं ॥ शक्तिश्च
कूर्चवीजं स्यात् दक्षिणा सरस्व
ती । कवित्वार्थे नियोगः स्या
दित्यादि तेन मायया ॥ षडं
गन्यासः षड्दीर्घभाजा वीजे
न प्रणवाद्येन कल्पयेत् वीर
तंत्रेपि दीर्घ षट्क युताद्येन प्र
णवाद्येन कल्पयेत् इति वा
तद्यथा ॐ क्रां अंगुष्ठाभ्यांनमः

ॐ क्रीं तर्जनीभ्यांनमः स्वाहा । ॐ
क्रूं मध्यमाभ्यां वषट् ॐ क्रैं अना
मिकाभ्यां हुं । ॐ क्रौं कनिष्ठाभ्यां
वौषट् ॐ क्रः करतलपृष्ठाभ्यां फ
ट् । एवं हृदयादिषु ॐ क्रां हृद
यायनमः इत्यादिः । एवं ॐ क्रां
अंगुष्ठाभ्यांनमः इत्यादिना ॥
ततो वर्णन्यासः अं आं इं ईं
उं ऊं ऋं ॠं लृं लॄं नमः ॥
इति हृदये । एं ऐं ओं औं
अं अः कं खं गं घं नमः
इति दक्षिण वाहौ । ङं चं छं
जं झं ञं टं ठं डं ढं नमः ।
इति वाम वाहौ । णं तं थं दं
धं नं पं फं वं भं नमः इति
दक्षिण पादे । मं यं रं लं वं
शं षं सं हं ळं क्षं नमः इति
वामपादे । विरूपाक्षमते सविंद
र्गे न्यासः यथा वीरतंत्रे अं
आं इं ईं उं ऊं ऋं ॠं लृं लॄं वै
हृदये न्यसेदित्यादि पुनर्विंदु
यथा अ आ इ ई उ ऊ ऋ ॠ
लृ लॄ वै हृदयं स्पर्शादित्या
दि किंत सविंदुकं वा न्यसेदेत
न निर्विंदुकं वाथ वर्णकान् इ
त्याचार्य परिगृहीत भैरवीयवा
क्यात् उभय मेवयुक्तं ॥ अथषो

ढान्यासः तदुक्तं वीरतंत्रे के
वलां मातृकां कृत्वा मातृकां
तार संपुटां । मातृका पुटितं
तारं न्यसेत् साधकसत्तमः ॥
श्रीवीजपुटितां तारं मातृका
पुटितं ततः कामेन पुटितां
देवीं ततः पुटं काममेव च । शा
क्त्याच पुटितां देवीं शक्तिञ्च
ततः पुटां न्यसेत् । क्रीं हंहञ्च
पुनर्न्यस्त्वा ऋ लृ लॄ ञ्च एव
वत् मूलेन पुटितां देवीं ततः पु
टं मंत्र मेव च । अनुलोमविलो
मेन न्यस्त्वा मंत्रं यथाविधि मू
लेनाष्टशतं कुर्याद्व्यापकं तद
नंतरं यथा ॐ अं ॐ एवं मा
तृका पुटिततारं । एवं श्रीवीज
पुटितां ततः पुटितं श्रीवीजं
एवं कामेन पुटितां मातृकां
मातृका पुटितं कामं एवं शा
क्त्या पुटितां मातृकां मातृ
का पुटितां शक्तिं न्यसेत् । त
था क्रीं हंहञ्च ऋ ॠ लृ लॄ
एवंवत् ततः पुटितां मातृकां
न्यसेत् मातृका पुटितञ्च ततः
मंत्रपुटितां मातृकां ततः पुटितं
मंत्रं पुनरनुलोम विलोमेन के
वलं मातृकान्यासे न्यस्य मू

तेन नाहश्शतेन व्यापकं कुर्य्या
त् । अथैतेन्यासमात्रया अम्बिका
देवः । इति शुभेन दुर्गया ऋग्वेदो
ध्यापकीर्त्तिताः तावद्याःकालि
कायास्तु अस्त्रुतात्मतया परे ।
एतस्मिन्न्यासवर्य्ये च सर्व्वपापप्र
णश्यति । ततस्तत्त्व न्यासः
यथा मूले त्रिखण्डं विधाय प्र
थमखण्डान्ते ओं आत्मतत्त्वाय
स्वाहेति पादादि नाभिपर्य्यन्ते ।
द्वितीयखण्डान्ते ओं विद्यातत्त्वा
य स्वाहा इति नाभ्यादिहृदयान्ते ।
तृतीयखण्डान्ते ओं शिवतत्त्वाय
स्वाहा इति हृदयादिशिवःप
र्य्यन्तं न्यसेत् । तदुक्तं स्वतन्त्रे मूल
विद्यां त्रिखण्डान्ते प्रणवाद्यैर्य
थाविधिः आत्मविद्या शिवैस्तत्त्वै
स्तत्त्वन्यासं समाचरेत् । अथ वी
जन्यासः । तदुक्तं कुमारीकल्पे ।
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललला
टे नाभिदेशके गुह्ये वक्त्रे च सर्व्वाङ्गे
सप्तबीजं क्रमान्न्यसेत् । यथा प्र
थमबीजं ब्रह्मरन्ध्रे द्वितीयबीजं
भ्रूमध्ये तृतीयबीजं ललाटे च
तुर्य्यबीजं नाभौ पञ्चमबीजं गु
ह्ये षष्ठबीजं वक्त्रे सप्तबीजं स
र्व्वाङ्गे । एतत्सर्व्वं काम्यम् ॥

ततो मूलेन समधा व्यापकन्या
सं कृत्वा यथाविधि मुद्रां प्रद
र्श्य ध्यायेत् । यथा कालीतन्त्रे क
रालवदनां घोरां मुक्तकेशीं च
तुर्भुजाम् । कालिकां दक्षिणां दि
व्यां मुण्डमालाविभूषिताम् । सद्य
श्छिन्नशिरः खड्गं वामाधोर्द्ध्वक
राम्बुजाम् । अभयं वरदञ्चैव दक्षि
णोर्द्ध्वाधःपाणिकाम् । महामेघ
प्रभां श्यामां तथा चैव दिगम्ब
रीम् । कण्ठावसक्तमुण्डालीगल
द्रुधिरचर्च्चिताम् । कर्णावतंस
तानीत शवयुग्मभयानकाम् ॥
घोरदंष्ट्रां करालास्यां पीनोन्नत
पयोधराम् । शवानां करसङ्घातैः
कृतकाञ्चीं हसन्मुखीम् । सृक्कद्वय
गलद्रक्तधाराविस्फुरिताननाम् ।
घोररावां महारौद्रीं श्मशाना
लयवासिनीम् । बालार्कमण्डला
कारलोचनत्रितयान्विताम् ॥
दन्तुरां दक्षिणव्यापिमुक्तालं
बिकचोच्चयां शवरूप महादे
वहृदयोपरिसंस्थिताम् । शिवा
भिर्घोररावाभिश्चतुर्दिक्षु सम
न्विताम् महाकालेन च समं
विपरीतरतातुराम् ॥ सुखप्रस
न्नवदनां स्मेराननसरो ॥

रुहां । एवं सञ्चिन्तयेत् काली
सर्व्वकामार्थसिद्धिदाम् । शवरू
ढेमति घोरवामण्डवतंसेति प्रेत
कर्णावतंसेति च पाठान्तं पत्त
सेवुक्तवाण कर्णविभूषिता मि
ति विशालास्य किशोराभ्यां कृत
कर्णावतंसिनी इति चतुर्दशनाड
भयमेव पाठः । ध्यानान्तरं तन्त्रे
अञ्जनाद्रिनिभां देवीं करालव
दनां शिवाम् । मुण्डमालावली
कीर्णां मुक्तकेशीं स्मिताननाम् ॥
महाकालहृदम्भोजस्थितां पी
नपयोधराम् । विपरीतरतासक्तां
घोरदंष्ट्रां शिवैः सह ॥ नाना
यज्ञोपवीताढ्यां चन्द्रार्द्धकृत
शेखराम् । सर्व्वालङ्कारयुक्ताञ्च
मुण्डमालाविभूषिताम् । मृतह
स्तसहस्रैस्तु बद्धकाञ्ची दिग
म्बराम् । शिवाकोटिसहस्रैस्तु
योगिनीभिर्विराजिताम् । रक्त
पूर्णमुखाम्भोजां मद्यपान
प्रमत्तिकाम् । वह्न्यर्कशशिनेत्रा
ञ्च रक्तविस्फुरिताननाम् । विगता
सुकिशोराभ्यां कृतकर्णावतं
सिनीं कण्ठावसक्तमुण्डाली
गलद्रुधिरचर्च्चिताम् श्मशान
वह्निमध्यस्थां ब्रह्मकेशववं

दिताम् सद्यःकृत्तशिरःखड्गवराभी
तिकराम्बुजाम् । ध्यानान्तरं रहस्ये ।
यथा शवारूढां महाभीमां घोर
दंष्ट्रां हसन्मुखीम् चतुर्भुजां खड्ग
मुण्डवराभयकरापरां । मुण्ड
मालाधरां देवीं ललज्जिह्वां दि
गम्बरीम् । एवं सञ्चिन्तयेत्काली
श्मशानालयवासिनीम् ॥
एवं ध्यात्वा मानसैः संपूज्य
शंखस्थापनं कुर्य्यात् । यथा
स्ववामे भूमौ हूंकारगर्भं त्रि
कोणं विलिख्य तत्राधारं सं
स्थाप्य मूलेन शुद्धजलादिना
शंखादिपात्रमापूर्य्य गन्धादि
कं दत्वा ओं गंगे चेत्यादिना
तीर्थमावाह्य मं वह्निमण्ड
लाय दशकलात्मने नमः इ
त्याधारं । अं सूर्य्यमण्डलाय द्वाद
शकलात्मने नमः इति शंखं
उं सोममण्डलाय षोडशकला
त्मने नमः इति जलं संपूज्य ओं
क्रां हृदयाय नमः ओं ह्रीं शिर
से स्वाहा ओं हूं शिखायै वषट्
ओं ह्रैं कवचाय हुं इत्यग्नीशास
रवायव्येषु ओं ह्रौं नेत्रत्रयाय
वौषट् चतुर्दिक्षु ओं ह्रः अस्त्राय फ
ट् इत्यनेन तदुपरि मस्य मुद्र

पाद्याय मूलेदशधाजप्त्वा धेनु
मुद्रया अमृतीकृत्य अनेन सं
त्स भगिनी योनिमुद्रे प्रदर्श्य
तज्जले किंचित् प्रोक्षणीपात्रे
निःक्षिप्य मूलेन तेनोदकेना
त्मानं पूजोपकरणं चाभ्युक्ष्य पी
ठपूजां समाचरेत्। अस्याः पूजा
यंत्रे। आदौ बिंदु स्वबीजं भुव
नेशीं च विलिख्य ततस्त्रिकोणं
ततो हि त्रिकोणं चतुष्पत्रं तत
मष्टदले पद्मं भुपुरेण चतुर्द्वा
रात्मकं भूगृहं लिखेत्। तत्र
के कालीतंत्रे आदौ त्रिकोण
मालिख्य त्रिकोणं तद्बहिर्लि
खेत् ततो वै द्विलिखेत्सर्वीति
कोणत्रय मुत्तमं ततो वृत्तं
समालिख्य लिखेदष्टदले ततः
वृत्ते विलिख्य विधिवल्लिखेद्भू
पुरमेककं कुमारीकल्पे मध्येतु
बिन्दौ चक्रं बीजमायाविभूषि
तं इति॥ अत्र विशेषाधारोऽपि
गुह्यकालायां ताम्रपात्रे कृपा
ले वा श्मशाने काष्ठनिर्मिते
फलके भौमदिने तापि शर्वरे
श्मशानभवे स्वर्णे रौप्ये पाले
हे वा चक्रं कार्यं विधानतः
येनात्मदेहे तत्र। ध्यायामि

ध्यात्वा षट्कोणं शक्तिभिः
तवात्मकं। पद्मे वसुदले भूमि
पूरञ्च ही रसेयुतेति। पीठपू
जा ततः कुर्यादाधारशक्तिपू
र्वकं प्रकृतिकमठञ्चैव शेषं
पृथ्वी तथैव च सुधांबुधिं मणि
द्वीपं चिंतामणिगृहं तथा श्म
शानं पारिजातञ्च तन्मूले रत्न
वेदिकां तस्योपरि मणेः पीठं
नानामुनिगणाः चतुर्दिक्षु
मुनीन् देवान् शिवाश्च शवमु
ण्डकान्। धर्माद्यधर्मादींश्च
त्वादिकं ज्ञानात्मने नमः इत्य
नेन पूर्व केशरेषु एतादि क्रमेण
पूजयेत्। इच्छा ज्ञाना क्रिया
चैव कामिनी कामदायिनी।
रती रतिप्रिया नंदा मध्ये चैव
मनोन्मनी। सर्वत्र प्रणवादि न
मोन्तेन पूजयेत् तदुपरि ह्सौः
सदाशिव महाप्रेत पद्मासना
य नमः। ततः पुनर्ध्यात्वा पुष्पा
ञ्जल्यानीय मूलमंत्रकल्पित
मूर्तावावाहयेत् ॐ देवेशि भक्ति
सुलभे परिवारसमन्विते याव
त्वां पूजयिष्यामि तावत्त्वं सु
स्थिरा भव। ततो मूलमुच्चार्य
गुह्यकालीदेवि इहावह इह तिष्ठ

इह सन्निधेहि इह सन्निरुध्यस्व
इह सन्निहिता भव। ततो हृदि
त्यावगुण्ठ्य अंगमंत्रैः सकलीकृ
त्य धेनुमुद्रया अमृतीकृत्य पर
मीकरणमुद्रया परमीकृत्य भ
क्तिमाकर्षिणी योनिमुद्राः प्रद
र्श्य प्राणप्रतिष्ठां विधाय मूले
न पाद्यादिभिः पूजयेत्। ततो
मूल मुच्चार्य एतत् पाद्यमगु
कदेवतायै नमः। एवं मंत्रेणा
हा आचमनीयं स्वधा स्नानीयं
निवेदयामि पुनराचमनीयं स्व
धा एतेभ्यो नमः। एतानि पु
ष्पाणि वौषट्। ततो मूलेन पं
च पुष्पांजलीन् दत्वा धूप दीपौ
दद्यात् वनस्पतीत्यादि पठन्
मूल मुच्चार्य एष धूपो नमः
दीप मंत्रस्तु स्वप्रकाशो महादी
पः सर्वतस्तिमिरापहः सबाह्या
भ्यंतरं ज्योति दीपोऽयं प्रतिगृ
ह्यतां। मूल मुच्चार्य एष दी
पो नमः। तत ॐ जयध्वनि
मंत्रमातः स्वाहा इति तेनासं
पूज्य वामहस्तेन घंटां वादयन्
नीचे धूपं दत्वा इष्टिपर्यंतं दी
पं दद्यात् ततो मूलेन पुष्पा
ञ्जलि पंच दत्वा यथोपचारैर्ने

वेद्यं दत्वा आवरण पूजां कु
र्यात्। श्रीगुह्यकालीदेवि आवर
णं ते पूजयामि इत्याज्ञां गृही
त्वा केशरेष्वग्न्यादिकोणेषु ॐ
क्रों हृदयाय नमः ॐ क्रीं शिरसे
स्वाहा ॐ क्रूं शिखायै वषट् ॐ
क्रैं कवचाय हुं ॐ क्रौं नेत्रत्रया
य वौषट्। चतुर्दिक्षु ॐ क्रः अ
स्त्राय फट् बहिः षट्कोणे ॐ
काल्यै नमः। सर्वत्र प्रणवादि
नमोन्तेन। कपालिन्यै कुल्लायै
कुरुकुल्लायै विरोधिन्यै विप्रचि
त्तायै उग्रायै उग्रप्रभायै दीप्ता
यै इति प्रथमाष्टे। ॐ नीलायै
नमः। एवं घनायै बलाकायै
इति द्वितीयअष्टे। एवं मात्रा
यै मुद्रायै मितायै इति तृती
यअष्टे सर्वाः श्यामा असिक
रामुण्डमाला विभूषिताः तर्ज
नीवामहस्तेन धारयन्त्यः शुचि
स्मिताः दिगंबरा हसन्मुख्याः स्व
स्ववाहनभूषिताः एवं ध्यात्वार्च
येत्। ततो दलेषु पूर्वादिक्रमे
ण ॐ ब्राह्म्यै नमः एवं नारायण्यै
माहेश्वर्यै चामुण्डायै कौमार्यै
अपराजितायै वाराह्यै नारसिं
ह्यै एता गंधादिभिः पूजयेत्




पंचाग्रे असितांगादि भैरवान्
प्रजयेत् ततोमूलेन पुष्पांज
लि त्रयं दत्वा पाद्यादिना म
हाकालं प्रजयेत् ॥ तस्य ध्या
नं । महाकालं यजेद्देव्या दक्षि
णे धूम्रवर्णकं । बिभ्रतं दंड
खट्वांगौ दंष्ट्रा भीममुखं शि
शुं व्याघ्रचर्म्मावृतकटिं तु
न्दिलं रक्तवाससं त्रिनेत्रं मु
र्द्धकेशाश्च मुंडमालाविभूषि
तं जटाभार लसच्चंद्रखंडं मु
ग्रं ज्वलन्निभं । तथा च कुमारी
कल्पे । देव्यास्तु दक्षिणे भागे म
हाकालं प्रपूजयेत् । हूं ह्रौं यां
रां लां वां ग्रां क्रों महाकाल
भैरव सर्वविघ्नान्नाशय नाश
य ह्रीं श्रीं फट्स्वाहा इत्यनेन
पाद्यादिभि राराध्य त्रि रूर्पयि
त्वा मूलेन देवी मंत्रोपचारैः
प्रजयेत् तथा चकालीतंत्रे म
हाकालं यजेद्यत्नात् पश्चाद्दे
वीं प्रपूजयेत् कालीकल्पे क
वचे ह्रौं समुद्धृत्य यां रां लां
वां ग्रां च क्रों ततः महाकाल
भैरवेति सर्वविघ्नान्नाशयेति
च नाशयेति पुनः प्रोक्त्वा माया
लक्ष्मीं समुद्धरेत् । फट्स्वाहया

समायुक्तो मंत्रः सर्वार्थसाधकः
ततो देवीं ध्यात्वा यथाशक्ति ज
प्त्वा गुह्यात्यादिना वामहस्ते ज
पं समर्प्य आत्मसमर्पणं कु
र्य्यात् ततः स्तुत्वा प्रदक्षिणी
कृत्य अष्टांग प्रणामं कृत्वा श्री
जगन्मंगलनामकवचं पठेत् ॥
ततो आवरणदेवता देव्यंगे वि
लाप्य संहारमुद्रया अमुकी दे
वि क्षमस्वेति विसृज्य ततेजः
पुष्पनासमं सहृ धारोपयेत
उत्तरे शिखरे देवि भूम्यां पर्वत
वासिनि ब्रह्मयोनि समुत्पन्ने
गच्छ देवि यथान्तरं । इति मंत्रेण ।
तत स्तन्नैवेद्यं किंचिदुच्छिष्ट
चाण्डालिन्यै नमः इत्यैशान्यां
दिशि दत्वा शेषमिष्टेभ्यो दत्वा
किंचित् स्वीकृत्य पादोदकं पी
त्वा निर्माल्यं शिरसि विन्यस्य
यथेच्छं विहरेत् ॥ ततो यंत्रले
पं वामहस्ते कृत्वा सव्यहस्त
कनिष्ठया मायाबीजं विलि
ख्य तया तिलकं कुर्य्यात् तथा
च वामे कृत्वा यंत्रलेपं मायास
व्यकनिष्ठया विलिख्य तिलकं
कुर्य्यात्स्त्रीयेणानेन साधकः ॐ
यं यं स्पृशामि पादेन यं मा

पश्यति चक्षुषा स एव दासतां
यांतु राजानो दुष्टदस्यवः । ज
पकाले तु कर्त्तव्यं कामाजिका का
र्य्या कर्पूरपूर्णा सदा जिका
कर्त्तव्या जपकर्म्मणि इति वि
श्वसारवाक्यात् इयं काम्यजप-
इतिनत्वं । ततो मूलेनाष्टोत्तर
शताभिमंत्रितं पुष्पं चंदनञ्च
धृत्वा त्रैलोक्यं वशमानयेत्
सर्वसिद्धियुतो भूत्वा भैरवोव
त्सराद्भवेत् । अस्य पुरश्चरणं
लक्षद्वय जपः । तथा च काली
तंत्रे । लक्ष मेकं जपेन्मंत्रं हवि
ष्याशी दिवा शुचिः । रात्रौ तां
बूल पूरास्य शय्यायां लक्ष-
मानतः । अवस्था माह स्वतंत्र
दिवा लक्षं शुचिर्भूत्वा हविष्या
शी जपेन्नरः । ततस्तु तद्दशांशे
न होमयेत् हविषा प्रिये । अस्यै
गमस्य कालांतर माह नीलसार
स्वते । लक्ष मेकं जपेन्मंत्रं हवि
ष्याशी दिवा शुचिः । अशुचिश्च
तथा रात्रौ लक्षमेकं तथैव च
दशांशं होमयेन्मंत्री तर्पयेद
भिषेचयेदिति साम्प्रदायिकाः
वस्तुतस्तु कुमारीकल्पे । लक्ष
मेकं जपेद्दिवा हविष्याशी दि-

वा शुचिः रात्रौ तांबूल पूरास्य
शय्यायां लक्षमानतः रात्रिज
पे तु कालो मुण्डमालायां
रात्रे तु प्रथमे यामे तृतीयप्र
हरावधि । निशायां तु प्रजप्तव्यं
रात्रिशेषे जपेन्नतु । एवं लक्ष
द्वयं जप्त्वा तद्दशांशेन मंत्रवित्
अयुते होमयेद्देवि दिवारात्रि
विभेदतः । तेन दिवालक्षं ज
प्त्वा तद्दशांशं होमं कुर्य्यात् ।
रात्रौ लक्षं जप्त्वा तद्दशांशं हो
मं कुर्य्यादिति वृहस्पत्यर्थः ॥
द्विजातीनाञ्च सर्वेषां दिवा
विधि विहोच्यते । शूद्राणा
ञ्च तथाप्रोक्तं रात्राविह म-
हाफलं । अन्यच्च च । दिवैव प्र
जपेन्मंत्रं नतु रात्रौ कदाचन ॥
अथ मंत्रभेदाः ॥
क्रीं । १ । क्रीं क्रीं क्रीं ३ । अ
नयोः पूजाप्रयोगाः सर्वे पूर्व
वत् । ध्यानं सिद्धेश्वरतंत्रे ॥ श
वारूढां महाभीमां घोरदंष्ट्रां
वरप्रदां । हास्ययुक्तां त्रिनेत्रा
ञ्च कपालकर्तृकाकरां ॥ मुक्त
केशीं ललजिह्वां पिबंतीं रुधि
रं मुहुः । चतुर्बाहुयुतां देवीं
वराभयकरां स्मरेत् ॥ अनयोः



पुरश्चरणं लक्षजपः ॥
ॐ क्रीं क्रीं हूं हूं ह्रीं ह्रीं ह्रीं
दक्षिणे कालिके ह्रीं ह्रीं ह्रीं
हूं हूं क्रीं क्रीं ११ अस्याः पू
जादिकं दक्षिणावत्कार्य्यं ।७
पुरश्चरणं लक्षजपः । ॐ क्रीं
क्रीं हूं हूं ह्रीं ह्रीं ह्रीं दक्षिणे
कालिके क्रीं ह्रीं ह्रीं हूं हूं क्रीं
क्रीं स्वाहा १२ । क्रीं क्रीं हूं हूं
ह्रीं ह्रीं ह्रीं दक्षिणेकालिके
क्रीं क्रीं क्रीं हूं हूं क्रीं क्रीं
स्वाहा १२ ॥
क्रीं क्रीं हूं हूं ह्रीं ह्रीं ह्रीं द
क्षिणेकालिके ह्रीं ह्रीं ह्रीं हूं
हूं क्रीं क्रीं १० ध्यानपूजा
दिकं दक्षिणावत् ॥
ह्रीं ह्रीं क्रूं ३ ॥ ॐ
क्रीं क्रीं मे स्वाहा ६ । अस्याः
पूजा प्रयोगः । अस्य भैरव ऋ
षि विराट्छन्दः सिद्धकालीब्र
ह्मरूपा भुवनेश्वरीदेवता नि
जबीजं बीजं लज्जाबीजं श
क्तिः । वर्णन्यासादि दक्षिणाव
त् ध्यानेतु खड्गेन्दीवरखण्डमुण्ड
वरदाभयमुण्डमालिकां शीत्रिनेत्रास
ढ्यो घोरेण कपालोज्वलद्दत्तज
मघा शुक्लकेशी पिबन्ती दिग्व
स्त्रावक्त्रकोटी मणिमयमुकुटा
घेरुण्ता दीप्तजिह्वा पायाज्जीलो
त्पलाभा रवि शशि विलसत्कु
ण्डलालीढपादा । एवं ध्यात्वा
दक्षिणावत् सर्वं कार्यं पुरश्च
रणं तु एकविंशतिसहस्रजपः ॥
क्रीं क्रीं क्रीं ३ । क्रीं क्रीं क्रीं
स्वाहा ५ क्रीं क्रीं क्रीं फट्
स्वाहा ६ क्रीं क्रीं क्रीं क्रीं
क्रीं क्रीं स्वाहा ८ ॥
ऐं नमः क्रीं ऐं नमः क्रीं कालि
कायै स्वाहा १४ एतस्याः पू
जाप्रयोगः । अस्य दक्षिणामू
र्ति ऋषिः पंक्तिछन्दः कालि
कादेवता । ध्यानेतु । चतुर्भुजाकृ
ष्णवर्णा मुण्डमालाविभूषिता
खड्गञ्च दक्षिणे पाणौ बिभ्रती
न्दीवरद्वयं कर्तृकञ्च खर्परञ्चैव क्र
माद्वामेन बिभ्रती । द्यां लिखन्ती
जटा मेकां बिभ्रती शिरसा द्वयी
मुण्डमाला धरा शीर्षे ग्रीवाया
मथ चापरां । वक्षसा नागहा
रञ्च बिभ्रती रक्तलोचना ॥ कृ
ष्णवस्त्रधरा कट्यां व्याघ्राजिन
समन्विता । वामपादं शवहृदि
संस्थाप्य दक्षिणंपदं बिलाप्य
सिंहपृष्ठे लेलिहानाशवं स्वयं

साट्टहासा महाघोररावयुक्ता
सुभीषणा । ध्यानमेवं अन्यत
सर्वं दक्षिणावत् पुरश्चरणं ल
क्षद्वयजपः । अन्यासां मंत्रवर्णा
संख्य लक्षजपः । क्रीं क्रीं क्रीं
दक्षिणे कालिके स्वाहा । ११
क्रीं हूं क्रीं दक्षिणे कालिके
फट् १० ॥ क्रीं क्रीं हूं हूं
ह्रीं ह्रीं दक्षिणेकालिके क्रीं
क्रीं हूं हूं क्रीं क्रीं स्वाहा १०
एतासां दक्षिणामूर्ति ऋषिः पं
क्तिछन्दो दक्षिणकालिकादे
वता । अन्यत् सर्वं दक्षिणावत्
क्रींस्वाहा ३ भैरवोऽस्य ऋषिः
क्रीं क्रीं हूं हूं ह्रीं ह्रींस्वाहा
८ ॥ क्रीं हूं क्रीं स्वाहा ।
५ अस्य पंचवक्त्र ऋषिः ॥
क्रीं क्रीं क्रीं हूं हूं क्रीं क्रीं
स्वाहा ९ ॥ क्रीं दक्षिणका
लिकेस्वाहा ९ ॥
क्रीं हूं क्रीं क्रीं हूं क्रींस्वा
हा ८ ॥ क्रीं क्रीं क्रीं क्रीं
क्रीं हूं हूं क्रीं क्रीं क्रीं क्रीं
क्रीं हूं हूं स्वाहा ॥ १६ ॥
नमः ऐं क्रीं क्रीं कालिकायै
स्वाहा ॥ ११ ॥ नमः ओं
क्रों क्रों क्रों फट् स्वाहा ॥
कालि कालि हूं १४ । एता
सां कृष्णादिकं पूजादिकञ्च
दक्षिणावत् पुरश्चरणं लक्षज
पः । अथ गुह्यकालिकामंत्राः ।
क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं
गुह्येकालिके क्रीं क्रीं क्रीं
हूं हूं ह्रीं ह्रीं स्वाहा १९ ।
क्रीं हूं ह्रीं गुह्ये कालिके
क्रीं क्रीं हूं हूं ह्रीं ह्रींस्वाहा १६
क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं
गुह्ये कालिके स्वाहा १४ ।
क्रीं हूं ह्रीं गुह्ये कालिके
हूं हूं ह्रीं ह्रीं स्वाहा १४ ।
क्रीं हूं ह्रीं दक्षिणे कालि
के हूं हूं ह्रीं ह्रीं स्वाहा ॥
१५ हूं ह्रीं गुह्ये कालि
के क्रीं क्रीं हूं हूं ह्रीं ह्रीं
स्वाहा ॥ १५ क्रीं गुह्येका
लिके क्रीं स्वाहा ९ ॥
क्रीं दक्षिणेकालिके क्रींस्वा
हा १० ॥ एतेषां सर्वं पूर्व
वत् । बलिमंत्रस्तु । एह्येहि
जगन्मातर्जगतां जननि गृ
ह्ण गृह्ण मम बलिं सिद्धिं देहि दे
हि पशुबलयं कुरु कुरु क्रूं क्रूं क्रीं
क्रीं फट् फट् ॐ कालिकायै
नमः फट्स्वाहा ॥ यथागुह्यका

ल्या ग्रयंमंत्रः । एह्येहि गुह्य-
कालि मम बलिं गृह्ण मम शत्रू
न्नाशय नाशय खादय खादय
स्फुर स्फुर छिंधि छिंधि सिद्धिं
देहि देहि हूं फट् स्वाहा । अथ
भद्रकाल्यादिमंत्राः । क्रीं क्रीं
क्रीं हूं हूं ह्रीं ह्रीं भद्रकाल्यै
क्रीं क्रीं क्रीं हूं हूं ह्रीं ह्रीं स्वा
हा १०। क्रीं क्रीं क्रीं हूं हूं ह्रीं
ह्रीं श्मशानकालि क्रीं क्रीं
क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ।
११। क्रीं क्रीं क्रीं हूं हूं
ह्रीं ह्रीं महाकालि क्रीं क्रीं
क्रीं हूं हूं ह्रीं ह्रीं स्वाहा ।
१२। एतासां पूजादिकं दक्षिणा
वत् । ध्यानं तु । महामेघप्र
भां देवीं कृष्णवस्त्रपिधायिनीं
ललज्जिह्वां घोरदंष्ट्रां कोटरा
क्षीं हसन्मुखीं । नागहार
लतोपेतां चंद्रार्द्धकृतशेखरां
घां लिखंतीं जटामेकां ले
लिहानां शवं स्वयं ॥ ना
गयज्ञोपवीतांगीं नागशय्या
निषेदुषीं । पंचाशन्मुंडसंयुक्त
वनमालां महोदरीं । सहस्र
फणासंयुक्तं अनंतं शिरसोपरि
चतुर्दिक्षु नागफणावेष्टितां


ह्यकालिकां । तक्षकसर्पराजे
न वामकंकणभूषितां । अनंत
नागराजेन कृतदक्षिणकंकणां
नागेन रसनाहारकटिस्थितां रत्न
नूपुरां । वामे शिवस्वरूपं तं क
ल्पितं वत्सरूपकं द्विभुजां चिंतये
द्देवीं नागयज्ञोपवीतिनीं । नर
देहसमावद्ध कुंडलश्रुतिम
ण्डितां । प्रसन्नवदनां सौ
म्यां नवरत्नविभूषितां । ना
रदाद्यैर्मुनिगणैः सेवितां शिव
मोहिनीं साट्टहासां महाभीमां
साधकाभीष्टदायिनीं । गुह्यका
ली इत्युपलक्षणं । भद्रका
लीमंत्रांतरं । प्रासादबीजमुद्धृ
त्य काली इति पदमुद्धरेत् महाका
लिपदं चोक्त्वा किलियुग्मततः
परं । अस्त्र मग्निप्रियांतोऽयं
भद्रकाल्या महामनुः ॐ का
लि महाकालि किलिकिलि
फट्स्वाहा ॥ ध्यानं यथा ॥
क्षुत्क्षामा कोटराक्षी मसिम
लिनमुखी मुक्तकेशी रुदंतीना
हं तृप्ता वदंती जगदखिलमिदं
ग्रासमेकं करोमि । हस्ताभ्यां धा
रयंती ज्वलदनलशिखासन्नि
भं पाशयुग्मं दंतैर्जंबूफलाभैः

परिहरतु भयं पातु मां भद्र
काली । अस्याः पुरश्चरणादि-
कं दक्षिणकालीतंत्रवत् इति के
चित् । वस्तुतस्तु पुरश्चरणमष्टो
त्तरसहस्रजपः । इति कृष्णानंदकृ
ततंत्रसारः ॥ श्मशानकाली
मंत्रादिकं तत्रैव द्रष्टव्यं ॥
अथ दीपान्वितापुपामापूजा ।
यामले । कार्तिके मासि कृष्णा
यां पंचदश्यां महानिशि । पूज
येत् योऽतियत्नेन कालीविद्या
प्रसीदति मृन्मयीं प्रतिमां कृ
त्वा महाकालीं प्रपूजयेत् ग्रा
मके शास्त्रे हितायां तुलार्के य-
स्त्वमावास्या निशार्द्धे घोरदक्षि
णां । पूजयेद्धि विधवत्कृत्वा सर्व
सिद्धीश्वरो भवेत् । इति । पक्षे
अर्द्धरात्रे पूजाया मुख्यकालः ॥
स च कालो यद्युभयदिने तदापू
र्वदिने पूजा यथा तत्रैवान्यत्रो
भयदिने प्रदोषकालेऽसत्युत्त
यदि उमामाहेश्वरीसा च तिथिः
सिद्धिप्रदा सतां । बलिदानेबलि
तिथावात्मनाशकरं परं ॥ त
त्र लग्नकर्त्तव्ये बलिदानविस
र्जने । मंत्रसिद्धिकरं तत्र परे
ह्निजपसाधने । रात्रौ पूजा-

प्रकर्त्तव्या रात्रावेव विसर्जनं ॥
प्रकाशे सिद्धिहानिः स्याल्लोपने
सिद्धि रुत्तमा । तथा कालीक
ल्पे । तुलार्कैवकृष्णपक्षे पंच
दश्यां महेश्वरी । यथोपचारैः
संपूज्य महानिशि त्वपो भवेत्
प्राप्ति भौमदिने चेत् स्यात्ततः
शतगुणं फलं । तत्राभयदिने
भूतयुक्तकुहौ महानिशि । इ
मां याज्ञां कारयित्वा चक्रवर्ती
भवेन्नृप इति महेश्वरीदक्षिण
काली तत्प्रकरणेकत्वात् ॥
कार्त्तिकामावास्यायां कालीपू
जा हेतु मार्ह विष्णुमासे का
र्त्तिके कृष्णपक्षे तु पंचदश्यां म
हानिशि । आविर्भूता महाका
ली योगिनीकोटिभिः सह । अ
तोऽत्र पूजनीया सा तस्मिन्न ह
नि मानवैः । बलि पूजादिकं स
र्वं निशायां क्रियते तु यत् ॥
तत्तदत्तयतो याति कालीविद्या
प्रसीदति । महानिशि अर्द्धरात्रे ।
तथाच अमरकामाख्यातंत्रे । प्र
दोषकाले च देवेशि दीपयात्रादि
नेष्विच । अमावास्या समासाद्य
मुख्यरात्रो विचक्षणः । मृन्म
यीं प्रतिमां कृत्वा दीपादिभिरल

कृतं । वलिं नानाविधं दद्या
त् वाद्यभाण्ड समन्विते । नृ
त्यगीतं कौतुकञ्च यावत्सू
र्य्योदयं भवेत् । प्रातःकाले
शुक्लतोये स्थापयेदर्शिताम्बि
मिति । एतेनास्या दीपयात्राप्य
र्द्धरात्रे बोध्या । आविर्भूतेत्य
नेनार्द्धरात्रे जन्मश्रवणात्त
त्रैव पूजा युज्यते । तथाच
ब्रह्मवैवर्त्तपुराणे रात्रौ निशीथ
व्यापिन्याममावास्या स्थितैव त
दृष्टीतले समायाता कालीदि
ग्वसनान्विता । अतस्तामर्चयेत्स
म्यग्देव देवीं द्विजातयः । पूज
येदात्मनो भक्त्या पशुपुष्पाद्यै
रुपदैरिति तथाशुभसमापनान्तरे ।
निशा तु परमेशानि सर्व्वथा
सत्सुपासते । प्रहरे च गते रा
त्रौ चण्डिके द्वे परे च ये । महा
निशास्समाख्याता तत्रस्थाति
महानिशा अर्द्धरात्रे गते देवि
पशुभावो न पूजयेत् ॥ अर्द्ध
रात्रे गते अर्द्धरात्रात् परे । तथा
दुर्गोत्सवे तु या पूजा तत्स
मकालं भवेत् । अष्टकोशेम
हेशानि तत्सर्व्वमष्टनोपमे ॥
सममकोशाके देवि सर्व्वं दीयोप
मे भवेत् अष्टमकोशाके देवि दु
र्गोत्सवे न संशयः । अतः परं महे
शानि विषमत्स्ये न संशयः एत
त्सर्व्वं महेशानि पशुभावेन योषि
दिते । अर्द्धरात्रस्य गौणत्वश्र
वणात् पशूनां यत्र पूर्व्वदिने अ
र्द्धरात्रव्यापिन्यमावास्या न तु त
स्यां प्राप्तिः परदिने च रात्रेः पंच
मुहूर्त्तव्यापिनी तदा परेद्युः पू
जेति चेन्न गुणसाध्य न तेषां
वचनस्त्वनियतपूजादिपरं । का
र्त्तिकामावास्यायामर्द्धरात्रे ज
न्मनिमित्तकपूजायां विशेषेणा
भिधानात् पशुभिरपि पूर्व्वस्मृ
तस्मात्ते पूर्व्वदिने अर्द्धरात्रएव
पूजा कार्य्या यथा श्रीकृष्णपू
जायाः सामान्यतो निशायाम
कर्त्तव्यत्वेपि जन्माष्टम्यामर्द्धरात्र
कर्त्तव्यता मुख्यत्वमेवेति । एवंच य
त्र पूर्व्वदिने अर्द्धरात्रात् परममा
वास्या परदिने अर्द्धरात्रात् पूर्व्व
मेव तत्र पशुभावितः परदिने
वीरदिव्ययोश्च पूर्व्वदिने पूजा
कार्य्या इति प्रमाणं गोप्यगो
पत्लीलावतीपद्धपटले । ए
वं यत्र पूर्व्वदिने अर्द्धरात्रव्यापि
न्यमावास्या परदिने तथा भू

तापि कुजवारादियुक्ता तत्रा
पि पूर्व्वदिने पूजा गुणफलकु
जवारादिकं मपेक्ष्य चतुर्दशी
योगस्य मुख्यत्वात् तथोक्तं श्या
मके शान्ते कुजवारे लक्षगुणं
पूर्व्वविद्धा ततोऽधिकेति । कुज
वार इति शनिवारोपलक्षणं
शनि भौमदिने चेत् स्यात्ततः
शतगुणफलमिति श्रवणात्
कार्त्तिकामावास्यायां कालीपू
जाया नित्यतामाह स्मार्त्ततेः
वर्षे वर्षेच कर्त्तव्यं कालिका
या महोत्सवं । कार्त्तिके तु
विशेषेण अमावास्यां निशार्द्ध
के इति । देव्यागमे च । प्रतिसं
वत्सरं कुर्य्यात् कालिकाया
महोत्सवं । कार्त्तिके तु विशे
षेण अमावस्यां निशार्द्धके ।
तत्र संपूजयेद्देवीं भोग मोक्ष
प्रदायिनी । इति । एतच्चात्र
फ कार्त्तिकपदं गौणचान्द्र कार्त्ति
कपरं जन्मकालतिथिकस्यत्वा
त् तत्र नानावचने तुलार्कश्र
वणात् सौरकार्त्तिकपरं तथाच
ति यस्मिन् वर्षे तुलार्के रात्रौ
नामावास्या प्राप्तिः तत्र वर्षे कु
सलोपः स्यात् एवं यत्र वर्षे
तुलार्के दर्शद्वये तत्रान्त्यव
साय्यापत्तेः । स्पष्टमुक्तं विधान
पारि तेत्र कार्त्तिकस्याप्यमावा
स्या गौणचेद् प्रमाणतः । नि
शीथव्यापिनी यात्तु तस्यां पूजां
समाचरेत् । निशीथमर्द्धरात्रं ।
एवं यत्र पूर्व्वदिने निशीथव्या
पिन्यमावास्या कन्यार्के परदि
ने च तुलार्के अर्द्धरात्रात् परं मु
हूर्त्तादिव्यापिनी तत्रापि पूर्व्वदि
ने निशीथस्य मुख्यकालत्वानुरो
धात् भूततिथि योगानुरोधाच्च
तुलार्कस्य दिनभेदनियामकत्वे
नाश्रुतत्वात् । परंतु तुलार्कघटे
नानावचने पठ्यते तत् प्राशि
काभिप्रायेण गुणफलाभिप्रा
येणावगन्तव्यं । अत एव तिथितत्त्वे
तत्मादिपुराणं । कृत्तराशिविशे
षेण यत्कर्म्म विहितं नवैः देवे
वाप्यथवा पैत्र्ये तत्कन्यापि रे
प्यते इति अगस्त्यसंहितायां
मेषे एषाणि संग्रामे लग्ने कर्क
टकाह्वये । भानिहासीत् सक
लया कौशल्यायां परः पुमान्
इति अत्र मेषार्के जन्मश्रवणे
मीनार्केपि कदाचित् उपवा
सः । यत्तु तेजीय मितिकृत्वा



पठंति तुलार्के त्वद्दराते या-
दीपयात्रा तिथि र्भवेत् । तत्र
संपूजयेत् काली सर्वकामार्थ
सिद्धये निशार्द्धे सतिथिर्नोक्ति
तदयः कालसंयुता । तत्रापि पू
जयेत् काली तुलार्के नैव लं
घयेत् । इति तदमले । समल
कत्वेपि तुलार्के इत्यत्र तु शब्दः
कन्यार्कव्यावर्तकः तेन तुलार्के
कन्यार्के वा इत्यर्थः । तुलार्क
मात्रपरत्वे प्रतिसंवत्सर मन्य-
स्य बाधापत्ते रुक्तत्वात् । तुला
र्के नैव लंघयेदित्यस्य तुलार्के
विहितपूजां नत्यजेत् इत्यर्थः
तुलार्के विहितपूजायां गौणका
र्तिकत्वेन कर्तव्यतायां विशेषता
त् पर्यवसानकत्वात् । यद्वा सर्व
त्र तुलार्कवद्विकत्वेन तुलार्क
स्यामावास्याया उपलक्षणतया
न्वयः न तु विशेषणतया । न
वा पूजाया मपितदन्वयः । तेन
तुलार्कोपलक्षितामावास्यायां
निशीथे काली पूजयेत् इति-
विधिना गौणचान्द्र कार्तिका
मावास्यालाभः तस्या मेव तु
लार्कसंबंध नियमात् । अन्यथा
तुलास्वरयावद्व्याप्ताभावेन करा
चित् तत्पर प्रतिपदादिदर्शांतो
तस्य मुख्यकार्तिकत्वानुपपत्तिः
मुख्यकार्तिकामावास्यायाः कदा
चित् वृश्चिकेसत्वात् नतु तुला
र्के नियमः तथाच तुलार्कोप
लक्षितामावास्यायां निशीथे कालीं पू
जयेदिति पर्यवसिते तुलार्कं नै
व लंघयेदित्यत्र तुलार्कपदञ्च
तुलार्कोपलक्षितामावास्यापूजा
परं संकल्पवाक्ये तु कार्तिकेमा
सीत्युल्लेख्यं नतु वाष्पलेखोपि
गौणचान्द्रेण विधानात् । केचि
त्तु उपलक्षणतया अमावास्या
यां मुख्यत्व नामधेयेन तुलारा
शिस्थे भास्करे इत्युल्लेख्यं इति
भास्करपदोत्तर सप्तम्या उपल
क्षणतया तत्कालसंबंध बोध
नसामर्थ्यात् इति वदंति ॥
तंत्रांतरे । तुलाराशिं गते भानौ
दीपयात्रा निशासु च पूजयेत्
कालिकां देवीं धर्मकामार्थसि
द्धये । तंत्रे । अर्द्धरात्रात्परस्तात्
यावद्दंडचतुष्टयं ॥ सा महा
रात्रिरुद्दिष्टा यद्दत्तमक्षयं भवे
त् । महानिशात्र विज्ञेया अर्द्धरा
त्रात् परं शिवे । नाडीचतुष्ट
यं प्रोक्तं तत्र पूजा महाफला ॥

विद्योत्पत्ति तंत्रे ॥ दीपोत्सव
चतुर्दश्यां ममायां योगमेव च
कालरात्रिर्महेशानि काली-
तारा प्रियंकरी । ज्ञानार्णवे
महारात्राववमावास्यां दक्षिणा
याः प्रपूजने । कार्तिके मासि-
कृष्णाणि कालीप्रीतिकरं परं ।
तत्रापि च निशीथे तन्महासिद्धि
प्रदं स्मृतं । निशीथात् परतो
देवि यत्तु नाडीचतुष्टयं । सा
महारात्रि रुद्दिष्टा तत्र पूजा म
हाफला ॥ तारतम्येन देवे
शि पूजायाः फलकल्पनं ॥
कुलार्णवेपि भूतयुक्ता म
हेशानि महारात्रौ तथा कुहूः
सा कालरात्रि रुद्दिष्टा काली
तारा प्रियंकरी ॥ तत्र पूजा
तयोः कार्या नाना पशुवि-
हिंसनं बलिदाने बलिनिष्ठा-
त्म नाशकरं शिवे । कुल
चूडामणौ । निशिथः पातु
एं पर्वदर्शः कोटिगुणोत्तरः । फ
लोपचार वकुले ज्येष्ठे सूर्य-
तुलागमे । एतल्लयित्वा महाका
लीतरो निर्वाणमृच्छति । चतु
र्वर्गप्रदे दर्शे कार्तिके कालि-
कार्चनं । अनेन फलदं तत्प-
र्वं युक्तेच पर्वणि निशार्द्धे पूज
येद्देवीं त्वमुंडां मुंडमालिनीं
पश्चात् किलीरवे घोरे सर्वप्रा
णिभयंकरे । कालीकुलसद्भा
वे दीपोत्सवे चतुर्दश्या संमि
श्रा या भवेत् कुहूः । तस्या
यामासी रात्रिः सोच्यते काल
रात्रिका । तस्यां पूजा प्रकर्तव्या
कालीताराप्रियंकरी ॥ तुला
मकर मेषेषु कन्यायां मिथुने
तथा । भूतविद्धाप्यमावास्या
पूज्या भवति यत्नतः । इति
जीमूतवाहनकृत धर्मरत्ने का
लविवेकधृतहारीतवचनं ॥
शिवरात्रिप्रकरणे देवलोक्तम
हानिशा यथा । महानिशे द्वे
घटिके रात्रे र्मध्यमयामयोः
इति गंगामाहात्म्यप्रकरणेधृ
तस्मृतिरत्नाकरधृता तु महानिशा
तु विज्ञेया मध्यमं प्रहरद्वयं तत्र
स्नानं न कुर्वीत नित्यनैमित्तिका
दृते । ब्रह्मवैवर्ते श्रीकृष्णजन्मख
ण्डे यत्मुहूर्तं व्यतीते तु रात्रे
र्व महानिशा कृष्णजन्माणवे
दीपायनः । महानिशा तु वि
ज्ञेया मध्यं मध्यमयामयोः । दे
आगमे अमावास्या महारात्रे-



दक्षिणां पूजयेत् परां । कुल
कृत्येच यः कुर्यात् सगच्छे
च्छिवसन्निधिं तुलायांभौमवा
रेचअमावास्यायदाभवेत् । ति
थिःसापि महापुण्या शिवेनप
रिकीर्त्तिता । वर्षे अन्तर्भि यत्
पुण्यंविधिवत् पूज्यचंडिकां ।
तत्फलंलभतेवीर अमावा
स्यांनिशार्द्धके कालीकुलतंत्रे
निशार्द्धे पूजयेद्देवीं श्मशाना
लयवासिनीं इति । मालिनीतं
त्रे । पतत्संध्यात्रयेणैव अर्द्धरा
त्रौतुवन्दना । महारात्रावुपित
स्या कार्य्या देशिकसत्तमैः ।
स्वापकाले यथा । श्रीदेव्यु
वाच । देवदेव महादेव संसा
रार्णवतारक । देवतायाःस्वाप
कालं कथयस्व दयानिधे । श्री
शिव उवाच । चतुर्दश्यांत् परं
देवि रात्रेः प्रथमयामकः स्वा
पकालस्तुकथितः पूजानर्थ
फलप्रदा । पूजा होमः स्तोत्रनती
जागरकाले प्रशस्यते इतिका
लीकुलामृततंत्रे । अन्यच्च मथ
ने देवि देवासुरगणाःपुरा । ता
रात्रौ त्वां समस्तौषु यत स्त्वंवि
यद्रूपिणी । आविर्भूता महा
काली ब्रह्माण्डनाशनाशिनी ।
तद्दृष्ट्वा देवा दैत्याश्च भीताः सं
शरणांगताः तेषां अपि भयेद
ष्ट्वा भीतोहं विषसन्निधौ । गत्वा
ध्यानपरोभूत्वाविधे पातुं समा
रभे । एवंकाया महाविद्या आ
विर्भूताच मे हृदि । तल्लोकुकां
निशार्द्धेच देवदानव निद्रिते
मनुष्य पशुपक्षादौ निद्रिते
चाप्यजेतेषु । तस्मिन्कालेम
या पूजा देवेशाप्यस्तवेणतु ॥
देव्युवाच ॥
कुत्र काले त्वया पूजा देवेशां
प्यस्तवेणच । महादेव उवाच ।
अर्द्धरात्रात्मुहूर्त्तेच मया चेदेश
पूजिता ततोमुहूर्त्तेस पूज्यावीरे
णाप्यस्तवेणच । अन्तस्याधाःपा
पावःस्यात् वैवः शेषः प्रकीर्त्तितः
स्वायंभुवेन मनुना मर्त्येनेन
प्रपूजिता । इति गोप्यरोपन
लीलागमे ८ पटलः ॥
कालीकुलसर्वस्वे । निशार्द्धे
सातिथि नास्ति तदूर्द्धं भूतसं
युता । तथापि पूजयेद्देवीं भू
तयुक्तां नलेचयोदिति ॥
अथरक्षाकालीपूजाप्रमाणं ।
उत्तरकामाख्यातंत्रे मारीभये

समायाते दुर्भिक्षभयपीडिते ।
पूजयेत् परयाभक्त्या कालीं
कालविनाशिनीं । रक्षणात्सर्व
भूतानां रक्षाकालीतिसास्मृता
स्तानार्णवे सर्वविघ्नापशान्त्यर्थं
रक्षाकालीं प्रपूजयेत् । शनिमं
गलवारेच प्रदोषे पूजयेत् शिवां
चतुर्दश्याममायात्वानवम्याम
ष्टमीतिथौ । पूजनात् वरदा
काली यथेप्सितफलप्रदा ।
कालीकुलसर्वस्वे निशामुखेम
हेशानी कालीरक्षार्थमादरा
त् पूजनीयात्वभिः सर्वैरुपचार
समन्वितैः ॥ विनशाठ्येनकर्त्तव्यं
यथाविभवविस्तरैः निरूत्तरतं
त्रे । बलिदानंतु विधिवत् मधु
भिःपायसेनच एभिर्मोदकसंचै
श्च पृथुकैः श्रीफलैरपि । नाना
फलैःशाकरूपैः पंचतत्वैर्महे
श्वरी । पूजयेद्विघ्नशान्त्यर्थं का
लीरक्षाविधायिनीं । प्रदोष
समये पूजा कर्त्तव्या भूतिमि
च्छता । रात्रौ विसर्जनंकार्य्यं
क्रीडा कौतुकमंगलैः । नै
रुत्ततंत्रे । अथ वक्ष्ये महेशानि
घोरे मारीभयेतथा । उत
पातिकेचडिंभिसे युद्धे वा ।
दुर्भयागते । पूजां कुर्यात्म
हाकाल्याः रक्षार्थं पंचपर्वसु ।
प्रदोषकालेसंपूज्य निशायांतु
विसर्जयेत् मुहूर्त्तद्वितयेकालः
प्रदोषोःस्तमयात्ततः । तंत्रान्तरे
निशामुखे महाकालीमहा
मारीभये शिवां । कालींत्रै
लोक्यरक्षार्थं पूजयेत् रत्न
णात्मिकां ॥ ॥
अथ फलहारीपूजाप्रमाणं ।
मधुमासे सिताष्टम्यां वैशाख
त्रितये: इति पौर्णमास्यां तथा
ज्येष्ठे अमायाञ्च महेश्वरि ॥
इत्यादि । अमायां कार्त्तिकेचै
व नवम्यां शुक्लपक्षके । इति
कात्यायनीतंत्रे २८ पटलः ॥
ज्येष्ठेमासि तथामायां सफले
कालिकार्च्चनं इत्युत्तरकामाख्या
तंत्रे ९ पटलः ज्येष्ठेमासि अ
मायां वै मध्यरात्रे महेश्वरि । पू
जयेत् कालिकां देवीं नानाद्र
व्योपहारकैः तत्रैव सितपक्षे
तु पंचदश्यां निशार्द्धके । पूज
येच्च फले लीलैः शाक्तिनोप
पि कालिकां ॥ इतिमाया
तंत्रे २७ पटलः ॥ अ
थरटंतीपूजाप्रमाणं ॥

माघे मासस्य सितेपक्षे रटन्त्या-
ख्या चतुर्दशी तस्यां निशार्द्ध-
समये पूजयेन्मुण्डमालिनीं ।
इति मायातन्त्रे १७ पटलः । म
करस्थे रवौ कृष्णचतुर्दश्यां नि
शार्द्धके पूजयेद्दक्षिणां का
लीं धर्मकामार्थसिद्धये इत्यु
त्तरकामाख्यातन्त्रे ६ पटलः ॥

श्यामाकः पुं तृणधान्यभे
दः । श्यामा इति भाषा । तत्पर्य्या
यः । श्यामकः २ श्यामः ३ त्रिबी
जः ४ अविप्रियः ५ सुकुमारः ६
राजधान्यम् ७ तृणबीजोत्तमः ८
अस्य गुणाः मधुरत्वं । तिक्तत्वं
कषायत्वं । लघुत्वं । शीतलत्वं
वातकारित्वं कफपित्त व्रणदो
षनाशित्वं । संग्राहित्वञ्च ॥
इति राजनिर्घण्टः । अपिच ।
श्यामाकः शोषणो रूक्षो वा
तलः कफपित्तहृत् । इति भा
वप्रकाशः ॥

श्यामांगः पुं बुधग्रहः । इति
त्रिकाण्डशेषः । कृष्णकलेवरे त्रि
यथा । श्यामांगीं शशिशेखरां
निजकरैर्दानञ्च रक्तोत्पलं
रत्नाढ्यं चषकं परं भयहरं
संविभ्रतीं शाश्वतीं । मु
क्ताहारलसत् पयोधरनतां
नेत्रत्रयोल्लासिनीं वन्दे देवसु
रपूजितां हरवधूं रक्तारविन्दस्थि
तां । इति तन्त्रसारे भुवनेश्वरी
ध्याने ॥

श्यामाक्षी स्त्री नीलाक्षी । इ
ति राजनिर्घण्टः ॥

श्यालः पुं पत्नीभ्राता । शाला
इति भाषा । इत्यमरः । तत्प
र्य्यायः । वाक्कीरः २ श्यालिकः
३ । इति शब्दरत्नावली । श्वशु
र्य्यः ४ आत्मवीरः ५ इति जटा
धरः । तन्मरणे एकरात्राशौचं
यथा आचार्य्यपत्नीपुत्रोपा
ध्यायमातुलश्वशुरश्वशुर्य्य
सहाध्यायिशिष्येष्वेकरात्रेणेति
इति शुद्धितत्त्वे । दक्षस्मृतिश्च ॥

श्यालिकः पुं श्यालः । इति शब्द
रत्नावली ॥

श्यालिका स्त्री पत्नीभगिनी ।
शाली इति भाषा तत्पर्य्यायः
श्याली २ केलिकुञ्चिका ३ ।
इति शब्दरत्नावली ॥

श्यावः पुं कपिशः । इत्यमरः ।
सतु कृष्णपीतमिश्रवर्णः । इ
ति भरतः । तद्युक्ते त्रि ॥

श्यावदन्तं त्रि कृष्णपीतमिश्रित


वर्णदन्तयुक्तः । इति सिद्धान्त
कौमुदी ॥

श्यावदन्तः } स्वाभाविकक
श्यावदन्तकः } ष्णवर्णदशनयुक्तः
प्रधानदन्तद्वयमध्यस्थसूक्ष्मदन्तवि
शिष्टः प्रधानदन्तोपरिदन्तो वा तद्
युक्तः । यथा विष्णुः । ब्रह्मन
रकानुभूतदुःखानां तिर्य्यक्त्व
मुत्तीर्णानां मानुष्ये लक्षणा
नि भवन्ति कुष्ठनिपातकी ब्र
ह्महा यक्ष्मी सुरापः श्यावदन्त
कः सुवर्णहारी कुनखी । गुरुत
ल्पगो दुश्चर्म्मा इत्यादि श्यावद
न्तकः स्वभावकृष्णदन्तः । प्रधा
नदन्तद्वयमध्यवर्त्तिसूक्ष्मदन्तः ।
प्रधानदन्तोपरिदन्तोऽयमिति के
चित् । कुनखी संकुचितनखः
दुश्चर्म्मा स्वभावतः अनावृत
मेढ्रः अतएव महारोगिणो
यावज्जीवमशौचमाह कूर्म्मपु
राणे क्रियाहीनस्य मूर्खस्य म
हारोगिण एव च । यथेष्टाचर
णस्याहुर्म्मरणान्तमशौचकं
क्रियाहीनस्य नित्यनैमित्तिक
क्रियानुष्ठानहीनः मूर्खस्य गा
यत्रीरहितस्य सार्थगायत्रीर-
हितस्येति हरधरः । महारोगि
णः पापरोगाक्रान्तस्य रो
गवतः ते च उन्मादस्त्वग्दोषो
राजयक्ष्मा श्वासो मधुमेहो भ
गन्दरः उदरं अश्मरी इत्यष्टौ पा
परोगा नारदोक्ताः यथेष्टा
चरणस्य पतितवेश्यासक्त
स्य एवञ्च भविष्यपुराणोक्त
पतितोद्धारणप्रायश्चित्ते अ
कृतप्रायश्चित्तानां कुष्ठादी
नां दाहे वैधत्वं । अन्यथैषां
प्रायश्चित्तोपदेशो विफलः
स्यात् । यथा विष्णुः । कुनखी
श्यावदन्तश्च द्वादशरात्रं कृच्छ्रं
चरित्वोद्धरेयातां तद्दन्तनखौ
इति । अत्र द्वादशरात्रे प्राक
रूपं तत्र पंचधेनवः । न तु प्रा
जापत्यं । तदाह कर्त्तुं यतिचा
न्द्रायणेन विषमशिष्टत्वात्
तत्र वरुणा सेकधर्म्मणामि
ति वचनात् प्राकाशितत्वा
त् । कुष्ठादीनामपि प्रायश्चित्ते
अतएव प्रायश्चित्तविवेके कुष्ठ
एव दुश्चर्म्मादिष्वपुरुषमिति
महापातकादतिपातकस्य गुरु
त्वात् तच्छेषेपि प्रायश्चित्ते
द्विगुणं इति शुद्धितत्त्वं ॥

श्येतः पुं शुक्लवर्णः तद्वति त्रि

इत्यमरः ॥
श्येनकोलकः पुं मत्स्यविशेषः फुँटी इति भाषा । यथा सफरः श्येनकोलकः । इति हारावली ॥
श्येनः पुं पाण्डुरवर्णः । इति मेदिनी । पक्षिविशेषः । स ञ्चाल इति राजइति च भाषा तत्पर्यायः । शशादनः २ पत्री ३ इत्यमरः । कपोतारिः ४ पतङ्गीकः ५ इति शब्दरत्नावली । घातिपक्षी ६ ग्राहकः ७ मारकः ८ इति जटाधरः ॥ शशादः ९ क्रव्यादः १० स्रुवः ११ वेगी १२ खगान्तकः १३ करगः १४ नीलपिच्छः १५ लेवकर्णः १६ गृध्रप्रियः १७ रणपक्षी १८ पिच्छबाणः १९ स्थूलनीलः २० भयङ्करः २१ इति राजनिर्घण्टः । शशघातकः २२ इति भावप्रकाशः ॥ अस्य मांसगुणाः प्रसहशब्दे द्रष्टव्याः ॥ तस्य शुभाशुभसूचकत्वं यथा प्रदक्षिणीकृत्य वदेद् व्रजतो यात्रासु वामेन यातः प्रवेशे । श्येनाः प्रशस्ताः शकुनस्वरा श्येनाः ताः प्रदीप्ता विनेत्रा स्ते· श्येनो नदतो दक्षिणवामपृष्ठभागेषु भार्गवः स्थितिमादधाति तिष्ठन् भरत्नाग्रतये करोति युद्धे जयं छत्र रथध्वजस्थः इति वसन्तराजशाकुने श्र हणवर्गः । यागविशेषः । यथा श्येनेनाभिचरन् यजेत । इति तिथ्यादितत्त्वधृता श्रुतिः ॥
श्येनच्छदा स्त्री दन्तीवृक्षः । इति राजनिर्घण्टः ॥
श्येनचित् पुं श्येनपालितवतकः इति केचित् ॥
श्येनी स्त्री श्वेतवर्णा । इति जटाधरः श्येनपत्नी च ॥
श्यै उ गतौ । इति कविकल्पद्रुमः । तालव्यादिः ऐस्पाद्योपधः । उ श्यायते । इति दुर्गादासः ॥
श्येनपाता स्त्री मृगया । इत्यमरः ॥
श्योनाकः पुं वृक्षविशेषः ॥ शोनागाछ इति भाषा । तत्पर्यायः मण्डूकपर्णः २ पत्रोर्णः ३ नटः ४ कट्वङ्गः ५ टुण्टुकः ६ शुकनासः ७ ऋक्षः ८ दीर्घवृन्तः ९ कुटन्नटः १० शोनकः ११ अरलुः १२ इत्यमरः श्योनाकः ॥

१३ इति भरतः । शोणकः १४ ॥ अरटुः १५ दीर्घवृन्तकः १६ ॥ इति शब्दरत्नावली पृथुशिम्बिः १७ शल्यकः १८ इति जटाधरः । कटम्भरः १९ मयूरजङ्घः २० । अरलुकः २१ प्रियजीवः २२ ॥ तद्भेदा यथा श्योनाकः पृथुशिम्बोन्या भल्लूको दीर्घवृन्तकः । टेण्टुकः पीतवृक्षश्च शुकनासो मुनिद्रुमः ॥ निःसारः फलवृन्ताकः इति पञ्च वसन्तकः मण्डूकवर्णः पत्नागो जेवृकः पीतपादकः । वातारिः पीतकः शोणकः विरोचनः प्रसरेष्टा बहिर्जेत्तानेत्र नेत्रमित्राभिदः । अन्नकान्तरे टेंटुक स्थाने टुण्टुकफलवृन्ताक स्थाने फल्गुवृन्ताकपीतपादक स्थाने पीतपादप· कुलेट स्थाने कुनट बहिर्जेच स्थाने बहिर्जेन इति च पाठः तयोर्गुणाः । श्योनाकयुगले तिक्तं शीतञ्च त्रिदोषजित् । पित्तश्लेष्मातिसारघ्नं सन्नि· पातज्वरापहम् । इति राजनिर्घण्टः । अपि च श्योनाकः शोषणाख्यः स्यान्नटकट्वङ्गटुण्टुकाः मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः दीर्घवृन्तोऽरलुः स्यापि पृथुशिम्बकटम्भराः श्योनाको दीपनः पाके कटुकस्तुवरो हिमः । ग्राही तिक्तोऽनिलश्लेष्मपित्तकासप्रणाशनः । कटङ्कस्य फले बाले रूक्षे वातकफापहे । हृद्यं कषायं मधुरं रोचनं लघु दीपनं । गुल्मार्शःकृमिहृत् प्रोक्तं गुरु वातप्रकोपणं । इति भावप्रकाशः ॥
श्रक इ ऊ सर्पे । इति कविकल्पद्रुमः । रेफयुक्ताद्यः । इ श्रंकते । ऊ श्रंकते । सर्पो गतिः इति दुर्गादासः ॥
श्रग इ व्रजे इति कविकल्पद्रुमः । रेफान्त तालव्यादिः । अयं सुखगत्यामिति महलः इ श्रङ्गते इति दुर्गादासः ॥
श्रण म दाने । इति कविकल्पद्रुमः तालव्यादी रेफयुक्तः । मश्राणयति इति दुर्गादासः ॥
श्रण क दाने इति कविकल्पद्रुमः कश्राणयति । स्वामतेत्वस्य ज्यादि· क्रमेवविकल्पनेःण्यहमस्वराननुबन्धाभावो· ऽन्येषा·



था मन्त्ररोपात् । इति दुर्गादा-
सः ॥
श्रत् अ श्रद्धा । इति मुग्धबोध-
टीकायां दुर्गादासः ॥
श्रथ म वधे । इति कविकल्प-
द्रुमः । मश्रथयति इति दुर्गा-
दासः ॥
श्रथ त क दौर्बल्ये । इति कवि-
कल्पद्रुमः । श्रथयति ॥ इति
दुर्गादासः ॥
श्रथ क यत्ने । प्रतिहर्षे । इति
कविकल्पद्रुमः । कश्राथयति
पठितेशिक्षकः । श्राथयति शि-
ष्यं लोकः पुनः प्रहर्षयति इ-
त्यर्थः इति दुर्गादासः ॥
श्रथ कि बन्धे । मोक्षे । वधे ।
इति कविकल्पद्रुमः । कि श्राथ-
यति श्रथयति । श्राथं श्राथय-
ति स्फुटार्थं मधुरं गद्यं च पद्यं
सदा भावक्लृप्ति पेशलं श्र-
थयति साहित्यरं नाटके ।
श्रथ्नाति प्रथितावदान्यचरितः
शास्त्रं विविक्तञ्च य इति हला-
युधोक्ते श्रथ्नातीति श्रथतक-
र्दौर्बल्ये इत्यदन्तस्य रूपं । अ-
नेकार्थत्वात् वध्नातीत्यर्थः ।
इति दुर्गादासः ॥

श्रथ इ उ शैथिल्ये । इति क-
विकल्पद्रुमः । शैथिल्यमिह
शिथिलीभावस्तत्करणञ्च ।
इ श्रन्थेते । उ श्रन्थते वर्णः शिथि-
लस्यादित्यर्थः । श्रन्थते वर्णो लो-
कः शिथिलं करोतीत्यर्थः ।
इति दुर्गादासः ॥
श्रथनं क्ली वधः । यत्नः । पुनः
पुनर्हर्षणं । बंधनं । मोक्षणं ।
शिथिलीकरणं । इति श्रथ
धातुभ्यो भावे अनट्प्रत्ययेन नि-
ष्पन्नं ॥
श्रद्दधानः त्रि श्रद्धायुक्तः । य-
था । तच्छ्रद्दधाना मुनयो ज्ञान-
वैराग्ययुक्तया । पश्यन्त्यात्मनि
चात्मानं भक्त्या श्रुतगृहीतया
इति श्रीभागवते १ स्कन्धे २ ।
अध्यायः ॥
श्रद्धा स्त्री संप्रत्ययः । स्पृहा ।
इत्यमरः । आदरः । शुद्धिः ॥
इति शब्दरत्नावली । शास्त्रार्थे
दृढप्रत्ययः यथा । अत्ययोप-
मेकार्थेषु तथा श्रद्धेत्युदाहृ-
ता । नास्ति ह्यश्रद्दधानस्य धर्म-
कृत्ये प्रयोजनं । इति स्मृतिः ।
चेतसः प्रसादः । इति पातञ्ज-
लभाष्ये वेदव्यासः । सा-

त्रिविधा यथा श्रीभगवानुवाच
त्रिविधा भवति श्रद्धा देहिनां सा
स्वभावजा । सात्त्विकी राजसी चैव
तामसी चेति तां शृणु । सत्त्वानु-
रूपा सर्वस्य श्रद्धा भवति भारत
श्रद्धामयोऽयं पुरुषो यो यच्छ्र-
द्धः स एव सः । यजन्ते सात्त्विका
देवान् यक्षरक्षांसि राजसाः
प्रेतान् भूतगणांश्चान्ये यजन्ते
तामसा जनाः ॥ इति श्री-
भगवद्गीतायां १७ अध्यायः
तस्याः प्रशंसा यथा ।
ब्रह्मोवाच श्रद्धापूर्वा इमे धर्माः
श्रद्धा मध्यान्त संस्थिताः । श्र-
द्धा नित्या प्रतिष्ठाश्च धर्माः श्र-
द्धैव कीर्त्तिताः । श्रुतिमात्ररसाः
सूक्ष्माः प्रधानपुरुषेश्वराः ।
श्रद्धामात्रेण गृह्यन्ते न करेण न
चक्षुषा । कायक्लेशैर्न बहुभि-
र्न चैवार्थस्य राशिभिः । धर्मः
संप्राप्यते सूक्ष्मः श्रद्धाहीनैः सु-
रैरपि । श्रद्धा धर्मः परः सूक्ष्मः
श्रद्धा ज्ञानं हुतं तपः । श्रद्धा
स्वर्गश्च मोक्षश्च श्रद्धा सर्वमि-
दं जगत् । सर्वस्वं जीवितं वा-
पि दद्यादश्रद्धया यदि । नाप्नु-
यात् स फलं किञ्चित् श्रद्धादा-

नेन तेन भवेत् एवं श्रद्धान्विताः
सर्वे सर्वधर्माः प्रकीर्त्तिताः ।
केशवः श्रद्धया गम्यो ध्येयः
पूज्यश्च सर्वदा । इति वह्निपुरा-
णे धेनुदानमाहात्म्याध्यायः ॥
देवलः । अर्थानामुदिते पात्रे
श्रद्धया प्रतिपादनं । दानमि-
त्यभिनिर्दिष्टं व्याख्यानं तस्य व-
क्ष्यते । उदिते शास्त्रकथिते
श्रद्धा देवलोक्ता यथा । सत्-
कृतिश्चानसूया च सदा श्रद्धे-
ति कीर्त्तिता । अत एव भगवद्गी-
तासु अश्रद्धया हुतं दत्तं तपस्त-
प्तं कृतञ्च यत् । असदित्युच्यते पा-
र्थ न च तत्प्रेत्य नो इह च । हरिवंशे
बलिं प्रति भगवद्वाक्यं । अ-
श्रोत्रियं श्राद्धमधीत मव्रतं त्व-
दक्षिणं यज्ञमनृत्विजा हुतं ।
अश्रद्धया दत्तमसंस्कृतं हवि-
र्भागाः षडेते तव दैत्यपुङ्गव ॥
इति शुद्धितत्त्वं । याज्ञवल्क्यः
श्रद्धाविधिसमायुक्तं कर्म यत्
क्रियते नृभिः । सुविशुद्धेन भा-
वेन तदानन्त्याय कल्पते । यो-
गियाज्ञवल्क्यः । विधिहीनं
भवेद्दुष्टं कृतमश्रद्धया च यत् ।
तद्धरन्त्यसुरास्तस्य मूढस्याकृ-



तात्मनः। इति प्रायश्चित्ततत्त्वे।

श्रद्धालुः स्त्री दोहदवती। श्रद्धायुक्ते त्रि। इत्यमरः॥

श्रद्धावान् त्रि श्रद्धायुक्तः। यथा। श्रद्धावान्लभतेज्ञानं तत्परः संयतेन्द्रियः। ज्ञानंलब्ध्वापरां शान्तिमचिरेणाधिगच्छति। इतिभगवद्गीतायां ४ अध्यायः॥

श्रन्थ कि दर्भे। वधे। इति कविकल्पद्रुमः। कि श्रन्थयति श्रन्थति। दर्भो ग्रन्थने॥ इति दुर्गादासः॥

श्रन्थ ग मोक्षे। प्रतिहर्षे। इति कविकल्पद्रुमः। ग श्रथ्नाति वत्सं लोकः मोचयतीत्यर्थः। श्रथ्नाति शिशुं लोकः पुनः पुनः हर्षयति इत्यर्थः। श्राश्रथ इति दुर्गादासः॥

श्रन्थः पुं विस्रुः। इति त्रिकाण्डशेषः। श्रन्थधात्वर्थोप्यत्र॥

श्रन्थनं क्ली ग्रन्थनं। यथा। सन्दर्भो रचना गुम्फः श्रन्थनं ग्रन्थनं समाः। इति हेमचन्द्रः॥

श्रन्थितः त्रि ग्रन्थितः। बद्धः॥ हतवधः। मुक्तः॥ हर्षितः। इति श्रन्थधातोः क्त प्रत्ययेन निष्पन्नः॥

श्रपितं त्रि हृतदुग्धजलमिश्रपक्वद्रव्यं यथा। निष्पक्वे क्वथिते पक्वंतान्ये क्षीरे पयःशृते श्रप्यते श्रपिते श्राणं समुदक्ते हृतेसमे। इति जटाधरः।

श्रपिता स्त्री काञ्जिके। इति केचित्॥

श्रम उम य ति इर तपःखेदयोः। इति कविकल्पद्रुमः। उ श्रमित्वा श्रान्त्वा भय श्राम्यति लोकः तपः करोति खिद्यति वेत्यर्थः। ति श्रान्तोऽस्ति। इर श्रमत् अश्रमीत्। अश्रमात् पुषादित्वात् ङ। इत्यन्ये॥ पूर्वान् विश्रामयेति स इति देवो श्रामतक मंत्रे इत्यदंतस्य रूपं। इति दुर्गादासः॥

श्रमः पुं तपः। खेदः। इति। श्रमयात्यर्थदर्शनात्। श्रान्तिः तत्पर्य्यायः। क्लमः २ क्लेशः ३ परिश्रमः ४ प्रयासः ५ आयासः ६ व्यायामः ७ इति हेमचन्द्रः। क्लमथः ८ इत्यमरः। श्रमोऽभ्यासः। तत्पर्य्यायः। खुरली २ योग्या ३ अभ्यासः ४ इति च हेमचन्द्रः॥

श्रमणः पुं यतिविशेषः। इति मेदिनी। तत्पर्य्यायः। मुक्ति मोक्षोऽपवर्गोऽथ मुमुक्षुः श्रमणो यतिः। वाचंयमो व्रती साधुरनगार ऋषिर्मुनिः। निर्ग्रन्थो भिक्षुरस्य स्वं तपोयोगशमादयः। इति हेमचन्द्रः॥ लिङ्गजीविनि त्रि॥ इति मेदिनी।

श्रमणा स्त्री सुदर्शना। मांसी। मुण्डीरी। शबरीभेदः। इति मेदिनी॥

श्रमी त्रि श्रमविशिष्टः। श्रमशब्दादस्त्यर्थे इन् प्रत्ययेन निष्पन्नः॥

श्रयः पुं आश्रयः। श्रिधातोरल्प्रत्ययेन निष्पन्नः॥

श्रयणं क्ली आश्रयः। तत्पर्य्यायः। आयः २ इत्यमरः॥

श्रवः पुं कर्णः। श्रवणं। इत्यमरटीकायां भरतः॥


श्रवः क्ली कर्णः। इत्यमरः।

श्रवणं क्ली कर्णः। इत्यमरः। नक्ष्यां श्रवणः कर्णः। इति हेममाली इति तट्टीकायां भरतः॥ षण्मासाभ्यन्तरे श्रवणयोश्छिद्रं भवति। इति सुखबोधः

श्रुतौ क्ली सात्त्वकर्णेन्द्रियज्ञानं शोणं इति भाषा॥ इति मेदिनी॥

श्रवणः पुं श्रवणानक्षत्रे। इति मेदिनी॥

श्रवणद्वादशी स्त्री श्रवणानक्षत्रयुक्तभाद्रशुक्लद्वादशी। यथा। पितामह उवाच। श्रवणाद्वादशीं वक्ष्ये भुक्तिमुक्तिप्रदायिनी। एकादशी द्वादशी च श्रवणेन च संयुता। विजया सा तिथिः प्रोक्ता हरिसंज्ञादि वाचरेत्। एकभक्तेन नक्तेन तथैवायाचितेन च। उपवासेन भक्षेण नैव द्वादशिको भवेत्॥ कांस्यं मांसं तथा क्षौद्रं लोभं वितथभाषणं। आयासञ्च व्यवायञ्च दिवास्वप्नमथाञ्जनं। शिलापिष्टं मसूरञ्च द्वादशैतानि वर्जयेत्। मासि भाद्रपदे शुक्ले द्वादशी श्रवणान्विता॥ महती द्वादशी ज्ञेया उपवासे महाफला। संगमे सरितः स्नानं बुधयुक्ता महाफला। कुम्भे सवेत्ने सजले यजेत् स्वर्णान्वितं मतं। सितवस्त्रयुगाच्छन्ने छत्रोपानद्युगान्विते। ॐ नमो वासुदेवाय



शिवः संपूजयेत्ततः । श्रीध
राय सखीवन्तहन् कण्ठकुम्भाय
वै नमः । नमः श्रीपतये वक्षो
भुजौ सर्वास्त्रधारिणे । व्याप
काय नमः कुक्षौ केशवायो
दरं बुधः । त्रैलोक्यपतये मेढ्रं
जङ्घे सर्वपते नमः ॥ सर्वा
त्मने नमः पादौ नैवेद्यं घृतपा
यसं । कुम्भांश्च मोदकांस्तद्वत्
तज्जागरं कारयेन्निशि । स्ना
त्वा प्रीतोः स्तुयित्वा तु कृतपु
ष्पाञ्जलिं वदेत् । नमो नम
स्ते गोविन्द बुध श्रवणसंज्ञ
क । अघौघसंक्षयं कृत्वा स
र्वसौख्यप्रदो भव । प्रीयतां दे
वदेवेशो विप्रेभ्यः कलसान्ददे
त् । तथा स्त्रीरेष वाकुर्य्यात्
सर्वान् कामानवाप्नुयात् । इ
ति गारुडे १४१ अध्यायः ॥
अप्यत्र द्वादशी श्राद्धे द्रष्टव्यं ।
श्रवणपूर्व्विका स्त्री श्रावणी
वृत्तः । इति राजनिर्घण्टः ॥
श्रवणा पुं स्त्री नक्षत्रविशेषः
इति मेदिनी । सा तु अश्विन्या
द्यन्तर्गत द्वाविंशनक्षत्रं । त
स्याः स्वरूपं वामाकारतारात्र
यात्मकं तस्याधिदेवो हरिः
यथा तारकात्रयमिते श्रवणाकृ
तौ केशवे गगनमध्यवर्त्तिनि
सप्तवारणगते जलग्रहो नि
र्ययु गौजमहीश लिखिकाः
३८ । पं ९ । इति कालिदासकृत
रात्रिलग्ननिरूपणं । तत्रजात
फलं । शास्त्रान्तरज्ञो बहुपु
त्रमित्रः सत्पुत्रभक्तिर्विजि
तारिवर्गः । चेज्जन्मकाले श्रव
णास्ति यस्य श्रीमान् पुराणश्रव
णप्रवीणः । इति कोष्ठीप्रदीपः
तत्र गृहारम्भाद्य स्तम्भकाष्ठादि
छेदनसंग्रह दक्षिणादिक्
गमननिषेधः । यथा । छेदने
संग्रहे चैव काष्ठादीनां न का
रयेत् । श्रवणादौ बुधः षट्के
न गच्छेद्दक्षिणां दिशं । अग्नि
पीडा भयं शोको राजपीडाप
नक्षयः संगृहे तृण काष्ठानां
कृते वस्वादिपञ्चके । इति ज्यो
तिस्तत्त्वं ॥
श्रवणा स्त्री मुण्डरिकावृक्षः ।
इति रत्नमाला ॥
श्रवाप्यः पुं बलियोग्यपशुः
यज्ञियपशुः । इति सिद्धान्त
कौमुदी ॥
श्रविष्ठा स्त्री धनिष्ठानक्षत्रं ।

इत्यमरः ॥
श्रविष्ठाजः पुं बुधग्रहः । इति
त्रिकाण्डशेषः तत्रजाते त्रि ॥
श्रव्यः त्रि श्रोतव्यः । श्रवणा
र्हवाक्यादिः । श्रुयातो यं प्रत्य
येन निष्पन्नः ॥
श्रा ल खेदे । इति कविकल्प
द्रुमः । रेफयुक्त स्तालव्यादिः
ल श्राति । इति दुर्गादासः ॥
श्रा लस पाके । इति कविक
ल्पद्रुमः । रेफयुक्त स्तालव्या
दिः । ल श्राति । स श्रपयति ।
इति दुर्गादासः ॥
श्राणं त्रि पक्वं । इति मेदिनी ।
घृतदुग्धजलाभिन्नपक्वदुग्धे ।
इति जटाधरः ॥
श्राणा स्त्री यवागूः । इत्यमरः ॥
श्राद्धं क्ली शास्त्रोक्तविधानेन
पितृकर्म्म । इत्यमरः ॥ तस्य
लक्षणं । यथा । संस्कृतव्यञ्जना
द्यञ्चपयो दधि घृतान्वितं श्र
द्धया दीयते यस्मात् श्राद्धं तेन
निगद्यते । इति पुलस्त्यवचना
त् श्रद्धया अन्नादेर्दानं श्राद्धं
इति वैदिकप्रयोगाधीनयो
गिकं । इति श्राद्धतत्त्वं । अ
पिच । संबोधनपदोपनीतान्
पित्रादीन् चतुर्थ्यन्तपदेनोद्दि
श्य हविस्त्यागः श्राद्धं । तत्तु
द्वादशविधं । यथा विश्वामित्रः
नित्यं नैमित्तिकं काम्यं वृद्धि
श्राद्धं सपिण्डनं । पार्व्वणञ्चेति
विज्ञेयं गोष्ठ्यां शुद्ध्यर्थमष्ट
मं ॥ कर्म्माङ्गं नवमं प्रोक्तं
दैविकं दशमं स्मृतं । यात्रा
स्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वा
दशं स्मृतं । एतद्भविष्यपुराणे
विवृतं । यथा भविष्ये अहन्य
हनि यच्छ्राद्धं तन्नित्यमभिधी
यते । वैश्वदेवविहीनं तत्
शक्तावुदकेन तु । एकोद्दिष्टं
तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते
तदप्यदैवं कर्त्तव्यमयुग्मानाश
येद्द्विजान् । काम्याय तु हितं का
म्यमभिप्रेतार्थसिद्धये ।
पार्व्वणेन विधानेन तदप्युक्तं
खगाधिप । वृद्धौ यत् क्रियते
श्राद्धं वृद्धिश्राद्धं तदुच्यते ॥
सर्वं प्रदक्षिणं कार्य्यं सर्व्वाङ्गे
तूपवीतिना । गन्धोदकतिलै
र्युक्तं कुर्य्यात् पात्रचतुष्टयं
अर्घार्थं पितृपात्रेषु प्रेतपात्रं
प्रसेचयेत् ये समाना इति
द्वाभ्यामेतज्ज्ञेयं सपिण्डनं ।



नित्येन तुल्यं शेषं स्यादेको
द्दिष्टं स्त्रिया अपि अमावास्यां
यत् क्रियते तत् पार्व्वणमुदा
हृतं । क्रियते वा पर्व्वणि यत्
तत्पार्व्वणमिति स्थितिः गोष्ठ्यां
यत्क्रियते श्राद्धं गोष्ठीश्राद्धं त
दुच्यते । बहूनां विदुषां सम्य
क्सुखार्थं पितृतृप्तये । क्रिय
ते सुहृदये यत्तु ब्राह्मणानां भो
जनं । सुखार्थमिति तत्प्रोक्तं
दैवतेय मनीषिभिः । निषेक
काले सोमे च सीमन्तोन्नयने
तथा । ज्ञेयं पुंसवने चैव श्रा
द्धं कर्म्माङ्गमेव च देवानुद्दि
श्य यच्छ्राद्धं तद्दैविकमिहोच्य
ते । हविष्यान्नविशिष्टेन सप्त
म्यादिषु यत्नतः । गच्छन्देशा
न्तरं यत्तु श्राद्धं कुर्य्यात्तु सर्पिषा
यात्रार्थमिति तत् प्रोक्तं प्रवे
शे च न संशयः । शारीरोपचये
श्राद्धं सर्व्वोपचय एव च पुष्ट
र्थमेतद्विज्ञेयं सौपचायिक
मुच्यते । तस्य पञ्चविधत्वं य
था बृहस्पतिः । नित्यं नैमित्ति
कं काम्यं वृद्धिश्राद्धं तथैव च ।
पार्व्वणञ्चेति मनुना श्राद्धं पञ्च
विधं स्मृतं । कूर्म्मपुराणे । अहन्यह
नि.

नित्यं स्यात् काम्यं नैमित्तिके
पुनः । एकोद्दिष्टन्तु विज्ञेयं वृ
द्धिश्राद्धन्तु पार्व्वणं । एतत्पञ्च
विधं श्राद्धं मनुना परिकीर्त्तितं
मत्स्यपुराणे त्रैविध्यमुक्तं य
था । नित्यं नैमित्तिकं काम्य
त्रिविधं श्राद्धमुच्यते । तस्य द्वै
विध्यं । विष्णुना नित्यकाम्य
रूपतया द्वैविध्यं वक्ष्यते । त
त्र नित्यपदमावश्यकरूपतया
पार्व्वणैकोद्दिष्टयोरपि परि
ग्रहार्थं । काम्यपदमनावश्य
कत्वार्थं । इति श्राद्धविवेकः ॥
आदावात्रेय मुनिपुत्रेण निमि
नातत्पुत्रस्य श्राद्धे कृते ।
यथा । धरण्युवाच । कोऽग्रतः
पितृयज्ञस्य कथमेवमपज्यते
केन चोत्पादितं श्राद्धं कस्मिन्न
र्थे किमात्मकं । एतदिच्छाम्य
हं श्रोतुं विस्तरेण वदस्व मे ।
वाराह उवाच । मनोस्तु वंशसम्भू
त आत्रेय इति विश्रुतः । आ
त्रेयस्यात्मजो विप्रो निमिर्नामा
तपोधनः । निमिपुत्रस्तु धर्म्मात्मा
त्रिषु लोकेषु विश्रुतः । वर्षाणा
ञ्च सहस्राणि तपस्तप्त्वा वसुन्धरे
मृत्युकालमनुप्राप्त स्ततः पञ्चत

मागतः ॥ नष्टन्तु तं सुतं दृष्ट्वा
निमेः शोक उपाविशत् । पुत्र
शोकाभिसंयुक्तो दिवारात्रौ च
चिन्तयन् । निमिः कृत्वा ततः शो
कं विधिना तत्र माधवि । तस्यैव
गतसंकल्पे त्रिरात्रे प्रत्यपद्यत
तस्य प्रतिविबुद्धस्य माघमासे
तु द्वादशी । मनः संहृत्य विषये
बुद्धिविस्तारगामिनी । स निमि
श्चिन्तयामास श्राद्धकल्पं समाहि
तः । यानि तस्यैव भोज्यानि मू
लानि च फलानि च । यानि का
नि च भक्ष्याणि नवञ्चैव संवरं ॥
यानि तस्यैव चेष्टानि सर्व्वमेत
दुदाहरत् । आमन्त्र्य ब्राह्मणान् पू
र्व्वं शुचिर्भूत्वा समाहितः । दक्षि
णावर्त्ततः सर्व्वं ऋषिः स्वयमकुर्व
त सप्त कृत्वा ततस्तत्र युगपत्समु
पाविशत् । दत्वा तु मांसशाका
नि मूलानि च फलानि च । पूज
यित्वा तु विप्रांस्तु सप्तकृत्वस्तु
सुन्दरि । कृत्वा तु दक्षिणाग्रा
श्च कुशांश्च प्रयतः शुचिः । प्र
ददौ श्रीमते पिण्डं नामगोत्रमुदा
हरन् । एतस्मिन्नन्तरे देवि नारदो
द्विजसत्तमः जगाम सुप्रसार-
ण्यं कृष्णाश्रमविभूषितं । तं दृष्ट्वा


पूजयामास स्वागतेनाथ मा
धवि मोहाद्गद्गदया वाचा निश्व
संश्च मुहुर्मुहुः । सव्रीडो भाव
तो विप्रः कारुण्येन समन्वितः ।
कृतः स्नेहश्च पुत्रार्थे मया संक
ल्पयता कृते । तर्पयित्वा द्विजा
न्सप्त अन्नाद्येन फलेन च । प
श्चाद्विसर्जिते पिण्डं दर्भाना·
स्तीर्य भूतले । उदकानयन
ञ्चैव तपसा तेन पाषिते शोक
स्नेह प्रभावेन एतत्कर्म्म मया
कृतं । न च श्रुतं मयाप्येवं न
दैवे ऋषिभिः कृतं । भयं तीव्रं
प्रपश्यामि मुनिशापात् सुदा
रुणात् । नारद उवाच । न भेतव्य
द्विजश्रेष्ठ पितरं शरणं व्रज ।
अधर्म्मं न च पश्यामि धर्म्मेणैवात्र
संशयः । नारदेनैव मुक्तस्तु नि
मिर्ध्यानमुपाविशत् । कर्म्मणा
मनसा वाचा पितरं शरणं गतः
ततोऽतिचिन्तयामास वंशक
र्त्तारमात्मनः । ध्यायमानस्ततो
ऽप्याशु आजगाम तपोधनः । पुत्र
शोकेन सन्तप्तं पुत्रं दृष्ट्वा तपोध
नः । पुत्रमाश्वासयामास वा
ग्भिर्विद्याभिरव्ययैः । निमे संक
ल्पितोऽयन्तु पितृयज्ञस्तपो

यन। पितृयज्ञेति निर्दिष्टोध
र्मोऽयं ब्रह्मणा स्वयं। ततोऽस्य
तिलरोपणमः कृतरेकः प्रतिष्ठि
तः। कृतः स्वयंभुवा पूर्वे श्रा
द्धेया विधिरुत्तमाः। इति वा
राहे श्राद्धोत्पत्तिर्नामाध्यायः
अपिच। अपसव्येन दातव्यं
मासि मासि तिलोदकं। प्र
णम्य शिरसा देवी निर्वापस्य
चधारिणीः वैसवी काश्यपी
चेति प्रजया चेति नामतः एवं
दत्तेन प्रीयंते पितरश्च न संश
यः। परमात्माशरीरस्था देव
तानां मया कृतः। इयत्त्वत्र व
राहे देवतानामाहितिः स्मृताः।
पितृदेवा भविष्यंति भोक्तारः
पितृपिंडकान्। देवतास्तु ये
यत्रायत्तास्तपन्नगाः। पिंडे
श्राद्धस्य पश्यंति वायुभूतान
क्षुधायः। पितृयज्ञे विशालाक्षि
येऽर्चयंति द्विजोत्तमाः। आयुःकी
र्तिबलं तेजो धनं पुत्र पशुस्त्रि
यः। ददंति पितरस्तस्य श्राद्धे
ऽपि नात्र संशयः। आत्मकर्मव
शाल्लोकान् प्राप्नुवंतीह ये ना
भनान्। तिर्यक्त्वंच विमुच्यंते
प्रेतभावाच्च मानवाः। नरके

पच्यमानानां त्राता भवति मान
वः। पूजकः पितृदेवानां सर्वका
ले गृहाश्रमे। द्विजातीन्तर्पयि
त्वा तु एतेन विधिना नरः॥
अर्चयेत्तस्य मन्यन्ते पितरः श्राद्ध
तर्पिताः। नरा ये पितृभक्ता
स्ते प्राप्नुवंति परां गतिं॥ पक्वा
न्नेनैव कार्यं स्यादिष्टं च शु
द्धितः। कृते तु तत्र मध्याह्ने
श्राद्धारंभं तु कारयेत्। स्नान
न्तु तथा कृत्वा पाद्यार्घ्यमंड
लेष्वपिः। पाद्ये दत्वा तु विप्रा
य गृहस्याभ्यंतरं नयेत्। आसने
कल्पयित्वात्र आवाह्य तदनंत
रं। अर्घ्यं दद्याद्विधानेन गंधमा
ल्यैः प्रपूज्यच धूपदीपं तथाव
स्त्रं तिलोदकमथापि वा। पा
मंच भोजनस्पार्श्वे विप्राग्रे था
पयेत्तथा। भस्मना मण्डले
कार्यं पंक्तिदोषनिवारकं। अ
ग्निकार्यं ततः कृत्वा अन्नं तु प
रिवेषयेत्। तत्र कार्यं तु संक
ल्पः पितृन्तु द्विजपदे दरि। यथा
सुखेन भोक्तव्यमिति कथयेद्द्वि
जं प्रति। रक्षोघ्नं मंत्रपाठोऽत्र आ
चमेत विचक्षणः। तस्मात्तु ग्रास
एणानुज्ञात्वा दद्याद्विकिरं ततः

उच्छेषपोशने दत्वा पिण्डप्रश्नं तु
कारयेत्। दक्षिणाभिमुखो भू
त्वा दर्भान्नास्तीर्य भूतले। पिंड
दाने प्रकुर्वीत पित्रादि त्रितये
तथा। पिंडदानं पूजनं कार्यं
तत्र दृष्ट्वा यथाविधि। ब्राह्मण
स्य च हस्ते तु दद्याद्दक्षयमात्मवा
न्। पिंडाह्वयन्त वस्त्रं ये यावति
ष्ठंति भूतले। आप्यायमानाः पि
तरस्तावत्तिष्ठंति वै गृहे। उपस्थ
कृष्णविर्भूत्वा दद्यात् शांत्युद
कानि च। प्रणम्य शिरसा भूमौ
निर्वापस्य च धारिणीः वैसवी
काश्यपी चेति अन्यथा चेति ना
मतः। भक्षयेत् प्रथमं पिंड
पत्नी देयं च मध्यमे। तृतीय
मुदके दद्यात् श्राद्धे एवं विधिः
स्मृतः। पितृदेवं विसर्जयेत् म
न्त्रा तु प्रणमेत्सुतान्। एवंद
त्तेन तुष्यंति पितृदेवा न संश
यः। दीर्घायुष्यं प्रयच्छंति पु
त्रपौत्र धनानि च। तेनान्नमे
व विप्रेषु दद्यात् श्राद्धे विधा
नतः। अन्यथा तत्र वै श्राद्धे नि
ष्फलं नास्ति संशयः। मंत्रही
नं क्रियाहीनं यत्श्राद्धं कुरु
ते द्विजः। मद्भक्तस्यापहरेद्दस्य

फलं भवति भागवतः। इति
वाराहे पितृयज्ञनिर्णयनामा
ध्यायः। तस्याधिकारिक्रमो य
था। पुत्रः पौत्रः प्रपौत्रो वा भ्रा
ता वा भ्रातृसंततिः। सपिंड
संततिर्वापि क्रियार्हो नृप जाय
ते। तेषां मभावे सर्वेषां समा
नोदकसंततिः। मातृपक्षस्य
पिंडेन संबद्धा ये जलेन वा॥
कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः
कार्याः क्रिया नृप। संघातांत
र्गतैर्वापि कार्याः प्रेतस्य याः
क्रियाः। उत्सन्नबंधुरिक्थाद्वा
कारयेदवनीपतिः। पूर्वाः क्रि
या मध्यमाश्च तथा चैवोत्तराः
क्रियाः। त्रिप्रकाराः क्रियाश्चे
ता स्तासां भेदं शृणुष्व मे
आदाह वार्ष्यायुधादि स्पर्शा
द्यंतास्तु याः क्रियाः। ताः पू
र्वा मध्यमा मासि मास्येकोद्दि
ष्टसंज्ञिताः। प्रेते पितृत्वमा
पन्ने सपिंडीकरणाद्नु। क्रि
यंते याः क्रियाः पित्र्याः प्रोच्यंते
ताः नृपोत्तराः। पितृमातृसपि
ण्डैस्तु समानसलिलैस्तथा।
संघातांतर्गतैश्चैव राज्ञा वा धन
हारिणा। पूर्वाः क्रियास्तु कर्तव्याः



पुत्राद्यैरेव चोत्तरतः । दौहि
त्रैर्वा नरश्रेष्ठ कार्यास्तत्तन
ये स्तथा । मृताहानि च कर्त
व्याः स्त्रीणामप्युत्तराः क्रियाः
प्रतिसंवत्सरं राजन्नेकोद्दिष्टवि
धानतः । इति विष्णुपुराणे ३
अंशे १३ अध्यायः । याज्ञव
ल्क्य उवाच । अथ श्राद्धवि
धिं वक्ष्ये सर्वपापप्रणाशने
अमावास्याष्टकावृद्धिः कृष्ण
पक्षोऽयनद्वयं । द्रव्यं ब्राह्मण
सम्पत्तिर्विषुवत्सूर्यसंक्रमः ॥
व्यतीपातो गजच्छाया ग्रहणं
चन्द्रसूर्ययोः । श्राद्धं प्रति रुचि
श्चैव श्राद्धकालाः प्रकीर्तिताः
अग्र्याः सर्वेषु वेदेषु श्रोत्रियो
वेदविद्युवा । वेदार्थवित् ज्येष्ठसा
मा त्रिमधुस्त्रिसुपर्णिकः । स्वस्री
यः ऋत्विग्जामातृयाज्यश्वशु
र मातुलाः । त्रिणाचिकेतदौ
हित्रशिष्यसंबन्धिबान्धवाः । कर्म
निष्ठास्तपोनिष्ठाः पञ्चाग्निर्ब्रह्म
चारिणः । पितृमातृपराश्चैव ब्रा
ह्मणाः श्राद्धदेवताः । रोगी ही
नातिरिक्ताङ्गः काणः पौनर्भ
वस्तथा । अवकीर्णादयो येच
ये चाचारविवर्जिताः । अवैश्ववाश्च

ये सर्वेन श्राद्धार्हाः कदाचन
निमंत्रयेच्च पूर्वेद्यु र्द्विजे भो
ज्येच संयतैः । आचांतश्चैव
एतैरेक द्वासने सूपवेशयेत्
युग्मान्दैवे तथा पित्र्ये सुप्रदेशे
स्वशक्तितः । द्वौ दैवे प्रागुदक्
पित्र्ये त्रीणेकं चोभयोरेथ
क । मातामहानामप्येवं तंत्रं
वा वैश्वदेविकं । हस्तप्रक्षाल
नं दत्वा विष्टरार्थं कुशानपि ।
आवाह्य तदनुज्ञातो विश्वेदे
वास इत्यृचा । यवैरन्ववकी
र्याथ भाजने सपवित्रके । शं
नो देव्या पयः क्षिप्त्वा यवोऽसी
ति यवांस्तथा । या दिव्या इति
मंत्रेण हस्तेष्वर्घं विनिक्षिपेत्
गंधोदके तथा धूप माल्यदान
प्रदीपकं । अपसव्यं ततः कृत्वा
पितृणामप्रदक्षिणं । द्विगुणां
स्तु कुशान् दत्वा उशंतस्त्वेत्यृचा
पितॄन् । आवाह्य तदनुज्ञातो ज
पेदायन्तु नस्ततः । यवार्थस्तु ति
लैः कार्यः कुर्यादर्घादि पूर्ववत्
त् दत्वा तु संश्रवांस्तेषां पात्रे
कृत्वा विधानतः । पितृभ्यः स्था
नमसीति न्युब्जं पात्रं करोत्य
धः । अग्नौ करिष्यन्नादाय

पृच्छत्यन्नं घृतप्लुतं । कुरुष्वेति
तथोक्तोऽग्नौ कृत्वाग्नौ पितृय
ज्ञवतः । हुतशेषं प्रदद्यात्तु भा
जनेषु समाहितः । यथालाभो
पपन्नेषु रौप्येषु च विशेषतः
दत्वान्नं पृथिवीति पात्रमिति
पात्राभिमंत्रणं । कृत्वेदं विष्णु
रित्यन्ने द्विजांगुष्ठं निवेशयेत्
सव्याहृतिकां गायत्रीं मधुवा
ता इति त्र्यृचं तथा । जप्त्वा यथासु
खं वाच्यं भुंजीरंस्तेऽपि वाग्यता
ताः । अन्नमिष्टं हविष्यं च दद्या
दक्रोधनोऽत्वरः । आतृप्तेस्तु पवि
त्राणि जप्त्वा पूर्वं जपेत्तथा । अ
न्नमादाय तृप्ताः स्थ शेषं चैवानु
मन्य च । तदन्नं विकिरेद्भूमौ दद्या
च्चापः सकृत्सकृत् । सर्वमन्नमु
पादाय सतिले दक्षिणामुखः ।
उच्छिष्टसन्निधौ पिण्डान् प्रद
द्यात् पितृयज्ञवत् । मातामहा
नामप्येवं दद्यादाचमनं ततः
स्वस्ति प्रीयंतामिति चाहैवं
विश्वेदेवान् जलं ददत् । स्व
स्ति वाच्य ततो दद्यादक्षय्योद
कमेव च । दत्वा तु दक्षिणां शक्त्या
स्वधाकारमुदीरयेत् । वाच्यतां
मित्यनुज्ञातः पितृभ्यश्च स्वधो

च्यतां । विप्रैरस्तु स्वधेत्युक्ते
भूमौ सिंचेत्ततो जलं । दाता
रो नोऽभिवर्धंतां वेदाः संतति
रेव च । श्रद्धा च नो मा व्यगमद्
बहुदेयं च नोऽस्त्विति । इत्यु
क्त्वापि प्रियं वाचं प्रणिपत्य
विसर्जयेत् । वाजे वाजे इति प्री
तः पितृपूर्वं विसर्जनं । यस्मिं
स्ते संस्रवाः पूर्वं अर्घ्यपात्रे नि
पातिताः । पितृपात्रं तदुत्तानं
कृत्वा विप्रान् विसर्जयेत् । प्रद
क्षिणमनुव्रज्य भुंजीत पितृसे
वितं । ब्रह्मचारी भवेत्तां तु रज
नीं भार्यया सह । एवं प्रदक्षि
णं कृत्वा वृद्धौ नांदीमुखान्
पि । यजेत दधिकर्कन्धुमिश्राः
पिण्डा यवैः क्रियाः । एकोद्दिष्टं
दैवहीनमेकार्घ्यैकपवित्रकं ।
आवाहनाग्नौकरणरहितं ह्यप
सव्यवत् । उपतिष्ठतामित्यक्ष
य्यस्थाने विप्रान् विसर्जयेत् । अ
भिरम्यतां प्रकुर्यात् कर्मसु ताभि
रताः स्मः । गंधोदकतिलैर्मि
श्रं कुर्यात् पात्रचतुष्टयं । अ
र्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसे
चयेत् । ये समाना इति द्वा
भ्यां शेषं पूर्ववदाचरेत् ॥

पतेत् सपिण्डीकरणमेकोद्दि-
ष्टं स्त्रिया अपि । अर्व्वाक् सपि-
ण्डीकरणं यस्य संवत्सराद्भवेत् ।
तस्याप्यन्नं सोदकुम्भं दद्यात् संव-
त्सरं द्विजः । पिण्डांस्तु गोजवि-
प्रेभ्यो दद्यादग्नौ जलेऽपि वा ॥
हविष्यान्नेन वै मासं पायसेन
तु वत्सरं । मात्स्यहारिणकौ-
रभ्रशाकुनच्छागपार्षतैः । ऐ-
णरौरववाराहशाशैर्मांसै-
र्यथाक्रमं । मासवृद्ध्याभितृ-
प्यन्ति दत्तैरिह पितामहाः ॥
दद्याद्वर्षा त्रयोदश्यां मघासु
च न संशयः । प्रतिपत्प्रभृति
ष्वेकन्यादीन् श्राद्धदो भवेत् ।
शस्त्रेण निहता ये तु चतुर्दश्यां
प्रदीयते । स्वर्गं ह्यपत्यमोजश्च
शौर्यं क्षेत्रं बलं तथा ॥ पुत्र-
श्रैष्ठ्यान् ससौभाग्यमपत्यमु-
ख्यतां सुतान् । प्रवृत्तचक्र-
तां पुत्रान् वाणिज्यप्रभृतींस्त-
था । अरोगित्वं यशोवीतशो-
कतां परमां गतिं । धनं विद्यां
भिषक्सिद्धिं कुप्यं गोजावि-
कं तथा । अश्वानायुश्च विधि-
वद्यः श्राद्धं संप्रयच्छति । कृ-
त्तिकादिभरण्यन्तं स कामाना-
प्नुयादिमान् । वस्वाद्याः प्रीण-
यन्त्येवं नवे श्राद्धे कृते द्विजः ।
आयुः प्रज्ञां धनं विद्यां स्वर्गं मो-
क्षं सुखानि च । प्रयच्छन्ति त-
था राज्यं प्रीता नित्यं पितामहाः ॥
इति गारुडे ९९ अध्यायः ॥
अपि च । आमश्राद्धे महे वस्त्र-
भक्तिं भुक्तिप्रदेन्तरां । एवं
निमन्त्रयेद्विप्रान् निषिद्धब्र-
ह्मचारिणः ॥ प्रदक्षिणोप-
वीतेन देवान् वामोपवीतिना
पितॄन्निमन्त्रयेत् पादौ क्षालये-
द्वाक्यमेवतः । ओं स्वागतं भ-
वद्भिरिति प्रश्नः । ओं सुस्वाग-
तमिति तैरुक्ते ओं विश्वेभ्यो
देवेभ्य एतत् पादोदकमर्घ्यं
स्वाहा पितृभ्यः स्वधा इति
देवब्राह्मणपादयोर्देवतीर्थे-
नाभुग्नकुशजलकुसुमदाने ॥
ततो दक्षिणामुखसव्यवामोपवी-
तेन अमुकसगोत्रेभ्यः अस्मत्
पितृपितामहप्रपितामहेभ्यो
यथानामशर्म्मभ्यः सपत्नीके-
भ्य एतत्पादोदकमर्घ्यं स्वधा इ-
ति पित्रादि ब्राह्मणपादयोः पि-
तृतीर्थेनाभुग्नकुशतिलकुसुमज-
लदाने । एवं मातामहादिषु एतद्

आचमनीयं स्वाहा स्वधेति ब्रा-
ह्मणहस्ते । एषवो अर्घ्यः इति
ब्राह्मणहस्तेऽर्घ्यदाने । एतद्वः
पुष्पं इति ब्राह्मणहस्ते पुष्पदा-
ने । ओं सिद्धमिदमासनं इहा-
सध्वमित्यभिधाय ओं भूः ओं भु-
वः ओं स्वः ओं महः ओं जनः ओं त-
पः ओं सत्यं सप्तव्याहृतिभिः ए-
वमुखे देवब्राह्मणोपवेशने ।
उत्तराभिमुखयोः पितरः ओं देव-
ताभ्यः पितृभ्यश्च महायोगिभ्य
एव च । नमः स्वधायै स्वाहायै
नित्यमेव नमो नमः ॥ इति
त्रिर्जपेत् ओं अद्यास्मिन्नेषो
अमुकमासे अमुकराशिगते
सवितरि अमुकस्यां तिथौ अ-
मुकसगोत्राणामस्मत्पितृ-
पितामहप्रपितामहानां यथा-
नामशर्म्मणां विश्वेदेवपूर्वकं
श्राद्धमहं करिष्ये ओं विश्वेभ्यो
देवेभ्य इदमासनं स्वाहा । ओं
विश्वान् देवानावाहयिष्ये ओं
आवाहय इत्युक्ते ओं विश्वेदेवा-
स आगत शृणुता म इमं हवं एदं
बर्हिर्निषीदत ॥ ओं विश्वेदेवाः
शृणुतेमं हवं मे ये अन्तरीक्षे
य उपद्यविष्ठ ॥ अग्निजिह्वा उत
वा यजत्रा आसद्यास्मिन् व-
र्हिषि मादयध्वं । ओं ओषधयः
सम्वदन्ते सोमेन सह राज्ञा यस्मै
कृणोति ब्राह्मणस्तं राजन् पार-
यामसि । ओं आगच्छन्तु महाभा-
गा विश्वेदेवा महाबला ये यत्र
विहिताः श्राद्धे सावधाना भव-
न्तु ते । ओं अपहता असुरा रक्षांसि
वेदिषदः । इति त्रिभिर्यवविक-
रणं ओं पवित्रमहं करिष्ये ओं कु-
रुष्वेति तेनोक्ते साग्रकुशपत्रद्व-
यं प्रादेशप्रमाणं कृत्वा ओं प-
वित्रे स्थो वैष्णव्यौ अनेन कु-
शान्तरेण छित्त्वा ओं विष्णोर्मन-
सा पूते स्थ इत्यभ्युक्ष्य कुशान्त-
रेण त्रिवृतं कृत्वा पात्रे पवित्र-
निवेशने । शन्नो देवीरभीष्टये
आपो भवन्तु पीतये शंयोरभि
स्रवन्तु नः । इति पात्रे जलदा-
ने । ओं यवोऽसि यवयास्मद्द्वेषो
यवयारातीः इति यवदाने । ओं
गन्धद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीं ईश्वरीं सर्वभूता-
नां तामिहोपह्वये श्रियं ॥
इति गन्धदाने । ओं श्रीश्च ते
लक्ष्मीश्च पत्न्या इति पुष्पदा-
ने । ओं या दिव्या आपः पय-



स्रा संवस्तु या अंतरीक्षा उत
पार्थ्वी र्या हिरण्यवर्णा यज्ञि
याक्षा न आपः शिवाः संश्योनाः
सुहवा भवंतु ॐ भूर्विलोचन सं
ज्ञकेभ्यो विश्वेभ्यो देवेभ्य एषो
र्घ्यो नमः । इति हस्तेर्घ्यं दत्वा
अनेनैव पात्रेण संस्रव पवित्र
ग्रहणं प्रथमपात्रेण संस्रवं प
वित्रञ्च गृहीत्वा ब्राह्मण दक्षि
ण पार्श्वे कुशोपरि कुर्द्ध मुखं
पात्रे स्थापनं तदुपरि कुशदाने
ततः ॐ भूर्विलोचन संज्ञकेभ्यो
विश्वेभ्यो देवेभ्य एतानि गंध
पुष्प धूप दीप वासोयुगसो
त्तरीय यज्ञोपवीतानि नमः
गंधादिदान मच्छिद्र मस्तु सं
कल्पसिद्धिरस्तु । ब्राह्मणवाच
ने । ततः पितृ पितामह प्रपितामह
ह मातामह प्रमातामह वृद्धप्र
मातामहानां सपत्नीकानां श्राद्ध
महं करिष्ये । अनुज्ञापनं । ॐ कुरु
ष्वेति ब्राह्मणोक्ते ॐ देवता-
भ्यः पितृभ्यश्च महायोगिभ्य एव
च इति त्रिर्जपेत् तत ॐ अमु
कसगोत्राणां अस्मत् पितृपि-
तामह प्रपितामहानां यथानाम
शर्मणां सपत्नीकानां श्राद्धंप
श्चामहे करिष्ये ॐ कुरुष्व आ
ह्वकब्राह्मणानुज्ञाने ॐ अमुक सगो
त्रेभ्यो अस्मत् पितृपितामह प्र
पितामहेभ्यो यथानामशर्म्मभ्यः
सपत्नीकेभ्य इद मासनं स्वधा
ब्राह्मणवामपार्श्वे आसने । ॐ
पितृनावाहयिष्ये ॐ आवाहये
त्युक्ते उशंतस्त्वा निधीमह्युश
न्तः समिधीमहि । उशन्नुशत आ
वह पितृन् हविषे अत्तवे । ॐ आ
यांतुनः पितरः सोम्यासो अग्नि
ष्वात्ताः पथिभि र्देवयानैः । अ
स्मिन् यज्ञे स्वधया मदंतोऽधि
ब्रुवंतु तेऽवन्त्वस्मान् । इत्यावा
हने । ॐ अपहता असुरा रक्षांसि
वेदिषदः । इति तिल विकरणं
ॐ तिलोसि सोमदेवत्यो गोस
वो देवनिर्म्मितः । प्रत्नमद्भिः
पृक्तः स्वधया पितॄन्लोकान्
प्रीणाहि नः स्वाहा । तिलदाने
गंधपुष्प ह्यस्ताभ्यां दत्वा पितृ
पात्रमुत्थाप्य या दिव्येति पठि
त्वा अमुकसगोत्र अस्मत्पितः अ
मुकशर्मन् सपत्नीक एष ते अ
र्घः स्वधा । एवं पितामहादी सपवि
त्रंपात्रं गृहीत्वा ब्राह्मण वामपा
र्श्वे दक्षिणाग्र कुशोपरि ॐ पितृ

भ्यः स्थानमसीति अधोमुखं
पात्र स्थापनं । ॐ शुंधंतां लोकाः
पितृसदनाः पितृसदनमसि
अधोमुखं पात्रस्पर्शनं । ततः
अमुक सगोत्रेभ्यो अस्मत् पि
तृ पितामह प्रपितामहेभ्यः
सपत्नीकेभ्यः एतानि गंधपुष्प
धूपदीपवासोयुगसोत्तरीय य
ज्ञोपवीतानि स्वधा । पितृती
र्थेन गंधादि दानं । गंधादिन म
च्छिद्रमस्तु संकल्प सिद्धिरस्तु
ब्राह्मणवाचनं । एवं मातामहा
दीनामनुज्ञापनादिकर्म । ॐ या
दिव्येतिस्य मिमस्मार्जनं । ततो
घृताक्त मन्नं गृहीत्वा दक्षिणो
पवीते पितृब्राह्मणं । ॐ अग्नौक
रणमहं करिष्ये ॐ कुरुष्वेति ते
नोक्ते ॐ अग्नये कव्यवाहनाय
स्वाहा । ॐ सोमाय पितृमते स्वा
हा । आकृतिद्वये देव ब्राह्मण ह
स्ते दत्वा अवशिष्टार्द्धं पिण्डार्थं
स्थापयित्वा अपरमर्द्धं पित्रादि
पात्रे मातामहादि पात्रे च निःक्षि
पेत् । पात्रे अन्नादि निधाय कु
शं दत्वा अधोमुखाभ्यां पाणि
भ्यां पात्रं गृहीत्वा । ॐ पृथिवी ते
पात्रं द्यौः पिधानं ब्राह्मणस्य
मुखे अमृते अमृतं जुहोमि स्वा
हा । पात्राभिमंत्रणं । इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं समूढ
मस्य पांशुले विष्णोहव्यं रक्ष
स्व । इत्यन्नोपरि अधोमुखं हि
अंगुष्ठ निवेशनं । ॐ अपह
तेति त्रियव विकरणं । ॐ निह
न्मि सर्वं यदमेध्यवद्भवेत् ह
ताश्च सर्वेऽसुरदानवा मया
रक्षांसि यक्षाः सपिशाच संघा
हता मया यातुधानाश्च सर्वे
इति सिद्धार्थ विकरणं । तत ॐ
भूर्विलोचनसंज्ञकेभ्यो विश्वे
भ्यो देवेभ्य एतदन्नं सघृतं स
पानीयं सव्यंजनं स्वाहा इति
वारि कुशाद्यैरन्न संकल्पनं ।
ॐ आद्यमिद मच्छिद्र मस्तु सं
कल्पसिद्धिरस्तु । ततो वामोप
वीतेन सव्यंजनं सघृत मन्नं पि
त्रादिपात्रे निधाय तदुपरि भूमि
संलग्न कुशं दत्वा ॐ पृथिवी
ते पात्रं अभिमंत्रणं । उत्तानाभ्यां
पाणिभ्यां पात्रं गृहीत्वा ॐ इदं
विष्णुरित्यन्नोपरि उत्तानो कुष्ठ
निवेशयेत् । ॐ अपहता इति
तिल विकरणं भूमि पातितं
वामजानुः अमुक सगोत्रेभ्यो




अस्मत्पितामह प्रपितामहे
भ्यो अमुकशर्मभ्यः सपत्नीके
भ्य एतदन्नं सघृतं सपानीयं
सव्यञ्जनं प्रतिषिद्धवर्जितं स्व
धा। अन्नसंकल्पः। ओं ऊर्जं व
हन्ती रमृतं घृतं पयः कीलालं
परिस्रुतं स्वधास्थ तर्पयत मेपि
तॄन्। दक्षिणामुखवारिधारा
त्यागः। ओं अत्र पितर मच्छिद्रम
स्तु संकल्पसिद्धिरस्तु। ततः स
व्याहृतिकया गायत्र्याविसृज्योपि
त्वा मधुवाता ऋतायते मधुक्ष
रन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीः
मधुनक्तमुतोषसो मधुमत्पार्थि
वं रजः मधु द्यौ रस्तु नः पिता म
धुमान्नो वनस्पति र्मधुमानस्तु
सूर्यः माध्वीर्गावो भवन्तु नः। म
धु मधु मधु इति जपः। यथास्व
त्वि वाग्यताजुषध्व मिति कथयन्
भुक्तवत्सु समव्याधारिके पितृ
श्लोकं जपेत्। ओं सप्तव्याधा दशा
र्णेषु मृगाः कालञ्जरे गिरौ चक्र
वाकाः शरद्वीपे हंसाः सरसि
मानसे। तेऽपि जाताः कुरुक्षेत्रे
ब्राह्मणा वेदपारगाः प्रस्थि
ता दूरमध्वानं यूयं तेभ्योऽवसी
दत। ततस्तृप्तेषु। दक्षिणामुखो

वामोपवीती। ओं उच्छिष्टाग्रतः।
ओं अग्निदग्धाश्च ये जीवा ये
प्यदग्धाः कुले मम भूमौ दत्तेन
तृप्यन्तु तृप्ता यान्तु परां गतिं।
इति भस्मोकुशोपरि सघृतमन्नं
जलप्लुतं विकिरेत्। ततो देवब्रा
ह्मण क्रमेण जलगण्डूषं दत्वा
पूर्ववत् पुनः सव्याहृतिकां सा
वित्री मधुवातेतित्र्यचं मधुम
धुमितिच जप्त्वा ओं तृप्ताः स्थ भवद्भि
रिति देवब्राह्मण प्रश्नः। स्वद
रितं मिति तेनोक्ते ओं शेषम
न्नमस्तीति प्रश्नः इष्टैः सह
भुज्यतामिति तेनोक्ते पित्रादिब्रा
ह्मणे वामोपवीतेन ओं तृप्ता
स्थ इति प्रश्नः ओं तृप्ताः स्म इत्
युक्ते शेषमन्नेति प्रश्नः। ओं इष्टैः
सह भुज्यतामिति तेनोक्ते माता
महादि ब्राह्मणे तथैव प्रश्नः
ततः पित्रादि ब्राह्मणे पित्र्ये
नेह पात्रयिष्व पातयेत्सुक्ते।
तदुच्छिष्टाग्रतो दक्षिणाग्रे
तु लच्छत्र चतुष्कोणं तिलविक
रणं ओं अमुक सगोत्र अस्मत्पि
तः अमुकशर्मन् सपत्नीक एत
त्ते पिण्डासनं स्वधा अस्त्ववेत्याम
एवं पितामहाय प्रपितामहायच

सव्याहृतिकां गायत्रीं मधुवाते
ति त्रिर्जपेत्। अन्ने साज्ये पिण्डं
कृत्वा कुशोपरि अमुकगोत्रा
स्मत्पितः अमुकशर्मन् सपत्नी
क एष ते पिण्डः ये चात्र त्वामनुये
श्च त्वमनु तस्मै ते स्वधा। एवं
पितामह प्रपितामह मातामह
प्रमातामह वृद्धप्रमातामहेभ्यः
पिण्डशेष विकिरणं पिण्डान्तिके
ओं लेपभुजः प्रीयन्तां इति स्तर
ण कुशेषु हस्तमार्जनं। प्रक्षा
लितेन पिण्डपात्रोदकेन अ
मुकसगोत्र अस्मत्पितः अमुक
शर्मन् सपत्नीक एतत्ते जलम
वनेनिक्ष्व ओं ये चात्र त्वामनुयां
श्च त्वमनु तस्मै ते स्वधेति पितृ
पिण्डसेचनं। पिण्डपात्र मधोमु
खं कृत्वा बद्धाञ्जलि ओं अत्र पि
तरो मादयध्वं यथाभाग मावृषा
यध्व मिति जपः तपः स्पृष्ट्वा वा
मेनपरावृत्य उदङ्मुखश्च प्रा
ण निःसंयम्य ओं वसन्ताय नम
स्तुभ्यं ग्रीष्मायचनमो नमः वर्षा
भ्यश्च शरत्से ऋतवे नमः स
दा हेमन्ताय नमस्तुभ्यं नमस्ते
शिशिरायच मासः संवत्सरेभ्यश्च
दिवसेभ्यो नमोनमः॥ ओं य

इभ्य ऋतुभ्यो नमः पितृभ्यो न
मः। इति जपः। वामेनैव परावृत्य
दक्षिणाभिमुखः अमीमदन्त पि
तरो यथाभाग मावृषायिषत।
इति जपः। वासः शिथिलीकृ
त्यांजलिं कृत्वा ओं नमो वः पित
रः पितरो नमो वः। इतिजपः
गृहान्नः पितरो दत्त। इतिगृह
वीक्षणं। ओं सदो वः पितरो दे
ष्म। इति पिण्ड वीक्षणं। ओं
एतद्वः पितरो वासः इत्यस्वाध्य
अमुक सगोत्र इत्यादिना एत
त्ते वासः ओं ये चात्र त्वामनु यांश्च
त्वमनु तस्मै ते स्वधा दशाभव
स्त्रयाणं। वामेनपाणिना उ
दकपात्रं गृहीत्वा ओं ऊर्जं वहन्ती
रमृतं घृतं पयः कीलालं इत्या
दिना पिण्डोपरि वारिधारा त्यागः
एवं सर्वपितृपात्रशेषोदकैः
प्रत्येकं पिण्डसेचनं। पिण्डवाद्ये
न गन्धादिदानं। पिण्डोपरि कु
शे हस्तम्बुदत्वा ओं अन्नमभी
मदन्तहाव प्रियाअधूषत अ
स्तोषत स्वभानवो विप्रा न
विष्ठया मतीयो याम्बिन्द्र ते
हरीतिजपः इत्यं मातामहा
दे ब्राह्मणानां माचमनं॥



स्वस्त्येत्ति माल्विति भूम्यस्तु
स्तरणं कृत्वा। अपांमध्ये स्थिता
देवा सर्वमप्सु प्रतिष्ठितं। ब्राह्म
णस्य करेन्यस्ताः शिवा आपो भ
वंतु नः। शिवा आपः संत्विति
हस्ते ब्राह्मणस्य जलदाने ल
क्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति
पुष्करे लक्ष्मी र्वसतु सदा गोष्ठे सौ
मनस्यं सदास्तु मे। सौमनस्यमस्तु
पुष्पदाने ओं अक्षतं चास्तु मे पु
ण्यं शांतिः पुष्टि र्धृतिश्च मे।
यद्यत् श्रेयस्करं लोके तत्तद
स्तु सदा मम ओं अक्षतं चारिष्टं
चास्तु यवतण्डुल दाने अमुक
सगोत्राणामस्मत् पितृपिताम
हप्रपितामहानां सपत्नीकानां द
त्तमिदमन्न पानादिकमक्षय्यम
स्तु इति पित्रादि ब्राह्मणहस्ते स
तिलजलदाने। यजमानस्य अक्षय्य
मस्त्विति ब्राह्मणो वदेत्। एवं मा
तामहादीनामक्षय्य आशिषः
ओं अघोराः पितरः संतु गोत्रं नो
वर्द्धतां दातारो नोभिवर्द्धंतां वे
दाः संततिरेव च। श्रद्धा च नो मा
व्यगमद्बहु देयं च नोस्त्विति
अन्नं च नो बहु भवेदतिथींश्च
लभेमहि। याचितारश्च नः।

संतु मा च याचिष्म कंचन एता
एवाशिषः संतु सौमनस्यमस्तु
शुभं चास्तु इत्युक्ते पिंडपात्रे
ष्ठौ संवंधानकुशान् पवित्राणि
चाक्षीण्य पित्रादि ब्राह्मणं स्व
धां वाचयिष्ये ओं वाच्यतां ओं
पितृपितामह प्रपितामह माता
मह प्रमातामह वृद्धप्रमातामहे
भ्यो यथानाम शर्मभ्यः सपत्नी
केभ्यः स्वधोच्यतां अस्तु स्वधा
इत्युक्ते ऊर्जं वहंती रमृतं घृतं
इति पिण्डानां सुपरि धारिया
दद्यात्। ततः ओं विश्वेदेवा अ
स्मिन् यज्ञे प्रीयंतां देवब्राह्म
णहस्ते यवोदक दाने ओं प्रीयं
तामिति तेनोक्ते ओं देवताभ्य
इति त्रि र्जपेत्। अथामुखे
पिंडपात्राणि चालयित्वा अ
चम्य दक्षिणोपवीती एवमभि
मुखः ओं अमुकसगोत्राय अमु
कशर्मणे ब्राह्मणाय सपत्नी
काय श्राद्धप्रतिष्ठार्थं दक्षिणा
मिदं रजतं तुभ्य महं ददे इति
दक्षिणां दद्यात् एवं मातामहा
दीनां ततो देवब्राह्मणाय दक्षिणा
दाने ततः पितृब्राह्मणे पिंडपा
त्रमुत्ताने कृत्वा ओं पिंडाः संपन्नाः

ओं सुसंपन्ना इति पिंडे हीरथा
रां दत्वा पिंडचालनं ओं वाजे वा
जे वत वाजिनो नो धनेषु वि
प्रा अमृता ऋतज्ञाः अस्य मध्वः
पिवत मादयध्वं तृप्ता यात प
थिभि र्देवयानैः। इति पित्रादि
विसर्जनं। ओं आमा वाजस्य प्रस
वो जगम्यादेमे द्यावापृथिवी वि
श्वरूपे आमा गंतां पितरो मातरा
युवमा मा सोमो अमृतत्वाय गम्या
त्। इति देवविसर्जनं ओं अभिरम्य
तामित्युक्ते अभिरताः स्म इति
ब्राह्मणे रुक्त्वा तस्य निवर्त्तनं
गवादिषु पिंड प्रतिपादनमिति
एष श्राद्धविधिः प्रोक्तः पाठतो
पापनाशनः। अनेन विधिना
श्राद्धं कृतं वै यत्र कुत्रचित्॥
अक्षयं स्यात् पितृणां च स्वर्गं
प्राप्नुयुर्ध्रुवं तथा इत्युक्ते पार्व
णश्राद्धं पितृणां ब्रह्मलोकदं
इत्याद्ये गारुडे पार्वणश्राद्धं
२२२ अध्यायः। ब्रह्मोवाच॥
नित्यश्राद्धं प्रवक्ष्यामि एवं व
र्णविशेषयेत् ओं अमुकसगो
त्राणामस्मत्पितृपितामह प्र
पितामहानां अमुकशर्मणां स
पत्नीकानां श्राद्धं सिद्धान्नेन यु

ष्मभ्यमहं करिष्ये। आसनादि
कमस्याहिस्ये देवविवर्ज्जितं॥
वृद्धिश्राद्धं प्रवक्ष्यामि एवं वता
द्विशेषकं। ज्ञातपुत्रमुखदर्श
नादौ वृद्धिश्राद्धं पूर्वाभिमुखे
षु दक्षिणोपवीतिषु मधु यवव
दमिश्रा पिण्डा देवतीर्थेन नम
स्कारेण दक्षिणोपचारेण
कर्तव्यं। दक्षिणाजानु गृहीत्वा
ओं अद्यास्यदीयामुक वृद्धौ अ
मुकसगोत्राणामस्मत् पितृ
पितामहप्रपितामह मातामह
प्रमातामह वृद्धप्रमातामहानां
अमुकशर्मणां सपत्नीकानां
नांदीमुखानां श्राद्धे कर्तव्ये वसुस
त्यसंज्ञकानां विश्वेषां देवानां श्रा
द्धसिद्धान्नेन युष्मासु मया कर्तव्यं
इति देव ब्राह्मणमंत्रणं ओं करि
ष्यसीति तेनोक्ते इत्थमेव मातृ
पितामही प्रपितामहीनां देव
ब्राह्मणामंत्रणं। तत ओं अमुकस
गोत्राया मम पितामह्या अमुकी
देव्या नांदीमुख्याः श्राद्धे सिद्धा
न्नेन युष्मासु मया कर्तव्यमिति
प्रपितामही ब्राह्मणमंत्रणं।
करिष्यसीति तेनोक्ते इत्थमेव
पितामही ब्राह्मणमंत्रणमा



त्र ब्राह्मणामंत्रणंच । तत ॐअ
द्यामुकरुद्रो अमुक सगोत्राणा
मस्मत् प्रपितामह पितामह
पितॄणां नान्दीमुखानां श्राद्धे
क्षिप्रातेन युष्मास्मया कर्त
व्यमिति ब्राह्मणामंत्रणं ॐकरि
ष्यामीति तेनोक्ते इत्य मेव वृद्ध
प्रमातामहादि ब्राह्मणामंत्रणं
देवपितृ सर्वदेवब्राह्मण श्राद्ध
करणानुज्ञापनं । आसने ॐवि
श्वेदेवास आगत शृणुताम इम
हवं एदं बर्हि निषीदत । ॐवि
श्वेदेवाः शृणुतेम हवं येमे
न्तरीक्षेय उपद्यविष्ठये अग्नि
जिव्हा उतवा यजत्रा आसद्या
स्मिन् बर्हिषि मादयध्वं ॐआ
गच्छंतु महाभागा विश्वेदेवा॰
इति विश्वेदेवावाहनं । गंधादिदान
अच्छिद्रावधारणं वाचनं
ततः प्रपितामही प्रभृतीनां
मनुज्ञापने आसनं गंधादिदा
ने अच्छिद्रवधारणं इत्यं प्रपि
तामहादीनां अनुज्ञापनं । आ
सने आवाहने गंधादिदानं । प
वं वृद्धप्रमातामहादीनां अनु
ज्ञापनादिकरणं । ॐवसु सत्य
संज्ञकेभ्यो विश्वेभ्यो देवेभ्य॰
एतदन्नं सघृतं सपानीयं सव्यं
जनं सवरं सदपि प्रतिषिद्ध
वर्जितं नमः । इतिअन्नसंकल्पनं
ॐअमुकसगोत्रे मत्प्रपिताम
हि अमुकी देवि नान्दीमुखि ए
तदन्नं सवरं सदपि नमः । इत्यं
पितामही मातृब्राह्मणे ततः
प्रपितामहादि ब्राह्मणपात्रे ॐ
अमुक सगोत्रेभ्यो मत्प्रपिताम
ह पितामह पितृभ्य एतदन्नं॰
सवरं सदपि सव्यंजनं सपा
नीयं नमः । एवं वृद्धप्रमातामहा
दिभ्यः ॥ एकोद्दिष्टे प्रसावश्य
तद्विशेषं वदे शृणु प्रथमे नि
मंत्रणं पादप्रक्षालनं आसनं
अद्य अमुकसगोत्रस्य मत्पितृ
रमुकदेवशर्मणः प्रतिसांव
त्सरिक मेकोद्दिष्टं श्राद्धं क्षिप्रा
त्रेन युष्मास्मु अहंकरिष्ये । आ
द्धकरणानुज्ञापनं । आसनेअ
र्घः । गंधादिदानं पितृस्थाप
नं अन्न संकल्पनंजप्यनिवीती
उत्तराभिमुखीभूयातिथिश्राद्धं
कुर्यात् ततस्तानिंज्ञात्वा द
क्षिणाभिमुखेव वामोपवीती
उच्छिष्ट समीपे येअग्निदग्धा
इति अन्नविकिरणं । ॐ


अमुकसगोत्र पितरमुकदेव
शर्मन् एतत्ते जल मवनेनि
क्ष्वये चात्र त्वा मनु यांश्च त्वम
नुतस्मै ते स्वधा इति रेखापरि
दत्तिणामुखवारिधारादानं । इ
ति गारुडे २२२ अध्यायः ॥
ब्रह्मोवाच । सपिंडीकरणंवक्ष्ये
षुर्णो वृत्ततत्स्याहनि । कृत्वा
कुतपकालेतु प्रेतादेः पितृलो
कदं । सपिंडीकरणं कुर्यात्
अपराह्नतपर्ववत् पितामहा
दिब्राह्मण निमंत्रणं ॐपुरोर
वोमाद्रवः संज्ञकेभ्यो देवेभ्य
एतदासनंनमः । वामपार्श्वेचा
सनदानं । ततः पितामहप्रपि
तामह वृद्धप्रपितामहानां सप
त्नीकानां श्राद्धमहं करिष्य
इत्यनुज्ञाग्रहणं । पात्रत्रयकर
णपात्रोपरि कुशं दत्वा पात्रा
न्तरेणपिधाय अच्छिद्रावधार
णांतंपरिसमाप्यतथैवपितृव
पित्सपत्नीकस्य प्रेतांत नाम्ना
श्राद्धकरणानुज्ञापनं । देवपात्रा
च्छिद्रावधारणं । तंपरिसमाप्य
पितामह प्रपितामह वृद्धप्रपि
तामहपितृक्रमेणपात्रांतामनाक
वाचनं उद्घाटनं कृत्वा ये समानाः
समनसः पितरो यमराज्ये ते
षां लोकःस्वधा नमो यज्ञो दे
वेषु कल्पतां । ये समानाः सम
नसो जीवाजीवेषु मामकाः
तेषां श्रीर्मयिकल्पतां अस्मि
न्लोकेशतं समाः । एतन्मंत्र
द्वयेन पितृपात्रोदकं पिताम
हप्रपितामह वृद्धप्रपितामह
पात्रे दत्वा वृद्धप्रपितामह पा
त्रंपरित्यज्य पितामह प्रपिता
महयोः उदकं पवित्रत्र पितृ
पात्रे निक्षिपेत् ततः पितृब्रा
ह्मणहस्ते पवित्रदानं । पात्रेषु
ष्पेण शिरसः करपादाङ्गेनेह
स्तेः स्य जलदानं हस्ताभ्यां पा
त्रमुत्थाप्य ॐयादिव्येतिच प
ठित्वा अमुक सगोत्र मत्पितर
मुकप्रेतपत्नेअर्घ्यायेचात्रत्वा
मनुयांश्च त्वमनुतस्मै ते स्वधा ।
इति पितृब्राह्मणहस्ते सोकम
र्घोदकं पितृतीर्थेन दत्वा पिताम
हब्राह्मणहस्ते पवित्रदानं पात्र
पुष्पेण शिरः करपादाङ्गेन हस्ते
ष्यजलदानं हस्ताभ्यां पात्रमु
त्थाप्य यादिव्येति पठित्वा अमु
कसगोत्र मत् पितामह अमुक
देवशर्मन् सपत्नीकप्रवतेऽर्घः

स्वधा पितृपात्रेणैव पिताम
ह ब्राह्मणहस्ते स्तोक मर्घ्या
दकं दत्त्वा शेषमुदकं पिंडस्येच
नार्थं पात्रान्तरे निधाय तेनैव पा
त्रेण पितामहब्राह्मणानां ह
स्तस्थउदके पवित्रं गृहीत्वापि
तृब्राह्मण वामपार्श्वे दक्षिणा
ग्रकुशोपरि पितृभ्यः स्थानम
सीति अधोमुखपात्रं स्थापने।
पितामहानां गंधादिदाने अ
ग्नौकरणं देवानां अवशिष्टा
न्ने पितामहादिपात्रे क्षिपेत् पि
तामहादि पात्राभिमंत्रणादिवा
चन पर्यन्ते क्रमेण समाप्य पि
तृब्राह्मण पात्राभिमंत्रणे अंगु
ष्ठनिवेशने तिल विकिरणं।
तिलान्नविकिरणं कृत्वा अमु
कसगोत्र मत्पित अमुक प्रेत प
ते नैवं सह तेन सपानीयं सभोज
नं प्रतिष्ठित वर्त्तिते ये चात्र त्वा
मनु यांश्च त्वमनु तस्मै ते स्वधा
ततो देवप्रभृति आपोशानेद॰
यात्। अतिथौ प्राप्ते अतिथि
श्राद्धं कुर्यात् अस्मिन्नवसरे। त
तो विकिरणं। पितामहादीप
अं कृत्वा पितृब्राह्मणे ओं स्वदि
तमवाड्वितिप्रश्नः अमुकसगोत्र

मत्पितामह अमुक शर्मन्
सपत्नीक एष ते पिण्डो ये चा
त्र त्वामनु यांश्च त्वमनु तस्मै ते स्व
धा एव मन्ययोः। पिण्डदान म
च्छिद्रमस्तु। संकल्पसिद्धिरस्तु
इति वाचनं कृत्वा ततः पितृप्रे
तपिण्डपातने ओं संकल्पसिद्धि
रस्त्विति वाचने तं समाप्य पिंड
त्रयं कृत्वा ये समानाः समन
सः इति मंत्रद्वयं पठित्वा पिता
मह प्रपितामह वृद्धप्रपितामह
पिण्डेषु क्षिपेत्। पिण्डेषु गंधा
दिकं पिण्डचालने। अतिथिब्रा
ह्मणे स्वदित मित्यादि प्रश्नः।
ब्राह्मणानामाचमनं भुक्तशेषे
ण तांबूलदाने स्वस्त्यस्तिति नम
स्ते शिवा आपः सन्तु वृद्धप्रपिता
महादिक्रमेण ब्राह्मणानां हस्ते
जलदाने गोत्रस्माकमस्तु पि
तृब्राह्मणहस्ते ओं उपतिष्ठतामि
तिसतिलजलदानेनाम गोत्रेण
उपतिष्ठतामिति तेनोक्ते अघो
राः पितरः सन्तु सन्त्विति उक्त स्व
धां वाचयिष्ये इति पितामहादि
ब्राह्मणानुज्ञापने ओं वाच्यतामि
त्युक्ते पितामहादिभ्यः स्वधोच्यतां
अस्तु स्वधा इत्युक्ते पितृब्राह्मणे

पितृभ्यः स्वधोच्यतां इति अस्तु
स्वधा इत्युक्ते ओं ऊर्जं वहन्तीर
मृतं इति दक्षिणाभिमुख वा
रिधारापातः ओं विश्वेदेवाः अ
स्मिन्यज्ञे प्रीयेतामिति देव
ब्राह्मणहस्ते यवोदकदाने ओं
देवताभ्य इति त्रि जपः। पिण्डा
न् पात्रे तोलयित्वा आचम्यापि
तामहादिभ्यो दक्षिणां दद्यात
तः पितृब्राह्मणाय ततो अति
थिब्राह्मणाय च आशिषो मे
दीयतामित्याशीःप्रार्थने आ
शिषः प्रतिगृह्यतां इत्युक्ते दा
तारो नोभिवर्द्धन्तामिति पात्रमु
त्तानं कृत्वा वाजे वाजे इति विसर्ज
ने अभिरम्यतामिति पितृब्राह्म
णविसर्जनं। सपिंडीकरणश्रा
द्धेष्वासमेक्ते मया तव। श्राद्धे
विष्णुः श्राद्धकर्ता फलं श्राद्धादि
के हरिः। इति गारुडे २२४ अध्या
यः तिथ्यादिविशेषे श्राद्धकर
णफलं यथा व्यास उवाच अ
थ श्राद्धममावास्यां प्राप्य का
र्यं द्विजोत्तमैः। पिण्डान्वाहार्य
कं भक्त्या भुक्ति मुक्ति फलप्रदं
पिण्डान्वाहार्यकं श्राद्धं क्षीणे
राजनि शस्यते। अपराह्णे द्विजा

तीनां प्रशस्तेनामिषेण तु ॥
प्रतिपत् प्रभृति ह्येता स्तिथ्य
यः कृष्णपक्षके। चतुर्दशीं वर्ज
यित्वा प्रशस्ता ह्युत्तरोत्तराः। अ
मावास्याष्टका स्तिस्रः पौष मा
घादिषु त्रिषु। तिस्र श्चान्वष्टकाः
पुण्या माघस्य दशमी तथा। त्रयो
दशीं मघायुक्तां वर्षासु तु विशे
षतः। शस्यपाकश्राद्धकालानि
त्यान्याहुर्दिने दिने। नैमित्तिकं
हि कर्तव्यं ग्रहणे चन्द्रसूर्ययोः
बान्धवानां च मरणे नारकी स्या
दतोन्यथा। काम्यानि चैव श्रा
द्धानि शस्यन्ते ग्रहणादिषु अ
यने विषुवे चैव व्यतीपातेप्यनन्त
के। संक्रान्त्यामक्षयं श्राद्धं तथा ज
न्मदिनेष्वपि। नक्षत्रेषु च सर्वेषु
कार्यं काम्ये विशेषतः। स्वर्गं तु ल
भते कृत्वा कृत्तिकासु द्विजोत्त
मः। अपत्यमथ रोहिण्यां सौम्ये
तु ब्रह्मवर्चसं। रौद्राणां कर्मणां
सिद्धि मार्द्रायां शौर्य मेव च ॥
पुनर्वसौ तथा भूमिं श्रियं पुष्ये
तथैव च। सर्वान् कामांस्तथा
सार्पे पैत्र्ये सौभाग्य मेव च ॥
अर्यम्णे तु धनं विन्द्यात् फल्गु
न्यां पापनाशनं ज्ञातिश्रैष्ठ्यं तथा



हस्ते विद्यायां सुबहून् सुतान्
वाणिज्यसिद्धिं स्वातौ च विशा
खायां सुवर्णकं मैत्रे बहूनि
मित्राणि राज्यं शाक्रे तथैव च ।
मूले कृषिं लभेद्याने सिद्धिमा
प्येऽतथैव च सर्वान् कामान् वै
श्वदेवे श्रैष्ठ्यं तु श्रवणे पुनः ॥
श्रविष्ठायां तथा कामान् वा
रुणे च परं बलं । अजैकपाद
के कुर्यादहिर्बुध्ने गृहे शुभं ।
रेवत्यां बहवो गावो ह्यश्विन्यां
तुरगांस्तथा । याम्ये चाजीवनं
तस्मात् यदि श्राद्धं प्रयच्छति
आदित्यवारे चारोग्यं चान्द्रे सौ
भाग्यमेव च कौजे सर्वत्र विज
यं सर्वान् कामान् बुधस्य च
विद्यामभीष्टां जीवे तु धनं वै
भार्गवे पुनः । शनैश्चरे लभेदा
युः प्रतिपत्सु शुभान् सुतान्
कन्यका वै द्वितीयायां तृती
यायां भुवं तथा ॥ पशून् तु
द्रौ चतुर्थ्यां तु पंचम्यां शो
भनान् सुतान् । षष्ठ्यां द्युतिं कृ
षिं सप्तम्यां लभते नरः
अष्टम्यामपि वाणिज्यं लभते
श्राद्धदः सदा । स्यान्नवम्यामेक
खुरं दशम्यां द्विखुरं बहु । प

कादश्यां तथा रूप्यं ब्रह्मवर्च
स्विनः सुतान् । द्वादश्यां जात
रूपं तु रजतं रौप्यमेव च ॥ ज्ञा
तिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु क्रुप्रजाः पंचदश्यां
सर्वकाममाप्नोति श्राद्धदः स
दा तस्माच्छ्राद्धं न कर्त्तव्यं चतुर्द
श्यां द्विजातिभिः । शस्त्रेण
तु हतानां वै तत्र श्राद्धं प्रक
ल्पयेत् । द्रव्य ब्राह्मणसंपत्तौ
न कालनियमः कृतः । तस्मा
द्भोगापवर्गार्थं श्राद्धं कुर्याद्द्वि
जातिभिः ॥ कर्म्मारम्भेषु स
र्वेषु कुर्यादाभ्युदयं पुनः ॥
पुत्रजन्मादिषु श्राद्धं पार्वणं
पर्वणि स्मृतं । अहन्यहनि नि
त्यं स्यात् काम्यं नैमित्तिकं त
था एकोद्दिष्टादि विज्ञेयं वृद्धि
श्राद्धं च पार्वणं । एतत् पंचवि
धं श्राद्धं मनुना परिकीर्त्तितं
यात्रायां षष्ठमाख्यातं तत्प्र
यत्नेन पालयेत् शुद्धये सप्तमं
श्राद्धं ब्रह्मणा परिकीर्त्तितं
दैवि चाष्टमं श्राद्धं यत्कृत्वा
मुच्यते भयात् ॥ सन्ध्यारात्र्यो
र्न कर्त्तव्यं राहोरन्यत्र दर्शनात्
देशानान्तु विशेषेण भवेत्पु
ण्यमनुत्तमं । गयायामक्षयं

श्राद्धं प्रयागे मरकण्टके । गा
यन्ति पितरो गाथां कीर्त्तयन्ति
मनीषिणः एष्टव्या बहवः पुत्रा
यद्येकोऽपि गयां व्रजेत् । यजे
त वाश्वमेधेन नीलं वा वृषमु
त्सृजेत् एष्टव्या बहवः पुत्राः
शीलवन्तो गुणान्विताः । तेषां
तु समवेतानां यद्येकोऽपि गयां
व्रजेत् । गयां प्राप्यानुषंगेण
यः श्राद्धं समाचरेत् । तारि
ताः पितरस्तेन स याति परमां
गतिं ॥ वराहपर्वते चैव गंगा
यां च विशेषतः वाराणस्यां
विशेषेण यत्र देवैः स्वयं हरः
गंगाद्वारे प्रभासे च बिल्वके
नीलपर्वते कुरुक्षेत्रे च कुब्जा
म्रे भृगुतुंगे महालये । केदा
रे फल्गुतीर्थे च नैमिषारण्य
एव च । सरस्वत्यां विशेषेण पु
ष्करे च विशेषतः । नर्मदायां कु
शावर्त्ते श्रीशैले भद्रकर्णके ।
वेत्रवत्यां विपाशायां गोदाव
र्यां विशेषतः । एवमादिषु
चान्येषु तीर्थेषु पुलिनेषु च ।
नदीनां चैव तीरेषु तुष्यन्ति पित
रः सदा । व्रीहिभिश्च यवैर्म्मासै
रद्भिर्मूलफलेन च श्यामाकैश्च

तथा शाकैर्नीवारैश्च प्रियंगु
भिः । गोधूमैश्च तिलैर्मुद्गैर्मा
सं प्रीणयते पितॄन् आम्रान्
आम्रातकान् इक्षून् मृद्वीकाश्च
सदाडिमान् विदारींश्च भरण्डां
श्च श्राद्धकाले प्रदापयेत् ला
जान्मधुयुतान् दद्यात् शक्तून्
शर्करया सह दद्याच्छ्राद्धे प्रय
त्नेन शृंगाटक कशेरुकान् ।
द्वौ मासौ मत्स्यमांसेन त्रीन्मा
सान् हारिणेन तु औरभ्रेणाथ
चतुरः शाकुनेन तु पंच वै ष
ण्मासान् छागमांसेन पार्षते
ण चाथ सप्त वै अष्टावेणस्य मां
सेन रौरवेण नवैव तु दशमासां
स्तु तृप्यन्ति वराहमहिषामिषैः
शशकूर्म्मयोस्तु मांसेन मासा
न् एकादशैव तु । संवत्सरं तु गव्ये
न पयसा पायसेन वा वाध्रीण
सस्य मांसेन तृप्तिर्द्वादशवार्षि
की कालशाकं महाशल्क
खड्गलोहामिषं मधु आनन्त्या
यैव कल्प्यन्ते मुन्यन्नानि च सर्वशः
क्रीत्वा लब्ध्वा स्वयं वाथ मृता
नाहृत्य वै द्विजः । दद्यात् श्राद्धे
प्रयत्नेन तदस्याक्षयमुच्यते ॥
पिप्पलीं शिग्रुकं चैव तथा चैव

मसूरकं कुष्माण्डालाबुवार्त्ताकान्भूस्तृणं सुरसं तथा। कुसुम्भपिण्डमूलं वै तण्डुलीयकमेव च राजमाषांस्तथा क्षीरं माहिषं च विवर्जयेत्। कोद्रवान्कोविदारांश्च पालङ्कीं मरिचं तथा। वर्जयेत् सर्वयत्नेन श्राद्धस्थाने द्विजोत्तमः। इति कौर्मे उपरिभागे २१ अध्यायः॥ व्यास उवाच। स्नात्वा यथोक्तं सन्तर्प्य पितॄन् चन्द्रक्षये द्विजः। पिण्डान्वाहार्यकं श्राद्धं कुर्यात्सौम्यमनाः शुचिः। पूर्वमेव परीक्षेत ब्राह्मणं वेदपारगं। तीर्थं तद्धव्यकव्यानां प्रदाने चातिथिः स्मृतः। ये सोमपा विरजसो धर्मज्ञाः शान्तचेतसः। व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः। पञ्चाग्निरप्यधीयानो यजुर्वेदविदेव च। बह्वृचश्च त्रिसुपर्णस्त्रिमधुर्वाथ यो भवेत्। त्रिणाचिकेतच्छन्दोगो ज्येष्ठसामग एव च। अथर्वशिरसोऽध्येता रुद्राध्यायी विशेषतः। अग्निहोत्रपरो विद्वान्न्यायविच्च षडङ्गवित्। मन्त्रब्राह्मणविच्चैव यश्च स्याद्धर्मपाठकः। ऋषिव्रती ऋषीकस्तथा द्वादशवार्षिकः ब्रह्मदेयात्मसन्तानो गर्भशुद्धः सहस्रदः। चान्द्रायणव्रतचरः सत्यवादी पुराणवित्। गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः॥ विमुक्तः सर्वतो धीरो ब्रह्मभूतो द्विजोत्तमः। महादेवार्चनरतो वैष्णवः पङ्क्तिपावनः॥ अहिंसानिरतो नित्यमप्रतिग्राहकस्तथा। सत्रिणो दाननिरता विज्ञेयाः पङ्क्तिपावनाः। मातापित्रोर्हिते युक्तः प्रातःस्नायी च वा द्विजः। अध्यात्मविन्मुनिर्दान्तो विज्ञेयः पङ्क्तिपावनः। ज्ञाननिष्ठो महायोगी वेदान्तार्थविचिन्तकः श्रद्धालुः श्राद्धनिरतो ब्राह्मणः पङ्क्तिपावनः। वेदविद्याव्रतस्नातो ब्रह्मचर्यपरः सदा। आथर्वणो मुमुक्षुश्च ब्राह्मणः पङ्क्तिपावनः असमानप्रवरको ह्यसगोत्रस्तथैव च। असम्बन्धी च विज्ञेयाः ब्राह्मणाः पङ्क्तिपावनाः। भोजयेद्योगिनं पूर्वं तत्त्वज्ञानरतं यतिं। अलाभे नैष्ठिकं दान्तमुपकुर्वाणकं तथा। तदलाभे गृहस्थं वा मुमुक्षुं सङ्गवर्जितं

सर्वालाभे साधकं वा गृहस्थमपि भोजयेत्। प्रकृतेर्गुणतत्त्वज्ञो यस्याश्नाति यतिर्हविः फलं वेदविदां तस्य सहस्रादतिरिच्यते। तस्माद्यत्नेन योगीन्द्रमीश्वरज्ञानतत्परं। भोजयेद्धव्यकव्येषु त्वलाभे त्वितरान् द्विजान्। एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः। मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुं। दौहित्रं विट्पतिं बन्धुं ऋत्विग्याज्यौ च भोजयेत्॥ न श्राद्धे भोजयेन्मित्रं धनैः कार्य्यः स्वसंग्रहः। पैशाची दक्षिणा सा हि नैवामुत्र फलप्रदा॥ कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिं। द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलं। ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति। तस्मै हव्यं न दातव्यं न च भस्मनि हूयते। यथोषरे बीजमुप्त्वा न वप्ता लभते फलं। तथार्चे हविर्दत्वा न दाता लभते फलं यावतो ग्रसते पिण्डान् हव्यकव्येषु मन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तान् स्थूलर्ष्ट्ययोगुडान् अपि विद्याकुलैर्युक्ता हीनवृत्ता नराधमाः। यत्रैते भुञ्जते हव्यं तद्भवेदासुरं द्विजाः। यस्य वेदश्च वेदी च विच्छिद्येते त्रिपूरुषं स वै दुर्ब्राह्मणो नार्हः श्राद्धादिषु कदाचन। शूद्रप्रेष्यो भृतो राज्ञो वृषलो ग्रामयाजकः। वधबन्धोपजीवी च षडेते ब्रह्मबन्धवः। दत्त्वानुयोगाद्वृत्त्यर्थं पतितान्मनुरब्रवीत्। वेदविक्रयिणो ह्येते श्राद्धादिषु विगर्हिताः। श्रुतिविक्रयिणो ये तु परपूर्वासमुद्भवाः। असमानान् याजयन्ते पतितास्ते प्रकीर्त्तिताः। असंस्कृताध्यापका ये भृत्या वाऽध्यापयन्ति ये। अधीयते तथा वेदान् पतितास्ते प्रकीर्त्तिताः। वृद्धश्रावकनिर्ग्रन्थाः पञ्चरात्रविदो जनाः। कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः। यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः। न तस्य तद्भवेच्छ्राद्धं प्रेत्य चेह फलप्रदं। अनाश्रमी यो द्विजः स्यादाश्रमी वा निरर्थकः। मिथ्याश्रमी च ये विप्रा विज्ञेयाः पङ्क्ति-

दूषकाः। कुष्ठमो कुनखी कुष्ठी
श्वित्री च श्यावदन्तकः। विद्धज
ननश्चैव स्तेनः क्लीबोऽथ नास्
तिकः। मद्यपो वृषलीसक्तो वी
रहा दिधिषूपतिः। आगारदाही
गुणाशी सोमविक्रयिणो द्वि
जाः। परिवेत्ता तथा हिंस्रः परि
वित्तिर्निराकृतिः। पौनर्भवः कु
सीदी च तथा नक्षत्रदर्शकः। गी
तवादित्रनिरतो व्याधितः का
ण एव च। हीनाङ्गश्चातिरिक्ता
ङ्गो ह्यवकीर्णिस्तथैव च। कन्या
दूषी कुण्डगोलौ ह्यभिशस्तोऽ
थ देवलः। मित्रध्रुक् पिशुनश्चै
व नित्यं भार्य्यानुवर्त्तकः। मातापि
त्रोर्गुरोस्त्यागी दारत्यागी तथै
व च। गोत्रभित् भ्रष्टशौचश्च का
ण्डस्पृष्टस्तथैव च। अनपत्यः कू
टसाक्षी याचको रङ्गजीवनः॥
समुद्रयायी कृतहा तथा सम
यभेदकः। वेदनिन्दापरश्चैव त
हृदारतस्तथा। द्विजनिन्दार
ताश्चैव वर्ज्याः श्राद्धादिकर्म्मसु
कृतघ्नः पिशुनः क्रूरो नास्ति
को वेदनिन्दकः। मित्रध्रुक् कुह
कश्चैव विशेषात् पङ्क्तिदूषकाः।
सर्व्वे पुनरभोज्यान्नाः स्वदानार्हा

हि कर्म्मसु ब्रह्मभावानिरस्ता
श्च वर्ज्जनीयाः प्रयत्नतः। शूद्रा
न्नरसपुष्टाङ्गाः सन्ध्योपासनव
र्ज्जिताः। महायज्ञविहीनश्च ब्रा
ह्मणः पङ्क्तिदूषकः। अधीतना
शनश्चैव स्नानहोमविवर्ज्जितः।
तामसो राजसश्चैव ब्राह्मणः
पङ्क्तिदूषकः। बहुनात्र किमुक्ते
न विहितान् ये न कुर्व्वते। निन्दि
ताचरणश्चैव वर्ज्जनीयाः प्रयत्नतः।
इति कौर्म्मे उपविभागे २२ अध्या
यः। गोमयेनोदकैर्भूमिं शोध
यित्वा समाहितः। सन्निपात्य
द्विजान् सर्व्वान् साधुभिः सन्नि
मन्त्रयेत्। श्वोभविष्यति मे श्रा
द्धं पूर्व्वेद्युरभिपूज्य च। असम्भ
वे परेद्युर्वा यथोक्तैर्लक्षणैर्यु
तान्। तस्य ते पितरः श्रुत्वा श्रा
द्धकालमुपस्थिते। अन्योन्यम
नसा ध्यात्वा सम्पतन्ति मनोज
वाः। ब्राह्मणैस्ते सहाश्नन्ति पि
तरो ह्यन्तरीक्षगाः। वायुभूता
श्च तिष्ठन्ति भुक्त्वा यान्ति परां ग
तिं। आमन्त्रिताश्च ते विप्राः श्रा
द्धकाल उपस्थिते। वसेयुर्नि
यताः सर्व्वे ब्रह्मचर्य्यपरायणाः।
अक्रोधनोऽत्वरो॥

ऽमन्त्रः सत्यवादी समाहितः। भा
रं मैथुनमध्वानं श्राद्धकृद्वर्ज्जये
ज्जपं। आमन्त्रितो ब्राह्मणो यो
ऽन्यं वै कुरुते क्षणं। स याति नो
रवं घोरं सूकरत्वं प्रयाति च
आमन्त्रयित्वा यो मोहादपरं मन्त्र
येत् द्विजं। स तस्मादधिकः पा
पी विष्ठाकीटोऽभिजायते॥
श्राद्धे निमन्त्रितो विप्रो मैथुनं
योऽधिगच्छति। ब्रह्महत्यामा
वाप्नोति तिर्य्यग्योनौ स गच्छति
श्राद्धं कृत्वा तु भुक्त्वा च यो
ऽध्वानं प्रतिपद्यते। भवन्ति पि
तरस्तस्य तन्मासं पांशुभो
जनाः। निमन्त्रितस्तु यः श्राद्धे
प्रकुर्य्यात् कलहं द्विजः। भव
न्ति तस्य तन्मासं पितरो मलभो
जनाः। तस्मान्निमन्त्रितः श्राद्धे
नियतात्मा भवेत् द्विजः। अक्रो
धनः शौचपरः कर्त्ता चैव जिते
न्द्रियः। श्वोभूते दक्षिणां गत्वा
दिशं दर्भान् समाहितः। समू
लानाहरेद्वापि दक्षिणाग्रान् सु
निर्म्मलान्। दक्षिणाप्लवनं स्नि
ग्धं विविक्तं शुभलक्षणं। शुचिं
देशं विविक्तञ्च गोमयेनोपले
पयेत्। नदीतीरेषु तीर्थेषु स्वभू

मौ चैव सानुषु। विविक्तेषु च।
तुष्यन्ति दत्ते च पितरः सदा॥
पारक्ये भूमिभागे तु पितॄणां
नैव निर्व्वपेत्। स्वामिभिस्तद्धि ह
न्येत मोहात् यत् क्रियते नरैः।
अटव्यः पर्व्वताः पुण्या तीर्था
न्यायतनानि च। सर्व्वाण्यस्वामि
कान्याहुर्न हि तेषु परिग्रहः॥
तिलान् अवकिरेत्तत्र सर्व्वतो बन्ध
येदजान्। असुरोपहतं सर्व्वं ति
लैः शुध्यत्यजेन वा। ततोऽन्नं
बहुसंस्कारं नैकव्यञ्जनमच्युतं
चोष्यपेयसमृद्धञ्च यथाशक्त्या
प्रकल्पयेत्। ततो निवृत्ते म
ध्याह्ने लुप्तरोमनखान् द्वि
जान्। अभिगम्य यथामार्गं प्र
यच्छेद्दन्तधावनं। तैलमभ्यञ्ज
नं स्नानं स्नानीयञ्च पृथग्विधं।
पात्रैरौदुम्बरैः कुर्य्यात् वैश्वदेव
त्यपूर्व्वकं। ततः स्नात्वा निवृत्ते
भ्यः प्रत्युत्थाय कृताञ्जलिः॥
पाद्यमाचमनीयञ्च सम्प्रयच्छे य
थाक्रमं। पुस्तकान्तरे निवृत्तेभ्य
स्थाने निमित्तेभ्य इति निवृत्ते
भ्य इति च पाठः। ये चात्र वि
श्वेदेवानां द्विजाः पूर्व्वं निमन्त्रि
ताः। प्राङ्मुखान्यासनान्येषां।

द्विदर्भौ परितानि च । दक्षिणा
मुखयुक्तानि पितॄणामासना
नि च दक्षिणाग्रैकदर्भाणि प्रो
क्षितानि तिलोदकैः । तेषूपवेश
येदेतानासने संस्पृशन् द्विजः । आ
स्यध्वमिति संजल्पन्नासीरंस्ते पृ
थक् पृथक् । द्वौ दैवे प्राङ्मुखौ पि
त्र्ये त्रय उदङ्मुखास्तथा । एकै
कं वा भवेत्तत्र देव मातामहेष्व
पि । सत्क्रिया देशकालौ च
शौचं ब्राह्मणसंपदः । पंचैता
न् विस्तरो हन्ति तस्मान्नेहेत वि
स्तरं ॥ अपि वा भोजयेदेकं ब्रा
ह्मणं वेदपारगं । श्रुतशी
लादिसंपन्नमलक्षणविवर्जि
तं । उद्धृत्य पात्रे चान्नं तत् सर्व
स्मात् प्रकृतात्पुनः ॥ देवता
यतने तस्मै निवेद्यान्नं प्रवर्त्तये
त् । प्रास्येदग्नौ तदन्नं तु दद्या
द्वा ब्रह्मचारिणे । तस्मादेक
मपि श्रेष्ठं विद्वांसं भोजयेत् द्वि
जं । भिक्षुको ब्रह्मचारी वा भोज
नार्थमुपस्थितः । उपविष्टेषु
यः श्राद्धे कामं तमपि भोजयेत्
अतिथिर्यस्य नाश्नाति न तत् श्रा
द्धं प्रशस्यते । तस्मात् प्रयत्ना
त् श्राद्धेषु पूज्या ॥

ह्यतिथयो द्विजैः । आतिथ्यरहि
ते श्राद्धे भुंजते ये द्विजातयः । का
कयोनिं व्रजन्त्येते दाता चैव न सं
शयः । हीनांगः पतितः कुष्ठी व्र
णी पुक्कस नास्तिकौ । कुक्कु
टाः शूकराः श्वानो वर्ज्याः श्रा
द्धेषु दूरतः । बीभत्समशुचिं
नग्नं मत्तं धूर्तं रजस्वलां । नी
लकाषायवसनं पाषण्डांश्च
विवर्जयेत् । यत्तत्र क्रियते क
र्म पैतृकं ब्राह्मणान् प्रति । त
त्सर्वमेव कर्तव्यं वैश्वदैविकपू
र्वकं । यथोपविष्टान् सर्वांस्ता
नलंकुर्याद्विभूषणैः । स्रग्दा
मभिः शिरोवेष्टि धूपवासानुले
पनैः । ततस्त्वावाहयेद्देवान् ब्रा
ह्मणानामनुज्ञया । उदङ्मुखो
यथान्यायं विश्वेदेवास इत्यृचा
द्वे पवित्रे गृहीत्वा च भाजने तालि
ते पुनः । शन्नोदेव्या जले क्षिप्त्वा
यवोसीति यवांस्तथा । यादिव्या
इति मंत्रेण हस्ते त्वर्घ्यं निवेदये
त् । प्रदद्यात् गंधमाल्यानि धूपादी
नि च शक्तितः । अपसव्यं ततः
कृत्वा पितॄणां दक्षिणामुखः ।
आवाहनं ततः कुर्यात् उशन्ते
त्वेत्यृचा बुधः । आवाह्य तदनुज्ञा

तो जपेदायन्तु नस्ततः । शन्नो दे
व्योदकं पात्रे तिलोसीति तिलां
स्तथा । क्षिप्त्वा चार्घ्यं यथापू
र्वं दत्वा हस्तेषु वै पुनः । संस्र
वांश्च ततः सर्वान् पात्रे कुर्या
त् समाहितः । पितृभ्यः स्थान
मेतेन न्युब्जं पात्रं निधापयेत् ।
अग्नौ करिष्यन्नादाय पृच्छेदन्नं
घृतप्लुतं करिष्य इत्यनुज्ञातो
जुहुयादुपवीतवत् । यज्ञोपवी
तिना होमः कर्तव्यः कुशपाणि
ना । प्राचीनावीतिना पित्र्यं
वैश्वदेवं तु होमयेत् । दक्षि
णं पातयेज्जानुं देवान् परिचर
न् सदा । पितॄणां परिचर्यासु
पातयेदितरं तथा । सोमाय वै पि
तृमते स्वधा नम इति ब्रुवन् ॥
अग्नये कव्यवाहनाय स्वधेति
जुहुयात्ततः । अग्न्यभावे तु वि
प्रस्य पाणावेवोपपादयेत् ।
महादेवान्तिके वाथ गोष्ठे वा
सुसमाहितः । ततस्तैरभ्यनु
ज्ञातो गत्वा वै दक्षिणां दिशं
गोमयेनोपलिप्योर्वी स्थानं
कृत्वा तु सैकतं । मण्डलं चतु
रस्रं वा दक्षिणाप्रवणं शुभं । त्रि
रुल्लिखेत्तस्य मध्यं दर्भेणैकेन

चैव हि । ततः संस्तीर्य तत्स्थाने
दर्भान्वै दक्षिणाग्रकान् । त्रीन्
पिण्डान् निर्वपेत्तत्र हविःशेषा
त् समाहितः । न्युप्य पिण्डांस्तु त
द्धस्तं निमृज्याल्लेपभागिनां ।
तेषु दर्भेष्वथाचम्य त्रिराचम्य श
नैरसून् । षडृतून्नमस्कुर्यात्
पितॄनेव च मंत्रवत् । उदकं निन
येच्छेषं शनैः पिण्डान्तिके पुनः
अवजिघ्रेत्ततान् पिण्डान् यथा
न्युप्तान् समाहितः । अथ पिण्डा
च्च शिष्टान्नं विधिना भोजयेद्द्वि
जान् मांसान् पूपांश्च विविधा
न् दद्यात् कृशरपायसं । सूप
शाकफलानीक्षून् पयो दधि
घृतं मधु । अन्नं चैव यथाकामं
विविधं भक्ष्य पेयकं । यदिष्टं
द्विजेन्द्राणां तत्तत् सर्वं निवेद
येत् धान्यांस्तिलांश्च विविधान्
शर्करा विविधास्तथा । उष्ण
मन्नं द्विजातिभ्यो दातव्यं श्रेय
इच्छता । अन्यत्र फलमूलेभ्यः
पानकेभ्यस्तथैव च । नाश्रु
पातयेज्जातु न कुप्येन्नानृ
तं वदेत् । न पादेन स्पृशेदन्नं
न चैतदवधूनयेत् । क्रोधेन चैव
यद्दत्तं यद्दत्तं त्वरया पुनः ।

यातुधाना विलुंपंति जल्पतां
चोपपादिते स्विन्नगात्रो न तिष्ठे
त सन्निधौ च द्विजन्मनां । न चा
त्र श्येन काकादीन् पक्षिणः प्र
तिषेधयेत् । न दद्यात्तत्र हस्तेन
प्रत्यक्षं लवणं तथा । न चायसे
न पात्रेण न चैवाश्रद्धया पुनः ॥
कांचनेन तु पात्रेण तथैवोदुंबरे
ण च । दत्तमक्षयतां याति खड्गे
न च विशेषतः । पात्रे तु मृन्मये
यो वै श्राद्धे भोजयते पितॄन् स
याति नरकं घोरं भोक्ता चैव पुरोध
सः । न पंक्त्यां विषमं दद्यान्न
याचेन्न च दापयेत् । याचिता
दापिता दाता नरकान् यांति
दारुणान् । भुंजीत वाग्यतो मृ
ष्टं न क्रुध्येत् प्राकृतान् गुणान्
न् । तावद्धि पितरोश्नंति
यावन्नोक्ता हविर्गुणाः । ना
ग्रासनोपविष्टस्तु भुंजीत प्र
थमं द्विजः । बहूनां पश्यतां
सोऽज्ञः पंक्त्या हरति किल्बिषं
नात्किंचिद्वर्जयेच्छ्राद्धे नियुक्त
स्तु द्विजोत्तमः ॥ न मांसं प्रति
षेधेत न चान्यस्यान्नमीक्षये
त् । यो नाश्नाति द्विजो मांसं
नियुक्तः पितृकर्मणि । स प्रे

त्य पशुतां याति संभवानेकविंश
तिं । स्वाध्यायं श्रावयेदेषां धर्म
शास्त्राणि चैव हि ॥ इतिहास
पुराणानि श्राद्धकल्पांश्च शो
भनान् । ततोन्नमुत्सृजेद्भुक्तेष्व
ग्रतो विकिरन् भुवि । पृष्ट्वा
स्वदित मित्येवं तृप्तानाचाम
येत्ततः । आचांताननुज्ञानीया
दभितो रम्यतामिति । स्वधा
स्त्विति च ते ब्रूयुः ब्राह्मणास्त
दनंतरं । ततो भुक्तवतां तेषा
मन्नशेषं निवेदयेत् । यथा ब्रू
युस्तथा कुर्यादनुज्ञातो द्विजो
त्तमैः । पित्र्ये स्वदित मित्येवं
वाक्यं गोष्ठेषु सुशृतं । संपन्न
मित्यभ्युदये दैवे रुचित मित्य
पि । विसृज्य ब्राह्मणांस्तान्
वै पित्र्य एवं तु वाग्यतः । दक्षिणां
दिशमाकांक्षन् याचेतेमान् व
रान् पितॄन् । दातारो नोभिवर्द्धंतां
वेदाः संततिरेव च । श्रद्धा च नो मा
व्यगमद् बहु देयं च नोस्त्विति ।
पिंडांस्तु गोजविप्रेभ्यो दद्या
दग्नौ जलेपि वा । मध्यमं तु ततः
पिंडं मद्यात् पत्नी सुतार्थि
नी । प्रक्षाल्य हस्तावाचम्य ज्ञा
तीन् शेषेण भोजयेत् ॥

ज्ञातिष्वपि च भुक्तेषु स्वान् भृत्या
न् भोजयेत्ततः । पश्चात् स्वयं च
पत्नीभिः शेषमन्नं समाहरेत् ।
नोद्वासयेत्तदुच्छिष्टं यावन्नास्त
गतो रविः । ब्रह्मचारी भवेत्तां तु
दंपती रजनीं तु तां । दत्वा श्रा
द्धं तथा भुक्त्वा सेवते यस्तु मै
थुनं । महारौरव मासाद्य की
टयोनिं व्रजेत्पुनः ॥ शुचिर
क्रोधनः शांतः सत्यवादी समा
हितः । स्वाध्यायं च तथाध्वा
नं कर्ता भोक्ता च वर्जयेत् ।
श्राद्धं कृत्वा परश्राद्धे भुंजते
ये द्विजातयः । महापातकि
भिस्तुल्या यांति ते नरकान् ब
हून् । एषवोभिहितः सम्यक् श्रा
द्धकल्पः सनातनः । अनेन वर्त्मये
न्नित्यमुदासीनोऽथतत्त्ववित् ।
अनग्निरध्वगो वापि तथैव व्य
सनान्वितः । आमश्राद्धं द्विजः
कुर्यात् वृषलस्तु सदैव हि । आ
मश्राद्धं यदा कुर्यात् विधिज्ञः श्र
द्धयान्वितः । तेनाग्नौकरणं कु
र्यात् पिंडांस्तेनैव निर्वपेत् ।
योनेन विधिना श्राद्धं कुर्यात्
संयतमानसः । व्यपेतकल्मषो
नित्यं यतीनां वर्त्तते पदे ॥

तस्मात् सर्वप्रयत्नेन श्राद्धं कु
र्यात् द्विजोत्तमः । आराधितो
भवेदीशस्तेन सम्यक् सनात
नः । अपि मूलफलैर्वापि प्रकु
र्वन्निर्धनो द्विजः । तिलोदकैस्त
र्पयेद्वा पितॄन् स्नात्वा समाहि
तः । न जीवत्पितृको दद्या
द्धोमांतं वाविधीयते । येषां वा
पि पिता दद्यात्तेषां चैके प्रचक्ष
ते । पिता पिता महश्चैव तथै
व प्रपितामहः । यो यस्य प्रिय
तेन तस्मै देयं नान्यस्य तेन तु ।
भोजयेद्वापि जीवंतं यथाका
मं तु भक्तितः । न जीवंतमति
क्रम्य ददाति श्रूयते श्रुतिः । द्या
मुष्यायणिको दद्याद्बीजिक्षेत्रि
कयोः समं अधिकारं समाद
द्यात् नियोगोत्पादितो यदि ।
अनियुक्तात् सुतो यस्तु शुल्क
तो जायते द्विजः । प्रदद्याद्बी
जिने पिंडं क्षेत्रिणे तु ततोन्यथा
द्वौ पिंडौ निर्वपेत्ताभ्यां क्षेत्रि
णे बीजिने तथा । कीर्तयेद्द्व
यैकस्मिन् बीजिने क्षेत्रिणे ततः
मृताहनि तु कर्तव्यमेकोद्दि
ष्टं विधानतः । अशौचे स्वे प
रिक्षीणे काम्यं वै कामतस्तु ।

तः। एर्वोक्तेन चैव कर्त्तव्यं श्राद्ध
मभ्युदयार्थिना ॥ देववत्सर्व
मेव स्यात् नैव कार्य्या तिलक्रि
या। दर्भाश्च ऋजवः कार्य्या
युग्मान् वै भोजयेत् द्विजान्।
नान्दीमुखास्ते पितरः प्रीयन्ता
मितिवाचयेत्। मातृश्राद्धन्तु पू
र्व्वं स्यात् पितॄणां स्यादनन्तरं।
ततो मातामहानाञ्च वृद्धौ श्रा
द्धत्रयं स्मृतं। दैवपूर्व्वन्तु दद्या
द्वै न कुर्य्यादप्रदक्षिणं। प्राङ्मु
खो निर्व्वपेत् पिण्डानुपवीती स
माहितः पूर्व्वं वै मातरः पूज्या
भक्त्या चैव गणेश्वरः। स्थण्डिले
षु विचित्रेषु प्रतिमासु द्विजाति
षु। पुष्पैर्धूपैश्च नैवेद्यैर्गन्धा
द्यैर्भूषणैरपि पूजयित्वा मा
तृगणान् कुर्य्यात् श्राद्धत्रयं
बुधः अकृत्वा मातृयागन्तु यः
श्राद्धं परिवेषयेत्। तस्य क्रोध
समाविष्टा हिंसा मिच्छन्ति मा
तरः। इति कौर्म्मे उपविभागे २१
अध्यायः॥ मात्स्ये १६ १७ १८
अध्यायेषु चान्यत् द्रष्टव्यं॥
श्राद्धे कदलीपत्रं निषिद्धं भो
जनपात्रतया ॥ इतिहेमाद्रि
धृता श्राद्धखण्डे। न।
जाती कुसुमानि दद्यात् न क
दलीपत्रे। इति क्रतुवचनं॥
श्राद्धोत्तरं निषिद्धानि यथा।
यात्रा युद्धं नदीपारं मिथ्याला
पो द्विर्भोजनं द्यूतक्रीडा दिवा
निद्रा श्राद्धे सप्त विवर्ज्जयेत्।
इति कर्म्मलोचने॥
स्मृतिः यत्नाच्च कलहञ्चैव स
र्व्वसन्ध्यो दिवाशयं श्राद्धकर्त्ता
च भोक्ता च पुन र्भुक्तं च वर्ज्जयेत्
अपि च विष्णुपुराणे। वर्ज्जानि
कुर्व्वता श्राद्धे कोपोऽध्वगमनं
त्वरा भोक्तुरप्यत्र राजेन्द्र त्रयमे
तन्न शस्यते॥ राजमार्त्तण्डे॥
पुनर्भोजन मध्वानं यानाध्ययन
मैथुनं। दानं प्रतिग्रहे संध्यां श्रा
द्धं कृत्वाष्ट वर्ज्जयेत्। नव्यवर्द्ध
मानधृता स्मृतिः पुनर्भोजनम
ध्वानं भाराध्ययन मैथुनं। दानं
संध्यां पुनः स्नानं श्राद्धे कृत्वाष्ट
वर्ज्जयेत्। इति श्राद्धतत्त्वं। श्रा
द्धे त्रि श्रद्धासमन्विते। इति
हेमचन्द्रः॥
श्राद्धकर्त्ता [ऋ] त्रि श्राद्धका
रकः। यथा। श्राद्धकर्त्ता
च पुनर्भुक्तञ्च वर्ज्जयेत्।
इति॥

श्राद्धतत्त्वं॥
श्राद्धदेवः पुं यमः। इत्यमरः
सह विवस्वतः संज्ञायां पत्न्यां
जातः। मनुभेदः। इति पुरा
णं॥
श्राद्धशाकं क्ली कालशाके।
इति भावप्रकाशः॥
श्राद्धिकः त्रि श्राद्धभोक्ता। इति
सिद्धान्तकौमुदी। श्राद्धसम्बन्धि
द्रव्यं यथा। याज्ञवल्क्यः। सन्ध्या
गर्ज्जिते निर्घाते भूकम्पोल्का
निपातने। समाप्य वेदं द्युनि
शमारण्यकमधीत्य च। पञ्च
दश्यां चतुर्दश्यामष्टम्यां राहु
सूतके। ऋतुसन्धिषु भुक्त्वा वा
श्राद्धिकं प्रतिगृह्य च। इतिति
थ्यादितत्त्वं॥
श्राद्धी[न्] त्रि श्राद्धभोक्ता। श्रा
द्धमनेन भुक्तमितिठनौ इ
तिसूत्रेणानिष्पन्नः। इति सि
द्धान्तकौमुदी॥
श्रान्तः पुं शान्तः। जितेन्द्रियः।
इति हेमचन्द्रः। श्रमयुक्ते त्रि।
श्रम तपः खेदयोः इत्यस्मात्
क्त प्रत्ययेन निष्पन्नः। यथा
सखि महाजनालापेन साधयन्
ती निरन्तरं। इति श्रान्तासि स
द्भाव स्नेहया विषमोचिती॥
इति काव्यचन्द्रिका॥
श्रान्तसंवाहनं क्ली श्रमान्वित
स्याऽऽसनादि प्रदानद्वारा श्र
मोपशमनं। इति केचित्॥
श्राम तक मंत्रे। इतिकविक
ल्पद्रुमः। आश्रमत्। मंत्रोऽभिमु
खीकरणं। शश्रामक्ति विश्यके।
इति दुर्गादासः॥
श्रामः पुं मासः। मण्डपः॥
कालः। इति मेदिनी॥
श्रामणेरः पुं जिनभिक्षुशि
ष्यः। तत्पर्य्यायः चेलुकः २ प्रव्र
जितः ३ महापासकः ४ गोमी
५ इति त्रिकाण्डशेषः॥
श्रायः पुं आश्रयणं आश्रयः।
इत्यमरः। श्रीसेवापि नित्रि। य
था। श्रीर्देवता अस्य श्रायो ह
विः। इति श्रीशब्दात् प्रत्ययेन
निष्पन्नमिति सिद्धान्तकौमुदी
श्रायसः त्रि श्रेयसि जातः।
इति सिद्धान्तकौमुदी॥
श्रावः पुं श्रवणं। श्रुधातो
र्भावे प्रत्ययेन निष्पन्नः॥
श्रावकः पुं शाक्यमुनिशिष्य
विशेषः। काकः। इति त्रिका
ण्डशेषः। श्रोतरि त्रि॥

श्रवणाः ७ पाषण्डः इति मे
दिनी ॥ वैशाखादिद्वादशमासा
न्तर्गतचतुर्थमासः । श्रवण
नक्षत्रयुक्ता पौर्णमासी श्राव
णी सा यत्र मासे सः । तत्पर्य्यायः
नभाः १ श्रावणिकः २ इत्यमरः
नभः ३ इति शब्दरत्नावली ॥
स च द्विविधः सौरश्चान्द्रश्च ।
कर्कटस्थरविको मासः सौ
रश्रावणः । कर्कटस्थरविप्रा
रब्धशुक्लप्रतिपदादिदर्शान्तो
मासश्चान्द्रश्रावणः चान्द्रोऽपि द्वि
विधो मुख्यो गौणश्च तत्र मु
ख्योक्तः श्रावणीय कृष्णप्रति
पदादिपौर्णमास्यन्तो मासो गौ
णश्चान्द्रः श्रावणः । मुख्य लक्षण
माघोक्तं । इति मलमासतत्त्वे
तत्र जातफलं । लोकप्रसि
द्धो धनवान् वदान्यः सुहृत्
कृतज्ञश्च दयायुक्तः । श्रा
ताकरा यस्य जनस्य सर्वस
श्रावणाख्ये सततं प्रसूतः
अथ श्रावणकृत्यं तत्र देवी
पुराणे सुप्ते जनार्दने कृष्ण
पंचम्यां भवनांगणे । पूज
येन्मनसादेवीं स्नुहीविटप
संस्थितां स्नुहीसिजहस्तः

देवीं संपूज्य न त्वाचन सर्पभय
माप्नुयात् पंचम्यां पूजयेन्नागा
ननंताद्यान् महोरगान् क्षीरं
सर्पिश्च नैवेद्यं देयं सर्पविषाप
हं । गारुडे अनंतं वासुकिं शं
खं पद्मं कंबलमेव च तथा
कर्कोटकं नागं धृतराष्ट्रं च शं
खकं । कालीयं तक्षकं चापि
पिंगलं मणिभद्रकं । यजेन्ना
नसितान्नागान् दद्युः क्षीरादि
कं जेन । पुराणान्तरेऽपि । अनं
तो वासुकिः पद्मो महापद्म
श्च तक्षकः । कुलीरः कर्कटः
शंखो ह्यष्टौ नागाः प्रकीर्त्तिताः
पाद्मे शेषः पद्मो महापद्मः कु
लीरः शंखपालकः । वासुकि
स्तक्षकश्चैव कालीयो मणि
भद्रकः ऐरावतो धृतराष्ट्रः क
र्कोटकधनंजयौ एता करे पि
चुमर्दस्य पत्राणि स्थापये
दवनोदरे स्वयं चापि तदश्नीया
तद्ब्राह्मणानपि भोजयेत् पिचु
मर्दस्य निम्बस्य । तत्प्रयोगः ह
रिशयनानन्तरं गौणचान्द्रेण
श्रावण कृष्णनवम्यां कृतस्ना
नादि कृत्यशुचिः अद्यश्रावणे
मासि कृष्णपक्षे पंचम्यां तिथावमुक

गोत्रः श्रीअमुकदेवशर्म्मा सर्प
भयाभावकामो मनसादेवीपू
जामहं करिष्ये । इति संकल्प स्नु
हीवृक्षे पूजयेत् तदभावे घटे
जले वा न्यासादिकं कृत्वा देवी
संवेति ध्यात्वा मनसादेवि इहा
गच्छ इत्यावाह्य एतत् पाद्यं
ॐ मनसादेव्यै नमः । इत्यनेन य
थाशक्ति गंधपुष्पधूपदीपनै
वेद्यानि दद्यात् । ततोऽनंतादी
न् नागान् पूजयेत् । तत्र क्षीर
सर्पिर्नैवेद्यं प्रधानं । अनंतादि
कं पाद्यादिभिः संपूज्य ॐ या
सावनंतरूपेण ब्रह्माण्डं सच
राचरं । पुष्पवद्धारयेन्मूर्ध्नि त
स्मै नित्यं नमो नमः इत्यनेन त्रिः
पूजयेत् । एवं प्रणवादिनमो
न्तेन स्व स्व नाम्ना पूजयेत्
ॐ वासुकये नमः । ॐ पद्माय
नमः ॐ कंबलाय नमः । ॐ
कर्कोटकाय नमः । ॐ शंख
काय नमः । ॐ कालीयाय नमः
ॐ तक्षकाय नमः ॐ पिंगलाय न
मः ॐ महापद्माय नमः ॐ कुलि
काय नमः ॐ मणिभद्राय नमः
ॐ धनंजयाय नमः ॐ शेषाय न
मः । ॐ ऐरावताय नमः अशक्तौ

गंधपुष्पाभ्यां पूजयेत् । नि
म्बपत्राणि गृहे स्थापयेत् ब्रा
ह्मणेभ्यो दद्यात् स्वयं भक्षये
च्च उभयदिने एकैक मुहूर्त
न्यूनपंचमीलाभे पूर्वदिने पू
जा युग्मात् । श्रावण्या पौर्ण
मास्या श्राद्धमावश्यके । इति
कृत्यतत्त्वं । श्रवणनक्षत्रसंब
धिनि त्रि ॥

श्रावणा स्त्री दध्यालीवृक्षः
इति मेदिनी ॥

श्रावणिकः पुं श्रावणमासः
इत्यमरः ॥


श्रावणी स्त्री श्रावणमासीय
पूर्णिमा यथा पौर्णमासी त
था माघी श्रावणी च नरोत्तम
पत्नी सु श्राद्धकालान् वै नित्या
नाह प्रजापतिः । इति श्राद्धत
त्त्वं । वृक्षविशेषः । मुण्डी इति
खोलकुड़िया इति च हिंदी भा
षा तत्पर्य्यायः । मुण्डितिका १
भिक्षुः ३ श्रवणशीर्षिका ४ श्र
वणा ५ प्रव्रजिता ६ परिव्राजी ७
तपोधना ८ अस्या गुणाः । क
षायत्वं कटुत्वं उष्णत्वं । कफ
वात आमातिसार कास विष
छर्दि नाशित्वं च । इति राज

निर्घण्टः । अपिच मुण्डीभिरु
पि प्रोक्तः श्रावणीच तपोध
ना । श्रवणाह्वा मुण्डितिका
तथा श्रवणशीर्षका । महा ।
श्रावणिकान्यातु सा स्मृता भूक
दंबिका कदंबपुष्पिका चस्यात्
यथा तु तपस्विनी । मुण्डिति
काकटुः पाके वीर्य्योष्णा मधुरा
लघुः । मेध्या गण्डापची कृ
च्छ्रकृमियोन्यर्त्तिपाण्डुनुत्श्ली
पदारुच्यपस्मारप्लीहमेदोगु
दार्त्तिहृत् । महामुण्डीच तद्व
त्स्या गुणैरुक्ता महर्षिभिः ॥
इति भावप्रकाशः ॥ अन्यत्तु मु
ण्डितिकाशब्दे द्रष्टव्यं ॥
श्रावंती स्त्री धर्म्मपत्तनाख्यदे
शः । इति त्रिकाण्डशेषः ॥
श्रावष्टीयः त्रि श्रवणानक्षत्र
संबंधीयः । श्रविष्ठा शब्दात्छ
ण्प्रत्ययेन निष्पन्नः । इति सि
द्धांतकौमुदी ॥
श्रि । ञ सेवने । इति कविक
ल्पद्रुमः ॥ ञ श्रयति श्र
यते । इति दुर्गादासः ॥
श्रितः त्रि सेवितः आश्रितः ।
श्रिधातोः क्त प्रत्ययेन निष्पन्नः
इति सिद्धांतकौमुदी ॥

श्रितवान् त्रि सेवाकारकः
श्रिधातोः क्तवतु प्रत्ययेन निष्प
न्नः इति सिद्धांतकौमुदी ॥ श्रि
यंमन्या स्त्री आत्मानं श्रियंम
न्यतेया । इति मुग्धबोधव्याक
रणं ॥
श्रिष उ दाहे । इति कविकल्प
द्रुमः । उ श्रेषित्वा श्रिष्ट्वा । इ
ति दुर्गादासः ॥
श्री ञ गा पाके इति कविकल्प
द्रुमः ञ गा श्रीणाति श्रीणीते
इति दुर्गादासः ॥
श्रीः स्त्री लक्ष्मी । लवंगं इत्यम
रः । वेशरचना शोभा । सर
स्वती । सरलवृक्षः त्रिवर्गः ।
संपत्तिः । विधा उपकरणं वि
भूतिः । मति इति मेदिनी ॥
अधिकारः । प्रभा ॥ कीर्त्तिः
इति धरणिः । वृद्धिः सिद्धिः
इति शब्दरत्नावली । वृत्नाहे
न्नमाता इति हेमचंद्रः । कम
ले । बिल्ववृक्षः । वृद्धिनामौ
षधं इति राजनिर्घण्टः ॥
देवादिनाम्नः पूर्वे श्रीशब्द
प्रयोगः कर्त्तव्यः । यथा देव
गुरुं गुरुस्थाने क्षेत्रे क्षेत्राधि
देवतां । सिद्धे ॥

सिद्धाधिकारोस्य श्रीरेवं समु
दीरयेत् । इति राघवभट्टधृतश
योगसार दर्शनात् स्वर्गगामि
त्वादिना सिद्धो अधिकारो येषां
नराणां इत्यनेन जीवतो श्रीश
ब्दादित्व नाम्नः । न तु मृतानां
तथेति शिष्टाचारः । इति संस्का
रतत्व ॥ पत्रप्रदे श्रीशब्ददान
प्रमाणं पत्रशब्दे द्रष्टव्यं ॥
श्रीः पुं रागविशेषः । स तु
हनुमन्मते षड्रागान्तर्गतपंचम
रागः । पृथिव्या नाभितो निर्ग
तः अस्य जातिः सम्पूर्णा तस्य
स्वरावलिः । ध ऋ ग म प
ध नि ॥ अस्य गृहं षड्ज
स्वरः ॥ हेमंतर्तौ अपराह्णे
गानसमयः । रागमालायां अ
स्याकारः । सुन्दरपुरुषः ॥
शुक्लवस्त्रपरीधानः ॥
मतान्तरे रक्तवस्त्रपरीधानः । स्फा
टिकपद्मरागमणिमालागलः
पद्मपुष्पहस्तः । विचित्रसिंहा
सनारूढः अस्य संमुखे गायंति
गायकाः ॥ हनुमन्मते अस्य
भार्याः पंच । यथा । प्रथमा मा
लश्रीः । तस्याः संपूर्णजातिः
अस्याः स्वरावलिः ष ऋ ॥

ग म प ध नि अस्या गृहे षड्ज
स्वरः । हिमर्तौ द्वितीयप्रहर
दिवसे गानसमयः । रागमाला
यां तस्याः स्वरूपं । रक्तवर्णा स्त्री
कोमलांगी । पीतवस्त्रपरीधाना
कांतकात् भ्रमंतीसती ना
यकाद्भिन्ना सर्वांगेण स
हहास्ययुक्ता आम्रतरुतलोपवि
ष्टा । २ द्वितीया मारवा अथवा
मालवा । अस्या षाड़वजातिः अ
स्याः स्वरावलिः ध प ग म ध नि
अस्या गृहे षड्जस्वरः । हिमर्तौ
शेषवेलायां गानसमयः रागमा
लायां तस्याः स्वरूपं यथा स्वर्णांग
हेमपरीधाना पुष्पमाल्यधरा ना
यक मेलनार्थमेकाकिनी संके
तस्थानोपविष्टा ३ तृतीया धना
श्रीः । अस्या षाड़वजातिः । अस्याः
स्वरावलिः । ष प ध नि ऋ ग । गृहे
षड्जस्वरः । हिमर्तौ द्वितीयप्रह
र दिवसे शेषवेलायां वा गानस
मयः । रागमालायां तस्याः स्वरू
पं वियोगिनी नारी । रक्तवस्त्रप
रीधाना । वियोगजसंतापेन दुः
खिताति कृशा । एकाकिनी रो
रुद्यमाना बकुलतरुतलोपविष्टा
३ चतुर्थी वसंतरागिणी । अस्याः



सम्पूर्णा जातिः अस्याः स्वरा
वलिः स ऋ ग म प ध नि अ
स्या ग्रहं षड्जस्वरः हिमर्त्तौ म
ध्याह्ने वसन्तर्त्तौ दिवामात्रेच गा
नसमयः रागमालायान्तस्याःस्व
रूपं सुंदरपुरुषाकृतिः । कस्य
चिन्मते श्यामवर्णा रक्तवसना
मयूरपुच्छशिखा आम्रमुकुल
हस्ता यौवनमदनमदमत्ता। पु
ष्पमाल्यगलदेशा पुष्पोद्याने स
हनर्त्तकी सुस्वरगायनीभिःस्व
रेनरागरंगयुता वामहस्तधृ
तताम्बूलवीटिका स्त्रीगणस
हित हास्यकौतुकक्रीडान्वयगी
तवाद्यासक्ता रागमालान्तरे उ
क्तगुणयुक्ता श्रीकालमूर्त्तिस
दृशमूर्त्ति र्लिखिता ४ पंचमी
आशावरी अस्या ओडवजातिः
अस्याःस्वरावलिः ध नि ग म प
अस्या ग्रहे धैवतस्वरः । हिमर्त्तौ
द्वितीयप्रहरदिवसे गानसमयः
रागमालायां अस्याःस्वरूपं श्या
मवर्णा स्त्री कोमलांगी श्वेत
शाटीपरीधाना।कर्पूरानुलेप
ना हस्तपद्यो र्हस्तसर्पवेष्टि
ता केशैर्बद्धचूडा जलसम्प
र्कपर्वतगुहायां उपविष्टारागा
मालान्तरेउक्त गुणयुक्ता हस्तपा
त्रवद्धकटिदेशा नग्ना लिखिता ५
अस्य पुत्रा अष्टौ । यथा । सिंधुः १
मालवः २ गौ ड़ः अथवा
गौणडः ३ अस्यस्थाने केचित्
कल्याणः इति केचिच्च हामीर।
इति पठंति। गुणसागरः ४ कुंभः
५ गंभीरः ६ शंकरः अथवा श्री
गडः ७ विहागरः ८ ॥ कल्लिना
थमते श्रीरागः प्रथमरागः अ
स्यभार्य्याःषट्। यथा। गौरी १ गौ
लाहली २ धवली ३ रुद्राणी ४
मालकोश अर्थात् कौशिकी ५
देवगांधारी ६ तन्मते पुत्रा अष्टौ
हनुमन्मततुल्याः । किंतु गौ ३
शंकर विहागरस्थाने कल्याण
श्रीगड़ विगडा लिखिताः। सो
मेश्वरमतेपि प्रथमरागोयं अ
स्य रागिण्यः षट्यथा। माल
वी अथवा मरवा १ त्रिवेणी
अथ वातिरवली २ गौरी ३ के
दारा ४ मधुमाधवी ५ पाहाडि
का अथवा पाहाड़ी ६ अस्य पु
त्राः एतन्मतद्वयतुल्याः। तन्म
ते अस्य रागस्य रागिणीसहि
तस्य शिशिरर्त्तौ गानसमयः।
भरतमते पंचम रागोयं ॥

अस्य रागिण्यः पंच ॥
यथा सिंधुवी १ काफा २ ठुम
री ३ एवंदेशे विस्तार इतिख्या
ता विचित्रा ४ शिरहटी अथ
वा सोरठी ५ तन्मते अस्याष्ट
पुत्राः यथा। श्रीरमणः १ को
लाहलः २ सामंतः ३ शंकर
णः ४ रागेश्वरः ५ खटरागः ६
वडहंसः ७ देशकारः ८ तेषां
भार्य्या यथा । विद्या १ धन्या
२ कुंभा ३ सुहनी ४ शारदा ५
हेमा ६ शशरेखा ७ सरस्वती ८
इति नाना संगीतशास्त्रमतःसंगृ
हीते ॥
श्रीकंठः पुं शिवः इत्यमरः ॥
कुरुजांगलदेशः । स तु हस्ति
नापुरस्य उत्तर पश्चिमे वर्त्तते।
इति हेमचंद्रः ॥
श्रीकंठपदलाञ्छनः पुं भवभू
तिः सतु मालतीमाधवनाटक
कर्त्ता इतिशब्दमाला ॥
श्रीकंठसखः पुं कुवेरः इति
हलायुधः ॥
श्रीकन्दा स्त्री वंध्याकर्कोटकी
इति राजनिर्घण्टः ॥
श्रीकरं क्ली रक्तोत्पले । इति
त्रिकाण्डशेषः ॥
श्रीकरः पुं विष्णुः इति त्रिकाण्ड
शेषः स्मृतिग्रंथकारविशेषः।
यथा। श्रीकराचार्य्यादिग्रंथार
ण्यशाहनविवेकान्ता। इतिदाय
भागाद्यश्रीकृष्णटीकायां श्रीकृष्ण
तर्कालंकारः।श्रीकारके त्रि
श्रीकरणं क्ली लेखनी । इति
शब्दरत्नावली ॥
श्रीकांतः पुं विष्णुः इति श
ब्दरत्नावली ॥
श्रीकारी पुं मृगविशेषः तत्
पर्य्यायः शितिरूपः २ कुरंगः
३ महायवः ४ यवनः ५ हेम
हरिणः ६ जंघालः ७ जांघि
काख्यः ८ अस्य मांसगुणाः
लघुत्वं रुच्यत्वं । वलप्रदत्वंच
इति राजनिर्घण्टः ॥
श्रीखण्डः पुं क्ली चंदनं। इ
ति त्रिकाण्डशेषः ॥
श्रीगर्भः पुं विष्णुः इति त्रिकां
डशेषः खड्गः यथा आशीर्वि
षशानः खड्ग लीलाधारो उ
रामदः श्रीगर्भो विजयश्चैवध
र्मपाल नमोस्तुते । इति ति
थ्यादितत्वं ॥
श्रीग्रहः पुं पक्षिणःपानीय
शाला तत्पर्य्यायः शकुनिप्रपा २



इति हारावली ॥
श्रीचनं क्ली दधि इति जटा
धरः ॥
श्रीघनः पुं बुद्धः । इत्यमरः ॥
श्रीचक्रं क्ली त्रिपुरसुन्दर्य्याः पू
जार्थयन्त्रविशेषः । यथा श्रीचक्र
संस्कृतिं वक्ष्ये तत्र पूजाप्रसि
द्धये । बिन्दुगर्भं त्रिकोणं तद्ब
त्वाचाष्टारमुद्धरेत् । दशारद्व
य मन्वस्राष्टार षोडशको
णकं । त्रिरेखात्मकभूगेहं वे
ष्टितं यन्त्रमालिखेत् । इति मे
रुमहोदधौ ११ तरङ्गः ॥
अपिच अथ श्रीचक्रं । यथा
बिन्दुमत् अष्टत्र्यष्टकोणोपेत
त्र्यं संहारचक्रं द्विदशारं
चतुर्दशारं स्थितिचक्रमेतत्त्र
यं । अष्टपत्रं षोडशदलं वृत्त
त्रयं भूसदनत्रयं चतुर्द्वारसमा
युक्तमेतत् दृष्ट्यात्मकं । तत्र
तत्त्वजामले बिन्दु त्रिकोण व
सुकोण दशारयुग्म मन्वस्र
नागदल संयुत षोडशारं वृ
त्तत्रयञ्च धरणीसदनत्रयञ्च श्री
चक्रराजमुदितं परदेवतायाः
चक्रराजे लिखेत् कुङ्कुमादिना
लिखितं सुवर्णरजतपञ्चरत्न
स्फटिकताम्रपुत्तकीर्णं कुर्य्यात्
तथा भूतभैरवतन्त्रे प्रकृत्वास
मस्मारेखो नालिख्य सममेषु
वि योऽत्र यन्त्रे प्रवर्त्तते तस्य सर्वं
हराम्यहं । यस्य यत्र स्थितिर्दे
वि तत्रैतां नाङ्कयेद्यदि तन्मांस
रुधिरेणैव पारणां तस्य जाय
ते पशोर्बालोकनं तस्मात्
स्यात्कृतयत्नतः । यदि देवा
त् पशोरग्रे लिखितं विघ्नतः क्व
चित् । समागच्छति वा त्रक्रिय
ते पापबुद्धिना तथा भूतभैरवे ।
योऽस्मिन् यन्त्रे महेशानि केशा
णि प्रकल्पयेत् । योगिनी
सहितास्तस्य हिंसां कुर्वन्ति भै
रवाः ॥ इति वचनात्तत्र केशा
णि । नरो नावकयेत् यन्त्रे स्ना
पकस्तु कदाचन । प्रमादाद्दैकि
नेयत्रे पापा भवति तन्त्रणात्
त् । तत्रापराजितापुष्पकरवी
रेजपावासच । तत्र देवी वसेन्नित्य
नयन्त्रे पूजने मम ॥ तथा स
क्ते दभैरवे । कृष्णाग्नरुपाण्डिलेप
त्रं हस्तमात्रं समं तदं । रत्नादि
षु चानिर्माणं मानं निष्कावशा
दुवेत् । एकतोलं द्वितोलं वाचि
तोलं वेदतोलकं ॥

इतोधिकं नरः कृत्वा प्रायश्चि
त्ती भवेत् ध्रुवं । रक्तेन रजसा
पृष्ठ्यश्रीचक्रं भुवि पूजयेत् ।
नश्यन्ति सर्वविघ्नानि प्राप्यते
च यथेप्सितं । दशभागं सुवर्ण
स्य ताम्रस्य द्वादश तथा षट्द
पं रजतस्याथ चैतल्लोहत्रयं भवे
त् । चक्रेऽस्मिन् पूजयेद्योहि स
सौभाग्यमवाप्नुयात् अनिमा
द्यष्टसिद्धीनां सचिपो जायते
ऽचिरात् विद्रुमे रचिते यन्त्रेप
द्मरागेऽथवा प्रिये । इन्द्रनीले
ऽथ वैदूर्य्ये स्फाटिके मरकते
ऽपिवा । धनं पुत्रं तथा दारान्
यशांसि लभते ध्रुवं । ताम्र
तु कीर्तिदं प्रोक्तं सुवर्णं श
त्रुनाशनं । राजतं क्षेमदं
व स्फाटिकं सर्वसिद्धिदं एत
द्यन्त्रमात्रे ज्ञेयं । अथ श्रीच
क्रनाशे प्रायश्चित्तं । दस्वंच
स्फटितं यन्त्रं हृतं चोरेण वा
प्रिये । उपवासं प्रकुर्वीत दिन
मेकं मतं द्विजः लक्षमात्रं ज
पेद्विद्या होमं तर्पणमेव च
मद्भक्त्या चगुरुं तोष्य ब्राह्म
णानपि भोजयेत् लक्षजपा
दशांशो होमः तद्दशांशं तर्पणं
लक्षमयुत मिन्यके कदाचित्
प्रतिक्रं वा स्फटितादि विदुष
णे । भग्नं करोति यो मर्त्यो मृत्यु
स्तस्य इतो भवेत् । तस्माच्च ।
तीर्थराजे वा गङ्गादिसरितो
बरे समुद्रे वा क्षिपेद्देवि चान्य
था दुःखमाप्नुयात् । इदं तु
यन्त्रमात्रविषये ॥ अथ श्रीच
क्रपादोदकमाहात्म्यं । गङ्गापु
ष्कर नर्म्मदासु यमुना गोदा
वरी गोमती गङ्गाद्वार गया
प्रयाग वदरी वाराणसी सिन्धु
देवा सेतु सरस्वती प्रभृतिषु
ब्रह्माण्डभाण्डोदरे तीर्थस्ना
नसहस्रकोटिफलदं श्रीचक्र
पादोदकं । अथ दर्शनफलं
सम्यक् शतक्रतून् कृत्वा यत्
फलं समवाप्नुयात् तत्फलं ल
भते भक्त्या कृत्वा श्रीचक्रदर्शनं
षोडशे वा महादाने कृत्वा यल्ल
भते फलं । तत्फलं समवाप्नोति
कृत्वा श्रीचक्रदर्शनं । सार्द्ध
त्रिकोटितीर्थेषु स्नात्वा यत्फ
लमश्नुते । तत्फलं लभते भक्त्या
कृत्वा श्रीचक्रदर्शनं ॥
इति मन्त्रसारः ॥
श्रीजः पुं कामदेवः । श्रियाजात

तात्। प्रांशुः इतिकेचित्॥
श्रीतालः पुं तालवृक्षसदृशवृ
क्षविशेषः तत्पर्य्यायः मृदु
तालः २ लक्ष्मीतालः ३ मृदुच्छ
दः ४ विशालपत्रः ५ लेखोपहः
६ मसीलेखादलः ७ शिवालप
त्रकः ८ याम्याद्भूतः ९ अस्य गु
णाः मधुरत्वं शीतलत्वं ईषत्क
षायत्वं पित्तनाशित्वं कफका
रित्वं। ईषद्वातप्रकोपणत्वञ्च
इति राजनिर्घण्टः॥
श्रीदः पुं कुवेरः। इत्यमरः॥
शोभादातरि त्रि॥
श्रीधरः पुं विष्णुः। भूतार्हद्
भेदः। इति हेमचन्द्रः। शाल
ग्रामभेदः। यथा श्रुतिचक्रेहि
चक्रांतं वनमालाविभूषितं।
श्रीधरं देवि विज्ञेयं श्रीप्रदं गृ
हिणां सदा इतिब्रह्मवैवर्त्तेप्र
कृतिखण्डे १९ अध्यायः॥
श्रीनन्दनः पुं कामदेवः। इति
हेमचन्द्रः लक्ष्मीपुत्रश्च॥
श्रीनिकेतनः पुं विष्णुः इतिश
ब्दरत्नावली॥
श्रीनिवासः पुं विष्णुः। इति
त्रिकाण्डशेषः॥
श्रीप त्रि श्रियंपातियत्। इति
मुग्धबोधव्याकरणं॥
श्रीपतिः पुं विष्णुः इत्यमरः॥
पृथिवीनाथः इति मेदिनी॥
श्रीपथः पुं राजपथः। इति
हेमचन्द्रः॥
श्रीपर्णं क्ली पद्मे अग्निमन्थ
वृक्षः। इति मेदिनी॥
श्रीपर्णिका स्त्री कट्फलवृक्षः
इत्यमरः॥
श्रीपर्णी स्त्री गम्भारीवृक्षः। इत्य
मरः। कट्फलवृक्षः। इति मेदि
नी। शाल्मलीवृक्षः॥ हठवृक्षः
इति हेमचन्द्रः॥ अग्निमन्थ
वृक्षः। इति राजनिर्घण्टः॥
श्रीपिष्टः पुं सरलवृक्षसः॥
इत्यमरटीकायां रामाश्रमः॥
श्रीपुत्रः पुं अश्वः इतित्रिकाण्ड
शेषः। कामदेवश्च॥
श्रीपुष्पं क्ली लवङ्गं इतिरा
जनिर्घण्टः। पद्मकाष्ठं। इति
रत्नमाला॥
श्रीफलः पुं बिल्ववृक्षः। इत्य
मरः राजादनी। इति राजनि
र्घण्टः॥
श्रीफला स्त्री नीली क्षुद्रका
रवेल्ली इतिराजनिर्घण्टः॥
श्रीफलिका स्त्री क्षुद्रकारवेल्ली

महानीलीवृक्षः इति राज
निर्घण्टः॥
श्रीफली स्त्री आमलकी नी
ली इति मेदिनी॥
श्रीभद्रा स्त्री भद्रमुस्तकः। इ
तिशब्दरत्नावली॥
श्रीभागवतं क्ली अष्टादशम
हापुराणान्तर्गताष्टादशसहस्र
श्लोकयुक्तपुराणविशेषः यथा
अष्टादशे भागवते सारमाकृ
ष्य सर्व्वतः कृतवान् भगवान् व्या
सः शुकञ्चाध्यापयेत् सुतं॥
स्कन्धैर्द्वादशभिर्युक्तं ब्रह्मविद्या
समन्वितं वेद वेदान्तसारं तत्
पुराणानाञ्च सत्तम। यत्र सं
कीर्त्तितः कृष्णो भगवान् वै पदे
पदे। श्रीभागवत मित्येवयेस्य
न्ति नराः क्वचित्। शृण्वन्तेस
र्व्वपापेभ्यो यथा नाम्ना गदा
भृतः। महीभृतां यथा मेरुर्दे
वानां केशवो यथा। सुरभिः
कामधेनूनामप्सरस्सु यथोर्व
शी कार्ष्णीनां पार्व्वतीनाथो
राज्ञां दाशरथिर्यथा॥
समनाञ्चैव गंधर्वो नदीनां
जाह्नवीयथा पुराणानां तथा
राजन् श्रीभागवतमुत्तमं॥
अंबरीष उवाच। पुराणे ते
भागवते पठमेपुरतो हरेः।
चरितं दैत्यराजस्य प्रह्लादस्य च
मत्पतेः। गौतम उवाच॥ अं
बरीष शुकप्रोक्तं नित्यं भा
गवतं शृणु। पठस्व स्वमुखेना
पि यदीच्छसि भवक्षयं। स्कन्धे
स्कन्धेऽश्वमेधस्य फलमाप्नोति
मानवः। प्रत्यध्यायं राजसूय
फलेन परियुज्यते प्रतिश्लोके
वाजपेयफलं तस्योपजायते
पदे पदे महाराज तीर्थस्नान
फलं लभेत्। एतद्भागवते देवि
पुराणे मुक्तिसाधके तत्रापि
दशमस्कन्धः सर्व्वभक्तमनोहरः
तत्रापि रासलीलाध्यायपंचाध्या
यी महाफला श्रीपार्व्वत्युवाच
सर्व्वञ्च हरिलीलाढ्यं श्रीमद्भा
गवते यदि स्कन्धस्य दशमस्या
यं महिमा केन हेतुना॥ रा
सलीलेति तत्रापि कथ्यते स
र्व्वतोधिका। तत्र मे कारणं श्रो
तुमुत्कण्ठा वर्द्धते भृशं। श्रीस
दाशिव उवाच स्वयं भगवतो
जन्म तस्य लीला च वर्ण्यते मु
नीनाञ्च स्तुतिर्यत्र सर्व्वदा ह्य
सस्मिता। स्वयं भगवतो लीला

सर्व्वशक्तिसमुद्दर्शिता। दशम
स्कंधमाहात्म्ये पतहैकारणम
ते तत्रापि रासलीलायाः यन्मा
हात्म्यमुदीरितं। तत्रापि कारणं
वक्ति शृणु पर्व्वतनंदिनि। यः
स्वयं भगवान् कृष्णः षडैश्वर्य्य
इतीर्य्यते ससर्व्वशक्तिसंपूर्णः
सर्व्वलीलाप्रकाशकः तेष्वेवश
क्तयो गोप्यः प्रोक्ताः सर्व्वोत्तमाय
ताः। राधिकी नाम शक्तिमती।
लीला यत्रैकतः स्थिता। सा
लीलासर्व्वतः श्रेष्ठा कीर्त्तिताप
रमर्षिभिः। इति पाद्मे पाताल
खण्डे ७९ अध्यायः॥
श्रीभ्राता पुं अस्त्यः। इति राज
निर्घण्टः॥ चेट्टः समृद्धत्वप
न्नत्वात्॥
श्रीमतिः स्त्री राधा यथा श्री
राधा श्रीमतिः श्रेष्ठा श्रेष्ठ
पाकृतिप्रिया इति नारदपंचरा
त्रेतस्याः सहस्रनामस्तोत्रे।
श्रीमती स्त्री श्रीयुक्ता योषि
न्नाम्नः एवं पतञ्जलिप्रयोज्यः
इति शिष्टाचारः॥
श्रीमस्तकः पुं रसोनः इति।
त्रिकाण्डशेषः। लक्ष्मी शिरश्च
श्रीमान् पुं तिलकवृक्षः। इस

मरः अश्वत्थवृक्षः। इति राज
निर्घण्टः। विष्णुः इति शब्दरत्ना
वली। शिवः इति त्रिकाण्डशे
षः। कुवेरः॥ इति शब्द
माला॥
श्रीमान् त्रि मनोज्ञः। धनी॥
इति मेदिनी। तत्पर्य्यायः॥
लक्ष्मीवान् २ लक्ष्मणः ३ श्री
लः ४ इत्यमरः॥
श्रीमलापहा स्त्री क्षुद्रपत्रा। इ
ति राजनिर्घण्टः॥
श्रीमुखः पुं कालचक्रस्यसप्तम
वत्सरः। इति केचित् पत्रपृष्ठे श्री
शार्दूलिखने। इति लोकप्रसि
द्धः। शोभायुक्तानेन स्त्री॥
श्रीमूर्त्तिः स्त्री देवविग्रहः विष्णु
प्रतिमा यथा। अथ श्रीमद्भागवते
यः। एकादशस्कंधे। शैलीदा
रुमयी लौही लेप्या लेख्या च
सैकता। मनोमयी मणिमयी
प्रतिमाष्टविधा स्मृता चलाच
लेति द्विविधा प्रतिष्ठा जीवम
न्दिरं उद्वासावाहने नस्तःस्थि
रायाः मुद्धवार्च्चने। अस्थिरायां
विकल्पः स्यात् स्थण्डिले तु भवे
त्द्वयं। स्नपने त्वविलेप्याया म
न्यत्र परिमार्ज्जनं। गोपाल।

मंत्रोद्दिष्टत्वात् श्रीमूर्त्तिरूप
त्तिता। तथापि वैष्णव प्रीत्यै
लक्ष्याः श्रीमूर्त्तयो ऽखिलाः॥
अथ श्रीमूर्त्तिलक्षणानि हय
शीर्षपंचरात्रे। भगवत् श्रीहय
शीर्षब्रह्मसंवादे। आदिमूर्त्तिर्व्वा
सुदेवः संकर्षणो मथाऽसृजत्।
चतुर्मूर्त्तिः परं प्रोक्त एकैको भिद्य
ते त्रिधा। केशवादि प्रभेदेन मू
र्त्ति द्वादशकं स्मृतं पंकजं दक्षि
णे दद्यात् पांचजन्यं तथोपरि
वामोपरि गदा यस्य चक्रं चाधो
व्यवस्थितं। आदिमूर्त्तेस्तु भेदो
यं केशवेति प्रकीर्त्यते॥ १
अपरोत्तरभावेन कृतमेतत्तु
यद्भवे। नारायणाख्यामामू
र्त्तिः स्थापिता भुक्ति मुक्तिदा
२ अधः पंकजं यस्य पांच
जन्यं तथोपरि दक्षिणोर्द्ध्वे ग
दा यस्य चक्रं चाधो व्यवस्थितं
आदिमूर्त्तेस्तु भेदोऽयं माध
वेति प्रकीर्त्यते ३ दक्षिणाधः
स्थितं चक्रं गदा यस्योपरि स्थि
ता। वामोर्द्ध्वे संस्थितं पद्मं शंख
श्चाधो व्यवस्थितः संकर्षणस्य
भेदोऽयं गोविंदेति प्रकीर्त्यते।
४ दक्षिणोपरि पद्मं तु गदा

चाधो व्यवस्थिता संकर्षणस्य भे
दोऽयं विष्णुरित्यभिशब्द्यते। ५
दक्षिणोपरि शंखश्च चक्रं चाधः
प्रदृश्यते वामोपरि तथा पद्मं ग
दा चाधः प्रदृश्यते। मधुसूद
ननामा ऽयं भेदः संकर्षणस्य च
६ त्रिविक्रममूर्त्तिमाह। दक्षि
णोर्द्ध्वे गदा यस्य पंकजं चाप्य
धःस्थितं वामोर्द्ध्वे संस्थितं चक्र
मधः शंखं प्रदृश्यते। ब्रह्मो
ड्गो वामपादे दक्षिणे शेषपृष्ठ
गे ७ श्रीवामनमूर्त्तिमाह। व
लिं वचन संयुक्तं वामनं चाप्य
धःस्थितं। वामोर्द्ध्वे कौमोदी
यस्य पुण्डरीक मधःस्थितं
दक्षिणोर्द्ध्वे सहस्रारं पांचज
न्यमधः स्थितं। सप्ततालप्रमा
णेन वामनं कारयेत्सदा ८।
ऊर्द्ध्वे दक्षिणतश्चक्रं मधः पद्मं व्य
वस्थितं वामोर्द्ध्वे कौमोदी य
स्य पांचजन्यमधःस्थितं। पद्मा
पद्मकरा वामे पार्श्वे यस्य व्य
वस्थिता। स्थितो वाप्युपविष्टो
वा सानुरागविलासवान् प्रद्यु
म्नस्य हि भेदोऽयं श्रीधरेति प्र
कीर्त्यते ९ दक्षिणोर्द्ध्वे सहाच
क्रं कौमोदी तदधः स्थिता॥



वामोर्द्ध्वे नलिने यस्य अधःशं
खे विराजते हृषीकेशेति विज्ञे
यः स्थापितः सर्वकामदः ७ ॥
दक्षिणोर्द्ध्वे पुण्डरीके पाञ्चजन्यम
धस्तथा वामोर्द्ध्वे संस्थिते चक्रं
कौमोदी तदधः स्थिता ॥ पद्म
नाभेति सा मूर्तिः स्थापिता मो
क्षदायिनी ८ दक्षिणोर्द्ध्वे पाञ्च
जन्य मधस्तात् कुशेशयं ॥
सव्योर्द्ध्वे कौमोदी देवी देति
राज मधःस्थिते अनिरुद्धस्य
भेदोऽयं दामोदर इति स्थितः
९ पत्रेषांतु स्थितो कार्श्यप
घ वीणा धरे शुभे इति क्रमे
ण मार्गादि मासाधिपाः के
शवाद्या द्वादश । अथसि
द्धार्थसंहितायां चतुर्विंशति
मूर्तयः वासुदेवो गदा शंखच
क्रपद्मधरो मतः १ पद्मं शंखं
तथा चक्रं गदां वहति केश
वः २ शंखं पद्मं गदां चक्रं धत्ते
नारायणः सदा ३ गदां चक्रं
तथा शंखं पद्मं वहति माध
वः ४ चक्रं पद्मं तथा शंखं ग
दाञ्च पुरुषोत्तमः ५ पद्मं कौ
मोदकीं शंखं चक्रं धत्तेऽध्य
धोक्षजः ६ संकर्षणो ॥

गदां शंखं पद्मचक्रधरः स्मृतः ७
चक्रं गदां पद्मं शंखं योगाविद्धो धर
ते भुजे ८ गदां पद्मं तथा शंखंच
क्रं विष्णुर्बिभर्ति यः ९ चक्रं शं
खं तथा पद्मं गदाञ्च मधुसूद
नः १० गदां सरोजं चक्रंच शंखं
धत्तेऽच्युतः सदा ११ ॥
शंखं कौमोदकीं चक्रमुपेन्द्रः
पद्ममुद्वहेत् ॥ १२ ॥
शंखं चक्रं गदां पद्मधरः प्रद्युम्न
उच्यते १३ पद्मं कौमोदकीं च
क्रं शंखं धत्ते त्रिविक्रमः १४ ॥
शंखं चक्रं गदां पद्मं वामनो
वहते सदा १५ पद्मं चक्रं ग
दां शंखं श्रीधरो वहते भुजे
१६ चक्रं पद्मं गदां शंखं नर
सिंहो बिभर्ति यः १७ ॥
पद्मं सुदर्शनं शंखं गदां धत्ते ज
नार्दनः १८ अनिरुद्धश्चक्रगदा
शंखं पद्मं लसद्भुजः १९ ॥
हृषीकेशो गदां चक्रं पद्मं शं
खञ्च धारयेत् २० पद्मनाभो व
हेत् शंखं पद्मं चक्रं गदां तथा
२१ पद्मं चक्रं गदां शंखं धत्ते
दामोदरः सदा २२ शंखं चक्रं
सरोजंच गदां वहति यो हरिः
२३ । शंखं कौमो ॥

दकीं पद्मं चक्रं कृष्णो बिभर्ति यः
२४ एताश्च मूर्तयो ज्ञेया दक्षि
णःकर क्रमात् ॥ मत्स्यपुराणे
च । एतदुद्देशतः प्रोक्तं प्रतिमा
लक्षणं तथा विस्तरेण न शा
क्नोति बृहस्पतिरपि द्विजाः ।
इति सेवा निष्ठा हरेः श्रीमहे
श्वराः पाञ्चरात्रिकाः । प्राक्
स्वादीविलोगानां श्रीमूर्तिं ब
हुमन्वते सेवया निज निजे दे
व मंत्रैः स्वस्वेष्टमूर्तयः शाल
ग्रामात्मकेरूपे नियमो नेष
विद्यते ॥ द्विभुजा जलद
श्यामा त्रिभंगी मधुराकृतिः
सेव्या ध्यानानुरूपैव श्रीमू
र्तिः कृष्णदैवतः ॥ प्रत्याश्च
विविधाः श्रीमदवतारादि
मूर्तयः । प्रादुर्भावविधावग्र
लेखा स्वेच्छादिशेषतः ॥
नित्यकर्मप्रसंगेऽर्चामूर्तिजन्म
प्रतिष्ठयोः । विधिर्मे लेखि
तो योऽपः सन्तु लेखिष्यतेऽग्र
तः । इति श्रीहरिभक्तिविलासे
१८ विलासः ॥
श्रीयुक्तः) त्रि लक्ष्मीविशिष्टः ।
श्रीयुतः} श्रीमान् । जीवत्पुरुष
नाम्नः सर्वे दानवोये ॥

श्रीरसः पुं श्रीवेष्टः । इति रा
जनिर्घण्टः ॥
श्रीरंगपत्तने क्ली देशविशेषः
सारपटन् इति भाषा इति
मान्द्राजाख्यदेशे प्रसिद्धं ॥
श्रीरागः पुं षड्रागाणां मध्ये
तृतीयरागः । इति हलायुधः
अस्य रागिण्यो यथा गांधा
री देवगांधारी मालवश्रीश्च
सारवी रामकीर्यपि रागिणः
श्रीरागस्य प्रिया इमाः । इति
संगीतदामोदरः । विस्ता
रस्तु श्रीशब्दे द्रष्टव्यः ॥
श्रीरामः पुं रामचन्द्रः । इति
शब्दरत्नावली ॥
श्रीलः त्रि लक्ष्मीवान् इत्य
मरः शोभायुक्तश्च ॥
श्रीलता स्त्री महाज्योतिष्म
ती इति राजनिर्घण्टः ॥
श्रीवत्सः पुं विष्णुः विष्णुव
क्षोविशेषः । सतु वक्षस्थशुक्ल
वर्णदक्षिणावर्तलोमावली
अर्हत्ध्वजः इति हेमचन्द्रः ॥
सुरंगाभेदः इति त्रिकाण्डशे
षः ॥
श्रीवत्सकी त्रि पुं हृदकावर्त
हयः इति हेमचन्द्रः ॥

श्रीवत्सभृत् पुं विष्णुः इति हेमचन्द्रः ॥

श्रीवत्सलाञ्छनः पुं विष्णुः इत्यमरः श्रीवत्सो लाञ्छनं चिह्नं यस्य श्रीवत्सलाञ्छनः । वत्सस्य नन्दमहापुरुषलक्षणं श्वेतरोमावर्तविशेषः श्रीवत्स इति सर्वस्वं । श्रीवत्सो हृत्स्थितमणिविशेषः कौस्तुभवदिति कौस्तुभदासः । इत्यमरटीकायां भरतः । श्रीवत्साङ्कः पुं विष्णुः । इति हलायुधः ॥

श्रीवराहः पुं विष्णुः इति त्रिकाण्डशेषः ॥

श्रीवल्ली स्त्री कण्टकवृक्षभेदः । तत्पर्यायः । शिववल्ली २ कण्ठवल्ली ३ श्रीवल्ली ४ अम्ला ५ कटुफला ६ दुरारोहा ७ अस्या गुणाः कटुत्वं । अम्लत्वं वातश्लेष्म कफापहत्वञ्च तत्फलं तैललेपघ्नं मत्स्यघ्नं रुचिकृत्परं इति राजनिर्घण्टः ॥

श्रीवाटी स्त्री नागवल्लीभेदः इति राजनिर्घण्टः ॥

श्रीवारकः पुं सितावरशाकः । इति राजनिर्घण्टः ॥

श्रीवासः पुं सरलवृक्षरसः टारपिन् इति भाषा तत्पर्यायः । पायसः २ वृकधूपः ३ श्रीवेष्टः ४ सरलद्रवः ५ इत्यमरः ॥ तैलपर्णी ६ श्रीपिष्टः ७ इति जटाधरः । श्रीवेशः ८ इति शब्दरत्नावली । अस्य गुणाः श्रीवासः सरले सतिः ऊंदरु ग्रंथिपर्णकं । सिल्हकः परमा मांसी देवदारु सुरा तथैव सर्वे ऽमी परमालक्ष्मी रक्षोघ्ना ज्वरनाशनाः इति राजवल्लभः ॥ अन्यत् श्रीवेष्टशब्दे द्रष्टव्यं ॥ पद्मे विष्णुः । इति मेदिनी ॥ शिवः । इति शब्दरत्नावली ॥

श्रीवासाः पुं सरलद्रवः । इत्यमरटीका ॥


श्रीविद्या स्त्री महाविद्याविशेषः सा तु त्रिपुरसुन्दरी । तस्याः षट्त्रिंशद्भेदाः ग्रन्थबाहुल्यभिया न लिखिताः । अथ श्रीविद्या । तन्त्रभेदः ज्ञानार्णवे ॥ भूमिश्चन्द्रः शिवो माया शक्तिः कृष्णाध्वमादनौ । अर्द्धचन्द्रश्च विन्दुश्च नवार्णो मेरुरुच्यते ॥ महात्रिपुरसुन्दर्य्या मन्त्रा मेरुसमुद्भवाः सकला भुवनेशानी कामेशी बीजमुत्तमं । अनेनमा-

कला विद्याः कथयामि वरानने शाक्तेन सर्ववर्णाग्रे एक लमध्ये मलोचने वाग्भवं पञ्चवर्णाढ्यं कामराज मथोच्यते । मादनं शिवचन्द्राढ्यं शिवान्ते मीनलोचने कामराज मिदं भद्रे षड्वर्णं सर्वमोहनं शक्तिबीजे नगारोहे चन्द्राढ्यं सर्वमोहनं । एतत्कुमारस्य देवेशि कामः संवादसुन्दरः ॥ कामराजो भवेद्देवि विद्येयं ब्रह्मरूपिणी । अस्यार्थः शक्तिरेकारः तस्य ईकारः तेन ककार एकार ईकार लकार महामाया वाग्भवकूटं । शिवो हकारः चन्द्रः सकारः तेन हकार सकार लकार महामाया इति कामराजकूटं चन्द्रः सकारः तेन सकार ककार लकार महामाया इति शक्तिकूटं तेन त्रिभिः कूटैः कामराजविद्येयं अस्याः ध्यानं यथा बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनां पाशाङ्कुशशराश्चापं धारयन्तीं शिवां भजे । एवं ध्यात्वा मानसपूजादिकं कुर्यात् ॥ इति तन्त्रसारः ॥

श्रीवृक्षः पुं अश्वत्थवृक्षः । इति हेमचन्द्रः बिल्ववृक्षः यथा इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहं । इति तिथ्यादितत्त्वधृत श्रीदुर्गाबोधनमन्त्रः ॥

श्रीवृक्षकः पुं अश्वहृदावर्त्तः इति त्रिकाण्डशेषः ॥

श्रीवेष्टः पुं सरलवृक्षस्य निर्यासः । तत्पर्यायः श्रीवेष्टो वृक्षधूपश्च चिताग्निधो रसायकः । श्रीवासः श्रीरसो वेष्टो लक्ष्मीवेष्टश्च वेष्टकः ॥ वेष्टसारो रसावेष्टः क्षीरशीर्षः सुधूपकः । धूपाङ्गं तिलपर्णश्च सरलोऽपि षोडश । तद्गुणाः श्रीवेष्टः कटुतिक्तश्च कषायः श्लेष्मपित्तजित् योनिदोषरुजाजीर्णव्रणघ्नाध्मानदोषहृत् इति राजनिर्घण्टः । अपिच श्रीवासः सरलः प्रोक्तः श्रीवेष्टो वृक्षधूपकः । श्रीवासो मधुरस्तिक्तः स्निग्धोष्णः तुवरः सरः ॥ पित्तलो वातमूर्द्धाक्षिस्वररोगकफापहः । रक्षोघ्नी स्वेददौर्गन्ध्ययूकाकण्डूव्रणप्रणुत



इति भावप्रकाशः ॥
श्रीशः पुं विष्णुः श्रीरामः ॥ इति शब्दरत्नावली ॥
श्रीसंज्ञं क्ली लवंगं इत्यमरः
श्रीसहोदरः पुं चंद्रः । इति केचित् ॥
श्रीहस्तिनी स्त्री वृक्षविशेषः हातिशुँड़ा इति भाषा । तत्पर्य्यायः भूरुण्डी २ इत्यमरः नागदन्ती ३ इति जटाधरः ॥
श्रु गतौ इति कविकल्पद्रुमः । श्रवति रेफ रहितोप्ययमिति केचित् । शवति इति दुर्गादासः ॥
श्रुत गतौ । श्रुतौ । इति कविकल्पद्रुमः । न शृणोति देहोस्मीति पुरापि संशृणुमहे । इति पुराणे कालीहावादास्तनेपदे संशृणुत मयाख्याते । इति गणकृतानित्यत्वात् आख्यानं शब्दस्य क्रियाविशेषणतयाः कर्म्मकत्वमस्य गम्लृ छेत्यादिनापरा इति दुर्गादासः । श्रुत्कारः पुं विकङ्कतवृक्षः । इति रत्नमाला ॥
श्रुघ्निका स्त्री सर्जिकाक्षारः । इति रत्नमाला ॥

श्रुतं क्ली । शास्त्रं इत्यमरः । श्रवणगोचरः । इति शब्दरत्नावली ॥
श्रुतः त्रि अवधृतः । इत्यमरः आकर्णितः इति मेदिनी ॥
श्रुतकीर्त्तिः स्त्री जनकभ्रातुः कुशध्वजराजकन्या शत्रुघ्नपत्नी यथा । शत्रुघ्नस्यापि धर्म्मात्मा प्रददौ मिथिलेश्वरः श्रुतकीर्त्तिं महाबाहोः पाणिं गृह्णीष्व पाणिना । इति वाल्मीकीये रामायणे बालकाण्डे ७३ सर्गः अपि च एवं भवतु भद्रं ते कुशध्वजसुते इमे पत्न्यौ भजेतां सहितौ शत्रुघ्नभरतावुभौ । इति तत्रैव ७२ सर्गः देवर्षौ ॥ कीर्त्तिषु त्रि इति केचित् ॥
श्रुतदेवी स्त्री सरस्वती । इति हेमचंद्रः ॥
श्रुतबोधः पुं कालीदासकृतछन्दोग्रन्थविशेषः । यथा छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते तदहं कथयिष्यामि श्रुतबोधमविस्तरं । इति तद्ग्रन्थस्याद्यश्लोकः ॥
श्रुतर्षिः पुं ऋषिविशेषः सत्यश्रुतादिः । इति त्रिकाण्डशेषः

यथा । संहिता ऋग्यजुःसाम्नां संहिताः तैः श्रुतर्षिभिः सामान्याद्वै कृतान्येव द्वापरे विह इति मात्स्ये १४४ अध्यायः ॥
श्रुतश्रवोनुजः पुं शनैश्चरग्रहः । इति हारावली ॥
श्रुतश्रेणी स्त्री द्रवन्ती । इति भावप्रकाशः ॥
श्रुतादानं क्ली ब्रह्मवादः । इति हारावली ॥
श्रुताध्ययनसंपन्नः त्रि धर्म्मशास्त्रज्ञः । यथा याज्ञवल्क्यः श्रुताध्ययनसंपन्नाः कुलीनाः सत्यवादिनः । राज्ञा सभासदः कार्य्याः शत्रौ मित्रे च ये समाः इति व्यवहारतत्त्वे ॥
श्रुतान्वितः त्रि शास्त्रज्ञः । यथा । अभून्नृपो विबुधसखः परन्तपः । श्रुतान्वितो दशरथ इत्युदाहृतः गुणैर्वरं भुवनहितच्छलेन यं सनातनः पितरमुपागमत्स्वयं इति भट्टिः ॥
श्रुतार्थः पुं शास्त्रबोधविषयीभूतार्थः । श्रवणमात्रबोध्यार्थः यथा श्रुतार्थस्य परित्यागादश्रुतार्थस्य कल्पनात् प्राप्तस्य बाधादित्येवं परिसंख्या त्रिदोषिका । इति प्रायश्चित्ततत्त्वे ॥
श्रुतायुः पुं सूर्य्यवंशीयराजविशेषः । स तु कुशस्य चतुर्दशपुरुषः यथा नाभागस्याम्बरीषो ऽभूत् सिन्धुद्वीपस्ततो ऽभवत् । ततः श्रुतायुः पुत्रो ऽभूत् ऋतुपर्णस्ततो ऽभवत् इति मात्स्ये १२ अध्यायः ॥
श्रुतिः स्त्री वेदः । कर्णः इत्यमरः । गर्भस्यास्य पंचमासेः श्रुतिर्भवति । इति सुखबोधः श्रुतौ इन्द्रियग्राह्यः शब्दः शब्दत्वादिः यथा घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः । तथा रसो रसज्ञया तथा शब्दोपि च श्रुतेः । इति भाषापरिच्छेदः ॥ कर्णस्य शुभाशुभलक्षणमाह रक्ताल्प पक्ष्म श्रुकर्णाः स्युः पापमृत्यवः । निर्मांसैः शिरापिहे भोगाः कृपणा ह्रस्वकर्णकाः । शंकुकर्णाश्च राजानो रोमकर्णाः शतायुषः । वृहत्कर्णाश्च राजानो धनिनः परिकीर्त्तिताः इति गारुडे ६५ अध्यायः ॥ श्रोत्रकर्म्म ॥

वाती। इति मेदिनी ॥ श्रवणान
न्तरं इति शब्दरत्नावली ॥
षड्जाद्यारम्भिका इति हेमचन्
द्रः। शोरन् इति भाषा। सा च
द्वाविंशतिप्रकारा यथा। नन्
दी चालनिका रम्या च मसृणा लीवि
शा विचित्रा घना मातङ्गी सर
स्वस्ता मधुकरी मैत्री शिवा
माधवी। बाला शार्ङ्गरवी कला
कलरवा माला विशाला जया
मातेति श्रुतयः प्रमाणकविभिर्द्वा
विंशतिः कीर्त्तिताः। नान्दी वि
शाला सुमुखी विचित्रा संभवाः स
दा षड्जो मतो मुनीन्द्रेण भवते
न घोषवनच चित्रा घना चालनि
का निवेशनात् संजायते। ऋ
षभस्तथैव। रक्तोऽपि माला
सुरसा निवेशनात् गान्धारनामा
भूषितः पृथिव्यां। मातङ्गी माध
वी मैत्री शिवाजातस्तु पञ्चमः
कला कलरवा बाला शार्ङ्गरव्या
स्तु पञ्चमः जायतस्ता रसानात्
संयोगाद्धैवतस्वरः मायामधुक
रीयोगात् निषादः संप्रजायते
श्रुतिस्थाने स्वरान् वक्ष्यन्ता
लङ्घ्यापितत्वतः जलेचस्तु
तरो मार्गो मानीतो नोप।

लक्ष्यते गगने पक्षिणां यद्वत्
तद्वत् स्वरगता श्रुतिः श्रुति
र्नादवशा प्रोक्ता तथाप्याच
कला मता। यथा तैलगतं स
र्पिर्यथा काष्ठगतोऽनलः तथ
तेऽप्युपदेशेन यथा स्वरगता
श्रुतिः। वीणादेहे श्रुतिस्था
ने स्वररक्तानतु वेशजे श्रुषिते
रसतो रुद्राः संहेणाकेन श्र
श्रुतः। प्रपापांस हृदेनोद स
तो द्वाविंशतिः श्रुतिः। इति
संगीतदामोदरः ॥
अपिच तीव्रा कुमुद्वती मन्दा
छन्दोवत्यस्तु षड्जगाः। दया
वती रञ्जनी च रतिका ऋषभेस्थि
ताः रौद्री क्रोधा च गान्धारेव
त्रिकाद्य प्रसारिणी प्रीतिश्च
मार्जनीत्येताः श्रुतयो मध्यम
माश्रिताः। क्षिति रक्ता च संदी
पी न्यालापी चैव पंचमे। मन्द
ती रोहिणी रम्येत्येता धैवत
संश्रयाः। उग्रा च क्षोभिणी
ति द्वे निषादे वसतः श्रुती ॥
इति संगीतरत्नाकरः ॥
श्रुतिकटः पुं प्राज्ञलोहः ॥
शाहः पापशोधने। इति मे
दिनी ॥

श्रुतिकटुः पुं कठोरशब्दः ॥
अलंकारस्य दोषविशेषः। यथा
श्रुतिकटु च्युतसंस्कृति अप्र
योक्तानुचिता कविप्रसिद्धविरोधि
काः उदाहरणं। वाचा मधुरया
तन्वि स्मितापांगतरंगया मना
स्वदन मुखोल्य कान्तोऽस्मि कुरु
मार्दवः इति काव्यचन्द्रिका।
श्रुतिकथितः त्रि श्रुतसूक्तः वे
दोक्तः। इति लोकप्रसिद्धः ॥
श्रुतिजीविका स्त्री धर्मशास्त्रं
यथा। स्मृतिर्धर्मसंहिता च सं
हिता श्रुतिजीविका। इति
शब्दरत्नावली वेदजीवनो
पायश्च ॥
श्रुतितत्परः त्रि सकर्णः इ
तिजटाधरः। वेदाभ्यासरतश्च।
श्रुतिधरः त्रि श्रुतिमात्रधार
कः। श्रवणमात्रेणाभ्यासक
र्त्ता। तदौषधं यथा हरिद्राच
हालिकर्णस्य वै मूले गृहीत्वा
चूर्णयेद्बुधः। सर्वरोगविनिर्मु
क्तं चूर्णं पलशतं शिव सर्पी
र्भावितं कुर्य्यात् समाहेनतू
षधजं। नवं श्रुतिधरं भूरं
मृषोऽप्युगति विक्रमे पद्मयोनि
पती कान्तो पञ्चदशानां पुक

षोडशाद्वाहुतीं विप्र सततं
गुरुभोजिते। मधुसर्पिः समा
युक्तं जप्य मायुष्करं भवेत्।
तज्जप्यं मधुना सार्द्धं दशवर्ष
सहस्रिणं कुर्य्यान्नरं श्रुतिधरं
प्रमदाजनवल्लभं। इति गारुडे
१९९ अध्यायः ॥
श्रुतिवर्जितः त्रि बधिरः। इ
तिजटाधरः। वेदरहितश्च ॥
श्रुतिवेधः पुं कर्णवेधः त
स्य विहितकालो यथा दीपि
कायां नो जन्मेऽह्नि मासस्पर्ये
रविजे समाजाह स्वमाच्युते
शालेन्दुर्लघुयुग्म विष्णु मृदुभे
स्वामिज्ये तारादिस्वभे सौम्येस्थाय
त्रिकोणकण्टकगतैः पापैस्त्रि
लाभारिगे रोज्ञोट्टे श्रुतिवेध
इज्यासितभे लग्ने तु काले।
शुभे। इति ज्योतिस्तत्त्वं ॥ अ
न्यच्च। तत्र निर्णयः दिक्पाभि
ज्ञाः प्रशस्ताः वाराः बृहस्पति
बुधशुक्राणां प्रशस्ताः। नक्ष
त्राणि अश्विनी रेवती हस्ताचि
त्रा पुनर्वसुर्धनिष्ठा मृगशि
रः पुष्यः श्रवणानुराधा उत्त
रफाल्गुनी उत्तराषाढा उत्तरभाद्र
पद स्वाती लग्नानि वृष तुला ध



तुमीनसंज्ञकानि प्रथमवर्षे।
जन्ममास चैत्र श्रेयाग्रहाय-
णाभिन्न मासाः प्रशस्ताः शुक्ल
पक्षे चंद्रताराद्विशुद्धौ हरिश
यनभिन्नकाले कालशुद्धौश्र
निवेशः कार्यः इति ज्योतिषं ॥
श्रुतिस्फोटा स्त्री कर्णस्फोटा
लता इतिराजनिर्घण्टः ॥
श्रुवः पुं यागः इतिजटाधरः
स्त्रुवेऽस्त्री इति केचित् ॥
श्रुवा स्त्री मूर्वा इति राजनि
र्घण्टः ॥
श्रुवावृक्षः पुं विकंकतवृक्षः
इति राजनिर्घण्टः ॥
श्रेढी स्त्री अंकविशेषः भिन्नं
भिन्ने यत्किंचिद्व्यादिक मे
कीक्रियते तद्गुणनायाः श्रेढ्या
मिश्रायत्वा तद्गुणनानंतरमा
रब्धः श्रेढीव्यवहारः इति शु
नीश्वरानन्दकृतलीलावतीटी
का। तस्याप्रास्ते यथा। अथ
श्रेढीव्यवहारकरणसूत्रे सैक
पदघ्न पदार्द्धं मेथकाद्यंकयुतिः
किलसंकलिताख्या साहिप्रेते
नपदेनविनिघ्नीस्यात् विहता
किलसंकलितैक्यं।उदाहरणं
एकादीनां नवांतानां ए. ॥

थक् संकलितानि मे तेषांसं
कलितैकांच प्रचक्ष्वगणकतु
ते। न्यासः।१।२।३।४॥
५।६।७।८।९। लब्धानि
तेषां संकलितानि १।३।६
।१०।१५।२१।२८।३६।
४५ अथ तेषां संकलितैक्या
नि १ ४ १० २० ३५ ५६ ८४
१२०॥ १६५ तस्य शेषसूत्रे ॥
यथा ॥ करणसूत्रं सार्द्धं मा
र्या। पादाचरं विपैगाद्धे-
गुणं वर्गं फलश्चये। द्विगुणा
समवृत्तानां संख्या तद्वर्गवर्ग
वर्गश्च। स्वस्वपदेनोनयोस्ता
दर्द्धसमानाच्च विषमाणां।उ
दाहरणं समानां मर्द्धतुल्या
नां विषमाणां पृथक् पृथक्
वृत्तानां वद मे संख्यामनुष्टु
प्छंदसां द्रुतं न्यासः अत्रो
दि २ गुणाः गच्छः ८ लब्धा
समवृत्तानां संख्या २५६ त
थार्द्धसमानाञ्च ६५२८० विष
माणाञ्च ४२९४९०१७६० इति
लीलावती ॥
श्रेणिः पुं स्त्री निश्छिद्रपंक्तिः
तत्पर्यायः पंक्तिः २ श्रेणी ३
विज्ञाली ४ वीथी ५ आलिः

६ पालिः ७ आवलिः ८ आली ९ लोकं ॥
पाली १० आवली ११ वीथिः १२
वीथिका १३ राजी १४ राजिः १५
रेखा १६ लेखा १७। इतिशब्द
रत्नावली ॥ समानशिल्पिसंह-
तिः। कम्पानि इति अङ्गरेजीय
भाषा। इतिमेदिनी ॥
सेकपात्रं। इतिविश्वः ॥
श्रेणिकः पुं मगधदेशीयराज
विशेषः। इति हेमचंद्रः ॥
श्रेणी पुं स्त्री श्रेणिः। इति
शब्दरत्नावली ॥
श्रेयः स्त्री धर्म। मुक्ति। इत्य
मरः। शुभे। इति प्रशस्तेत्रि।
इतिमेदिनी ॥
श्रेयसी स्त्री हरीतकी। पाठा॥
करिपिप्पली। इत्यमरः। रास्ना।
इति विश्वः। शुभयुक्ताच ॥
श्रेयांशः पुं तृतार्हद्विशेषः।
इति हेमचंद्रः ॥
श्रेयान् त्रि श्रेष्ठः। इत्यमरः॥
शुभयुक्तश्च ॥
श्रेष्ठं क्ली गोदुग्धं। इति त्रि-
काण्डशेषः ॥
श्रेष्ठः पुं कुबेरः ॥ नृपः ॥
द्विजः। इति शब्दरत्नावली ॥
विष्णुः। इति तस्य सहस्रनाम

श्रेष्ठः त्रि प्रशस्तः। वरः तत्प
र्यायः श्रेयान् २ पुष्कलः ३
सत्तमः ४ अतिशोभनः ५ ॥
इत्यमरः ॥ मुख्यः ६ वरेण्यः ७
प्रमुखः ८ प्रष्ठः ९ अग्रहरः १०
उत्तमः ११ प्रग्रहः १२ अनुत्तमः।
१३ अग्रीयः १४ प्रवेकः १५ अ
ग्र्यः १६ अग्रियः १७। इति
शब्दरत्नावली। अनवरः १८
अग्रिमः १९ प्राग्र्यः २० प्राग्रहरः
२१ प्रवर्हः २२ इति जटाधरः
वृद्धः ॥ वृद्धः ॥ ज्येष्ठः। इति
शब्दरत्नावली ॥
श्रेष्ठकाष्ठः पुं शाकवृक्षः। इति
राजनिर्घण्टः ॥
श्रेष्ठा स्त्री स्थलपद्मिनी। इति
राजनिर्घण्टः ॥ मेदा। इतिके
चित्। उत्तमानारीच ॥
श्रेष्ठाम्लं क्ली वृक्षाम्लं। इति
राजनिर्घण्टः ॥
श्रेष्ठाश्रमः पुं गृहस्थाश्रमः
आश्रमत्रयाणां पालकत्वात् ॥
श्रेष्ठी पुं कुलोत्तमशिल्पी ॥
यथा। कुलिकस्तु कुली श्रेष्ठी-
कुल श्रेष्ठिनि शिल्पिनो। इति
जटाधरः ॥



श्रै स्वेदे । इति कविकल्पद्रुमः ॥ श्रायति रोश्लोकः । इति दुर्गादासः ॥

श्रौम पचने । इति कविकल्पद्रुमः । म श्रापयति । इति दुर्गादासः ॥

श्रोण ऋ संघाते । इति कविकल्पद्रुमः ॥ ऋ अशुश्रोणत् । संघातो राशीकरणं । इति दुर्गादासः ॥

श्रोणः पुं पंगुः । इत्यमरः ॥

श्रोणा स्त्री श्रवणानक्षत्रं । कांजिकं । पक्केति । इति केचित् ॥

श्रोणिः स्त्री कटिः । इत्यमरः ॥ स्मात् गर्भस्थस्य मासद्वयेन भवति । इति सारबोधः । पंथाः इति शब्दरत्नावली ॥

श्रोणिफलं क्ली कटिः । इति राजनिर्घण्टः ॥

श्रोणिफलकं क्ली कटिपार्श्वः तत्पर्यायः । कटः २ इत्यमरः फलकं चर्म तदाकारत्वात् श्रोणिः फलकमिव श्रोणिफलकं कटप्रोथे आध्रियतेकटः कटे वर्षावरणयोः अल् कटिः । इति केचित् । इति भरतः ॥

श्रोणिबिम्बं क्ली कटिसूत्रं । इति धनञ्जयः ॥

श्रोणिसूत्रं क्ली खड्गबन्धनसूत्रं । परतला इति हिंदीभाषा ॥ कटिबन्धनसूत्रं चुनुशी । इति भाषा । इति केचित् ॥

श्रोणी स्त्री कटिः । पंथाः । इति भरत द्विरूपकोषः ॥

श्रोतः[स] क्ली कर्णः । नदीवेगः ॥ इति जटाधरः । इंद्रियं । यथास्वीक मत्ते करणं श्रोतः । खं विषयीन्द्रियं । इति हेमचन्द्रः ॥

श्रोतव्यं त्रि श्रवणीयं । यथा । अध्येतव्यं नचान्येन ब्राह्मणं क्षत्रियं विना । श्रोतव्यमिह शूद्रेण नाध्येतव्यं कदाचन ॥ इति तिथ्यादितत्त्वं ॥

श्रोता त्रि श्रवणकर्त्ता । यथा । अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः । इति हितोपदेशः ॥ पुराणश्रोतृत्वे प्रमाणमाह ॥ पठेदर्थं बुध्यमानः श्रावयेद्धै नरोत्तम । श्रोता तत्प्राञ्जलो भूत्वा शृणुयात् भक्तितत्परः ॥ इति पाद्मे पातालखण्डे ४२ । अध्यायः ॥

श्रोत्रं क्ली कर्णः । इत्यमरः ॥

श्रोत्रियता । इति त्रिकाण्डशेषः ॥

श्रोत्रियः पुं वेदाध्येतृब्राह्मणः तत्पर्यायः ॥ छान्दसः २ ॥ इत्यमरः ॥ श्रूयते धर्माधर्मावनेन इति श्रोत्रो वेदः शास्त्रमितिवः श्रोत्रं वेत्ति अधीते वा श्रोत्रियः घ इ कादिति इयः । छन्दो अधीते इत्यर्थे इयछन्दः शब्दस्य श्रोत्रादेशः । इति परे ॥ छन्दो वेत्ति अधीते वा छान्दसः । इति एवंणस्सः ॥ इति भरतः ॥ तस्य लक्षणं यथा ॥ जन्मना ब्राह्मणो ज्ञेयः संस्कारै द्विज उच्यते ॥ विद्याभ्यासी भवेद्विप्रः श्रोत्रिय स्त्रिभिरेव हि । इति पाद्मे उत्तरखण्डे ॥ ११६ ॥ अध्यायः ॥ मानवे मार्कण्डेय पुराणे चाप्येवं ॥ अपि च । एकां शाखां सकल्पां वा षड्भिरंगैरधीत्य च । षट्कर्म निरतो विप्रः श्रोत्रियो नाम धर्मवित् । इति दानकमलाकरः ॥

श्रोत्रियता स्त्री श्रोत्रियधर्मः । तत्पर्यायः । श्रोत्रं २ । इति त्रिकाण्डशेषः ॥

श्रौतं क्ली गार्हपत्याहवनीय दक्षिणाग्नयः । यथा । त्रेता ये गार्हपत्याहवनीय दक्षिणाग्नयः इद मग्नित्रिकं श्रौतं त्रेताग्निहोत्र मित्यपि ॥ इति जटाधरः ॥

श्रौतः त्रि श्रुतिविहितधर्मादिः यथा । धर्मज्ञैर्विहितो धर्मः श्रौतः स्मार्त्तो द्विधा द्विजैः ॥ दानाग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणं । स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः ॥ पूर्वेभ्यो वेदयित्वेह श्रौतं सप्तर्षयोऽब्रुवन् ॥ ऋचो यजूंषि सामानि ब्रह्मणोङ्गानि साश्रुतिः । मन्वन्तरस्यातीतस्य स्मृत्वा तन्मनुरब्रवीत् । ततः स्मार्त्तः स्मृतो धर्मो वर्णाश्रम विभागशः । एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते । विज्ञेयः श्रवणात् श्रौतः स्मरणात् स्मार्त्त उच्यते । इज्या वेदात्मकः श्रौतः स्मार्त्तो वर्णाश्रमात्मकः ॥ इति मात्स्ये १२० अध्यायः ॥ अपि च । अधिकरणमाला कृष्णाचार्य्यधृत पराशरभाष्ये शातातपः । श्रौतं कर्म

स्वयं कुर्य्यादन्योपि स्नाते स्नाच
रेत् । अशक्तौ श्रोत मप्यन्यः
कुर्य्यादाचार मंततः । इति नि
त्याचारतत्वं ॥
श्रोत्रं क्ली कर्णः । श्रोत्रियक
र्म्म । तत्पर्य्यायः । श्रोत्रियता २
इति शब्दरत्नावली । श्रोत्र-
कर्म्मच ॥
श्रौषट् व्य देवहविर्द्दाने ॥
इत्यमरः ॥ देवहविर्द्दाने इत्य
नेनायं मंत्रः सूचितः । इति
भरतमतं ॥
श्लाकं क्ली पद्मं । इति केचि-
त् । श्लक इ उ सर्पे । इति कवि
कल्पद्रुमः । अंत्यस्थतृतीयवर्णोप
धादिः । इ श्लंकते । उ श्लंकते ।
सर्पो गतिः । इति दुर्गादासः ॥
श्लग इ व्रजे । इति कविकल्प
द्रुमः । अंत्यस्थतृतीयवर्णयुक्त
तालव्यादिः । इ श्लंगते । इति
दुर्गादासः ॥
श्लथ तक दौर्ब्बल्ये । इति कवि
कल्पद्रुमः । अंत्यस्थतृतीययु-
क्तादिः । क श्लथयति । इति
दुर्गादासः ॥
श्लथः त्रि शिथिलः । यथा ।
शिथिलः प्रश्लथः श्लथः । इति जटा

धरः दुर्ब्बलः । इति श्लथधात्वर्थ
दर्शनात् ॥
श्लक्ष्णं त्रि अल्पं । इत्यमरः ॥
मनोहरं । इत्युणादिकोषः ॥
श्लक्ष्णकं क्ली पूगफलं । इति
राजनिर्घण्टः । मनोहरञ्च ॥
श्लक्ष्णत्वक् पुं अश्मंतकवृक्षः । इ
तिराजनिर्घण्टः । स्वल्पवल्कलश्च
श्लाख ऋ व्याप्तौ । इति कविक
ल्पद्रुमः । अंत्यस्थतृतीययुक्तः ।
ऋ अशश्लाखत् । इति दुर्गा
दासः ॥
श्लाघ ङ उ कत्थने । इति कवि
कल्पद्रुमः ॥ अन्त्यस्थतृतीययुक्त
तालव्यादिः । कत्थनं प्रशंसा ॥
ऋ अशश्लाघत् । उ श्लाघते गुणिनं
गुणी । इति दुर्गादासः ॥
श्लाघा स्त्री प्रशंसा । परिचर्य्या ।
अभिलाषः । इति मेदिनी ॥
श्लाघ्यः त्रि श्लाघनीयः । प्रशंस्यः
यथा । गौरविता स्वाचार्य्यमिश्राः
श्लाघ्या स्तत्रभवन्तश्चाः ॥
इति त्रिकाण्डशेषः ॥
श्लिकं क्ली ज्योतिःशास्त्रं । इत्यु
णादिकोषः ॥
श्लिकुः पुं भृत्यः । इति सिद्धांत-
कौमुद्यामुणादिवृत्तिः ॥ षिद्गुः ।

इत्युणादिकोषः ॥
श्लिष उ दाहे । इति कविकल्प-
द्रुमः । अंत्यस्थतृतीययुक्तः ॥
उ श्लेषित्वा श्लिष्ट्वा । इति दुर्गा-
दासः ॥
श्लिष औ ष ऌ त्रि श्लेषे । इति
कविकल्पद्रुमः । अंत्यस्थतृतीय
युक्तादिः । औ श्लेष्टा । य श्लिष्यति
। ऌ अश्लिषत् । आलिंगने तु
अश्लिक्षत् । त्रि श्लिष्टोऽस्ति ।
श्लेष आलिंगनं । तच्च वाह्यमा
मेव नूह्यं । श्लिष्यति कामपीति
जयदेवः । प्राप्तावप्ययं । श्लि-
ष्यति वृत्ते लता । इति दुर्गा-
दासः ॥
श्लिष क श्लेषे । इति कविक-
ल्पद्रुमः ॥ अंत्यस्थतृतीययुक्तः
क श्लेषयति । इति दुर्गादासः
श्लिषा स्त्री आलिंगनं । इति
त्रिकाण्डशेषः ॥
श्लिष्टः त्रि श्लेषयुक्तशब्दादिः ।
भिन्नार्थैकैकरूपान्वितवाक्यं ।
तस्य लक्षणं यथा । श्लिष्टं श्लि
ष्टमविष्पष्ट मेकरूपान्वितं वचः
इति सरस्वतीकण्ठाभरणं ॥
श्लीपदं क्ली स्फीतपादादि । गोद
इति भाषा । तत्पर्य्यायः । पा

दवल्मीकं २ । इति हेमचंद्रः ॥
अथ श्लीपदाधिकारः । तत्र श्ली
पदस्य विप्रकृष्टं निदान माह ।
पुराणोदकभूयिष्ठाः सर्व्वर्त्तुषु च
शीतलाः । ये देशा स्तेषु जाय
न्ते श्लीपदानि विशेषतः । वि
शेषतः । इति वचनेनान्यत्रापि
श्लीपदं भवति इति बोध्यते ॥
सामान्य लक्षण माह ॥
यः सज्वरो वंक्षणजो भृशार्त्तिः
शोथो नृणां पादगतः क्रमेण
तत् श्लीपदं स्यात् करकर्णनेत्र
शिश्नोष्ठ नासास्वपि केचिदा
हुः ॥ तत् त्रिविधं । वातिकं
पैत्तिकं श्लैष्मिकञ्चेति । तेषां
लक्षण माह । वातजं कृष्णरूक्षं
हि स्फुटितं तीव्रवेदनं ॥ अ
निमित्तरुजं चास्य बहुशोज्व
र एवच । पित्तजं पीतसंका
शं दाह ज्वरयुतं भृशं । श्लैष्मि
कं तु भवेत् स्निग्धं तथा पाण्डु
गुरुस्थिरं । त्रीण्यप्येतानि जानी
यात् श्लीपदानि कफोच्छ्रयात्
गुरुत्वञ्च महत्वञ्च यस्मान्नास्ति
विनाकफात् ॥ असाध्य माह
वल्मीक मिव संजातं कण्टकै
रुपचीयते । सर्व्वात्मके महत्तत

वर्ज्जनीयं विशेषतः ॥ यत् श्ले
ष्मलाहार विहारज्जाते ज्ञातेत
या भूरिकफसम्भवः । सास्रा
वमथ्यत्र तु सर्वलिंगो सकाण्डुके
वापि विवर्ज्जनीयं ॥ श्लीपद
स्यचिकित्सा । लंघनालेपन
स्वेद रेचनै रक्तमोक्षणैः । प्रा
यः श्लेष्महरै रुक्षैः श्लीपदं
समुपाचरेत् ॥ १ ॥ सिद्धा
र्थ शोभाञ्जन देवदारु विश्वौ
षधे मूत्रयुतैः प्रलिम्पेत् । पु
नर्णवा नागर सर्षपाणांक
ल्केन वा काञ्जिकमिश्रितेन
२ श्लीपदमिति शेषः । धत्तूरै
रण्ड निर्गुण्डी वर्षाभू शिग्रु सर्ष
पैः । प्रलेपः श्लीपदं हंति चि
रोत्थमपि दारुणं ॥ ३ ॥ प्रसा
रण्यपि यान्यते श्लीपदे चिरका
लजे । मूलेन सहचराया स्तु
लमिश्रेण लेपनात् । तालस्य
फलरसो ग्राह्यः । ४ । सप्तला
स्थूलपत्राणां कल्कं तक्रेण वा
पिबेत् । संस्नुहं लवणोपेतं सेवि
तं श्लीपदं हरेत् ५ पूगकोट व
ल्कल क्वाथं गोमूत्रेण युतं
पिबेत् । श्लीपदानां विनाशाय
मेदोदोष निवृत्तये ६ ॥ र

ज्जनी गुडसंयुक्तो गोमूत्रेणापिवे
न्नरः । वर्षोत्थं श्लीपदं हंति द
द्रुकुष्ठं विशेषतः ७ ॥ वर्षाभू
त्रिफलाचूर्णं पिप्पल्यासहयो
जितं । सेव्याद्रं श्लीपदंनिहन्यात्
चिरोत्थं श्लीपदं जयेत् ॥ ८
गंधर्वतैलसिद्धां हरीतकीं गो
मूत्रेण पिबति । श्लीपद वि
बन्धमुक्तो भवत्यसौसप्तरात्रे
ण ॥ गंधर्वतैलं एरंडतैलं गो
मूत्रं गोमूत्रेण ॥ ९ ॥
इति श्लीपदाधिकारः ॥
इति भावप्रकाशः ॥ तस्यक
र्म्मविपाको यथा गौतमोपि
क्कविद्विशेष माह । अन्नदवा
गुल्वणं गुरु शुक्रः संलग्नवाक्
जलोदरी दारत्यागी कूटसाक्षी
श्लीपदी । इति मिताक्षरायां
प्रायश्चित्ताध्यायः ॥ कूटसाक्ष
स्य सुरापानसमत्वेनानुपात
कत्वात् ततकर्म्मजस्य श्लीपद
रोगाद्युक्तेन पराकव्रतं कर्त्तव्यं
इति मन्वादिमतं ॥
श्लीपदप्रभवः पुं शाखोटः ॥
इति शब्दमाला ॥
श्लीपदापहः पुं पुत्रञ्जीववृक्षः ॥
इति त्रिकाण्डशेषः ॥

श्लीलः त्रि लक्ष्मीवान् । इति
श्रीलशब्दटीकायां स्वामी ॥
श्लेषः पुं संयोगः । तत्पर्यायः
संधिः २ । इत्यमरः ॥ दाहः ॥
आलिंगनं । इति श्लिषधात्वर्थ
दर्शनात् ॥ शब्दालंकारविशेषः
तस्य लक्षणादि यथा ॥
वाच्यभेदेन भिन्ना यद्युगपद्भाष
णस्पृशः । श्लिष्यंति शब्दाः श्ले
षोऽसावक्षरादिभिरष्टधा ॥
अर्थभेदेन शब्दभेद इति दर्श
ने काव्यमार्गे स्वरो न गण्यते
इति च नये वाच्यभेदेनभिन्ना
अपि शब्दा यद्युगपदुच्चारणेन
श्लिष्यंति भिन्नं स्वरूप मपह्नु
वते स श्लेषः ॥ स च वर्णपद
लिंगभाषा प्रकृति प्रत्ययवि
भक्ति वचनानां भेदादष्टधा ॥
क्रमेणोदाहरणं । अलंकारः
शोकाकरनरकपाले परिजनो
विशीर्णांगो भृंगी वसतु च वृष
एको बहुवयाः । अवस्थेयं स्था
णोरपि भवति सर्वामरगुरोर्वि
धौ वक्रे मूर्द्धि स्थितवति वयंके
पुनरमी ॥ इक्षुकान्तिस्वरमाङ्गं
भूषित निःशेष परिजनं देव
विलसत्करेणुगहनं ॥

सम्प्रति समवाययोः सदनं ॥
भक्तिप्रह्व विलोकनप्रणयिनी
नीलोत्पल स्पर्द्धिनी ध्यानाल
म्बनतां समाधिनिरतै र्नीतेहि
तप्राप्तये । लावण्यैकमहानि
धी रसिकतां लक्ष्मीदृशो स्त
न्वती युष्माकं कुरुतां भवार्ति
शमनं नेत्रे तनुर्वा हरेः । पद्मप
व वचनश्लेषोपि । महदे सुर
सन्धम्मे मव समासगमागमा
हरणे । हर बहु सरणं तं चि
त्तमोह मवसर उमे सहसा । अ
यंसर्वाणि शास्त्राणि हृदि ज्ञेषु
च वक्ष्यति । सामर्थ्यकृदमित्रा
णां मित्राणाञ्च नृपात्मजः । रजनि
रमणमौलेः पादपद्मावलोक
क्षणसमयपराप्ता प्रर्वसम्पत्सह
स्रे । प्रथम निवह मध्ये जातुचि
त्त्वत्प्रसादादहमुचितरुचिः स्यान्न
न्दितास्मा तथा मे । सर्व्वस्व हरस
र्वस्यत्वं भवच्छेदतत्परः । नयोप
कारसांमुख्य मायासि तनुवर्त्त
नं ॥ भेदाभावात् प्रकृत्यादे र्भे
दोपि नवमो भवेत् । नवमोपि
त्वपि भिन्नक्रमः । उदाहरणं
योऽसकृत् परगोत्राणां पक्ष
च्छेदक्षणक्षमः । शतकोटिदत्तां

विश्वहितत्रुपेन्द्रः सराजते ॥ अत्र
प्रकरणादिनियमाभावात् द्वा
वप्यर्थौ वाच्यौ । ननु स्वरिता
दिगुणभेदात् भिन्नप्रयत्नोच्चा
र्य्याणां तदभेदादभिन्नप्रयत्नो
च्चार्य्याणाञ्च शब्दानां बन्धेऽनिय
मेनालंकारान्तरप्रतिभोत्पत्ति
हेतुः । शब्दश्लेषोऽर्थश्लेषश्चे
ति द्विविधोऽप्ययमर्थालंका
र मध्ये परिगणितोऽन्यैरिति क
थमयं शब्दालंकारः । उच्यते ।
इह दोषगुणालंकाराणां शब्दा
र्थगतत्वेन यो विभागः सोऽन्व
यव्यतिरेकाभ्यामेव व्यवतिष्ठ
ते । तथाहि कष्टत्वादि गाढत्वा
द्यनुप्रासादयो ऽर्थत्वादि प्रौढ
त्वाद्युपमादयः सद्भाव तदभावा
नुविधायित्वादेव शब्दार्थगतत्वे
न व्यवस्थाप्यन्ते । तथाहि । स्वयंच
पल्लवाताम्रभास्वत्कर विराजिता
इत्यभंगश्लेषः । प्रभातसन्ध्येवा
स्वापफललुब्धे हितप्रदेति स
भंगशब्दश्लेष इति द्वावपि श
ब्दैकसमाश्रयाविति द्वयोरपि
शब्दश्लेषत्वमुपपन्नं । नत्वाद्य
स्यार्थश्लेषत्वं । अर्थश्लेषस्य तु
स विषयः यत्र शब्दपरिवर्त्तनेऽपि न

श्लेषत्वखण्डना । यथास्तोकेनो
न्नतिमायाति स्तोकेनायात्यधोग
तिं । अहो सुसदृशी वृत्तिस्तुला
कोटेः खलस्य च । इति । नचा
यमुपमा प्रतिभोत्पत्तिहेतुः
श्लेषः । अपि तु श्लेषप्रतिभोत्
पत्तिहेतुरुपमा । तथाहि । य
था कमलमिव मुखं मनोज्ञ
मेतत् कचतितरामित्यादौ गुण
गुणसाम्ये क्रियासाम्ये उभय
साम्ये वा उपमा तथा सकलक
लं पुरमेतज्जातं संप्रति चक्षितां
शुविम्बमिवेत्यादौ शब्दमात्रसा
म्येऽपि सा युक्तैव, तथा सुक्तं रु
द्रटेन । स्फुटमर्थालंकारावेता
वुपमासमुच्चयौ किन्तु । आश्रि
त्य शब्दमात्रं सामान्यमिहापि स
म्भवत इति । नच कमलमिव मु
खमित्यादि साधारणधर्मप्रयो
गशून्य उपमाविषय इति वक्तुं
युक्तं पूर्णोपमाया निर्विषयत्वा
पत्तेः । देव त्वमेव पातालमाशा
नां त्वं निबन्धनं । त्वञ्चामरमरु
द्भूमिरेको लोकत्रयात्मकः । इ
त्यादि श्लेषस्य चोपमाद्यलंकार
विविक्तास्ति विषयः । इतिद्वयो
र्योगे संकर एव उपपत्तिपर्य्या


लोचने तु उपमाया एवायं यु
क्तो विषयः अन्यथा विषया
पहार एव पूर्णोपमायाः स्यात् ।
नच अविन्दसुन्दरी नित्यं गलल्ला
वण्यविन्दुकेत्यादौ विरोधप्रति
भोत्पत्तिहेतुः श्लेषः । अपि तु
श्लेषप्रतिभोत्पत्तिहेतुर्विरोधः
न ह्यत्रार्थद्वयप्रतिपादकः श
ब्दः श्लेषः द्वितीयार्थस्य प्रति
भातमात्रस्य प्ररोहाभावात् ।
नच विरोधाभासइव विरोधः ॥
श्लेषाभास इव श्लेषस्तस्मादेव
मादिषु वाक्येषु श्लेषप्रतिभोत्
पत्तिहेतुरलंकारान्तरमेव सा
धीयः । तथा च सद्वंशमुक्ताम
णिर्नाथः कविभिश्च स्मरप्रभो.
कोऽदेवमहान् भवान् । अनुरागव
तीसन्ध्या दिवसस्तत्पुरःसरः । अ
हो दैवगतिश्चित्रा न तथापि समा
गमः । आदाय चापमचलं कृत्वा
हीनं गुणं विसमदृष्टिः । यश्चि
त्रमच्युतशरो लक्ष्यमभांक्षीन्नम
स्तस्मै ॥ इत्यादावेकदेशविव
र्त्तिरूपश्लेषव्यतिरेकसमासो
क्ति विरोधत्वमुचितं न तु श्ले
षत्वं शब्दश्लेष इति चोच्यते ।
अर्थालंकारमध्ये च लक्ष्यत इति

कोऽयं नयः किन्तु वैचित्र्यमलं
कारः इति यत्रैव कविप्रतिभासं
रंभगोचरस्तत्रैव विचित्रतेति
सैवालंकारभूमिः । अर्थमुखे
मपेक्षितत्वमेतेषां शब्दानामि
ति चेत् अनुप्रासादीनामपि
तथैवेति तेऽप्यर्थालंकाराः किं
नोच्यन्ते रसादिव्यंजकस्वरू
पवाच्यविशेषसापेक्षत्वमनुप्रा
सादीनामलंकारताशब्दगुण
दोषाणामप्यर्थापेक्षयैव गु
णदोषता । अर्थगुणदोषा
लंकाराणां शब्दापेक्षयैव व्य
वस्थितिरिति तेऽपि शब्दगत
त्वेनोच्यन्ताम् । विधौ वक्रमूर्द्धि
स्थितवक्रीत्यादौ च वर्णादिश्ले
षे एकप्रयत्नोच्चार्य्यत्वेऽर्थश्ले
षत्वं शब्दभेदेऽपि प्रसज्यतामि
त्येवमादि स्वयं विचार्य्यं । इ
ति काव्यप्रकाशे शब्दालंकार
निर्णयोनाम नवम उल्लासः ॥

श्लेष्मकः पुं कफः । इति शब्द
चन्द्रिका ॥

श्लेष्मघ्ना स्त्री मल्लिका । केत
की । इति विश्वमेदिन्यौ । श्लेष्म
नाशके त्रि ॥

श्लेष्मघ्नी स्त्री ज्योतिष्मती । इति



जटाधरः । मल्लिका । इति मे
दिनी । त्रिकटुः । इति शब्दर
त्नावली ॥
श्लेष्मघ्नः त्रि कफघ्नी । इत्यमरः ॥
श्लेष्मघ्ना स्त्री वृक्षविशेषः । य
था । गुरुस्कन्ध स्त्वर्पणीच श्ले
ष्मघ्ना च वृक्षापि च । इति शब्द
माला । श्लेष्मलः त्रि श्लेष्मायु
क्तः । इत्यमरः ॥
श्लेष्मलः पुं वृक्षविशेषः । बहु
वार इति ख्यातः । इति शब्द
चंद्रिका ॥
श्लेष्महः पुं कट्फलवृक्षः ॥
इति शब्दचंद्रिका । कफनाशके
त्रि श्लेष्मा पुं कफः । इत्यमरः ।
तस्य प्रकोपहेतुर्यथा । गुरु
मधुर रसातिस्निग्ध दुग्धेक्षु भ
क्ष्य द्रवदधि दिननिद्रा पूप सर्पिः
प्रपूरैः । तुहिनपतनकाले श्ले
ष्मणः संप्रकोपः प्रभवतिदि
वसादौ भुक्तमात्रे वसंते ॥
तस्य लक्षणं यथा । स्तैमि
त्ये मधुरास्यता शिथिलता
सोत्क्लेशा प्रसेको मलप्राचुर्य्य
शिशिरता रसश्च लवणः कण्डूर
तिस्थूलता । आलस्यं चिरकारि
ताकठिनता शोथारुचिः स्निग्धता

तंद्रा स्तब्धपदेह कास गुरुताप
ताः कफोत्था रुजः ॥
अस्य प्रशमनकारणं यथा । गुरु
शीत मृदु स्निग्ध मधुर स्थिर
पिच्छिलाः । श्लेष्मणः प्रशमं यां
ति विपरीतगुणे गुणाः । रूक्षक्षा
रकषाय तिक्त कटुक व्यायाम
निष्ठीवन स्त्रीसेवा ध्वनि युद्ध
जागर रतिक्रीडा पदघातनं । धू
मात्युस्लशिरो विरेक वमन स्वे
दीपनाह्लादिके पानाहार विहा
र भेषज मिदं श्लेष्माणं प्रशं ज
येत् ॥ सच पंचविधो यथा ॥
अवलंबक [illegible] क्लेदकः श्ले
ष्मकोऽपरः । बोधकस्तर्पकश्चेति
श्लेष्मा पंचविधः स्मृतः ॥ एते
षां लक्षणानि यथा । कफधाम्ना
न्तु शेषाणां यत्करोत्यवलंब
नं । ततोऽवलंबकाख्यातिं श्लेष्मा
प्रोमात्युरःस्थितः १ आमाशया
श्रितः सो ऽन्नक्लेदनात्क्लेद
कः स्मृतः २ श्लेष्मकः श्लेषणा
त् संधेः सच सन्ध्यां व्यवस्थितः
३ ॥ रसनावस्थित स्वाद बोध
को रसबोधनात् ४ शिरःस्थि
स्थित स्नेहो तर्पको नेत्रतर्पणा
त् ॥ ५ ॥ अस्य स्थाना ॥

नि । उरः कण्ठ शिरः क्लोम पर्वा
ण्यामाशयो रसः । मेदो घ्राणं
च जिह्वा च कफस्थान मुरः परं
तत्प्रकृतिकलक्षणं । गंभीरबु
द्धिः स्थूलांगः स्निग्धकेशो महा
बलः । स्वप्ने जलाशयालोकी श्ले
ष्मप्रकृतिकोनरः ॥ स्नेहोबं
धः स्थिरत्वञ्च गौरवं वृष्यता
बलं । क्षमा धृति रलोभश्च क
फकर्म्माविकारजं । इति [illegible]
पः ॥ श्लेष्मकरद्रव्याणि यथा
भोजनानंतरं स्नानं जलपानं
विना तृषा । तिलतैले स्निग्धे ते
ले स्निग्धमामलकी द्रवे । पक्व
चिंतान्ने तक्रञ्च पक्वरंभाफले द
धि । मायाम्बु शर्करातोषं सुस्नि
ग्धसुप्तसेवनं । नारिकेलोदके दू
रस्नानेपर्युषितं जले । तरुबुं
जापक्वफलं सुपक्वकर्कटीफ
लं । खातस्नानञ्च वर्षासु मूलकं
श्लेष्मकारणं । तज्जले ब्रह्मखंडे च
महद्वीर्य्यविनाशनं ॥ श्लेष्मना
शकद्रव्याणि यथा । वह्निस्वेदं
भृष्टमांसं पक्वतैलं विशेषकं
भ्रमणं शुष्कभक्षञ्च शुष्कपक्व
हरीतकी । पिप्पलकमपक्वञ्चरंभा
फलमपक्वकं । वेशवार स्निग्धतांच


मनाहार मपानकं । सघृतं रो
चनाचूर्णं सघृतं शुष्कशर्करं
मरीचं पिप्पली शुष्कमार्द्रकं जी
रकं मधु । द्रव्याण्येतानि गांधर्वि
सद्यः श्लेष्महराणि च । इति ब्रह्मवै
वर्त्ते ब्रह्मखंडे १६ अध्यायः ॥
अपिच । सार्षपतैलं १ तैलाभ्यं
गः २ उद्वर्त्तनं ३ शैशिरजलं ४
वाप्यजलं ५ कौपजलं ६ नै
र्झरजलं ७ नादेयजलं ८ सा
मान्योष्णोदकं ९ विशेषतःपा
दशेषोष्णोदकं १० पेषितवचा
मुस्तकसंयुक्तजलस्नानं ११ ।
अगुरु १२ कुंकुमं १३ पत्रकं १४
कंकोलं १५ शटी १६ दग्धभू
मिजातशालिधान्यं १७ ब्रीहिधा
न्यं १८ यवः १९ श्यामाक
धान्यं २० कोद्रवधान्यं २१ कंगुधा
न्यं २२ हस्तिश्यामाकधान्यं २३
चीनकधान्यं २४ मुद्गः २५ मु
कुष्ठ २६ राजमाषः २७ मसूरः
२८ चणकः २९ कुलत्थः ३० तु
वरी ३१ नानाशिम्बा ३२ जलसं
योगिसामान्यशुष्कनारीचपत्रशा
कं ३३ हिलमोचीशाकं ३४ शालि
चीशाकं ३५ ग्रीष्मसुंदरशाकं ३६
पुनर्णवाशाकं ३७ कलायशाकं ३८

अस्थीशाके ३९ चांगेरीशाके ४०
ष्क्काशाके ४१ पालंकीशाके ४२
चणकपत्रशाके ४३ कौसुंभशा
के ४४ उपोदकीशाके ४५ महावा
स्त्रीशाके ४६ कदलीमोचके ४७
स्त्रुङ्वार्त्ताकुफले ४८ अंगारपक्क
वार्त्ताकुः ४९ पोटुरंगफले ५०
कारवेल्लफले ५१ कर्कोटकफ
ले ५२ पटोलनाडी ५३ कुष्माण्ड
नाडिका ५४ वेत्राग्रे ५५ सूरणः
५६ केबुकमूले ५७ चूत तैलाभ्यां
सिद्धमूले ५८ मूलकपुष्पे ५९
खण्डकर्णः ६० मूलकफले ६१
वाराहीकंदमूले ६२ आम्रपेषी
६३ अम्लरसदाडिमे ६४ मातुलु
गत्वक् ६५ निम्बाके ६६ जंबी
रे ६७ कर्कंधुः ६८ शुष्कसमस्त
कोलफले ६९ अजीरे ७० जंब
फले ७१ लवलीफले ७२ जांब
वे ७३ पक्वाम्लिकाफले ७४ प
क्वतिंदुके ७५ अम्लवेतसे ७६ म
हार्द्र ७७ करुणं ७८ कोशाम्रफले
७९ नालासिमज्जा ८० वालवि
ल्वे ८१ विल्वपेषिका ८२ धात्री
८३ विभीतके ८४ विभीतमज्जा ८५
धात्रीमज्जा ८६ नंद्यावर्तमत्स्यः ८७
कवयीमत्स्यः ८८ पलेगमत्स्यः

८९ दण्डिकमत्स्यः ९० त्रिकण्टः
मत्स्यः ९१ प्रोष्ठीमत्स्यः ९२ म
त्स्याण्डे ९३ कूर्माण्डे ९४ खगा
ण्डे ९५ पललमांसे ९६ खड्गिमांसे
९७ कूर्मपादः ९८ कपिञ्जलमां
से ९९ वर्तिकापत्तिमांसे १००
प्रसन्नामद्ये १०१ अरिष्टमद्ये १०२
अच्छमधु १०३ पुराणमधु १०४ नू
तनमधु १०५ मेषीक्षीरे १०६ उष्ट्री
क्षीरे १०७ धारोष्णदुग्धं १०८ छा
गदधि १०९ हस्तिनदधि ११० द
धिमस्तुः १११ दधिमरः ११२ मथि
तकं ११३ आविकघृतं ११४ औ
ष्ट्रकघृतं ११५ पेक्षोत्तरसः ११६
हिंगु ११७ जीरके ११८ वाष्पिका
११९ शुष्कपन्याके १२० कासन्दी
वटिका १२१ हरिद्रा १२२ यमानी
१२३ शुष्कपिप्पली १२४ आर्द्रपि
प्पली १२५ शुण्ठी १२६ आर्द्रके
१२७ सर्षपः १२८ सिद्धार्थः १२९
पलाण्डुः १३० गृञ्जनक १३१ प
त्ते १३२ यवक्षारः १३३ सर्जिका
क्षारः १३४ टंकणक्षारः १३५
मण्डः १३६ भृष्टतण्डुलः १३७ ला
जाः १३८ लाजमण्डः १३९ अपक्व
यवशक्तुः १४० वाट्यमण्डः सतु
भृष्टयवमण्डः १४१ मुद्गयूषः १४२

रागयूषः सचदाडिमद्राक्षायुक्त
मुद्गयूषः १४३ मसूरयूषः १४४
कुलत्थयूषः १४५ खडयूषः १४६
काम्बलिकयूषः सतुलवणाम्लता
दितिलमाषमिश्रितपक्वदधि १४७
पलालवेष्टित कर्दमलेपित अंगा
रदग्धपलवणवेशवारपुरस्कृतसा
र्द्रक कटुतैल संतोलित मत्स्यः १४८
प्रदिग्धं १४९ शालिपिष्टके १५०
तांबूलं १५१ चूर्णं १५२ खदिरः
१५३ एला १५४ जातीफलं १५५
कर्पूरं १५६ कटुरसः १५७ तिक्त
रसः १५८ कषायरसः १५९ उष्ण
स्वभावद्रव्यं १६० मालतीपुष्पं
१६१ मल्लिकापुष्पं १६२ पद्म
पुष्पं १६३ बकुलपुष्पं १६४
पुन्नागपुष्पं १६५ कल्हारपुष्पं
१६६ उत्पलपुष्पं १६७ पाट
लपुष्पं १६८ चंपकपुष्पं १६९
रात्रिजागरणं १७० विल्वमूलं
१७१ पाटला १७२ शालपर्णी
१७३ पृश्निपर्णी १७४ एरंडमूलं
१७५ कंठकारिका १७६ विशाला
१७७ लोध्रः १७८ भृंगराजः १७९ के
शराजः १८० द्रोणपुष्पी १८१
किराती १८२ वचा १८३ शाकासने
१८४ हरिद्रा १८५ दार्वी १८६ ॥

अवल्गुजः १८७ पडगजः १८८
रेणुका १८९ भूर्जः १९० असनः
१९१ निम्बपत्रे १९२ भूनिम्बः १९३
कुटजः १९४ यासः १९५ दुराल
भा १९६ कटुकी १९७ त्रायन्ती १९८
शृंगी १९९ कटुफलं २०० कुष्ठ
२०१ पारिभद्रः २०२ वासकः २०३
मधुयुक्तगुडूची २०४ पिप्पली
मूलं २०५ चविका २०६ गज
पिप्पली २०७ अर्कः २०८ धुत्तूरः
२०९ सामान्यगुग्गुलुः २१० नूतनपु
रातनगुग्गुलुः २११ अरुणात्रिवृ
ता २१२ सितात्रिवृता २१३ सिं
धुवारः २१४ मनोह्वा २१५ सौ
राष्ट्री २१६ ताम्रं २१७ कांस्यं
२१८ ॥ श्लेष्मवर्द्धकद्रव्याणि य
था ॥ पद्मपर्णतैलं १ अनूपदेश
वारि २ वार्षिकपानीयं ३ पल्व
लजलं ४ सामान्यशालिधान्यं ५
माषः ६ अतसी ७ नूतनधान्यं ८
मधुरनारीचशाकं ९ कंचटशा
कं १० कलंबीशाकं ११ उमारिका
शाकं १२ मध्यमकुष्माण्डफलं
१३ अलाबुफलं १४ शीर्णवृन्तफ
लं १५ चेलानं १६ दीर्घपटोलिका
१७ अलाबुनाडिका १८ पिण्डालुकं
१९ करीषपलाशासिनि वेणुश्च



जाते छुच्छिकाशाके २० विशेष
तः पलालजातसंस्वेदजशाके
२१ मधुकुक्कुटिका २२ वकुवार
फले २३ वालाम्लिकाफले २४ चौ
रुके २५ पक्ककण्ठाफले २६ क
एलाफलास्थि २७ पक्ककदले २८
तावन्मत्स्यः २९ पाण्डरमत्स्यः ३०
क्वथितमत्स्यः ३१ लवणभावित
मत्स्यः ३२ भाकूटमत्स्यः ३३ पा
ठीनमत्स्यः ३४ शिलिन्दमत्स्यः
३५ भेकुलिमत्स्यः ३६ गरमत्स्यः
३७ कर्णफलमत्स्यः ३८ इलि
शमत्स्यः ३९ शृङ्गीमत्स्यः ४०
चिङ्गटमत्स्यः ४१ वाचमत्स्यः ४२
चिङ्गटीमत्स्यः ४३ गवाचीमत्स्यः
प्रथोत् पौकालमत्स्यः ४४ कालि
गपक्षिमांसे ४५ तावत्तीरे ४६ ग्रा
मकुस्थं ४७ ग्राविकदधि ४८ मा
हिषदधि ४९ स्वादुदधि ५० अ
म्लदधि ५१ तावद्घृते ५२ मा
हिषघृते ५३ तावदिक्षुः ५४ वि
शेषतो भीरुनामकेक्षुः ५५ को
लाशीक्षुः ५६ इक्षुफाणिते ५७
इक्षुखण्डः ५८ नवान्ने ५९ चिपि
टः ६० चूतपत्रः ६१ पायसः ६२
शष्कुली ६३ सरसगुवाकफले
६४ मधुररसः ६५ अतिशयाम्ल
भोजने ६६ लवणरसः ६७ शीत
वीर्यद्रव्ये ६८ कन्दकपुष्पे ६९
यूथिकापुष्पे ७० केतकपुष्पे ७१
तावज्जलरसः ७२ तावज्जलस
ज्ञा ७३। इतिद्रव्यगुणात्संगृ
हीतं ॥

श्लेष्मातः पुं श्लेष्मातकवृक्षः ॥
इति शब्दरत्नावली ॥

श्लेष्मातकः पुं वहुवारवृक्षः
इत्यमरः ॥

श्लेष्मान्तकः पुं वृक्षविशेषः।
वहुयार इति वङ्गभाषा। लसो
ड़ा इति हिन्दीभाषा। तत्पर्यायः
वहुवारः २ पिच्छिलः ३ द्वि
जकुत्सितः ४ शेलुः ५ शीत
फलः ६ शीतः ७ शाकटः ८
कर्बुदारकः ९ भूतद्रुमः १० गु
प्तपुष्पः ११ अस्यगुणाः। कटुत्वं।
हिमत्वं। मधुरत्वं। कषायत्वं।
स्वादुत्वं। पाचनत्वं। कृमिशूल
हरत्वं। आमास्रदोषमलरोध
वहुव्रणार्ति विस्फोट शान्ति
करत्वं। कफकारकत्वंच। इतिरा
जनिर्घण्टः। अस्यामफलगुणाः
विष्टम्भित्वं। रूक्षत्वं। पित्तक
फास्रनाशित्वंच। तत्पक्वफल
गुणाः। मधुरत्वं। स्निग्धत्वं। श्ले

ष्मलत्वं। शीतलत्वं। गुरुत्वंच।
इतिभावप्रकाशः ॥

श्लैष्मिकः त्रि श्लेष्मोद्भवः। श्ले
ष्मसम्बन्धीयः। इति श्लेष्मशब्दा
त्ठिक प्रत्ययेन निष्पन्नः ॥

श्लोक ऋ उ. संघाते। वर्ज्जने।
सर्ज्जने। इति कविकल्पद्रुमः ॥
संघात इह ग्रन्थविशिष्ट वा
क्यरचनं। ऋ अशुश्लोकत्।
उ. श्लोकते कवि इति दुर्गा
दासः ॥

श्लोकः पुं पद्यं। यशः। इत्य
मरः ॥ श्लोकनामकारणं य
था। मा निषाद प्रतिष्ठांत्वम
गमः शाश्वतीः समाः। यत्क्रौ
ञ्चमिथुनादेकमवधीः काममो
हितं। तस्येत्थं ब्रुवतश्चिन्ताव
भूव हृदि वीक्षतः। शोका
र्त्तेनास्य शकुनेः किमिदं व्या
हृतंमया। चिन्तयन्ससहाप्रा
ज्ञश्चकारमतिमान्मतिं। शि
ष्यञ्चैवाब्रवीद्वाक्यमिदंसमुनि
पुंगवः। पादबद्धोऽक्षरसम
तन्त्रीलयसमन्वितः। शोकार्त्त
स्यप्रवृत्तो मे श्लोको भवतुना
न्यथा। इति रामायणे वाल्मी
कीये वालकाण्डे २ सर्गः ॥

श्लोकेन ऋ संघाते। इति कवि
कल्पद्रुमः। ऋ अशुश्लोकत्।
संघातो राशीकरणं ॥ इति
दुर्गादासः ॥

श्वः[स्] व्य अनागताहः। काल्लि
इति भाषा इत्यमरः ॥

श्वःश्रेयसं क्ली कल्याणं। इत्य
मरः ॥ परमात्मा। शर्म्म। इति
मेदिनी। कल्याणयुक्ते त्रि ॥

श्वक इ उ. सर्पे। इतिकविक
ल्पद्रुमः। वकारयुक्तोयं। इ श्व
ङ्कते। उ. श्वकते। सर्पो गतिः
इति दुर्गादासः ॥

श्वगणः पुं कुक्कुरसमूहः। य
था। हारादेर्यत्वषा दिकुर्मोस्मा
तोणिनद्विते परे। श्वापदमेको
त्वा। न तु श्वगणप्रभृतीनां
इति मुग्धवोधव्याकरणटीका
यां दुर्गादासः ॥

श्वच उ. } गतौ। इति कविकल्प
श्वचि इ उ. } द्रुमः। द्वौ वकारयुक्तौ
दौ। पुनःपाठाद्यो नेदत्वं
यः। डि.तो तु द्वौ। एकपवे
तु पाठवलाद्धाध्य इति निय
मात्। उ. श्वचते। इ श्वञ्च
ते। उ. श्वञ्चते। इति दु.
र्गादासः ॥

श्वठक } गतौ ॥ असंस्कृते ॥
श्वठ इक } संस्कृते । इति कवि
कल्पद्रुमः ॥ द्वौ वकारयुक्तौ पु
नः पाठादयो भेदत्रुवेपः ॥
श्यो अर्थौः । श्वठयति । इक
श्वण्ठयति जनः । गच्छति किम
पि संस्करोति वा इत्यर्थः । संस्का
रगतो विति केचित् । इति दु
र्गादासः ॥
श्वठ त् क उद्धांचि । इतिकवि
कल्पद्रुमः । वकारयुक्तः । श्वठ
यति नीचः । कुत्सिते वदतीत्य
र्थः । रमानाथस्तु सम्यग्भाष
णेइति मत्वा श्वठयति सम्यग्व
दतीत्यर्थं इत्याह । सम्यग्भाषा इ
त्यप्येके । इति दुर्गादासः ॥
श्वदंष्ट्रकः पुं गोक्षुरः । इति रा
जनिर्घण्टः ॥
श्वदंष्ट्रा स्त्री गोक्षुरकः । इत्य
मरः ॥
श्वधूर्त्तः पुं शृगालः । इति श
ब्दरत्नावली ॥
श्वनिशं क्ली } शुनां निशा । इ
श्वनिशा स्त्री } त्यमरभरतौ । म
हाकृष्णनिशा । यथा । यस्यां
महानिशि श्वानः श्वानिशं स्वनि
ताच सा । इतिजटाधरः ॥

श्वपक्^च पुं चण्डालः । यथा । नि
षादः श्वपचः श्वपक् इतिभर
तधृत वोपालितः ॥
श्वपचः पुं चण्डालः । इत्यमरः
तस्य संज्ञा अन्त्यावसायी । त
स्य धर्म्मो यथा । चण्डालश्वप
चानान्तु बहिर्ग्रामात् प्रतिश्रयः
अपपात्राश्च कर्त्तव्या धनं येषा
श्वगर्दभं । वासांसि मृतचेलानि
भिन्नभाण्डेषु भोजनं । कार्ष्णायसं
अलङ्कारः परिव्रज्या च नित्य
शः । नैतैः समयमन्विच्छेत् पु
रुषो धर्म्ममाचरन् । व्यवहा
रो मिथस्तेषां विवाहः सदृ
शैःसह ॥ अन्नमेषां पराधीनं
देयं स्यात् भिन्नभाजने । रात्रौ न
विचरेयुस्ते ग्रामेषु नगरेषु च
दिवा चरेयुः कार्य्यार्थं चिह्नि
ता राजशासनैः ॥ अबान्धवं
शवञ्चैव निर्हरेयुरिति स्थितिः
वध्यांश्च हन्युः सततं यथाशा
स्त्रं नृपाज्ञया ॥ वध्यवासां
सि गृह्णीयुः शय्याश्चाभरणा
नि च ॥ चण्डालः श्वपचः क्ष
त्ता सूतो वैदेहकस्तथा ॥ मा
गधायोगवौ चैव सप्तैतेऽन्त्याव
सायिनः ॥ तस्मान्नभक्षणे प्रा

यश्चित्तं यथा । अन्त्यावसायिना
मन्नं मश्नीयाद्यस्तु कामतः ॥
स तु चान्द्रायणं कुर्य्यात् तप्त
कृच्छ्रं मथापि वा ॥
इति प्रायश्चित्ततत्त्वधृताङ्गिरो
वचनं ॥
श्वपाकः पुं चण्डालः । इत्यमरः
तस्योत्पत्तिर्यथा । क्षत्त्रं जात
स्तथोग्रायां श्वपाक इतिकी
र्त्त्यते । इति मानवे १० अध्या
यः ॥ रजस्वलाया स्तत्स्प
र्शने प्रायश्चित्तं यथा । चाण्डा
लेन श्वपाकेन संस्पृष्टा चेद्रज
स्वला । अतिक्रम्य तान्यहानि
प्रायश्चित्तं समाचरेत् ॥
त्रिरात्रमुपवासः स्यात् पंचग
व्येन शुद्ध्यति तानि प्राप्तान्यति
क्रम्य स्वजातिभक्तं कारयेत् ॥
इति वचनान्तर दर्शनात् एतत्
कामतः । अज्ञाने बृहस्पतिः
पतितान्त्य श्वपाकैस्तु संस्पृष्टा
स्त्री रजस्वला । अन्यहानिव्य
तिक्रम्य प्रायश्चित्तं समाचरेत्
प्रथमेऽह्नि त्रिरात्रं तु द्वितीये
द्व्यह माचरेत् ॥ अहोरात्रं तृ
तीयेऽह्नि चतुर्थे नक्तमाचरेत्
चतुर्थेऽह्नीति शुद्धि ॥

स्नानात् एवं । इति प्रायश्चित्त
तत्त्वं ॥
श्वफलः पुं वीजपूरः । इतिर
त्नमाला ॥
श्वफल्कः पुं वृष्णिपुत्रः । स च
अक्रूरपिता । यथा । अनमित्रस्या
न्वये ऽभो वृष्णिः । तस्मात्श्व
फल्कः । तत्प्रभावः कथित ए
व । श्वफल्कस्यान्यः कनीयान्
चित्रकोनाम भ्राता । श्वफल्काद
क्रूरो गान्दिन्यामभवत् । इति वि
ष्णुपुराणे ४ अंशे १४ अध्यायः
श्वभीरुः पुं शृगालः । इति
शब्दमाला ॥
श्वभ्र क विले । गतौ । तेके ।
इति कविकल्पद्रुमः । विलं रन्ध्र
करणं । क श्वभ्रयति आखुं वा
लकः । तेक इति तकि दीक्ष्य
इत्यस्य रूपं श्वभ्रयति दीनः कः
खेन जीवतीत्यर्थः । तेकस्था
ने तेत्र इत्यपपाठः ॥ इति
दुर्गादासः ॥
श्वभ्रं क्ली छिद्रं । इत्यमरः ॥
श्वयथुः पुं शोथः । इत्यमरः ॥
श्वयीची स्त्री पीडा । श्वि यातो
रौणादिक ईचि प्रत्ययेन निष्प
न्ना । इति सिद्धान्तकौमुदी ॥



श्वल वेगे। इतिकविकल्पद्रुमः वकारयुक्तादिः। श्वलति। वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्वल्क क भाषे। इति कविकल्पद्रुमः। वकारयुक्त स्वाल्लयादिर्वे तस्मात्तलीयोपधः। क श्वल्कयति। भाषः कथने। इतिदुर्गादासः॥

श्वल्ल वेगे। इतिकविकल्पद्रुमः। वकारयुक्तादिः लद्वयान्तः श्वल्लति वेगः शीघ्रगतिः। इति दुर्गादासः॥

श्ववृत्तिः स्त्री सेवा। चाकरी इतिभाषा। इत्यमरः। श्वन इव वृत्तिः परपिण्डोपजीवनात्॥ इतिभरतः॥

श्वव्याघ्रः पुं हिंस्रपशुः। यथा स्याद्धूल्लः पुण्डरीकस्त्वद्वीपीचा घ्रमृगादनः। श्वव्याघ्रश्च तरक्षुश्च व्याघ्रश्च श्वापदः समे। इति जटाधरः॥

श्वशुरः पुं पति पत्न्योः पिता। इत्यमरः॥ श्वशुः। इति मेदिनी॥

श्वशुरौ पुं श्वश्रूश्वशुरौ। श्वशुर शाशुडी इतिभाषा। द्विवचनान्तोऽयं। इत्यमरः॥

श्वशुर्य्यः पुं देवरः श्यालः॥ इत्यमरः॥

श्वश्रूः स्त्री पतिपत्न्योः प्रसूः॥ शाशुडी इतिभाषा। इत्यमरः॥ तस्याः स्नुषाभिः सहाविश्वास-कारणं यथा। धर्म्मव्याध उवाच। मया तेऽदुहिता दत्ता पुत्रार्थेव स्ववासिनी। साच त्वद्गर्ह्यया प्रोक्ता दुहिता जन्तुघातिनः। अतोऽस्मीस्यागतोऽहं ते गृहे प्रति समीक्षितं। आचारे देवसज्ञा च प्रतिषीलाश्च तर्पणं॥ एतेषा मेक मप्यत्र कुर्वन्नपि न दृश्यते। तदहं गन्तु मिच्छामि पितॄणां श्राद्धकाम्यया। स्वगृहे नैव भुंजामि पितॄणां कार्य्य मित्युत। अहं व्याधो जीवघाती मन्त्र नलोकहिंसकः॥ मत्सम ता जीवघातस्य यत्पापं तत् सुतेन च। तन्मद्वत्वच्च समा मे प्रायश्चित्तं तपोधन॥ एवमुक्ता सचोन्माय श्वश्रा नारी न द्राघरे। मास्नुषाभिःसमं श्वश्रा विश्वासो भवति कर्हिचित्। साच स्नुषा कदाचित् स्यात् या श्वश्रू जीवती मिषत्। एव मुक्ता गतो व्याधः स्वगृहेप्रति भामिनि

इति वाराहे आदिकृतवृत्तान्तनामाध्यायः॥

श्वश्रूश्वशुरौ पुं श्वश्रुश्वशुरयोः सहोक्तिः। तत्पर्य्यायः श्वशुरौ २ इत्यमरः॥

श्वस च लु प्राणने। इति कविकल्पद्रुमः। वकारयुक्तादिः॥ च लु श्वसिति लोकः जीवती त्यर्थः। आश्वसेद्यु र्निशाचरान् इति भट्टिः। न विश्वसेत् पूर्व्वविरोधितस्येति पंचतंत्रे॥ न विश्वसेदविश्वस्ते विश्वस्तेनाति विश्वसेत्। इत्यादौच गणाकृत सनित्यमिति न्यायात् श्यपः स्थितौ साध्यं। अथ वा क्वादे राकृति गणत्वात् तत्र द्रष्टव्यं। दर्शनतस्तु पचादित्वादनि श्वस इवाचरतीति क्वौ साध्यं। इति दुर्गादासः॥

श्वस लु र स्वप्ने। इति कविकल्पद्रुमः। लु शास्ति। र वैदिकः। इतिदुर्गादासः॥

श्वसनं क्ली श्वसितं। निश्वासः इतिमेदिनी॥

श्वसनः पुं वायुः। मदनवृक्षः। इत्यमरः॥

श्वसनाशनः पुं सर्पः। इति हारावली॥

श्वसनेश्वरः पुं अर्जुनवृक्षः इतिशब्दचन्द्रिका॥

श्वसनोत्सुकः पुं सर्पः। इति शब्दरत्नावली॥

श्वसितं क्ली श्वासः। यथा। श्वासस्तु श्वसितं सोऽन्तर्मुखेऽदुच्छ्वास आहारः। आनो बहिर्मुखस्तु स्यान्निःश्वासः पान एतनः॥ इति हेमचन्द्रः॥

श्वस्तनः पुं ह्यातन्तुहृत्तः। कल्के रदिनेगा इतिभाषा। इति शब्दचन्द्रिका॥

श्वस्तने त्रि भविष्यद्दिनं। इति शब्दमाला। भविष्यत्काले क्ली। इतिराजनिर्घण्टः॥

श्वस्त्यं त्रि श्वोभवकल्यं। इति शब्दमाला॥

श्वा पुं कुक्कुरः। तत्पर्य्यायः। कुक्कुरः श्वा च भषकः शुनको मृगदंशकः। कौलेयको रुतिदेवः सारमेयो रतक्रणः। कुक्कुरो दीर्घसुरतः श्वोनो ग्राममृगोऽपिच। वक्रपुच्छः शृगालुः स्यात् शयनत्काक्यवनप्रपः॥ कौलेयादियोगितः श्वा स्यादलर्को पालर्कोकः। मृगयाकु

शालःस्यात् विषकटुः श्वा
नघे। इतिशब्दरत्नावली॥
श्वागणिकः त्रि श्वगणेनचर
तियः। यथा। श्वगणात् ठञ्च
श्वगणेन चरति श्वागणिकः
श्वागणिकी श्वगणिकः श्वग
णिकी। इतिसिद्धांतकौमुदी।
श्वादंतः पुं कुक्कुरदशनः। इति
सिद्धांतकौमुदी॥
श्वानः पुं कुक्कुरः। इति शब्द
रत्नावली॥
श्वानचिल्लिका स्त्री शुनकचि
ल्ली। इतिराजनिर्घण्टः॥
श्वानी स्त्री कुक्कुरी। इति श
ब्दरत्नावली॥
श्वापदः पुं हिंस्रपशुः। इति
हेमचंद्रः। व्याघ्रः। इति श
ब्दरत्नावली॥
श्वावित् पुं शल्यः। सज्जारुः
श्वाविद् इति भाषा। इत्यमरः
श्वाश्वः पुं भैरवः। कुक्कुरवाह
नत्वात्। इति केचित्॥
श्वासः पुं श्वसिते॥ वायुः
इतिहेमचंद्रः॥ तत्पर्यायः।
श्वासः २ इति राजनिर्घण्टः॥
रोगविशेषः। स तु बलवान्
महापातकजः यथा। उन्माद
श्च तथा दोषो राजयक्ष्माश्मरीत
था। श्वासश्च मधुमेहो ह्यर्बुद
दीपापसंज्ञकाः। इति नारदोक्तं
इति शुद्धितत्वं॥ सचहीनब
ल उपपातकजः। यथा। ज
लोदर यकृत् प्लीह शूलरोग
व्रणानिच। श्वासाजीर्णज्वरच्छ
र्दिभ्रम मोह गलग्रहाः। रक्तार्बुद
विसर्पाद्या उपपापोद्भवा गदाः
इति मलमासतत्वं॥ अथश्वा
साधिकारः। तत्र निदान माह।
यै रेव कारणैर्हिक्का देहिनां सं
प्रवर्त्तते। तैरेव बहुभिः श्वा
सो व्याधि र्घोरः प्रजायते॥
श्वासस्य भेदानाह। महोर्द्ध्व
छिन्न तमक क्षुद्रभेदैस्तुपंच
धा। भिद्यते स महाव्याधिः श्वा
स एकोविशेषतः॥ पूर्वरू
पमाह। प्राग्रूपं तस्यहृत्पी
डा शूल माध्मान मेव च॥ आ
नाहो वक्त्रवैरस्यं शंखनिस्तोद
एवच॥ संप्राप्तिमाह॥ य
दा स्रोतांसि संरुध्यमारुतःक
फपूर्वकः। विष्वग्व्रजति संरु
द्ध स्तदा श्वासं करोतिसः॥
स्रोतांसि प्राणोदकान्नवहानि
कफपूर्वकः कफः पूर्वः॥

प्रधाने यस्यसः। विष्वग्व्रजति
सर्वतोविमार्गगत्वंयाति।संरुद्धः
कफेन रुद्धमार्गः॥ महाश्वा
सस्य लक्षणमाह। उद्धूयमान
वातोयः शब्दवत् दुःखितो न
रः। उच्चैः श्वसिति संरुद्धो मत्तर्ष
भइवानिशं। प्रणष्टज्ञान विज्ञा
नस्तथा विभ्रांत लोचनः। विकृ
ताक्ष्याननो बद्धमूत्रवर्चा विशी
र्णवाक्। दीनः प्रश्वसिते चास्य
दूरात् विज्ञायते भृशं। महा
श्वासोपसृष्टस्तु क्षिप्र मेव वि
पद्यते। उद्धूयमानवातः ऊर्द्ध्वं
नीयमानो वातो यस्यसः। श
ब्दवत् शब्दं यथा स्यात्। कीट
क्ष शब्द स्तद्दर्शयितुमाह। म
त्तर्षभ इव उच्चैः श्वसितीत्यन्वयः
संरुद्धः आनद्धः आनाहयुक्त
इति यावत्। ज्ञानं शास्त्रे। वि
ज्ञानं तदर्थविनिश्चयः विशी
र्णवाक् स्खलितवचनः। दीनः
ग्लानः। मारकश्चायं महाश्वा
सः॥ ऊर्द्ध्वश्वासमाह। ऊर्द्ध्वं श्व
सिति योऽत्यर्थं नच प्रत्याहरत्यधः
श्लेष्मावृत मुखस्रोताः क्रुद्ध
गंधवहार्दितः। ऊर्द्ध्वदृष्टि र्विप
श्यंस्तु विभ्रांताक्ष इतस्ततः।
प्रमुह्यन् वेदनार्त्तश्च शुष्कास्यो
ऽरतिपीडितः। ऊर्द्ध्वश्वासे प्रकुपि
ते ह्यधःश्वासो निरुध्यते॥
मुह्यत स्ताम्यत श्चोर्द्ध्वं श्वास
स्तस्यैव हंत्यसून्। सर्वेषु श्वा
सेषूर्द्ध्वं श्वसते। अत्र अत्यर्थ मि
ति विशेषः। नचप्रत्याहरत्यधः
न श्वास मधः करोति। श्लेष्मा
वृतेत्यादि। श्लेष्मणा आवृते य
स्य मुखस्रोतांसिच तैः क्रुद्धो यो
गंधवह स्तेनार्दितः। विपश्यन्
इत स्ततो विकृत यथा स्यादे
वं पश्यन्। अधःश्वासो निरु
ध्यते श्वासो नाधः प्रवर्त्ततइत्य
र्थः। ऊर्द्ध्वश्वासस्यारिष्टलक्ष
णमाह। मुह्यतो मोहं प्राप्नुव
तः ताम्यतो ग्लानिं प्राप्नुवत
स्तु। ऊर्द्ध्वश्वासो असून् प्राणा
न्हंति। तस्यैवेति न तु मोहग्ला
नि रहितस्य॥ छिन्नश्वासमा
ह। यस्तु श्वसिति विच्छिन्नं स
र्वप्राणेन पीडितः। नचाश्वसि
ति दुःखार्त्तो मर्म्मच्छेदरुजार्दितः
आनाह स्वेद मूर्च्छार्त्तो दह्यमा
नेनबस्तिना। विप्लुताक्षः परि
क्षीणःश्वसन्रक्तैकलोचनः। वि
चेताःपरिशुष्कास्यो विवर्णःप्र

लपज्वरः। छिन्नश्वासेन विच्छि
न्नः स शीघ्रं विजहात्यसून्। वि
च्छिन्नं सविच्छेदं। सर्वप्राणेन या
वद्बलेन। चर्म्मच्छेदरुजार्द्दितः
हृदय शिरश्छेद वेदनयेव पी
डितः। दह्यमानेन वस्तिना उप
लक्षितः। विप्लुताक्षः प्रप्लु
तनेत्रः। विचेताः उद्विग्नचित्तः
छिन्नश्वासेन विच्छिन्नः सः। य
द्दक्ष्यन्तीति विच्छिन्न मित्यादि
लक्षणयुक्तो यः सनरश्छिन्नश्वासे
न विच्छिन्नः पीडितो वोढुमश
क्यः। मारकश्वासे विच्छिन्नश्वा
सः॥ तमकश्वासमाह। प्रति
लोमं यदा वायुः स्रोतांसि
प्रतिपद्यते। ग्रीवां शिरश्च सं
गृह्य श्लेष्माणं समुदीर्य च।
करोति पीनसं तेन कण्ठे घुर्घु
रकं तथा। अतीव तीव्रवेगञ्च
श्वासं प्राणप्रपीडकं। प्रताम्य
ति स वेगेन त्रस्यते सन्निरुध्य
ते। प्रमोहे कासमानश्च स गा
च्छति मुहुर्मुहुः॥ श्लेष्मण्य
मुच्यमाने तु भृशं भवति दुःखि
तः। तस्यैव च विमोक्षान्ते मुहू
र्त्तं लभते सुखं। तथास्योद्ध्वंस
ते कण्ठः कृच्छ्राच्छक्नोति भा-
षितुं। नचापि निद्रां लभते शा
यानः श्वासपीडितः। पार्श्वे त
स्यावगृह्णाति शयानस्य समी
रणः। आसीनो लभते सौख्यमु
ष्णञ्चैवाभिनन्दति। उच्छ्रिताक्षो
ललाटेन स्विद्यता भृशमार्त्ति
मान्। विशुष्कास्यो मुहुः श्वासी
मुहुश्चैवावधम्यते। मेघाम्बु शी
तप्राग्वातैः श्लेष्मलैश्च विवर्द्धते
स याप्यस्तमकः श्वासः साध्यो
वास्यान्नवोत्थितः। सशस्य प्र
या समुदीर्य वर्द्धयित्वा। पीन
सेनास्रावेण तेन श्लेष्मणा घु
र्घुरकं घुर्घुरशब्दं। प्राणप्रपीडकं
प्राणाधिष्ठान हृदय प्रपीडकं
प्रताम्यति तमसि प्रविशतीव
वेगेन श्वासवेगेन। सन्निरुध्यते
निश्चेष्टो भवतीति चक्रः। सन्नि
रुध्यते श्वास इति जेज्जटः॥
श्लेष्मण्यमुच्यमानेन। सुखं
सुखमिव। उद्ध्वंसते ग्रथितो
भवति। शयानः शय्यानिहितो
ऽगः। अवगृह्णाति पीडयति। उ
ष्णञ्चैवाभिनन्दति उष्णेन तम
को वात कफारब्धत्वादिति वोद्धव्यं
उच्छ्रिताक्षः स्थूनाक्षः। ललाटेन
स्विद्यता उपलक्षितः। अवध-

म्यते गात्रादूष्मस्येव सर्वगात्रं
चाल्यते॥ तमकस्यैव पित्ता
नुबन्ध जनित ज्वरादियोगेन
प्रतमक संज्ञामाह। ज्वरमूर्च्छा
परीतस्य विद्यात् प्रतमकं तु तं
उदावर्त्त रजोऽजीर्ण क्लिन्नका
य निरोधतः। तमसा वर्द्धतेऽ
त्यर्थं शीतैश्चाशु प्रशाम्यति।
मज्जतस्तमसी चास्य विद्यात्स
तमकं तु तत्॥ क्षुद्रश्वासमा
ह। रूक्षायासोद्भवः कोष्ठे क्षुद्रो
वात उदीरयन्। क्षुद्रश्वासेन
सोऽत्यर्थं दुःखेनाङ्गप्रबाधकः
हिनस्ति न च गात्राणि न च दुः
खो यथेतरे न च भोजनपाना
नां निरुणद्ध्युचितां गतिं॥
नेन्द्रियाणां व्यथाञ्चापि कांचि
दुत्पादयेद्रुजं। स साध्य उक्तो
बलिनः सर्वे वा व्यक्तलक्षणाः
क्षुद्रः अल्पनिदानलिङ्गः॥ उ
दीरयन् ऊर्द्ध्वं गच्छन्। दुःखः
दुःखप्रदः। सर्वे महाश्वासाद
योपि॥ श्वासानां साध्यत्वादि
कमाह। क्षुद्रः साध्यतम स्ते
षां तमकः कृच्छ्र उच्यते। त्रयः
श्वासा न सिध्यन्ति तमको दुर्ब
लस्य च। कासप्राणहरा रोगा
बहवो न ज्वरादयः। तथा य
था श्वास हिक्के हरतो जीवमा
शु ते। अथ श्वासस्य चिकित्सा
श्वास हिक्कातुरं प्रायः स्निग्धैः
स्वेदैरुपाचरेत्। युक्तैः लवण
तैलाभ्यक्तैस्तस्य ग्रथितः कफः
स्रोतसो विलयमायाति मारु
तश्चानुशाम्यति। स्निग्धं ज्ञात्वा
ततः स्विन्नं भोजयेच्च वसोदनं॥
स्वरसे शृङ्गवेरस्य माक्षिकेन
समन्विते। पाययेत् श्वासका
सघ्नं प्रतिश्याय कफापहं। शृङ्ग
वेरमार्द्रकं। प्रस्थं विभीतका
नामस्थि विना साधयेदजामूत्रे
अथ मवलेहो लीढो मधुसर्पि
तः श्वासकासघ्नः। दशमूलीशटी
रास्ना पिप्पली विश्व पौष्करैः।
शृङ्गी तामलकी भार्गी गुडूचीना
गराग्निभिः। यवागूं विधिना
सिद्धां कषायं वा पिबेन्नरः। श्वा
स हृद्ग्रह पार्श्वार्त्ति हिक्का का
सप्रशान्तये॥ तामलकी भूम्या
मलकी दशमूलस्य वा क्वाथः
पौष्करेणावचूर्णितः। श्वासका
स प्रशमनः पार्श्वशूल विनाश
नः। रम्भाकन्द शिरीषाणां कल्कं
पिप्पलीयुतं। पिप्पलीतण्डुलतोयेन



पीत्वा श्वास मपोहति। शृंगी
महौषध कणा घन पुष्कराणां
चूर्णं शठी मरिचयोश्च सितामि
श्रं। क्वाथेन पीत ममृताहृषपंच
मूल्या श्वासं सुघोरमपि निहंति हि
घोररूपं। पंचमूली तु सामान्या
तु पिबेद्योज्या कनीयसी। मह
ती मारुते देया सैव देया कफे
ऽधिके॥ कूष्माण्डकशिफाचू
र्णं पीतं कोष्णेन वारिणा। प्री
त्रे शमयति श्वासं कासं चापि सुदा
रुणं। हरिद्रां मरिचं द्राक्षां कणां
रास्नां शठीं गुडं। कटुतैलेन लि
हन् हन्यात् श्वासान् प्राणह
रानपि। प्रातः संगृह्य भार्ग्यास्तु
दशमूल्यास्तथापरे। प्रातहरी
तकीनां च पचेत्तोये चतुर्गुणे
पादावशेषे तस्मिंस्तु रसे वस्त्र
निपीडिते। प्रालोड्य च तुलां
दत्वा गुडस्य त्वभयां ततः॥ पु
नः पचेत् मृदग्नौ यावल्लेहत्व
मेति तत्। शीते च मधुनस्त
त्र षट्पलानि विनिक्षिपेत्॥
त्रिकटु त्रिसुगंधं च पलमात्रं
पृथक् पृथक्। यवक्षारं कर्ष
मेकं चूर्णं प्रक्षिपेत्ततः। भक्ष
येदभयामेकां लेहस्यार्द्ध पलं

तथा। श्वासं सुदारुणं हंति का
सं पंचविधं तथा। अर्शांस्यरो
चकं गुल्मं शकृद्भेदं क्षयं त
था। स्वरवर्णप्रदो ह्येष जठरा
ग्नेश्च दीपनः। नाम्ना भार्गीगु
डः ख्यातो भिषग्भिः सकलैर्मतः
भार्गीगुडः॥ रसो गंधो विषं चा
पि टंकणं च मनःशिला। प
तानि कर्षमात्राणि मरिचं चा
ष्टकर्षकं। कटुत्रयं कर्षयुग्मं
पृथक् चाविनिः क्षिपेत्। रसः श्वा
सकुठारोऽयं सर्वश्वासनिवारणः
श्वासकुठारो रसः। इति श्वासा
धिकारः। इति भावप्रकाशः।
अन्यच्च। विभीतकस्य चूर्णं
समधुश्वासनाशनं। पिप्पली
त्रिफलाचूर्णं मधुसैंधवसंयुतं
सर्वरोगज्वरश्वासशोषपीनस
हृद्भवेत्। इति गारुडे १९४
अध्यायः॥ तस्य पुराणोक्तनि
दानं यथा। धन्वंतरिरुवाच॥
अथातः श्वासरोगस्य निदानं
प्रवक्ष्यामहे। कासवृद्ध्या भवेच्छ्वा
सः पूर्वैर्वा दोषकोपनैः॥ आ
मातिसारवमथुविष पाण्डुज्व
रेरपि। रजोधूमानिलैर्मर्मघा
तादपि हिमाम्बुना। क्षुद्रक

तमक छिन्नो महानूर्ध्वश्च पंच
मः। कफोपरुद्धगमनः पवनो वि
ष्वगास्थितः। प्राणोदकान्नवाही
नि दुष्टः स्रोतांसि दूषयन्। उरः
स्थः कुरुते श्वास मामाशयसमु
द्भवं॥ प्राग्रूपं तस्य हृत्पार्श्व
शूलं प्राणविलोमता। आनाहः
शंखभेदश्च तत्रायासोऽतिभोज
नैः॥ प्रेरितः प्रेरयन् क्षुद्रं
स्वयं संशमनं मरुत्। प्रतिलो
मं शिरा गच्छेत् उदीर्य पवनः
कफं। परिगृह्य शिरोग्रीव मुरः
पार्श्वे च पीडयन्। कासं घुर्घुर
कं मोहं मरुचिं पीनसं भृशं। क
रोति तीव्रवेगाश्च श्वासप्राणो
पतापनं। प्रताम्येत्तस्य वेगेन
निष्ठीवांते क्षणं सुखी। कृच्छ्राच्छ
यानः श्वसिति निषण्णः स्वास्थ्य
मिच्छति। उच्छ्रिताक्षो ललाटे
न स्विद्यता भृशमार्तिमान्। वि
शुष्कास्यो मुहुः श्वासः कांक्षत्यु
ष्णं सवेपथुः। मेघांबु शीत प्राग्वा
तैः श्लेष्मलैश्च विवर्द्धते। सयाप्य
स्तमकः साध्यो नरो वा बलिनो
भवेत्। ज्वर मूर्च्छापरीतस्य प्रीतैः
प्राम्येत् प्रतमकस्तु सः॥ शि
ला श्वासित विच्छिन्न मर्मच्छेद

रुजार्दितः। सस्वेदमूर्च्छः साना
हो बस्तिदाहविरोधवान्। अ
धोदृष्टिः सुतांतस्तु मुह्यत्रैक
लोचनः। शुष्कास्यः प्रलपन्
दीनो नष्टच्छायो विचेतनः। म
हता महता दीनो नादेन श्वसि
ति ध्रुवन्। उद्धूयमानः संर
ब्धो मत्तर्षभ इवानिशं। प्रनष्टज्ञा
न विज्ञानो विभ्रांतनयनाननः
अंते समाक्षिप्तबद्धमूत्रवर्चा
विशीर्णवाक्। शुष्ककण्ठो मु
हुर्मुहुः कर्णशंखशिरोतिरुक्
योदीर्घमुच्छ्वस्यूर्द्ध्वं न च प्रत्या
हरत्यधः। श्लेष्मावृतमुखस्रो
तः क्रुद्धगंधवहार्दितः। ऊर्द्ध्वदृ
ष्टिर्विलोकेत महिष्णी पवितः
सिपन्। मर्मसु छिद्यमानेषु प
रिदेवी निरुद्धवाक्। एते सिद्धे
श्वास मुक्ता व्यक्ताः प्राणहरा ध्रु
वं। इति गारुडे श्वासरोगनिदा
ने १५५ अध्यायः॥ अथ श्वा
सरोगस्य कर्मविपाकः। श्वास
रोगो महानुग्रो देहि देहाभि
तापकः। कर्मणा येन भवति
तन्मे निगदतः शृणु। महेन्द्रे
छिन्न तमक क्षुद्रा भेदोऽस्य
पंचधा। श्वासः संजायते नृणां

पृथक् कर्म्मानुसारतः। यस्तु
यज्ञेसमासाद्य पशुश्वासे निह
न्यच। हंतिवादेतिवातेचमहा
श्वासेनगृह्यते।१। पौराणिक-
कथामध्ये यस्तु वाचामथाव
देत्। सकृद्धश्वास मासाद्यह्नो
त्यहर्ह्नर्निशं २ निषिद्धादानग्र
हणात्छिद्रश्वासेन गृह्यते ३
मर्म्मश्वासाद्य निर्गीतवाक्ययो
हृदयस्यापि। पीड्यतेतमकश्वा-
सैःद्वंद्वैःपाकस्य विज्ञतः।४।५
परत्र कर्मतो देही नरकेषुवि
पच्यते। नरकान्तेपनर्योस्त्रियो
निं शूकर वायसी। पृथक्
कर्मवशाद्योनौ गत्वासंप्राप्य
नश्यते। मानुषत्वमनुप्राप्य पू
र्वोक्तेनोपगृह्यते। श्रुत्वा तुग्र
हं कदने श्वासरोग समुद्भवे।
प्रणम्य भरतःश्रीमान् भृगुं वाच
मुवाचह। राजोवाच। श्वास-
कर्म्म त्वयं येन दानेन नियमे
नच। कृतेन मुक्तो भवतितन्मे
वदप्रसादतः। भृगुरुवाच। ह्र
वर्ण्णी कारयेन्मूर्त्तिं भुक्त्वा वरुण
वातयोः। ताम्रपात्रोपरिस्था-
प्य तस्यावे फलसोपरि। राज
तंकारयेत्सार्थं ध्वजस्तैव-।

पलद्वयो। वामदक्षिणतो मूर्त्ते
र्भूपाश्चा गंधदीपकैः। वायोर्ध्व
जसमायुक्तां गंध माल्य परिष्कृ
तां॥ वरुणस्यापसव्येतु कुर्य्या
द्वायोः प्रपूजने। न च श्वासवि
नाकाम स्तिछुवसः कामतोपि-
वा॥ तस्मात् पूज्याविमौस
म्यक् वायु वरुणावुभौ॥ वारु
णंकारयेद्धोमं वरुणस्येतिमं
त्रतः॥ घृत होदू तिलयवैःस
हस्रं वाल्पशक्तितः। वायोस्ति
लयवैः कार्य्यो मनोवातेति मंत्र
तः। सादरं ब्राह्मणं पूज्य वस्त्र
माल्यानुलेपनादिभिः। कर्मोपश
म वाक्येन ब्राह्मणाय निवेदये
त्। सदक्षिणांच तन्मूर्त्तिं दत्वा
गाथां पठेन्नरः। ॐनमः पाशभृ
ते तुभ्यं भुजाधिपतये नमः॥ ज
लाधिपतये तुभ्यं वायो सर्व
जनप्रिय। शुचये दीयते दानं
ध्वजपाशेन तु राजतः। श्वास
कासौ हरेयातां प्रीतौ सर्वज
नप्रियौ। पूर्वजन्म विपाकोत्थौ
श्वासकासौच दारुणौ॥ वाहि
शरणंप्रपद्यामि मुक्तोहं त्वत्
प्रसादतः। सादरं माधवं नत्वा
दिदेवान् भास्करंप्रिवं ब्रह्मा

त्मंरुकृतं विप्रे पुनर्भोनुमुदीर
येत्। अतःपरंप्रकुर्वीत यदासो
तुतउर्ध्वहो। श्वासकासोज्वर
व्याधी दाने तस्योपशांतये। प
श्चात्तोज्ञेव श्वासे कुर्य्याद्ग्रे
स्तुतर्पणं। ॐप्रग्ने मीढ्वे ति-
मंत्रेण हार्ग दद्यात् सदक्षि
णं। कथाविद्योज्ञेवे योगकु
र्य्यात् सारस्वतेतम्प। दक्षिणा
ं सरजतं सारस्वतं निवेदये
त्। निषिद्धदान ग्रहणोपगोद्
नेव समाचरेत्। इच्छाहारेण
संतर्प्य द्विजश्चापि प्रजापतिं।
होमेनानेन दानेन मुक्तोभव
ति कर्मतः॥ सादरं माध
वेनत्वा संतर्प्य द्विजपुंगवान्
स्नात्वा कलशतोयेन मुक्तो
भवति मानुषः॥ इति भृगुभ
रतोक्त श्वासकासकर्मविपा
कः॥ अपिच। पिशुनो न
रकस्यान्ते जायते श्वासकास
वान्। घृतं तेन प्रदातव्यं सह
स्रपलसम्मितं। इति शातात
पीय कर्म्मविपाकः॥ श्वा
सकासः पुं श्वासयुक्तकास
रोगः॥ श्वासजनककासः। य
था। कास वृद्धाभवेच्छ्वासः पूर्वो

वा दोषकोपनैः। इति माह
दे १५५ अध्यायः॥ अन्यत्तच्छा
सशब्दे द्रष्टव्यं॥
श्वासकुठारः पुं श्वासरोगस्य-
औषधविशेषः। यथा रसो ग
न्धो विषञ्चापि टंकणञ्च मनः
शिला। एतानि कर्षमात्राणि म
रिचञ्चाष्टकर्षकं। कटुत्रयं कर्ष
युग्मं पृथगत्र विनिःक्षिपेत्।
रसः श्वासकुठारोऽयं सर्वश्वास
निवारणः। इति भावप्रकाशः॥
श्वासप्रश्वासधारणं क्ली प्राणा-
यामः। इति हेमचन्द्रः॥
श्वासहेतिः स्त्री निद्रा। इति-
हेमचन्द्रः॥
श्वासारिः पुं पुष्करमूलं। इति
राजनिर्घण्टः॥
श्वासी[न] पुं वायुः। इति शब्दर-
त्नावली॥ श्वासयुक्ते त्रि॥
श्वि टु पे ऊ इर गतिवृद्ध्योः।
इति कविकल्पद्रुमः॥ तालव्या
दिः। टु अथथुः। पे भूयात्।
ऊ श्वयिता। इर अश्वत् अश्वयीत्
इति दुर्गादासः॥
श्वित ल ऊ आ पोत्स्य। इति
कविकल्पद्रुमः। वेकाराद्युक्तः।
ल अश्वितत्। आश्वितेन श्वितं

उ॰ श्वेतले प्रासादः ॥ इति उ॰
णादासः ॥
श्वित्रं क्ली श्वेतकुष्ठे । तत्प-
र्य्यायः। कुष्ठे २ इत्यमरः ॥
श्वेते ३ श्वैत्रे ४ इति तट्टीका॥
पृथक्त्वश्रुति सामान्यात् कुष्ठभेद
त्वाच्चात्रैव श्वित्र माह । कुष्ठैक
सम्भवं श्वित्रं किलासं चारुणं
भवेत्। निर्द्दिष्टमपरिस्रावि वि-
धात्वुद्भवसंश्रयं। कुष्ठैकस
म्भवेत्कुष्ठेन सह एकस्मिन्नस
म्भवो निदानं यस्य तत्। श्वित्रस्य
भेदानाह। किलासं चारुणंम
वेत्। श्वित्र मेव रक्तमांसाश्रया
त् किलासमरुणं भवेदित्य
न्वयः। ननु कुष्ठस्य श्वित्रस्य
को भेदः इत्यत आह। निर्द्दिष्ट
मपरिस्रावीति। श्वित्र मपरि-
स्रावि भवति कुष्ठं तु स्रावि त्रि
धात्विति धातूद्भवसंश्रयमिति त्र
यो धातवो वात पित्त कफास्ते
भ्यः पृथग्भूतेभ्य उद्भवो यस्य-
तत्। अपरञ्च त्रयो धातवो रक्त
मांस मेदांसि संश्रयो यस्या
तं यस्य तत्। कुष्ठं सान्निपाति
कं सर्वधात्वाश्रयं तच्च भवति।
इति भेदः ॥ दोषभेदेन ।

लक्षण भेदमाह वातादुक्तारु
णं पित्तात्ताम्रं कमलपत्रवत्।
सदाहं रोम विध्वंसि कफाच्छ्वेतं
घनं गुरु। सकण्डुकं क्रमाद्रक्तं
मांस मेदःसु चादिशेत्। वर्णे
नैवेदमुभयं कृच्छ्रं तच्चोत्तरोत्तरं
आरुणमीषल्लोहितं। कम-
लपत्रवदित्यनेन मध्ये श्वेतम
न्ते लोहितं बोधयति। घनेप
ष्टं क्रमाद्रक्तं मांसं मेदःसु चा
दिशेत्। तथाच चरकः। अरु
णं रक्तं वाते ताम्रं पित्ते प
लेष्माते। श्वेतं श्लेष्मणो मेदःस्थ
श्वित्रं कुष्ठपरंपरं इति। उभ-
ये द्विविधमपि श्वित्रं वर्णानई
द्वेगाब्ध अरुणताम्र श्वेतञ्च दोष
भेदात्। द्विविधं दोषजं व्रण
जंच। तथाच भोजः। श्वित्रंच
द्विविधं विद्याद्दोषजं व्रणजं
तथेति ॥ श्वित्रं साध्य मसाध्य
माह अशुक्ल रोमावहल म
संसृष्ट मिथो नवं। अनग्निद
ग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्य
था ॥ अवहलं ननु। अन्यच्च ॥
गुह्य पाणितलौष्ठेषु जातम
प्यचिरं तनं। वर्जनीयं विशेषेण
किलासं सिद्धि मिच्छता। गुह्य

मेहनं भगंच। तल मत्र पादत-
लं। सुश्रुतेनांते जात सितिसा
मान्यतो निर्द्दिष्टत्वात् ॥ अथ
श्वित्रस्य चिकित्सा। विभीत
कत्वक् मलयू जटानां क्वाथेन
कृत्वा गुडसंयुतेन। अवल्गुजं
बीज मपाकरोति श्वित्राणि कृ
च्छ्राण्यपि पुण्डरीके। मलयूः क
वरी। अवल्गुजः वकुची। कुड
वावल्गुजबीजं हरितालं तच्च
तुर्थांशं। मनःशिला तालका
द्वीगुञ्जाफलमग्निमूलंच। मूत्रे
ण गवां पिष्टं सवर्णताकारकं
श्वित्रस्य। २। श्वित्रकुष्ठे व्रजत्यस्त
पत्राह्वेलाधिकेनवा। गिरिक
र्ण्याः सितायाश्च मूलेन परिलेपि
ते। गिरिकर्णीनीलापराजिता।
धन्वन्तरीतिलोके ३ क्वाथःस
बाकुचीचूर्णं धात्री खदिरसार
योः। शंखेन्दु कुन्दधवलं श्वित्रं से
वितो हन्ति ४ मथितेन पिबे
च्चूर्णं काकोडुम्बरवल्गुजं। तैला
क्तं चर्म्मसेवी स्यात्तक्राशी श्वि
त्रहृद्भवेत्। मथितं निर्जलं वि
लोडितं दधि। तक्रं चतुर्थांशज
लयुक्तं वस्त्रपूतं दधि।५।खदिर
सप्तपलान्यष्टौ सोमराज्याः प

लद्वयं। त्रिफला पिचुमर्द्दश्च दा
रुदार्व्यश्च पर्पटः। पृथक् पला
न्समुद्धृत्य सिंहिकायाः पलद्व
यं। जलाढकद्वये साध्यं याव
त् पादावशेषितं। क्वाथ्यमानंच
सद्वैश्यो घृतप्रस्थं विपाचयेत्।
चतुःपलं सोमराज्याः खदिरस्य
पलं तथा। पटोलमूलं त्रिफ
ला त्रायमाणा दुरालभा। का
र्षिकं कटुकं चापि कार्षिकान्
सूक्ष्मपेषितान्। पलद्वयं कौपि
कुस्तुम्बुरुस्यात्र प्रदापयेत्। सि
द्धं सर्पिर्विदं श्वित्रं हन्त्यदंत इवान
लं। अष्टादशानां कुष्ठानां परमं
वै तदौषधं सोमराजीघृतं ना
मनिर्म्मितं ब्रह्मणा पुरा ॥ लोका
नामुपकाराय श्वित्रकुष्ठादिरो
गिणां। इति सोमराजीघृतं।
६। महौषधं महामेदा निम्बप
त्राणि सर्षपाः। मनःशिलाच
सिंहरं पद्म चारिणवल्गुजं ॥
हरिद्रे हरितालंच त्रिफलापीत
गन्धकान्। एतानि समभागा
नि विषार्द्धांशानि योजयेत्। स
र्पिषश्च पलान्यष्टौ देवदारुवृक्षे
शुभे। द्विगुणं त्रिगुणं क्षीरंगो
मूत्रञ्च चतुर्गुणं। ताम्रपात्रेतु

संस्थाप्य शाने र्मृद्वग्निना पचेत्
चतुर्भागावशेषे तु सकल्कमव
भावयेत् । अग्नौ विपचेत् निःशे
षं जलमुक्तं विचक्षणाः । अभ्यं
पाने योगमात्रं दाप्य सर्वान् गदा
न् जयेत् । अष्टादशानां कुष्ठानां
हद्रुणां श्वित्रिणां तथा । दुष्टना
डीषु मर्म्माणां स्राविणां कीटि
नां तथा । अस्य कल्कस्य परीतापे
ये च स्वल्पभिषक्क्रियाः । सर्वेश
रुपक्रान्तां प्रीतिंगतानां विशे
षतः । सर्वधातुगते कुष्ठे पतित
नु शिरोरुहे । चर्च्चरात्मके चो
षाणां तथा सर्वाणवातिनां ।
पाने ऽभ्यङ्गे तथा नस्ये वस्ति
कर्म्मणि नित्यशः । सप्तरात्र प्र
योगेण सर्वकुष्ठानि नाशयेत्
द्विसप्ताहप्रयोगेण हर्षिवर
निभाननः । जातकेशो नखश्च
श्रुश्रीति षोडशवर्षवत् । अनेन
सहितं साक्षात् सर्वामयविना
शनः । पतद्धृतं महाश्रेष्ठं भार्ग
वेणावतारितं ॥ मनुष्याणां हि
तार्थाय सर्वव्याधिहरं परं । म
हापाकोऽप्येकमिदं घृतं सर्वाम
यापहं २ ॥ इति भावप्रकाशः
श्वित्र । यात्री खदिर ॥

योऽक्षाद्यं पीत्वा च जेतु संयुतं ।
शंखेंदु धवलं श्वित्रं हंतितूर्ण
नसंशयः । इति गारुडे १७५ ।
अध्यायः ॥
श्वित्रघ्नी स्त्री पीतपर्णी । विष्णु
टी इति भाषा । इति शब्दचंद्रिका
श्वित्री त्रि श्वित्ररोगयुक्तः । य
था । श्वित्री वस्यापरसंतचीरील
वृत्ताहारकः । इति मिताक्षरा ॥
श्विद इ ऊ श्वैत्ये । इति कवि
कल्पद्रुमः । वकारयुक्तः । इ श्वि
न्दते । ऊ श्विन्दते पुण्डरीकं ।
इति दुर्गादासः ॥
श्वेतं क्ली रूप्यं । इत्यमरः ॥
श्वेतः पु शुक्लवर्णः । द्वीपवि
शेषः । सर्वतोभद्रः । इति मेदिनी
कपर्द्दकः । इति हेमचंद्रः ॥
शुक्रग्रहः । श्वेताभ्रः । इति श
ब्दरत्नावली ॥ शंखः । इति रा
जनिर्घण्टः । जीवकः ॥ इति
जटाधरः ॥ शिवावतारविशे
षः । यथा । वेदव्यासावताराणि
द्वापरे कथितानि तु । महादेवा
वताराणि कलौ शृणुत सुव्रताः
आद्ये कलियुगे श्वेतो देवदेवो
महाद्युतिः ॥ नाम्ना हिताय
विप्राणामभूद्वैवस्वतेऽन्तरे ॥

हिमवच्छिखरे रम्ये छगले प
र्वतोत्तमे । तस्य शिष्याः शिखा
युक्ता बभूवुरमितप्रभाः । श्वेतः
श्वेतशिख श्चैव श्वेतास्यः श्वेत
लोहितः । चत्वारस्ते महात्मा
नो ब्राह्मणा वेदपारगाः ॥
सुभावो दमनश्चाथ सुहोत्रः कं
कणस्तथा । लोकाक्षिरथयो
गीन्द्रो जैगीषव्यस्तु सप्तमे ॥
अष्टमे दधिवाहः स्यान्नवमे ऋ
षभः प्रभुः । भृगुस्तु दशमे प्रो
क्तस्तस्मादुग्रः परः स्मृतः । द्वाद
शेऽत्रिः समाख्यातो वालीचाथ
त्रयोदशे । चतुर्दशे गौतमस्तु
वेदशीर्षा ततः परं । गोकर्ण
श्चाभवत्तस्माद्गुहावासः शिख
ण्डघृक् । जटामाल्यट्टहासश्च दा
रुको लांगली क्रमात् । श्वेत
स्तथापरः शूली डिण्डी मुण्डी
चैव क्रमात् । सहिष्णुः सोमश
र्म्मा च नकुलीशोऽन्तिमे प्रभुः
वैवस्वतेऽन्तरे शम्भोरवतारा
स्त्रिशूलिनः । अष्टाविंशति
राख्याता ह्यन्ते कलियुगे प्र
भोः ॥ इति कौर्म्मे ५० अध्या
यः ॥ श्वेतपर्वतस्य परिमा
णादि यथा । उत्तरोत्तरे ।

णेलावृते नीलः श्वेतः शृंगवा
निति त्रयो रम्यक हिरण्मय कु
रूणां मर्य्यादागिरयः प्रागाय
ताः उभयतः क्षारोदावधयो द्वि
सहस्रयोजन पृथव एकैकशः
पूर्वस्मात् पूर्वस्मादुत्तरोत्तरो द
शांशाधिकांशेन दैर्घ्य एव ह्र
सन्ति । एवं दक्षिणेनेलावृते
निषधो हेमकूटो हिमालय
इति प्रागायता यथा नील
दयः । अयुतयोजनोत्सेधा हरि
वर्ष किंपुरुष भारतानां यथा
संख्यं । इति श्रीभागवते ५
स्कंधे १६ अध्यायः ॥ राजवि
शेषः । यथा । ब्रह्मोवाच ।
श्वेताभिजनसंपन्नः सत्यवागन
सूयकः । तपाधीते कृते दत्ते
गुरवः परितोषिताः । न तेदत्तं
द्विजेभ्योऽन्नं कदाचिद्विभृति
ते । तस्मात्त्रीव्रहमेत्संज्ञाता क्षु
धा ते नृपसत्तम ॥ अन्नदा
नाद्दते पुंसां नस्याद्भिर्महो
तले । स्वर्गेवापि तथानाद
अन्नदानं ततोऽधिकं ॥
इति वह्निपुराणे अन्नदानना
माध्यायः ॥
श्वेतः त्रि शुक्लवर्णयुक्तः । अस्य

मरः ॥ श्वेतवस्तूनि यथा ॥
अथ श्वेतानि । सुपर्णाशुभ्रोच्चैःश्र-
वः शंख कीर्ति ज्योत्स्नापार-
दुग्धाः । प्रासाद सौध नगर म
ल्लवद्ध हिमाद्रयः । सूर्येन्दु
कान्तकर्पूर कर्णभारजते हली
हिमीक भस्म हिण्डीर चंदनं
कारका हिमं । हारोराला भत
न्वत्थि स्वर्गगेभरदाभ्रकं । शे
षाहिः शर्करा रूप्यं दधि गंगा
सुधाजलं । मृणाल सिकता हं
सबक कैरव चामरं । रंभागर्भ
पुण्डरीक केतकीशंख निर्झ
राः । लोध्र सिंह ध्वज कूर्च स्
ल सत्कि कपर्दकाः । मुक्ता कु
सुमनखदंतपुण्याश्वोकृगणाः
कैलाशकाशकार्पाससहासबा-
सव कुंजराः । नारदः पारदः कुं
दवेदिका स्फाटिकादयः ॥ इति
कविकल्पलतायां द्वितीये स्त
बकेवर्णनाम द्वितीयं कु
सुमं । श्वेतकं क्ली रूप्यं । इति रा
जनिर्घण्टः ॥
श्वेतकः पुं वराटकः । इति
शब्दप्रयोगः ॥
श्वेतकण्टकारी स्त्री शुक्लकण्ट
कारिका । श्वेतरेगनी । इति

हिंदीभाषा । तत्पर्यायः । सि
तकण्टकारिका २ श्वेता ३ श्वे
तबृहती ४ लक्ष्मणा ५ सितसिंही
६ सितक्षुद्रा ७ क्षुद्रवार्त्ताकिनी
८ सिता ९ सिंहिका १० कटुवार्त्ता
की ११ क्षेत्रजा १२ कपटेश्वरी १३
निःस्नेहफला १४ वामा १५ सित
कण्टा १६ महौषधी १७ गर्दभी
१८ चन्द्रिका १९ चंद्री २० चंद्रपु
ष्पा २१ प्रियंकरी २२ नाकुली
२३ दुर्लभा २४ रास्ना २५ । अस्या
गुणाः । रुच्यत्वं । कटुत्वं । उ
ष्णत्वं । कफ वातनाशित्वं । च
क्षुष्यत्वं । दीपनत्वं । रसनियाम
कत्वञ्च । इति राजनिर्घण्टः ॥
अन्यच्च श्वेता क्षुद्रा चन्द्रहासा
लक्ष्मणा क्षेत्रदूतिका । गर्दभा
चन्द्रभा चान्द्री चन्द्रपुष्पा प्रियंक
री । कण्टकारी सरा तिक्ता क
टुका दीपनी लघुः । रूक्षोष्णा
पाचनी कास श्वास ज्वर कफा
निलान् । निहन्ति पीनसं पार्श्व
पीडा कृमि हृदामयान् । तयोः
फले कटुरसं पाकेच कटुकं
भवेत् । शुक्रस्य रेचनं भेदि ति
क्ता पित्ताग्निकृल्लघुः । हन्यात्
कफ मरुत् कण्डू कास मेदः कृमि

ज्वरान् । तद्वत् प्रोक्ता सिता
क्षुद्रा विशेषाद्गर्भकारिणी ।
इति भावप्रकाशः ॥
श्वेतकन्दा स्त्री अतिविषा । इ
ति राजनिर्घण्टः ॥
श्वेतकिणिही स्त्री वृक्षविशेषः
तत्पर्यायः । सिताभिकटभी २
गिरिकर्णिका ३ शिरीषपत्री
४ कालिंदी ५ प्रतामरा ६ विष
घ्निका ७ महाश्वेता ८ महाश्वे
ण्डी ९ महादिकटभी १० अ
स्या गुणाः । कटुत्वं । उष्णत्वं । गु
ल्मविषाध्मान शूलदोषनाशि
त्वं । वात कफ जीर्णरोगशमन
त्वंच । श्वेता च तत्र गुणाद्युक्ता । इ
ति राजनिर्घण्टः । अस्य कंतद्वे-
सिताभिकटभी स्थाने सितालि
कटभी । महादिकटभी स्थाने म
हालिकटभी इति च पाठः ॥
श्वेतकुञ्जरः पुं ऐरावतहस्ती ॥
इति शब्दरत्नावली । शुक्लराज
श्च श्वेतकुशः पुं तृणविशेषः
तत्पर्यायः । सितदर्भः २ कु
शकुशः ३ पूतः ४ यज्ञीयपवकः
५ वज्रः ६ ब्रह्मपवित्रः ७ तीक्ष्णः
८ यज्ञभूषणः ९ सूचीमुखः १० पु
ण्यतृणः ११ बर्हिः १२ हृततृणः १३

अस्य मूलगुणाः । हिमत्वं । क
षायत्वं । मधुरत्वं पित्त रक्त ज्वर
तृषा श्वास कामलादोषनाशि
त्वञ्च । इति राजनिर्घण्टः ॥
श्वेतकेतुः पुं बुद्धः । इति त्रि
काण्डशेषः । केतुग्रहविशेषः
यथा । केतवो यत्र दृश्यन्ते वा
रुणा स्तथ पवने । ऊर्मिके
तुः श्वेतकेतु धूमकेतु स्तुती
यकः । श्वेतकेतु र्यदा दृश्ये
त् श्वेतास्थि कुरुते मही । त
दा मानुषमांसानि भक्षयन्ती
ह मानवाः ॥ चक्ररूपांत जगत्
कृत्स्नं चक्रवद्भ्रमते तदा ॥
अपि च । श्वेतः शाखाकुलं कुर्या
त् लोहितस्त्वग्निजं भयं । ध्व
जरूपे पीतकः कुर्यात् क्षोभो
ग मयोत्थवर्णं । अन्यच्च । श्वे
तौ शुक्रवर्णपं यावहन्यात्
धापरान् देशान् क्वचित् क्वचि
द्रोगादुर्भिक्षैः परिपीडितान् ॥
श्वेतापस्त्म जटाकारी श्या
मो व्योमत्रिभागगः । निवर्त्तते
पसव्येन त्रिभागीकुरुते प्रजाः
इति समयामृतं ॥
श्वेतकेशः पुं रक्तशिग्रुः । इ
ति जटाधरः । शुक्लकेचश्च ॥

श्वेतकोलः पुं शफरमत्स्यः
इति त्रिकाण्डशेषः ॥
श्वेतखदिरः पुं शुक्लखदिरः
तत्पर्य्यायः। कदरः २ श्वेतसारः
३ कार्म्मुकः ४ कुब्जकण्टकः
५ सोमसारः ६ सोमवृक्षः ७ सो
मवल्कः ८ पथिद्रुमः ९ अस्य
गुणाः। तिक्तत्वं। कषायत्वं।
कटुत्वं। उष्णत्वं। कण्डूति भूत
कुष्ठ कफ वात व्रणनाशित्वं
च। इति राजनिर्घण्टः। पुस्त
कान्तरे कार्म्मुकस्थाने कामुकः
कुब्जकण्टकस्थाने कुष्ठकण्टक
इति च पाठः ॥ अन्यच्च। खदि
रः श्वेतसारोऽन्यः कदरः सोम
वल्कलः। कदरो विशदो व
र्ण्यो मुखरोग कफास्रजित्
इति भावप्रकाशः ॥
श्वेतगजः पुं इन्द्रहस्ती। इति
हेमचन्द्रः। शुक्लवर्णहस्ती च
श्वेतगरुतः पुं हंसः ॥ इत्य
मरः ॥
श्वेतगुञ्जा स्त्री शुक्लगुञ्जा। सा
दाकुँच इति भाषा। तत्पर्य्यायः
श्वेतकाम्बोजी २ भृण्टिका ३
काकादनी ४ काकपीलुः ५ च
कृष्णला ६ चूडाला ७ अस्या
गुणाः। तिक्तत्वं। उष्णत्वं। त
स्या बीजं वान्तिकरं। तस्याः शि
फामूलं विषनाशिनी। तस्याः
पत्रं वशे प्रशस्तं। इति राजनिर्घ
ण्टः। अपिच। श्वेता रक्तोच्चटा
प्रोक्ता कृष्णला चापि सा स्मृता
रक्ता सा काकचिंची स्यात्का
कणन्ती च रक्तिका॥ काकादनी
काकपीलुः सा स्मृता गारव
लरी। गुंजाद्वयं तु केश्यं स्यात्
वातपित्तज्वरापहं। मुखशोष
भ्रमश्वास तृष्णा मद विनाशनं
नेत्रामयहरं वृष्यं बल्यं कण्डू
व्रणं हरेत्। कृमीन्द्रलुप्त कुष्ठा
नि रक्ता च धवलापि च। इति
भावप्रकाशः। अन्यच्च। गुञ्जा
शिखण्डिका ताम्रा रक्तिका का
कणन्तिका। श्वेतान्या चक्रि
काचूडा उच्चटा काकपीलुका
गुञ्जा केश्या बलकरा रुच्या पि
त्तकफापहा नेत्रामयहरा वृ
ष्या हन्ति कण्डू ग्रह व्रणान्। कृ
मीन्द्रलुप्त कुष्ठानि तद्वच्छ्वेतापि
शस्यते। इति मदनपालनिर्घण्टः
श्वेतचन्दनं क्ली शुक्लचन्दनं। इति
राजनिर्घण्टः॥ अस्य पर्य्यायगु
णाश्चन्दनशब्दे द्रष्टव्याः ॥

श्वेतचिल्ली स्त्री शाकभेदः। त
त्पर्य्यायः। वास्तुकी २ सुपर्णा
३ श्वेतचिल्लिका ४ सितचिल्ली
५ उपचिल्ली ६ ज्वरघ्नी ७ क्षुद्र
वास्तुकी ८ अस्या गुणाः श्वेतचि
ल्ली सुमधुरा क्षारा च शिशिरा
च सा। त्रिदोष शमनी पथ्याक्ष
द्दोषविनाशिनी। इति राजनिर्घ
ण्टः। श्वेतच्छदः पुं हंसः। इति
हलायुधः। गन्धपत्रः। बाबुइतुल
सी इति भाषा। इति शब्दचन्द्रिका
श्वेतजीरकः पुं गौरजीरकः॥
इति राजनिर्घण्टः ॥
श्वेतटंककं क्ली श्वेतटंकणं
इति राजनिर्घण्टः ॥
श्वेतटंकणं क्ली क्षारविशेषः
सादासोहागा इति भाषा। तत्
पर्य्यायः। श्वेतटंककं २ लोहि
३ सिन्धुकरं ४ सिन्धु ५ माल
तीतीरसम्भवं ६ शिवं ७ द्रावक
रं ८ पीतक्षारं ९ टंकणं १० अ
स्य गुणाः। स्निग्धत्वं। कटुत्वं।
उष्णत्वं। कफ वातामय श्वा
स विषकास मल नाशित्वं च
इति राजनिर्घण्टः ॥
श्वेतदूर्वा स्त्री शुक्लदूर्वा। तत्
पर्य्यायः। गोलोमी २ सिता-
ख्या ३ चण्डा ४ भद्रा ५ भार्गवी
६ दुर्म्मरा ७ गौरी ८ विघ्नेशका
न्ता ९ अनन्ता १० श्वेता ११
दिव्या १२ श्वेतकाण्डा १३ प्रच
ण्डा १४ सहस्रवीर्य्या १५ सह
स्रकाण्डा १६ सहस्रपर्व्वा १७ सुर
वल्लभा १८ शुभा १९ सुपर्व्वा २०
सितच्छदा २१ स्वच्छा २२ कच्छ
रुहा २३ अस्या गुणाः। अति
शिशिरत्वं। मधुरत्वं। वान्तिपित्ता
तिसारकासदाहतृष्णानाशि
त्वं रुच्यत्वं च। इति राजनिर्घण्टः
श्वेतद्विपः पुं इन्द्रहस्ती। इति
त्रिकाण्डशेषः॥ शुक्लगजश्च।
श्वेतद्वीपः पुं चन्द्रद्वीपः। स च
वैकुण्ठाख्यविष्णुधाम। यथा। श्वे
तद्वीपं गतवति त्वयि द्रष्टुं त
दीश्वरं। तत्र हाय मभूत्प्रश्न
स्त्वं संशयमनुपृच्छसि। इति
श्रीभागवते १० स्कन्धे ८७ अध्या
यः॥ अपिच। एकदा ब्रह्मणो
लोकाद्यायान्तं नारदं मुनिं।
पर्य्यटन्नारदो लोकान्दृष्ट्वान
त्वाब्रवीद्वचः। भगवन् ब्रूहि मे
ह्यत्र सन्ति महाबलाः। यो
द्धुमिच्छामि बलिभिस्त्वं जानासि
जगत्त्रये। इति श्रुत्वा तु सुवि

रं श्वेतद्वीपनिवासिनः। महा
बला महाकाया स्तत्र यान्ति म
हामते। विष्णुपूजारता ये वै वि
ष्णुना निहताश्च ये। त एव तत्र
संजाता ग्रजेयाश्च सुरासुरैः
श्रुत्वा तद्रावणो वेगान्मंत्रिभिः
पुष्पकेण तान् योद्धुकामः
समायात श्वेतद्वीपसमीपतः
तत्प्रभाहततेजस्कं पुष्पकं ता
च्चलितं ततः। त्यक्त्वा विमानं
प्रययौ मंत्रिणश्च दशाननः।
प्रविशन्नेव तद्द्वीपं धृतो हस्ते
न योषिता। पृष्टश्च त्वं कुतः
कोऽसि प्रेषितः केन वा वद।
इत्युक्तो लीलया स्त्रीभिः हस
न्तीभिः पुनः पुनः। क्रुक्रीड
त्ताडितनिर्मुक्तस्तस्माद्द्वीपाद्द
शाननः। आश्चर्यमतुलं ल
ब्ध्वा चिंतयामास दुर्मतिः।
विष्णुना निहतो यामि वैकुंठमि
ति निश्चितः। मयि विष्णु र्यथा
कुप्येत्तथा कार्यं करोम्यहं।
इति निश्चित्य वैदेहीं जहार वि
पिनेश्वरः। ज्ञात्वैव परमात्मा
नं जहारावनीसुतां। इति श्री
ब्रह्माण्डपुराणे श्रीमदध्या
त्मरामायणे उत्तरकाण्डे ५
ध्यायः। अन्यच्च। श्वेतगंगां
नरः स्नात्वा यः पश्येच्छ्वेत
माधवं मत्स्याख्यं माधवंचैव
श्वेतद्वीपं स गच्छति ॥ इति
तीर्थचिंतामणिः ॥
श्वेतधातुः पुं खटिका। इति
राजनिर्घण्टः ॥ शुक्लवर्णधा
तुद्रव्यंच ॥
श्वेतधामा पुं चंद्रः। कर्पूरः ॥
समुद्रफेनः। इति मेदिनी ॥
श्वेतनीलः पुं मेघः। इति
शब्दरत्नावली। शुक्लनीलव
र्णश्च ॥ श्वेतपत्रः पुं हंसः। इति
श्वेतपत्ररथशब्दार्थदर्शनात्
शुक्लपर्णे त्रि ॥
श्वेतपत्ररथः पुं ब्रह्मा। इति
शब्दमाला ॥ श्वेतपत्रो हंसो र
थो वाहनं यस्य ॥
श्वेतपद्मं क्ली सिताम्भोजं।
तत्पर्यायः। सिताब्जं २ पुण्ड
रीकं ३ श्वेतवारिजं ४ हरिने
त्रं ५ शारदपद्मं ६ शारदं ७ शो
भवल्लभं ८। अस्य गुणाः। हि
मत्वं। तिक्तत्वं। मधुरत्वं। पित्त
दाहास्रभ्रमदोषपिपासाघ्नत्वं
शीतत्वञ्च। इति राजनिर्घण्टः ॥
श्वेतपर्णा स्त्री वारिपर्णी। पाना

इति भाषा। इति रत्नमाला ॥
श्वेतपर्णासः पुं श्वेततुलसी।
यथा। अर्जकः श्वेतपर्णासो
गंधपत्रः कुठेरकः। इति रत्न
माला ॥
श्वेतपाटला स्त्री शुक्लपाटला
वृक्षः। इति जटाधरः ॥
श्वेतपिंगः पुं सिंहः ॥ इति
हेमचंद्रः ॥
श्वेतपिंगलः पुं सिंहः। इति
त्रिकाण्डशेषः ॥ शुक्लकपिल
वर्णयुक्ते त्रि ॥
श्वेतपिंगलकः पुं सिंहः। इति
शब्दमाला ॥
श्वेतपिण्डीतकः पुं महापिंडी
तरुः। इति राजनिर्घण्टः ॥
श्वेतपुष्पः पुं सिंधुवारवृक्षः।
इति जटाधरः राजनिर्घण्टश्च ॥
शुक्लकुसुमे क्ली ॥
श्वेतपुष्पकः पुं करवीरवृक्षः।
इति राजनिर्घण्टः ॥ शुक्लपुष्प
युक्ते त्रि ॥
श्वेतपुष्पा स्त्री घोषातकी।
श्वेतघोषा इति भाषा। इति
रत्नमाला। नागदंती। मृगे
र्वारुः। इति राजनिर्घण्टः ॥
श्वेतपुष्पिका स्त्री पुत्रदात्री ॥
महाश्वेतपुष्पिका। इति राज
निर्घण्टः ॥
श्वेतप्रसूनकः पुं वृक्षविशेषः
यथा। तिलकः शाकतरुः श्वेत
वृन्तः श्वेतप्रसूनकः। इति श
ब्दमाला। शुक्लपुष्पयुक्ते त्रि।
श्वेतभण्डा स्त्री श्वेतापराजिता
इति रत्नमाला ॥
श्वेतमंदारकः पुं वृक्षविशेषः
श्वेतआक इति हिन्दीभाषा ॥
तत्पर्यायः। पृथ्वीकुरवकः २
दीर्घायुष्पः ३ सितालर्कः ४
दीर्घालर्कः ५ सिताकयः ६
इति राजनिर्घण्टः ॥
श्वेतमरिचं क्ली शोभाञ्जनबी
जं। इत्यमरः। शुक्लमरिचंच।
श्वेतमालः पुं मेघः। धूमः।
इति विश्वः। मेदिनीशब्दरत्ना
वल्योः श्वेतमाल इति पाठः।
श्वेतरक्तः पुं पाटलवर्णः। गो
लाबीरंग इति भाषा। इत्यम
रः। श्वेतरंजनं क्ली सीसके
इति केचित् ॥
श्वेतरथः पुं शुक्रग्रहः। इति
शब्दरत्नावली। शुक्लवर्णस्य
न्दनश्च। श्वेतराजी स्त्री चञ्चेरगा
इति राजनिर्घण्टः ॥

श्वेतरोचिः[५] पुं चंद्रः। इतिह
लायुधः ॥
श्वेतरोहितः पुं वृक्षविशेषः।
श्वेतरोहिड इति हिंदीभाषा।
तत्पर्यायः। सितपुष्पः २ सि
ताह्वयः ३ सितांगः ४ शुक्ल
रोहितः ५ लक्ष्मीवान् ६ जन
वल्लभः ७। अस्य गुणाः। क
टुत्वं। स्निग्धत्वं। कषायत्वं। सु
शीतलत्वं। कृमिदोष व्रण·
प्लीह रक्तनेत्रामय नाशित्वं·
च। इतिराजनिर्घंटः ॥
श्वेतलोध्रः पुं पट्टिकालोध्रः
इतिराजनिर्घंटः ॥
श्वेतवचा स्त्री अतिविषा। शु
क्लवचा। पारसीवच् इतिभाषा
तत्पर्यायः। मेध्या २ षड्ग्रंथा
३ दीर्घपत्रिका ४ तीक्ष्णगंधा ५
हैमवती ७ मंगल्या ८ अस्या गु
णाः। अतिगुणाढ्यत्वं। मति मे
धायुः स्मृति हितत्वं। कफनाशि
त्वंच। इतिराजनिर्घंटः। अन्य
च्च। पारसीकवचं शुक्ला प्रो·
क्ता हैमवतीतिसा। हैमवत्युदि
ता तद्वत्कूलहंतिविशेषतः। त
द्वद्वचावत्। इतिभावप्रकाशः
श्वेतवल्कलः पुं उडुंबरवृक्षः।
इतिजटाधरः। शुक्लत्वक्च ॥
श्वेतवाजी[२] पुं चंद्रः। इति हे
मचंद्रः। अर्जुनः। इति जटा
धरः ॥ शुक्लघोटकश्च ॥
श्वेतवासाः[स] पुं शुक्लवस्त्रधा
रिसंन्यासी। इतिहलायुधः। प
रिहितशुक्लवसने त्रि ॥
श्वेतवाः[ह] पुं इंद्रः। इति मुग्ध
बोधव्याकरणं ॥
श्वेतवाहः पुं अर्जुनः। इंद्रः
इति केचित् ॥
श्वेतवाहनः पुं चंद्रः। अर्जुनः
इति मेदिनी। मकरः ॥ इति
शब्दरत्नावली ॥
श्वेतवाही[२] पुं अर्जुनः। इति
शब्दरत्नावली। इंद्राणी स्त्री
श्वेतवक्रा स्त्री वनतिक्ता। यथा
श्वेतवक्रा कपीतस्त्र वनतिक्ता
विसर्पिणी। प्रोखिनी चाकचि·
च्चाच गिरिज्ञा प्रसरच्छदा ॥
इतिरत्नमाला ॥
श्वेतवृहती स्त्री शुक्लवृहती
भाकी। तत्पर्यायः। श्वेता २
श्वेतमहोदिका ३ श्वेतसिंही ४
श्वेतफला ५ श्वेतवार्त्ताकिनी
६ अस्या गुणाः। विशेषा श्वे
तवृहती वात श्लेष्म विना।

शिनी। रुच्या श्वेजनयोगेन·
नाना नेत्रामयापहा ॥ इति
राजनिर्घंटः ॥
श्वेतवृक्षः पुं वरुणवृक्षः। इति
राजनिर्घंटः। शुक्लतरुश्च ॥
श्वेतशरपुंखा स्त्री क्षुपविशेषः
श्वेतशरफोंका इति हिंदीभा
षा। तत्पर्यायः। सितशायका
२ सितपुंखा ३ श्वेतपुंखा ४
शुभ्रपुंखा ५। अस्या गुणाः। क
टुत्वं। उष्णत्वं। कृमि वातरु·
जापहत्वं। गुणाढ्यत्वंच। इति
राजनिर्घंटः ॥
श्वेतशिग्रुः पुं शुक्लशोभांज
नः। धोला शजिना इतिभाषा।
तत्पर्यायः। सतीक्ष्णः २ सुरव
भंगः ३ सिताह्वयः ४ सुमूलः
५ श्वेतमरिचः ६ रोचनः ७ मधु
शिग्रुकः ८ अस्य गुणाः। कटु
त्वं। तीक्ष्णत्वं। शोफानिलामय
घ्न। मुखजाड्य नाशित्वं। रुच्य
त्वं। दीपनत्वंच। इतिराजनिर्घंटः
शिग्रुवल्कल पत्राणां स्वरसः प
रमार्तिहृत्। चक्षुष्यः शिग्रुजंबी
जं तीक्ष्णोष्णं विषनाशनं। अवृ·
ष्यं कफ वातघ्नं तन्नस्येन शिरो
र्त्तिनुत्। इति भावप्रकाशः ॥
श्वेतशिंशपा स्त्री शुक्लशिं
शपावृक्षः। तत्पर्यायः। श्वेतप
त्रा २ श्वेतचिलिका ३ अस्या गु
णाः तिक्तत्वं। शिशिरत्वं। पित्त
दाहनाशित्वंच। इतिराजनिर्घंटः
श्वेतशृंगः पुं यवः। इति जटा
धरः। शुक्लशृंगयुक्ते त्रि ॥
श्वेतशूरणः पुं वनशूरणः
इतिराजनिर्घंटः ॥
श्वेतसर्पः पुं वरुणवृक्षः। इ
तिजटाधरः ॥ शुक्लवर्णाहि
श्च। श्वेतसारः पुं खदिरः। इ
तिजटाधरः ॥
श्वेतसुरसा स्त्री शुक्लशेफा
लिका। इत्यमरः ॥
श्वेतस्पंदा स्त्री अपराजिता।
इतिराजनिर्घंटः ॥
श्वेतहयः पुं इंद्राश्वः। इति·
त्रिकांडशेषः। अर्जुनः। इति
हेमचंद्रः। शुक्लवर्णघोटकश्च
श्वेतहस्ती[२] पुं ऐरावतः। इति
भूरिप्रयोगः। शुक्लगजश्च ॥
श्वेता स्त्री वराटिका। काष्ठपा
टला। शंखिनी। इति मेदिनी
अतिविषा। इति रत्नमाला
अपराजिता ॥ श्वेतवृहती
श्वेतकंटकारी ॥

पाषाणभेदी । शिलावल्कला
श्वेतदूर्व्वा । वंशरोचना ॥
स्फटी । शर्करा । वृत्तभेदः ॥
केना इति कर्णे इतिच हिन्दी
भाषा । तत्पर्य्यायः । छूरिका
पत्री २ पर्व्वमूला ३ अविप्रिया
४ अस्या गुणाः । अतिमधुरत्वं
शीतलत्वं । सन्धानत्वं । रुचि
कारित्वञ्च । इति राजनिर्घण्टः ॥
श्वेता त्रिवृत् स्त्री शुक्लत्रिवृता
सादा तेउडी इति भाषा । तत्पर्य्या
यः । त्रिभण्डी २ त्रिवृता ३
त्रिपुटा ४ सर्व्वानुभूती ५ सर
ला ६ निशोत्तरा ७ रेचनी ८
अस्या गुणाः । रेचनत्वं । स्वा
दुत्वं । उष्णत्वं समीर पित्तज्वर
श्लेष्मपित्त शोथोदर नाशित्वं
रूक्षत्वञ्च । इति भावप्रकाशः ।
श्वेताद्रिः स्त्री क्षुपविशेषः ।
तत्पर्य्यायः । अद्रिका २ पिण्डाडी
३ पिण्डिका ४ । अस्या गुणाः
मधुरत्वं । वृष्यत्वं । पित्तनाशि
त्वं । बलदातृत्वञ्च । इति राज
निर्घण्टः ॥
श्वेतार्कः पुं शुक्लार्कवृक्षः ।
सादा आकन्द इति भाषा । तत्
पर्य्यायः । तपनः २ श्वेतः ३
प्रतापः ४ सिताक्र्कः ५ शार्के
रापुष्पः ६ हेममल्लिका ७ अस्य
गुणाः कटुत्वं । तिक्तत्वं । उष्ण
त्वं । मलशोधनकारकत्वं ।
मूत्रकृच्छ्रास्र शोफार्त्ति व्रण
दोष विनाशनत्वञ्च । इति
राजनिर्घण्टः ॥
श्वेतावरः पुं सितावरशाकः
इति राजनिर्घण्टः ॥
श्वेताह्वा स्त्री सितपाटला ।
इति राजनिर्घण्टः ॥
श्वेतेक्षुः पुं शुक्लवर्णेक्षुः । सा
दा आकु इति भाषा तत्पर्य्यायः
सितेक्षुः २ कोषेक्षुः ३ वंशप
त्रकः ४ सवेशः ५ पाण्डुरेक्षुः
६ अस्य गुणाः । कठिनत्वं । रु
च्यत्वं । गुरुत्वं । कफ मूत्रका
रित्वं दीपनत्वं । पित्तदाहना
शित्वं । विपाके कोमलत्वञ्च
इति राजनिर्घण्टः ॥
श्वेतोदरः पुं कुवेरः । इति
त्रिकाण्डशेषः शुक्लवर्णजठ
रश्च श्वेत्रं क्लो श्वित्रं । इत्यमर
टीका । श्वेतोही स्त्री इन्द्राणी ।
इति मुग्धबोधव्याकरणं ॥
श्वोवसीयः त्रि मङ्गलं । इति
हेमचन्द्रः ॥

ष मूर्द्धन्यषकारः । सतु एक
पञ्चाशद्वर्णान्तर्गत सप्तचत्वा
रिंशवर्णः । चतुस्त्रिंशद्व्यञ्जनान्त
र्गतएकत्रिंशत्तम व्यञ्जनञ्च ।
अस्योच्चारणस्थानं मूर्द्धा । इ
तिव्याकरणं । तत्पर्य्यायः । यः
श्वेतो १ वासुदेवश्च २ पीता ३
प्राज्ञा ४ विनायकः ५ परमे
ष्ठी ६ रामवाहुः ७ श्रेष्ठो ८ ग
र्भविमोचनः ९ लंबोदरो १०
यमोजेशः ११ कामधुक् १२
कामधूमकः १३ सूक्ष्मः १४ उ
ष्णा १५ वृषो १६ लज्जा १७ म
रुद्रूपः १८ प्रियः १९ शिवः २०
सर्व्वात्मा २१ जठरः २२ कोषो
२३ मन्ना २४ वेदो २५ विदारि
णी २६ कलकंठो २७ सप्ताभिमा
२८ युद्धात्मा २९ मलयुः ३० शि
वः ३१ । इति तंत्रं ॥ अपिच । ष
कारः श्वेत आख्यातो मूर्द्धे
न्यो वृष संज्ञकः । पितेशक्ति
श्च मायाच महायोनिःस्वावि
दुमत् । इति मंत्राभिधानं ॥
अस्यस्वरूपं यथा । षकारंशृ
णुचार्व्वङ्गि रक्तकोणमयंसदा ।
रक्तचंद्र प्रतीकाशं स्वयं पर
मकुण्डली । चतुर्व्वर्गमयंवर्णेस
था ॥
निर्म्मित विग्रहे । पंचदेवमये
वर्णे पंचप्राणमये सदा । रजः
सत्व तमोयुक्ते त्रिशक्तिसहि
तं सदा । त्रिविन्दु सहिते वर्णे आ
त्मादि तत्त्व संयुते । सदेदेवम
येवर्णे हृदि भावय पार्व्वति ।
इति कामधेनुतंत्रे ॥ अपिच
कुंचिता वामतो दक्षगताच
गोकृति स्वधः । पुनरूर्द्धगा
ता तासु वह्नि चंद्र दिवाकराः
माया भवानी विज्ञेया ध्यान
मस्य प्रचक्षते । इति वर्णोद्धा
रतंत्रे । अस्य ध्यानं । यथा ।
चतुर्भुजां चकोराक्षीं चारुचंद
न चर्च्चितां । शुक्लवर्णां त्रिनय
नां वरदाञ्च शुचिस्मितां । र
त्नालंकार भूषाढ्यां श्वेतमा
ल्योपशोभितां, देववृन्दे रभि
वंद्यां सेवितां मोक्षकांक्षि
भिः ॥ एवंध्यात्वा षकारंतु
तन्मंत्रं दशधाजपेत् । इति
वर्णोद्धारतंत्रे ॥
षः पुं कचः । इति मेदिनी ॥
मानवः । सर्व्वः । श्रेष्ठः । गर्भ
विमोचनः । इति काशिकैका
क्षरकोषः ॥
षः त्रि विज्ञः ॥ श्रेष्ठः । इति

मेदिनी ॥
षष स ए संहृतौ। इति कवि
कल्पद्रुमः। ससिषषियति
पयसगीत्। इति दुर्गादासः ॥
षच न हिंसे। इति कविकल्प
द्रुमः। न सच्नोति असीषचत्
इति दुर्गादासः ॥
षच उ॰ सेचने। इति कविक
ल्पद्रुमः। उ॰ सचते जले मेघः
इति दुर्गादासः ॥
षच संबंधे। इति कविकल्पद्रुमः
सचति। इति दुर्गादासः ॥
षट् अंशके। इति कविकल्प
द्रुमः। अंशके अवयवे। सटति
पटः अवयवी स्यादित्यर्थः। इ
ति दुर्गादासः ॥
षट् त्रि संख्याविशेषः। छय
इति भाषा तद्वाचकानि यथा।
वज्रकोणाः १ शिशिरनेत्रं २ त
र्कः ३ अंगं ४ दर्शनं ५ चक्रव
र्ती ६ कार्त्तिकेयमुखं ७ गुणः ८
रसः ९ ऋतुः १० ज्वरबाहुः ११
रूपं १२। इति कविकल्पलता ॥
षट्कर्म्म क्ली षट्प्रकारश्रा॰
तद्विकर्म। यथा शारदायाम्
शाभिधास्ये तेषां स्थितल्लक्षणक
षट्कर्म लक्षणं। सर्वेषांमनुसा

रेण प्रयोगाः फलसिद्धिदः।
शांति वश्य स्तंभनानि विद्वेषो
च्चाटने ततः। मारणान्तानि संशा
ति षट्कर्माणि मनीषिणः। रोग
कृत्याग्रहादीनां निरासः शांतिरी
रिता। वश्यं जनानां सर्वेषां विधे
यत्वमुदीरितं। प्रवृत्तिरोधः स
र्वेषां स्तंभनं तदुदाहृतं। स्निग्धा
नां द्वेषजननं मिथो विद्वेषणं
मतं। उच्चाटनं स्वदेशादेर्भ्रंशनं
परिकीर्त्तितं। प्राणिनां प्राण
हरणं मारणं तदुदाहृतं। स्वदे
वता दिक्कालादीन् ज्ञात्वा क
र्माणि साधयेत्। रति वाणी र
माज्येष्ठा दुर्गा कालीयथाक्र
मं। षट्कर्मदेवताः प्रोक्ताः कु
र्यादेताः प्रपूजयेत्। ईश चंद्रे
न्द्रनिर्ऋतिवाय्वग्नीनां दिशामतः
सूर्योदयं समारभ्य घटिकादश
कं क्रमात्। ऋतवः स्युर्वसंता
द्याः अहोरात्रं दिने दिने ॥ व
संत ग्रीष्मवर्षाख्य शरद्धेमंत
शैशिराः। यद्वा। अर्द्धरात्रे शार
त्कालो हेमंतस्तु प्रभातकः।
पूर्वाह्ने च वसंतः स्यान्मध्याह्ने
ग्रीष्म एव च। अपराह्णे प्रावृ॰
डः स्यात् प्रदोषे शिशिरः ॥

स्मृतः ॥ अथवा। उषायोगे
च हेमंतः प्रभाते शिशिरागमः
प्रहरार्द्धे वसंतः स्यात् ग्रीष्मो
मध्यंदिनागमे। तृतीयामेच
वर्षाख्यः शरदस्तंगते रवौ ॥
अथ कालनियमः। हेमंतः शां
तिके प्रोक्तो वसंतो वश्यक
र्मणि। शिशिरः स्तम्भने प्रो
क्तो विद्वेषे ग्रीष्म एव च। प्रावृट्
उच्चाटने ज्ञेया शरन्मारण
कर्मणि। अथ तिथिनियमः
पंचमी च द्वितीया च तृतीया स
प्तमी तथा। बुधेज्यवारसंयुक्ता
विज्ञेया हेयकर्मणि। कृष्णा च
तुर्दशी तद्वदष्टमी मंदवारकाः
उच्चाटने तिथिः शस्ता प्रदोषे च
विशेषतः। चतुर्द्दश्यष्टमी कृष्णा
अमावास्या तथैव च। मंदभौम
दिनोपेता शस्ता मारणकर्मणि।
बुध चंद्र दिनोपेता पंचमी दश
मी तथा। पौर्णमासी च विज्ञेया
तिथिस्तंभनकर्मणि। शुभग्र
होदये कुर्यात् शुभानि च शुभो
दये। रौद्रकर्म्माणि रिक्तार्के च
सुयोगे च मारणं ॥ जपेत् पूर्वमु
खो वश्ये दक्षिणं चाभिचारके
पश्चिमे स्तंभने विद्यात् अग्ने॰

शांतिकं भवेत्। आकर्षण
मथाग्नेये नैर्ऋते मारणं तथा
उच्चाटनं तु वायव्ये ऐशान्यां मो
क्षदायकं ॥ तथाभिचारके का
र्याच दक्षिणाप्लवना मही।
वसने लोहिते प्रोक्तं उल्लीशं॰
लोहितं स्मृतं। भूषणं लोहद्रव्ये
ण वामेन पूजनादिकं। नरस्था
स्थि विशेषेण मारणे तु वीरिता
मृतस्य पुरुषस्यास्य दंतस्य ग
र्दभस्य वा। कृत्वाक्षमालां जप
मंशत्रूणां वधमिच्छता। अश्वेभ
दंतमणिभिर्जपेदाकर्षकर्मणि
साध्यकेशस्तन्तु मौलैस्तुरंगदश
नोद्भवैः। अक्षमालां समालोक्य
विद्वेषोच्चाटने जपेत्। पद्माक्षैः
शांतिके भूयो विकटे कुक्कु
टेषु नः। वज्रं भद्रकमित्याद्य
शसनानि मनीषिणः। पद्मास
नं संयोज्य जानूर्वी दंतरेक
के। निवेश्य प्रभ्रमो संस्थाप्योर्ध्वो
मस्य कुक्कुटासनं। अन्यानि व
क्तव्यानि ॥ षण्मुद्राः क्रमतो
ज्ञेयाः पद्मपाशगदाह्वयाः। मु
षलाशनिखड्गाख्याः शांतिका
दिषु कर्म्मसु। जलेशांतिविधौ
शांतं तर्पयेत्पवादि कहीरितः। स्तंभ

ने पृथिवी शाला विद्वेषेव्योम
कीर्तितं। उच्चाटने स्मृतो वायु
र्भयोग्नि र्मारणे स्मृतः। तत्तद्भू
तोदये सम्यक् तत्तन्मंडलसंयु
ते। तत्तत् कर्म विधातव्यं मंत्रि
णा निश्चितात्मना॥ शीतांशु
सलिलैशानी व्योमवायुहवि
र्भुजां। वर्णास्तु मंत्रबीजानि ष
ट्कर्मसु यथाक्रमं। ग्रथनञ्च
विदर्भश्च संपुटो रोधनं तथा
योगाः पल्लव इत्येते विन्यासाः
षट्सुकर्मसु। मंत्रार्णांतरिता
न्कुर्यात्साध्यवर्णान् यथाविधि
ग्रथनं तद्विजानीयाच्छांतिकेशां
तिकर्मणि मंत्रार्णद्वयमध्यस्थ
साध्यनामाक्षरं लिखेत् विदर्भःस
विज्ञेयो मंत्रिभिर्वश्यकर्मणि
आद्यंते च मंत्रः स्यान्नाम्नः सो
संपुटः स्मृतः। पश्चात् स्तंभने
प्रोक्त इत्युक्तो मंत्रवेदिभिः॥ ना
म्न आद्यंत मध्येषु मंत्रः स्या
द्रोधने मतं। विद्वेषणविधाने
षु प्रशस्तश्चिन्मीरितं। मंत्र
स्यांते भवेन्नाम योगः प्रोच्चाट
ने मतः। अंते नाम्नो भवेन्मंत्रः
पल्लवो मारणे मतः। सितर
क्तपीतमिश्रकृष्णधूम्राः प्रकी
र्तिताः। वर्णानां मंत्रसंयोगादे
वताः षट्सुकर्मसु॥ मंत्राणां
लिखनद्रव्यं चंदनं रोचनं पि
ष्टा। गृहधूमश्चिताभस्म मार
णेः ह विषाणि च। येषनाग्निलो
लपिष्टानि धुस्तूरकरसस्ततः
गृहधूमस्विकटुकं विषाष्टकं।
क्षितीरिते देवताकालमुद्रादी
नुसम्यक्ज्ञात्वा विचक्षणः षट्
कर्माणि प्रयुंजीत यथोक्तफल
सिद्धये। उच्चाटने वषट्प्रोक्तं हुं
फट् तच्च मारणे। स्तंभने च नमः
प्रोक्तं स्वाहा शांतिक पौष्टिके॥
होमसंतर्पणयोः स्वाहा न्यासपू
जनयोर्नमः। मंत्रांते योजयेन्म
त्री जपकाले यथास्थिति।
अस्यार्थः फलानि तत्तत्कर्मणि
जपकाले मंत्रांते योजयित्वा मं
त्रं जपेत्। होमादिषु नार्थं निय
मः होम इति कश्चित् तन्न। प्र
णिकार्थं जपेत् स्वाहा नमः
सर्वत्र चार्चने। शांति पुष्टि व
श्याकर्षोच्चाटनमारणे। स्वा
हा स्वधा वषट् हुं च वौषट् फट्यो
जयेत्क्रमात्। वषपाकघस्वसंज्ञता
पल्लवे स्वाहा प्रकीर्तिता। क्रोधो
पशमने शांतौ प्रीतौ योज्य·

नमो बुधैः। वौषट् संमोहने पुष्टौ
पुष्टि मृत्युंजयेषु च॥ हूं
कारं प्रीतिनाशे च मारणे छे
दने तथा। उच्चाटने च वि
द्वेषे वषट्पंगक्रतौ वषट्। म
न्त्रोद्दीपनकार्येषु लाभालाभे
वषट् स्मृतः। इति विशेषवच
नाद्धोमे नार्थं विधिः। शांति
कादौ मंत्रलिखनपद्मादिनि
यमस्तत्रैव। शांतिके राजतं ता
म्रं भूर्जपत्रञ्च वश्यके। सर्वका
र्येषु सौवर्णं क्रूरे स्यात्प्रेतकर्पटे
त्रिगंधं शांतिके प्रोक्तं पंचगं
धं तु वश्यके। सर्वकार्येषु ह
रिद्रा स्यात् क्रूरे चाष्टविषा·
णि च। शांतिके लेखनी दूर्वा
वश्यादौ शितिपुच्छिका। द्वे
षा सर्वाणि कार्याणि क्रूरे स्या
त्काकपुच्छिका। गृहेषु शांति·
कर्म स्यात् वश्यं च चाटिका गृहे
देवालये च सर्वाणि श्मशाने क्रू
रकर्म च। अथ भूतानामुदयः
दंडाकाराणि भूमेः शुद्धयो·
रूभयोरपि। तोयस्य पावकः
स्यापि द्वे शानि लिख्यकं नभस्वतः
गतिर्व्योम्नो भवेन्मध्ये भूताना
मुदयः स्मृतः। पश्चिमोदये ऊ
ध्यात् स्तंभने वश्य मारणे वि
ते। शांतिके पौष्टिके कर्मणि तो
यस्य समये वसोः। मारणादी
नि मरुतो विपक्षोच्चाटनादिके
तेजोदिनाशने प्रोक्त मुदये
च विहायसः॥ अथ भूतानां
मंडलानि। वृत्ते दिव सत् ष
ड्बिंदुलांछितं मातरिश्वनः
त्रिकोणं स्वस्तिकोपेतं वह्ने
र्वह्निसंयुतं। अर्धभोजसमंभसो
भूमे श्चतुरस्रं सवज्रकं॥ त
त्तद्भूत समाभानि मंडलानि
विदुर्बुधाः। वर्णाः स्वेरंजिताख्या
तः स्व स्व नाम्ना कृतान्यपि।
स्वयंवियत्मकन् कुर्लो वह्नो
ग्निं विषदं पयः। पीडा भूता
दि प्रयोगानंतरं कुर्लारोगे।
पकलत्वं जपेन्मंत्रं ध्यान स्वा
समन्वितं प्रयोगादोषशांत्य
र्थं मात्मरक्षार्थकारणं। नचे
त्फलं च नाप्नोति देवताश्च
पशापयात्। यत्नात्प्रयोगांत
रणं कर्म कुर्याच्चेद्युतं जपे
त्। तत् प्रायश्चित्तपरं। इति
तंत्रसारः॥
षट्कर्माणि च शास्त्रादिभिर्युक्ते
ब्राह्मणाः। इत्यन्यः॥ तथा च।

इज्याध्ययन दानानि याजना
ध्यापने तथा। प्रतिग्रहश्चेतैर्यु
क्तः षट्कर्म्मा विप्र उच्यते॥
षट्कर्म्माण्यस्य इति वह्नी
हिः॥ इति भरतः॥
षट्कूटा स्त्री भैरवीविशेषः
यथा। अथ षट्कूटाभैरवी।
डाकिनी राकिणीवीजे लाः
किनी काकिनीयुगे। साकि
नी हाकिनीवीजे आद्यन्तसुर
सुंदरि। आद्ये मकारसंयुक्तम
न्त्यदीकारसंज्ञितं। शाक्रस्वरान्वि
तं देवि तार्तीयेवीजमालिखे
त्। विंदुनादकलाक्रान्तं चितयं
पौलसंभवे। तृतीयवीजे स
विसर्गं इत्यपि केचित्। तेषा
न्तरे। उर्द्धे न्यसा मादनं जीवं
शिव मत्र त्रिधा लिखेत्। अ
र्केणास्या पाशक्रोध्यो क्रमात्त
संज्ञितं क्रमात्। विंदुनादान्वितं
चाद्यहृदयं मंत्रं विसर्गवत्॥
ध्यानमस्याः प्रवक्ष्यामि सर्वभ
त्तनिकृंतनं। वालसूर्यप्रभां दे
वीं जवाकुसुमसन्निभां मुंडमा
लावलीरम्यां वालसूर्यसमांशु
कां। स्वर्णकलसाकारपीनोन्न
तपयोधरां। पाशाङ्कुशौ पुस्त

कञ्च तथा च जपमालिकां।
दधतीमिति शेषः। हिरण्मयाष
डुंगानि विधाय परमेश्वरि। ये
त्र मस्या वरारोहे त्रिकोणंत
तुर्दलं लिखेत्। वहिरष्टदले
पद्मं रविपत्रं ततो लिखेत्।
चतुरस्रं चतुर्द्वारं मेवं मण्डल
मालिखेत्। षडङ्गावरणं देवि
पूजयेत् पूर्ववच्छिवे। रस्या
दि त्रितयं देवि त्रिकोणे परि
पूजयेत्। डाकिन्याद्याश्च ष
ट्कोणे वस्त्रपत्रे ततः परं।
ब्राह्म्यादि युगले पश्चात्द्रवि
पत्रे ततः परं॥ वालायाः पी
ठपाक्षीस्तु वामाद्याः पूजये
त् क्रमात्। चतुरस्रे लोकपा
लान् सायुधान् परमेश्वरि।
अनेनैव विधानेन नित्यास्यां
भैरवीं यजेत्॥ इति तन्त्रसा
रः॥ षट्कोणं क्ली न
ष्प्रान्तषष्टगृहे॥ तन्त्रपरिभाषा
नं। यथा। पातालं हिबुकं
चैव सुहृत्देश चतुर्थकं॥
त्रिविकोणञ्च नवमं हृश्चिकं
स्यात् तृतीयकं। धीस्थानं
पंचमं ज्ञेयं यामित्रं सप्तमं स्मृ
तं। छुनं छुनं तथा॥

लाख्यं षट्कोणं विपुमंदिरं
इति ज्योतिस्तत्वं॥
वज्रं। इति राजनिर्घण्टः॥ ष
ट्चक्रं। यथा गणेशयंत्रे। वीजे
षट्कोण मध्ये स्फुरदनल
पुरे तारयां दिक्षु लक्ष्मीः माया
कन्दर्पभूमि स्वदनु रसपुटेष्टा
लिखेद्वीजषट्कं। इति तंत्रसा
रः। षट्चक्रं क्ली शरीरस्थष
ड्याकार षट्प्रकारचक्रं। यथा
सप्तपद्मानि तत्रैव संति लोका
श्च प्रभो। गुदे एष्टीसमे चक्रं
हेमहर्णं चतुर्दलं। लिंगे तु
षड्दलं चक्रं स्वाधिष्ठानमि
ति स्मृतं। विलोक वह्नि नि
लयं तप्तचामीकरप्रभं। नाभौ
दशदलं चक्रं कुण्डलिन्या स
मन्वितं। नीलाञ्जननिभं ब्रह्म
स्थाने एवकसंदिरं। मणिपू
राभिधं स्वच्छं जलस्थाने प्र
कीर्तितं। उद्यदादित्यसंकाशं
हृदि चक्रं मनाहतं। कुंभका
ख्यं द्वादशारं वैस्रवं वायुमंदि
रं कंठे विशुद्ध मारणं षोडशारं
शुभोदयं। शांभवी वरचक्राख्यं
चन्द्रविंदु विभूषितं। षष्
माज्ञालयं चक्रं द्विदलं श्वेत

मुत्तमं॥ धाराचक्रमिति ख्याते
मनः स्थाने प्रकीर्तितं। सहस्रद
लमेकार्णं परमात्मप्रकाश
कं। नित्यज्ञानमयं सत्यं सह
स्रादित्य सन्निभं॥ षट्चक्राणी
हृतेषानि नैतज्ञेयं कथञ्चन॥
इति पाद्मे स्वर्गखण्डे २० अध्यायः
अन्यच्च। तत्स्वरूप मेकं तत्
षट्चक्रं प्रति लङ्घयेत्॥ ष
ट्चक्रेऽपि महामाया हृणं ध्या
त्वा प्रयत्नतः। लेवयेन्मूलमंत्रेण
आदि षोडश चक्रकं। आदि
षोडशचक्रस्था साधकानन्दका
रिणी। चिंतयन् साधको देवी
जपकर्म समारभेत्। भ्रुवो रूप
रिनाडीनां त्रयाणां प्रांत उच्य
ते। तत् प्रांतं त्रिपथस्थानं ष
ट्कोणं चतुरंगुलं। रक्तवर्णं तु
योगज्ञे राजाचक्रमितीरितं॥
कंठे त्रयोणां नाडीनां वेष्टनं
विधते न्यसा। सहस्रेडापिं
गलानां षट्कोणं तत्षडंगुलं
तत् षट्चक्रमिति प्रोक्तं मूले
कण्ठस्य मध्यगे। त्रयाणां मध्य
नाडीनां हृदये वेकता भवेत्
तत् स्थाने षोडशाङ्गस्यान्त
मांगुल प्रमाणतः तत्पीनतु

कं योगसारादि षोडशचक्रकं।
ध्यानानां सथ मंत्राणां चिंतन
स्य जपस्य च। यस्मादाधत्तु हृदये
तस्मादादीतिगद्यते। इति का
लिकापुराणे ५४ अध्यायः ॥
अपरञ्च। मूलाधारे त्रिकोणाख्ये इच्छा ज्ञान क्रियात्मके।
मध्ये स्वयंभुलिंगंतु कोटिसूर्य-
समप्रभं। तदूर्द्धे कामवीजंतु क
लशांतीन्दु नादकं। तदूर्द्धे तु
शिखाकारा कुंडली ब्रह्मविग्र
हा। तद्वाह्ये हेमवर्णाभं वसव
र्णचतुर्द्दलं। द्रुत हेमसमप्रख्यं
पद्मंतत्र विभावयेत्। तदूर्द्धे
ग्नि समप्रख्यं षड्दलं हीरक
प्रभं। वादिलांतषड्वर्णेनयुक्तं
स्वाधिष्ठानसंज्ञकं। मूलमाधारष
ट्कानां मूलाधारं ततोविदुः
स्वशब्देन परं लिंगं स्वाधिष्ठा
नंततोविदुः। तदूर्द्धे नाभिदेशे
तु मणिपूरं महाप्रभं। मेघा
भं विद्युदाभञ्च बहुतेजोमयं
ततः ॥ मणिवद्भिन्नं तत्पद्मं
मणिपूरं तथोच्यते। दशभि
श्चदलैर्युक्तं डादिफांताक्षरान्वि
तं। शिवेनाधिष्ठितं पद्मं विश्व
लोकैककारणं। तदूर्द्धे ऽना-
हतंपद्मं उद्यदादित्यसन्निभं
कादिठांताक्षरैः र्कपत्रैश्चसम
धिष्ठितं। तन्मध्ये वाणलिंगं
तु सूर्यायुत समप्रभं। शब्दब्र
ह्ममयं शब्दोऽनाहतस्तत्र दृश्य
ते। तेनाहताख्यं पद्मं तन्मु
निभिः परिकीर्त्यते। आनंद
सदनं तत्तु पुरुषाधिष्ठितं परं
तदूर्द्धे तु विशुद्धाख्यं दलषोड
शपंकजं। स्वरैः षोडशकैर्यु
क्तं धूम्रवर्णं महाप्रभं। विशु
द्धिं तनुते यस्मात् जीवस्य हंस
लोकनात् ॥ विशुद्धंपद्म मा
ख्यातं आकाशाख्यं महत्प
रं। आज्ञाचक्रं तदूर्द्धे तु आत्म
नाधिष्ठितं परं। आज्ञासंक्र
मणं तत्र गुरोराज्ञेति की-
र्तितं। कैलासाख्यं तदूर्द्धे तु
बोधनीतु तदूर्द्धतः ॥ एवञ्च
शिवचक्राणि प्रोक्तानि तव
सुव्रत। सहस्राराम्बुजे बिंदुस्था
नं तदूर्द्धे मीरितं ॥ इत्येतत्
कथितं सर्वं योगमार्गमनुत्त
मं। इति तंत्रसारः ॥
षट्चरणः पुं भ्रमरः। इति
हलायुधः ॥ यूका। इति रा
जनिर्घण्टः ॥ षट्पादश्च ॥

षट् क निकेतने। हिंसे। दाने
वले। इति कविकल्पद्रुमः ॥
मूर्द्धण्यादिः षट्ठयान्तः ॥ क
षट्टयति लोकः। निवसति
हंतिवली स्यात् ददातिवा इत्य
र्थः। इति दुर्गादासः ॥
षट्तिली[न्] स्त्री जन्मतिथ्यादौ ति
लकरणक षट्कर्मकारी। य
था। तिलोद्वर्त्ती तिलस्नायी ति
लहोमी तिलप्रदः। तिलभुक् ति
लवापीच षट्तिलीनावसी
दति ॥ इति तिथ्यादितत्त्वं ॥
षट्त्रिंशत् स्त्री संख्याविशेषः
छत्तिश इति भाषा। यथा। आ
ह्निकचिंतामणौ आसनाभ्य
ञ्जने तदुद्वर्त्तने विरूक्षणे स
म्मार्ज्जने सर्पिरादिस्नपनावाह
ने तथा। पाद्यार्घ्याचमनीय
श्च स्नानीय मधुपर्ककौ। पु
नराचमनीयंच वस्त्र यज्ञोपवी
तके। अलंकारो गंध पुष्प धूप
दीपा तथैवच। तांबूलादिक
नैवेद्यपुष्पमाला तथैवच ॥ अ
नुलेपश्च शय्या च चामरव्यज
ने तथा। आदर्शदर्शनं चैव न-
मस्कारोऽथ नर्त्तने। गीतवाद्ये
च दानानि स्तुति होम-
प्रदक्षिणं दंतकाष्ठप्रदानञ्चत
तो देवविसर्ज्जनं ॥ उपचारा इ
मे ज्ञेयाः षट्त्रिंशत् सुरपूज
ने। इत्येकादशीतत्त्वं ॥ षट्प
दः पुं भ्रमरः। इत्यमरः ॥
तच्छकुनानि यथा। येषट्पदा
याः शकुनानि तेषां माश्चर्य
रूपाणि निरूपयामः। अथैत
कामो यदि मंजु गुंजन् पदेप
त वा वामदिशे प्रसर्पन्। आस्वा
दयेद्वा कुसुमे प्रशस्ते भृंगस्त
दा स्यात् सुमहान् प्रमोदः ॥
अत्रापरे संति च षट्पदा येया
शास्ते ते वामगताः प्रशस्ताः ॥
इति वसंतराजशाकुने षट्प
दाध्यायः ९५ वर्गः ॥ यूका। इ
ति राजनिर्घण्टः ॥ षट्चरणश्च ॥
षट्पदप्रियः पुं नागकेशरवृक्षः
इति शब्दमाला ॥
षट्पदातिथिः पुं आम्रवृक्षः ॥
इति त्रिकाण्डशेषः। चम्पकः।
इति केचित् ॥
षट्पदानंदवर्द्धनः पुं किंकि
रातवृक्षः। इति राजनिर्घण्टः ॥
षट्पदी स्त्री यूका। इति हेम
चंद्रः ॥ भ्रमरपत्नीच ॥
षट्प्रज्ञः पुं कामुकः। यथा।

षिड्गो व्यलीकः षट्प्रज्ञः का-
मकेलि विंदूषकः । पीठकेलिः
पीठमर्द्दोभविलक्षिड्गो विटः
इति त्रिकाण्डशेषः ॥ धर्म्मा
दिषुणाखविज्ञः । यथा । धर्म्मार्थ
काम मोक्षेषु लोकतत्वार्थयो
रपि । षट्सु प्रज्ञास्ति यस्या
सौ सषट्प्रज्ञ इति स्मृतः ॥
इति तन्नैव ॥ षड़ंगं क्ली शरीर
स्यवयवं यथा । जंघे बाहू शिरोमध्यं
षड़ंग मिदमुच्यते । इति शब्द
चंद्रिका ॥ वेदांगषट्शास्त्रा-
णि । यथा । शिक्षा कल्पो व्या
करणं निरुक्तं ज्योतिषं तथा
छन्द श्चेति षड़ंगानि वेदा-
नांवैदिकाविदुः ॥ इतिशब्द
रत्नावली ॥ अपिच ॥ अंगान्या
हशिक्षापद्यं छन्दःपादौ तु वे
दस्य हस्तौ कल्पोऽथ कथ्यते ।
ज्योतिषामयनं नेत्रं निरुक्तं
श्रोत्रमुच्यते ॥ शिक्षा घ्रा
णंतुवेदस्य मुखं व्याकरणं-
स्मृतं । तस्मात् सांग मधी
त्यैव ब्रह्मलोके महीयते ॥
इति तिथ्यादितत्वं ॥
श्राद्धीयदानांगपीठादि
के ॥ इति

लोकप्रसिद्धं । षट्प्रकारगव्य
विशेषः । यथा । गोमूत्रंगोम
ये क्षीरं सर्पि र्दधि चरोच-
ना । षड़ंग मेतन्मांगल्यंपवि
त्रं सर्वदा गवां ॥ इतिस्मृतिः
हृदयादिषड़वयवे । तत् प्र
माणं. न्यासशब्दे द्रष्टव्यं ॥
षड़ंगः पुं क्षुद्रगोक्षुरकः ॥
इति राजनिर्घण्टः ॥
षड़ंगजित् पुं विष्णु । इति-
शब्दमाला ॥
षड़ंगजेतरि त्रि ॥
षड़भिज्ञः पुं बुद्धः । इत्यमरः ॥
षड़शीतिः स्त्री रविसंक्रांतिवि
शेषः । सा तु मिथुनकन्या ध
नुर्मीनराशिषु भवति । यथा ।
भविष्यमास्य ज्योतिषेषु । मृग
कर्कट संक्रांती द्वे तूदग्दक्षि
णायने विषुवती तुला मेषे
गोलमध्ये तथापराः ॥ धनु
र्मिथुनकन्यासु मीनेच षड़-
शीतयः । वृषवृश्चिककुंभेषु सिं
हेविष्णुपदीस्मृता । इतितिथ्या
दितत्वं । अस्याः पुण्यकालः
संक्रांतिशब्दे द्रष्टव्यः ॥
षड़धिकाशीतिसंख्या । छेया
शीतिभाषा । इत्यंकशास्त्रं ॥

षड़शीतिचक्रं क्ली मिथुनकन्या
धनुर्मीन राशिस्थरवेः शुभाशु
भफल ज्ञानार्थं नक्षत्रांग नरा
कारचक्रं । यथा । मुखे चैकंक
रे वेदाः पादयुग्मेद्वयं द्वयं । क्रो
ड़े वाणास्तथा वेदाः करेसव्येनरे
पिच ॥ द्वयं द्वयं तथानेत्रे म
स्तके त्रितयं तथा । द्वयंचै-
व तथा गुह्ये षड़शीत्यास्तथे
स्थिते । मुखे दुःखं करेलाभः
पादयो र्भ्रमणं हृदि । कांता
स्याद्धनेवामे हस्तेस्यात् स्त्री
यतेल्टणं ॥ सस्त्रानंनेत्रयो
स्त्रैव प्रपमानश्च मस्तके । गु
ह्ये चैव भवेन्मृत्युः षड़शीति
फलश्रुतिः ॥ इति ज्यो
तिस्तत्वं ॥
षड़ष्टकं क्ली योगविशेषः ।
सतु वर कन्ययोः स्वस्व राश्य
पेक्षया परस्पर षष्ठाष्टमराशि
सम्बन्धः । सच मित्रारिभेदेन
द्विविधः । तत्र मित्रषड़ष्टकं
यथा । श्रीपतिरत्नमालायांम
कर मेषेत मिथुनंकन्या कल
सौ मृगेन्द्र मीनौ च ॥ वृषभ-
तुले अलि मेषौ कर्कटधनु
षीच मित्रविधौ । षड़ष्टकाविति

शेषः ॥ अरिषड़ष्टक माह ॥
मकरः करिकुल रिपुणा कन्या
मेषेण सह कष स्तुलया । क
र्किघटौ वृष धनुषौ वृश्चिकमि
थुनेचारिविधौ । यदि कन्याष्टमे
भर्ता भर्तुः षष्ठे च कन्यका ।
षड़ष्टके विजानीयात् वर्जितं
त्रिदशै रपि ॥ षड़ष्टकादौ ता
रानियम माह । भीमपराक्रमः
सौहृद्ये सुखयो र्द्वयोरपि त
योरैकाधिपत्येपि वा तारा ष
ट् च सुमित्र मित्रजनन क्षे
मार्थ सम्पद् यदि ॥ षट्
काष्टे नव पंचके व्ययधनेयो
गेच पुं योषितोः प्रीत्यायुः
सुखवृद्धि पुष्टिजनकः का
र्य्यो विवाह स्तदा ॥ गर्गः ॥
मरणं तारविरोधे ग्रह वि
भावे चिरेण । योगादि नरना
र्य्योः षट्काष्टे वैरं भवेदाशु
व्यासः । मैत्रादि योगेपि ष
ड़ष्टकादौ तारा विपत्प्रत्य
रि नैधनाख्याः । वर्ज्या विवा
हे पुरुषोड़ुतो हि प्रीतिः प
रा जन्मतु तारकाद्धा । इति-
ज्योतिस्तत्वं ॥ मतान्तरे य
था । सिंहेन मकरः श्रेष्ठ-

कन्यया मेष उत्तमः । तुलया स्त्रमीनस्तु कुम्भेन सह कर्कटः धनुषा वृषभः श्रेष्ठो मिथुनेन च वृश्चिकः ॥ एतत् षडष्टकं प्रीत्यै भवत्येव न संशयः ॥ इति गारुडे ६१ अध्यायः ॥

षडङ्घ्रीणः पुं मत्स्यः ॥ इति केचित् ॥

षडाननः पुं कार्त्तिकेयः । इत्यमरः ॥ तस्य कार्त्तिकेयनामकारणं यथा । अग्निपुत्रः कुमारस्तु शरस्तम्बे व्यजायत । तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः । अपत्यं कृत्तिकानाञ्च कार्त्तिकेयस्ततः स्मृतः । इति मात्स्ये ५ अध्यायः ॥

षडूषणं क्ली मिलितषट्कटुद्रव्यं । यथा । पिप्पली मरिचं शुण्ठी त्रयमेतद्विमिश्रितं । त्रिकटु त्र्यूषणं व्योषं कटुत्रिकमथोच्यते । ग्रन्थिकानलचव्यैस्तु चतुःपञ्चषडूषणं । इति शब्दचन्द्रिका । अपि च । पञ्चकोलं समरिचं षडूषणमुदाहृतं । पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहं । इति भावप्रकाशः ॥

षड्गया स्त्री षड्विधगयायायथा गया गङ्गा गयादित्यो गायत्री च गदाधरः । गया गयासुरश्चैव षड्गया मुक्तिदायिका । इति वायुपुराणे गयापद्धतिः ॥

षड्गवं त्रि गोषट्कयुक्तहलादि । यथा । अष्टागवं धर्म्महलं षड्गवं जीविकार्थिनां । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनां ॥ इत्याह्निकाचारतत्त्वं ॥ प्रत्ययविशेषः । यथा । पशुभ्यो गोयुगे युक्ते परं षड्गत्वे तु षड्गवं । इति हेमचन्द्रः ॥ षण्णां गवां समाहारः । इति द्विगुसमासनिष्पन्नं तत्र क्ली ॥

षड्ग्रन्था स्त्री वचा । इति भावप्रकाशः ॥ श्वेतवचा शटी ॥ महाकरञ्जः । इति राजनिर्घण्टः ॥

षड्ग्रन्थि क्ली पिप्पलीमूलं । इति वैद्यके । षट्पर्व्वणि पुं ॥

षड्ग्रन्थिका स्त्री शटी । इत्यमरः ॥

षड्ग्रन्थी स्त्री वचा । इति शब्दरत्नावली ॥

षड्जः पुं तन्त्रीकण्ठोत्थितस्वरविशेषः । इत्यमरः । अस्य व्युत्पत्तिर्यथा । नासां कण्ठमुरस्तालु जिह्वां दन्तांश्च संश्रितः ॥ षड्भ्यः सञ्जायते यस्मात्

तस्मात् षड्ज इति स्मृतः ॥ स च मयूरस्वरतुल्यस्वरः । यथा । षड्जं रौति मयूरो हि गावो नर्दन्ति चार्षभं । अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमं ॥ इति भरतः ॥ तानसेनमतेऽस्य स्वराणां मध्ये प्रथमस्वरोऽयं । खरज इति लोके ख्यातः अस्योच्चारणस्थानं कण्ठः । अयं विप्रवर्णः । अस्याश्विकं नाम । अर्थात् एकस्वरमिलितः । सर्व्वस्वरापेक्षया ह्रस्वोऽयं । अस्य तालं एकः । अस्याष्टौ भेदा भवन्ति । इति सङ्गीतशास्त्रं ॥

षड्दुर्गं क्ली षट्प्रकारदुर्गं । यथा । धन्वदुर्गं १ महीदुर्गं २ गिरिदुर्गं ३ मनुष्यदुर्गं ४ मृद्दुर्गं ५ वनदुर्गञ्च ६ । इति महाभारते राजधर्म्मः ॥

षड्धा व्य षट्प्रकारं । इति व्याकरणं ॥

षड्विधं त्रि षट्प्रकारं । यथा । संज्ञा च परिभाषा च विधिर्नियम एव च । अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणं । इति मुग्धबोधटीकायां दुर्गादासः ॥ अपि च । तत्र तिक्ते गन्धहेतुर्नानारूपवती मता । षड्विधस्तु रसस्तत्र गन्धोऽपि द्विविधो मतः । इति भाषापरिच्छेदः ॥

षड्भुजः पुं षड्हस्तयुक्तः । यथा । भीम त्रिपाद त्रिशिराः षड्भुजो नवलोचनः । भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥ इति ब्रह्मवैवर्त्तपुराणे माहेश्वरज्वररूपं । चैतन्यदेवः ॥ स तु पुरुषोत्तमक्षेत्रे षड्भुजो भूत्वा श्रीजगन्नाथदेवशरीरे लीनोऽभूत् । इति लोकप्रसिद्धं ॥

षड्भुजा स्त्री फललताविशेषः । खरबुजा इति भाषा । तत्पर्य्यायः । मधुफला २ षड्रेखा ३ वृत्तकर्क्कटी ४ तिक्ता ५ तिक्तफला ६ मधुपाका ७ हस्तेन्द्रोरुः ८ षण्मुखा ९ अस्याः फलगुणाः । तिक्तं वाऽस्य तदनु मधुरं किञ्चिदम्लं विपाके निष्पक्वं चेत् तदमृतसमं तर्पणं पुष्टिदायि । तृष्णादाहश्रमविनाशं मूत्रकृच्छ्रे विधत्ते पित्तोन्मादापहरकफदं षड्भुजं वीर्य्यकारि । इति राजनिर्घण्टः ॥ चण्डिका । यथा ।

र्व्वदले चण्डिकां पीनवक्षःस्थ
लरुहां अग्निप्रभां षड्भुजां द
क्षिणे गदाभय वज्रधरां वामे
शक्ति शूल परशुधरां देवी-
मिति । रुद्रचण्डा । यथा । दक्षि
णदले रुद्रचण्डिकां स्वर्णादिया
भरणभूषितां प्रसन्नवदनां ष
ड्भुजां दक्षिणे वज्रशूलपरशु
धरां वामे पाशाङ्कुश केशधरां
देवीमिति । चण्डवती । यथा ।
वायुदले चण्डवतीं धूम्रवर्णां प्र
सन्नवदनां सर्व्वालङ्कारभूषितां
षड्भुजां दक्षिणे अङ्कुशपाशा
क्षसूत्रधरां वामे दण्ड शूल उ
त्पलधरां देवीमिति । इति
बृहन्नन्दिकेश्वरपुराणोक्त दु
र्गापूजापद्धतिः ॥
षड्रसः पुं मधुरादिषट्प्रकार
रसः । यथा । मधुरो लवणस्ति
क्तः कषायोऽम्लःकटु स्तथा ।
संतीति रसनीयत्वादेत एव
षडमी रसाः । एषां नाम लक्षणे
मधुरोऽल्पमित्याद्यं विल्वादौ
सच लक्ष्यते । लवणस्तु पटुः
प्रोक्तः सैन्धवादौ सदर्प्यते ।
तिक्तस्तु पिचुमर्द्दादौ व्यक्त
मास्वाद्यते रसः । कषायस्तुवर
ल्लकः सच शृङ्गीफलादिषु । क
टुस्तु तामसेवः स्यान्मरीचादौ स
चेष्यते । इतिराजनिर्घण्टः ॥
एषो गुणा लक्षणशाद्रूद्रव्याः
षड्रात्रं क्ली षडहः । यथा । सद्यः
शौचं भवेद्विप्रन् तथाचोक्तंच
तुर्व्विधं । गर्भ स्रावेच वेदोक्तं
एर्व्वकाले त्वचेतसः ॥ ब्राह्म
णानां महाराज क्षत्रियाणामि
नत्रयं । षड्रात्रन्त्वेव वैश्यानां
शूद्राणां द्वादशाह्निकं ॥
इति वामने १४ अध्यायः ॥
षड्रेखा स्त्री षड्भुजा । इतिरा
जनिर्घण्टः । षड्राजीच ॥
षड्लवणं क्ली मज्जापेतंपंच
लवणं । इतिराजनिर्घण्टः ॥
षड्वक्त्रः पुं कार्त्तिकेयः । यथा
यते स्नातो विशाखोऽसौ ख्यातो
लोकेषु षण्मुखः । स्कन्दो वि
शाखः षड्वक्त्रः कार्त्तिकेयश्च
विश्रुतः । इति मत्स्यपुराणे ।
१३४ अध्यायः ॥
षड्विंदुः पुं विष्णुः । इति त्रि
काण्डशेषः । कीटभेदः । इति
मेदिनी शिरोरोगस्य पक्वौ
लविशेषः । यथा । एरण्डमूले
नगरं शलाकां जीवनिकां से

न्धव शाल्मलिकेच भृंग विडंगाम
मधुयष्टिकां च विशोषयं क्रम
तिलस्य तैलं । अजपयसेल-
विमिश्रितञ्च चतुर्गुणे भृंगर
से विपक्कं । षड्विन्दवो नासि
कयोःप्रदेया सर्वा शिरोत्थाःशि
रसो विकारान् । च्युतांश्च केशा
न् पलितांश्च दन्तान् निर्बध्य
मूलान् सदृढीकरोति ॥ सु
पर्ण गृध्रप्रतिमंच चक्षुःऊर्द्ध
तिवाहौ स्थिकं बलंच । जीवंति
काच हरीतकी शाकविशेषः ॥
इति भावप्रकाशः ॥
षण्डः पुं वृषभः । षाँडू इति
भाषा । तत्पर्यायः ॥ गोपतिः
१ इट्चरः २ इत्यमरः ॥ षण्ढः
४ शण्डः ५ शण्ढः ६ इतिश-
ब्दरत्नावली । क्लीवे । इतिजटा
धरामरटीके । समूहः । इति
हेहः ॥
षण्डः पुं क्ली पद्मादिकदं
बं । पद्मकुमुदादिसमूहः । इत्यम
रः । षण्डाली स्त्री तैलमाने । छ
टाक् । इतिभाषा । सरसी । कामु
कस्त्री । इति मेदिनी ॥ शुद्धोक्ति
तमेदिन्यां दंत्यसकारादौलि
खिता ॥
षण्ढः पुं नपुंसकं । इति राज-
निर्घण्टः हेमचन्द्रश्च तद्दर्शन
स्पर्शनयोः प्रायश्चित्तं । यथा ।
तालपत्रेन विहिताम् वीरही
नां तथास्त्रियं । देवता पितृ
मङ्खासु यज्ञसत्रादि निन्दकैः
कृत्वा तु स्पर्शनालापं शुद्धेता
र्कावलोकनात् । अवलोक्यत
थादर्शं मेमनने पतिते शवे-
विधर्मि सूतिका षण्ढ विवस्त्रा
तावसायिनः । मृत नियतिको
श्चैव परदाररताश्चये ॥ एत
देवहिकर्त्तव्यं प्राज्ञैः शोधन-
मात्मनः । अभोज्य सूतिका-
षण्ढ मार्ज्जाराखुश्च कुक्कुटान्
पतितापविद्धचाण्डाल मृतहा
रांश्च धर्म्मवित् । संस्पृश्य शु
द्ध्यते स्नानादुदक्या ग्रामसू-
करौ ॥ इति मार्कण्डेये सदा
चाराध्यायः ॥
षण्मास्यः त्रि षण्मासः । ष
ण्मासेभव । षण्मास शब्दात्कर्म
णिल्य प्रत्ययेननिष्पन्नः ॥
षण्मुखः पुं कार्त्तिकेयः । इतिह
लायुधः । षट्संख्यकवदने क्ली
तद्वति त्रि ॥
षण्मुखा स्त्री षड्भुजा । इतिराज

निर्घण्टः ॥
षत्वं क्ली मूर्द्धण्यषकारस्यभा
वः। यथा षत्व यत्वे। इति मुग्ध
बोधव्याकरणं ॥
षद क गतौ। भ्वा॰उ॰ऐर्वो॰ये।
इति कविकल्पद्रुमः। मूर्द्धण्या
दिः। क आसादयति ॥ इति दु
र्गादासः ॥
षद ऌ ज औ श विषादे स्था
ने। गतौ। इति कविकल्पद्रुमः
ऌ असदत्। ज साद॰सदः। औ
आसात्सीत्। श सीदती सीदं
ती। विषाद आकुलीभावः ॥
सीदतिवापा रासगृहे पारणं
हिंसा। इति दुर्गादासः॥
षन सम्भक्तौ। इतिकविक
ल्पद्रुमः। सम्भक्तिः सेवनं। सन
ति गुरुं लोकः। इतिदुर्गादासः
षन द म उ दाने। इतिकवि
कल्पद्रुमः। द म सनोति स
नुते। उ सनित्वा सत्वा। इति
दुर्गादासः ॥
षन्ब गतौ। इति कविकल्पद्रु
संचति। इतिदुर्गादासः ॥
षन्ज ञौ णि संगे। इति क
विकल्पद्रुमः। ञौ असाङ्क्षीत्। णि
सक्तोऽस्ति। सजति वपुषि·
वासः। इतिदुर्गादासः ॥
षप सम्वे। इतिकविकल्पद्रुमः
सपति असीषपत्। सम्बः सम्ब
यः। इतिदुर्गादासः ॥
षम वैक्लव्ये। इति कविकल्प
द्रुमः। वैक्लव्यं विकलीभावः। स
मति यद्वियोगेन सीमंतिन्यःस्म
रातुराः। इतिदुर्गादासः ॥
षम तू क वैक्लव्ये ॥ इतिकवि
कल्पद्रुमः ॥ सियमयियति ॥
इतिदुर्गादासः ॥
षम्ब सर्पणे। इतिकविकल्पद्रुमः
सम्बति इतिदुर्गादासः ॥
षर्ज अर्जने। इति कविकल्पद्रु
मः ॥ सिषर्जयिषति । सर्जति
धनं लोकः ॥ इति दुर्गादा
सः ॥
षर्वसर्पणे। इतिकविकल्पद्रुमः
सर्वति। इतिदुर्गादासः ॥
षर्षपी स्त्री पक्षिविशेषः। यथा
हापुत्रिका खंजनिका षर्षपी
खंजनाकृतौ। इति शब्दरत्नाव
ली ॥
षल गतौ। इतिकविकल्पद्रुमः
सलति। सिषालयिषति। इति
दुर्गादासः ॥
षष्टिः स्त्री संख्याविशेषः। षाट

इति भाषा। इति ज्योतिषं ॥
षष्टिकः पुं धान्यविशेषः। ष
ष्टिरात्रेण पच्यते षाटिया इ
तिख्यातिस्तभूती। इत्यमरभरतौ
तत्पर्य्यायः। षष्टिशालिः २ षष्टि
जः ३ स्निग्धतण्डुलः ४ षष्टि
वासरजः ५ अस्य गुणाः। गौ
रो नीलः षष्टिकोऽयं द्विधा
स्याद्वाद्यो रुच्यः शीतलो दो
षहारी। बल्यः पथ्या दीपनो
वीर्य्यवृद्धिं दत्ते तस्मान्किंचि
हनो द्वितीयः ॥ इति राजनि
र्घण्टः। षष्टिसंख्येक्रीते त्रि।
षष्टिका स्त्री षष्टिकधान्यं। य
था। हैमन्तिकं सितास्विन्नं धा
न्यमुद्गा स्तिलायवाः कलायकं
गुनीवास्तु वास्तूकं हिलमोचि·
का। षष्टिका कालशाकंच मू
लकं केमुकेतरत्। इति तिथ्या
दितत्वे हविष्यान्नप्रकरणीय
स्मृतिवचनं। किंच। शरदि ष
ष्टिकाभिः पार्वणं नित्यमिति
वाचस्पतिमिश्राः ॥
षष्टिक्य त्रि षष्टिकधान्योपयु
क्तक्षेत्रादि। इत्यमरः ॥
षष्टितमः त्रि षष्टेः पूरणः
षष्टिशब्दात् तमट् प्रत्ययेननि
ष्पन्नः। इति मुग्धबोधव्याकरणं
षष्टिधा अ षष्टिप्रकारं। षष्टि
शब्दात् धाच् प्रत्ययेन निष्पन्नं ॥
षष्टिमनः पुं हस्ती। षष्टिवर्षप
र्य्यन्ते वयःपर्य्यवस्थितत्वात् षष्टि·
मतः। इतिसारस्वताभिधाने ॥
शब्दमालाच ॥
षष्टिलता स्त्री भ्रमरमारी। इ
तिराजनिर्घण्टः ॥
षष्टिसंवत्सरः पुं प्रभवादिष
ष्टिसंख्यकवर्षं। यथा। अथ ष
ष्टिसंवत्सराणामा। शाकेंद्रका
लः पृथगाकृतिघ्नः २२ शशांक
नंदाश्वियुगैः ४२२१ समेतः। शा
राद्रि वस्विंदु १८७५ हृतः सलब्धः
षष्ट्याववशिष्टाः प्रभवादयोब्दाः
बृषबर्ज्जित यछेषं सूर्य्यैःसह
ष्यगोऽसिभिः ९। हृतयुक्ता
मतः स्वाग्नि हृतेष्वे मासका
दयः। अस्यार्थः। शाकेंद्रका
लः शाकराज्ञा हृकालः पृथक
द्विष्टः तत्रैव आकृतिघ्नः २२।
द्वाविंशत्या गुणितः शशांक नं
दाश्वि युगै केकनवत्यधिक शा
तद्वयाधिक चतुःसहस्रैः समे
तोऽङ्कः शरादि वस्विन्दुहृतः
पंचसप्तत्यधिकाष्टादशशतै·

यावत् संख्यं हंदे शक्नोति ताव प्रभवे परिकीर्त्तिताः १ सु
वता हतः कर्त्तव्यः । सलब्धः भिक्षे क्षेम मारोग्यं सर्वेव्याधि
एर्वशकाद्वः शेषमादिना ल विवर्जिताः । प्रशान्ता मानवाः
ब्धसंख्यया युतः कार्यः षष्ट्या सर्वे वसुधा वसुंधरा । सु
प्रशेषषष्ट्यादेषोऽङ्कः एवंवत्ः ष्टा सुष्ट जनाः सर्वे विभवे व
षष्ट्या हते लब्धसाव शिष्टे प्र वरानने २ रोगा बहु विधा
भवादयः । एकावशेषे प्रभवः श्चैव मनुष्या वाजिकुञ्जराः ।
स्याद्यवशिष्टे विभवादिः । वर्ष सर्वप्रव प्रणश्यन्ति शुक्लेवर्षे
वर्ज्जेन यच्छेषं वर्षान्तिरिक्तं श वरानने ३ । उत्सन्नञ्च जगत्सर्वं
राहि वसिवि हतावशिष्टे तत् यमधान्य समाकुलं । नित्यात्
स्रैष्यं द्वादशाभिः संख्य स्वामि सवः प्रजावृद्धिः प्रमोदे जाय
भिः षष्ट्यासते युक्तमत इत्यने ते प्रिये ४ नीरोगाश्च निरावा
न वाष्टिहतावशिष्टः शेषकाद्दं धा मानवा विगतद्विषः । व
ङ्कः षष्टिहत लब्धांशके त्वाष्टि हुक्षीरास्तथागावः प्रजाप
हते विंशतिहते प्रवशिष्टा श्रे न्येव वरानने ५ निरातंके जरा
शका लब्धा मासाः स्युरिति । त्सर्वे यत्र यौवन गर्विते । श्री
प्रभवादि षष्टि वर्षाण्युपक्रम्य । मिरासि प्रजाः सर्वा निरोगास्स
श्रीचार्यात् विंशति श्रेष्ठी द्विती· र्हावरानने ६ सुभिक्षं क्षेम मा
यादैश्चर्वीस्मृता । तृतीया रुद्रदै रोग्यं वर्षाकाले सुशोभनं ।
वत्या श्रेष्ठास्त्याप्यमाभवेत् । भ शस्यवृद्धिं विजानीयात् श्री
विष्यपुराणोस्मिन्नेव उवाच षष्ट्या मुखे संवत्सरे दिने ७ बहुक्षीरास्ता
ह्येक षष्ट्या स्वरूपाः सौम्याश्च ये श्चावो धान्यञ्च बलवत्तरं जाये
प्रिये । संवत्सरफलंशुत्वं प्रभवा ते सर्वशस्यानि भावे वर्षे वरा
द्दौ वरानने । बहुतोया स्तथा मे नने ८ महार्घं जायते सर्वं घृ
घाः सर्वशस्याच मेदिनी । बहु त तैल रसादिकं ॥ प्रजोत्पत्ति
क्षीरास्तथा गावो व्याधिरोगवि भवे हृद्धि यूनि संवत्सरे शुभे
वर्ज्जिताः ॥ प्रशान्ताः पार्थिवाश्चे ९ । निष्पत्तिः सर्वशस्या·

तं मध्या यातिकीर्त्तिता । इक्षु यते सर्वदेशे सुलोचने । सोरा
क्षीर गुडादीनां प्रबलत्वं वरान ष्ट्र नाटदेशे च पार्थिवे नाश
ने १० सुभिक्षं क्षेम मारोग्यं· संशयः ११ दुर्भिक्षं जायते घो
कार्पासस्य महार्घता । लवण रे सर्वोपद्रव संयुते । अनावृ
मधु गव्यंच इक्षुरे दुर्लभं प्रिये ष्टिः समाख्याता व्ययेसंवत्सरे
१२ सुभिक्षं क्षेममारोग्यं प्रशा प्रिये ॥ २० उद्यतोवर्षणे मे
ताः पार्थिवाः प्रिये । तस्करो घो जले नैवोपयच्छति ॥
पद्रुते वित्तं बहुधान्य वरानने महार्घं सर्वजितेषे सर्वमेवव
१३ ॥ राष्ट्रभंगाश्च दुर्भिक्षं तस्क रानने २१ । कोद्रवाः शालि·
रैश्चोपपीडनं । जानीयाद्धिय मुद्गाश्च कंगु माषा स्तथैवच
हं घोरं प्रमाथिनि वरानने ॥ सुलभं जायते सद्यः जगाहे सर्व
१३ ॥ जायंते सर्वशस्यानि मे धारिणि २२ अनावृष्टि प्रवल्लो
दिनी निरुपद्रवा ॥ लवणं का धान्याषधि प्रपीडनं । जाय
मधुगव्यंच महार्घं विक्रमे ते मानुषे कष्टं विरोधिनि न सं
प्रिये ॥ १४ ॥ कोद्रवाः शालि शयः २३ सर्वाःप्रजाः प्रपी·
मुद्गाश्च शालि माषा स्तथैवच डंते व्याधिः शोकश्च जायते ।
महार्घं जायते सर्वं वृषेच सुर· शिरो वक्षोऽक्षिरोगाश्च पापार्द्धि
वंदिते ॥ १५ । चणकाश्च कुस्मा· विकृते जनाः ॥ २४ ॥ उपद्रुतं
याश्च अन्यञ्च विदले प्रिये । म जगत्सर्वं तस्करैर्मूषिकैःखगैः
हार्घंजायते सर्वं चित्रभानोव पीडिताश्च प्रजाःसर्वाः देशभं
रानने १६ । सुभिक्षं क्षेममारो गःखरे प्रिये ॥ २५ सुभिक्षं क्षे
ग्यं विषयञ्च निरुपद्रवं सर्वहा ममारोग्यं शस्यं भवति शो
रोभवे श्रेयान् स्वभौमो देव भनं ॥ बहुक्षीरा स्तथा गावो
पूजिते १७ अति वृष्टिश्च जा नंदने नन्दने प्रिये २६ अल्प
यते धान्यस्यापि प्रपीडनं । श तोयास्तथा मेघा वर्षन्ति ख
स्यं भवति सामान्यं दारुणेदे ण्डमण्डले ॥ तपन्ति सर्व
वनंदिते । १८ । बहुशस्यानि जा शस्यानि विजये नात्र संशयः २७

तत्रियाश्च तथावैश्याः शूद्रा
श्च नट नर्त्तकाः। पीडिता
स्तिवरारोहे जये सर्वेनसंश
यः २९ सरोगाश्च तथादेविह
हज्वरसमन्विते ॥ अभिभूतं
जगत्सर्वं मन्मथे सुरवन्दिते
३१ तृष्णयान्न तया देवि स
र्वेशस्य महार्घता। व्यवहारा
श्च नश्यन्ति दुर्भिक्षदुःखोःप्र
जाः।३२ पीड्यंते सर्वशस्यानि दे
शोदेशे शुचिस्मिते हेमलम्बे
प्रजाः सर्वाःक्षीयंते नात्रसंशयः
३३ तस्करैः पार्थिवैश्चैव भू
भिभूत मिदं जगत् ॥ सुर्वो
भवति सामान्या विलम्बे तुभ
येमहत् ३४॥ विषमस्थं जग
त्सर्वं विरोधेभय संप्लवे। वि
कारी सर्वतोःपाथो ममकार्यं
तु नान्यथा ३५ क्वचिद्वर्षति प
र्जन्यो देशे खंडितमण्डलः।
दुर्भिक्षं सर्वरीवर्षे व्यवहारो
विपर्ययः ३६ दुर्भिक्षं जाय
तेसर्वा मेदिनीदुष्यति प्रिये।
प्लवे स्रवंति तोयानि मानवा
दुःखिताभुवि॥ ३७ शुवर्णम्
धान्यानि जगत्सर्वं शुभा
भवे। ब्राह्मणावणिजस्तथाः

सुभिक्षं च शुभकृन्प्रिये ३८ सुभि
क्षं तेन मारोग्यं नृपा गोब्रा
ह्मणाः प्रिये। सुस्थिताः शोभ
ने वर्षे प्रजाः सर्वाः सुलोचने
३९ विषमस्थं जगत्सर्वं व्याकुले
समुदाहृतं। जनानां जायते भ
ये क्रोधे क्रोधः परस्परं ४०
सर्वत्र जायते तेषां सर्वशस्यम
हार्घता। विश्वावसौ वरारो
हे कार्पासस्य महार्घता ४१
पार्थिवै नृपसैन्यैश्च समस्तैः
खण्डमण्डले प्रपीड्यन्ते ज
नाः सर्वा भयभीताः पराभवे
४२ नृपा धान्यानि पीड्यन्ते श्री
के वर्षति वासवः सर्वेशा पी
डिताः सर्वाः प्रजाश्च सुरवंदिते
४३ जायंते सर्वशस्यानि सुभि
क्षं निरुपद्रवं सौम्यदृष्टि र्भ
वेद्राज्ञा कालिके च शुभं वदेत्
४४ सुभिक्षं तेन मारोग्यं साधवे
च निरुपद्रवं। सौम्यदृष्टि र्भवे
द्राज्ञा सौम्यं सौख्यं प्रकीर्तितं
४५ तोयपूर्णा भवेन्मेघा
वर्षते च दिने दिने। निरुप
द्रवाश्च राजानः सर्वत्र धाराणां
प्रिये॥ ४६ वासवो वर्ष
ते देवि देशोचाखण्ड

मण्डले। अहिच्छत्रे कान्यकुब्जे
विरोधि कृषिनाशकृत ४७ अ
भिभूतं जगत्सर्वं क्लेशे बैकवि
धैःप्रिये। मारुतैः फलदा हैश्च
परिधाविनि शोभने ४८॥
निष्पत्तिः सर्वशस्यानां सुभि
क्षं भवति प्रिये। प्रमाथिनि ज
लोत्कारी जलदो मोदते प्रजा
४९ निष्पत्तिः सर्वशस्यानां स
र्वशस्य महार्घता। घृतं तैल
समं याति आनंदे नंदति प्र
जा ५० कोद्रवाः शालिमु
द्गाश्च पीड्यंते वरवर्णिनि॥
सर्वौषधानि धान्यानि राक्ष
से निष्ठुराः प्रजाः ५१ दुर्भिक्षं
जायते घोरं धान्यौषधि प्रपी
ड्यते। अनले च समाख्याते ना
त्र कार्या विचारणा ५२ देश
भंगाः सुदुर्भिक्षं समाख्यातं क
थयाम्यहं। पिंगले चाल्पमेघा
स्तिदुर्भिक्षं नर्मदातटे ५३ गो
महिष्या विनश्यंति येचान्ये
नटनर्तकाः। वासवो वर्षते दे
वि शस्यंच नहि जायते। तिल
सर्षप माषादि कार्पासानां म
हार्घता। गोमहिष्याः सुवर्णानि
कोसलाश्च यशोषतः॥ तत्सर्वं

देवि विक्रीय कर्त्तव्यो धान्यसं
चयः। तेन धान्येन लोकोऽयं
निस्तरिष्यति दुर्दिने। पार्थि
वो मोषकादीनां फालयुक्ते
प्रपीडिताः ५४ तोयपूर्णाः
स्तता मेघा वरुशस्याच मेदिनी
निष्ठुराः पार्थिवा देवि सिद्धार्थे
च वरानने ५५ अल्पतोया च
नाश्चैव कीटकाः प्रबलास्तथाः
विरुद्धाः पार्थिवा देवि रौद्रे सं
वत्सरे प्रिये ५६ दुर्भिक्षं मध्यमं
प्रोक्तं व्यवहारो न वर्त्तते। भवे
द्वैमध्यमा वृष्टि दुर्मती समु
पस्थिते ५७ दुर्भिक्षं जायते
लोकाः सर्वे दुःखिगवर्जिताः
प्राणिनां जायते हर्षो दुंदु
भौ वरवर्णिनि ५८ महिषी
गो हिरण्यादि ताम्रकांस्याद्य
पोषतः। तत्सर्वं देवि विक्री
य कर्त्तव्यो धान्यसंचयः। रु
द्रे संवत्सरे देवि क्रूरवृष्टि र्नरा
धिपः। मानवाः कृष्णचे शास्त्र
संग्रामे कुपितं भवेत् ५९ दुर्भि
क्षं मरणं घोरं धान्यौषधि प्रपी
ड्यते। पापरोगो भवेद्देवि रक्ता
क्षेः मरवंदिनि ६० रोगो
मरणं दुर्भिक्षं विरोधो वकु

सङ्कुले ॥ क्रोधेन विषमे सर्व्वे समाख्याते दुरप्रिये ५९ मेदिनी लभते देवि सर्व्वभूतं चराचरं देशभङ्गश्च दुर्भिक्षेण येऽस्तीयते प्रजा ॥ सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये कौमुदी नर्म्मदायाश्च यमुना नर्म्मदा तटे । विन्ध्यायां सैन्धवश्चापि विनश्यन्ति नसंशयः । सिंहले मध्यदेशाश्च कालञ्जरे तथैव च । क्षयेक्षयन्ति सर्व्वाणि नान्यथा वरवर्णिनि ६- इति ज्योतिस्तत्त्वं ॥

षष्टिहायनः । पुं राजाः । धान्यविशेषः । इति मेदिनी राजनिर्घण्टश्च । षष्टिसंख्यकवत्सरः । तत्संख्यवर्षायुते त्रि ॥

षष्टिः त्रि षट्साहस्राः । इति मेदिनी ॥

षष्टकः त्रि षट्कः । षट्शब्दात् कण् प्रत्ययेन निष्पन्नः ॥

षष्ठान्नकालकः स्त्री त्रिमहानेतरभोक्ता । यथा ह्यत्रैव यंतरे भुक्ते प्राह्लः षष्ठान्नकालके । इति त्रिकाण्डशेषः ॥

षष्ठिका स्त्री षष्ठी । यथा चामुण्डेत्यत्र षष्ठिकेत्यहो । इति दुर्गोत्सवीयबलिदानप्रकरणे तिथ्यादितत्त्वं ॥

षष्ठी स्त्री कात्यायनी । इति मेदिनी । षोडशमातृकान्तर्गतमातृकाविशेषः । सा प्रकृतेः षष्ठीकला स्कन्दभार्य्या च । तस्याः स्वरूपं यथा (यथा । प्रधानं शास्त्ररूपा॰) देवसेना च नारद । मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता । शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी । तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी । षष्ठांशरूपा प्रकृते स्तेन षष्ठी प्रकीर्त्तिता । पुत्रपौत्रप्रदात्री च धात्री त्रिजगतां सती । सुन्दरी युवती रम्या सततं भर्त्तुरन्तिके ॥ स्थाने शिशूनां परमा वृद्धरूपा च योगिनी ॥ पूजा द्वादशमासेषु यस्या विश्वेषु संततं ॥ पूजा च सूतिकागारे । परा षष्ठदिने शिशोः ॥ एकविंशतिमे चैव पूजा कल्याण हेतुकी । शश्वन्नियममिता चैषा नित्या काम्याऽतः तःपरा ॥ मातृरूपा दया ।

रूपा शश्वद्रक्षणरूपिणी जले स्थले चान्तरीक्षे शिशूनां स्वप्नगोचरे । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः ॥

अपि च । श्रीनारायण उवाच षष्ठांशा प्रकृते र्या च सा च षष्ठी प्रकीर्त्तिता । अस्याः पूजाविधौ ब्रह्मन् इतिहासमिमं शृणु राजा प्रियव्रत आसीत् स्वायम्भुवमनोः सुतः । योगीन्द्रो नवहेज्जार्य्यां तपस्यासु रतः सदा ॥ ब्रह्माज्ञयाच यत्नेन कृतदारो बभूव सः । सुचिरं कृतदारश्च न लेभे तनयं ततः । पुत्रेष्टियज्ञं तञ्चापि कारयामास कश्यपः । मालिन्यै तस्य कान्तायै मुनि र्यज्ञचरुं ददौ । भुक्त्वा चरुञ्च तस्याश्च सद्यो गर्भो बभूव ह । दधार तञ्च सा देवी दैवेद्वादश वत्सरं । ततः सुसाव सा ब्रह्मन् कुमारं कनकप्रभं सर्व्वावयवसंपन्नं मृतमुत्तानलोचनं । श्मशानञ्च ययौ राजा गृहीत्वा बालकं मुने । पतस्मिन्नन्तरे तत्र विमानञ्च ददर्श ह ॥ ददर्श तत्र देवीञ्च कमनीयामनोहरां । दृष्ट्वा तां पुरतो राजा तुष्टाव परमादरं प्रपच्छ राजा तां दृष्ट्वा ग्रीष्मसूर्य्यसमप्रभां तेजसा ज्वलितां कान्तां शान्तां स्कन्दस्य नारद । प्रियव्रत उवाच कान्ते सुशोभनेकस्य कान्ते कान्तासि सुव्रते ॥ कस्य कन्या वरारोहा धन्या मान्या च योषितां । देवसेनोवाच ब्रह्मणो मानसी कन्या देवसेनाहमीश्वरी । दृष्ट्वा मां मनसा धाता ददौ स्कन्दाय भूमिप । मातृकासु च विख्याता स्कन्दभार्य्या च सुव्रता विश्वे षष्ठीति विख्याता षष्ठांशा प्रकृते र्यतः । इत्येवमुक्त्वा सा देवी गृहीत्वा बालकं मुने । महाज्ञानेन तपसा जीवयामास लीलया । गृहीत्वा बालकं देवी गगने गन्तुमुद्यता । पुनस्तुष्टाव तां राजा शुष्ककण्ठोष्ठतालुकः । नृपस्तोत्रेण सा देवी परितुष्टा बभूव ह उवाच तं नृपं ब्रह्मन् वेदोक्तं कर्म्मनिर्म्मितं । देवसेनोवाच । त्रिषु लोकेषु राजा त्वं स्वायम्भुवमनोः सुतः । मम पूजाञ्च सर्व्वत्र कारयित्वा स्वयं कुरु । तदा दास्यामि पुत्रं ते कुलप

मेमनोहरं। इत्येवमुक्त्वा सा देवी तस्मै तद्बालकं ददौ॥ राजा चकार स्वीकारं तत्पुत्रं घ्येन सुव्रतः। जगाम देवी स्वर्गञ्च दत्वा तस्मै शुभं वरं। आजगाम महाराजः स्वगृहं हृष्टमानसः। देवीं तां पूजयामास ब्राह्मणेभ्यो धनं ददौ। राजा च प्रतिमासेषु शुक्लषष्ठ्या महोत्सवं। षष्ठ्या देव्याश्च यत्नेन कारयामास सर्वतः। बालानां सूतिकागारे षष्ठाहे यत्नपूर्वकं तत्पूजां कारयामास चैकविंशतिवासरे। बालानां शुभकार्य्ये च शुभान्नप्राशने तथा सर्वत्र वर्द्धयामास स्वयमेव चकार ह। ध्यानं पूजाविधानञ्च स्तोत्रं मत्तो निशामय। यत् श्रुतं धर्म्मवक्त्रेण कौथुमोक्तञ्च सुव्रत। शालग्रामे घटे वाथ वटमूलेऽथवा मुने। भित्तौ पुत्तलिकां कृत्वा पूजयेद्वा विचक्षणः। षष्ठांशां प्रकृतेः शुद्धां सुप्रतिष्ठाञ्च सुप्रभां। सुपुत्रदाञ्च शुभदां दयारूपां जगत्प्रसूं। श्वेतचम्पकवर्णाभां रत्नभूषणभूषितां। पवित्ररूपाम्परमां देवसेनामहं भजे॥ इति ध्यात्वा स्वशिरसि पुष्पं दत्वा विचक्षणः। पुनर्ध्यात्वा च मूलेन पूजयेत् सुव्रतां सतीं। पाद्यार्घ्याचमनीयैश्च गन्धपुष्पप्रदीपकैः। नैवेद्यैर्विविधैश्चापि फलेन शोभनेन च॥ मूलेनों ह्रीं षष्ठीदेव्यै स्वाहेति विधिपूर्वकं। अष्टाक्षरं महामंत्रं यथाशक्ति जपेन्नरः। ततः स्तुत्वा च प्रणमेद्भक्तियुक्तः समाहितः। स्तोत्रञ्च सामवेदोक्तं वरपुत्रफलप्रदं। अष्टाक्षरं महामंत्रं लक्षधा यो जपेन्मुने स पुत्रं लभते नूनमित्याह कमलोद्भवः॥ स्तोत्रं शृणु मुनिश्रेष्ठ सर्वकामशुभावहं वाञ्छाप्रदञ्च सर्वेषां गूढं वेदेषु नारद। प्रियव्रत उवाच। नमो देव्यै महादेव्यै सिद्ध्यै शान्त्यै नमो नमः। शुभायै देवसेनायै षष्ठ्यै देव्यै नमो नमः॥ वरदायै पुत्रदायै धनदायै नमो नमः। सुखदायै मोक्षदायै षष्ठीदेव्यै नमोनमः। शक्तिषष्ठीशरूपायै सिद्धायैच नमो नमः। मायायै सिद्धयोगिन्यै

षष्ठीदेव्यै नमोनमः। सारायै सारदायैच परायै सर्वकारिण्यै। बालाधिष्ठातृदेव्यै च षष्ठीदेव्यै नमोनमः॥ कल्याणदायै कल्याण्यै फलदायैच कर्म्मणां। प्रत्यक्षायैच भक्तानां षष्ठीदेव्यै नमोनमः। पूज्यायै स्कन्दकान्तायै सर्वेषां सर्वकर्मसु। देवरक्षणकारिण्यै षष्ठीदेव्यै नमोनमः। शुद्धसत्वस्वरूपायै वन्दितायै नृणां सदा। हिंसाक्रोध वर्जितायै षष्ठीदेव्यै नमोनमः॥ धनं देहि प्रियां देहि पुत्रं देहि सुरेश्वरि। धर्म्मं देहि यशो देहि षष्ठीदेव्यै नमो नमः। देहि भूमिं प्रजां देहि विद्यां देहि सुपूजिते॥ कल्याणञ्च जयं देहि षष्ठीदेव्यै नमोनमः॥ इति देवीञ्च संस्तूय लेभे पुत्रं प्रियव्रतः। यशस्विनञ्च राजेन्द्रं षष्ठीदेवी प्रसादतः। षष्ठीस्तोत्रमिदं ब्रह्मन् यः शृणोति च वत्सरं। अपुत्रो लभते पुत्रं वरं सुचिरजीविनं। वर्षमेकञ्च या भक्त्या संयतेदं शृणोति च। सर्वपापविनिर्मुक्ता महावन्ध्या प्रसूयते। वीरं पुत्रञ्च गुणिनं विद्यावन्तं यशस्विनं। सुचिरायुष्मन्तमेव षष्ठीदेवीप्रसादतः। काकवन्ध्या च या नारी मृतापत्या च या भवेत्। वर्षं श्रुत्वा लभेत् पुत्रं षष्ठीदेवीप्रसादतः। रोगयुक्ते च बाले च पिता माता शृणोति चेत्। मासञ्च मुच्यते बालः षष्ठीदेवीप्रसादतः। इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ४५ अध्यायः। तिथिविशेषः। स तु शुक्लकृष्णपक्षभेदेन द्विविधः। तत्र चन्द्रस्य ह्रस्वानुकूल षष्ठकलाक्रियारूपः शुक्लपक्षीयः। तस्य क्षयानुकूलषष्ठकलाक्रियारूपः कृष्णपक्षीयः॥ तत्कृत्यादि यथा। अथ षष्ठी सा सप्तमीयुता ग्राह्या युग्मात्। राजमार्त्तण्डे। ज्येष्ठे मासि सितपक्षे षष्ठी चारण्यसंज्ञिता व्यजनैककरास्तस्यां भ्रमन्ति विपिने स्त्रियः। तां विन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्तिच। कंदमूलफलाहारा लभन्ते सन्ततिं शुभां कंदं सूरणादि। मूलं तदितरत्। भविष्ये। येयं मार्गशिरे मासि षष्ठी भरतसत्तम। पुण्या पापह

रायन्या शिवा शान्ता गुहप्रिया
देवीपुराणे चैत्र मधिकृत्य। ष
ष्ठ्यां स्कन्दस्य कर्त्तव्या पूजा स
र्व्वोपचारिका। इहैव स्नातसौभा
ग्य मन्ते विष्णुपुरं व्रजेत्। इयमे
व स्कन्दषष्ठी पञ्चमीयुतैव ग्रा
ह्या। कृष्णाष्टमी स्कन्दषष्ठी शि
वरात्रिचतुर्द्दशी। एताः पूर्व्वयु
ताः कार्य्यास्तिथ्यन्ते पारणं भवे
त्। इति ब्रह्मवैवर्त्तवचनात्। वि
ष्णुधर्म्मोत्तरे। अष्टमीञ्च तथा षष्ठी
नवमीञ्च चतुर्द्दशीम्। विशेषेण
न कुर्व्वीत पर्व्वसंयोग एव च॥
इति तिथ्यादितत्त्वे॥ सा च का
र्त्तिकेयाभिषेकतिथिः। यथा।
स्वयं स्कन्दो महादेवः सर्व्वपाप
प्रणाशनः। तस्य षष्ठीति तिथिस्त
दादभिषेके पितामहः। अस्यां
फलाशनो यस्तु यजेन्नियत
मानसः। अपुत्त्रोऽपि लभेत् पु
त्त्रान् अधनोऽपि लभेद्धनम्। यं
य मिच्छेत मनसा तं तं लभति
मानवः। यश्चैतत्पठति स्तोत्रं का
र्त्तिकेयस्य मानवः। तस्य गेहे कु
माराणां क्षेमारोग्यं भवेद्ध्रुवम्॥
इति वाराहे स्कन्दोत्पत्तिर्नामा
ध्यायः। तत्र जातफलं विद्वान्
वरिष्ठ स्वतनुः प्रकीर्त्तिः प्रलम्ब
बाहु र्गुणकीर्त्तिमान्नरः। सप्तमति
शायन पुत्त्रयुक्तः षष्ठी प्रसूतो
मनुजश्चिरायुः॥ इति कोष्ठीप्र
दीपः॥ तत्र यात्राकरणदोषो
यथा। पञ्चम्या मीप्सितार्थः
स्यात् षष्ठ्यां व्याधियुतो भवेत्।
सप्तम्या मर्थलाभः स्यादष्टम्यां
मंत्रपीडनं। षष्ठ्यष्टमीद्वादशी
षु न गच्छेत्त्रिदिनस्पृशि॥
इति ज्योतिस्तत्त्वं॥
षस लव स्वापे। इति कविक
ल्पद्रुमः॥ मूर्द्धन्यादिः। लुप्तस्ति
र्व्वैदिकः। स्वापः शयनं॥
इति दुर्गादासः॥
षसज सर्पणे। इति कविक
ल्पद्रुमः। दन्त्यसोपधः। क्विपि
संयोगादिलोपे सक्। सज्जति
केचोपि परमात्तरं नच पदेषु
संसज्जते। इति प्राकृतलेखा
एकत्वानित्यत्वात्॥ इति
दुर्गादासः॥
षस्त र लव स्वप्ने। इति कवि
कल्पद्रुमः। मूर्द्धन्यादिः दन्त्य
सोपधः। इ संस्यते। नसध्वा
पाठेऽपि नस्योपधत्वाभावे देव
लोपाभावे इदनुबन्धो वेदे

युद्धारम्भेदार्थः। लु संक्लि
र्वैदिकः। इति दुर्गादासः॥
षह य कि शक्तौ। इति कवि
कल्पद्रुमः। शक्तिरिह दैवादि
कस्य शकधातोरूपं तेन त्वम
इत्यर्थः। य सह्यति दुःखं लो
कः सहते इत्यर्थः। कि साहयति
सप्तवाये नागः सहति कलभे
भ्यः परिभवं। इति दुर्गा
दासः॥
षह ज ङ शक्तौ। इति कवि
कल्पद्रुमः। इहापि शक्तिःक्ष
मा। ज साहः सहः। ङ अन्या
यं सहते नासौ। इति हलायु
धः। इति दुर्गादासः॥
षहसानुः पुं हसनावान् यज्ञः
मयूरः॥ इति संक्षिप्तसारोणा
दिवृत्तिः॥
षाट् अ सम्बोधने। इति के
चित्॥
षाडवः पुं गानोत्सवः। इति मे
दिनी॥ रागस्य जातिविशेषः
स च षट्स्वरमिलितरागरा
गिणी। यथा। औडवः पञ्च
भिः प्रोक्तः स्वरैः षड्भिस्तु
षाडवः। सम्पूर्णः सप्तभिर्ज्ञेय
एवं रागा स्त्रिधा मतः। इति
सङ्गीतदर्पणः॥
षाड्गुण्यं क्ली राज्ञां राजव
र्त्तने उपायाः षट्। यथा। सं
धानासने संधिं कृत्वा प्रवस्थाने
१ यात्रासंस्थाने युद्धार्थयाने २
विगृह्यासने वैरं कृत्वावस्था
नं ३। यात्रा संपरिगृह्यास
ने शत्रो र्भय प्रदर्शनार्थं
याने प्रदर्श्य स्वस्थाने अव
स्थाने ४ द्वैधीभावः उभयत्र
संधीकरणं ५ अन्येषां संश्र
यः दुर्ब्बले महाराजस्य वा आ
श्रयः ६ इति महाभारते रा
जधर्म्मः॥
षाण्मातुरः पुं कार्त्तिकेयः
इत्यमरः॥
षात्वणत्विकः त्रि षत्वणत्व
विधायकशास्त्रव्याख्याने। तत्र
भवः। यथा। षत्वणत्वयोर्विधा
यके शास्त्रे षात्वणत्वे तस्य व्या
ख्यानं तत्र भवो वा षात्वणत्विकः
इति सिद्धान्तकौमुदी॥
षाध ओ न य सिद्धौ। इति क
विकल्पद्रुमः। ओ सिषात्सति।
न साध्नोति। य साध्यति। सि
द्धिर्निष्पत्तिः। इति दुर्गादासः
षान्त्व क सामप्रयोगे। इति कवि

कल्पद्रुमः। कसान्त्वेयति पुंसा
कान्तं दयालुः। क्षिषान्त्वयियति
इति दुर्गादासः॥
षाडः त्रि षडः। यडषाद्भात्
स्वार्थे स प्रत्ययेन निष्पन्नः॥
षि न ग म वेधे। इति कवि
कल्पद्रुमः। मूर्द्धन्यादिः। ग म
सिनाति सिनीते। न सिनोति।
सिनुते। इति दुर्गादासः॥
षिच प श ऊ म क्षरणे। इति
कविकल्पद्रुमः। प श म सि
ञ्चति सिञ्चते। ऊ सेक्ता। क्षिषि
चुरवति मम्बुवहाः। इतिभार
विः। इति दुर्गादासः॥
षिट अनादरे। इति कविक
ल्पद्रुमः। मूर्द्धन्यादिः। सेटति
खले लोकः। इति दुर्गादासः
षिड्गः पुं कामुकः। लोञ्छा इ
तिभाषा। तत्पर्यायः। विटश्चः
२ लाताव: ३ भविलः ४ छिद्रुवः
५ विटः ६ खलीकः ७ षट्प्रासः
८ कामकेलिः ९ विदूषकः
१० इति भूरिप्रयोगाः॥ पीठके
लिः ११ पीठमर्दः १२ इति त्रि
काण्डशेषः। पल्लविकः १३
इति हेमचन्द्रः॥
षिध ड शिवे॥ प्रासे। इति

कविकल्पद्रुमः। मूर्द्धन्यादिः। उ
असेधीत् असेत्सीत्। षिधे म
गले। तदाकर्म्मकः। सिद्धो
वर्णसमाम्नाय इति कातन्त्रस्या
द्यसूत्रं। शास्त्रमनुशासने। सेध
ति शिष्यं गुरुः॥ इति दुर्गा
दासः॥
षिध गत्यां। इतिकविकल्पद्रु
मः। सेधति। निष्ठायां सिधितः
इति दुर्गादासः॥
षिध उ गत्यां। इतिकविकल्प
द्रुमः॥ सेधति। उ सेधित्वा सि
द्ध्वा। क्त्वा वेटत्वान्नेम ऊस्थीति
इमो निषेधे सिद्धः॥ इति दु
र्गादासः॥
षिध उ य ऊ सिद्धौ। इति दुर्गा
दासः। उ सेधित्वा सिद्ध्वा। य
सिध्यति। ऊ असेत्सीत्। अस्मा
त् प्रयादित्वान्नित्यं उ इत्यन्ये
सिद्धिर्निष्पत्तिः। सिध्यति चेटो
निष्पन्नः स्यात् इत्यर्थः॥
इति दुर्गादासः॥
षिभ उ हिंसने। दीप्तौ। इति
कविकल्पद्रुमः॥ उ सिभ्भित्वा
सिद्धा। इति दुर्गादासः॥
षिल श उञ्छे। इति कविकल्प
द्रुमः। उञ्छ अहृतशस्य शेषा

पहरणे। श सिलति धान्यदीनः
सेलिता। इति दुर्गादासः॥
षिव य उ तन्तुतैला। इतिकवि
कल्पद्रुमः॥ तन्तुतति स्यूतुमि
ग्रेष्यते। यसीव्यति वस्त्रं सौचि
कः। उ सेवित्वा स्यूत्वा॥
इति दुर्गादासः॥
षु म न संधा क्लेद पीड मन्थे
इति कविकल्पद्रुमः। मूर्द्धन्या
दिः। न म सुनोति सुनुते। सं
धा संधाने क्लेद इह स्नानं सं
गलस्नाने वा। तथाच षुञ
अभिषवे इति प्राञ्चः। अभि
षवः पीडने मन्थने वेति त्रि
लोचनादयः। स्नानञ्चेति दुर्गाः
संधाने मङ्गलस्नाने वेतिधा
तुप्रदीपः। इति दुर्गादासः॥
षु म गतौ। इति कविकल्प
द्रुमः। म सुषाव सुषुवे। इति
दुर्गादासः॥
षु गतौ। पेश्वर्य्यप्रसवयोश्च।
इति कविकल्पद्रुमः। सवति।
इति दुर्गादासः॥
षु ल पेश्वर्य्यप्रसवयोः। इति
कविकल्पद्रुमः। ल सौति। इति
दुर्गादासः॥
षुः पुं गर्भविमोचनं। इत्ये

कातन्त्रकोषः॥
षुह क तौष्ट्ये। अनादरे॥
इतिकविकल्पद्रुमः। पंचमस्व
रीदन्तयोन्तः। कसहयति। दन्त्या
दित्वत् सितिभीमः। तौष्ट्यम
स्थीभावः। इति दुर्गादासः॥
षुम्भ दीपन हिंसयोः। इतिक
विकल्पद्रुमः। मूर्द्धन्यादिः। पंच
मस्वरी सुम्भति सुषुम्भ। इति
दुर्गादासः॥
षुर श ऐश्वर्य्ययोः। इति कवि
कल्पद्रुमः। मूर्द्धन्यादिः। श
सुरति सोरिता सुयोग। आदी
प्तिः। पेशप मैम्स्व[illegible]। इति दु
र्गादासः॥
षुह लृ य तृप्तौ। शक्तौ। इति
कविकल्पद्रुमः। शक्तिः क्षमा
लृ असुहत्। य सुह्यति दुःखे
अनिः सहत इत्यर्थः। सुयोग
इति दुर्गादासः॥
षू म ल सूतौ। इतिकविकल्प
द्रुमः॥ मूर्द्धन्यादिः। ङ ल सूते
इति दुर्गादासः॥
षू य ऊ ङ सूतौ। इतिकविक
ल्पद्रुमः। य ङ सूयते। ऊ सूनं
सूते गर्भविमोचनं। सूते पुत्रं
नारी। अन्यत्रापि धर्म्मः[illegible]॥

प्रसूयते। इतिदुर्गादासः ॥
षू श क्षेप। इतिकविकल्पद्रुमः
मूर्द्धन्यादिः। शास्वति । इति
दुर्गादासः ॥
षूः स्त्री गर्भविमोचने। इति
कश्चिदेकाक्षरकोषः ॥
षूद ङ. निरासे। इति कविक
ल्पद्रुमः। षष्ठस्वरी। ङ. सूदते
निरासो निःक्षेपः । इति दु.
र्गादासः ॥
षूद क्षरणे। इतिप्राञ्चः। क्ष
रणमवदारणं हिंसोपलक्षण
मितिरमानाथेन व्याख्यातं ॥
इतिदुर्गादासः ॥
षूद क आस्कृतिहत्योः। नि.
रासे। इति कविकल्पद्रुमः ॥
आस्कृति रंगीकारः। क सूद
यति धनं विप्राय दाता।
रमानाथस्तु आस्रवणं इतिदं
समस्कारं पठित्वा सूदयति म
दिराभाण्डात् स्रवतीत्यर्थ इ
त्याह। इतिदुर्गादासः ॥
षूर ङ. य ई स्तम्भे ॥ हिंसे ॥
इतिकविकल्पद्रुमः। ङ. य सू
र्यते। ई सूर्णः। केश्चिदयं न
मन्यते। स्तम्भो जडाभावः ॥
इति दुर्गादासः ॥


षूर्क्ष नादरे। इति कविकल्पद्रुमः
रेफयुक्तः षष्ठस्वरी सूर्क्षतिदु
ष्टं लोकः। इतिदुर्गादासः ॥
षूर्क्ष्य ईर्ष्ये। इतिकविकल्पद्रुमः
सूर्क्ष्यति सुहृदं। यद्रुयोलोऽय
मित्येके। इतिदुर्गादासः ॥
षूष प्रसवे। इतिकविकल्पद्रु
मः। षष्ठस्वरी मूर्द्धन्यादिः। सू
यति। इतिदुर्गादासः ॥
षेक क्र ङ. सर्पणे। इतिकवि
कल्पद्रुमः। मूर्द्धन्यादिः। अस्य
योपदेशं विधौ वर्ज्जनेपीष्ठपा
ठः कस्यचिद्दतुरोधात्। क्र
असिषेकत्। ङ. षेकते। इति
दुर्गादासः ॥
षेल क्र चालगत्योः। इतिकवि
कल्पद्रुमः। मूर्द्धन्यादिः। क्र
असिषेलत्। इतिदुर्गादासः ॥
षेव क्र न ङ. सेवने। इतिकवि
कल्पद्रुमः। क्र असिषेवत्। न
सेवति सेवते ङ. सेवते। सेव
नं माराधन मुपभोग आश्र
यणञ्च। विष्णु सेवते स्वावेस
वते तीर्थं सेवते साधुः। प्र
स्थेत्वस्मात् परस्मैपदं समस्य
मानाः नीचं समृद्ध मपिसेवति
नीच एव। स्वाधीने विभवेप्य.

हीनरपतिं सेवति किं मानि
न इत्यादौ गणकृतानित्यत्व
माहुः। इतिदुर्गादासः ॥
षै क्षये। इतिकविकल्पद्रुमः
मूर्द्धन्यादिः। सायति। इति
दुर्गादासः ॥
षो य नाशे। इति कविक
ल्पद्रुमः। मूर्द्धन्यादिः। नाशादूर
नष्टीकरणं। यस्यति यमोऽर्जत
न्। इति दुर्गादासः ॥
षोडन् पुं षड्दंतयुक्तवृषः
इति हेमचंद्रः ॥
षोडश त्रि संख्याविशेषः ॥
षडधिकादश। षोला। इति
भाषा। तद्वाचकौ इन्दुकला
मातृकाशब्दौ। इति कविकल्प
लता। नित्यबहुवचनांतोयं।
षोडशः त्रि षोडशानां पूरणः
षोडशन् शब्दात् डट् प्रत्य
येन निष्पन्नः ॥ इति सिद्धांत
कौमुदी ॥
षोडशकलाः स्त्री चंद्रमंडल
स्य षडधिकदशभागाः। तासां
नामानि यथा। तत्र श्रीचंद्रस्यत्र
मृतादि षोडशकलाः पूर्ववत्
प्राणप्रतिष्ठां कृत्वा पूजयेत्। अं
अमृतायै नमः १। आं मान

दायै २ इं पूषायै ३ ईं तुष्ट्यै
४। उं पुष्ट्यै ५। ऊं रत्यै ६
ऋं धृत्यै ७ । ॠं शशिन्यै
८। लृं चंद्रिकायै । ९ ॡं
कांत्यै १०। एं ज्योत्स्नायै ११
ऐं श्रियै १२ ओं प्रीत्यै १३ औं
अंगदायै १४ । अं पूर्णायै १५
अः पूर्णामृतायै १६ ॥
नमः सर्वत्र ॥ प्राक्प्रोक्तप्रत्ये
कमावाह्य गंधादिभिः पूजये
त्। इति तन्त्रसारः ॥
षोडशदानं क्ली श्राद्धादौ षो
डशप्रकारदेयद्रव्यं। तत्क्रम
माहुः साम्प्रदायिकाः। भूम्या
सने जलं वस्त्रं प्रदीपोऽन्नं ततः
परं। ताम्बूल छत्र गन्धाश्च
माल्यं फलमतः परं ॥ शय्या
च पादुका गावः कांचनं रज
तं तथा दान मेतत् षोडशकं
प्रेत मुद्दिश्य दीयते ॥ तत्
षोडशं षोडशकं रेकादानसा
गरो भवति ॥ तत्रभूमेः पू
जायां दानवाक्ये च प्रियद
त्तेति विशेषणं। भूमेर्देवता
विष्णुः। षष्टिवर्षसहस्राणि दि
व्यस्वर्गवासः फलं। प्रतिग्रहे
तद्भूमेः प्रदक्षिणीकरणं ॥

तद्भूमे रसन्निधाने तामुद्दि-
श्य प्रदद्दिति । १ आसनस्य उ
त्तानाङ्गिरसो देवता राज्यस्था
नानुत्तमस्थानप्राप्तिः फलं । तत्र
विशेषानुपदेशात् करमध्या-
त्मकाग्रेयेन तीर्थेन प्रतिग्रहः
एवमन्यत्रापि । अग्नेयं करतलं
२ जलस्य वरुणो देवता तृप्ति
प्राप्तिः फलं ३ वस्त्रस्य बृहस्प
ति र्देवता चेन्द्रलोकप्राप्तिः
फलं । प्रतिग्रहे दशान्तग्रहणं
परिधाने । ४ दीपस्य अग्निर्दे
वता उत्तमचक्षुःप्राप्तिः फलं
५ अन्नस्य प्रजापति र्देवता-
ऽक्षय सुखप्राप्तिः फलं । प्रति
ग्रहे मुष्टिग्रहणं । ६ ताम्बूल
स्य वनस्पति र्देवता । मेधावि
त्व सुभगत्व प्राज्ञत्व दर्शनी
यत्वप्राप्तिः फलं ७ छत्रस्य उत्ता
नाङ्गिरसो देवता सर्वव्याधिवि
निर्मुक्तत्व श्रीमत्व वरूथत्व-
प्राप्तिः फलं । प्रतिग्रहे दण्डधार
णं ८ गन्धस्य गन्धर्वो देवता-
ब्रह्मपदप्रयाणं फलं ९ मा
ल्यस्य वनस्पति र्देवता अन्त्य
न्तरखिलभवने फलं १० फल
स्य वनस्पति र्देवता । सुदायुक्त
त्वं फलं । ११ शय्यायाः उत्तानाङ्गि
रसो देवता अन्त्यन्तरखिलभ
वनं फलं । प्रतिग्रहे आरोहणं
१२ पादुकायुगस्य उत्तानाङ्गि
रसो देवता स्वर्गलोकसुखगा
मनं फलं । प्रतिग्रहे आरोहणं
१३ धेनो रुद्रो देवता । सूर्य्यलो
कप्राप्तिः फलं । तत्र धेनुं प्रा
ङ्मुखीं मानसमीपमानीय
ओं या लक्ष्मीः सर्वभूतानां या
च देवेष्ववस्थिता धेनुरूपे-
ण सा देवी मम शान्तिं प्रय
च्छतु । ओम् देवस्था या च रु
द्राणी शङ्करस्य च या प्रिया । धेनु
रूपेण सा देवी मम शान्तिं प्रयच्छ
तु । ओम् विष्णु वक्षसि या लक्ष्मी
र्या लक्ष्मी र्धनदस्य च । या लक्ष्मीः
सर्वभूतानां सा धेनु र्वरदास्तु मे ।
ओम् चतुर्मुखस्य या लक्ष्मीः स्वाहा
चैव विभावसोः । चन्द्रार्क शक्रश
क्तिर्या धेनुरूपास्तु सा श्रिये ॥
ओम् स्वधा त्वं पितृसंघानां स्वाहा
यज्ञभुजां यतः । सर्वपापहरा धे
नुस्तस्माच्छान्तिं प्रयच्छ मे ॥
ओं सर्वदेवमयी देवी सर्ववेदम
यी तथा सर्वलोक निमित्ताय
सर्वलोकसमीपस्थिरा । प्रयच्छ

मि महाभागा मत्स्याय सुखा
य च । इत्युच्चार्य्य उत्सृजेत् । प्र
तिग्रहे पुच्छधारणं १४ हिर
ण्यस्याग्नि र्देवता दीर्घायुःप्रा
प्तिः फलं १५ रजतस्य चन्द्रमा दे
वता उत्तमरूपप्राप्तिः फलं १६
इति शुद्धितत्त्वं ॥ गयामाहा
त्म्ये षोडशदाने यथा । सु
वर्णं रौप्यं तथा ताम्रं कांस्य
गावो गजाह्वयाः । गृहे भू
मि र्वृषो वस्त्रं शय्याछत्र
मुपानहौ । दासयुक्तं पितृय-
ज्ञेषु दानं षोडशकं मतं । इति
वायुपुराणे गयामाहात्म्यं ॥
षोडशभुजा स्त्री षोडशहस्त
युक्ता दुर्गा । यथा । यदा तथा
ऽष्टभुजां महामायां प्रपूजये
त् । दुर्गातन्त्रेण मन्त्रेण विशे
षं तत्र वै शृणु । कन्यायां-
कृष्णपक्षस्य एकादश्यां शुचो
षितः ॥ द्वादश्यां मेकभक्त
न्तु नक्तं कुर्य्यात् परे हनि ॥
चतुर्दश्यां महामायां बोध-
यित्वा विधानतः ॥ गीतवा
दित्र निर्घोषै र्नानानैवेद्य वे
दैनैः । अयाचितं तुपः कुर्य्या
त् उपवासं परे ॥
ऽहनि । एवमेव व्रतं कुर्य्यात्
यावद्वै नवमी भवेत् । जपश्च
यन्त्र समभ्यर्च्य मूलेन प्रतिपू
जयेत् । उत्तरेणार्च्चनं कृत्वा श्र
वणान्ते विसर्जयेत् ॥ इति का
लिकापुराणे ५९ अध्यायः ॥
षोडशमातृकाः स्त्री षोडश
संख्यक देवी विशेषः । यथा ।
गौर्य्यादि षोडशमातृकाभ्यो
नमः । इति दुर्गोत्सवपद्धतिः ।
तासां नामानि यथा । गौरी प
द्मा शची मेधा सावित्री विज
या जया । देवसेना स्वधा स्वाहा
मातरो लोकमातरः ॥ शान्तिः
पुष्टि र्धृति स्तुष्टि रात्मदेवतया
सह । आदौ विनायकः पूज्यो
अन्ते च कुलदेवता ॥ इति श्रा
द्धतत्त्वं ॥
षोडशर्त्विक् क्रतुः पुं षोडश
पुरोहितसाध्ययाग विशेषः
सत् ज्योतिष्टोमयागः ॥ द्वाद
शाहसाध्य सत्र यागश्च । यथा
ज्योतिष्टोमे द्वादशशत मोद
क्षिणा विभागः षोडशर्त्विजां
तद्विकृतीभूते सत्रात्मके द्वाद
शाहसाध्ये प्राप्ते नार्हिनोदीत
यन्तीत्यादि दर्शनेन निर्णीयते ।



तत्त्वविभागमनुरभ्याह। सर्वे
षामर्द्धिनोमुख्या स्तदर्द्धेनार्द्धि
नोऽपरे। तृतीयिन स्तृतीयो-
शा अस्तुर्थांश्चैकपादिनः॥ द
क्षिणाया ऋतविभागाय यो
तकाम्नायतोपि। अथ द्वादशा
द्वादश आद्येभ्यः षट्षट् द्वि
तीयेभ्य श्चतस्त्र श्चतस्त्र स्तृती
येभ्य स्तिस्त्र स्तिस्त्र इतरेभ्यः।
इत्यत्र षोडशर्त्विजांचतुरव्य
त्वरः कृत्वा चत्वारो वर्गाः। इ-
ति मलमासतत्त्वं॥ एषां ऋत्वि
ज्ञांनामानि यथा। ब्रह्मा १ ब्रा
ह्मणाच्छंसी २ आग्नीध्रः ३ पो
ता ४ एते सार्ववेदीयाः। होता
५ मैत्रावरुणः ६ अच्छावाकः ७
ग्रावस्तोता ८ एते ऋग्वेदिनः।
अध्वर्युः ९ प्रतिप्रस्थाता १०
नेष्टा ११ उन्नेता १२ एते याजु
षाः। उद्गाता १३ प्रस्तोता १४
प्रतिहर्त्ता १५ सुब्रह्मण्यः १६
एते सामगाः॥ इति महाभा
रते मोक्षधर्मे १०५ अध्यायः
नीलकण्ठटीका॥
षोडशांशुः पुं शुक्रः। इति
शब्दमाला॥ षोडशांकिर
णोऽप्युक्ते त्रि॥

षोडशाङ्गः पुं षोडशप्रकारस्स
गन्धद्रव्यमिश्रितधूपः। यथा
गुग्गुलुं सरलं दारु पद्मं मल
यसम्भवं। क्लीवेरं मगुरुं कुष्ठं
गुडं सर्ज्जरसं घनं। हरीतकीं
नखीं लाक्षां जटामांसीञ्च शै
लजं। षोडशाङ्गो विदुर्धूपं दे
वे पैत्र्ये च कर्म्मणि॥
इति तन्त्रसारः॥ षोडशावय
वयुक्ते त्रि॥
षोडशांघ्रिः पुं कर्कटः। इति
हेमचन्द्रः। षोडशचरणयुक्ते
त्रि। षोडशारं क्ली षोडशदल
पद्मं। यथा। आधारे लिङ्गनाभौ
हृदय सरसिजे तालुमूले ल
लाटे द्वे पत्रे षोडशारे द्विदश
दशदले द्वादशार्द्धे चतुष्के। वा
सान्ते वादिलान्ते डफ क ठ
सहिते कण्ठदेशे स्वराणां हंसो
कोटेन्दु मध्ये सकलदलगतं व
र्णरूपं नमामि। इति तन्त्रं॥
जलाशयोत्सर्गीयवेदिकोप
विकल्प्यचक्रं। यथा मत्स्य
पुराणे। रजसा मण्डलं कुर्य्यात्
पंचवर्णेन तत्त्ववित्। षोडशारं
भवेच्चक्रं पद्मगर्भं चतुर्मुखं
चतुरस्रं तु परितो वृत्तं मध्ये

गुणान्तरं। वेद्या श्चोपरितत्
कृत्वा ग्रहांलोकपतींस्तथा॥
विन्यसेन्मंत्रतः सर्व्वान् प्रतिदि
क्षु विचक्षणः। इति जलाश
योत्सर्गतत्त्वं॥
षोडशार्च्चिः पुं शुक्रग्रहः। इति
भूरिप्रयोगः॥ षोडशशिखा-
युक्ते त्रि॥
षोडशावर्त्तः पुं शंखः। इति
हेमचन्द्रः॥ षोडशावर्त्तनयु
क्ते त्रि॥
षोडशिकाम्रं क्ली पलपरिमा
णं। इति वैद्यकपरिभाषा॥
षोडशी पुं यज्ञपात्रविशेषः
यथा। अतिरात्रे षोडशिनंगृ
ह्णाति नातिरात्रे षोडशिनं
गृह्णातीति। षोडशी ससोम
कपात्रविशेषः॥ इति मल
मासतत्त्वं॥
षोडशी स्त्री द्वादशमहाविद्या
न्तर्गतविद्याविशेषः॥ यथा
कालीतारा महाविद्या षोडशी
भुवनेश्वरी। भैरवी छिन्नमस्ता
चविद्या धूमावती तथा। वगला
सिद्धविद्याच मातंगीकमला
त्मिका। एतादशमहाविद्याः सि
द्धविद्याः प्रकीर्त्तिताः॥ तन्त्र-

पारिभाषिकी षोडशी माह
ज्ञानार्णवे। चंद्रान्ते वारुणांत
श्च शक्रादि सहितं पृथक्।
वामाक्षि बिंदुनादाढ्यं विसृमा
त्कलात्मके। विद्यादौ योजये
द्देवि साक्षात् जाग्रत्स्वरूपि
णी। त्रिकूटाः सकलाभेदाः पंच
कूटा भवंतिहि। वैष्णवी वसु
कूटा स्यात् षट्कूटा शांक
रीभवेत्। अस्यार्थः। चंद्रान्ते ह
कारः वारुणांते शकारः शक्रा
दी रेफः। वामाक्षि कुवेरः॥
विद्यादौ एवोक्त द्वादशविद्या
दौ। वेदादि मंडिता देवि शि
वशक्तिमयीसदा। तदाभेदास्तु
सकलाः षट्कूटा परमेश्वरि
वैष्णवी नवकूटा स्यात् सप्तकूटा
च शांकरी। अस्यार्थः। शिवश
क्तिमयी एवोक्ता वीजद्वयवती
वेदादिः प्रणवः। मंडिता आ
दौभूषिता॥ अथ महाषोडशी
आद्य वीजद्वयं भद्रे विपरीतक्र
मेणहि। विलिख्य परमेशानि
ततोऽन्यानि समुद्धरेत्। अन्त्य
मुख्यौ वरारोहे कुमारीत्रिपुरे
श्वरी। एभिस्तु पंचसंख्याके
वीजैः संपुटितां यजेत्॥

षट्कूटा परमेशानि विधेयं षोडशाक्षरी। त्रिकूटाः सकला भद्रे षोडशार्णा भवंति हि ॥ वैलक्ष्येकोणविंशार्णा श्रीवी सप्तदशाक्षरी। अस्यार्थः। आद्यबीजद्वयं मायारमात्मकं। विपरीतक्रमः आदौ रमापश्चान्माया। अंतमध्ये स्थिते काम बीजं मुखे आद्ये यस्याः कमाख्याः। एभिः पंचसंख्याकैर्बीजैः षट्कूटा सप्तकूटा नवकूटा वा संपुटिता संपुटवत् कृता तेनानुलोमविलोमतः संपुटिता मि स्पष्टाः। योगिनीतंत्रे। श्रीबीज मायास्मर योनिशक्तिस्ताश्च माया कमलाख्यविद्या। शक्त्यादिबीजेषु विलोमतोक्ता श्री षोडशीयन्त्र शिवप्रदिष्टा। तथा च रुद्रयामले। श्रीमायामदनो वाग्भवः परा तारं शिवप्रिया हरिप्रियाविहृदासापरा वाणी मनोभवः। मायालक्ष्मीर्महाविद्याश्रीबीजं षोडशीपरा। अथ बीजावली षोडशी। रुद्रयामले श्रीबीजं मायेसं लिख्य तथैव चकमलादिकं। श्रीबीजं मायेकामंच वाग्माया कमला तथा। परा

कामंच वाग्बीजं माया श्रीबीजमेवच। बीजावली षोडशीयं सर्वतंत्रेषु गोपिता। राज्यंदेयं शिरोदेयं न देया षोडशाक्षरी ॥ तंत्रांतरे। आद्याकुंडलिनी शक्तिः शक्तिः राध्या ततः परा। निवेशयेत् त्रयो मध्ये देवि गोविंदवल्लभे। ततस्तु सप्तमं बीजं श्रीबीजं तदनंतरं। रसलेखा रमयो वृंद्धे वेदवक्रे विनिःसृपेत्। ततो लोपामुद्रे देवि त्रिकूटा मध्यवायवां आद्यानि पंचबीजानि पश्चाद्विन्यस्य संदरी। षोडशीयं सुरेशान्याहिते हे देवि प्रकाशिता। अस्या माहात्म्य मतुलं जिह्वाकोटि शतैरपि। वक्तुं न शक्यते देवि किंपुनः पंचभिर्मुखैः। अपि प्रियतमे देयं सुतदारधनादिकं। राज्यं देयं शिरोदेयं न देया षोडशाक्षरी॥ तंत्रांतरे॥ सिंदूर रजसा वापि कुंकुमेन विलेपिते। लिखित्वा दर्शयन्मंत्रं नच कुत्र प्रकाशयेत्। ततः स्वात्मविशुद्ध्यर्थं लक्ष मेकं जपेद्बुधः॥ बीजषोडशीमाह। सिद्धयामले ॥

कामो माया रमा बाला त्रिकूटाख्ये भगांकुशे। काली कामकलाकूर्चे सर्वादौ प्रणवः प्रिये श्रीमहाषोडशीयं च याख्याता भुवनत्रये। ज्ञानेन सप्तमहाविद्या सर्वाम्नाये नमस्कृता। सप्तलक्ष महाविद्या संख्यादौ कथिताः प्रिये। सारात्सारतराभूता या या विद्याः सुगोपिताः। बहुलाकिमिहोक्तेन तासां सारा तु षोडशी। प्रकाशिता महादेविया एषा ते पुनः पुनः॥ शाक्तकामराजं तु श्रीक्रमे। मायाबीजं तथा क्लिएदी कामं शाक्तं वियत्क्रमात्। जातवेदो मृगांके एलालक्षितपरमेश्वरी। पतद्वाग्भवकूटंच एवंवत्कामराजकं तथैव शक्तिबीजं तु संदर्श्य षा प्रकीर्तिता। अत्रापि एवं वह्नीजसंयोगः। माया ईकारः। किएदीपकारः। पुनः शाक्तमाह। पतद्ग्रं ततो माया ब्रह्मा शाक्रोहरयोः स्त्रिता। वामनेत्रेण संयुक्ता नादबिन्दु विभूषितः। पतद्वाग्भव सुदिष्टं एवं वत्कामशक्तिकं। भगायकारं अत्रापि रवेवह्नीजसंयोगः। अत्र विशेषः

… त्रिकूटेषु … री देवी हि … शक्तिकूटे महेशा … री मता। पषा त सुन्दरी … मतभेदेन दर्शिता। त्रिकूटांते हंसबीजं विनु सर्गविभाषिते। एवा श्रीश्राणसंयुक्ता दारिद्र्य दुःखमोचिनी। इति तंत्रसारः। कुर्नविंशतिपिण्डदानक्रिया। यथा प्रेतशिलाकरीत्या द्वादशपिंडान्षोडशीपिंडं स्नदद्यात्। इति तीर्थयात्राप्रयोगतत्वं। तद्विधानेयथा। अमावस्यां तु कन्यार्के तीर्थं प्राप्ते तथापस्य। कृत्वा श्राद्धं विधानेन दद्यात् षोडशापिएडकं। वायुपुराणीय स्तत् प्रयोगो यथा। कुर्नविंशतिदास्यमानपिण्डस्थानानि यथा दत्तिणं भागवतस्येन कृतानि तत्र दत्तिणाग्रान्कुशान् आस्तीर्य अस्मत्कुले मृताये च गतिर्येषां न विद्यते। आवाहयिष्ये तान्सर्वान्दर्भपृष्ठे तिलोदकैः। मातामहकुलेयेच गतिर्येषां न विद्यते। आवाहयिष्ये तान्सर्वान् दर्भपृष्ठे तिलोदकैः। बंधुवर्गकुले

येच
आवा
गृहे ति त्यैते
स्तिलोदकै आब्रह्मस्तं
वपर्य्यंते देवानापितृ मातवाः
तृप्यंत पितरः सर्वे मातृ माता
महादयः। अतीतकुलकोटी·
नांसप्तद्वीपनिवासिनां। आब्र
ह्मभुवनाल्लोकादिदमस्तु ति
लोदकं। इत्यताभ्यां तिलोदको
जलीन् दद्यात्। ततो मूला·
दितः पितृतीर्थेन पिंडान् द
द्यात्। तत्र क्रमः। अस्मत्कुले
मृता येच गति येषां नवि
द्यते। तेषा मुद्धरणार्थाय इ
मंपिंडंददाम्यहे १ मातामह
कुले येच गति येषां न वि·
द्यते। तेषा मुद्धरणार्थाय इ
मंपिंडंददाम्यहे २ बंधुवर्गकु
ले येच गतिर्येषांनविद्यते।
तेषा मुद्धरणार्थाय इमंपिंडं
ददाम्यहे ३ अजातदंता ये
केचित् येच गर्भेप्रपीडिताः
तेषा मुद्धरणार्थाय इमंपिंडं
ददाम्यहे ४ अग्निदग्धाश्चये
केचिन्नाग्निदग्धास्तथापरे।
विद्युच्चौरहतायेच तेभ्यःपिंडं
ददाम्यहे ५। दावदाहेमृताये
च सिंहव्याघ्रहताश्चये। दं
ष्ट्रिभिः शृंगिभिर्वापि तेभ्यःपि
ण्डंददाम्यहे। ६ उद्बन्धनमृता
येच विष शस्त्रहताश्चये। आ
त्मापघातिनोयेच तेभ्यःपिं
डंददाम्यहे ७ अरण्ये वर्त्मे
निवने क्षुधया तृष्णया हताः
भूत प्रेतपिशाचाश्च तेभ्यः
पिण्डंददाम्यहे। नवे जले ८
रौरवे चांधतामिस्रे कालसूत्
रेचयेस्थिताः। तेषा मुद्धरणा
र्थाय इमंपिंडंददाम्यहे ९। अ
नेकयातना संस्थाः प्रेतलो·
केच येगताः। तेषा मुद्धरणा
र्थायइमंपिंडं ददाम्यहे १० अ
नेक जातना संस्था येनीता
यमकिंकरैः। तेषामुद्धरणार्था
यइमंपिंडंददाम्यहे ११ ॥ नर
केषु समस्तेषु यातनासु चये
स्थिताः। तेषा मुद्धरणार्थाय
इमं पिंडं ददाम्यहे १२। पशुयो
निगता ये च पक्षि कीट सरी
सृपाः। अथवा वृक्षयोनिस्था
स्तेभ्यःपिंडं ददाम्यहे। १३ जा
त्यंतर सहस्रेषु भ्रमंतः स्वेनक
र्मणा। मानुष्यं दुर्लभं येषां

तेभ्यःपिंडं ददाम्यहं १४ ॥
दिव्यंतरीक्ष भूमिष्ठाः पितरो
बांधवादयः। मृताश्चासंस्कृता
येच तेभ्यःपिण्डंददाम्यहं १५
येकेचित् प्रेतरूपेण वर्त्तंते पि
तरोमम। तेसर्वेतृप्तिमायांतुपिं
डदानेनसर्वदा। १६। येबांध
वा बान्धवा वा ये ऽन्यजन्मनि
बान्धवाः। तेषांपिंडोमयादत्तो
ऽक्षय्यमुपतिष्ठतां। १७ ॥
पितृवंशे मृता येच मातृवंशे
चयेमृताः। गुरु श्वशुरवंश्यानां
येचान्ये बान्धवा मृताः। येमे
कुले लुप्तपिण्डाः पुत्र दारवि
वर्जिताः ॥ क्रियालोपगताये
च जात्यन्धाः पंगवस्तथा ॥
विरूपा आमगर्भाश्च ज्ञाताज्ञा
ताः कुलेमम। तेषां पिण्डो
मया दत्तोऽक्षय्यमुपतिष्ठतां
१८ आब्रह्मणो ये पितृवंश·
जाता मातृ स्तथा वंशभवा·
मदीयाः। कुलद्वये येममदास
भूताभृत्या स्तथैवाश्रितसेव
काश्च। मित्राणिसख्यःपशवश्च
वृक्षादृष्टाश्चादृष्टाश्च कृतोपका
राः। जन्मान्तरे ये ममदासभूता।
तेभ्यः स्वधा पिण्डमहंददानि १९
अत्रोनविंशतिपिण्डषोडशपिंड
त्वेपारिभाषिकं पंचाग्रवत्। इति
तिथ्यादितत्वे ॥ पतेषां मंत्राणां
स्त्रीलिंगोहेन स्त्रीषोडशीत्वं भव
ति ॥ अथ मातृषोडशी ॥ ग
र्भेदवरामे चैव विषमे भूमि
वर्त्मनि। तस्यानिष्क्रमणार्था
यमातृपिण्डंददाम्यहे १ मासि
मासिकृतंकष्टं वेदनाप्रसवेषु च
तस्यानिष्क्रमणार्थायमातृपिं
डंददाम्यहे २ पैष्टिले प्रसवेचै
वमातुरत्यंत दुष्करं। तस्यानिष्क्र
मणार्थायमातृपिंडंददाम्यहे ३
पद्भ्यांजनयते मातुर्दुःखेरैव
सुदुस्तरं। तस्यानिष्क्रमणार्था
यमातृपिण्डं ददाम्यहे। पद्भ्या
मित्यत्रदग्धामितिच पाठः ४
अग्निना शोषयते देहं त्रिरात्रो
नशनेन च। तस्यानिष्क्रमणा
र्थायमातृपिंडंददाम्यहे। ५ पि
वेच्च कटुद्रव्याणि क्वाथानि वि
विधानि च। तस्यानिष्क्रमणार्था
यमातृपिंडंददाम्यहे ६। दुर्लभं
भक्तद्रव्यस्य यातो विदृति यत्फ
ले। तस्यानिष्क्रमणार्थायमातृ
पिंडं ददाम्यहे ७ रात्रौमूत्रपु
रीषाभ्यां भिद्यते मातृकर्पटे

तस्या निष्क्रमणार्थाय मातृ
पिण्डं ददाम्यहं ८ पुत्रव्याधि
समायुक्ते मातृदुःखमहर्नि
शं । तस्या निष्क्रमणार्थाय मा
तृपिण्डं ददाम्यहं ९ यदा पुत्रो
न लभते तदा मातुश्च शोच
ने । तस्या निष्क्रमणार्थाय मा
तृपिण्डं ददाम्यहं १० । क्षुध-
या विकले पुत्रे ददाति निर्भ
रं स्तने । तस्या निष्क्रमणार्था
य मातृपिण्डं ददाम्यहं ११
दिवारात्रौ यदा मातुः शोष
णाच्च पुनः पुनः । तस्या निष्क्र
मणार्थाय मातृपिण्डं ददाम्यहं
१२ षोडशैतु दशमे मासि मातुर
त्यन्तदुष्करे । तस्या निष्क्रमणा
र्थाय मातृपिण्डं ददाम्यहं १३
गात्रभङ्गो भवेन्मातुः मृत्युमे
व प्रयच्छति । तस्या निष्क्रम-
णार्थाय मातृपिण्डं ददाम्यहं १४
अल्पाहारवती माता यावत्पु
त्रोऽस्ति बालकः । तस्या निष्क्र
मणार्थाय मातृपिण्डं ददाम्यहं
१५ यमद्वारे महाघोरे पथि-
मातुश्च शोचने । तस्या निष्क्र
मणार्थाय मातृपिण्डं ददाम्यहं
१६ इति गयायां प्रसिद्धं ॥

षोडशोपचारः पुं षोडशप्रका
रपूजाद्रव्ये । यथा । आसनं
स्वागतं पाद्यमर्घ्यमाचमनी
यकं । मधुपर्काचमन स्नान
वसनाभरणानि च । सुगन्धिसु
मनो धूपदीपनैवेद्यवन्दनं प्रयो
जयेदर्चनायामुपचारास्तु षो
डश ॥ इति तन्त्रसारः ॥
षोढा व्य षट्प्रकारं । यथा । प्र
सङ्गेन उपोद्घातो हेतुतावस
रस्तथा । निर्वाहकैककार्यत्वे
षोढा सङ्गतिरिष्यते । इत्यनु
मितौ जागदीशी टीका । सं
ख्याया धाच् प्रकारे । इति मु
ग्धबोधे षष् शब्दात् धाच् प्रत्यये
ततनिपातनात् सिध्यते । इति मु
ग्धबोधव्याकरणं ॥
षोढान्यासः पुं विधिनायरी
देमन्त्रविन्यासः । यथा । अथ षो
ढान्यासः । तदुक्तं वीरतन्त्रे । के
वलां मातृकां कृत्वा मातृकां
तारसम्पुटां । मातृकापुटितं ता
रं न्यसेत् साधकसत्तमः १ ॥
श्रीवीजपुटितां तां तु मातृ-
कापुटितं ततः २ कामेन पु
टितां देवीं ततः पुटं कामभे
वच ३ । शक्त्या च ॥

पुटितां देवीं शक्तिञ्च ततः पु
टां न्यसेत् ४ । क्रीं हूं हूं च पुन
र्न्यस्त्वा क्रं क्रं लं लं च एवं
वत् ५ मूलेन पुटितां देवीं तत्
पुटं मन्त्रमेव च ६ अनुलोमवि
लोमेन न्यस्त्वा मन्त्रं यथावि
धि । मूलेनाष्टघातं कुर्य्यात्
व्यापकं तदनन्तरं । यथा । प्र
णवपुटितां मातृकां । एवं मा-
तृकापुटितं तारं । एवं श्रीवी
जपुटितां तां । तत्पुटितं श्री
वीजं । एवं कामेन पुटितां मा
तृकां । मातृकापुटितं कामं
एवं शक्त्या पुटितां मातृकां ।
मातृकापुटितां शक्तिं न्यसेत्
तथा क्रीं हूं हूं च क्रं क्रं लं
लं च एवंवत् । तत्पुटितां
मातृकां न्यसेत् । मातृका
पुटितञ्च तत् ॥ मन्त्रपुटितां
मातृकां । तत्पुटितं मन्त्रं ॥
पुनरनुलोम विलोमेन केव
लं मातृकास्थाने न्यस्य मूले
नाष्टघातेन व्यापकं कुर्य्यात् ।
अयं न्यासः स्वाराध्यायामपि का
र्यः ५ इति गुप्तेतड्णीया श्रे
गयोढा प्रकीर्तिता । तारा
याः कालिकायाश्च उक्तु-

व्याश्च तथापरे ॥ एतस्मिन्
न्यासवर्य्ये च सर्वं पापं प्रण
श्यति । इति तन्त्रसारः ॥
ष्टक म प्रतीघाते । इति कवि
कल्पद्रुमः । मतिष्टकयिष्यति
इति दुर्गादासः ॥
ष्टग म प संवृतौ । इति कवि
कल्पद्रुमः । मतिष्टगयिष्यति
दन्त्यवर्गद्वितीयोपध इति के
चित् । इति दुर्गादासः ॥
ष्टन मि शब्दे । इति कविक
ल्पद्रुमः । मि स्तनयति स्तान
यति अतिष्टनत् । इति दुर्गादासः
ष्टभ इ उ स्तम्भे । इति कविक
ल्पद्रुमः ॥ इ स्तम्भ्यते । उ स्त
म्भते । तिष्टम्भयिषति इकारस्य
पुनरुक्तिः सर्वत्र तस्य व्यनिषेधा
र्थैव इति स्तम्भ सर्वे । एकपदेतणा
ठवलात् बाध्य इति वम । स्त
म्भो जडीभावः जडीकरणञ्च
स्तम्भो स्तम्भनं जडीभावो इत्यम
रटीका । पृथ्वीनावष्टब्धः जडी
कृतश्चार्थः । इति क्रमदीश्वरो
क्तेष्ठ । स्तम्भ इह क्रियानिरो
धः । इति भीमः । दोषहृद्वितिति
गोविन्दभट्टः । स्तम्भो रुद्धीक
रणञ्च । स्तम्भते कवाटेन.

द्वारं लोकः। इति दुर्गादासः॥
छम त क वैक्लव्ये। इति कवि
कल्पद्रुमः। मद्वंत्यादिः। योप
देशपाठो भाघटीतिदंत्यस्येह
तस्य कारत्वात् यत्नार्थः। तिछ
मयिषति। एवं सर्वत्र। इति
दुर्गादासः॥
छम वैक्लव्ये। इतिकविकल्प
द्रुमः। वैक्लव्यं विकलीभावः
छमति। अतिछमत्। इति दु
र्गादासः॥
छिद्य न उ. आस्कन्दे। इतिक
विकल्पद्रुमः। आस्कन्दनं आस्क
न्दनं। अभियोग इति भट्टमलः
न उ. छिद्यते नदी पान्थः। ति
छिद्ये। इति दुर्गादासः॥
छिप ऋ उ. क्षुति। इति कवि
कल्पद्रुमः॥ ऋ अतिछिपत्। उ.
छेपते तिछिपे। क्षुति च्छर-
णे। इति दुर्गादासः॥
छिम य क्लेदे। इतिकविकल्प
द्रुमः॥ यः छिम्यति तिछेम।
क्लेदः आर्द्रीभावः॥ इति दुर्गा
दासः॥
छीम य क्लेदे। इति कविकल्प
द्रुमः। य छीम्यति तिछीम॥
क्लेद आर्द्रीभावः। इति दुर्गा-
दासः॥
छु मल स्तुतौ। इतिकविक
ल्पद्रुमः। मद्वंत्यादिः। न ल
छौति स्तवीति स्तुते। इति-
दुर्गादासः॥
छुच उ. प्रसादे। इतिकविकल्प
द्रुमः। मद्वंत्यादि तालव्यः॥
प्रसादः प्रसन्नीभावः। उ. छो
चते जले तोछुच्यते। यस्याछो
मद्वेग इति केचित्॥ छो
चते छोच्यते॥ इति दु-
र्गादासः॥
छुभ उ उ. क्षोभे। इतिकविक
ल्पद्रुमः। उ छोभित्वा छुब्धा
उ. छोभते तुछोभयिषति॥
छोभो जडीभावः तत्करणत्व
छोभो स्मरणे जडीभावाविस्
मरोक्तिः। प्रीतेनावछुब्धो ज
डीकृत इत्यर्थः। इति क्रमदीश्व
रोक्तेश्च। पापेन छोभते भ्र
यो लघुप्रकृतिको नरः॥
इतिहलायुधः॥ छोभते वृष
प्रीतो वायुः। इतिचतुर्भुजः।
तस्मादिह क्रियानिरोधः। इति
भीमः। दोषहृद्धि विति गोविं
दभट्टः। इति दुर्गादासः॥ छु
प उछन्दाये॥ इति कवि-

कल्पद्रुमः। यहस्वरी। उछन्दाये
राशीकरणे। कल्पयति धान्य
छूषकः। तुछूपयिषति। इति
दुर्गादासः॥
छूप य इर् उछन्दाये। इति कवि
कल्पद्रुमः। यहस्वरी। यछूप्य
ति। इर् अछूपत् अछूपीत्।
पुषादित्वान्नित्यं उ. इत्यन्ये॥
अतुछूपत्। इति दुर्गादासः॥
छृह ऊश वधे। इतिकविक-
ल्पद्रुमः। मद्वंत्यादिः तालव्यः
ऊ अछर्हीत् अछर्हात्। श
छृहती छृहेती। तिछर्हायि
षति। इति दुर्गादासः॥
छृत्त गमने। इतिकविकल्प-
द्रुमः। सप्तमस्वरयुक्तः तालव्यः
छृत्तति। तरीछृत्तते। इति
दुर्गादासः॥
छृह ऊश वधे। इति कविक
ल्पद्रुमः। मद्वंत्यादिः तालव्यः।
सप्तमस्वरी ऊ अछर्हीत् अछर्
हात्। श छृहती छृहेती। तिछृ
हयिषति। इति दुर्गादासः॥
छेप ऋ उ. क्षुति। इति कवि-
कल्पद्रुमः। ऋ अतिछेपत्। उ.
छेपते तिछेपे क्षुति च्छरणे
इतिदुर्गादासः॥
छुमः ए चंद्रः। दीप्तिः। इति
केचित्॥
छै संहतौ। छुतौ। इतिक
विकल्पद्रुमः॥ अंतस्थाद्ययुक्तो
दंत्यवर्गाद्यमध्यः यो गात् टः
तेन तछ्या। तछ्यासति। ता
छ्यायते। संहतिः समूहः॥
छायति लोकः एकत्र समूहा
यते छाछायते वा इत्यर्थः। दंत्य
विधौ छै षक्ष छिवो वर्जो ना
न्ते दंत्यः। इति दुर्गादासः॥
छग म प संहत्यौ। इतिकवि
कल्पद्रुमः। मद्वंत्यादि तालव्यः
ययोगात् टः। म तिछगयिष
ति। प अछगीत्। दंत्यवर्गादि
तीयमध्यः। इति केचित्॥
तिछगयिषति अतिछगत्।
इतिदुर्गादासः॥
छल ज स्थितौ। इति कविक
ल्पद्रुमः। ज छालः छालः। छा
लति लोकस्तिष्ठतीत्यर्थः॥
इतिदुर्गादासः॥
छा जि स्याने। इति कविकल्प
द्रुमः। जि छितोः छि। छाने
गतिनिह्नोतिः। निछति साधुर्धे
मं। छछत छिछतान। इतिकी
रचविते प्रकाशार्थे छात्मने



नेपद्विधानात् ष्ठानः। अथ
वाताच्छीलेर्थ ष्ठाढः ष्ठानः। इ
दुर्गादासः ॥
ष्ठिव उ निरासे। इति कविक
ल्पद्रुमः। उदित्त्विात् ष्ठ्युत्वा। अ
स्यनेम ष्ठी ष्ठी इत्यादिना। इ
मोनिषेधे निष्ठ्यूयो ष्ठ्युत इति
भेदः। निरास इह फूत्कार इ
ति भट्टमल्लः। मुखेन श्लेष्मा
दे र्वमन मिति केचित् ॥
इति दुर्गादासः ॥
ष्ठिव य निरासे। इति कवि-
कल्पद्रुमः। ष्ठीव्यति। इति-
दुर्गादासः ॥
ष्ठीव निरासे। इति कविकल्प
द्रुमः॥ ष्ठीवति। यं कश्चिन्ने
मत्वा ष्ठिवुक्रमाचमोऽपीति
दीर्घोऽतिं विदधामः सम्प्रदाये
ष्ठीविष्यति इत्यादि साधनाय
दीर्घोपकाते। तेन कश्चिन्नोप
ष्ठोनास्मिन् गृहीते भ्वाद्या
दि स्तः स्तू इत्यादिना मूर्द्धन्यस्य
स्य दन्त्यत्वोत्पादनस्थाने एवं ष्ठिवज्ञा
धोः ष्ठेवित्यादिना ष्ठे एकार
स्य तकारे निष्ठीव टिष्ठीवज्ञस्य
पिस्यात्। यत्तु सत्यप्यस्मिन्नेन
टिष्ठीवन मिति निपातनेनद्रस्य
सर्वसमस्तत्वाभावात्। निरास
इह फूत्कार इति भट्टमल्लः ॥
मुखेन श्लेष्मादे र्वमन मिति
केचित्। ष्ठीवनं लोकः ॥
ष्ठीवामि युष्केष्वललतास्यिक
ल्पे। इति दुर्गादासः ॥
ष्णस य ल्ट उ सि निवासे। इ
ति कविकल्पद्रुमः। मूर्द्धन्यादि
र्दन्त्यकविनकारयुक्तः। यस्त-
स्याति। ल्ट असस्नत्। उ स्नसि
त्वा स्नुस्त्वा। सि स्नसयति स्ना
सयति। इति दुर्गादासः ॥
स्ना ल शौचने। इति कविकल्प
द्रुमः॥ मूर्द्धन्यादि रयं। दन्त्या-
दिरय मिति कश्चित्। लस्ना
ति गंगायाधीरः। अनुपसर्ग
स्य जो ज्वल कलेत्यादिना कस्ने
स्ना वा स्नपयति स्नापयति
सोपसर्गस्य तु प्रस्नापयति।
इति दुर्गादासः ॥
ष्णिह य ऊल्ट मि प्रीतौ। इति
कविकल्पद्रुमः। ऊ स्नेहिष्यति
स्नेक्ष्यति। य स्निह्यति वंधुः ल्ट
असिस्निहत्। मि स्निहयः स्नीचो
ऽस्ति। इति दुर्गादासः ॥
ष्णिह क स्नेहने। इति कविक
ल्पद्रुमः। स्नेहने स्निग्धीभावः

क स्नेहयति वर्तिका तैलेन ॥
इति दुर्गादासः ॥
ष्णु ञ ल स्नुतौ। इति कविक
ल्पद्रुमः। ञ ल स्नौति स्नवीति
स्नुते। इति दुर्गादासः ॥
ष्णुच उ सेचने। इति कविक
ल्पद्रुमः। स्नोचते सुस्नुचे।
इति दुर्गादासः ॥
ष्णुस य भक्ते। इति कविकल्प
द्रुमः। दन्त्यनकारयुक्तः। यत्स्नुस्य
तिस्त्वसोमः। इति दुर्गादासः ॥
ष्णुह यऊ ल्ट उद्गारे। इति क
विकल्पद्रुमः॥ दन्त्यनकारयु
क्तः। उद्गारो वान्तिः। यस्नुह्य-
मन्नं लोकः। ऊ स्नोहिष्यति-
स्नोक्ष्यति ल्ट अस्नुहत् ॥
इति दुर्गादासः ॥
ष्णै वेष्टे। इति कविकल्पद्रुमः
मकारस्य दन्त्यवर्गीयोपधः।
स्नायति हृत्ते लता। अनुपस
र्गस्य जौ ज्वल कलेत्यादिना
कस्ने वा। स्नपयति स्नापय
ति सोपसर्गस्य तु प्रस्नापय
ति। इति दुर्गादासः ॥
ष्मि उ स्मिते। इति कविकल्प
द्रुमः। स्मित मीषद्धास्यं। उ-
स्मयते वधूः। विस्मापयते ॥
इति दुर्गादासः ॥
ष्वक्क उ सर्पणे। इति कविक
ल्पद्रुमः। वकारयुक्तादिः कोप
धः। उ ष्वक्कते षिष्वक्किषते या
ष्वक्यते। दन्त्यविधावस्य वर्ज्जे
नात्र दन्त्यः। चेद्दोदयस्तु इमं
पंचमस्वरिणं मत्वा ष्वक्कते
पुषुक्कियते पायुक्कते। इत्या
ह। इति दुर्गादासः ॥
ष्वद क स्वादे॥ छेदे। इति-
कविकल्पद्रुमः। स्वादो रसोपा
दाने। क स्वादयति नीरं। लो
कः। इति दुर्गादासः ॥
ष्वद ङ प्रीति लिहोः। इति क
विकल्पद्रुमः। प्रीतिः प्रीतीक
रणं। लिह् रसोपादाने। ङ
अपि हि त्समायन वारिधारा
स्वादुः सुगंधिः स्वदते तुषारा
इति श्रीहर्षः। इति दुर्गादासः
ष्वञ्ज ङौ मि ङ आलिंगे। इ
ति कविकल्पद्रुमः। वकारयु
क्तादिः आलिंग आलिंगनं। ङौ
स्वंक्ता। मि स्वंजोऽस्ति। ङ स्वज
ते युवती युवा। परिषस्वजति
पाञ्चाली मध्यमं पांडुनंदन-
मिति गणकृतानित्यत्वात्।
इति दुर्गादासः ॥

ष्वप ञौ यु लृ ञि शये। इति
कविकल्पद्रुमः। वकारयुक्तम्
इत्यादिः ञौ अस्वाप्सीत्। यल
स्वपिति। ञि सुप्तोऽस्ति। शयः
शयने। इति दुर्गादासः॥
ष्वष्क गत्यां। तङ्के। इति
कविकल्पद्रुमः॥ वकारयुक्त
मूर्द्धन्यादिः। तङ्को दुःखेनजी
वनं। क स्वष्कते यतिजनो गच्छ
ति दुःखेन जीवति वेत्यर्थः। अ
स्वष्किष्ट। इति दुर्गादासः॥
ष्विद ञि आ उ लृ मोहस्नेह
मोचनेषु। इति कविकल्पद्रुमः
ञि स्विन्नोऽस्ति। आ स्वेदितं
स्विन्नं तेन। उ स्वेदते तिलः
तैलं मुञ्चति इत्यर्थः। लृ
अस्विदत्। स्नेहः स्निग्धीभावः
इति दुर्गादासः॥
ष्विद लृ ञौ य आ ञि ष्विदि
इति कविकल्पद्रुमः लृ अस्वि
दत्। ञौ स्वेत्ता। य स्विद्यति।
आ स्वेदितं स्विन्नं तेन। ञि स्वि
न्नोऽस्ति। स्विदीति मोहस्नेह
मोचनेष्विति वोपदेवः। गात्रप्र
स्रवणे इति प्राञ्चः। न च
स्विद्यति तस्याङ्गमिति ह
लायुधः। इति दुर्गादासः॥

स दन्त्यसकारः। स तु व्यञ्जन
द्वात्रिंशवर्णः। अस्योच्चारण
स्थानं दन्तः। इति व्याकरणं॥
तत्स्वरूपं यथा। सकारं शृ
णु चार्व्वङ्गि शक्तिबीजं परात्परं।
कोटिविद्युल्लताकारं कुण्डलीत्र
यसंयुतं। पञ्चदेवमयं देवि पं
चप्राणात्मकं सदा। रजःसत्त्व
तमोयुक्तं त्रिविन्दुसहितं सदा।
इति कामधेनुतन्त्रं॥ अस्य लेख
नप्रकारो यथा। कुञ्चिताधो
गता दक्षगता चोर्द्ध्वतिस्र
यः। पुनरूर्द्ध्वगता तासु वह्नि
चन्द्रदिवाकराः। मात्रा भवानी
विज्ञेया ध्यानमस्य प्रचक्षते
इति वर्णोद्धारतन्त्रं॥ अस्य ध्या
नादि। शुक्लाम्बरा शुक्लवर्णा
द्विभुजा रक्तलोचना। श्वेत
चन्दनलिप्ताङ्गी मुक्ताहारोप
शोभिता। गन्धर्व्वगीयमानाच्च
सदानन्दमयी परा। अष्टसिद्धि
प्रदा नित्यं भक्तानन्दविवर्द्धि
नी। एवं ध्यात्वा सकारं तत्तु
मन्त्रं दशधा जपेत्। त्रिशक्ति
सहितं वर्णं आत्मादितत्त्वसंयु
तं। प्रणम्य सततं देवि हृदि
भावय सुन्दरि। इति वर्णोद्धार-

तन्त्रं॥ तत्पर्य्यायः। सोऽहंसः
स्मयशा विष्णुर्भृगवीशश्चन्द्र
संज्ञकः। जगद्वीजं शक्तिना
मासोऽहं वेदवती भृगुः। प्रकृ
तिरीश्वरः शुद्धः प्रभा श्वेताङ्क
लोज्वलः। दक्षपादोऽमृतं श्री
श्रीपरमात्मा परेश्वरः॥ स्व
रूपा च गुरोः प्रेम गोः कलक
एषा वृकोदरी। प्राणायामश्च
पुरा देवी लक्ष्मीः सोमो हि
रण्मयः। दुर्गोत्तारिणि सम्मा
हाज्ञीवो मूर्त्ति मनोहरः॥
इति तन्त्रं॥
सं अव्य शोभनार्थः। समार्थः
संगतार्थः। प्रकृष्टार्थः। इति
मेदिनी। उपसर्गविशेषः॥
अस्यार्थाः यथा। सम् प्रकर्षे
श्लेष नैरन्तर्य्य औचित्याभिमु
ख्येषु। इति मुग्धबोधटीकायां
दुर्गादासः॥
सः पुं ईश्वरः। सर्पः। इति शब्द
रत्नावली। पक्षी इत्येकाक्ष
रकोषः। विष्णुः। यथा॥ सः
स्याद्धिंसोहरे सर्पे। इति भव
तेकार्थसंग्रहः॥ सर्वोक्तपराम
र्शकः। से इति भाषा। तद्‌श
ब्दस्य प्रथमैकवचननिष्पन्नः॥

यथा। सोऽध्यैष्ट वेदांस्त्रिदशा
नयष्ट पितॄनपारीत् सममंस्त
बन्धून्। इति भट्टिः। समास
स्थेयपदत्वे सहार्थः। यथा। स
मातृकः। क्वचित् समानार्थश्च
यथा। सरूपः। इति व्याकरणं।
संग्राही पुं कुटजवृक्षः। इति
राजनिर्घण्टः। धारके त्रि॥
संज्ञं क्ली पीतकाष्ठं। यथा।
जायके कावुके संज्ञं प्रचेले
प्राविरः पुमान्। कालीयकञ्च
कालानुसार्य्यञ्चाथ समर्थके
जायकादिस्तपीतकाष्ठे॥
इति शब्दचन्द्रिका॥
संज्ञुः त्रि लग्नजानुकः। यथा
प्रज्ञुः प्रगतजानुः स्यात् प्रेज्ञो
ऽप्येवञ्च दृश्यते। संज्ञुः संहत
जानुश्च भवेत् संज्ञोऽपि तत्र हि
इति साहसाङ्कः॥
इत्यमरटीकायां भरतः॥
संज्ञपनं क्ली मारणं। इत्यमरः
विज्ञापनञ्च॥
संज्ञप्तिः स्त्री मारणं। इति हेम
चन्द्रः। विज्ञापनञ्च॥
संज्ञा स्त्री चेतना। बुद्धिः। नाम
आख्या। हस्ताद्यैरर्थसूचना।
हस्तभ्रूलोचनादिभिः प्रयोज

नस्यन्तापना। इत्यमरभरतौ॥
गायत्री सूर्य्यपत्नी। इति मे
दिनी॥
संत्रास्तुतः पुं ग्लानिः। इति
केचित्॥
संत्रः त्रि संहतजानुकः इ
त्यमरः॥
संज्वरः पुं अग्निजन्तापः। इ
त्यमरः॥
संयः पुं कङ्कालः। इति श
ब्दचन्द्रिका॥
संयतः त्रि बद्धः इत्यमरः॥
कृतसंयमः। यथा। ब्रह्मपुरा
णे। यो यः कश्चित्तीर्थयात्रा
न्तु गच्छेत् सुसंयतः स च पूर्व्वं गृ
हे स्वे। कृतोपवासः शुचिः प्रयत
नः संपूजयेद्भक्तिनम्रो गणे
शं। इति प्रायश्चित्ततत्त्वं॥
संयत् पुं स्त्री युद्धे। इत्यमरभ
रतौ॥
संयत्वरः पुं वारयतः जेतृसम्
हः। इति संक्षिप्तसारोणादिवृ
त्तिः संयद्वरः पुं नृपः। इत्युणा
दिकोषः॥
संयन्ता त्रि संयमनकर्त्ता। नि
यन्ता। संपूर्व्वयमधातोस्तृन्प्र
त्ययेन निष्पन्नः॥

संयमः पुं व्रताङ्गत्वेन पूर्व्वदिन
कर्त्तव्याचारः। तत्पर्य्यायः। वि
यामः २ वियमः ३ यामः ४ य
मः ५ संयामः ६ इत्यमरः। संय
मनं ७ नियमः ८। इति [illegible]
तद्विधानं यथा। अथ दशमी
नियमाः। स्मृतिसंग्रहे। कांस्यं
मांसं मसूरञ्च चणकं कोरदू
षकं। शाकं मधु परान्नञ्च त्यजे
दुपवसन् स्त्रियं। अत्रोपवसति
ति तद्दिने भोजनासम्भवात्
सामीप्यात्। पूर्व्वापरदिनयो
ग्रहणं। स्मृतिः। शाकं माष
मसूरञ्च पुनर्भोजनमैथुने।
द्यूतमत्यम्बुपानञ्च दशम्यां वै
स्वर्व्वर्ज्जयेत्। कांस्यं मांसं सुरां
क्षौद्रं लोभं वितथभाषणं॥
व्यायामञ्च व्यवायञ्च दिवास्वप्न
तथाञ्जनं॥ तिलपिष्टं मसू
रञ्च दशम्यां वर्ज्जयेत् पुमान्।
दशम्यामेकभक्तञ्च कुर्व्वीत
नियतेन्द्रियः॥ आचम्य दन्त
काष्ठञ्च खादेत तदनन्तरं॥
एवं हरिदिनाल्लोकाः सेवयं चै
कभोजनं॥ अवनीपृष्ठशायिनः
स्त्रियाः सङ्गविवर्ज्जिताः॥ सं
वधे देवदेवेशपुराणपुरुषोत्त

मे। सकृद्भोजनसंयुक्ता द्वाद
श्याञ्च भविष्यथ। इत्येकाद
शीतत्त्वं। श्राद्धपूर्व्वदिनकर्त्त
व्यनियमो। यथा। देवलः। श्वः
कर्त्तास्मीति निश्चित्य दाता वि
प्रान्निमन्त्रयेत्। निरामिषं सकृ
द्भुक्त्वा सर्व्वसुप्तजने गृहे॥
असम्भवे परेद्युर्व्वा ब्राह्मणां
स्तान्निमन्त्रयेत्। वराहपुरा
णे। वस्त्रशौचादि कर्त्तव्यं श्वः
कर्त्तास्मीति जानता। स्नानो
पलेपनञ्चैव कृत्वा विप्रान्नि
मन्त्रयेत्। दन्तकाष्ठञ्च विसृ
जेत् ब्रह्मचारी शुचिर्भवेत्।
विसृजेत् आत्मीयब्राह्मणेभ्यो
दद्यात्। मार्कण्डेयपुराणे। निम
न्त्रयेच्च पूर्व्वेद्युः पूर्व्वोक्तान् द्वि
जसत्तमान्। अप्राप्तौ तद्दिने
वापि हित्वा योषित्प्रसङ्गिनं।
यमः। प्रार्थयेत प्रदोषान्ते भू
क्तान्ते पायितान् द्विजान् सदो
यास विनिर्मुक्तैः कामक्रोध
विवर्ज्जितैः॥ भवितव्यं भवद्भि
श्च स्वो भूते श्राद्धकर्म्मणि दक्षि
णज्ञात्तु चालभ्य त्वं मयात्र नि
मन्त्रितः। एवं निमन्त्र्य नियमान्
श्रावयेत् पैतृकान् बुधः। तन्नियम

माह। अक्रोधनैः शौचपरैः स
ततं ब्रह्मचारिभिः। भवित
व्यं भवद्भिश्च मया च श्राद्धकर्म
णि। इति श्राद्धतत्त्वं। तीर्थया
त्रादिनकर्त्तव्यनियममाह। ब्र
ह्मपुराणे। यो यः कश्चित्तीर्थ
यात्रान्तु गच्छेत् सुसंयतः स
च पूर्व्वं गृहे स्वे। कृतोपवासः शु
चिः प्रयतः संपूजयेद्भक्तिनम्रो
गणेशं। देवान् पितॄन् ब्राह्मणां
श्चैव साधून् धीमान्
प्रीणयन् वित्तशक्त्या
प्रयत्नात्। प्रत्यागत
श्चापि पुनस्तथैव दे
वान् पितॄन् ब्राह्मणा
न् पूजयेच्च॥ एवं प्रकुर्व्वतः।
तस्य तीर्थाद्यदुक्तं फलन्तत्
स्यान्नात्र सन्देह एव। ह्यसे यतः
पूर्व्वदिने कृतैकभक्तादिनि
यमस्तदुत्तरदिने कृतोपवास
इत्यादि। उपवासदिने श्राद्धन
मपि। प्रयागे तीर्थयात्रायां
पितृमातृवियोगतः। कचानां
वपनं कार्य्यं वृथा न विकचो
भवेत्। इति विष्णुपुराणात्
इति प्रायश्चित्ततत्त्वं॥
प्रायश्चित्तपूर्व्वाह्णकृत्यं यथा।
शंखलिखितौ वाप्य केश
नखान् पूर्व्वं कृते प्राप्य व
हिर्निशि। प्रत्येकं नियते
काल मात्मनो व्रत मादि
शेत्॥



इति प्रायश्चित्ततत्त्वं ॥
संयमकः त्रि नियंता । यथा
सएव धाता सर्वस्य तन्नियोग
करावयं । यमसंयमने त्वक्तः
सोऽस्मत् संयमकोहरिः ॥
इतिवह्निपुराणे नारसिंहप्र
भावाध्यायः । संयमीच ॥
संयमनं क्ली संबधं ॥ व्रते ।
इति मेदिनी ॥ चतुःशाले
इति संजीवनशब्दटीकायां
भरतः ॥
संयमनी स्त्री यमपुरी । इति
मेदिनी ॥
संयमितः त्रि जातसंयमः ॥
संयमशब्दात् इतोऽस्यजाते इ
त्यनेन इतप्रत्ययेननिष्पन्नः ॥
संयमी पुं मुनिः । इतिधरणिः
निगृहीतेंद्रिये त्रिः । यथा ।
या निशा सर्वभूतानां तस्यां
जागर्ति संयमी ॥ यस्यांजा
ग्रति भूतानि सा निशापश्य
तोमुनेः ॥ इतिश्रीभगवद्गी
तायां २ अध्यायः ॥
संयात्रा स्त्री द्वीपांतरगमनं
संयैर्वो याति द्वीपांतरगा
मनवृत्ति स्तत स्त्रात्रमिति
यः स्त्रि
यामाप् संयात्रा । द्वीपांतरगाम
ने समग्रयात्रा संयात्रा वा ।
इति सांयात्रिकशब्दटीका
यांभरतः ॥
संयानं क्ली सम्यग्गमनं ।
संपूर्वे याधातो रनट्प्रत्ययेन
निष्पन्नं ॥
संयामः पुं संयमः । इत्यमरः
संयावः पुं घृतक्षीरादिपक्व
गोधूमः । यथा । संयावस्तु घृ
ते क्षीर गुड गोधूम पाकजः
इति शब्दचंद्रिका । पिष्टकवि
शेषः । पेराकी इति भाषा ।
यथा । पर्य्यस्यः साज्य समिता
निर्म्मिता घृतभर्ज्जिताः । कुहि
ता खालिताः खण्डाः शर्कराभि
र्विमर्द्दिताः । तच्चूर्णे प्रक्षिपे
देलालवंगमरिचानिच । ना
लिकेरं सकर्पूरं वापिवीजा
न्यनेकशः । घृताक्त समिता
पट्ट रोटिका रचिता ततः ॥
तस्यां तत् पूरणं न्यस्य कुर्य्या
न्मुद्रे द्वयं सुधीः । सर्पिषिप्र
चुरे तां तु सुपचेन्निपुणोजनः
प्रकारैस्तैः प्रकाराय संयाव
इति कीर्त्तितः ॥ मण्डको
पि समो ज्ञेयः संयावो ।

पि गुणो जैनैः ॥ इति भावप्र
काशः ॥
संयुक्त त्रि गुणवान् । यथा ।
संबंधी गुणवान् संयुक्त् मित्रयु
क् मित्रवत्सलः । इति त्रिकाण्ड
शेषः । संयुक्तश्च ॥
संयुक्तः त्रि संयोगाश्रयः ॥
यथा । कुर्य्यादलाभे संयुक्तो
नालाभेऽपि प्रवेशिनौ ॥
इति तिथ्यादितत्त्वं ॥
संयुगः पुं युद्धे इत्यमरः ॥
संयोगश्च ॥
संयुतः त्रि संयुक्तः । यथा ।
चतुर्थी संयुता कार्य्या पंच
मीपरयानतु । दैवे कर्म्मणि
पैत्रेच शुक्लपक्षे तथाऽसिते
इतितिथ्यादितत्त्वं ॥
संयोगः पुं मेलनं । न्यायम
ते गुणपदार्थः । सच संबंध
विशेषः । अप्राप्तवस्तुद्वयस्य
प्राप्तिः । सच त्रिविधो । यथा ।
एककर्म्मजन्यः । यथा पर्वतेन प
क्षिसंयोगः । १ । उभयकर्म्मज
न्यः । यथा मेषद्वयसंयोगः ।
२ । संयोगजन्यसंयोगः ॥
यथा कपाल तरुः संयोगज
न्यतरु कुंभ संयोगः ३ कर्म्म
जन्यसंयोगोपि द्विविधः । अ
भिघातः तस्मात् शब्दो जाय
ते । १ । नोदनः । तस्मात् शब्दो
न जायते २ अत्र प्रमाणं ।
अप्राप्तयोस्तु या प्राप्तिः से
व संयोग ईरितः । कीर्त्तित
स्त्रिविधस्त्वेष आद्योन्यतरक
र्म्मजः । तथोभयोः कर्म्मज
न्यो भवेत् संयोगजोऽपरे
आदिमः श्येन शैलादि सं
योगः परिकीर्त्तितः । मेषयोः
सन्निपातो यः स द्वितीयउदा
हृतः । कपालतरुसंयोगात् सं
योगस्तरुकुंभयोः । द्वितीयः
स्यात् कर्म्मजोपि द्विधैवपरि
कीर्त्तितः । अभिघातो नोदन
श्चशब्दहेतुरिहादिमः । शब्दा
हेतु र्द्वितीयः स्याद्विभागोऽपि
द्विधा भवेत् । इति भाषापरि
च्छेदः ॥ उदयात् पर्वदशम्याः
शेषः । यथा । उदयात् प्राक्
दशम्यास्तु शेषः संयोग उ
च्यते । उपरिष्टात् प्रवेशस्तु
तस्मात् तौ परिवर्ज्जयेत् ॥
इति तिथ्यादितत्त्वे । संबंधमा
त्रे । इतिसंयोगपृथक्त्वन्या
यार्थदर्शनात् ॥

संयोगपृथक्त्वं क्ली न्यायविशेषः। यथा। एकस्य कर्म्मणोऽनित्यत्व काम्यत्वाभ्यां हेतूभ्यां मीमांसकारे नित्यानित्य संयोगविरोधः। सैव संयोगपृथक्त्वन्यायात्। स च न्यायश्चतुर्थाध्याये उक्तः। यथा। खादिरे पशुं बध्नाति खादिरं वीर्य्यकामस्य यूपं कुर्व्वीत इति श्रूयते। अत्र संशयः। किं काम्यस्यैव खादिरता नित्येऽपि स्यात् उत नेति। तत्र फलार्थत्वेनानित्यतया नित्यप्रयोगाङ्गता न युक्ता। यद्वा नित्येऽपि खादिरत्वश्रवणात् तत्काम्यस्यैव पशुबन्धनाय यूपाश्रयत्वापन्नार्थश्रुतेः न नित्ये खादिरता इति प्राप्ते सिद्धान्तश्चतुर्थाध्यायस्थः। एकस्य तूभयत्वे संयोगः संयोगमात्रे पृथक्त्वमेदः। एकस्य खादिरस्य क्रत्वर्थपुरुषार्थत्वरूपोभयात्मकत्वेनावाक्यद्वयेन च क्रतुपुरुषत्व फलोपायत्व लक्षणसंयोगभेदावगमान्नित्यानित्यसंयोगविरोधः॥ न चाश्रयत्वानार्थी नित्यवाक्ये॥

गस्यत्वमिति अत्रसंयोगः

सन्निधानादेवाश्रयलाभात्। अत उभयार्थो खादिरतेति। एवं दध्ना जुहोति दध्नेन्द्रियकामस्य जुहुयादित्याद्युभयार्थतैव॥ दधित्वस्य हयाश्रवणात्। इति प्रायश्चित्ततत्त्वं॥

संयोगविरुद्धं क्ली परस्परसंयोगेन रोगजनकखाद्यद्रव्यं। यथा। शाकाम्ल फल पिण्याक कुलत्थ लवणाम्लिर्यैः। करीरदधिमत्स्यैश्च प्रायः क्षीरं विरुध्यते। प्राणहारी तु हारीतो हरिद्रा लवणैः स्मृतः। कृशरा तैलेर्नलेर्भृष्टं विषमायससमामिषं वराहवसया भृष्टा वनाकाले हृत्स्यहृत्। संयुक्ता सेववारुणया उत्साद्येश्च विरुध्यते। अवि कुसुम्भशाकेन मत्स्यैस्तैलैः कणांस्त्यजेत्। मांसे विरुद्धे विकारेश्च काञ्जिके तिलशष्कुली। कपोतः सार्षपे भृष्टो हृते कांस्येऽपि चाहरेत्। विषवृतसमं स्नाते मधु नारायणा स्वच। मूलकं मायसत्वेनमधुनाचनभक्षयेत्। एकत्र संदशांशं विरुद्धं तत् परस्परं। शाकमन्य वीसर्पदकोद्रवाणां

विस्फोटिकोन्मादभगन्दराणां मूर्च्छामदाध्मान गलग्रहाणां। पाण्ड्वामयस्यामविषस्य चैव। किलास कुष्ठ ग्रहणी गदानां शोथास्रातिसार ज्वर पीनसानां। संतानदोषस्य तथैव मृत्योः विरुद्ध मन्नं प्रवदन्ति हेतुं॥ विरुद्धाहारजान् रोगान् विनिहन्ति विरेचनं। वमनं शमनं वापि पूर्व्वं वा हितसेवनं इति संयोगविरुद्धं॥ इति राजवल्लभः॥

संयोगितः त्रि जातसंयोगः संयोगशब्दादितप्रत्ययेन निष्पन्नः। इति संयोजितशब्दटीकायां भरतः॥

संयोगी [न्] त्रि संयोगविशिष्टः। यथा। अयं वृक्षः कपिसंयोगीन मूले। इति सिद्धान्तलक्षणजागदीशी॥

संयोजनं क्ली मैथुनं। इति हारावली। संयोगश्च॥

संयोजितः त्रि पदार्थः पदार्थान्तरेण संयुक्तीकृतः। तत्पर्य्यायः। उपाहितः २ इत्यमरः। संयोगितः ३ इति भरतः॥

संरम्भः पुं कोपः। इति शब्दरत्नावली। आटोपः। इति त्रिकाण्डशेषः। उत्साहः। यथा। कार्य्यारम्भेषु संरम्भः स्थेय उत्साह इष्यते इति साहित्यदर्पणे ३ परिच्छेदः॥

संरावः पुं शब्दः इत्यमरः॥

संरावी [न्] त्रि प्रशस्तशब्दविशिष्टः। संरावशब्दादस्त्यर्थे इनप्रत्ययेन निष्पन्नः॥

संरूढः त्रि प्ररूढः। अङ्कुरितः इति मेदिनी॥

संरोधः पुं रोधनं। क्षेपः। इति मेदिनी॥

संलग्नः त्रि संयुक्तः। संपूर्व्वलगधातोः क्तप्रत्ययेन निष्पन्नः। संलयः पुं निद्रा। इति हेमचन्द्रः। प्रलयश्च॥

संलापः पुं परस्परभाषणं। इत्यमरः। अन्योन्यं प्रीतिभाषणं संलापः। उक्तिप्रत्युक्तिभावेन विशेषरहितमन्योन्यभाषणं संलापः। इति परेऽपि। रहसि भाषणं संलापः। इति कौमुदी। मिथोऽन्योन्यं रहस्यपि। इति वृत्तिः। सम्मेलालपने संलापः क्रियादिकया चञ्। यत्त्वालापः

स तु केनापि क्रियते इदंतप
रस्परभाषणं संवेति भेदः। इ
तिभरतः। उक्तिप्रत्युक्तिमहा
कंपं संलाप इति कीर्त्यते।
इत्युज्वलनीलमणिः॥
संवत्सरः पुं वत्सरः। इत्यम
रः। संवसंति ऋतवो अत्र
संवत्सरः। वस ङौ निवासे।
नाम्नीति सरः सम्पतः। संवद
तिभावात् इति वदो रूपं वा
इति भरतः। पंचविधवत्स
रान्तर्गतप्रथमवत्सरः। यथा
शाकाह्वात् पंचभिः शेषात्
समाद्यादिषु वत्सराः। संपरी
दानुपूर्वोऽस्य तथादापूर्वकाः
स्मृताः। संवत्सरादिफले वि
ष्णुधर्मोत्तरे। संवत्सरे तथा
दाने तिलस्य च महाफलं।
परिपूर्वे तथा दाने यवानांच
द्विजोत्तमाः। इदापूर्वेऽन्नवस्त्रा
णां धान्यानाञ्चानुपूर्वके।
उदासंवत्सरे दाने रजतस्य
महाफलं॥ ज्योतिर्विदस्त्वि
त्थमाहुः प्रभवादेस्तु संभ
वे। ऊचुस्त्वहत् समाद्यादि
वर्षाणामपि सम्भवे। इति
मलमासतत्त्वं॥

संवट्ट ञ वत्सरः। इत्यमरः॥
अधुना विक्रमादित्यराजवत्स
रः संवत् इति ख्यातः॥ संवदनं
क्ली आलोचनं॥ वशीकरणं इ
तिमेदिनी संवादः। इति हेमचंद्रः
संवदना स्त्री संवदनं। वशी
क्रिया। यथा। मणिमंत्रौषधै
र्वशीकरणं संवदनं। संपूर्वाद्व
दि वशीकरणे भावे ल्युट्।
संवदना चेति केचित्। कर
णे ल्युट् वशाक्रियासाधने म
णिमंत्रादावपि। जयश्रियः सं
वदनेयत त्वदितिवक्तुः॥
संचलनमितिपाठांतरं॥
इत्यमरटीकायां भरतः॥
संवननं क्ली संवदनं। इत्य
मरटीकायां रामाश्रमः॥
संवरं क्ली जलं बौद्धव्रतवि
शेषः॥ इति केचित्॥
संपूर्व वृ धातोः अप् प्रत्ययेन
निष्पन्नं। रभसे मकार म
ध्यपाठः॥ तत्र संवधातो र
र प्रत्ययेननिष्पन्नं॥
संवरः पु दैत्यविशेषः॥
मत्स्यविशेषः॥
हरिणविशेषः॥
इति केचित्। रभसकोषे

संबर इतिपाठः॥
संवर्त्तः पुं प्रलयः। इत्यमरः
मुनिविशेषः। कर्षफलवृक्षः
इति मेदिनी। मेघः। इति श
ब्दरत्नावली॥ मेघनायकवि
शेषः। तस्य विवरणं यथा। त्रि
युते शाकवर्षे त्वचतुर्भिः शे
षिते क्रमात्। आवर्त्तो विद्धि
संवर्त्तं पुष्करं द्रोणं मेघदं॥
आवर्त्तो निर्जलो मेघः संव
र्त्तश्च बहूदकः। पुष्करो दुष्क
रजलो द्रोणः शस्यप्रपूरकः॥
इति ज्योतिस्तत्त्वं। संपूर्वकोऽन्त
स्थवकारादिवृतधातो घञ्
प्रत्ययेन निष्पन्नत्वादन्तस्थव
मध्यः। मकारमध्योऽप्ययं।
संवर्त्तकः पुं बलदेवः। इति श
ब्दरत्नावली। बलदेवस्य लांग
लं। वडवानलः। इति हेम
चंद्रः॥
संवर्त्तकी पुं बलदेवः। इति
त्रिकाण्डशेषः॥
संवर्त्तिः स्त्री संवर्त्तिका। इत्य
मरटीकायां भरतः॥
संवर्त्तिका स्त्री पद्मस्य केशरस
मीपस्थदलं इत्यमरः। पद्मा
दीनां जटिकाकारे नवपत्रे॥

इत्यन्ये। सम्यक् वर्त्तते वर्द्धते।
इति संवर्त्तिका ण्वुल् कः संवर्त्तय
ति वेष्टयतीति वा नाम्नीति इत्य
न्ये संवर्त्तिरपि। संवर्त्तिर्नवपत्रि
केति गोपालितः। पाच्छाण
दीति ईपि संवर्त्ती च अनः स्वा
र्थे के संवर्त्तिका। सामान्यन
तनपत्रेऽपि संवर्त्तिकेति हड्डु
चंद्रः। दलमात्रे चसंवर्त्तिके
तिमधुः ऊर्वाणा समकोच
यद्दशशतान्यम्भोज संवर्त्तिके
ति मुरारिः इति भरतः॥
संवर्द्धकः त्रि संवर्द्धनकारी
इति हेमचंद्रः॥
संवर्द्धनं क्ली सम्यग्वृद्धिः।
संदीपनं। संपूर्ववृधधातो र
नट्प्रत्ययेन निष्पन्नं॥
संवर्द्धितः त्रि सम्यग्वृद्धिविशि
ष्टः। यथा। अथ प्रभावोपन
तैः कुमारं कल्पद्रुमोत्थैरव
कीर्य पुष्पैः उवाच वाग्मी द
शनप्रभाभिः संवर्द्धितोरःस्थ
लतारहारः॥ इति रघौ ५
सर्गः॥
संवलित त्रि मिश्रितः। एकत्री
कृतः। यथा। प्रकृतग्रंथस्यास्य
रसंवलितस्यैवपाठस्य धर्त्तृमुचि

तत्वाद्यामेत्येवं धारणायुक्तं ॥
इति पञ्चतोञ्जागदीशीटीका।
अन्यच्च। प्रतीयमानःप्रत्येकं
प्रथमं हेतु रुच्यते। ततःस
म्बलितःसर्वो विभवादिः संचे
तसां। इति साहित्यदर्पणे ३
परिच्छेदः ॥
संवसथः पुं ग्रामः।इत्यमरः
संवहः पुं सप्तवाय्वन्तर्गतपञ्च
मवायुः। स तु उद्वहवायो रु
परिष्टः ॥ इति सिद्धान्तशि·
रोमणिः ॥
संवाटिका स्त्री शृङ्गाटकः।
इतिजटाधरः ॥
संवादः पुं संदेशवाक्यं। स·
माचार इतियावत्। तत्पर्य्या
यः।वाचिकं २ संदेशः ३ ॥
इति जटाधरः। संदेशवाक्यं
इत्यमरः। वाचिकं तद्भवेद्यत्र
हृतत्वेनाभिसंभाषणे ॥ इति
शब्दरत्नावली ॥
संवासः पुं गृहं। इति शब्द
रत्नावली। पुरवासिनां विहा
रार्थं पुरमध्ये वहिर्वा प्रमाहृत
स्थाने। तत्पर्य्यायः। सन्निवेशः
२ सन्निकर्षणं ३।इति जटा
धरः ॥

संवाहः पुं अंगविमर्द्दकः ॥
इतिजटाधरः ॥
संवाहकः पुं अंगमर्द्दकारकः
तत्पर्य्यायः ॥ अंगमर्द्दकः २।
इति त्रिकाण्डशेषः ॥ अंगमर्द्दः
३ इतिहेमचन्द्रः ॥
संवाहनं क्ली अंगमर्द्दनं। भा
रादिवहनं। इति मेदिनी ॥
संवित्तिः स्त्री प्रतिपत्तिः। अ
नन्याविवादः। इति मेदिनी ॥
चेतना बुद्धिः। इतिशब्दरत्नाव
ली हेमचन्द्रश्च ॥
संवित् } स्त्री अंगीकारः। ज्ञानं
संविद् } सम्भाषा। क्रियाकारः
युद्धं। इत्यमरः ॥ आचारः ॥
संकेतः। नाम। तोषणं ॥
इतिमेदिनी ॥ सम्भाषः। इति·
शब्दरत्नावली ॥
संविदितः त्रि अंगीकृतः ॥
इत्यमरः ॥
संविधा स्त्री प्रतिविधा ॥ इति
शब्दचन्द्रिका॥
संवीक्षणं स्त्री अन्वेषणं। अप
हृतवस्तुन स्तात्पर्य्येणान्वेषणं
इत्यमरः। सम्यक् तात्पर्य्येण वि
विधप्रकारैः वीक्षणं संवीक्षणं
अनट्। इति भरतः ॥

संवीतं त्रि रुद्धं। आवृतं।
इत्यमरः ॥
संवृतः पुं आवृतः। सम्पूर्वव्रि·
ञ धातोः क्त प्रत्ययेन नि
ष्पन्नः ॥
संवृत्तः पुं वरुणः। इतिश
ब्दमाला ॥
संवृत्तिः स्त्री सम्यक्प्रकारेण
वर्त्तनं। आवरणं। इतिसंपू·
र्वक वृतधातोः क्ति प्रत्ययेन
निष्पन्नाः ॥
संवेगः पुं भयादिजनितत्वरा
इत्यमरः ॥ सम्यगावेगश्च ॥
संवेदः पुं अनुभवः। तत्पर्य्या
यः। वेदना २ इत्यमरः ॥
हे अनुभवे। विदल मतौ घञ
संवेदः। णीविच्छन्धीति अनेवे
दना। न नेत्युक्तेः क्ली वेदनं
तत्र विशेषेणापि सामान्यवा
च्यतेनकश्चित् कृतीति अनट्
इतिभरतः ॥
संवेशः पुं निद्रा। इत्यमरः ॥
स्त्रीरतबंधः। इति मेदिनी ॥
पाठः। इति हेमचन्द्रः ॥
संवेशनं क्ली रतिक्रिया। इति
हेमचन्द्रः ॥
संव्यानं क्ली उत्तरीयवस्त्रं ॥

इत्यमरः। वस्त्रे। इति मे
दिनी ॥
संशप्तकः पुं समयात्संग्रामा
दनिवर्ती। इत्यमरः। समयात्
कुलाचारात् शपथाद्वा संग्रा
मादनिवर्त्तिनो॰ पराङ्मुखा अ
पलायमाना स्वाङ्कोशान्ति ते
संशप्तकाः। शपे भावे क्तेश
पे सम्यक्सत्य शपं येषां ते
संशप्तकाः ॥ इति भरतः ॥
नारायणीसेनाविशेषः। इ
तिमहाभारत ॥
संशयः पुं संदेहः। इत्यमरः।
तस्य लक्षणं यथा समेशा
योभवेद्या धी रेकत्राभावभाव
योः। साधारणादिधर्म्मस्य ज्ञानं
संशयकारणं। इति भाषापरि
च्छेदः। संशये लक्षयति संश
य इति एकधर्म्मिक विरुद्धभा
वाभावप्रकारकं ज्ञानं संशय
इत्यर्थः। साधारणेति उभयसा
धारणो यो धर्म्मस्तज्ज्ञानं संशय
साधनं। यथा उच्चैस्तरत्वेस्था
णुत्वसाधारणं ज्ञात्वा अयं स्था
णु र्न वेति संदिग्धे। एवमसाधा
रणज्ञानं संशयकारणं। यथा
शब्दत्वे नित्यानित्यव्यावृत्तं ४

शब्दं गृहीत्वा शब्दो नित्यो न वेति संदिग्धे । विप्रतिपत्तिस्तु शब्दो नित्योऽनित्यो वेति शब्दात्मिका न संशयकारणं शब्दस्य नित्यत्वादीनां निश्चयमात्रजनकत्वस्वाभाव्यात् किन्त्वत्र शब्देन कोटिद्वयज्ञाने जन्यते संशयस्तु मानस एवेति एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशयः । एवं व्याप्यसंशयादपि व्यापकसंशय इत्यादिकं बोध्यं । किन्तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति । इति तट्टीका सिद्धान्तमुक्तावली ॥

संशयालुः त्रि संशययुक्तः । संपूर्व शीङ् धातोः आलुप्रत्ययेन निष्पन्नः ॥

संशयापन्नमानसः त्रि संशयविषयः । संशययुक्तः । तत्पर्यायः ॥ सांशयिकः २ इत्यमरः ॥ द्वे संशयविषये स्थाने द्वौ संशयमापन्नः सांशयिकः स्मृतः । संशयम् आपन्नं मानसं यत्र स्यात् स्थाने तत्तथा । संशयमापन्नं मानसं यस्य स तथेति बहुव्रीहिपदार्थत्वे संशयितरि पुरुषादावप्येतत्शब्दद्वयप्रवृत्तिः स्यात् । इति भरतः ॥

संशयालुः त्रि संशयिता । इति हेमचन्द्रः ॥

संशयिता त्रि संशयकर्ता । इति हेमचन्द्रः ॥

संशरणं क्ली रणारम्भः ॥ इति शब्दमाला ॥

संशितः त्रि सम्यक्संपादिते ॥ व्रतविषयकयत्नवान् । यथा । संशितं व्रतं । सम्यक्सम्पादितमित्यर्थः । संशितो ब्राह्मणः व्रतविषयकयत्नवानित्यर्थः । इति सिद्धान्तकौमुदी ॥

संशुद्धिः स्त्री सम्यक्शोधने ॥ शरीरमार्जने । यथा । स्नानमार्जनञ्च संशुद्धिः संशोधन विशोधने । इति रत्नमाला ॥

संशुष्कं त्रि आतपादिना संशोषितवस्तु । सं एवं शुष धातोः क्तप्रत्ययेन निष्पन्नं ॥

संशोधनं क्ली संशुद्धिः । इति रत्नमाला ॥

संशोधितं त्रि शुद्धीकृतवस्तु । संपूर्व शुध धातोः क्तप्रत्ययेन निष्पन्नं । यथा । येनोपायेः कुष्ठा न युज्यन्ते निशितान्तदोषाणां ।

संशोधिताशयानामेषः सिद्धिर्भवेन्नैषां ॥ इति मधुमती ।

संश्चत् क्ली ऊहकः । इत्युणादिकोषः ॥

संश्यानः त्रि शीतेन संकुचितः । इति मुग्धबोधव्याकरणं ॥

संश्रयः पुं आश्रयः ॥ यथा । स्तुता स्वैः स्वैः एवमस्मीह संश्रया । तथा सुरैरिन्द्रेण दिनेषु सेविता । करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यभिहन्तु चापदः ॥ इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः ॥

संश्रवः पुं अङ्गीकारः ॥ इत्यमरः ॥

संश्रितः त्रि आश्रितः । यथा । न प्राची मघतः शस्या नोदीचीं शक्तिसंश्रितां । न प्रतीचीं यतः एष मतो दत्तं समाश्रयेत् । इति तिथ्यादितत्त्वं ।

संश्रुतः त्रि अङ्गीकृतः । इत्यमरः ॥

संश्लिष्टः त्रि आश्लिष्टः । मिलितः । संपूर्व श्लिष धातोः क्तप्रत्ययेन निष्पन्नः ॥

संश्लेषः पुं आलिङ्गने । इत्यमरः । मेलनञ्च ॥

संसत् क्ली माया । यथा । संसत् ऊहके ज्ञेये संसत् तन्त्रे वते समे । इत्युणादिकोषः ॥

संसक्तः त्रि संलग्नः । अव्यवहितः । इत्यमरः ॥

संसक्तिः स्त्री संसक्तता । संपूर्व सन्ज धातोर्भावे क्तिप्रत्ययेन निष्पन्ना ॥

संसत् / संसद् स्त्री सभा । इत्यमरः ॥

संसरणं क्ली प्राणिजन्म । असंबाधसैन्यगमने । चण्डापथः । इत्यमरः । रणारंभः । इति मेदिनी । गमने । इति शब्दरत्नावली ॥

संसर्गः पुं संबन्धः । स च समवायादिः । इति न्यायशास्त्रं । पापिष्ठान्यजनादिसंसर्गप्रायश्चित्तं यथा । स्तेयादिना पतिता इत्युपक्रम्य उक्तं । अज्ञानतो वत्सरेण पतति पतितेन सहाचरन् याजनाध्यापनाद्यौनादेकशय्यासनाशनात् ॥ इति हारीतवचनात् । ज्ञानतो वत्सरार्द्धेनेति । तदर्द्धे

स्पृष्टस्तद्दोषाभाव एव । वान्धवोऽपि पृथग्भूत्वा तत्पापेन न युज्यात् कचित् । इति देवलवचनात् ॥ यस्तस्य भुंक्ते पक्वान्नं कृच्छ्रार्द्धं तस्य निर्दिशेत् ॥ शुष्कान्नभोजिनः पादमित्याह भगवान्मनुः । तस्याविज्ञातचण्डालसहितैकवेश्मस्यप्राकरीकरणानूपमूलपापकर्त्तं हि तीयसंसर्गिणः । तथाचापस्तम्बः । अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि । संवेत्तात्वा तु काले न कुर्य्यात्तस्य विशोधनं । चान्द्रायणं पराकं वा द्विजातीनां विशोधनं । प्राजापत्यस्तु शूद्राणां तथा संसर्गदूषणे । येत्वत्र भुंक्ते पक्वान्नं कृच्छ्रं तेषां विनिर्दिशेत् । तेषामपि च ये भुंक्ते तेषामर्द्धं विधीयते । तेषामपि च ये भुंक्ते कृच्छ्रपादो विधीयते । तत्र तृतीयसंसर्गिण एव प्रायश्चित्तदर्शनात् चतुर्थसंसर्गे दोषो नास्ति । प्रायश्चित्तविवेकोऽप्येवं । इति प्रायश्चित्ततत्त्वं ॥ अथ संसर्गनिरूपणं । तत्र महापातकिसंसर्गस्यापापहेतुत्वमाह मनुः । ब्रह्महत्या सुरापानं स्तेयं गुर्व्वङ्गनागमः महान्ति पातकान्याहुः संसर्गश्चापि तैः सह । प्रायश्चित्तमपि मनुना दर्शितं । एषां पापकृतामुक्ता चतुर्णामपि निष्कृतिः । पतितैः संप्रयुक्तानामिमाः शृणुत निष्कृतीः । यो येन पतितेनैषां संसर्गं याति मानवः ॥ स तस्यैव व्रतं कुर्य्यात् तत्संसर्गविशुद्धये । प्रायश्चित्तीयतां प्राप्य दैवात् पापकृतेन वा । न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः । पापिष्ठसंसर्गी पातकी भवति इति कल्पश्रुतिः । विष्णुः । यश्च येन पापात्मना सह संसृजेत् । स तस्यैव प्रायश्चित्तं कुर्य्यात् ॥ गौतमोऽप्याह । ब्रह्महसुराप गुरुतल्पगा पितृमातृयोनिसम्बन्धागस्तेनाभक्ष्यभक्षक नास्तिकनिन्दक निन्दितकर्म्माभ्यासी पतितात्याग्य पतितत्यागिनः पतिताः पातकसंप्रयोजकाश्च तैश्चाब्दं समाचरन् निषिद्ध पतितसंसर्गात् पततीति प्रकृतिः कल्पः ॥ केते संसर्गप्रकारा इत्यत्राह बृहस्पतिः । एकशय्या-

सनं पंक्ति भाण्ड पक्वान्नमिश्रणं । याजनाध्यापने योनिस्तथा च सहभोजनं । नवधा संकरः प्रोक्तो न कर्त्तव्योऽधमैः सह । छागलेयः । आलापात् गात्रसंस्पर्शात् निश्वासात् सहभोजनात् । सहशय्यासनाध्यायात् पापं संक्रमते नृणां । यमः । दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति । यो यस्यान्नमिहाश्नाति स तस्याश्नाति किल्विषं । देवलः । पतितेन सहायित्वा ज्ञानात्संवत्सरं नरः । मिश्रितस्तेनसोऽब्दान्ते स्वयंच पतितो भवेत् । याजनं योनिसम्बन्धं स्वाध्यायं सहभोजनं । कृत्वा सद्यः पतत्येते पतितेन न संशयः । व्यासः । ब्रह्महा मद्यपः स्तेनो गुरुतल्पग एव च । महापातकिनस्त्वेते यश्चैतैः सह संवसेत् । संवत्सरं तु पतितैः संसर्गं कुरुते तु यः । यानशय्यासनैर्नित्यं जानन् स पतितो भवेत् ॥ ननु द्वितीयतृतीयसंसर्गिणि प्रमाणं नास्ति अत एव बृहच्छातातपः । अशुचिं संस्पृशेद्यस्त्वेक एव स दुष्यति । तत्स्पृष्टो न दुष्येत सर्वद्रव्येष्वयं विधिः । तथा संहतानां तु पात्राणां यद्येकमुपहन्यते । तस्य तत्स्नापनं प्रोक्तं न तु तत्स्पृष्टिनामपि उच्यते । यश्च येन पापात्मनेति यो येन संपिवेदिति संसर्गी येन संसर्गी क्षिति विष्णुव्यास जाबालवचनैः सामान्येन पापिष्ठसंसर्गी पापी भवति इति प्रतिपादनात् संसर्गी पापिष्ठस्यापि संसर्गी पापयुक्तो भवतीतिपक्षिवदेव प्रतिपादिते ॥ पतितोत्पन्नानां शुद्धिमिच्छतां पतितानां प्रायश्चित्तस्य तृतीयो भागस्तत् प्रायश्चित्तं ज्ञेयं । स्त्री च पतितोत्पन्नात्तृतीयभागस्य तृतीयभागं कुर्य्यात् । इति प्रायश्चित्तविवेकः ॥ संसर्गाभावः पुं संबन्धरहितत्वं । न्यायमते अभावपदार्थविशेषः । स तु भेदभिन्नाभावः । स च त्रिविधः । प्रागभावः १ ध्वंसः २ अत्यन्ताभावः ३ यथा अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः । प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥

एवं द्वैविध्यमापन्नः संसर्गो भाव उच्यते । इति भाषापरिच्छेदः ॥ भेदत्वं तादात्म्यसंबन्धावच्छिन्न प्रतियोगिताकाभावत्वं । विनाश्यभावत्वं प्रागभावत्वं १ जन्याभावत्वं ध्वंसत्वं २ नित्यसंसर्गाभावत्वमत्यन्ताभावत्वं ३ । इति सिद्धान्तमुक्तावली ॥

संसर्गी [न] त्रि संसर्गविशिष्टः । यथा । विभागानन्तरं संसृष्टात् पितृभ्रातृ पितृव्य भ्रातृपुत्राणां यथायथं एकत्रावस्थाने संसर्गः तद्युक्तः संसर्गी । एवम्भूतस्य संसर्गिणो मृतस्य धनं तज्ज्ञातस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात् ॥ इति दायतत्त्वं ॥

संसर्पः पुं सम्यक्प्रकारेण गमने ॥ सर्पादिगमनवद्गमनं । सम्पूर्वं सृपधातो घञ्प्रत्ययेन निष्पन्नः ॥

संसर्पी [न] त्रि संसर्पविशिष्टः । सम्यग्गमनशीलः । सम्पूर्वकसृपधातोर्घिन् प्रत्ययेन सम्पूर्वकसृपधातो णिन् प्रत्ययेन च निष्पन्नः ॥

संसारः पुं मिथ्याज्ञानजन्यवासना । इति नैयायिकाः । यथा संसारस्य मिथ्याधीप्रभवा वासना । इति प्रमाणवादगादाधरीटिप्पनी । स्वादृष्टोपनिबद्धशरीरपरिग्रहः । इति कलापटीकायां गोपीनाथः । संसरणं । इति शब्दरत्नावली ॥ तत्पर्यायः । दुःखलोकः २ भवः ३ कष्टकारकः ४ । इति त्रिकाण्डशेषः । संसरत्यत्र संसारः संपूर्वात् सृगतावित्यस्मात् घञ् । अपि च । अस्माद्विजायते विश्वमत्रैव प्रविलीयते । अमायी मायया बद्धः करोति विविधास्तनूः ॥ न चाप्ययं संसरति न च संसारयेत् प्रभुः । नायं पृथ्वी न सलिलं न तेजः पवनो न तत् न प्राणो न मनो व्यक्तं न शब्दः स्पर्श एव च । न रूप रसगन्धाश्च नाहं कर्ता न वागपि ॥ न पाणिपादौ नो पायु नचोपस्थो द्विजोत्तमाः ॥ न कर्ता न च भोक्ता वा न च प्रकृतिपुरुषौ न माया नैव च प्राणश्चैतन्यं परमार्थतः ॥ अहं कर्त्ता ॥

सुखी दुःखी कृशः स्थूलेति या मतिः । सा चाहंकारकर्तृत्वादात्मन्यारोप्यते जनैः । वदन्ति वेदविद्वांसः साक्षिणं प्रकृतेः परं । भोक्तारमक्षरं शुद्धं सर्वत्र समवस्थितं । तस्मादज्ञानमूलोऽयं संसारः सर्वदेहिनां ॥ इति कौर्म्मे ईश्वरगीतासु २ अध्यायः । किंचापितृमातृसुतभ्रातृकलत्रादिकृतेन च दुःखैः सकृत्तथा दैन्यमम्बुसृष्टिनतो गतः ॥ एवं संसारचक्रेऽस्मिन् भ्रमता तात संकटे । ज्ञानमेतन्मया प्राप्तं मोक्षसंप्राप्तिकारकं ॥ इति मार्कण्डेयपुराणे पितापुत्रसंवादनामाध्यायः ॥

संसारगुरुः पुं कामदेवः । इति त्रिकाण्डशेषः । जगद्गुरुश्च ॥

संसारमार्गः पुं योनिः । इति त्रिकाण्डशेषः ॥

संसारमोक्षणं त्रि भवतारकं यथा । एतन्मे तन्महाभाग संवेदितं संसारमोक्षणं । मम भक्त्या व्यवसायेन प्रयुक्तं परमं मया ॥ इति वाराहे मतस्वामिमाहात्म्यनामाध्यायः ॥ भवमोचने स्त्री । तदुपाया यथा । बलिरुवाच । संसारार्णवमग्नानां नराणां मन्दचेतसां । तरणे यो भवेत् पोतः स त्वं आख्यातुमर्हसि । प्रह्लाद उवाच । ये शंखचक्राब्जकरं त्वशार्ङ्गिणं खगेन्द्रकेतुं वरदं श्रियःपतिं । समाश्रयन्ते भवतीति नाशनं संसारगर्त्ते न पतन्ति ते पुनः ॥ वैकुण्ठमखण्डपरं भवबन्धसमुच्छिदं । प्रणिपत्य महात्मानं संसारे न पुनर्भवेत् ॥ ध्यायेत् दामोदरं यस्तु भक्तिनम्रोऽर्च्चयेत्तथा ॥ न स संसारगर्त्तेऽस्मिन् मज्जते दानवेश्वर । ये मानवा विगतरागपरावरज्ञा नारायणं सुरगुरुं सततं स्मरन्ति । ते धौतपाण्डरपटा इव राजहंसाः संसारसागरजलस्य तरन्ति पारं ॥ इति वामने ९ अध्यायः ॥

संसारी [न] पुं संसारविशिष्टप्राणी इति हलायुधः । शरीरी ॥ यथा संसारिणामिति संसारित्वं शरीरित्वं शरीरित्वं च भोगावच्छेदकत्वं न तु चेष्टावत्वं । अतएव स्वरूपपरिगृहीतरामकृष्णादिशरीरस्य दासः ॥

मिथ्याज्ञानजन्यवासनाया अदृष्टस्य वा संसारपदेन विव संभवः ॥ इति वोढ्राधिकारस्य गादाधरी टिप्पनी ॥

संसिद्धिः स्त्री प्रकृतिः । स्वभावः । इत्यमरः ॥ सम्यक्सिद्धिः मदोग्रा । इति मेदिनी ॥

संसृतिः स्त्री संसारः ॥ इति शब्दरत्नावली ॥ प्रवाहः । इति त्रिकाण्डशेषः ॥

संसृष्टः त्रि संसर्गः । वमनादिना संशुद्धः । इति मेदिनीकरहेमचन्द्रौ ॥ विभागानन्तरं मैत्र्या पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थाने संसर्गस्तद्युक्तः । पृथक् संसृष्टधनविभागः । एकपितृजातयोरपि सोदरविमातृजयोर्मृतदेयधनपिण्डदातृत्वेन सोदरस्यैव धनाधिकारोनन्तु पित्रादित्रयमात्रपिण्डदातुर्विमातृजस्य । क्वचित्संसृष्टत्वेन विमातृजस्याप्यसंसृष्टसोदरेण सह तुल्याधिकारित्वम् सोदरस्य संसृष्टत्वे स एव गृह्णीयान्न संसृष्टोऽपि विमातृज ॥ इति।

तथा च याज्ञवल्क्यः । संसृष्टिनस्तु संसृष्टी सोदरस्य तु सोदरः । दद्याच्चापहरेदंशं जातस्य च मृतस्य च ॥ अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् । असंसृष्ट्यपि चादद्यात् संसृष्टो नान्यमातृजः ॥ संसृष्टिनमाह बृहस्पतिः । विभक्तो यः पुनः पित्रा भ्रात्रा चैकत्र संस्थितः । पितृव्येनाथवा प्रीत्या स तत्संसृष्ट उच्यते ॥ तेन विभागानन्तरं मैत्र्यात् पितृभ्रातृपितृव्यभ्रातृपुत्राणां यथायथं एकत्रावस्थाने संसर्गः तद्युक्तः संसर्गी । एवञ्च तस्य संसर्गिणो मृतस्य धने तज्ज्ञातेस्तस्यापत्यस्य तदपत्याभावे संसर्गी स्वयं गृह्णीयात् । एवं सोदरस्य तु सोदरः ॥ तत्र च संसृष्टिनस्तु संसृष्टीत्यनेन वचनेन तत्सु सर्वेऽपि संसर्गी कृतविशेष प्रतिपन्नार्थे तेन सोदराणां सापत्नानां भ्रातृपुत्राणां पितृव्याणां तुल्यानां सद्भावे संसर्गी गृह्णीयात् वाक्यादविशेषश्रुतेः । एवं वचने सर्वेषामेव प्रकृतत्वात् सर्वेषु चोक्ते

पापसंभवात् । अतो न भ्रातृमात्रविषयमिदं वचनमिति जीमूतवाहनः । सोदरे त्वसंसृष्टिनि संसृष्टिन्यसोदरे च सति कतरस्तावत् गृह्णीयात् । एवं सोदरासोदरयोः संसृष्टयोः सद्भावे कतरः इत्यत्र प्रथमत आह अन्योदर्यस्त्विति । अन्योदर्यः पुनः संसृष्टी सन् गृह्णीयात् नान्योदर्यमात्रः किन्तु असंसृष्टोऽपि एवं वचनस्य सोदरपदानुषङ्गात् प्राप्तः सोदरश्च गृह्णीयात् । तेन एकत्रविषये एवं वचनेनोक्तं संसृष्टत्वसोदरत्वयोरेकैकस्य तुल्यत्वादुभयोर्विभज्य ग्रहणं । तदुभयसत्वे च असोदर्यस्य संसृष्टिनोः तुल्यरूपत्वान्नेति । द्वितीये आह संसृष्टो नान्यमातृज इति सोदरे संसृष्टिनि सत्यन्यमातृजः संसृष्टी सोदर एव गृह्णीयात् संसृष्टत्वाविशेषेऽपि सोदरत्वेनतस्य बलवत्वात् । दायभागकारास्तु अन्योदर्यस्तु संसृष्टी सन् सत्यपि सोदरे संसृष्टिधने हरेत् नान्योदर्योऽसंसृष्टोऽपि गृह्णीयादिति एवमाहुः

स्यार्थः । तत्र किं सोदरस्तदानीं न गृह्णीयादेवेत्यपेक्षायामुत्तरार्द्धेनोक्तं असंसृष्ट्यपि चादद्यात् सोदर इत्यनुषज्यते न संसृष्टोऽन्यमातृजः केवलः । किन्तु उभाभ्यामेव विभज्य गृहीतव्यमित्याहुः । मिताक्षरादयोऽप्येवं । याज्ञवल्क्यदीपकलिकायां शूलपाणिमहामहोपाध्यायास्तु । अन्योदर्यस्तु संसृष्टी नान्योदर्यो धनं हरेत् । असंसृष्ट्यपि सोदर एव गृह्णीयात् न तु संसृष्टः सापत्न्यो भ्राता । संसृष्टइतिगार्थसंसृष्टः सोदर इति केचित् । नान्योदर्यो धनं हरेत् इति पाठं अन्योदर्यः सन् धनं गृह्णीयात् । इति व्याख्या असंसृष्टसोदरस्याधिकारार्थमिदं वचनमेतान पुनरुक्तिरित्याहुः । रत्नाकरप्रभृतयस्तु कल्पतरौ नान्योदर्यधनं हरेदिति पाठो दृश्यते समूलभूत याज्ञवल्क्यमिताक्षरापारिजातहलायुधग्रन्थेषु नान्योदर्यधनं हरेदिति पाठदर्शनात् तदनुसारव्याख्यादर्शनाच्च लिपिकरप्रमाद इत्याहुः । इति

दायतत्त्वे ॥
संसृष्टत्वं क्ली संसृष्टस्य भावः
यथा। तेन एकत्र विषये एवं
वचनोक्तसंसृष्टत्व सोदरत्व-
योरेकत्र सत्त्वात्तदुभयोर्वि
भज्य ग्रहणं। इति दायतत्त्वे॥
संसृष्टी पुं संसृष्टत्वविशिष्टः।
यथा याज्ञवल्क्यः। संसृष्टिन
स्तु संसृष्टी सोदरस्य तु सोदरः
दद्याच्चापहरेदंशं जातस्य च मृ
तस्य च। अन्योदर्य्यस्तु संसृष्टी
नान्योदर्य्योधनं हरेत्। असं
सृष्टापि चादद्यात् संसृष्टो-
नान्यमातृजः ॥
इति दायतत्त्वे ॥
संस्कारः पुं प्रतियत्नः। अनुभ
वः। मानसकर्म्म। इति मेदिनी
न्यायमते गुणविशेषः। स च
त्रिविधः वेगाख्यसंस्कारः १
अयं सर्व्वपदार्थस्थायी। क्वचि
द्वेगजन्यः क्वचित् कर्म्मजन्यश्च
स्थितिस्थापकसंस्कारः २ अयं
पृथिवीगुणः केचिन्मते पृथि
व्यादि चतुःपदार्थगुणः। अयं
अतीन्द्रियः स्पन्दनकारणञ्च।
भावनाख्यसंस्कारः ३ अयं आ
त्मनो अतीन्द्रियगुणः। उपे-
ज्ञानात्मक निश्चयजन्यः। अ
यं स्मरण प्रत्यभिज्ञयोः कार
णञ्च। अस्य प्रमाणं। संस्कार
भेदो वेगोऽथ स्थितिस्थाप
कभावने। मूर्त्तमात्रे तु वेगः स्या
त् कर्म्मजो वेगजः क्वचित्। स्थि
तिस्थापकसंस्कारः क्षितौ केचि
च्चतुर्ष्वपि। अतीन्द्रियः सविशेषः
क्वचित्स्पन्देपि कारणं। भावना
ख्यस्तु संस्कारो जीववृत्तिरती
न्द्रियः। उपेक्षानात्मकस्तस्य निश्च
यः कारणं भवेत्। स्मरणे प्रत्य
भिज्ञायामप्यसौ हेतुरुच्यते।
इति भाषापरिच्छेदः। शुद्धिः॥
अदृष्टविशेष जनककर्म्म। य
था। यदग्निस्थापनानन्तरं कर्म्म
कालेनुष्ठानादिश्रेकया संस्कृता
ग्निरन्यत्रानीयते तदा पुनर्म्मसं
स्कारः कर्त्तव्यः। समुद्रमुपलि
प्य उल्लिख्योद्धृत्य अभ्युक्षयेत्
एष संस्कारो ज्ञेयोऽतोऽग्नेरभ्रयः
इति गृह्यान्तरात्। इति संस्कार
तत्त्वे॥ दशविधसंस्कारा यथा।
विवाहः १ गर्भाधानं २ पुंसवनं
३ सीमन्तोन्नयनं ४ जातकर्म्म ५
नामकरणं ६ अन्नप्राशनं ७ चूडा
करणं ८ उपनयनं ९ समावर्त्तनं

१० यथा हारीतः। गर्भाधानव
दुपेतो ब्रह्मगर्भं संदधाति पुं
सवनात् पुंसीकरोति फलस्ना
पनात् मातापितृजे पाप्मान
मपोहति रेतोरक्तगर्भोपघा
तः पञ्चगुणो जातकर्म्मणा प्र
थममपोहति नामकरणेन
द्वितीयं प्राशनेन तृतीयं चूडा
करणेन चतुर्थं स्नापनेन पञ्च
ममेतैरष्टाभिः संस्कारैर्गर्भो
पघातात् पूतो भवतीति। स्ना
नमत्र समावर्त्तनरूपमिति कल्प
तरुः। इति संस्कारतत्त्वं। याज्ञव
ल्क्यः। गर्भाधानमृतौ पुंसः स
वनं स्पन्दनात् पुरा। षष्ठेऽष्टमे वा
सीमन्तः प्रसवे जातकर्म्म च। अ
हन्येकादशे नाम चतुर्थे मा
सि निष्क्रमः। षष्ठेऽन्नप्राशनं मा
सि चूडा कार्य्या यथाकुलं॥
एवमेनः शमं याति बीजगर्भस
मुद्भवं। इति मलमासतत्त्वं। सं
स्कृतानामधिकारमाह याज्ञ
वल्क्यः। असंस्कृतास्तु संस्का
र्य्या भ्रातृभिः पूर्व्वसंस्कृतैः। भगि
न्यश्च निजादंशाद्दत्वांशन्तु तुरीय
कं। असंस्कृता भ्रातरः भगिन्यश्च
पूर्व्वसंस्कृतैरुपनीतैः। अन्यथा
मन्त्रपाठानधिकारापत्तेः। इत्यु
द्वाहतत्त्वं। एषां विवरणं त
त्तत् शब्दे द्रष्टव्यं। गृहदेव
गणोक्तसंस्कारा स्तत्रैव ९३
९४। ९५ अध्यायेषु द्रष्टव्याः
अथ जीर्णदेवगृहादिसंस्का
रफलं। अथ चेज्जीर्णसंस्का
रविधिः शृणुष्व महामुने। दे
वतादिषु कर्त्तव्यो महाभो
गफलप्रदः। मूलादष्टगु
णं पुण्यं जीर्णसंस्कारतो भवे
त्। तस्मादनाथ जीर्णेषु कार्य्यं
संस्करणं मुने। स्वकीयं पर
कीयं वा यथाविभववित्तैः।
स्वतो वा परतो वापि यस्तु संस्कु
रुते सुरान्। स यावच्चेन्द्रस्थायी
गो स्तावत्काले सुखी भवे
त्। लोकेषु तेषु देवानां वि
रजस्केषु हृष्टधीः। यथा रो
मेधयज्ञेषु पशुरोमसमाः स
माः। वसेत् दिवि हृष्टात्माजी
र्णसंस्कारकारकः। अनाथा
वा सनाथा वा पूजनीयाः सदा
सुराः। इति देवीपुराणे पूजा
विधिनामाध्यायः॥
संस्कारजः त्रि संस्कारेण जा
तः। संस्कारशब्दे एवं कजनया।

तो ऽप्रमयेन निष्पन्नः ॥
संस्कारवर्जितः पुं उपनयन
संस्कारहीनः। तत्पर्य्यायः ॥
व्रात्यः २। इति हेमचन्द्रः ॥
दशसंस्कारहीने त्रि ॥
संस्कारहीनः पुं व्रात्यः। इत्य
मरः। संस्कारहीनत्वकालमा
ह। यमः। पतिता यस्य सावि
त्री दशवर्षाणि पञ्च च। ब्राह्म
णस्य विशेषेण तथा राजन्य
वैश्ययोः। प्रायश्चित्तं भवेदेषां
प्रोवाच वदतां वरः। तथा मार्क
ण्डेयः। विप्रस्य षोडशाद्वर्षात्
राज्ञो द्वाविंशतेः परं। वैश्य
स्याष्टाधिकाद्दशाद्वात् सावि
त्रीपतनं भवेत्। विष्णुधर्मोत्तरे
षोडशाब्दाद्धि विप्रस्य राज
न्यस्य हि विंशतिः। विंशतिः
सचतुर्थी च वैश्यस्य परिकी
र्त्तिता। सावित्री नातिवर्त्तेत
अत ऊर्द्धं निवर्त्तते। इति मल
मासतत्त्वं ॥
संस्कृतं क्ली लक्षणोपेते। इति
मेदिनी। पाणिन्यादिकृतव्या
करणसूत्रेण उपेतं उपगतो
लक्षणोपेतः साधुशब्दः। इत्य
मरटीकायां भरतः। सा तु दे
ववाणी यथा। गीर्वाणवाणीव
दने मुकुन्दसंकीर्त्तने चेत्युभयं हि
लोके। सुदुर्लभं तच्च नमुष्य
बोधान्न लभ्यते ऽतः पठनीय
मेतत्। इति मुग्धबोधव्याक
रणप्रशंसाश्लोकः ॥
संस्कृतः त्रि कृत्रिमः। इत्यमरः
करणेन निर्वृत्तः कृत्रिमो य
ज्ञादिः। इति भरतः। पक्वः ॥
स्वते गुणान्तराधानं। इत्यमरः
टीकायां स्वामी। शस्तः। भू
षितः। इति मेदिनी। शोधितः
इति जटाधरः ॥
संस्क्रिया स्त्री शवदाहादिक्रि
या। इति त्रिकाण्डशेषः। संस्कार
श्च संस्तरः पुं शय्या। यज्ञः। इ
ति हेमचन्द्रः। पल्लवादिरचितश
य्या। इति शब्दरत्नावली ॥
संस्तवः पुं परिचयः ॥ इत्यम
रः। सम्यक्स्तुतिश्च ॥
संस्तवानः त्रि सहृत्का। इत्यु
णादिकोषः। वाग्मी। उद्गाता।
हर्षः। इति संक्षिप्तसारोणा
दिवृत्तिः ॥
संस्रावः पुं क्रतुषु द्विजन्मनां
स्तुतिभूमिः। इत्यमरः। यज्ञेषु
स्तुतिकारिणां ब्राह्मणानां व

स्थानभूमिः संस्राव उच्यते ॥
क्रतुषु यज्ञविषयेषु द्विजानां
या स्तुतिभूमिः स्थाने स संस्रा
वः। तत्पर्य्यायः। समेत्य स्तूयते
छन्दोगै र्यत्र इति संस्रावः च
मु। इति भरतः ॥
संस्तुतः त्रि सम्यक्प्रकारेण
स्तुतिप्राप्तः। सम्यक्स्तवविष
यीभूतः। यथा। भूयश्च शतवा
र्षिक्यामनावृष्ट्यां मनस्विनि।
मुनिभिः संस्तुता भूमौ संभ
विष्याम्ययोनिजा। इति देवी
माहात्म्ये। संस्त्यायः पुं संघा
तः। सन्निवेशः। इत्यमरः। सं
स्थाने। विस्तृतिः। इति मेदिनी
गृहे। इति हेमचन्द्रः ॥
संस्थः पुं चरः। इति मेदिनी
निजराष्ट्रकः। इति हेमचन्द्रः
संस्थः त्रि अवस्थितः। इति मे
दिनी। मृतः। इति शब्दर
त्नावली ॥
संस्था स्त्री न्याय्यपथस्थितिः
इत्यमरः। संतिष्ठते ऽनया स
म्यगवस्थाने वा संस्था। इति
भरतः। अस्याः पर्य्याया मर्य्या
दाशब्दे द्रष्टव्याः ॥ स्थितिः
सादृश्यं। नाशः। इति मेदि
नी। अवस्था। व्यक्तिः। क्रतुभे
दः ॥ समाप्तिः ॥ इति हेमच
न्द्रः ॥ प्रलयचतुष्टये ॥ यथा
नैमित्तिकः प्राकृतिको नित्य
आत्यन्तिको लयः। संस्थेति
कविभिः प्रोक्ता चतुर्धास्य स्व
भावतः। इति पुराणं। संस्थानं
क्ली सन्निवेशः। चतुष्पथः।
इत्यमरः ॥ आकृतिः ॥
मृत्युः। इति मेदिनी। चिह्नं।
इति जयपालः। सम्यक्स्थिति
श्च संस्थापनं क्ली सम्यक्स्थि
तिप्रापणं। स्थिरीकरणं। य
था। परित्राणाय साधूनां विना
शाय च दुष्कृतां। धर्मसंस्थाप
नार्थाय संभवामि युगे युगे।
इति भगवद्गीतायां ४ अध्यायः
साधुरक्षणेन दुष्टवधेन च धर्मं
स्थिरीकर्त्तुं। इति तट्टीकायां
श्रीधरस्वामी ॥
संस्थितः त्रि मृतः। इत्यमरः।
सम्यक्स्थितिविशिष्टश्च ॥
संस्थितिः स्त्री संस्थानं। मृत्युः
गृहं। इति केचित् ॥
संस्पर्शः पुं सम्यक्स्पर्शः। स
त्वगिन्द्रियग्राह्यगुणविशे
षः यथा छागलेयः। आलाप।

तृणाग्रसंस्पर्शात् निश्वासात् स
हभोजनात्। सहशय्यासना
ध्यायात् पापं क्रमते नृणां ॥
इति प्रायश्चित्तविवेकः ॥
संस्पर्शा स्त्री जनीनामगन्धद्र
व्यं। इत्यमरः ॥
संस्फालः पुं मेषः। इति त्रि
काण्डशेषः ॥
संस्फुटः त्रि विकसितः। इति
शब्दरत्नावली ॥
संस्फेटः पुं युद्धं। इत्यमरटी
कायां भरतः ॥
संस्फोटः पुं युद्धं। इत्यमरः
संस्मरणं क्ली संस्मृतिः। सं
स्मारजन्यज्ञाने। यथा याज्ञि
याज्ञवल्क्यः। ध्यायेन्नारायणं
नित्यं स्नानादिषु च कर्मसु। त
द्विष्णोरिति मन्त्रेण स्नायाद
प्सु पुनः पुनः। गायत्री वैष्ण
वी ह्येषा विष्णोः संस्मरणाय
वै। इति तिथ्यादितत्त्वं ॥
संस्मृतिः स्त्री संस्मरणं। सं
पूर्व्वस्मधातोः क्तिः प्रत्ययेन नि
ष्पन्नः ॥ संहतः त्रि दृढसंधिः।
इत्यमरः। मिलितः। दृढः। इ
ति मेदिनीकरहेमचंद्रौ ॥ स
म्यक्प्रकारेण हतश्च ॥

संहतजानुः त्रि लग्नजानुकः
यथा। मनुः प्रगतजानुः स्यात्
प्रज्ञोः सैव च हन्यते। संज्ञुः
संहतजानुश्च भवेत् संज्ञो
पितरहि ऊर्द्धज्ञुस्तु ऊर्द्धजानुः
स्यादूर्द्धज्ञोः ऊर्द्धजानुकः ॥
इति भरतधृतसाहसाङ्कः ॥
संहतजानुकः त्रि लग्नजानु
कः। तत्पर्य्यायः संज्ञुः २ इत्य
मरः। संहतजानुः ३ संज्ञः ४
इति तट्टीकायां भरतः ॥
संहतलः पुं मिलितपाणि
द्वयं। इत्यमरः। द्वौ वाम दक्षि
णौ प्रतलौ संहतौ मिलितौ
संहतल उच्यते प्रतलद्वयं
मिलितं संहतलः स्यादित्य
र्थः। संहतं लाति संहतलः
हेनजनादितिरुः। निर्विशेषो
पाठे द्वौ वामदक्षिणौ पाणी
संहतौ मिलितौ चेत् तदा सं
हतलप्रतलावुच्येते। अस्मि
न्नर्थे प्रतलोयं चपेटे संहत
ले च वर्त्तमानत्वात् नानार्थः
इति भरतः ॥
संहतिः स्त्री समूहः। इत्यमरः
संहननं क्ली शरीरं। इत्यम
रः ॥ सम्यक्हननञ्च ॥

संहराख्यः पुं पावकनामाग्निः
इति मत्स्यपुराणं ॥
संहर्षः पुं प्रमोदः। स्पर्द्धा ॥
वायुः। इति विश्वमेदिन्यौ ॥
संहवनं क्ली सम्यक्प्रकारेण
हूतिः। संपूर्व्व हुधातो भावे
ऽनट् प्रत्ययेन निष्पन्नं ॥
संहारः पुं नरकविशेषः। इ
त्यमरः। प्रलयः। इति हेमचं
द्रः। संक्षेपः। इति जटाधरः
संहरणञ्च ॥
संहारमुद्रा स्त्री विसर्ज्जनमुद्रा
यथा राघवभट्टधृतं। अधोमु
खे वामहस्ते ऊर्द्ध्वास्यं दक्षहस्त
कं। क्षिप्ताङ्गुली रङ्गुलीभिः सं
गृह्य परिवर्त्तयेत्। प्रोक्ता संहा
रमुद्रेयं अर्पणे तु प्रशस्यते ॥
अर्पणे आत्मनीति शेषः। इति
तिथ्यादितत्त्वं। भैरवविशेषः।
यथा। असितांगो रुरुश्चण्डः क्रो
धउन्मत्त एव च। कपाली भी
षणश्चैव संहारश्चाष्टभैरवाः
इति तन्त्रं ॥
संहितः त्रि मिलितः। संपूर्व्व
धाधातोः क्तप्रत्ययेन निष्पन्नः
संहितपुष्पिका स्त्री मिश्रेया
इति राजनिर्घण्टः ॥

संहिता स्त्री मन्वादिप्रणीतध
र्मशास्त्रं। तत्पर्य्यायः। स्मृतिः २
धर्म्मसंहिता ३ श्रुतिजीविका
४ इति शब्दरत्नावली संहिता
विशेषा यथा। पद्मपुराणे सं
ख्यानं च तत्सर्व्वमुदाहृतं। अ
ष्टादशपुराणानामेव मेवावि
दुर्बुधाः। एवञ्चोपपुराणानाम
ष्टादश प्रकीर्त्तिताः। इतिहा
सो भारतञ्च वाल्मीकं काव्यमे
व च। पंचकं पंचरात्राणां कृ
ष्णमाहात्म्यमुत्तमं। वाशिष्ठं ना
रदीयञ्च कापिलं गौतमीयकं
परं सनत्कुमारीयं पंचरात्रञ्च
पंचकं। पंचम्यः संहिताना च
कृष्णभक्तिसमन्विताः। ब्रह्म
णश्च शिवस्यापि प्रह्लादस्य त
थैव च। गौतमस्य कुमारस्य
संहिताः परिकीर्त्तिताः। इति
ब्रह्मवैवर्त्ते श्रीकृष्णजन्मख
ण्डे १३२ अध्यायः॥ अपि च।
इदं तु पंचदशमं पुराणं कौ
र्म्ममुत्तमं। चतुर्धा संस्थितं पु
ण्यं संहितानां प्रभेदतः॥ ब्रा
ह्मी भागवती सौरी वैष्णवी च
प्रकीर्त्तिता। चतस्रः संहिताः पु
ण्या धर्म्मकामार्थमोक्षदाः

इत्येतत्संहिता ब्राह्मी चतुर्वेदैः
समन्विता। भवन्ति षट्सहस्रा
णि श्लोकानामत्र संख्यया॥
इति कौर्म्मे १ अध्यायः॥
संहूतिः स्त्री बहुभिः कृताका
ने। इत्यमरः॥
संहृतः त्रि कृतसंहारः। यथा
ग्रहे विभूत्या बहुभि विहरूपै
र्यदा स्थिता। तत् संहृते मयै
कैव तिष्ठाम्याजौ स्थिरो भव
इति मार्कण्डेयपुराणीय दे
वीमाहात्म्य॥
संहृतिः स्त्री संहारः। यथा।
विसृष्टौ सृष्टिरूपा त्वं स्थिति
रूपा च पालने तथा संहृति
रूपान्ते जगतोऽस्य जगन्मये
इति मार्कण्डेयपुराणे देवी-
माहात्म्य॥
संक्षयः पुं नाशः। यथा। वि
पदः संक्षयं यान्ति कल्याणं चो
पपद्यते। नन्दते च कुलं पुंसां
माहात्म्यं मम शृण्वताम्॥ इ
ति मार्कण्डेयपुराणे देवीमा
हात्म्य। प्रलयः॥ इति श
ब्दरत्नावली॥
संक्षिप्तः त्रि कृतसंक्षेपः॥ सं
क्षेपविशिष्टः यथा। समा

हृत्यात्यन्तवाणि संक्षिप्तैः प्रति
संस्कृतैः। सम्यक् सूच्यन्ते वैर्नै
नामलिङ्गान्यनुशासने। इत्यम
रः॥ संक्षिप्तैः अल्पेनैव बहुर्
थप्रतिपादकतया अभिहि
तैः। इति तट्टीकायां भरतः॥
संक्षेपः पुं स्तोकेन भूयसो-
ऽभिधानं। इत्यमरटीकायां भ
रतः। छुंवक इति ख्यात इति
च ख्यातः॥
संक्षुब्धः त्रि संचलनविशिष्टः
इति शुम्भयान्वयदर्शनात्। अ
ऊले। यथा दृष्ट्वा समस्तं सं
क्षुब्धं त्रैलोक्यममरारयः। स
न्नद्धाखिलसैन्यास्ते समुत्तस्थु
रुदायुधाः। इति मार्कण्डेयपु
राणे देवीमाहात्म्य॥
संक्षेपणं क्ली विस्तीर्णानां सं
क्षेपः। प्रपञ्चकरणवैपरीत्ये॥
इति भरतः। तत्पर्य्यायः॥
समसनं २ इत्यमरः। संहारः
३ समाहारः ४ संग्रहः ५ समा
सः ६ इति जटाधरः॥
संक्षोभः पुं चाञ्चल्य। सञ्च
लनं। यथा संक्षोभमत्तरङ्ग
या सापि वितताव्धाः॥ इति
श्रीभागवते॥

सकः पुं } एवोक्तपरामर्शकः
सका स्त्री } से इति भाषा। तद्
शब्दस्य टेः एवं अकि परत्र
आपप्रत्यये च कृते प्रथमैक
वचननिष्पन्नपदद्वये॥
सकटः पुं शाखोटवृक्षः। इति
भूरिप्रयोगः॥
सकटान्नं क्ली अशुद्धान्नं। इति
केचित्॥
सकण्टकः पुं शैवालः। इति
शब्दचन्द्रिका। करञ्जविशेषः।
नाटाकरञ्ज इति भाषा। इति
रत्नमाला। कण्टकयुक्ते त्रि
यथा। पीतलोष्टु समायुक्तस
कण्टकदलान्वितः। हरपाप
मपामार्गं भ्राम्यमाणः पुनः पुनः
इति तिथ्यादितत्त्वे॥
सकरः त्रि हस्तयुक्तः। राजस्व
विशिष्टः। शुण्डयुक्तः। किरण
विशिष्टः। करेण सह वर्त्तते
योऽसौ। इति बहुव्रीहि समा
सनिष्पन्नः॥
सकरुणः त्रि करुणायुक्तः।
सदयः। यथा भवानि त्वं दासे
मयि वितर दृष्टिं सकरुणामि
ति स्तोतुं वाञ्छन् कथयति भ
वानि त्वमिति यः। तदैव त्व-

तस्मै दिशसि निजसायुज्यपद
वीं मुकुन्दब्रह्मेन्द्रस्फुटमुकुट
नीराजितपदां॥ इत्यानन्द-
लहरी॥
सकर्णः त्रि श्रवणशीलः। त
त्पर्य्यायः। श्रुतिलम्बरः २॥
इति जटाधरः। कर्णयुक्तश्च॥
सकर्म्मकः पुं कर्म्मयुक्तधातुः
कर्म्मान्वयिक्रियार्थकः। यथा
काचित् सकर्म्मकाद्धातो र्भावेपि
क्रियाव्याभिरक्तिः। यथा। को
दिशो गन्तव्यः। इति सुपद्मोपटी
योडुगोदासः॥
सकलं त्रि समुदायः। तत्पर्य्या
यः। समं २ सर्वं ३ विश्वः ४
अशेषं ५ कृत्स्नं ६ समस्तं ७
निखिलं ८ अखिलं ९ निःशेषं
१० समग्रं ११ पूर्णं १२ अखण्डं १३
अन्यूनकं १४ इत्यमरः॥
अनूनं १५ इति शब्दरत्नावली
सकामः त्रि कामनाविशिष्टः
यथा अकामो वा सकामो वाप्य
त्रकापि वहिर्जले। इह चामुत्र
दुःखानि नाप्नोत्यायी न पश्य
ति। इति तिथ्यादितत्त्वे॥
सकाशः पुं समीपः। यथा।
देवि दैत्येश्वरः शुम्भ स्त्रैलोक्य

परमेश्वरः। हतोहं प्रेषित स्ते
न त्वत्सकाश मिहागतः॥
इति मार्कण्डेयपुराणेदेवीमा-
हात्म्ये। काशायुक्ते त्रि सकु
रुण्डः पुं साकुरुण्डवृक्षः।
इति राजनिर्घण्टः॥
सकुलः पुं शकुलमत्स्यः। इति
शब्दरत्नावली॥
सकुल्यः त्रि सगोत्रः। यथा
ज्ञातयो ये सगोत्रास्तु स्वज
नज्ञाति बान्धवाः। सकुल्य वे
यकायाद स्वसमानोदका अपि
इति जटाधरः॥ स्वावधूर्द्धं
ततास्सप्तावधि दशमपुरुषप
र्यन्त पुरुषत्रयं। तेषां दशम
पुरुषपर्यन्त संततिः। स्वाव-
धपस्तनाष्टमावधि दशमपु
रुषपर्यन्तसंततिश्च। तेषामशौ
चं यथा बृहस्पतिः। दशाहे
न सपिण्डास्तु शुद्ध्यन्ति प्रेत-
सूतके। त्रिरात्रेण सकुल्यास्तु
स्नात्वा शुद्ध्यन्ति गोत्रजाः॥
इति शुद्धितत्त्वं॥ दायाधिका
रि सकुल्यास्तु पंचमपुरुषाव
धयः। यथा बौधायनः। प्रपि
तामहः पितामहः पिता स्वयं
सोदर्यभ्रातरः सवर्णायाःपुत्रः

पौत्रः प्रपौत्रो वा एतानविभक्त
दायादान् सपिण्डान् आच-
क्षते विभक्तदायादान् सकु
ल्यान् आचक्षते सत्स्वंगजेषु
तद्गामी ह्यर्थो भवतीति। इ
ति दायतत्त्वे शुद्धितत्त्वेच॥
तस्य कन्यादानाधिकारित्वं
यथा। विष्णुः। पिता पिता
महो भ्राता सकुल्या माताम
हो माता चेति कन्याप्रदः पूर्व
नाशे प्रकृतिस्थः परः परः॥
नारदश्च। पिता दद्यात् स्वयं
कन्यां भ्राता वानुमतः पितुः
मातामहो मातुलश्च सकुल्या
बान्धवस्तथा। माता त्वभावे
सर्वेषां प्रकृतौ यदि वर्तते॥
तस्यामप्रकृतिस्थायां कन्यां द
द्युः स्वजातयः। इत्युद्वाहतत्त्वं॥
सकुली स्त्री मत्स्यविशेषः। त
स्या गुणादि स्तालव्यशकारा
दि शकुलशब्दे द्रष्टव्यः॥
सकृत् अव्य सह। एकवारं।
इत्यमरः। विश्वः। इति तट्टीका
सकृत्प्रजः पुं काकः। इत्यम
रः। जातैकमात्रापत्ये त्रि॥
सकृत्फला स्त्री कदली॥
इति राजनिर्घण्टः॥

सकृत्कर्णः पुं वेसरः। इति रा
जनिर्घण्टः। एकमात्रगर्भि-
ण्यां स्त्री॥
सकृद्वीरः पुं एकवीरवृक्षः॥
इति राजनिर्घण्टः॥
सक्तः त्रि प्रविरतः॥ इति हेम
चंद्रः। आसक्तश्च॥
सक्तिः स्त्री संगः सन्जधातोः
क्तिः प्रत्ययेन निष्पन्ना॥
सक्तुः पुं भृष्टयवादिचूर्णः॥
छातु इतिभाषा। यथा भृष्टा
यवाःपुनर्धाना धानाचूर्णन्तु स
क्तवः। इतिहेमचंद्रः। अस्य गुणा
दिः तालव्यादिशक्तुशब्दे द्रष्टव्यः
सक्तुकः पुं विषभेदः। इति-
हेमचंद्रः। स्वार्थे के सक्तुश्च
सक्तुफला स्त्री शमीवृक्षः॥
इत्यमरः॥
सक्तुफली स्त्री शमीवृक्षः॥
इति शब्दरत्नावली॥
सक्थि क्ली ऊरुः॥ इत्यमरः
शकटावयवविशेषः। इत्यु-
णादिकोषः॥
सखा[१] पुं सौहार्दयुक्तः। समा
नः ख्यायते जनैः ख्याति डिः
सलीयादित्वात् ख्याते ये लोपः
समानस्य सभावश्च स्वरवृद्धा-

मिति मेडौ। इत्यमरटीकायां
भरतः। तत्पर्य्यायः॥ आक्रं
दः २ मित्रं ३ सुहृत् ४। इतिज
टाधरः॥ वयस्यः ५ सवयाः ६
स्निग्धः ७ सहचरः ८ इति-
हेमचंद्रः। सहायः। इति मेदि
नी॥ तत्पत्नीगमने दोषो य
था। गुरुतल्पव्रतंकुर्य्यात् रे
तः सिक्त्वा स्वयोनिषु। स
ख्युःपुत्रस्यचस्त्रीषुकुमारीष्वन्त्य
जासुच। इति प्रायश्चित्ततत्त्वं॥
सखिता स्त्री सख्यं। यथा मी
मांसे वृक्षेविनाऽस्मि सुहृद
स्तर्काः समस्ताः स्युः मे वेदान्ताः
परमाप्तबोधगुरवो यूयं मयो
पासिताः। जाता व्याकरणानि
बालसखिता युष्माभि रभ्यर्थ्य
येयामोये समये मनक्तविद्व
तो साहाय्य मालम्ब्यतां। इति
मनुटीकायां कुल्लूकभट्टः॥
सखित्वं क्ली सख्यं। सखिश
ब्दात्भावे त्व प्रत्ययेननिष्पन्नं॥
सखी स्त्री सहचरी। तत्पर्या
यः। आलिः २ वयस्या ३ इत्यम
रः। सध्रीची ४ इति हेमचंद्रः॥
सख्यं क्ली मित्रता। तत्पर्य्यायः
सौहृदं २ सौहार्दं ३ साप्तप

द्वीते ७ मेवे ८ जर्ये ९ से
गते १० इति हेमचन्द्रः ॥
सगा म प संवृतौ । इति कवि
कल्पद्रुमः । मासि सगापयति
पद्मसंगीत् । इति दुर्गादासः ॥
सगोपः पुं ज्ञातिः । इति त्रि
काण्डशेषः । गंधप्रकेति ॥
सगरः पुं अर्हद्भेदः । इति
हेमचन्द्रः । सूर्य्यवंशीयराज
विशेषः । सतु अयोध्याधिप
तिवाहुराजपुत्रः । तस्योत्प
त्यादि यथा । सूर्य्यवंशे महा
राजो वाहुर्नाम महानभूत् ।
तस्यारी हृतेसर्वे हैहयैस्ता
लजंघकैः । काम्बोजाः पह्न
वाश्चैव पारदा यवनाः शकाः
एते पंचगणा ब्रह्मन् हैहया
र्थं पराक्रमन् । हृतराज्यः सवै
विप्र तदा वाहु र्वने ययौ । प
त्नी च यादवी तस्य गर्भिण्या
सीत् पतिव्रता । ततः सपत्नी
एवं सेव तस्या गर्भजिघांस
या । भोजनेन सह प्रादात् ग
रं प्रमानेवतस्या यादव्यास्तत
पोयोगात् गर्भो नैव समार
हा । तं समारचसा राज्ञी देवा
नामतुलकस्यया ॥ पतिमानुष

यौ साध्वी सिषेवेतं वने सदा ।
स राजा विपिने तस्मिन् प्राणां
स्तत्याज योगवान् । सा तु भर्त्तु
श्चितिं कृत्वा वने ता मध्यरो
हत । और्व्वस्तां भार्गवस्तातकृ
पात्समवारयत् । तस्याश्र
मे च सा गर्भं सुषुवे ज्वलन
प्रभं । अजायत महाबाहु र्गरे
णैव सह द्विज । सगरो नाम
तेनाभूत् बालकोतिमनोहरः ।
और्व्वस्तु जातकर्मादि तस्यकृ
त्वा महात्मनः । अध्याप्य वेदा
नखिलान् शास्त्राणि प्रत्यपाद
यत् आग्नेयञ्च महाघोरं ममरै
रपिदुःसहं सतेनास्त्रवलेनाजौ
वलेन च समन्वितः । हैहयांस्ता
लजंघांश्च जघ्ने क्रुद्धः पशूनिव ॥
जनयामास लोकेस्मिन् कीर्त्तिं
कीर्त्तिमतां वरः । ततः शकान्
सयवनान् काम्बोजान् पार
दांस्तथा । पह्नवांश्चापि निःशे
षान् कर्तुं व्यवसितो नृपः ॥
ते हन्यमाना वीरेण सगरेण
महौजसा । वशिष्ठं शरणं ज
ग्मुः सर्वे शरणमीहिते । वशिष्ठः
शरणायातान् समये स्थाप्य तानृ
षिः । सगरं वारयामास तेभ्यो

दत्वाभयं तदा । सगरस्तां प्र
तिज्ञान्तु निशम्य सुमहाबलः
धर्म्मं जघान तेषाञ्च वेशान
न्योऽन्यकारह । अर्द्धं शिरःशका
नां तु मुण्डयामास भूपतिः । यव
नानां शिरः सर्वं काम्बोजानामपि
द्विज । पारदान् मुक्तकेशांस्तु प
ह्नवान् श्मश्रुधारिणः । निःस्वा
ध्यायवषट्कारान् सर्वानेव च
कार ह । कोलिसर्पा माहिषका
दार्वाश्चोलाः सकेरलाः । खसा
स्तुषारा श्चीनाश्च मद्राः किष्कि
न्धकास्तथा । कौन्तलाश्च तथा वं
गाः शाल्वाः कोंकणकास्तथा ॥
सर्वे ते क्षत्रिया स्तात धर्म्मास्तेषां
निराकृताः ॥ पुरोहितस्य वाक्ये
न कृता विकृतवेशिनः ॥ वशीकृ
त्य स राजन्यान् स्वराज्यमन्व
शासत । इति पाद्मे स्वर्गखण्डे १५
अध्यायः । अपि च रोहिताद्वृ
को जातो वृकाद्बाहु रजायत
सगरस्तस्य पुत्रोऽभूत् राजा
परमधार्म्मिकः । द्वे भार्य्ये सग
रस्यापि प्रभा भानुमती तथा
ताभ्यामाराधितः पूर्वं सोर्वो
ग्निः पुत्रकाम्यया ॥ और्व्वस्तुष्ट
स्तयोः प्रादात् यथेष्टं वरमुत्त

मं । एका षष्टिसहस्राणि सुत
मेकं तथापरा । गृह्णातु वंशक
रं प्रभा गृह्णात्वहं स्तथा ॥
एकं भानुमती पुत्र मगृह्णात्
असमञ्जसं । ततः षष्टिसहस्राणि
सुषुवे यादवी प्रभा । खनन्तः पृ
थिवीं दग्धा विष्णुना येऽश्वमा
र्गिणः । असमञ्जसस्तु तनयो अं
शुमान् नाम विश्रुतः । तस्य
पुत्रो दिलीपस्तु दिलीपात्तु भ
गीरथः । येन भागीरथी गंगा
तपः कृत्वावतारिता । भगीरथ
स्य तनयो नाभाग इतिवि
श्रुतः ॥ इति मात्स्ये १२ ॥
अध्यायः ॥
सगर्भः पुं सहोदरः । इति शा
ब्दरत्नावली ॥ अथ पतितसस्व
पुत्रादिपुत्तकृत्यादि । यथा ।
दर्भान् सगर्भ्यानादाय नव सप्त
च पंच वा । साग्रान् समूलान्
छिन्नान् द्विजो दक्षिणपाणि
ना । अंवारम्भेन सव्येन तर्पयेत्
षड् विनायकान् । इति काशी
खण्डे सदाचारो नाम ३५ ॥
अध्यायः ॥
सगर्भा स्त्री गर्भवती । यथा
केचिद्वहन् सामित्य केचित्

पातालमाविशन् सगर्भोचेद्
सेनस्य भार्य्यादाल्भ्याश्रमे ययौ
इति पाद्मे सृष्टिखण्डे १ अध्या
यः ॥ सहोदरः । इति सगर्भ्यश
ब्दर्शनात् ॥ ८
सगर्भ्यः पुं सहोदरः ॥ इत्य
मरः ॥
सगोत्रं क्ली कुले । यथा ।
कुलेगोत्रे सगोत्रञ्च तत्परो
त्रे नियम्यते । इति शब्दर
त्नावली ॥
सगोत्रः पुं ज्ञातिः । समानंगो
त्रं यस्य । यथा । सगोत्रबा
न्धव ज्ञाति बन्धु स्वस्वजनाः
समाः ॥ इत्यमरः ॥
सग्धिः स्त्री सहभोजनं । इत्य
मरः । समाना सह वा जग्धिः
सग्धिः । अदः क्तिः जग्धोदी
इति जग्धे जग्धिः निपातनात्
त् सग्धिः वादेशः । सग्धि धपि
ंदसीति परे ॥ इति भरटी
कायां भरतः ॥
सच न हिंसे । इति कविकल्प
द्रुमः नसज्ञोति । अससज्ञत्
इति दुर्गादासः ॥
संकटः त्रि संबाधः । इत्यमरः ।
हे अस्त्यवकाशे वर्त्मादौ । स
सम्यक् कटति आवृणोतीति सं
कट अच् । सम्यगाम्योत्य बाध्यते
ऽस्मिन्नाचः त्वन् वाच्यलिंगताच
संबाधंदुस्तरेदपि तदुभयं वर्त्म इ
ति माघः ॥ इति भरतः ॥
दुःखे क्ली । यथा । सर्वाबाधा
सुघोरासु वेदनाभ्यर्दितोऽपि
वा । स्मरन्ममैतच्चरितं नरोमु
च्यतेसंकटात् । संकटे दुःखमु
नराहं सततन्वयि ॥ इति दे
वीमाहात्म्यस्य टीकायां नागो
जीभट्टः ॥
संकटा स्त्री देवीविशेषः । सा
च वाराणस्यां प्रसिद्धा । योगि
नीविशेषः । यथा । मंगला पिं
गला धन्या भ्रामरी भद्रिकात
था । उल्का सिद्धिः संकटा च
योगिन्योष्टौ प्रकीर्तिताः ॥
इति ज्योतिषं ॥
संकटाक्षः पुं धवद्रुमः । कटा
क्षसहितेत्रि ॥ इति विश्व
हेमचन्द्रौ ॥
संकथनं क्ली सम्यग्भाषणं
यथा उपलसफलनंपेत दि
वासप्राप्त मैथुनात् । स्त्री एता सं
प्रेक्षणात् स्पर्शात्ताभिः संकथ
नादपि । इत्येकादशीतत्वं ॥

संकथा स्त्री परस्परभाषणं ॥
यथा । उल्लापः काकुवाग्नेयान्वा
क्तिः संलाप संकथे । इति हेम
चन्द्रः ॥ सम्यक्कथनञ्च ॥
संकरः पुं सम्मार्जन्यादिमय
ल्यादिः । तत्पर्य्यायः । अवक
रः २ इत्यमरः । संकारः ३ इति
शब्दरत्नावली । अग्निचटत्
कारः । इति मेदिनी हारावल्या
मिश्रितत्वे । यथा ॥
भेदाख्यानाय नद्वन्द्वो नैक
शेषो नसंकरः ॥ इत्यमरः ॥
परस्परात्यन्ताभाव समानाधि
करणयो रैकाधिकरणं । यथा
मूर्तत्वं मनसि वर्तते भूतत्वं
नास्ति आकाशे भूतत्वं वर्त्तते
मूर्तत्वं नास्ति । पृथिव्यां भूत
त्ववर्त्तते मूर्तत्वञ्चास्तीति जा
तिसांकर्य्यं । तथाचोक्तं । अके
रभेद स्तुल्यत्वे संकरोऽथान
वस्थितिः । रूपहानि रसंबधा
जातिबाधक संग्रहः । इति सि
द्धान्तमुक्तावली ॥ वर्णसंक
रजातिः । यथा याज्ञवल्क्यउ
वाच । वक्ष्ये संकरजात्यादिग
हस्यादिविधिं परं । विप्रा
न्मूर्द्धावसिक्तो हि क्षत्रियायां
विशः स्त्रियां । जातोऽम्बष्ठस्तु
शूद्रायां निषादः पारशवोऽपि
वा माहिष्योग्रौ प्रजायेते विट्
शूद्रांगनयोः नृपात् ॥ वैश्यायां
शूद्रांच राजन्यो माहिष्योग्रो
सुतौ स्मृतौ । शूद्रायां कर
णो वैश्यात् विन्नास्वेष वि
धिः स्मृतः ॥ ब्राह्मण्यां क्षत्रि
यात् सूतो वैश्याद्वैदेहक
स्तथा । शूद्राज्जातस्तु चाण्डा
लः सर्वधर्मवहिष्कृतः । क्षत्रि
यामागधं वैश्यात् शूद्रात् क्ष
त्तारमेवच । शूद्रादायोगवं वै
श्या जनयामास वै सुतं ॥
माहिष्येण करण्यांतु रथका
रः प्रजायते । असत्सन्तस्तु वि
ज्ञेयाः प्रातिलोमानुलोमजाः
जात्युत्कर्षो युगे ज्ञेयः सप्तमे
पञ्चमेऽपि वा । व्यत्यये कर्मणां
साम्यं पूर्ववच्चाधरोत्तरं ॥
इति गारुडे ९६ ॥
अध्यायः ॥
संकरी स्त्री नवदूषितकन्या ।
इति मेदिनी ॥
संकरीकरणं क्ली नवविधपापा
न्तर्गतपापविशेषः यथा विष्णुः
अश्वपुरुषस्य काम क्रोध लो

भाग्यं विपुरये भवति। परि
ग्रहप्रसंगेन विशेषात्तूहाग्र
मिणः। तेनाय माकीर्णोऽति
पातक महापातकानुपातको
पपातकेषु वर्तते। जातिभ्रं
शकरेषु संकरीकरणेषु पा
त्रीकरणेषु मलावहेषु प्रकी
र्णकेषु। तद्यथा। खराश्वोष्ट्रमृ
गेभानामजाविकवधस्तथा
संकरीकरणं ज्ञेयं मीनाहिमहि
षस्य च। तस्य प्रायश्चित्तं यथा।
संकरापात्रकृत्यासु मासं शोध
नमैन्दवं मलिनीकरणीयेषु त
प्तः स्याद्यावकस्त्र्यहः। तथा वि
ष्णुः ग्राम्यारण्यानां पशूनां हिं
सा संकीर्णीकरणं। संकरीक
रणं कृत्वा मासम् अश्नीयाद्
के कृच्छ्रातिकृच्छ्रमथवा प्रा
यश्चित्तं कारयेत्। इति प्राय
श्चित्तविवेकः॥

संकर्षणं क्ली आकर्षणं। स
म्यक्प्रकारेण कर्षणं। संपूर्व
कृष धातोः ल्युट् प्रत्ययेन निष्प
न्नं संकर्षणः पुं बलदेवः। इ
त्यमरः॥

संकलः पुं संकलनं। योगः
संपूर्व कल धातोः भावे अल्
प्रत्ययेन निष्पन्नः॥

संकलनं क्ली एकत्रीकरणं।
योजनं ठिकदेओया। इति
भाषा। इति लीलावती॥

संकलितः त्रि लेखोदितः सं
कृतः। तत्पर्यायः। संपृक्तः २
इत्यमरभरतौ योजितः ३॥
ठिकदेओया योक इति भाषा
यथा। अथ संकलितव्यवक
लितयोः करणसूत्रं। इति लीला
वती। पुञ्जीकृतधान्यादि॥
इति केचित्॥

संकल्पः पुं कर्म मानसं।
इत्यमरः। संकल्पउक्तो हारीते
न। यथा। मनसा संकल्पयति
वाचा अभिलपति कर्मणा चो
पपादयति इति भविष्यपुराण
वचनेन च। संकल्पेन विना रा
जन् यत्किंचित् कुरुते नरः॥
फलं त्वल्पाल्पकं तस्य धर्मस्यार्द्ध
क्षयो भवेत्। इति ब्रह्मपुराणेना
पि आशास्य च शुभं कार्यमु
द्दिश्य च मनोगते। इत्यागमस्यप्र
जने उक्तं। मनोगतं शुभं फल
माशास्य मनसा संकल्प्य उ
द्दिश्य वाचा अभिलप्य कार्यं
कर्मणा उपपाद्यं। भविष्य॥

शुक्तिशंखावाप्य हस्तेस्य कांस्य
तृपादिभिस्तथा। संकल्पाने
वकर्तव्यो मृन्मयेन कदाचन
गृहीत्वोदुंबरे पात्रे वारिपूर्णं
गुणान्वितं। दर्भत्रयं साग्रमूलं
फल पुष्प तिलान्वितं। जला
शयारामकूपे संकल्प एवं वि
ष्णुवे:। साधारणे चान्नरासेपे
प्राग्भागं निक्षिपेज्जले। अत्र के
वल हस्त निषेधस्तु पात्रांतरस
त्त्वविषयः। शंखादि साहच
र्यात्। एकहस्तपरो वा। गृही
त्वोदुंबरे पात्रे वारिपूर्ण मुद
ङ्मुखः। उपवासं तु गृह्णीयाद्य
द्वा वाचैव धारयेत्। इति वराह
पुराणदर्शनात्। इति तिथ्या
दितत्त्वं॥ संकल्पस्य भावेन
यैतत्कर्तव्य मेव निषेधेन म
यैतन्नकर्तव्य मिति ज्ञानविशे
षः॥ व्रतादीनां संकल्पसंभ
वत्वं यथा संकल्पमूलः का
मो वै यज्ञाः संकल्पसंभवाः। व्र
तानि यम धर्माश्च सर्वे संकल्प
जाः स्मृताः। इत्येकादशीतत्त्वं॥

संकल्पजन्मा पुं कामदेवः॥
इति हलायुधः॥

संकल्पभवः पुं कामदेवः। इति
त्रिकाण्डशेषः॥

संकल्पयोनिः पुं कामदेवः
इति हेमचन्द्रः॥

संकसुकः त्रि अस्थिरः। इत्य
मरः। दुर्बलः। कुसुमादिको
षः। मन्दः। इति सिद्धान्तकौ
मुदी उणादिवृत्तिः। संकीर्णः
अपवादशीलः। इति सिद्धान्त
सारोणादिवृत्तिः॥

संकारः पुं सम्मार्जन्यादि
क्षिप्तपांश्वादिः। इति शब्दरत्नाव
ली। अग्निचटत्कारः। इति मे
दिनी। संकारी स्त्री नवहृषित
कन्या। इति मेदिनी॥

संकाशः त्रि सदृशः। अन्तिकः
इति विश्वः॥

संकिलः पुं दहनोल्का। इति
त्रिकाण्डशेषः॥

संकीर्णः त्रि जनादिभिर्निरव
काशः। इति भरतः। नानाजाति
संमिलितं। इति भानुदीक्षितः
तत्पर्यायः। संकुलं २ आ
कीर्णं ३। इत्यमरः। निचितं
४। इति नानार्थे अमरः॥
आश्रं ५ समाकीर्णं ६ इति
शब्दरत्नावली संकटः। इत्य
जयः। परस्परविजातीयः॥

यथा। विशेष्यनिघ्नैः संकी
र्णैर्नानार्थैः रत्नसंचये ऽपि। इत्य
मरटीकायां भरतः। अ
शुद्धः। इति नानार्थे अमरः।
संकीर्णः पुं अम्बष्ठकरणा
दिजात्यन्तरपर्यन्त मिश्रजा
तिः। इत्यमरः। मिश्रितरागः।
इति संगीतशास्त्रं ॥
संकीर्तनं क्ली सम्यक्
कारेण देवतानामोच्चारणं।
गुणादिकथनं यथा कृष्णव
र्णं त्विषा कृष्णं सांगोपांगास्त्र
पार्षदं। यज्ञैः संकीर्तनप्रायैर्य
जन्ति हि सुमेधसः। इति श्रीम
द्भागवते ११ स्कन्धे ५ अध्यायः
कृष्णं लोकान्यावर्तयति। त्विषाका
न्त्या कृष्णम् इन्द्रनीलमणिवदु
ज्ज्वलं। यद्वा त्विषा कृष्णं कृष्णा
वतारं अनेन कलौ कृष्णावता
रस्य प्राधान्यं दर्शयति। अंगा
नि हृदयादीनि। उपांगानि कौ
स्तुभादीनि। अस्त्राणि सुद
र्शनादीनि। पार्षदाः सुनन्दा
दयः। तत्सहितं यज्ञैः देवा
र्चनैः। संकीर्तनं नामोच्चारणं
स्तुतिश्च तत्प्रधानैः। सुमेध
सो विवेकिनः। इति तट्टीका
यां श्रीधरस्वामी ॥ तन्माहा
त्म्यं यथा। संकीर्तनध्वनिं श्रु
त्वा ये च नृत्यन्ति मानवाः ॥
तेषां पादरजःस्पर्शात् सद्यः
पूता वसुंधरा। इति बृहन्नारदी
यपुराणं। अपि च। नामसंकीर्त
ने यत्र कृष्णस्य परमात्मनः
स्थाने तत्र पवित्रे स्यान्मृतानां
तत्र मुक्तिदे। इति पद्मपुरा
णं ॥ प्रथमसंकीर्तनारम्भ
प्रमाणं यथा ॥ पुष्करतीर्थे ना
रदं प्रति ब्रह्मवाक्यं। श्रीकृष्णस्य
संकीर्तने वीणाध्वनिसमन्विते
कृतवत्साधुनात्मैव शृण्वन्तु मु
नयः सुराः। गोपीनाञ्च सुहृद्गणं
परं रासमहोत्सवं। नाभिः सार्द्धं
जलक्रीडां हरे रुतकीर्तनं कुरु
कृष्णसंकीर्तनं नृत्यं पुनाति
स्फातिमात्रतः। श्रोतारश्च प्र
वक्तारं अकृषैः समभिः सह ॥
यत्रैव प्रभवेत्तस्य तन्नाम गु
णकीर्तनं। तत्र सर्वाणि ती
र्थानि पुण्यानि मंगलानि च ॥
तत्कीर्तनध्वनिं श्रुत्वा सर्वाणि
पातकानि च। दूरादेव पलायं
ते वैनतेयमिवोरगाः ॥ तदि
ने सफलं मन्ये यशसं सर्वमं

गलं। श्रीकृष्णकीर्तनं यत्र तत्र
वै नायुषोऽव्ययः कृष्णसंकीर्त
नस्थाने ये च नृत्यन्ति वैष्णवाः
तेषां पादरजःस्पर्शात् सद्यः पू
ता वसुंधरा ॥ उत्कीर्तनं भवे
यत्र कृष्णस्य परमात्मनः ॥
स्थानं तत्र भवेत्तीर्थं मृता
नां तत्र मुक्तिदं। तत्र पापा
नि तिष्ठन्ति पुण्यानि सुखि
तानि च। तपस्विनाञ्च व्रति
नां व्रतानां तपसां स्थले।
वर्तन्ते पापिनां देहे पापा
नि त्रिविधानि च। महापापो
पपापातिपापान्येव स्मृता
नि च। कृष्णसंकीर्तनाद्धाना
नन्नामग्रहणाद्देहो मुच्यन्ते पा
तकैर्लोकाः पापिनः त्रिविधा
जनाः। इति नारदपञ्चरात्रे
ज्ञानामृतसारे प्रथमैकरा
त्रे महोत्सवारम्भो नाम ९
अध्यायः ॥
संकीर्तितः त्रि सम्यगुच्चरि
तः। संस्तुतः। यथा। अज्ञाना
दथवा ज्ञानादुत्तमश्लोकना
म यत्। संकीर्तितमघं पुंसो द
हेदेधो यथानलः ॥ इति श्री
भागवते ६ स्कन्धे २ अध्यायः
संकुचितं क्ली संकोचयुक्तं
अप्रफुल्लं। तत्पर्यायः। निद्रा
णं १ मीलितं २ मुद्रितं ३
इति हेमचन्द्रः। सुप्तं ४ मिलि
तं ५ नतं ६ निकुंचितं ७।
सन्निद्रं ८ अलसं ९ इति रा
जनिर्घण्टः ॥
संकुलं क्ली युद्धं। इत्यजयः।
परस्परपराहतवाक्यं। तत्प
र्यायः। क्लिष्टं २ इत्यमरः ॥
द्वे पूर्वापरविरुद्धे वाक्ये। य
था यावज्जीवमहं मौनी ब्र
ह्मचारी पिता मम इत्यादिः मा
ता च मम वन्ध्या स्यात् स्मरा
मोऽनुपमो भवान्। कुलं बंधु
संहतयोः संपूर्वः कुङ् क्तात्
कः। क्लिश्यते इति कः क्लिष्टं
परस्परपराहते। तत्र सरस्वती
कण्ठाभरणे क्लिष्टलक्षणं
यथा। इत्येव यस्यार्थं संविनि
क्लिष्टेनेष्टं हितन्मतं। यथा
विजितात्मभवद्वेषि गुरुपा
दहतो जनः। हिमापहामि
त्रधरैर्व्याप्तं व्योमाभिनन्दति।
इति। अस्यार्थः। विना गरु
डेन जितं इह स्यात्मभवो
र्जितस्तस्य द्वेषी कर्णः तस्य

विरुद्धं परस्परपराहते ५



गुरुपिलासर्थ्यः तस्य पादैरभि
भिर्हतोजनो लोकः व्योम श्रा
कांशमभिनंदति कीदृशं हि
मापह्नोऽग्नि स्तस्याभिन्नं जले
नद्धारयंति ये ते मेघैः र्व्या
प्ते। इति भरतः॥
संकुलं त्रि जनादिभिर्निरव
काशे। तत्पर्यायः संकीर्णं
१ आकीर्णं २ इत्यमरः। क
लिलं ४ गहनं ५ इति केचि
त्। संकीर्यते स्म जनादिभि
र्निरंतरं व्याप्यते स्म संकीर्णं
कृशा विक्षेपे क्तः। संकुलति
संकुलं कुल जं वंधे संह
त्याः संघर्ते इजडत्वात् क्तः
संकुलं दस्यादि शाकिधाना
कलेशांकुले तालवाद्यादीति
स्वामी। आकीर्णं संकीर्णं
वत् इति भरतः॥ संकेतः पुं
स्वाभिप्रायव्यंजकचेष्टाविशे
षः। संकेत्यते उच्यतेऽत्र। त
त्पर्यायः। प्रज्ञप्तिः २ परि
भाषा ३ बोली ४ समयः ५
आकारः ६ इति त्रिकाण्डशे
षः। उदाहरणं यथा संके
त प्रियशंकया निजपतिं
प्राबोचदर्शप्रमे। इति रसमं
ग्रहः न्यायमते यथा संकेतो
लक्षणा चार्थे पदवृत्तिः॥ इ
मा पदप्रतिपाद्योऽर्थः एवंपदा
र्थः इत्यभिधीयते। इदं पदमि
ममर्थं बोधयत्विति तस्मात्प
दादयमर्थो बोद्धव्य इतिवे
च्छा संकेतरूपा वृत्तिः॥ तत्रा
धुनिकसंकेतः परिभाषा। तथा
अर्थबोधकं पदं पारिभाषिकं
यथा शास्त्रकारादिसंकेति
तनदीवृद्ध्यादिपदं। ईश्वरसंके
तः शक्तिः। तथा अर्थबोधकं
पदं वाचकं। यथा गोत्वादिवि
शिष्टबोधक गवादिपदं॥
तेह्योऽर्थो गवादि वाच्यः स
एव मुख्यार्थ इत्युच्यते। इति श
क्तिवादे गदाधरीटीका॥
संकेतनिकेतनं क्ली प्रियसं
लनाधार्थं यावितगृहं। यथा सं
केतनिकेतने प्रिय मनवलो
क्य समाकुलहृदया विप्रलब्धा
संकेतकेलिगृह मेत्य निरीक्ष्य
शून्य मेणीदृशो निभृतनिःश्व
सिताधराया। अर्धोत्तरं वच
नमर्हति कापि नेत्रे ताम्रोत्पल
द्विकवलीकृत मेव तस्थौ। सं
केतस्थलं प्रति भर्तुरनागमन

कारणं चिंतयति या सोत्कंठि
ता। इति रसमंजरी॥
संकोचं क्ली कुंकुमं। इत्यमरः
संकोचः पुं मत्स्यभेदः। बंधः
इति मेदिनी। बहुविषयकवा
क्यार्थादे रल्पविषयस्थापनं।
यथा। सामान्यशास्त्रार्थस्य वि
शेषनिष्ठत्वं संकोचः। इति श्रा
द्धविवेकः। बोधः। जडीभाव
इत्यर्थः। यथा यस्मिन् प्रमुदि
ते राज्ञि तमः संकोचतितितो
इति कवि कल्पद्रुमटीकायां
दुर्गादासः॥
संकोचनी स्त्री लज्जालुलता
इति रत्नमाला॥
संकोचपिशुनं क्ली कुंकुमं।
इति भावप्रकाशः॥
संक्रन्दनः पुं इंद्रः। इत्यमरः।
रोदने क्ली॥
संक्रमः पुं क्ली दुर्गसंचरः॥
साको इति भाषा। इत्यमरः।
संक्रामति अनेन संक्रम्यते
ऽस्मिन् वा संक्रमः स्वच्। दुर्गे
षित्वादि संचरत्यनेन दुर्गसंच
रः करणे अल्। संचरो निर्ग
मोऽल्पपथः। इति रत्नकोषः
इति भरतः॥
संक्रमः पुं क्रमणं सम्यग्राशि
संचारवस्तु। इति धरणिः॥ र
विसंक्रमकालो यथा। त्रिंशः स
हस्रभागोयः सकालो रविसं
क्रमः। इति तिथ्यादितत्त्वं॥
संक्रमणं क्ली गमनं। सूर्यस्य
राश्यंतरप्रवेशः। यथा। काल
कौमुद्यां जावालिः एर्केचेद
हरणे तु रविसंक्रमणं भवे
त्, प्राक् दिनद्वयं पुण्यं स्यक्त्वा
मकरकर्कटौ। देवीपुराणे
रविसंक्रमणे पुण्ये नस्नाया
तु यस्तु मानवः। सप्तजन्म भ
वेत् कुष्ठी दरिद्रश्चोपजायते
इति तिथ्यादितत्त्वं॥
संक्रांतः त्रि संक्रांतिविशिष्टः
यथा। असंक्रांतमासोऽधि
मासः स्फुटः स्यात् द्विसंक्रां
तमासः क्षयाख्यः कदाचित्।
इति मलमासतत्त्वं। प्राप्तः। गतः
क्रमागतधनादि। यथा स्त्री-
संक्रांतधनस्य स्त्रीधनत्वाभा
वात् अधिकारविशेषस्यानव
चनादप्राप्यानांतया कल्पने
सादृश्यात् स्त्रीसंक्रांत धनस्या
स्य सर्वस्वामि दायादृष्टेऽपि
कारी कल्पनीय एतद्ध्येपत्नी

पदस्य स्त्रीत्वकत्वमिति भा
वः। इति दायभागटीकायां श्री
कृष्णतर्कालङ्कारः॥
संक्रान्तिः स्त्री राश्यन्तरसंयो
गानुकूलव्यापारः। यथा। ना
डीनक्षत्र दिवसे रवि भौमश
नैश्चराः। संक्रान्तिर्यस्य कुर्व्वं
ति तस्य क्लेशोऽभिजायते।
इति तिथ्यादितत्त्वे। रविसंक्रा
न्तिर्यथा। भविष्य मात्स्ययोः
तियेषु। मृगकर्कटसंक्रान्ती
द्वे तूदग्दक्षिणायने। विषुव
ती तुलामेषे गोलमध्ये त
थापराः॥ मृगो मकरः॥
गोलो राशिचक्रं धनुर्मिथु
नकन्यासु मीने च षडशीत
यः वृषवृश्चिकसिंहेषु कुम्भे
विष्णुपदी स्मृता। देवीपुराणे
यावद्विंशकला भुक्तास्तत्पु
ण्यं चोत्तरायणे निरंशे भास्क
रे दृष्टे दिनान्तं दक्षिणायने। अ
र्द्धरात्रे त्वसम्पूर्णे दिवा पुण्यम
नागते। अर्द्धरात्रे व्यतीते तु वि
ज्ञेयं चापरेऽहनि। सम्पूर्णोचा
र्द्धरात्रे च उदयेऽस्तमयेऽपि वा।
स्नानार्हं भास्करे पुण्यमह
र्णे पार्वतीदले॥ सम्पूर्णेत्वह
भयोर्ज्ञेयमतीतेऽकेऽपरेऽहनि।
षडशीतिमुखे तीते वृत्ते च
विषुवद्वये। भविष्यत्ययने पु
ण्यमतीते चोत्तरायणे। आदौ
पुण्यं विजानीयात् यद्यभिन्ना
तिथिर्भवेत्। विंशकलाविंश
तिनमीकला संक्रान्तिलग्नाह
र्द्धं यावद्भवति तावत्पुण्यम्। नि
रंशोऽंशस्पृष्टे संक्रान्तिकाले हि
भास्करोऽंशरहितो भवति त
स्मिन् दृष्टे दिवेति यावत्। दि
नेत्र्य दिनकरकरसंस्कृता हि
षण्नाडिका इति ज्योतिर्विदः।
तदेतत्समाप्ति यावत् तावत्
पुण्यं तथा च वृद्धवशिष्ठः। विंश
त्कर्कटके नाड्यो मकरे विंश
तिः स्मृताः नाडीदण्डः। अमलाहि
पले षष्ठ्या विपलात्तु पलं नये
त्। पलात् षष्ठ्या नयेन्नाडीं त
त्षष्ठ्या तु रवेर्दिनं॥ इति मि
हीतसन्दर्भात्। तत्र देवीपु
राणे वृद्धवशिष्ठयोरेकवा
क्यतया कला नाड्योः पर्याय
ता॥ रविसंक्रमणे त्वाह अर्द्ध
रात्रे त्विति। असम्पूर्णे कला
स्नानार्हरात्रे। कलास्नानार्हरा
त्रे तु यदि संक्रमणं भवेत्॥

तदहः पुण्यमिच्छन्ति गार्ग्यगा
लवगौतमाः। इति कृत्यचिन्ता
मणि वर्षकृत्य धृत गर्गवचना
त्। कालकौमुद्यान्तु गालवस
हारीत इति पाठः। ततश्च कला
स्नानार्हरात्र्यभ्यन्तरे द्वादशस्वपि सं
क्रान्तिषु अनागते नागते सं
क्रमणेन यत्र दिवा तदेव पु
ण्यं पुण्यजनकं। तत्र एवं दिने
तदेव संक्रान्तेरनागतत्वसम्भ
वात्। तेन संक्रमणकालादर्वा
गेव दिवा पराह्णे स्नानादिकं
कर्तव्यमित्यर्थः। अर्द्धरात्रे व्य
तीते कलाधिकार्द्धरात्रे व्यती
ते। सम्पूर्णे अर्द्धरात्रे रात्रिमध्य
कलयोः कलास्नानार्हरात्रे वि
ति वचनानन्तरं भुजबलभीमे
अर्द्धरात्रे कलाधिके यदा संक्र
मते रविः। तदोत्तरदिने ग्रा
ह्यं स्नानदान जपादिषु। अर्द्ध
रात्रे त्वसम्पूर्णे यदा संक्रमते र
विः। प्राक्‌दिनद्वयं पुण्यं मु
क्त्वा मकरकर्कटौ। इति वच
नाभ्यां तथा प्रतीतेः। कालवि
वेके कालकौमुद्यान्तु शाता
तप जाबाली। पूर्णे चेदर्द्धरात्रे
तु रविसंक्रमणं भवेत्॥
प्राक् दिनद्वये पुण्यं मुक्त्वा म
करकर्कटौ एतयोर्व्यवस्था
माह कालमाधवीये भविष्यो
त्तरीये मिथुनात् कर्किसंक्रान्ति
र्यदि स्यादंशुमालिनः। प्रदोषे
वा निशीथे वा कुर्य्यादहनि पू
र्वतः। कार्मुकं तु परित्यज्य झ
षं संक्रमते रविः। प्रभाते वार्द्ध
रात्रे वा स्नानं कुर्य्यात् परेऽ
हनि। ततश्च रात्रिमध्यदण्डद्व
यात्मकार्द्धरात्रे संक्रान्तावुदयेऽ
स्तमयेऽपि वा इत्यनेन उदयाप
क्रमम् अस्तमयान्तं च स्नानार्हं
पुण्यं। एवञ्चोभयदिने पुण्य
काले एकदिनाकरणं पूर्वपर
दिने। अतः कार्य्यमपि कर्त्तव्यं पू
र्वाह्णे चापराह्णिके। नहि प्रतीय
तेऽस्पष्टः कृतमस्पष्टं वा कृतं। इति
लिङ्गपुराणात् मात्स्यमाच्च
तत्रापि दक्षिणायने पूर्वदि
नार्द्धमात्रमिति विशेषः। उत्तराय
णे परदिनार्द्धमात्रमिति वि
शेषः। स्नानार्हमिति भास्करे
भास्करोपलक्षिते काले दिवेति
यावत् तस्मिन् संक्रमणेऽपि मा
नार्द्धपुण्यं। एतच्च विषुवषडशी
तिविषये। अयनकालयोः पूर्व

शुक्लत्वात् विसुपयास्त्रोभय-
तः षोडशकलात्मे पंचदश ना
डिकानामपा पुण्यत्वस्य शातात
पादिवचनेन वसमानत्वात्।तेन
दिवासंक्रमणे पलायनादित्वेन
पुण्यकाले विशेषः। रात्रिसंक्र
मणे तु अर्द्धरात्रीय मकरक
र्कटसंक्रमणव्यतिरिक्ते सर्वे-
षां तुल्यतेति। अपराह्णे शर्वरीद
ले कलास्नानार्द्धरात्रे इत्यत्रापि
मानार्द्धे नित्यनुषज्यते। दिवापु
ण्य मितियत् प्रागुक्तं अत्र तेदे
वमानार्द्धे तेन विशेषित मित्यपु
नरुक्तिः। एवमुदयास्तमये यन्मा
नार्द्धे पुण्यं तत् किमेकदिने दिन
योर्द्धेति तत्राह संक्रमेणेत्यभयोरि
ति उभयोः पूर्वापरदिनयोः स्मा
नार्द्धे पुण्यं तेन पूर्वादिनस्यास्त
मयपर्यन्तं परदिनस्य उदय मा
रभ्य मानार्द्धे पुण्यमित्यर्थः अ
तिरेके अर्द्धरात्रात् परतः संक्र
मणे परेऽहनि मानार्द्धे पुण्य-
मित्यनुषज्यते। मानार्द्धे तु प्रहर
द्वयं। अर्द्धरात्रादपरस्मिन् स
ध्याक्रमेणापरा क्रिया ऊर्द्ध्वसं-
क्रमणे भानोरुदयात् प्रहरद्व
यं। पूर्वार्द्धराजसंक्रान्तौ द्वे दि

नार्द्धे तु पुण्यदे इति संवत्स
रप्रदीप गंगावाक्यावलीधृतव
शिष्ट सौरधर्मवचनैकवाक्य
त्वात् अर्द्धरात्रादपश्चैव दिनार्द्ध
स्योपरि क्रिया। ऊर्द्ध्वसंक्रमणे भा
नो रुदयात् प्रहरद्वयं। इति-
भोजराज कृत्यचिन्तामणि धृते
कवाक्यतान्त्व। अधः पूर्व ऊर्द्धप
रतः। क्रिया स्नानादिका। एव
ञ्च गार्ग्यवचनस्य तदह रिति या
मद्वयपरं अन्यथा मलभ्ततश्च
त्पतेर कल्पनापत्तेः। एवञ्च षड
शीतिमुखे स्तीते, इत्यादि दिवा
संक्रमणविषयं। तेन दिवाष
डशीतिसंक्रमणे भूते भविष्य
त्स्नानार्द्धे पुण्यं एवं विषुवद्वये
पि। दिवोत्तरायणेपि भविष्य
द्विंशति दंडानां पुण्यत्वं। अत्रो
त्तरायणस्य पृथगभिधानात्
अयन इति पदं दक्षिणायनप
रं गोवलीवर्द्दन्यायात्। तेनदि
वा दक्षिणायने भविष्यति भूते
त्रिंशद्दण्डानां पुण्यत्वं। एवंच षड
शीत्यादिष्वप्यवकाश मलभ
माने अर्वाक् षोडश विज्ञेया
नाड्यः पश्चाच्च षोडश। कालः
पुण्योऽर्कसंक्रान्ते विद्वद्भिः।

परिकीर्त्तितः॥ इति शातातपी
ये। अतीतानागते भोगेना-
ड्यः पंचदश स्मृताः। इति देवी
पुराणीयञ्च वचनं दिवा विसु
पदीविषयं। अत एव जावालि-
वृहद्वशिष्ठौ पुण्याया विसुप
ध्येव प्राक् पश्चादपि षोडश।
अर्द्धरात्रे विशेष माह याद्यावि
त्यादि। अर्द्धरात्र संक्रान्तावादौ
पूर्वादिनएव मानार्द्धे पुण्यं। यद्य
भिन्ना संक्रान्तिकालेपूर्वादिनेच
एकैव तिथि र्भवेत् तेन मध्य
रात्रे संक्रमेने यदुभयदिनमा
नार्द्धे पुण्यमुक्तं तद्भिन्नतिथि
विषयं। अतीतेपुनर्वर्द्धरात्रे पूर्वे
णाक्रा तिथ्यभेदेपि परदिन-
स्यैव पूर्वार्द्धे पुण्य मिति तात्प
र्यार्थः। एवंच रात्रिसंक्रान्तौ दि
न एव पुण्यत्वाभिधानात्। वा
ऊर्द्धेन संक्रान्ति विवाहात्यय
वृद्धिषु। स्नान दानादिकं कुर्यु
र्निशि काम्यव्रतेषु च। इतिदेव
लेन दिनसंक्रमणस्य रात्रिप्रवि
ष्ट पुण्यकालांशे संक्रान्ति नि
मित्तेन स्नान दानादि विधीयते
इति। यत्तु मन्दा मंदाकिनीध्वां
क्षी घोरा चैव महोदरी॥

राक्षसी मिश्रिता प्रोक्ता संक्रां
तिः सप्तधा नृप। मन्दा ध्रुवेषु
विज्ञेया मृदौ मंदाकिनी तथा
क्षिप्रे ध्वांक्षी विजानीयादुग्रेघो
रा प्रकीर्त्तिता। चरे महोदरी ज्ञे
या क्रूरे ज्ञेयैस्तु राक्षसी। मि
श्रिता चैव विज्ञेया मिश्रितर्क्षे
रवि संक्रमे। इत्येतेर्द्धोदशस्ववसं
क्रान्तिषु अश्वादि नक्षत्रयोगा
न्मन्दादिरूपतया सप्तधाभिन्ना
स्तु। विचतः पंच सप्ताष्टनवद्वा
दश एव च। क्रमेण घटिका ह्ये
तास्तत् पुण्यं पारमार्थिकं॥
इति देवीपुराणपठितचतुरादि
घटिकानां पुण्यत्वमुक्तं तद्दिवा
रात्रौ तत्तत्कालोपदेशात् अ
वकाशमलभमानं संध्याद्वयसं
क्रान्तिविषय मिति समयप्रका
शः॥ अश्वादिशास्त्रदीपिका
यां। उग्रः पूर्वमघा तत्काः ध्रुव
वारुण स्त्रीण्युत्तराणि सभ्रूवीना
दित्यहरिवर्ज्ये चरगणाः पुष्याश्वि
हस्ता लघुः। चित्रा मित्र मृगान्त्य
भं मृदुगण स्त्रीस्वेला हिकर्द्दस्य
कृत्तिमिश्रा मिश्रः सविशाखवभः पू
म फलाः सर्वे स्वकृत्ये गणाः अ
नेकाभरणी। स्वभूरोहिणी वा

नादित्यहरिविरञ्चिस्वातीपुनर्वसुः श्रवणा धनिष्ठा शतभिषा। सिद्धमृगोत्थमं अनुराधा मृगशिरे वत्यः। अहि रुद्रेन्द्रयुक् अश्लेषा आर्द्रा ज्येष्ठा मूला। अग्निः कृत्तिका। कल्पतरुस्तु। क्रमेण यथासंख्येन एता घटिका स्तत्पुण्यतस्य संक्रमणस्य पुण्यहेतुत्वात् पुण्यं पारमार्थिकं मुख्यं त्रुटेः सहस्रभागो यः स कालो रविसंक्रमः। इत्युक्तस्तत्संक्रमकालीनानुष्ठानजन्यं पुण्यं सम पुण्यहेतव इत्याह। त्रुटिस्तु लवस्य चतुर्भागः त्रुटिरित्यभिधीयते। त्रुटिद्वयं लवः प्रोक्तो निमेषस्तु लवद्वयं। इति स्मृत्युक्तो एतदेव मतं युक्तं। अत एव देवलेन। याः याः सन्निहिता नाड्यस्तास्ताः पुण्यतमाः स्मृता इत्युक्तं। एवं चैता घटिकाः पुण्यतमाः मानादौ किन्तु पुण्यमात्रमिति तस्मान्मन्दे त्यादिनसंध्यासंक्रान्ति विषयकमिति। संध्यासंक्रान्ति विषयत्वे पारमार्थिकमिति तु पपत्तेः। पुण्य मित्यनेनैव सिद्धेः पारमार्थिक मित्यत्र कल्पतरु व्याख्यानानवलोकनात् रविसं

क्रम इति पाठकल्पनं कल्पनमेव। समयप्रकाशकृतापि तथा पठितत्वात्। जीमूतवाहनेनापि कालविवेके। अग्निसंक्रमणेऽप्यमहः कृत्स्नं प्रकीर्तितं। रात्रौ संक्रमणे भानोर्दिनार्द्धं स्नानदानयोः। इति वृद्धवसिष्ठादिवचनपर्य्यालोचनया दिवासंक्रान्तौ दिनमात्रं पुण्यं पुण्यतरास्तु विशेषविहिता नाड्यः इत्युक्तं। अत एव मुहूर्त जावालिवृहस्पतिशातातपवचनमपि संगच्छते। यथा। वर्त्तमाने तुला मेषे नाड्यस्तूभयतो दश। कालमाधवीयेऽपि। अग्निस्त्वभिधायस्मार्त्तस्यानादरेणस्य युक्तं। पञ्चैव दिवासंक्रान्तौ कृत्स्नं दिनं पुण्यमेव प्रीतिमुखे त्वतीते इति वचनं पुण्यतरपरं॥ ननु देवीपुराणे दिवा रात्र्योः संक्रमणे विशिष्ट कालाभिधानात् संध्यासंक्रान्तेः कः काल इति चेत्। विशन्मुहूर्त्ते कथित महोरात्रे तु यन्मया। इति विष्णुपुराणेन संध्ययोः पृथगनुपादानात् दिवारात्रिसंबन्धित्वान्मुहूर्त्तद्वयेन तयोर्न्नभोगः। तथा च दक्षः। अहोरात्र·

स्य यः संधिः सूर्य्य नक्षत्रवर्जितः सा तु संध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः। योगियाज्ञवल्क्यः। ह्रासवृद्धी च सततं दिने रात्र्योर्यथा क्रमं। संध्यामुहूर्त्तमाख्याता ह्रासे वृद्धौ समा स्मृता। वराहः। अर्द्धास्तमयात् संध्या व्यक्तीभूता न तारका यावत्। तेजःपरिहानिरुषा तावो वेर्द्धोदये यावत्। अत एव केनापि मुनिना नानादेशीयसंग्रहकारेणच संध्यासंक्रान्तित्वेन विशेषो नाभिहितः॥ तदयं संक्षेपः॥ दिनसंक्रमणे कृत्स्नं दिनं पुण्यं। षडशीतिमुखे त्वतीते इत्याद्युक्तं पुण्यतरं। मन्दा मन्दाकिनीत्यादिरूपेण वि चतुरादि घटिकाः पुण्यतमाः। दिनद्वेतान्तरा युगादि विहित विशानिर्द्देश· दीनां रात्रिप्रविष्टभागस्यापि पुण्यत्वं। रात्रिसंक्रमणे तु कलान्यूनप्रथमार्द्धरात्रगते तद्दिवसीयशेषयामद्वयं पुण्यं। कलाद्वयात्मक मध्यरात्रगते तद्दि· वसीयतिथ्यभेदे तद्दिवसीय शेषयामद्वयं पुण्यं। भेदे तु तद्दिवसीय शेषयामद्वयं परदिवसी

याद्ययामद्वयं च पुण्यं। उभयदिने पुण्यकालेऽपि पूर्व्वदिनाकरणे एव परदिने तद्विहितं कार्य्यं। तिथिभेदाभेदयोर्द्दक्षिणायने तद्दिवसीय शेषयामद्वयं उत्तरायणे तु परदिवसीयाद्ययामद्वयं पुण्य मिति मध्यरात्रीयकलात्मक शेषार्द्धरात्रसंक्रमनमात्रे तु परदिनाद्ययामद्वयं पुण्य मिति। संध्यासंक्रमणे तु दिनदण्डे दिनस्य रात्रिदण्डे रात्रेर्व्यवस्थेति। ब्रह्मपुराणे। शुक्लपक्षस्य सप्तम्यां यदा संक्रमते रविः। महाजया तदा प्रो· क्ता सप्तमी भास्करप्रिया। स्नानेदाने तपो होमः पितृदेवाभिपूजनं। सर्व्वं कोटिगुणं प्रोक्तं तपनेन महौजसा। अत्र मासपक्ष तिथीनाञ्च निमित्तानाञ्च सर्व्वशः। इत्यनेनाप्राप्तिश्छले रवे तद्विशेषणत्वेन महाजयाद्युल्लेखो। संज्ञाविधेरेतदेव प्रयोजनं यत्तया निर्देश इत्युक्तत्वात्। एवञ्च संक्रान्ति विशेषस्य निमित्तत्वेन शास्त्रे विधुवाद्युल्लेखोऽपि। स्कान्दे। पक्रान्ततो मया प्रोक्ताः कालाः

संक्रान्तिसंज्ञकाः। नैतेषु विष
तेः निष्टं यत स्नानयसन्निताः
अभ्यह्यापि यद्दत्तं कृपात्रेभ्यो
पि मानवैः। अकालेपि हि
तत् सर्वं सत्य संत्यजतां व्रजे
त्॥ मात्स्ये। अयने कोटि
गुणं तु लक्षं विष्णुपदीषु च
षडशीतिसहस्रं तु षडशीत्या
मुदाहृतं। शतं मिंडुक्षये पुण्य
सहस्रं तु दिनक्षये। विषुवे शत
साहस्र माका मा वैधृतेनंतकं
माकामा वैष आषाढ्यो कार्त्ति
की माघी वैशाखी पूर्णिमासु
देवीपुराणे। रविसंक्रमणे पुण्य
नक्षत्रायाधस्तमानवः। सप्तज
न्मसु भवेत् रोगी निर्द्धनश्चोपजा
यते। दीपिकायां। नाडीनक्ष
त्रदिवसे रवि भौम शनैश्चराः
संक्रान्तिं यस्य कुर्वन्ति तस्य क्ले
शोऽभिजायते॥ गोमूत्रस
र्षपैः स्नानं सर्वौषधि जलेन
च। विष्णुसंकांचनेदयाम्नाडी
होषोपशान्तये। नाडीनक्षत्रा
णि त्वाद्यदशषोडश अष्टदश
त्रयोविंशति पंचविंशतयः। र
त्नमालायां। तारावलादिंडुर
बेंडुवीर्याद्दिवाकरः संक्रमणा

णाऊकः। ग्रहाश्च सर्वे सवितुर्व
लेन महीसुताद्याः क्रमशः प्रश
स्ताः। संवत्सरप्रदीपे। पुष्कर
तीर्थसलिलैः स्नायात् संक्रान्ति
शान्तये। तथा सर्वौषधीमिश्र
तिलमंत्रांश्च संजपेत्॥ यदा
र्कि मेषसंक्रान्ति स्तुलासंक्रम
णं तिथिः। तदाप्रजाविवर्द्धतेथ
नधान्य समृद्धिभिः॥ कुजार्क
शनिवारेण महासंक्रमणं य
दा। तदा भवेत् प्रजानाशो दु
र्भिक्षादि भयं महत्। षट्त्रिं
शान्मत निगमे। संक्रान्त्या पं
चदश्यांच हादश्यां श्राद्धवास
रे। वहिनपीडयेन्नत्र नचक्षावे
ण योजयेत्। संक्रान्त्यां चत्रयो
दश्यां पक्षान्ते नवमीदिने॥
सप्तम्यां रविवारे च स्नानं मामल
के त्यजेत्। शातातपः रविवा
रेके संक्रान्त्यां पक्षान्ते सप्तमीति
थौ। आरोग्यकामस्तु नरो नि
बपत्रं न भक्षयेत्॥ कृत्यचिं
तामणौ शनिसर्वेस्ते च॥
चैत्रे मासि चसमस्ता घंटाक
र्णाख्यदानकः। आरोग्यार्थं तु
हीमत्ले संक्रान्त्यां तत्र कारयेत्
एत्रा मंत्रः। घंटाकर्ण महावीर

सर्वव्याधिविनाशन। विस्फोट
कभये प्राप्ते रक्ष रक्ष महाबल
शिवपुराणे। घंटाकर्णो ग
णः श्रीमान् शिवस्यातीववल्लभः
कृत्यचिन्तामणौ। मसूरं निम्बप
त्रञ्च योगोति मेषगते रवौ। अपि
योषान्वित स्तस्य तक्षकः किंक
रिष्यति। संवत्सरप्रदीपे तत्र
गाई। मेषस्थच विषौ तस्मान्न
स्ययो विषजं भयं॥ स्मृतिः
मेषादौ शक्तवो देयावारिपू
र्णाश्च गर्गरी। तत्रिदानमंत्रः
एष धर्मघटो दत्तो ब्रह्मवि
ष्णु शिवात्मकः। अस्यप्रदाना
त्सफला मम सन्तु मनोरथाः॥
वैशाखे यो घटं पूर्णं सभोज्यं
वै द्विजन्मने। ददात्यभुक्तो रा
जेन्द्र सयातिपरमां गतिं। एतं
जलेनेति शेषः। महार्णवे। यो
ददाति हि मेषादौ शक्तूनम्बु
घटान्वितान्। पितृनुद्दिश्यपवि
प्रेभ्यः सर्वपापैः प्रमुच्यते॥
विप्रेभ्यः षाडे के हृत्वे पितृभ्यो
विषुवे शुभे। पितृभ्यः पितृनु
द्दिश्य इत्यर्थः। अत्र विषुवस्य
पुण्यविशेषयजनकत्वेन विव
क्षितत्वात् मेषादाविति विषुवसं

क्रान्तिपुण्यकालपरं अन्यथाका
लस्य कल्पनापत्तेः। कर्म्मोप
देशिन्यां व्यासः। संक्रान्त्यां पक्ष
योरन्ते द्वादश्यां श्राद्धवासरे।
सायं संध्यां नकुर्वीत कृते च
पितृहा भवेत्॥ देवीपुराणे
अतीतानागतो भोगो नाड्यः
पंच दशस्मृताः। सान्निध्यं तु
भवेत्तत्र ग्रहाणां संक्रमे रवेः॥
पुण्यपापविभागेन फलं देवीप
यच्छति। भोगः पुण्यपापजनन
योग्यकालः पुण्यपापविवेच
ने विश्वामित्रः॥ यस्यार्थस्य क्रि
यमाणो हि प्रशंसामागमवेदिभिः
सधर्मोयं विगर्हेति तमधर्मं प्र
चक्षते। आगमवेदिभिः क्रियमा
णमिति संबंधः। तान्त्रिकास्तु
विहितक्रियया साध्यो धर्मः
पुंसो गुणो मतः॥ प्रतिषिद्ध
क्रियासाध्यः स गुणोऽधर्म उच्य
ते। अत्रैकस्मिन्नेव काले पुण्य
पाप फलदान दर्शनात् संक्र
मण पुण्यकाल एवस्नानादि
वैधेला दित्यागः। एवमेव गुरु
चरणाः। एकादश्यां प्रकर
णेऽपि संक्रान्त्युपवासस्य व्रत
त्वेन भावरूपत्वाज्ञाबद्धाघटितत्वा

होमयथापि तत्रएव विधेहि
ति विस्तरेन पुण्यकालयुक्ता
होरात्र कर्तव्यता ग्रहस्नुपवास
वत्। एकादशीतत्वे एतत्कृत्या
विस्तृहं। एवंच रात्रिप्रागर्द्धसंक्रां
तौ दिवापोवार्द्धमाजस्य तत्रपु
ण्यकालत्वाद्रात्रि सुरूतोहं
स्नायंसंध्योपासनंकार्य्यमेव।
ब्रह्मपुराणे॥
नित्य हयो रयनयो नित्यं वि
षुवतो हेयोः। चंद्रार्कयोर्ग्रहः
णयो र्व्यतीपातेषु पर्वसु॥
अहोरात्रोषितःस्नाने श्राद्धदा
नेतथाजपं। यःकरोतिप्र
सन्नात्मा तस्य स्यादक्षयंचत
त्। अहोरात्रोषितः पूर्वदिने·
कृतोपवासः। एतत्परमेव।
अर्द्धरात्रे व्यतीते तु संक्रांति
र्यदिह भवेत्। पूर्वे त्रवै स्नात्
दिकं कुर्य्यात् परेद्युः स्नान·
दानयोः। इति भीमपराक्रमी
ये। स्नान दानयो विषयत्वम
मीनिर्दैशात् अरदिवसीयस्ना
नदानादिनिमित्तकं पूर्वदिने
उपवास संयमरूपं व्रतादिकं
कुर्य्यादित्यर्थः। इति तिथ्या
दितत्वे॥ अथ रवि।
संक्रांतिगणने। नवाष्ट शकाही
नेन शकाद्धोकेन एविनाः। म
वीण चंद्रावेकाग्नी कुरामो वे
दयुग्मके।२।१५।३१।३१।
२४। अंका अनुपलादेस्त घघा
लब्धांक क्षिप्तिताः। दंशात् ला
ग्नीस्येष्टच ३०।५७ पलादि
त्वाततःपुनः। समावशिष्टावा
राःस्यु स्तेतोद्वादिकापरे। मे
षसंक्रमणोभानोः स्थितोतस्फ
टसन्नतः भुंज्तो घटिष्टवाम्ना
ग्नी २।५६।३३ कालो जाति
गौजावनी ८।२२।१९। रामस्त्र
ह्मःशिग्निपुरमक्ष्व ३।१८।२३ न
कौंक दृक् नवाक्षुसो।८।
२९ ५९ ह्यावेक दृक् वेदवा
ण २।२९।५४ अद्रि वाणश
रो स्वराः।४।५५।३३।घस्मा
ग वेदो भूस्येड् ८। ५८।१९
एके शैलष्ठवो शराः।१।॥
७।१५। द्वौ घडग्नीतथा कालो
२।३६।८ अद्रौ रामाः शराव
नी।७।३।१९ पंचाग्नीस्तथा
ह्यद्ग ५।५३।११। मेषसंक्र
मवारतः। अंके येऽजपान्नृषा
देस्तवारायाःसंक्रमे रवेः॥
इति ज्योतिस्तत्वे॥

संक्रांतिचक्रे स्त्री नराणांशुभा
शुभज्ञानार्थं नरचक्रांकित नरा
कारचक्रे। यथा मूर्द्धिसप्त मु
खे त्रीणि हृदये पंचविन्यसे
त्। त्रितये हस्त पादेषु महावि
षुव भक्रमात्। मस्तकेभूप
तेःसौख्यं वदने एटनास्तवेभे॥
हृदयेच धनाप्यैश्वर्य्यमाप्निर्द्दि
क्षिण करे वामकरे महद्दुःखं
स्कंधे पादेचदक्षिणे। भ्रमणं
वामपादे चकथितं विषुवत्
फले॥ इतिमहाविषुवचक्रं॥
षड्मूर्द्धिवदने पंचचत्वारि हृ
दये तथा। त्रितयं कर पादेषु
पयोविषुवभक्रमात्। मानं·
मूर्द्धिमुखिचेवं हृदये स्याधसं
भवः। दोःपदो र्द्दयो भोग
स्तावस्थानमयोः स्तवे॥
इति जलविषुवचक्रफलं॥
शीर्षेपंच मुखेत्रीणि हस्त
योर्युग्मयंत्रयं॥ हृदि पंच·
प्राप्ती नाभौगुदेच पादयोरस्ताः
उत्तरायण भान्वेयं स्थनस्तेच
स्थितेःफलं। शीर्षेऽर्थलाभो
वदने सुखानि दत्ते करेभृहोहृ
दयेच सौख्यं। नाभौ शुभंवा
मकरे·च्चनाशा गुह्ये भयंवा
मपदे प्रवासः। इत्युत्तरायण
चक्रफलं॥ शीर्षेत्रीणिमुखे
त्रीणि हृदये पंचहस्तयोः॥
अष्टौ पादद्वयेःष्टौ दक्षि
णायन भक्रमात्। शीर्षे मा
नंमुखे विद्या हृदये वित्तसं
चयः॥ प्रवासः स्यात् करे·
वामे भिक्षालाभश्च दक्षिणे
निष्फलंवामपादेच किंचित्ला
भश्चदक्षिणे। इति दक्षिणा
यणचक्रफलं॥ अथ संक्र
मणे यत्र विष्णुपद्यां मुखेच
त्। चत्वारिदक्षिणे बाहौत्री
णि त्रीणि पदद्वये। चत्वारि
वामबाहौच हृदयेपंचनिर्द्दि
शेत्। अष्टेणहृदय द्वये यो
ज्य मूर्द्धि द्वौचैककं गुदे॥
रोगो भोगस्तथा याने बंधनं
लाभ एवच॥ पेश्चर्थ्यं राज
पूजाच अपमृत्युरितिक्रमात्
इति विष्णुपदीचक्रफलं॥
मुखे चैकंकरे वेदाःपादयुग्मे
द्वयं द्वयं। क्रोडे वाण स्तथा
वेदाः करेस्कंधेतरेपिच॥
द्वयं द्वयं तथानेत्रे मस्तके त्रि
तयं तथा॥ द्वयंचैव तथा
गुह्ये षडशीत्यांस्तवेभस्थिते॥

स्वभेऽस्थिते ॥ सुखेदुःखेऽङ्करे
न्ताभः पादयोर्भ्रमणे हृदि ।
कान्ता स्याद्धन्यते वामे हस्ते
स्यात् स्त्रीयभे रणे । समा
ने नेत्रयोश्चैव अपमानश्च म
स्तके । गुह्ये चैव भवेन्मृत्युः ष
डशीतिफलश्रुतिः । इति
षडशीतिविकफले ॥ इति
ज्योतिस्तत्त्वं ॥
संक्रामः पुं दुर्गसञ्चरः । इति
हेमचन्द्रः ॥
संक्लेदः पुं आर्द्रीभावः । संपू
र्वक क्लिदधातोर्घञ् प्रत्यये
न निष्पन्नः ॥
संख्यं क्ली युद्धे । इत्यमरः ॥
संख्येयेत्रि ॥
संख्याता स्त्री संख्यात्वे । संख्ये
यता । संख्याशब्दात् भावेत प्र
त्ययेन निष्पन्ना ॥
संख्या स्त्री बुद्धिः । इति राज·
निर्घण्टः । विचारणा । इत्यमरः
एकत्वादिः । इति मेदिनी ॥
संख्येयेत्रि । यथा । विप्रेशा वि
क्रयः संख्याः संख्येये ह्यादश
त्रिषु । विंशत्याद्याः सदैक·
त्वे सर्वाः संख्येय संख्ययोः ।
संख्यार्थे द्विबहुत्वे स्तस्तासु
चानवतेः स्त्रियः । पङ्क्तेः शत
सहस्रादि क्रमाद्दशगुणोत्तरम् ॥
इति चामरः । आदश दशसङ्ख्याप
र्य्यन्तं अष्टादशयावत् एका
दिकाः संख्याशब्दाः संख्येयेऽर्
थे वर्त्तन्ते । त्रिषु लिङ्गेषु तेन·
संख्या संख्येययोः सामाना
धिकरण्येन वृत्तिः । यथा ए
काशाटी एकः पटः एकं कुण्ड
मिति शाब्दी अवधारणे संख्येय
एव न तु संख्यायामित्यर्थः ॥
तेन यदा दश इति साधनेच्छे
दानां दशेति । किन्तु द्व्येकयोः
द्विवचनैकवचने । इति सूत्रे द्व्ये
कयो रिति निर्देशात् संख्या
मात्रेऽपि सम्भव इति भाष्यम् ॥
घटानां पञ्च इत्यपि स्यादिति
स्मृतिः । वातोक्त दोषा गुणा
समयुक्ता । इति वैद्यके । आद·
शाब्देन दशशब्दस्याव्ययीभा
वः । दशशब्दस्य त्रिलिङ्गत्वात् न
पुंसकत्वपक्षे क्लीबाहेति पक्षे
अः तेन आदश आदशेति पाठः
द्विशः । अष्टादश परा विंशत्या
द्याः सर्वा एव संख्याः संख्या
यां संख्येये च नित्यमेकव
चनान्ता भवन्ति यथा विंशति

र्गावः गावो विंशतिः ॥ संख्या ।
इह संख्या संख्येयान्तरं अन्यथा
पूर्वेण विरोधः स्यात् संख्या अ
र्थो अभिधेयो यस्य स संख्यार्थः
तत्र संख्यार्थे विंशत्यादौ सं
ख्यायां संख्येये च सामानाधि
करण्यात् द्विवचन बहुवचने
भवतः यथा द्वे विंशती गावः
गवां वा तिस्रो विंशतयो गावः
गवां वा एवं द्वे शते दश शतानी
त्यादि । अयमभिप्रायः यदा विं
शत्यादीनामनावृत्ति रेकैव विं
शति रेकमेव शतमित्येवं स्या
त् तदा पूर्वेण एकवचनान्तै
व यथोक्तं विंशति र्गावः गा
वो विंशतिरिति । यदा विंशत्य
ादे रावृत्ति विंशतिद्वयं शतद्व
यमित्येवं स्यात् तदा अनेन·
द्विवचन बहुवचनान्ता स्यात्
यथोक्तं द्वे विंशती तिस्रो·
विंशतयः । अतएव परेऽपरि·
भाषन्ते । विंशत्यादेरनावृत्तौ
बहुत्वेऽप्येकवचनं । इति । एक
शेषात् द्वे विंशती तिस्रो विं
शतयः इत्यन्येऽपि स्वमते पिआ
दयः संख्याशब्दा वीता इत्यु
क्तः टेलोप इति सूत्रे विं·
शते ते स्तङ्वादिति डिवर्जने
नैव एकवचनेनतान्ता एकाद
श्यहानि इत्यनेन चावृत्तौ द्वि
त्वबहुत्व संभवाच्चाय मर्थः
वगम्यः । तासु संख्यासु विंशत्या
द्या नवत्यन्ताः स्त्रीलिङ्गाः भिन्न
लिङ्गेनापि सामानाधिकरण्ये
स्त्रिय एव यथा विंशत्या पुरुषैः
विंशतिः कुलानीति विंशतिः
प्रभृति रष्टाविंशति यावत् एवं
त्रिंशत् प्रभृति रष्टात्रिंशत् याव
त् एवं चत्वारिंशदाद्या । पङ्क्ति
र्दशसंख्याता मारभ्य परार्द्धान्ते
दशगुणोत्तरं दशगुणाधिकं क्र
मात् शतसहस्रादि भवति । क्र
मादिति परोपादानादय मर्थः
एकं दशगुणितं पङ्क्ति रुच्यते
दशपङ्क्तयः शतं । दशशतानि
सहस्रं । एवं दशगुणितं सहस्र
मयुतं । एवं लक्षनियुतादि ज्ञे
यं । तथाच । ब्रह्माण्डपुराणे ए
कं दश शतं चैव सहस्रमयुतं तथा
लक्षं च नियुतं चैव कोटि रर्बु
दमेव च । वृन्दः खर्वो निखर्वश्च
शङ्खः पद्मश्च सागरः । अन्त्यम
ध्यं परार्द्धं च दशवृद्ध्या यथा
क्रमम् ॥ इति । शतं तालव्य श

कारं । सहस्रं द्विदंतमकारं ।
इतिभरतः ॥ न्यायमतेऽस्या
गणनव्यवहारे कारणत्वं । ए
कत्वे नित्यवस्तुनि नित्यं । अन्य
त्र अनित्यं । द्वित्वादि परार्द्धपर्य्य
न्ते अपेक्षाबुद्ध्या जायते । एवं
अपेक्षाबुद्धिनाशेन तेषां नाशः
पर्य्याप्तिसंबंधेन अनेकाश्रये
तिष्ठंति । यथा । गणनव्यव
हारे तु हेतुः संख्याभिधीयते
नित्येषु नित्य मेकत्व मनित्ये
ऽनित्य मिष्यते ॥ द्वित्वादयः
परार्द्धान्ता अपेक्षाबुद्धिजा मताः
अनेकाश्रय पर्य्याप्ता एते तु
परिकीर्त्तिताः ॥ अपेक्षाबुद्धि
नाशाच्च तेषां नाशो निरूपितः
अनेकैकत्वबुद्धिर्या सापेक्षा
बुद्धिरुच्यते ॥ इति भाषा
परिच्छेदः ॥
अपिच । श्रीमैत्रेयउवाच ॥ प
रार्द्धसंख्यां भगवन् ममाचक्ष्व
यथातुसः । द्विगुणीकृतयाज्ञे
यः प्राकृतः प्रतिसंचरः । श्रीप
राशरउवाच । स्थानात्स्थानं दश
गुण मेकस्माद्गुण्यते द्विज । त
तोऽष्टादशमे भागे परार्द्धम
भिधीयते । परार्द्धद्विगुणं यत्तु
प्राकृतः प्रलयो द्विज । तदाव्य
क्तेऽखिलं व्यक्तं स्वहेतौ लयमे
ति वै ॥ इति विष्णुपुराणे । ६ ।
अंशे ३ अध्यायः ॥
संख्यातं त्रि कृतसंख्यं । तत्
पर्य्यायः । गणितं २ इत्य
मरः ॥
संख्यानं क्ली संख्या । संपूर्व्वख्या
धातो र्ल्युट् प्रत्ययेन निष्पन्नं
संख्यावान् पुं पंडितः । इत्य
मरः । संख्यायुक्ते त्रि । इति
मेदिनी ॥
संख्येयं त्रि संख्यायोग्यं । तत्
पर्य्यायः । गणेयं २ गणनीयं
३ । इति जटाधरः ॥ गण्यं ४
इति हेमचंद्रः ॥
संगः पुं मेलने । तत्पर्य्यायः ।
मेलकः २ संगमः ३ इत्यमरः
रागः । यथा । रागसंगे तु गृ
ध्नुता । इति त्रिकाण्डशेषः ॥
संगदोषोयथा । समेसमापि
जलवासिमित्रमत्स्यस्यसंगात्
सद्यसेवनतः परिग्रहः संगात्कृ
तो ममायं परिग्रहोत्याग्रम
हाविविक्तः । इति विष्णुपुरा
णे ४ अंशे २ अध्यायः ॥
अन्यच्च । अहोऽस्य दारसंयो

गःकथं न महीवेतसः । दृष्ट्वा
तयोश्च शृंगारं मुनिः कामीव
भवत् । जितेंद्रियैः सतांसंगात्
दोषः सांसर्गिको भवेत् ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णज
न्मखण्डे २२ अध्यायः । अपि
च । असतां संगदोषेण का
नयाति पराभवं ॥ त्रिदशैर्वं
दितो वह्निः भस्मना सहितो
यथा । इति चाणक्यं । किंच
यत्र यत्र स्थितो जीवस्तत्संयो
गेन लज्जते । उपहासाय किंन
स्यादसत्संगो मनीषिणां ॥
इति ज्योतिस्तत्वं ॥
संगणिका स्त्री अप्रतिरूपक
था । इति त्रिकाण्डशेषः ॥
संगतं क्ली सौहार्द्दं । इतिहे
मचंद्रः ॥
संगतं त्रि युक्तियुक्तवाक्यं ॥
इति भरतः ॥ तत्पर्य्यायः ॥
हृदयंगमं २ इत्यमरः ॥
संगतिः स्त्री संगमः । ज्ञानं ।
इति मेदिनी । न्यायमते ॥
आनंतर्य्याभिधान प्रयोजक
जिज्ञासाजनकज्ञानविषयो
ऽर्थः । सा च षोढा । प्रसंगः
१ संगतित्वे सति उपोद्घातादि
भिन्नः ॥ यथा सामान्य लक्षणा
याः प्रसंगसंगतिः । उपोद्घातः २
निर्दिष्टोपपादकत्वं । यथा प
रमर्शश्रवणेकत्वाने च उपोद्घा
तसंगतिः ॥ हेतुता ३ ॥
यथा । प्रत्यक्षप्रमाणे हेतुता
संगतिः । अवसरः ४ ॥
अनंतरवक्तव्यत्वं । यथा । उ
पमाने अवसरसंगतिः । नि
र्वाहकं ५ कारणता निर्वाह
कैकार्य्यत्वं । यथा । अनुमानेका
र्य्यतासंगतिः । एककार्य्यत्वं
६ एककार्य्य कारित्वं । यथा
हेत्वाभासे एककार्य्यकारित्व
संगतिः । इति अनुमितिग्रंथे
जगदीशतर्कालंकारः ॥
संगमः पुं क्ली संगः । इत्य
मरः । नद्यादिमेलकः । इति
पुंनपुंसकलिंगसंग्रहटीकायां
भरतः । स्त्रीपुंसोर्मिथुनीभा
वः । स त्रिविधः प्रथमः १ ।
मध्यमः २ । उत्तमः ३ । यथा ।
त्रिविधं तत्र समाख्यातं प्रथ
मंमध्यमोत्तमं । अदेशकाल
भाषाभि र्निर्ज्जनेच परस्त्रियाः
कटाक्षावेक्षणं हास्यं प्रथमं
साहसंस्मृतं १ प्रेषणं गन्ध

मास्थानो धूपभूषणवाससां
प्रलोभनं स्त्रान्नपाने संध्यामे-
साहसं संस्मृतं २ सहासनवि
विक्तेषु परस्पर समाश्रयः।
केशाकेशिग्रह श्चैव सम्यक्
संग्रहणं स्मृतं ३ इति मिता
क्षराधृतव्यासवचनं ॥
संगरं क्ली प्रामीकृतफले।
इति मेदिनी ॥
संगरः पुं युद्धे ॥ आपत् ॥
अंगीकारः सम्वित्। इत्यमरः।
क्रियाकारः। विषे। इति मे-
दिनी ॥
संगवः पुं प्रातःकालात्परं त्रि
मुहूर्त्तद्वयं। यथा। प्रातःकालो
मुहूर्त्तांस्त्रीन् संगव स्तावदे
व तु। मध्याह्न स्त्रिमुहूर्त्तः स्या
दपराह्ण स्ततः परं ॥ सायाह्न
स्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न का
रयेत्। इति तिथ्यादितत्त्वं ॥
संगी त्रि संगविशिष्टः। यथा
आत्मस्तुतो नैव मनोरथानां-
मेतोऽस्ति विज्ञात मिदं मया
हि। मनोरथासक्तिपरस्य चि
त्ते न जायते वै परमार्थसंगी
इति विष्णुपुराणे ४ अंशे २
अध्यायः ॥

संगीतं क्ली प्रेक्षणार्थन्त्यगी
तवाद्यं। यथा गीतवाद्यनृत्य
त्रयं नाट्यं तौर्य्यत्रिकं च तत्।
संगीतं प्रेक्षणार्थेऽस्मिन् शा
स्त्रोक्ते नाट्यधर्मिका। इति
हेमचन्द्रः। नृत्यगीतवाद्यस्य
शास्त्रे। तत्र सोमेश्वर भरतह
नुमत् कल्लिनाथ मतभेदाच्च-
तुर्विधं। अधुना हनुमन्मतं प्र
चलितं। तस्य अध्यायाः सप्त।
स्वराध्यायः १ रागाध्यायः २
तालाध्यायः ३ नृत्याध्यायः ४
भावाध्यायः ५ कोकाध्यायः ६
हस्ताध्यायश्च ७ इति संगीतशा
स्त्रं। संगीतावसाने ताम्बूलदान
प्रमाणं यथा। ता वासुदेवोप्य
नुरक्तचित्तः संन्यस्य गीताभिन
ये रुदारैः। नरेंद्रस्तेनापरितो
षितेन ताम्बूलयोगेन वराप्स
रोभिः। तदागताभि स्त्वरा
हताश्च कुसुमप्रयामानमया
स्थैव। फलानि ताम्बोलम
वेति वीरा स्छालिका गान्धर्व
मथासनश्च। कुसुमच्छया च
त्रिदिवान्तदेवमनुग्रहार्थं अवि
मानुषाणां क्षितितश्च रम्य हरि
तेजसैव प्रयोजयामास स-

रौक्मिणेयः। स्छालिका गान्ध
र्वमुदारबुद्धि स्तेनैव ताम्बूल म
थप्रयुक्तं। इति हरिवंशे भानु-
मतीहरणे जलक्रीडायां ८४
अध्यायः ॥
संगतिः स्त्री आलापः। इति-
हलायुधः॥ संगीतं च।
संगीर्णः त्रि अंगीकृते। इत्य
मरः॥
संगुप्तः पुं बुद्धभेदः॥ इति हे
मचन्द्रः। संगोपनाश्रये त्रिसं
गूढः त्रि लेखादिना संहृतः।
इति भरतः। लेखादिना पुंजी
कृत धान्यादिः। इति नीलकं
ठः। तत्पर्य्यायः॥ संकलि-
तः २ इत्यमरः॥
संगोपनं क्ली सम्यक्प्रकारे
णगोपनं। सम्यक् उपयाता
वनद् प्रसूयेतनिष्पन्ने ॥
संग्रहः पुं समाहृतिः। इत्य
मरः॥ संक्षेपेण गृह्यन्ते नाना
स्थाने विप्रकीर्णा ग्रंथा मुख्यं
तेऽनेन संग्रहः। संगृहीत ग्रह
आदानेऽल् विस्तरेणोपदिष्टा
नामर्थानां सूत्रभाष्ययोः। नि
बन्धो यः समासेन संग्रहं तं
विदुर्बुधाः॥ इति कृत्यतत्त्वा

कृष्ण एकत्र निबंधने संग्रहः
इति कल्पतरुप्रभृतयः। इति-
भरतः॥ नानाग्रन्थस्था ग्रंथाः
संगृह्यन्ते एकस्थानस्थाः क्रियन्ते
इति संग्रहो ग्रंथविशेषः॥
इति श्राद्धविवेकटीकायां श्री
कृष्णतर्कालंकारः॥ हृहत् ॥
उद्योगः। ग्रहणं। संक्षेपः॥ इति
मेदिनी। मुष्टिः। इति विश्वः॥
स्वीकारः। महोद्योगः॥ इति
नानार्थरत्नमाला॥
संग्रहणी स्त्री ग्रहणीरोगः
तस्य निदानादि ग्रहणीशब्दे द्र
ष्टव्यं। अथ सामान्यग्रहणीरो
गस्य चिकित्सामाह। ग्रहणी
माश्रितं रोगं मजीर्णवदुपा
चरेत्। लंघने दीपनीयैश्च म
दातीसारभेषजैः॥ दोषसामं
निरामं च विघात्यातिसारव
त्। अतिसारोक्त विधिना त
स्यामं च विपाचयेत्। पेयादि
पटु लघ्वन्नं पंचकोलादिभि
र्युतं। दीपनानि च तक्राणि ग्रह
ण्यां योजयेद्भिषक्॥ कपि
त्थबिल्वचांगेरी तक्रदाडिमसा
धिता। यवागूः पाचयत्यामं स
कृत् संवर्तयत्यपि॥ संवर्त्तय



ति चूर्णीकरोति ॥ डोषघ्ना
स्याह। जातीफल लवंगैला
पत्र त्वङ्नागकेसरैः। कर्पूरचं
दने तिल्व त्वक् क्षीरीतगराम
लैः। तालीस पिप्पली पथ्या
स्थूलजीरक चित्रकैः। शुंठी
विडंग मरिचैः समभागैर्विचू
र्णितैः। यावन्त्येतानि सर्वाणि
दद्याद्भंगाच्च तावती। सर्वचूर्ण
समा लोश्रा प्रदेया शुभ्रशर्क
रा। कर्षमात्रमिदं खादेन्मधुना
प्लावितं जनः। नाशयेद्ग्रहणी
कासं क्षयं श्वास मरोचकं॥
जातीफलादिचूर्णं॥ चित्रकं
पिप्पलीमूलं क्षारौ लवण
पंचकं। व्योषं हिङ्ग्वजमोदा
च चव्यं चैकत्र चूर्णयेत्। व
टिका मातुलुंगस्य रसैर्वा दा
डिमस्य वा। कृता विपाचयत्या
मं प्रदीपयति चानलं। क्षारौ स्व
र्जिका यवक्षारो। लवण पंच
कमिति। सैंधवं रुचकं चैव वि
डं सामुद्रिकं गडमिति। व्यो
षं शुंठी पिप्पली मरिचानि।
अजमोदा च यवानिका मातु
लुंगं बीजपूरकं चित्रकादिव
टिका॥ श्रीफलशलाटुक

लैकानागर चूर्णेनमिश्रितः सगु
डः। ग्रहणी गद मत्युग्रं तक्र भु
जा शीलितो जयति। श्रीफल
शलाटुः विल्वस्यामफलं। गुड
स्यात्र भागद्वयं। विल्वकल्कः॥
चतुष्फलं सुधाकाण्ड त्रिफलं
लवणत्रयं। वार्ताकोः कुडवश्चा
र्कमूलाद्विल्व तथाऽनलात्। द
ग्धद्रवेण वार्ताको गुटिका भो
जनोत्तरं। भुक्तान्नं पचत्याशु
नाशयेद्ग्रहणीगदं। कालेश्वा
से तथा शोषि विसूचीश्च हृद्दा
मयं। वार्ताकुगुटिका॥
मुस्तकातिविषा विल्व कोट
जैस्तु समचूर्णिते। मधुना च समा
लीढे ग्रहणी सर्वजा त्यजेत्। को
टजेन्द्रयवः। मुस्तादिचूर्णं॥ स्व
तावायाद्विवात्तः सपक्वो ग्रह
णीगदः। गुडेनाधिक सर्जेनम
क्षितेनाशु नश्यति। सर्जः राल
इति लोके। सर्जरसचूर्णं॥
विल्वाम्र शक्र यव बालकमो
चसिद्धं माज्जं पयः पिबति यो
दिवसत्रयेण। सोऽतिप्रवृद्धवि
रुजे ग्रहणीविकारे सामे स
शोणित मसाध्य मपि त्रिणो
ति। मोचो मोचरसः। त्विरणोति

हन्ति। प्रस्थत्रये त्वामलकी
रसस्य शुद्धस्य दत्वार्द्धतुलां गुड
स्य। चूर्णीकृतैर्ग्रन्थिक जीर
चव्य व्योषेभ कृष्णा हपुषाजमो
दैः। विडंग सिंधु त्रिफला यवानी
पाठाग्नि धान्यैश्च पल प्रमाणैः। द
त्वा त्रिवृच्चूर्ण पलानि चाष्टाव
ष्टौ च तैलस्य पचेद्यथावत्॥
तं भक्षयेदक्षफल प्रमाण यथे
ष्टचेष्टं त्रिसुगंधि युक्तं। अनेन
सर्वा ग्रहणी विकाराः सश्वास का
सस्वरभेद शोथाः। शाम्यन्ति
चायं चिरमन्तराग्नेर्हतस्य पुंस
श्च वृद्धिहेतुः। स्त्रीणां तु वंध्या
मय नाशनः स्यात् कल्याणको
नाम गुडः प्रसिद्धः। तैले मनाक्
त्रिवृत् भृष्टा त्रिसुगंधिपलं प
लं। सिद्धे निपेय मत्रैव गुडे
कल्याणगुडके। कल्याणकगु
डः॥ पिप्पली पिप्पलीमूलं
चव्यकं गजपिप्पली। धान्यक
ञ्च विडंगानि यवानी मरिचा
नि च॥ त्रिफला चाजमोदा च
भल्लिनी जीरक द्वयं। सैंधवं
रोमकं चापि सामुद्रं रुचकं
विडं आरग्वधश्च त्वक् पत्रं
हैमैला चोपकुंचिका। शुंठी

शक्रयवाश्चैव प्रत्येकं कर्षस
म्मिता। मृद्वीकायाः पलान्यत्र
चत्वारि कथितानि हि। त्रिवृता
याः पलान्यष्टौ गुडस्यार्द्धतुला
तथा। तिलतैल पलान्यष्टौ धा
मलक्या रसस्य तु। प्रस्थत्रय
मिदं सर्वं शनैर्मृद्वग्निना पचेत्।
उदुम्बरं चामलकं बादरं वा यथा
फलं। तावन्मात्रमिदं खादेज्ज
रयेद्वा यथानलं। निखिलान्
ग्रहणीरोगान् प्रमेहां श्वेतकार्वि
शांसि। उरोघातं प्रतिश्यायं दौ
र्बल्यं वह्निसंक्षयं। ज्वरानपि
हरेत् सर्वान् कुर्यात् कान्तिम
तिं स्वरं। पिचु पाठान्वयाद्ध
ति रक्तपित्तं च विद्ग्रहं। धातु
क्षीणे वयःक्षीणः स्त्रीषु क्षी
णः त्वयी च यः। तेभ्यो हितस्तु
वंध्यायै महाकल्याणको गुडः।
महाकल्याणकगुडः। कुष्मा
ण्डानां स्वपक्वानां स्विन्नानां
निष्कुलत्वचां। सर्पिः प्रस्थे पल
शतं ताम्रपात्रे शनैः पचेत्। पि
प्पली पिप्पलीमूलं चित्रकं ग
जपिप्पली। धान्यकानि विडं
गानि नागरं मरिचानि च। त्रिफ
ला चाजमोदा च कलिंगाजाजि



सैंधवं। एकैकस्य पलं चैकं त्रि
वृतोऽष्टपलानि च। तैलस्य च प
लान्यष्टौ गुडात् पंचाशदेव तु
आमलक्या रसस्याथ प्रस्थत्रय
मुदीरितं। तावत् पाकं प्रकुर्वी
त मृदुना वह्निना भिषक्॥
यावद्दर्वीप्रलेपः स्यात् तदे
नमवतारयेत्। औदुंबरं चाम
लके वाद्रं वाथवा फले। ता
वन्मात्रमिदं खादेद्वलयेद्वा य
थानलं। अनेनैव विधानेन प्र
युक्तस्य दिने दिने। निहंति ग्र
हणीरोगान् कुष्ठान्यर्शो भग
न्दरान्। ज्वरमानाह हृद्रोग
गुल्मोदरविसूचिकाः। काम
लापांडुरोगांश्च प्रमेहांश्चैकविं
शतिं। वातशोणितवीसर्प
दद्रुपत्तहलीमकान्। वातपि
त्तकफान् सर्वान् दुष्टान् शु
द्धान् समाचरेत्। व्याधिक्षीणा
वयःक्षीणा स्त्रीषु क्षीणाश्च येन
राः। तेभ्यो हितो गुडोऽयं स्यात्तथै
व्यानामपि पुत्रदः॥ वृष्यो व
लो देहदार्ढ्य वयसः स्थापनः
परः। कुष्माण्डकल्याणगुडः।
इतीसाराधिकारलिखित विल्व
तैलस्याग्रहिते। इति ग्रहणी

रोगाधिकारः॥ इति भाव
प्रकाशः॥
संग्राम उ. म त. क युद्धे। इति
कविकल्पद्रुमः। असंग्रामत्
उ. संग्रामयते। म संग्रामय
ति। जितैवोभयपदसिद्धौ डि
त्करणं अफलवत्कर्त्तरिप्रा
प्त्नेपदार्थं। एवं सर्वत्र॥
किंत्वयमात्मनेपदीति प्राचः
कदाचित् परस्मैपदार्थो नका
रः। इति दुर्गादासः॥
संग्रामः पुं युद्धं। इत्यमरः॥
संग्रामपटहः पुं रणवाद्यं॥
यथा। रणतूर्य्यंतु संग्रामपट
हो ऽभयडिंडिमः॥ इति त्रि
काण्डशेषः॥
संग्राहः पुं फलकस्य मुष्टिः॥
फलकग्रहणस्थानमिति यावत्
संगृह्यतेऽयमिति कर्मणि घञ्
मुष्टिबन्धनक्रिया। तत्पर्य्यायः
मुष्टिबंधः २। हे मुष्टिबन्धन
क्रियायां। मुष्टेर्बन्धो ऽङ्गुलि
विन्यासो मुष्टिबंधः। मुष्टिना
बन्धो दृढग्रहणं संग्राह इत्य
परे। मुष्ट्या मेव संग्रह इत्यन्ये
मुष्टिः स्त्रियाञ्च संग्रह इति
बोपालितः। संसर्वग्रहे॥

त्येन संग्राहः। इत्यमरभरतौ
संग्राही[२] पुं कुटजवृक्षः। इ
तिराजनिर्घण्टः॥
संघः पुं समूहः। इत्यमरः॥
सजातीयानां विजातीयानां
च जंतूनां वृन्दे संघसार्थौ स्या
तां। यथा भिक्षुसंघः वणिक्
सार्थः। संहन्यते परिच्छिद्यते
ऽनेनेति संघः। संपूर्वात् हन
धातोः नाम्नीति डः निपातनात्
तहस्य घः। इति भरतः॥
संघचारी[२] पुं मत्स्यः। इति
हेमचन्द्रः॥ बहुभिः सहचा
रिणि त्रि॥
संघजीवी[२] पुं भृतीनः। इति
हेमचन्द्रः॥
संघट्टः पुं अन्योन्यावमर्दः॥
यथा। नैवान्यत्र मदंधसिंधु
रघटा संघट्ट घंटारणत्का
रस्रस्तसमस्तदिवनितालब्धस्तु
ति र्भूपतिः। इति वाल्मीकि
कृतगंगाष्टकस्तोत्रे। गठनं। य
था। मदाहवणसंघट्ट पतिष्ठा
कानमेव च। स्वपनं एजनं चैव
विसर्जनमतः परं। इति तिथ्या
दितत्त्वे। चक्रविशेषश्च॥
संघट्टनं क्ली स्त्री मेलनं॥

पठनं। घटना। इति केचित्
संघट्टा स्त्री लता इति शब्द
चन्द्रिका॥
संघतलः पुं मिलितप्रतल
हयं। जोड्हात इति भाषा।
इत्यमरः॥
संघपुष्पी स्त्री धातकी। इ
तिराजनिर्घण्टः॥
संघर्षः पुं संघर्षणं। स्पर्द्धा।
ससर्पः। इति शब्दरत्नावली।
संघाटिका स्त्री युग्मं। कुट्टनी
जलकंटकं। इति मेदिनी॥
घ्राणं। इति विश्वः॥
संघातः पुं समूहः। नरक
भेदः। इत्यमरः। हननं। इति
मेदिनी। कफः। इति राज
निर्घण्टः। नाटके गतिविशे
षः। इति केचित्॥
संघातपत्रिका स्त्री शतपु
ष्पा। इति राजनिर्घण्टः॥
संघुषितं } त्रि सम्यग्घोषणा
संघुष्टं } श्रयः। संपूर्वघुषधा
तोः क्तः प्रत्यये कृते वा रूपाभ
संपत्वात् संघुष्टत्वं इत्यनेन
विकल्पेन इडा निषिध्यते। इति
मुग्धबोधव्याकरणं॥
सचिः स्त्री शची। इत्यमरटीका

यो रामाश्रमः ॥
सचिल्लकः त्रि क्लिन्नचक्षुः । इति शब्दरत्नावली ॥
सचिवः पुं मंत्री । सहायः ॥ इत्यमरः । कृष्णधत्तूरकः । इति राजनिर्घण्टः ॥
सचिवामयः पुं विसर्पः । इति राजनिर्घण्टः ॥
सची स्त्री शची । इंद्राणी । शचते व्यक्तं वक्ति शची शवउ वाचि तालव्यादिः नाम्नीति ङः पाक्षे डाणादीति पक्षे ङपि शची । कौशिकी च शची कौशालकीति वर्णदेशमालायां तालव्यशेषु पठ्यते । सची दंत्यादिश्च तत्र सचते प्राप्नोयति इंद्रमिति षच ङ. सेचने सेवने ङः कृपृच । इत्यमरटीकायां भरतः । सचिः शचीति भरतद्विरूपकोषश्च । सचीनंदनः पुं शचीसुतः । सच जयंतः ॥ चैतन्यदेवः । यथा शाके श्रुति व्योम युगेंदु गाणिपश्चात्स्य तिथौ फाल्गुने पौर्णमास्यां । त्रैलोक्य भावपादय पुण्यकीर्त्ति देवः सचीनंदन आविरासीत् । इति चैतन्यचंद्रोदयनाटके ॥
सचेष्टः पुं आम्रः । इति शब्दमाला । चेष्टया सहवर्त्तमाने त्रि
सज्वारा स्त्री हरिद्रा । इति शब्दचंद्रिका ॥
सच्चित् क्ली ब्रह्म । इति मुग्धबोधव्याकरणं ॥
सच्चिदानंदं क्ली नित्यज्ञानसुखस्वरूपं । तच्च ब्रह्म । यथा अहं देवो न चान्योस्मि ब्रह्मैवास्मि न शोकभाक् । सच्चिदानंदरूपोहं नित्यमुक्तस्वभाववान् ॥ इत्याह्निकतत्त्वं । साकारदेवविशेषणे त्रि । यथा ॥ मुकुंदे सच्चिदानंदे प्राणिमत्स्य शणीयते । इत्यादि मुग्धबोधव्याकरणं ॥
सजंबालः त्रि पंकिलः । इत्यमरः ॥
सजातिः पुं समानजातिस्त्रीपुंसोः पुत्रः ॥ यथा । सवर्णेभ्यः सवर्णासु जायंते हि सजातयः । अनिंद्येषु विवाहेषु पुत्राः संतानवर्द्धनाः । इति मिताक्षरायां आचाराध्यायः ॥ समानजातौ त्रि ॥
सजातीयः त्रि समानधर्माक्रांतः । यथा । सजातीयैः कुलयुपं

तिरस्थो पुं नपुंसके । इत्यमरः
सजूः अव्य सहार्थः । इति शब्दरत्नावली भरतश्च ॥
सजूः त्रि प्रीतियुक्तः ॥ सेवायुक्तः । इति मुग्धबोधव्याकरणं ॥ जुषी प्रीतिसेवनयोः जोषणं जुट् सह जुषा वर्त्ततेया सा सजूः ॥ इति तट्टीकायां दुर्गादासः ॥ तापसः ॥ इति संक्षिप्तसारव्याकरणं ॥
सज्जः त्रि सन्नद्धः । इत्यमरः ॥ संभृतः । इति विश्वमेदिन्यौ ॥ निभृतः । इति शब्दरत्नावली । सज्जायुक्तश्च ॥
सज्जनं क्ली रक्षणार्थं सैन्यस्थानं । चौकी ति ख्याते । तत्पर्य्यायः ॥ उपरक्षणं २ इत्यमरः ॥ घट्टः । इति मेदिनी । सज्जा च ।
सज्जनः पुं सत्कुलोद्भवः । तत्पर्य्यायः । महाकुलः २ कुलीनः ३ आर्य्यः ४ सभ्यः ५ । साधुः ६ इत्यमरः । कुलजः ७ सेवः ८ साधुजः ९ इति शब्दरत्नावली । मेदिनीकरमते. वाच्यलिंगोप्ययं । तल्लक्षणं यथा दांत उवाच निजाचारग्राहिणो ये कुर्वंतो वेदसम्मतं । पापाभिलासरहिताः सज्जनास्ते प्रकीर्त्तिताः । इति पाद्मे क्रियायोगसारे १९ अध्यायः । तत्संगप्रशंसा यथा नलिनी दलगत जलवत्तरलेतद्वज्जीवन मतिशयचपलं क्षणमपि सज्जन संगति रेका भवति भवार्णवतरणे नौका इति श्रीशंकराचार्यकृतमोहमुद्गरः ॥
सज्जना स्त्री नायकस्यारोहणार्थं गजसज्जीकरणं तत्पर्य्यायः । कल्पना २ । इत्यमरः ॥
सज्जा स्त्री वेशः । साज इति भाषा । सन्नाहः । सांजोया इति भाषा । षस्ज धातो भावेशात् प्रत्यय निष्पन्ना ॥ इति व्याकरणं ॥
सज्जितः त्रि भूषितः । कृतसज्जः । वर्म्मितः । सन्नद्धः । षस्ज धातोः क्तप्रत्ययेन निष्पन्नः ॥
संचः पुं पुस्तकलेखनार्थपत्रचयः । सांचु इति भाषा । यथा । श्रीतालीपत्रजे संचे समे पत्रसुसंचिते । विचित्रके विपाट्येव वर्मणा संपुटीकृते । रक्ते

मेदिनी। शिखा। इति शब्द
रत्नावली॥
सटाङ्कः पुं सिंहः। इति शब्द
रत्नावली॥
सटिः स्त्री शठी॥ इति श
ब्दरत्नावली॥
सटिका स्त्री गन्धपत्रा। सटी
इति राजनिर्घण्टः॥
सटी स्त्री गंधद्रव्यविशेषः।
वनआदा इति आम्रहरिद्रा इ
ति च भाषा। आवेहलदी इति
कोंकणे प्रसिद्धा। तत्पर्य्यायः
शटी २ गंधशटी ३ सुगंधा ४
सटिः ५ शटिः ६ गंधमूला ७
गंधमूली ८ पलाशः ९ कर्वुरः
१० षड्ग्रन्थिका ११ कर्चूरः १२ ग
न्धालिः १३ गंधमूलकः १४।
इति शब्दरत्नावली। शठी
१५ षड्ग्रन्था १६ आम्रनिशा
१७ वधूः १८ गंधारी १९ सटि
का २० पलाशिका २१ सुभद्रा
२२ तपणी २३ हवी २४ गंधा २५
पृथुपलाशिका २६ सोम्या २७
हिमोद्भवा २८ गंधवधूः २९।
अस्या गुणाः। तिक्तत्वं। अ
म्लरसत्वं। लघुत्वं। उष्णत्वं। रु
चिप्रदत्वं ज्वरकफास्रकेड्

व्रणदोषवक्त्रामयनाशित्वं।
हृद्यत्वं च। इति राजनिर्घण्टः॥
सट्टा स्त्री पक्षिभेदः। वाद्यं। इ
ति संक्षिप्तसारोणादिवृत्तिः।
सठ क सम्यगर्थे। इति कविकल्प
द्रुमः। दन्त्यादिः। क सठयति।
शाठ्ये गत्यसंस्कृत संस्कृतेषु
इति दुर्गादासः।
सठी स्त्री शठी। इति राजनि
र्घण्टः॥
सणसूत्रं क्ली शणसूत्रं। इत्य
मरटीकायां रायमुकुटः॥
सण्डः पुं षण्डः। इत्यमरटीका
सण्डिशः पुं संदंशः। सांडाशी
इति भाषा। यथा। पायसे कृ
सराच्छागे देवान्नानि चयानि
वै अन्नानि ये ह्यसंस्कृत्य तेषा
मन्नानि पापिनां। निपाति
तानां भूपृष्ठे उद्धृतानि निरीक्ष
तां। संडिशैरपकृष्यन्ते नैरे यो
म्ये सुखामनेतः। इति मार्क
ण्डेयपुराणे १४ अध्यायः॥
संडीनं क्ली खगगतिक्रिया।
इत्यमरः। खगानां पक्षिणां
गतौ स्थानान्तर संचारे एताः
क्रियाः व्यापाराः। का एता इ
त्याह प्रथमडीनं प्रडीनं उ

ड्डयनाय क्रमबंधः॥ ऊर्द्धं डीनं
उड्डीनं विषङ्गमने। संगतेडीनं
संडीनं इत्यादौ पतनमिति।
पृथक् पृथक् पक्षिगतिक्रि
यास्तु प्रडीनं तिर्य्यग्गमने उ
ड्डीनं ऊर्द्धगमने संडीनं संगत
गमनमित्यन्ये। डी ङ य
गतौ डी ङ च नभोगतौ भावे
क्तः स्वाद्योदितिनत्वं। इति
भरतः॥
सत् त्रि सत्ये। साधुः। विद्य
माने। प्रशस्ते। अभ्यर्हिते॥
इत्यमरः। धीरः। इति मेदि
नी॥
सत् क्ली ब्रह्म। यथा भगव
द्गीता। ॐ तत्सदिति निर्द्देशो
ब्रह्मणस्त्रिविधः स्मृतः। ब्रा
ह्मणास्तेन वेदाश्च यज्ञाश्च वि
हिताः पुरा॥ ॐ तत् सदिति
त्रिविधो ब्रह्मणो जगदीश
स्य निर्द्देशोऽभिधाने ब्रह्मवि
द्भिश्चिन्तिते। तत्र तावदोमिति
ब्रह्मेत्यादि श्रुतिप्रसिद्धे रो
मिति ब्रह्मणो नाम। पातञ्ज
लिश्चाह तस्य वाचकः प्रण
वः। अस्य ब्रह्मणः। ॐकारो भ
गवान्विष्णुरित्यादि तद्वाच्या वा

चकयो रभेदेन। तथा च।
जगत्कारणत्वेन प्रसिद्धत्वा
द्विशेषापरोक्षत्वाच्च तच्छब्दो
ऽपि ब्रह्मणो नाम। एवं परमा
र्थसत्व साधुत्व प्रशस्तत्वादि
भिः सच्छब्दोऽपि। अत स्तेन त्रि
विधनिर्द्देशेन। यद्वा यस्माद्ये
त्रिविधो निर्द्देशस्तेन परमा
त्मना ब्राह्मणादयो निर्म्मिताः
वैदिके कर्म्मणि तेषां प्रथमतो
निर्द्देशो यथा। तस्मादोमित्यु
दाहृत्य यज्ञदान तपः क्रिया
प्रवर्त्तन्ते विधानोक्ताः सततं ब्र
ह्मवादिनां। यस्मादेवं ब्रह्म
णो निर्द्देश स्तस्मादोमित्युदा
हृत्य उच्चार्य्य कृत्वा वेदवादि
नां यज्ञाद्याः शास्त्रोक्ताः क्रियाः
सततं सर्वदैव कल्पेऽपि प्रवर्त्तन्ते
प्रकर्षेण वर्त्तन्ते सगुणा भवन्ती
ति भगवान् शंकराचार्य्य चरणाः
तदित्यनभिसंधाय यज्ञदानत
पः क्रिया। दानक्रियाश्च विविधाः
क्रियन्ते मोक्षकाङ्क्षिभिः॥
तदिति ब्रह्मणोऽभिधानमुदा
हृत्य अनुषंगः। अनभिसंधा
य कर्म्मणः फलमिति शेषः त
स्मात् फलाभिसंधाने विनाशु



सत्त्वएण कर्मकर्त्तव्यमित्यपि
बोध्यं। सद्भावे साधुभावे च सदि
त्येतत्प्रयुज्यते। प्रशस्ते कर्म्म
णि तथा सच्छब्दः पार्थ युज्य
ते। यतो विद्यमानत्वमित्युत्
कृष्टचरिते च सदित्येतत्प्रयु
ज्यते अतो यज्ञादौ कर्म्मणि
प्रथमतः सच्छब्दः प्रयुज्यते
इत्येकादशीतत्त्वं ॥
अन्यत् सच्छब्दे द्रष्टव्यं ॥
सत्कुलीनः पुं सत्कुलोद्भ·
वः। यथा। सत्कुलीनाय शां·
ताय ऋजवे दम्भवर्ज्जिते। दद्या
त्तोयमिदं पुण्यं सर्वकामफ
लप्रदं। इति विश्वसारतन्त्रे व
टुकभैरवस्तोत्रं ॥
सतते क्ली निरन्तरक्रिया। त
द्वति त्रि इत्यमरः। तत्पर्य्या·
या अनवरतशब्दे निम्नपाठे च
द्रष्टव्याः। अपि च। सततेत्वन
वरतानारताश्रान्त संतत ॥
प्रसक्तासक्त नित्यजस्रानव्रा
विरतानिशं। इति जटाधरः॥
सतत्वे क्ली स्वभावः। इति·
हेमचन्द्रः ॥
सत्तर्कः त्रि तर्केण सह वर्त्तमा
नः। सावधानः। इति लोकप्रसि
द्धः। सतानन्दः पुं गौतममुनिपु
त्रः। स च जनकराजपुरोहितः॥
इति शब्दरत्नावली ॥
सतिः स्त्री दाने। अवसाने ॥
इति सातिशब्दटीकायां भरतः।
सती स्त्री दुर्गा। साध्वी। इति मे
दिनी ॥ सौराष्ट्रमृत्तिका ॥
इति हेमचन्द्रः ॥ दाने। अवसा
ने। इति नानार्थ सातिशब्दटी
कायां भरतः ॥ स्थानविशेषे
तस्याष्टोत्तरशतनामानि। यथा
देव्युवाच। सर्वगा सर्वभूते
षु द्रष्टव्या सर्वतो भुवि। स
प्तलोकेषु यत्किञ्चिद्रहितं न
मया विना। तथापि येषु स्था
नेषु द्रष्टव्याः सिद्धिमीप्सुभिः
स्मर्त्तव्या भूतिकामैर्वा तान् व
दामि प्रयत्नतः। वाराणस्यां
विशालाक्षी नैमिषे लिङ्गधारि
णी। प्रयागे ललितादेवी कामु
का गन्धमादने। मानसे कुमुदा
नाम विश्वकाया तथाम्बरे। गो
मन्ते गोमती नाम मन्दरे का
मचारिणी। मदोत्कटा चैत्रर
थे जयन्ती हस्तिनापुरे। का
न्यकुब्जे तथा गौरी रम्भा मल
यपर्वते। एकाम्रके कीर्त्ति·

मती विश्वा विश्वेश्वरे विदुः
पुष्करे पुरुहूतेति केदारे मा
र्गदायिनी ॥ नन्दा हिमवतः
पृष्ठे गोकर्णे भद्रकर्णिका।
स्थानेश्वरे भवानी तु बिल्वके
बिल्वपत्रिका। श्रीशैले माधवी
नाम भद्रा भद्रेश्वरे तथा। जया व
राहशैले तु कमला कमलालये
रुद्रकोट्यां तु रुद्राणी काली
कालञ्जरे तथा। महालिङ्गे तु
कपिला मर्कोटे कमलेश्वरी।
अत्र कपिलाश्वरा इति च पाठः
शालग्रामे महादेवी शिवलिं
गे जलप्रिया। मायापुर्य्यां कुमा
री तु संताने ललिता तथा। उत्
पलाक्षी सहस्राक्षे हिरण्याक्षे म
होत्पला। गयायां मङ्गला नाम
विमला पुरुषोत्तमे। विपाशा
याममोघाक्षी पाटला पुण्ड्रवर्द्ध
ने। नारायणी सुपार्श्वे तु त्रिकू
टे रुद्रसुन्दरी। विपुले विपुला
नाम कल्याणी मलयाचले।
कोटवी कोटितीर्थेषु सुगन्धा
माधवे वने। गोदाश्रमे त्रिसं
ध्या तु गङ्गाद्वारे रतिप्रिया
शिवकुण्डे शिवानन्दा नन्दिनी दे
विकातटे। रुक्मिणी द्वारवत्यां तु
राधा वृन्दावने वने। देवकी म
थुरायां तु पाताले परमेश्वरी।
चित्रकूटे तथा सीता विन्ध्ये
विन्ध्याधिवासिनी। सह्याद्रावेक
वीरा तु हरिश्चन्द्रे तु चण्डिका॥
रमणा रामतीर्थे तु यमुनायां मृ
गावती। करवीरे महालक्ष्मी रु
मादेवी विनायके। आरोग्या वै
द्यनाथे तु महाकाले महेश्व
री। अभयेत्युष्णतीर्थेष्वमृता
विन्ध्यकन्दरे। उष्णतीर्थेत्यत्र अष्ट
तीर्थेति च पाठः। माण्डव्ये मा
ण्डवी नाम स्वाहा माहेश्वरे पुरे
छगलाण्डे प्रचण्डा तु चण्डिका
मरकण्टके। सोमेश्वरे वरारोहा
प्रभासे पुष्करावती। देवमाता
सरस्वत्यां पारापारातटे मता॥
महालये महाभागा पयोष्ण्यां पि
ङ्गलेश्वरी। सिंहिका कृतशौचे
तु कार्त्तिके त्वतिशंकरी। उत्प
लावर्त्तके लोला सुभद्रा शो
णसंगमे। माता सिद्धवने लक्ष्मी
रनङ्गा भरताश्रमे। जालन्धरे
विश्वमुखी तारा किष्किन्धपर्व
ते। देवदारुवने पुष्टिर्मेधा काश्मी
रमण्डले। भीमादेवी हिमाद्रौ च
तुष्टिर्विश्वेश्वरे तथा। कपाल·

मोचने शुद्धि र्माता कायावरो
हणे। शंखोद्धारे ध्वनि र्नाम
धृतिः पिण्डारके तथा। कालात
चे च काली यामच्छोदे शिवधा
रिणी। वेणायाममृता नाम बद
र्य्यामुर्व्वशी तथा। ओषधी चो
त्तरकुरौ कुशद्वीपे कुशोदका
मन्मथा हेमकूटे तु कुमुदे सत्य
वादिनी। अश्वत्थे वन्दनीका तु
निधि र्वैश्रवणालये। गायत्री वे
दवदने पार्व्वती शिवसन्निधौ देव
लोके तथेन्द्राणी ब्रह्मास्येषु स
रस्वती। सूर्य्यविम्बे प्रभा नाम
मातॄणां वैष्णवी तथा अरुन्धती
सतीनान्तु रामासु च तिलोत्तमा
चित्ते ब्रह्मकला नाम शक्तिः
सर्व्वशरीरिणां ॥ एतदुद्देशतः
प्रोक्तं नामाष्टशतमुत्तमं। अ
ष्टोत्तरञ्च तीर्थानां शतमेत
दुदाहृतं। यः पठेच्छृणुयाद्वा
पि सर्व्वपापैः प्रमुच्यते। एषु ती
र्थेषु यः कृत्वा स्नानं पश्यति मा
नवः। सर्व्वपापविनिर्म्मुक्तः कल्पं
शिवपुरे वसेत्। यस्तु मत्पर
मः काले करोत्येतेषु मानवः
स भित्वा ब्रह्मसदनं पदमभ्ये
ति शाङ्करं। नामाष्टशतकं यस्तु
श्रावयेच्छिवसन्निधौ तृतीया
यामथाष्टम्यां बहुपुत्रो भवेन्न
रः। गोदाने श्राद्धकाले वा अ
हन्यहनि वा पुनः। देवार्च्चनवि
धौ विद्वान् पठन् ब्रह्माधिग
च्छति। एवं वदन्ती सा तत्र ददाह
स्वात्मनात्मना। स्वयम्भुवेऽपि का
ले च दक्षप्राचेतसोऽभवत्। पा
र्व्वती चाभवद्देवी शिवदेहार्द्ध
धारिणी। मेनागर्भसमुत्पन्ना
भुक्तिमुक्तिफलप्रदा। अरुन्धती
जपन्त्येतत्प्राप्ता योगमुत्तमं।
पुरूरवाश्च राजर्षि र्लोकेष्वज
यतामगात्। ययातिः पुत्रलाभं
तु धनलाभन्तु भार्गवः। तथान्ये
देवदैत्याश्च ब्राह्मणाः क्षत्रिया
स्तथा। वैश्याः शूद्राश्च बहवः
सिद्धिमीयु र्यथेप्सितां। यत्रैत
ल्लिखितं तिष्ठेत् पूज्यते देवसन्नि
धौ। न तत्र शोकदौर्गत्ये क
दाचिदपि जायते। इति म
त्स्यपुराणे १३ अध्यायः॥
सावित्री। यथा। यम उवाच
सावित्रीवरदानेन त्वं सावित्री
कलासती। प्राप्ता पुराभूभृता
च तपसा तत्समा शुभे॥ यथा
श्रीः श्रीमतः क्रोडे भवानी च भ

वक्षसि। सौभाग्या स्वप्रिया त्वं
च भव सत्यवति प्रिये। इति
ब्रह्मवैवर्त्ते प्रकृतिखण्डे २४॥
अध्यायः। विद्यमाना। यथा
अथापमानेन पितुः प्रयुक्ता द
क्षस्य कन्या भवपूर्व्वपत्नी। स
ती सती योगविसृष्टदेहा तां
जन्मने शैलवधूं प्रपेदे॥ इ
ति कुमारसम्भवे १ सर्गः॥
सतीनः पुं वंशः। इति शब्द
माला। सतीलकः। इत्यमर
टीकायां भरतः॥
सतीनकः पुं सतीलकः। इत्य
मरटीका॥
सतीर्थ्यः पुं परस्परैकगुरुशि
ष्यः। इति शब्दरत्नावली॥
सतीर्थ्यः पुं परस्परैकगुरु
शिष्यः। इत्यमरः। एको ऽभि
न्नो गुरु र्येषां ते ऽन्योन्यं सती
र्थ्याः। समाने तीर्थे गुरौ वसन्ति
सतीर्थ्याः। फह्ने कादितियः
ज्योतिर्ज्जनपदेत्यादिना सः॥
तीर्थं मृषिजुष्टे जले गुरौ इ
ति वक्ष्यते। इति भरतः॥
अपि च। स्यात् सतीर्थ्यः सती
र्थ्योऽपि तथैव गुरु शिष्योऽपि।
इति शब्दरत्नावली॥
सतीलः पुं वेणुः। इति हारा
वली। वायुः। इत्यमरटीका
यां रायमुकुटः। कलायः। य
था। कलायस्त्रिपुटः प्रोक्तः
सतीलो वर्त्तुलो मतः। इति
भरतधृतव्याडिः॥
सतीलकः पुं कलायः। यथा।
कलायस्तु सतीलकः हरेणु
खण्डिकौ चास्मिन्। इत्यमरः॥
चत्वारि कलाये। मटर इति ख्या
ते। कलायशब्दो विशेषसामा
न्ये च अतएव माषकलाय इत्या
दिप्रयोगाः। कड्यते भुज्यते क
लायः। कड भक्षणे नाम्नी
तिआयः मनीषादित्वात् उस्यतः
तिलेन तिलवत् कृष्णवर्णचि
ह्नेन सह वर्त्तते सतीलः निपा
तनात् दीकारस्य दीर्घः स्वार्थे के
सतीलकः इत्यादि। क्रियते भ
क्षणार्थं हरति मनो वा हरेणुः
नाम्नीति अणुः। खण्ड्यते विदा
र्य्यते खण्डिकः पूर्व्वेण इकः
कलायस्त्रिपुटः प्रोक्तः सती
लो वर्त्तुलो मतः। हरेणुः क
ण्ठका ज्ञेयेति तु व्याडिः।
इति भरतः॥
सतीला स्त्री कलायविशेषः

तेऽोऽञ इतिभाषा। यथा। सतीला त्रिपुटिकातिपुटीति शब्दचन्द्रिका॥

सतुषं क्ली तुषयुक्तधान्यं धान्ये। यथा। धान्यं श्वेतगतं धान्यं सतुषं धान्य मुच्यते। आमेवितुषं मित्युक्तं स्विन्नं मवमुदाहृतं। इति श्राद्धतत्त्वं॥

सतृष्ण त्रि तृष्णायुक्तः। तत् पर्य्यायः। तृषितः २ तर्षितः ३ इति त्रिकाण्डशेषः॥

सतेरः पुं तुषः। इति संक्षिप्तसारोणादिवृत्तिः॥

सत्त्र क्ली ब्रह्म। पतद्विवरणं सत्याहीनशब्दात् परे सत्त्रशब्दे द्रष्टव्यं॥

सत्कदम्बः पुं केलिकदम्बः। यथा केलिवृत्तः सत्कदम्बो वृत्तभः शिशुपालकः। इति शब्दचन्द्रिका॥

सत्कर्त्ता पुं विष्णुः। यथा। सत्कर्त्ता सत्कृतः साधु रिति तस्य सहस्रनामस्तोत्रं॥

सत्कर्म्म क्ली वेदविहितक्रिया। यथा। विष्णुपुराणे। सत्कर्म्मयोग्यो न जनो नैवापः शोधकारणं यस्मिन्नुदितस्तस्मै नमो देवाय भास्वते। इति प्रायश्चित्ततत्त्वं॥

सत्काञ्चनारः पुं रक्तकाञ्चनः। यथा। कोविदारे चमरिकः कुद्दालो युगपत्रकः। सत्काञ्चनारः कामाल्लु हयवाहनशंकरः। इति शब्दचन्द्रिका॥

सत्काण्डः पुं चिल्लः। इति शब्दचन्द्रिका॥

सत्कारः पुं पूजा। यथा। पवमस्नुताः सभासदः सभायां यथा सीदन्ति उपविशन्ति तथा दानमान सत्कारै राज्ञा कर्त्तव्याः। इति व्यवहारतत्त्वं॥ शवदाहादिक्रिया। इति लोकप्रसिद्धिः॥

सत्कृतः त्रि पूजितः। कृतसत्कारः। यथा। तेषां कंचित् सकालञ्च मुनिना तेन सत्कृतः। इति देवीमाहात्म्यं॥

सत्कृतिः स्त्री सत्कारः। सत्क्रियाशब्दार्थ दर्शनात्॥

सत्क्रिया स्त्री शवदाहादिक्रिया। तत्पर्य्यायः। संस्क्रिया २ इति त्रिकाण्डशेषः। संस्कारः ३ इति शब्दरत्नावली। सत्समाने। यथा मनुः। चतेऽपव।

र्ज्जिते ज्ञातिमध्येषा यवसं गवां। प्रदद्यात् प्रथमे गोभिः सत्कृतस्यहि सत्क्रिया॥ इति प्रायश्चित्ततत्त्वं॥

सत्तमः त्रि अतिशोभनः। इत्यमरः। श्रेष्ठतमः। साधीयान्॥ उत्तमः। इति मेदिनी॥

सत्ता स्त्री जातिविशेषः। इति भाषापरिच्छेदः। विद्यमानता। यथा। यद्यपि पापस्यकार्य्यानन्वितत्वेन तत्सत्ताया मप्रामाण्यं प्रतिभाति। इति प्रायश्चित्ततत्त्वं। साधुता। सतो भावः इत्यर्थे सत्शब्दात् तप्रत्ययेन निष्पन्ना॥

सत्त्रं क्ली यज्ञः। सदादानं॥ आच्छादनं। अरण्यं। कैतवं इति मेदिनी। धनं॥ गृहं। दानं। सरोवरं॥ इत्यनेकार्थकोषः। यागविशेषः। यथा। नैमिषेऽनिमिषत्तेत्रे ऋषयः। शौनकादयः सत्त्रं स्वर्गाय लोकाय सहस्रसम मासत। कलिमागतमाज्ञाय त्तेत्रेऽस्मिन् वैष्णवे वयं॥ आसीना दीर्घसत्त्रेण कथायां सक्तणा हरेः। इति श्रीभागवते १ स्कन्धे १ अध्यायः॥ द्वादशाहसाध्यसत्त्रं। यथा। ज्योतिष्टोमे द्वादश गोशतदक्षिणा विभागः षोडशर्त्विजां तद्विकृतीभूते सत्त्रात्मके द्वादशाहे साध्ये शतेनाहीनो दीक्षयन्तीत्यादि दर्शनेन निर्णीयते। तच्च सावनमानेन कर्त्तव्यं। यथा। सत्त्राण्युपास्यान्यथ सावनेन लोकाश्च यस्माद्व्यवहारकर्म। इति मलमासतत्त्वं॥ सदाक्षिण्यं सततान्नदानं॥ तन्निन्दकस्पर्शनादिनिषेधो यथा। नालपेज्जनविद्विष्टान् वीरहीनां तथा स्त्रियं। देवता पितृ सच्छास्त्र यज्ञ सत्त्रादिनिन्दकैः॥ कृत्वा तु स्पर्शनालापं शुद्ध्यानार्कावलोकनात्। इति मार्कण्डेयपुराणे सदाचाराध्यायः॥ सत्त्रं सदाक्षिण्यं सततान्नदानं। इति तट्टीका॥

सत्त्रं म छद्म सद्म। इति शब्दरत्नावली जटाधरश्च।

सत्त्रशाला स्त्री अन्नादिदानगृहं। तत्पर्य्यायः। प्रतिश्रयः २ इति हेमचन्द्रः॥

सत्रा अ सह । इत्यमरः ॥
सत्राजित् पुं राजविशेषः । स तु श्रीकृष्णस्य श्वशुरः । पुरे भलाटनगरे शशिध्वजराजो बभूव । इति कल्किपुराणे २२ अध्यायः ॥ सत्रिः पुं मेघः । हस्ती । जयशीले त्रि । इत्युणादिकोषः ॥
सत्रिजातकं क्ली व्यञ्जनविशेषः यथा । मांसे वक्रच्युते भृष्टे सिक्ता चोल्लाम्बुना शुक्तैः जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते । तदेव शूलतक्राढ्यं प्रदिग्धं सत्रिजातकं । इति पाकचन्द्रिका ॥
सत्री[२] पुं गृहपतिः । इत्यमरः हे गृहस्थे । सत्रं सदादाने विद्यते ऽस्य सत्री इन् । सदेहस्य सत्रं हितकारं । सत्रमाच्छादने यज्ञे सदादाने च कैतवे । इति विश्वः । गृहस्य पतिर्गृहपतिः । इति भरतः । नित्यप्रवृत्तान्नदानः ॥ यथा विष्णुः नाशयेच्च शस्त्रैः राजकर्माणि नवृत्तिर्यां व्रतेन सत्रिणां सत्रे न कारुणां स्वकर्मणि नवाज्ञाकारिणां तदिच्छया नदेवप्रतिष्ठा विवाहयोः सर्वसंहनयोः । इति । सत्रिणो नित्यप्रवृत्तान्नदानाः सत्रेऽन्नदाने । इति शुद्धितत्वं ॥
सत्वं क्ली प्रकृतेर्गुणविशेषः यत्र सत्वे प्रकाशकज्ञाने सुखहेतुः । सतो भावः सत्वं । त्वतोभावे इति त्वे निपातनात्तलोप इति केचित् । सत्वाहितकार इति बहवः । इत्यमरः । भरतो । महाभारतमते सुखजनकगुणः । तस्य धर्माः ६ प्रसादः १ हर्षः २ प्रीतिः ३ असंदेहः ४ धृतिः ५ स्मृतिः ६ । इति मोक्षधर्मः । द्रव्यं । असुः व्यवसायः । इत्यमरः ॥ पिशाचादिः । बलं । स्वभावः ॥ आत्मा । चित्तं । इति मेदिनी । रसः । आयुः ॥ इति धरणिः कुबेरः । इति हेमचन्द्रः ॥ धनं । आत्मता । इति शब्दरत्नावली ॥
सत्वं पुं क्ली जन्तुः । इत्यमरः ।
सत्वता स्त्री सत्वस्य भावः । सत शब्दात् भावे तप्रत्ययाने तवेआप् प्रत्ययेन निष्पन्ना ॥
सत्वसम्पन्नः त्रि सत्वप्रधानः । सत्वशब्दात् संपूर्वपद्धातोः क्त

प्रत्ययनिष्पन्नः ॥
सत्वस्थः त्रि सत्ववृत्तिशाली सत्वप्रधानः । यथा । ऊर्द्ध्वं गच्छन्ति सत्वस्था मध्ये तिष्ठन्ति राजसाः । जघन्यगुणवृत्तस्था अधो गच्छन्ति तामसाः ॥ इति भगवद्गीतायां १४ अध्यायः १८ श्लोकः ॥
सत्पत्रं क्ली पद्मस्य नवदलं इति शब्दचन्द्रिका ।
सत्पथः पुं प्रशस्तपथः । तत्पर्यायः । अतिपन्थाः २ सुपन्थाः ३ अर्चिताध्वा ४ इत्यमरः ॥ सुपथः ५ इति शब्दरत्नावली
सत्पशुः पुं यज्ञीयपशुः । इति केचित् । शोभन पशुश्च ॥
सत्पुत्रः पुं उत्तमसन्तानः ॥ वेदादिविहितपिण्डादिकार्यकर्त्ता । यथा । पुत्रान्नो नरकाद्यस्मात् त्रायते पितरं सुतः । मुखसन्दर्शनेनापि तदुत्पत्तौ यतेत सः । इति बृहस्पतेन्नरक नरक निस्तारयत्य ऋणमस्मिन्सन्नयति अमृतत्वञ्च विन्दति पिता पुत्रस्य जातस्य पश्येत् चेज्जीवतो मुखं । इति वशिष्ठोक्त ऋणापनयनाय च यत्नमपेक्षेति नियम विधाने तदकृतपुत्रकार्य पुत्रपरे । सत्पुत्रस्तु मुखदर्शनं विनापि नरकान्निस्तारकः तथा च विष्णुपुराणे । सत्पुत्रेण तु जातेन वेणोपि त्रिदिवं ययौ पुन्नाम्नो नरकाज्जातः सतेन सुमहात्मना । ब्रह्मपुराणेपि । समुत्पन्नेन भो विप्राः सत्पुत्रेण महात्मना । त्रातः स पुरुषव्याघ्रः पुन्नाम्नो नरकात्तदा । इति शुद्धितत्वं ॥
सत्पुरुषः पुं पूज्यमानपुरुषः इति संक्षिप्तसारसमासपादः ॥
सत्प्रतिग्रहः पुं साधुजनदत्तद्रव्यग्रहणं सद्भ्यः साधुभ्यः प्रतिग्रहः दानग्रहणं । यथा ॥ सप्तवित्तागमा धर्म्या दायो लाभः क्रयो जयः । प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥ इति मानवे १० अध्यायः ॥
सत्प्रतिपक्षः पुं तुल्यव्याप्तिकः प्रतियोगी । न्यायमते । साध्याभावव्याप्यवत् पक्षः । यथा ह्रदो वह्निमान् धूमादित्यादौ वह्न्यभावव्याप्यवज्जलादिः । इति सत्प्रतिपक्षग्रन्थः । तल्लक्षणं यथा । साध्यविरोध्युपस्था

पन समर्थं समान वलोप०
स्थित्या प्रतिरुद्धे कार्य्ये लिंग
त्ववलेच व्याप्ति पक्षधर्मते वि
रोधि वोधकान्यरामकैतौ यपि
कत्रूपसंपत्ति मन्नयाक्रायमाने
नप्रतिरुद्ध कार्य्यत्ववा तत्वं
इति गंगेशोपाध्यायकृततत्त्वचिं
तामणिः ॥
सत्यफलः पुं दाडिमवृक्षः । इ
तिशब्दचंद्रिका ॥
प्रोक्षनफलवृक्षश्च ॥
सत्यं क्ली कृतयुगं । शपथः
यथार्थ्यः । तद्वति त्रि । इतिमे
दिनी । सिद्धांतः । इति शब्दर
त्नावलीवली । यथार्थस्य प-
र्य्यायः । तथ्यं १ ऋतं २ सम्य
क् ३ । इत्यमरः । अवितथं ४
भूतं ५ इतिजटाधरः । तल्ल-
क्षणं यथा । यथार्थकथनं यच्च
सर्वलोक सुखप्रदं । तत्सत्य-
मिति विज्ञेय मसत्यं तद्विप-
र्य्ययं । इति पाद्मेक्रियायोगसा
रे १९ अध्यायः ॥ तदा-
कारा यथा । सत्यंच समता
चैव दमश्चैव नसंशयः । अ
मात्सर्य्यंक्षमाचैव ह्रीस्तिति
क्षानसूयता । त्यागो ध्यान

मथार्य्यत्व इतिश्च सततंस्या
प्रहिंसाचैवराजेंद्र सत्याकारा
स्त्रयोदश । इतिमहाभारतेरा
जधर्मः । तस्यापालने दोषो
यथा । कृत्वाशपथरूपञ्च स
त्यं हिनपालयेत् । सकृत
घ्नः कालसूत्रे वसेदेवचतुर्यु
गं । सप्तजन्मसु काकश्च स
प्तजन्मसु पेचकः । ततःशूद्रो
महाव्याधी जन्मसप्ततत:शुचिः
इति ब्रह्मवैवर्त्ते प्रकृतिखंडे
५८ अध्यायः । अपिच । सत्येन
लोकं जयति सत्यंतुपरमंतपः
यथाभूत प्रसादंतु सत्य माहु
र्मनीषिणः । इति कौर्मे उप
विभागे १४ अध्यायः । तस्यप्र
शंसा यथा । सत्यमाराध्यते
हरिः सत्ये निष्कपटे वद । वद
तत् स्वभयं त्यक्का सत्यं ब्रूहि
सुसंसदि । वरं कूपशताद्वापी
वरं वापीशतात्क्रतुः । वरं क्र
तुशतात्पुत्रः सत्यंपुत्रशतात्
किल । नहि सत्यात्परो धर्मो
नानृतात् पातकंपरं । नहि
मातुः परो वंधुर्नगुरु र्मंत्रदा
त्परः । इति ब्रह्मवैवर्त्ते जन्म
खंडे ८५ अध्यायः ॥ अपिच ॥

तस्मात्सत्यंपरंब्रह्मसत्यमेवप
रंतपः । सत्यमेव परोयज्ञः
सत्यमेवपरं श्रुतं । सत्यंवेदे
षुजागर्ति सत्यंच परमंपदं ।
कीर्त्तिर्यशश्च पुण्यञ्च पितृदे
वर्षिपूजने । आद्यो विधिश्च-
विद्याच सर्वं सत्ये प्रतिष्ठितं ।
सत्यं यज्ञस्तथा वेदा मंत्रादे-
वाः सरस्वती । व्रतचर्य्यातथा
सत्यं ओंकारःसत्यमेवच । स
त्येनवायुरभ्येतिसत्येनतपते
रविः । सत्येनाग्निर्दहेन्नित्यं
स्वर्गं सत्येनगच्छति । सत्येन
चापः क्षिपति पर्जन्यो धरणी
तले । परेण सर्वदेवानां सर्व-
तीर्थावगाहनं । सत्यस्यवच
नाल्लोके सर्वमाप्नोत्यसंशयं
अश्वमेधसहस्रंच सत्यंचतु
लयाधृतं । अश्वमेधसहस्राद्धि
सत्यमेव विशिष्यते । सत्येनदे
वाः प्रीयंते पितरंऋषयस्तथा
मनुष्याः सिद्धगंधर्वाः सत्यात्
सिद्धिमितोगताः । अयायो वि
पुले शुद्धे सत्यतीर्थे शुचिह्र
दे । स्नातव्यं मनसा शुक्लैः स्ना
नेतत्परमंस्मृतं । आत्मार्थे-
वा परार्थेवा पुत्रार्थे वापि ।

मानवाः अनृतं येन भाषंते
ते बुधाः स्वर्गगामिनः । तस्मा
त्सत्यकृतंपंच तदनंतफलंभ
वेत् । इति वन्हिपुराणे दाना
वस्थानिर्णयनामाध्यायः । अ
पिच । तडाग शतदानेन यत्पु
ण्यंलभतेनरः । ततोधिकंचल
भतेपुण्यंकन्याप्रदानतः । दश
कन्याप्रदानेनयत्फलंलभतेन
रः । ततोधिकंचलभतेयोगेक
न्याप्रदानतः । दशकन्याप्रदा
नेनयत्फलंलभतेनरः । त
तोऽधिकंचलभतेयज्ञेकेनन
राधिपः । शतयज्ञेनलभते
यत्पुण्यं पुण्यकृज्जनः । ततो
ऽधिकंचलभते पुण्यासादर्शने
नेच । दर्शनेशतपुत्राणांयत्पु
ण्यंलभतेनरः । तत्पुण्यंलभते
नूनं पुण्यवान् सत्यपालनात्
नहि सत्यात्परोधर्मो नानृता
त्पातकंपरं । नहि गंगासमं
तीर्थं नदेवः केशवात्परः ॥
इति ब्रह्मवैवर्त्तपुराणं ॥
अन्यच्च । सत्यमूलंजगत्सर्वंस
र्वंसत्ये प्रतिष्ठितं । सिद्धिंलभं
तेसत्येन ऋषयो वेदपारगाः
सत्येन दीयतेकन्या सत्यं ज-



स्यंति ब्राह्मणाः । सत्ये वदं
ति राजानः सत्येन वसुधा धृता
सत्येन गम्यते स्वर्गो मोक्षं स-
त्येन प्राप्यते । सूर्यस्तपति
सत्येन सोमः सत्येन राजते ॥
यमः सत्येन हरति सत्येनेंद्रो वि
राजते । वरुणश्च कुवेरश्च
तौ च सत्ये प्रतिष्ठितौ ॥ तत्
सत्यसमन्वेषत यद्यहं नारा
मे पुनः । इति वाराहे मथु
रामाहात्म्ये अन्यकतीर्थप्रभा
व वर्णनं नामाध्यायः ॥
अन्यच्च सत्यं संतोष आस्ति
क्यं तथा चेंद्रियनिग्रहः ॥
देवताभ्यर्च्चनं पूजा ब्राह्मणा
नां विशेषतः ॥ सर्वभूत-
हितं वाक्यं सत्येयं स्वाद्यते
पदे । नियमाः पंच सत्याद्याश्चा
द्य साम्यंतरे स्थिता । इति गा
रुडे ४९ अध्यायः ॥
अपि च । येऽर्थी धर्मेण तेषां सं-
ता येऽधर्मेणागतश्रियः । स
त्यशौचं मनःशौचं शौचमि
न्द्रियनिग्रहः । सर्वभूतदया
शौचं जलशौचं च पंचमं यस्य
सत्यं च शौचं च तस्य स्वर्गो न दु
र्लभः । सत्यं हि वचनं यस्य सो

ऽश्वमेधाद्विशिष्यते । इति गा
रुडे ११२ अध्यायः । अपि च ॥
न सा सभा यत्र न संति वृद्धा
वृद्धा न ये ते न वदंति धर्मं
नासौ धर्मो यत्र नो सत्यमस्ति
नो तत् सत्यं यच्छलेनानुवि
द्धं । ब्राह्मणोपि मनुष्याणामा
दित्यश्चैव तेजसां । शिरोपि स
र्वगात्राणां व्रतानां सत्यमुत्तमं
इति गारुडे ११५ अध्यायः ॥
ब्रह्म । यथा । यः सर्वज्ञः सर्व
वित् यस्य ज्ञानमयं तपः । त
वस्य वपुषी सर्वसोप्रानःयः
पृथिव्यांतिष्ठन् पृथिव्याअंत
रः सोऽकामयत बहुस्यां स क
र्त्ततत्तेजोऽसृजत् सत्यं ज्ञान
मनंतं ब्रह्म इत्याद्याः । इति श्री-
भागवतदशमस्कंधीय ८७ अ
ध्यायीयतृतीयश्लोकटीकायां
श्रीधरस्वामी । अपि च । अह
मात्मा परं ब्रह्म सत्यं ज्ञानमनं
तकं । विज्ञानमानंदो ब्रह्मस
तत्त्वमसि केवलं नित्यं शुद्धं बु
द्धं मुक्तं सत्यमानंद मद्वयं । यो
सावादित्ये पुरुषः सोसावह
मखंडितः । इति ध्यायन् विमु
च्येत ब्रह्मणो भवबंधनात् ।

इति गारुडे ४९ अध्यायः ।
सत्यं व प्रश्नः स्वीकारः । इ
ति शब्दरत्नावली ॥
सत्यः पुं श्रीरामः । यथा । कौ
शल्यानंदनः श्रीपुः सत्योदशास्य
घातकः । इति शब्दरत्नावली ।
विष्णुः । यथा । ॐ नमोऽप्यंतरे वि-
ष्णुः सत्यैः सह स्वयोनिभिः । स
त्यायां समभवत् सत्यः सत्यरूपो
जनार्दनः । इति कौर्म्मे ४८ अ
ध्यायः ॥ अन्यच्च । सत्यव्रतं
सत्यपरं त्रिसत्यं सत्यस्य योनिं
निहितं च सत्ये । सत्यस्य सत्
तसत्यनेत्रं सत्यात्मकं त्वां शर
णं प्रपन्नाः । इति श्रीभागव
ते १० स्कन्धे २ अध्यायः ॥
प्रतिष्ठितं सत्ये कृतं स्मिति दृ
ष्टाः प्रथमं सत्यत्वेन स्तुवंति
सत्यव्रतं मिति । सत्यं व्रतं
संकल्पो यस्य । सत्यपरं श्रे
ष्ठं प्राप्तिसाधनं यस्मिन् तं ।
त्रिसत्यं त्रिष्वपि कालेषु सृष्टेः
पूर्वं प्रलयानंतरं स्थितिसम
ये च सत्यं अव्यभिचारेण व
र्त्तमानं । तदेवाहुः । सत्यस्य
योनिमिति । सत्त्वहेतुन पृथि
व्यप् तेजांसि । स्वशब्देन वा

आकाशेन । एवं सत्त्वं यच्च स
त्ये भूतपंचकं । तेषां मिथ्या
चैतन्ये इति श्रुतेः । तस्य योनिं
कारणं अनेन सृष्टेः पूर्वं वर्त्त-
मानतोक्ता । तथा सत्ये त
स्मिन्नेव निहितं अंतर्यामितया
स्थितं अनेन स्थिति समयेऽस
त्यत्वमुक्तं । तथा सत्यस्य सत्य
तस्यैव सत्यस्य सत्यं पारमार्थि
कं नाशेपि अवशिष्यमाणं रू
पं अनेन प्रलयेऽप्यवधित्वेन
सत्यत्वं दर्शितं एवं त्रिसत्यत्व
मुपपादितं । तथा ऋतं सत्य
नेत्रं । ऋतं च सूनृता वाणी
सत्यं च समदर्शनं । तथा भग
वता व्याख्यायमानत्वात् स
त्यं च समदर्शन मिति ऋतं
च सूनृता वाणी कविभिः परि
कीर्त्तिता । इति तयोर्नेत्रं नयनं प्रा
पनं नेतारं प्रवर्त्तक मिति याव
त् । एवं सर्वप्रकारेण सत्यात्म
कं त्वां वयं शरणं प्रपन्ना इत्य
र्थः । इति श्रीधरस्वामी । असत्य
भिन्नः । इति राजनिर्घण्टः । ना
न्दीमुखश्राद्धदेवः । यथा । इष्टि
श्राद्धे क्रतुर्दक्षः सत्यो नान्दीमु
खे वसुः । नैमित्तिके काल

कामा कामेच पुरिलोचनौ
इति स्मृतत्वं ॥ तपोलोका
दूर्द्धलोकः । इति विश्वः ॥
पुरस्यविवरणं सत्यलोकश
ब्देद्रष्टव्यं ॥
सत्यंकः क्ली सत्यंकारः । इति
केचित् । सत्यं तदुक्ते त्रि स
त्यंकारः पुं अवश्यंपमर्पयितत्के
तव्यमितिसत्याकारणं । तत्
पर्य्यायः । सत्यापने २ सत्या
कृतिः ३ इत्यमरः । सत्यापना
४ इति गोपालितः ॥
सत्यंकारकृतः त्रि अवश्यंपमर्पै
तत्कैतव्यमिति सत्यं कृत्वा
यद्देयं । बायना इति भाषा ।
इति मिताक्षरा ॥
सत्यतपाः पुं मुनिविशेषः ।
स तु पुरा व्याध आसीत् तत
स्तपः कृत्वा दूर्वाससोवरेणवे
दादि सर्वशास्त्रज्ञो भूत्वा एत
न्नामा बभूव । यथा । तमृषि
शेषं व्याधेतु न्यपहूवलतांगते
उवाच वेदाः सांगा सेतिहास्य
पदक्रमाः । ब्रह्मविद्या पुराणा
नि प्रत्यक्षाणि भवंतु ते । एवं
स्मादाहरेतस्य दुर्वासा नामस्या
कवेत् । भवान् सत्यतपा नाम
ऋषि र्गाथा भविष्यसि । इति
वाराहे सत्यतप उपाख्यान
नामाध्यायः ॥
सत्यधृतिः पुं ऋषिविशेषः ।
यथा । सर्वहतस्तु दायादस्त्व
ल्पासेप्रसूयते । शतानंद ऋषि
श्रेष्ठं तस्यापि सुमहातपाः ॥
तस्य सत्यधृतिर्नाम मुनिर्वेद
स्य पारगः । इति मात्स्ये ४८
अध्यायः ॥
सत्यनारायणः पुं देवताविशे
षः । सत्यपीर इति भाषा ॥
तस्य व्रतकथा यथा । एकदा
मुनयः सर्वे सर्वलोकहिते र
ताः स्वरम्ये नैमिषारण्ये गोष्ठी
चक्रुर्मनोरमां । तत्रांतरे महाते
जा व्यासशिष्यो महायशाः ॥
सूतः शिष्यगणैर्युक्तः समाया
तो हरिं स्मरन् । तमायांतं स
मालोक्य सूतं शास्त्रार्थपारगं
नेमुः सर्वे समुत्थाय शौनकाद्या
स्तपोधनाः । सोपि तान् सह
साभ्येत्य मुनीन् परमवैष्णवा
न् । ननाम दण्डवद्भूमौ स
र्वधर्मविदांवरः ॥ वरासने
महाबुद्धि स्तैर्दत्ते मुनिपुंगवैः
उवास स सभा ॥

मध्ये सर्वैः शिष्यगणैर्वृतः ।
तत्रोपविष्टं तं सूतं शौनको मु
निसत्तमः । बद्धांजलि विमात्वा
च मुवाच विनयान्वितः । शौ
नकउवाच । महर्षे सूत सर्वज्ञ
कलिकाले समागते केनोपा
येन भगवन् हरिभक्तिर्भवेन्नृ
णां । कलौ सर्वे भविष्यंति पा
पकर्मपरायणाः । वेदविद्या
विहीनाश्च तेषां श्रेयः कथंभवे
त् । कलावन्नगतप्राणा लोकाः
स्वल्पायुषस्तथा । निर्धनाश्चभ
विष्यंति नानापीडाप्रपीडिताः
प्रयाससाध्ये सुकृते नग्रहेषु
येते द्विज । तस्मात् केपि करि
ष्यंति कलौ न सुकृतं जनाः स
कृतेषु विनष्टेषु प्रवृत्ते पापक
र्मणि स्वदेशाः प्रलये सर्वे ग
मिष्यंति दुराचाराः स्वल्पश्रमे
स्वल्पवित्ते स्वल्पकाले च सत्तम
यथा भवेन्महापुण्यं तथा कथ
य सूततः । यस्योपदेशतः पुण्य
पापं वा कुरुते जनः । सतङ्गामी
भवेन्मर्त्य इति शास्त्रेषु निश्चि
तं । पुण्योपदेशी सदयः केतवे
श्च विवर्जितः । पापायन विरो
धी च चत्वारः केशवोपमाः ज्ञाने
संप्राप्य संसारे यः परेभ्योन
यच्छति ज्ञानरूपी हरिस्तस्मै
प्रसन्नश्चवनेहृते । ज्ञानरत्नैश्च
रत्नैश्च परमं तोयकृन्नरः ॥
सत्येयः सुकृतिर्नृते नररूपध
रो हरिः । व्रतेन तपसा किंवा
प्राप्यते वांछितं फलं सर्वत
त् श्रोतुमिच्छामि कथयस्व म
हामते । त्वमेव मुनिशार्दूल वेद
वेदांगपारगः । त्वद्दते न हि वक्ता
न्यो यतस्त्वं व्यासशासितः ॥
सूतउवाच धन्योसि त्वं मुनिश्रे
ष्ठ त्वमेव वैष्णवाग्रणीः । यतः
समस्तलोकानां हितं वाञ्छसि
सर्वदा । शृणु शौनक वक्ष्या
मि यत्त्वया प्रष्टुमिष्यते । नार
देनैव पृष्टःसन् भगवान् कम
लापतिः । स्वर्षये यथैवाक्त
न्मे शृणुष्व समाहितः । एकदा ना
रदो योगी परानुग्रहकांक्षया ।
पर्यटन् विविधान् लोकान् म
र्त्यलोकमुपागमत् । तत्र दृष्ट्वा
जनाः सर्वे नानादुःखसमन्विताः
नानायोनि समुत्पन्नाः क्लिश्यं
ते पापकर्मभिः केनोपायेन
चैतेषां दुःखनाशो भवेद्ध्रुवं
इति संचिंत्य मनसा विष्णुलोकं

गतस्तदा । तत्र नारायणं दे
वं शुक्लवर्णं चतुर्भुजं ॥ शंख
चक्रधरं देवं वनमाला विभू
षितं । दृष्ट्वा तं देवदेवेशं स्तोतुं
समुपचक्रमे । नारद उवाच ॥
नमस्ते वाङ्मनोतीतरूपाया
नंतशक्तये । आदिमध्यांतही
नाय निर्गुणाय गुणात्मने ।
सर्वेषामादिभूताय भक्तानां
मार्तिनाशिने श्रुत्वा स्तोत्रं त
तो विष्णुर्नारदं प्रत्यभाषत ॥
श्रीभगवानुवाच । किमर्थमा
गतोसि त्वं किं ते मनसि वर्तते । क
थयस्व महाभाग तत्सर्वं कथ
यामि ते । नारद उवाच मर्त्यलो
के जनाः सर्वे नानाक्लेशसम
न्विताः । नानायोनिसमुत्पन्नाः
पच्यंते पापकर्मणा । तत्कथं
शमयेन्नाथ लघूपायेन तद्वद
श्रोतुमिच्छामि तत्सर्वं कृपा
स्ति यदि ते मयि । श्रीभगवा
नुवाच । साधु पृष्टं त्वया वत्सलो
कानुग्रहकाम्यया । यत्कृत्वा
मुच्यते मोहात् तत् शृणुष्व व
दामि ते । व्रतमस्ति महापुण्यं
स्वर्गे च भुवि दुर्लभं तव स्नेहान्म
या विप्र प्रकाशः क्रियतेऽधुना ।
सत्यनारायणस्यैतद्व्रतं सम्यग्वि
धानतः । कृत्वा सद्यः सुखं भु
क्त्वा परत्र मोक्षमालभेत् । तत्
श्रुत्वा भगवद्वाक्यं नारदः पुन
रब्रवीत् । किं फलं किं विधानं च
कृतं केनैतद्व्रतं । तत्सर्वं
विस्तराद्ब्रूहि कदा कार्यं हि त
द्व्रतं । श्रीभगवानुवाच । दुःख
शोकादिशमनं धनधान्यविव
र्द्धनं । सौभाग्यसंततिकरं सर्व
त्र विजयप्रदं । यस्मिन् कस्मि
न् दिने मर्त्यो भक्तिश्रद्धासम
न्वितः । सत्यनारायणं देवं य
जेच्चैव निशामुखे । बांधवैश्चै
व ब्राह्मणैश्च सहितो धर्मतत्परः
नैवेद्यं भक्तितो दद्यात् सपादभ
क्ष्यमुत्तमं । रंभाफलं घृतं क्षीरं
गोधूमस्य च चूर्णकं । अभावे
शालिचूर्णं वा शर्करां वा गु
डं तथा । सपादं सर्वभक्ष्याणि
एकीकृत्य निवेदयेत् । विप्राय
दक्षिणां दद्यात् कथां श्रुत्वा ज
नैः सह । ततश्च बंधुभिः सार्द्धं विप्रे
भ्यः प्रतिपादयेत् । प्रसादं भक्ष
येत् भक्त्या नृत्यगीतादिकं च
रेत् । ततस्तत्वा गृहं गच्छेत् स
त्यनारायणं स्मरन् एवं कृते


मनुष्याणां वांछासिद्धिर्भवेत्
ध्रुवं । विशेषतः कलियुगे लघो
पायोस्ति भूतले । कथामस्य प्र
वक्ष्यामि कृतं येन भवेद्द्विजः
कश्चित्काशीपुरे ग्रामे ह्यासीद्वि
प्रश्च निर्धनः । क्षुधा तृष्णाकु
लो भूत्वा सततं भ्रमते मही ॥
दुःखितं ब्राह्मणं दृष्ट्वा भगवा
न् ब्राह्मणप्रियः । वृद्धब्राह्म
णरूपः सन् पप्रच्छ द्विजमादरा
त् । किमर्थं भ्रमसे विप्र महीं
कृत्वा दुःखितः तत्सर्वं श्रो
तुमिच्छामि कथ्यतां यदि रोच
ते । विप्र उवाच । ब्राह्मणोऽति
दरिद्रोऽहं भिक्षार्थं भ्रमते मही ।
उपायं यदि जानासि कृपया क
थय प्रभो ॥ वृद्ध उवाच ॥
सत्यनारायणो देवो वांछितार्
थफलप्रदः । तस्य त्वं द्विजश्रे
ष्ठ कुरुष्व व्रतमुत्तमं । यत्
कृत्वा सर्वदुःखेभ्यो मुक्तो भव
ति मानवः । विधानं च व्रतस्या
स्य विप्रायाभाष्य यत्नतः ॥
सत्यनारायणो वृद्धस्तत्रैवांतर
धीयत । ततः प्रातः करिष्यामि
व्रतं मनसि चिंतयन् । इति सं
चिंत्य विप्रोऽसौ रात्रौ निद्रां
न चालभेत् । ततः प्रातः सम
त्थाय सत्यनारायणव्रतं । क
रिष्ये इति संकल्प्य भिक्षार्थम
गमद्द्विजः । तस्मिन्नेव दिने विप्रः
प्रचुरं प्राप्तवान्धनं । तेनैव बं
धुभिः सार्द्धं सत्यस्य व्रतमाचर
त् । सर्वदुःखविनिर्मुक्तः सर्व
संपत्समन्वितः । बभूव स हि
जश्रेष्ठो व्रतस्यास्य प्रभावतः
ततः प्रभृति कालं च मासि मा
सि व्रतं कृतं । सूत उवाच । एवं
नारायणस्येदं व्रतं कृत्वा द्वि
जोत्तमः । सर्वपापविनिर्मुक्तो
दुर्लभं मोक्षमाप्नुयात् । व्रत
च तं यथा विप्रः पृथिव्यां संच
रिष्यति । तदैव सर्वदुःखं हि न
राणां च विनश्यति । एवं नाराय
णेनोक्तं नारदाय महात्मने ।
मयापि कथितं विप्र किम
न्यत् कथयामि ते । इति श्रीस्क
न्दपुराणे रेवाखंडे सत्यनारा
यणविप्रसंवादो नाम १ अध्यायः
शौनक उवाच तस्माद्विप्रव्रतं
केन पृथिव्यां च रितं मुने । तत्
सर्वं श्रोतुमिच्छामि श्रद्धास्मा
कं प्रजायते । सूत उवाच ॥ शृ
णुध्वं मुनयः सर्वे तस्माद्येन

कृतेभुवि । एकदा स हि जवरो·
यथाविभवविस्तरैः । बंधुभिः स्व
जनैः सार्द्धं व्रतं कर्त्तुं समुद्यतः
एतस्मिन्नेवकाले तु काष्ठकेतुः
समागतः ॥ बहिः काष्ठञ्च सं
स्थाप्य विप्रस्य मंदिरं ययौ । तृ
ष्णया पीडितात्मा स विप्रं दृ·
ष्ट्वा तथाविधं । प्रणिपत्य द्वि
जश्रेष्ठं किमिदं क्रियते त्वया ।
कृते किं फलमाप्नोति विस्त
राद्वद मे प्रभो । विप्र उवाच ।
सत्यनारायणस्येदं व्रतं सर्वे·
प्सितप्रदं । दुःख शोकादि·
शमनं सर्वत्र विजयप्रदं । धना
दि संततिकरं सर्वेषां मोक्षि
तप्रदं । यस्य प्रसादात्सर्वं·
धन धान्यादिकं महत् ततस्त
स्य व्रतं ज्ञात्वा काष्ठकर्त्ताति
हर्षितः । पपौ जलं प्रसादं च
भुक्त्वा तन्नगरं ययौ । सत्यना
रायणं देवं चिन्तयन् स्थिर
मानसः । काष्ठं विक्रीय नगरे
प्राप्स्यते चाद्य यद्धनं । तेनैव
सत्यदेवस्य व्रतं मद्य करोम्य
हं । इति संचिन्त्य मनसा काष्ठं
कृत्वा तु मस्तके । जगाम नग
रे रम्ये धनिनो यत्र संस्थितिः

तद्दिने काष्ठमूल्यञ्च द्विगुणं प्रा
प्तवानसौ । ततः प्रसन्नहृदयः सु
पक्वकदलीफलं शर्कराञ्च घृ
तं दुग्धं गोधूमस्य च चूर्णकं ॥
प्रत्येकं तु सपादञ्च गृहीत्वा गृ
हमाययौ । ततो बंधून् समाहू
य चकार विधिना व्रतं तद्व्रतस्य
प्रसादेन धनपुत्रान्वितोऽभवत्
इह लोके सुखं भुक्त्वा चान्ते सत्य
पुरं ययौ । इति श्रीस्कंदपुरा
णे रेवाखंडे सत्यनारायणक
था विप्रकाष्ठकेतुसंवादो २
अध्यायः ॥ सूत उवाच ॥ पुन
रग्रे प्रवक्ष्यामि शृणुध्वं मुनि
सत्तमाः । आसीदुल्कामुखो ना
म नृपति दीलिनो वरः । जितेंद्रि
यः सत्यवादी ययौ देवालयं प्र
ति । दिने दिने धनं दत्वा द्विजान्
संतोषयेत् सुधीः । भार्या तस्य
प्रमुग्धा च सरोजवदना सती ।
सस्मितास्या शारदिंदु सकला
ञ्च विभ्रती । कांचीच विभ्रती
रूपा सा मालतीमाल्यभूषिता
भद्रशीला व्रतं सत्य सिन्धुती
रेऽकरोन्मुने ॥ एतस्मिन्नंतरे
तत्र साधुः कोपि समागतः ।
वाणिज्यार्थं बहुधनैरनाद्यैः

परिपूरितः नावं संस्थाप्य त
त्तीरे जगाम उत्तटं प्रति ॥
दृष्ट्वा तत्र व्रतं सम्यक् पप्रच्छ
विनयान्वितः । साधुरुवाच कि
मिदं कुरुषे राजन् भक्तियुक्तेन
चेतसा । प्रकाशं कुरु तत्सर्वं·
श्रोतुमिच्छामि संप्रति ॥ रा
जोवाच । पूजनं क्रियते साधो
विष्णोरतुलतेजसः । व्रतं च
स्वजनैः सार्द्धं पुत्राद्य प्राप्तये
मया । साधुरुवाच ततो नत्वा
राजानं मधुरं वचः । सर्वं कथ
य मे राजन् व्रतमेतत् करो·
म्यहं । ममापि संततिर्नास्ति
सत्यमेतत् तव व्रते । ततो नि
वृत्य वाणिज्यात् सानंदो गृह
मागतः । भार्यायै कथितं स·
र्वं व्रतञ्च संततिप्रदं । तदा व्रतं
करिष्यामि यदा मे संततिर्भवे
त् यत्किंचिद्दिवसे तस्य भार्या
लीलावती सती गर्भयुक्ता
नंदचित्ता भवद्धर्मपरायणा
पूर्णे गर्भे ततो जाता बालिका
चातिनिर्मला दिने दिने वर्द्धमा
ना शुक्लपक्षे यथा शशी ततो
वणिक् सुतायाश्च जातकर्मादि
कंचरन् कन्याकलावतीचेति
ना·

मकरणं कृते । ततो लीलावती
प्राह स्वामिनं मधुरं वचः । न क
थि किमर्थं वा पूरयञ्च प्रति·
श्रुतं विवाहसमयेऽप्यस्याः क
रिष्यामि व्रतं प्रिये । इति भा
र्यां समाश्वास्य जगाम नगरं प्र
ति । ततः कलावती कन्या वर्द्धि
ता पितृवेश्मनि दृष्ट्वा कन्यां त
तः साधुर्नगरे बंधुभिः सह ॥
मंत्रयित्वा द्रुतं दूतं प्रेषयित्वा
स धर्मवित् । विवाहार्थं च कन्या
या वरं श्रेष्ठं विचारयन् । तेनाज्ञ
प्तश्च दूतोऽसौ कांचनं नगरं य
यौ तस्मादेकं वणिक्पुत्रं स
मादायागतो हि सः । दृष्ट्वा तं
सुंदरं बालं वणिक्पुत्रं गुणा
न्वितं । ज्ञातिभिर्बंधुभिः सार्द्धं
परितुष्टेन चेतसा । दत्तवान्
साधुपुत्राय कन्यां विधिवि·
धानतः ततोऽभाग्यवशात्तेन वि
स्मृतं व्रतमुत्तमं । विवाहस
मयेऽप्यस्या तेन रुष्टोऽभवद्वि
भुः ततः कालेन कियता नि
जधर्मविशारदः । वाणिज्या
र्थं गतः शीघ्रं जामातासहितो
वणिक् रत्नसारपुरे रम्ये गत्वा
सिंधुसमीपतः । वाणिज्यं कुरु



ते साधु र्यामात्रा श्रीमता सह।
पुरीं निर्माय नगरे चंद्रकेतोर्नृ
पस्य च। एतस्मिन्नेवकाले तु स
त्यनारायणः प्रभुः। भ्रष्टप्रति
ज्ञमालोक्य शापं तस्मै प्रदत्तवा
न्। अद्यप्रभृति कालेच महदुः
खं भविष्यति। तस्मिन्नेव दि
ने चोरो धनमादाय तस्करः ते
नैव वर्त्मना यातः पृष्टदेशं वि
लोकयन्। ततः पश्चाद्धावका
न् दूतानदृष्ट्वा भीतेन चेतसा
धनं संस्थाप्य तत्रैव गतः शीघ्र
मलक्षितः। ततो दूताः समाया
ता यत्रास्ते सज्जनो वणिक्। दृ
ष्ट्वा नृपधनं तत्र बद्ध्वा तौ वणि
क्सुतौ। हर्षेण धावमानाश्च
जग्मुर्नृपसमीपतः। तस्करौ द्वौ
समानीतौ विलोक्याज्ञापय
प्रभो। नृपेणाज्ञप्तमादाय दृ
ढबद्धावुभौ स्थापितौ
द्वौ महादुर्गे कारागारे विचा
रयन्। सूत उवाच। मायया
सत्यदेवस्य न श्रुतं तत्र योर्व
चः। ततस्तयोर्धनं राज्ञा गृहीतं
चंद्रकेतुना। तच्छापाच्च ते
योर्गेहे भार्या चातिदुःखिताभवत्।
चोरेणापहृतं सर्वं गृहे यच्च

स्थितं धनं। आधिव्याधिसमा
युक्ता क्षुत्पिपासातिपीडिता
अन्नचिंतापराभूत्वा भ्रमते च गृ
हे गृहे। ततः कलावती कन्या
बभ्राम प्रतिवासरे एकस्मिन्
दिवसे रात्रौ क्षुधार्ता द्विजमं
दिरं। गत्वापश्यद्व्रतं तत्र सत्य
नारायणस्य सा उपविश्य क
थां श्रुत्वा वरं प्रार्थयती मुदा।
प्रसादं भक्षणं कृत्वा ययौ रात्रौ
गृहं प्रति। ततो लीलावती क
न्यां भर्त्सयामास तां भृशं।
पुत्रि रात्रौ स्थिता कुत्र किं ते
मनसि वर्तते। द्विजालये व्रतं
मातर्दृष्टं वांछितसिद्धिदं॥
तत् श्रुत्वा कन्यकावाक्यं व्र
तकर्तुं समुद्यता। सा मुदा सा व
णिक्साध्वी सत्यनारायणस्य
च। व्रतं चक्रे सैव साध्वी बंधुभिः
स्वजनैः सह। भर्तृजामातरौ
क्षिप्रमागच्छेतां स्वमाश्रमे
इति दैवं वरं याचे सत्यदेवं पुनः
पुनः। अपराधं च भर्तुर्मे जामा
तुः क्षंतुमर्हसि। व्रतेनानेन तुष्टो
ऽसौ सत्यनारायणः प्र
भुः। दर्शयामास स्वप्नं हि चं
द्रकेतुं नृपोत्तमं। बंदिनौ

मोचय प्रातर्वणिजौ नृपसत्तम
देयं धनं च तत्सर्वं विधिना द्वि
गुणीकृतं। नोचेत् त्वां नाश
यिष्यामि सराज्यधनपुत्रकं। ए
वमाभाष्य राजानं ध्यानगम्योऽभ
वत्प्रभुः। ततः प्रभातसमये रा
जा च स्वजनैः सह। उपविश्य
सभामध्ये प्राह स्वजनं प्रति
बद्धौ महाजनौ शीघ्रं मोचय
ध्वं वणिक्सुतौ। इति राज्ञो
वचः श्रुत्वा मोचयित्वा महा
जनौ। समानीय नृपस्याग्रे प्रो
चुश्च विनयान्विताः। आनीतौ
द्वौ वणिक्पुत्रौ मुक्तौ निगड
बंधनात्। ततो महाजनौ नत्वा
चंद्रकेतुं नृपोत्तमं। स्मृत्वा च
पूर्ववृत्तांतं विस्मयाद्भयविह्व
लौ। राजा वणिक्सुतौ वीक्ष्य
प्रोवाच सादरं वचः। देवात्
प्राप्तं महद्दुःखं इदानीं नास्ति
ते भयं। इदानीं सेव क्षौरं च
रकर्मादिकं चर ततो नृपव
स्त्रैः श्रीमान् स्वर्णरत्नविभूषणैः
अलंकृत्य वणिक्पुत्रौ वचसा
प्रीणयन्नृपः पुरानीतं च यद्द्रव्यं
द्विगुणीकृत्य दत्तवान्। प्रोवाच
तौ ततो राजा गच्छ साधो नि

जाश्रमे राजानं प्रणिपत्याह
गंतव्यं त्वत्प्रसादतः यात्रां कृ
त्वा ततः साधुर्मंगलाचारपू
र्विकां। ब्राह्मणेभ्यो धनं दत्त्वा
सहर्षो नगरं ययौ। कियद्दूरे ग
ते साधौ सत्यनारायणः प्रभुः
जिज्ञासां कृतवान् साधो किं
मस्ति तव नौस्थितं ततो महा
जनौ मत्तौ हेलया च प्रहस्य
च। कथं पृच्छसि भो दण्डिन् मु
द्रां किल लब्धुमिच्छसि। लताप
त्रादिकं चैव वर्तते तरणौ मम
निष्ठुरं च वचः श्रुत्वा सत्यं भव
तु ते वचः। एवमुक्त्वा गतः शी
घ्रं दंडी तस्य समीपतः। कियद्
दूरे ततो गत्वा स्थितः सिंधुसमी
पतः। गते दंडिनि साधुः कृत
नित्यक्रियस्तदा। उत्थितां
तरणीं दृष्ट्वा विस्मयं परमं य
यौ। लतापत्रादिकं दृष्ट्वा मूर्च्छि
तो न्यपतद्भुवि। लब्धसंज्ञो व
णिक्पुत्रस्ततश्चिंतापरोऽभ
वत्। तस्य तु दुहितुः कांतो वच
नं चेदमब्रवीत्। जामातोवाच
किमर्थं क्रियते शोकः शापो दत्त
श्च दंडिना। शक्यते तेन सर्वं हि
कर्तुं हर्तुं न संशयः। ततस्तच्छ

रणं यामो वाञ्छितार्थोऽभ
विष्यति जामातश्च वचः श्रु
त्वा तत्सकाशं गतस्तदा। दृष्ट्वा
च दंडिनं भक्त्या नत्वा प्रोवाच सा
दरं। त्वमस्य चापराधं मे यदुक्तं
तव सन्निधौ। मयाऽडराम्नना दे
व मुह्याः हं तव मायया॥
यदुक्तं तद्वचो नाथ्य हं क्षन्तुं
मर्हसि। यतः परकृताः सर्वे त्व
मसारे हि साधवः। पुनः पुनः
स्तितो नत्वा रुरोद शोकविह्व
लः॥ तमुवाच ततो दंडी विल
पंतं विलोक्य च मा रोदीः शृणु
मे वाक्यं मम पूजा पराङ्मुखः
मामवज्ञाय दुर्बुद्धे लब्धं दुःखं
मुहुर्मुहुः। ततः श्रुत्वा भगव
द्वाक्यं स्तुतिकर्तुं समुद्यतः सा
धुरुवाच। त्वन्मायामोहिताः
सर्वे ब्रह्माद्या त्रिदिवौकसः।
न जानंति गुणान् रूपं तवाश्चर्य
मिदं प्रभो मूढोऽहं त्वां कथं जा
ने मोहितस्तव मायया। प्रसी
द पूजयिष्यामि यथाविभववि
स्तरैः। पुरा वित्तं च मत्सर्वं पा
हि मां शरणागतं श्रुत्वा भक्ति
युतं वाक्यं परितुष्टो जनार्द
नः। वरं च वाञ्छितं दत्वा तत्रै
वांतरधीयत ततोऽसौ नावमारु
ह्य दृष्ट्वा रत्नादिपूरितां॥ कृप
या सत्यदेवस्य सफलं वाञ्छितं
मम। इत्युक्त्वा स्वजनैः सार्द्धं पू
जां कृत्वा यथाविधि॥ ह
र्षेण महता साधुः प्रयाणं चा
करोद्द्विजः। नावं संयोज्य वे
गेन स्वदेशमगमत्तदा। ततो
जामातरं प्राह पश्य पत्तनपुरीम
म। दूतं च प्रेरयामास निजवि
त्तस्य रक्षकं। ततोऽसौ नगरं ग
त्वा साधुभार्यां विलोक्य च।
उवाच वाञ्छितं वाक्यं नत्वा ब
द्धांजलिस्तदा। निकटे नगर
स्यैव जामात्रा सहितो वणिक्
आगतो बंधुवर्गैश्च वित्तेन बहुवि
धेन च। श्रुत्वा दूतमुखाद्वा
क्यं महाहर्षयुता सती सत्यपू
जां ततः कृत्वा प्रोवाच तनुजां
प्रति। व्रजामि शीघ्रं साधुं
साधुसंदर्शनाय च इति मातृ
वचः श्रुत्वा व्रतं कृत्वा समाप्य
च प्रसादं च परित्यज्य गता सा
च पतिं प्रति। तेन रुष्टः सत्यदेवो
भर्तारं तरणीं तथा। संहृत्य च
धनैः सार्द्धं जले तस्मिन् न्यमज्जय
त्। ततः कलावती कन्या न

लोक्य वणिजं पतिं। शोकेन म
हता तत्र रुदंती चापतद्भुवि। दृ
ष्ट्वा तथाविधां कन्यां नष्टां त
रणिं तरीं। भीतेन महता सा
धुः किमाश्चर्यमिदं महत्॥
विचिंत्यमाना श्च ते सर्वे बभूवुस्त
रिवाहकाः। ततो लीलावती
साध्वी दृष्ट्वा तद्विकला सती।
विललापातिदुःखेन भर्तारं चे
दमब्रवीत्। इदानीं नौकया सा
र्द्धं मम शेषः भूलक्षितं। न
जाने केन दैवेन हेलया वाप
हारितं। सत्यदेवस्य माहात्म्यं
किं ज्ञातुं नहि शक्यते। इत्यु
क्त्वा विललापाथ ततश्चाश्च स्व
जनैः सह॥ ततो लीलावती क
न्यां क्रोडे कृत्वा रुरोद च। ततः
कलावती कन्या नष्टे स्वामिनि
दुःखिता। गृहीत्वा पादुकां त
स्यानुगंतुं मनो दधे। कन्या
याश्चरितं दृष्ट्वा सभार्यः सज्ज
नो वणिक्। अतिशोकेन संत
प्तश्चिंतयामास धर्मवित्। हृतो
हि सत्यदेवेन जामाता सत्यमा
यया। सत्यपूजां करिष्यामि
यथाविभवविस्तरैः। इति सर्वा
न् समाहूय कथितं च मनोरथः
नत्वा च दंडवद्भूमौ सत्यदेवं पु
नः पुनः। ततस्तुष्टः सत्यदेवो
गगनान्निजं प्रति। जगाद व
चनं चेदं नैवेद्यमवमन्य च।
आगता स्वामिनं द्रष्टुं सुताः
हं शेषाः भवत् प्रभुः। गृहं गत्वा
प्रसादं च भुक्त्वा चायाति सा
पुनः। लब्धभर्त्री सुता साधो भ
विष्यति न संशयः ततश्च प्रा
णदे वाक्यं श्रुत्वा गगनमंड
लात्। क्षिप्रं तदा गृहं गत्वा प्रसा
दं प्रतिभुज्य च। अपश्यत्तत्र
रायास पतिं तां स्वजनैः सह॥
ततः कलावती तुष्टा जगाद
पितरं प्रति। चलितात गृहं या
हि विलंबं कुरुषे कथं ततः
श्रुत्वा कन्यका वाक्यं संतुष्टो
ऽभूद्वणिक्सुतः। पूजनं सत्य
देवस्य कृत्वा विधिविधानतः।
धनैर्बंधुगणैः सार्द्धं जगाम
निजमंदिरं। पौर्णमास्यां च सं
क्रांत्यां पूजां कृत्वा यथाविधि
इहलोके सुखं भुक्त्वा चांते स
त्यपुरं ययौ। इति श्रीस्कंद
पुराणे रेवाखंडे श्रीसत्यनारा
यणकथायां वणिक्साधुमो
क्षवर्णनो नाम ३ अध्यायः॥



सूतउवाच। अथचान्यत्प्रव
क्ष्यामिशृणुध्वंमुनिसत्तमाः
आसीदुल्काधुखोराजाप्रजापा
लनतत्परः प्रसादंसत्यदेवस्य
त्यक्त्वाऽदुःखमवाप्तः एकदा
सवनंगत्वाहत्वाचविविधान्मृ
गान् आगात्स्यवटमूलेचदृष्ट्वा
सत्यस्यपूजनं गोपाःकुर्वंति
संतुष्टाभक्तियुक्ताःसबांधवाः
राजादृष्ट्वापिदर्पेण नागतोन
ननामसः ततोगोपगणाःस
र्वेप्रसादं नृपसन्निधौ। संस्था
प्यपुनरागात्य भुक्ताःसर्वेय
थेप्सितं ततःप्रसादंसंत्यज्य
राजादुःखमवाप्तः। तस्यपु
त्रशतं नष्टंधनधान्यादिकंच
यत्। सत्यदेवेनतत्सर्वं नाशि
तंममनिश्चितं। अतस्तत्रैव
गच्छामियत्रदेवस्यपूजनं॥
मनसेतिविनिश्चित्यययौगो
पालसन्निधिं। ततोसौसत्य
देवस्य पूजांगोपगणैःसह।
भक्तिश्रद्धान्वितो भूत्वाच
कारविधिवन्नृपः। सत्यदेव
प्रसादेन धनपुत्रान्वितोऽभव
त्। इहलोकेसुखंभुक्त्वाचा
न्तेसत्यपुरंययौ॥ यइदंकु
रुते सत्यव्रतं परमदुर्लभं। शृ
णोति च कथां पुण्यां भक्तियु
क्तिफलप्रदां॥ धनधान्यादिकं
तस्यभवेत् सत्यप्रसादतः। दरि
द्रोलभते वित्तं बद्धो मुच्येतबं
धनात्। भीतोभयात्प्रमुच्येत
सत्य मेतन्नसंशयः ईप्सितंच
फलंभुक्त्वाचान्तेसत्यपुरंव्रजेत्
इति वःकथितंविप्राः सत्यना
रायणव्रतं। यत्कृत्वा सर्व
दुःखेभ्यो मुक्तो भवतिमानवः
विशेषतः कलियुगेसत्यपूजा
कथा फलं। सत्यनारायणं
केचित् सत्यदेवंतथापरे। ना
नारूपधरो भूत्वा सर्वेषा मीप्सि
तप्रदः। भविष्यतिकलौ सत्य
व्रतरूपी सनातनः॥ य इदंपठ
ते नित्यं शृणोतिमुनिसत्तमाः
तस्य नश्यंतिपापानिसत्यदेव
प्रसादतः। इतिश्रीस्कंदपुरा
णे रेवाखंडे सत्यनारायण
कथानाम ५ अध्यायः॥
इतिश्रीसत्यनारायणव्रतकथा
समाप्ता। कुचित्पुस्तकेअध्या
यमात्र नास्ति। कुचित्तु भवि
ष्यपुराणेइतिकृत्वा पुस्तकया
लिखिता। अथसत्यनारायण

पूजापद्धतिः। आदौ स्वस्ति
वाचन पूर्वकं संकल्पंकुर्या
त्। अद्येत्यादि अमुकतिथौअ
मुकगोत्र श्रीअमुकदेव
शर्म्माअमुककामः गणेशा
दि देवतापूजा पूर्वकश्रीस
त्यनारायणपूजनकथाश्रव
णमहंकरिष्ये ततःसंकल्पं पठे
त्। ततआसनशुद्ध्यादिकं कृ
त्वागणेशादिदेवतानवग्रह
दिक्पालान् पूजयेत् लक्ष्मी
सरस्वती आदिपुरुष अना
दिपुरुष श्रीराम लक्ष्मण
पूजां कृत्वा यव तिलैः स
त्यनारायण मावाहयेत्। प्र
णवव्याहृतीःसप्तुत्वाध्यभगव
न्सत्यनारायण इहागच्छइह
गच्छ इहतिष्ठ इहतिष्ठममपू
जां गृहाणइत्यादिना आवह्य
पुष्पंगृहीत्वाध्यायेत् ध्यायेत्स
त्यं गुणातीतं गुणत्रयसमन्वितं
लोकनाथं त्रिलोकेशं पीतांबर
धरं हरिं। इंदीवरदलश्यामं शं
खचक्रगदाधरं। नारायणं
चतुर्बाहुं श्रीवत्सपदभूषितं
गोविंदं गोकुलानंदं जगतः
पितरं गुरुं। इतिध्यात्वापतत्
पाद्यं सत्यनारायणायनमः।
अर्घ्ये मंत्रस्तु। व्यक्ताव्यक्त स्वरू
पाय हृषीकपतयेनमः। मया
निवेदितोभक्त्या अर्घ्योऽयंप्रति
गृह्यतां। एषोऽर्घ्यः श्रीसत्यना
रायणायनमः। पुष्पांजलिं
गृहीत्वा। नमस्ते विश्वरूपा
य शंखचक्रधरायच। पद्म
नाभायदेवाय हृषीकपतयेन
मः। नमोऽनंत स्वरूपायविष्
णवेसत्यभिभाषिणे नैवेद्यंगृही
त्वा। त्वदीयं वस्तु गोविन्द तु
भ्यमेवसमर्पितं। गृहाणसुमु
खोभूत्वा प्रसीदपुरुषोत्तम॥
ततो अंजलिं बद्ध्वा पठेत्।
अच्युतं पुंडरीकाक्षं नृसिंहं दै
त्यसूदनं। हृषीकेशं जगन्नाथं
वागीशं वरदायकं। गुणत्रयं
गुणातीतं गोविंदं गरुडध्वजं
जनार्दनं जनानंदं जानकीव
ल्लभं जये। प्रणमामि सदासत्
यनारायणमतःपरं॥ दुर्गमे
विषमेघोरे शत्रुभिः परिपीडि
ते। निविधापत्सु कष्टेषु त
थान्येष्वपि यत्नतः। नामान्ये
तानि संकीर्त्य ईप्सितंफल
माप्नुयात्। सत्यनारायणंदे
वं वंदेहं कामदं शुभं॥

लीलया चततं विश्वं येन तस्मै नमो नमः । ततो दक्षिणान्दद्यात् । अच्छिद्रावधारणं कुर्य्यात् । इति सत्यनारायणपूजापद्धतिः ॥

सत्यपुरं क्ली विष्णुलोकः । यथा । अर्पितं च फलेषु क्वाचान्ते सत्यपुरं व्रजेत् । इति वः कथितं विप्राः सत्यनारायणव्रते ॥ इति स्कन्दपुराणीयसत्यनारायणव्रतकथा ॥

सत्यफलः पुं बिल्ववृक्षः । इति राजनिर्घण्टः ॥

सत्यभामा स्त्री कृष्णपत्नीभेदः इति शब्दरत्नावली । सा च श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषः । यथा अष्टौ महिष्यस्तस्य सर्व्वा रुक्मिण्याद्या महात्मनः रुक्मिणी सत्यभामा च कालिन्दी च शुचिस्मिता मित्रविन्दा जाम्बवती नाग्नजिती सुलक्षणा सुशीला नाम तस्यैता महिष्यो ह्यष्टमाः स्मृताः इति पाद्मे उत्तरखण्डे ९९ अध्यायः ॥

सत्यभारतः पुं वेदव्यासः ॥ इति त्रिकाण्डशेषः ॥

सत्ययुगं क्ली चतुर्युगानां प्रथमयुगं । यथा । कृतं सत्ययुगं त्रेताग्नायी द्वापरं । यज्ञियो । कलिर्कर्करकः कर्मयुगं पापे तु पातकं । इति त्रिकाण्डशेषः तस्य कृत नाम कारणं यथा तद्रूपापि कृतः कालो ब्रह्मणो जन्म मृत्युकृत् । शतसंवत्सरे ब्रह्मा लयं प्राप्नोति हि त्वयि । लयान्ते त्वन्नाभिमध्यादुत्थितः सृजति प्रभुः । ततः कृतयुगान्तेऽहं काले स्वल्पे पालके । कृतकृत्याः प्रजा यत्र तन्नाम्ना सोऽकृतं विदुः ॥ इति कल्किपुराणे १९ अध्यायः । तद्धर्म्मा यथा । धर्म्मश्चतुष्पादभवत् कृते हि जगतां त्रये । देवा यथोक्तफलदाश्च देति भुवि सर्व्वतः । सर्व्वशस्या वसुमती हृष्टपुष्टजनावृता शाठ्यचौर्य्यानृतैर्हीना आधिव्याधिविवर्जिता विप्रा वेदविदः सुमङ्गलयुता नार्य्यश्च व्रताचारैः पूजाहोमपराः पतिव्रतपरा यागोद्यताः क्षत्रियाः । वैश्या वस्तुषु धर्म्मतो विनिमयैः श्रीविष्णुपूजापराः

शूद्राश्च द्विजसेवनाद्धरिकथालापाः सपर्य्यापराः ॥ इति कल्किपुराणे ३४ अध्यायः ॥ तद्युगमानं यथा । चत्वारि त्रीणि द्वे चैकं कृतादिषु यथाक्रमं । संख्यातानि सहस्राणि द्विगुणानि शतानि च । इति श्रीभागवते १२ स्कन्धे ५ अध्याये २ श्लोकटीकायां श्रीधरस्वामी ॥

सत्ययौवनः पुं विद्याधरः ॥ इति जटाधरः ॥

सत्यरतः पुं सत्यव्रतराजपुत्रः यथा । त्रिधन्वनः सुतो जातस्त्रय्यारुण इति स्मृतः तस्य सत्यव्रतो नाम तस्मात् सत्यरतः स्मृतः । तस्य पुत्रो हरिश्चन्द्रो हरिश्चन्द्राच्च रोहितः ॥ इति मात्स्ये १२ अध्यायः ॥

सत्यलोकः पुं सप्तलोकान्तर्गतलोकविशेषः । यथा । षड्गुणेन तपोलोकात् सत्यलोको विराजते । अपुनर्मारकायत्र ब्रह्मलोको हि संस्मृतः ॥ इति विष्णुपुराणे २ अंशे ७ अध्यायः । जनलोकापेक्षयैव षड्गुणेन द्वादशकोट्युच्छ्रायेण तपोलोकान्तरं सत्यलोकः न तु तपोलोकात् षड्गुणेनेति मन्तव्यं । तथा सत्यस्य चत्वारिंशत्कोट्युच्छ्रायत्वेन ब्रह्माण्डे तस्यावकाशाभावात् । सूर्य्याण्डगोलयोरन्तः कोट्यः स्युः पंचविंशतिरितिशुकेः । सत्यलोक एवकल्पाभेदेन ब्रह्मधिष्ण्यात् परं वैकुण्ठलोकादि ज्ञेयं । एवंच भूतलाद्ध्वं पंचदशलक्षाधराश्चयोविंशतिः कोट्यो भवन्ति । सत्यलोकाद्ध्वंच पंचदशलक्षोनकोटिद्वयादण्डकटाह इति ज्ञेयं । अपुनर्मारकाः पुनर्मारशून्याः । इति तट्टीका ॥

सत्यवचाः [स्] पुं ऋषिः । इत्यमरः सत्यवादिनि त्रि ॥

सत्यवती स्त्री व्यासमाता । तत्पर्य्यायः । काली २ योजनगन्धा ३ गन्धकाली ४ झषोदरी ५ व्यासमाता ६ सत्या ७ चित्राङ्गदसूः ८ विचित्रवीर्य्यसूः ९ कन्या १० दासेयी ११ दासनन्दिनी १२ इति शब्दरत्नावली । नारदपत्नी । ऋचीकमुनिपत्नी । इति मेदिनी सत्यविशिष्टे त्रि ॥

ऋचीकपत्न्याः प्रमाणान्तरं यथा

ब्रह्मपुत्रो भृगुर्नाम ऋचीकस्त
स्य सुतोऽभवत् । सभार्य्यार्थी चर
न्भूमौ कान्यकुब्जं गतः पुरा ।
ददर्श चारुसर्वाङ्गीं जह्नोर्वं
शसमुद्भवां कुशिकस्य सुते गा
धिनृपस्य नृपसत्तमं अरण्यस्थ
स्य तस्याथ पुत्रकामस्य भूभृतः
सभार्य्यस्य सुता जज्ञे देवकन्या
समा गुणैः । ऋचीको भृगुपुत्र
स्तां भार्य्यार्थे समयाचत गाधिं
नृपतिशार्दूलं स चोवाच नृपो
मुनिं । एकतः श्यामकर्णानाम
श्वानां चन्द्रवर्चसां । सहस्रमेकं
यो दद्यान्मह्यं पुत्री प्रदीयते ॥
ऋचीक उवाच दास्याम्यश्व
सहस्रं तव राजेन्द्र यथाविधि कं
चित्कालं प्रतीक्षस्व यावदह
मानये । गङ्गाजलात्तु स्थितेनतु द
त्तं सम्यक् प्रचेतसा आदायाश्व
सहस्रं स तु निर्गायिमयाश्वयु
त् तानश्वान् गाधिराजाय पुत्रीं
सत्यवतीं लेभे । ऋचीकाय द
दौ लक्ष्मीं केशवायेव सागरः ।
ऋचीकोऽपि गाधितनयां लब्ध्वा
भार्य्यामनिन्दितां मुदितः सत्यया
रेमे यथाकामं स्वकाश्रमे । क
दाचं सुते कृत्वा दृष्टे पुत्रे
स्वके भृगुः अथ जगाम मतिः
मान् स्नुषां दृष्टुं ननान्द च ॥
दम्पती तं समासीनं भृगुं देव
गणार्च्चितं । पूजयित्वा समासी
नं तस्थतुः सैवा कृताञ्जली । ततो
भृगुः स्नुषां स्वीयां सुप्रीतस्तद
मब्रवीत् वरं वृणीष्व दास्यामि
वाञ्छितं वरवर्णिनि । प्रदेयं
करे वापि पुत्रे ते वर्त्तते स्पृहा ।
ततः सत्यवती पुत्रं तपआम्नाय-
पारगं । मातुश्च वीरमतुलपु
त्रं वरमयाचत । स चैवमस्त्विति
तत्रैव भूत्वा ध्यानपरः स्थिरः ॥
विसृष्टावर्त्यमनसा यत्नात्
श्वाससमङ्कुसः तस्य निःश्वास
वातात्तु निःसृतेवै चरुद्वयं । तस्मि
तत् क्षितये दत्वा भृगुस्तामिदम
ब्रवीत् चरुद्वयं गृहाणत्वं स्नुषे
सत्यवति स्वयं स्नात्वा ऋतौ स
ते माता तदात्वं च कृतक्रियः ।
आलिङ्ग्याश्वत्थवृक्षं तु माता पु
त्रवती वै चरुमारक्तकं चेमं
साभोक्ष्यति सुतस्ततः त्वं चोदु
म्बरवृक्षं तत्समालिङ्ग्य क्षिप्ते चरुं
भक्षये तेन पुत्रस्ते भविष्यतीति स
नातनः एवमुक्त्वा भृगुर्यातो
यथेच्छं सापि संमुदे ॥

अवापमात्रा सहिता भर्त्तापि
शचभाविनी । अथ स्नानदिने
ऽश्वत्थमालिङ्गयारक्तकं चरुं । अ
घात् सत्यवती तस्या माता फ
लं सिते चरुं । परिवर्त्तेन तु ते
ज्ञात्वा दिव्यज्ञानो भृगुर्मुनिः ॥
अथागमत् स्नुषां तां तु वचनं चे
दमब्रवीत् विपर्य्ययं त्वया भ
द्रे कृतालिङ्गनकर्मणि । तथा च
रुप्राशने च तद्देवे भविष्यति
ब्राह्मणः क्षत्रियाचारस्तव पुत्रो
भविष्यति । क्षत्रियो ब्राह्मणा
चारो मातुस्ते भविता सुतः । इ
त्युक्ता भृगुणा साध्वी तदा सत्यव
ती भृगुं । पुनः प्रसादयामास पौ
त्रो मे ह्स्त्विति तादृशः ॥
एवमस्त्विति प्रोक्ता स तत्रैवां
तर्द्दधे भृगुः अथ काले सुते तदी
मे जमदग्निञ्च गाधिजा । सु
षुवे जननी तस्या विश्वामित्रं
तपोधनं । जमदग्निस्ततो वेदा
न् चतुरः प्राप सार्थकं । प्रा
दुरासंश्चतुर्वेदः स्वयं तस्मिन्
महात्मनि । विश्वामित्रोऽपि सक
लान् वेदानपि तथाचिरात् ।
धनुर्वेदं तथा कृत्स्नं विप्र श्री
भृगुपोधनः । जातस्त्वमानस्ते
जस्वी जमदग्निर्महातपाः वे
दैस्तपोभिः सम्भूतो नत्यक्षामश्च
स्त्र्यभवत् । इति श्रीकालिका
पुराणे जामदग्न्योपाख्याने ८४
अध्यायः ॥
सत्यवतीसुतः, पुं व्यासः । इति
शब्दरत्नावली ॥
सत्यवाक्, [च] पुं ऋषिः । इति श
ब्दरत्नावली । काकः । इति त्रि
काण्डशेषः ॥ सत्यवादिनि त्रि ॥
सत्यवादी, [न्] त्रि यथार्थवक्ता । तत्
पर्य्यायः । सत्योद्यः २ इति श
ब्दमाला ॥
सत्यवान्, [त्] पुं राजविशेषः । स च
सावित्रीपतिः । इति मेदिनी ।
सत्यवति त्रि ॥
सत्यव्रतः त्रि सत्यवादी । इति
केचित् ॥
सत्यव्रतः त्रि त्रेतायुगे सूर्य्य
वंशीयपञ्चविंशराजः । यथा ।
त्रिधन्वनः सुतो जातस्त्रय्यारु
ण इति स्मृतः । तस्य सत्यव्रतो ना
म तस्मात् सत्यव्रतः स्मृतः ॥
इति मात्स्ये १२ अध्यायः ॥
स च त्रिशङ्कुराजः । यथा त्रिध
न्वनस्त्रय्यारुणः त्रय्यारुणात् स
त्यव्रतः योऽसौ त्रिशङ्कुसंज्ञाम·

वापचाण्डालतामुपगतस्तु ॥
द्वादशवार्षिक्या सत्यावृष्ट्यावि
श्वामित्रस्य कलत्रापत्यपोष-
णार्थं चाण्डालपरिग्रह परिहर
णार्थंच जाह्नवीतीरे न्यग्रोधे
मृगमांसं सत्यहिंनेवेदय परि
तोषितश्च विश्वामित्रेणास्य शरीरं
स्वर्गे आरोपितः । त्रिशंकोर्ह
रिश्चन्द्रः इति विष्णुपुराणे । ४
अंशे ३ अध्यायः ॥
सत्यसंकाशः त्रि सत्यसन्निभः
इति केचित् ॥
सत्यसंगरः पुं कुवेरः । इति
त्रिकाण्डशेषः । अन्यायवर्हि
तप्रतिज्ञश्च ॥
सत्यसन्धः । पुं रामानुजभरतः
जनमेजयः । इति शब्दरत्नाव-
ली । श्रीरामचन्द्रः यथा राजेन्द्र
सत्यसंधे दशरथतनये प्रणाम
ले शान्तमूर्तिं वेदे लोकाभिरा
मे रघुकुलतिलके राघवे राव
णारिः । इति महानाटके । १
श्लोकः । सत्यप्रतिज्ञे त्रि ॥
सत्यसंधा स्त्री द्रौपदी । इति
शब्दरत्नावली ॥
सत्या स्त्री सीता । सा च राम-
पत्नी । सत्यवती । सा तु व्यास-

माता । इति शब्दरत्नावली ॥
दुर्गा ॥ इति ब्रह्मवैवर्ते प्रकृ
तिखण्डः ॥
सत्याकृतिः स्त्री अवश्यं मयै
तत्कर्तव्य मिति सत्यकरणं
तत्पर्यायः ॥ सत्यकारः २
सत्यापनं ३ इत्यमरः ॥
सत्याग्निः पुं अगस्त्यमुनिः ॥
इति शब्दरत्नावली ॥
सत्यानृते क्ली वाणिज्यं । इत्य
मरः किंचित्सत्यं किंचिदसत्य
सत्यसहितमनृतं वा यत्र ॥
इति भरतः ॥
सत्यापनं क्ली सत्याकृतिः ॥
इत्यमरः ॥
सत्यापना स्त्री सत्याकृतिः इ
त्यमरटीकायां वोपालितः ॥
सत्योद्यः त्रि सत्यवादी । इति
शब्दमाला ॥
सत्र त ङ क संबंधे । सत्रतै
इति कविकल्पद्रुमः । दंत्यव
र्गाद्युपधः । सत्रति निर्वाह
क्रियेतिसहमल्लः । ङ सत्रयते
सन्ज्ञापयते प्रतिज्ञां साधुः सं
तनोति विस्तारयतीति गोविंद
भट्टः । इति दुर्गादासः ॥
सत्रं क्ली यज्ञविशेषः । यथा

नैमिषे निमिषक्षेत्रे ऋषयः
शौनकादयः । सत्रं स्वर्गाय
लोकाय सहस्रसम मासत
कलिमागतमाज्ञाय क्षेत्रेऽस्मि
न्वैष्णवे वयं आसीना दीर्घ
सत्रेण कथायां सक्षणा हरेः
इति श्रीभागवते १ स्कन्धे १
अध्यायः ॥
सत्राजित् पुं राजविशेषः । स च
श्रीकृष्णश्वशुरः । सत्यभामापि
ता । परे शशिध्वजराजस्त्रवभू
व । इति कल्किपुराणे २० अध्या
यः । सत्रिजातकं क्ली मांसव्य
जनविशेषः । यथा । मांसं बहुच्छ
तैर्भृष्टं सिक्तं चोष्णोदकाकुः
जीरकाद्यैः समायुक्तं परिभृष्टं
तदुच्यते । तदेव शूलतकाप्यं
प्रदिग्धं सत्रिजातकं । इति
शब्दचन्द्रिका ॥
सत्वं क्ली गुणविशेषः । इत्य
मरः । अस्य विवरणं त्रितका
र सत्वशब्दे द्रष्टव्यं ॥
सत्वरं क्ली शीघ्रं । सह त्वरया
वर्तते सत्वरं । तद्वति त्रि ॥
इत्यमरभरतौ ॥
सत्सारः पुं हलविशेषः चित्र-
करः कविः । इति केचित् ॥

उत्तमसारयुक्तोऽपि ।
सधुत्कारे क्ली अन्नकृते इति
हेमचन्द्रः । धुत्कारेण सह व
र्तमानत्र ॥
सदंशकः पुं कर्कटः । इति राज
निर्घण्टः । दंशयुक्तोऽपि । सदंश
वदनः पुं कंकपक्षी । इति रा
जनिर्घण्टः ॥
सदंजनं क्ली कुसुमांजनं । य
था । रीतिपुष्पं पुष्पकेतु पौष्प-
कं कुसुमाञ्जनं सदञ्जनञ्च चाक्षु
ष्यं मालिकं धातुमाक्षिकं ॥
इति शब्दचन्द्रिका ॥
सदनं क्ली गृहं । इत्यमरः ॥
जलं । इति मेदिनी ॥
सदः स्त्री क्ली सभा । इत्यमरः
सदस्य पुं विधिदर्शी इत्यमरः
न्यूनातिरिक्तता विपर्यासञ्च
परिहर्तुं विधिं वेदोक्तयज्ञकि
याकलापं द्रष्टुं शीलं येषां ते
सदस्याः । सदसि साधवः का
वका इति विकारसंज्ञोत्पादिना
यः । इति भरतः ॥
तस्य नामान्तरं प्रश्नवक्ता ॥
यथा एकः कर्मान्नियुक्तः स्यात्
द्वितीय स्तेत्रधारकः तृतीयः
प्रश्नके कृत्यान्तः कर्मसमाप्त

रेत्। कर्म्मनियुक्तः आचार्य्यः। सच ब्रह्मा गके होमकर्म्मणि ब्रह्मा। स्वयं होमाकरणे होतापि स्वयं प्रधानकर्म्माकरणे प्रतिनिधिरपि तेन धारकः पुस्तकधारकः। प्रश्नद्रष्टा सदस्यः इति संस्कारतत्त्वं। सभ्यः॥ यथा। सभ्याः सदस्याः पार्षद्याः सभास्तारा: सभासदः। सामाजिका इत्यादि हेमचन्द्रः॥

सदा व्य सर्व्वकाले सर्व्वदा। इत्यमरः। परोपकारनियतः। सदाभवमहाजन॥ इति विष्णुपुराणं॥

सदागतिः पुं वायुः। इत्यमरः सूर्य्यः। निर्व्वाणं। सदीश्वरः। इति मेदिनी॥

सदाचारः पुं साधूनामाचरणं। तल्लक्षणादि यथा। सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरं तद्देवनिर्म्मितं देशं ब्रह्मावर्त्तं प्रचक्षते। तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः॥ वर्णानां सान्तरालानां सदाचारः स उच्यते॥ इति मनुः अ २। और्व्व उवाच। सदाचारेषु राजेन्द्र विशेषान्॥ शृणुष्व संप्रति यानवश्यं त्वयाऽध्यानाम्नातः सकलान् शृणु। साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः तेषामाचरणं यत्तु सदाचारः स उच्यते। आगमेषु पुराणेषु संहितासु यथोदितान् समुद्दिश्य सदाचारांस्तान् शृण्वीयाद्गृहस्थवत्। ऋषीन् यज्ञैर्वेदपाठैर्देवान् होमैस्तु पूजयेत्॥ श्राद्धैः पितॄन् यजेदन्नैर्भूतानि बलिभिस्तथा॥ मेघे प्रसादने स्नाने दन्तधावनभोजने। सर्व्वं गृहस्थवत् कुर्य्यात् निषेकाद्यं विधिं तथा॥ षट्कर्म्मसु नियुञ्जीत राजा विप्रान् समन्ततः तेष्वेव क्षत्रियादीन्नित्ये स्वे कर्म्मणि योजयेत्। यः स्वधर्म्मं परित्यज्य परधर्म्मं समाचरेत्। तं शासनेन स्वपदं द्यः पुनस्तस्मिन्नियोजयेत्॥ सोऽवन्त्येषु कर्म्मेषु विशेषात्तान्समाचरेत्। श्रवणपाणिवो राजन् विशेषांस्तु शृणुष्व मे॥ शरत्काले महाष्टम्यां दुर्गायाः परिपूजने नीराजनं दशम्यान्तु कुर्य्याद्वै बलवृद्धये॥ पौषमासि तृतीयायां कुर्य्यात्।

प्रथमाभिषेचने। पूजयित्वा श्रियं देवीं श्रीपञ्चम्यां नृपश्चरेत्। श्रीयज्ञं यत्न आत्मनः वृद्धये नृपसत्तमः ज्येष्ठे दशहरायान्तु विस्मारिष्टिं समाचरेत्॥ रवौ हरिस्ये हादश्यां शाक्रपूजां समाचरेत्। विशेषेणैतान्तु नृपतिः कुर्य्यात् सर्व्ववृद्धये। एभिः कृतैर्बलं राज्यं कोषश्चापि विवर्द्धते। अकृतेष्वेषु यज्ञेषु दुर्भिक्षं मरकं तथा। जायते च नृपस्तस्मादेषु यज्ञं समाचरेत्। शरत्काले महाष्टम्यां दुर्गायाः पूजने विधिः। पुराप्रोक्तस्तु विधिना तेन कार्य्यस्तु पूजने। इति कालिकापुराणे ८८ अध्यायः। अपिच सदाचारे विशेषं यं कथितस्तव पार्थिव निबोधैव विशेषांस्तु शृणुष्व ये नप्रियेष्यते। असंपूज्य तथा विप्रान् शिवामग्निपुरन्दरं। अदत्वाच तथा दानं न भुञ्जीयान्नृपः क्वचित्। श्रावयेदग्निहोत्रन्तु नित्यमेव पुरोहितैः गृह्यता चाग्निहोत्रं भुञ्जानो रकमानुयात् नास्तिके गृहे राजाऽवन्नेहि परिवर्ज्जिते। स्वपेत् तथा स्त्रिया सार्द्धं न कदाचन संविशेत्। भुक्त्वान्नं श्रीफलं नाद्यात्तथा श्रीफलेन्नृपः बुद्धिक्षय करान्नाम यथा मसवर्त्तिकाः निम्बाटरूषहन्ताश्च बुद्धिवृद्धिकरा नताः। बुद्धिहा बुद्धिहरास्त्रिंसा जेत्राजा च भोजने। भोजयेदन्वहं बुद्धिवृद्धिहेतुर्नृपोत्तमः नवर्य्याय विहीनं तु मावरोहेदासनं नृपः नयानेन गजानश्च मारोहेद्धीन ब्राह्मणे। नैकस्तु विचरेद्राजा कदाचिदपि निर्ज्जने। मद्देहेन्तु न भुञ्जीयात् कदाचिदपि भोजने। कदापि नोपसेवेत दृष्टम्भा मांसमेथुने॥ शुभस्नानेन गायाश्च हे तिलैस्तर्पणमेवच। न जीवत्पितृको भूपः कुर्य्यात्कुत्राद्यमानुयात्। नक्तेऽरुणादीस्तनयान् राजा राज्येऽभिषेचयेत्। पितॄणां श्राद्धयोग्यस्तमौरसेन तनयाः स्मृताः औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च। गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे। कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा। स्वयंदत्तश्च पोष्यश्च षडिमेऽपङ्क्तपा

शूलाः। अभावे सर्वपुत्रेषु तेषांप
रान् समभिषेचयेत्। पौनर्भ
वे स्वये दत्ते दासे राज्येन यो
जयेत्। दत्ताद्यास्त्वपि तनया
निजगोत्रेण संस्थिताः। आ
यान्ति पुत्रतां सम्यगन्यबीजस
मुद्भवाः। पितृगोत्रेण यः पुत्रः
संस्कृतः पृथिवीपते। आचू
डान्तं न पुत्रः स पुत्रतां याति
चान्यतः। चूडाद्या यदि सं
स्कारा निजगोत्रेण वै कृताः
दत्ताद्यास्तनयास्ते स्युरन्यथा
दास उच्यते। ऊर्द्ध्वं तु पंचमाद्व
र्षान्नदत्ताद्याः सुता नृप॥
गृहीत्वा पंचवर्षीयं पुत्रेष्टिं प्र
थमं चरेत्। पौनर्भवं तु तनयं
जातमात्रं समानयेत्। कृत्वा
पौनर्भवं स्तोमं जातमात्रस्य
तस्य वै। सर्वान् कुर्यात् संस्का
रान् जातकर्मादिकान्नरः।
कृते पुनर्भवस्तोमे सुतः पौ
नर्भवस्तथा। एकादिष्टेऽपि
तु कुर्यात्तु श्राद्धं पार्वण
दिकं(?)। क्रीताद्या वनितास्तु
लोः सा दासीति निगद्यते॥
तस्यां यो जायते पुत्रो दासः
पुत्रस्तु स स्मृतः न राज्यो यो(?)

राज्यभाक् स स्याद्विपुलानपि
आहृतान्। प्रथमः सर्वपुत्रेभ्य
स्तेन तस्मात् परिवर्जयेत्। पुराण
धर्मशास्त्राणि संहिताश्च मुनी
रिता। नाध्यापयेन्नृपः शूद्रैर्वि
हितान्यत् यदृच्छया। यस्मा
ज्ज्येष्ठः सदा शूद्रः पुराणं संहितां
तथा। पठति स्वात्महीनाशो
राज्ञा बाह्मणसान्वयः(?)। मोहाद्वा
कामतः शूद्रः पुराणं संहितास्म
ति पठन्नरकमाप्नोति पितृभिः
सह पापकृत्। शूद्रो मन्त्रादि
हितयज्ञयज्ञमत्र उदाहृतः॥
तद्वत्यं विप्रवदनाच्छ्रुत्वा शूद्रैः
सदैव हि न योजयेन्नृपः शूद्र
मवहासस्य दर्शने। नियोज्य
तत्र तं भूप नाभिषेत्तं(?) तेनपद्य
ते। हीनाश्रमस्य भवेल्लोकोऽशा
ज्ञा चापि सहान्वयः। कोने
ष्वेव मंचपुत्रं वानभिज्ञ मति
तेऽस्थिरं न कुर्त्तं व्यापितं वापि
त्वपः कुर्यात् उरोहितं। कृप
णस्य पतने राजा न शक्नुयात्
कदाचन नहि जानं तथा दया
हनानि विपुलान्यपि नारोह
त् कामुकोन्मत्तं राजे राज्याक
दाचन। आरुह्य कामुकं तत्र

परत्रेह विषीदति अनायुष्यं
न कुर्यात्तु कर्म भूपः कदाच
न। सततं आयुषो वृद्ध्यै यतेत
सकलैर्बलैः नक्षत्रवारतिथ्यु
ष्णं नष्टमासपक्षमः(?)। अञ्ज
नाभ्यञ्जने कुर्यात्तदावल्लस्यापि(?)
भोजनं। प्रतिसूत्रं तथा पूर्णे
ग्रहणे चन्द्रसूर्ययोः। नालो
कयेत् स्वयं राजा वक्रं सूर्यं न
चैव च। उत्पाते जायते यत्नादि
व्यं भौमं च नाभसं। नेत्रेण यत्ना
न्नृपतिं दृष्ट्वा नाशयेत्। अहं पुनः
सर्वदा मंगले वस्तु धारयेत्
सह हर्षया। अवस्थाच्छादि
ते राज्ञे न विशेभ्यः प्रदर्शये
त्। नेत्रे येस्वस्तु स्वपरेणत्वा(?)
द्यान्मोसानि यत्नेस्व। नारोहे
त्तरवरं चोध्वं नवा सीमायिपु(?)
र्वितो। परेण न यस्तु ना राजा च
त्वेन विवर्द्धयन्। आत्मानं स
तत रक्षेत् सदा वीर्यं विवर्द्ध
येत्। बीजक्षयकरं नित्यं भ
संभोजनं च पानकं। वर्जये
त्तावत् पाकाद्यानन्यत्र वक्र
निश्चके। कोष्ठ गृहजनं वरा
श्लोनाये पानेष्व वर्द्धनं सुरह
ढिकरं बीजक्षयकारि विवर्ज

येत्। नाम्नायः स्वर्णसीसानां धा
मस्य फलं चर्मणा शुक्रवृद्धि
करं तोये तदुपासीत यत्नतः
सर्वमुक्तेषु कृत्येषु सदाचारेषु
गुप्तितः भक्त्येह विविधान् भो
गानेऽहं स्थाने व्रजेत् परे॥
श्रीमार्कण्डेय उवाच। एवमाचा
रसर्गं राजा भाष्य मुनिपुंगवः
शास्त्राणि चैव सर्वाणि सदाचा
रानसुगृह्यकान् वक्रशः कथया
मास समगरायमहात्मने। तत्रा
त्रियत पृथ्वी वैरा कथितेऽस्मा
यन राजनीतिः सतां नीतिर्यथा
यथा त्रासस्य संवें। संहितास्तु पु
राणे च यज्ञा नामचेष्टितं। सर्वं
शुश्रावकथयौ श्रुत्वा दोर्वाराधी
मतः तेषां हि कथितं किञ्चिद्दह्
स्य द्विजसत्तमाः विमुच्य मीन
तेऽपूर्वं मया रहसि भारते। ता
जानीतिं सदाचारं वेद वेदांग
संगतं रहस्यं सततं विलोकी
तस्य द्विजसत्तमाः। यज्ञं तु वृ
त्त मन्त्र गदितं वा समस्याय
संशयच्छेदनं तेषु शुश्रूषके
पितेत्विदं। अनुक्तं संशयच्छे
दि पुराणं कालिकाकृत्यं यो
ऽभ्यसेत् सततं विप्रः सर्वदा


नो फलंल्लभेत्। इति श्रीका-
लिकापुराणे ८९ अध्यायः राज
नीति सदाचारादिके समाप्तः।
ग्रन्थश्च। ऋषयऊचुः॥ सदाचा
रो निगदित स्त्वयाऽस्माभिरा
दरात्। लक्षणं तस्य वस्मास्त
त्कुरुष्व निशाचर। गृहस्थेन
सदाकार्य्य माचारपरिपालनं।
न ह्याचारविहीनस्य भद्रमत्र पर
त्र च। यज्ञदानतपांसीह पुरुष-
स्य न भूतये भवंति यः समुल्लंघ्य
सदाचारं प्रवर्त्तते। दुराचारो-
हि पुरुषो नेह नामुत्र नन्दति-
कार्य्यो यत्नः सदाचारे आचा
रो हंत्यलक्षणं। तस्य स्वरूपं-
वक्ष्यामः सदाचारस्य राक्षस-
शृणुष्वैकमना स्त्वं च यदि श्रे
यो हि वाञ्छसि। धर्म्मोऽस्य-
मूलं धनमस्य शाखा पुष्पं च का
मः फलमस्य मोक्षः। असौ सदा
चारतरुः सुकेशिन् संसेवितो
येन स पुण्यभोक्ता। ब्राह्मे मु
हूर्त्ते प्रथमे विबुध्येदनुस्मरेदे
ववरं महर्षीन्। प्राभातिकं मं
गलमेव वाक्यं यदुक्तवान् देवप
ति स्त्रिनेत्रः। सुकेशिरुवाच॥
किं तदुक्तं सुप्रभातं पिनाकरेण

महात्मना। प्रभाते यत् पठन
मर्त्यो मुच्यते पापबंधनात्॥
ऋषय ऊचुः। श्रूयतां राक्षसश्रे
ष्ठ सुप्रभातं हरोदितं। श्रुत्वा-
स्मृत्वा पठित्वा च सर्वपापैः प्रमु
च्यते। ब्रह्मा मुरारि स्त्रिपुरांतका
री भानुः शशी भूमिसुतो बुधश्च
गुरुः सशुक्रः सह भानुजेन कु
र्वंतु सर्वे मम सुप्रभातं। भृगु
र्वसिष्ठः क्रतुरंगिराश्च मनुः पुल
स्त्यः पुलहः सगौतमः रैभ्यो म
रीचि श्च्यवनो विभुश्च कुर्वंतु
सर्वे मम सुप्रभातं। सनत्कु
मारः सनकः सनंदनः सनातनो
प्यासुरि पिंगलौ च। सप्तस्वराः
सप्तरसातलाश्च कुर्वंतु सर्वे म
म सुप्रभातं। पृथ्वी सगंधा सरसा
स्तथापः सस्पर्शो वायु र्ज्वलितं
च तेजः। नभः सशब्दं महता स
हैव कुर्वंतु सर्वे मम सुप्रभातं।
सप्तार्णवाः सप्त कुलाचलाश्च
सप्तर्षयो द्वीपवराश्च सप्त। भू
रादि कृत्वा भुवनानि सप्त कुर्वं
तु सर्वे मम सुप्रभातं। इत्थं प्रभा
ते परमं पवित्रं यः संस्मरेद्वा शृ
णुयाच्च भक्त्या। दुःस्वप्ननाशो
ननु सुप्रभाते भवेच्च ॥

सतं भगवत्प्रसादात् ततः
समुत्थाय विचिंतयेद्धर्मं
तथार्थं च विहाय शय्यां उ
त्थाय पश्चाद्धरिरित्युदीर्य्य ग
च्छेत्तदोत्सर्गविधिं हि कर्तुं। न दे
वगोब्राह्मणवह्निमार्गे न राज
मार्गे न चतुष्पथे च। कुर्य्याद
थोत्सर्ग मपीह गोष्ठे प्रच्छा
द्य शीर्षं सुवलनाशिकं च तत
स्तु शौचार्थ मुपाहरेन्मृदं गुदे
त्रयं पाणितले च सप्त। तथो
भयोः पंच चतुस्तथैकां लिंगे
तथैकां मृदमाहरेच्च। नांतर्ज
लाद्राक्षस मूषिकस्थलाच्छौ-
चावशिष्टा शरणादि भग्ना व
ल्मीकमृच्चैव हि शौचनायग्रा-
ह्या सदाचारविदा नरेण। उदङ्मु
खः प्राङ्मुख पादौ भुविष्टः समाच-
मेदद्भि रफेनिलाभिः आचम्य
च त्रिः परिमृज्य च द्विः ततः स्पृ-
शेत्खानि शिरः करेण संध्यां स नि
र्वत्य ततः क्रमेण केशांश्च संशो
ध्य च दंतधावनं कृत्वा तथा दर्प
णदर्शनं च कृत्वा शिरःस्नान म
थाङ्गिकं च। संपूज्य तोयेन पितॄ
न्सदेवान् होमं च कृत्वा लभनं
शुभानां। कृत्वा बहिर्निर्गमनं प्र

शस्तं हरिं दधि सर्पिरप्योदकुंभं
धेनुं सवत्सां वृषभं सुवर्णं मृद्गो
मयं स्वस्तिकमक्षतानि। लाजा
मधु ब्राह्मण कन्यकाश्च श्वेता
नि पुष्पाण्यथ शोभनानि कृत्वा
शुक्ले चंदन मर्कबिंबं मधु स्माहुत
भुजं समालभेत ततस्तु कुर्य्यान्नि
जजातिधर्म्मं सम्यक्। स्वगोत्रधर्मो
न हि संत्यजेत तेनापि सिद्धिं समु
पाचरेत नासत्प्रलापंन च सत्य
हीनं न निष्ठुरं नागमशास्त्रहीनं
वाक्यं वदेत् साधुजनेन येन
निंद्यो भवेन्नैव च धर्मभेदी।
संगं न चासत्सुजनेषु कुर्य्यात्
सेव्यास्तु भव्यं सुरतं दिवा च
सर्वासु योनीषु परावलासु
जलस्थलेस्ववजलेषु धीरः। वृ
थाटनं वृथादानं वृथाच प
शुमारणं। न कर्तव्यं गृहस्थेन
वृथादारपरिग्रहं। वृथाटनान्नि
त्यहानि वृथादानाद्धनक्षयः।
वृथापशुघ्नः प्राप्नोति पात
नान्नरकं महत्॥ संतत्याहानि
रश्लाघ्या वर्णसंकरतो भये
भेतव्यं च भवेल्लोके वृथा दार
परिग्रहात्। परत्र परदारेच-
ने॥

देशानुशिष्टं
कुलधर्म्मं



कार्य्यातु द्विरूतमैः परस्त्रंनचैका
यैवपरदाराश्च मृत्यवे नैत्तेतप
स्त्रियंनग्नांनसम्भाषेच्चुतस्करान्
उदक्या दर्शने स्पर्शसंभाषां
चविवर्जयेत् ॥ नैकासने न
थास्थयं सदर्थ्या परजायया
तथैव स्यात्रमातुश्च तथैवदु
हितुस्त्वपि। नभार्य्यावीक्षते
नग्ना पुरुषेणकदाचन नच
स्नायीतवैनग्नांनशयीतक
दाचन। दिग्वाससोपिनतथा
परिभ्रमतामिष्यते भिन्नास
नेभाजनादीन् दूरतः परिवर्ज
येत्। नन्दासुनाभ्यंगमुपाचरेत
क्षौरंचरिक्तासुजयासुमांसं। ए
र्णासुयोषित् परिवर्जनीया भ
द्रासुसर्वाणिसमालभेत। नाभ्यं
ग मर्केनचभूमिपुत्रे क्षौरंच शु
क्रेचविजेचमांसं। बुधेषु योषित
समाचरेत शेषेषुसर्वाणिसदै
वकुर्य्यात्। चित्रासुहस्तेश्रव
णेषुतैलं क्षौरंविशाखास्वभि
जितस्ववर्ज्यं। मूल मृगेभाद्रप
दासुमांसं योषित्मघा कृत्ति
कयोत्तरासु। सदैववर्ज्यंशयने
सुदक्षिणाप्य स्तथा प्रतीच्यां र
जनीचरेशा प्रेजीतेनेवहचरन्ति
णाम।

मुखोनचप्रतीचीमभिभोजनी
यं देवालयं चैत्यतरुं चतुष्प
थं विद्याधिकञ्चापि गुरुंप्र
दक्षिणं। कुर्य्यात्र वामे गमने
चथीमान् द्विजान् मृगान् ग्रा
मनिशाचरेश। माल्यानुले
पवसनानिधृत्वान्ना नास्यैर्धृ
तान्यवहिर्धारयेत। स्नायाद्धि
हःस्नानतयाचानित्यंनिष्कार.
णंचैवविना निशास्तु ग्राही
परावस्त्रजनाभिधानेषुस्त्नाच
जन्मक्षेत्रातेषुपाके। नाभ्यंगि
ते काय मुपस्पृशेच्च स्नातोन
केशान्विधुनीतचापि गात्रा
णिचैवांबरपाणिनाच स्नातोभ
वमृज्याद्रजनीचरेषु। बसेत्रदे
शेषुसराजकेषु सुखेहितसौ
यजनेषुनित्यं अक्रोधनान्याय
परावमत्सराः कृषीवलाद्योष
धिजातपस्थ। नतद्वदेशेषु वसे
त्सुबुद्धिमान् यस्मिन्सदोद्भव
त्वधाकृः। जनोपिनित्यांतरवैर
दुवैरः सदाजिगीषुश्चनिशाच
रेट्र ऋषयऋचुः। यत्रभोज्यम
हावाहो सदापर्य्युषितैर्नरैः
यद्भोज्यंच समुद्दिष्टं कथ्यपिशा
महेन्द्रयं तज्ज्यमन्नंपर्य्युषितं.

स्नहाक्तं चिरसंभृतं। अस्नेहाश्री
हयः श्लक्ष्णा विकाराः पायसा
स्तथा। शशकः शल्लको गोधा
तथाखड्गीच कच्छपः। तद्वद्विद
लकादीनि भोज्यानिमनुरब्रवीत्
मणिरत्न प्रवालानां तद्वन्मुक्ता.
फलस्यच शैल दारुमयानांच.
तृण मूलौषधस्यच। शाकमा
ल्याजिनानांच संहतानांच वास.
सां। वल्कलाना मशेषाणामेव
माशुद्धि रिष्यते। सस्नेहाना म
ध्यासेन तिलकल्केन चाविकं।
कार्पासिकानांवस्त्राणां शुद्धिः।
स्यात्सहभस्मना। नागदन्तास्थि
शृंगाणां तक्षणाच्छुद्धि रिष्यते
पुनःपाकेन भाण्डानां मृन्मयानां
न्तु शुद्धता। शुद्धंभैक्ष्यंकारुहस्तः
पण्यं योषिन्मुखंतथा। रथ्याग
त मविज्ञातंदासवर्गेणयत्कृते
काकपते चिरालीन मनेकोतरि
तंलघु। चेष्टितंबाल वृद्धानां बा
लस्यत मुखंशुचि। म्लेच्छाना
मपि गोशालाजनन्यायसत्ता.
स्त्रियः बालिवृष्योद्विजेन्द्राणां
पाठे वागर्त्विदंबः भूमिर्वि
शुध्यतेखात दाह गोक्रमसेच
नैः। लेपाडुल्लेखनान्मेकाल

वेश्म सम्मार्ज्जनाञ्जलात् के
शकीटावपन्नेऽन्ने गोघ्राते म
क्षिकान्विते मृद्वारि भस्मना
राणिप्रक्षेप्तव्यानि शुद्धये॥
उदुंबराणा म्लाम्लेन क्षारेण
त्रपुसीसयोः कांस्यानां भस्मना
शुद्धि स्नाथानां शुद्धि द्रवस्यच
अमेध्याक्तस्य मृत्तोये गन्धा
पहरणेनच। अमेध्या मपित
द्भूमिशुद्धिर्गम्यावहावतः मातुः
प्रस्रवणेवत्सः शकुनिः फलपा
तने गर्दभो भारवाहित्वे श्वा
मृगग्रहणे शुचिः। रथ्याक
र्दमतोयानि नावःपथिस्तृणा
निच। मारुतेनैव शुध्यन्ति पक्के
ष्टकचितानिच मृते शेणाट
कस्यात्र समेध्याभिप्लुतेभवेत्
अग्रमुद्धृत्य संत्यज्य शेषस्य प्रो
क्षणंस्मृतं। उपवासं त्रिरात्रंवा
दूषितान्नस्य भोजने। अज्ञाते
ज्ञातपूर्वेच नैव शुद्धिर्विधीय
ते। उदकार्थं तनग्राह्य मृति
कांस्याववशायिनः स्पृष्ट्वा स्ना
यीत शौचार्थं तथैव मृतहा
रिणः सस्नेह मश्रिसंस्पृश्य
सवासाः स्नान माचरेत्। आल
भ्यैवतुनिःस्नेहवा मालभ्यार्क

मीस्यच नलंघयेत् नखस्य
वर्त्मानेङ्गलेभंतथा। शूद्राद्युच्छि
ष्टविन्मूत्र पादांभांसि क्षिपेद्ब
हिः पंचपिंडानत्रुद्धृत्य न स्नाया
त्परवारिणि स्नायीत देवखाते
षुसरो ह्रदसरित्सुच। नोद्या-
नादौ विकालेषु प्राज्ञस्तिष्ठे
त्कदाचन। नालपेज्जनविद्वि
ष्टंवीरहीनांतथास्त्रियं। देवता
पितृ सच्छास्त्र यज्ञस्यादिनि
दकैः। कृत्वातुस्पर्शनालापं
शुद्ध्यतेः र्कावलोकनात् अभो
ज्याः सूतिका षण्ढमार्जारा
खुश्वकुक्कुटाः पतितापविद्ध
नग्नाश्चचांडालाधमाश्च
ये। सूतकेपिक्तवाच॥ भवद्भिः
कीर्तिताभोज्या य एते सूति
कादयः॥ अमीषांश्रोतुमिच्छा
मि त्वत्तो लक्षणानिच। ऋष
यऊचुः ब्राह्मणी ब्राह्मणेश्चैव
यावच्छेदत्वमाराते। तावुभौस्त
तिकेस्यातां तयोरन्नं विगर्हितं न
जुहोत्यग्निनेकालेनस्नातिचद
दातिच। पितृदेवार्चुताहीनः स
षण्ढः परिगीयते। दम्भार्थेज
पते यश्च तप्यते यजते तथा
न परार्थे समुद्युक्तो मार्जारः
परिकीर्तितः। विभवेसतिनैवा
त्तिनदृदातिजुहोतिच। तमाहु
राखुंतस्यान्नंभुक्त्वा कृच्छ्रेणशु
द्धति। सभागतानांयः सभ्यः प
क्षपातंसमाश्रयेत्। तमाहुः श्व
कुक्कुटं देवा स्तस्याप्यन्नंविगर्हितं
स्वधर्मं यः समुत्सृज्यपरधर्मंस
माचरेत्। अनापदिस विद्वद्भिः
पतितः परिकीर्त्यते। वेदत्यागी
पितृत्यागी गुरुवन्धुसकलत्रा
गोब्राह्मणस्त्रीवधकृदपविद्धः स
उच्यते॥ येषांकुलेनवेदोस्ति
न शास्त्रंनैवचव्रतं तेनग्नाः की
र्तिताः सद्भिस्तेषामन्नं विगर्हि
तं आशागतानां सदातांचदात
स्युप्रतिषेधकः। शरणागतंयस्त्य
जतिसचांडालाधमोनरः॥ यो
दार्थैः परित्यक्तः साधुभिर्ब्राह्म
णैरपि। कुंडाशीयस्तस्यान्नं भु
क्त्वा चांद्रायणंचरेत्॥ योनि
त्यकर्मणो हानिं कुर्यात्नैमि
त्तिकस्यच। भुक्त्वान्नं तस्य शु
ध्येत त्रिरात्रोपोषितो नरः॥
नित्यस्य कर्मणो हानिः के
वलं मृते जन्मसु॥ न तु
नैमित्तिकोच्छेदः कर्तव्यो हि
कथंचन॥

जाते पुत्रे पितुःस्नानं सचेल
स्य विधीयते। मृतेच सर्ववंधू
नामित्याह भगवान्भृगुः। प्रेता
यसलिलं देयं बहिर्दग्धात् गो
त्रजैः प्रथमेह्निचतुर्थेवा सप्त
मे वास्थिसंचयं। ऊर्ध्वं संचयनात्ते
षा मंगस्पर्शो विधीयते। सो
दकैस्तु क्रिया कार्या अशुद्धे
स्तु सपिंडकैः। विषोद्बन्धन
शस्त्राद्यैर्वह्निपात मृतेषुच॥
तथा गृहीत संन्यासे देशांतर
मृतेतथा। सद्यः शौचं भवेद्वि
द्वन् तत्राप्युक्तंचतुर्विधं। गर्भ
स्रावे तदेवोक्तं पूर्णकालेनचे
वरेत्। ब्राह्मणानामहोरात्रं क्ष
त्रियाणां दिनत्रयं। षड्रात्रं चैव
वैश्यस्य शूद्राणां द्वादशाह्नि
कं। दश द्वादश मासार्द्ध मास
संख्यादिनैर्गतैः स्नात्वा कर्म
क्रियाः कुर्युः सर्वे वर्णा यथाक्र
मं। प्रेतशुद्धिं प्रकर्तव्यं भेकोद्दि
ष्टं विधानतः। सपिंडीकरणं
कार्यं प्रेतस्य वत्सरांतरे॥ त
तः पितृत्वमापन्ने दर्शपौर्णादि
भिःशुभैः। प्रीणनंतस्य कर्त
व्यं यथाश्रुतिनिदर्शने॥ पि
तर्यस्मसमुद्दिश्य भूमिकोषादि
कंच यत् कुर्यात्तेनास्य सु
प्रीतापितरोयांति राजस॥
यद्यदिष्टतमं किंचित् यच्चा
स्य दयितं गृहे तत्तद्गुणव
तेदेयं तदेवाक्षय मिच्छता।
अध्येतव्या त्रयी नित्यं भाव्यंच
विदुषासदा धर्मतो धनमाह
र्यं षष्टव्यंचापियत्नतः आ
चारं कुर्वतो नात्मा जुगुप्सामे
तिराजस तत् कर्तव्यमशंके
नयन्नगोप्यं महाजने एवमा
चरतो लोके पुरुषस्य गृहेसतः
धर्मार्थकामसंप्राप्तिः परत्रेह
चशोभना। एषतूद्देशतः प्रो
क्तो गृहस्थाश्रमउत्तमः। वान
प्रस्थाश्रमेधर्मास्तेवसामोऽव
धार्यतां। अपत्यसंततिंदृष्ट्वा
प्राज्ञो देहस्य चायतिं। वान
प्रस्थाश्रमंगच्छेदात्मनः शुद्धि
कारणं। तत्रारण्यापभोगैस्त
पोभिश्चात्मकर्षणं। भूमौशय्या
ब्रह्मचर्यं पितृदेवातिथि
क्रिया। होमस्त्रिसवनस्नानंज
टावल्कलधारणं वन्यस्नेहनि
षेवित्वं वानप्रस्थविधिस्त्वयं। स
र्वसंगपरित्यागो ब्रह्मचर्यममा
नितां जितेंद्रियत्वमावासेनेक॥

स्मिनवसते चिरं। अनारम्भ·
स्त्वथाहारो भिक्षा विप्रेषु निंदि
ते आत्मज्ञानं विवेकश्च तथा
ह्यात्मावबोधनं। चतुर्थे चाश्र
मे धर्मास्त्वस्माभिस्ते प्रकीर्तिताः
वर्णधर्माणि चान्यानि निशा
मय निशाचर। गार्हस्थ्यं ब्रह्मच
र्यं च वानप्रस्थं त्रयाश्रमाः। क्ष
त्रियस्यापि गदिता य आचारो
द्विजस्य हि। वैखानसत्वं गार्ह
स्थ्यमाश्रमद्वितयं विशः। गार्ह
स्थ्यमुत्तमं त्वेकं शूद्रस्य क्षण·
दाचर। स्वानि वर्णाश्रमोक्तानि
धर्माणीह न हापयेत्। यो हाप
यति तस्यासौ परिकुप्यति भास्क
रः। कुपितः कुलनाशाय देहरोग
विवृद्धये वर्षाप्युपतन्तेतस्य नर
स्त्वक्षणदाचर। तस्मात्स्वधर्मं न
हि सन्त्यजेत न हापयेच्चापि तथा
त्मवंशं। यः सन्त्यजेच्चापि निजं
हि धर्मं तस्मै प्रकुप्येत दिवाक
रस्तु। पुलस्त्य उवाच। इत्येवमु·
क्तो मुनिभिः सुकेशिः प्रणम्य
तान् ब्रह्मनिधीन् महर्षीन्। जगा
म चोत्पत्य पुरं स्वकीयं मुहुर्मु
हुर्धर्ममवेक्षमाणः। इति श्री
वामनपुराणे १४ अध्यायः। अ

स्यात् पाद्मे स्वर्गखण्डे २९। ३०। ३१
अध्यायेषु विष्णुपुराणे ३॥
अंशे ११ अध्याये मार्कण्डेयपुरा
णे सदाचारनामकाध्याये चालो
कनीयं॥

सदाचारवान्[२] त्रि सदाचारवि
शिष्टः। सदाचारी। सदाचारश
ब्दादस्त्यर्थे वतु प्रत्ययनिष्पन्नः॥

सदातनः पुं विष्णुः। इति त्रिका
ण्डशेषः॥ नित्ये त्रि। इत्य
मरः॥

सदातोया स्त्री पल्लपर्णी। इति
शब्दचन्द्रिका। करतोया। इति
सदानीरा शब्ददर्शनात्॥

सदादानः पुं ऐरावतः॥ गणे
शः। मत्तहस्ती। इति मेदिनी।
नित्यदाने क्ली॥

सदानन्दः पुं शिवः। यथा॥
सदाशिवः सदाकान्तो सदाहर्त्ता
सदागतिः। सदानन्दः सदावर्त्तो·
सदासंगविवर्जितः। इति श्रीशि
वजामलपार्वतीश्वरसंवादे शिव
सहस्रनामस्तोत्रे॥ सततान्ना
दयुक्ते त्रि। यथा। मन्मानन्दे सदा
नन्दः सदानन्दो भविष्यति। स
मानन्दे निरानन्दो निरानन्दो भ·
विष्यति। इति पुराणोभग·

तीवाको॥

सदानर्त्तः पुं खञ्जनपक्षी॥
इति शब्दचन्द्रिका सर्वदानृत्य
कारके त्रि॥

सदानीरवहा स्त्री करतोयानदी
इति शब्दरत्नावली॥

सदानीरा स्त्री करतोयानदी।
इत्यमरः। गौरीविवाहसमये
शंकरकरगलितसम्प्रदानतो
यप्रभवत्वात् करस्य तोयं विद्य
ते अत्रेति करतोया अर्शआ·
दित्वादः। श्रावणे पतद्गंजेस
र्वा नद्यो रजस्वला अयं तु न रज
स्वला। अत एव सदा सर्वदा·
नीरमस्या इति सदानीरा। तथा
च स्मृतिः। अथादौ कर्कटे देवी
त्र्यहं गंगा रजस्वला। सर्वा रक्त
वहा नद्यः करतोयाम्बुवाहिनी
इति भरतः॥

सदापुष्पः पुं नारिकेलवृक्षः
इति शब्दमाला। सर्वदाकुसु
मयुक्ते त्रि॥

सदापुष्पी स्त्री रक्तार्कवृक्षः
इति रत्नमाला॥

सदाप्रसूनः पुं रोहितकः॥
अर्कः। कुन्दः। इति राज·
निर्घण्टः॥

सदाफलः पुं स्कन्धफलः। ना
रिकेलः। उडुम्बरः। इति मेदिनी
विल्वः। इति जटाधरः॥

सदाफला स्त्री त्रिसंधिपुष्पं
इति राजनिर्घण्टः॥ वार्त्ताकुवि
शेषः। सलावागुन। इति कु
लीवागुन इति ढेंकोवागुन
इति च भाषा। अस्या गुणाः
सदाफला त्रिदोषघ्नी रक्तपित्त
प्रसादनी कण्डूकच्छूहरी चैव
वातोक्ती गुणवत्तरा। इति रा
जवल्लभः॥

सदाभद्रा स्त्री गम्भारीवृक्षः।
इति रत्नमाला॥

सदायोगी[२] पुं विष्णुः। इति
त्रिकाण्डशेषः। हरिशयने
मधुमांसवर्जनफलभागी य
स्मात्सदामुनिः सदायोगी मधु
मांसस्यवर्जनात्। निरपि नी
रोगोजस्वी विष्णुभक्तश्च जा
यते। इति तिथ्यादितत्त्वं॥

सदृक्[२] त्रि तुल्यः। इत्यमरः

सदृशः त्रि समः। इत्यमरः।
उचितः। इति मेदिनी॥

सदृशस्पन्दनं क्ली निस्पंदः।
इति त्रिकाण्डशेषः॥

सदृक्षः त्रि सदृशः। इत्यमरः॥

सदेशः त्रि निकटः । इत्यमरः ॥
देशान्वितः । यथा । सदेशस्सदे
शे निकटे देशादेशान्विते ऽपि
मात् । इति धरणिः ॥
शाकृतः त्रि सत्वे । इति हेम-
चन्द्रः ॥
सद्म [न] क्ली गृहं इत्यमरः । ज
ले । इति मेदिनी ॥
सद्यः [अ] व्यतत्क्षणे । तत्पर्य्या-
यः । सपदि २ । इत्यमरः । हेत-
त्क्षणे तत्काले । समानेऽ
ह्नि सद्यः कृतक्कुकृद इत्यादिना
निपातः । सद्यः पततिमांसेन-
इति सपदि मुकुलिताक्षी ।
हृदयेद्रस्यादि । इतिभरतः ॥
सद्यःकृतं क्लीनाम इतित्रि
काण्डशेषः । तत्क्षणकृते त्रि ।
सद्यःप्राणकरः त्रि तत्क्षणात्
बलकारक द्रव्यादिः । यथा । स
द्योमांसं नवान्नञ्च बालास्त्री
क्षीरभोजनं । घृतमुष्णोदकञ्चै
व सद्यःप्राणकराणि षट् ।
इतिचाणक्यः ॥
सद्यःप्राणहरः त्रि तत्क्षणा
त् बलायुषो र्नाशकद्रव्यादि य
था । शुष्कंमांसंस्त्रियोवृद्धा बा
लार्कस्तरुणंदधि प्रभाते मै
थुने निद्रा सद्यःप्राणहराणि
षट् । इतिचाणक्यः ॥
सद्यःशुद्धिः स्त्री सद्यःशौचं ।
यथा । देशान्तरमृते बाले स
द्यःशुद्धि र्यतो मृते । इतिगा
रुडे ९७ अध्यायः ॥
सद्यःशोथा स्त्री कपिकच्छुः ।
इति शब्दचन्द्रिका ॥
सद्यःशौचं क्ली तत्क्षणाच्छु
द्धिः । यथा शिल्पिनः कारवो वै
द्यादासीदासास्तथैवचकाः । अ
ग्निमान् श्रोत्रियो राजासद्यः
शौचाः प्रकीर्त्तिताः । इतिगारु
डे ९७ अध्यायः । अन्यच्चका
रवः शिल्पिनो वैद्या दासीदा
सा स्तथैवच दातारो नियमी
चैव ब्रह्मविद्ब्रह्मचारिणो ॥
सत्रिणो व्रतिन स्तावत् सद्यः
शौचा उदाहृताः । राजाचैवाभि
षिक्तश्च प्राणः सत्रिण एवच ॥
यज्ञे विवाहकालेच देवयागे
तथैवच सद्यःशौचं समाख्यातं
दुर्भिक्षेवाप्युपद्रवे । डिम्बाह
वहतानाञ्च विद्युतापार्थिवैर्द्वि
जैः । सद्यःशौचं समाख्यातं
सर्पादिमरणे तथा ॥ अ
ग्नौ मरुप्रपतने वीराध्वन्यप्य

नाशके । ब्राह्मणार्थेचसंन्य
स्तेसद्यः शौचं विधीयते । इति
कौर्म्मे उपरिभागे २२ अध्यायः
अपरञ्च । अथ सद्यःशौचं ॥
तत्र विष्णुः । नाशौचं राज्ञां रा
जकर्म्मणि न व्रतिनां व्रते न
सत्रिणां सत्रेन कारुणांस्व-
कर्मणि न राजाज्ञाकारिणां
तदिच्छया न देवप्रतिष्ठा वि
वाहयोः पूर्वसंन्नद्धयोः इति । स
त्रिणोनित्य प्रवृत्तान्नदानाःतेस
ह्येवान्नदाने । कारवः सूपकारा-
द्याः । आदिपुराणे । सूपकारेण
यत्कर्मकरणीयं नरेष्विह । तद
न्योनैव शक्नोति तस्मात्शुद्धः स
सूपकृत् । कूर्म्मपुराणे कारवः
शिल्पिनो वैद्यादासा दास्य स्त
थैवच । दातारो नियमीचैव
ब्रह्मविद्ब्रह्मचारिणौ सत्रिणो
व्रतिनस्तावत्सद्यःशौचाउदाहृ
ताः । आदिपुराणे शिल्पिनश्चि
त्रकाराद्याः कर्मयत् साधयन्तित
तत्कर्म्मनान्यो जानाति तस्मा
त्शुद्धः स्वकर्मणि । दासादा
स्यश्चयत्कर्मकुर्वन्त्यपिचलील
या तदन्यो नक्षमः कर्त्तुं तेनते
शुचयः स्मृताः । चित्रकराद्यैः
द्याः शिल्पिनः आद्यःशाद्वल
नीरञ्जकाद्याः शातातपः । म
ल्यकर्मकाराः शूद्रा दासा दास्य
स्तथैवच । स्नाने शरीरसंस्का
रे गृहकर्मण्यदूषिताः स्मृतिः स
द्यः स्पृश्या गर्भदासो भक्तदा
सस्तथाहकः शुचिः । वैद्याअपि चि
कित्सायामेव । तथाच स्मृतिः
चिकित्सको यत् कुरुते तदन्ये
न न शक्यते । तस्मात् चिकित्सकः
स्पर्शे शुद्धो भवति नित्यशः ॥
दातार आवश्यक प्रसङ्गे गोभू
मि हिरण्यादिदाने प्रवृत्ताः ।
तेषां तद्दानएव । प्रसङ्गेदानञ्च
दातव्यं प्रसङ्गपात्रे इतियाज्ञ
वल्क्यात् । कदाचित् कृदानका
रिणां तद्दाने प्रवृत्ते अशौचेना
क्लिता वत् यावत्तत् कर्म्म कुर्व
ति इति हारलताधृतं । एवंसं
कल्पित द्रव्यदानेप्यनाशौचं ॥
तथाच मिताक्षरायां । एवंसंक
ल्पिते द्रव्यदीयमाने न दुष्यति
इति आदिपुराणे निवृत्ते कृच्छ्र
होमादौ ब्राह्मणादिषु भोज
ने गृहीतनियमस्यापि न स्याद
न्यस्य कस्यचित् निमन्त्रितेषु
विप्रेषु प्रारब्धे श्राद्धकर्मणि-

निमंत्रणादि विप्रस्य स्वाध्याया
दिरतस्यच। देहेपितृमतिरप्त
नाशौचं विद्यते क्वचित्। प्राज्ञा
पत्यादिकृच्छ्रसमाप्ते होमया·
गजापेषु समाप्तेषु समर्पणार्थ
मवश्यं मया ब्राह्मणा भोजयित
व्या इति गृहीतनियमो यस्त
स्याशौचे स्वकृतान्नानामपि
भुञ्जानानां दोषाभावः। कस्य·
चिद्दातृभोक्त्रोर्विचारः। एवंमा
रब्धश्राद्धेपि क्वचिदित्यनेन·
दातृभोक्त्रोर्दोषाभावः। त
थाच विष्णुः। व्रतयज्ञविवाहे
षुश्राद्धे होमेऽर्चने जपे। आर
ब्धे सूतकं न स्यादनारब्धे तु
सूतकं इति। पराशरः। दीक्षि
तेष्वभिषिक्तेषु व्रती तीर्थे परेषु
च। तेषां दान प्रसक्तेषु नाशौ
चं मृतसूतके। यज्ञमानानां·
सोमयागाद्य दीक्षणीयेष्टिं·
कृतायां दीक्षितत्वं भवतितेन
दीक्षणीयेष्ट्युत्तरकालं यजमा
नस्य यत्कर्म तदाशौचे नास्ति
अभिषिक्तेषुक्षत्त्रियन्नृपतिषु·
तीर्थे गयादि। अत्र कुशस्तिकश्चि
त् कालमाचवीये कूर्मपुराणे
काम्योपवासप्रक्रान्तेष्वन्तरा मृ
तसूतके तत्रकाम्य व्रतं कर्त्त्या
त् दानार्च्चनविवर्ज्जितं। तदा
नाक्षेते स्वयं वर्ज्जयेत् श्रमहा
रा तु कारयेत् तथाच मत्स्य·
पुराणे। गर्भिणी सूतिकानक्त
कुमारीच रजस्वला यदा शुद्धा
तदान्येन कारयेत् क्रियतेसदा
उपवासाच्चरेण गर्भी पीडासं
भावनायां नक्तं भोजनं कुर्य्या
त्। उपवासेष्वशक्तस्यतदेवफ
लमिच्छतः। अनभ्यासेन रोगा
णां किमिष्टं व्रतं मुच्यते।
इति नारदप्रश्नानन्तरं। उप·
वासेष्वशक्तानां नक्तं भोजन
मिष्यते। इति मत्स्यपुराणे प
वेष्टरप्रतिवचनात्। स्वयमशु
द्धाशुद्धद्वारा पूजादिकं कारये
त् कायिक मुपवासादि स्वाशु
द्धशुद्धिकाले स्वयं क्रियते।
स्मृतिपरिभाषायां मप्येवं। वि
स्तुःवक्र कालिकसंकल्पागृही
तस्य पुराणादि। सूतके मृतकेच
वृतं तन्नैव दुष्यति पतत्काम्य
व्रतपरं नित्यानामारब्धानाम
नारब्धाना मविशेषेण कर्त्तव्य
ता नाशौचिमित्युक्तं ब्रह्मपुरा
णे नैष्ठिकस्याथ वानप्रस्थभिक्षो

प्रस्थितस्यच नैष्ठिकस्य ब्रह्म
चारिविशेषस्य। अन्यस्यच तथा
ग्निमिणः। अशौचिभिन्नाग्रहणे
दोषाभावः। इति हारलताप्रभृ
तयः। कौर्म्मे। सद्यःशौचं समा
ख्यातं दुर्भिक्षेचाप्युपप्लवे। डि
म्बाहवहतानाञ्च विद्युता पा
र्थिवे र्द्विजैः। सद्यःशौचं समा
ख्यातं शापादिमरणे तथा॥
उपप्लवे राजविप्लवे। औपस
र्गिकात्सन्तमरकपीडने च सद्यः
शौच मुक्तं। तथा च पराशा
रः। उपसर्गमृते चैव सद्यः
शौचं विधीयते। अतएवब्रा
ह्मणे अपिच कष्टायां सद्यःशौ
चे विधीयते। इतियाज्ञवल्क्य
वचनैः निरूढमह मूलपाणि
प्रभृतिभि र्दौपसर्गिकात्यन्त
मरकपीडायां सद्यःशौचं वि
धीयते इत्युक्तं। उपसर्गश्च वि·
विधोत्पातः तथाच गर्गसंहि
ताभारद्वाजसत्याहा नास्तिकाद्धा
प्यधर्मतः नरापचारान्नियतमु
पसर्गाः प्रवर्तन्ते। अतोःपचा
रान्नियत मपवर्ज्जन्ति देवताः
ताः सृजन्त्यद्भुतांस्तांस्तु दिव्य
नाभस भू
मिजान्। तएव त्रिविधा लोके
उत्पाता देवनिर्मिताः। विच
रन्ति विनाशाय रूपैः सम्भाव
यन्तिच। यद्यप्युपसर्गः स्मृतो
रोग भेदोपप्लवयो रपीतिवि
श्वकोषादुपसर्गस्योभयवाच
कत्वे तथापात्रश्रुति प्रयुक्तत्व
नानतेरोगत्वात् त्रिविधोत्पाता
त्मकोपसर्गो गृह्यते नतु रोग
विशेषात्मक इति। एतेनोपसृ
ज्यतीति व्युत्पत्त्या देहास्यन्तर
एव यावद्वर्त्तते तावत्कालम
रणएवसद्यःशौचं बहिर्भावेत्त
ण परस्परयामरणेसतिस्वजा
त्युक्ताशौचमेवेति अवह मिति
दर्शनस्मृतिसारप्रदीपा इतिवा
चस्पतिमिश्रोक्तं हेयं द्विजैर्ब्रा
ह्मणैः। शापादीत्यादि शब्दे
नाभिचारमृतस्य ग्रहणं। ब्रह्म
कूर्मपुराणाभ्यां यद्ब्राह्मणाद्
तस्याशौचाभाव उक्तः तद्विहिर
कहननेरोद्धव्यः प्रमादहतेत्व
शौचाद्यस्त्यव अन्यथा मरीचि
वचनं निर्विषयं स्यात्। य
था विष शस्त्र श्वापदाहि ति
र्य्यग् ब्राह्मणघातिनां। चतुर्दश्यां
क्रियाकार्य्या अन्येषांतुविगर्हि

ना विषादि साहचर्य्यात् ब्रा
ह्मणकृतत्वात्तेः स्यात्त्वीति प्रती
यते। यच्चात्र ये च वै ब्राह्मणैर्ह
ता इति ब्रह्मपुराणीयं साधक
त्वेनोपन्यस्तं श्राद्धविवेके तच्चि
न्त्यं। महापातकिनो येच पतिता
स्ते उदाहृताः इत्युत्तरार्द्धेन·
पातित्य समभिधायतेषां श्रा
द्धे निषेधात्। जावालः। उ
भिन्ते शूद्रस्याने शस्त्रेणा
ब्रह्मघातिते। पतिते·नशा·
नप्रेते विदेशस्थशिष्टेनच
नाशौचमित्यर्थः॥ इति
शुद्धितत्त्वं॥

सद्यस्कः त्रि नूतने इतिहेम
चन्द्रः॥

सद्योजातः पुं वत्सः। इति
शब्दचन्द्रिका। शिवः। यथा
भक्ते नीता विधेर्युक्तं ब्राह्म
णायनिवेदयेत्। प्रीयतां दे
वदेवोऽयं सद्योजातः पिनाक
धृक्। इति मात्स्ये शिवचतु
र्दशीव्रते ९५ अध्यायः॥
सद्योजाताय नमः॥ इति·
शिवरात्रिव्रते शिवस्नानमंत्रः
इति तिथ्यादितत्त्वंच। तत्त
त्क्षणोत्पन्ने त्रि॥

सद्योभावी पुं तर्णकः। सद्यो
जातवत्सः। इति शब्दचन्द्रि
का॥

सद्रुः त्रि गमनकर्त्ता। सदधा
तोरु प्रत्ययेन निष्पन्नः। इति
सिद्धान्तकौमुदी॥

सद्मसद्यः पुं ग्रामः। सत्शब्द
पूर्व्वक वसधातो ध्यच् प्रत्य
येन निष्पन्नः। इति केचित्।
किन्तु सपूर्व्व वसधातो ध्यप्र
त्ययेसद्मसद्य इति सिद्धान्तकौ
मुद्यां निष्पादितं॥

सद्वृत्तं क्ली साधुस्वभावः। स
च्चरित्रं। इति जटाधरः। तद्युक्ते
त्रि। यथा नासमंजसशीलेन
महासीतकदाचन। सद्वृत्तसन्नि
कर्षो हि क्षणार्द्धमपिशस्यते
इति तिथ्यादितत्त्वं॥

सद्वृत्तिभाक् त्रि सद्वृत्तिविशि
ष्टः। यथा सारावल्यां। पथ्या
शिनांशीलवतांनराणांसद्वृत्ति
भाजांविजितेन्द्रियाणां। एवं
विधानामिह मानुषाणां चिरं
सदा हृद्यमुनिप्रवादः। इति
मलमासतत्त्वं॥

सधर्म्मा त्रि सदृशः। यथा।
तुल्यः समानः सदृक्षः सरूपः स

दृशः समः। साधारणसधर्म्मा
णौ सवर्णः सन्निभः सदृक् इति
हेमचन्द्रः। समानधर्म्मयुक्तश्च॥

सधर्म्मचारिणी स्त्री भार्य्या। य
था। सधर्म्मचारिणी पत्नीजाया
चगृहिणीगृहा। इतिहलायुधः

सधर्म्मिणी स्त्री भार्य्या। यथा
सवासिनी वधूटी स्याच्चिरण्ट्य
थसधर्म्मिणी। पत्नीसहचरीपा
णिगृहीती गृहिणी गृहा। इ
ति हेमचन्द्रः॥

सधर्म्मी त्रि समानधर्म्माचारी
यथा। पञ्चाङ्गसमजो ऽन्ये·
यो समाजेऽस्य सधर्म्मिणा·
इत्यमरः॥

सधवा स्त्री जीवत्पतिका। त
त्पर्य्यायः। सभर्तृका २ पतिव
त्नी ३ सनाथा ४। इति जटा
धरः। अस्या धर्म्मा यथा भर्त्तुः
शुश्रूषणं स्त्रीणां परोधर्म्मो
ह्यमायया। तद्बन्धूनांच कल्याणः
प्रजानांचानुपोषणं। दुःशी·
लो दुर्भगो वृद्धो जडो रोगय
धनोपिवा। पतिः स्त्रीभि
र्नहातव्यो लोकेप्सुभिरपा
तकी। इति श्रीभागवते १०
स्कंधे २९ अध्यायः॥

सधिः पुं अग्निः इतित्रिकाण्ड·
शेषः॥

सधिः पुं वृषभः। इतिसिद्धान्
तकौमुद्यां मुणादिवृत्तिः॥

सध्रीची स्त्री सखी। इतिहेम
चन्द्रः॥

सध्राङ् त्रि सहचरः। इत्यमरः

सनः पुं स्त्री हस्तिकर्णास्फा
लः। यथा। कर्णास्फाले सनः
सनी। इतिशब्दरत्नावली॥

सनः पुं चाणपाटलिवृक्षः
शब्दचन्द्रिका॥

सनकः पुं विष्णुपारिषदभेदः
इतिशब्दरत्नावली। सचब्रह्म
णश्चतुष्पुत्रान्तर्गतपुत्रविशेषः
यथा। दृष्ट्वा पापीयसीं सृष्टिं
नात्मानं बह्वमन्यत। भगवद्ध्या
नपूतेन मनसान्यांस्ततोऽसृ
जत्। सनकंच सनंदंच सना
तन मथात्मभूः। सनत्कुमा
रंच मुनीन् निष्क्रियानूर्द्ध्वरे
तसः। तान् बभाषे स्वभूः पुत्रा
न्प्रजाः सृजत पुत्रकाः। तन्नैच्छ
न्मोक्षधर्म्माणो वासुदेवपराय
णाः। इति श्रीभागवते ३ स्कंधे
१२ अध्यायः। तस्य वासस्थानं
जनलोकः। इतिकाशीखण्डः॥

सनत् पुं ब्रह्मा। इति त्रिकाण्ड
शेष शब्दरत्नावल्यौ ॥
सनत् व्य सर्व्वदा। इत्यमरटी
कायां रामाश्रमः ॥
सनत्कुमारः पुं ब्रह्मणः पुत्त्रः
तत्पर्य्यायः वैधात्रः २ इत्य
मरः। वैधात्रिकः ३ इति भर
तः। धातृपुत्त्रः ४ वेधायः ५
इति शब्दरत्नावली तन्नाम
व्युत्पत्ति र्यथा। सनत् ब्रह्म
तस्य कुमारः सनत्कुमारः। स
नित्य कुमारस्तेन सनत्कुमा
रो वाचीति स्वाभिमते। इति भ
रतः। तन्नामकारणं यथा। य
थोत्पन्नस्तथैवाहं कुमार इति
विद्धि मां। तस्मात् सनत्कुमारे
ति नामैतन्मे प्रतिष्ठितं। इति म
हाभारते हरिवंशः। सच धर्म
स्यौरसेन अहिंसायां जातः
पश्चात् ब्रह्मणो दत्तपुत्त्रः। अ
र्येसाम्प्रदायः। यथा। श्रीना
रद उवाच कोऽयं सनत्कुमारेति
यस्मात्कं ब्रह्मणः स्वयं। तथा
पि तेन प्रादितं वद कामं सर्व्वं
तः पुलस्त्य उवाच। धर्म्मस्य भा
र्य्याहिंसाख्या तस्यां पुत्त्रचतुष्ट
यं। संप्राप्ते मुनिशार्द्दूल योगा
शास्त्रविचारके। ज्येष्ठः सनत्
कुमारोऽभूत् द्वितीयश्च सना
तनः तृतीयः सनको नाम चतु
र्थश्च सनन्दनः। सांख्यवेत्तार
मपरं कपिलं वोढु मासुरिं
दृष्ट्वा पंचशिखश्रेष्ठं योगयु
क्तं तपोनिधिं। ज्ञानयोगं न ते
दद्यु र्ज्यायांसोऽपि कनीयसां
ज्ञान माद्य महायोगं कपिला
दिनेचावदत्। सनत्कुमारस्त्वा
भ्येत्य ब्रह्माणं कमलोद्भवं
अपृच्छद्योगविज्ञानं तमुवा
च प्रजापतिः। कथयिष्यामि
ते सर्व्वं यदि पुत्त्रेति मे वचः।
शृणोषि कुरुषे तच्च ज्ञानेऽसौ
त्वं स्थितो भव। पितामह वचः
श्रुत्वा साध्यः प्राह तपोधनः। स
र्व्वाहितं तव पुत्त्रोऽहं देव योगं वद
स्व मां तमुवाच महायोगी त्व
न्माता पितरौ यदि दास्यते च
ततः स्वच्छन्दभ्यादो मे सि पुत्त्रक
सनत्कुमारः प्रोवाच दायादप
रिकल्पना येषां हि भवता
प्रोक्ता तानेव्याख्यातमर्हसि
तदुक्तं साध्यपुत्त्रेण वाक्यं
श्रुत्वा पितामहः। प्राह प्रहस्य
भगवान् शृणु वत्स तिनावदः

इति वामने ५७ ५८ अध्यायौ
सच पंचहायनवयस्कः चूडादि
संस्कार वेद संध्या विहीनश्च
यथा। तच्छ्रुत्वा सृंजयो राजा
रत्नभूषणभूषितां गृहीत्वा
कन्यकां रम्यां नारदाय ददौ
मुदा गृहीत्वा च सभार्य्यं तेपु
र्द्धयाता मुदान्वितः। प्रययौ
ब्रह्मलोकञ्च देवेन्द्रैर्मुनिभिः
सह। तत्राजगाम तत्रैव ज्व
लत्ब्रह्मतेजसा सनत्कुमारो
भगवान् साक्षाच्च बालकोप
मा। स्वेष्टः सर्व्वेच वयसा यथै
वपंचहायनः अचूडोऽनुपवीत
श्च वेद संध्याविहीनकः॥
कृष्णेति मंत्रं जपति यस्य ना
रायणोगुरुः। अनन्तकालं
कल्पंच ब्रह्मभिश्च ज्ञिभिः सह
वैसवाना म्यग्रणीधो ज्ञानिना
ञ्च यो गुरुः आगत्य नारद
लं भ्रातरंच सतां वरं॥ सह
सा शिरसा भक्तैः दण्डवत्प्रणना
म तं। उवाच नारदं बालः प्रहस्य
परमार्थकं। इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखण्डे ५९ अध्या
यः॥ जिनमते हादशासा
र्व्वभौमान्तर्गतसार्व्वभौमः
भेदः। इति हेमचन्द्रः॥
सनन्दः पुं ब्रह्मणः पुत्त्रचतुष्ट
यान्तर्गतपुत्त्रविशेषः। सचज
नलोकवासी। इति काशीख
ण्डे। सपवद्दिव्यमनुष्यः अस्य त
र्पणं निवीतिना प्रयस्मृते
न प्राजापत्यातीर्थेन सामहो
न कर्त्तव्यं। तदितरेण उदङ्मु
खेन कर्त्तव्यं। यथाद्दत्तः। प्राङ्
शमाग्र मुकुट्स सलिले प्राङ्मु
खः स्नान्। उदङ्मुखोऽस्त्वथ
त पितृन् दक्षिणतस्तथा अ
ग्रैस्तु तर्पयेद्देवान् मनुष्यान् कु
शमध्यतः। पितृंस्तु कुशमूलो
ग्रैर्विधिः कौशेन यथाक्रमं कृ
तोपवीती देवेभ्यो निवीती च
भवेत्ततः। मनुष्यांस्तर्पयेद्भ
क्त्या ऋषिपुत्त्रानृषीं स्तथा॥
सनकश्च सनन्दश्च तृतीयश्च
सनातनः। कपिलश्चासुरि
श्चैव वोढुः पंचशिखस्तथा।
सर्व्वे ते तृप्तिमायान्तु मद्दत्ते
ना म्बुना सदा अनेनांजलि त्रयं।
यथा प्रत्येकं मंत्रलिंदेवा हौ हो
तु सनकादयः। प्रोक्ता इति पितरः
हीहीनास्त्रियस्त्वेके कुमंजलि
परिशिष्टप्रकाशाष्टे तसामवे

दीयषट्त्रिंशद्ब्राह्मणे मनुष्या
णा मेषा दिक् यत्प्रतीचीति।
तथा च ज्योतिष्टोमे श्रूयते।
प्राची देवा अभजन्त दक्षिणां
पितरः प्रतीचीं मनुष्याः उदीचीं
मसुराः अपरेषा मुदीचीं मनु
ष्याः विष्णुपुराणे। प्राजापत्ये
ननीर्थे न मनुष्यांस्तर्पयेत् पृ
थक्। इत्याह्निकचारतत्त्वे।
सनपर्णी स्त्री असनपर्णी।
इति शब्दरत्नावली ॥
सनस्त्रे क्ली पवित्रके हेशाण
सूत्रजाले। शाणस्य सूत्रं शाण
सूत्रं शाणानि ददाति सूत्रं शाणः
शाणक्रत्मदाने अन् शाणस्त
लब्धा दिर्घ ईत्यणोतः। इति व
हवः। सनो दंमसादि दन्त्यसतो
तः। इति केचित् तन्मते यन्तद
न्त्यादि ईत्यप्रत्ययः। सरणं दन्त्य
सादि मूर्ध्न्यणकत्परे। स
णकि णामणिका काकणकोण
काणा इति ईत्यणोते विघा
भरणः। कार्पास मुपवीतं स्यात्
विप्रस्योर्द्धवृतं त्रिवृत्। सनसूत्र
मयं राज्ञो वैश्यस्याविकसौत्रि
कं। इति मनुवचनात् पवित्र
कमपि तदुच्यते। इत्यमरः।
टीकायां भरतः ॥
सना अ नित्यं। इत्यमरः ॥
सनातनः पुं विष्णुः शिवः॥
ब्रह्मा। पितृणामतिथिः। इति
हेमचन्द्रः। दिव्यमनुष्यः। अस्य
प्रमाणं सनंदशब्दे द्रष्टव्यं।
सच ब्रह्मणः पुत्रः। यथा सनत्
कुमारो धर्मश्च सनकश्च सना
तनः। सनंदश्चापिसत्यश्च ये।
स्येवा ब्रह्मणः सुताः। विचत्त
णा न यह्नन्ति केवाः स्येजस्त्व
नुयः। इति ब्रह्मवैवर्ते प्रकृति
खण्डे ३१ अध्यायः। सतुजन
लोकवासी। इति काशी
खण्डे। वह्निपुराणमते तुत
पोलोकस्य इति भेदः। वैस
वराजः। इति मत्स्यपुराणे ॥
सनातनः त्रि नित्य। इत्यमरः
स्थानिश्चलः। इति विश्वः॥
सनातनतमः पुं विष्णुः इति
तस्य सहस्रनामस्तोत्रे॥
सनातनी स्त्री दुर्गा। लक्ष्मीः
सरस्वती इति शब्दरत्नावली
तस्या व्युत्पत्तिर्यथा। सर्वका
ले सना प्रोक्ता विद्यमानेतनी
तिच। सर्वत्र सर्वकालेषु विद्य
माना सनातनी ॥ इति।

ब्रह्मवैवर्ते प्रकृतिखण्डे ५४
अध्यायः। अपिच निर्गुणस्य
चनित्यस्य वाचकश्चसनात
नः। सदा नित्या निर्गुणायाकी
र्तिता सा सनातनी। इति ब्रह्मवै
वर्ते श्रीकृष्णजन्मखण्डे २२ अ
ध्यायः। अन्यच्च स्थितिंकरो
ति भूतानां सैव काले सनात
नी इति देवीमाहात्म्यं ॥
सनातृ अ नित्यं। इत्यमरटी
कायां रामाश्रमः। विष्णुः।
इति तस्य सहस्रनामस्तोत्रे।
सनाथा स्त्री जीवद्भर्तृका।
इति जटाधरः ॥
सनाभिः पुं सपिण्डः। ज्ञातिः
इत्यमर मेदिनीकरौ ॥
सनाभिः त्रि तुल्यः। इति मे
दिनी। स्नेहयुक्तः। इति श
ब्दरत्नावली ॥
सनामकः पुं प्रेमभाजनः ॥
इति शब्दचन्द्रिका। समानना
मयुक्ते त्रि ॥
सनिः पुं पूजा। दाने। इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः
सनिः पुं स्त्री अध्येषणा। इत्य
मरः गुर्वादेः सत्कारपूर्वकं
कस्यचिदर्थे नियोजनं तस्य हे
तुरो अस्माकं कर्मकुर्वित्यादि
रूपे सायते दीयते पुष्पादि
कमत्र सनिः यन्तुजन दानेना
स्तीति इः पाक्षिणादीति कृ
पिसनीच। अन्वेषणादिवद्ध्ये
षणा। इति भरतः दिक् ॥
इति शब्दमाला ॥
सनितः त्रि प्रतिपन्नः। इति
हेमचन्द्रः ॥
सनिष्ठीवं क्ली सनिष्ठेवं। इत्य
मरटीकायां भरतः ॥
सनिष्ठेवं क्ली अस्पष्टकृते। इत्य
मरः। निष्ठेवो मुखवातविन्दुः
तेन सह वर्त्तते इति सनिष्ठेवं नि
पूर्वष्ठिवे धञ् गुणः सनिष्ठीव
मिति क्वचित् पाठो लिपिकर
प्रमादादिति मुकुटः। इत्यमर
टीकायां भरतः ॥
सनी स्त्री सनिः इत्यमरटीका
यां भरतः। हस्तिकर्णस्फालः
इति शब्दरत्नावली ॥
सनीडः त्रि निकटः। इत्यमरः
नीडयुक्तश्च। सनंतः पुं संहतलः
इति शब्दचन्द्रिका ॥
सन्त् शब्दस्य प्रथमाबहुव
चनान्तरूपश्च ॥
सन्तते क्ली सतते तद्वति त्रि।

इत्यमरः ॥
सन्तताभ्यासः पुं निरन्तराभ्या
सः यथा। स्वाध्यायः सन्तता
भ्यासः। इति भूरिप्रयोगः ॥
सन्ततिः स्त्री गोत्रे। इत्यमरः।
पङ्क्तिः। विस्तारः। परस्पराभ
वः। पुत्रः। कन्या। इति वि
श्वः ॥
सन्तप्तः त्रि अध्वगमनादिना
श्रान्तः। तत्पर्य्यायः। सन्तापि
तः २ धूपितः ३ धूपायितः ४
दूनः ५ इत्यमरः। तप्तः ६ इति
शब्दरत्नावली। अग्निज्वलापयु
क्तः। यथा। आदित्तदादीमकृशा
नुकल्पे सिंहासनं तस्य सपाद
पीठे। सन्तप्तचामीकरवल्गुव
र्णे विभासाविस्मृतमहार्घरत्ने
इति भट्टिकाव्ये ३ सर्गः ॥
सन्तमसं क्ली विश्वकतमः॥
व्यापकान्धकारः। इत्यमरः। मो
हः। यथा। ममापि किं नो
दयसे दयायन त्वदङ्घ्रिमग्र
यदि वेत्थ मे मनः। निमज्जयन्
सन्तमसे पराशये विधिस्तु वा
च्यः कृतवागसः कथा। इति
नैषधे ९ सर्गः ॥
सन्तर्पणं क्ली द्राक्षा दाडिमाव
ज्जरी कदली शर्करा लाजा
चूर्णमधाज्य सम्मिलिते। इति
राजनिर्घण्टः। तृप्तिकारके त्रि
यथा। तृप्तो महाब्रह्मसमूह
जुष्टः सन्तर्पणेन नाकसदां व
रेण्यः। जज्वाल लोकस्थित
ये स राजा यथाध्वरे वह्निरभि
प्रणीतः। इति भट्टिकाव्ये १
सर्गः। सन्तानः पुं कल्पवृक्षः
वंशः। इत्यमरः। विस्तारः। अ
पत्यं। इति मेदिनी ॥
सन्तानिका स्त्री क्षीरसरः। म
र्कटजालकः। छुरिकाफले
फेणः। इति हारावली। अ
घस्य गुणाः। सन्तानिका गु
रुः शीता वृष्या पित्तास्रवात
जित्। इति राजनिर्घण्टः॥
सन्तापः पुं अग्निज्वलापः। तत्
पर्य्यायः। सञ्ज्वरः २ इत्यमरः।
तापः ३ शोषः ४ उष्मा ५। इ
ति राजनिर्घण्टः। सम्यक्
तापनञ्च ॥
सन्तापनः पुं कामदेवस्य पं
चबाणान्तर्गतबाणविशेषः। इ
ति त्रिकाण्डशेषः। सम्यक्ता
पकारके त्रि ॥
सन्तापितः त्रि अध्वादिना श्रान्तः

इत्यमरभरतौ। अस्य पर्य्यायः
सन्तप्तशब्दे द्रष्टव्यः ॥
सन्तिः स्त्री दाने। अवसाने।
इत्यमरे सातिशब्दटीकायां नी
लकण्ठः। सनितिश्च सातिश्च सति
स्साती। सनोतेराशिषि लिङ्गेन
स्य पत्नौ निपात्येते। पद्देसत्र
तात् इतिवाक्ये क्तिकिच्चौ नहव
र्त्तेते इति इम् निषेधे जनसने
त्यत्र क्तिकिच्वर्ज्जनात् नलोपा
भावे सन्तिः। इति गणबोध
टीकायां दुर्गादासः। सन्तिश
ब्दो निर्विसर्गोऽप्युत् अससलभा
वे इत्यस्मात् क्तीति प्रत्ययेन नि
ष्पन्नः। यथा। सन्तिरम्या ज
नपदा बह्वन्नाः परितः कुरून्।
इति महाभारते विराटपर्व्व ॥
सन्तुष्टः त्रि सन्तोषयुक्तः। यथा
गच्छध्वं ममराः सर्व्वे गृहीत्वाद्यो
स्वमालयं। सन्तुष्टा वरमस्माकं
ददत्विदानीं सुपूजिताः। इति
छन्दोगाह्निकोत्सर्गतत्त्वं ॥
सन्तोषः पुं सन्तुष्टिः। तत्प
र्य्यायः। धृतिः २ स्वास्थ्यं ३
इति हेमचन्द्रः ॥
सन्दंशः पुं कङ्कमुखः। साँडा
सी इति भाषा। इति हेमचन्द्रः॥
सन्दंशिका स्त्री सत्रुटी। साँ
डासी इति चिमूटा इति च भा
षा। लौहयन्त्रविशेषः। कातारि
इति भाषा। इति मेदिनी ॥
सन्दर्भः पुं रचना। इति हलायु
धः। प्रबन्धः। इति त्रिकाण्ड
शेषः। ग्रथनं। यथा। सन्दर्भो
रसना गुल्फः ग्रन्थने ग्रथने
समाः। इति हेमचन्द्रः। तस्य
लक्षणं यथा। गूढार्थस्य प्र
काशश्च सारोक्तिः श्रेष्ठता त
था। नानार्थवत्त्वं वेद्यत्वं सन्द
र्भः कथ्यते बुधैः। इति रूप स
नातनगोस्वामिकृत श्रीभाग
वतीय षट्सन्दर्भस्य प्रथमस
न्दर्भकारिका ॥
सन्दर्शनं क्ली सम्यक्प्रकारे
ण दर्शनं। यथा। सन्दर्शनार्थ
मम्बाया नदीपुलिनसंस्थितः
स च वैश्य स्तपस्तेपे देवीसू
क्तं परं जपन्। इति मार्कण्डेय
पुराणे देवीमाहात्म्यं ॥
सन्दानं क्ली दाम। इत्यमरः॥
सम्यग्दानञ्च ॥
सन्दानः पुं गजस्याष्ठीवतो र
योभागः। इति त्रिकाण्डशेषः
सन्दानिका स्त्री अविखदिरः।

इति राजनिर्घण्टः ॥
संदानितः त्रि बद्धः। इत्यमरः
संदानिनी स्त्री गोगृहं गो-
पालि इति भाषा। इति हेम
चन्द्रः ॥
सन्द्रावः पुं पलायनं। इत्य
मरः ॥
संदाहः पुं मुखतात्वोष्ठदाहः
इति राजनिर्घण्टः ॥
संदिग्धः त्रि संदेहयुक्तः। यथा
न तावत् संदिग्ध साध्य धर्मत्व
पक्षत्वमिति पक्षतामूलं ॥
संदिग्धमतिः त्रि संदेहविषयी
भूतबुद्धियुक्तः। संदिग्धा मतिर्य
स्य। इति बहुव्रीहिसमासनिष्पन्नः
संदिग्धार्थः पुं संदेहविषयी-
भूतार्थः। तद्विशिष्टे त्रि ॥
संदितः त्रि बद्धः। इत्यमरः ॥
संदिष्टं क्ली वार्ता। इति शब्द
रत्नावली। कथिते त्रि ॥
संदिष्टार्थः पुं संदेशहरः ॥
इति केचित् ॥
संदिहानः त्रि संदिग्धः। यथा।
संदिहानः सांशयिकः संशया
पन्नमानसः। इति जटाधरः ॥
संदी स्त्री खट्वा। यथा। तिवद्या
खट्विका संदी। इति त्रिकाण्ड-
शेषः ॥
संदीप्यः पुं मयूरशिखावृक्षः
इति शब्दचन्द्रिका ॥
सन्देशः पुं संवादः। इति शब्द
रत्नावली। स्वनामख्यातमिष्टा
न्नविशेषश्च ॥
संदेशवाक् स्त्री संवादः। तत्
पर्य्यायः। वाचिकं २ इत्यम
रः ॥
संदेशहरः पुं दूतः। इत्य-
मरः ॥
संदेशहारकः पुं दूतः। इति
हेमचन्द्रः ॥
संदेहः पुं एकधर्मिकविरुद्ध-
भावाभावप्रकारकं ज्ञानं ॥
इति सिद्धान्तमुक्तावली ॥ तत्प
र्य्यायः। विचिकित्सा २ संश
यः ३ द्वापरः ४ इत्यमरः ॥
संदोहः पुं समूहः। इत्यमरः।
संद्रावः पुं पलायनं। इत्य
मरः ॥
संधा स्त्री स्थितिः प्रतिज्ञा।
इति मेदिनी संधानं। इति श
ब्दरत्नावली संध्या। यथा।
संधा द्विजमैत्री चिरप्रसक्तः।
इति भरतधृतवाचस्पतिः ॥
संधानं क्ली मद्यसज्जीकरणं

इति नयनानन्दः। तत्पर्य्यायः ॥
अभिषवः २ इत्यमरः ॥ संधा
नी ३ संधिका ४ इति शब्द
रत्नावली। संधीयते संधानं
वंशाङ्कुर फलादीन् बहुकाले
संधाय यत् क्रियते। इति भ
रतः। संघट्टने। इति मेदिनी
काञ्जिके। इति हलायुधः ॥
मदिरा। अवदंशः सौराष्ट्र। इ
ति राजनिर्घण्टः। धनुषि बा-
णयोजने यथा। तदाशुकृ
तसंधानं प्रतिसंहर सायकं।
आर्तत्राणाय वः शस्त्रं न प्रह
र्तुमनागसि। इत्यभिज्ञान शा
कुन्तलायां १ अङ्कः। अन्वेष
णे। इति लोकप्रसिद्धं ॥
संधानितः त्रि संधानविशिष्टः
संघटितः। संधानशब्दादित
प्रत्ययेन निष्पन्नः
संधानिनी स्त्री गोगृहं। इति
केचित् ॥
संधानी स्त्री संधाने। इति शब्द
रत्नावली। कुप्य शाला। इति
हेमचन्द्रः ॥
संधिः पुं राजादीनां षड्गुणान्त
र्गतगुणविशेषः। सतु स्वर्णादि
दानेन वैरिभिः प्रीत्युत्पाद
नात् मित्रीकरणं। संयोगः।
तत्पर्य्यायः। श्लेषः २ इत्यमरभ
रतौ। सुरुङ्गा। भगं। संघट्टने
रूपकाङ्गमुखाद्येषु। सावका
शः। इति मेदिनी। भेदः। इति
विश्वः। व्याकरणमते वर्णद्वय
स्य मेलनं तल्लक्षणादिर्य्य
था अर्द्धमात्रोच्चारणकालेना
व्यवहितयोर्वर्णयोर्द्रुततरोच्चा
रणं संधिः। अतएव श्लोकार्द्ध
योर्मध्यार्द्धयोर्वा न संधिः। तत्रा
र्द्धमात्रोच्चारण कालव्यवधा
नस्योचितत्वादिति शाब्दः। स्वम
ते तु संधेयासत्त्वविहितकार्य्यं
संधिरिति संधिलक्षणं। तेनापि
पद्मादि शब्दानां संयोगान्तलु
पि लुपि न संध्याद्यविधी इति
निषेधेऽपि संधिग्रहणात् संधि
लोप्यवनसंधिरिति नियमात् कु
प कर्मा विस्मृतेन चपटे वा पिप
क पिपक् इति भिन्नपदेत्तु संधि
र्विभाषयेति बोध्यं। तथाच। सं
धिरेकपदे नित्यो नित्यो धातू
पसर्गयोः। स्वरेहृच भवेन्नित्यः
सेवान्यत्र विभाषया। इति प्रा
ञ्चः। एकपदे इति स्वभावादे
कपदे समासेऽपि। यथा दानं।

भवेत् नद्यो इत्यादि ॥ समासेऽसुरारिः हृषीकेशः त्र्यंबकः गवीशः इत्यादि । धातूपसर्गयोस्तु प्रणीतं उपेत्य इत्यादि ॥ अमत्र अत्र अंतः अन्तर्गतः इह ईड्ः इहेड्ः इत्यादि । धातूपसर्गयोः समासस्यानित्यत्वादेकपदग्रहणेनैव हि सिद्धौ तयोः पुनरुपादानं अनित्य समासे कदाचिदेकपदत्वे संधि विभाष्यते इतिज्ञापनार्थं । तेन उच्चारितरुचिर ऋचो चाननानां चतुर्णां इत्यादि सिद्धिः । इति मुग्धबोधव्याकरणटीकायां दुर्गादासः ॥

सर्वाङ्गसंधि म्मासत्रयेणाभवति । गात्रसंधिः सप्तमासेऽभवति । इतिसुखबोधः । सुगासंधि सुरापाहे देहसंधि समरेपाहेच द्रष्टव्यः ॥

संधिका स्त्री मद्यसंधानं । इतिशब्दरत्नावली ॥

संधिचोरः पुं चोरविशेषः । सिंधॉलचोर इतिभाषा । यथा संधिचौरस्तु हारकः । इतिशब्दमाला ॥

संधिजीवकः त्रि कुत्सितविभवान्वेषी तत्पर्य्यायः । पार्श्वकः २ इति त्रिकाण्डशेषः ॥

संधितः त्रि संधियुक्तः मिलितः । यथा । अस्महृद्दिव्यवपुः संधितः संधिमानसौ । आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भविष्यति । इति राजतरंगिण्यां २ तरंगः ॥

संधिनी स्त्री वृषभेणाक्रान्ता गौः । इत्यमरः । या ऋतुमती वृषभेण आक्रान्ता निष्पादितमैथुना साऽसंधिनी गर्भेणसंधानेऽसम्बन्धा सा विद्यते अस्याः संधिनी इन् । इति भरतः । अ·कालदुग्धाः गौः । इति मेदिनी शब्दरत्नावलीच ॥

संधिपूजा स्त्री शारदीयमहापूजान्तर्गततृतीयापूजा । यथा कालिकापुराणवचनेतरं । अष्टमीनवमी संधौ तृतीया च लुकथ्यते । तत्रपूज्यान्वहं पुत्रयोगिनी गणसंयुता । जेपातिथे । अष्टम्यासंधियोगे सकल परिजनैः पूजयेत् सर्वभावैः सप्तमीपूजावत् महाष्टम्यादि कृत्यमपिचविहितं दण्डिकायामेवतत् परदिवसीय खण्डतिथौ

किंतु पूर्वोक्त संध्यनुरोधात्रिशाखायेव खण्डतिथावपि संधिपूजा । एवं च पूर्णाष्टम्यां महाष्टमीपूजा तत्परदिने अष्टमीनवम्योः संधिपूजा तत्परदिने महानवमीपूजा प्रागुक्तनंदिकेश्वरपुराणयुक्तोदयगामितिथ्यनुरोधात् । तत्परदिने दशम्यां विसर्जनं पूजानुरोधेनाधिकदिनलाभात् । अन्यत् दुर्गापाहे द्रष्टव्यं ॥

संधिबंधः पुं भूमिचंपकः । इतिशब्दचंद्रिका ॥

संधिबंधनं क्लीं शिरा ॥ इतिकेचित् ॥

सन्धिमतिः पुं काश्मीरदेशीयजयेंद्रराजमंत्री सच पश्चाद्राजा बभूव । यथा । हतो मही महेंद्रस्य जयेंद्रस्तस्य भूपतेः स्वामाज्ञानुभुंजो राज्ञा भूभो·जाद्य प्रथुप्रथः ॥ तस्याभ्युदतोदंतमवभक्ति विभूषितः राज्ञः संधिमति नामसंज्ञोऽमतिमतां वरः । अस्मद्दृहादिव्यवपुः संधितः संधिमानसौ । आर्य्यत्वादार्य्यराजाख्यः ख्यातो भुवि भविष्यति । इति राज·तरंगिण्यां २ तरंगः ॥

संधिरप्रका स्त्री सुरंगा । इति केचित् ॥

संधिला स्त्री सुरंगा । नदी । मदिरा । इति मेदिनी ॥

संधिवेला स्त्री कालविशेषः सतु अहोरात्रादिमेलनकालरूपः । यथाव्यासः । उपास्ते संधिवेलायां निशाया दिवसस्य च तामेव सन्ध्यां तस्मात्तु प्रवदतिमनीषिणः ॥ इत्याह्निकतत्वं ॥

संधिहारकः पुं संधिचोरः ॥ यथा बंदिचोरो माचलः स्यात् कुंभिलः संधिहारकः । इतिहारावली ॥

संध्या स्त्री कालविशेषः । सतु दिवारात्रिसंधौ पिदंडद्वयरूपः ॥ तत्पर्य्यायः । पितृप्रसूः २ ॥ इत्यमरः । संधा ३ हितीयमेष इतिभरतधृत वाचस्पतिः ॥ सायं ५ दिनांतः ६ निशादि ७ दिवसात्ययः ८ इति राजनिर्घंटः सायाह्नः ९ विकालः १० ब्रह्मभूतिः ११ सायः १२ । इति शब्दरत्नावली ॥ साच कालस्य भार्य्या । यथा । कालस्य·



तिसो भार्य्यासु संध्या रात्रिर्दि
नानिच । याभिर्विना वियात्राच
संध्यो कर्त्तुं न शक्यते । इतिव्र
ह्मवैवर्त्ते प्रकृतिखण्डे १ अध्या
यः ॥ रात्रे राद्यन्तदण्डचतुष्टया
त्मककालः । यथा । त्रियामां
रजनीप्राहुस्त्यक्त्वाद्यन्तचतुष्ट
ये । नाडीनां तदुभे संध्ये दिव
साद्यन्तसंज्ञिते । इतिप्रायश्चित्त
तत्त्वे । तत्स्वार्थके यथा । सम
हे हिमवत्पार्श्वे नद्यां संध्याब्रुडम
ते । राज्ञावहनि संध्यायां कस्य
गुप्तः परिग्रहः । इतितिथ्यादि
तत्त्वे ॥ त्रिसंध्यकालीनोपास
ना ॥ तत्कालोपास्यादेवता
यथा । अथ संध्योपासनं ॥
तत्रछन्दोगपरिशिष्टं ॥ अत
ऊर्द्ध्वं प्रवक्ष्यामि संध्योपासनि
कं विधिं । अनर्हः कर्मणां वि
प्रः संध्याहीनो यतः स्मृतः ॥
अतः प्रातःस्नानानन्तरं । तथा ।
एतत् संध्यात्रये प्रोक्तं ब्राह्मण्यं
यदधिष्ठितं । यस्य नास्त्यादरस्त
त्र न स ब्राह्मण उच्यते । एतत्ता
तपः । अब्राह्मणास्तु षट्प्रोक्ता
ऋषिणा तत्त्ववादिना । आद्यो रा
जभृत स्तेषां द्वितीयः क्रय वि
क्रयी । तृतीयो बहुयाज्यः स्या
च्चतुर्थो ग्रामयाजकः । पंचम
स्तु भृतस्तेषां ग्रामस्य नगरस्य च
अनागतान्तु यः पूर्वां सादित्या
ञ्चैव पश्चिमां नोपासीत द्विजः
संध्यां स षष्ठोऽब्राह्मणः स्मृ
तः । राजभृतो राजसेवकः । ग्रा
मादेर्भृतो भरणीयः ग्रामलक्ष
ण माह मार्कण्डेयपुराणं ॥
तथा शूद्रजनप्रायाः सुसमृद्ध
कृषीवलाः क्षेत्रोपयोगभूमध्ये
वसति ग्रामसंज्ञिका । अत्रसं
ध्यात्रयस्य नित्यत्वाभिधानात्
सर्वकालमुपस्थाने संध्यायाः प्रा
प्ते विवध्यते । अत्यन्तसूतकाशौ
च विभ्रमातुर भीतितः । इति
विष्णुपुराणीये संध्याया श्लोक
वचनान्तपाठो धर्मकोषोक्तो
ग्राह्यः । एव मेव न त्ववर्द्धमानः
सर्वकाले प्रातःसंध्याक्ते सायंरूपे
कालद्वये । अन्यथा तदुपादाने
वर्ण्यं स्यात् । विभ्रमश्चित्तविक्षे
पः तेनेह तत्तादावपि संध्यामा
चरेति । अतएव याज्ञवल्क्यः
सर्वावस्थापि यो विप्रः संध्यो
पासनतत्परः । ब्राह्मण्यञ्च
महीयेत ब्रह्मजन्मगतोऽपिसन्

सर्वावस्थापि नित्ये सेवकादि
कर्मरतोऽपि । यथाचितशेणोचे
ष्यशक्तोऽपि इति रत्नाकरः । अ
न्यायवस्थापन्नोपीतियुक्तं ॥
संध्यात्रयस्यापारणलक्षणमाह
योगी याज्ञवल्क्यः । त्रयाणांचै
व वेदानां ब्रह्मादीनां समागमः
संधिः सर्वसुराणांच तेन संध्या
प्रकीर्त्तिता ॥ संध्याद्वयकाल
स्तु अहोरात्र संधिपि मुहूर्त्ता
त्मकः तथाच दक्षः । अहोरात्र
स्य यः संधिः सूर्य्य नक्षत्रवर्ज्जि
तः । साच संध्या समाख्याता मु
निभिस्तत्त्ववादिभिः । सूर्य्येण
तत्र वर्ज्जितः । अर्द्धास्तमितादर्द्धो
दित सूर्य्यमंडल प्रकृष्टतेजो
नक्षत्र वर्ज्जितः । तथाच बृह
हः । अर्द्धास्तमयात् संध्याव्य
क्तीभूतान तारका यावत् ॥
तेजःपरिहानि रूपा भानो र
र्द्धोदयं यावत् । अत्रप्राधान्ता
उक्ता । परिमाण माह दक्षः ।
राज्यन्तकाले नाड्यौ द्वे संध्या
दिः काल उच्यते दर्शनादरविरे
खाया स्तदन्तो मुनिभिःस्मृतः
नाडीदण्डः । योगी याज्ञवल्क्यः
ह्रासवृद्धी सततं दिवरात्र्यो
र्यथाक्रमं संध्या मुहूर्त्तमाख्या
ता ह्रासे वृद्धौ समा स्मृता ॥
अत्रोपासनाया अपि संध्यात्व
माह व्यासः । उपास्ते संधिवेला
यां निशाया दिवसस्य च । तामेव
संध्यां तस्मात्तु प्रवदन्ति मनीषि
णः । उपास्ते यद्धमाण प्राणा
यामादि क्रियये ति यावत् ॥
तत्काले उपास्या अपि देवता
संध्या । तथाच याज्ञवल्क्यः । स
न्ध्यो संध्या मुपासीत नास्तगो
नोद्गते रवौ । उपासनोपक्रम
माह संवर्त्तः । प्रातः संध्यां स
नक्षत्रा मुपासीत यथाविधि
सादित्यां पश्चिमां संध्यां अर्द्धा
स्तमितभास्करां । सनक्षत्रा
मित्यनेन तद्युक्तकाले उपक्र
म्य प्रातः संध्या मुपासीत । ए
व मेवार्द्धास्तमितभास्करा
वां पश्चिमां सादित्यामित्यनेन
तद्युक्तकाले उपक्रम्य उपासीते
त्यर्थः ॥ मध्याह्न संध्यायामु
हूर्त्तं कालमाह स्मृतिः
एवापरे तथा संध्ये सनक्षत्रे प्र
कीर्त्तिते । समस्तसूर्य्योपि मध्याह्ने
मुहूर्त्तं समुपासते । सांध्याय
न गृह्ये अरोप समित्पाणिः संध्या



मुपासीत नित्यं वाग्यत उत्तराप
राभिमुखो ऽन्वष्टमदिशा मानत
त्वदर्शनात् । अतिक्रान्तायां महा
व्याहृतीः सावित्रीं स्वस्त्ययनादि
जप्त्वा एवं प्रातः प्राङ्मुखं तिष्ठ
न् आमण्डलदर्शनादिति । उत्तराप
राभिमुखो वायुकोणाभिमुखः
कोणं विवृणोति अन्वष्टमदि
शामिति । उभयदिगष्टमभागाभि
तिपावत् । व्यासः । गायत्री नाम
पूर्वाह्णे सावित्री मध्यमे दिने
सरस्वती च सायाह्ने सैव सन्ध्या
त्रिषु स्मृता प्रतिगृहान्न दोषाच्च
पातकादुपपातकात् । गायत्री
प्रोच्यते तस्मात् गायन्तं त्रायते
यतः । सवितृद्योतनात् सैव
सावित्री परिकीर्त्तिता जगतः
प्रसवितृत्वात् वाग्रूपत्वात्सर
स्वती । तैत्तिरीयब्राह्मणे । उद्य
न्तमस्तं यान्तं आदित्यमभिध्या
यन् कुर्वन् ब्राह्मणो विद्वान्स
कलं भद्रमश्नुते असावादित्यो
ब्रह्मा इति ब्रह्मैव सन् ब्रह्मा
प्येति य एवं वेदेत्यस्यार्थः
वक्ष्यमाणप्रकारेण प्राणाया·
मादिकं कुर्वन् यथोक्तनामरू
पोपेतं सन्ध्याशब्दस्य वाच्यमादि
त्यं ब्रह्मेति ध्यायन् ऐहिकमामु
ष्मिकं च सकलभद्रमश्नुते । य
एवमुक्तध्यानेन शुद्धान्तःकरणो
ब्रह्म साक्षात् कुरुते स पूर्वमपि
ब्रह्मैव सन् मत्तावान् चिरजीवि
त्वे प्राप्ते यथोक्तज्ञानेनाज्ञानो
पशमे ब्रह्मैव प्राप्नोति । इति
पराशरभाष्ये माधवाचार्य्यः
अतएव व्यासः । नभिन्नां प्रति
पद्येत गायत्रीं ब्रह्मणा सह
सोऽहमस्मीत्युपासीत विधिना
येन केनचित् ॥ गायत्रीस्थभर्ग
पद प्रतिपाद्य ईश्वरः । अहन्त
द्रूपोऽस्मि भवामि इति । अज
हत्स्वार्थलक्षणया जीवेश्वर
योरहङ्कारप्रतिफलितत्वोपाधि
रहितेन चिद्रूपेणैक्यं । घटाका
शगृहाकाशयो रूपाधिविरव
गमात् ऐक्यमिव भावयन्नुपा
सीत याज्ञवल्क्योऽपि यासन्ध्या
सा तु गायत्री द्विधा भूत्वा प्रति
ष्ठिता । सन्ध्या उपासिता येन वि
ष्णुस्तेन उपासितः ॥ उपासना
याः फलमाह स एव । यावांस
र्षिः शरीरस्य नकरोत्यस्य पोष·
णं । निःस्तेन कर्म्मसंयुक्तपन
स्त्वासां तदोषयं ॥ एवं सहि

शरीरस्थः सर्पिर्वत् परमेश्वरः
विना चोपासनादेव नकरोति
हितन्त्वसु । प्रणव व्याहृतिभ्यां
च गायत्र्या त्रितयेन च । उपा
स्यं परमं ब्रह्म आत्मा यत्र प्रति·
ष्ठितः त्रितयेन प्रणवादित्रि
येन ब्रह्मप्रतिपादकेनोच्चारि
तेन तदर्थावगमेन उपास्यं प्र
सादनीयं । तदाह स एव ॥
वाच्यः स ईश्वरः प्रोक्तो वाचकः
प्रणवः स्मृतः । वाचकेऽपि च वि
ज्ञाते वाच्य एव प्रसीदति ॥
भूर्भुवः स्व स्तथा पूर्वं स्वयमेव
स्वयम्भुवा । व्याहृता ज्ञानदेहेन
तस्मात् व्याहृतयः स्मृताः ज्ञान
देहेन तत्त्वज्ञानस्य चिद्रूपेश्वरस्य
देहेन शरीररूपेण व्याहृता उ
क्ताः । तेन तद्वाच्योपीश्वरः ॥
कूर्मपुराणे । प्रधाने त्रयः का
लो ब्रह्मविष्णुमहेश्वराः । सत्व
रजस्तम इत्येषः क्रमाद्यास्यत·
यः स्मृताः एतद्रूपेणापि भावनी
याः । इत्याह्निकाचारतत्त्वे ॥
अपि च । दिनान्तसन्ध्यां सूर्य्येण
पूर्वां महैत्र्ये युक्तां बुधः उपति
ष्ठेत् यथान्यायं सम्यगाचम्य
पार्थिव । सर्वकाल मुपस्थाने स
न्ध्यायाः पार्थिवेष्यते । अन्यत्र स
न्तकाशेऽपि च विभ्रमात्तरभीतितः
सूर्य्येणाभ्युदितो यस्तु त्यक्तः
सूर्य्येण यः स्वपन् अन्यत्रातुर
भावाच्च प्रायश्चित्तीयते नरः ।
तस्मादनुदिते सूर्य्ये समुत्थाय
महीपते । उपतिष्ठेन्नरः सन्ध्यां
सस्थांच दिनान्तजां । उपतिष्ठे
ति वै सन्ध्यां येन एवं न पश्चिमां
प्रजंतिते दुरात्मानस्तामिस्रेन
रकं नृप । इति विष्णुपुराणे ३
अंशे ११ अध्यायः ॥
दीक्षितविशेषस्य सन्ध्या विशे
षा यथा । भूमिरुवाच देवदेव
कथं सन्ध्यां दीक्षितः कुरुते वद
केन मन्त्रेण वा भक्तस्तव कर्म्म
परायणः । वराहउवाच शृणु
माधवि तत्त्वेन सन्ध्यामन्त्रमनुत्त
मे । यथा वदन्ति वै सूर्य्ये सन्ध्यां
एवं चिरन्तया । जलाञ्जलिगृ
हीत्वा च मम भक्त्या व्यवस्थि
तः । गुरूत्तैः ध्यानमास्थाय मन्त्रम
मुदाहरेत् । मन्त्रः । भवोद्भव सा
दिव्यकमहयमादिस्य सर्वदेवा
ब्रह्मरुद्रेन्द्रा लोकाश्च कृत्स्ना यथा
सीत् ध्यानयोगस्थिता ते सन्ध्या
संज्ञा वासुदेवं नमन्ति वयं देव·

मादि व्याहृतिपूर्वकत्वाचात्मनि दे
वसंध्या तथापि संसारार्थे क
र्म तत्कारणमेव संध्या संध्या
वासुदेव नमोनमः । अनेनैव त्
मंत्रेण संध्योपासनमुदीरितः ।
इति वाराहे चतुर्वर्णदीक्षानामा
ध्यायः ॥ संध्या प्रशंसा यथा
मुनयऊचुः । कथंमुने द्विजया
ति ब्राह्मणो दग्धकिल्बिषः ।
अनग्निको हि मंत्रैर्हि यत्रकेव
क्रियापरः । सूत उवाच सायं
प्रातश्च यः संध्यामुपास्ते स्वकत्र
मानसः । जपन् हि पावनीं देवीं
गायत्रीं वेदमातरं ॥ तपसाभा
वितां देव्या ब्राह्मणः पूतकि
ल्बिषः । नसीदेत् प्रतिगृह्णा
नो अपि पृथ्वीं ससागरां । ये
चास्य दारुणाः केचित् ग्रहाः सू
र्यादयो दिवि तेचास्य सौम्य
तां यांति शिवाः शिवतरास्तथा
यत्र यत्र गतं चैनं दारुणाः पि
शिताशनाः । घोररूपा महा
कायाः प्रभवंति नराक्षसाः ॥
इति वह्निपुराणे आश्वमेधिक
नामाध्यायः ॥ अपिच । नित्यं नि
त्ये त्रिसंध्यांच करिष्यसि दिने
दिने । मध्याह्ने चापि सायाह्ने
प्रातरेव शुचिः सदा । संध्या
हीनोऽशुचिर्नित्यमनर्हः सर्वक
र्मसु । यदन्यत् कुरुते कर्म नत
स्य फलभाग्भवेत् नोपतिष्ठति
यः पूर्वां नोपास्ते यस्तु पश्चिमां
स शूद्रवद्बहिः कार्यः सर्वस्मा
द्द्विजकर्मणः । यावज्जीवनप
र्यंतं यस्त्रिसंध्यं करोतिच । स
च सूर्यसमो विप्रस्तेजसा तप
सा सदा । तत्पादपद्मरजसा
सद्यः पूता वसुंधरा जीवन्मुक्तः
स तेजस्वी संध्यापूतो हि यो
द्विजः तीर्थानिच पवित्राणि
तस्य संस्पर्शमात्रतः ततः पापा
नि यांत्येव वैनतेयादिवोरगाः
नगृह्णाति सुरास्तेषां पितरः
पिंडतर्पणं । स्वेच्छयाच द्विजा
तिश्च त्रिसंध्यारहितस्य च । वि
ष्णुमंत्रविहीनश्च त्रिसंध्यारहि
तो द्विजः । एकादशीविहीनश्च
विषहीनो यथोरगः ॥ इति ब्र
ह्मवैवर्त्ते प्रकृतिखंडे २१ । अ
ध्यायः । अन्यत् कौर्मे १२ । अ
ध्याये मार्कंडे २१५ । २२० अध्या
ये द्रष्टव्यं । जननमरणा
शौचे तन्निषेधो । यथा । सं
ध्यां पंच महायज्ञान् नैत्यिकं स्म

तिकर्म च । तन्मध्ये हापयेत्ते
षां दशाहांते पुनः क्रिया ॥ इति
शुद्धितत्वं ॥ सायंसंध्यानिषे
धकालो यथा । कर्मोपदे
शिन्यां व्यासः । संक्रांत्यां पक्ष
यो रंते द्वादश्यां श्राद्धवासरे
सायं संध्यां न कुर्वीत कृते च
पितृहा भवेत् ॥ इति तिथ्या
दितत्वं ॥ तत्कालेऽध्ययना
दिनिषेधो यथा । स्वमस-
ध्ययने स्नाने मुहूर्ते भोजने
गतिः । उभयोः संध्ययोर्नि
त्यं मध्याह्ने चैव वर्जयेत् ।
इति कौर्मे १५ अध्यायः ॥
संध्या स्त्री नदीविशेषः । युग
संधिः । इति मेदिनी । चिंता ।
संश्रवः । सीमा संधाने ॥ कु
सुमविशेषः । इति हेमचंद्रः ॥
संध्यांशः पुं युगसंधिः । यथा
चत्वार्याहुः सहस्राणि वर्षा
णां तत्कृतं युगं । तस्य तावच्छ
ती संध्या संध्यांशश्च तथाविधः
इतरेषु ससंध्येषु ससंध्यांशेषु च
त्रिषु एकापायेन वर्तंते सह
स्राणि शतानि च । इति मान
वे १ अध्यायः । चत्वार्याहु
रिति चत्वारि वर्षसहस्राणि कृ
तयुगं काले मन्वादयो वदंति
तस्य तावच्छतानि संध्या सं
ध्यांशश्च भवति युगस्य पूर्वास
ध्या उत्तरश्च संध्यांशः । तदुक्तं वि
ष्णुपुराणे । तत्प्रमाणैः शतैः
संध्या पूर्वा तत्राभिधीयते । सं
ध्यांशकश्च तत्तुल्यो युगस्या
नंतरो द्विजः । संध्या संध्यां
शयो रंतर्यः कालो मुनिसत्त
म । युगाख्यः स तु विज्ञेयः कृ
तत्रेतादिसंज्ञकः । वर्ष संख्या
चेयं दिव्यमानेन तस्यैवानंत
र प्रकृतत्वात् । दिव्यैर्वर्षसह
स्रैस्तु कृतत्रेतादिसंज्ञितं ।
चतुर्युगं द्वादशभिस्तद्विभागं
निबोध मे । इति विष्णुपुराणव
चनाच्च इत्येवमिति ग्रन्थेषु त्रेता
द्वापर कलियुगेषु संध्या संध्यां
शौ सहितेषु एकहान्या सहस्रा
णि शतानि च भवंति । तेनेदं
संपद्यते । त्रीणि वर्षसहस्रा
णि त्रेतायुगं तस्य त्रीणि वर्षश
तानि संध्या संध्यांशश्च । एवं द्वे
वर्षसहस्रे द्वापरः तस्य द्वे वर्ष
शते संध्या संध्यांशश्च । एकं
वर्षसहस्रं कलिः । तस्यैकवर्ष
शतं संध्या संध्यांशश्च । इति

उलूकभट्टः ॥
संध्याचलः पुं पर्वतविशेषः।
यथा। आरायनोपदेशाय का
पोतस्य वचः स्मरन् जगमतुर्द
क्षिणं काष्ठां यत्र संध्याचलः स्थि
तः। कांतानाम नदी तत्रवशि
ष्ठेनावतारिता। तस्या स्तीरे
महाशैले स्वेयच्छाया लता
तदा। संध्यां वशिष्ठः कृतवान्
तत्र यस्माद्धियेः स्मृतः। अतः सं
ध्याचलो नाम तस्य गायंति दे
वताः। इति कालिकापुराणे ५०
अध्यायः॥ अपिच॥
तोभकाख्यान्महाशैलाद्देश
त्मा पर्वतोत्तमः। तेनाः संध्या
चलोनाम वशिष्ठो यत्र धाम
वान्। निमे नाम्ना तु राजर्षेः
शापाद्ध्रस्तस्ततः पुरा। वशि
ष्ठो ह्यशरीरोभूत्तत्का पाद्धुनि
मित्रया। ततो ब्रह्मोपदेशे
न निर्जने कामरूपके। संध्या
चलेतपस्तेपे तस्य विस्तरभू
तदा। प्रसन्नस्तस्य देवस्य व
रदानान्महामुनिः। अमृता
स्वतीर्थ्यं कुंडं कृत्वा शिरे
स्थले तत्र स्नात्वा च पीत्वा च
शरीरं प्राप दृविते। तस्माद०
स्तत्कुंडात्तु संध्यानामनदी
वरा। निःसृता तत्रचास्तित्य चिरा
पुरगतो भवेत्। इतिच कालि
कापुराणे ८१ अध्यायः॥
संध्यानाटी पुं शिवः। इतिश
ब्दरत्नावली त्रिकांडशेषौ॥
संध्यापुष्पी स्त्री जाती। इति
राजनिर्घण्टः॥
संध्यावलः पुं राक्षसः। इति
त्रिकांडशेषः॥
संध्यावलिः पुं शिवालयस्थि
तम्नत्काष्ठादिनिर्मितवृषः।
यथा। ये शिवायतनेभ्यन्तरेण।
ते संध्यावलयो वृषाः। इ
तिहारावली॥
संध्यांशु स्त्री सवर्णा चैविकं।
इतिराजनिर्घण्टः॥
संध्यारागं स्त्री सिंदूरं। इति
राजनिर्घण्टः॥
संध्यारामः पुं ब्रह्मा। इतिश
ब्दरत्नावली॥
सन्नः पुं पियालवृक्षः। इत्यम
रटीकायां भरतः॥
सन्नकः पुं खर्वः। इतिसन्नकदु
शब्दटीकायां भरतः॥
सन्नकद्रुः पुं पियालवृक्षः। अम
रः। सन्नकः खर्वो द्रुः स्कन्धो।

ऽस्येति सन्नकद्रुरिति स्वामी
सन्नको द्रुमेति द्वे नामनी०
इति सोमनंदी। इति भरतः।
सन्नतिः स्त्री प्रणतिः। ध्वनिः
इतिमेदिनी। नम्रता। यथा
हरिवंशे। यत्र श्रीः ह्रीः स्थि
तानत्रयत्र श्रीस्तत्र सन्नतिः। सन्न
ति श्रीस्तथाश्रीश्च नित्यं कृष्णे
महात्मनि॥ इति तिथ्या
दितत्वे॥
सन्नद्धः त्रि वर्म्मितः। कृतसमा
हः। व्यूढः। व्यूहविन्यासयुक्तः
इतिमेदिनी। आततायी॥
वधोद्यतः। इत्यमरटीकायां
रायमुकुटः। संयादिसंयुतः।
इति शब्दरत्नावली॥
सन्नयः पुं समूहः। पृष्ठस्था
यिवलः। इत्यमरमेदिनीकरौ
सन्नाहः पुं युद्धार्थं सज्जा
या इति भाषा। तत्पर्यायः।
वर्म्म २ कंकटः ३ जगरः ४
कवचं ५ दंशः ६ तनुत्रं ७ सा
यी ८ उरश्छदः ९ इतिहेमचंद्रः
सन्नाह्यः पुं युद्धोद्योगगजः।
यथा। राजवाह्यस्तु पवाह्यः
सन्नाह्यः समरोचितः। इति
हेमचंद्रः॥
सन्निकर्षः पुं स्त्री सान्निध्यं। तत्प
र्यायः। पार्श्वं २ समीपं ३ स
विधं ४ समीपाभ्यासे ५ सवेशः
६ अंतिकः ७ सदेशः ८ अभ्य
र्णं ९ सनीडं १० सन्निधानं ११
उपांते १२ निकटं १३ उपकण्ठं
१४ सन्निकृष्टं १५ समर्य्यादं
अभ्यर्णं १६ आसन्नः १७ सन्नि
धिः १८ इतिहेमचंद्रः॥
न्यायमते विषयेंद्रियसंबंधः
स च ज्ञानस्य कारणं। सतु
द्विविधः। लौकिकसन्निकर्षः
अलौकिकसन्निकर्षश्च लौकि
कसन्निकर्षश्च षड्विधः। इंद्रि
यसंयोगः १ इंद्रियसंयुक्तसम
वायः २ इंद्रियसंयुक्तसमवेतस
मवायः ३ श्रोत्रादिसमवायः।
४ श्रोत्रादिसमवेतसमवायः ५
तदादिविशेषणता ६ अलौकि
कसन्निकर्षस्तु त्रिविधः। सामा
न्यलक्षणा १ ज्ञानलक्षणा २ यो
गजः ३ यथा। महत्वे षड्विधे
हेतुरिंद्रियं करणं मतं। वि
षयेंद्रियसंबंधो व्यापारः सो
पि षड्विधः॥ द्रव्यग्रहस्तु सं
योगात् संयुक्तसमवायतः। द्र
व्येषु समवेतानां तथा तत्र।

समवायतः। तत्रापि समवे
तानां शब्दस्य समवायतः।
तद्वृत्तीनां समवेतसमवायेन
तद्ग्रहः। विशेषणतया तद्वद
भावानां ग्रहो भवेत्। यदि
स्यादुपलभ्येतेत्येवं यत्र प्रस
ज्यते। प्रत्यक्षे समवायस्य वि
शेषणतयाभवेत्। अलौकि
कः सन्निकर्षस्त्रिविधः परि
कीर्तितः। सामान्यलक्षणोज्ञा
नलक्षण योगजस्तथा। आस
त्ति राश्रयाणां तु सामान्यज्ञा
नमिष्यते। तदिंद्रियज तद्धर्म
बोधसामग्र्यपेक्ष्यते। विषयी
यस्य तस्यैव व्यापारो ज्ञानल
क्षणः। योगजो द्विविधः प्रो
क्तो युक्तयुंजान भेदतः॥
युक्तस्य सर्वदाभानं चितास
हकृतोऽपरः। इति भाषाप
रिच्छेदः॥
सन्निकर्षणं क्ली सन्निधाने तत
पर्यायः। सन्निधिः २ इति सं
कीर्णवर्गे अमरः। सन्निधं २
इति भरतः॥
सन्निकृष्टः त्रि सन्निकर्षविशि
ष्टः। निकटः। इति विशेष्यनिघ्न
वर्गेऽमरः। अस्य पर्यायः समीप
शब्दे द्रष्टव्यः॥
सन्निधं क्ली सन्निधाने। इति
भरतधृततोपालितः॥
सन्निधाने क्ली निकटे। इति
हेमचंद्रः। आश्रयः। यथा।
आरंभः संधायानामविनयभव
नेपथ्ये साहसानां दोषाणां
सन्निधाने कपट पातमयं ते
यत्प्रत्ययानां। दुर्ग्राह्यं यन्म
हद्भिः स्वरनरवृषभैः सर्वमाया
करंडं स्त्रीरूपं केन लोके
विषममृतमयं धर्मनाशाय
सृष्टं। इति शांतिशतके॥
सन्निधिः स्त्री सन्निकर्षः। इन्द्रि
यः। इंद्रियगोचरः॥ इति
मेदिनी॥
सन्निपतितः त्रि एकत्रीकृतः
मिश्रितः। संनिपूर्वकपतधा
तोः क्तप्रत्ययेन निष्पन्नः॥
सन्निपातः पुं तालभेदः। यथा
एकपञ्चगुरुद्वयेन सन्निपातः स उ
च्यते। इति संगीतदामोदरः॥
विकारोत्पादकमिलितदोष
त्रये। अस्यत्रयोदश नामल
क्षणानि यथा। संधिगस्तांत्रि
कश्चैव ससाध्यश्चित्तविभ्रमः।
कष्टसाध्यः कंठकुब्जः कर्णिको

कम्बो से

जिह्मगस्तथा। कष्टात् कष्टत
मो ज्ञेयो रुग्दाहो हंति मानवं
अंतको भग्ननेत्रश्च रक्तष्ठीवी
त्रिपातकः। शीतांगश्च प्रला
पश्च अभिन्यासोऽतिमारकः
ज्ञातव्याः सर्वदा वैद्यैः सन्नि
पाता त्रयोदश। माधवीये
शीतज्वरा स्तांत्रिकश्चित्तविभ्रमः
कण्ठकुब्जकः। कर्णिको जि
ह्मगश्चैव कष्टसाध्यानकस्तथा
भग्ननेत्रो विलापश्च प्रलापश्शी
तलांगकः। अभिन्यासश्च निवि
धान् सन्निपाता त्रयोदश॥
सदारूपं प्रोष्यमाणं हर्षोत्फुल्लका
सोऽनिवेदना शोषश्च लक्ष
णान्येव शीतज्वरो सान्निपाति
के १ शीतं तंद्रा ज्वरः श्वासः का
सस्तापोऽतिसारकः। स्थूलकंठः
स्तिताश्यपासा जिह्वाकण्ठचक्र
ज्ञति। इति तल्या चेति विद्यात्त
तांद्रिके सान्निपातिके २ मदो
मोहो भ्रम स्तापो हास्य गीत
प्रलापनं। नित्यं वैकल्पिता
पीडा विकटात्रिनिद्रीलक्षणाः। ल
क्षणैः सन्निपातोऽयं ज्ञातव्यश्चि
त्तविभ्रमः। ३ कंठग्रहो ज्वरो
मूर्च्छा दाहः कम्पो विलापनं
मोहस्तापः शिरोर्तिश्च वाता
र्त्तेः प्रलयं गतः। कंठकुब्जे स
न्निपाते कष्टसाध्यं विनिर्दिशे
त् ४ ज्वरः कर्णेतपोत्थश्च श्वा
सः कम्पः प्रलापनं। स्वेदः कंठ
ग्रह स्तापः स्तम्भो हो भयमेव च
कर्णिके सन्निपाते च लक्षणा
नि भवंतिहि ५ संकटा कठिना
जिह्वा कासः श्वासोऽतिविक
लः। मूको बधिरता तापो बल
हानिश्च लक्षणं। जिह्मगः सन्नि
पातोऽयं कष्टात् कष्टतरः परः
मोहस्तापः प्रलापश्च व्यथाक
ण्ठभ्रमः श्रमः। वेदना च तृषा
जाड्यं श्वासश्च लक्षणो विशेः।
कष्टात्कष्टतरो ज्ञेयः कण्वाहः
सान्निपातिकः ७ दाहो मोहः
शिवः कम्पो हिक्का श्वासोऽत
मर्दनं। संतापश्चांतको ज्ञेयः स
न्निपातोऽतिमारकः। ८। स्रस
ने लोचने भुग्ने स्मृति स्खला
ज्वरोऽधिकः। मोहः प्रलापने
कम्पो भ्रमो निद्राचललक्षणः।
ज्ञातव्यो भग्ननेत्रोऽयं सन्नि
पातः क्षयंकरः ९ रक्त निष्ठी
वनं मूर्च्छा ज्वरो मोहस्तृषा
भ्रमः॥ वांति हिक्कातिसारश्च

संज्ञानाशोहृदि व्यथा मंडले
क्षणाव रक्तश्च देहेषु लक्षणो
दिभिः। ज्ञातव्यः सन्निपातोयंर
क्तष्ठीवी निपातकः १० प्रला
पलाप कर्णार्त्तिः प्रलापाशो
गतितापवान्। ज्ञेयः प्रलापक
श्चिह्नैः सन्निपातोतिमारकः।
११ शरीरे हिमवत् शीत मति
सारश्च कम्पते। कर्णनादो ह
त्तापो हि कासश्वासः कफोत्क्ले
शः। संधौ शीतलो हेति शीतां
गः सन्निपातकः १२ त्रिदोषेच
मुखे शुष्कं निद्रा वैकल्य कंठ
वाक्। निश्चेतन मतिश्वासो-
मंदाग्नि र्वलहीनता। मृत्युतुल्य
मभिन्यासं सन्निपातश्च लक्षये
त् १३ इति चक्रपाणिदत्तः॥
यं दृष्ट्वा यस्य संभवः स तस्य स
न्निपातः। सन्निपात विधिरनि
मित्ते तद्विघातस्य। इति कला
पव्याकरणे ४ टीका २ प्रकरणे
समस्तः। यथा। प्रसज्यपातिः स-
न्निलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटु करणैः प्रा
णिभिः प्रापणीयाः। इत्यौत्सु
क्यादपरिगणयन् गुह्यकस्तंय
याचे कामार्त्ता हि प्रकृति कृपणा
श्चेतनाचेतनेषु। इति मेघदूतः
सम्यक्प्रकारेण पतनेमर-
णञ्च॥

सन्निपातज्वरः पुं त्रिदोषजज्व
रः। स तु त्रयप्रकारज्वरान्तर्गत [?]
ज्वरविशेषः। त्रयस्त्वविशेषेणेति [?]
वातिकः पैत्तिकः श्लैष्मिक श्चेति
त्रयः। द्वंद्वजास्त्रयः। वातपै-
त्तिकः वातश्लैष्मिकः पित्तश्लै
ष्मिकश्चेति। सन्निपातजः सन्नि-
पातिक एकः। उल्वणैकोल्व
णैः षट्स्युर्हीन मध्याधिकैश्च
षट्। समैश्चैको विकारास्ते सन्
निपाता स्त्रयोदश। इति चरके
ण त्रयोदश सन्निपाता उक्ताः
ते यथा वातोल्वणः १ पित्तो
ल्वणः २ कफोल्वणः ३ वात
पित्तोल्वणः ४ वातश्लेष्मोल्वणः
५ पित्तश्लेष्मोल्वणः ६ एवं षट्
अधिकवातो मध्यपित्तो हीन-
कफः १ अधिकवातो मध्यक
फो हीनपित्तः २ अधिकपित्तो-
मध्यवातो हीनकफः ३ अधिक
पित्तो मध्यमकफो हीनवातः ४
अधिककफो मध्यवातो हीन
पित्तः ५ अधिककफो मध्यपि
त्तो हीनवातश्चेति ६ षट् समल्वण

एकः १ एवं त्रयोदश। अत्र त
त्त्रिदोषजत्वेन साम्यात्सन्नि
पातिक एक एव गणितः। आ
गन्तुजोपि एक एव अत्र आगं
तुजशब्देन अभिघातादयो हे
तव उच्यंते। ज्वरचिकित्सायाः का
र्यकारणयो रभेदोपचारात्
इति ज्वराधिकारे भावप्रकाशः
अथ सन्निपातज्वराधिकार-
माह। तत्र सन्निपातज्वरस्यातिम
हत्त्व सन्निकृष्टकारणकथनपू
र्विकां संप्राप्तिमाह। त्रिदोषजन
के वातपित्तश्लेष्माणः समोहताः। [?]
वहिं निरस्य कोष्ठाग्निं रसगा
ज्वरकारिणः। एवं रूपमाह।
प्राग्रूपाणि त्रिदोषाणां स्युर्हि
दोषज्वरेरिताम्। [?] सन्निपातज्व
रस्य सामान्यानि लक्षणान्या
ह। क्षणे दाहः क्षणे शीतमस्थि
संधि शिरोरुजा सास्रावे कलु
षेरक्ते निर्भुग्नेचापि लोचने।
सस्वनौ सरुजौ कर्णौ कण्ठः
शूकैरिवावृतः। तंद्रा मोहः प्र
लापश्च कासश्वासोरुचिर्भ्रमः
परिदग्धा खरस्पर्शा जिह्वास
स्तांगता परं ष्ठीवनं रक्तपित्त
स्य कफेनोन्मिश्रितस्य च शिर
सो लोठनं तृष्णा निद्रानाशो
हृदि व्यथा। स्वेद मूत्र पुरीषा
णां चिराद्दर्शन मल्पशः। कृश
त्वं नातिगात्राणां प्रततं कण्ठ
कूजनं। कोठानां श्यावरक्ता
नां मण्डलानां च दर्शनं मूक
त्वं स्रोतसां पाको गुरुत्व मुद
रस्य च। चिरात्पाकश्च दोषाणां
सन्निपातज्वराकृतिः। लोचने
सास्रावे साश्रुणी। कलुषे रक्ते
निर्भुग्ने निर्गते कुटिलेच।
कण्ठः शूकै रिव धान्याग्रै रि
वावृतः। जिह्वापरिदग्धा परि
दग्धेव ज्ञायते। अथवा परिदग्धे
व कृष्णा दृश्यते। स्रस्तांगता शि
थिलगात्रता। परं अतिशयेन
ष्ठीवनमिमादि कफसंपृक्तस्य
रक्तस्य पित्तस्य च ष्ठीवनं। शिरसो
लोठनमितस्ततः शिरश्चालनं
कृशत्वं नातिगात्राणां गात्रा
णामतिशयितं कार्श्यमत्याधि [?]
प्रभवात्। प्रततं निरंतरं कोठः
वरटीदंश संस्थानः कोठ इत्यभि
धीयते। [illegible] वर्णाः
मूकत्व मवचनत्वं मल्पवचन
त्वं [illegible] कर्णनासादीनां
[illegible]

ण तेषां सम्भूयैककार्य्यारम्भ
कत्वे नोपपद्यते परस्परोपघा
तात् दहनसलिलयोरिव तत्
कथं वात पित्त कफा मिलित्वा
विकारोत्पादकाः अत्र समा-
धान मुक्तं दृढबलेन। विरुद्धै
रपिनत्वेतेगुणै र्घ्नंति परस्परं
दोषाः सहजसात्म्यत्वा द्विषंघो
र महीनिव। गदाधरस्तु हेत्व
न्तरमुक्तवान्। दैवाद्दोषस्वभा
वाद्वा दोषाणां सान्निपातिके
विरुद्धैश्च गुणैःकश्चिन्नोपघा
तः परस्परमिति। ननु भिन्न
चय प्रकोप कालानां वातपि
त्त कफानां युगपदुत्पादाभा
वात् कथं सम्भूय सन्निपातज्वरा
रम्भकत्वमुपपद्यते उच्यते त्रिदोष
जनक निदान बलेन युगपद्दोषा
प्रकोपादिति सिद्धान्तः॥ अ
थ सामान्यसन्निपातज्वरस्य त्र
योदश विशेषानाह एकोल्वण
स्त्रय स्ते स्यु र्द्व्युल्वणाश्च त्रयोपि
षट्। मल्वणाश्च भवेदेको वि
ज्ञेयः सत्र समैः। प्रवृद्ध म
ध्यहीनैस्तु वात पित्त कफैश्च
षट् सन्निपातज्वरस्यैवं स्यु र्वि
शेषा स्त्रयोदश तत्र प्रवृद्ध-
वातो मध्यपित्तो हीनकफः १
मध्यवातः प्रवृद्धपित्तो हीनक
फः २ हीनवातः प्रवृद्धपित्तो
मध्यकफः ३ प्रवृद्धवातो ही
नपित्तो मध्यकफः ४ मध्यवा
तो हीनपित्तः प्रवृद्धकफ ५ ही
नवातो मध्यपित्तः प्रवृद्धकफ
श्चेतिषट् ६ तेषांनामानि क्रमा
दाह। विस्फारकः आशुकारी
कम्पनो बभ्रुसंज्ञकः शीघ्रका
री तथा भल्लुः सप्तमः कूटपा
कलः। संमोहकः पाकलश्च या
म्याः क्रकचइत्यपि तद्वत् कर्क
टकः प्रोक्तस्तनो वैदारिकाभिधः
तेषांतरे विस्फारक इत्यत्र वि
स्फुरक इति पाठः। बभ्रुस्थाने
विभुरिति पाठः कुत्रापिविद्ध
इत्यपि पाठः भल्लुरित्यत्र फल्गु
रिति पाठः याम्य इत्यत्र संग्रा
म इति पाठः कर्कटक इत्यत्र
कर्क्कोटक इति पाठः॥ तत्र
वातोल्वणस्य लक्षणमाह।
श्वासः कासो भ्रमो मूर्छा प्रला
पो मोह वेपथुः पार्श्वस्य वेदना
जृम्भो कषायत्वं मुखस्यच वा
तोल्वणस्य लिंगानि सन्निपात
स्य लक्षयेत् अथ विस्फारकोना-

म्ना सन्निपातः सुदारुणः १॥
अथ पित्तोल्वणस्य लक्षणमाह
अतीसारो भ्रमो मूर्छा मुखपा
कस्तथैवच। गात्रेचविंदवो रक्ता
दाहोतीवप्रजायते। पित्तोल्व
णस्य लिंगानि सन्निपातस्यल
क्षयेत् भिषग्भिः सन्निपातोः
यमाशुकारी प्रकीर्तितः २॥
अथ कफोल्वणस्य लक्षणमा
ह। जडता गद्गदावाणी रात्रौनिद्रा
भवत्यपि। प्रस्तब्धे नयने चैवमु
खमाधुर्य्य मेवच कफोल्वण
स्य लिंगानि सन्निपातस्यलक्ष
येत्। मुनिभिः सन्निपातोयमुक्तः
कम्पनसंज्ञकः ३। अथवात-
पित्तोल्वणस्य लक्षणमाह।
वातपित्ताधिको यस्य सन्निपा
तः प्रकुप्यति। तस्यज्वरो मदस्तृ
ष्णा मुखशोष प्रमीलकाः।
आध्मानारुचि तंद्राश्चकास
श्वास भ्रम श्रमाः। मुनिभिर्व
भ्रुनामायंसन्निपातउदाहृतः ४
अथवातश्लेष्मोल्वणस्य लक्ष-
णमाह वातश्लेष्माधिकोयस्य
सन्निपातः प्रकुप्यति। तस्यशी
तज्वरोमूर्छास्तत्स्वापार्श्वनिग्र
हः। शूल मस्विद्यमानस्य हिक्का
श्वास-
स्तुजायते असाध्यः सन्निपातो
ऽयं शीघ्रकारीति कथ्यते। न
हि जीवत्यहोरात्र मनेनाविष्ट
विग्रहः ५ अथपित्त श्लेष्मो
ल्वणस्य लक्षण माह। पि
त्ते श्लेष्माधिको यस्य सन्निपा
तः प्रकुप्यति। अंतर्दाहो बहिः
शीते तस्य तृष्णा प्रवर्द्धते॥
तुद्यते दक्षिणंपार्श्व मुरः शी
र्षगलग्रहाः ष्ठीवति श्लेष्म पि
त्तञ्च कृच्छ्रात् कण्ठश्च दूयते
विड्भेदः श्वास हिक्काश्च वर्द्धन्ते
सप्रमीलकाः। ऋषिभिर्भल्लुना
मायंसन्निपात उदाहृतः ६॥
अथवातपित्त श्लेष्मोल्वणस्य
लक्षण माह। सर्वदोषोल्वणो य
स्य सन्निपातः प्रकुप्यति त्रयाणा
मपि दोषाणां तस्य रूपाणिलक्ष
येत् व्याधिभ्यो दारुण श्चैव
वज्र शस्त्राग्निसन्निभः। केवलो
च्छ्वास परम स्सर्वांगस्तब्ध
लोचनः। त्रिरात्रोपरमेतस्य जं
तोर्हरति जीवितं। तदवस्थं तं
दृष्ट्वा मृत्यो र्व्याहरते जनः ७
षितो राक्षसै र्नत्र भवेल्लायो
चरंतिये। अंबया ब्रुवते केचि
त्ययति एषा ब्रह्मराक्षसैः पि



शाचै गुह्यके श्वेव तथान्ये म
स्तकेहते । कुलदेवर्षिनाहीने
पर्षिते कुलदेवतैः । नेत्तद्वपी
डा सपदे गरकर्मेति चापरे ।
सन्निपात मिमंप्राहुर्भिषजः
कूटपाकलं ७ अथ प्रवृद्ध-
मध्यहीन वातादि जनित स
न्निपात ज्वराणां लक्षणान्या
ह । प्रवृद्धमध्यहीनेस्तु वातपि
त्तकफैस्त्रयः । तेनरोगा स्त्रयो
क्ता यथादोषवलाश्रयाः प्र
लापायास सम्मोह कंपमूर्छा
रति भ्रमाः एकपक्षाभिघातः
स्तत्राप्यत द्विशेषतः । एष स
म्मोहको नाम्ना सन्निपातःस
दारुणाः । रोगा स्त्रयश्चोक्ता उक्ता
एव ते रोगाः यथा वेपथु नि
द्रानाश विष्टम्भादयो वातजाः
दाहतृष्णास्तला स्वेदादयःपित्त
जाः । गौरवाग्निमान्द्यालस्य का
सिका मुखप्रसेकादयःकफजाः
तत्रापि प्रलापादयःपक्षाघाता
ता द्विशेषाद्भवंति । ननुवातः
प्रवृद्धःसन् ज्वरं करिष्यतिपि
त्तेतु मध्यंममिति यावत् त
त्कथं ज्वरंकरिष्यति । यत्राह
धातव स्त्वमला दोषानाश्रयंता

समा स्तनु । समाःस्वखाय विज्ञे
या वलायोपचयाय चेति । उच्य
ते । अत्र पित्ते मध्य मपि अ
कृत मेव यतो ःप्रकृतयोवीत
श्लेष्मणो रपेक्षया मध्यंतेन-
मध्यं मध्यकुपित मित्यर्थः ॥
ननुकफः क्षीणः सकथंज्वरं
करिष्यति हीनशक्तिकत्वात्
उच्यते दोषाः क्षीणा अपिक्षा
थीन् कुर्वंत्येव यत आह । वा
त क्षयेल्पचेष्टत्वं मंदवाकत्वं
विसंज्ञता पित्तक्षयेपिकश्लेष्मा
वृद्धिर्मन्दःप्रभाक्षयः । शिथिलाः
संधयो मूर्छा रौक्ष्य दाहोकफक्ष
य इति । इत्याशंकासिद्धान्त श्ला
घत्रापि ८ । मध्यप्रवृद्ध ही
नेस्तु वात पित्त कफैस्त्रयः ॥
तेनरोगा स्त्रयोक्ता यथादो
षवलाश्रयाः । मोहप्रलाप मू
र्छाः स्यु र्मन्यास्तंभः शिरोग्र
हः । कासः श्वासो भ्रमस्तंद्रा
संज्ञानाशो हृदिग्रहः ॥ रव
श्रेया रक्तं विसृजति तंद्राप्या
त स्त्रव्यनेत्रता । तत्राप्येतावि
शेषाःस्युर्मन्यास्तंभ स्वीकं विवा
सवात् । भिषग्भिःसन्निपातोयं
कथितः पाकलाभिधः ९ ॥

हीन प्रवृद्ध मध्यस्तु वातपित्त
कफैस्त्रयः । तेन रोगा स्त्रय
श्चोक्ता यथादोषवलाश्रयाः
हृदयं दह्यते चास्य यकृत्प्ली
हांत्र फुप्फुसाः । पच्यंतेऽत्यर्थ
मूर्ध्वाधः एव शोणित निर्गमः
शीर्णदंतस्य मृत्युस्तु तत्राप्यत
द्विशेषतः । भिषग्भिःसन्निपा
तोऽयं याम्यनामा प्रकीर्तितः
१० । अथ प्रवृद्धवात मध्यपि
त्त हीनकफस्यसन्निपातस्यल
क्षणमाह प्रवृद्ध मध्यहीनेस्तु
वात पित्त कफैस्त्रयः । तेन
रोगा स्त्रयश्चोक्ता यथादोषव
लाश्रयाः । प्रलापायाससंमोह
कम्पमूर्छा रति भ्रमाः । मन्या
स्तंभेन मृत्युस्तु तत्राप्यतद्वि
शेषतः । उक्तः क्रकचनामा-
ऽयं सन्निपातो भिषग्वरैः ११
मध्यहीन प्रवृद्धैस्तु वातपि
त्त कफैस्त्रयः । तेन रोगास्त्र
योक्ता यथादोषवलाश्रयाः
श्वेतदाहो विशेषाः स्वनवक्र
सशकाते । रक्त मालकके-
नेव लक्ष्यते मुखमंडलं ॥
यत्नेनाकर्षितः श्लेष्मा हृदया
न प्रसिच्यते इषुणेवाहतं ।

पार्श्वं तुद्यते खन्यते हृदि ।
प्रमीलक श्वास हिक्का वर्द्धते
तुदिने दिने । जिह्वा दग्धा ख
रस्पर्शा गलः शूके विवाहतः
विसर्गे नाभिजानाति कर्णेश्वा
पि कपोतवत् । प्रतीकश्लेष्म
णाधर्णः शुष्कवक्त्रोष्ट तालुकः
तंद्रानिद्रातियोगार्त्तःश्रवाणिहृ
तद्युतिः । न चातिलभते शांतिं
विपरीतानि चेष्टते । आयस्य
तेच वक्त्रेण रक्तं ष्ठीवति चास्य
गः । एषकर्कटको नाम्ना सन्नि
पातः सुदारुणः १२ । हीन मध्य
प्रवृद्धैस्तु वातपित्त कफैस्त्रयः
तेन्रोगास्त्रयोक्ता यथादोष
वलाश्रयाः । अलं प्रलंकरो
तोदो मध्यादाहोरुजा भ्रमः ।
भूयो क्लमः शिरो वक्र मन्याहृ
दयवाग्रुजः । प्रमीलकः श्वास
हिक्का कास जाड्य विसंज्ञताः
प्रथमात्यम मेतेन साधयेत
कदाचन । एतस्मिन्सन्निहन्तेतु
कर्णमूलेसुदारुणा । पिडका
जायतेजंतोर्यथाकृच्छ्राण्जीव
ति । वैदारिकसंज्ञो ऽयं सन्निपा
तः सुदारुणः । विशेषपक्षेऽनस्य
र्थ मोषयकल्पनः १३ ॥

अथ तंत्रांतरे। वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां शीतांगादीनि त्रयोदशनामांतराणि लक्षणांतराणि चाह। शीतांग हिमलोद्भव ज्वरगणेतंद्री प्रलापी तनोरक्तष्ठीव चित्ताचलत्वगणितः संभुग्ननेत्र लघ्या। साभिन्यासककजिह्वकस्य कथितः प्राकसन्धिगोष्यांतको रुग्दाहः सहचित्तविभ्रम इह हेकण कण्ठग्रहो तंद्री तंद्रिक। प्रलापीप्रलापकः रक्तष्ठीवयिता रक्तष्ठीवी। संभुग्ननेत्रो भुग्ननेत्रः। अभिन्यासकः अभिन्यासः। कर्णकण्ठग्रहो कर्णग्रहः कर्णकः। कण्ठग्रहः कंठकुब्जकः। अथ तेषां प्रत्येके लक्षणानि। हिमशिशिर शरीरः सन्निपातज्वरी यः श्वसन कसन हिक्कामोह कंपप्रलापैः। क्लम वङ्कफतांतर्दाह वम्यंगपीडा स्वरविकृतिभिरार्तः शीतगात्रः स उक्तः १ तंद्रातीव तत्र तृष्णातिसारो श्वासोऽधिकः कासरुक संतप्तातितनु गले श्यावयुता साहं च कण्डूः कफः। सुप्रणाम्य रसना क्लमः श्रवणयोर्मांद्यं च दाहस्तथा स्यात् सहितंद्रिको निगदितो दोषत्रयोत्थो ज्वरः २ यत्र ज्वरे निखिलदोष नितांतरदोषज्जातेप्रलापबहुलाः सहसोत्थिताश्च। कम्पव्यथा पतन दाह विसंज्ञताः स्युर्मोग्न्या प्रलापक इति प्रथितः पृथिव्यां ३ ॥ निष्ठीवो रुधिरस्य रक्त सदृशं कृष्णं तनो मंडले लोहितं नयने तृष्णा रुचि वमि श्वासातिसारभ्रमाः। आध्मानञ्च विसंज्ञताचलपनं हिक्कांगपीडा भृशं रक्तष्ठीविनि सन्निपात जनिते लिंगं ज्वरे जायते ४ भुग्ने नयने रक्तता श्वसन कास तंद्रा भ्रमाः प्रलापमदवेपथुश्रवणहानिमोहाश्च तथा। अंगे निखिलदोषजे भवति यत्र लिंगं ज्वरेश्वरा तं चिकित्सकैः स इह भुग्ननेत्रो मतः ५ दोषा लीनतराभवंति बलिनः सर्वेऽपि यत्र ज्वरे मोहोतीव विचेष्टता विकलता श्वासो भृशोन्मकता। दाह श्रिक्काण मानतञ्च दहनो मंदत्वलस्यलयः सोभिन्यास इति प्रकीर्तित इह प्राज्ञैर्भिषग्भिःपुरा ६। त्रिदोषजनिते ज्वरे

यत्र

भवति यत्र जिह्वा भृशं हता कठिनकंठके लदनुमूकता मूढता। श्रुतिहति बलक्षतीश्व सन कासक्षतमयः उदाहत भिषग्भरा लक्षिह जिह्वकं वदते ७ यत्रातिशयिता भवत्युयथु संयुतासंधिषु प्रभूत कफता सुखे विगतनिद्रता कासरुक। समस्तमिति कीर्तितं भवति लक्षम यत्र ज्वरे त्रिदोषजनिते बुधैः स हि निगद्यते संधिगः ८ यस्मिन् लक्षणमेतदस्ति सकले दोषे रुदीते ज्वरेऽजस्रं मूर्द्धविधूननं सकसनं सर्वांगपीडाधिका। हिक्का श्वास सदाह मोहसहितादेहे तिसंभूता वैकल्यं च तथा वचांसि मुनिभिः संकीर्तितः सोन्तकः ९ दाहोधिको भवति यत्र तृषा च तीव्रा श्वास प्रलापविरुचिभ्रम मोह पीडाः मन्या हनुव्यथन कण्ठरुजाश्रमाश्च रुग्दाहसंज्ञ उदित स्त्रिभवोज्वरोऽयं १० ॥ गायति नृत्यति हसति प्रलपति विकृतं निरीक्षते शुष्येत्। दाह व्यथा भयार्तो दोषत्रय चित्तविभ्रमो ज्वरवान् ११। निःशेष दोष जित ज्वरेशोषजन्मा स्यात् कर्णमूल विषये श्वयथुर्व्यथा च कंठग्रहो बधिरता श्वसनप्रलापप्रस्वेदमोहदहनानि च कर्णकाख्ये १२ कण्ठः शूक शतावरुद्धवदतिश्वासः प्रलापोऽरुचिर्दाहो देहरुजा तृषापि च हनुस्तम्भः शिरोर्तिस्तथा। मोहो वेपथुना सहेति सकलं लिंगं त्रिदोषज्वरे यत्र स्यात् स हि कंठकुब्ज उदितः प्राज्ञैश्चिकित्सावरैः १३ ॥

संधिग लघु साध्यः स्यात्तंद्रिकश्चित्तविभ्रमः। कर्णको जिह्वकः कण्ठकुब्जः पंचाधिकष्टकाः रुग्दाहः त्वन्तकश्चेत्यसंसाध्यके शुभाषितः। रक्तष्ठीवी भुग्ननेत्रः शीतगात्रः प्रलापकः। अभिन्यासोऽन्तकश्चेति षडसाध्याः प्रकीर्तिताः ॥ अथ तंत्रांतरे। वातोल्वणादीनां सन्निपातज्वरविशेषाणां त्रयोदशानां कुंभीपाकादीनि त्रयोदश नामांतराणि लक्षणांतराणि चाह। कुंभीपाकः प्रोर्णुनावः प्रलापी शंतदाहो दंडपातोऽन्तकसु। एणीदाह श्वास हारि

ज द्रसेना

भेदा एते सन्निपातज्वरस्य ।
भुग्ननेत्रोष भूतहासो यंत्रापीड
स्तु संन्यासः । संशोषीच विशे
षा स्तस्यैवोक्ता स्त्रयोदश च
ग्रंथेषां लक्षणानि । शीतगावि
दर कंठकूणिताक्षिसमील
लोहिते सार्ति । विलुठन् म
स्तकमभितः कुंभीपाकेन पी
डितं विद्यात् । उत्तिष्ठयः स्व
मंगोत्तिपत्त्यप्रलापविनीत मुहु
क्षिति । तं प्रोर्णुनावक्तुष्टं विर्चि
कष्टं विज्ञानीयात् । स्वेद भ्रमांगा
पीडा कंपा दवथुर्वमी व्यथा
कंठे । गात्रं च गुर्वतीदं प्रलापि
तुषस्य जायते लिंगं । अंतर्दाहः
शैत्यं बहिस्थ यस्य विशेषतः
श्वासः । अंगमिवदग्धकल्पसो
न्तर्दाहार्दितः कथितः । नक्तं दि
वानिद्रा कुपेति शृङ्खलाति सृ
कथीर्नेभसः । उत्थायदण्डपाते
भ्रमात्तुरः सर्वतो भ्रमति । तभ
सो गृह्णाति शाकापतत् किं
चिद्दुही वं कर्कोकसो प्रसारयति
दृष्ट्यैः । संस्पृष्यते शरीरं पिपि
भितस्तत्रयो दंशमकता । स्वासा
तुरस्य घाततं विचेतनस्यांतकान्ते
सा । परिधावतीव गात्रे ह्रकाचे·

भुजगा पतगा हरिणाकाः वे
पथुमतः सदाहस्पैणी दाहज्व
रांगस्य । रुक्पात्रे पीडाभाजने
गात्रस्य विशेषणमेतत् । यस्या
तिपीत मेगा नयने सततं मले
ततोऽप्यधिकं । दाहोतिशीतता
वहिरस्य स हाविडकोज्ञेयः ॥
छुगालक शरीरकंपः स्कन्ध
हनुवाभिरुद्ध गलरंध्रः ॥
प्रजल्पोष सन्निपातादाताम्रा
लस्सुमाह्वभवति । न स्वान्विषया
न् यंत्रींद्रियग्रामः । हसति प्रलप
ति परुषसत्तेयो भूतहासान्नं:
येन युक्तं ज्वरवेगायंत्रेणैवाव
पीडितेनांगं । रक्तं पीतं च वमेत्
यंत्रापीडः स विज्ञेयः । श्रांति
स्रवति वमति कूजति गात्रा
ण्यभित क्षिपं नरः क्षिपति ।
सस्यासस्य सन्निपाते प्रलपति भु
ग्नाक्षिमंडलो भवति । मेचकव
पुरसितमेचकलोचनयुगलोः
वलो मलोत्सर्गात् संशोषि
णि शितपिडका मंडलयुक्तो
ज्वरे भवति । नारायणप
द विषप्रभेषजमेतेषु ज्ञान्
वीनीरं । नैरुज्यहेतुरेको·
नित्यं मृत्युंजयोध्येयः ॥

शाखारीन पिपाळति

अथासाध्यसन्निपातज्वरस्य ल
क्षणमाह । सन्निपातज्वरस्या
न्ते कर्णमूले सुदारुणः ।
शोथः संजायते तेन कश्चि
देव प्रमुच्यते । सुदारुणः सा
रकत्वात् यतस्तेन शोथेन क
श्चिदेव प्रमुच्यते । कोपि जी
वितेनयुज्यते इत्यर्थः । सन्निपात
ज्वरान् कष्टानसाध्यानपरे जगुः
दोषे विवृद्धे नष्टेऽग्नौ सर्वसंपू
र्णलक्षणः । सन्निपातज्वरोऽसा
ध्यः कष्टसाध्यस्ततोन्यथा ।
दोषे पित्ते कफे । विवृद्धेऽप
क्वे । सर्वसंपूर्णलक्षणः सर्वा
णि दाहशीतादीनि संपूर्णानि
असुनानि शोधानीति यावत् ल
क्षणानि यस्य सः । ततोऽन्यथा दो
षपक्वे अग्नौ दीप्ते स्वल्पलक्षण
कः कष्टसाध्य इत्यर्थः ॥ अथ·
सामान्यसन्निपातज्वरस्य चिकि
त्सा । सन्निपातार्णवे मग्नं यो
ऽभ्युद्धरति मानवः कोस्तेन न·
कृतो धर्मः कां च पूजां न सोऽर्हति
मृत्युना सह योद्धव्यं सन्निपाते
चिकित्सता । यश्च तत्र भवेज्जे
ता स जेता मरुसंकुले । श्ले
ष्मनिग्रह मेवाग्रे कुर्यात्त्वा

यौ त्रिदोषजे । निरस्ते श्लेष्म
णि ह्यस्य श्वासः स्तब्धादिते
षु च । लाघवं जायते सद्य
स्तस्माच्चैवोपशाम्यति । भे
डोप्याह । सन्निपातज्वरे पूर्वं
कुर्यादाम कफापहे । पश्चात्
श्लेष्मणि संक्षीणे शमयेत्
पित्तमारुतावति । ननु तेषा त
रे प्रथमे पित्तस्य प्रतिक्रिया
प्रोक्ता । यथा । शमयेत् पित्त
मेवादौ ज्वरेषु समवायिषु उ
त्तिवारनवं नहि ज्वरावेषु विशे
षतः । इति । अन्यत्रापि । सम
वाये त्रिदोषाणां पूर्वं पित्तमु
पाचरेत् । ज्वरे चैवातिसारे च
सर्वत्रान्यत्र मारुतमिति तथा
तत्र प्रथमे वायोः प्रतिक्रिया
प्रोक्ता । यथा । वातस्यानुजये
त्पित्तं पित्तस्यानुजयेत् कफं
इति ॥ तत्र व्यवस्थामाह तं
त्रांतरे । ज्वरे त्रिदोषजे सा शे
मयेत् प्रथमं कफं । जीर्णत्वा
मेजयेत् पित्तं निरामं त्वनिलं
जयेत् । इति । प्रथमं सन्निपाता
न तत्र यौ विसंवदते । आमे लिति
समाद्यपने यथा शीघ्रं जयेत्
एवं तयः स्याद्देवलवाक्ये इति

तथाच। संसर्गे यो गरीयान्
स्यादुपक्रम्यः स वै भवेत्। शे
षदोषाविरोधेन सन्निपाते त
थैव च इति। संसर्गे दोषद्वय
संसर्गे। गरीयान् बलवत्तरः
अंशांशं यत्र दोषाणां विवेक्तुं
नैव शक्नुयात्। क्रियां साधा
रणीं तत्र विदधीत चिकित्सकः
लंघनं वालुकास्वेदो नस्यं नि
ष्ठीवनं तथा। अवलेहोऽञ्जनंचै
व प्राक् प्रयोज्यं त्रिदोषजे॥
ज्वर इति शेषः॥
ननु क्रियायास्तु गुणालाभे क्रि
यामन्यां प्रयोजयेत् पूर्वस्यां
शान्तवेगायां न क्रियासंकरो
हितः। इति वचनेन क्रियासं
करस्य निषिद्धत्वात् कथ मत्र
नस्यनिष्ठीवनावलेहाञ्जनानि
युगपद्विधीयन्ते इत्याशंकायां
माह। क्रियाभिस्तुल्यरूपाभिः
क्रियासांकर्य्यमिष्यते। भिन्नरूप
तयैतास्तु नहि कुर्वन्ति दूषणं।
तत्र लंघनस्यावधिमाह। त्रिरात्रं
पंचरात्रं वा दशरात्रमथापि वा
लंघनं सन्निपातेषु कुर्य्यादारोग्य
दर्शनात्। लंघने त्रिरात्रादि
विकल्पउक्तो नानाद्यपेक्षया
दोषाणां क्षीणमध्यमन्दशक्ति
कत्वात् व्याधिस्वभावाच्च। आ
रोग्यदर्शनात् इति यावदारोग्य
तादर्शनं स्यात्तावद्धा लंघनं कु
र्य्यात्। एतेन त्रिरात्राद्यवधे र
नियतत्वं सूचितं। अतएव सु
श्रुतः माह। सप्तमे दिवसे प्राप्ते
दशमे द्वादशेऽपि वा। पुनर्घोर
तरो भूत्वा प्रशमं याति हन्ति
वा। घोरतर इति घोरः स्वभा
वादेव तदा घोरतरो भूत्वेति
हननप्रशमनयोः कारणमा
ह। पित्तकफानिलवृद्ध्या दश
दिवसद्वादशाहसप्ताहात्।
हन्ति विमुञ्चत्यथ वा त्रिदोषजो
धातुमलपाकात्। त्रिदोषजो
ज्वर इति शेषः। धातुमलपाका
त् धातुपाकाद्धन्ति मलपाकाद्वि
मुञ्चतीत्यर्थः। धातुमलपाके प्र
कलकौर्म्मवेहेतुः। तत्र यदि जीव
नसंवर्द्धके कर्म्माणि लिनेदा मलपा
कोऽन्यथा धातुपाकः। स च
रसादि शुक्रान्त धातूनां पाको
बोद्धव्यः। तत्र धातुपाकस्य ल
क्षणमाह। निद्रानाशो हृदि
स्तंभो विष्टंभो गौरवारुची॥
अरति र्बलहानिश्च धातूनां पा

कलक्षणं विष्टंभ उदरस्य।
गौरवं गात्राणां। अन्यच्च। सं
बाध्यमानो हृदि नाभिदेशे
गात्रेषु वाक्रजायुतेषु पीड
ज्वरार्त्तोऽङ्गुलिभिश्च गच्छेत्
धातुपाकी कथितो भिषग्भिः
अपरञ्च। नाभेरूर्द्धं हृदोऽधः
स्तात् पीड्यते व्यथया यदि।
धातोः पाकं विजानीयादन्य
धातुमलस्यच॥ मलपाकल
क्षणमाह। दोषप्रकृतिवैकृत्यं
लघुता ज्वरदेहयोः। इन्द्रियाणां
च वैमल्यं मलानां पाकलक्ष
णं। दोषप्रकृतिवैकृत्यं दोषा
वातादयस्तेषां प्रकृतिर्वैपथ्य
दाहगौरवादिकरणं तस्य वै
कृत्यं वैपरीत्यं। वैमल्यं मल
राहित्यं। मलानां दोषाणां।
अन्यच्च। अष्टर्द्धीरिय पंचकस्य
पटुता वक्लेशश्च यत्र क्रमात् त
स्यादि प्रशमो ज्वरस्य मृदुता त
दोषपाकं वदेत्। हन्नाभेरति
वेदनातिमरणं तीव्रो ज्वरस्त
न्द्र श्वासाधिकता मनोभ्रमकर
तिरिति स्याद्धातुपाकाकृतिः
ग्रामस्याधिकेन सप्तमदिवसा
द्यव्यतिक्रमे परमावधिमाह
हारीतः सप्तमी द्विगुणा याव
त्रयमेकादशी तथा एषा त्रि
दोषमर्य्यादा मोक्षायचवधा
यच। नवम्येकादशीचागमन
दिवसं संविहाय बोद्धव्या तेना
गमनदिवसे नीत्वा दशमी द्वा
दशी च अतएव विरम्य प्रक्रिय
ते। सन्निपातज्वरे एवं सम्यग्
लंघनमाचरेत्। शृतेशीतेपिबे
दम्भः सततं भेषजं भजेत्। सन्नि
पातेन तप्तस्य तत पश्चात् कतालशो
षिते। यः पाययेज्जलं शीतं स
त्तृषे विषग्रहः। शीतं प्रक्वथि
ते। शृते तु शीते विहितमेव।
इति लंघनं। अथ वालुकास्वे
दः। वात श्लेष्म कृते स्वेदान्
कारयेद्रुक्षनिर्म्मितान्। स्निग्धः
स्वेदो निषिद्धोऽत्र विना केवल
वातजान्। खर्परभृष्ट पटस्थि
तकाञ्जिकसंसिक्त वालुकस्वेदः
शमयति वातकफामय मस्त
कशूलांगभंगादीन्। शोतकामा
ईवे हत्वा नीत्वा पाककमाश्र
यं। हत्वा वातकफस्तंभं स्वेदोज्व
रमपोहति। इति वालुकास्वेदः।
अथ नस्यं। सैन्धवं श्वेतमरि
चं सर्षपाः कुष्ठ मेवच॥

वल्लमत्रेण सर्पिषं नस्यंतंद्रा
निवारणं । स्वेतमरिचं शिग्रु
बीजं । सैंधवादिनस्यं । मधूक
सारसिंधूत्थ वचोषणा कणाः
समाः । श्लक्ष्णं पिष्ट्वाम्भसा नस्यं
दद्यात्संज्ञाप्रबोधनं । मधूकसा
रादिनस्यं । मातुलुंगार्द्रकरसे·
कोष्णे विलवणान्विते । अम्लहा
सिद्ध विहितेनस्यं तीक्ष्णं प्रयो
जयेत् । तेन प्रभिद्यते श्लेष्मा
प्रभिन्नश्च प्रसिच्यते । शिरो·
हृदय कण्ठास्य पार्श्वरुक्
चोपशाम्यति । मोहासयेन·
मुखं चोपयित्वं यान्हशः शक्नः
कस्यतरु नामधेया रसो न ना
ह्रक एवं किंचित् । इति नस्यं
अथ निष्ठीवनं जिह्वातालु·
गल क्लोम मरुत् पित्तेनचो
च्छ्रितः । तदा सचारयेच्छाष
जिह्वायाः खरतां तथा ॥
स्फुटनञ्च तदा जिह्वां लेप
येन्मधुपिष्टया । द्राक्षया साज्य
पातेन जिह्वा स्यात् सरसा मृ
दुः । आर्द्रकस्य रसोपेतं सैंध
वकटुकत्रयं । आकंठाद्धारये
द्दासो निष्ठीवेच्च पुनःपुनः । ते
नास्यहृदयक्लोममन्यापार्श्व

शिरो गलात् । नीलोप्याकृष्य
ते श्लेष्मा लाघवं चास्य जायते
पर्वभेदो ज्वरो मूर्च्छा निद्रा
श्वासगलामयाः । मुखाक्षिगौ
रवं जाड्य मुत्क्लेश श्चोपशाम्य
ति सकृत् हि स्त्रिभ्रतः कुर्या
द्दृष्ट्वा दोषबलाबलं । एतद्धि
परमप्राहु र्भैषजं सन्निपाति
नां । इति कवलग्रहः ॥
अथावलेहः कट्फलं पौष्क
रं श्रृंगी व्योषं यासश्चकारवी
श्लक्ष्णचूर्णीकृतंचैतन्मधुना
सहलेहयेत् । एषावलेहिका
हंति सान्निपातेसुदारुणं हिक्कां
श्वासं च कासं च कंठरोगं च ना
शयेत् एतद्योज्य कफाढ्ये च
भ्रमार्द्रकजैः रसैः । तैस्तैरेव उ
क्तं । अष्टांगं मधुनालिह्याद
र्द्रकस्य रसेनवा । संमोहदारु
णहन्याचन्द्रा कासश्वासान्वितं ।
इति सर्वेषुसन्निपातेषून सौर
मवचारयेत् । शीतोपचारितो
ऽसं स्यात् शीतत्वाद्विरुध्यते ।
अयमभिप्रायः । सन्निपातज्वरे
षु श्लेष्मनिग्रहार्थं सर्वदा स्वे
दो हितउक्तः । अत्राग्निसंबंधा
देहस्यासता तिष्ठेदेव ॥

उस्नेन मधुना विरोधः उस्नं च
सुश्रुतेन । उस्ने विरुध्यते म
धु विषान्वयत्वान्मधु । उस्ना
र्तमुस्नैरुस्नं च तन्निहंति यथा
विषं इति । शीतोपचारितोर
मिति । शीतेनोपचारोऽस्यास्ती
ति शीतोपचारी । शीतंचात्र
सन्निपाते विरुध्यते । अथ मव
लेहः प्रायेणार्द्रजनुजरोगाह
रत्वात् साय सुपयुज्यते । यत
उक्तं चरकेण । उर्ध्वजत्रुगदघ्नी
या सा सायमवलेहिका । अथो
रोगहरीयासा भोजनात् प्रा
कप्रयुज्यते । पौष्करं पुष्कर
मूलं तदलाभेकुष्ठंदेयं श्रृंगी
कर्कटश्रृंगी । व्योषं शुंठी पि
प्पली मरिचानि यासो यवासः
केचिद्यासस्थाने यवानीं प्रति
पंति । कारवी मगरेला इति
लोके । अष्टांगावलेहिका ॥
सिद्धेमामलकं पिष्ट्वा द्राक्षया
सह मेलयत् । विश्वभेषजसंयु
क्तंमधुना सहलेहयेत् । तेना
शुप्रशाम्यति श्वासः कासो मू
र्च्छारुचिस्तथा । इत्यवलेहः । अ
थांजनं । शिरीषबीज गोमूत्रकृ
ष्णमरिच सैंधवैः । अंजनं स्यात्

प्रबोधाय सरसोन शिलावचैः
शिरीषबीजाद्यंजनं ॥ अथार
जःस्वेतलोध्र मंजनं मरिचं तथा
गोपित्तेन समायुक्तं तंद्रानाशन
मुत्तमं । गोपित्तेगोरोचना । लो
हचूर्णाद्यंजनं ॥ अञ्जनेसमभा
गं च मधु सिंधु शिलायणाः ।
प्रमोहहृद्भिर्भवति भाषितं
भिषजां वरैः ॥ शिलामनः
शिला । उषणंमरिचं । इत्यंज
नं ॥ अथ क्वाथः । सूर्ततिविष
च मरिचं तुत्थकं नवसादरं ॥
चूर्णितं स्वरसे मर्द्यं भूतपञ्चर
सेनयो । सन्निपातकृते मोहे
मूर्द्ध्नि लिम्पेत् पदोपरि । अ
स्थिदध्याम्लेनैव लेपं कुर्या
त्पदोपरि । पदेपीछु इति लो
के । बिल्व श्योनाक गम्भारी
पाटला गणिकारिकाः पाच
ने वात कफ हृत् पंचमूलमिदं
महत् । शालपर्णी पृश्निपर्णी
बृहती कंठकारिका गोक्षुरोवा
त पित्तघ्नं कनीयः पंचमूलकं
उभयं दशमूलं तत्पिप्पलीचूर्ण
संयुतं । सन्निपातज्वरं हंति हृत्कं
ठग्रहनाशनं । तेन्द्रा वातकफात्
कस्वासपार्श्वार्तिकासनुत् महा

तियानि मूलानि काश्मर्याणि यानि च। तेषां तु वल्कलं ग्राह्यं कुस्वमूलानि कृत्स्नशः। अत्र बिल्वादीनां पंचानां मूलस्य वल्कलं ग्राह्यं। दशमूलक्वाथः। दशमूलीकषायस्तु पौष्कर कणान्वितः। सन्निपात ज्वरे देयः श्वासकास समन्विते। द्वादशांगक्वाथः॥ चिरज्वरे वात कफोल्बणे वा त्रिदोषजे वा दशमूलमिश्रः। किराततिक्तादिगणः प्रयोज्यः शुद्ध्यर्थिने वा त्रिवृता विमिश्रः। किराततिक्तादि येषां। किराततिक्तको मुस्ता गुडूची विश्वभेषजं। किराततादिगणो ह्येष चातुर्भद्रकमिष्यते। चतुर्दशांगक्वाथः। दशमूली शठी शृंगी पौष्करं सदुरालभं। भार्गी कुटजबीजं च पटोलं कटुरोहिणी। अष्टादशांगमित्येष सन्निपातज्वरापहः। कास हृद्ग्रह पार्श्वार्तिश्वास हिक्का वमीहरः। अष्टादशांगक्वाथः। भूनिंब दारु दश मूल महौषधाब्द तिक्तेंद्रबीज धनिकेभकणा कषायः। तंद्रा प्रलाप कसनारुचि दाह मोह श्वास त्रिदोष जनितज्वरनाशनः स्यात्॥

द्वितीयोष्टादशांगक्वाथः। एतस्यैव गुणा उक्ता वंगसेनेन। अष्टादशांगमित्येष सस्तकल्पज्वरं जयेत्। इति। अथ सन्निपातज्वरे रसाः। विषत्रिकटुकं गंधं टंकणं मृतशुल्वकं धुस्तूरस्य च बीजानि हिंगुलं नवमेस्तते। एतानि समभागानि दिनैकं विजयाद्रवैः। मर्द्दयेत् गुंजाकाकारा कर्तव्या वटिका शुभा। भक्षणीयानुपानेनार्द्रवमूल कषायकः। मृतसंजीवनीनाम्ना सन्निपातज्वरांतकृत्। मृतसंजीवनी वटीका॥ सन्निपातज्वरे रसप्रदीपे शुद्धसूत समं गंधं सूतोंशस्तत्र त्र्यंके त्रिभिस्तुल्यं गवाक्षीद्रवैर्मर्द्दयेद्धातपेखरे। मर्द्दयेदिनमेकं तु निर्गुण्डी शिग्रुजैर्द्रवैः विधाय गोलं तं गोलं मंदमूषागतं पचेत्। त्रियामान् वालुकायंत्रे ततः स्वांगे विचूर्णयेत्। अष्टमांशेन विषं तत्र क्षिपेत्तेनापि मर्दयेत्। त्रिनेत्राख्या रसो ह्येष नेयो गुंजाद्वयोन्मितः। पंचकोलकषायेन हाकारीकुरसेनवा सह। रसेनानेन भुक्तेन

सन्निपातज्वरो महान्। संक्षयं व्रजति क्षिप्रं कर्तव्या नात्र संशयः। त्रिनेत्रो रसः। सन्निपातज्वरे रसप्रदीपे। भस्मसोऽश्वानिष्कं स्यादारणोपलसंभवे। मरिचे निष्कमात्रं तु विषं निष्कं विचूर्णयेत्। रसो भस्मसूरो नाम्ना सन्निपातज्वरांतकृत्। एकगुंजामितो भक्ष्य आर्द्रकस्य द्रवेण हि। भस्मसूरो रसः। सन्निपातज्वरे रसेंद्रचिंतामणौ द्वौ कर्षौ सूतकाद्ग्राह्यौ गंधकाद्वौ तथैव च। यत्नेन स्तूभंगं मर्द्ये दिनं हंसपदीरसैः। कल्कस्य वटिकां कृत्वा निःक्षिपेत् काचभाजने कर्षकममृतं तत्र क्षिप्त्वा वक्रं निरोधयेत्। कूपिकायाः परो भागो वालुकाभिश्च पूरयेत्। स्थाल्यां यावद्धोमाग्ने तावत्तत्र पचेद्रसं। दीपमात्रोग्नलो देयः सांगशीतं समुद्धरेत्। तोलाद्वे समृतं तत्र क्षिपेत्तावत्तथोषणा भक्षितो रक्तिकामात्रो रसस्त्वग्निकुमारकः। सन्निपातज्वरे हन्याद्धाते मेदाश्रिता अपि शूलं संग्रहणीं गुल्मं ह्यष्टौ पांडुगदे


तथा। श्वास कासादिकान्सर्वान्गदानेष विनाशयेत्। अग्निकुमारो रसः। सन्निपातज्वरादिषु रसेंद्रचिंतामणौ। गंधशटंक मरिचे विषं यत्नरजेद्रवैः। दिन सप्तदिनं शुष्कं पंचवक्त्रो रसो भवेत्। आर्द्रकस्य द्रवेणैष दातव्यो रक्तिका मितः। सन्निपातज्वरं घोरं नाशयेन्नात्र संशयः। इंद्रः पारदः। टंकः टंकणः। पंचवक्त्रो रसः॥ सन्निपातज्वरे रसेंद्रचिंतामणौ अथ शीतज्वरे रसाः। सूतके गंधकं चैव हरितालं मनःशिलां। एक निष्कं द्वि निष्कं च चतुर्निष्कं तथैव च। पंचनिष्कं रसैः कारवेल्याः कल्कं प्रकल्पयेत्। ताम्रपत्राणि तल्यानि तेन कल्केन लेपयेत्। स्थापयेत्संपुटे तानि कृत्वा तेषां शुष्कापि। द्वयालोपिष्टिकां पश्चात् घटस्याकेनपाचयेत्। ततः संचूर्णयेदेव रसः सोद्रोणाक्षद्विनः। एकैकमात्रया हंति घोरं शीतज्वरं ध्रुवं पारदटंकः १ गंधक टंकः २। हरितालटंकः ४ मनःशिलाटंकः ५ ताम्रपत्रटंकः १२। शीतज्वरा

रसः॥ रसप्रदीपे। पारदंगन्ध
कं तुल्यं दरदंच विषंसमं॥ वि
षाद्द्विगुणं योज्यं मरिचं वि
षभेषजं। अस्यगंधा तु विज्ञ
या कामर्दं कुठिलकः। चतु
र्णांच रसे रेतच्चूर्णं यत्नेन मर्द
येत्। तुलस्यास्तु दलैः सार्द्ध
भक्षितो रक्तिकामतः। हंति
शीतज्वरं घोरं नाम्नाये शीत
केशरी। शीतकेशरीरसः॥
रसप्रदीपे। तालकं शुक्तिका
चूर्णं तुल्यं तत्रोभयोपरि। त
वमांशंच तुत्थस्यात् मर्द्दयेत्
कन्यकाद्रवैः। तत्तु संपुटकम्
पले रुंध्ये गजपुटे पचेत्॥
शीतं तच्चूर्णयेद्देहं गुंजामात्रं
शिलायुतं। प्रभाते भक्षयेत्तेन
याति शीतज्वरस्तथे। वांतिभ्र
वतिकास्यापि कस्यापि न भव
त्यपि। शीतभंजी। रसकं पार
दं तुल्यं तालकं गंधटंकणं।
सर्वे मेतत्समं चूर्णं कारवेल्ली
रसैर्दिनं। मर्द्दयेत्तेन मुद्गस्य
रक्तकादि समंस्यात्। ताम्रस्य
भाजनस्यांत लिंपेदर्द्धांगुलो
न्मितं। तत्पचेद्वालुकायंत्रे
यवा यावत् स्फुटंति हि।

शीतलं तद्धि शुल्कीयात्ताश्र
पाचोदराद्विषक् शीतभंजीर
सो माषमात्रो मरिच संयुतः।
भक्षितः पर्णखंडेन नाशयेद्वि
षमज्वरान्। शीतभंजीरसः॥
शीतज्वरादि विषमज्वरेषु रसे
न्द्रचिंतामणौ। तालकोदारदो
मृतपारदो गंधकः शिला। क
माऽक्षमाक्षं रहिते कारवेल्लतु
मर्द्दितं। अग्नेनास्य प्रमाणेन ता
म्रपात्रे प्रलेपयेत्। अधोमुखी
हंढे भाण्डे तन्निरुध्य प्रय
येत्। चूल्यां वालुकया प्रेस्त
माग्निं प्रज्वालयेद्दृढं। शीतंसं
चूर्णयेन्माषोस्य नागवल्लीदले
स्थितः। भक्षितो मरिचैः सार्द्धंस
मस्तान् विषमज्वरान्। शीतदा
हादिकान्हंति पथ्यं शाल्योदनंप
यः। शीतभंजीरसः। रसरत्नप
दीपे। रसं गंधं विषंचैव समंशु
ल्वेच टंकणं। मर्द्दयेत् खल्लम
ध्ये तु यावत् कज्जलसंनिभं। न
कुलस्य शुद्धखेत्तिन्यात्कदोसेवेत
येद्दृढं। स्थापयेत्तत्त्वमये पात्रे
अधोः हुल्लवर्णं न्यसेत्। छावे
भांडे संनिरुध्य चतुर्यामं दृढा
ग्निना। स्वांगशीतं समुद्धृत्य

कृत्वा खल्वे शुभं कज्जली। गुंजा
द्वयप्रमाणेन नस्यकर्माणियो
जयेत्। वामभागे ज्वरे हंति नत्त
एतन्न्यनुके मर्हन्। योजयेद्द
क्षिणे भागेऽप्येवं पनिश्चितं भवे
त्। इत्यर्द्धनारीनाटेश्वरोरसः
शीतज्वरादि विषमज्वरेषु।
रसरत्नप्रदीपे। कट्फलं त्रिफ
ला दारुचंदनं सपर्पटकं। क
टुका पद्मकोशीरं विपचेत्
कर्षकं जले॥ त्रिदोष दाहतृ
ष्णाघ्नं पानं मोचयत्ज्जितं। दी
र्घकाल ज्वरार्त्तानां सेवनत्स्या
दमृतोपमं॥ कर्षं कट्फला
शुण्ठी रास्ना सर्वदिवानोजले
प्रस्थमिते विपचेत् अर्द्धशेषं
कट्फलादिपानं तत्स्यायो
दाहेच। सन्निपाते तु दाहार्त्ते
यः सिंचेच्छीतवारिणा। स्या
त्तदैःसकथं जीवेत् म्रियते वा स
कथंभवेत्। एष सन्निपातिनो
दाहे शीतांबुसेक निषेधो रु
ग्दाहादन्यत्र तत्र वाष्पाध्यवस्था
हनस्याकृत्वात्। अथानस्याह
दुःस्पर्शो गोत्रज्वरदाहा स्विद्धमा
हार मर्पयेत्। दोषशांतिव
लाग्रंथे त्रिदोषज्वरिणोभिष

क्। दुःस्पर्शो यवासः। आहार
मुचितमन्नं। लाजशाकून् समश्नी
यात् सैंधवेन समन्वितान्। ते
चेज्जीर्णंमयि च्छेन ज्वरी जीवेत
दात्रुवं। इति केचित्। रक्तापि
त्ते हितं त्वेतत्स्यादाहज्वरे भ्रुव
लाजानां शक्तवः शीतास्त्वतः
शहिता मताः। पाचनो दीपनः
सोक्तो लाजमण्डो यतः स्मृ
तः। दशमूलादिसंसिद्धः सन्नि
पातज्वरे हितः। सन्निपातज्व
रीयस्तु कम्पते प्रलपत्यपि
किञ्चिदेव न जानाति चिकित्
सा तस्य कथ्यते। अभ्यंजयेत्तु
तेनैव सर्पिषा एवमेव तं। बला
रास्नागुरुच्याद्यै तैलेस्तु परिषे
चयेत्। वर्मिकोवर्मिका ल्यावावा
लीकस्मितिरिःश्वाद्यः। कुलिंग
स्वरसेनैषां तर्पयेत्तयथा नले
वर्मिकः वटेवरतिलोके। वर्मि
कावटई इतिलोके वामीकोवा
तचटक इति निघण्टुः। तेयोग
इति लोके। कुलिंगा गवगौर
या इति लोके। सन्निपाते स्तुधा
र्त्ते यो भोजयेत् पिपासितं
सकथंभिषगालोकलभतेम
नुजाधमः॥ अथ वालोल्या



सन्निपातज्वरस्यचिकित्सा पं
चमूलीकषायंतद्यातवातोत्त
रेज्वरे। भूयोसंवास्तोसेवा-
दह्या दोषवलावलं पंचमूली
महती प्रयसे प्रामाण्य स्याद
वचनाभावात् ॥ अथ पित्तोल्ब
ण सन्निपातज्वरस्यचिकित्
सा। पटूषकाणित्रिफलादेव
दारुच कट्फलं। चंदनं पद्म
कंचैवतथाकटुकरोहिणी ह
स्निपर्णीमृतं त्वेभिक्वथितेशी
तलेजलं। पित्तोत्तरे त्वणमेत
त्सन्निपाते चिकित्सितं। पटूष
कादिक्वाथः। किराततिक्तकं
मुस्तंगुडूचीविश्वभेषजं। पाठो
दीच्यमृणालंच शृतं पित्ताधि
के पिवेत् किरातादिसप्तकं
अथ कफोल्वणसन्निपात-
ज्वरस्य चिकित्सा। बृहत्यो
पौष्करंभार्गी शटी शृंगीदुरा
लभा। वत्सकस्यचवीजानि प
टोलं कटुरोहिणी। बृहत्यादि र्ग
णःशस्तःसन्निपाते कफोत्तरे।
श्वासादिषुच सर्वेषु हितःसोप
द्रवेष्वपि। बृहत्यादिक्वाथः। अ
थवातपित्तोल्वण सन्निपात
ज्वरस्यचिकित्सा वातपित्तहरंह्यो

कणीयः पंचमूलकं ततक्वाथो
मधुनाहंतिवातपित्तोत्तरंज्वरं ॥
लघुपंचमूलं। अथ वातश्लेष्मो
ल्वणसन्निपातज्वरचिकित्सा।
किराततिक्तकं मुस्तं गुडूचीवि
श्वभेषजं। चातुर्भद्रकमित्याऊ
र्वातश्लेष्मोल्वणेज्वरे ॥ चातु
र्भद्रकक्वाथः ॥ अथ पित्तश्ले
ष्मोल्वणसन्निपातज्वरचिकि
त्सा। पर्पटः कट्फलं कुष्ठं मु
स्तीरं चंदनं जलं। नागरं मुस्त
कंशृंगी पिप्पल्येषा शृतंहितं।
तृष्णा दाहाग्निमान्द्येषु पित्त श्ले
ष्मोल्वणेज्वरे। पर्पटादिक्वा-
थः ॥ अथवातपित्तश्लेष्मोल्व
णसन्निपात ज्वरचिकित्सा
नागरान्यकं भार्गी पद्मकेर
कचंदनं। पटोलं पिचुमर्दश्च
त्रिफला मधुकं वला ॥
शर्करा कटुका मुस्ता गजाह्वा
व्याघ्रिजानकः। किराततिक्तम
मृताद्राक्षामूली निदिग्धिकायो
शावालेता निहत्येष सन्निपातवि
कोल्वणं। सन्निपातसमुत्थाने
ससमपानातजयेत् । गजाह्वा
गजपिप्पली। व्याघ्रिजानकः
आरग्वधः। निदिग्धिकाहेंगु

णपार्थे पृथक् पठिता। योग
राजक्वाथः। अथप्रवृद्ध मध्य
हीन वातादि जनित सन्निपात
ज्वराणां यत्नो तेत्रेण चिकित्
सामाह। प्रवृद्धे कर्षयेद्दोष-
हीनं संवर्द्धयेद्भिषक्। चिकि
त्स्यं विधानत्वात दोषयो वृद्ध-
हीनयोः। अस्यायमर्थः। प्रवृ
द्धं दोषं कर्षयेत् तन्त्रेणपहे
तुभि दोषधात्र विहारैः कृशी
कृत्य समीकुर्यात्। हीनंदो
षंसंवर्द्धयेत्। तद्वृद्धिहेतुभिदो
षधात्र विहारैर्वर्द्धयित्वासमी
कुर्यादित्यर्थः। प्रवृद्धे सन्निते
दोषमध्यमःसमयमेवहि। शां-
तिंयातिसमं नीते त्वनुवंधेऽनु
वंधवत्। अस्यायमर्थः। वर्षास्व
वातु रनुवंधः सेव्यः। प्रधान-
मितियावत्। पित्तश्लेष्माणा
वनुवंधौ वाद्या स्तुचेरप्रारदि
पित्तमनुवंध्यं कफानुवंधः। व
संतेकफानुवंध्यो वात पित्ते अ
नुवंधौ तयाप्यानुवंध्ये प्रशम
नीतेऽनुवंधःस्वयमेव शांतिंया
ति। तथाप्रवृद्धे दोषे सान्निते-
क्तौकर्षयित्वा समीकृते मध्यमोदो
षो हि निश्चयेन स्वयमेव। ।

शांतिं याति प्रकृतो भवतीत्य
र्थः ॥ अथ शीतांगादीनां सन्नि
पातज्वराणां त्रयोदशानां वि
शिष्टचिकित्सा तत्र शीतांग
स्य चिकित्सामाह। भास्वन्मूलं
जीरकं ग्रोषभार्गीव्याघ्रीशुंठी
पुष्करं गोजलेन। सिद्धं सद्यः
शीतगात्रातिमोहं श्वास श्लेष्मो
द्रेक कासान्निहंति। भास्वन्मू
लं अर्कमूलं। कर्कोटिका क
न्दरजः कुलस्थ कृष्णावचा क
ट्फलक्रसजीरैः। किराततिक्ता
नेल कटुतुलावु पथ्याभिरुद्धे
तेन मत्रशस्ता। कर्कोटिकाकं
दरजः खवखशामूलरजः। वत्सवि
षमरिच मेढ्रशाभियफल भरेसा
कम्बूवर्वदस्तुभिः। भागोर्मित
मुद्गूलन भिदमभिलरवेद श्रीम
द्वे। अथ तंद्रिकस्यचिकित्सा। तुरा
मृतानागर पौष्कराणि मूलानि
पीतानिनिशि वायुतानि। शुंठीक
णाग्निजिरसोषणानि नस्यैन
तंद्राविजयोत्त्वणानि। मरिच
कचपंचपचावचा कटुकाभिरद्र
नागरपार्वती गणात्त्वः। लुगालक
जलकांल्किता निंरातेनसिनिहि
तानतु तंद्रिकं जयंति। कचः वाल

कः। पंचपचा दारुहरिद्रारुक
ष्ठं। कृमिहरो विडंगः। दार्वी
हरिद्रा। गवाक्षी इंद्रवारुणी। न
सिनासिकाये। तुरंगलालालव
णा लमेनुः मनःशिला मागधिका
मधूनि। नियोजितान्यक्षिणि नि
क्षिपेत्कृत्वा तेनामलिंगा विनिवार
यंति। लवणोत्तमं सैंधवं। इंदुः
कर्पूरः। निद्रा प्रतिनिद्रा ॥ अ
थ प्रलापकस्य चिकित्सा। स
तगर वरतिक्ता देवता भोद ति
क्ता नलद तुरगगंधा भारती·
हाबहूराः। मलयज दशाम्लूली
शंखपुष्पी सुपक्वाः प्रलपनम
पहृत्युः पानेन नातिहसान्। व
रतिक्ताः पर्पटो नद महानिंब
स्तेयान वानुरोधात् नलदं लाम
ज्जकं। नदलाभाडशीरं ग्राह्यं·
भारती ब्राह्मी। वरंभी प्रतिला
के। हाबहूरा शास्ता। सान्वेनेवं
ज्ञेनेचैस्य स्त्री हो स्तिमितसे
वेनेः। सर्वतो विकृतेचिन्तम
स्य प्रकृतिमानयेत् ॥ अथ
रक्तष्ठीविनश्चिकित्सा। रोहि
षयन्व यवासक वासा पर्पट
गंधलता कटुकाभिः। शर्कर
यासम मेष कषायः तत्रजष्ठीवि
नष्ठदित उपायः। रोहिषं सुगं
धतृणविशेषः। रोहित इति
लोके। गंधलता प्रियंगुः ॥
पद्मक चंदन पर्पट मुस्ता जा
तिवराकणचंदनवारि। शीत
कनिंबयुते परिपक्वं वारि भवे
दिह शोणितहारि। शीतकं
यष्टीमधुकं। इहरक्तष्ठीविनि
मधुक मधूक परूषक पाथ श्री
दन पल्लवदारु समांशः। श्रीप
र्णीफलशीतकषायः सशितस्त
स्यापहृतजयाय। पल्लवपद्मकं। पा
थः वालः। समांशः समप्रमाणः। श्री
पर्णी गंभारी। अथ भग्ननेत्रस्य चि
कित्सा। तुरंगगंधा लवणाग्रगं
धा मधूकसारो मणमागधीभिः
वरसांद्रशुंठी लसुनान्विताभिर्नं
स्यं स्वभग्नदृशं करोति। अथा
भिन्यासस्य चिकित्सा। शृंगी
भार्गपभयाजीकणा भूनिंबप
र्पटैः। देवदारुवचा कुष्ठ यास
कटफलनागरैः। मुस्ताधान्या
कतिक्तेंद्रयव पाठा हरेणुभिः
हर्लि पिप्पल्यामार्गी पिप्पली
मूलचित्रकैः। विषालारग्वधा
रिष्टशटी वाकुचिकाफलैः विं
गा रजनी दार्वी यवानी हयसंयुतैः

समांशैर्विहितः क्वाथो हिंगवा
र्द्रकरसान्वितः। अभिन्यासज्व
रं घोरं हंति तंद्रां च तत्क्षणात्
प्रमोहं कर्णमूलं च सन्निपा
तांश्चयोदश। हिक्काश्वासं च का
सं च तथा सर्वानुपद्रवान्। शृंग्या
दिक्वाथः। अथ जिह्वकस्य चि
कित्सा। किराततिक्ताकुलक
कालिंज कर्बुरकास्मा कटुतैल
युक्तः। अम्लद्रवः संशमयेद्रस·
नादोषान्स्तुतो दासरथिर्यथाद्विं·
भ्राकुलकं तत् अकरकरहा इति
लोके। कालिंजं कलिंजन इति
लोके। अम्लद्रवः बीजपूरादि
रसः। किराताद्धिकवलः। शा
लपर्णी मालूरमूलाम्लयमष्ट
द्धता शंखपुष्पीसहिता सेव्या
वाचा विशुद्धये। शालपर्णी
ब्राह्मी। मालूरमूलं बिल्वमूलं
आम्लयः कुष्ठं। शंखपुष्पी शंख
पुष्पी। शालपर्ण्यादिकवलेहः
ऊष्मानागरपुष्करामृतलता ब्रा
ह्मी वचा हब्बता भार्गीवासकया
सनोषकर्कटशाक्वाथो जयेज्जिह्व
कं। विषा दर्भविभावरी गुडवना
वत्साहदनी वारिदब्राह्मी निंब प
टोलपुष्कर जटाकृतदारुभिर्वाकृ
तःपुष्करं पुष्करमूलं। तथा चा
मरसिंहः। मूले पुष्करकाश्मी
रपद्मपत्राणि पौष्करे। सुब्रता
गंधपलाशी काश्मीरे प्रसिद्धा
सुरसा तुलसी विषादियोगां
तरे। वर्मपर्पटः। विभावरी गुड
हरिद्रा दारुहरिद्रा च। वरा त्रि
फला वत्साहदनी गुडूची व्याघ्री
कंटकारिका। रुक् कुष्ठं। अथ
संधिगस्य चिकित्सा। प्राचीसु
रतरुजमाः स्थविरदारुरास्नाः
समाः सनागर सुधान्विताः पि
व शाल्मलीसंयुताः। मृदुज्वल
न पाचिताः सह पुराणसंधिग
हं यथा पहतये हृष्णा शिशिर
सेवनं मा कृथाः। उत्तमा त्रिफ
ला। स्थविरदारु विधारा इति
लोके। सुधा गुडूची। पुराण गुग्गु
लुः। वचा कट्वचकेकुष्ठ रास हव
रामृता भंगुरा सुराह्व चनना
गरा नतकणादरू तास्ना पुटः।
दृषा नकणाभीरुभिः स्तरभवंति
संधिग्रहव्यथा हृत्विमल्कोसभ
मापलद्यात तुहः। कवचः पर्पट
कः। कच्छुरा यवासः। भंगुरा अति
विषा। सुराह्वं देवदारु। अनतरा
दारुहरिद्रा। पुरो गुग्गुलुः। दृषा
वेहदंती पंडेवन् पत्रविटपा·

तदलाभे दंती वचाद्या समान
गुणत्वात्। तरुणा पंडुः भीरुः
शतावरी। सुरदारुशटी सुधाल
तास्वदा शुंठीयुता श्रुता जले।
मधुराः शमयंति सेविता सततं
सन्निपाते सदारति। सुरदारुसा
मुस्तैरंडशणादा वासादारुच्छि
न्नारास्नाभीरु कंटकारिका। वा
सावित्री पंचमूलीगुणाढ्याह
न्त्याकल्पास्तंभसंधिग्रहातीः। शा
णदाहरीतकी बाणाः नीलपुष्प
सहचरः। तिक्ताकटुका। अथो
तकेविधिः। इहापहाय ज्वलदुल्ल
वारि ज्वरारि हृयादि गदापहारि
ज्वरच्छिदं जीवितदंच नित्यम्
सुज्वरं चेतसि चिंतयस्व। अह
श्रीतके। ज्वरे लंघनादि नियम
कृशोदरप्रकरावदातवपुषं सुधा
या मुद्राद्यं प्रार्थक्रंत जने
षु भावुकजुषं भालस्फुरच्च
क्षुषं। संपूर्णामृतकुंभ संभृत
करं शुभ्रांशुमालाधरं पिंगा
क्षुरा जटाकलाप रुचिरं चंद्रा
र्द्धमौलिंस्तुहि। भिषग्भिर्विहिति नि
हंतीतं सन्निपातेन्नकाभिधे।
भेषजं जाकृवीनीरं वैद्योहि
विदग्धहि ॥ अथरुग्दाहस्य

चिकित्सा। उशीरचंदनोदीच्य
द्राक्षामलक पर्पटैः। शृतं
शीतं जलं दद्याद्दाहतृष्णाज्व
रशांतये। षडंगपानं। साशि
तो निशि पर्युषितः प्रातर्धा
न्याकनकसुल क्वाथः। पीतः
शमयत्यचिरादंतर्दाहं ज्वरे पैत्ते
धान्याकतंडुलाः काथितथा
त्वकानि धान्याकक्वाथः। प
थ्या तैल घृत लौहं लिहन्
दाहज्वरापहा। कासासृकपि
त्तवीसर्प श्वासान् हंतिवमीमपि
तैलघृत लौहे त्रिफलाचूर्णसमन्वि
तः लेहेन केवलेन मधुनापि
लिह्यात्। पथ्यावलेहः ॥ प्र
शमयति दाहमचिरात् दधिय
ककर्कंधुपलवै लेपः। लेपोहि
मकरमलयज निंबदले सक्त
पिष्टैर्वा हिमकरः कर्पूरः। तथा
चंदनसारक्रुद्रसत्त उत्पमरुः
उत्तानशयनस्य गंभीरतास्त्र का
स्यादि पात्रे निहितेच नाभौ ॥
शीतांबुधारा वहला पतंतीनिहं
तिदाहं त्वरितं ज्वरंच। शीतांभ
सात्त शातपात्र विलोडितेन रा
जतचंदनयुतेन घृतेन दिग्धा।
दाहज्वरी सकमलोत्पल मा

ल्यधारी हिमं विशेत् सलिल
कोष्ट मनल्पकाले। कांजिकाई
पटेनावगुंठनं दाहनाशनं।
अथ गोतक्रसेक्ति शीतलीकृ
तवासमा। अथाक्रमाह। दाहा
वमर्दिते ग्रामे निरंतरे ल्लस्या
न्विते। शर्करा मधुसंयुक्ते पा
ययेल्लाजतर्पणं। लाजतर्पणं
लाजशक्तु भिक्षुपतर्पणं। वाप्याः
कमलहासिन्यो जलजंत्वगृहाः
शुभाः। नाथ्यश्चन्दनादिग्धांगो
दाहदैन्यहरामताः। मुक्तावली
चंदन शीतलांगोस्तुगंधपुष्पो
वरभूषितानां। नितंविनीनांस्तु
पयोधराणामालिंगनान्याशुह
रंतिदाहं। प्रल्हादेचास्यविज्ञा
यतः सीव्यपनयेत्पुनः। हितं
च भोजयेदन्नं येनाप्नोति सुखं
महत्। प्रल्हादकंकामकृतेह
र्षे ॥ अथ चित्तभ्रमस्य चिकि
त्सा। कोणाषदोणग्रा लवराणन
शाति करंजबीजं तगरादामला
नि। पथ्याद्व सिद्धार्थकहिंगुशुं
ठी युतानि वस्तांबुविमिश्रिता
नि। पिष्ट्वा गुटीयं नयनेविधेया
प्रचेतनेति प्रथिताचित्ताय्यां।
चित्तभ्रमापस्मृति भूतदोष शि


रोत्ति रोगभ्रम नाशहेतुः ॥
वस्त्रेव छागमूत्रं। कूष्मांडव
तयो रंभा गुड दिग्धा कराणात्वि
ते निहिते नसि नूनं स्यात् चि
त्तभ्रमविनाशने। कूष्मांडवत्वमो
ऽंभः अगस्तिवृक्षवल्कलकार
सः। पुराणसर्पिर्जमेधाकामधूक
मलयोद्भवैः मस्तकाः मधूलि
केः प्रपाणिजपो शुभिः। लो
हेलामज्जकेलाभि धूपश्चित्तभ्र
मापहः। ग्रहदोषहरः श्रीदः
सोभाग्यकरउत्तमः। सुरा प
कोगी। मरुद्धेजो बाला। मरुत्त
रुः देवदारुः। पुरः गुग्गुलुः
पाणिज्ञः नखः। पांसुः पर्पट
कः। लोहमगुरुः। लामज्जकं
उशीरवत् पीतच्छहित्वणादि
शोषः। तदलाभे उशीरःग्राह्य
मृद्वीकामरदारु मत्स्यशाक
लामुस्तामलक्याः शृतापथ्या
देवल रामसेनक रक्तो राजीफ
लैःसंयुताः। हृस्य श्चिन्नुरुजो
पदतुरदलाद्राक्षा पटोली
पयः पद्मापर्पटराजवृक्षकटु
काशे हृकपुष्पशृताः। मृद्वी
का द्राक्षा। मत्स्यशकला कटु
का। अरेवतः आरग्वधः। राम

सेनकः। किराततिक्तकः। रजः
पर्पटकः। राजीफलः पटोलः।
प्रयोगांतरमाह। इंद्रदला मं
डूकपर्णी। साच ब्राह्मी। ब्राह्मी मं
जिष्ठा शोणकश्च। तथाप्यब्रा
ह्मी ग्राह्यायतउक्तं गुणश्रेष्ठे। ब्रा
ह्मी मतिप्रदा मेध्या ज्वरहंत्री र
सायनीति। ब्राह्मी वरंभी इति
लोके। पयः वालकं। राजहस्तग्रा
ह्वयः। पौष्करपुष्पी शोथपु
ष्पी। अथ कर्णकस्य चिकित्सा। प्र
लेपः समस्तेनयस्य सेकः समु
द्रिक्त शोथे च रक्तावसेकः। विप
क्वस्य शस्त्रक्रिया व्रणजित्सा प्र
णात्वेगतस्य इत्युक्तेस्तच्चिकित्सा। प्र
यमर्थः। अल्पतेकर्णके पक्वः प्र
लेपः अंकैनाशं नयति। तच्चि
कित्सा व्रणचिकित्सा। निशा
विशालामय माणिमन्थ दार्वी
गुंदीमूलकृतः प्रलेपः। प्रभाक
रुद्रीयुत प्रभावाद्यल्पः समस्तो
ऽप्यथकर्णिकघ्नः। कुलत्थः कट्
फलंशुंठीकारवीच प्रमांशकैः
सुखोष्णे लेपनं कार्यं कर्णमू
ले मुहुर्मुहुः। गैरिकं कठिनी
शुंठी कट्फलैः सवचैः समैः।
उष्णैः कांजिकसंपिष्टैः प्रलेपः

कर्णमूलेतुत शिग्रुराजिकयोः
पिष्ठा कर्णमूले प्रलेपयेत्। क
र्णमूलभवः शोथ स्तेन लेपे
न शाम्यति। अपिपिरजलप
विमृदिते मरिच कणा जीरकै
युते लविते। नस्यविधि सेविते
नतु कर्णकरुक नाशकृदिते
भार्गीजया पौष्करकंठकारीक
टुत्रिकोग्रा च न कुंडलीभिः॥
कुलीरशृंगी कटुका रसाभिः
कृतः कषायः किलकर्णक
घ्नः। भार्गीवृसनेटी। इतिलो
के। तदलाभेकंठकारीमूलंग्रा
ह्यं। जया गणियार इतिलो
के। पौष्करं पुष्करमूलं। उग्रा
वचा कुंडली गुडूची। कुलीर
शृंगी कर्कटशृंगी। रसा रास्ना
दृष्टामूल मत्स्यशकला चपला
त्रिफला महौषधि किरातयुतै
मरिचं परिक्वथित माक्षुबलाद
पहंति कर्णक रुजः सकला।
चपला पिप्पली॥ अथ कंठकु
ब्जस्य चिकित्सा। फलत्रिकव्य
षणामुस्तकदि कलिंग सिंह
ननशार्वरीभिः। क्वाथः कृतः हंत
ति कंठकुब्जं कंठीरवः कुंजरमा
शुयद्वत्। सिंहाननो वासकः॥

शार्वरी हरिद्रा किरातकटुका
कणा कुटज कंटकारी शटी
कलिंदु किलिमाभया कटु
कट्फलांभोधरैः। विषाम
लकपुष्करानल कुलीरशृंगी
वृषमहौषधसखैरयं जयति
कंठकुब्जगणः। शटी कर्चूरः।
कलिंदुः विभीतकः। किलिम
देवदारुः। कटुकं मरिचं। विषा
अतिविषा। पुष्करं पुष्करमूलं
वृषः वासकः। वृषादिभिः किं
विशिष्टैः महौषधसखैः महौ
षधस्य सखिभिः। तेन प्रतैः
सहितेन महौषधेन इत्यर्थः
अथोल्वण वातादि प्रवृद्धम
ध्य क्षीण वातादि हेतुका
नां कुंभीपाकादि सन्निपातज्व
राणां त्रयोदशानां चिकित्
साभिधीयते। साच तत्तद्धेतु
कानां विष्फुरकादीनां त्रयो
दशानामेव विधातव्या। इति
सन्निपातज्वराधिकारः। इति
भावप्रकाशः॥
सन्निपातनृत्त पुं नेपालनिंबः
इतिराजनिर्घण्टः॥
सन्निबद्धः त्रि सम्यक्बंधनयु
क्तः संनिपूर्वबंधधातोः कर्मणि

क्तप्रत्ययेन निष्पन्नः॥
सन्निबंधनं क्ली सम्यग्ति
ष्ठितबंधनं सम्यगविबंधनं।
सनिपूर्वकबंधधातोरनट्प्रत्य
येननिष्पन्नं॥
सन्निभः त्रि सदृशः। इतिज
टाधरः॥
सन्निविष्टः त्रि उपविष्टः। य
था। ध्येयः सदा सवितृमंडलम
ध्यवर्ती नारायणः सरसिजास
न सन्निविष्टः। केयूरवान्कन
ककुंडलवान्किरीटी हारी हि
रण्मयवपुर्धृतशंखचक्रः। इत्या
दित्यहृदये। निकटः। इतिकेचि
त्। सन्निवृत्तिः स्त्री सम्यङ्निवर्त
नं। संनिपूर्व वृत्तधातोः क्ति प्रत्य
येननिष्पन्नाः॥
सन्निवेशः पुं पत्तनादिषु दिशा
दिपरिच्छिन्नप्रदेशः। एवंदिशा
द्यवच्छिन्नगृहं। इतिकलिंगः
पुराद्वहिर्विहरणभूमिः॥
इतिस्वाम्यादयः। तत्पर्यायः।
निकर्षणं २ इत्यमरभरतौ॥
किंच। नगरादिबहिःस्थैर वि
हारचारुभूमिषु। तत्रद्वय नि
गदितं सन्निवेशो निकर्षणं
इति शब्दरत्नावली॥



सन्निहिते त्रि निकटे। यथा
ब्रह्मपुराणे। षष्ठ्यादौ कृष्णप
क्षे तु भूमौ सन्निहिता भवेत्।
यावत् पुण्य ममावास्यां दिना
नि दशपंच च। इति प्रायश्चि
त्ततत्त्वे॥
संन्यस्तः त्रि सम्यक् न्यासीकृ
तः। समर्पितः। यथा योगसं
न्यस्तकर्म्माणं ज्ञानसंछिन्नसं
शयं। आत्मवन्तं न कर्म्माणि नि
बध्नन्ति धनञ्जय। इति भगव
द्गीतायां। अध्यायः॥
संन्यासः पुं जटामांसी। इति
शब्दचन्द्रिका। काम्यकर्म्मणां
न्यासः। यथा। काम्यानां क
र्म्मणां न्यासं संन्यासं कवयो वि
दुः सर्व्वकर्म्मफलत्यागं प्राहु
स्त्यागं विचक्षणाः। इति श्री
भगवद्गीतायां १८ अध्यायः।
अपि च। संन्यासः कर्म्मणां न्या
सः कृतानामकृतैः सह। कुश
लाकुशलाभ्यां तु प्रहाणं न्यास
उच्यते। इति मात्स्ये १९ ॥
अध्यायः। चतुर्थाश्रमः। तदा
श्रमधर्म्मा यथा। सर्व्वसंगपरि
त्यागो ब्रह्मचर्य्यसमन्वितः।
जितेन्द्रियत्वमावासे नैकस्मि

न् वसतिश्चिरं। अनारम्भस्तथा
हारो भिक्षान्नविधे ह्यनिर्दिते।
आत्म ज्ञानविवेकश्च तथात्मा
त्मावबोधनं। चतुर्थे चाश्रमे
धर्म्मा ह्यस्माभिस्ते प्रकीर्त्तिताः
इति वामने १४ अध्यायः॥
तदाश्रमकालादि यथा। पञ्च
वनाश्रमे स्थित्वा तृतीयं भा
गमायुषः। चतुर्थमायुषो भा
गं संन्यासेन नयेत् क्रमात्। अ
ग्नीनात्मनि संस्थाप्य द्विजः प्रव्र
जितो भवेत्। योगाभ्यासरतः शा
न्तो ब्रह्मविद्यापरायणः। यदा
मनसि संपन्नं वैतृष्ण्यं सर्व्ववस्तुषु
तदा संन्यासमिच्छन्ति पतितः
स्याद्विपर्य्यये। प्राजापत्यां निरू
प्येष्टिमाग्नेयीमथवा पुनः। दा
न्तः पक्वकषायोऽसौ ब्रह्माश्रमगु
पाश्रयेत्। इति कौर्म्मे उपविभा
गे २९ अध्यायः। कलौ तत्त्रि
य वैष्णवयोः संन्यासनिषेधो
यथा। अश्वमेधं गवालम्भं संन्या
सं पलपैतृकं। देवरेण सुतो
त्पत्तिं कलौ पंच विवर्ज्जयेत्।
इति कलौ संन्यासनिषेधकं
तत्त्रिय वैष्णवविषयकं। इ
ति मलमासतत्त्वे संन्यासप्र

तिषेधस्तु कलौ तत्त्वविशेषाभ
वेत्। इति मलमासतत्त्वप्रति
ज्ञायां श्रीरघुनन्दनभट्टाचार्य्यः
चैत्रमासे संन्यासकरणप्रमा
णं यथा॥ चैत्रे शिवोत्सवं
कुर्य्यात् तत्सर्व्वं महोत्स
वैः। स्नायात् त्रिसंध्यं शौच
हविष्याशी जितेन्द्रियः। शि
वस्वरूपतां याति शिवप्रीति
करः परः। क्षत्रियादिषु योग
ऽसौ देहे संपीडभक्तितः॥
अश्वमेधफलं तस्य जायते च
पदे पदे सर्व्वकर्म्मपरित्यागी
शिवोत्सवपरायणः। भ
क्तै ज्ञानगणाकृष्टाङ्गो नृ
त्यकृत्हलैः। नानाविधैर्म्म
हावाद्यैर्व्वैष्णवैर्व्विविधैरपि
नानावेशधरैर्न्नृत्यैः प्रीयते
शंकरप्रभुः। किमलभ्यं भग
वति प्रसन्ने नीललोहिते।
तस्मात् सर्व्वप्रयत्नेन तोषणी
यो महेश्वरः। शंखवाद्यं शाल
तोयं वर्ज्जयेत् शिवसन्निधौ।
ग्रामाद्बहिर्विमं शम्भोः कृत्वा वै
कारयेन्मुदा। उपोष्य कृत्वा सं
क्रान्त्यां व्रतमेतत् समापयेत्॥
इति बृहद्धर्म्मपुराणोत्तरखण्डे ९


अध्यायः
संन्यासी पुं संन्यासाश्रमवि
शिष्टः। चतुर्थाश्रमी। तत्पर्य्यायः
पाराशरी २ मस्करी ३ परिव्रा
ट् ४ कर्म्मन्दी ५ श्रमणः ६ भि
क्षुः ७ इति जटाधरः। तस्य
लक्षणादि यथा। सर्व्वशृङ्गादि
केसन्त्यक्तामुण्डितमुण्डो गैरिक
कौपीनाच्छादने देहे कमण्ड
लुं च बिभ्रत् भिक्षावृत्तिर्निर्ज्ज
ने तीर्थे वा स्थित्वा केवलमीश्वरा
राधनं करोति यः संन्यासी।
स तु चतुर्व्विधः कुटीचरः १।
बहूदकः २ हंसः ३ परमहंसः ४
तस्य धर्म्माः यथा। सदने काक
दन्ते वा लोष्ट्रे वा काञ्चने तथा
समबुद्धिर्यस्य शश्वत् स संन्या
सीति कीर्त्तितः। दण्डं कमण्ड
लुं रक्तवस्त्रमात्रं च धारयेत्।
नित्यप्रवासी नैकत्र स संन्या
सीति कीर्त्तितः। शुद्धाचारद्वि
जान्नं च भुङ्क्ते लोभादिवर्ज्जितः
किं तु किंचिन्न चेतनं स संन्या
सीति कीर्त्तितः। न वा पापी
नाश्रमी च सर्व्वकर्म्मविवर्ज्जितः
ध्यायेन्नारायणं शश्वत् स संन्या
सीति कीर्त्तितः। शश्वन्मौनी

ब्रह्मचारी संभाषालापवर्जि
तः। सर्वं ब्रह्ममयं पश्येत्स संन्या
सीति कीर्त्तितः। सर्वं ब्रह्मसमबुद्धि
श्च हिंसामायाविवर्जितः। क्रो
धाहंकाररहितः स संन्यासीति
कीर्त्तितः। अयाचितोपस्थितं च
मिष्टामिष्टं च भुक्तवान्। न
याचेत भक्ष्याणि यो स संन्यासी
ति कीर्त्तितः। न च पश्येन्मुखं
स्त्रीणां न तिष्ठेत्तत्समीपतः। दा
रवीमपि योषां च न स्पृशेद्यः स
भिक्षुकः। अथ संन्यासिनां धर्मे
त्याह कमलोद्भवः। इति ब्रह्मवै
वर्त्ते प्रकृतिखण्डे ३३ अध्यायः॥
अपि च। सर्वसंन्यासो हरौ भूपय
मः संन्यासिनो ध्रुवं। एकाकी वा
स्मादण्डी च बिभर्त्ति मस्तकमण्ड
लुं। सर्वं ब्रह्मसमदर्शी च स्मरेन्ना
रायणं सदा। करोति भ्रमणं
नित्यं गेहे गेहे न तिष्ठति। वि
घ्नां संघं च कस्मैचित् न ददा
ति च दैवतं। करोति नाश्रमे
भिक्षुः करोति नान्यवासनां।
करोति नान्यसंगं च निर्मोहः
स्पृहवर्जितः। न स्वादु भुंक्ते
दैवाच्च स्त्रीमुखं न हि पश्य
ति। न वाञ्छितं भक्ष्यवस्तु या
चते गृहिणां व्रती। इति संन्या
सिनां धर्ममित्याह कमलोद्भवः
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मख
ण्डे ४५ अध्यायः। अन्यच्च। तप
सा कर्षितोऽत्यर्थं यस्तु ध्यान
परो भवेत्। संन्यासीह स विज्ञे
यो वानप्रस्थाश्रमे स्थितः। यो
गाभ्यासरतो नित्यमारुरुक्षुर्जि
तेन्द्रियः। ज्ञानाय वर्त्तते भिक्षुः
प्रोच्यते पारमेष्ठिकः। यस्त्वा
त्मरतिरेव स्यान्नित्यतृप्तो महा
मुनिः। सम्यक् च दमसम्पन्नः स
योगी भिक्षुरुच्यते। भैक्ष्यश्रु
तं च मौनित्वं तपो ध्यानं विशेष
तः। सम्यक् च ज्ञानवैराग्यं ध
र्मोऽयं भिक्षुके मतः॥ ज्ञान
संन्यासिनः केचित् वेदसंन्या
सिनोऽपरे। कर्मसंन्यासिनः
केचित् त्रिविधः पारमेष्ठिकः
योगी च त्रिविधो ज्ञेयो भौति
को मोक्ष एव च। तृतीयोऽन्त्या
श्रमी प्रोक्तो योगमूर्त्तिसमा
श्रितः। प्रथमा भावना पूर्वे
मोक्षे त्वक्षरभावना तृतीये
चान्तिमा प्रोक्ता भावना पारमे
श्वरी। यतीनां यतचित्तानां
न्यासिनामूर्द्ध्वरेतसां॥

आनंदं ब्रह्म तत्स्थानं यस्मान्ना
वर्त्तते मुनिः। योगिनाममृतं
स्थानं व्योमाख्यं परमक्षरं। आ
नंदमैश्वरं यस्मान्मुक्तो नावर्त्त
ते नरः। इति गारुडे ४९
अध्यायः॥ अपरञ्च। ज्ञानसंन्या
सिनः केचिद्वेदसंन्यासिनोऽपरे
कर्मसंन्यासिन स्त्वन्ये त्रिविधाः
परिकीर्त्तिताः। यः सर्वसंग
निर्मुक्तो निर्द्वन्द्वश्चापि निर्भयः
प्रोच्यते ज्ञानसंन्यासी स्वात्म
न्येव व्यवस्थितः। वेदमेवाभ्य
सेन्नित्यं निराशी निष्परिग्रहः
प्रोच्यते वेदसंन्यासी मुमुक्षु
र्विजितेन्द्रियः॥ यस्त्वग्नीना
त्मसात् कृत्वा ब्रह्मार्पणपरो
द्विजः। ज्ञेयः स कर्मसंन्यासी म
हायज्ञपरायणः॥ त्रयाणाम
पि चैतेषां ज्ञानी त्वभ्यधिको म
तः। न तस्य विद्यते कार्य्यं न लिंगा
द्या विपश्चितः। निर्ममो निर्भ
यः शान्तो निर्द्वन्द्वः पर्णभोजनः
जीर्णकौपीनवासाः स्यान्नग्नो
वा ध्यानतत्परः। ब्रह्मचारी मि
ताहारो ग्रामादन्नं समाहरेत्
अध्यात्मरतिरासीत निरपेक्षो
निरामिषः। आत्मनैव सहायेन
सुखार्थं विचरेदिह। सुखार्थमि
त्यत्र स्वार्थमिति च पाठः। ना
भिनन्देत मरणं नाभिनन्देत जी
वितं। कालमेव प्रतीक्षेत नि
देशं भृतको यथा। नाध्येत
व्यं न वक्तव्यं न श्रोतव्यं कदाच
न। एवं ज्ञानपरो योगी ब्रह्मभू
याय कल्पते। एकवासा अथवा
विद्वान् कौपीनाच्छादनोऽथवा
मुण्डः शिखी वाथ भवेत्त्रि
दण्डी निष्परिग्रहः। काषाय
वाससः सततं ध्यानयोगपराय
णः। ग्रामान्ते वृक्षमूले वा वा
से देवालयेऽपि वा। समः शत्रौ
तथा मित्रे तथा मानापमान
योः। भैक्षेण वर्त्तयेन्नित्यं नैका
न्नादी भवेत् क्वचित्। यस्तु मो
हेन चान्यस्मादेकान्नादी भवेद्य
तिः। न तस्य निष्कृतिः काचिद्धर्म
शास्त्रेषु कथ्यते। रागद्वेषवि
मुक्तात्मा समलोष्टाश्मकाञ्चनः
प्राणिहिंसानिवृत्तश्च मौनी स्या
त् सर्वनिस्पृहः। दृष्टिपूतं न्य
सेत् पादं वस्त्रपूतं जलं पिबेत्
शास्त्रपूतां वदेद्वाणीं मनःपूतं
समाचरेत्। नैकत्र निवसेद्दे
शे वर्षाभ्योऽन्यत्र भिक्षुकः॥

स्नान पेणाचरतो नित्यंकमंड
लुकरःशुचिः । ब्रह्मचर्यरतो
नित्यं वनवासरतोभवेत् । मो
क्षशास्त्रेषुनिरतो ब्रह्मचारी·
जितेंद्रियः । दंभाहंकार निर्मु
क्तो निंदापैशुन्यवर्जितः । आ
त्मज्ञान गुणोपेतो यतिर्मो
क्षमवाप्नुयात् ॥ अभ्यसेत्
सततं वेदं प्रणवाख्यंसना
तनं । स्नात्वाचम्यविधानेन
शुचिर्देवालयादिषु । यज्ञो·
पवीती शांतात्मा कुशपाणिः
समाहितः । धौतकाषायवसनो
भस्मछन्नतनूरुहः । अधियज्ञं
ब्रह्मजपेदाधिदैविकमेवच ॥
आध्यात्मिकंचसततं वेदांताभि
धानंचयत् । पुत्रेषुवाथनिवस
न् ब्रह्मचारी यतिर्मुनिः । वेदमे
वाभ्यसेन्नित्यं सयातिपरमांग·
तिं । अहिंसासत्यमस्तेयंब्रह्मच
र्यंतपःपरं । क्षमादयाचसंतो
षो व्रतान्यस्यविशेषतः । वेदां
तज्ञाननिष्ठोवा पंचयज्ञान्स·
माहितः । कुर्यादहरहःस्नात्वा
भिक्षान्नेनैव तेनहि । होममंत्रा
न् जपेन्नित्यं काले कालेस·
माहितः । स्वाध्यायंचान्वहं कु
र्यात् सावित्रीं संध्ययोर्जपेत्
ध्यायेत सततं देव मेकांतेप
रमेश्वरं । एकान्नंवर्जयेन्नित्यं
कामंक्रोधंपरिग्रहं । एकवा
साद्विवासावा शिखी यज्ञोप
वीतवान् । कमंडलुकरोविद्वां
स्त्रिदंडीयातितत्पदं । इति
कौर्मे उपरिभागे २७ अध्यायः
व्यासउवाच । एतत्वाश्रमनिष्ठा
नांयतीनांनियतात्मनां । भै
क्षेण वर्तनं प्रोक्तं फलमूलै
रथापिवा । एककालं चरेद्भै
क्षं नप्रसज्जेत विस्तरे । भैक्षप्र
सक्तो हि यति र्विषयेष्वपिस
ज्जति । सप्तागारं चरेद्भैक्षमला
भेहे पुनश्चरेत् । प्रक्षाल्य पा
त्रेभुंजीयादद्भिःप्रक्षालयेत्तु
त् । अथवान्यदुपादाय पात्रेभुं
जीत नित्यशः । भुक्त्वाचसंत्य
जेत् पात्रं यात्रामात्रमलोलुपः
विधूमे सन्नमुसले व्यंगारे भु·
क्तवज्जने । वृत्ते शरावसंपाते
भिक्षां नित्यं यति श्चरेत् ॥
गोदोहमात्रं तिष्ठेत कालं
भिक्षु रधोमुखः ॥ भिक्षे·
त्युक्त्वा सकृत्तूष्णीमश्नीयाद्वा·
ग्यतःशुचिः ॥ प्रक्षाल्य ।

पाणिपादौचसमाचम्ययथा
विधि । आदित्ये दर्शयित्वान्नं·
भुंजीतप्राङ्मुखोत्तरः । कृत्वाप्रा
णाहुतीःपंच ग्रासानष्टौसमाहि
तः । आचम्य देवंब्रह्माणंध्यायी
तपरमेश्वरं । अलाबुं दारुपात्रं·
च मृन्मयंवैणवंततः । चत्वारि
यतिपात्राणि मनुराह प्रजाप
तिः । प्रदोषेपररात्रेच मध्यरा
त्रे तथैवच । संध्यास्वह्निविशे
षेण चिंतयेन्नित्यमीश्वरं ॥ कृ
त्वाहृत्पद्मनिलये विश्वाख्ये
विश्वसंभवे । आत्मानंसर्वभू
तानांपरस्तात्तमसः स्थितं । सर्व
स्याधार भूतानामानंदंज्योति
रव्ययं । प्रधानपुरुषातीतमा
काशंदहनंपरं । तदंतःसर्वभा
वानामीश्वरं ब्रह्मरूपिणं ।
ध्यायेदनादिमद्वैत मानंदादि
गुणालयं । महांतंपरमंब्रह्मपुरु
षंसत्यमव्ययं । सितेतरारुणा·
कारं महेशं विश्वरूपिणं । ओंका
रांतेथ्यवात्मानं संस्थाप्यपर·
मात्मनि । आकाशेदेवमीशा
नंध्यायीताकाशमध्यगं । कार
णंसर्वभूतानामानंदैकसमा
श्रयं । पुराणपुरुषंशुभ्रंध्यायेन्मुच्ये
त ।
बंधनात् । यद्वा गुहायांप्रकृतौ
जगत्संमोहनालये । विचिंत्य
परमे व्योमसर्वभूतैककारणं
जीवनं सर्वभूतानां यत्रलोकः
प्रलीयते । आनंदंब्रह्मणःसूक्ष्मं
यत्पश्यंति मुमुक्षवः । तन्मध्ये
निहितंब्रह्मकेवलं ज्ञानलक्ष
णं । अनंतंसत्यमीशानं विचिं
त्यासीत संयतः । गुह्याद्गुह्य
तमं ज्ञानं यतीनां मेतदीरितं
योऽनुतिष्ठेत सततं सोऽश्नुते
योगमीश्वरः । तस्माद्ध्यानर
तो नित्यमात्मविद्यापरायणः
ज्ञानं समभ्यसेद्ब्राह्मं मुच्येत
भवबंधनात् । यद्वा पृथक्
त्वमात्मानं सर्वस्मादेवकेवलं
आनंदमक्षरं ज्ञानं ध्यायीत च
पुनः परं । यस्माद्भवंति भूतानि
यद्गत्वा नेह जायते । सतस्मादी
श्वरोदेवःपरस्माद्योऽधितिष्ठति
यदंतरेतद्गगनं शाश्वतंशिवम
व्ययं । यमात्मतत्परोयस्तुस
देवःस्यान्महेश्वरः । व्रतानि
यानि भिक्षूणां तथैवोपव्र
तानिच । एकैकातिक्रमे ते·
षां प्रायश्चित्तं विधीयते । उप
त्यच स्त्रियंकामात् प्रायश्चि



न्नेसमाहितः। प्राणायाममसमा
युक्तः कुर्यात् सांतपनेनशुचिः।
ततश्चरेत नियमान् कृत्स्नान्सं
यतमानसः पुनराश्रममागम्य
चरेद्भिक्षुरतंद्रितः। न तस्मिंप्र
क्रमस्तत्रेहिनस्तीति मनीषिणः
तथापि न च कर्तव्यः प्रसंगो ह्ये
षदारुणः। एकरात्रोपवासश्च
प्राणायामशतं तथा। उत्क्रान्त
नैप्रकर्तव्यं यतिना धर्मलिप्सु
ना। परमापद्गतेनापिनकार्यं
स्तेयमन्यतः। स्तेयादभ्य
धिकः कश्चित् नास्त्यधर्म इति
स्मृतिः हिंसा चैषा परा तस्मा
या चात्मज्ञाननाशिका। यदेते
द्रविणं नाम प्राणाह्येतेवहि
श्चराः। सतस्यहरते प्राणान्
योयस्यहरतेधनं। एवं कृत्वा
सदुष्टात्मा भिन्नवृत्तोव्रतच्युतः
भूयोनिर्वेदमापन्न श्चरेच्चांद्रा
यणंव्रतं। विधिना शास्त्रदृ
ष्टेन संवत्सर मिति श्रुतिः॥
भूयो निर्वेद मापन्न श्चरेद्भिक्षु
रतंद्रितः। अकस्मादपिहिंसां
तुयदिभिक्षुः समाचरेत् कुर्या
त्कृच्छ्रातिकृच्छ्रंतु चांद्रायणं
मथापिवा स्कंदेदिंद्रियदौर्बल्यात्
स्त्रियं दृष्ट्वा यति र्यदि। तेन
धारयितव्याव्वै प्राणायामास्तु
षोडश। दिवास्कन्ने त्रिरात्रंस्यात्
प्राणायामशतं तथा। एकान्ने
मधुमांसेच नवश्राद्धे तथैवच
प्रत्यक्षलवणे चोक्तं प्राजाप
त्यविशोधनं। ध्याननिष्ठस्य
ततं नश्यते सर्वपातकं। त
स्मान्महेश्वरं ध्यात्वातस्यध्या
नरतोभवेत्। यद्ब्रह्मपरमंज्यो
तिः प्रतिष्ठाक्षयमव्ययं। यो
ऽन्तरात्मापरंब्रह्मसविज्ञेयो म
हेश्वरः। एषदेवो महादेवः के
वलः परमेश्वरः। तदेवाक्षय
मद्वैतंतदादित्यांतरंपरं॥ यस्मा
न्महीयसे देवः स्वधाम्नि ज्ञा
नसंस्थिते। आत्मयोगाह्वये त
त्वेमहादेवस्ततः स्मृतः। नान्यं
देवं महादेवाद्व्यतिरिक्तं प्रप
श्यति। तमेवात्मान मात्मेति
यःसयातिपरंपदं॥ मन्यन्ते ये
स्वमात्मानं विभिन्नं परमेश्व
रात्। न ते पश्यन्ति तं देवं वृथा
तेषांपरिश्रमः। एक मेव परं
ब्रह्मविज्ञेयं तत्त्वमव्ययं। सदे
वस्तुमहादेवो नैतद्विज्ञाय
बध्यते॥ तस्माद्यत्नेन निय

तं यतिः संयतमानसः॥ ज्ञान
योगरतः शांतोमहादेवपरायणः
एषवः कथितो विप्रा यतीना
माश्रमः शुभः। पितामहेन प्र
भुना मुनीनां पूर्वमीरितः। न
पुत्रशिष्य योगिभ्यो दद्यादिद
मनुत्तमं। ज्ञानं स्वयंभुवा
प्रोक्तंयतिधर्माश्रमेशिवं॥ इ
ति यतिनियमानामेतदुक्तं वि
धानं पशुपतिपरितोषेयद्भवेदे
कहेतुः। नभवति पुनरेषामु
द्भवोवा विनाशः प्रणिहितम
नसा येनित्य मेवाचरंति। इति
कौर्म्मेउपविभागे यतिधर्म्मो
नाम २८। अध्यायः॥
युगभेदे संन्यासिनां नामानि
उपाधयश्च यथा। आदौ वेदो
क्ताचार्यो ब्रह्मा। द्वितीयाचा
र्यो विष्णुः। तृतीयाचार्यो रु
द्रः। चतुर्थाचार्यो वशिष्ठः
पंचमाचार्यः शक्तिः। षष्ठा
चार्यः पराशरः। सप्तमाचा
र्यो व्यासः। अष्टमाचार्यः शु
कः। नवमाचार्यो गौडः। दश
माचार्यो गोविंदः। एकादशः
श्रीशंकराचार्यः। सत्ययुगमध्ये
आचार्यत्रयं ब्रह्म विष्णु रुद्राः।
त्रेतायुगे आचार्यत्रयं वशिष्ठ
शक्ति पराशराः। द्वापरे आचा
र्यद्वयं व्यास शुकौ। कलियुगे
आचार्यत्रयं गौड गोविंद शंक
राचार्याः। शंकराचार्यस्य च
त्वारः शिष्याः स्वरूपाचार्यः प
द्माचार्यः त्रोटकाचार्यः पृथ्वी
धराचार्यइति। अथदशनामानि
स्वरूपाचार्यस्य शिष्यः तीर्थः आ
श्रमश्च। पद्माचार्यस्यशिष्यद्वये
वनः अरण्यश्च। त्रोटकाचार्य
स्य शिष्यत्रयं गिरि पर्वत साग
रा इति पृथ्वीधराचार्यस्य शिष्य
त्रयं। सरस्वतीभारतीपुरी चेति
इति श्रीशंकराचार्यविरचितं।
सप्तमस्त्रं। अपिच। तीर्थाश्र
मवनारण्य गिरि पर्वत साग
राः सरस्वती भारतीच पुरीति
दशकीर्तिताः। तेषां लक्षणानि
यथा। त्रिवेणी संगमे तीर्थेतत्त्व
मस्यादि लक्षणे। स्नायात्तत्त्वा
र्थभावेन तीर्थनाम्ना सउच्यते १
आश्रमग्रहणे प्रौढ आशापा
शविवर्जितः। यातायातविनि
र्मुक्त एतदाश्रमलक्षणं॥ २
सुरम्ये निर्झरे देशे वनेवासं क
रोतियः॥ आशापाशविनि

मुक्तो वननामा सउच्यते ३ ॥
अरण्ये संस्थितो नित्यमानंद
नंदने वने । त्यक्त्वा सर्वमिदं वि
श्व मानंदलक्षणे किल ॥ ४ ।
वासो गिरिवरे नित्यं गीताभ्या
से हि तत्परः । गंभीराचलबु
द्धिश्च गिरिनामा सउच्यते ५
वसेत् पर्वतमूलेषु प्रौढो यो
ध्यान धारणात् । सारात्सारं
विजानाति पर्वतः परिकीर्ति
तः । ६ । वसेत्सागर गंभीरो व
नरत्न परिग्रहः । मर्यादाश्च
न लंघेत सागरः परिकीर्तितः
७ । स्वरज्ञानवशो नित्यं स्वर
वादी कवीश्वरः । संसारसागरे
साराभिज्ञो यो हि सरस्वती ८
विद्याभावेन संपूर्णः सर्वभारं
परित्यजेत् । दुःखभावे न जाना
ति भारती परिकीर्तितः ९ ॥
ज्ञानतत्वेन संपूर्णः पूर्णतत्वप
दे स्थितः । पर ब्रह्मरतो नित्यं
पुरीनामा सउच्यते १० । इति
दृष्टच्छेकरविजये विद्यारण्य
स्वामिसूते ॥ श्रीसदाशिवउवा
च ॥ अथवक्ष्याम्यहो देवि क
लौ संन्यास उच्यते विधिना
येन कर्तव्यं तत्

सर्वं शृणुष्व साम्प्रतं । ब्रह्मज्ञाने स
मुत्पन्ने विरते स्वर्गकर्मणि ।
अध्यात्मविद्यानिपुणः संन्या सं
न्यासाश्रममाचरेत् । विहाय वृद्धौ
पितरौ शिशुं भार्यां पतिव्रतां ।
त्यक्त्वासमर्थान् बंधूंश्च प्रव्रजे
न्नारकी भवेत् । संपाद्य गृहक
र्माणि परितोष्याखिलानपि ।
निर्ममो निलयाद्गच्छेन्निष्का
मो विजितेंद्रियः । आहूय स्व
जनान् बंधून् ग्रामस्थानपि वा
सिनः । प्रीत्यानुमति मन्विच्छेद्गृ
हाज्जिगमिषुर्नरः । तेषामनुज्ञा
मादाय प्रणम्य परदेवतां । ग्रामं
प्रदक्षिणीकृत्य निरपेक्षो गृहा
दियात् । मुक्तः संसारपाशेभ्यः प
रमानंदहृंहितः । कुलावधूतं ब्र
ह्मज्ञं गत्वा संप्रार्थयेदिदं ॥ गृ
हाश्रमे परं ब्रह्मन् ममैतद्विगतं
वयः । प्रसादं कुरु मे नाथ संन्या
सग्रहणं प्रति । निवृत्तगृहकर्मा
णं विचार्य विधिवद्गुरुः ॥
प्रशांतं विवेकिनं वीक्ष्य द्वितीया
श्रममादिशेत् । ततः शिष्यः कृत
स्नानो यतात्मा विहिताह्निकः
ऋणत्रय विमुक्त्यर्थं देवर्षीश्चा
र्चयेत् पितृन् । देवा ब्रह्मा च.

विष्णुश्च रुद्रश्च सगणैः सह ।
ऋषयः सनकाद्याश्चाद्या दे
वर्षयस्तथा । अत्र ये पितरः पूज्या
वक्ष्यामि शृणु तानपि पितापिता
महश्चैव प्रपितामह एव च । मा
ता पितामही देवि तथैव प्रपि
तामही । मातामहादयोऽप्येवं
मातामह्यादयोऽपि च । प्राच्या
मृषीन् यजेद्देवान् दक्षिणस्यां
पितॄन् यजेत् । मातामहान्
प्रतीच्यां तु पूजयेच्छ्राद्धकर्मणि
एकैकादि क्रमतो दद्यादासनानां
द्वयं द्वयं । देवादीन् क्रमत
स्तत्रावाह्य पूजां समाचरेत् ॥
समर्च्य विधिवत्तेभ्यः पिंडान्
दद्यात् पृथक् पृथक् ॥ पिंड
प्रदानविधिना दत्वा पिंडं य
थाक्रमं । कृतांजलिपुटो भूत्वा
प्रार्थयेत् पितृदेवताः । तृप्यंतु
पितरो देवा देवर्षि मातृकाग
णाः । गुणातीतपदे शून्य मत्प्राणी
कुरुताचिरात् । आनृण्यमर्थयि
त्वा च प्रणम्य च पुनः पुनः । ऋण
त्रयविनिर्मुक्तः स्वात्मश्राद्धं प्रक
ल्पयेत् । पितामहास्तथैव सर्वेषां
तत्पिता प्रपितामहः । आत्मना
मर्पणार्थाय कुर्याद्वात्मक्रियां

सुधीः । उत्तराभिमुखो भूत्वा पूर्व
वत् कल्पितासने । आवाह्यात्म
पितॄन् देवि दद्यात् पिंडं सम
र्चयन् । आग्नेयान् दक्षिणाग्रांश्च
पश्चिमाग्रान् यथाक्रमात् । पि
ण्डार्थमास्तरेद्दर्भानुदगग्रांस्त
कर्मणि । समाप्य श्राद्धकर्माणि
गुरुदर्शितवर्त्मना मुमुक्षुश्छिन्न
सूत्रार्थं मिमं मंत्रं शतं जपेत् ।
ह्रीं त्र्यंबकं यजामहे सुगंधिं पु
ष्टिवर्धनं । उर्वारुकमिव बंध
नान्मृत्यो र्मुक्षीयमामृतात् । उ
पासनानुसारेण विधामंडल
पूर्वकं । संस्थाप्य कलशं तत्र गु
रुः पूजां समारभेत् । ततस्तु परम
ब्रह्म ध्यात्वा शांतवर्त्मना विधा
यपूजां ब्रह्मज्ञो ब्रह्मस्थापनमा
चरेत् । प्राग्वत् संस्कृते वह्नौ सं
कल्प्य काकुतिं गुरुः । दत्वा शि
ष्यं समाहूय साकल्यं हावयेत्त
तः । आदौ व्याहृति भिर्हुत्वा प्रा
णहोमं प्रकल्पयेत् । प्राणोऽपा
नः समान उदान व्यानौ च वा
यवः । तत्र होमे ततः कुर्याद्देहा
मेध्यत्वशुद्धये । पृथिवीसलिलं
वह्नि वायु राकाश मेव च ॥
गंधो रसश्च रूपश्च स्पर्शः शब्दो

यथाक्रमात् । ततो वाक्पाणि
पादाश्च पायूपस्थौ ततः परं
श्रोत्रं त्वक् नयने जिह्वा घ्राणं
बुद्धीन्द्रियाणि च एतानि मे प
दांतेच शुध्यंति पद मुच्चरेत्
ज्योतिर्ज्योति रहं विरजा विपाप्मा
भूयासं हिठ इत्यपि । चतुर्विं
शति तत्वानि कर्माणि वैदिका
नि च । कृत्वाग्नौ निष्क्रियो देहं
स्मृतवच्चिंतयेत्ततः विभाव्य मृ
तवत्कायं रहितं सर्वकर्मणा
स्मरन् तत्परमं ब्रह्म यज्ञसूत्रं
समुद्धरेत् ऐं क्लीं हूं इति मंत्रेण
स्कंधादुत्सार्य तत्ववित् यज्ञसूत्रं
करे धृत्वा पठित्वा व्याहृतित्रयं
वह्निजायां समुच्चार्य हुताशन
ने क्षिपेत् । कृत्वैवमुपवीतं त्व
कामबीजं समुच्चरन् छित्वा शि
खां करे कृत्वा घृतमध्ये नियोज
येत् । ब्रह्मपुत्रि शिखे त्वं हि वाग्नि
रूपा सनातनी । दीयते पावके स्था
नं गच्छ देवि नमोऽस्तु ते । काम
मायां कूर्चमंत्रं वह्निजायामुदी
रयेत् । शिखां वा साग्निमध्ये पित
रो देवा देवर्षयस्तथा । सर्वाण्या
श्रमकर्माणि निवसेति शिखा॰
परि ततः संतर्पिताः सर्वा देव

र्षिपितृदेवताः । शिखासूत्र प
रित्यागाद्देही ब्रह्ममयो भवेत्
यज्ञसूत्र शिखात्यागात् संन्यासः
स्याद्द्विजन्मनां । शूद्राणामितरेषां
च शिखां कृत्वैव संक्रिया । ततो
मुक्तशिखासूत्रः प्रणमेद्दण्डव
द्गुरुं । गुरुरुत्थाप्य तं शिष्यं द
क्षकर्णे वदेदिमं । तत्वमसि म
हाप्राज्ञ हंसः सोऽहं विभावय ॥
निर्ममो निरहंकारः स्वभावेन सु
खं चर । ततोच्चरेच्च वह्निं च वि
सृज्य ब्रह्मतत्ववित् । आत्मस्व
रूपं तं मत्वा प्रणमेच्छिरसा गु
रुं । नमस्तुभ्यं नमो मह्यं तुभ्यं म
ह्यं नमो नमः । त्वमेव त्वदहमे
व विश्वरूप नमोऽस्तु ते । ब्रह्म
मंत्रोपासकानां तत्वज्ञानां जि
तात्मनां । स्वमंत्रेण शिखाच्छे
दात् संन्यासग्रहणं भवेत् । ब्र
ह्मज्ञान विशुद्धानां किं यज्ञैः
श्राद्ध पूजनैः । स्वेच्छाचारपरा
णां तु प्रत्यवायो न विद्यते ॥
ततो निर्द्वन्द्वरूपोऽसौ निष्कामः
स्थिरमानसः । निर्ममो विहरे
त् शिष्यः साक्षाद्ब्रह्ममयो भुवि
मुक्तो विधि निषेधाभ्यां निर्यो
ग क्षेम आत्मवित् । सुखदुःख

समो धीरो जितात्मा विगतस्पृ
हः । स्थिरात्मा प्राप्तदुःखोऽपि
सुखे प्राप्तेऽपि निस्पृहः । सदा
नंदः शुचिः शांतो निरपेक्षो
निराकुलः । नोद्वेजकः स्यात् जी
वानां सदा प्राणिहिते रतः ॥
विगतामर्षभीर्दान्तो निःसंक
ल्पो निरुद्यमः शोक द्वेष विमु
क्तः स्यात् शत्रौ मित्रे समो भवे
त् । शीत वातातपसहः स
मो मानापमानयोः । समः शु
भाशुभे तुष्टो यदृच्छालाभ
वस्तुना । निस्त्रैगुण्यो निर्विक
ल्पो निर्लोभः स्यादसंचयी । य
था सत्यमुपाश्रित्य मृषा विश्वं
प्रतिष्ठति । आत्माश्रित स्तथा दे
हो ज्ञानत्रेवं सुखी भवेत् । इंद्रि
याण्येव कुर्वंति स्वं स्वं कर्म पृथ
क् पृथक् । आत्मा साक्षी विनिर्लि
प्तो ज्ञात्वैवं मोक्षभाग्भवेत् ॥
धातुप्रतिग्रहे निंदामनृतं क्रीड
नं स्त्रिया । रेतस्त्यागमसूयां च
संन्यासी परिवर्जयेत् । सर्वत्र
समदृष्टिः स्यात् कीटे देवे तथा
नरे । सर्वं ब्रह्मेति जानीयात्
परिव्राट् सर्वकर्मसु । विप्रान्नं
श्वपचान्नं वा यस्मात्तस्मात् स

मागतं । देशे काले तथा पा
त्रे मश्नीयादविचारयन् । अध्या
त्मशास्त्राध्ययनैः सदा तत्वविचा
रणैः । अवधूतो नयेत्कालं स्वे
च्छाचारपरायणः । संन्यासिनो
मृते काये दाहयेन्न कदाचन ॥
संपूज्य गंधपुष्पाद्यैर्निखने
द्वाप्सु मज्जयेत् । अप्राप्तयोग
मर्त्यानां सदा कामाभिलाषिणां
प्रभावाज्जायते देवि प्रवृत्तिः
कर्मसंकुले । अत्रापि नेष्टानुर
क्ता ध्यानाद्वा जपसाधने । श्रे
यस्तदेवज्ञानेन स्त्रैत्रैवहृप्ति
श्रयाः । अतः कर्मविधानानि
प्रोक्तानि चित्तशुद्धये । नाम
रूपं बहुविधं तदर्थं कल्पितं
मया ब्रह्मज्ञानं विना देवि कर्म
संन्यसनं विना । कुर्वन् कल्पश
तं कर्म न भवेन्मुक्तिभाजनः ।
कुलावधूतस्तत्वज्ञो जीवन्मुक्तो
नराकृतिः ॥ साक्षान्नारायणं
मत्वा गृहस्थस्तं प्रपूजयेत् ॥
यतो दर्शनमात्रेण विमुक्तः स
र्वपातकात् । तीर्थव्रततपोदान
सर्वयज्ञफलं लभेत् । इत्यवधू
ताश्रमः । इति महानिर्वाणतं
त्रेऽष्टमोल्लासः ॥

सपत्रकृतः पुं स्तनमृगादिः। अत्यंतपीडिते त्रि। इति केचित्॥

सपत्राकरणं क्ली अत्यंतपीडने। इतिहलायुधः॥

सपत्राकृतः पुं स्तनमृगादिः। अत्यंतपीडिते त्रि॥ इति केचित्॥

सपत्राकृतिः स्त्री अत्यंतपीडनं तत्पर्य्यायः। निष्पत्राकृतिः२ इतिहेमचंद्रः॥

सपत्नः पुं शत्रुः। इत्यमरः॥

सपत्नारिः पुं वंशविशेषः। वेउवांश इति भाषा। यथा। ब्रह्मर्षिः सपत्नारि र्वेऊसंततिराखुपः। इति शब्दचंद्रिका॥

सप संबंधे। अहीसपत्। इति दुर्गादासः। कविकल्पद्रुमे मूर्द्धन्यादिरयं॥

सपत्नी स्त्री समानपतिका। सतीन इति भाषा। यथा। दौहित्राभावे सपत्नीपुत्रः। तस्यपुत्रत्व स्मरणात्। यथा मनुः॥ सर्वासा मेकपत्नीना मेका चेत् पुत्रिणी भवेत्। सर्वास्ता स्तेन पुत्रेण प्राह पुत्रवती र्मनुः॥ एकपत्नीना मिति एकः पतिर्यासा मिति। अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्वेपि स्त्रीणां सपिंडने मैथिले रुक्तं। तत्र पुत्रेणैव तत्कर्त्तव्यमसपिंडीकरणं स्त्रियाः। पुरुषस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपिच। इतिलघुहारीतवचने एवकारेणातिदिष्टपुत्रनिषेधात्॥ इति शुद्धितत्वं॥

सपदि अव्य तत्क्षणः॥ इत्यमरः॥

सपर्य्या स्त्री पूजा। इत्यमरः॥

सपादः त्रि पादेन सहवर्त्तमानः स तु चरणयुक्तः चतुर्थभागसहितश्च। यथा। सपादपलमाने न वेला त्रुटति निश्चितं। इति सत्कृत्यमुक्तावली॥

सपादपीठं त्रि पादपीठयुक्त सिंहासनादि। यथा। आदित्त दादीमकृत्वानुकल्य सिंहासनं तस्य सपादपीठं संतप्तचामीकर वल्गु वन्ने विभावरीन्यस्त महार्हरत्नं। इतिभट्टौ २ सर्गः॥

सपिंडः पुं सप्तपुरुषांतर्गतज्ञातिः। तत्पर्य्यायः। सनाभिः २ इत्यमरः॥ सच अशौचविवाह दायभेदात् त्रिविधः। तत्राशौचसपिण्डस्य लक्षणं यथा। सप्तपुरुषांतर्गतत्वे सति गोत्रैक्ये सति दातृत्वे भोक्तृत्वान्यतर संबंधेन। पिंडलेपान्यतरवत्वं। दत्तकन्यानांतु भर्त्तृसपिण्डेन सापिंड्यं। अदत्तानां पितृवपि त्रिपुरुष सापिण्ड्यं। विवाहसपिंडास्तु। पितृ पितृबन्धुपेक्षया सप्तमपुरुषावधयः। मातामह मातृबन्धुपेक्षया पंचमपुरुषावधयश्च। यथा। पंचमात्सप्तमाद्दूर्द्धं मातृतः पितृतः क्रमात्। सपिंडता निवर्त्तेत सर्ववर्णेष्वयं विधिः। इत्युद्वाहतत्त्व धृतनारदवचनं। दायसपिण्डास्तु। त्रिपुरुषावधयः। तेच पितृपितामह प्रपितामहाः तेषां पुत्र पौत्र प्रपौत्र दौहित्राः। मातामह प्रमातामह वृद्धप्रमातामहाः। तत्पुत्र पौत्र प्रपौत्राश्च। इति दायभागः॥ अथ सपिण्डादिविचारः। मत्स्यपुराणं। लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिंडदः सप्तम स्तेषां सापिंड्यं साप्तपौरुषं तन्त्रैव श्राद्धादिभिः सह पिंड तल्लेपभोक्तृत्वा संभवात् कथंसपिंडत्वमिति चेदुच्यते। तेषामपि पिंडलेपयोः संबंधोऽस्ति। तथाच बौधायनः। प्रपितामहः पितामहः। पिता स्वयं सोदर्य्यभ्रातरः सवर्णायाः पुत्रः पौत्रः प्रपौत्रो वा एतानविभक्तदायादान् सपिंडानाचक्षते विभक्तदायादान् सकुल्यानाचक्षते सत्स्वंगजेषु तद्गामी ह्यर्थो भवति। इति। अस्यार्थः पित्रादि पिण्डत्रयेषु सपिंडनेन भोक्तृत्वात् पुत्रादिभिस्त्रिभि स्तत्पिंडदानात्। यस्तुजीवन् यस्यपिंडदाता स मृतः सन् सपिंडनेन तत्पिंडभोक्ता एवंसतिमध्यस्थितः पुरुषः पूर्वेषांजीवन् पिंडदाता मृतः सन् तत्पिंडभोक्ताः पूर्वेषां जीवतां पिण्डसंप्रदानभूतश्चासीत् मृतेभ्य तैः सह दौहित्रादिदेयपिण्डभोक्ता। अतो येषा मयं पिंडदाता ये चास्य पिंडभोक्तार स्तैःविभक्तपिंडरूपे दाये अप्यस्तीति अविभक्तदायादाः सपिंडा इति। इदंच सपिंडत्वं सकुल्यत्वंच दायग्रहणार्थं। अशौचाद्यर्थंतु

पिंडलेपभुजां। अपि लेपभा
जश्चतुर्थाद्याः पित्राद्याः पिंड
भागिनः। इति प्रागुक्तमत्स्यपु
राणात् वक्ष्यमाणकूर्मपुरा
ण शंखलिखितवचनाच्च। पि
ण्डे यथापरस्परं भोक्तृत्वं तथा
लेपेऽपस्य न्यायात्। हारलता।
यां कूर्मपुराणं। सपिण्डता तु
पुरुषे सप्तमे विनिवर्त्तते। समा
नोदकभावस्तु जन्मनाम्नोरवे
दने। पिता पितामहश्चैव तथै
व प्रपितामहः। लेपभाजश्चतु
र्थाद्याः सापिंड्यं साप्तपौरुषं
लेपभागिभ्यस्त्र्यहं यावज्जन्म
नाम्नोर्वेदनं यावदमुकना
म्नोऽस्मात् पूर्वपुरुषादयं जा
तः इति विशेषः अथ अस्मत्
कुले जात इति सामान्यतो वा
स्मर्य्यते तावत् समानोदक
त्वमिति हारलता। अत्र परवच
नेनैव सापिंड्यसिद्धौ पूर्ववच
न प्रवृत्तिर्जीवत्पितृकत्वादि
नाऽप्राप्तिकपुरुषेषु पिंडलेप
संबंधेऽपि सपिंडतानिवृत्तिज्ञाप
नाय सर्वदेशीयाचारोपि तथा।
यथाह विवेकेऽपि पार्वणश्रा
द्धं तं निरुप्याहं विकलस्य कः

मार्कण्डेयपुराणे निमिक्रिया।
पितृणां तु केचिदिच्छन्ति सप्तमाः
न पितृणां तथैवान्ये शेषं एव
दापयेत्। अत्र पूर्वोक्तान् पितृणां
प्राप्तौ न पितृणामित्यत्र पुनः पि
तृणां ग्रहणं सहकादीनाम
न्त्रोत्सर्गाभ्यनुज्ञानार्थमिति
फलान्तरं शुक्रे हरिशर्म्मणा
पिण्डत्यागार्थं पुनर्वचनमिति लि
खितं। अथ यः खलु पिंडान् द
त्तेवम्भूतः परतस्त्वप्राप्तमित्यभा
वः स कथं सपिंडः एकपिंडदा
तृत्वभोक्तृत्वलक्षणसंबंधाभा
वादिति चेन्न तद्योग्यतयेति क
मः। योग्यताप्रयोजकं च सामा
न्यशास्त्रविषयत्वं। तेनास्य अत्र
तिवृद्धप्रपितामहावधिकाप्रत्न
नानापक्षा ७ सा प्रत्येकापेक्षया
समानामेकगोत्राणां स्यादपि
परतनानां समानोच सापिंड्यं
पिंडलेपयोर्दातृत्वभोक्तृत्व
संबंधादिति स्त्रीणां तु भर्तृसापि
ण्डेन सापिंड्यं। पत्नीनां भर्तृसा
पिण्ड्यमिति वचनात्। नन्वेवं क
न्यायाः कथं सपिंडतेति चेदत्रा
दिपुराणवचनात्। त्रैपुरुषं स
पिंड्यं। यथा। सपिंडता तु।

कन्यानां सवर्णानां त्रिपौरुषी
अत्र कन्यानाम् अनूढानां। अत्र
त्राणां त्रिपौरुषमिति वशिष्ठव
चनात्। तेन आत्मपंचमे वृद्धप्र
पितामहे सापिंड्यं निवर्त्तते।
इति प्रतिपादिते अतएव क
न्यायाः प्रपितामहभ्रात्रा तत्स
न्ततिभिश्च सह सापिंड्याभावात्
कन्यामरणे जननयोस्तेषां स
पिंडाशौचं नास्ति किन्तु समानो
दकनिमित्तमेवाशौचमिति।
एवं तेषामपि जननमरणयोः क
न्यानामिति शूलपाणिमहा
महोपाध्यायाः। यत्तु कूर्मपुराणं
अप्रत्तानां तथा स्त्रीणां सापिंड्यं
साप्तपौरुषं। प्रत्तानां भर्तृसा
पिण्ड्यं प्राह देवः पितामहः॥
इति रत्नाकरधृतं तद्विवाहेपि
तृपक्षविषयं। यथा विष्णुपु
राणं। सप्तमीं पितृपक्षाच्च मा
तृपक्षाच्च पंचमीं। उद्वहेत द्वि
जो भार्य्यां न्यायेन विधिना नृ
प सप्तमीं पंचमीं हित्वा इति शे
षः। भर्तृसापिण्ड्यमित्यत्र सा
प्तपौरुषमित्यनुषज्यते तेन
भर्तृसमानं सापिंड्यमित्यर्थः
शंखलिखितौ। सपिण्डता तु

सर्वेषां गोत्रतः साप्तपौरुषी। पि
ण्डेचोदकदाने च शौचाशौचं तदा
नुगं। गोत्रतः गोत्रैक्येन मा
तामहकुले कदाचित् षट्पु
रुषपर्य्यन्ते पिंडसंबंधेपि न स
पिंडता। तावत्सप्तपुरुषान् आ
समंतात् कात्स्न्येन पिण्डादिकम
नुगच्छतीति तदानुगं। एतेन
सपिंडता एकशरीरावयवान्व
येन भवति। तथाहि। पितुः श
रीरावयवान्वयेन पित्रा सह पु
त्रस्य पितामहादिभिरपि पितृद्वारे
ण तच्छरीरावयवान्वयात् ए
वं मातृशरीरावयवान्वयेन मात्रा
दिभिरपि। एवं पत्न्या सह पत्न्या
एकशरीरारम्भकतया सापिंड्यं
तथा च गर्भोपनिषत्। एतत्
षाट्कौषिकं शरीरं त्रीणि पि
तृतः त्रीणि मातृतः अस्थिस्नायु
मज्जानः पितृतः त्वङ्मांसरुधि
राणि मातृत इति तत्र तत्राव
यवान्वयप्रतिपादनात्। निर्वाप्य
पिंडान्वयेन तु सापिंड्ये भ्रातृपि
तृव्यादिषु सापिंड्यं न स्यात् अति
प्रसंगस्तु समानमतेन प्रयो
गोपाधिना निरसनीयः यद्येवं
मातामहादीनामपि मरणे स

पिण्डत्वेन दशाहाद्यशौचं प्राप्नोति
स्यादेतत् यदि मातामहादीनां म
ध्येऽत्रिरात्रं स्याद्दशौचकं इत्या-
दिविशेषवचनं नस्यात्। यत्र
तु विशेषवचनं नास्ति तत्र दशा
हमिति मिताक्षरा रत्नाकरादि
मतमपास्तं। लेपभाज इत्यादि
वाचनिके ऽर्थे सापिण्ड्ये एकश-
रीरावयवान्वयरूप स्वकपोल
रचितार्थानवकाशात् किंवा
सपिण्डसंबन्धेन भ्रात्रादीनां सा
पिण्ड्यस्य मतस्य पूर्वाणामेवायना
भ्यां एवं युक्तत्वात्। कामधेनु
हारलता कल्पतरु पारिजात
कारादिभिरस्यैव व्याख्यातत्वा
च्च। रेतः शोणितपरिणामरूपत्वा
दपत्यशरीरस्य भर्त्तुर्वा तथा।
पत्न्याः सह पत्या एकशरीरारम्भ
कत्वाद्याः प्रत्यक्षबाधितत्वात् क
ल्पसापिण्ड्यं प्रमातामहादीनां वि
शेषवचनाभावात् सपिण्डत्वेन
दशाहाद्यशौच प्रसंगात् माता
महाद्यो सापिण्ड्यस्य लोकविरु
द्धत्वाच्च। भर्त्तुर्वा तथा शरीरा
द्वारा सापिण्ड्यं तथापि वचनात्
यथा सगोत्रतात्वं तेनैव तथा गोत्र
तः सापिण्डीकरणीति वचनात् शौचे

ऽव्यमपि प्रागुक्तवचनात्। कन्या-
याश्चैव पौरुषं सपिण्ड्यं ऊर्ध्वायाश्च
भर्त्तृ सापिण्ड्येन सापिण्ड्यमिति
चेत् तदेतन्मतोपि अवश्यायान
द्वितिर्विति। अतएव समन्तवच
नाभिहितं यद्दशमपुरुषपर्य्यन्त
मशौचं तत्सप्तमपुरुषपर्य्यन्तत्र
शौचाभ्यूनं त्रिरात्रं। यथा ब्राह्म
णाना मेकपिण्डस्थाना माद
शाहात् धर्मविच्छित्तिर्भवति
आसप्तमात् क्षत्रस्य विच्छित्ति
र्भवति प्रातस्तीयात् स्वथा वि
च्छित्तिर्भवति अन्यथा पिण्डशौ
च क्रियायुक्तेदाद्रुस्य हेतुत्वाभ
वतीति। अस्यार्थः एकासमानापि
ण्डस्थायेषां तेन तथा। यथा एकोदि
ष्टस्य पिण्डेतु अनुपालेनयुज्यते
स्वधानुपालेनानुपायुक्तो मंत्रो
लभ्यते अनुयुक्त मंत्रस्तु येचा
त्रत्वामनु यांश्चत्व मनुतस्मै ते
स्वधा इति तथा पिण्डस्थापाठे
तपिण्डसंबन्धि स्वधा पाठयुक्त मं
त्रकरणक देयजलं लक्षितं त
थाच ऊर्जं वहन्ती रमृतं घृतं प
यः कीलालं परिस्रुतं स्वधास्थ
तर्पयत मे पितृन् इत्यनेन पिण्डान्
सिञ्चेदित्युक्तं। ततश्च एकपिण्ड

स्थानां समानोदकता मित्यर्थः
अतएव मनुः। जन्मन्येकोदकानां
तु त्रिरात्रात् शुद्धि रिष्यते। वि
ष्णुपुराणे। मातृपक्षस्य पिण्डेन सं
बद्धा ये जलेन वा मातृपक्षसमा
माहामहपक्षस्य पिण्डेन संबद्धाः
सपिण्डाः जलेन संबद्धाः समानो
दका इति श्राद्धविवेकेपि व्याख्या
तं। असंबन्धा भवेद्या तु पिण्डेनै
वोदकेन वा इति विवाहे ऽप्युक्तं।
अत्र पुत्रिकायाः पार्वणे पिण्डोद
कयोः संबन्धात् कन्यामात्रेपि-
तद्योग्यतायाः सत्वात्कन्यापि
ण्डोदकसंबन्धोच्यते। एतदनुसा
रादपि तस्याः सपिण्डतावोद्धव्या
तस्मादेकपिण्ड स्थानामित्यने
न समानोदकभावः समाख्या
तः तत्र दशमपुरुषपर्य्यन्तेपि
श्राद्धिजीवनादिना पिण्ड संब
न्धेपि सापिण्ड्यं विहितं श्राद्ध
रूपकेः स्वधेत्यस्य तदनुपयुक्त
त्वेन वैयर्थ्यापत्तेः। अपत्र एतापि
कारस्तु सन्निहिततराभावे सप्त
मपुरुषपर्य्यन्ते। मृतपितृकस्य
स्वधोपलक्षित श्राद्धाधिकारः पु
रुषत्रयपर्य्यन्तमिति। अत्रस्वधा
पाठो मंत्रपरः पितृभक्तपरोपि-

तथा च गुणविष्णुकृता श्रुतिः
स्वधा वै पितृणा मन्नमिति दश
मपुरुषानन्तरं समानोदकत्वेपि
न त्रिरात्रं किन्तु पक्षिण्यादि। त
थाहि। उदकक्रिया मधिकृत्यपा
रस्करः। सर्वे ज्ञातयो भावयन्ति
आसप्तमाद्दशमाद्वा समानग्रा
मवासेन यावत् संबन्ध मनुस्म
रेयुर्वा इति भावयन्ति निष्पादय
न्ति। तत्र यावत्संबन्धमनुस्मरेयुरेक
कुलजाता वयमिति स्मरणं भ
वति मनेनैव सर्वेषामुदकदाने
प्राप्ते यदासप्तमाद्दशमाद्वेत्युक्तं
तत् सन्निकर्ष तारतम्येनाशौच
भेदमुदककर्मसमानार्थमिति।
अशौच भेदस्तु सप्तमपुरुषप
र्य्यन्तं सपिण्डत्वाद्दशाहः। ततश्च
दशमपुरुषपर्य्यन्तं त्र्यहः। तथा
च विष्णु बृहस्पती। दशाहेन स
पिण्डास्तु शुद्ध्यन्ति मृतसूतके।
त्रिरात्रेण सकुल्यास्तु स्नात्वा शु
द्ध्यन्ति गोत्रजाः। ततश्चतुर्द्दशपुरुष
पर्य्यन्ते पक्षिणी। ततश्च जन्म
नाम स्मृति पर्य्यन्त मेकाहः॥
तथाच पितामहो विवाहादिचिन्ता
मणिधृतो हन्मनुः। सपिण्डतातु पु
रुषे सप्तमे विनिवर्त्तते। समा

नोदकभावस्तु निवर्तेताचतुर्दशा
त्। जन्मनामस्मृतेरेकेतत्परं॰
गोत्रमुच्यते। अत्रसमानोदकत्वे
द्विविधे एवैत्र गोतमः पक्षिणी
मसपिण्डे इति। परत्रहारीतः
मातामहे त्रिरात्रं स्यादेकाहं
त्वसपिंडके इति अत्रैव गो
त्रजाना महः स्मृतमितिजा
बालवचनं। ततः परं सर्वथा॰
समानोदकता निवृत्तेः स्नान
मात्र मिति। स्नात्वा शुद्ध्यति॰
गोत्रजा इति वृहस्पत्युक्तत्वा
दिति। इति शुद्धितत्वं॥ सपिं
डीकरणं तु पूर्णेसंवत्सरे॰
क्रियमाणपार्वणैकोद्दिष्टेति॰
कर्तव्यताकश्राद्धं। यत्र प्रेतपिं
डस्यपितृपिंडेनसह मिश्रीकर
णं। यथा। सपिंडेकरणं प्रो॰
क्तं पूर्णेसंवत्सरे पुनः। कुर्या
च्चत्वारि पात्राणि प्रेतादीनां॰
द्विजोत्तमाः। प्रेतार्थं पितृपात्रे
षु पात्र मासेचयेत्ततः। येसमा
ना इति द्वाभ्यां पिंडानप्येवमेव
हि॥ सपिंडीकरणश्राद्धं दे
वपूर्वं विधीयते। पितृनावा
हयेत्र पृथक्पिंडंच निर्दि
शेत्। येसपिण्डीकृताः प्रेता

नतेषां स्यात्पृथक् क्रिया।
यस्तु कुर्यात् पृथक् पिंडं पि
तृहा सोपि जायते। इति कू
र्मपुराणे उपविभागे २२ अध्या
यः॥ अन्यच्च। ततः संवत्सरे
पूर्णेसपिंडीकरणंभवेत्। स
पिंडीकरणादूर्द्ध्वं प्रेतः पार्वण
भुग्यतः। वृद्धिपूर्वेषु योग्य
श्च गृहस्थश्च भवेत्ततः। सपि
डीकरणं श्राद्धं देवपूर्वं नियो
जयेत्। पितृनेवाशयेत्तत्र ए
थक् प्रेतं विनिर्दिशेत्। गंधो
दक तिलैर्युक्तं कुर्यात् पात्रच
तुष्टयं। अर्घ्यार्थं पितृपात्रेषु
प्रेतपात्रं प्रसेचयेत्। तद्वत्
संकल्प्य चतुरः पिंडान्पिंड
प्रदस्तदा। येसमना इति द्वा
भ्यां माद्यंतु विभजेद्द्विधा। च
तुर्थस्य पुनः कार्यं न कदाचि
त्तयतो भवेत्। ततः पितृत्व॰
मापन्नं सचतुर्थं स्तदा पुमान्
अग्निष्वात्तादिमध्यं तु प्राप्नोत्य
मृतमुत्तमं। सपिंडीकरणाद्
ऊर्द्ध्वं तस्मै तस्मान्न दीयते। इति
मात्स्ये १८ अध्यायः॥ अपरं
च। अथ सपिण्डीकरणं। त
त्र गोभिलः। पूर्णे संवत्सरे

षण्मासे त्रिपक्षे यदहर्वा वृद्धि
रापद्येत तदहः श्राद्धचतुरुदकपा
त्राणि सतिल गंध पुष्पोदका
निसंश्रयित्वा त्रीणि पितृणामेकं
प्रेतस्य प्रेतपात्रं पितृपात्रेष्वा
सिंचति। येसमानाः समनसः
पितरो यमराज्ये तेषां लो॰
कः स्वधा नमो यज्ञो देवेषुक
ल्पतां। ये समानाः समनसो
जीवा जीवेषु मामकाः तेषां
श्रीर्मयिकल्पतामस्मिन्लोके
शतंसमाः। इति एतेनैव पिण्डा
व्याख्यात इति। पूर्णेसंवत्सरे॰
इति मुख्यकल्पः। तदशक्तौ
नवमो मासः। संवत्सरांते वि
सर्जने नवममासस्य मिष्यके।
इति पैठीनसिवचनात्। तदश
क्तौ षष्ठो मासः। तत्राप्यशक्तौ
त्रिपक्षः। तत्राप्यशक्तौ अशौ
चापगमे प्रथम मासस्य द्वादश
मिदिने द्वादशमासिकानि श्रा
द्धानि निर्वर्त्य त्रयोदशाहः सपिं
डीकरणकालः। शूद्रस्य द्वादशा
हेन तु त्रयोदशाह एव मासि॰
कार्थवत् द्वादशाहः श्राद्धं कृत्वा
त्रयोदशेऽह्नि वा तत् कुर्यान्मंत्र
वर्ज्यं हि शूद्राणां द्वादशाहः कीर्ति।

विष्णुः वचनात् मासिकार्थवदि
तिमासिकार्थो नास्ति मासिक्रिय
माण श्राद्धप्रयोजनं प्रेताप्याय
नादि तयुक्तं द्वादशाहक्रियमा
णश्राद्धमित्यर्थः। यत्रत्वेकादश
मासाभ्यंतरेऽधिमासपातस्तत्र त्र
योदशाहस्तु दिनेषु त्रयोदशमा
सिकानि कृत्वा चतुर्दशेऽह्नि स
पिण्डनं कार्यमिति। संवत्सरा
भ्यंतरे यद्यधिमासो भवति त
दामासिकार्थं दिनमेकं वर्द्धयेत्
इति विष्णुवाक्यात्। शूद्रस्य त्र
योदशादिनेषु त्रयोदशमासि
कानि त्रयोदशेऽह्नि सपिंडनं
वृद्धपरिकल्पनान्यायात्। एवंच
श्राद्धवृद्धिमात्रे नदिनवृद्धि रिति
मिश्रोक्तं हेयं। तदुक्तविष्णुवे॰
दिनमेकं वर्द्धयेदिति श्रुतेः।
तेः श्राद्धाधिक्य माहसत्यव्रतः
संवत्सरस्य मध्येतु यदि स्यादधि
मासकः। तदात्रयोदशे श्राद्धं॰
कार्यं तदधिकं भवेत्॥ तत्रा
प्यशक्तौ प्रथममासस्यैकाह
एव द्वादशमासिकसहितसपिं
डीकरणकालः मुख्यं श्राद्धमा
सि मासि अपर्याप्तावृतं प्रति।
द्वादशाहेन वा कुर्यादेकाहेन वा

दशाह वा। इति मरीचिवचना
त्। अपर्युषितो अशक्तो मृते
मासद्वये। अत्र केचित् षण्मासि
कदिने पंचममासिके कृत्वा प्र
थमषाण्मासिकं कृत्वा षण्मासि
के कार्यं तदग्रतः कर्षन्यायात्। न
तु तस्यैव षाण्मासिके उत्क्रमा
पत्तेनैव पंचममासिकमपि एवं
दिने मृततिथ्यभावात्। एवमेव
वाचस्पतिमिश्राः। अपकर्षेति
मितमाह व्याघ्रः। आनन्त्यात्कु
लधर्माणां पुंसां चैवायुषः क्षयात्
अस्थितेश्च शरीरस्य द्वादशाहः
प्रशस्यते। एतच्च द्वादशाहग्र
हं शातातपेनोक्त तृतीयदिनमा
त्रपर मिति प्राचीनमैथिलाः
अजहत्स्वार्थलक्षणया स्वज्ञा
त्युक्त पैठीनसि तृतीयदिनसोऽ
प्युक्त मिति श्राद्धप्रदीप श्रा
द्धचिंतामणी तद्वय मप्ययुक्तं
द्वादशाहेन वा कुर्यात् इति म
रीचिवचन द्वादशाहश्राद्धं कृ
त्वा द्वेधा किं वा कुर्यात् इति
विरुद्धवचनाभ्या मेकवाक्यत्व
या द्वादशाह इत्यस्य द्वादशदिन
परत्वात्। कुलधर्माणामिति कु
लधर्मज्ञानामिति रामानार्यसिद्धान्तं

तदभावे विनाशपरचक्रभयोपद्र
वदेशागमनादिभि र्निमित्तै र
पेक्षापगमे द्वादशदिनानि षो
डशश्राद्धापकर्षकालः इति शू
लपाणिपाध्यायव्याख्यानात्
मरीचिनैव एकाहे द्वादशाहे वे
ति सामान्यत एव एकाहविधा
नाच्च। अत एव एकाहापेक्षया
प्राशस्त्याभिधान मपि संगच्छ
ते। अत एव प्रथममासस्य एकाह
एव द्वादशमासिकसहितसपिंडी
करणकालः इति श्राद्धविवेकः
अत्र यानि एकाहकर्तव्यतया द्वा
दशमासिकश्राद्धान्युक्तानि ता
नि मृताहेऽपि आद्यमासिकदिन
एव कार्याणि तत्राद्यमासिके
कृत्वा तत्परदिने एकादशमासि
कानीति ज्ञेयं एवं च तेषामपकर्षे
तत्प्रयुक्तदेतकाल कर्तव्यतया
षाण्मासिकद्वय सपिंडीकरणा
पकर्षः सिद्ध्यतीति सर्वाभिप्रायः
यद्वद्धिं वृद्धिरिति वृद्धिसापात
माने पुंसवनादि आपद्येत अ
सत्त्वा भवति तद्दिने सपिंडीक
रणं। तथाहि प्रायश्चित्तेनाद
न्तःकाले विधानं। इति गोभि
लसूत्रेण पुंसवनादिरूप।

वृद्धे योगमहयाद्यंतरे विधानात्
सपिंडीकरणस्य चापराह्णे विधा
नात् ययोः कालयोः बाधाय वृद्धि
पूर्वदिने अपकर्षः॥ ननु सपिं
डीकरणस्यापराह्णिकत्वे किं
प्रमाण मिति चेत् अपराह्णेत
पैतृक मित्युत्सर्गवचनेः। किं
च यद्यप्यदन्तकः एषोपेष्टमिति
दाचरुं। अग्नीषोमीय सामान्यात्
पुरोडाशविधीयते। इति छंदो
गपरिशिष्टवचने यथा वहन्ता
मनुवेधात् एकुलचरु नैकानुरो
धात् पेष्टचरुः। विरुद्धधर्मस
मवाये भूयसां स्यात् सधर्मक
त्वे इति जैमिनिसूत्रात्। तद्व
दत्रापि बहुदेवताक पार्वण
अनुरोधादेकोद्दिष्टकालबाध इ
ति। एवं च संवत्सर मधिकृत्य
सपिंडीकरणं तस्मिन्काले राजे
न्द्र तत्स्मृतं। एकोद्दिष्टविधा
नेन कार्यं तदपि पार्थिव। इति
विष्णुपुराणीय मेकोद्दिष्टशेषो
न दिनकर्तव्यतापरं न तु तत्
कालपरं। तथाच परिशिष्टम
कादशाहे श्राद्धद्वयमुपक्रम्य
कुर्वीत सहपिंडतां। तयोःपा
र्वणवत्सर्वमेकोद्दिष्टमथापि

तं इति। एवं च शुद्धितत्वलिखि
तस्यमंतकोपाख्यानवत् वृद्धि
निमित्तकृते सपिंडीकरणे न
दानं विघ्नेन वृद्ध्यभावेऽपि वृद्ध्या
रंभकालात् पूर्णसंवत्सरे वा
प्राप्य पितृत्वप्रापकं इतिन सपिं
डनांतरं। अत्र पुनः कर्तास्मीति
निमित्तस्य दातुः विप्रान्निमंत्रयेत्
इति वन्निमित्ते तिलत्कटकोटि
क संभावनोपलक्षणं। अपि
च नित्यस्य कर्मणः प्रत्यूहार्ह
त्वात्। एवंच वृद्धिश्राद्धं यदर्थं
कृते तत्कर्म चेत् विघ्नान्नदि
ने न क्रियते तदा दिनांतरे त
त्कर्माति क्रियमाणे तदंग
त्वात् पुनर्वृद्धिश्राद्धं कर्तव्यमे
व। प्रधानस्याक्रिया यत्र सांग
तत्क्रियते पुनः। तदंगस्याक्रि
यायां नावृत्ति र्नैव तत्क्रिया
इति छंदोगपरिशिष्टेन सांगकर
णाभिधानात्। हेमाद्रिमते
पूर्णसंवत्सरे श्राद्धषोडशी परि
कीर्तिता तेनैव च सपिंडत्वं ते
नैवाब्दिकमिष्यते। अत्र पूर्णसं
वत्सर क्रियमाणश्राद्धाद्यपो
भय निर्वाहः। तथापकृष्टस
पिंडनादप्युभय निर्वाहात स

णिसंवत्सरे श्राद्धिकांतरं कां
तरं कार्य्यं। एवंच पंचदश श्राद्धे
कृतेप्युक्तेयं। उदकपात्राणि
इति अर्घ्यार्थ मुदकयुक्तपा·
त्राणि। अत्र त्रीणि पितॄणा मेकं
प्रेतस्येति पाठक्रम दर्शनात्स
र्वेत्र छंदोगानां यजुर्वेदिनांच
गृह्यानुरोधात् सपिंडीकरणे प्रे
तकर्मकरणं पितृकर्मण्एवेके
तयोःपार्वणवत् पूर्वमेकोद्दिष्ट
मथापरं। इति एवं लिखितवच
ने शाब्दक्रमदर्शनात्। देवक्र
म पितृकृत्ययोर्मध्ये प्रेतकृत्ये
न व्यवधानस्यायुक्तत्वाच्च। एते
न अथ सपिंडीकरणं संवत्सर
मेकं पिंडमुद्दिश्य संवत्सरांतेच
त्वार्य्युदकपात्राणि प्रयुनक्ति त
त्रैकं प्रेतस्यत्रीणित्रितरेभ्यः। इ
त्याश्वलायन दर्शनात् सर्वेषा
मेवं सपिंडीकरणे प्रेतादित्वं
मैथिलोक्तं निरस्तं। एतद्वच
नस्य तद्धाधिमात्रपरत्वात्।
किंत्वर्घ्यदानमात्रे पाठक्रमाच्छ्रा
द्धक्रमस्य बलवत्वात् ब्रह्मपुरा
णे प्रेतार्घ्यदानानंतरं ततः पिता
महादिभ्यः इतिपाठक्रमस्यात
पात्रार्घ्यपात्रेषु गंध पुष्पदान

पर्य्यंतं पितृपूर्वकत्वा उत्सर्गेत्प्रे
तपूर्वकतेति। तथाब्रह्मपुराणे
चतुर्भ्यः श्चार्घ्यपात्रेभ्य एकं वा
मेन पाणिना गृहीत्वा दक्षि
णेनैव पाणिना च तिलोदकं।
सम्मार्जयित्वा पृथिवीं ये स
माना इतिस्मरन् प्रेतविप्रस्यह
स्तेत चतुर्भागं जले क्षिपेत्।
ततःपितामहादिभ्य स्तन्मंत्रैश्च
पृथक्पृथक्। ये समानाइति
द्वाभ्यां तज्जलंतु समर्पयेत्॥
अर्घ्यंतेनैव विधिना प्रेतपात्राच्च
पूर्ववत्। तेभ्य श्चार्घ्यलिप्तेष्वेव प
श्चाच्छ्रयमाचमेत्। एकं प्रेत
पात्रं वामेन अनंतरं दक्षिणेन
गृहीत्वा इति संबंधः। ये समा
ना इति मंत्रद्वयंपठन् प्रेतपा
त्रस्थं उत्सृष्टजलं कुशाग्रेणाभ्र
ष्टेण चतुर्धा विभज्याभ्यामेकं
प्रेतब्राह्मणहस्ते क्षिपेत् दद्या
त्। उत्सृष्टजलं पिंडत्रयेपि वि
भागो मंत्रस्य करणत्वश्रुतेमार
ण्यात्तत्परः निरूप्यचतुरः पिंडा
न् पिंडदः प्रेतनामतः। ये स
माना इति द्वाभ्यामाद्यंतु वि
भजेत् त्रिधा। एष एवविधिः
पूर्वं मर्घ्यपात्रचतुष्टये॥

तत स्तदनंतरं तन्मंत्रैः पिताम
हादिभेदेन त्रिधाद्वैतेर्घ्यो दिव्या
इति मंत्रे श्चकारात् पितामहा
द्युत्सर्गवाक्ये षष्ठी मतस्तज्ज
ये समाना इति द्वाभ्यां मंत्राभ्या
मर्घ्ये पुष्पोदके तज्जलं प्रेतपा
त्रस्थजलं तेनैव विधिना प्रेत
केन एवंवत् चतुर्भागत्रयंप्रेत·
पात्रात् समर्पयेत् तेभ्यःपिता
महादिभ्य स्त्रिभ्य स्त्रिस्त्रिः प्रत·
पुष्प तिलोदकत्रय मर्घ्यं निवे
द्य तत्तद्ब्राह्मणहस्ते प्रक्षिप्य प
श्चादाचमेदित्यर्थः। तेन प्रेतब्रा
ह्मणहस्ते उत्सृज्य दत्तस्यैवा·
र्घ्यजलस्य तदवशिष्टजलस्यभा
गत्रयं पितामहाद्युत्सृष्टार्घ्य
जलेषु मिश्रीकर्तव्यमिति प्रती
यते। अतएव दत्तस्यैव प्रेतपिंडस्य
मिश्रीभाव इति श्राद्धविवेकः॥
यत्तु नचात्रदेवं भोजयेत्प्रागे
व देवे अर्घ्यं मन्त्राद्यंचदत्वा·
गन्धमाल्यैः पात्र मर्च्चयित्वाऽ
नग्नौ हवं पितृभ्यः पात्रेषुदद्यात्
इत्याश्वलायनवचने पितृपात्रे
देवं न मिश्रयेदिति कल्पतरु
व्याख्यानुरोधेन मैथिलोक्तं

आश्वलायनेन कात्यायनस्या
क्तत्वात् बह्वृचानामेव तथा
युक्तत्वात्। नसामगयजुर्वेदिनोः
तयोः पदार्थानुशयस्याक्तत्वात्
अत्र साम यजुर्वेदिनोः श्राद्धस्त
त्रे समन्वये मंत्रदर्शनात्त्रेव
मंत्रान्वयः पितृदपितादावुक्तः
वस्तुतस्तु पौराणिकत्वात् देव
ताभ्य इत्यस्यपाठवत् साधार
णस्मृतिकार शातातपोक्तत्वाच्च
विभागेपि मंत्रान्वयो युक्तः। अ
तएवमैथिलैरपि तथा लिखित
मिति। एवंच पार्वणे प्रागुक्तव
चनेन शेषद्रव्येण पिंडदान
विधानात् तद्विकृतावपि सपिं
डीकरणे तन्नियमात् यद्यपि
शेषाभावे पिंडनिवृत्ति रायाति
तथापि यथोक्तवचनस्याप्यमो
घार्थं तदनुकारियत्। यवाना
मिव गोधूमा व्रीहीनामिव पा
लयः। इतिच्छंदोगपरिशिष्टवच
नात् मुख्याभावे प्रतिनिधिःप्रा
प्तार्थइति न्याया मध्वाद्यभावे
गुडादिग्रहणवत् इष्टांतरेण
पिपिंडदाने। शेषद्रव्यानियमस्तु
ततंभवे इत्यांतरत्यागाय अन्य


सर्वग्राहिवचनोनतथाचरणे तत्रएकं द्या तदंगाभावे कर्म्मवैगुण्य·

स्यात्। सहपिंडक्रियायां इतिम
न्त्रोक्तेः प्रेतपिंडस्य पितृपिण्डेन
सह मिश्रीकरणं यत्रेति सपिं
डीकरणसमाख्यासिद्ध्यर्थस्तत्र
तत्र अर्घ्याचरणं। प्रतिपत्तिरूप-
कर्म्मांग एव प्रतिपाद्याभावेन-
निवृत्तिः। पशुयागे लोहिते
निरस्यति सक्तुनिरस्यतीत्यादा
वुक्ता अतएव यज्ञवास्तुरूपप्र
तिपत्तियागेपि यज्ञो यत्र वस-
तीति यज्ञवास्तु समाख्यानुरो
धेनास्तृतकुशाविनाशेपि कुर्णा
नरप्रतिनिधिर्भट्टनारायणेन गो
भिलभाष्ये उक्तः। प्राक् स्वि-
ष्टिकृत आवापः इतिगोभिल
सूत्रस्य व्याख्यानेपि आउप्यते
इत्यावापः प्रधानहोमः स तु स्वि
ष्टिकृद्धोमात् प्राकृतपश्वादि
स्वर्थः। एवंच मुख्यहोमेत्वकृते
यदि चरु नेष्टो इष्टो वा भवति
तदान्यः पाच्यः मुख्यकृते चेन्मा
ण्डुष्टी स्यात् तदाज्येनैव स्वि
ष्टिकृद्धोम इति सारला एतेन
प्रोषनाशे पिंडनिवृत्तिरिति वा
चस्पतिमिश्रोक्तं हेयं। एतेन
पिंड इति। एतेनाग्न्यदानवि
धानेन। पिण्डः पिण्डमिश्रणम

कारो व्याख्यातः। तथाच ब्रह्म
पुराणं। अथ तेनैव विधिना द
र्भमूले रवनेजनं। पितृदत्ता
नपिंडान् दद्यात्कृत्वा पूर्वव
त्। दत्वा पिंडान् पितृभ्यस्तु पश्चा
त् प्रेताय पार्थिवः। तेन पिंडेत्रि
धाकृत्वा आनुपूर्व्याच संतते॥
निदध्यात्त्रिषु पिंडेषु एवं संसर्ज्ज
ने विधिः। पितृभ्यः पितृपिता
महादिभ्यः पिण्डान् दत्वा पश्चा
त् प्रेताय पार्थिवः पूर्ववदेवापि
ण्डं दद्यादित्यर्थः। तं प्रेतायद
त्तपिंडं। आनुपूर्व्या पितामहा
दिक्रमेण। संसर्ज्जने प्रेतपिंड
मिश्रणे भविष्यपुराणे गंधो
दक तिले युक्तं कुर्य्यात्पात्र
चतुष्टयं। अर्घ्यार्थं पितृपात्रे
षु प्रेतपात्रं प्रसेचयेत्। ये स
माना इति द्वाभ्यां मेतज्ज्ञेयं स
पिंडनं। निस्येन तु स्यां शेषं
स्यादेकोद्दिष्टक्रियास्वपि नि
त्येनावश्यकेन तत्पुरुषार्वणं
पो पार्वणेन एकोद्दिष्टशे
एकोद्दिष्टेन शेषं श्रेयो ज्ञात
तुल्यं। एकोद्दिष्टमिति प
कोद्दिष्टं तद्धर्म्मयाहित्वात्
सपिंडीकरणं चेत्युभयपरं।

एतत् सपिंडीकरणमेकोद्दि
ष्टक्रियास्वपि। इतियाज्ञवल्क्य
वचनैकवाक्यत्वात्। तेन श्राद्धे-
षु मध्ये एतच्छ्राद्धद्वयं स्त्रियाः
कर्त्तव्यं न त्वाभ्युदयिकश्राद्धादि
त्रयं वा कर्त्तरि कृत्य इतिकर्त्त
रि षष्ठीति कर्त्तृत्वनियमः॥
वृद्धिश्राद्धादौ स्त्रीणां भोज
नदर्शनात्तु भोक्तृत्वनियमः।
पितर्य्येवं मृते तद्वर्षाभ्यन्तरे-
पितामहे प्रपितामहे च मृते
यथा कर्त्तव्यं तथाह छन्दोग
परिशिष्टे कात्यायनः। पितुः
सपिंडनं कृत्वा कुर्य्यान्मासा
नुमासिकं। असंस्कृतौ न संस्का
र्य्यौ पूर्वौ पौत्र प्रपौत्रकैः॥
पितरं तत्र संस्कुर्य्यादिति का
त्यायनोऽब्रवीत्। पापिष्ठमपि
शुद्धेन शुद्धं पापकृतापि वा।
पितामहेन पितरं संस्कुर्य्यादि
ति निश्चयः। पितुः सपिण्डनात् ऊ
र्द्ध्वं प्रेतीभूतयोरपि पितामह
प्रपितामहयोः सेतोः प्रतिमास
हितपार्वणं पितृवृद्धप्रपितामह
हानि वृद्धप्रपितामहानां कर्त्तव्यं
न तु तयोः सपिंडीकरणापेक्षा
कार्य्या। न तु सपिंडनेनासंस्कृ

ताभ्यां पितामहप्रपितामहाभ्यां
सह पितुः कथं सपिंडनाख्य
संस्कारस्तस्मात्तदर्थं तयोः स
पिंडीकरणमपकर्षणीयं पितृ
रेव वा सपिंडनमुत्कर्षणीय
मित्यतआह असंस्कृताविति।
उत्कर्षापकर्षौ नकार्य्याविस्मिन्ने
नवचनेनोक्तं। कथमसंस्कृतेन स
ह संस्कार इत्यत आह पापिष्ठम
पीति पापिष्ठमकृतसपिंडीकर
णं शुद्धेनकृतसपिण्डीकरणे
न पितामहेन पापकृता वा अ
कृतसपिंडीकरणेनापि शुद्धं कु
र्य्यादिति शास्त्रनिश्चयः। अतो
वचनबलाददोषः इति तात्पर्य्यं
अत्रतु प्रेतीभूत पितामहेनापि
तुः सपिंडने पितामहस्यैको
द्दिष्टमेव असपिंडीकृतं प्रेत
मेकोद्दिष्टेन तर्पयेत् इति
शाट्यायनवचनात्। ए
वमन्यत्रापि बोध्यं। वृद्धप्रपि
तामहस्य प्रेतत्वे तेन सहैका
ध्य मिति तात्पर्य्यं॥ अत्र मा
तुः सपिंडने मातामह्यास्तु
योः पिण्डौ कुशौ वाचकौ यो
तथा च मार्कण्डः। पतिनैकेन
कर्त्तव्यं सपिण्डीकरणं स्त्रि-



याः। सा गता तादिमन्तैकत्वं कु
र्वन्तैरं तरयन् पितॄन्। श्वशुरस्या
ग्रतो यस्मात्स्त्रियः प्रेतच्छादना
त्क्रिया पुत्रैर्देवैस्तासां कार्यामा
तुरभ्युदयार्थिभिः। प्रेतरयती
त्यर्थे प्रेतरयमिति लिंगव्यत्ययेन
पुंस्त्वमिति हलायुधः परवच
नं गोभिलश्राद्धसूत्रभाष्यकृ
तापि लिखितं। अतएव प्रव्रजिते
पतिते वा पितरि मृतेन पितामा
हादिभिर्मातुः सपिंडीकरणं किं
तु पितामह्यादिभिरेव स्वेन भर्त्रा
सहैवास्याः सपिंडीकरणं स्त्रियाः
एकत्वं सा गता यस्माच्चरुमंत्रा
हुति व्रतैः। तस्मिन्गतिस्तुताः
कुर्युः पितामह्या सहैवतु। इत्य
त्र तस्मिन् सतीति आह्वानहेम
तेरुपलक्षणं। अतएव तस्याश्चै
व तु जीवेत्स्यात्तस्याः श्वश्रैति नि
श्चयः इति लघुहारीतेन श्वश्रू
जीवने तस्याः श्वश्र्वा न्युक्तं न तु
श्वशुरेणेति क्वचिदप्युक्तं॥
एवं पितामह्यादिभिर्मातुः सपिं
डीकरणे पितामहेन ये चात्र
त्वा मनु यांश्च त्व मनु तेभ्य ते
स्वधा इति मंत्रेण पाठः मंत्रलिं
गविरोधात् अतएव आभ्युद
यिके मातृपक्षे श्राद्धमातादिभिर्मं
त्रांतरं लिखितं न तु ये चात्रत्वामि
ति तत्र तस्य आभ्युदयिकेऽह्नि
दोगानां मातृपक्ष एव नास्ति
ति वक्ष्यते। एवंच प्रत्यर्थापि
तृपात्रेषु प्रेतपात्रं प्रसेचयेत्।
ये समाना इति द्वाभ्यां शेषं
पूर्ववदाचरेत्। एतेन सपिंडी
करणमेकोद्दिष्टं स्त्रिया अपि
इति याज्ञवल्क्येन पार्वणैको
द्दिष्ट विकृतीभूत पुंसपिंडना
तिदेशात् तद्विकृतीभूतस्त्रीस
पिंडनेऽपि ये समाना इति मंत्र
द्वयस्य पार्वनोक्त ये चात्रत्वामि
ति मंत्रस्य च लिंगार्थासमवेतत्व
विप्रकृत्यर्थस्य समवेतार्थत्वा
त्पाठः। ततश्च मातामहानाम
प्येवं श्राद्धं कुर्याद्विचक्षणः। मं
त्रोहेन यथान्यायं शेषाणां
मंत्रवर्जितं। इत्यनेन यच्छेषाणां
मंत्रवर्जनमित्युक्तं तत्स्वपत्नी
पितरः स्वधेयं पितामहाः स्वा
दिप्रकृत्यूहयोग्य मंत्रवर्जनप
रमिति प्रागुक्तं। मार्कंडेयपुरा
णे। सर्वाभावे स्त्रियः कुर्युः स्व
भर्तॄणाममंत्रकं तदभावे च नृ
पतिः कारयेत् स्वकुटुंबवत्॥

स्त्रीणाममप्येवमेवैतदेकोद्दिष्ट
मुदाहृतं। मृताहनि यथान्या
य्यं नृणां यद्वद्दिष्टोदितं। स्त्रियो
ऽत्र असवर्णोप्या अपरिणीता
वेति श्राद्धविवेकः। सवर्णोप्या
याः पुत्र पौत्र प्रपौत्राभाव एव
विधानात्। यथा शंखः। पि
तुः पुत्रेण कर्तव्या पिण्डदानो
दकक्रिया॥ तदभावे तु पत्नी
स्यात्तदभावे सहोदरः। स्त्रीणा
मिति तु सम्प्रदानपरं स्त्रीकर्तृ
कत्वस्य एवोऽह्ने एवोक्तत्वात् प
त्वमेवामंत्रक मित्यर्थः। इति श्रा
द्धविवेकः। अत्रस्त्रियश्चास्यास
वर्णोप्या अपरिणीता पत्न्या
ख्यानात् स्त्रीणां मंत्रनिषेधोपि
तत्संप्रदानकश्राद्धे एवावगम्य
ते। नतु स्त्रीसंप्रदानकमात्रे। क
ल्पतरौ तु स्त्रीणामप्येवमिति
याद्दशेन संबंधेन पितृव्यत्वादिना
पुरुषाणामेकोद्दिष्टादिश्रा
द्धं तादृशेन संबंधेनैव स्त्रीणा
मेतत्कर्तव्यमिति। एतच्चाख्याने
स्त्रीसंप्रदानकश्राद्धे स्वतंत्रामं
त्राः पाठ्याः। याज्ञवल्क्येनापि।
समंत्रकमेकोद्दिष्टं सपिण्डी
करणं चोक्ता एतत्सपिंडीकरण
मेकोद्दिष्टं स्त्रिया अपीत्यनेन
स्त्रिया अपि तथैवोक्तं। मातुः
सपिंडीकरणं पितामह्या सहो
दितं। यथोक्तेनैव कल्पेन शुद्र
कायानचेत् सुतः। इति छन्दो
गपरिशिष्टेनापि यथोक्तेनैव
कल्पेन इत्यनेन मंत्रादिकस
र्वं मतिदिष्टं व्यवहारोपि तथै
ति। अमंत्रकं स्त्रीकर्तृकमंत्रपा
ठरहितं। अमंत्रा हि स्त्रियो मताः
इति बौधायनेन सामान्यतो
ऽभिधानात्। ननु ब्राह्मणकर्तृ
कमंत्रपाठरहितं। तथाचवरा
हपुराणे। अयमेव विधिः प्रो
क्तः शूद्राणां मंत्रवर्जितः।
अमंत्रस्य तु शूद्रस्य विप्रो मंत्रे
ण गृह्यते। अमंत्रस्येति विशे
षणस्य यावदमंत्रश्राद्धार्थत्वे
न परिभाषानुपपत्त्या नैतच्छ्राद्ध
मात्रविषयः। न वा शूद्रकर्तृ
कश्राद्धमात्रविषयः। किंतु स्त्री
कर्तृकश्राद्धमप्यस्य विषयः।
यदुक्तं ब्राह्मे। स्त्रीभिश्चाववर्णै
श्च श्राद्धं विप्रानुशासनात्। मंत्र
वद्विधिपूर्वं तु वह्निपाकविवर्जितं
विप्रानुशासनात् विप्रपाठनात्
मंत्रवन्मंत्रयुक्तं। वह्निपाकविव

ज्ञेत भिन्नसवर्णास्त्रीकर्तृकश्रा
द्धपरं। पतिकर्तृक श्राद्धेऽपिप
त्न्याः पाकाधिकारदर्शनात्। त
थाचच्छंदोगपरिशिष्टे। शाकंच
फाल्गुनाष्टम्यां स्वयं पत्न्यथ
वापचेत्। पत्नीत्वंच सवर्णाप्वा
याः। ज्येष्ठा पत्नीति वचनात्
ज्येष्ठ माहमनुः। यदिस्वाश्चप
राश्चैव विंदेरन् योषितो द्विजाः
तासांवर्णक्रमेणैव ज्यैष्ठ्यं पूजा
चवेश्मच। कुर्वेरोपाध्यायध्व
ने। असंस्कृतप्रमीतानां पिता न
श्राद्धमाचरेत्। यदिच्छेदेन कु-
र्वीत सपिंडकरणं विना। असं
स्कृतप्रमीतानामनुपनीतस्त्वा
नां। लघुहारीतः पुत्रेणैव तु
कर्तव्यं सपिंडीकरणं स्त्रियाः
पुरुषस्यपुन स्तन्येभ्रातृपुत्रा
दयोऽपिये॥ आदिशब्दग्राह्या
नाहसएव। भ्राता वा भ्रातृपुत्रो
वासपिंडः शिष्य एववा। सह
पिंडक्रियांकृत्वा कुर्यादभ्युद
यंततः। भ्राता वा इतिवाक्यात्
त् भ्रातृपेक्षया प्रधानत्वेन ए
कीधिकारिणां दौहित्रादीनां
समुच्चयः। अतएव सपिंड
त्वेनैव भ्रातृ तत्पुत्रयो रधिका
रसिद्धैः पृथगुपादानं प्राधान्य
ज्ञापनार्थं॥ महागुरौ प्रतीभू
ते वृद्धिकर्मन युज्यते। इति
शूलपाणि लिखितवचनेन।
प्रमीतौ पितरौ यस्यदेहस्तस्या
शुचिर्भवेत् नापिदैवं न वा पै
त्र्यं यावत् पूर्णोन वत्सरः॥ इ
ति देवीपुराणवचनेन च प्रेती
भूतमातापितृकस्य पितुः
प्रेतीभूत मातापितृकस्य सं
स्कार्यस्य प्रेतीभूतमाता पि
तृकायाः अनूढायाः कन्या
याश्च वैदिककर्म कर्तृत्व क
र्मत्वानर्हत्वेन तत्परीहाराय य
द्दर्शो वृद्धि रापद्येत इत्यनेन
पूर्वदिने सपिंडनं कृत्वा पित्रा
दिः परदिने अभ्युदयं नामकर
णादिकं कुर्यात्। कन्यायास्तुप
तिरेको गुरुः स्त्रीणां। इतिवच
नोक्तैकपदेन मरणेव महागु
रुत्वाभिधानात् तत्प्रेतत्वमा
त्रे तस्याः कर्मानधिकारः। ए
वंच पितृ मात्रो र्महागुरुत्व
व्याहते स्तयो र्मरणे कन्याया
नकर्मानधिकारः। अत्राभ्युदय
सपिंडनयो र्यानंतर्यमावेत्का प्र
त्ययार्थः नत्वेककर्तृकत्वं। सपि।

अन्यथा सपिंडनाधिकारिणः प
त्न्याः सत्वे अभ्युदयाधिकारिणो
भ्रातुः सपिंडनाधिकारापत्तेः।
यथा नानिष्ट्वा तु पितॄन् श्राद्धैः
कर्मवैदिकमारभेत्। इति शा
तातपवचने पितृकर्तृक वृद्धि
श्राद्धानंतर मेव पुत्रेण विवाहः
क्रियते। नतु पुत्रेण श्राद्धांतरं
क्रियते। अत्र पुरुषस्य पुनस्त्व
न्य इत्यनेन पुत्रवत् शिष्यांत
स्य सपिंडने सामान्यतोऽधिका
र प्रतिपादनात् अभ्युदयं विना
पि पुरुषस्य सपिंडनं प्रतीयते
सहपिंडक्रियांकृत्वा कुर्यादभ्यु
दयंततः। इति तु सपिंडीकरणा
त् सर्व मभ्युदयाभावार्थं नत्व
भ्युदयसत्व एव सपिंडीकरणा
र्थमिति। यत्तु। यानि पंचदशा
द्यानि अपुत्रस्येतराण्यपि। एक
स्यैवतुतद्दातव्यमपुत्रायाश्च यो
षितः। इतिच्छंदोगपरिशिष्टीयं
सपिंडीकरणेतरपंचदशश्राद्ध
विधायकं तच्छिष्यपर्यंताभावे
पुरुषस्य बोध्यं। इतराणिएको
द्दिष्टविधानेनैव यानि प्राप्तानि
प्रत्याब्दिकश्राद्धानि तान्येवदा
तव्ये दातव्यानि इत्यर्थः॥
अपुत्रायाश्चेति चकारोऽनुक्तस
मुच्चायकः पतिरहिताया इति
समुच्चिनोति। अपुत्रायां मृतायां
तु पतिः कुर्यात् सपिंडनं। इ
तिपैठीनसिवचनैकवाक्यत्वात्
अत्र छंदोगपरिशिष्टे अपुत्रायाः
पंचदशश्राद्धविधानात्सपिं-
डीकरणं तासां पुत्राभावेनवि
धते। इतिमार्कंडेयपुराणाच्च
बालकपुत्रसत्वे सपिंडीकरणं
अन्येनापि कर्तव्यमितिप्रतीय
ते। एवंपतिः कुर्यादित्यत्रापि
पतिसत्वमात्रं विवक्षितं। तेन
ऊढया दुहित्रा सपिंडनंकार्यं
अत्र। सर्वासा मेकपत्नीना मे
काचेत् पुत्रिणी भवेत्। सर्वा
स्ता स्तेन पुत्रेण प्राह पुत्रवती
र्मनुः। इति मनुवचनेसपत्नी
पुत्रस्य पुत्रत्वातिदेशात् तत्स
त्वेपि स्त्रीणां सपिंडनं मैथिले
रुक्तं तत्र प्रागुक्तलघुहारीतव
चने पुत्रेणैवेत्येवकारेणातिदि
ष्टपुत्रनिषेधात्। अतएव तद
तरार्द्धे भ्रातृपुत्रोपादानं संगच्छ
ते। अन्यथा भ्रातृपुत्रसत्वे। य
द्येकजाता बहवो भ्रातरश्च सं
होदराः। एकस्यापि सुते जाते

सर्व्वे ते पुत्त्रिणो मताः । इति वृह-
स्पतिवचनेन पुत्त्रत्वातिदेशात्
भ्रातृपुत्त्रस्य पितृव्यश्राद्धाधि-
कारे प्राप्ते भ्रातृपुत्त्रोपादाने व्य-
र्थं स्यात् । पुत्त्रत्वातिदेशफले
तु तत्सत्त्वे पुत्त्रान्तराकरणं पु-
न्नामनरकत्राणञ्च ॥ लघुहा-
रीतः । सपिण्डीकरणान्तानि या-
नि श्राद्धानि षोड़श । पृथङ्-
नैव सुताः कुर्य्युः पृथक्द्रव्या
अपि क्वचित् । प्रेत संस्कारक-
र्म्माणि यानि श्राद्धानि षोड़श
यथाकालेन कार्य्याणि नान्य-
थामुच्यते ततः । पृथग्द्रव्या अ-
पि विभक्ता यदा अपि पृथक् न
कुर्य्युस्तनयाः मरणस्य पितुः पृथ-
क् न कुर्य्युः किन्तु पृथक् कुर्य्युः । अ-
विशेषयति मरीचिः । मृतेऽपि न
विपुत्त्रेण क्रियाकार्य्या विधान-
तः । बहवः स्युर्यदा पुत्त्राः पितुरेक-
वासिनः । सर्व्वेषान्तु मतं कृत्वा
ज्येष्ठेनैव तु यत् कृतं । द्रव्येण
चाविभक्तेन सर्व्वैरेव कृतं भ-
वेत् । पुत्त्रेणेत्यविशेषात् सर्व्वे-
षामधिकारे प्राप्ते ज्येष्ठस्यास-
क्तात् कर्त्तव्यतामाह बहव इति
ज्येष्ठेनापि सर्व्वेषां भ्रातृणां ।

मतकरणेनैव करणं भवतु इति
मतेस्थाने कृत्वाविभक्तत्वेन द्रव्य
संश्लेषेणाच कृते कर्म्म सर्व्वैरेव
कृतमेव भवेत् । तदानीं द्रव्यासं-
श्लेषेच तस्मात् द्रव्यं प्रागंशमि-
ति कृत्वा कर्त्तव्यं । यदि तेन तत्र
परिश्रूयते तदा स्वकृतमेव भव-
ति प्रत्यवायीच भवति । ततु
तेन श्राद्धान्तरं कर्त्तव्य मिति
श्राद्धविवेकोक्तं युक्तं पृथङ्-
नैव सुताः कुर्य्युरित्यनेन पृथक्-
करणस्य पर्य्युदस्तत्वेनानधिका-
रात् । यथाकाल मिति अशौचा-
न्तद्वितीयदिन द्वादशमास मृत-
तिथिप्रकारकत्वेन षण्मासाद्यन्त-
य संवत्सरेषु । नच विधानसामर्थ्या-
देव तत्तत्काल प्राप्ते तत्रैक मिदमि-
ति वाच्यं । तत्तत्कालानां द्वादशाहा-
द्यपेक्षया प्राधान्यबोधनार्थत्वा-
त् । अत्र आनन्त्यात् कुलधर्म्मा-
णां पुंसाञ्चैवायुषः क्षयात् । अस्थि-
तेश्च शरीरस्य द्वादशाहः प्रश-
स्यते । इति व्याघ्रवचनोक्त प्रश-
स्तते इत्यनेन कुलाचारस्थानिः
प्रशस्तादितानवाकृतिमरण-
शौचे पञ्चवादि देशले देशादिशा
सनानुसारादेव सपिण्डीकरणा-

पकर्षे द्वादशाहापेक्षया प्रागु-
क्त नवममासादि गौणकालपरि-
ग्रहः । अथवा यथाकाल मित्या-
दे यदह वा वृद्धि रापद्येत इत्यने-
नावश्यक नामकरणादि वृद्ध्य-
र्थ मेवापकर्षो न त्वनावश्यक
वृद्धार्थ्यतीयर्थापकर्षः कार्य्य
इति तात्पर्य्यं । अतएव लघु-
हारीतेन । नैषेवकाम्य यत्
कर्म्म वत्सरात् प्रथमादृते इत्य-
नेन काम्यस्यापकर्षनिमित्तता
नास्तीत्युक्ते यदि त्वावश्यकवृ-
द्धिनिमित्तेनापकर्षः कृतस्तदा
वृद्धाद्भ्यादि काम्यं वत्सराभ्यन्त-
रेपि कर्त्तव्यमिति । श्राद्धविवे-
कोप्येवं । यद्यपि गोभिलसूत्रा-
दौ सपिण्डीकरणस्यैवापकर्षः ।
प्रागुक्त स्तथापि सपिण्डीकर-
णापकर्षे तत्पूर्व्वकर्त्तव्यश्राद्धा-
नामपि तदादितदेशन्यायादप-
कर्षः । सपिण्डीकरणान्ता ह्येषा
प्रेतक्रिया बुधैः । इति शातातप-
वचने प्रेतक्रियायाः सपिण्डीकर-
णान्तत्वं प्रतीयते । अत्र वृद्धिनि-
मित्तं विना सपिण्डनापकर्षे कृते
पूर्णसंवत्सरकाले प्राप्ते प्रेत-
त्वपरीहारमाह विष्णुधर्म्मोत्तरे

कृते सपिण्डीकरणे नरः सं-
वत्सरात् परं । प्रेतदेहं प-
रित्यज्य भोगदेहं प्रपद्यते ॥ वृ-
द्धिनिमित्तकसपिण्डीकरणा-
पकर्षे कृते तत्क्षणादेव प्रे-
तत्वपरीहारः । तदर्थमेवापक-
र्षात् । एवञ्चान्यनिमित्तकाप-
कर्षे वृद्धिकाले प्राप्य प्रेतत्व-
परीहारः । तत्कालस्य पूर्णसं-
वत्सरकालतुल्यत्वात् । अर्व्वा-
क् संवत्सराद्वृद्धौ पूर्णे संवत्स-
रेऽपि वा । ये सपिण्डीकृताः प्रे-
ता न तेषान्तु पृथक्क्रिया
इति शातातपवचनात् ॥
इति श्राद्धतत्त्वं ॥

सपीतकः पुं राजकोषातकी
इति राजनिर्घण्टः ॥

सपीतिः स्त्री आत्मीयजनसह-
मिलितैककालपाने । तत्पर्य्या-
यः । तुल्यपानं २ इत्यमरः ।
सहपीतिः ३ । इति शब्दरत्ना-
वली ॥

सपीतिका स्त्री हस्तिघोषा ।
इति राजनिर्घण्टः ॥

सप्त त्रि संख्याविशेषः । सात
इति भाषा । बहुवचनान्तोऽयं ।
तद्वाचकानि यथा । पातालं १

भुवनं २ मुनिः ३ द्वीपः ४ स्व
र्य्यास्य: ५ वारः ६ समुद्रः ७ स्व
रः ८ राज्याङ्गं ९ व्रीहिः १० वह्नि
शिखा ११ पर्व्वतः १२ इति क
विकल्पलता ॥ सप्तसंख्याविशि
ष्टः। यथा। सप्तसप्तविलिखेत्
प्ररेखिका स्निग्धशृङ्गं मयक
तिकादिकं लेखयेदभिजितास
मन्वितं चैकरेखया विगणेनविध्य
ते। इति ज्योतिस्तत्त्वे दीपिका
ग्रपि च। कस्मात् स्वरेण सप्ता
ना मारोह स्थावरोहणं स्मृतं
नेमच्यते ग्रामत्रये तः सप्त
सप्त च ॥ इति संगीतद
र्पणः ॥

सप्तः त्रि सप्तमः। यथा सप्ता
ष्टांस्त्वदहिः स्मृते रुद्रपत्नादेका
दशा हि तिथे। इति ज्योति
स्तत्त्वं ॥

सप्तकः त्रि सप्तानां पूरणः।
यथा। योऽष्टके सप्तके मघत्तु
ले ध्रुवम हृद्यो नष्टा। सिंहवृ
चैर्वे सदावर्ज्जी मृतिः तथाष्ट्री
क्तिवः। इति ज्योतिस्तत्त्वं ॥ स
प्तसंख्याविशिष्टः। यथा। यत्त
जातु द्वितीय च चकास्य शाक्ति
केवच दीर्घी वेदीच विज्ञेया।
यज्ञादिः सप्तको गणः। इति मु
ग्धबोधटीकायां दुर्गादासः ॥
सप्तसंख्या। सप्त एव सप्तकः
स्वार्थे कप्रत्ययः ॥

सप्तकी स्त्री काञ्ची। इत्यमरः।

सप्तगोदावरं क्ली सप्तानां गो
दावरीणां समाहारः। इति मु
ग्धबोधव्याकरणं ॥

सप्तच्छदः पुं वृक्षविशेषः ॥
छातिन् इति भाषा। तत्पर्य्यायः
गुच्छपुष्पः २ युग्मपर्णः ३ स
प्तच्छदः ४ बृहत्त्वक् ५ वक्रपर्णः ६
शाल्मलिपत्रकः ७ सद्गन्धः ८
गन्धिपर्णः ९ अस्य गुणाः ॥
तिक्तत्वं। उष्णत्वं त्रिदोषघ्नत्वं
दीपनत्वं मदगन्धित्वं। व्रणरक्ता
मय कृमिनाशित्वञ्च। इति रा
जनिर्घण्टः ॥ अन्यत्सप्तपर्णः
शब्दे द्रष्टव्यं ॥

सप्तजिह्वः पुं अग्निः। इति त्रि
काण्डशेषः। तस्य सप्तजिह्वा
नामानि यथा। कालीकरा
लीच मनोजवाच सुलोहिताचै
व सुधूम्रवर्णा उग्रा प्रदीप्ता च
रूपी द्वयोनेः सप्तैव कीलाः क
थिताश्च जिह्वाः। टीकासर्वत्र
ते उग्रा प्रदीप्तयोः स्थाने ॥

स्फुलिङ्गिनी विश्वनदाख्येति
नामद्वयं। इत्यमरटीकासारसु
न्दरी। कर्म्मविशेषे तासां नामान्त
राणि यथा हिरण्या १ कनका
२ रक्ता ३ कृष्णा ४ सुप्रभा ५ ब
हुरूपा ६ अतिरिक्ता ७ एताः सा
त्त्विक्यो यागकर्म्मणि काम्यक
र्म्मणि च पद्मरागा १ सुवर्णा २ भ
द्रलोहिता ३ लोहिता ४ श्वेता ५
धूमिनी ६ करालिका ७ एता
राजस्यः। क्रूरकर्म्मणि तु। वि
श्वमूर्त्तिः १ स्फुलिङ्गिनी २ धूम्र
वर्णा ३ मनोजवा ४ लोहिता
५ कराला ६ काली ७ एता
स्तामस्यः ॥ एतासामधिष्ठा
तृदेवता यथा। अमराः पितृ
गन्धर्व्व यक्ष नागपिशाचकाः।
राक्षसः सप्तजिह्वानां मीरिता
अधिदेवता। एतासां वर्णा दि
ङ्नियमो यथा। गणेशादिम
र्णिपा। हिरण्या तप्तहेमाभा
शूलपाणे दिशि स्थिता वैडूर्य्य
वर्णा कनका प्राच्यां दिशि सम
स्थिता। तरुणादित्यसंकाशार
क्ता जिह्वाग्निसंस्थिता कृष्णा
नीलाभ्रसंकाशा नैर्ऋत्यां दि
शि संस्थिता। सुप्रभा पद्मरा
गा वारुण्यां दिशि संस्थिता
अतिरिक्ता जवाभासा वायव्यां
दिशि संस्थिता। बहुरूपा यथा
ख्याता दक्षिणोत्तरसंस्थिता
इति तन्त्रसारः ॥

सप्तज्वालः पुं अग्निः। इति हेम
चन्द्रः ॥

सप्ततन्तुः पुं यज्ञः। इत्यमरः ॥

सप्ततिः स्त्री संख्याविशेषः ॥
सत्तोर इति भाषा। यथा। नु
वति योजनानाञ्च सहस्राणि
च सप्ततिः यावत्स्फटिकमार्गेण
तावज्ज्वलति भास्करः। इत्यादि
स्यहृद्ये ॥

सप्ततितमः त्रि सप्ततेः पूरणः
सप्ततिशब्दात् पूरणार्थे मघट्
प्रत्ययनिष्पन्नः। इति व्याकरणं

सप्तदश त्रि संख्याविशेषः।
सतेरो इति भाषा। तत्संख्या
विशिष्टः। यथा। एष वै सप्त
दश प्रजापति र्यज्ञे यज्ञे अ
न्वायत्तः। इति मलमासतत्त्वे
बहुवचनान्तोऽयं ॥

सप्तदशः त्रि सप्तदशानां पूर
णः। यथा। ततः सप्तदशे ज्ञातेः
सम्यवर्षा परापरात् चक्रेवैर
तोः शापो दृष्टा पुंसोऽल्प

मेधसः ॥ इतिश्रीभागवते ९ स्कंधे ३ अध्यायः ॥

सप्तदीधितिः पुं अग्निः । इति त्रिकाण्डशेषः ॥

सप्तद्वीपपतिः पुं सप्तद्वीपानामधिपतिः । यथा । नमस्तस्मा द्राहेयपातः सभार्य्य ऋद्धिसंयुतः । सप्तद्वीपपतिर्जातः सूर्य्यायुतसमप्रभः ॥ इति तिथ्यादितत्त्वधृतमत्स्यपुराणं ॥

सप्तद्वीपा स्त्री पृथिवी । यथा मनोः स्वायंभुवस्यासन् दशपुत्रास्तु तत्समाः । यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना । ससमुद्राकरवती प्रतिवर्षं निवेशिता । इति मार्कण्डेयपुराणं । तेषां नामादि द्वीपशब्दे द्रष्टव्यं ॥ सप्तधा व्य सप्तप्रकारं । यथा ॥ सप्तवाराजपो ध्येयः सप्तधा संयतेन्द्रियः । सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ॥ इति तिथ्यादितत्त्वं ॥

सप्तधातवः पुं शरीरस्थसप्तरक्तधातवः । तद्यथा । रसासृङ्मांसमेदोऽस्थिमज्जानः शुक्रसंयुताः । शरीरस्थे यदा सम्यक् विज्ञेयाः सप्तधातवः ॥ इति राजनिर्घण्टः ॥

सप्तनाडीचक्रं क्ली वृष्टिज्ञानार्थं ग्रहनक्षत्राङ्कितसप्तनाडिकसर्पाकारचक्रं । यथा । अथ सप्तनाडीचक्रं । अथातः संप्रवक्ष्यामि यच्चक्रं सप्तनाडिकं । येनविज्ञानमात्रेण वृष्टिं जानंति साधकाः । कृत्तिकादीनि ऋक्षाणि साभिजिन्ति क्रमेण च । सप्तनाडीव्यवस्थत्र कर्त्तव्यः पन्नगाकृतिः । ताराचतुष्कवेधेन नाडिकैका प्रजायते । तासां नामान्यहं वक्ष्ये तथा चैव फलानिह । कृत्तिका च ३ विशाखा च १६ मैत्राख्या १७ भरणी २ तथा । ऊर्द्धाद्या प्रानिनाडी स्याच्चण्डनाड्यभिधा मता । रोहिणी ४ स्वाती १५ ज्येष्ठा १८ अश्वि १ द्वितीया नाडिका मता । आदित्यप्रभवा नाडी वायुनाडी तथैव च । सौम्यं ५ चित्रा १४ तथा मूलं १९ पौष्णसंज्ञं २७ चतुर्थकं । इतीयं मारकानाडी दहनाख्या च सम्मता ॥ रौद्रं ६ हस्तं १३ तथा पूर्वाषाढा २० भाद्रपदोत्तरा २६ चतुर्थी जीवनानाडी सौम्यनाडी

प्रकीर्त्तिता । पुनर्वसू ७ उत्तरफल्गुनी १२ उत्तराषाढा २१ तारकाः पूर्वभाद्रा च २५ शुक्राख्या पंचमी नीरनाडिका । पुष्यर्क्षं ८ फल्गुनी पूर्वा ११ अभिजित् शततारकाः २४ षष्ठी नाडी च विज्ञेया बुधाख्या जलनाडिका । अश्लेषर्क्षं ९ मघा १० विश्व २२ धनिष्ठाभं २३ तथैव च । अमृताख्या हि सा चाड्री सप्तमी चंद्रनाडिका । मध्यनाडीस्थिता सौम्या नाडीनस्याग्र पृष्ठतः । सौम्ययाम्यगते ज्ञेये नाडिकानां त्रिकं त्रिके । क्रूरा याम्यगता ज्ञेया सौम्या सौम्यदिशि स्थिता । मध्यनाडी च मध्यस्था ग्रहरूपफलप्रदाः । एकनाडीगता ह्याद्याः ग्रहाः क्रूराः शुभा यदि । ततो नाडीफलं वाच्यं शुभं वा यदि वाशुभं । ग्रहाः क्रूरा महावाते गताश्चंडाख्यनाडिकां । वायुनाडीगता वायुं दहनाख्याग्निदाहकाः । सौम्यनाडीगता मध्या नीरदा मेघवाहकाः । जलाख्या वृष्टिदाः स्युः अमृतनाडीगतास्तथा । एकोपि तत्फलं दत्ते तन्नाडीसंस्थितो ग्रहः । अमृततः सर्व्वनाडीषु दत्ते नाडीसमं फलं । प्रावृट्काले तु संप्राप्ते योऽस्मिन्नक्षत्रगते रवौ । नाडीवेधसमायोगे जलयोगं वदाम्यहं । यत्र नाडीस्थितश्चंद्रस्तत्रस्थः खेचरो यदि । क्रूराः सौम्या विमिश्राश्च तद्दिने वृष्टिरुत्तमा । एकर्क्षे तु समायोगो जायते यदि खेचरैः । तत्काले च महावृष्टिर्यावदस्यांशके शशी । केवलैः सौम्यैः पापैर्वा ग्रहैर्विद्धो यदा शशी । तदा तु तद्दिने पानीयं दुर्द्दिनं च भवेद्ध्रुवं । यस्य ग्रहस्य नाडीस्थश्चंद्रमास्तत्क्रूरेण च दृष्टः शुक्रः करोत्यभ्रं यदि दृष्टो न जायते । स्थिराः स्थिता स्थिता चैव सौरि सौम्या तु पुंसका । पुरुषाः पुरुषे वायुः क्लीबे तु बुधकारकौ । स्त्रीपुरुषसमायोगे वृष्टिस्तु प्रबला भवेत् । पीयूषनाडीगश्चंद्रस्तत्र खेटाः शुभाशुभाः । त्रिस्रः पंच पानीयं दिनान्येकं त्रिसप्तकं । एवं जलाख्यनाडीस्थे चंद्रमिश्रग्रहान्विते दिनार्द्धं दिवसं पंचदिनानि जायते जले । नीरनाडीस्थिते चंद्रे तत्र

श्येऽपि देवद्विग्रहैः ॥ याम्ये दिनार्द्धकं त्रीणि दिनानि ज्ञायते जले । अमृतादि त्रिनाडीषु यदि स्युः सर्व्वखेचराः । तद्वृष्टिः क्रमाज्ज्ञेया एतार्के रस वासरान् । सौम्यनाडीगताः सर्व्वे वृष्टिदास्ते दिनत्रयं । घोषातोऽप्या महाराज इष्टवृष्टिप्रदा ग्रहाः निर्ज्जला जलदा नाडी भवेद्योगो शुभाधिकः । क्रूराधिकसमायोगे जलदाश्चापि निर्ज्जलाः । याम्यनाडीगताः क्रूरा अनावृष्टिप्रसूचकाः । शुभेषु क्वाजलाशस्या श्चातिवृष्टिशुभाग्रहाः । एकनाडीसमायुक्तौ चंद्रमा धरणीसुतौ । यदि तत्र भवेज्जीव स्तदा वारिमयी मही बुधशुक्रौ यदैकत्र गुरुणाच समन्वितौ । चंद्रयोगे तदा कालेजायते वृष्टिरुत्तमा । जलयोगागतौ स्यातां यदा चंद्रसितौ ग्रहौ । क्रूरदृष्टौ युतौ वापि तदा मेघोऽल्पवृष्टिदः । उदयास्तगतेमार्गे वक्रयुक्तेच संक्रमे ॥ जलनाडीगता स्तत्र महावृष्टिप्रदा ग्रहाः ॥ इति स्वरोदये सप्तनाडीचक्रं ॥

तच्चक्ररूपं यथा।

सप्तनामा स्त्री आदित्यभक्ता । इति राजनिर्घण्टः ॥

सप्तपत्रः पुं मुद्गरवृक्षः ॥ इति राजनिर्घण्टः ॥ सप्तपदी स्त्री सप्तानां पदानां समाहारः ॥ इति व्याकरणं ॥

विवाहाङ्गसप्तपदीगमनं यथा ततो जामाता प्रागुदीच्यां गत्वा वधूं सप्तभि र्मन्त्रैः सप्तमण्डलिकासु सप्तपदानि नयेत् । वधूञ्च दक्षिणपादं नीत्वा पश्चाद्वामपादे मण्डलिका नयेत् जामाताच वधूं क्रयात् वामेनपादेन दक्षिणं पाद माक्रामयेति । सप्तानां मन्त्राणा मृष्यादयः साधारणाः । प्रजापति रृषि रेकपादविराट्छंदो विष्णुर्द्देवता पादाक्रमणे विनियोगः । ओम् एक मिषे विष्णु स्त्वा नयतु । द्वे ऊर्ज्जे विष्णु स्त्वा नयतु त्रीणि व्रताय विष्णु स्त्वा नयतु । चत्वारि मायो भवाय विष्णु स्त्वा नयतु । पंचपशुभ्यो विष्णु स्त्वा नयतु । षड्रायस्पोषाय विष्णु स्त्वा नयतु सप्त सप्तभ्यो होत्राभ्यो विष्णु स्त्वा नयतु । ततः सप्तमे पदे गतां वधूं पति राशास्ते । प्रजापति रृषि सोमको पंक्तिश्छंदः कस्या देवता पदाक्रमणानन्तर माशासने विनियोगः । सखा सप्तपदी भव सख्यं ते गमेयं सख्यं ते मा योषाः सख्यं ते मा योष्ठाः इति सप्तपदीगमनं ॥ इति भवदेवभट्टः ॥

सप्तपर्णी स्त्री मिष्टान्नविशेषः यथा। शुक्तादाडिम खर्ज्जूर सुदिताम्रं सशर्करं । लाजचूर्णं समभागं सप्तपर्णमुदाहृतं ॥ इति शब्दचन्द्रिका ॥

सप्तपर्णः पुं वृक्षविशेषः । छातिन इति भाषा । तत्पर्य्यायः ॥ विशालत्वक् २ शारदी ३ विषमच्छदः ४ इत्यमरः । शारदः ५ देवहृतः ६ दानगंधिः ७ शिरोरुजा ८ ग्रहनाशः ९ सुतिपर्णः १० गृहाशी ११ ग्रहनाशनः १२ इति शब्दरत्नावली ॥ गुच्छपुष्पः १३ शाक्तिपर्णः १४ सप्तपर्णकः १५ इति जटाधरः । बृहत्त्वक् १६ इति रत्नमाला । अस्य गुणाः सप्तपर्णो व्रण श्लेष्मवात कुष्ठास्र जन्तुजित् । दीपनः श्वास गुल्मघ्नः स्निग्धोष्णस्तुवरः

स्मृतः ॥ इति भावप्रकाशः ॥
अन्यत् सप्तच्छदशब्दे द्रष्टव्यं ।
सप्तपर्णी स्त्री लज्जालुलता । इ
ति रत्नमाला राजनिर्घण्टौ ॥
सप्तपातालं क्ली सप्तसंख्यका
धोभुवनं । यथा आदित्यरश्मि
तो देवो रुद्ररूपी जनार्दनः ।
निःसृत्य प्रथमे यातः पाता
लतलमन्ततः । सप्तपातालसं
स्थास्तु नाग गन्धर्व राक्षसान्
देवान्दैत्यांश्च योषांश्च जघान च
रम्भूलष्टक । इति कालिका
पुराणे ९४ अध्यायः । तन्नामा
नि यथा ॥ अतलं वितलञ्चैव
वितलञ्च रसातलम् । म
हातलं सुतलञ्चाग्र्यं पातालं
सप्तमं विदुः । इति भरतः ॥
सप्तपुत्रसूः स्त्री सप्तपुत्रप्रसू
ता । तत्पर्य्यायः । सुतवस्करा
२ । इति त्रिकाण्डशेषः ॥
सप्तभद्रः पुं शिरीषवृक्षः । इ
ति शब्दचन्द्रिका ॥
सप्तसुः त्रि सप्तानां पूरणः
सप्तमः इत्यादि भाषा । यथा ।
लेपभाजश्चतुर्थाद्याः पित्रा
द्याः पिण्डभागिनः । पिण्डदः सप्त
मस्तेषां साषिण्ड्यं साप्त ।

पौरुषं । इति शुद्धितत्त्वं ॥
सप्तमी स्त्री तिथिविशेषः । चन्द्र
स्य सप्तमकला क्रिया । तत्र शु
क्लपक्षे अमृतपूर्णवच्छिन्नसप्त
मकला क्रिया । कृष्णपक्षे तदम
तक्षयानुकूलसप्तमकला
क्रियेति विशेषः । पञ्जिकायां त
स्या अङ्कः शुक्लपक्षे ७ कृष्णप
क्षे १५ ॥ तत्र जातफलं । क
न्याप्रज्ञो वैरिकुलेभसिंहो वि
शालनेत्रः प्रथितप्रभावः । दे
व द्विजाज्ञीरसिको महात्मा
स्यात् सप्तमीजः पितृवित्त
हर्त्ता । इति कोष्ठीप्रदीपः ॥
अथ सप्तमी ॥ सा च षष्ठी
युता ग्राह्या युग्मात् । पैठीन
सि वचनाच्च । यथा । पञ्चमी
सप्तमी चैव दशमी च त्रयोदशी
प्रतिपन्नवमी चैव कर्त्तव्या सं
मुखी तिथिः । संमुख्य शब्दे
स्कान्दे । संमुखी नाम या या
त्वाव्यापिनी दृश्यते यदा । अत
एव पूर्वदिने त्रिसन्ध्याकाल
व्यापित्वे षष्ठीयुक्तसप्तम्यामुप
वासमाह भविष्यपुराणं षष्ठी
समेता कर्त्तव्या सप्तमी नाष्टमीयु
ता पतंगोपासनायेह षष्ठ्या मार्कं

ण्डायनं । यथा उपोष्यैव तथा
कर्मान्तरे । तथा । षष्ठ्या युता
सप्तमी च कर्त्तव्या सर्वदा तिथिः
षष्ठी च सप्तमी यत्र तत्र सन्निहितो
हरिः । इति स्कन्दपुराणात् । तथा
शुक्लपक्षस्य सप्तम्यां सूर्यवारो
यदा भवेत् सप्तमी विजया ना
म तत्र दत्तं महाफलं । भविष्ये
शालितण्डुलप्रस्थस्य कुर्यादन्नं
सुसंस्कृतं । सूर्याय चरुकं दत्वा
सप्तम्यां च विशेषतः । यावन्त स
ण्डुला स्तस्मिन्नैवेद्ये परिसंख्य
या । तावद्वर्षसहस्राणि सूर्यलोके
महीयते । गोपथब्राह्मणे । हा
विष्यान्तपलिकं प्रस्थमुक्तं स्वयम
थर्वणा ज्योतिषे । पलं तु लौ
किकैर्मानैः साष्टरक्ति द्विमाषकं
तोलकत्रितयं तेषु ज्योतिर्विद्भिः
स्मृतिसम्मतं ॥ तेन च त्रयस्त्रिं
कार्षिक माषपञ्चकार्षिकषड्
धिक शततोलकमिताः प्रस्थ
तण्डुलाः । इति । एवञ्चैतत्तन्त्राधि
कयोः फलतारतम्यं बोध्यं । प
वं देवतान्तरेऽपि तत्तल्लोकमहि
तत्वं फलेन कल्पयितुं युक्तं ।
अतएव शिवेऽप्येवं वक्ष्यते ॥ व
राहपुराणे । अथापरं महाराज

व्रतमारोग्यसंज्ञितं । कथयामि
परं पुण्यं सर्वपापप्रणाशनं
तस्यैव माघमासस्य सप्तम्यां स
मुपोषितः । प्रजयेद्भास्करं देवं
विश्वरूपं सनातनं । आदित्यभा
स्करं रवे भानो सूर्य दिवाकर
प्रभाकरेति संपूज्य देवः सर्वे
श्वरो रविः ॥ षष्ठ्यां चैककृतो
हारः सप्तम्यां समुपोषितः अष्ट
म्यां चैव भुञ्जीत एष एव विधिः
स्मृतः । अनेन वत्सरं पूर्णं वि
धिनाभ्यर्चयेद्रविं । तस्यारोग्यं ध
नं धान्यमिह जन्मनि जायते ॥
परत्र च शुभं स्थानं यद्गत्वा न नि
वर्त्तते । सप्तम्यां समुपोषित इ
ति आदिकमेति क्रमः । तेन स
प्तम्यां समुपवासः स्तु मारभ्यावान्
ष्टम्यः । ततश्च प्रातः सप्तम्या
मेवोपवाससंकल्पः । रविरस्तु
विश्वरूपतया पूजाकाले ध्येयः
अभिलापे तु तत्रियाविशेषा
आरभ्येति । ऐहिकारोग्यधन
धान्यपारलौकिकशुभस्थान
लाभकामः संवत्सरं यावदारो
ग्यव्रतमिति विशेषः । ततः अष्ट
मि सप्तम्यामुपवासं कुर्वन्
आदित्यभास्कररवे भानो सूर्य




दिवाकर॥ प्रभाकरनमस्तुभ्यं
मस्माच्छोकाद्विमोचय। इतिमं·
त्रेण पूजयेत्। अत्र षष्ठ्यादि
षु नतन् कर्मविधानात् षष्ठी
सप्तमेनैतस्य विषयः॥ का
लिकापुराणे भक्तं प्रतिसप्तम्यं
वाक्यं। अहृष्टमांनभुंजीत वि
ष्णसूत्रेनैवदर्शयेत्। तथा। म
दष्टाघृतनिर्मोल्य ष्टपरि न त
धारयेत्। अष्टा प्रतिमा॥
अथ विधानसप्तमी। कृत्सचिन्ता
मणौ। अर्कांग्र शुचि गोमयं·
स्तुमरिचे तोये फलंचाष्टतेम्
ले नक्तं सुपोषणाच्च विधिवत्
कृत्वैकभक्तं नरः। क्षीरं वायुश
ने घृताशन क्षिति प्रोक्तमथमु
नि क्रमात् कृत्वा द्वादशसप्त·
मीर्दिनकृतः प्राप्नोत्यभीष्टंफ·
लं। अथवार्काग्रादीनत्भोजन
निवृत्तिः एवसीयते। तपस्त्वात्
तथाचमत्स्यपुराणे। तपोभिः
प्राप्यतेऽभीष्टं नासाध्यंहि त
पस्यतः। दुर्भगत्वं वृथालो·
को वहते सति साधने॥ तप
सः क्लेश स्वभावत्वं तथैवोक्तं।
अस्नः तिचपत्ता भुवि नहीसता
वक्रवपुः। सोढुं क्लेशस्वभा

वस्य तपसः सौम्यदर्शने॥ अ
र्कं शुक्लं यथा। अर्कपत्राकरमा
त्र मेतवीस्त गृहीतकं। कपि·
लाविट्पवमात्रं मंत्रुले मविंचे
जले। कदलीफलमध्यंत् क
णामात्र मपक्वकं। कुशामूलेय
वमात्रं स्वच्छायाद्विश्रोत्तणे॥
भक्षामितोदने नक्तं मुद्गोपवस
नेतथा। एकभक्तं मध्यराणुम
ण्णांभोजनेमते। अर्द्धप्रसृतिमा
त्रेतु कपिलाद्रव्यभक्षणं। स्ना
त्वासंपूज्य मार्तंडं प्राश्नीयाद्वा
ग्यमाश्रयेत्। घृते स्वल्पंपौषमा
से माघादद्वंसमाचरेत्। ब्राह्म
णान्भोजयेद्भक्त्या गुड क्षीर नि
रामिषैः विप्राय दक्षिणांदेवावि
भवस्यानुरूपतः। अष्टम्यां पारणं
कुर्यात् कटुम्लरहितेनच॥ मु
द्गमाष तिलादीनि घृतेचैववि
वर्जयेत्। एकसिद्धंभक्ष मुक्त
मर्कतेजानुसारतः॥ एतद्व्रत
स्य माघादिमासविशेष विहित
कर्मत्वेन मलमासेतरकर्तव्यत्व
माह्वशिष्ठः लिङ्गपुराणे माघे
ह्यग्रेत पश्चात् संप्राप्ते त्वधिमा
सके। एवंमानेन तेस्तका का
र्यं द्वादशमासिके एवंमानेन

मलिम्लुच मुख्यामानेन। तेम
लमासे। द्वादशमासिके द्वादश
मासेष्वेव कार्य्यं न मलमासश्चप
र्यः यत्। मासेमलिम्लुचेः पौवं
यजेदेवी सशंकरां। किंतुनो
धापने कार्य्य मित्याह भग·
वान् शिवः। इति विसुरहस्यव
चनं। तत्मासविशेषानेकितमा
समावकर्तव्यामावास्यादि व्रतक
र्तव्यतापरं। उद्यापने प्रतिष्ठा।
एव मारंभोपिनिषिद्धः गार्ग्यः
अस्त गते गुरौवा शुक्रे वाले
वृद्धे मलिम्लुचे। उपायनसुपा
रंभे व्रतान्तं नैव कारयेत्॥
उपायनेप्रतिष्ठा। उपारंभ मा
रंभे। एतच्च कालशुद्धिमात्रप
रं तत्तन्मात्रविधिकल्पने गौरवा
त्॥ भविष्ये। भाद्रेमासि सिते
पक्षे सप्तम्यां नियमेन या।
स्नात्वा शिवं लेखयित्वा मंड
लेचसहस्त्रांशुकं। पूजयेच्चतदा
तस्याउःखायंनैवविद्यते। इदंकु
क्कुटीव्रतत्वेन ख्यातं। भविष्ये
सूर्य्यग्रहनतुल्या हि शुक्लामा
घस्य सप्तमी। अरुणोदयवेला
यां तस्यांस्नाने महाफलं॥
माघे मासि सिते पक्षे सप्तमी

कोटिभास्करा। दद्यात्स्नानार्घ्य
दानाभ्या मायु रारोग्य सम्पदः॥
अरुणोदयवेलायां शुक्लामाघ
स्यसप्तमी। गंगायां यदि लभ्ये
त सूर्य्यग्रहशतैःसमा। कोटिभा
स्करा कोटिसप्तमीतुल्या। सू
र्य्यग्रहणफले स्नानजे सन्निहि
तेवष्टिरंतवंगेतिस्यायात्। तेन
वरुणात सूर्य्यग्रहणकालीन
गंगास्नानजन्यफलसमफलप्रा
प्तिः फल मत्र ज्ञेयं। अत्रवरूणा
त सूर्य्यग्रहणं प्रत्येकाधिक
रणतासंसर्गरिणान्वयात् काला
नां स्नानानां तत्फलानां मपि
वरूणातत्वे लभ्यते अतो नाप्र
सिद्धिः एषासप्तम्यां एवापरस्या
यंत्रारुणोदयकाले सप्तमी तत्र
पूर्वदिने तत्काले स्नानं। चत
स्रोघटिका प्रातररुणोदय उच्य
ते। यतीनांस्नानकालोऽयं गंगांभः
सदृशः स्मृतः। त्रियामांरजनीप्रा
हु स्त्यक्त्वाद्यंत चतुष्टयं। नाडी
नांतदुभे संध्ये दिवसाद्यंत संज्ञिते
इति कालमाधवीयधृत ब्रह्म
वैवर्तीयेन पूर्वस्य तत्काल
स्य पूर्णतिथिसंबंधिदिनकर्त
व्य कर्मांगत्वेन इतरस्य चेतरा




त्रं तेनाभिधानात्। अत एव दत्ते
ण तत्काल मात्रव्यापिक कृत्य
मभिहितं। अरुणोदयकालेतु
हूर्तास्तुन तिथिलाभ एव स्नाने
व्रतोपवास स्नानादौ घटिकैका
यदा भवेत्। उदये सा तिथिर्ग्रा
ह्या श्राद्धादावस्तगामिनी ॥
इति विष्णुधर्मोत्तरात्। अत्रैव घ
टिका मुहूर्ते आद्युपाय का
लाद्युपायात् इति वक्ष्यते। ब्रह्म
वैवर्त्तवचने घटिका हेतुरूपाप
रवचने नाडीना मध्येत्युक्त
त्वयमित्येकवाक्यत्वात्। ये तु
सूर्योदयात् प्रागपि प्रातःस्ना
नविधानात् तत्रैव माघसप्तम्या
द्युगुणफलविधि लाघवादि-
त्याहुस्तच्चिंत्यं। प्रकरणान्यत्वे प्र
योजनान्यत्वे। इति जैमिनिसूत्रे
ण प्रकरणभेदे गुणविध्यसि
द्धेः। अत एव कल्पतरु रत्नाकर
योः। यदुक्तं द्विगुणात् भगवान्
चेदस्तुयं प्रोहोपमान् प्रातःस्ना
यी भवेन्नित्यं द्वौ मासौ माघ फा-
ल्गुनौ। इति विष्णुरहस्ये निम
स्नान प्रकरणात् प्रकरणान्तरा
म्नानात् प्रकरणान्तराधिकरण
न्यायेन काम्यस्नानांतरमभिरभिम

त्तं न तु गुणफल विधिः। किंतु
काम्यकरणे प्रसंगान्नित्यसिद्धि
रिति। अत्र माघमास निमित्तक
माघसप्तमीनिमित्तक काम्यस्ना
नयोः प्रातर्विधानात् नैमित्ति
कत्वेन प्रायश्चित्तवत् सकृदनुष्ठा
ने। प्रधानस्य क्रिया यत्र सांग
तत् क्रियते पुनः। तदंगस्याक्रि
यायांतु नावृत्तिर्नैव तत्क्रिया
इति कात्यायनवचनात्। नद्या
नमाचरेद्भुक्त्वा नातुरो न महा
निशि। न वासोभिः सहाजस्रं
नाविज्ञाते जलाशये। इति म
नुवचनेनैकदाजस्रस्नाननिषे
धाच्च धर्मविन्नाचरेत् स्नानमा
त्रिकञ्च पुनः पुनः। इति मनुव
चनाच्च। अत एव नदीमुख मक
रणशेष प्रधानानां मपि काम्या
नां तन्तदेश काल विहितानां
तन्त्रेणैव सिद्धिरिति आदर्शिना
मतिः निष्काम विष्णुप्रीतिका
मयोः स्नानयो सकृदनुष्ठाने। ग
णानारतम्यात् फलतारतम्य उ
चितं न्यायेन फलेवोध्यं। तन्त्रेऽस्तु (?)
नीयगुणादि माघधर्मभेदवन्निर्दे
हमघाकं यस्यान्तरेऽपि कम्यास्ना
देशो आद्ये प्रशस्यते। कन्या।

गते पंचमे तु विशेषेणैव का
रयेत्। इति हेमाद्रिधृतादित्य
पुराणोक्तवत्। एतद्वचनप्राग
र्हं कार्तिक मलमासाद्यविषयं।
देश कालाश्रम तत्र इत्यादा
मनो गुणाः स्वकृशस्यापि दान
स्य फलातिशयहेतवः। इति ब्रह्म
पुराणोक्तवच्च। तीर्थभेदे त्वेक
दापि नाना स्नानं विष्णुवदित्ये-
से प्राप्ते पंचतीर्थी विधानतः
इति ब्रह्मपुराणादिवचनात्ती
र्थभेदे तेन प्रसंगयोरसंभवा-
च्च। अत एव गंगावाक्यावलीप्र
हचिंतामणयः। यत्तु प्रयागे अ
ह स्नान कोटीकृतेपि माघसप्त
मी स्नानादावसाधारणसंकल्पे
न पुनस्तत्रैव प्रातःस्नानाचरण
मदयुक्तं। तदासकृत्स्नानस्यैव
वितत्वात्। अन्यथा तन्महफल
कामनायां तदानेन्यापत्तेरिति-
क्तं॥ स्नाने परिपाटी माहकृ
सकल्पलतायां विष्णुः। सप्तवद
रपत्राणि सप्तार्कपत्राणि च शि
रसि निधाय यद्यज्जन्मकृतं पापं
मयासप्तसु जन्मसु। तन्मे रोगं
च शोकं च माकरी हन्तु सप्तमी इत्य
नार्घ्य स्नायादिति विशेषः रोक


च्छिद्रं। तिथिकृत्यस्य पौर्णमास्यं
त मासांगकल्पत्वात्माकरीति पदं स
करार्कारब्ध चान्द्रमासीयतिथि
परं तिथिक्रमेण च कृत्सादिव्रतेषु
क्यादि मेवच। विवाहोऽपि चेद्यो
यदि मासे कृतो विनिर्दिष्टोत्
इति ब्रह्मपुराणात्। मन्वन्तरा
दिन तथा युक्तत्वाच्च। यथाम
त्स्यपुराणे। यस्मान्मन्वन्तरादौ
तु रथ मापुर्दिवाकरः। माघमा
सस्य सप्तम्यां तस्मात् सा रथस
प्तमी। अरुणोदयवेलायां तस्यां
स्नानं महाफलं। अत एव नार
सिंहे रथ्याख्याया मित्युक्तं।
यथा समपि चैव हि। तथान्नयत
नीयायां शिष्यान्नाध्यापयेद्बुधः
माघमासे तु सप्तम्यां रथ्याख्या
यांतु वर्जयेत्। द्वादश्यां प्रायेण
स्यान द्वादश्यां। भरण्यामाशकध
जपातभरण्यां। इति कल्पतरुः
अत्र महानवम्यादि साहचर्या
त्क्षीण चांद्रत्वे प्रतीयते। अत
एव चतुर्दश मन्वन्तरादिगणने
क्वापि न रथ्याप्युल्लेखः॥ यथा
भविष्य मात्स्ययोः। अश्वयु
क् शुक्ल नवमी द्वादशी का-
र्तिकी तथा। तृतीया चैत्र-

महानवम्यां हाद
ष्याभरण्या ^



मासस्य तथा भाद्रपदस्य च
फाल्गुनस्याप्यमावास्यापौष
स्यैकादशीतथा। आषाढस्या
पिदशमीतथामाघस्यसप्तमी।
श्रावणस्याष्टमी कृष्णा तथाषा
ढस्यपूर्णिमा। कार्त्तिकीफाल्गु
णीचैत्रीज्यैष्ठीपञ्चदशीसिता म
न्वन्तरादयस्त्वेता दत्तस्याक्षयका
रिकाः। अत्रामावास्याष्टमीव्यति
रिक्ताः शुक्लाः। पुनःएतत्त्वाप
होपादानात् उपक्रमोपसंहारयोः
शुक्लत्वकीर्त्तनाच्च अत्रकामधे॰
नौ तृतीया चैव माघस्येति के
ष्यतेषो तु तृतीया चैत्रमासस्य
तिलिखिते। अत्र पाठद्वये श्री
पतिरत्नमालायां। मत्स्ययुक्ति
शुक्लनवमी द्वादश्यष्टमस्थौ
तृतीया चेति पाठद्वये तृतीयैव
ग्राह्या श्रीदत्तोप्येवं। माघसप्त
म्या श्राद्धत्वे सौरागमेऽपि। श्री
कपद्धैः सवदैवैः ईवास्तत सचं
दैनैः। षष्ठ्यांताविधिनाचीर्णेद
घादादित्यहृच्ये। साचेऽप्य
फाल्गुने वापि भवेद्धैमाघसप्त
मी। साकरीतिचयत्प्राक्कंतत्
प्रायोवृत्तिदर्शनात्। अष्टांग
विधिना। योऽष्टांगमर्घ्यमाघस्य
भानो मूर्ध्नि निवेदयेत्। ताम्र
पात्रेश्चाष्टोनेन पुण्यं दशगुणं
स्मृतं। इति विष्णुपुराणीयेन।
आदित्यपुराणे। कृत्वा षाशिवि
शेषेण यत्कर्म विहितं नरैः॥
देवं वाप्यथवापैत्रं तदन्यथा
मिहश्यते। अद्यैमेवस्तु। जननी
सर्वभूतानां सप्तमीसप्तसप्तिके
सप्ताहृतिके देवि नमस्तेर
विमंडले। प्रणामसंत्रस्तु। सप्त
सप्तिवहे प्रीत सप्तलोकप्रदीप
न। सप्तम्याहि नमस्तुभ्यं नमोऽ
नंताय वेधसे। सप्ति रक्षः॥
इति तिथ्यादितत्त्वं। सप्तमीव्र
तविशेषा यथा। ब्रह्मोवाच॥
भगवान्भवसंसारसागरोत्तार
कारके किंचिद्व्रतं समाचक्ष्व
स्वर्गारोग्यसुखप्रदे। श्रीभगवानु
वाच। सौरधर्मं प्रवक्ष्यामिनाम्ना
कल्याणसप्तमी। विशोकसप्त
मीतद्वत् फलदां पापनाशिनी
शर्करासप्तमीपुण्यातथाकम
लसप्तमी। मंदारसप्तमीपुण्या
तथैव शुभसप्तमी। सर्वाःसर्व
फलाःप्रोक्ताः सर्वदेवर्षिपूजि
ताः। विधानमासांवक्ष्यामियथा
वदनुपूर्वशः। यदातुशुक्लसप्त॰

सा मादित्यस्य दिने भवेत्।
सा तु कल्याणिनी नामविज॰
यात निगद्यते। अस्यां काल॰
इतिकर्त्तव्यता च मत्स्यपुराणे
६९ अध्यायावधि ७५ अध्यायप
र्यन्ते द्रष्टव्ये॥ सा सूर्य्यमू
र्त्तिप्रकाशिकातिथिः। यथा
एव शुक्लस्तदा देवैः सौम्या
मूर्त्तिं मयाकरोत्। प्रकाशत्वे
गतास्तुश्च देवतानां महाप्रभः
एतत्सर्वं सुराणांतु दहते॰
शामितंपुरा। सप्तम्याखलु
सूर्य्येण मूर्त्तिश्च कृतवान्सुवि
इति वाराहे सूर्य्योत्पत्तिनामा
ध्यायः॥
सप्तरक्तः स्त्री शरीरस्य रक्तव
र्णसप्तावयवाः। तेचहस्तपादत
ल नेत्रांतर तालुकाधर जिह्वा
नखाः। यथा। पाणिपादत॰
लौरक्तौ नेत्रांतर नखानिच।
तालुकाधर जिह्वाश्च सप्तर
क्तंप्रशस्यते। इतिसामुद्रकं।
सप्तर्षयः पुंभूम्नि सप्तसंख्यक
ऋषयः। तेषां नामानि। यथा
मरीचिः १ अत्रिः २ अंगिराः ३
पुलस्त्यः ४ पुलहः ५ क्रतुः ६
वशिष्ठः ७। इत्यमरः अपिच।
सप्तर्षिमंडलंतस्माद्दृश्यतेसर्वतो
दिवि। तत्र सप्तर्षयःसंतिविनियु
क्ताःप्रजासृजा॥ मरीचि रत्रिः
पुलहः पुलस्त्यः क्रतुरंगिराः॥
वशिष्ठश्च महाभागब्रह्मणो
मानसाः सुताः॥ सप्तब्राह्म॰
णा इत्येते उच्यंते ब्रह्मवादिभिः
संभूति रनसूयाचक्षमा प्रीति
स्सन्नतिः॥ अरुंधतिस्तथा
लज्जा तत्पत्न्यो लोकमातरः
एतासां तपसाचैतद्धार्य्यते भु
वनत्रयं॥ संध्यात्रयमुपासी
ना गायत्रीजपतत्पराः॥
तस्मिन्लोकेवसंत्येते ब्राह्म
णा ब्रह्मवादिनः॥ इतिपा
द्मेस्वर्गखंडे ११ अध्यायः॥
सप्तला स्त्री नवमालिका। इत्य
मरः। चर्मकषा। गुंजा। पा
टला। इतिमेदिनी॥
सप्तशती स्त्री सप्तशतिका। स
प्तानांशतानां समाहारः। इति
व्याकरणं। सप्तशतश्लोकात्मक
देवीमाहात्म्यं। चंडीति ख्याते।
यथा। अर्गलं कीलकंचादौप
ठित्वा कवचं ततः। जपेत् सप्त
शतीं चंडीं क्रम एष शिवोदि
तः। इत्यर्गलस्तोत्रं। अपिच॥



तेषाद्ये चरिताध्याये श्लोकाश्र
शीति स्मृताः। मध्यमध्ये चरित्रे
तु पंचाशैकसमन्विताः ॥
त्रयोऽध्याया स्मृतः सप्तचतुर्वेद
त्वेदकाः। अथोत्तरचरित्रे तु
षट्पञ्चाशत् श्लोकभाक्। अष्टौ
सेमाध्यायवतीगीता सप्तशती
स्मृता। इति नागोजीभट्टः॥
सप्तशलाकः पुं विवाहसमुद्धा
शुभदिनज्ञानार्थे तिर्य्यगूर्द्धं स
प्तरेखाविशिष्टचक्रविशेषः। य
था। कृत्तिकादि चतुःसप्तरेखो
र्द्धोपरिभ्रमन् ग्रहस्त्वेकवे
खोस्थो वेधः सप्तशलाकजः
सप्त सप्त विलिखेत् रेखिका
स्तिर्य्यगूर्द्धं मध्य कृत्तिकादिकं
लेखयेदभिजाता सप्तन्विते चै
करेखया खगेन विध्यते। वेधप
क्ष चतुर्थः शे श्रवणेद्धो लि
भिकाचतुष्के च। अभिजित् ने
क्षत्रचरे विज्ञेया रोहिणी वि
हा। त्रिभिकादंडः। यस्याः पा
णिः सप्तशलाकभिन्नः पापेरपा
पेरथवा विवाहे रक्ताम्बरेणैव
तु रोदमाना श्मशानभूमिं प्र
सदा प्रयाति। इति सप्तशला
कवेधः। इति ज्योतिस्तत्त्वे ॥

तच्चक्ररूपं यथा।

३ ४ ५ ६ ७ ८ ९

२ | १०
१ | ११
२७ | १२
२६ | १३
२५ | १४
२४ | १५
२३ | १६

२२ ० २१ २० १९ १८ १७

सप्तशिरा स्त्री नागवल्ली। इति
राजनिर्घण्टः ॥
सप्तसप्तिः पुं सूर्य्यः। इति हेम
चन्द्रः ॥
सप्तसागरः पुं महादानविशेषः
यथा। मत्स्य उवाच। अथातः सं
प्रवक्ष्यामि महादानमनुत्तमं।
सप्तसागरकं नाम सर्व्वपापवि
नाशनं। पुण्यंदिनमथासाद्य
कृत्वा ब्राह्मणवाचनं। तुला
पुरुषवत् कुर्य्यात् लोकेशावा
हनं बुधः। ऋत्विङ्मण्डपसंभा
रभूषणाच्छादकादिकं कारये
त्सप्तकुण्डानि काञ्चनानि विचक्ष
णः। प्रादेशमात्राणि तथारत्निमा
त्राणि वा पुनः। कुर्य्यात्सप्तपला
दूर्द्धं मासहस्राच्च शक्तितः ॥


संस्थाप्यानि च सर्व्वाणि कृष्णाजि
न तिलोपरि। प्रथमं पूरयेत्कु
ण्डं लवणेन विचक्षणः ॥ द्वि
तीयं पयसा तद्वत् तृतीयं स
र्पिषा पुनः। चतुर्थन्तु गुडेनैव
दध्ना पंचममेव च। षष्ठं शर्क
रया तद्वत् सप्तमं तीर्थवारि
णा। स्थापयेल्लवणस्यान्ते ब्र
ह्माणं काञ्चनं शुभं। केशवं क्षी
रमध्ये तु घृतमध्ये महेश्वरं॥
भास्करः गुडमध्ये तु दधिमध्ये
सुराधिपं। शर्करायां न्यसेल्ल
क्ष्मीं जलमध्ये तु पार्व्वतीं। स
र्व्वेषु सर्व्वरत्नानि धान्यानि च
समन्ततः। तुलापुरुषवच्छेष
मत्रापि परिकल्पयेत्। ततो
वारुण होमान्ते स्नापितो वेदपुं
गवैः। त्रिप्रदक्षिणमावृत्य मन्त्रा
निमानुदीरयेत्। नमो वः स
र्व्वसिन्धूनां आधारेभ्यः सनात
नाः। जन्तूनां प्राणदेभ्यश्च समु
द्रेभ्यो नमो नमः ॥ क्षीरोदका
ज्य दधि माधव लावणेक्षु
सारामृतेन भुवनत्रयजीवसं
घान्। आनन्दयन्ति वसुभिश्च
यतो भवन्त स्तस्मान्ममाप्य
घविघातमलं दिशन्तु। यस्मात्
समस्त भुवनेषु भवन्त एव तीर्थामराश्च
र सर्व्वमणिप्रतानं पापक्षयामृत
विलेपनभूषणाय लोकस्य बिभ्रति
तदस्तु ममापि लक्ष्मीः। इति ददाति
सोत्ररे संयुतान् शुचि रविस्मयवा
निह सागरान्। अमलकाञ्चन
नवरत्नमयानसौ पदमुपैति
हरे रमराहृतः। सकलपापवि
धौतविराजितेऽपि च पितामह
पुत्रकलत्रकैः। नरकलोकस
माकुलमप्यलं कुरु इति नेतु
मसौ शिवमन्दिरं। इति मत्स्य
पुराणे महादानानुकीर्त्तने स
प्तसागरप्रदानिको नाम २८९
अध्यायः ॥
सप्तसः स्त्री सप्तपुत्रप्रसूता। त
तपर्य्यायः। सुतवस्करा २ इति
शब्दरत्नावली ॥
सप्ताश्वपुङ्गवः पुं शनिग्रहः।
इति जटाधरः ॥
सप्तार्च्चिः[स] पुं अग्निः॥ चित्रक
वृक्षः। इत्यमरः। शनिग्रहः॥
इति हेमचन्द्रः। क्रूरचक्षुषि त्रि
इति मेदिनी। सप्तानामर्च्चि
षां नामानि सप्तजिह्वाशब्दे
द्रष्टव्यानि ॥

सप्ताश्वः पुं सूर्य्यः । अर्कवृक्षः ।
इत्यमरः ॥
सप्ताश्ववाहनः पुं सूर्य्यः । यथा
लोकसाक्षी त्रिलोकेशः कर्त्ता
हर्त्ता तमिस्रहा । तपनस्तापन
श्चैव शुचिः सप्ताश्ववाहनः ॥
इति शाम्बपुराणे सूर्य्यस्तोत्रे ।
सप्तिः पुं अश्वः । इत्यमरः ॥
सफरः पुं मत्स्यविशेषः । पुंटी
इति भाषा । शफयाना स्फुरति
पार्श्वेन गच्छतीति शफरी म
लीघादिः नदादित्वादीष् शोलि
शफरीशाख्या शाकट शिला
शारणशातपथ इत्युक्तभेदाञ्ज
लव्यादिः । दंष्ट्रादिरपीति केचि
त् शफरश्च । इत्यमरटीकायां
भरतः ॥
शफरी स्त्री मत्स्यविशेषः पुंटी
इति भाषा । इति भरतः । तत्
पर्य्यायः । शफरी १ प्रोष्ठी २
इत्यमरः । शफरः ३ श्वेतको
लः ४ इतित्रिकाण्डशेषः ॥
सफलं त्रि फलविशिष्टे । तत्
पर्य्यायः अमोघं २ इति ज
टाधरः ॥
सबलः त्रि सैन्ययुक्तः । साम
र्थ्यवान् । यथा सबलेच गृहे

पापे दिनमात्रं प्रवर्त्तते । मध्ये
बले तथा मासे वर्षे विघात
शबले । इति पंचस्वरा ॥
सबलिः पुं विकालः । इति
हेमचंद्रः ॥
सबाधः त्रि पीडायुक्तः । निषेध
युक्तः । बाधया बाधेन च सह
वर्त्तमानो यः इति बहुव्रीहिस
मासनिष्पन्नः ॥
सब्रह्मचारी पुं परस्परैकब्रह्म
व्रताचारः । इत्यमरः । एकस्माद्
गो ब्रह्मणो वेदाय अर्थात् वेदा
ध्ययनाय व्रतं अभि ब्रह्मचर्य्या
ख्यं आचरंति ये तेऽन्योन्यं सब्र
ह्मचारिण उच्यंते उपचारात्
ब्रह्माध्ययनार्थं व्रतमपि ब्र
ह्म । समानं ब्रह्म चरंतीति ग्रह
दित्वाणिनि ज्योतिर्जनपदेत्या
दिना समानस्य सभावः ब्रह्म
चारिणः एकब्रह्मव्रताचारा ।
इतरे एकस्माद्ब्रह्मणो ब्रह्मार्थे
ते व्रत माचरंतीति तदर्थेच
तदर्थ्या विगृह्णंतीति परे । स
ब्रह्मचारी भिन्न गुरुशिष्य इति
हारलोलेति भयनानंदः । इति
भरतः ॥
सभर्तृका स्त्री विद्यमानपतिका

तत्पर्य्यायः पतिवत्नी १ ।
इत्यमरः सधवा ३ सनाथा ४
इति जटाधरः ॥
सभा स्त्री सहभांति अत्र । मज
लिस इति पारसीकभाषा । पं
चायित इति हिंदीभाषा । मिटिं
इति इंगरेजी भाषा । तत्प
र्य्यायः । समज्या २ परिषत्
३ गोष्ठी ४ समितिः ५ संसत् ६
आस्थानी ७ आस्थानं ८ सदः ९
समाजः १० इत्यमरः पर्षत् ११
इति जटाधरः । तल्लक्षणादि
यथा । मनुः यस्मिन् देशे नि
षीदंति विप्रा वेदविद स्त्रयः
राज्ञः प्रतिकृतो विद्वान् ब्राह्मण
स्तां सभां विदुः ॥ विहत से
हेतावपि सभापर्य्याय परिष
च्छब्द माह सएव । त्रैविद्यो है
तुक स्तर्की निरुक्तो धर्मपाठ
कः । त्रय श्चाश्रमिणः पूर्वे परि
षत् स्याद्दशावराः । त्रैविद्यः त्रि
वेदपारगः । हैतुकः सद्युक्ति
व्यवहारी । अतएवामरसिंहः
सभा सदसि सभ्येच । अग्रेता
दीप्तिः प्रकाशो ज्ञान मिति ।
यावत् तया सह सात्तात् पर
स्परया वा वर्त्तते इति सभा

कात्यायनः । कुल शीलवयो
वृत्त वित्तवद्भि रधिष्ठितं ॥
वणिग्भिः स्यात् कतिपयैः कु
लवृद्धै रधिष्ठिते । सद इति शे
षः । इति व्यवहारतत्वं ॥
सामाजिकः । वृत्ते । गृहे । इति
मेदिनी । समूहः । इति हे
मचंद्रः ॥ सभायां एकाकि
गमननिषेधो । यथा । नैकस्मि
रेत् सभां विप्रः समवायश्च
वर्जयेत् । इति कौर्म्मे उपविभा
गे १५ अध्यायः ॥
सभाज न क सेवने । प्रीतौ ॥
दर्शने । इति कविकल्पद्रुमः
असभाजत ॥ इति दुर्गा
दासः ॥
सभाजनं क्ली गमनागमना
दिसमये सुहृदादेः वार्त्तालिंग
नारोग्यप्रश्नस्वागतादिना नंदो
त्पादनं । तत्पर्य्यायः । आनंदनं २
आप्रच्छनं ३ इत्यमरः ॥
दुनदि संज्ञा पि सभाजनकं सेव
नप्रीति दर्शने ष्वेको शालीक्ष
अनट् । तद्धतिः एकदृति ष्वा
उ. एवं आलिंगनादावितिसुभ
तिः । गमनसमये सुहृदः सा
लिंगप गमनानुज्ञाग्रहणं । आ



गतस्य वा स्वागताद्येरपादिष्ट
वक्ता श्रावेदन मिति रमानाथः
इतिभरतः ॥
सभापतिः पुं सभाजाधिपतिः
इतगृहस्वामी इतिकेचित् ॥
सभासत् पुं सभायांसीदति उ
सभासद् पविशतियः । तत्पर्य्या
यः । सभास्तारः २ सभ्यः ३
सामाजिकः ४ इत्यमरः । प
रिषद्वलः ५ पर्षद्वलः ६ पारि
षद्यः ७ पार्षदः ८ परिसभ्यः ९
इति शब्दरत्नावली । तल्लक्षण
दि यथा । कात्यायनः । सभ्ये
नावश्यवक्तव्यं धर्म्मार्थसहितं
वचः शृणोति यदि नो राजा
स्यात्तु सभ्य स्तदानृणः । सभ्याः
सभायां साधुः । तथा विधानाह
याज्ञवल्क्यः । श्रुताध्ययनसम्प
न्नाः कुलीनाः सत्यवादिनः । रा
ज्ञा सभासदः कार्य्याः शत्रौ
मित्रेच येसमाः । श्रुताध्ययन
संपन्नाः धर्म्मशास्त्रज्ञाः । कुली
नाः शंकरादिदोषशून्या माता
पितृवंशपापरस्पराकाः । एवंभू
ताः सभासदः सभायांयथा सी
दंति तथा दान मान सत्कारै
राज्ञा कर्त्तव्याः । इतिव्यवहार-
तत्वे । अन्यच्च । समः शत्रौच
मित्रेच धर्म्मशास्त्रविशारदः ।
विप्रमुख्यः कुलीनश्च धर्माधि
करणे भवेत् । कार्य्या स्तथा
विधास्तत्र द्विजमुख्याः सभास
दः । इति मत्स्यपुराणे २१५ अ
ध्यायः । बृहस्पतिस्तु सप्तपंच
त्रयो वा सभासदो भवंतीत्याह
लोक वेदज्ञधर्म्मज्ञाः सप्तपंच
त्रयोपिवा । यत्रोपविष्टाविप्राः
स्युः सा यज्ञसदृशी सभा । किं
च । सप्राड्विवाकः सामात्यः ।
सब्राह्मण पुरोहितः । ससभ्यः
प्रेक्षको राजा स्वर्गेतिष्ठति-
धर्म्मतः । तत्र ब्राह्मणाअनि
युक्ताः सभासदस्तु नियुक्ता-
इति भेदः । तत्र नियुक्तानां य
थावस्थितार्थकथनेपि यदि रा
जान्यथा करोति तदासौ नि
वारणीयोन्यथा दोषः । उक्त
ञ्च कात्यायनेन । अन्यायेना
पितंयांतं येनुयांति सभासदः
तेपि तद्भागिन स्तस्माद्बोध-
नीयः स तै र्नृपः ॥
इति मिताक्षरा ॥
सभास्तारः पुं सभासद् ॥
इत्यमरः ॥

सभिकः पुं द्यूतकारकः । इत्य
मरः । हे सहियार इतिख्यात
सभाद्यूत मस्याश्रयत्वेनास्ति
सभिकः विकारसेचेति स्मिकः
सभायुते सभागृह मिति रुद्रः
द्यूतं कारयति द्यूतकारकः
एयन्तात् स्वार्थे कः । इतिभर
तः । तत्पर्य्यायः । दुरोदरेचानि
र्द्रेस्य द्यूतकारक लग्नकाः ।
सभिकः मतिभ्र श्वेति । इति
जटाधरः ॥
सभीकः पुं द्यूतकारकः । इ
तिशब्दरत्नावली ॥
सभोचितः पुं पंडितः । इति
धनंजयः । सभायोग्ये त्रि. ॥
सभ्यः पुं साधुः । सभासद् १
इत्यमरः । सभिकः ॥ इति
जटाधरः ॥
सभ्यः त्रि प्रत्याषितः । इति-
जटाधरः । सभासंबंधीच ।
सम त्य समार्थः । प्रकृष्टार्थः
संगतः शोभनः । इतिशब्दर
त्नावली । सम्भयः । इति-
हेमचंद्रः । चतुर्थोपसर्गः ॥
इतिव्याकरणं । अस्यार्था विशे
षाः संप्रादृष्टव्याः ॥
समः त्रि सर्वं । समानं । इत्य
मरः । साधुः । इति मेदिनी ।
समः पुं राशिविशेषाणां सं
ज्ञाविशेषः । तेतु राशयः वृष
कर्कट कन्या वृश्चिकमकर
मीनाः । यथा । क्रूरोथ सौम्यः
पुरुषोङ्गनाच ओजोथयुग्मं
विषमः समश्च । चर स्थिरद्व्या
त्मक नामधेया मेषादयोऽ
मी क्रमशः प्रदिष्टाः । इति ज्यो
तिस्तत्वे ॥ मानस्य प्रकारवि
शेषः । सतुयदा गीतवाद्ययो
स्तालः गायकस्य हस्तपादा
दि चालनंच एकदासमभावे
नपतति तदा भवति । इति सं
गीतशास्त्रे । वर्गमूलानयना
र्थं अंकोपरिदत्त रेखा
विशेषः । यथा । त्यक्त्वान्त्या
द्विषमात् कृतिं द्विगुणयन्
मूलंसमे तद्धृते त्यक्त्वा लब्धकृ
तिं तदाद्यविषमाल्लब्धं द्विनिघ्नं
न्यसेत् । इत्यादिलीलावती
समकन्या स्त्री विवाहोपयुक्ता
इतिधनंजयः । सदृशकुमारीच
समकोलः पुं सर्पः । इति त्रि
काण्डशेषः ॥
समक्तः त्रि गमनकर्त्ता । सप्त
वंकप्रनच्यपाताःक्तप्रत्ययेन नि

स्यन्तः इतिमुग्धबोधव्याकरणं॥

समगंधकः पुं कृत्रिमधूपः। यथा। कृत्रिमधूपे भक्तकरोतिरिःस्या त्समगंधकः। इतिशब्दचंद्रिका॥

समगंधिकं क्ली उशीरं। इतिराजनिर्घण्टः। तुल्यगंधयुक्ते त्रि॥

समग्रः त्रि सकलं। पूर्णं। इत्यमरः॥

समंगा स्त्री मंजिष्ठा। इत्यमरः। लज्जालुलता। वराहक्रान्ता। इतिरत्नमाला वाला। इति राजनिर्घण्टः॥

समचित्तं क्ली एकविषयकांतःकरणवृत्तिः। यथा। मनोवृत्तिश्च चित्तञ्च ते ह्यनीप्राणःस्मारी र्णिषां। एकचित्तं मनःकृत्वा ज्ञानेनपश्यलोचने। समचित्ते प्रपद्यन्ते न ते लिप्यन्तिमानवाः। सर्वभूतस्थिताभ्यन्तराः पेयापेयेनवेवच। समचित्ते मयि यदि तदा तस्य न चान्यथा। इति वाराहे शुद्धकसंमाहात्म्यवर्णने नामाध्यायः॥

समजं क्ली वनं। इतिमेदिनी॥

समजः पुं पशुसमूहः। इत्यमरः। मूर्खसंहतिः। इति शब्दरत्नावली॥

समज्ञा स्त्री कीर्तिः। इत्यमरः। समाज्ञा समज्ञा समाख्याइतिच पाठः। इतिभरतः॥

समज्या स्त्री सभा। इत्यमरः॥ कीर्तिः। इति तट्टीकायां रायमुकुटः॥

समंजसं क्ली उचितं। इत्यमरः॥

समंजसः त्रि समीचीनः। इति त्रिकाण्डशेषः। अभ्यस्तः। इति जयपालः॥

समण्डः पुं गंडीरः। इतिशब्दरत्नावली हारावलीच॥

समता स्त्री समत्वं। समस्य भावः इत्यर्थे समशब्दात् तल्प्रत्ययेन निष्पन्ना॥

समतिरिक्तं क्ली सम्यगधिकं सम्यक्प्रकारेण तिरिक्तं। इति प्रादितत्पुरुषसमासनिष्पन्नं॥

समत्रयं क्ली समभागा हरीतकी नागर गुडं। इतिराजनिर्घण्टः॥

समदर्शी त्रि सर्वभूतेषु तुल्यदर्शनशीलः। यथा। विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पंडिताः समदर्शिनः। इति श्रीभगवद्गीता॥

समदृष्टिः स्त्री सर्वत्रतुल्यदर्शने

यथा। अरौ रेवस्तरवेच विप्रेन्द्र या दृष्टिर्वर्तते सदा। तथा शत्रौ च मित्रे च समदृष्टिश्च सा स्मृता। इति पाद्मे क्रियायोगसारे १८ अध्यायः। समदर्शिनि त्रि। समधिकः त्रि प्रथिकः। तत्पर्यायः॥ अतिरिक्तः २ इत्यमरः॥

समंतः पुं सीमा। सम्यक्प्रकारेण अंतः इति तत्पुरुषसमासनिष्पन्नः॥

समंततः अ चतुर्दिगभिव्याप्तः तत्पर्यायः। परितः २ सर्वतः ३ विष्वक् ४। इत्यमरः। समन्तात् ५। इति शब्दरत्नावली॥

समंतदुग्धा स्त्री स्नुहीवृक्षः। इत्यमरः॥

समंतभद्रः पुं बुद्धः। इत्यमरः॥

समंतभुक् पुं अग्निः। इति त्रिकाण्डशेषः॥

समंतात् अ समंततः। इति शब्दरत्नावली॥

समन्युः पुं शिवः। इतिकेचित्। क्रोधयुक्तश्च॥

समन्वितः त्रि संयुक्तः। यथा। विप्रस्य पतुतंपांतस्पर्शात्तदपदंतथा। कलेवरं समायुक्तं रस भाव समन्वितं। इति तिथ्यादितत्त्वं॥

समपदं क्ली धन्विनां पादयोस्तुल्यरूपतया धारणं। इत्यमरटीकायां भरतः॥

समपदः पुं रतिबन्धविशेषः यथा। योषित्पादौ हृदि स्थाप्य कराभ्यां पीडयेत् स्तनौ। यथेष्टं ताडयेद्यानि बंधः समपदः स्मृतः। इति रतिमञ्जरी स्मरदीपिकाच॥

समपादं क्ली धन्विनां पादयोस्तुल्यरूपतया धारणं। इति हेमचंद्रः॥

समभिव्याहारः पुं सहितः। यथा। घटमानय इत्यत्र भवति चाव्यवहित पूर्ववर्तिना तत्तत्समभिव्याहार संबंधेन घटपदनिष्ठस्यानुस्वारपदस्याव्यतिरेकप्रयुक्तो घटवत् कर्मत्व मिति भेदान्वय बुद्ध्याभाव। इति कार्यान्वयवादे घटपदस्यानुस्वारपदत्व साकांक्षा एवं विनियमनाविरहादव्यवहितोत्तरवर्तितारूप समभिव्याहार संबंधेन अनुस्वारपदनिष्ठस्य घटपदस्याव्यतिरेकप्रयुक्तोपि घटवत्।

कर्म्मत्वमिति भेदान्वयबुद्धा
भावश्चत्वनुस्वारपदस्य च्छेदपदव
त्त्व मपि तादृशान्वयबोधे आ
कोस्ता । इति आकांक्षाग्रन्थे म
थुरानाथः ॥
समभिव्याहृतः त्रि सहोच्चरितः
सहितः । यथा । निमित्तानां
उत्पत्तिविधिसमभिव्याहृतनि
यतानां । इति तिथ्यादितत्त्वं
समभिहारः पुं पौनःपुन्ये ।
भृशार्थे । इति मेदिनी ॥
समभूमिः स्त्री समानस्थानं ।
तत्पर्य्यायः । आजिः २ इति
जटाधरः ॥
समम् अ सहितं । यथा । सा
हैत्वा साकं सत्रं समं सह । इत्यमरः
समयः पुं कालः । शपथः ।
आचारः सिद्धान्तः संवित् । इत्य
मरः । क्रियाकारः । निर्द्देशः ।
संकेतः । भाषा । इति मेदिनी
सम्पत् । नियमः । अवसरः ।
इति हेमचन्द्रः ॥
कालप्रशंसा यथा । परशु
राम उवाच । राजेन्द्रोभिहसम
दंकुरुसाहसमर्थकं । कालभे
देनयो नृणां कालभेदेषराजे
यः । काले सिंहः सृ-
गालेच शृगालः सिंहमेव च ।
कालेव्याघ्रं नरो हन्ति राजेन्द्र
हरिणस्तथा । महिषं मक्षिका
काले गरुडश्च यथोरगः । किं
करः सोऽपि राजेन्द्र काले रा
जा च किंकरः । देवाश्च मनवः
काले काले राजा भविष्यति
तिरोहिताच प्रकृतिः काले-
श्रीकृष्णविग्रहे । भविष्यति म
हः सर्व्वे त्रिलोकस्था श्चराचराः
सर्व्वे काले लयं यान्ति कालो
हि दुरतिक्रमः । कालस्य कालः
श्रीकृष्णः स्रष्टुः स्रष्टा यथे-
श्वः संहर्त्ता चैव संहर्त्तुः पातुः
पाता परात्परः । महास्थूलात्
स्थूलतमः सूक्ष्मात् सूक्ष्मतमः
कृशः । परात्परः परमः कालः का
लश्च कालभेदकः । इति ब्रह्मवैवर्त्ते
गणपतिखण्डे ४० अध्यायः ॥
अपि च । कालः करोति संसारं ।
वेष्टनो बन्धुभिः समं । कालः क
रोति विच्छेदं विरोधं प्रीतिमे
व च । कालः सृष्टिं च कुरुते-
कालश्च परिपालने । कालः क
रोति सानन्दं कालः संहरते प्र
जाः । सुखं दुःखं भयं शोकं
जरां मृत्युं च जन्म च । सर्व्वकर्म्मा

नुरोधेन काल एव करोति च ।
सर्व्वकालकृते मात विस्मयेन
व्रजं व्रज । इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखण्डे ५० अध्यायः ॥
अथ कालनिरूपणं । आनन्दन
न्दनेश्वर परिपूर्णतमस्य च । श्रु
णु कालगतिं वत्स मदीयज्ञान
गोचरां । नराणां च पितॄणां च
सुराणां चापि ब्रह्मणः । नागा-
णां राक्षसादीनां तथैवायं च पुत्र
क । कथयामि निगूढार्थं साव
धानं निशामय । सर्व्वस्माच्च परं
स्थूलं सर्व्वाधारो महान् विराट् ।
यस्य लोमसु विश्वानि चासंख्या
नि च तानि च । सर्व्वस्माच्च परं सू
क्ष्मं परमाणुं निशामय । कालाव
भावात्मकं सर्व्वस्मात् ह परमोऽपि
तः परमः महिषोषाणामनेकोः
गुणस्थूल यथा । परमाणुः सविते
र्यान्तराणामेकदेशमो यथा । पर
माणुद्वयेनाणुः त्रसरेणुस्तत्रय
यः । त्रसरेणु त्रिकेणापि त्रुटिरु-
च्यते मणीषिभिः । वेधस्तु त्रुटि
तैनैव त्रिवेधेनैव लवस्तथा त्रिलवेन
निमेषश्च त्रिनिमेषेण च क्षणः का
ष्ठा पञ्चक्षणेनैव लवस्तु दश काष्ठ
या । लघुपञ्चदशे दण्डस्तत्प्रमा
णं निशामय द्वादशार्द्ध पलो
न्माच चतुर्भिस्तु तैर्गुलैः । स्वर्ण
माषैः कृतच्छिद्रं यावत् प्रच्छ
जलप्लुतं । दण्डद्वयेन च मुहूर्त्तः षष्टि
दण्डात्मिका तिथिः । तदष्टभागाः
प्रहाराः प्रमाणज्ञ निरूपणाच
तुर्भिः प्रहरै रात्रि श्चतुर्भि र्दिन
मेव च । तिथिपञ्चदशेनैव पक्ष
मानं प्रकीर्त्तितं पक्षद्वयेन मा
सः स्यात् शुक्ल कृष्णाभिधेन च
ऋतुर्म्मासद्वयेनैव वत्सरः षड्ऋतुकेन
वत्सरः । वसन्त ग्रीष्म वर्षा
श्च शरद्धेमन्तशीतकं । ऋतवः पञ्च
विधा ज्ञेयाः कालविद्भिर्निरू
पिताः । संवत्सरः प्रवत्सरश्च
इद्वत्सर एव च । अनुवत्सरो
वत्सरोऽभिधितिकालविदो वि
दुः । अग्रे हि षट्क मासैश्चा
त्रासम्भृष्णोहद्वव । वैशाखो ज्ये
ष्ठ आषाढः श्रावणो भाद्रप
दश्च । आश्विनः कार्त्तिको मार्गः
पौषो माघस्तु फाल्गुनः । चैत्र
स्तु चरमो ज्ञेयो वर्षशेषो निरूपि
तः । वसन्ते मुच्चैः शाखा मासो
द्वयेन कीर्त्तितः । ज्येष्ठाषाढ
द्वयेनैव ग्रीष्मस्तु परिकीर्त्तितः
वर्षा श्रावण भाद्रेणाश्विने

कार्त्तिके शरत्। मार्गे पौषेच
हेमंतः शिशिरो माघ फाल्गु
ने। अयूनस्तु चायने द्वे चैवोत्तरे
दक्षिणायने। माघादिषट्कें
नियतं उत्तरायणमीरितं श्राव
णादि मासषट्कं दक्षिणायनमे
वच माघादाषाढपर्यन्तं दिनह
द्धिं क्रमेण वै। नक्तं हृद्धि श्रावणा
द्यं पौष पर्यन्तमेवच ॥ प्रति
पदः पूर्णिमांतः शुक्लः पक्षः प्र
कीर्त्तितः। पूर्णिमायाः प्रतिप
दः अमावास्यांतएवच। कृष्णप
क्षस्तु विज्ञेयो वेदविद्भिर्निरू
पितः। द्वितीयाच तृतीयाच च
तुर्थी पंचमी तथा। षष्ठीच स
प्तमी चैव ह्यष्टमी नवमी तथा। द
शम्येकादशी चापि द्वादशीच
त्रयोदशी। चतुर्दशी कुहूर्याव
दिनं तु गणनं स्मृतं। अश्विनी
भरणीचापि कृत्तिका रोहिणी
तथा। मृगशिरा स्तथार्द्रा च नक्ष
त्रे द्वे पुनर्वसुः। पुष्याश्लेषा मघा चै
व पूर्वा चोत्तरफल्गुनी। हस्ता चि
त्रा तथा स्वाती विशाखा चानुरा
धिका। ज्येष्ठा मूला तथा ज्ञेया
पूर्वाषाढोत्तरा तथा श्रवणाप्य
भिजिच्चैव धनिष्ठा च प्रकीर्त्तितः

ततःशत

भिषा ज्ञेया एवं भाद्रपद स्तथा।
तथोत्तरस्तु विज्ञेया रेवती चरमा
स्मृता। अष्टाविंशच्च नक्षत्रं कल
त्रं शशिनोद्भव। क्रमेण तानि भिः
सार्द्धं च चंद्रः क्रिडति नित्यशः। स
प्तविंशति नक्षत्रं कलत्रं च ख्यातो
ख्यातं अभिजिच्छ्रवणक्षा
या तेनाष्टाविंशतिः स्मृता।
पक्षदाच मघो चंद्रो रोहिण्या
रामयासह रेमे दिवानिशं दृ
ष्ट्वा श्रवणाच चकोपसा। क्रो
धो दृष्टाच चंद्राय ययौ ताता
तिके भिषा। ततः पितृस्मानीय
साप्रचकेविभागकं वभूव तेन न
क्षत्रं अभिजिन्नामकं परा। एतत्
स्फुतं कलयुगाच्छतस्मृगे चपर्व
ते। नक्षत्रं कथितं तस्तस्तिष्यांश्
मति नित्यशः ॥ योगांच कर
णांचैव मद्वक्रेण निशामय
विष्कंभः प्रीतिरायुष्मान् सौ
भाग्यः शोभनस्तथा। अतिग
ण्डः सुकर्माच धृतिः शूलस्तथै
वच। गण्डो वृद्धि ध्रुवश्चैव व्याघा
तो हर्षण स्तथा। वज्रश्चासृग्व्य
तीपातो वरीयान् परिघः शिवः
सिद्धः साध्यः शुभः शुक्लो ब्रह्मेन्द्रो
वैधृति स्तथा। कीर्त्ति ॥

तस्तु योगागणः करणं श्रूयतां
मिति। ववश्च वालवश्चैव कौल
वस्तैतिल स्तथा। गरश्च वणिज
श्चापि विष्टिश्च शकुनिस्तथा। च
तुष्पाच्चापि नागश्च किंस्तुघ्न
इति कीर्त्तितं। नराणांचापि मा
सेन पितृणांच दिवानिशं। शुक्ले
तेषां दिनं चापि कृष्णे नक्तं प्रकी
र्त्तितं। वत्सरेण नराणांतु सुरा
णांच दिवानिशं। दिनं तेषामु
त्तरेणनक्तंच दक्षिणायने। म
न्वंतरेतु दिव्यानां युगानामे
कसप्ततिः। मन्वायुः परिमितं
शक्रस्यायुः प्रकीर्त्तितं। पंचविं
शतसहस्रंच तथा पंचशते पंच
तत्रसूर्यगतिर्नास्ति शक्रपातान्
सारतः। युगानांषष्टिसधिकं नरा
णाञ्च प्रकीर्त्तितं। कालेनैते
न शक्रस्य पतनञ्च मनोस्तथा।
चतुर्दशेंद्रपतिनेकालेन ब्रह्म
णो दिनं। एतेनैवच तत्तुल्य
कृष्णानु दिवानिशं। एवं तेषां
निपतनं वोद्धव्यं दिवानिशं
तत्रसूर्यगतिर्नास्ति शक्रपा
तानुसारतः। दिवानिशांच
जानंति ब्रह्मलोकनिवासिनः
दंडद्वये तत्र पले शक्रपा।


तेन तत्पले। एवं त्रिंशद्दिनैर्ने
र्वधात्मासः प्रकीर्त्तितः। अहो
द्वादशभिर्मासैर्वत्सरस्य शता
युषः। ब्रह्मणः पतनेनैव निमे
षः श्रीहरेरपि। यातः पातानु
सारेण वैकुंठेन दिवानिशं॥
तत्र सूर्यगतिर्नास्ति चैवं गो
लोकतः स्मृतं। वैकुंठवासिनः
सर्वे तेन ज्ञानंत्यहर्निशं। चंद्र
स्यापि ग्रहाणांच गतिर्नास्तीति
तत्रवै। चक्रं नैव भ्रमत्येवराः
शीना मिच्छयाहरेः। दिनंचते
जसादीप्तं कृष्णस्य परमात्मनः
नक्तं तेजो विहीनञ्च हरेश्च मे
दिंगते। एवं कालगतिस्तत्र
विष्णुलोके स्थिसंतते। काल
वरूपो भगवान् परमात्मा निरा
कृतिः। चैवसूर्यगतिर्नास्ति
पातालेषु च सप्तसु। तद्वासिन
श्च जानंति शक्रतेन दिवानिशं
स्थितेच सर्प्पनागानां मणिज्यो
तिर्नित्यशः। संख्याद्यादी मम
ग्रेश्चशा विश्वतमसाहृता ॥ का
लेतास्मी प्रमाणेन जानंति तन्नि
वासिनः। यथाभुवि तथा तत्र
परिमाणं प्रकीर्त्तितं ॥ कृतत्रे
ताद्वापरं च कलिश्चेति चतुर्युगं

दिव्यैर्द्वादशसाहस्रैर्वत्सरैस्त्रे
पि सम्मिते। अष्टौ शतान्यप्य
धिके सहस्राणां चतुष्टये।
दिव्यैर्वर्षैः कृतयुगं कालवि
द्भिर्निरूपितं। अष्टाविंशत्सहस्रा
ण्यप्यधिकं परिमाणकं लक्षा
णां च सप्तदश तन्मानं परिकी
र्तितं। अधिकं षट्शतान्येव सह
स्राणां त्रयं तथा दिव्यैर्वर्षैस्त्रे
तेति वत्सकालविदो विदुः।
षण्णवति सहस्राणि लक्षैर्द्वाद
शभिः सह। तन्मानं वर्षैस्त्रेतेति
कालविद्भिः प्रकीर्तितः। चतुष्टये
शतान्येवाप्यधिके द्विसहस्रके
वर्षैर्दिव्यैर्द्वापरं च कालज्ञैः परि
कीर्तितं। चतुःषष्टिसहस्राणि
लक्षैरष्टभिरेव च। तन्मानं वर्षै
र्द्वापरं च कालज्ञैः परिकीर्तितं।
अधिके द्विशते चैव दिव्यवर्षस
हस्रके। परिमिते कलियुगं त
त्प्राज्ञैः प्रकीर्तितं। द्वात्रिंश
च्च सहस्रैश्च चतुर्लक्षैस्तन्मान
कं। वर्षैस्त्रेति कलियुगं चकार
कालकोविदः लक्षैस्त्रिचत्वारिं
शद्भिः सह विंशतिसहस्रकैः।
तन्मानं वर्षैः कालज्ञैर्वत्समेव
चतुर्युगं। इति तेकथितं वत्स

कालसंख्यानिरूपणं। यथाश्रु
तं यथाज्ञानं गच्छ वत्स हरेः पुरं
इति ब्रह्मवैवर्ते श्रीकृष्णजन्म
खंडे राधोद्धवसंवादे कालनि
रूपणं ९९ अध्यायः। अपि च
मार्कण्डेय उवाच। निमेषो नाम
कालोयो नेत्रोन्मेषविलंबितः
ते ह्यष्टादशभिः काष्ठा काष्ठा
नां त्रिंशता कला। कलाभि
स्त्रिंशतीभिस्तु क्षणाख्यः परि
कीर्तितः क्षणैर्द्वादशभिः प्रोक्तो
मुहूर्तस्तैस्तु त्रिंशता। मानुषः
स्यादहोरात्रः पक्षस्ते दश पंच च
पक्षाभ्यां मानुषो मासः पितॄणां
तदहर्निशं। मासैर्द्वादशभिर्व
र्षं देवानां तदहर्निशं। कृष्ण
पक्षः पितॄणां तु कर्मार्थं दिवसो
मतः। स्वप्नार्थं शुक्लपक्षस्तु
रजनी परिकीर्तिता। देवानां
तु दिनं प्रोक्तं षण्मासा उत्तराय
णं। रात्रिः स्वप्नाय देवानां ष
ण्मासा दक्षिणायनं। द्वाभ्यां
द्वाभ्यां तु मासाभ्यामर्कजाभ्यामृ
तुः स्मृतः ऋतुभिस्त्र्ययनं प्रोक्तं
त्रिभिस्तस्माद्द्वयं मतं। ऋतुभि
र्वत्सरः षड्भिस्तस्य संख्याथ
पृथक् पृथक्। चैत्रादि युगलैः स

स्ता तैस्तैः षड्भिर्द्विजोत्तमाः
वसंतश्चैत्रवैशाखौ ग्रीष्मो
ज्येष्ठः शुचिस्तथा। प्रावृट्
नभो नभस्यौ तु शरदप्यारि
शकीर्तितो। सहः पौषौ च हे
मंतः शिशिरो माघफाल्गुनौ
षडिमे ऋतवः प्रोक्ताः यत्रा
दौ विहिताः पृथक्। तस्या
मानेन दशभिः लक्षैः सप्तभि
रुत्तरैः। साष्टाविंशतिसाहस्रै
र्मानं कृतयुगस्य च। संध्या च
तुः शतानीह वर्षाणां संतवाल
तः। संध्यांशश्च तथा प्रोक्तः स
दंतर्गत इष्यते। त्रेता द्वादशभि
र्लक्षैर्मानुषैर्वत्सरैर्भवेत्। ष
ण्णवत्या सहस्रैश्च संध्या च स्या
त्शतत्रयं। शतत्रयं तु संध्यां
श स्तदंतः परिकीर्तितः चतुः
षष्टि सहस्राणि लक्षाण्यष्टौ
प्रमाणतः। भवेद्युगं द्वापरा
ख्यं तेषु संध्याशतद्वये शतद्व
यं तु संध्यांशो स्तदंतर्गत इष्यते
द्वात्रिंशत्तु सहस्राणि चतुर्लक्षा
णि वै कलेः। संवत्सरैर्भवेन्माने
संध्यैकं प्रोच्यते शतं। वत्सरा
णामेकशतं संध्यांशश्च तदंत
रे। एवं कृतञ्च त्रेता च द्वा

परश्च तथा कलिः। मानुषेण
प्रमाणेन भवेद्युगचतुष्टयं त्रि
चत्वारिंशता लक्षैर्मानेन चतुर्यु
गं भवेत्। सहस्रैश्च विंशत्यासं
ख्या संध्यांशसंयुते देवदिनेव
त्सरेण मानुषेण सराजके॥
एवं क्रमेण गणितान्मानुषीषे
श्चतुर्युगे। देवे द्वादशसाहस्रे
वत्सराणां प्रकीर्तितं। दैवे द्वा
दशसाहस्रे वत्सरैर्दैविके युगे
तत्र चैतद्युगानां संख्या सं
ध्यांशसंयुते। देवानां तु कृते
त्रेता द्वापरादिव्यवस्थया। न
युगव्यवहारोऽस्मिंश्च धर्मादि
भिन्नता। किंतु चातुर्युगं नाम
भवेद्दैवयुगं सदा दैवैरेव च सप्त
मायुगैर्मन्वंतरं भवेत्॥ दैवे
युगसहस्रे द्वे ब्रह्मणः स्यादह
र्निशं चतुर्युगसहस्रे द्वे तन्मा
मानेन तद्भवेत् एकस्मिन्ब्रा
ह्म्यादिवसे मनवः स्युश्चतुर्दश
एवं ब्राह्मेण मानेन दिवसैस्त
त्रिभिः शतैः। सषष्टिभिर्वत्स
रः स्याद्द्वादशभिर्वर्षाणां यथा
ब्राह्मैः पंचशता वर्षैः परार्द्धः प
रिकीर्तितः। तदीयस्यादि
वसं तावती रात्रिरिष्यते ५



शतेन ब्रह्मणो वर्षैः कालः स्या-
त् द्विपरार्द्धकः । परार्द्धद्वितये-
तीते ब्रह्मणः प्रलयो भवेत् ॥
प्रलीने ब्रह्मणि परे जगतो
प्राकृतो लयः । समस्तजगदा-
धार मव्ययं यत् परात्परं ॥
तस्य ब्रह्मस्वरूपस्य दिवारात्र-
म्प्रवर्त्तते । तत्परं नाम तस्या-
र्द्धं परार्द्ध मभिधीयते । इति श्री-
कालिकापुराणे २४ अध्यायः ॥
किंच प्रति पद्म परिज्ञेयो
निमेषः परिकीर्त्तितः । ह्रोति-
मेषा त्रुटि र्नाम द्वे त्रुटी तुल-
वः स्मृतः । द्विलवः क्षणस्तु
क्षः काष्ठा प्रोक्ता दशपञ्चक्षणाः
दश काष्ठाः कला नाम तत्त्रिं-
शत्काश्च घटिका घटिके
द्वे मुहूर्त्तः स्यात्ते त्रिंशदहोरा-
त्रकं । चतुर्विंशतिवेलाभिर-
होरात्रं प्रवर्त्तते । सूर्य्योद-
यादि विज्ञेयो मुहूर्त्तानां क्र-
मः सदा । पञ्चदशाहोरात्रादि
होरात्राणां विधानक्रमः । इति
वह्निपुराणे गणभेदनामा-
ध्यायः ॥ अपरं नरसिंहपुरा-
णे १ अध्याये कौर्म्मे ६ अ-
ध्यायेच द्रष्टव्यं ॥

समयकारः पुं संकेतः । यथा
प्रज्ञाभिः परिभाषा शैलीसं-
केत समयकाराश्च । इति त्रि-
काण्डशेषः ॥
समया व्य निकटः । मध्यः । अ-
स्य पर्य्यायः । निकषा २ हिरु-
क् ३ इत्यमरः । समयानिकटे
मध्ये मध्येच निकषान्तिके ।
हिरुङ्मध्ये विनार्थेच । इति
रुद्रः । हिरुगन्तेच सामीप्ये ।
इत्यमरमाला । कालविज्ञापने
इति शब्दरत्नावली ॥
समरः पुं स्त्री युद्धं । इत्यमरः ॥
समरभः पुं रतिबन्धविशेषः ।
तस्य लक्षणं यथा । स्वजंघाद्द-
यं संयुक्तं कृत्वा योषित् पदद्वये
स्तनौ धृत्वा रमेत् कामी बन्धः
समरभः स्मृतः ॥ इति र-
तिमंजरी ॥
समरूपः त्रि समस्य साधोर्भ-
तः सर्वो गवादिः । समशब्दात्
रूप्यप्रत्ययेन निष्पन्नः ॥
समर्थः त्रि शक्तिष्टः । संबन्धार्थः
हितः । इत्यमरः ॥
समर्थता स्त्री सामर्थ्यं । शक्तिः
समर्थत्वं समर्थ शब्दात् तप्र-
त्ययेन निष्पन्ना ॥

समर्थनं क्ली इदमुचितमिदम-
नुचितमिति निश्चयः । तत्पर्य्या-
यः । संप्रधारणा २ इत्यमरः ॥
समर्थना ३ इति शब्दरत्नावली
सामर्थ्यञ्च ॥
समर्थना स्त्री अशक्याध्यवसा-
यः । यथा । सिंधु मपि शोषया-
णि । इति मुग्धबोधव्याकरणं ।
समर्थनं । इति शब्दरत्नावली ।
समर्द्धकः त्रि वरदः । इष्टफ-
लदात् देवतादिः । इत्यमरः ॥
समर्पणं क्ली सम्यक्प्रकारेण
अर्पणं । सौंपोन इति भाषा । सम् पूर्व-
स्य ऋधातोः णौ कृते पनिकृते
अनट् प्रत्यय निष्पन्नं । यथा
प्राणायामं ततः कृत्वा प्रज-
पेत् साधकाग्रणीः ॥ देव्या
हस्ते जपफलं समर्पणं मथा-
चरेत् । इति तोडलतंत्रे ३
पटलः ॥
समर्य्यादः पुं समीपः । मर्य्या-
दासहिते त्रि । इति मेदिनी ॥
समलं क्ली विष्ठा । इति शब्दर-
त्नावली । आविले त्रि । इति
जटाधरः ॥
समवतारः पुं तीर्थं । सम् अव
पूर्वक तॄ धातो र्घञ प्रत्ययेन
निष्पन्नः ॥
समवर्त्ती [2] पुं यमः । इत्यमरः
तुल्यवर्त्तनशीले त्रि ॥
समवाकारः पुं नाटकभेदः ।
यथा । स्यान्नाटकं प्रकरणं भ-
णः प्रहसनं डिमः । व्यायोगः सम-
वाकारो विथ्यंकेहामृगा इति
अभिनेयप्रकाराः स्यु र्भाषाः ष-
ट्संस्कृतादिकाः । इति हे-
मचंद्रः ॥
समवायः पुं समूहः इत्यमरः ।
संबंधविशेषः । यथा । घटादीनां
कपालादौ द्रव्येषु गुणकर्म्म-
णोः । तेषु जातेश्च संबंधः समवा-
यः प्रकीर्त्तितः ॥ इति भाषाप-
रिच्छेदः । अवयवावयविनो
र्गुण गुणिनोः क्रिया क्रिया-
वतो र्जाति व्यक्त्यो र्नित्यद्रव्य
विशेषयोश्च यः संबंधः सम-
वायः । इति सिद्धान्तमु-
क्तावली ॥
समवेतः त्रि मिलितः । यथा ।
धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता यु-
युत्सवः । मामकाः पाण्डवाश्चै-
व किमकुर्वत संजय । इति भ-
गवद्गीतायां १ अध्यायः । स-
मवाय संबंधेन वृत्तिः ॥ यथा ।



यत् समवेतं कार्य्यं भवति ज्ञेयं तु समवायिजनकं तत् ॥ इति भाषापरिच्छेदः ॥

समश्नुवानः त्रि सम्यक्प्रकारेणाभिविशिष्टः । सम्+अश व्याप्तौ + शानच् प्रत्ययेन निष्पन्नः ॥

समष्टिः स्त्री समस्तः । मिलितः यथा । समष्टिरीशः सर्व्वेषां स्वात्मतादात्म्यवेदनात् । तदभावात्तदन्ये तु ज्ञायन्ते व्यष्टिसंज्ञया । इति पञ्चदशी ॥

समष्ठिलः पुं क्षुपविशेषः ॥ कोकुआँ इति हिन्दीभाषा । तत्पर्य्यायः । भाण्डीरः २ नद्याम्रः ३ ग्रामसंघकः ४ कोकाक्षः ५ कण्टकिफलः ६ उपदंशः ७ अस्य गुणाः कटुत्वं उष्णत्वं रुच्यत्वं । मुखविशोधनत्वं । कफवातप्रशमनत्वं । दाहकारित्वं । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ समष्ठिला स्त्री गण्डीरः । इत्यमरः । हे समठा इति ख्याते शाकभेदे इति ख्याते । अनूपदेशजे शाके इति केचित् । गुडिञ्चा इति ख्याते शाके इति सर्व्वानन्दः ॥ गाँडीति ग्रन्थिपर्णानि शाकानि ईरयति गण्डीरः । यथा । गण्डे ग्रन्थिविशेषं ईरयति गण्डीरः पृषोदरादित्वात् । समष्ठाभि लाति समष्ठिलाऽः मनीषादित्वात् सम्यक्त्वं । इति भरतः ॥

समष्ठिला स्त्री समष्ठिला । यथा समष्ठोपि च गण्डीरः समष्ठीला समष्ठिला । इति शब्दरत्नावली ॥

समसनं क्ली संक्षेपणम् । इत्यमरः ॥

समसुप्तिः स्त्री कल्पान्तः । महाप्रलयः ॥ इति हेमचन्द्रः । तुल्यशयनञ्च ॥

समस्त त्रि सम्पूर्णम् । तत्पर्य्यायः समं २ सर्व्वं ३ विश्वं ४ अशेषं ५ कृत्स्नं ६ निखिलं ७ अखिलं ८ निःशेषं ९ समग्रं १० सकलं ११ पूर्णं १२ अखण्डं १३ अनूनकं १४ इत्यमरः । अनन्तं १५ इति शब्दरत्नावली ॥ अन्यूनं १६ अनूनं १७ । इति जटाधरः ॥

समस्तः त्रि समासः । समभावे अस्तितः । समस्+अस क्षेपणाया तो ऊ प्रत्ययेन निष्पन्नः ॥

समस्थली स्त्री गङ्गायमुनयोर्मध्यदेशः । तत्पर्य्यायः । अन्तर्वेदिः

२ इति हेमचन्द्रः ॥

समस्या स्त्री श्लोकस्य पादैकेन द्वाभ्यां त्रिभिर्वा पूरणम् । यथा । कुसुमेषोः किं तवाद्यापि चित्रकाननमायतेः । स्मरनाराचणं येन वेल्लायां कोऽवहेलितः ॥ इत्यादि श्लोकादौ पादे पूरणरूपेणाय मित्येके । इति रायमुकुटः । तत्पर्य्यायः । समासार्था २ इत्यमरः । समस्यार्था ३ समासार्था ४ । इति भरतः ॥ समस्यते संक्षिप्यते नया समस्या अस उ क्षेपे षी व्रज यजेत्यादिना क्यप् अभिप्रायस्य श्लोकादेः स्वदीयत्वेन परमभिप्रायसमानानां भागानां स्वकृतेन परकृतेन वा भागान्तरेण समसनं संघटनं समस्येति भावः ॥

समस्यार्था स्त्री समस्या । इत्यमरटीकायां भरतः ॥

समस्या स्त्री यज्ञः । इति शब्दरत्नावली ॥

समन्तं त्रि अन्तस्य समीपं । सं पूर्व्व अन्तिशब्दात् अ प्रत्ययेन निष्पन्नं । इति मुग्धबोधव्याकरणम् ॥

समा स्त्री वत्सरः इत्यमरः ॥ समति विकलयति भावान् समा सम वैक्लव्ये पचादित्वादच् । आप् । समा नित्यबहुवचनान्ताः स्त्रियामिति वामनादयः समांसमा विजायते इत्येकत्वेपि दृश्यते इति स्वामी । अत एव समा इति बहुवचनेन क्वचित्पाठः समेति क्वचिदेकवचनेन । इति तट्टीकायां भरतः ॥

समांशहारी [न्] त्रि समभागार्हः ॥ यथा । समांशहारिणी माता पुत्राणां स्यात् मृते पतौ । इति दायतत्त्वम् ॥

समांशिकः त्रि समभागार्हः यथा । यदि कुर्य्यात् समानांशान् पत्न्यः कार्य्याः समांशिकाः । न दत्तं स्त्रीधनं यासां दत्ते त्वर्द्धं प्रकीर्त्तितम् ॥ इति दायतत्त्वम् ॥

समांशी [न्] त्रि तुल्यभागविशिष्टः । समानभागी । यथा । ज्येष्ठो वा श्रेष्ठभागेन सर्व्वे वा स्युः समांशिनः । इति दायतत्त्वम् ॥

समांसमीना स्त्री प्रतिवर्षप्रसवनगवी । इत्यमरः ॥

समाकर्षी [न्] पु अतिदूरगामिगन्धः



तत्पर्य्यायः । निर्हारी २ ॥
इत्यमरः । तत्साज्जनकगन्धयुक्ते
मद्यादिद्रव्ये इय मेतदिति
सान्तः । तत्र त्रि ॥
समाख्या स्त्री कीर्त्तिः । इति श
ब्दरत्नावली । संज्ञा । यथा । स
पिण्डीकरणं समाख्यासिद्धत्वे
ततरां तत्र तथाचरणं । इति
तिथ्यादितत्त्वं ॥
समागतः त्रि सम्यगागमनवि
शिष्टः । आगमनाश्रयः । यथा । कै
र्म्मया सहयोद्धव्यमस्मिन्रणसमु
द्यमे । योत्स्यमानानवेक्षेऽहं य
एतेत्र समागताः ॥ इति भग
वद्गीताया १ अध्यायः ॥
समागतिः स्त्री समागमनं । स
म्+आङ्+पूर्व्वगमधातोः क्तिः प्रत्य
यनिष्पन्ना ॥
समागमः पुं सम्यगागमनं । स
म्प्राप्तिः । यथा । मत्स्यपुराणे ।
इतिशाकिः स्त्रियः कान्ता भो
ज्यभोजनशक्तिता । दान
शक्तिः सविभवा रूपमारोग्य
संपदः ॥ स्वाद्वपुष्पमिदं
प्रोक्तं फलं ब्रह्मसमागमः ।
इति श्राद्धतत्त्वं ॥
समाघ्रातः पुं ग्रहं । इत्यमरः ।
वधः । इति मेदिनी ॥
समाचारः पुं सम्यगाचरणं ।
यथा । गुणपत्नीणां समाचारं
श्रोतुमिच्छामितत्त्वतः । इति
मत्स्ये ९९ अध्यायः ॥ संवा
दः । इति लोकप्रसिद्धिः ॥
समाजः पुं पशुभिन्नानां संघः ।
इत्यमरः ॥ सभा इति हेमचंद्रः ॥
हस्ती ॥ इति अनेकार्थ
कोषः ॥
समाज्ञा स्त्री समज्ञा । इत्यमर
टीकायां भरतः ॥
समादानं क्ली समीचीनग्रह
णं । सम्यग्ग्रहणं । सौगताह्नि
के । बौद्धानां नित्यकर्म्म । इति
मेदिनी ॥
समाधाः पुं निष्पत्तिः । विरोधभं
जने । इति लोकप्रसिद्धं ॥
समाधानं । सं आङ् धा ल्युट् । धा
तोर्विधप्रत्ययेन निष्पन्नः ॥
समाधानं क्ली अन्तःकरणस्थि
रीकरणं । चित्तैकाग्र्यं । तत्पर्य्या
यः । अवधानं २ प्रणिधानं ३
समाधिः ४ । इति हेमचंद्रः ।
पूर्व्वपक्षस्योत्तरं ॥
इति लोकप्रसिद्धं ॥
समाधिः पुं समर्थनं । नीवाकः

नियमः । इत्यमरः । समर्थनं ।
अशक्ये अध्यवसायः उच्चैरस्य
घटनं वा । नीवाको वचना
भावः । इति स्वामी । धान्यादिषु
मूल्योत्कर्षएवंको जनादरः
इति स्मृतिः । नियमो अंगी
कारः । एतेसत्यादयः । समा
धीयते ऽस्मिन् मनो जनैरि
ति किः । इति भरतः । ध्यानं
काव्यगुणविशेषः । इति मे
दिनी । इंद्रियनिरोधनं ॥ इति
शब्दरत्नावली । समाधिलक्ष
णं यथा । नित्ये शुद्धे बुद्धियु
क्ते सत्यमानंद मद्वयं । तुरी
य मक्षरं ब्रह्म अहमस्मिप
रंपदं । अहंब्रह्मेत्यवस्थानं स
माधिरिति गीयते । इति गा
रुडे ५५ अध्यायः ॥
अपिच । द्वादशाध्यान पर्य्यंतं
मनो ब्रह्मणि योजयेत् । तदे
तस्येयतो युक्तः समाधिः सो
ऽभिधीयते । ध्येय मेव हि स
र्व्वत्र ध्याता तल्लयतां गतः । प
श्यति द्वैतरहितं समाधिः सो
ऽभिधीयते । इति गारुडे ४८
अध्यायः ॥ अन्यच्च ॥ तस्यै
व कल्पनाहीनं स्वरूपग्रह
णं हि यत् । मनसा ध्याननिष्पा
द्यं समाधिः सोऽभिधीयते ।
इति विष्णुपुराणे ६ अंशे ७ अ
ध्यायः ॥ अपरंच इमंगुणस
माहात्म्यमनात्मत्वेन पश्यतः
अंतःशीतलता यस्य समाधि
रिति कथ्यते । इति योगवा
शिष्ठे उपसमप्रकरणं ।
समाधिस्थः त्रि समाधियुक्तः ।
यथा । मनः संकल्परहितमिंद्रि
यार्थानचिंतयन् । यस्य ब्रह्मणि
संलीने समाधिस्थः सकीर्त्तितः ।
ध्यायतः परमात्मानमात्मस्थस्य
स्पयोगिनः । मनस्तल्लयतां याति
समाधिस्थः सकीर्त्तितः । इति गा
रुडे गीतासारे ४९ अध्यायः ॥
समानं त्रि सत् । समं । एकं ॥
इति मेदिनी ॥
समानः पुं शरीरस्थवायुवि
शेषः । स तु नाभिसंस्थितः । इत्य
मरभरतौ । वर्णभेदः । इति हे
मचंद्रः । सतुपक्षस्थानेम्वार्थ
वर्णः । यथा । साम्येत्वेकस्थान
त्वे । इति मुग्धबोधव्याकरणं ।
समानकालीनः त्रि तुल्यका
लोत्पत्तिकः । यथा । गोत्रद्वयस्या
नाम् आगतः इत्याश्रागत इ

त्पादो समानकालीनत्वं भाव
ते तेन गोविषयक वर्त्तमान-
दोहनकालीन गमनानुकूल
कृतिमान् । एवं गोविषयकाली
नदोहन समानकालीनातीत
गमनानुकूलकृतिमानिति बो
धः । इति सारमञ्जरी ॥
समानोदकः पुं एकोदकः ।
सतु ज्ञातिविशेषः । तर्पणेस
माने एकमुदकं यस्य । यथा
ज्ञातो नेगः सगोत्रस्तु स्वजन-
ज्ञाति बान्धवाः । सकुल्य बंधुदा
याद स्व समानोदका अपि । इ
तिजटाधरः । सतु चतुर्दशपु-
रुषपर्य्यन्तः । जन्मनामस्मृति
पर्य्यन्तश्च । तत्र आद्यस्यैकाद
शपुरुषावधि चतुर्दशपुरुष
पर्य्यन्तस्याशौचे पक्षिणी हिनी
यस्यैकाहः । यथा । उदकक्रिया
मधिकृत्य पारस्करः । सर्वे ज्ञात
यो भावयेति । आसप्तमादश-
माद्वा समानग्रामवासेन याव
त्संबंध मनुस्मरेयुर्वा इति भाव
येति निष्पादयेति । अत्रयावत्सं
बंध मनुस्मरेयु रेककुलजाता
वय मिति स्मरणे भवतीत्यने
नैव सर्वेषा मुदकदाने प्राप्ते-
यदासप्तमादूर्ध्वमाद्वाऽर्के तत्स
न्निकर्ष तावतप्यनाशौचभेदेषु
दकं कर्मसमानार्थमिति । अ
शौचभेदस्तु सप्तमपुरुषपर्य्य
न्तसपिण्डत्वाद्दशाहः । ततश्चतुर्दशम
पुरुषपर्य्यन्ते त्र्यहः । तथा च वि
ष्णुवृहस्पती । दशाहेन सपिण्डास्तु
शुध्यन्ति मृतसूतके । त्रिरात्रेण
सकुल्यास्तु स्नात्वा शुध्यन्ति गो
त्रजाः । ततश्चतुर्दशपुरुषपर्य्यन्ते
पक्षिणी ततश्च जन्मनामस्मृति
पर्य्यन्त मेकाहः । तथाच मिताक्ष
रा विवादचिंतामणयो र्वृहन्मनुः
सपिण्डतातु पुरुषे सप्तमे वि
निवर्त्तते । समानोदकभावस्तु
निवर्त्तताचतुर्दशात् । जन्मना
मस्मृते रेके तत्परं गोत्रमुच्य
ते । अत्र समानोदकत्वे द्विवि
धे एवंच गोतमः पक्षिणीमस
पिंडे । यज्ञहारीतः । माताम
हे त्रिरात्रं स्यादेकाहस्त्वसपिण्डके
इति । अत्रैव गोत्रजानामहः ।
स्मृतः मिति जावालवचने ॥
ततः एवं सर्वेषां समानोदकता
निवृत्तेः स्नान मात्र मिति लाघवा
शुध्यन्ति गोत्रजा इति वृहस्पत
त्वादिति । इति शुद्धितत्त्वं ।

समानोदर्य्यः पुं सहोदरः ॥
इत्यमरः ॥
समापः पुं देवयजने । इति-
मुग्धबोधव्याकरणं ॥
समापकः त्रि समापनकर्त्ता ।
समापयति यः सएव आपधा
तो र्णक प्रत्ययेन निष्पन्नः ॥
यथा । आख्याता ख्यातिवादयस्त
थाच प्रधानत्वे वाक्यसमापक
त्वात् । इति दुर्गादासः ॥
समापनं क्ली परिच्छेदः ॥ स
माप्तिः । वधः । इति मेदिनी ॥
समाधाने । इति विश्वः । लब्धं
इति धरणिः ॥
समापन्नं त्रि समाप्तः । प्राप्तः ॥
क्लिष्टः । वधः । इति विश्वः ॥
समापिका स्त्री वाक्यसमापक
क्रिया । तत्र तिबादयो भवंति ।
यथा । देवदत्तो गच्छति । क्व
चित् क्तान्तादिपदेनापि वाक्य
समाप्तिः । यथा । नाम्ना हृष्टः
शिवो जनैः । क्वचित् तव्याद्यन्त
क्रियाया अपि वाक्यसमापक
त्वे । यथा । मया कांक्षितं गत
व्यं ॥ कार्दन्तिकी क्रिया असमा
पिका । तत्र शत्रादयो भवंति ।
यथा । गच्छन् भुंक्ते ।
भुक्त्वा व्रजति इतिव्याकर
णटीका ॥
समापितं त्रि कृतसमापनं
यथा । आरब्धं मलमासात्
प्राक्काम्यकर्मन समापितं आ
गते मलमासेपितत्समाप्यमसं
शयः । इति मलमासतत्त्वं ॥
समाप्तः त्रि समापनप्राप्तः । स
माप्तिविशिष्टः । यथा समाप्ते
यदि जानीयान्मयैतदन्यथा
कृतं । यत स्तदन्यथाभूतं त
तएव समापयेत् । इति तिथ्या
दितत्त्वं ॥
समाप्तालः पुं पतिः । इतिसं
क्षिप्तसारोणादिवृत्तिः ॥
समाप्तिः स्त्री अवसानं । सम
र्थनं । इति मेदिनी । परिसमाप्तिः
इति । शब्दरत्नावली ॥
समाप्तार्था स्त्री समस्या । इतिस
मासार्था शब्दटीकायां भरतः
समाप्यं त्रि समापनीयं । समा
पितव्यं । अस्य प्रमाणं समापित
शब्दे द्रष्टव्यं ॥
समावृत्तः त्रि सम्यक्प्रकारेण
आवृतः । यथा । जयत्वकालि
सर्वेषां सर्वभूतसमावृते त्वं
मानिजभूतेभ्यो बलिं भुंक्षे ने-

सोःस्त्रते । इतिदुर्गादासप्रयो
गतत्वं ॥
समानयोगः पुं संयोगः । स
मवायः । प्रयोजने । इति
मेदिनी ॥
समालंबी पुं भूस्तृणं । इति
राजनिर्घण्टः ॥
समालंभः पुं कुंकुमादिवि
लेपनं । इत्यमरः ॥
समालंभनं क्ली कुंकुमादि-
विलेपनं । तत्पर्य्यायः । विच्छि
त्तिः २ कषायः ३ । इतित्रिकाण्ड
शेषः ॥ समालंभः ४ विलेप
नं ५ इत्यमरः । सम्यक्मारणं ।
सम्यक्स्पर्शनं । यथा । अतऊ
र्द्ध्वंसमालंभेन मादप्रासा
दितिगोभिलसूत्रं ॥
समाली स्त्री कुसुमस्तवकः । इति
त्रिकाण्डशेषः ॥
समावर्त्तनं क्ली वेदाध्ययनाने
तरं गार्हस्थ्याधिकारप्रयोजकं
कर्म्म । यथा । अथ समावर्त्तनं ।
ज्योतिषे सौम्यभानुज्ञयोर्व्वारे न
क्षत्रे श्रेष्ठे दिने । तत्राचैव
विष्णुश्च समावर्त्तेनिक्षिप्य
ते । गोभिलः । अथाप्लवने
ग्य ब्रतानंतर माप्लवने ।

स्नाने कुर्य्यादितिशेषः । उत्तरतः
पुरस्ताद्वाचार्य्यकुलस्य परिव्रतः
भवति । आचार्य्य गृहादुत्तर
स्यां पूर्व्वस्यां वा स्नानार्थमा
वृते स्नाने कुर्य्यात् । प्रक्षाग्र
ग्रेषु दर्भेषु उदगाचार्य्य उपवि
शति तथावृते उदक उदङ्मुखः
प्राक् ब्रह्मचार्य्युदगग्रेषुदर्भे
षु । प्राक् प्राङ्मुख उपविशा
तीत्यन्वयः । सर्व्वौषधि विफा
एटाभि रद्भि र्गन्धवती भिःशी
तोष्णाभिराचार्य्या अभिषिंचेत्
सर्व्वौषधयश्च । ब्रीहयः शालयो
मुद्गा गोधूमाः सर्षपा स्तिलाः
यवा श्चौषधयः सप्त विपदोघ्नं
ति धाविताः । इति छंदोगप
रिशिष्टोक्ता स्ताभिः सहया आ
पो विफाण्टा विपक्वा उत्लीकृ
ताः ताः सर्व्वौषधि विफाण्टास्ता
भिर्गन्धवती भि श्चन्दनादि गंध
द्रव्ययुक्ताभिः शीतोष्णाभिःशी
तोदकमिश्रितोष्णाभि रिति भट्टभा
ष्यं । स्वयमिवत्वमंत्रवर्णो भवति
इव शाह्य पर्व्वार्थे । स्वय मेवब्र
ह्मचारी आत्मान मभिषिंचेत्
आचार्य्यकर्त्तृकाभिषेकस्तुपर
मेतो यतो मंत्रवर्णोभवति मंत्र

वर्णो अभिषेक मंत्रलिंगं तेन
तेनाहं मा मभिषिंचामि इति
तेन मा मभिषिंचित मिति च ।
तद्विधि माह येऽप्स्वंतरग्नयः प्र
विष्टा इत्यपा मञ्जलि मवसिंच
ति । येऽप्स्वंतरग्नयः इतिमंत्रेण
कासा मपा मंजलिं ब्रह्मचारी
अवसिंचति कौथुमोक्ततः अवसिं
चति वचनात् । तेनमंत्रस्याभिहि
तात् सृजामीति यदपा मितिमं
त्रस्याभिहितात् सृजामि इति मं
त्रलिंगाठ्याश्च सर्व्वाधारत्वेन प्रा
प्ताया भूमौ त्यजति यदपां
घोरं यदपांक्रूरं यदपामशान्त
मितिच । अपा मंजलि मवसिंच
तीति वर्त्तते चकारात् योरोचन
स्तमिह गृह्णामीत्यात्मान मभि
षिंचति । प्रकृतानामपा मंजलि
नायो रोचन इति मंत्रेण ब्रह्म
चारी आत्मानमभिषिंचति । ओँ
यशसे तेजसे इतिच आत्मान
नमभिषिंचतीति वर्त्तते । येनस्त्रिय
मकृण्वत मितिच । आत्मानम
भिषिंचतीति वर्त्तते । तूष्णींच
तुर्थं । आत्मानमभिषिंचतीति
वर्त्तते । अभिषेकः शिरसि क
र्त्तव्यः शिरः प्रधानमंगानामिति

वचनात् । उपोत्थायादित्यमुप
तिष्ठेत उद्यन् भ्राजभृष्टिभिरि
त्येतत्प्रभृति मंत्रेण । आचार्य्य
समीपादुत्थाय उद्यन्नित्येतत्प्र
भृति मंत्रेण माहिंसी रित्यंत मं
त्रेणादित्यमुपतिष्ठेत उपान्मंत्रे
एव चेत्यात्मनेपदं । मेखलामव
मुंचेत उदुत्तमं वरुणमिति । अ
वमुंचते अधस्तादवतारयति अ
वशब्दो अधस्तादर्थे । ब्राह्मणान्
भोजयित्वा स्वयं भुक्ता केशश्म
श्रुरोमनखानिवापयतीति शि
खावर्ज्जं । ब्राह्मणान् भोजयि
त्वास्वयं भुक्ता नापितेन मुंड
यीत । अत्र शिखावर्ज्ज मिति वच
नात् प्राक् सशिखवपनमितिद्
र्शयति । उक्तंच । सशिखं वपनंका
र्य्यमास्नानात् ब्रह्मचारिणा इ
ति । स्नात्वा अलंकृत्याहते वाससी
परिधाय स्रजमावध्नीत श्रीरसि
मयिरमस्वेति । अलंकृत्य कुंडला
दिनात्मानं योजयित्वा अहते
ईषद्धौते नवेशुभ्रे सदशे यन्नधा
रितं । अहतंतद्विजानीयात्सर्व्व
कर्म्मसु पावनं । इति वशिष्ठोक्त
लक्षणे ईषत् सूक्ष्मं । तथावि
तेन परिधानादि कृतं । स्रजे

शोधः । श्री रसीति ५

ग्रथितपुष्पं प्रावध्नीत शिर सीति मंत्रेण नेत्रोस्थो नयते· मा भित्सुपानहौ । प्रावध्नीते त्यनुवर्तते । उपानहौ चर्मपादुके योगपत्वात् पादयोः । गंधर्वोसीति मंत्रेण वैणवं दंडं गृह्णाति । वैणवं वंशप्रभवं· गंधर्वोसीति मंत्रेण आचार्य्यं सपरिषत्कं सम्भेत्याचार्य्यपरिषद् मीक्षते । यत्तमिव चक्षुषः प्रियो वो भूयास मिति । सपरिषत्कं शिष्यादि सभासहितं अभ्येत्याभिमुख्येन गत्वा· आचार्य्यं परिषदं चेक्षते यत्त मितिमंत्रेण । उपोपविश्य मुख्यान्प्राणान् संस्पृशन् ओष्ठापिधाना नकुलीति उपाचार्य्यसमीपे मुख्यान् प्राणान् मुख प्रभवान् वायून् संस्पृशन् स्नातकः । ओष्ठापिधानमिति मंत्रं जपेत् । अन्नेनमाचार्य्योऽर्हयेत् । अत्रावसरे तत्रे स्नातकं विवाहोक्त वृता रेण विधिनार्चयेत् । तदपत्कौ गोयपुच्छाभ्यो गोयुक्तं रथमुपकम्य पक्तसी कूवरं वाक्रूराभिमृषेत् । वनस्पति विड्वंगो हि भूया इति । पक्षसी चक्रे । कूवरं रथिकस्थानं वाक्रूरं रथवेदिस्तम्भः । वनस्पतीति मंत्रेणाभिमृषेत् स्पर्शेत् । आस्थाते जयत जेत्वानीत्यातिष्ठति । रथमारुह्य आस्थाते जयतु जेत्वानीति वनस्पते इत्यादि मंत्रस्य चतुर्थपादेनातिष्ठति । उपविशतिप्राग्वा उदग्वाभिप्रयायप्रदक्षिण माहृत्य उपयाति । तेन रथेन प्राङ्मुखो वा प्रयायप्र· कर्षेण गत्वा उपयाति आचार्य्य समीपमागच्छति उपयातायार्घ्य मिति कोहनीयाः । उपयाताया· चार्य्य समीप मागतायार्घ्यं देय मिति कोहनीया आचार्य्यामाऊः । रथाभावेपि मंत्रपाठाचारः । चरुकरणे तण्डुलादाववघातादिवत् । अस्य कर्म्मणः समावर्तनसंज्ञापि गुरुणानुमतः स्नात्वा समावर्तेत यथाविधि । उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम् । इति मनूक्तेः । सह पैठीनककारिकायां कुर्वीत स्वय मेवैतत् समावर्त्तनसंज्ञ· कं । इति संस्कारतत्वं ॥ समावायः पुं समूहः । इत्यमर टीकायां भरतः ॥

समावृत्तः त्रि वेदाध्ययननिवृत्तः तत्पर्य्यायः । लब्धानुज्ञः २ इत्यमरः । सांगवेदाध्ययनानंतरं त्व मिदानीं गृहस्थो भव इति गार्हस्थ्याय प्राप्तानुमतिः समावृत्त उच्यते समावर्त्तने अध्ययनान्निवर्तते इति समाङ्पूर्व वृत् वृत्तेः कर्तरि क्ते समावृत्तः इति भरतः । अतः परं समावृत्तः कुर्य्याद्दारपरिग्रहं । इति उद्वाहतत्वं च । तस्य सर्वाश्रो वेतुण्डने यथा । अशेषचाधिकारे आपस्तम्बः । अनुभाविनांच परिवापनमिति अनुभाविनां स्नापोच मनुभवतां समावृत्तानां सर्वाश्रमे च मुण्डनं । यत्त पुन रापस्तम्बः । न समावृत्ता वपेयु रन्यत्र व्रीहावादिके के । व्रीहावात् दर्श पौर्णमासंग यागविशेषादन्यत्र समावृत्ता गृहस्था न वपेयुः । इत्येकेषां मतं । तत्काम्यपरं । इतिशुद्धितत्वं ॥

समावृत्तकः पुं समावृत्तः । इति शब्दरत्नावली ॥

समावेशः पुं एकत्र सहावस्थानं । यथा । अर्थस्थापनत्व बलव· दनिष्टानुबंधीष्टसाधनत्वं । अनर्थसाधनत्वेबलवदनिष्टसाधनत्वं । नचानयो रेकत्र समावे· शः । इति तिथ्यादितत्वे वैधहिंसाविचारः ॥

समावेशितः त्रि सहावस्थितः प्रविष्टः । समावेशमाप्तः ॥ समावेश शब्दादित प्रत्ययेन निष्पन्नः ॥

समाश्रयः पुं सम्यगाश्रयः । सम्यगाधारः । सहायः । समाङ्. पूर्वक श्रियातो रल् प्रत्ययेन निष्पन्नः ॥

समाश्रितः त्रि सम्यक्प्रकारेणाश्रितः । यथा । देवः कवेः किं समरस्य सारः कोषे भयंकिं किमुदंति भृंगाः । सदा भयं चाप्यभयं च केषां भागीरथी तीरसमाश्रितानां ॥ इत्येतल्लापिका ॥

समासः पुं संक्षेपः । समर्थने इति मेदिनी । समाहारः ॥ इति हलायुधः । एकपद्यं । इति हेमचंद्रः ॥ समसनं पदयोः पदानाम्वा एकपदीकरणं समासः इति संक्षिप्तसारव्याकरणं । सच षड्विधः द्वन्द्वः १ बहु

व्रीहिः २ कर्म्मधारयः ३ तत्पु
रुषः ४ द्विगुः ५ अव्ययी ६ ते
षां लक्षणं यथा । भिन्नार्थैका
र्थे ह्यादि संख्या व्यादीनां च
ह य ष ग वाः । इति गंपुंवो
व्याकरणं । अपिच । नाम्नांस
मासो युक्तार्थः स तस्या लोप्या
विभक्तयः । इति वैयाकरणाः ।
तस्य सामान्यलक्षणं यथा । अ
भिधानाश्रित लोपाभाववदन
मध्यवर्त्ति विभक्तिशून्यनामस
मुदायत्वं समासत्वं । तत्र कर्म्मधा
रयद्विगु तत्पुरुष बहुव्रीहि द्वंद्वा
व्ययीभावाः षट्समासा भवंति
तत्र कर्म्मधारयत्वं समासनियत
लक्षणाशून्यासंज्ञास्य संख्यावा
चकपूर्व्वपदकान्यमध्यवर्त्तिविभ
क्तिशून्य तुल्याधिकरणपदस
मुदायत्वं । यथा नीलोत्पलमित्या
दिः १ । तत्र द्विगुत्वं समासाधी
नलक्षणाशून्यमध्यपदवर्त्तिवि
भक्तिशून्यासंज्ञास्य संख्यावाचक
पूर्व्वपदकतुल्याधिकरणनामसमु
दायत्वं । सच तद्धितार्थविषयीभू
ते तद्धितार्थः अभिधेये उत्तरपदे वा
समाहारे वाभिधेये भवति । उत्त
रपदे पारिभाषिकं यत्पद ·
घटितं समासांतर्वर्त्ति द्विगुत्वप
देतत्पदं । तेनच पंचगावो धना
नीत्येतासमस्त प्रयोगेण तत्
पंचगावानि धनानि इति । तद्धि
तार्थे विषयीभूते यथा पंचगर्ग्ग
रूप्यः पंचब्राह्मणपः पांचनापितिः
द्वैनाविक मित्यादि तद्धितार्थेः
भिधेये यथा पंचकपालः ओद
नः । समासस्यसंस्कृतोऽर्थः सं
स्कारे प्रयोज्यतासंबंधेन पंच
कपालस्यान्वयो श्रुतएवेति
स्यात् तथाच पंचकपाल प्रयो
ज्य संस्काराश्रयाभिन्न ओदनः ।
तद्धितार्थस्य समासेनाभिधानात्
न तद्धितप्रत्ययः समाहारेऽभि
धेये यथा पंचगव्यं चतुष्पथं
द्विपात्रं त्रिभुवनं चतुर्युग मित्या
दयः उत्तरपदे यथा । पंचगव
धनः इत्यादिः २ तत्पुरुषत्वंत
समासाधीनलाक्षणिकविशेष
णपदक मध्यवर्त्ति विभक्तिशू
न्य नामसमुदायत्वं । यथा । रा
जपुरुषः । कण्ठाश्रितः । पुरुषो
त्तमः । इत्यादि ३ समासप्रयु
क्तलक्षणानियतोत्तरपदकसमा
सत्वं बहुव्रीहित्वं । समासाधी
नलाक्षणिक विशेष्यवाचकपदक

मध्यवर्त्तिविभक्तिशून्यनामसमु
दायत्वंवा संबंधिलाक्षणिकत्व
व्याप्योत्तरपदकत्वंवा बहुव्रीहि
त्वं बहुव्रीहिश्च द्विविधः समाना
धिकरणो व्यधिकरणश्च । यथा
चित्रगुः । गृहधान्यकस्त्रैरः । प्राप्त
पवानरो वृक्षः । इत्यादि ४ । स्व
घटकीभूतप्रत्येकपदार्थान्विता
र्थकसोत्तरविभक्तिकमध्यवर्त्ति
विभक्तिशून्यनामसमुदायत्वं द्वं
द्वत्वं । यथा धवखदिर पलाशा
श्छिंधि । इति द्विविधो द्वंद्वः । इतरे
तरयोगः समाहारश्च । यत्र समाहा
रस्यावयवार्थः प्रधानं तत्रेतरेत
रयोगः द्विवचन बहुवचनेऽपित
त्रैव । यथा । देवदत्त यज्ञदत्तौ । ध
वखदिर पलाशाः । इति । यत्रस
हतिप्राधान्यं तत्र समाहार स्तत्रै
कवचनं नपुंसकलिंगता च ।
यथा वाग्दृषदं हस्तपादं । इ
त्यादि ५ समासप्रयुक्त लक्ष
णाशून्यावयवपूर्व्वपदकमध्यव
र्त्तिविभक्तिशून्य तत्पुरुषान्यनाम
समुदायत्वं अव्ययीभावत्वं । य
था । उपकुंभं अर्द्धटं निर्म्मक्षिकं
अधिस्त्रि इत्यादि ६ इति समास
वादः । अन्यच्च । यौगिकेषु स
मासं लक्षयति यादृशस्य म
हावाक्यस्यांत स्वादि निजार्थ
के यादृशार्थस्य धीहेतुः सस
मास स्तदर्थकः । यादृशं महा
वाक्यान्तरं त्व तलादिः स्वार्थ
स्य यादृशार्थावच्छिन्न विषय
ताशालिबोधे हेतु स्तादृशं त
द्वाक्यं तथाविधार्थे समासः । वि
भज्यते । सचायं षड्विधः कर्म्म
धारयादिप्रभेदतः यथोपपदस
मोऽन्य स्तेनासौ सप्तधा मतः । ए
वमव्ययान्त सर्वान्यपदप्राधान्यतः
पुनः । प्राच्यैः पंचविधः प्रोक्तः स
मासो वा भट्टादिभिः । तेषुक
र्म्मधारयं लक्षयति । कर्म्मिकंय
न्नामयुग्म मेकार्थे ऽन्यार्थबो
धकं । तादात्म्येन भवेदेष स
मासः कर्म्मधारयः । कर्म्मिकंयन्ना
मद्वयं तयो रेकस्य नाम्नोऽर्थे
ऽपरस्मिन् तादात्म्येनापरनाम्नो
ऽर्थस्यान्वयबोधं प्रति समर्थं ता
दृशनामद्वयं कर्म्मधारयः । य
थानीलोत्पलं १ । द्विगुं लक्ष
यति । संख्यापूर्व्वगुणेनाम तद
र्थस्यार्थबोधकं । अभेदेनैवय
त्स्वार्थे साहित्य द्विविधो मतः
संख्यावच्छिन्नपाक यत्पदोत्तर

त्वविशिष्ट यन्नाम स्वार्थधर्मि
कं तादात्म्येन तदलस्यार्थस्यान्व
यबोधं प्रति समर्थं तन्नामोत्तरत्ता
पन्नं तन्नामैव तदलस्यार्थाभिन्न
स्वार्थे द्विगुरुच्यते । तत्र तद्धिता
र्थान्वितार्थे द्विगुं लक्षयति । तद्धि
तार्थान्वितस्वार्थे स्तद्धितार्थद्विगु
स्मृतः । तद्धितार्थत्वात्ताणिक स्वा
त्सन्नाम त्वसर्वगः । यो द्विगुः स्या
त्तत्र तद्धितार्थान्वितस्वार्थकः ।
उत्तरपदद्विगुं लक्षयति । स्वांत
र्निविष्ट शब्दाभ्यां शब्दांतर समा
सगः यो द्विगुः शाब्दिकैः रुक्तः स
उत्तरपदद्विगुः । यो द्विगुः स्वघ
टक नामभ्यां सह साकांक्षता
कांतवेन समासस्यांतर्गतः स
उत्तरपदद्विगुः । यथा पंचगाव
धनः समाहारद्विगुं लक्षयति ।
स्वार्थान्वित समाहार लक्षकः
स्वाम शब्दकः । उक्ताभ्यां भिन्नः
किं वा समाहारद्विगु द्विगुः ॥
स्वोपस्थाप्यार्थस्य समाहारलक्ष
को यदीयांत्यशब्दः स द्विगुः स
माहारद्विगुः । यथा पंचपूली
त्यादि २ तत्पुरुषं लक्षयति ।
यदीयेनस्वार्थेन युत यद्बोधकत
कः । यः समास स्तस्य तत्र स
तत्पुरुष उच्यते । यदर्थगतेनस्व
वर्थेन विशिष्टस्य यदर्थस्यान्व
यबोधं प्रति यः समासः स्वरूप
योग्यः स तदर्थस्य तदर्थतत्पु
रुषः । तत्पुरुषन्नामोत्तरं यन्नामय
दर्थगत स्वर्थावच्छिन्नस्य यत
स्वार्थस्य बोधकं तत्तत्र तन्नामैव
तदर्थयोः स्तत् पुरुषः स्वर्थका
योः द्वे पिप्पलीत्यादावव्याप्तेः । वि
भजते । द्वितीयादि स्वर्थस्य भे
दादेवच षड्विधः । क्रियान्वयी
द्वितीयादेर्थः प्रायोत्र योजितः
३ अव्ययीभावं लक्षयति । उत्तर
थान्वित स्वार्थमव्ययपूर्वकं लक्षयो
भवेत् । समासः सोऽव्ययीभावः
स्त्री पुं लिंग विवर्जितः ॥ यः
समासः स्वोत्तरपदोपस्थाप्यमान
दर्थान्वितस्य यदर्थस्य बोध
कोऽव्ययपूर्वभागकः सतद्विशिष्ट
स्वतदर्थस्य बोधने अव्ययीभावः
यथा निर्मक्षिकं उपकुंभमित्यादि
अपादेशं विना श्रूयमाण षष्ठी
नबोधिका स्वार्थे यदर्थस्य यद्वा
सोऽव्ययीभावरुच्यते । अपादेशं वि
नाश्रूयमाण षष्ठी स्वार्थे यत्तस
मासार्थस्यान्वयबोधं प्रत्यसमर्था
सएव वाऽव्ययीभावः श्रूयमाणेव


षष्ठी स्वार्थे समासान्तरार्थस्या
न्वयबोधने समर्था न तत्समा
पि ष बहुव्रीहिं लक्षयति । ब
हुव्रीहिः स्वगर्भार्थ संबंधित्वेन
बोधकः । निरूढया लक्षणया
स्वाशज्ञापक शब्दवान् स्वाश
स्वनिरूढलक्षणया ज्ञापकेन
शब्देन घटितः स्वगर्भस्य याद
शार्थस्य संबंधित्व प्रकारेणान्व
यबोधं प्रति समर्थः समासः स्व
गर्भं तादृशार्थ संबंधि बोधने
बहुव्रीहिः । अस्यैकं प्रथमांतैः सत
स्वैवैते तितरैः सह । यदा भेदस्यैवैतेन
साकांक्षनाम विग्रहः । अस्य ब
हुव्रीहेर्घटक मेकं नाम प्रथ
मांतं सत् स्वैवैते तितरनामभिः
सह भेदार्थक स्वैवैत पद्धेहेन
साकांक्षं विग्रहः कथ्यते । ब
हुव्रीहिं विभजेत तदतद्गुण
संविज्ञानौ द्वौ भेदौ तदादिमः
विग्रहस्य विशेष्यो यः स्तद्वि
शेष्यक बोध्यकृत् । तत्र विग्रह
वाक्यस्य विशेष्य विधया प्रत्य
येयो योऽर्थः स्तद्विशेष्यकबोध
कृत् बहुव्रीहि स्तयो रादिमः
तद्गुणसंविज्ञानः तस्य स्वा
घटकीभूतस्य सम्यग्विशेष्यवि
धया विज्ञाने यस्मिन्निति श्रुत
पमास्वार्थान्वयः संज्ञात्वात् त
च्छिन्न स्यातद्गुणसंविज्ञान श्च
रमइत्यस्माद्वगम्यते प्राचांमते
न तद्गुणसंविज्ञान बहुव्रीहि
मन्यथा निर्दिशि । यः स्वार्थघट
कार्थस्य स्वार्थान्वयिनि बोधने
अनुकूलो बहुव्रीहिः सतयोरद्य
वादिमः । यो बहुव्रीहिः स्वार्थस्या
न्वयिनि स्वार्थघटकस्यार्थस्या
न्वयबोधने समर्थः सतयोरत
द्गुण तदगुणयोरादिमः । लंब
कर्णमानय हारग्रीवं पश्य इत्या
दि पुनर्विभजते स्वांतर्निविष्ट
द्वित्र्यादि नामभि विंग्रहात् पुनः
बहुव्रीहि र्बहुविधो द्विपद त्रि
पपदादिकः हि त्रिचतुरादि
भिर्देवे स्वघटक नामभिर्विग्र
हवशात् द्विपद त्रिपद् चतुष्प
दादिको बहुव्रीहि र्बोध्यः ॥
५ द्वंद्वं लक्षयति यद्यदर्थकय
न्नामद्वंद्वे यद्यत् प्रकारके ।
बोधे समर्थः सद्वंद्वः समास
स्तावदर्थकः यद्यदर्थोपस्था
पकस्य क्रमिकयोर्द्वन्नामयो
मस्यानिष्ठाय स्तदर्थप्रकारको
न्वयबोधं प्रति तेनैव समर्थला

हश्च नामवत् एव तावदर्थको
द्वंद्वसमासः। द्वंद्वं विभजते द्वाभे
दावस्य शास्त्रोक्तौ समाहारेतरे
तरौ एकान्यवचनाकांक्षा हानो
पादानतश्च तौ ॥ अस्य द्वंद्वस्य
द्वौ भेदौ समाहार इतरेतरश्च
प्राग्वसिद्धौ ॥
तत्रैकवचनान्त्य सर्वाकांक्षावि
हीनः समाहारः। तथाविध स
र्वाकांक्ष इतरेतरः यथा। पा
णिपादं हस्त्यश्वं धवखदिरौ।
इत्यादि ९ उपपदसमासलक्ष
यति। यत्रोत्तरपदं नामानुत्तरं य
दत्रोपपदं। धातुकृत् सुपप
दसमासः सतदंतकः ॥ धातु
कृत्सो निष्पन्नं यस्योत्तरपदं।
शब्दान्तरं स यदुपपदस्यवो
पं प्रथमसमर्थं तादर्थ्यार्थेता·
तादर्थ्यार्थकोपपदकः समा
सः उपपद संज्ञकः। कुंभकारः
सौरपायीत्यादि विभजते।
कार्वकेकोपपदकः षड्विधोय
मिति भ्रमः। कर्मकर्त्राद्युपपद
भेदात् बहुविधस्त्वसौ ७ ॥
इतिशब्दार्थप्रकाशिका ॥
समासक्तः त्रि संयुक्तः। यथा।
त्रिपंचाशे पाठे शव शिव हारि

स्मरवदनो महाकालेनाश्चैर्मदन
रसलावण्य निरता। समासक्ता
नक्तं स्वयमपि रतानन्दनिरता·
जनो यो ध्यायेत्त्वामपि जननि
स्मरात् स्मरहरः ॥ इतिक
र्पूराद्यस्तोत्रे ॥
समासंजनं क्ली समासंगः।
मेलनं। संयोगः समाङ्-पूर्व
कसंजधातो रनट् प्रत्यये
न निष्पन्नं ॥
समासन्नं त्रि निकटं। समाङ्
पूर्व सद्धातोः क्तप्रत्ययेन·
निष्पन्नं ॥
समासवान् पुं तत्पुरुषः। इ
ति शब्दचंद्रिका ॥ सामासवि
शिष्टे त्रि ॥
समासादितः त्रि आसन्नः। प्रा
प्तः समाङ्-पूर्व स्योतसदधातोः
क्तप्रत्ययेन निष्पन्नः ॥
समासार्थे त्रि प्राप्यं। इत्यम
रः। अनुस्वारपूर्वसंघेन प्राप्त
नेत्रवैपयकक्रिया ॥
समासार्था स्त्री समस्या श्लोक
स्य पादेनैकेन द्वाभ्यां त्रिभिर्वा
पूरणं। इत्यमरभरतौ ॥
समाहरणं क्ली समाहारः समा
ङ्-पूर्वक हृञ् धातो रनट् प्र·

त्ययेन निष्पन्नं ॥
समाहारः पुं समुच्चयः इत्यमरः
बहूनां भिन्नानां वाह्यव्यापारेण
बुद्ध्या वा पंचवटीत्रिभुवनवत्
राशीकरणं। इतिभरतः ॥ सं
क्षेपः। यथा। समासस्तु स
माहारः संक्षेपः संग्रहोपि च ॥
इतिहेमचंद्रः ॥
समाहारद्वंद्व समाहारद्विगु स
मासयो विवरणं समासशब्दे
द्रष्टव्यं ॥
समाहितः त्रि समाधिस्थः। अङ्गी
सिद्धान्तः शास्त्रितः। निर्विवा·
दीकृतः। प्रतिज्ञातः। इति मे
दिनी। नियमः। इति धर·
णी। मुचोत्रे। इति शब्दरत्ना
वली ॥
समाहृतः त्रि समस्ककारेण
आहरणीकृतः। संगृहीतः ॥
एकत्रीकृतः। संक्षेपेण प्रतिपा
दितः। समाङ्-पूर्वकहृधातोः क्त
प्रत्ययेन निष्पन्नः ॥
समाहृतिः स्त्री संग्रहः। इत्यम
रः। एककर्तृकाणा मनेककर्तृ
काणां वा एकाभिप्रायाणां वा
वाक्यानां समाहरणं समाहृतिः
समाह्रियते संक्षेपेण प्रतिपाद्य

पद्यते अनया समाहृतिः। सं
ग्रहः। आङ्-पूर्वात् हृञ् हरणे
इत्यस्मात् क्तिः। इति भरतः ॥
समाह्वयः पुं द्यूते। आह्वाने।
इति शब्दरत्नावली पशुपति
द्यूते संगरे। इति मेदिनी ॥
तस्य निषिद्धत्वं यथा। द्यू
तं समाह्वयं चैव राजा राष्ट्रा
न्निवारयेत्। राज्यान्तकरणा
वेतौ द्वौ दोषौ पृथिवीक्षितां
प्रकाशमेतत्तास्कर्यं यद्देव
न समाह्वयौ। तयोर्नित्यं प्र
तीघाते नृपतिर्यत्नवान् भवेत्
अप्राणिभिर्यत् क्रियते तल्लो
के द्यूतमुच्यते। प्राणिभिः
क्रियते यस्तु स विज्ञेयः समाह्व
यः ॥ द्यूतं समाह्वयञ्चैव·
यः कुर्यात् कारयेत वा ॥
तान् सर्वान् घातयेद्राजा शू
द्रांश्च द्विजलिंगिनः। इति
मानवे ९ अध्यायः ॥
समाह्वा स्त्री गोजिह्वावृक्षः
इति शब्दचंद्रिका। समाख्यात
समिकं क्ली प्रोतं। बडशादि
भाषा। इति शब्दरत्नावली ॥
समित् स्त्री युद्धं। इत्यमरः ॥
समित् स्त्री अग्निसंदीपनकाष्ठं



काष्ठादिः। तत्पर्य्यायः। इन्ध
ने २ एधं ३ इध्मं ४ एधः ५।
इत्यमरः। समित्पतनं ६ पत
स्मिन् सत्त्वे किलिंजं। इति श
ब्दरत्नावली। होमीयसमि
ल्लक्षणं मत्स्यपुराणे। प्रादे-
शमात्राः सशिखाः सवल्काश्च
पलाशिनीः। समिधः कल्पयेत्
प्राज्ञः सर्व्वकर्म्मसु सर्व्वदा। ल
क्षणान्तरं यथा छन्दोगपरि
शिष्टं। नांगुष्ठादधिका ग्राह्या
समित् स्थूलतया क्वचित्। न
निर्मुक्ता त्वचा चैव न सकीटा न पा
टिता। प्रादेशान्नाधिका नोना
न तथा स्याद्विशाखिका। न स
पत्रा न निर्वीर्य्या होमेषु च वि
जानता। इति संस्कारतत्त्वं॥
तस्या निषिद्धलक्षणं यथा।
विशीर्णा विदला ह्रस्वा वक्राः
स्थूला द्विधाकृताः। कृमिदष्टा
श्च दीर्घाश्च समिधो नैव कार
येत्। अत्र दोषा यथा। विशी
र्णायुःक्षयं कुर्य्याद्विदला पुत्र-
नाशिनी ह्रस्वा नाशयते पत्नीं
वक्रा बंधुविनाशिनी कृमिद
ष्टा रोगकरी विद्वेषकरणी द्विधा
पशून्मारयते दीर्घा स्थूला चार्थ
विनाशिनी। इति तत्त्वं॥
नवग्रहाणां समिधो यथा। अर्कः
पलाशः खदिरस्त्वपामार्गोऽथ
पिप्पलः उदुम्बरः शमी दूर्वा कु
शाश्च समिधः क्रमात्। इति
संस्कारतत्त्वे याज्ञवल्क्यवचनं।
समिता स्त्री गोधूमचूर्णं मयदा
इति भाषा। इति हेमचन्द्रः॥
तस्या लक्षणं यथा गोधूमाय
वल्ला धौताः कुट्टिताः शोषिता
स्ततः। प्रेषितास्ताः सा विनिष्पि
ष्टा स्फालिताः समिता स्मृता॥
इति राजनिर्घण्टः॥
समितिः स्त्री सभा। युद्धं॥
संगः। इत्यमरः मेदिनीकरौ॥
साम्यं। इति हेमचन्द्रः॥
समिथः पुं अग्निः इत्युणादि-
कोषः। युद्धं। इति सिद्धान्तको
मुद्यां उणादिवृत्तिः। आकृतिः
इति संक्षिप्तसारोणादिवृत्तिः॥
समिध् स्त्री समित्। इत्यमरः।
समिधः पुं अग्निः। इति त्रिका
ण्डशेषः॥
समिन्धनं क्ली समित्। इति
शब्दरत्नावली॥
समिरः पुं वायुः। इति हेमचन्द्रः
॥

समीकं क्ली युद्धं। इत्यमरः।
समीकृतं त्रि एकीकृतं। समा
नीकृतं। कृञ् धातोः परे सम
शब्दात् च्वि प्रत्ययेन निष्पन्नं।
समीचः पुं समुद्रः। इत्युणादि-
कोषः॥
समीचकः पुं मैथुने। इति
केचित्॥
समीची स्त्री मृगी। इत्युणादि
कोषः। वन्दना। इति त्रिका
ण्डशेषः॥
समीचीनं क्ली यथार्थं। तत्प
र्य्यायः। सत्यं २ सम्यक् ३
ऋतं ४ तथ्यं ५ यथातथं ६
यथास्थितं ७ सद्भूतं ८। इति
हेमचन्द्रः। तद्वति त्रि॥
समीदः पुं गोधूमचूर्णं। इति
केचित्॥
समीनः त्रि वत्सरसंबंधी। समा
शब्दात् ख इति प्रत्ययेन निष्पन्नः
समीनिका स्त्री प्रतिवर्षप्रसूता
गौः। इति शब्दचन्द्रिका॥
समीपः त्रि निकटः। इत्यमरः।
समीपता स्त्री नैकट्यं। समीप
त्वं। सामीप्यं। समीपशब्दात् त
प्रत्ययेन निष्पन्ना॥
समीयः त्रि समसंबंधी तत्प-
कारणकः समशब्दात् छीय
प्रत्ययेन निष्पन्नः॥
समीरः पुं वायुः। इत्यमरः॥
समीहृतः। इति राजनिर्घण्टः
समीरणः पुं वायुः। मरुवकः।
इत्यमरः पथिकः। इति मे-
दिनी॥
समीक्षं क्ली सांख्यशास्त्रं। इ
ति त्रिकाण्डशेषः। सम्यग्दर्शने
च। समीक्षणं क्ली सम्यक्प्रका
रेण दर्शनं। प्रेक्षणं संपूर्वईक्ष
धातोः ल्युट् प्रत्ययेन निष्पन्नं।
समीक्षा स्त्री तत्त्वं। बुद्धिः॥
निभालनं। इति मेदिनी॥
मीमांसाशास्त्रं। यत्नः। इ
ति शब्दरत्नावली॥
समुखः त्रि वाग्मी। वावदूकः
इति हेमचन्द्रः॥
समुचितः त्रि सम्यगुचितः। उप
युक्तः। यथा। वदामस्ते किन्ना
जननि वयमुच्चैर्जडधियो न
धाता नापीशो हरिरपि न ते-
वेत्ति परमं। तथापि त्वद्भक्ति
र्मुखरयति चास्माकममिते त
देतत् क्षन्तव्यं जननि लघुपद्योक्तः
समुचितः। इति तंत्रसारधृततारा
माहात्म्यं॥

समुच्चयः पुं समाहारः । इत्य
मरः । यथा राज्ञो हयो वेरू
नाञ्च समाहारः समुच्चयः । इति
शब्दरत्नावली ॥
समुच्छेदः पुं विनाशः । संपूर्व्वा
त् एवं छिद्धातोर्घञ्प्रत्ययेन
निष्पन्नः ॥
समुच्छ्रयः पुं विरोधः । उत्
सेधः । इति मेदिनी ।
समुच्छ्रायः पुं समुच्छ्रयः । सम्
सूर्व्व श्रिधातो र्घञ प्रत्ययेन
निष्पन्नः ॥
समुच्छ्रितः त्रि उच्चः । समुत्
पूर्व्व श्रिधातोः क्त प्रत्ययेन
निष्पन्नः ॥
समुज्झितः त्रि त्यक्तः । इत्य
मरः ॥
समुत्क्रमः पुं ऊर्द्ध्वगमने ।
समुत्पूर्व्व क्रमधातो र्घञ् प्रत्य
येन निष्पन्नः ॥
समुत्क्रोशः पुं कुररपक्षी ॥
इति शब्दरत्नावली । उच्चैः
शब्दश्च ॥
समुत्थः त्रि समुद्भवः । समुत्थि
तः । समुत्पूर्व्व स्थाधातो र्ड प्रत्य
येन निष्पन्नः ॥
समुत्थानं क्ली समुद्योगः । व्या

धीनोनिर्णयः । इति मेदिनी ॥
ऊर्द्ध्वगमनं । सम्यक्प्रकारेण
उत्थाने । उत्तोलने । यथा । इंद्र
ध्वज समुत्थाने प्रमादान्न कृते
यदि । तदा द्वादशमे वर्षे कर्त्त
व्यं नांतरा पुनः । इति तिथ्या
दितत्वं ॥
समुत्थितः पुं सम्यगुत्थितः ।
यथा । समुत्थितस्त्वे श्रवणाद्यथा
देशृहाण पूजां भगवन्नम स्ते
इति तिथ्यादितत्वे शक्रोत्थान
पूजामंत्रः ॥
समुत्पन्नः त्रि समुद्भूतः । यथा
पुस्तकस्या च या विद्या परहस्त
गतं धनं । कार्य्यकाले समुत्प
न्ने न सा विद्या न तद्धनं ॥
इति चाणक्यं ॥
समुत्पिंजः त्रि अत्यंतव्याकुलः ।
यथा उत्पिंजल समुत्पिंजपिं
जला भृशमाकुले । इतिहे
मचंद्रः ॥
समुत्पिंजः पुं भृशमाकुलसैन्य
इत्यमरः ॥ त्रि
समुत्सुकः सम्यगुत्कंठितः ।
इति हेमचंद्रः उत्सुकशब्दार्थंद
र्शनात् सम्यगिष्टार्थोद्युक्तः
इत्यमरे उत्सुकशब्दार्थं

दर्शनात् ॥
समुदक्तं त्रि उद्धृतं । कूपादे
रुद्धृतजलादि । इत्यमरः ॥
समुद्भूतः त्रि समुत्पन्नः । यथा
सात्त्वकीनाम् सुरानस्त्रुर्भवद्भि
स्तूयतेऽचका । शरीरकोषतः
शास्याः समुद्भूताब्रवीच्छिवा
इति देवीमाहात्म्यं ॥
समुदयः क्ली लग्नं । यथा साम
र्थ्यं तनु कल्पते समुदये वित्तं
कुटुंबे ततो विक्रोर्तिं सहजं त
तीयभवने योधंच संचिंतयेत्
इत्यादि ज्योतिस्तत्वं ॥
यस्माद्दीचक्रांतगतेचतुर्थिनाडी
सान्तु जन्मनक्षत्रावधिकाष्टार
शनक्षत्ररूपा तत्पर्य्यायः । सा
मुदायिकं २ यथा । जन्मर्क्षं
कर्म्म तनोदशमं सांघातिकंषो
डशतं । समुदयमष्टादशभं
विनाश संज्ञं त्रयोविंशं ॥
संतमे सामुदायिक मित्रभू
त्यर्क्षे संक्षयः । इति ज्योति
स्तत्वे ॥
समुदयः पुं समूहः इत्यमरः
युद्धं । समुद्गमः । इति मेदि
नी । दिवसः । इति शब्द
चंद्रिका ॥

समुदागमः पुं समंताज्ज्ञाने ।
इति त्रिकाण्डशेषः ॥
समुदाचारः पुं आशयः । इति
त्रिकांडशेषः ॥
समुदायः पुं समूहः । युद्धं ।
इत्यमरः । पृष्ठस्थायिबलं । इ
त्यजयः । समुच्छ्रयः । इति
मेदिनी ॥
समुदितः त्रि सम्यक्प्रकारेण
कथितः । संपूर्व्व वदधातोः क्त
प्रत्ययेन निष्पन्नः । उदये प्राप्तः
समुद्भूतः संपूर्व्व उत्पूर्व्व इन
धातोः क्त प्रत्ययेन निष्पन्नः
समुद्गः पुं संपुटकः ॥
इति हेमचंद्रः ॥
मुद्गसहितश्च ॥
समुद्गकः पुं संपुटकः । इत्य
मरः । सांपुडा इति ख्याते ।
समुद्गच्छतीति हनजनाहेम्बा
दे तिति डे समुद्गः ततः स्वा
र्थेकः । संपुटति द्वयोः संश्लि
ष्टो भवति संपुटकः उद्दाश्चि
ष्लेषे इजउ. त्वात् क ततः स्वा
र्थे कः । इतिभरतः ॥ तन्दो
विशेषश्च ॥
समुद्गमः पुं ऊर्द्ध्वगतिः । उत्
पत्तिः । संपूर्व्व उत्पूर्व्व गमधातो

तो वल् प्रत्ययेन निष्पन्नः ॥
समुद्गीर्णे त्रि उद्गीर्णे । समु
त्उद्गॄ धातोः क्तप्रत्ययेन नि
ष्पन्नं ॥
समुद्गीर्णः त्रि वमितः । उद्गी
र्णः कथितः । समुत्उद्गॄ
धातोः क्तप्रत्ययेन निष्पन्नः ॥
समुद्धतः त्रि अविनीतः । इत्य
मरः । समुद्गीर्णः । इति हेम
चन्द्रः ॥
समुद्धरणं क्ली वान्तान्ने उन्नयः
इत्यमरः वान्तार्थ उद्गीर्णार्थः
उन्नयः कूपादेर्जलाद्युत्तोलनेऽह
त्ताद्युन्मूलने वा अनयोः समु
द्धरणं समुद्ध्रियते उन्नोल्यतेऽय
न समुद्धरणं कर्मण्यनट् ।
भुक्तोज्झितोन्मूलितयोः स्या
दुद्धरणं समुद्धये । इति रभसः
इति भरतः ॥
समुद्धूतं त्रि समुत्कीर्णं । अप
नीतं । इति मेदिनी सम्यक्कम्प
कारेण उद्धूतं । उत्थापितं ।
यथा त्रैलोक्यमग्ना सचराच
राचरा विपाणकोट्याखिलवि
श्वमूर्त्तिना समुद्धृता येन वराह
रूपिणा सभे स्वयंभूर्भगवान्प्र
सीदतु । इति पाण्डवगीता ॥

समुद्रः पुं जलसमूहस्थानं । तस्यो
त्पत्ति यथा । चन्द्रोदयात्तथापः
सम्यगुन्दन्ति क्लिद्यन्तीत्यर्थः । च
न्द्रोदयात् समुन्दयन्तिवा समु
द्रः । उन्दी क्लेदे नाम्नीतिरक्
हस्वरुन्न लोप इति नलोपः ॥
अपांचैव समुद्रेन ससमुद्रइ
ति स्मृतः । इति वायुपुराणं ॥
मुद्रा मर्य्यादा तया सह वर्त्त
ते इति वा समुद्रः ॥ सम्यगु
द्रवन्तो योऽस्मिन्नत्र इति । मुद्रं रा
त्निदद्दातीति वे । समुद्राणिर
त्नादीनितैः सह वर्त्तते इति वा
इति भरतः । तत्पर्य्यायः ॥
अब्धिः २ अकूपारः ३ पारा
वारः ४ सरित्पतिः ५ उदन्वान्
६ उदधिः ७ सिन्धुः ८ सरस्वान्
९ सागरः १० अर्णवः ११ रत्नाक
रः १२ जलनिधिः १३ यादः प
तिः १४ अपांपतिः १५ इत्यम
रः । महाकच्छः १६ नदीकान्तः
१७ तरीषः १८ द्वीपवान् १९ जा
लेन्द्रः २० मंथिरः २१ क्षोणी
प्राचीरं २२ मकरालयः २३ इ
ति जटाधरः सरितांपतिः २४
जलधिः २५ नीरनिधिः २६ नी
रधिः २७ अम्बुधिः २८ पाथो

निधिः २९ पाथोधिः ३० याद
सांपतिः ३१ नदीनः ३२ इन्द्रज
नकः ३३ तिमिकोषः ३४ वारां
निधिः ३५ वारिनिधिः ३६ ।
वार्द्धिः ३७ वारिधिः ३८ तोयनि
धिः ३९ कीलालधिः ४० धर
णिधरः ४१ क्षीराब्धिः ४२ धर
णिप्लवः ४३ वीकः ४४ कचंगा
लः ४५ पेरुः ४६ मितद्रुः ४७ वा
हिनीपतिः ४८ गंगाधरः ४९ दार
दः ५० तिमिः ५१ प्राणभास्वान्
५२ ऊर्म्मिमाली ५३ महाशयः ५४
अम्भोनिधिः ५५ अम्भोधिः ५६ त
रिषः ५७ कूलंकषः ५८ तारिषः
५९ इति शब्दरत्नावली । वारिरा
शिः ६० शैलशिबिरं ६१ पतंगा
रः ६२ नवंतः ६३ महीप्राचीरं ६४
इति त्रिकाण्डशेषः । पयोधिः
६५ सरिन्नाथः ६६ अम्भोराशिः
६७ धुनीनाथः ६८ निमः ६९
कंधिः ७० अपांनाथः ७१ अस्य
जलगुणाः । विस्रत्वं । लवणर
सामयप्रदत्वं उष्णत्वं वैवर्ण्य
दोषजनकत्वं । विशेषाद्दाहार्त्ति
पित्तकारकत्वञ्च इति राजनि
र्घण्टः । अपिच । सामुद्रमुदकं
तावं सर्वदोषप्रकोपणं इति

राजवल्लभः । मुद्रायुक्तेत्रि ॥
सचसमुद्रो ब्रह्मणो मेढ्राज्जा
तः । यथा । हृदि कामो भ्रुवः क्रो
धो लोभश्चाधरदच्छदात् आ
स्याद्वाक् सिन्धवो मेढ्रात् नि
र्ऋतिः पायो रघाश्रयः । इति श्री
भागवते ३ स्कन्धे १२ अध्यायः
कल्पभेदे श्रीकृष्णौरसेन विर
जागर्भेजातः । यथा । श्रीकृष्णो
विरजां दृष्ट्वा सद्रूपां प्रियां स
तीं । उवाच रासे विरजां तीरे
नीरमनोहरे । जलादुत्थाय चाग
च्छ विधाय तनु कानने । आज
गाम हरे रन्ते साक्षाद्धाये वसुं
दरी । तांच रूपवतीं दृष्ट्वा प्रेम्णा
शेकां जगतां पतिः । चकारा
लिंगनं तस्यां चुचुम्बे च मुकु
न्दः । नानाप्रकारं शृङ्गारं वि
परीतादिकं प्रभुः । रहसि प्रेय
सीं प्राप्य चकार च पुनः पुनः ।
विरजा सा रजोयुक्ता ष्टन्वादी
ध्यमेचकं । सद्योवभूव तत्रैव
धन्या गर्भवती सती । तस्यां तत्र
सुखासीनां सार्द्धं च त्रैश्च सप्त
भिः । एकदा हरिणा सार्द्धं वृन्दा
वने पुनर्निर्जने । विजहार पुनः
साध्वी शृङ्गाररसकमानसा । ए

तस्मिन्नन्तरे तत्र मातुः क्रोडञ्ज
गाम ह कनिष्ठपुत्त्र स्तस्याश्च
भ्रातृभिः पीडितोभिया भीतस्व
तनये दृष्ट्वा तत्याज तोकृपानि
धिः। क्रोडे च कारवालं सा कृत्वा
गाथागृहे ययौ। प्रबोधवाले
सा साध्वी न ददर्शान्तिके प्रिये।
विललाप भृशं तत्र भृङ्गारात्
स्त्रमानसा शशाप स्वसुतं को
पात् लवणोदो भविष्यति।
कदापि ते जलं केन न खादिष्य
ति जीविनः। शशाप सर्वान्
बालांश्च यान्तु मृत्युं महीतले।
गच्छन्तु च महीं सूक्ष्मां जंबूद्वी
पं मनोहरं। स्थितिर्नैकत्र यु
ष्माकं भविष्यति पृथक् पृथ
क्। द्वीपे द्वीपे स्थितिं कृत्वा ति
ष्ठन्तु खिन्नः सुताः। द्वीपस्था
भि नदीभिश्च सह क्रीडन्तु निर्ज
ने। कनिष्ठा मातृशापाच्च वल
तोदो बभूव ह कनिष्ठः कथया
मास मातृशापं च बालकान्।
आजग्मुर्दुःखिताः सर्वे मातृस्था
नं च बालकाः कृत्वा विवरणं स
र्वं प्रजग्मुर्धरणीतलं। प्रणम्य मा
तृचरणौ भक्तिनम्रात्मकन्धराः
सप्तद्वीपसमुद्राश्च सप्त तस्य वि

भागशः। कनिष्ठाद्वृद्धपर्य्यन्तं द्वि
गुणं द्विगुणं मुने लवणेक्षुसुरा
सर्पिर्दधि दुग्ध जलार्णवाः॥
एतेषां च जलं स्पृश्यं प्रशस्यं च
भविष्यति व्यासाः समुद्राः सप्तैव
सप्तद्वीपाः वसुन्धरा। इति ब्रह्म
वैवर्ते श्रीकृष्णजन्मखण्डे ३ अ
ध्यायः॥ तस्य ह्रासवृद्धिकार
णं यथा। अपाञ्चैव समुद्रेऽकौ
तस्समुद्र इति संज्ञितः उदयन्ती
दौ पर्वे तु समुद्रः पूर्य्यते सदा
प्रक्षीयमाणे बहुले क्षीयतेऽस्त
मिते न वै। आपूर्य्यमाणो ह्यु
दधिरात्मनैवाभिपूर्य्यते। त
तो वै क्षीयमाणस्य स्वात्मन्येव
ह्यपां क्षयः। उदीर्य्यन्तेऽग्नि सं
योगात् उष्मा स्वापो यथा स्थितं
तथा स्वतः समुद्रोऽपि वर्द्धते श
शिनोदये। अन्यूनानतिरिक्ता
स्ता वर्द्धन्त्यापो ह्रसन्ति च॥
उदयास्तमये विन्दोः पक्षयोः
शुक्लकृष्णयोः। क्षयो वृद्धिश्च
उदधेः सोम वृद्धिक्षयौ यथा
दशोत्तराणि पञ्चाथ अङ्गुलानां
शतानि च। अपां वृद्धिः क्षयो
दृष्टः समुद्राणां तु पर्वसु॥
इति मात्स्ये १०० अध्यायः

अन्यत् विष्णुपुराणे २ अंशे ४
अध्याये द्रष्टव्यं॥ समुद्रे व
र्जनीयानि यथा। अब्धौ हि
पातॢ रत्नास्मि पोत यादोज
लप्लवाः। विष्णुकल्पागम शुद्ध
वृद्धि दीर्घाध्वसरणं। इति कवि
कल्पलतायां १ स्तबके ३ कु
सुमे॥ कलौ द्विजानां समु
द्रयात्रादि निषेधो यथा। बृ
हन्नारदीये। समुद्रयात्रा स्वी
कारः कमण्डलु विधारणं द्विजा
नामसवर्णासु कन्यासूपयमस्त
था। देवरेण सुतोत्पत्ति र्मधुपर्के
पशोर्वधः। मांसादनं तथा
श्राद्धे वानप्रस्थाश्रमस्तथा द
त्तायाश्चैव कन्यायाः पुनर्दानं व
रस्य च। दीर्घकालं ब्रह्मचर्य्यं न
रमेधाश्वमेधकौ। महाप्रस्थान
गमनं गोमेधं च तथा मखं।
इमान् धर्मान् कलियुगे वर्ज्या
नाहुर्मनीषिणः। इति उद्वाह
तत्त्वं। तस्य मन्थनं यथा।
कृतस्नानविभागा से एवं क
श्यपनन्दनाः। समस्याः परमं यत्ना
दमृतार्थं पयोनिधिं। मथ्यमा
नेऽर्णवे सोऽद्रिरनाधारो ह्यपो
विशत्। ध्रियमाणोऽपि ब

लिभिर्गौरवात् पाण्डुनन्दनाः॥
ते सुनिर्विण्णमनसः परिम्लानमु
खश्रियः आसन् स्वपौरुषे न
ष्टे दैवेनातिबलीयसा। विलो
क्य विघ्नेशविधिं तदेश्वरो दुर
न्तवीर्य्योऽवितथाभिसन्धिः कृ
त्वा वपुः काच्छपमद्भुतं मह
त् प्रविश्य तोयं गिरिमुज्ज
हार। तमुत्थितं वीक्ष्य कुला
चलं पुनः समुद्यता निर्मथितुं
सुरासुराः। दधार पृष्ठेन स ल
क्षयोजनप्रस्तारिणा द्वीपइवाप
रो महान्। सुरासुरेन्द्रैर्भुजवीर्य्य
वेपितं परिभ्रमन्तं गिरिमङ्ग
पृष्ठतः। बिभ्रत्तदावर्त्तनमादिक
च्छपो मेनेऽङ्गकण्डूयनमप्रमे
यः। निर्मथ्यमानादुदधेरभूद्वि
षं महोल्वणं हालाहलाख्य
मग्रतः। सम्भ्रान्तमीनोन्मकरा
हि कच्छपात् तिमि द्विपग्राह
तिमिङ्गिलाकुलात्। तदुग्रवेगं
दिशि दिश्युपर्य्यधो विसर्पदु
त्सर्पदसह्यमप्रति भीताः प्रजा
दुद्रुवुरङ्ग सेश्वरा अरक्ष्यमाणाः
शरणं सदाशिवं तद्दृष्ट्वा व्यस
नं तासां कृपया भृशपीडितः
सर्वदेवसुहृद्देव इद माह स॰

ते प्रियं । अहो वत भवान्येत
त् प्रजानां पश्य वैशसं । क्षी
रोदमथनोद्भूतात् कालकूटा
दुपस्थितं ॥ आसां प्राणप
रीप्सूनां विधेयमभयं हि मे ।
एतावान् हि प्रभोरर्थो यद्दीन
परिपालनं । प्राणैः स्वैः प्राणि
नः पान्ति साधवः क्षणभङ्गुरैः ।
बद्धवैरेषु भूतेषु मोहितेष्वा
त्ममायया । पुंसः कृपयतो भ
द्रे सर्वात्मा प्रीयते हरिः । प्री
ते हरौ भगवति प्रीयेऽहं सचरा
चरः । तस्मादिदं गरं भुञ्जे प्रजा
नां स्वस्तिरस्तु मे । एवमामंत्र्य
भगवान् भवानीं विश्वभावनः
तद्विषं जग्धुमारेभे प्रभावज्ञा
न्वमोदत । ततः करतलीकृत्य
व्यापि हालाहलं विषं । अभ
क्षयन्महादेवः कृपया भूत
भावनः । तस्यापि दर्शयामा
स स्ववीर्यं जलकल्मषः । यच्च
कार गले नीलं तच्च साधुविभू
षणं । पीते गरे वृषाङ्केण प्रीता
स्तेऽमरदानवाः । ममन्थुस्तरसा
सिन्धुं हविर्धानी ततोऽभवत् ॥
तामग्निहोत्रीमृषयो जगृहुर्ब्र
ह्मवादिनः । यज्ञस्य देवयानस्य

मेध्याय हविषे नृप । ततउच्चैः
श्रवा नाम हयोऽभूच्चन्द्रपा
ण्डुरः । तस्मिन् बलिः स्पृहां च
क्रे नेन्द्र ईश्वरशिक्षया । तत ऐ
रावतो नाम वारणेन्द्रो विनिर्ग
तः । दन्तैश्चतुर्भिः श्वेताद्रेर्हरन्
हिमवतो महीं । ऐरावणादय
स्त्वष्टौ दिग्गजा अभवंस्ततः ॥
अभ्रमु प्रभृतयोऽष्टौ च करि
ण्यस्त्वभवन्नृप । कौस्तुभाख्य
मभूद्रत्नं पद्मरागो महोदधेः । त
स्मिन्मणौ स्पृहां चक्रे वक्षोऽलंक
रणे हरिः । ततोऽभवत् पारिजा
तः सुरलोकविभूषणं । पूरय
त्यर्थिनो योऽर्थैः शश्वद्भुवि यथा
भवान् । ततश्चाप्सरसो जाता
निष्ककण्ठ्यः सुवाससः । रमण्यः
स्वर्गिणां वल्गुगतिलीलावलो
कनैः । ततश्चाविरभूत् साक्षात्
श्रीरमा भगवत्परा । रंजयन्ती दि
शः कान्त्या विद्युत्सौदामनी यथा
तस्यां चक्रुः स्पृहां सर्वे ससुरासु
र मानवाः । रूपौदार्यवयोवर्ण
महिमाक्षिप्तचेतसः । तस्याः
श्रिय स्त्रिजगतो जनको जन
न्या वक्षोनिवास मकरोत्परमं
विभूतेः । श्रीः स्वाः प्रजाः ।

सकरुणेन निरीक्षणेन यत्र स्थितै
धयत साधिपतींस्त्रिलोकान् ॥
अथासीद्वारुणी देवी कन्या कम
ललोचना असुरा जगृहुस्तां
वै हरेरनुमतेन ते । अथोदधेर्म
थ्यमानात् काश्यपैरमृतार्थि
भिः । उदतिष्ठन्महाराज पुरुषः
परमाद्भुतः । दीर्घपीवरदोर्द
ण्डः कम्बुग्रीवोऽरुणेक्षणः । श्या
मलस्तरुणः स्रग्वी सर्वाभर
णभूषितः । पीतवासा महोरस्कः
सुमृष्टमणिकुण्डलः । स्निग्धकु
ञ्चितकेशान्तः सुभगः सिंहविक्रमः
अमृतापूर्णकलसं बिभ्रद्वलयभू
षितः । स वै भगवतः साक्षाद्विष्णो
रंशांशसम्भवः । धन्वन्तरिरिति
ख्यात आयुर्वेददृगिज्यभाक् ।
तमालोक्यासुराः सर्वे कलसं चा
मृताभृतं । लिप्सन्तः सर्ववस्तूनि
कलसं तरसाहरन् । नीयमानेऽ
सुरैस्तस्मिन् कलसेऽमृतभाज
ने । विषण्णमानसा देवा हरिं श
रणमाययुः । एतस्मिन्नन्तरे विष्णुः
सर्वोपायविदीश्वरः ॥ योषिद्रू
पमनिर्देश्यं दधार परमद्भुतं ।
ततो गृहीत्वामृतभाजनं हरि
र्बभाष ईषत्स्मितशोभया गि

रा । यद्यभ्युपेतः क्व च साध्व
साधु वा कृतं मया वो विभ
जे सुधामिमां । कल्पयित्वा पृ
थक् पंक्तीरुभयेषां जगत्प
तिः । तांश्चोपवेशयामास स्वे
षु स्वेषु च पंक्तिषु । दैत्यान् गृ
हीतकलसो वंचयन्नुपसंचरैः
दूरस्थान् पाययामास जरामृ
त्युहरां सुधां । देवलिंगप्रतिच्छ
न्नः स्वर्भानुर्देवसंसदि । प्रवि
ष्टः सोममपिबच्चन्द्रार्काभ्यां च
सूचितः । चक्रेण क्षुरधारेण
जहार पिबतः शिरः । हरिस्तस्य
कबंधस्तु सुधया प्लावितोऽ
पतत् । शिरस्त्वमरतां नीतम
जो ग्रहमचीक्लृपत् । यस्तु पर्व
णि चन्द्रार्कावभिधावति वैरधीः
पीतप्रायेऽमृते देवै भगवान्
लोकभावनः । पश्यतामसुरे
न्द्राणां स्वं रूपं जगृहे हरिः । इ
ति श्रीभागवते ८ स्कन्धे ७।८
९ अध्यायाः ॥ पाद्मे उत्तरखण्डे
८९ अध्यायेप्येवं ॥ समुद्रक
फः पुं समुद्रफेनः । इति त्रि
काण्डशेषः ॥
समुद्रकान्ता स्त्री नदी । इति ह
लायुधः । स्पृक्का । इति राजनि

चेण्टः ॥

समुद्रगा स्त्री नदी। इति हेमचन्द्रः। साक्षात्समुद्रगामिनी नदी। यथा। ग्रहद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः। इति प्रायश्चित्ततत्त्वे छन्दोगपरिशिष्टवचनं॥ समुद्रगामिनि त्रि॥

समुद्रगृहं क्ली जलयन्त्रगृहं इति त्रिकाण्डशेषः॥

समुद्रचुलुकः पुं अगस्त्यमुनिः इति त्रिकाण्डशेषः॥

समुद्रदयिता स्त्री नदी। इति हेमचन्द्रः॥

समुद्रनवनीतं क्ली अमृतं। चन्द्रः। इति मेदिनी॥

समुद्रफलं क्ली अब्धिफलं। औषधविशेषः। यथा। समुद्रनामप्रथमं पश्चात् फलमुदाहरेत्। समुद्रफलमित्यादि नाम वाच्यं भिषग्वरैः। फलं समुद्रस्य कटूष्णकारि वातापहं भूतनिरोधकारि। त्रिदोषदावानलदोषहारि कफामयभ्रान्तिविरोधकारि। इति राजनिर्घण्टः॥

समुद्रफेनः पुं स्वनामख्यातद्रव्यं। तत्पर्य्यायः॥ फेनः २ अब्धिकफः ३ अर्णवजमलः ४ इति रत्नमाला। हिण्डीरः ५ डम्भरः॥ समुद्रकफः ६ जलहासः ७ फेनकः ८। इति त्रिकाण्डशेषः॥ समुद्रफेनं ९ फेनं १० वार्द्धिफेनं ११ पयोधिजं १२ सफेनं १३ अब्धिहिण्डीरं १४। सामुद्रं १५। अस्य गुणाः। शिशिरत्वं। कषायत्वं। नेत्ररोगकफकण्ठामयारुचिकर्णरोगनाशित्वञ्च। इति राजनिर्घण्टः॥ अपि च। समुद्रफेनश्चक्षुष्यो लेखनः शीतलश्च सः। कषायो विषपित्तघ्नः कर्णरुक्कफहृल्लघुः। इति भावप्रकाशः॥

समुद्रमेखला स्त्री पृथिवी। इति त्रिकाण्डशेषः॥

समुद्रयात्रा स्त्री समुद्रगमनं। यथा। समुद्रयात्रा स्वीकारः कमण्डलुविधारणं। इत्युद्वाहतत्त्वे॥

समुद्रयानं स्त्री पोतं। जाहाज इति भाषा। यथा। पुनर्लोकेऽत्र गमने वाणिज्यभावे मति र्गता। समुद्रयाने रत्नानि महामौल्यानि साधुभिः। रत्नपरीक्षकैः सार्द्धमानयिष्ये बहूनि च। एवं

निश्चित्य मनसा महासार्थपुरःसरः। समुद्रयायिभि र्लोकैः संविदं सुच्य निर्गतः। इत्युपक्रम्य शुकेन सह संप्राप्तो महान्तं लवणार्णवं। पोतारूढास्ततः सर्वे पोतवाहे कृपोषिताः॥ इति वाराहे गोकर्णमाहात्म्यनामाध्यायः॥

समुद्रयायी [न्] त्रि समुद्रगामी। यथा। समुद्रयायिभिः सार्द्धं संविदं सुच्य निर्गतः। इति वाराहपुराणं॥

समुद्ररमणा स्त्री पृथ्वी। इति हलायुधः॥

समुद्रलवणं क्ली समुद्रजलजातलवणं। करकचलवण इति भाषा। तत्पर्य्यायः। सामुद्रकं २ सामुद्रं ३ शिवं ४ वशिरं ५ सारोत्थं ६ अक्षीवं ७ लवणाब्धिजं ८ अस्य गुणाः। लघुत्वं। हृद्यत्वं। पलितास्रपित्तदत्वं। विदाहित्वं कफवातघ्नत्वं। दीपनत्वं रुचिकारित्वञ्च। इति राजनिर्घण्टः। अपि च। सामुद्रं यत्तु लवणं मक्षीवं वशिरं च तत्। सामुद्रं मधुरं पाके सतिक्तं मधुरं गुरुः॥ नात्युष्णं दीपनं भेदि अल्पाव मविदाहि च। श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलं। इति भावप्रकाशः॥

समुद्रवह्निः पुं वाडवानलः इति हलायुधः॥

समुद्रविजयः पुं हूलार्हत्पिता। इति हेमचन्द्रः॥

समुद्रसुभगा स्त्री गङ्गा। इति राजनिर्घण्टः॥

समुद्रा स्त्री सटी। शमी। इति राजनिर्घण्टः॥

समुद्रान्तं क्ली जातीफलं। इति शब्दचन्द्रिका। समुद्रान्तीरञ्च॥

समुद्रान्ता स्त्री दुरालभा। इत्यमरः। कार्पासी। पृक्का। इति मेदिनी। यवासः। इति राजनिर्घण्टः॥

समुद्राम्बरा स्त्री पृथिवी। इति त्रिकाण्डशेषः॥

समुद्रारः पुं कुम्भीरः। सेतुबन्धः तिमिङ्गिलमत्स्यः॥ इति मेदिनी॥

समुद्रियः / समुद्रीयः त्रि समुद्रसम्बन्धी। समुद्रस्य इदं द्वादिय छीयप्रत्ययाभ्यां निष्पन्नौ॥

समुन्दनं क्ली आर्द्रीभावः। तत्पर्य्यायः। तेमः २ स्तेमः ३



इत्यमरः ॥
समुन्नं त्रि आर्द्रं । इत्यमरः ॥
समुन्नतः त्रि समुन्नद्धः स्तंभमे
दः । इति धरणिः ॥
समुन्नतिः स्त्री उच्छ्रायः उत्सेधः
इति जटाधरः ॥
समुन्नद्धः त्रि पंडितम्मन्यः । गा
र्वितः । इत्यमरः । प्रभूः । इत्य
जयः । समुद्धतः । इति मेदि
नी ॥ ऊर्द्धवोढः ॥ इति हे
मचंद्रः ॥
समुपजोषं अव्य आनंदः । इत्य
मरटीकायां रामाश्रमः । ता
लव्यप्राकारादिश्च ॥
समुपेयिवान् त्रि गमनकर्त्ता
गमनविशिष्टः । समुपपूर्व्वइणधा
तोः क्वसुप्रत्ययेन निष्पन्नः ॥
समुल्लसत् त्रि सम्यगुल्लासयु
क्तः । समुत्पूर्व्वलसधातोः शतृप्र
त्ययेन निष्पन्नं ॥
समुल्लिखन् त्रि पादादिनाभू
मिलेखनकर्त्ता । यथा । तुषार
संघातशिलाः खुराग्रैः समुल्लि
खन् दर्पकलः ककुद्मान् दृष्टः
कथंचिद्गवयैर्विविग्नैरसोढ
सिंहध्वनिरुन्ननाद । इति कुमार
संभवे १ सर्गः ॥

समूढः त्रि पुंजितः । भुग्नः । सद्यो
जातः ॥ अनुपप्लुतः । इति मे
दिनी ॥ दमितः । विवाहितः ॥
इति धरणिः । प्रेरितः । इति
जटाधरः । मूलेन सहितः ॥ समूर
रुः पुं मृगभेदः ॥ इति हेम
चंद्रः ॥
समूरुः पुं मृगविशेषः । इ
त्यमरः ॥
समूलं त्रि मूलेन सह वर्त्तमाने
मूलसहिते । यथा । अधर्मेणैध
ते राजन् ततो भद्राणि पश्यति ।
ततः सपत्नान् जयति समूलस्तु
विनश्यति । इति महाभारते शा
न्तिपर्वणि राजधर्मे युधिष्ठिरंप्र
ति भीष्मवाक्यं ॥
समूहः पुं अनेकः । तत्पर्य्यायः ।
निवहः २ व्यूहः ३ संदोहः ४ वि
सरः ५ व्रजः ६ स्तोमः ७ ओघः
८ निकरः ९ व्रातः १० वारः ११
संघातः १२ संचयः १३ समुदा
यः १४ समुदयः १५ समवायः
१६ चयः १७ गणः १८ संहतिः
१९ वृंदं २० निकुरंबं २१ कदंब
कं २२ इत्यमरः । सार्थः २३ सन्न
यः २४ स्कंधः २५ निचयः २६
जालं २७ अग्रं २८ पटलं २९

काण्डं ३० मण्डलं ३१ चक्रं ३२
इति जटाधरः ॥
विस्तरः ३३ उत्करः ३४ समु
च्चयः ३५ आकरः ३६ प्रकरः
३७ संघः ३८ प्रचयः ३९ जातं
४० । इति शब्दरत्नावली ॥
समूहनी स्त्री सम्मार्ज्जनी । इति
हेमचंद्रः ॥
समूह्यः पुं यज्ञाग्निः । तत्पर्य्या
यः । परिचाय्यः २ उपचाय्यः ३
इत्यमरः । सम्यगूह्यो येन त्रि ॥
निर्विसर्गश्चेद्दानेन तर्प्याग्निः ॥
यथा । प्रागुदक् प्रवणे देशे
समेत्य परिसमूह्य । इति गो
भिलसूत्रं ॥
समृद्धः त्रि समृद्धियुक्तः । तत्
पर्य्यायः । अधिकर्द्धिः २ इत्यम
रः । अधिसंपत्तिशाली ३ ॥
इति शब्दरत्नावली ॥
समृद्धिः स्त्री सम्यग्वृद्धिः । अ
तिशयसम्पत्तिः । तत्पर्य्यायः ।
प्रथा २ इत्यमरः । विथा ३ ।
इति जटाधरः ॥
समेतः त्रि सम्यक्प्राप्तः । संयु
क्तः । यथा । नामसमेतं कृत
संकेतं वादयते मृदु वेणुं । वक्र
मनुसर तनुमनुसंगत पवन
चलितमपि रेणुं ॥ इति श्री
जयदेवः ॥
समेधितः त्रि सम्यग्वर्द्धितः
सम् एध धातोः क्त प्रत्ययेन
निष्पन्नः ॥
समोदकं क्ली मथितार्द्धांबुद
धि । अर्द्धजलयुक्तघोलं । इति
हेमचंद्रः । तत्पर्य्यायः । उदश्वि
त् २ इत्यमरः ॥
सम्पः पुं पतने । इति भूरिप्र
योगः ॥
सम्पत्तिः स्त्री विभवोत्कर्षः ।
तत्पर्य्यायः श्रीः २ लक्ष्मीः ३
सम्पद् ४ इत्यमरः । ऋद्धिः ५
इति जटाधरः ॥ भूतिः ६ ।
इति मेदिनी ॥
सम्पत् स्त्री संपत्तिः । इत्यमरः
गुणोत्कर्षः । हारभेदः ॥
इति मेदिनी ॥
सम्पदं क्ली समंपदयुग्मं । इति
शब्दमाला ॥
सम्पद्वरः पुं राजा । संपूर्व्वपद
धातो र्वैयादिक वरच् प्रत्य
येन निष्पन्नः । इति सिद्धान्तकौ
मुदी ॥
सम्पन्नः त्रि साधितः । संपत्ति
युक्तः । इति मेदिनी ॥


सम्परायः पुं आपत्। युद्धं ॥ उत्तरकालः। इत्यमरः ॥
साम्परायकं क्ली युद्धं। इत्यमरटीकायां भरतः ॥
साम्परायिकं क्ली युद्धं। इत्यमरटीकायां स्वामी ॥
सम्पर्कः पुं मेलकः। रतिः। इति मेदिनी। संसर्गः। यथा। सम्पर्कात् दुष्यते विप्रो जनने मरणेऽपि वा। सम्पर्कविनिवृत्तानामनप्रेतेनैव सूतके ॥ इति शुद्धितत्त्वं ॥
सम्पर्की त्रि सम्पर्कविशिष्टः। सम्पर्कशब्दादिन् प्रत्ययेन निष्पन्नः ॥
सम्पर्कीयः त्रि सम्पर्कयुक्तः। सम्बन्धीयः। सम्पर्कशब्दात् छप्रत्ययेन निष्पन्नः ॥
सम्पा स्त्री विद्युत्। यथा। गात्था तमसो विसारि विरहज्वालाभिरुद्धैः स्मराविष्टाभूतगणात् पयोनिधिविषमाद्युद्याव धूः सम्पातात्। पंकादेन मदेन पंकिलतनूः सम्पाति सम्पाततः सम्पाभानुभुजंगा सख विजिह्वो यान्ति भुजंगाश्रयं ॥ इत्युद्भटः ॥

सम्पाकः पुं आरग्वधवृक्षः। इत्यमरः। सम्यक्पाकश्च ॥
सम्पाकः त्रि तर्ककः। धृष्टः। इति मेदिनी। अल्पः। लम्पटः। इति धरणिः ॥
सम्पाटः पुं तर्कुः। इति शब्दमाला ॥
सम्पातः पुं पतनं। इति भूरिप्रयोगः। पक्षिणां गतिविशेषः। इति जटाधरः ॥
सम्पातिः पुं गरुडपुत्रः। स च जटायुषो भ्राता। यथा। सम्पातिर्नाम नाम्ना तु चिरजीवी विहंगमः। भ्राता जटायुषः श्रीमान् विख्यातबलपौरुषः ॥ इति रामायणे किष्किन्ध्याकाण्डे ५८ सर्गः ॥
सम्पातिकः पुं गरुडज्येष्ठपुत्रः। इति शब्दमाला ॥
सम्पादकः पुं निष्पादकः। सम्पूर्वपदधातोर्णक प्रत्ययेन निष्पन्नः ॥
सम्पादनं क्ली निष्पादनं। सम्पूर्वण्यन्तपदधातोरनट् प्रत्ययेन निष्पन्नं ॥
सम्पादितः त्रि निष्पादितः। सम्पूर्वण्यन्तपदधातोः क्त प्रत्य-

येन निष्पन्नः ॥
सम्पीडनं क्ली सम्यक्प्रकारेण पीडनं। सम्पूर्वपीडधातोरनट्प्रत्ययेन निष्पन्नं ॥
सम्पीतिः स्त्री सम्यक्पानं। सम्पूर्वपाधातोः क्तिप्रत्ययेन निष्पन्ना ॥
सम्पुटः पुं कुरुवकः। इत्यजयः। पेटा। इति हेमचन्द्रः। एकजातीयोभयमध्यवर्ती। यथा। सकामः सम्पुटो जप्यो निष्कामः सम्पुटं विना। इति। केचित्तु केवलमातृको कुलमातृकान्तरसम्पुटा। मातृकापुटितं तावन्मन्त्रं साधकसत्तमः। इति च। रतिबन्धविशेषः। तल्लक्षणं यथा। सम्प्रसार्योभयोः पादौ शय्यागतकपोलकः। भगलिंगस्य संयोगात् रमते सम्पुटो हि सः ॥ इति रतिमञ्जरी ॥
सम्पुटकः पुं आधारविशेषः ॥ सम्पुटी इति भाषा। इति भरतः। तत्पर्यायः ॥ समुद्गकः २ इत्यमरः। समुद्गः ३ सम्पुटः ४ इति हेमचन्द्रः ॥
सम्पूर्णः त्रि समग्रः। परिपूर्णः ॥ साङ्गं। यथा। गृहीतेऽस्मिन्व्रते देव यद्यपूर्णं त्वहं म्रिये। तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्दन ॥ इति तिथ्यादितत्त्वं ॥
सम्पूर्णः पुं रागस्य जातिविशेषः। स तु सप्तस्वरमिश्रितरागरागिण्यः। यथा। ओडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः ॥ सम्पूर्णः सप्तभिः प्रोक्तो रागजातिस्त्रिधा मता। इति संगीतरत्नाकरः। अपि च। सम्पूर्णस्वराः ष ऋ ग म प ध नि। सम्पूर्णरागाः सप्तभिः स्वरैर्यथा। नाट वसन्तादयः। इति संगीतदामोदरः ॥
सम्पूर्णा स्त्री एकादशीविशेषः। सा तु एकादश्युदयव्यापिनी सती षष्टिदण्डात्मिका। यथा। आदित्योदयवेलाया प्राङ्मुहूर्तद्वयान्विता। सैकादशी हि सम्पूर्णा विद्धान्या परिकीर्तिता। इति तिथ्यादितत्त्वं ॥
सम्पृक्तः त्रि मिश्रितः। तत्पर्यायः। करम्बः २ कबरः ३ मिश्रः ४ खचितः ५ इति हेमचन्द्रः ॥

सम्प्रति च अस्मिन्काले । तत्तु-
ल्यार्थाः । एतर्हि २ इदानीं ३
अधुना ४ सांप्रतं ५ ॥ इत्य-
मरः ॥
सम्प्रतिः पुं अतीतकल्पीयार्ह-
द्भेदः । इति हेमचन्द्रः ॥
संप्रतिपत्तिः स्त्री उत्तरविशेषः
यथा । मिथ्या संप्रतिपत्तिश्च
प्रत्यवस्कन्दनं तथा । प्राङ्न्या-
या श्चोत्तराः प्रोक्ता श्चत्वारः शा-
स्त्रवेदिभिः । श्रुत्वाभियोगं प्रत्य-
र्थी यदि तं प्रतिपद्यते । सा तु
संप्रतिपत्तिः स्याच्छास्त्रविद्भि-
रुदाहृता । अभियुज्यते अभि-
योगः । प्रतिपद्यते अङ्गीकरो-
ति । तेनार्थ्यार्थ्यः ॥
इति व्यवहारतत्त्वं ॥
संप्रतिबोधकं क्ली प्रतिबोधकं ।
संप्रति पूर्व बुधधातो र्ल्युट्प्र-
त्ययेन निष्पन्नं ॥
संप्रतीतिः स्त्री सम्यक्ख्यातिः
सम्यग्ज्ञानं । संप्रति पूर्व इन-
धातोः क्तिप्रत्ययेन निष्पन्ना ॥
संप्रदाता त्रि संप्रदानकर्त्ता ।
यथा । पद्माणां मुदकं कार्ष्णे ।
त्रिषु पित्रः प्रवर्त्तते । चतुर्थ्यः
संप्रदानेषां पंचमो ल्योप ।
पद्यते । इति स्मृतितत्त्वे काम्या-
यनवचनं ॥
संप्रदानं क्ली सम्यक्प्रकारेण
दानं । षट्कारकान्तर्गत कारक-
विशेषः । सच त्रिविधस्ताको-
धेर्णा रुचि प्रोह स्या त्रस्ता-
च स्मृति प्राप्तीत्तामतिश्रुप्र-
सन्तुष्ट पार्थ्यर्थानां विषयः ॥
तत्र चतुर्थी विभक्तिः स्यात् ।
मुख्यं संप्रदानं तत्प्रकृष्टं दाने-
यो लभते सः । तथा चोक्तं ।
संप्रदानं तदेव स्यात् अनुग्र-
हकाम्यया । दीयमानेन संयो-
गात् स्वामित्वं लभते यदि ॥
इति भद्रबोधव्याकरणटीकायां
दुर्गादासः । अपि च । गम्यादिभि-
न्ने धात्वर्थे चतुर्थ्या विग्रहस्य
या । यः स्वार्थो बोधनीय स्तत्
संप्रदानत्व मीरितं । गम्यादिभि-
न्ने यद्धातूपस्थाप्यव्यापारप्रयोज्यं वि-
ग्रहस्य चतुर्थ्या यः स्वार्थो बो-
धयितुं शक्यते स तद्धातूपस्था-
प्यव्यापारप्रयोज्य क्रियायां संप्रदानत्व-
मुच्यते । ब्राह्मणाय दानं धन-
स्य इत्यादौ ददातेः स्वत्वजन-
क त्यागोऽर्थः तत्र विशिष्टे च
स्वत्वे ब्राह्मणादेः प्रतियोगित्वं

निरूपितत्वं वा चतुर्थ्या बोध्यते
इति तदेव तत्र संप्रदानत्वं ब्रा-
ह्मणादि प्रतियोगिकं यद्धनच-
निस्वत्वं तज्जनक त्याग इत्येवं
तत्र प्रत्ययात् धात्वर्थतावच्छेद-
कीभूत स्वत्वाख्य फलवत्त्वयाच-
नादे दानकर्म्मत्वात् । नचैवं
पशुकामनया यागकरणदशा-
यां चैत्रः स्वात्मने पशुं ददाती-
त्यपि प्रयोगापत्तिः तादृशयाग-
स्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं
तज्जनक त्यागत्वादिति वाच्यं स्व-
त्वध्वंसजनकक्रियापर्य्यवसन्न-
स्य त्यागस्यैकदेशे स्वत्वध्वंसेपि
द्वितीयाद्यर्थस्यान्वयेन पशुफ-
लकयागे पशुनिष्ठस्य स्वत्वध्वं-
सस्य जनकत्व विरहादेतद्वा-
क्यस्याप्रमाणत्वात् । ग्रामाय गत
इत्यादौ विग्रहस्य चतुर्थ्या धात्वर्थ-
बोध्यमपि कर्म्मत्वं नमस्यादिभि-
न्ने । वृक्षाय सेचकः इत्यादौ गम्या-
दिभिन्ने चतुर्थ्या बोधनीयोपि
सम्बन्धयितु मित्यादि तुमर्थीन
विग्रहस्ययोति न तत्र प्रसंगः । स-
प्रदानश्चाहूत्त स्वाम्ययोगाच्चवस्या
गजन्यस्वत्वस्य प्रतियोगित्वेव
शक इति स्वत्वप्रतियोगित्वे स-
प्रदान मित्यादिको न प्रयोगः ॥
नच दानस्य स्वत्वहेतुत्वे प्रमाणा-
भावः । सप्त वित्तागमा धर्म्याद-
यो लाभः क्रयो जयः । प्रयोगः
कर्म्मयोगश्च सत्प्रतिग्रह एव च
इत्यादि मन्वादिवचनैस्तस्य स्व-
त्वहेतुत्वाप्रतिपादनादिति वाच्यं
ब्राह्मणाय सत्कार्यं गावि गो-
विषं ब्राह्मणस्य न तु मेत्यादि
सार्वजनीनप्रतीतेरेव तत्र प्रमा-
णत्वात् प्रदानं स्वाम्यकारण-
मिति वचनाच्च अतएव विदेश-
स्थे पात्र मुद्दिश्य त्यक्तधने स्वी-
कार मन्तरेणैव पात्रस्य मरणका-
ले पित्रदायत्वेन तद्धनं पुत्रादि-
भि र्विभज्य गृह्यते अन्यथा नै-
विव तदादीनं तपितृधनस्यार्पण-
कुशादे विवोपादानेयशोद्दतियो-
गेच प्रत्यवायो नस्यात् नन्वेवं
दानादेव स्वत्वसिद्धे देयवस्तु-
नि स्वीकारो व्यर्थः इति चेन्न
लब्धा चादृष्टं फलमित्या-
दि स्मृतेः प्रतिगृहीत द्रव्यदानस्य
फलविशेषं प्रति हेतुत्वेन ता-
दृशफलसम्पत्त्यर्थ मेव प्रतिग्र-
हस्योपयोगात् याजनाध्याप-
न प्रतिग्रहै र्हिजो धनमर्जये-



दित्यादिप्रकृत्या प्रागुक्तस्वत्वतया च
प्रतिग्रहस्यापि स्वत्वहेतुत्वे बो
धनात्तु । स्वत्वजनकव्यापारस्य
दानेन पदार्थत्वात् । दासाय भ
क्तं ददाति भृतकाय वेतनं दद
तीत्यादावपि स्वत्वजनकत्यागं
प्रतिपादयन् ददातिर्मुख्य एव.
प्रयोगजनकं तु न तादृशं दान म
वैधत्वात् । यत्तु स्वीकारजन्य
स्य स्वत्वस्य जनकः त्यागोदा
नं मनसा यात्र बुद्धिस्थ धनस्य
गं तु न दाने किंतु तत्स्वीकारापेक्ष-
तिग्रहजन्यस्वत्वं प्रति हेतुत्वेऽ
न वैधत्यागस्यैव तथात्वात् अपे
ता तु स्वत्वध्वंसमात्रजनक-
त्यागो न तु तत्र स्वत्वजनक
त्यागभ्रम इति मैथिलैरुक्तं तत्र
युक्तं लाघवेन स्वत्वजनकत्या
गस्यैव ददात्यर्थत्वात् तिलान्
ऽस्य प्रतियच्छति तस्य सोऽस्यवि
क्रीणाति इत्यादौ द्रव्यान्तरग्रहणा
र्थकं दानमेव प्रतिदानं । स्व
त्वग्रहणार्थकं दान मेव वि
क्रय इति तत्रापि मुख्य मेव सं
प्रदानत्वं चतुर्थ्या बोध्यते ति
लादिकं च तथात्वं पण्यं प्रकृतादे
रेव धात्वर्थे तथात्वोपदेशात् ॥

ग्रहणार्थं दत्तस्यैव च स्वीकारः
प्रतिग्रह इति पदेन प्रतिदत्तस्य
विक्रीतस्य वा तिल तण्डुलादेः स्वी
कारो न दोषावहः । मैत्राय मो
तं मोदक इत्यत्र चतुर्थ्या धा
त्वर्थान्वित माधेयत्वं धात्वर्थाच
भक्षणत्वप्रकारकेच्छा प्रत्याय्यते.
तिष्ठति प्रकाशयते इत्यादाविव
विषयत्वलक्षणं कर्तृत्वं तथा च
मैत्रनिष्ठायाः भक्षणत्वप्रकारके-
च्छाया विषयतावान् मोदकः
इत्याकारक स्तत्र बोधः । गुरवे गां
धारयते इत्यत्र धृञः गृहीतवस्थि
तिः द्वितीयया तदन्विते कर्तृत्वे
चतुर्थ्या च तन्निविष्टगृहीतत्वेनसं
बन्धित्व मुपस्थाप्यते तेन गोक
र्तृकाया गुरुसंबन्धिगृहीतवस्थि
तेरनुकूलव्यापारवान् इत्याकार
कस्तत्र बोधः । धात्वर्थनिष्ठा व्या
पारेऽधमर्णादिति कालापाः । पा
णिनीयास्तु धारे रुत्तमर्ण इति
सूत्रानुसारेण चैत्राय शतं धार
यते इत्यादाविव गुरवे गां धार
यते इत्यादावपि ऋणग्रहणं
धात्वर्थो दत्तत्वेच चतुर्थ्यर्थः तथा
च गुरुकर्तृकदानगो ऋणत्वेन ग्रहणा
ति इत्याकारस्तत्र वाक्यार्थः पश्चात्

शेषाध्यत्वेनांगीकृत्य गृहीतं च इ
त्यमृणम्भिमाक्षः । पुत्राय शाप
ति पुत्रायेहितं इत्यादौ देवनिरू
पणं धात्वर्थः तन्निविष्टे च दै
वे स्वर्थस्य संबन्धस्यान्वय स्तेन
पुत्रस्य दैवे निरूपयति इत्येवं त
द्बोधः । गुरवे गां प्रतिशृणोति
आशृणोति इत्यादौ देयत्वेना
भ्युपगमः शृणोते रर्थः तत्र
गो विशिष्यत्वेन तदेकदेशे च
दाने गुरोः कृद्दिश्यत्वेनान्वय स्ते
न गुरूद्देश्यकदानकर्मत्वेन गा
मभ्युपगच्छतीत्येवं तत्र बोधः
होत्रे प्रतिगृणातीत्यादौ हर्षा-
नुकूलव्यापारलक्षणं प्रोत्साह
नं गृणाते रर्थः तदेकदेशे च
हर्षे होत्रादे रन्वयः तेन होतृ
निष्ठहर्षानुकूलव्यापारवान् इ
त्याकारक स्तत्र बोधः चैत्राय
क्रुध्यतीत्यादौ धात्वर्थ उत्कट
द्वेष स्तत्र विषयित्वलक्षणं सं
प्रदानत्वं चतुर्थ्या बोध्यते तेन
चैत्रविषयकोत्कटद्वेषवान् इ
त्याकारक स्तत्र बोधः । पुत्रे
कोपो न युज्यते इत्यत्र क्रुदंत
स्य कोपपदस्यैवार्थे पुत्र इत्य
स्यान्वयो न तु धात्वर्थे पटाय


यतते इत्यादावपि धात्वर्थकृते
रूपाः पटस्य विषयित्वं बोध्यते
तत्र उद्देश्यत्व मेव चतुर्थ्यर्थः क
थमन्यथा पटेच्छया तंतुनिर्मा
णादशायां पटाय यतते इत्यादिकः
प्रयोग इत्यपि वदंति । मित्राय द्रु
ह्यति इत्यत्र द्विष्टाचरणं द्रोहस्ते
न मित्रस्य द्विष्टमाचरतीत्यर्थः ।
शिष्याय ईर्ष्यति इत्यत्र अनिष्टा
नुपेक्षणं शीर्षा तथा च शिष्या
निष्टं नोपेक्षत इत्यर्थः । पुत्रा-
याऽसूयति इत्यत्रासूया गुणद्वेष
स्तेन पुत्रस्य गुणं द्वेष्टि इत्या-
कारक स्तत्र बोधः । मित्रं द्रुह्यति
शिष्य मीर्ष्यति पुत्रमसूयतीत्य
पि प्रयोगात् द्रुहादिकर्मणः संप्र
दानत्वं वैकल्पिक मित्युन्नीयते
कोपपर्यवसन्न द्रोहादे द्रुहादिधा
तुवाच्यत्वे तत्कर्मणः संप्रदान
त्वे द्रोहादिमात्रस्य तथात्वे तत्क
र्मत्व मेवेति प्राञ्चः कौमाराः ।
सोपसर्गयोस्तु क्रुधद्रुहोः क
र्मणः कर्मत्वमेव न तु संप्रदान
ता अत एव शिष्यमभिक्रुध्य
मित्रमभिद्रोग्धेत्यादौ क्रुधद्रो
गोः कर्मणि षष्ठ्येव प्रमाणं । इति
शब्दशक्तिप्रकाशिका ॥

संप्रदायः पुं गुरुपरम्परागत-
सदुपदेशः । शिष्यपरंपरावती
र्णोपदेशः । इति भरतः ॥
तत्पर्य्यायः । आम्नायः २ इत्य
मरः । गुरुपरम्परागतसदुपदि
ष्टमन्त्रसमूहः । यथा । संप्र
दायानुरोधेन पौर्वापर्य्यानुसा
रतः । श्रीभागवतभावार्थदी
पिकेयं प्रतन्यते । इतिश्री
धरस्वामी ॥ तद्भेदा यथा ॥
श्रीमन्नारायणो ब्रह्मा नारदो
व्यासएवच । श्रीलमध्वःपद्मना
भो नरहरि माधव स्तथा । अ
क्षोभ्यो जयतीर्थश्च ज्ञानसिंधु
र्महानिधिः । विद्यानिधिश्च रा
जेंद्रो जयधर्ममुनि स्तथा ॥
पुरुषोत्तमो ब्रह्मण्यो व्यासती
र्थमुनि स्तथा । श्रीमाल्लक्ष्मीप
तिःश्रीमान्माधवेंद्रपुरिस्तथा ।
संप्रदाय विहीनाये मंत्रास्तेनि
ष्फला मताः । अतःकलौ भवि
ष्यंति चत्वारःसंप्रदायिनः । श्री
माध्व रुद्र सनका वैष्णवाःक्षि
तिपावनाः । इतिश्रीपद्मपु
राणोक्तं । तंत्रोक्तवैष्णवसंप्र
दाया यथा । श्रीशिवउवाच
वैखानःसामवेदादौश्रीराधाव
ल्लभी तथा । गोकुलेशोमहेशा
नि तथा वृंदावनीभवेत् । पांच
रात्रःपंचमःस्यात्षष्ठःश्रीवीर
वैष्णवः । रामानंदीहविष्याशी
निंवार्क्कश्चमहेश्वरि । ततोभा
गवतोदेवि दश भेदाः प्रकीर्त्ति
ताः शिखी मुण्डीजटीचैवहि
त्रिदण्डीक्रमेणच । एकदण्डी
महेशानि वीरशैवस्तथैवच
सप्तधाष्टपताःप्रोक्तादशधा
वैष्णवामताः । एतेषांवासनेदे
वि शृणु यत्नेन शांभवि ।
वेदेषुहि सर्वं संव्याप्य यस्तिष्ठ
ति सवैष्णवः । वैखानसादिदी
क्षाद्यै र्भूषितःस्मार्तवैष्णवः ॥
श्रीराधावल्लभेदेवि शृणुयत्ने
नशांभवि । वैष्णवाचारनिरतो
विष्णुतत्त्वैकपारगः । अनन्यचे-
ताःशांतात्मा विष्णुचिंतापराय
णः । श्रीराधावल्लभीदेवि गोकुले
शंशृणु प्रिये । नानाभूषणसंप
न्नोनाना सर्व्वांगभूषितः गवां
कुलेश्रीगणपिता केलिकलाकर
षट्क शारीरमंत्रशास्त्र तत्रि
वेदनकारकं अतःशक्तिपरो दे
विवहि वैष्णवरूपधृक् गंधर्वा-
चारनिरतो लताचेष्टमनत्परः ॥

संप्रदायो गोकुलेशः सर्वसि-
द्धिकरो भवि । वृंदावनाख्यंदेवे
शि शृणु यत्नेन सांप्रतं । वि
गताशः प्रसन्नात्मा विष्णुभक्ति
परायणः । कामिनीसंगचप-
लोवनक्रीडाविनोदष्टक सौगंध
भूषिततनुः स्त्रीध्यानैकपरा
यणः । विष्णुसारूप्यतत्त्वज्ञःप्रो-
क्तो वृंदावनीशिवे पांचरात्रोम
हेशानि तथैव वीरवैष्णवः ॥
एवमेव महेशानि कीर्त्तितःपर
मेश्वरि । रा शक्ति रिति विख्याता
मशिवःपरिकीर्त्तितः तद्रानंदी
पुणंतचित्तो प्रसन्नात्माविचारष्ट
क । सर्वत्र समरूपश्च रामानंदी
प्रकीर्तितः । हविष्याशीमहेशा
नियथ्यावयववारय । पापसंहर-
णाशक्तो विष्णुभक्तो जितेंद्रियः ॥
यमादि नियमै र्युक्तो भक्ताचा
रपरायणः । स्वापथेवाफलाशा
हीपरकार्य्यपरायणः । हविष्या
शीमहेशानि शिवभक्तिस्वरूप
धृक् निंवार्क्काख्यंसंप्रदायंशृणु
यत्नेन सांप्रतं । नित्यार्च्चनक्रमास
क्तः स्वतंत्रैकपरायणः । वाह्य
पूजादिनिरतो नात्मभक्तः प्रस
न्नधीः आर्य्यपत्न्यान्वितः स्वच्छः
स्वच्छन्दाचारतत्परः । स्वतंत्रःस्मा
र्त्तविद्वेषी निंवार्क्कोभगवान्हरिः ।
अथभागवते देवि कथ्यतेशृणु
सांप्रतं । विष्णुभक्त्यैकगणपुणो
विजितात्मा प्रसन्नधीः । स्मार्त
गर्वान्वितो देवितदन्याचारतत्प
रः । आर्य्यपत्न्यान्वितोदेवि त
था स्वरूपवेशाष्टक । शैवद्वे
षी तत्संसर्गात् पुनःस्नानप-
रायणः ॥ केवलं विष्णुत-
त्त्वज्ञः प्रोक्तो भागवतःशिवे ।
इति शक्तिसंगमतंत्रे १ खंडे ८
पटलः ॥
संप्रधारणा स्त्री उचितानुचित
निश्चयः । तत्पर्य्यायः । समर्थ
नं २ । इत्यमरः ॥
सम्प्रपदं क्लीं भ्रमणं । पर्य्यटनं ।
इतिकेचित् ॥
सम्प्रयोगः पुं निधुवनं । रतं ।
अन्वितिः । संबंधः । कार्म्मणं ।
वशीकरणादिकर्म्म । इति मेदि
नीकर हेमचंद्रौ । अर्थिते त्रि-
इत्यजयः ॥
सम्प्रयोगी न् पुं कलाकेलिः ॥
कामुकः । संप्रयोजकः । इति मे
दिनी ॥
सम्प्रसारणं क्ली व्याकरणस्य सं

ताविशेषः। यथा। इग्यणः संप्र
सारणं। यण स्थाने प्रयुज्यमानो
यइक् स संप्रसारण संज्ञः स्या
त् ॥ इति सिद्धांतकौमु-
दी ॥
संप्रहारः पुं युद्धं। इत्यमरः ॥
गमने। इति मेदिनी ॥
हनने। इति धरणी ॥
संप्राप्तः त्रि सम्यक्प्रकारेणप्रा
प्तः। यथा स्कन्दपुराणे ॥
संप्राप्ते मकरादित्ये प्रयागपु-
ण्यप्रदे सदा। कर्त्तव्यो निय
मः कश्चिद्व्रतरूपी नरोत्तमैः ॥
इति तिथ्यादितत्त्वे ॥
संप्राप्तिः स्त्री सम्यक्प्रापणं।
यथा। आत्मनेपदसंप्राप्तौ पर
स्मैऊचचिन्हवेत्। इति संक्षि
प्तसारव्याकरणे ॥
सम्प्रैषः पुं नियोगः। विधिः
इतिहेमचन्द्रः ॥
सम्फालः पुं मेषः। इतिहेम-
चन्द्रः ॥
सम्फुल्लः त्रि विकसितः। प्रफुल्लः
इत्यमरः ॥
सम्ब सर्पणे। इतिकविकल्पद्रु
मः। दंत्यादिः। ओष्ठवर्गशेषोप
धः। संबति। ससंबयिषति।
इतिदुर्गादासः ॥
संब क संबंधे। इति कविक-
ल्पद्रुमः ओष्ठवर्गशेषोपधः
कसंबयति यने लोकः संबरा
तीत्यर्थः तालव्यादि रयमिति
धातुप्रदीपः मूर्द्धन्यादि रित्ये
के। इति दुर्गादासः ॥
सम्बं क्ली जले। इति जटाधरः
वारद्वयकर्षणे। इति सम्बाहि
तशब्ददर्शनात् ॥
सम्बत् अ विक्रमादित्यराजाब्दः
संपूर्वकवयधातोः क्विप् प्रत्य
येन यकारलोपे तुकागमेन
निष्पन्नं। किंतु अमरकोषेऽ
व्ययवर्गे सम्वद्वर्षाब्दोऽस्ति ॥
संबद्धः त्रि संबंधयुक्तः। यथा
समंतः। मातृ पितृ संबद्धा आ
सप्तमाद्विवाह्याः कन्या भवंति
इत्युद्वाहतत्त्वे। वेष्टनविशिष्टः।
संपूर्व वेधधातोः क्त प्रत्ययेन
निष्पन्नः ॥
संबंधः पुं समृद्धिः। न्यायः॥
इत्यजयः। संसर्गः। यथा। पक
पदार्थे अपरपदार्थे संसर्गः संब
न्धं मर्य्यादया भासते सच प्रति
योगपनुयोगपाधाराधेय विषय
विषयिभावादिः। इति प्रथ-

मस्तुत पनिवादीयगादाधरी। स
म्बर्कः। सचत्रिविधः। विद्याजः
१ योनिजः २ प्रीतिजः ३ ॥
तद्विवरणं यथा। संबंधो येषु
येषां यः सर्वजातिषु सर्वतः।
तत्वां ब्रवीमि वेदोक्तं ब्रह्मणा
कथितं पुरा। पिता तातस्तु-
जनको जन्मदातरि वर्त्तते।
अंबा माता च जननी गर्भधात्री
प्रसूरिति। पितामहः पितृपि
ता तत्पिता प्रपितामहः ॥
अतऊर्द्ध्वं ज्ञातयश्च सगोत्राः पारि
कीर्त्तिताः। मातामहः पितामा
तुः प्रमातामह एवच। मातामं
हस्यजनकस्तत्पिता वृद्धपूर्व
कः। पितामही पितुर्माता तत्
श्वश्रूः प्रपितामही। मातामही
मातृमाता मातृतुल्याचपूजिता
प्रमातामहीति विख्याताप्रमा
तामहकामिनी। वृद्धप्रमातामही
ज्ञेया तत्पितुःकामिनीतथा
पितृभ्राता पितृव्यः स्यान्मातुर्भ्रा
ता तु मातुलः। पितुः स्वसा पितृ
भगिनीमातुर्भगिनीचमातृष्वसी
सुतः पुत्रस्तनयः पुत्रो दायाद आ
त्मजस्तथा। धनभाक्वीर्य्यजश्चै
वपुंसि जन्यश्च वर्त्तते। जन्या-
यांदुहिता कन्या कनीति परिकी
र्त्तिताः। पुत्रपत्नीवधूर्ज्ञेया जा
माता दुहितुः पतिः। पतिः प्रियश्च
भर्त्ताचस्वामीकांतेचवर्त्तते। पत्नी
भ्राता प्रपालकश्च पत्नीभगिनी
च प्रपालिका देवरः स्वामिनो भ्रा
ता ननन्दा स्वामिनः स्वसा। श्व
शुरः स्वामिनस्तातः श्वश्रूश्च स्वा
मिनः प्रसूः। भार्य्या जाया प्रिया
कांता स्त्रीच पत्नीच वर्त्तते। प
त्नीमाता तथा श्वश्रू स्तत्पिता
श्वशुरः स्मृतः। सगर्भः सोदरो भ्रा
ता सगर्भाभगिनी स्मृता। भगि
नीपुत्रो भागिनेयो भ्रातृपुत्रश्च
भ्रातृजः। प्रपालस्तु भगिनीकां
तो भगिनीपतिरेवच। प्रपाली
पतिस्तु भ्राताच श्वशुरैकतुरे
तना। श्वशुरस्तु पिता ज्ञेयो-
जन्मदातुः समो मुने। अन्नदा
ता भयत्राता पत्नीतातस्तथैव
च। विद्यादाता जन्मदाता पंचै
ते पितरो नृणां। अन्नदातुश्च
या पत्नी भगिनी गुरुकामिनी।
माताच तत्सपत्नीच कन्यापुत्र
प्रियातथा। मातुर्म्माता पितु
र्म्माता श्वश्रूः पित्रोः स्वसा स्व
या। पितृव्यानी मातुलानी-



मातरश्चचतुर्दश। पौत्रस्तु पुत्र
पुत्रेच प्रपौत्र स्ततस्ततोपि च
तत्पुत्राद्याश्च येवंशाःकुलजा
ताश्चकीर्तिताः। कन्यापुत्रश्च
दौहित्र स्तत्पुत्राद्याश्च बांधवाः
भागिनेयस्तताद्याश्च पुरुषा बां
धवाःस्मृताः। भ्रातृपुत्राश्च पु
त्राद्या स्तेषुच संतयःस्मृताः॥
गुरुपुत्र स्तथा भ्राताः पोष्यःप
रमबांधवः। गुरुकन्याच भ
गिनी पोष्या मातृसमा श्रुते
पुत्रस्यच गुरु भ्राता पोष्यःस्त्र
स्निग्धबांधवः। पुत्रस्य श्वशुर
भ्राता बंधु वैवाहिकः स्मृतः॥
कन्यायाश्च श्वशुरे तत्संबंधःप
रिकीर्तितः। गुरुश्च कन्यका
याश्च पुरुषा बांधवाः स्मृताः
पुरुषा बांधवाः स्मृता इत्यत्रश्चा
ता स्निग्धबांधव इत्यपि क्वचि
त्पाठः। गुरुःश्वशुरभ्रातृणांच गु
रुतुल्याश्च पूजिताः। बंधुनाथेन
सार्द्धंच तन्मित्रे परिकीर्तिते॥
मित्रं सुखप्रदं ज्ञेयं दुःखदोपि
पु रुच्यते।बांधवो दुःखदोदैवा
त् निःसंबंधी सुखप्रदः। संबं
धास्त्रिविधः प्रेसा विप्रेंद्र जगती
तले। विद्याजो योनिजः।
प्रेम्णैव प्रीतिजश्च प्रकीर्तितः॥
मित्रंतु प्रीतिजंज्ञेयं स संबंधः
सुदुर्लभः। मित्रमाता मित्रभार्य्या
मातृतुल्यानसंशयः।मित्रभ्राता
मित्रपिता पितृभ्रातृसमोनृणा
चतुर्थं नाम संबंध मित्याह क
मलोद्भवः।जारश्चोपपतिर्बंधु
र्दुष्टा संभोगकर्तरि।उपपत्नी
नवंगीच प्रेयसी चित्तहारिणी
स्वामितुल्यश्च जारश्च नवंगीगृ
हिणीसमा। संबंधो देशभेदेच
सर्वदेशे विगर्हितः। अवैदिको
निंदितस्तु विश्वामित्रेणानिर्मि
तः। इत्युपजातस्तुमहद्भिश्च देश
भेदेच संचरेत्। प्रकीर्त्तिज्ञत
कःपुंसायोषितोच विशेषतः।
तेजीयसां न दोषाय विद्यमानो
युगेयुगे। इति ब्रह्मवैवर्ते ब्र
ह्मखंडे संबंधज्ञातिनिर्णयो
नाम ९ अध्यायः॥
कूर्म्मपुराणे। एकोदकानामर
णे सूतके चैतदेवहि। पतिर्णां
योनिसंबंधे बांधवेषु तथैवच।
योनिसंबंधे मातृस्वसीय भा
गिनेयेषु। अपिच। असंबंधिनो
द्विजान् दहित्वा वहित्वा सद्यः
शौचं संबंधेन्तु त्रिरात्रं। इति।

श्रुहितत्वे। शब्दव्याकरणयो
र्गुणाद्य गुणवादकभावःसंबंधः
ग्रंथादौ तस्य वक्तव्यता यथा
सिद्धार्थं सिद्धसंबंधं श्रोतुं श्रो
ता प्रवर्तते। ग्रंथादौ तेन
वक्तव्यः सम्बन्धः सप्रयोज
नः। सप्रयोजन इत्यत्र क्व
चित् पुस्तके साभिप्रायक
इति पाठः। इतिमुग्धबोधटी
कायां दुर्गादासः॥
संबंधः त्रि शक्तः हितः। इत्य
जयः
संबंधी त्रि संबंधविशिष्टः।त
त्पर्य्यायः। गुणवान् २ संयुक्त २
इतित्रिकांडशेषः॥
संवरं क्ली संयमः। इति त्रि
कांडशेषः बौद्धव्रतविशेषः।
इति मेदिनी। जलं। इत्यमरः
सम्वृति सम्वरं। सम्बसर्पणे
पूर्वेण अपः सम्वरं दक्षारि।
शाकटायनादिभ्यस्मादरे तालव्या
दिच। क्लीवंतु संवरं नीरबौद्ध
व्रतविशेषयोः। विशेषे पुंसि
दैत्यस्य मत्स्यस्य हरिणस्यच।
इति दंत्यादौ रभसः। शंबरो ह
रिणे दैत्ये मत्स्येच सलिले
स्मृतः। इति तालव्यादौ।
वजयः। इतिभरतः॥
संवरः पुं सेतुः। यथा। सेतोप
त्यालि संवराः। इति हेमच
न्द्रः॥दैत्यविशेषः।हरिणावि
शेषः। मत्स्यविशेषः॥
शैलविशेषः। जिनविशेषः॥
इति मेदिनी। सत्नुभाव्यहेत
इति हेमचन्द्रः॥
सम्वरणं क्ली आवरणं। सम्
वृधातो रनट् प्रत्ययेन निष्पन्न
इंद्रियसंयमः। इति संवरणविश
वृत्तीकायांभरतः॥
संवरारिः पुं कामदेवः। इत्यम
रः। संवरस्य दैत्यविशेषस्यअरिः
क्लीवंतु संवरं नीर बौद्धव्रतवि
शेषयोः। विशेषपुंसिदैत्यस्य
मत्स्यस्य हरिणस्यच॥ इति द
न्त्यादौ रभसः। सम्वरणं संव
रःभावेऌ। इंद्रियसंयमः संव
रं स्तस्यारिरितिवा॥
तदुक्तं साहित्यकल्पतरुणा।क
इस्य संवरारिश्च पुष्पवतीतांकु
सुमधन्वेति। तदयं संवराविरि
ह तालव्यादि दंत्यादिश्च।
इतिभरतः॥
संवरी स्त्री शतावरी। इतिश
ब्दचंद्रिका। मूषिककर्णी इत्य

मरः । ईश्वरकानी इति ख्याता-
या घुलेगाडी इति ख्यातायामि-
ति केचित् । पुं कल्याणाङ्ग-
णोति शम्बरी एवंवदन् ईप
तालव्यशादिः दन्त्यसादिश्चेति
स्वामी । इति भरतः ॥

संबलं क्ली जलं । इति शब्दरत्ना-
वली ॥

संबलः पुं क्ली पाथेयं । ताल-
व्यादि दन्त्यादिश्च ॥ इत्यमर-
भरतौ ॥

संबाहृते त्रि वाच्यवत्कष्टे-
ज्ञे । इत्यमरः । तालव्यशादिश्च ।

संबाधः पुं संकटः । भगं । इति
मेदिनी भयं । नरकवर्त्म । इति
शब्दरत्नावली ॥

संबाधनं क्ली मदनस्याहारे ॥
शूलाग्रे । द्वारपालः ॥ इति
मेदिनी ॥

संबुद्धः पुं बुद्धावतारः । इति
त्रिकाण्डशेषः । सम्यग्बोधाश्र-
ये त्रि ॥

संबुद्धिः स्त्री संबोधनं । यथा
त्वर्थे संबुद्ध्युक्तार्थे स्त्री । इति
मुग्धबोधव्याकरणं ॥

संबोधः पुं बोधने । क्षेपः ।
इति मेदिनी । नाशः ॥ इत्य-
जयपालः ॥

संबोधनं । क्ली अन्यत्रव्यासक्त-
स्य कार्यान्तरे नियोजनार्थमाभि-
मुख्यविधानं । यथा हे विष्णो ।
इति व्याकरणं । हे वृक्ष हेल-
ते हे फल इत्यादावचेतनेनु-
पचारः । इति दुर्गादासः ॥
तत्पर्य्यायः । आमन्त्रणं २ ॥
इति हेमचन्द्रः । संबुद्धिः ३ ।
इति मुग्धबोधः ॥

संभली स्त्री कुट्टनी इत्यमरः ।
हे परपुरुषपुरुषेण सह परनारीं
योजयंतीं कुट्टनी इति ख्या-
तायां । कुट्टयति छिनत्ति स्त्री
पुरुष वैमत्यं कुट्टनी नंद्यादिः
शं कल्याणं भलते निरूपयति
शम्भली भलङ् निरूपणपचा-
दित्वादच् नदादित्वात् ङीप शंभ-
ली तालव्यादिः । सम्यक् भलते
संभली दन्त्यादि रित्यन्ये । इति
भरतः ॥

संभवः पुं हेतुः । उत्पत्तिः ॥
मेलकः । आधेयस्य आधारा-
नतिरिक्तत्वं । इति मेदिनी ।
संकेतः । अपायः । इत्यजयः ।
वर्त्तमानकल्पीयार्हद्भेदः । इति
हेमचन्द्रः ॥

संभव्यः पुं कपित्थः । इति शब्द-
चन्द्रिका । संभवनीये त्रि ।

संभारः पुं संभृतिः । समूहः ।
इति मेदिनी । सर्वस्याणावे । इति
त्रिकाण्डशेषः ॥


संभावनं क्ली अलंकारविशेषः ।
यथा । संभावनं यदीत्थंस्यादि-
त्यूहोऽन्यस्य सिद्धये । यदि शेषो
भवेद्वक्ता कथिताः स्युर्गुणा-
स्तव । इति चन्द्रालोकः ॥

संभावनं क्रियास्तु योग्यताध्य-
वसायः । इति मुग्धबोधव्या-
करणं ॥

संभावना स्त्री उत्कटकोटिक
संशयः । संस्ववैकालभूकशुहि-
चिंतयो विरमस्मात् सौषिश्र-
ष्यीत्यादि सूत्रेण नप्रत्ययनि-
ष्पन्ना । यथा । पवं कोटौ औत्क-
टूयं संभावनात्वमपि विष-
यताविशेषः । इति ध्येयं । इति
सम्मतिपत्रचिंतामणि दीधिति
गादाधरी । भूमदर्शनानेतरव-
न्यादि व्यवहारस्तु संभावना-
मात्रादिति कुसुमाञ्जलिटीका-
यां हरिदासः । पौराणिकास्तु
संभवं नामकं प्रमाणान्तरमन्य-
न्ते तन्मानाज्जन्या प्रमितिः ।
सम्भावना इति वदन्ति । तन्मतेन
चतुष्टय मेतिहार्थापत्तिसंभवा-
भाव प्रमाणपात् इति सूत्रेण
पञ्चस्य शब्द वैतिह्यानर्थान्तरभा-
वादनुमानेऽर्थापत्तिसंभवा-
भावानामनर्थान्तरभावाच्चाप्र-
तिषेध इति सूत्रेण भगवदक्ष-
पादपादैर्निराकृते । निश्चिता
ति उत्कटकोटिक संभाव-
नोपलक्षणमिति तिथ्यादि-
तत्त्वे स्मार्तभट्टाचार्य्य लिखनं
तु संभावना शब्दस्य संशयमा-
त्रपरतया संगमनीयं । इतिना-
नाग्रन्थेभ्यः संगृहीतं ॥

संभावितः त्रि संभावनाविशि-
ष्टः । संभवनयोग्यः । बहुमतः ।
यथा । अकीर्त्तिं चापि भूतानि क-
थयिष्यन्ति तेऽव्ययां । संभावि-
तस्य चाकीर्त्तिर्मरणादतिरिच्यते
इति भगवद्गीतायां २ अध्यायः
सम्भावितस्य बहुमतस्य ॥
इति तट्टीकायां श्रीधरस्वामी ॥


सम्भाषणं क्ली कथनं । आला-
पनं यथा कृते सम्भाषणा-
देव त्रेतायां स्पर्शनेन तु ।
द्वापरे त्वर्थमादाय कलौ प-
तेति कर्मणा इत्युदाहृतत्वं ।



सम्भाषा स्त्री सम्भाषणम्। संपूर्व्व कभाषधातोः भिदादित्वात् अङ् ततष्टाप्प्रत्ययनिष्पन्ना ॥
सम्भिन्नः त्रि सम्यक्भेदविशिष्टः। यथा। सम्भिन्नकोशवर्णो यानि रेतिवदनाद्ये। कासरस्त्वच्यते लोके तालव्यान्तो नकीर्त्तितः ॥ इति प्राचीनकारिका ॥
सम्भुः पुं संभवतीयः। संपूर्व्वभूधातोः डुप्रत्ययेन निष्पन्नः इति मुग्धबोधव्याकरणम् ॥
सम्भूतः त्रि उत्पन्नः। यथा। इत्येतत् कथितं भूप सम्भूता सा यथा पुरा। देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी ॥ इति देवीमाहात्म्यम् ॥
सम्भूतविजयः पुं श्रुतकेवलिस्थलकबौद्धविशेषः। इति हेमचन्द्रः ॥
सम्भूयसमुत्थानं क्ली मिलित्वकर्म्मस्य वणिजांकर्म्मकरणं तत्तु विवादपदविशेषः। यथा। सम्भूयसमुत्थानं नाम विवादपदमिदानीमभिदधाति समवायेन वणिजो लाभार्थं कर्म्म कुर्वते। लाभालाभौ यथाद्रव्यं यथावा संविदा कृतौ। सर्व्वे वणिक्प्रभृतयः मिलिताः कर्म्म कुर्वते इत्येवं रूपा सम्प्रतिपत्तिः समवाय स्तेन ये वणिक् नटनर्त्तकप्रभृतयो लाभलिप्सवो भूत्वा प्रातिस्विकं कर्म्म कुर्वते तेषां लाभालाभावुपचयापचयौ यथाद्रव्यं येन यावद्द्रव्यं पण्यग्रहणार्थं दत्तं तदनुसारेण वसेयाताम्। यद्वा। प्रधानगुणभावपर्य्यालोचनया अस्य भागद्वयमस्यैको भाग इत्येवं रूपया संविदा समयेन यथा सम्प्रतिपन्नौ तथा वेदितव्यौ। किञ्च प्रतिषिद्धमनादिष्टं प्रमादात् यच्च नाशितं। स तद्दद्याद्विप्लवाच्च रक्षिताद्दशमांशभाक्। तेषां सम्भूय प्रचरतां मध्ये यः पण्यमिदमित्थं न व्यवहर्त्तव्यमिति प्रतिषिद्धमाचरति यच्चानादिष्टं अननुज्ञातं वा करोति येन तत्प्रमादात् प्रज्ञाहीनतया वा यन्नाशितं स तत् सर्वं वणिग्भ्यो दद्यात्। यः पुनस्तेषां मध्ये चौरराजादिजनितात् व्यसनात् पण्यं पालयति स रक्षिताद्दशमभागं लभेत। अर्घप्रक्षेपणाद्विंशं भागं शुल्कं

नृपो हरेत्। व्यासिद्धं राजयोग्यञ्च विक्रीतं राजगामि तत्। इह यतः पण्यस्य यन्मूल्यं इमदेशे तस्य प्रक्षेपणात् राजनिरूपणाद्धेतोः विंशो भागः। मूल्यादिं शतितमं अंशं शुल्कार्थं गृह्णीयात्। यत् पुनः व्यासिद्धं मम न विक्रेयमिति राज्ञा प्रतिषिद्धं। यच्च राजयोग्यं माणिक्यादि प्रतिषिद्धमपि तद्राज्ञे अनिवेद्य लाभलोभेन विक्रीतं चेद्राजगामि मूल्यदाननिरपेक्षं तत्सर्वं पण्यं राजापहरेदित्यर्थः ॥ मिथ्यावदन् परीमाणं शुल्कस्थानादपासरन्। दाप्यस्त्वष्टगुणं यश्च सव्याजक्रयविक्रयी। यः पुनर्वणिक् शुल्कवञ्चनार्थं परीमाणं निह्नुते शुल्कग्रहणस्थानाद्वापसरति यश्चासेद मस्येत्येवं विवादास्पदीभूतं पण्यं क्रीणाति विक्रीणीते वा ते सर्व्वे पण्यादष्टगुणं दण्डनीयाः। अपिच। तरिकः स्थलजं शुल्कं गृह्णन् दाप्यः पणान् दश। ब्राह्मणप्रातिवेश्यानामेतदेवानिमन्त्रणे। शुल्कं हि द्विविधं स्थलजं जलजञ्च। तत्र स्थलजं मर्त्यप्रक्षेपणाद्विंशः भागः शुल्कं नृपो हरेदित्युक्तं। जलजन्तु मानवेनाभिहितं। पणं यानं तरे दाप्यं पुरुषोऽर्द्धपणं तरे। पादं पशुश्च योषिच्च पादार्द्धं रिक्तकः पुमान्। भाण्डपूर्णानि यानानि तार्य्यं दाप्यानि सारतः। रिक्तभाण्डानि यत्किञ्चित् पुमांसश्चापरिच्छदाः। इति शुल्कद्वयस्य मपरोविशेषः। नभिन्नकार्षापणं मस्ति शुल्कं न शिल्पवृत्तौ न शिशौ न दूते। न भैक्षलब्धे न हृतावशेषे न श्रोत्रिये प्रव्रजिते न यज्ञे। इति नीतेः तेनैतितरो नावादि स्थलजं शुल्कमपि कृत स्तरिकः स यदा स्थलोद्भवं शुल्कं गृह्णाति तदा दशपणान् दण्डनीयः। देशान्तरवेश्मप्रतिवेशा इति स्वगेहाभिमुखं स्वगृहपार्श्वस्थं चोच्यते तत्र भवाः प्रातिवेश्याः। ब्राह्मणश्च ते प्रातिवेश्याश्च तेषां श्रुतवृत्तसम्पन्नानां श्राद्धादिषु विभवे सति अनिमन्त्रणे एतदेव दशपणात्मकं दण्डनं वेदितव्यं। देशान्तरगमनवणिग्भिः कर्यं प्रत्याह। देशान्त-

प्रातिवेश्या
श्च ब्राह्मण



रगते प्रेतेऽस्य दायाद बांधवाः
ज्ञातयो वा हरेयुस्तदागताः
स्तैर्विना नृपः । यदा संभूय
कारिणां मध्ये यः कश्चिद्देशां
तरं गतो मृतस्तदा तदीयमं
शं दायादः पुत्राद्यपत्यवर्गः
बांधवाः मातृपक्षीयाः मातु
लाद्याः ज्ञातयोऽपत्यवर्गोत्पत्ति
विज्ञाः सपिंडा वा आगताः संभू
य व्यवहारिणो ये देशान्तरादा
गतास्तैर्वा गृह्णीयुस्तैर्विनादा
याद्यभावे राजा गृह्णीयात् । वा
शब्देन च दायादीनां वैकल्पिक
मधिकारं दर्शयति । पौर्वापर्य
नियमस्तु पत्नी दुहितर इत्यादि
प्रतिपादित एवात्रापि विज्ञेयः ।
शिष्य सब्रह्मचारि ब्राह्मणनि
षेधाद्वणिक् प्रभृतिष्वनपत्ये
जनेऽवणिजामपि मध्ये यः पि
तृदानर्णादानादि समर्थः स गृ
ह्णीयात् । सामर्थ्याविशेषे पुनः
सर्वे वणिजः संसृष्टिनो विभज्य
गृह्णीयुस्तेषामभावे दशवर्षं दाया
द्यागमनं प्रतीक्ष्यानागतेषु स्वयमे
व राजा गृह्णीयात् । तदिदं नार
देन स्पष्टमुक्तं । एकस्य चेत्स्या
त् मरणं दायादोऽस्य तदाग्र
यात् । अन्यो वाऽसति दाया
दे शक्तश्चेत् सर्व एव ते । तद
भावे तु गृह्णीत कारयेद्दशाव
त्सरात् । अस्वामिकमदाया
दं दशवर्षस्थितं ततः । राजा
तदात्मसात् कुर्यात् एवं धर्मो
न हीयते । इति किंच । जिह्मं
त्यजेयुर्निर्लाभमशक्तोऽन्येन
कारयेत् । जिह्मो वंचकः तं
निर्लाभं निर्गतलाभं लाभमा
च्छिद्य त्यजेयुः बहिष्कुर्युः ।
यश्च सम्भूयकारिणां मध्ये भा
गोऽप्रत्यवेक्षणादिकं कर्तु
मसमर्थः स्वावन्येन स्वं कर्म
भाण्डभारवाहनं तदायव्यय
परीक्षणादिकं कारयेत् । इ
ति मिताक्षरा ॥

संभूतः त्रि सम्यक् पुष्टः । सम्यग्
भूतः । सम्यक्प्रकारेण भूतः ॥
संपूर्वभूधातोः क्त प्रत्ययेन नि
ष्पन्नः ॥

संभृतिः स्त्री सम्यक्पोषणं । स
म्यक्भरणं । सम्यग्धारणं ॥
संपूर्व भृधातोः क्ति प्रत्ययेन नि
ष्पन्नः ॥

संभेदः पुं सिन्धुनद्योः संगमः
इत्यमरः । स्फुटनं । मेलनं ।

इति मेदिनी ॥

संभोगः पुं भोगः सुरतं ॥
जिनशासनं । इति मेदिनी ।
हर्षः । इति शब्दरत्नावली ॥
केलिनागरः । इति जटाधरः
शृंगारभेदः । इति त्रिकांडशे
षः । तस्य लक्षणं यथा । दर्श
नस्पर्शनादीनि निषेवेते वि
लासिनौ । यत्रानुरक्तावन्यो
न्यं संभोगः स उदाहृतः ॥
इति साहित्यदर्पणे ३ परि
च्छेदः ॥

सम्भोगी[२] पुं केलिनागरः । इ
ति भूरिप्रयोगः । सम्भोगा
विशिष्टे त्रि ॥

संभ्रमः पुं भयादिजनितत्व
रा । तत्पर्यायः । संवेगः २ त्व
सरः । आवेगः ३ इति तट्टी
का । प्रवेगः ४ त्वरा ५ त्वरिः
६ इति वाचस्पतिः । भयं ॥
आदरः । इति मेदिनी । महा
भ्रमः । स्तोत्रं । इत्यजयपालः ॥

सम्मतिः स्त्री अभिलाषः । अ
नुज्ञा । इति मेदिनी । आत्म
ज्ञानं । इत्यजयपालः ॥

सम्मदः पुं हर्षः । तद्वति त्रि
इत्यमरः ॥

सम्मर्दः पुं युद्धं । इति केचित्

सम्मातुरः पुं सतीतनयः त
त्पर्यायः । भद्रमातुरः २ इति
हेमचंद्रः ॥

सम्मादः पुं मत्स्यविशेषः । य
था । बहृचश्च सौभरि र्नाम म
हर्षिरन्तर्जले द्वादशाब्दं का
लमवास । तत्र चान्तर्जले म
त्स्यः सम्मदो नामातिबहुप्र
जोऽतिप्रमाणो मीनाधिपति
रासीत् । इति विष्णुपुराणे ४
अंशे २ अध्यायः । सम्यक्प्रकारे
णामत्तता । स एव मदधातो
र्घञ्प्रत्ययेन निष्पन्नः ॥

सम्मानः पुं समादरः । यथा
जन्मर्क्षयुक्ता यदि जन्ममासे
यस्य ध्रुवं जन्मतिथिर्भवेच्च ।
भवंति तद्वत्सरमेव यावत्क्ले
ज्यः ससम्मान सुखानि तस्य ॥
इति तिथ्यादितत्त्वं ॥

सम्मानितः त्रि समादृतः । गौ
रवितः । यथा । अन्येऽपि सर्वे
दैवी भूषणे राघवे त्वया ।
सम्मानिता ननादोच्चैः साट्ट
हासं मुहुर्मुहुः । इति देवीमा
हात्म्यं ॥

सम्मार्जकः पुं सम्मार्जनी । इति

शब्दरत्नावली । सम्मृक्ष्यार्ज्जे
नकर्त्तरि त्रि ॥
सम्मार्ज्जनं क्ली संशोधने । य
था । सम्मार्ज्जनेन च संशुद्धिः संशो
धनविशोधनेन । इति रत्नमाला ।
सम्मार्ज्जनी स्त्री धूल्यादिमार्ज्ज
नसाधनी । कौंसा इति कौं
इति च भाषा । तत्पर्य्यायः । शो
धनी २ इत्यमरः । ऊहनी ३
समूहनी ४ इति शब्दरत्नाव
ली बहुकरी ५ वर्द्धनी ६ । इ
ति हेमचन्द्रः ॥
सम्मितः त्रि समानपरिमाण
मस्य । सदृशः । इति जटाधरः ।
सम्मिश्रः त्रि संयुक्तः । मिश्रि
तः । सम्मिश्रा या चतुर्द्दशपाश्र
मावास्या भवेत् क्वचित् । रव
र्वितां तां विदुः केचिदपेक्ष-
सिनिवा परे । इति तिथ्यादि
तत्त्वं ॥
सम्मुखः त्रि अभिमुखः । स
मुख । इति भाषा । तत्पर्य्यायः ।
अभिमुखः २ इति त्रिकाण्डशेषः ॥
सम्मुखी[२] स्त्री दर्पणं । इति के
चित् ॥
सम्मुखीनः त्रि अभिमुखं ॥
इति हेमचन्द्रः ॥


सम्मूर्च्छः त्रि सम्यकमोहयुक्तः
मूर्च्छः । यथा । मानुषे कदली
स्तम्भे निस्सारे सारमार्गणं । यः
करोति स सम्मूढो जलबुद्बुद
सन्निभे । इति शुद्धितत्त्वं ॥
सम्मूर्च्छजः पुं तृणादिः ॥
इति हेमचन्द्रः ॥
सम्मूर्च्छनं क्ली सर्वतोव्याप्तिः
तत्पर्य्यायः । अभिव्याप्तिः २
इत्यमरः । उच्छ्रायः । मोहः ।
इति मेदिनी ॥
सम्मूर्च्छनोद्भवः पुं मत्स्यादिः
इति हेमचन्द्रः ॥
सम्मृष्टः त्रि संशोधितः । इत्य
मरः । द्वे मक्षिकाद्यपनयनेन
शोधिते व्यंजनादौ । इति
भरतः ॥
सम्मोदः पुं प्रीतिः । हर्षः ॥
इति शब्दरत्नावली ॥
सम्यक् व्य समस्तः । इति
केचित् ॥
सम्यक्[२] त्रि सत्यवचनं । प्रशं
नसद्धसमंचति संगच्छते । इत्य
मरभरतौ । मनोज्ञः ॥ संगतः
इति मेदिनी ॥ प्रथमक
ल्पादिः । यथा । सम्यक् संसा
धनं कर्म्मकर्त्तव्यं सपिकारिणा

निष्कामेण सदा पार्थकाम्यंका
मान्वितेन च सम्यक् प्रथमक
ल्पादिना । इति प्रायश्चित्त
तत्त्वं ॥
सम्राट्[ज] पुं येनराजसूयेन इष्टं ।
यो मंडलस्येश्वरः । आज्ञया रा
ज्ञः शास्ति यः । इत्यमरः ॥
राजसूययज्ञकर्त्ता तत्साध्यो याग
विशेषः । तेन येन इष्टं यागः
कृतं । यो मंडलस्य द्वादशराज
मण्डलस्य ईश्वरः । यश्च राज्ञो
न्यपान् आज्ञया शास्ति भृत्यव
द्व्यापारेषु नियोजयति स सम्रा
डुच्यते केचित्तु समुद्रयेनक्षोणि
तान्याहुः । राजसूययाजी यः स
सम्राट् चतुरब्धि सीमावच्छि
न्नाया भूमे यो ईश्वरः । सोपि ।
यश्च कियत्परिमाणाया भूमेः
पतीनाज्ञया शास्ति सोपि ।
इह परत्र च सम्यक् राजते इति
क्विप् सम्राट् दान्तेम इत्यत्र स
म्राड्वर्ज्जनाज्जानुस्वारः । इति
भरतः ॥
सयोनिः पुं इन्द्रः । इति केचि
त् । योन्या सह वर्त्तमाने समा
नोत्पत्तिस्थानके च त्रि ॥
सरं क्ली सरोवरः । इति शब्द

रत्नावली । जलं । इति जटा
धरः ॥
सरः पुं दध्यग्रे । तत्पर्य्यायः ॥
सरस्तु दध्युत्तरकं दधिस्नेहस्तु
कट्वरं । इति रत्नमाला । गतिः
इति मेदिनी । वाणः । लवणः ।
इति हेमचन्द्रः । निर्क्करे पुंस्त्री ।
इति भरतद्विरूपकोषः ॥
सरः त्रि सारकः । भेदकः ।
यथा । पिप्पली मधुरा वृष्या क
टुकादीपनी सरः । इति राजव
ल्लभः । गमनकर्त्तरि त्रि ॥
सरः[स] क्ली सरोवरः । इत्यमरः ॥
अस्य विवरणं तडाग पद्माक
रशब्दयो द्रष्टव्यं । अस्य जलगु
णाः । सारसं लघु तृष्णाघ्नं बल्य
स्वादु कषायवत् । इति राज
वल्लभः । नीरं । यथा । सरो नी
रे तडागे च । इति रुद्रः ॥
इत्यमरटीकायां भरतः ॥
सरःकाकः पुं हंसः । इति शब्द
रत्नावली ॥
सरःकाकी स्त्री हंसी । इति शब्द
रत्नावली ॥
सरकं क्ली सरोवरः । इति शब्द
रत्नावली । आकाशं । इति सि
द्धान्तकौमुद्यामुणादिवृत्तिः ॥

सरकः पुं क्ली शीधुपाने। शीधु
पाने। इत्युशीय। अच्छिन्ना
ध्वगपंक्तिः। इति मेदिनी। मद्य
परिवेषणे। इति भरटीकायां
भरतः॥
सरकः त्रि गतिशीलः। इति
शब्दरत्नावली॥
सरघा स्त्री मधुमक्षिका। इ
त्यमरः॥
सरंगः पुं चतुष्पात्। पक्षी।
इति संक्षिप्तसारे उणादिवृत्तिः॥
सरजं क्ली नवनीतं। हैयंग
वीनं। इति हारावली॥
सरजाः स्त्री ऋतुमती स्त्री।
तत्पर्य्यायः। मलिना २ इति
त्रिकाण्डशेषः॥
सरटः पुं कृकलासः गिरगि
ट्। इति कौंकलास इति च भा
षा। इत्यमरः। तत्पतनादि फलं
यथा। वल्याः प्रपाते च फलं
सरटस्य प्ररोहणे शीर्षे रा
ज्यश्रियो वाप्तिर्भाले चैश्वर्य्य
मेव च। कर्णयो र्भूषणावा
प्तिर्नेत्रयो र्बन्धुदर्शनं। नासिका
यांच सौगन्ध्यं वक्त्रे मिष्टान्नभो
जनं। कण्ठे चैव श्रियो वाप्ति
र्भुजयो र्विभवो भवेत्॥
धनलाभो बाहुमूले करयो र्ध
नवृद्धयः। स्तनमूले च सौभा
ग्यं हृदि सौख्यविवर्द्धने पृष्ठे
नित्यं महीलाभः पार्श्वयो र्बन्धु
दर्शने। कटिद्वये वस्त्रलाभो गु
ह्ये मृत्युसमागमः। जंघे चोरु
द्वयो र्नित्यं गुदे रोगभयं भवेत्।
ऊर्वोश्च वाहनावाप्ति र्जानुजंघे
ऽर्थसंक्षयः॥ वाम दक्षिण
योः पादौ भ्रमणं नियतं भवे
त्। वल्याः प्ररोहणे चैव पत
ने सरटस्य च। अन्यासाञ्च
फलं चैव तद्वदेव प्रजायते।
वल्याः प्ररोहणं वाधो सरटस्य
प्रपातनं। निम्नगाध्याय भवति
व्याधि पीडा विपर्य्ययो। पत
नानन्तरं चैवारोहणं यदि जाय
ते। पतने फलमुत्कृष्टं रोह
णेऽस्यात् फलं भवेत्। आरो
हणं चोर्द्धवक्त्रे अधोवक्त्रे च पा
तने॥ भवेदिष्टफलं तस्य
तत्फलं जायते ध्रुवं। स्पृष्ट
मात्रेण यः सद्यः सचेलं ज
लमाविशेत्। पंचगव्यप्रा
शनञ्च कुर्य्यादर्कावलोक
नं। वल्लीरूपं सुवर्णस्य
कृत्वा तेन वेष्टयेत्। पूजयेत्

गन्धपुष्पाद्यै स्तदग्रे स्वर्णकुम्भ
के। पंचगव्यं पंचरत्नं पंचाम्र
तं सपल्लवं। पंचवृक्षकषाय
ञ्च निःक्षिप्यावाहयेत्ततः॥
पूजयेद्गन्धपुष्पाद्यै र्लोकपा
लांस्तथा क्रमात्। मृत्युंजये
न मन्त्रेण समिद्भिः खदिरैः शु
भैः। तिलै र्व्रीहितिभि र्होमम
ष्टोत्तरसहस्रकं। वल्लीरूहगापि
का। मृत्युञ्जयमन्त्र संवक
मन्त्रः। इति विद्याकरः॥
इति ज्योतिस्तत्त्वं॥
सरट् पुं वायुः। मेघः। इत्यु
णादिकोषः। मधुमक्षिका। इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः।
कृकलासः। इत्यमरटीका।
सरटिः पुं वायुः। मेघः इत्यु
णादिकोषः॥
सरडुः पुं कृकलासः। इत्युणा
दिकोषः॥
सरणं क्ली लोहमलं। इति हे
मचन्द्रः। गमनञ्च॥
सरणा स्त्री प्रसारणी गंधभा
दालि इति भाषा। इत्यमरः॥
त्रिवृता तेउडी इति भाषा।
इति शब्दमाला॥ गमनक
र्त्तरि त्रि॥
सरणि } स्त्री पंक्तिः। पंथाः। इति
सरणी } मेदिनी। प्रसारणी। इ
त्यमरटीकायां भरतः॥
सरण्डः पुं पक्षी। सरटः। भूषण
भेदः। इति मेदिनी। कामुकः
पत्नी। इति शब्दरत्नावली॥
सरण्य त्रि गम्यं। गन्तव्यं। स
रण शब्दात् स्य प्रत्ययेन नि
ष्पन्नः॥
सरण्युः पुं मेघः। वायुः। जलं
इति शब्दरत्नावली। वसन्तः।
अग्निः। इत्युणादिकोषः॥
सरत् पुं सूत्रे। इति शब्द
माला॥
सरतिः पुं स्त्री रतिः। इति
केचित्॥
सरद्वान् पुं गौतममुनिः। गौ
तमसुनिपुत्रः। इति पुराणं।
तालव्यशादिश्च॥
सरपत्रिका स्त्री पद्मपत्रं। इति
शब्दरत्नावली॥
सरमा स्त्री राक्षसीभेदः। सा च
विभीषणपत्नी। कुक्कुरी। देव
शुनी। इति मेदिनी। कश्यप
पत्नीविशेषः। तदपत्यानि श्वाप
दादयः। यथा। गोलाङ्गूलश्च को
कश्चैव सापत्यं तथैव च॥



अपत्यं सरमायाश्च गणोवैश्व
रादयः। इति वह्निपुराणेका
श्यपीयवंशनामाध्यायः ॥
सरघुः पुं वायुः। इति त्रिका
ण्डशेषः ॥
सरयुः } स्त्री नदीविशेषः। इत्य
सरयूः } मरादिकोषः। अस्याज
लगुणाः सरयूसलिलं स्वादु
बलपुष्टिप्रदायकं। इति राज
निर्घण्टः। तस्याः उत्पत्तिर्यथा
पर्वे विवाहे विधिवत् सौवर्णे
मानसाचले। अरुन्धती वशिष्ठ
स्तु मोद माप तमाश्रह। तत्र
वत् पतितं तोयं मानसाचल
कंदरे। तत्तोयं सम्पथा भूत्वामा
नसाचलकंदरात्। हेमाद्रेः
कंदरे सार्द्धे सरयांच पृथक्
पृथक् यत्तोयं संगतं कुर्यात्
हंसा वरुव सन्निधौ ॥ तेना
भूत् सरयू नाम्ना नदी पु
ण्यतमा शुभा। इति कालिका
पुराणे ४३ अध्यायः ॥
सरलः पुं वृक्षविशेषः। तत्
पर्यायः। पीतद्रुः १ इतिकाष्ठं २
इत्यमरः धूमवृक्षकः ३। इ
ति शब्दरत्नावली। पीतदारु ४
भद्रदारु ५ मनोज्ञः ६। इति
रत्नमाला। पीतः ७ स्निग्धदा
रुसंज्ञः ८ स्निग्धः ९ मरिचपत्र
कः १० पीतवृक्षः ११ सुरभिदारु
१२। अस्य गुणाः। कटुत्वं। ति
क्तत्वं। उष्णत्वं। कफवातव्रण
दोषशोफकण्डूति व्रणना
शित्वं कोष्ठशुद्धिदातृत्वं ॥
इतिराजनिर्घण्टः। अन्यच्च। स
रलः पीतवृक्षः स्यात् तथासु
रभिदारुकः। सरलो मधुक
स्तिक्तः कटुपाकरसो लघुः॥
स्निग्धोष्णः कर्णकण्ठाक्षिरो
गरक्षो हरः स्मृतः कफानिल
स्वेद दाहकासमूर्छाव्रणापहः
इतिभावप्रकाशः। स्वद्रुः। अग्निः
इतिधरणी ॥
सरलः त्रि उदारः। अवक्रः।
इति मेदिनी ॥
सरलद्रवः पुं सरलवृक्षरसः।
तार्पीन इति भाषा ॥ तत्प
र्यायः। पायसः १ श्रीवासः २
वृकधूपः ३ श्रीवेष्टः ४ इत्यम
रः। तैलपर्णी ६ श्रीपिष्टः ७।
इतिजटाधरः। श्रीवेशः ८ या
सः ९ यवासः १० वृक्षधूपः ११
दध्याकरः १२ दीपाकरः १३
भवकः १४ क्षीरश्रीः १५ वायसः

१६। इतिशब्दरत्नावली। अस्यगु
णाः श्रीवेष्टशब्दे द्रष्टव्याः। स
रला स्त्री त्रिपुटा। इत्यमरः॥
नदीभेदः। इतिभूरिप्रयोगः ॥
सरलाङ्गः पुं श्रीवेष्टः। इति
राजनिर्घण्टः ॥
सरव्यं क्ली लक्ष्यं। इत्यमर
टीका। तालव्यशादिश्च ॥
सरसं क्ली सरोवरः॥ इतिश
ब्दरत्नावली। रसयुक्ते त्रि। यथा
कविता कोमलवनिता प्राया
तास्वादायिका। बलादानीय
मानासा सरसा विरसा भवेत्
इत्युद्भटः ॥
सरसम्भवं क्ली त्रिकण्टवृक्षः
तेकौटासिज् इतिभाषा। यथा
त्रिकण्ठः। पञ्चशमश्च पेषणः
सरसम्भवं इतिशब्दचन्द्रिका।
सरसा स्त्री श्वेतत्रिवृता। इत्य
मरटीकायां रायमुकुटः ॥
सरसिजं क्ली पद्मं। इतिराज
निर्घण्टः ॥
सरसी स्त्री सरोवरः। इत्य
मरः ॥
सरसीकः पुं सारसपक्षी। इ
ति शब्दरत्नावली ॥
सरसीरुहं क्ली पद्मं। इत्यमरः
सरस्वती स्त्री वाणी। स्त्रीरत्नं।
गौः। नदी। नदीभेदः। मनु
पत्नी। इति मेदिनी। ज्योति
ष्मती। ब्राह्मी। इतिराजनिर्घ
ण्टः॥ सोमलता। इतिशब्द
चन्द्रिका बुद्धशक्तिविशेषः ॥
इति त्रिकाण्डशेषः दुर्गा। यथा
स्वराः स्वरणशीलत्वात् गेया
ख्याः सप्त कीर्तिताः। प्रतिप्राप
णदाने वा तेन देवी सरस्वती
इति देवीपुराणे ४५ अध्यायः
वाग्देवता। तत्पर्यायः। ब्राह्मी १
भारती ३ भाषा ४ गीः ५ वाक्
६ वाणी ७। इत्यमरः। धृता ८ सा
रदा ९ गिरा १० गिरांदेवी ११
गीर्देवी १२ ईश्वरी १३ वाचा
१४ वचसामीशा १५ वाग्देवी
१६ वर्णमातृका १७ इतिशब्द
रत्नावली। गौः १८ श्रीः १९
इतिजटाधरः। वाक्येश्वरी २०।
श्रेयसंश्वेश्वरी २१ सायंसन्ध्या
देवता २२ इतिकविकल्पलता
तस्या उत्पत्त्यादि यथा। शौ
तिरुवाच॥ आविर्बभूव क
न्यैका परमस्य वामपार्श्वतः शु
क्लमूर्तिमती साक्षात् द्वितीया
कमलालया। आविर्बभूव त

तपश्चान्मुखतः परमात्मनः
एका देवी शुक्लवर्णा वीणा
पुस्तकधारिणी ॥ कोटिपूर्णेन्दु
शोभाढ्या शरत्पंकजलोचना
वह्निशुद्धांशुकाधाना रत्नाभर
णभूषिता। सस्मिता सुदतीवा
मासुंदरीणांच सुंदरी। श्रेष्ठा
श्रुतीनांशास्त्राणां विदुषां जन
नीपरा। वागधिष्ठातृदेवीसा·
कवीनां मिष्टदेवता। शुद्धसत्व
स्वरूपाच शांतरूपा सरस्वती।
गोविंदपुरतःस्थित्वा जगौ प्र·
थमतःस्वरं। तन्नाम गुणकी
र्तिंच वीणया सा ननर्तच। कृ
तानियानि कर्माणि कल्पे क
ल्पे युगेयुगे। तानि सर्वाणिहरि
णा तुष्टाव संपुटांजलिः। सरस्व
त्युवाच। रासमंडल मध्यस्थं रा
सोल्लास समुत्सुकं। रत्नसिंहा
सनस्थंच रत्नभूषणभूषितं। रा
सेश्वरं रासकरं वरं रासेश्वरीश्व
रं। रासाधिष्ठातृदेवंच वन्दे रास
विनोदिनं। रासायासपरिश्रां
तं रासे रासविहारिणं। रासो
त्सुकानां गोपीनां कांतंशांतं
मनोहरं। प्रणम्यते तमित्यु
क्त्वा प्रसन्नवदना सती ॥

उवास सा सकामा च रत्नसिंहा
सने वरे। इतिवाणीकृतं स्तो
त्रं प्रातरुत्थाय यःपठेत्। बुद्धि
मान् सोपि विद्यावान्लक्ष्मीवा
न्पुत्रवान्सदा। इतिब्रह्मवैवर्ते ब्र
ह्मखण्डे ३ अध्यायः ॥ अथच
साच शक्तिः सृष्टिकाले पंच
धा चेश्वरेच्छया। राधापद्माच
सावित्री दुर्गा देवी सरस्वती
प्राणाधिष्ठात्रीयादेवी कृष्णस्य
परमात्मनः। प्राणाधिकप्रिय
तमा साराधा परिकीर्तिता ऐश्व
र्याधिष्ठातृदेवी सर्वमंगलकारि
णी। परमानंदरूपाच सा लक्ष्मीः
परिकीर्तिता। विद्याधिष्ठात्री या
देवी परमेशस्य दुर्लभा। वेदशा
स्त्र योगमाता सा सावित्रीप्रकी·
र्तिता। बुद्ध्यधिष्ठात्रीया देवीसर्व
शक्तिस्वरूपिणी। सर्वज्ञानात्मि
का सर्वा सा दुर्गा दुर्गनाशिनी
वागधिष्ठात्री या देवी शास्त्रज्ञा
नप्रदा सदा। कृष्णकंठोद्भवा
याच साच देवी सरस्वती। पंच
धादौ स्वयं देवी मूलप्रकृतिरी
श्वरी। ततःसृष्टिक्रमेणैव
रूपा कलया च सा। इतिब्र
ह्मवैवर्ते गणेशखंडे ४· अध्यायः

तस्याः पूजादि यथा। श्रीना·
रायणउवाच। आदौ सरस्वती
पूजा श्रीकृष्णेनविनिर्मिता। य
त्प्रसादान्मुनिश्रेष्ठ मूर्खोभवति
पंडितः। आविर्भूतायदादेवीव
क्त्रतःकृष्णयोषितः। इयेषकृष्णं
कामेन कामुकीकामरूपिणी
सचविज्ञाय तद्भावंसर्वज्ञःसर्व
मातरं। तामुवाचहितं सत्यं प
रिणामसुखावहं। श्रीकृष्णउवा
च। भजनारायणंसाध्वीमदंशं त
चतुर्भुजं। युवानं सुंदरं सर्व·
गुणयुक्तंच मत्समं। कामज्ञं
कामिनीनांच तासांचकामपूर
कं। कोटिकंदर्पलावण्यलीला
लंकृत मीश्वरं। कांतेकांतं
च मां कृत्वा यदि स्थातुमिहेच्छ
सि। त्वत्तो बलवती राधा न ते भ
द्रं भविष्यति। योयस्मात्बलवा
न्वाणि ततोऽन्यं रक्षितुं क्षमः
कथं परान् साधयति यदिस्व
यमनीश्वरः। सर्वेशाःसर्वशास्ता
हंराधांबाधितुमक्षमः। तेजसा
मत्समासाच रूपेण च गुणेन
च। प्राणाधिष्ठात्रीदेवीसा प्रा·
णांस्त्यक्तुंच कः क्षमः। प्राण
तोपिप्रियःपुत्र केषांवास्तिच


कश्चन। त्वं भद्रे गच्छ वैकुंठं
तवभद्रं भविष्यति। पतिंतमी
श्वरं कृत्वा मोदस्व सुचिरंसुखं
लोभ मोह काम कोप मानहिं
सा विवर्जिता। तेजसा तव
सा लक्ष्मी रूपेणच गुणेनच ॥
तयासार्द्धंतववशी सा शश्वत्काले
प्रयास्यति। गौरवंमहतातुल्यं
करिष्यति पति र्द्वयोः। प्रति
वर्षेषु ते पूजां महतीं तेमुदा
न्विताः। माघस्य शुक्लपंचम्यां
विद्यारंभेच सुंदरी। मानवा
मनवो देवा मुनींद्राश्चमुमुक्ष
वः। संतश्च योगिनःसिद्धा ना
गा गंधर्व राक्षसाः। मद्वरेणकरि
ष्यंति कल्पे कल्पे लयावधि भ
क्तियुक्ताश्चदत्वा चैवोपचाराणि
षोडश। काण्वशाखोक्त विधि
नाध्यानेनस्तवनेनच। जितेंद्रि
याःसंयताश्च घटेच पुस्तकेपि
च कृत्वा स्वर्णगुटिकांगंधचंद
नचर्चितां। कवचं ते ग्रहीष्यंति क
ण्ठे वा दक्षिणेभुजे। पठिष्यंति
च विद्वांसः पूजाकालेच पूजिते
इत्युक्त्वा पूजयामास तां देवी
सर्वपूजितः। ततस्ततपूजने
चक्रु ब्रह्मविष्णुमहेश्वराः ॥

अनेनतस्यापि पर्मस्य मुनींद्राः
सनकादयः। सर्वे देवाश्च म-
नवो नृपाश्च मानवादयः। व
भूवपूजितानित्या सर्वलोकैः
सरस्वती। नारदउवाच। पूजा-
विधानं स्तवनं ध्यानं कवचमी
प्सितं। पूजोपयुक्तं नैवेद्यपु-
ष्पंच चंदनादिकं। वद वेदवि
दां श्रेष्ठ श्रोतुं कौतूहलंमम
वर्द्धते साम्प्रतं शश्वत् किं-
मिदं श्रुतिसुंदरं। श्रीनारायण
उवाच। शृणुनारदवक्ष्यामिकाण्
वशाखोक्तपद्धतिं। जगन्मातुः
सरस्वत्याः पूजाविधिसमन्वितां
माघस्य शुक्लपंचम्यां विद्यारं
भदिनेपिच पूर्वेह्निसंयमंकृत्वा
तत्राह्निसंयतःशुचिः। स्नात्वा-
नित्यक्रियांकृत्वा घटंसंस्थाप्य
भक्तितः। संपूज्य देवषट्कंच
नैवेद्यादिभिरेवच। गणेशंच
दिनेशंच वह्निं विष्णुं शिवं शि
वां। संपूज्य संयतो गृहीततो
ऽभीष्टं प्रपूजयेत्। ध्यानेन-
वक्ष्यमाणेन ध्यात्वाबाह्यघटे-
बुधः। ध्यात्वा पुनः षोडशो
पचारेण पूजयेद्व्रती। पूजो
पयुक्तं नैवेद्यं यद्यद्वेदे-

निरूपितं वक्ष्यामि सांप्रतंकिं
चित् यथाधीतंयथागमं। न
वनीतं दधि क्षीरं लाजंच तिल
लड्डुकं। इक्षुमिक्षुरसं शुक्ल
वर्णं पक्वगुडंमधु। स्वस्तिकंश
र्करां शुक्लधान्यस्याक्षतमक्षतं
अस्विन्नशुक्लधान्यस्य पृथुकंशु
क्लमोदकं। घृतसैंधवसंस्कारै
र्हविष्यान्नैश्च व्यंजनैः। यवगोधू
मचूर्णानां पिष्टकं घृतसंस्कृतं
पिष्टकं स्वस्तिकस्यापि पक्वरं
भाफलस्यच। परमान्नंच सघृतं
मिष्टान्नंच सुधोपमं। नारिकें
लंतदुदकं केशरं मूलमार्द्रकं
पक्वरंभाफलंचारु श्रीफलंब
दरीफलं। कालदेशोद्भवंपक्वफ
लं शुक्लं सुसंस्कृतं। सुगंधिशु
क्लपुष्पंच सुगंधि शुक्लचंदनं
नवीनशुक्लवस्त्रंच शंखंचसुंद
रंमुने। माल्यंच शुक्लपुष्पाणि
शुक्लहारंचभूषणं। यद्दृष्टंच श्रु
तौध्यानं प्रशस्यं श्रुतिसुंदरं। त
न्निबोधमहाभागभ्रमभंजनका
रणं। सरस्वतीं शुक्लवर्णां सस्मि
तां सुमनोहरां। कोटिचंद्रप्रभा
मुष्ट पुष्टश्रीयुक्तविग्रहां। वह्नि
शुद्धांशुकाधानां सस्मितां सुम

नोहरां। रत्नसारेंद्र निर्माणव
रभूषणभूषितां। सुपूजितां
सुरगणै ब्रह्मविष्णु शिवादि
भिः। वंदेभक्त्यावंद्यातांमुनी
न्द्रमनुमानवैः। एवंध्यात्वाचमू
लेन सर्वंदत्वाविचक्षणः। संस्तू
यकवचंधृत्वा प्रणमेद्दंडवद्भु
वि। येषां चेषा मिष्टदेवी तेषां
नित्याक्रियामुने। विद्यारंभेच
वर्षांते सर्वेषां पंचमीदिने। स
र्वोपयुक्तोमूलश्च वैदिकाष्टा
क्षरंपरं। येषां येनोपदेशोवा
तेषां सम्मूल एवच। सरस्व
ती चतुर्थ्यंता वह्निजायांत
एवच। लक्ष्मीमायादिकश्चैव
मंत्रोःयंकल्पपादपः। पुराना
रायणश्चेमं वाल्मीकायकृपा
निधिः। प्रददौ जाह्नवीतीरे
पुण्यक्षेत्रेचभारते। भृगुर्ददौ
चशुक्राय पुष्करे सूर्यपर्वणि
चंद्रपर्वणि मारीचो ददौ वाक्
पतयेमुदा। भृगवेच ददौतु
ष्टो ब्रह्मा बदरिकाश्रमे। आस्ती
कायजरत्कारुर्ददौ क्षीरोद
सन्निधौ। विभाण्डको ददौ
मेरौ ऋष्यशृंगाय धीमते
शिवः कणादमुनये गौतमायच

ददौ मुदा। सूर्यश्च याज्ञवल्क्या
य तथाकात्यायनायच। शेषः
पाणिनयेचैवभरद्वाजायधीम
ते ददौ शाकटायनायसुतलेब
लिसंसदि चतुर्लक्षजपेनैव मं
त्रः सिद्धो भवेन्नृणां। यदि स्यात्
सिद्धमंत्रोपि बृहस्पतिसमो भ
वेत्। कवचंशृणुविप्रेंद्र यद्द
त्तं विधिनापुरा विश्वस्रष्टा वि
श्वजयंभृगवेगंधमादने। भृ
गुरुवाच। ब्रह्मन्ब्रह्मविदांश्रे
ष्ठब्रह्मज्ञानविशारद। सर्वज्ञ-
सर्वजनक सर्वेशसर्वपूजित।
सरस्वत्याश्चकवचं ब्रूहिविश्व
जयंप्रभो। अयातयाम मंत्राणां
समूहैर्युक्तंपरं। ब्रह्मोवाच। शृ
णुवत्सप्रवक्ष्यामिकवचं सर्वका
मदं। श्रुतिसारं श्रुतिसुखं श्रु
त्युक्तं श्रुतिपूजितं। उक्तं कृष्णे
न गोलोके मह्यं वृंदावनेव
ने। रासेश्वरेण विभुना रासे
च रासमंडले। अतीवगोप
नीयंच कल्पवृक्षपरं वरं। अ
श्रुताद्भुत मंत्राणांसमूहैश्चस
मन्वितं। यद्धृत्वा पठनाद्ब्रह्म
न्बुद्धिमांश्च बृहस्पतिः। यद्धृत्वा
भगवान्शुक्रः सर्वदैत्येषुपूजि



तः।पठनाद्धारणाद्वाग्मी कवी
न्द्रोवाल्मिकोमुनिः।स्वायंभुवो
मनु श्चैवयद्धृत्वा सर्वपूजितः।
कणादो गोतमः कन्वः पाणिनिः
शाकटायनः।ग्रंथंचकारयद्धृ-
त्वादक्षःकात्यायनःस्वयं।धृत्वा
वेदविभागंच पुराणान्यखिला
निच।चकारलीलामात्रेणकृष्ण
द्वैपायनःस्वयं।शातातपश्चसंव
र्त्तोवशिष्ठश्चपराशरः।यद्धृत्वा
पठनाद्ग्रंथं याज्ञवल्क्यश्चका
रसः।ऋष्यशृंगो भरद्वाजश्चा
स्तीकोदेवलस्तथा जैगीषव्यो
थजाबालिश्च यद्धृत्वासर्वपूजितः
कवचस्यास्य विप्रेन्द्र ऋषिरेव
प्रजापतिः।स्वयंछंदश्चबृहती
देवो रासेश्वरःप्रभुः। सर्वतत्त्व
परिज्ञान सर्वार्थसाधनेषुच।
कवितास्वचसर्वास्वविनियोगः
प्रकीर्तितः श्रीं ह्रीं सरस्वत्यै-
स्वाहा शिरोमेपातुसर्वतः श्रीं
वाग्देवतायै स्वाहा भालं मे
सर्वदावतु।ॐ सरस्वत्यैस्वाहे
ति श्रोत्रे पातुनिरंतरं।ॐ श्रीं
ह्रीं भारत्यै स्वाहा नेत्रयुग्मं-
सदावतु।ॐ ह्रीं वाग्वादि-
न्यैस्वाहा नासां मे सर्वतोवतु॥
ह्रीं विद्याधिष्ठातृदेव्यै स्वाहा
चोष्ठंसदावतु।ॐ श्रीं ह्रीं
ब्राह्म्यै स्वाहेतिदंतपंक्तिंसदा
वतु।ऐं मित्येकाक्षरो मंत्रोम
म कंठंसदावतु।ॐ ह्रीं श्रीं
पातु मे ग्रीवां स्कंधं मे श्रीं स
दावतु।ॐ वागधिष्ठातृदेव्यै
स्वाहासर्वं सदावतु।ॐ सर्व
कण्ठवासिन्यै स्वाहा प्राच्यां स
दावतु।ॐ सर्वजिह्वाग्रवासिन्यै
स्वाहाग्निदिशि रक्षतु।ॐ ऐं
ह्रीं श्रीं क्लीं सरस्वत्यै बुधज
नन्यै स्वाहा।सततं मंत्रराजो
यंदक्षिणे मांसदावतु॥
ऐं ह्रीं श्रीं त्र्यक्षरो मंत्रो नैर्ऋ
त्यांसर्वदावतु।ॐ ऐं कविजि
ह्वाग्रवासिन्यैस्वाहा मांवारुणे
ऽवतु॥ सदंबिकायैस्वाहा च
वायव्ये मां सदावतु।ॐ गद्य
पद्यवासिन्यै स्वाहा मामुत्तरे
वतु।ऐं सर्वशास्त्रवासिन्यैस्वा
हैशान्यै सदावतु।ॐ ह्रीं स
र्वपूजितायै स्वाहा चोर्द्धं सदा
वतु।ऐं ह्रीं पुस्तकवासिन्यै
स्वाहाधो मां सदावतु।ॐ ग्रन्थ
बीजस्वरूपायै स्वाहा मांसर्वतो
ऽवतु।इति ते कथितं विप्र-


सर्वमंत्रौघविग्रहं इदं विश्व
जयं नाम कवचं ब्रह्मरूपिणं
पुरा श्रुतंधर्मवक्त्रात् पर्वते ग
न्धमादने। तव स्नेहान्मयाख्या
तंप्रवक्तव्यंनकस्यचित् गुरु म
भ्यर्च्य विधिवत् वस्त्रालंकारचं
दनैः।प्रणम्यदंडवद्भूमौकवचं
धारयेत्सुधीः। पंचलक्षजपे
नैवसिद्धंतकवचंभवेत् यदि
स्यात् सिद्धकवचो बृहस्पतिस
मोभवेत्।महावाग्मीकवीन्द्रश्च
त्रैलोक्यविजयीभवेत्।शक्नो
तिसर्वं जेतुञ्च कवचस्यप्रसा
दतः।इदंचकाण्वशाखोक्तंक
वचंकथितंमुने। स्तोत्रं पूजा
विधानञ्च ध्यानंच वंदनं तथा
इतिब्रह्मवैवर्ते प्रकृतिखंडे स
रस्वतीकवचं॥ श्रीनारायण
उवाच। वाग्देवतायाः स्तवनं
श्रूयतां सर्वकामदं।महामु
निर्याज्ञवल्क्यो येनतुष्टावतां
पुरा।गुरुशापाच्च समुनिर्हत
विद्यो बभूवह। तदाजगाम
दुःखार्तो रविस्थानंच पुण्यदं
संप्राप्यतपसा सूर्यं लोलार्के
दृष्टिगोचरे। तुष्टाव सूर्यं
शोकेन रुरोदच मुहुर्मुहुः
सूर्यस्तंपाठयामास वेदवेदां
गमीश्वरः।उवाच स्तुहिवाग्देवीं
भक्त्याचस्मृतिहेतवे।तमित्यु
क्त्वा दीननाथोऽप्यंतर्द्धानं च-
कारसः।मुनिःस्नात्वाचतुष्टाव
भक्तिनम्रात्मकंधरः।याज्ञवल्क्य
उवाच।कृपांकुरुजगन्मातर्मा
मेवंहततेजसं।गुरुशापात्
नष्टस्मृतिं विद्याहीनंचदुःखि
तं।ज्ञानं देहि स्मृतिंदेहि वि
द्यां विद्याधिदेवते प्रतिष्ठांक
वितां देहि शक्तिं शिष्यप्रबो
धिकां।ग्रंथकर्तृत्वशक्तिंच
सत्शिष्यं सुप्रतिष्ठितं।प्रति
भांसत्सभायांच विचारक्षमतां
शुभां।लुप्तंसर्वं दैवदोषात्
नवीभूतं पुनःपुनः।यथांकुरं
भस्मनिचकरोति देवतापुनः
ब्रह्मस्वरूपापरमाज्योतीरूपा
सनातनी।सर्वविद्याधिदेवीया
तस्यैवाण्यैनमोनमः।ययावि
नाजगत् सर्वं शश्वज्जीवन्मृतं
परं।ज्ञानाधिदेवी या तस्यैस
रस्वत्यैनमोनमः। ययावि
नाजगत्सर्वंमूकमुन्मत्तवत्
सदा वागधिष्ठातृदेवी यात
स्यैवाण्यैनमोनमः।हिमचंद

नऊंदेइ कुमुदांभोज सन्निभा
वर्णाधिदेवी यातस्यै चाक्षरायै
नमोनमः। विसर्गबिंदुमात्रास्
पदधिष्ठानमेवच। तदधिष्ठा
तृदेवी या तस्यै वाण्यै नमोनमः
यया विनाऽत्र संख्यावान् संख्या
कर्त्तुं न शक्यते। कालसंख्या स्व
रूपा या तस्यै देव्यै नमोनमः।
व्याख्या स्वरूपा या देवी व्या
ख्याधिष्ठातृदेवता। भ्रमसि
द्धांतरूपा या तस्यै देव्यै नमोनमः
स्मृतिशक्ति ज्ञानशक्ति बुद्धि
शक्ति स्वरूपिणी। प्रतिभा क
ल्पनाशक्तिर्याच तस्यै नमोनमः
सनत्कुमारो ब्रह्माणं ज्ञानं पप्र
च्छ यत्र वै। बभूव जडवत्सोपि
सिद्धांतं कर्त्तुमक्षमः। तदाजगा
म भगवानात्मा श्रीकृष्ण ईश्वरः
उवाच सततं स्तोहि वाणीमि
ति प्रजापते। सचतुष्टाव तां
ब्रह्मा चाज्ञया परमात्मनः।
चकार तत्प्रसादेन तदासिद्धा
तमुत्तमं। यदाप्यनंतं पप्रच्छ
ज्ञानमेकं वसुंधरा। बभूव मू
कवत्सोपि सिद्धांतं कर्त्तुमक्षमः
तदा त्वां सच तुष्टाव संत्रस्तः
कश्यपाज्ञया। ततश्चकार सिद्धां

तं निर्मलं भ्रमभंजनं। व्यासः
पुराणसूत्रं पप्रच्छ वाल्मी
कं यदा मौनीभूतः ससस्मार
त्वामेव जगदंबिकां। तदा चका
र सिद्धांतं त्वद्वरेण मुनीश्वरः। स
प्राप निर्मलं ज्ञानं भ्रमान्धध्वंस
दीपकं। पुराणसूत्रं श्रुत्वा स
व्यासः कृष्णकलोद्भवः। त्वां सि
षेवे च दध्यौ च शतवर्षं च पुष्करे
तदा त्वत्तो वरं प्राप्य सत्कवीन्द्रो
बभूव ह। तदा वेदविभागं
च पुराणं च चकार सः। तदा
महेंद्रः पप्रच्छ तत्वज्ञानं शिवा
शिवं। क्षणं त्वामेव संचिंत्य
तस्मै ज्ञानं ददौ विभुः। पप्रच्छ
शब्दशास्त्रं च महेंद्रश्च बृहस्प
तिं। दिव्यं वर्षसहस्रं च स त्वां
दध्यौ च पुष्करे। तदा त्वत्तो व
रं प्राप्य दिव्यं वर्षसहस्रकं।
उवाच शब्दशास्त्रं च तदर्थं च
सुरेश्वरं। अध्यापिताश्च ये शि
ष्या येरधीतं मुनीश्वरैः। ते च त्वां
परिसंचिंत्य प्रवर्तंते सुरेश्वरि
त्वं संस्तुता पूजिता च मुनींद्रम
नुमानवैः। दैत्येंद्रैश्च सुरैश्चा
पि ब्रह्मविष्णुशिवादिभिः। ज
डीभूतः सहस्रास्यः पंचवक्त्रश्च

चतुर्मुखः। यां स्तोतुं किम
हं स्तौमि तामेकास्येन मान
वः। इत्युक्त्वा याज्ञवल्क्यश्च
भक्तिनम्रात्मकंधरः। प्रणनाम
निराहारो रुरोद च मुहुर्मुहुः।
तदा ज्योतिः स्वरूपा सा तेनाऽदृ
ष्टाप्युवाच तं। सुकवींद्रो भवे
त्युक्त्वा वैकुंठं च जगाम ह। या
ज्ञवल्क्यकृतं वाणीस्तोत्रं यः
संयतः पठेत्। सुकवींद्रो महा
वाग्मी बृहस्पतिसमो भवेत्। म
हामूर्खश्च दुर्मेधा वर्षमेकं यदा
जपेत्। स पंडितश्च मेधावी सु
कविश्च भवेद्ध्रुवं। इति ब्रह्मवैव
र्ते प्रकृतिखंडे सरस्वत्युपाख्या
ने पंचमोऽध्यायः। अथ च। संवत्स
रप्रदीपे। पंचम्यां पूजयेल्लक्ष्मी
पुष्पधूपान्न वारिभिः। मस्या
धारं लेखनीं च पूजयेन्न लिखे
त्ततः। माघे मासि सिते पक्षे पंच
मी या श्रियः प्रिया। तस्याः पूर्वा
ह्ण एवेह कार्यः सारस्वतोत्सवः
सारस्वत इत्युपादानात् श्रियः
सरस्वत्याः। तथा च व्याडिः॥
लक्ष्मी सरस्वती धी त्रिवर्गसंप
द्विभूतिशोभासु। उपकरणवे
शरचना विधानेषु च श्रीरितिप्र
थिः।

ता। तथा चोक्तं गं दध्यादित्या
दौ नानार्थशब्दस्यापि प्रसि
द्धार्थत्वेन व्यवहारः। विपरी
तार्थग्राहक वाक्यशेषसत्वेन
अप्रसिद्धार्थत्वेन च व्यवक्रिय
ते सर्वदा नानार्थानां व्यवहारस्तु
श्लेषकाव्यादाविति तत्कृष्णश्च
कलमिंदौ बिभ्रती शुभ्रकांतिः
कुंचभरनमितांगी सन्निसन्ना
सिताब्जे। निजकरकमलोद्य
ल्लेखनी पुस्तकश्रीः सकलवि
भवसिद्ध्यै पातु वाग्देवता नः। इति
शारदां कं ध्यायेत् पाद्यादिभिः
पूजयित्वा भद्रकाल्यै नमोनि
त्यं सरस्वत्यै नमो नमः। वे
दवेदांत वेदांग विद्यास्थानेभ्य
एव च स्वाहा। इति ब्रह्मपुराणी
येणार्चिः पूजयेत्। मत्स्यसूक्ते
वं पुजीवं च ज्ञेणन्त्र सरस्वत्यै
नेदापयेत्। सरस्वती संपू
ज्य। यथा नदेवो भगवान् ब्र
ह्मालोकपितामहः। त्वां परित्य
ज्य संतिष्ठेत्तथा भव वरप्रदा
वेदाः शास्त्राणि सर्वाणि नृत्य
गीतादिकं च यत्। न विहीनं त्व
या देवि तथा मे संतु सिद्धयः
लक्ष्मी मेधा धरा पुष्टि गौरी·



तुष्टिः प्रभा धृतिः। एताभिः पाहि
तनुभि रष्टाभि र्मां सरस्वति॥
इति मत्स्यपुराणीयैः प्रार्थयेत्
इति निष्पादितत्वे॥ अथ सर
स्वतीमंत्रादि। अद्रिर्वकर्णसं
रुद्धो द वाग्वादिनि ठद्वयं। स
रस्वत्या दशार्णोयं वागैश्वर्यफ
लप्रदः। मंत्रो यथा। वद वद वा
ग्वादिनि वह्निवल्लभेति दशा
क्षरः। तथा निबंधे। भुवनेश्वरी
हं पुटितोयं महासारस्वतप्रदः॥
अस्य यंत्रं। ओमेंद्वौ वसनाग्नि
कर्णिक मध्ये हेहैः स्फुरत्के
शरं पत्रांतर्गत पंचवर्गाय शि
लावर्णादि वर्णक्रमात्। आसाध्य
त्रिपुलांत लांगलियुक्ता वैणाि
पुरेणावृते यंत्रे कल्पितमत्र पूजय
ते तां वर्णात्मिकां देवतां॥ सो
त्रमीये। कर्णिकायां भेतवी
जं विधिना विलिखेत् गुरुः
ततः षोडश केशरेषु विलि
खेत् षोडश स्वरान्। तथाष्टद
लमध्येच वर्गाष्टकं यथाविधि
कादि मांताः पंचपंचवर्गाः स्यु
र्मातृकोदिताः॥ यादि वांताः
शादि हांता लक्षवीजो प्रविन्य
सेत्। चतुरस्र चतुर्द्वारे दिक्षु

वं ठं विदिक्षु च॥ अस्य पूजा
प्रयोगः। प्रातः कृत्यादि पी
ठन्यासांतं कर्म विधाय केश
रेषु मध्ये च पीठशक्तीर्न्यसेत्
यथा। ॐ मेधायै नमः। ॐ
प्रज्ञायै नमः। ॐ प्रभायै नमः
ॐ विद्यायै नमः। ॐ धियै न
मः। ॐ धृत्यै नमः। ॐ स्मृत्यै
नमः। ॐ बुद्ध्यै नमः। ॐ वि
द्येश्वर्यै नमः। मध्ये तदुपरि
ॐ पद्मासनाय नमः। प्रणवा
दिनमोन्तेन पूजयेत्। तथा च
शारदातिलके। आधारशक्ति
मारभ्य पीठशक्तीन् समर्चयेत्
मेधा प्रज्ञा प्रभा विद्या धीधृति
स्मृतिबुद्धयः। विद्येश्वरीच सं
प्रोक्ता नारायणवशात्मयः॥
वर्णाब्जेनासनं दद्यात् मूर्तिं
मूलेन कल्पयेत्। ततः ऋष्या
दिन्यासः। तद्यथा। शिरसि
ॐ कण्व ऋषये नमः। मायाप
विन्यसेत् ॐ बृहस्पतये ऋष
ये नमः। मुखे विराट्छंदसे न
मः। हृदि वागीश्वर्यै देवतायै न
मः॥ अथ मंत्रन्यासः। शिरसि
वं नमः। श्रवणयो दं नमः।
वं नमः। चक्षुषोर्दं नमः। वां

नमः। नासिकयो र्वां नमः। दिं
नमः। वदने निं नमः। लिंगे
स्वां नमः। गुह्ये हां नमः॥ ततो
मातृकायाः करांगन्यासौ कृत्वा
ध्यायेत्। तथा च निबंधे। शि
रः श्रवण दृङ् नासा वदनांघ्रि
गुदे ष्विमान् न्यस्य वर्णान् षडं
गानि मातृकोक्तानि कल्पयेत्
ततो ध्यानं। तरुणशकलमि
न्दो र्विभ्रती शुभ्रकांतिः कुचभर
णमितांगी सन्निषण्णा सिताब्जे
निजकरकमलोद्यल्लेखनी पु
स्तकश्रीः कमलविभवसिद्ध्यै
पातु वाग्देवता नः॥ एवं ध्या
त्वा मानसैः संपूज्य शंखस्था
पनं कुर्यात्। ततः पीठपूजां
कृत्वा केशरेषु मध्ये दिक्षु चमे
धादि पीठमन्वंतं संपूज्य पुन
र्ध्यात्वावाहनादि पंचपुष्पांज
लिदान पर्यंतं कर्म विधाय आ
वरणपूजां कुर्यात्। आग्निकोणे
अं कं खं गं घं ङं आं हृदयाय
नमः। एवं नैर्ऋते ई चं छं जं झं
ञं ईं शिरसे स्वाहा। वायुकोणे
उं टं ठं डं ढं णं ऊं शिखायै
वषट्। ईशाने एं तं थं दं धं
नं ऐं कवचाय हुं। मध्ये ॐ पं

फं बं भं मं औं नेत्रत्रयाय वौ
षट्। दिक्षु अं यं रं लं वं शं षं
सं हं लं क्षं अः करतल पृष्ठा
भ्यां अस्त्राय फट्। ततः पत्रेषु
पूर्वादिषु ॐ योगायै नमः। ॐ
सत्यायै नमः। ॐ विमलायै नमः
ॐ ज्ञानायै नमः ॐ बुद्ध्यै नमः।
ॐ स्मृत्यै नमः। ॐ मेधायै न
मः। ॐ प्रज्ञायै नमः। दलाग्रे
षु ब्रह्माद्या मातरः पूज्याः प्र
णवादि नमोंतिकाः॥ तद्ब
हि र्विंद्रादीन् वज्रादींश्च पूज
येत्। ततो धूपादि विसर्जनां
तं कर्म समापयेत्। अस्य
पुरश्चरणं दशलक्षजपः। त
था च दशलक्षं जपेन्मंत्रं दशांशं
जुहुयात्ततः। खंडरीकैः पयोभ्य
क्तैः तिलैः त्रिमधुरान्वितैः इति
मंत्रांतरं। हृदयांते भगवति वद
शब्दयुग ततः। वाग्देवि वह्निजा
यांते वाग्भवाद्यं समुच्चरेत्।
अस्य पूजाप्रयोगः। प्रातःकृ
त्यादि पीठन्यासांतं कर्म
विधाय केशरेषु मध्ये च पूर्वो
क्त मेधादि पीठशक्तीः पीठम
न्त्रं च न्यसेत्। ततः पूर्वोक्त ऋ
ष्यादिन्यासं कृत्वा करांगन्यासौ

कुर्यात्। तद्यथा ऐं अंगुष्ठाभ्यां
नमः। नमस्तर्जनीभ्यां स्वाहा
भगवति मध्यमाभ्यां वषट्।
वद वद अनामिकाभ्यां हुं। वा
ग्देवि कनिष्ठाभ्यां वौषट् स्वाहा
करतल पृष्ठाभ्यां फट्। एवं हृ
दयादिषु। तथा च निबंधे। म
नोः षड्भिः पदैः कुर्यात् जातिषु
क्तं षडंगकं। ततो ध्यानं॥
शुभ्रां स्वच्छविलेपमाल्यवसनां
शीतांशुखंडोज्वलां व्याख्याम
क्षगुणं सुधाढ्यकलशं विद्यां
च हस्ताम्बुजैः। बिभ्राणां कमला
सनां कुचनतां वाग्देवतां सस्मि
तां वंदे वाग्विभवप्रदां त्रिनय
नां सौभाग्यसंपत्करीं॥ ए
वं ध्यात्वा मानसैः संपूज्य शं
खस्थापनं कुर्यात्। ततः पूर्वो
क्तक्रमेण पूजयेत्। किं त्वंग
मंत्रे विशेषः। अस्य पुरश्चर
णमक्षलक्षजपः। तथा चाह
विद्यार्थी जपेन्मंत्रं वसुलक्षम
नन्यधीः। दशांशं जुहुयादंते ति
लैराज्यपरिप्लुतैः। तारो माया
परो बिंदुः शक्तिस्तारः सरस्व
ती। ऊँ तो नमोन्तको मंत्रः प्रो
क्तः एकादशाक्षरः॥ अस्याः
पूजाप्रयोगः। प्रातः कृत्यादि
पूर्वोक्त पीठमन्वंते विन्यस्य पू
र्वोक्त ऋष्यादिन्यासं कुर्यात्
ततो मंत्रन्यासः। ऊँ नमो ब्रह्म
रंध्रे। ह्रीं नमो भ्रुमध्ये। ऐं न
मः श्रीं नमश्चक्षुषोः ऊँ नमः
सं नमः कर्णयोः। रं नमः स्वं
नमो नासिकयोः। ह्रीं नमो मु
खे। तं नमो लिंगे। मं नमो गु
ह्ये। ततः करांगन्यासः। ऐं अं
गुष्ठाभ्यां नमः। ऐं तर्जनीभ्यां
स्वाहा इत्यादि। एवं हृदयादिषु
तथा च निबंधे मन्त्रवर्णान्न्यसे
न्मंत्री वाग्भवेनांगकल्पना इ
त्यादि॥ ततो ध्यानं॥ बालीं
हर्षां निशाकरोज्वलमुखीं
दूरं कुंदप्रभां चेतसाह्लादिकिंतम
लकां निजकरैः संबिभ्रतीमा
दरात्। वीणामक्षगुणं सुधा
ढ्यकलशं विद्यां च तुंगस्तनीं दि
व्याभरणैर्विभूषिततनुं हंसा
धिरूढां भजे। एवं ध्यात्वा मान
सैः संपूज्य शंखस्थापनं कुर्यात्
ततः पीठपूजां विधाय केश
रेषु मध्ये च पूर्वोक्त पीठशक्तीः
पीठमंत्रं च यजेत्। ततः पुन
र्ध्यात्वा आवाहनादि पंचपुष्पा

ञ्जलि दान पर्यंतं कर्म समाप्य
आवरणपूजां कुर्यात्। देव्याद
क्षिणे ऊँ संस्कृतायै वाङ्मय्यै
नमः। वामे। ऊँ प्राकृतायै वा
ङ्मय्यै नमः। ततः केशरेषु अ
ग्निकोणे ऐं हृदयाय नमः॥
नैर्ऋते ऐं शिरसे स्वाहा। वा
यव्ये ऐं शिखायै वषट्। ईशाने
ऐं कवचाय हुं। मध्ये ऐं नेत्र
त्राय वौषट्। दिक्षु ऐं अस्त्राय
फट्। ततः पत्रादिपत्रेषु ऊँ प्र
ज्ञायै नमः एवं मेधायै श्रुत्यै
शक्त्यै स्मृत्यै वागीश्वर्यै मत्यै
स्वस्त्यै। ततः पत्राग्रेषु ब्राह्म्या
द्याः पूजयेत्। तथा च निबंधे
देव्या दक्षिणतः पूज्या संस्कृता
वाङ्मयी शुभा। प्राकृता वाङ्मयी
पूज्या वामतः सर्वदा शुभा॥
दिक्षु पूर्वादि वदंगानि प्रज्ञाद्याः पू
जयेत् पुनः। प्रज्ञा मेधा श्रुतिः
शक्तिः स्मृति वागीश्वरी मतिः
स्वस्ति श्चेति समाख्याता ब्राह्म्या
द्या स्तदनंतरं। तद्बहि रिन्द्रादी
न् वज्रादींश्च पूजयेत्। ततो
धूपादि विसर्जनांतं कर्म स
मापयेत्। अस्य पुरश्चरणं द्वा
दशलक्षजपः। तथा च। ज
पेत् द्वादशलक्षाणि तत्सहस्र
सितांबुजैः। नागचंपकपुष्पैर्वा
जुहुयात् साधकोत्तमः॥ मंत्रां
तरं शारदायाः। वाचस्पतेः स्रुते
भूयः स्रुव स्रु विति कीर्तयेत्
वाग्देवी मनु राख्यातो रुद्रसं
ख्याक्षरो परः॥ अस्य पूजादि
कं पूर्ववत्। करांगन्यासस्तु
ऐं अंगुष्ठाभ्यां नमः॥ वाचस्प
ते तर्जनीभ्यां स्वाहा। अमृते
मध्यमाभ्यां वषट्। प्लुव अना
मिकाभ्यां हुं। प्लुः कनिष्ठाभ्यां
फट्। एवं हृदयादिषु। तथा
च निबंधे। कुर्यादंगानि विधि
वत् वाग्भाद्यैः पंचभिः पदैः।
ध्यानेत्। आसीना कमलेकरै
र्जपवटीं पद्मद्वयं पुस्तकं बि
भ्राणा तरुणेंदु बद्धमुकुटा शुक्ले
न्दु कुंदप्रभा। भालोन्मीलितलोच
ना कुचभराक्रांता भवेद्भू
तये भूयाद्वागधिदेवता मुनि
गणैरासेव्यमाना निशं। एवं
ध्यात्वा पूर्ववत् पूजादिकं कुर्या
त्। अस्य पुरश्चरणमेकादशल
क्षजपः। तथा च। रुद्रलक्षं जपे
न्मंत्रं दशांशं जुहुयाद्घृतैः॥
मंत्रांतरं शारदायास्तोषकं शा



यत्नं विसर्गःसकेवलचतुर्मुखं
प्रतीशेंदुयुतो वह्निर्विंदुमस्तो
तुमान् भृगुः उक्तानित्रीशिवी
ज्ञानि सद्भिः सारस्वतार्थिनां।
तोयंवकारः विसर्गःप्रायन मा
कारः केवलेन अकाररहितेन
ककारेण सहितः तेनवाग्वि·
ति सिद्धं वाग्भव मित्यर्थः ॥
केचित्तु ललितलक्षणभया
देवंवदंति आकारयुक्तोवकारः
केमस्तकेवलते केवलोनुस्वा
रः तद्युक्तेन वकारेणसहवर्त
तेतेन ह्मा मिति। तत्र। निष्फल
त्वाणयोः शक्तितुल्यत्वात्।वाक
वाग्भव मिति पर्य्यायः।वस्तुत
स्तु ऐंकं ऐं। द्वादशस्वर मुद्ध
त्यविंदुनाद विभूषितं। विंदुना
दसमायुक्तं वह्निवीजं समुद्धरे
त्। षष्ठस्वरसमायुक्तं द्वितीय·
वीजमुद्धरेत्।चंद्रवीजसमुद्धृत्य
वरुणं योजयेत्ततः। त्रयोदश
स्वरारूढं विंदुनादविभूषितं।
इति विश्वसारवचनात् वाग्भव
वीज मेव। अस्य पूजादिकंपूर्व
वत्।करांगन्यासस्तु द्विरुक्तैः·
त्रिभिर्वीजै विधेयः। तथा च
निबंधे। अंगानि कल्पयेन्मंत्री·

द्विरुक्तै जाति संयुतैः। ध्यानं
तु। मुक्ताहारावदाता शिरसि
शशिकलालंकृता वाहुभिःसे
व्याख्यां वर्णात्तमाला मणिम
यकलसं पुस्तकेचोद्वहंती। आपी
नोत्तुंग वक्षोरुह भर विलसन्म
ध्यदेशा मयीशा वाचामीडेचिरा
य त्रिभुवननमिता पुंडरीकेनि
षण्णा। एवं ध्यात्वापूर्ववत् पू
जादिकंकुर्य्यात्। अस्यपुरश्च
रणं त्रिलक्षजपः। तथा च। त्रि
लक्षं प्रजपेन्मंत्रं जुहुयात्तद
शांशतः। पायसैराज्यसंसिक्तैः
संस्कृते हव्यवाहने। अथपा
रिजातसरस्वतीमंत्रः। मंत्रदे
वप्रकाशिकायां। सच प्रणव
हृल्लेखा संपुटित हकार सका
रौकारविंदुयुक्तः सरस्वतीङेंता
नतिश्च अस्यपूजा। प्रातःकृत्या
दि पीठमंत्रांते विन्यस्य ऋष्या
दिन्यासंकुर्य्यात्। शिरसिकन्वऋ
षयेनमः। मुखेत्रिष्टुप्छंदसेनमः
हृदि पारिजातसरस्वत्यै देवता
यैनमः। ततो मात्रकोक्तकरां
गन्यासौ कुर्य्यात्। मूर्द्धनि म
ध्य नेत्र कर्ण नासापुटद्वयजि
ह्वा लिंग पायुषु एकादशाक्षर

न्यासः। ततो ह्सां अंगुष्ठाभ्यां
नम इत्यादिनाकरांगन्यासौ कु
र्य्यात् अस्यतु सर्वंपूर्ववत्। द
क्षिणामूर्तिसंहितायां तु। संप·
त्प्रदाख्या भैरव्या वाग्भवंवीज·
मालिखेत्। तारेणपरया देवि सं
पुटीकृत्यमंत्रवित्। सरस्वत्यैहृ
दंतोयं रुद्राणेण मनुरीरितः ॥
प्रपंचसारे। आद्यंतप्रणव शक्ति
मध्यसंस्था वाक भूयोभवतिच
सरस्वतीङेंता। नमस्ततोमनुरय
मीशासंख्यवर्णः संप्रोक्तो भज
मानः पारिजातः। दक्षिणामूर्ति
ऋषि प्रोक्तो गायत्रीछंद ईरि
तं। पारिजातेश्वरी वाणी देवता
परिकीर्तिता। तृतीयंच द्वितीयं
च वीजशक्तिकीलकं। कीलकं
परमेशानि महासारस्वतप्रदं।
षड्दीर्घस्वरसंभिन्नवीजेनांगा
नि विन्यसेत्। ततो ध्यानं।
हंसारूढा हरे हसित हारेंदुकुं
दावदाता वाणीमंदस्मिततरमु
खी मौलिवद्धेंदुरेखा विद्या वी
णामृतमयघटाक्षस्रजा दीप्तह
स्ताशुभ्राब्जस्था भवदभिमतप्रा
प्तयेभारतीस्यात्। अस्यपूजादिकं
पूर्वोक्तैकादशाक्षरीवत्। पुर

श्चरणं तु द्वादशलक्षजपः। सित
पक्षे नागचंपके वा जुहुयात्
द्वादशसहस्र मिति। इति तंत्र
सारः ॥ नदीविशेषस्यपर्य्या
यः। प्लक्षसमुद्भवा १ वाक्
प्रदा २ ब्रह्मसुता ३ भारती ४
वेदाग्रणीः ५ पयोष्णिजाता ६
वाणी ७ विशाला ८ कुटिला ९
तज्जलगुणाः। स्वादुत्वं। पूतत्वं।
सर्वरुजापहत्वं। रुच्यत्वं। दीपन
त्वं। पथ्यत्वं। देहकांतिकरत्वं।
लघुत्वंच। इति राजनिर्घण्टः ॥
सात देशभेदे सप्तनाम्नीयथा।
पुष्करे पितामहयज्ञे आहूता सु
प्रभा १ नैमिषारण्ये सत्रयाजिभि
ऋषिभि राहूता कांचनाक्षी २
गयदेशे गयराजयज्ञे आहूता
विशाला ३ उत्तरकोशलायां
औद्दालकमुनियज्ञे समाहूता
मनोरमा ४ ऋषभद्वीपेकुरुक्षे
त्रे कुरुराजयज्ञे समाहूता ओ
घवती ५ गंगाद्वारे दक्षप्रजा
पतियज्ञे समाहूता सुरेणुः ६
हिमालयपर्वते ब्रह्मणः पुनर्य
ज्ञे समाहूता विमलोदा ७ तत्र
सप्तसरस्वत्यः समागता। अत
एवतत्तीर्थं सप्तसारस्वतनाम्ना

ख्याते। इतिमहाभारते शाल्य
पर्व। तस्याउत्पत्ति ब्रह्मपत्नी
त्वस्य कारणंचयथा नारायण
उवाच सरस्वती सा वैकुंठे स्वयं
नारायणांतिके। गंगाशापेन॰
कलया कलहाद्भारते सरित्॥
पुण्यदापुण्यजननी पुण्यतीर्थ
स्वरूपिणी। पुण्यवद्भिर्निषेव्या
चस्थितिः पुण्यवतां मुने। तप
स्विनां तपोरूपा तपस्याकारस्व
पिणी। कृतपापेध्मदाहाय ज्वल
दग्निस्वरूपिणी। ज्ञानेसरस्वती॰
तोये मग्नं ये स्नानवै भुवि। ते
षां स्थितिश्च वैकुंठे सुचिरंह
रिसंसदि। भारते कृतपापीच
स्नात्वा तत्रावलीलया। मुच्यते
सर्वपापेभ्यो विष्णुलोके वसे॰
च्चिरं। चातुर्मास्यां पौर्णमास्यां
अक्षयायां दिनक्षये। व्यतीपा
तेचग्रहणे॰ अस्मिन् पुण्यदिने
पिच। अनुसंगेन यः स्नाति
हेलया श्रद्धयाथवा। सारूप्यं
लभतेनूनं वैकुंठेसहरेरपि।
सरस्वतीमन्त्रंतत्र मासमेकंच्च॰
यो जपेत्। महामूर्खः कवीन्द्र
श्च स भवेन्नात्र संशयः॥ नि
त्यंसरस्वतीतोये यः स्नातिमु॰
ण्डयेन्नरः। नगर्भवासं कुरुते
पुनरेवसमानवः। इत्येवंकथि
तंकिंचित् भारतीगुणकीर्तनं
सुखदं पुण्यदं सारं किंभूयः
श्रोतुमिच्छसि। नारदउवाच
कथंसरस्वतीदेवी गंगाशापे॰
नभारते। कलया कलहेनैव॰
बभूव पुण्यदासरित्। नारा॰
यण उवाच। शृणु नारदवक्ष्या
मिकथामेतां पुरातनीं। यस्याः
श्रवणमात्रेण सर्वपापैः प्रमु॰
च्यते। लक्ष्मीसरस्वतीगंगाति
स्रोभार्या हरेरपि प्रेम्णा समा
स्ता स्तिष्ठंति सततं हरिसन्निधौ
चकार सैकदा गंगा विष्णोर्मु
खनिरीक्षणं सस्मिताच सका
माच सकटाक्षं पुनःपुनः॥
विभुर्जहासतद्वक्त्रं निरीक्ष्यच
सुखंमुदा। क्षणं चकार तद्दृष्ट्वा
लक्ष्मीर्नैव सरस्वती। बोधयामा
स तां पद्मा सत्वरूपाच सस्मि
ता। क्रोधाविष्टाचसावाणी न
च शांता बभूवह। उवाच गंगा
भर्तारं रक्तास्या रक्तलोचना।
कम्पिता कोपवेगेन शश्वत्प्र
स्फुरिताधरा। सरस्वत्युवाच।
सर्वत्र समताबुद्धिः सद्भर्तुः का

मिनी भूति धार्मिष्ठस्यवरिष्ठ
स्यविपरीतास्वलस्यच। ज्ञाते
सौभाग्यमाधिक्यंगंगायां तेग॰
दाधर। कमलायांच तत्तुल्यं नच
किंचिन्मयिप्रभो। गंगायाः प
द्मयासार्द्धं प्रीतिश्चास्ति सुसम्म
ता। क्षमांचकारतेनेदं विपरीतं
हरिप्रिया। किंजीवनेनमेऽत्रै
वदर्भगायाश्च साम्प्रतं। नि
ष्फलं जीवनं तस्याः यापत्युः
प्रेमवंचिता। त्वांसर्वेशंसत्वरूपं
ये वदंतिमनीषिणः ते चमूर्खा
न वेदज्ञा नज्ञानंतिमतिंतव।
सरस्वतीवचः श्रुत्वा दृष्ट्वा तां
कोपसंयुतां। मनसास समा
लोच्य प्रजगाम बहिःसभां।
गते नारायणे गंगा मुवाच
निर्भयं रुषा। वागाधिष्ठात्रदेवी
सा वाक्यं श्रवणदुष्करं। हे नि
र्लज्जे हे सकामे स्वामिगर्वंक
रोषिकिं। अधिकंस्वामिसौभा
ग्य विज्ञापयितुमिच्छसि। मा
नचूर्णं करिष्यामितवाद्यहरि
सन्निधौ। किं करिष्यतितेकां
तो ममैव कांतवल्लभे। इत्येव॰
मुक्त्वा गंगायाः केशं ग्रहीतुमु
द्यता। वारयामास तां पद्मा॰
मध्यदेशोस्थितासती। शशाप
वाणीतांपद्मां सहद्बलवतीसती
वृक्षरूपा सरिद्रूपा भविष्यसि
नसंशयः। अस्मन्नतान्त्वेतांदृष्ट्वा
कोपप्रस्फुरिताधरा। उवाचगं
गातां देवीपद्मांच रक्तलोचना
गंगोवाच। त्वमुत्सृज्य महो
ग्रांच पद्मेकिंमेकरिष्यति। वा
गदुष्टावागधिष्ठात्री देवीयंक
लहप्रिया। इत्येव मुक्त्वा सादे॰
वी वाण्यै शापं ददाविति। स
रित्स्वरूपा भवतु साया त्वांच
शशापह। अधोमर्त्यंसाप्रया
तुसंति यत्रैव पापिनः। कलौ
तेषांच पापंत्वं लभिष्यसि न
संशयः। इत्येवं वचनं श्रुत्वा
तां शशाप सरस्वती। त्वमेव
यास्यसि महीं पापिपापंलभि
ष्यसि। एतस्मिन्नंतरेतत्र भगवा
नाजगामह। चतुर्भुज श्चतुर्भि
श्च पार्षदैश्च चतुर्भुजैः। सरस्व
तीं करे धृत्वा वासयामासव
क्षसि बोधयामास सर्वज्ञः स
र्वज्ञानं पुरातनं। श्रीनारायण
उवाच। लक्ष्मित्वं कलयागच्छ
धर्मध्वजगृहेशुभे। अयोनिसंभवा
योनौ तस्यकन्या भविष्यसि॥



तत्रैव दैवदोषेण वृक्षत्वंच ल
भिष्यसि। मदंशास्मासरस्वैवशं
खच्छदस्यकामिनी। भूत्वापश्चा
त्समत्पत्नी भविष्यसिनसंशयः
त्रैलोक्यपावनीनाम्नातुलसीति
चभारते। कलयाचसरिद्भूत्वा
शीघ्रं गच्छवरानने भारतेभा
रतीशापात् नाम्ना पद्मावती
भव। गंगेयास्यसिपश्चात्वमं
शेनविश्वपावनी। भारते भा
रतीशापात् पापदाहाय पापि
नां। भगीरथस्यतपसा तेननी
ता स्वर्ककरात् नाम्ना भागी
रथीएता भविष्यसि महीतले
मदंशस्य समुद्रस्य जाया भव
ममाज्ञया। मत्कलांशस्यतस्य
वशांतनोश्च सुरेश्वरि। गंगा
शापेन कलया भारतंगच्छ
भारति। कलहस्य फलंभुंक्ष्व
सपत्नीभ्यां सहाच्युते। स्वयंच
ब्रह्मसदनं ब्रह्मणःकामिनीभ
व। गंगायातुशिवस्थानमत्र पद्मे
वतिष्ठतु। शांता च क्रोधरहिता
मद्भक्ता सत्वरूपिणी। महासा
ध्वीमहाभागा सुशीलाधर्म्मचा
रिणी। यदंशाकलयासर्वाधर्म्मिष्ठा
श्चपतिव्रताः शांतरूपाःसुशीलाश्च
प्रतिविश्वेषु योषितः। तिस्रोभा
र्य्या स्त्रिशलाश्च त्रयो भृत्या
श्चबांधवाः। ध्रुवं वेदविरुद्धा
श्चनह्येतेमंगलप्रदाः। गच्छ
गंगे शिवस्थानं ब्रह्मस्थानंस
रस्वती। अत्र तिष्ठतु मद्गेहे सु
शीलाकमलालया। इत्युक्त्वा
जगतां नाथो विररामचनार
द। अत्युच्चै रुरुदुर्देव्यः समालि
ङ्ग्य परस्परं। ताश्च सर्वाः समा
लोच्य क्रमेणोचुः सदीश्वरं।
कम्पिताः साश्रुनेत्राश्च शोके
नच भयेनच। सरस्वत्युवाच।
विदायं देहि मेनाथ दुष्टायाज
न्मशोधनं। सत्स्वामिनापरि
त्यक्ता कुतो जीवंति कास्त्रियः।
देहत्यागं करिष्यामि योगेन
भारतेध्रुवं। अत्युच्छ्रितो निप
तनं प्राप्नु महेति निश्चितं। गं
गोवाच। अहं केनापराधेनत्व
या त्यक्ता जगत्पते। देहत्यागं
करिष्यामि निर्दोषायावधंल
भ। निर्दोषांकामिनींत्यागंक
रोति योजनोभवे। सयातिन
रकं कल्पं किं ते सर्वेश्वरस्यवा।
महालक्ष्मी रुवाच। नाथ सत्व
स्वरूपस्त्व कोपःकथमहो तव।

प्रसादं कुरु भार्य्येहे सदीशस्यच
मावरं। भारतेभारतीशापात्या
स्यामिकलयाविभो। कतिका
लं स्थिति तत्र कदा द्रक्ष्यामि
तेपदं। दास्यंति पापिनःपापं
मह्यं स्नानावगाहनात्। केन
तेन विमुक्ताहं यास्यामिष्यामि
त्वत्पदं। कलया तुलसीरूपा
धर्म्मध्वजसुता सती। भूत्वाकदा
लभिष्यामित्वत्पादांबुजमच्युत
वृक्षरूपा भविष्यामि त्वदधिष्ठा
तृदेवता। समुद्धरिष्यसिकदात
न्मेब्रूहि कृपानिधे। गंगासरस्व
तीशापात् यदि यास्यति भारते
सा केन मुक्ता पापाच्च कदा
त्वांवालभिष्यति। गंगाशापेन
साचाणीयदि यास्यति भारते।
कदा शापाद्विनिर्मुच्य लभि
ष्यतिपदंतव। तांवाणींब्रह्मसदनं
गंगां वा शिवमंदिरं। गंतुंव
दसि हेनाथ तत्क्षमस्वचतेव
चः। इत्युक्त्वा कमलाकांतापादं
धृत्वा ननामच। स्वकेशैर्वेष्टनं
कृत्वा रुरोदच पुनः पुनः। उ
वाच पद्मनाभस्तांपद्मांकृत्वा
स्ववक्षसि ईषद्धास्य प्रसन्नास्या
भक्तानुग्रहकातरः। श्रीनारायण
उवाच त्वद्वाक्यमाचरिष्यामिस्व
वाक्यंच सुरेश्वरि। श्रूयतांचक
रिष्यामि श्रुणुतत्क्रम मेवच
भारती यातु कलया सरिद्रूपा
चभारते। अर्द्धांशा ब्रह्मसदनं
स्वयं तिष्ठतु मद्गृहे॥ भगी
रथेन नीता सा गंगा यास्य
तिभारते। एतं कर्तुं त्रिभुवनंस्व
यं तिष्ठतु मद्गृहे॥ तत्रैव चं
द्र मौलेश्च मौलिंप्राप्स्यति दु
र्लभं। ततःस्वभावतः पूतास्य
तिशूता भविष्यति॥ कलां
शांशेन त्वं गच्छ भारते कल
मेभव। पद्मावतीसरिद्रूपा तु
लसी वृक्षरूपिणी॥ कलेः
पंचसहस्रेच गते वर्षेच मोक्ष
णं। युष्माकं सरितांत्रैव म
द्गृहस्त्वागमिष्यति॥ इति
ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५
अध्यायः॥

सरस्वान् तु पुं समुद्रः। इत्यमरः
नदः। रसिके त्रि। इति मे
दिनी॥

सरा स्त्री निर्झरः। इति भवतः
हिरूपकोषः। प्रसारिणी। इति
राजनिर्घण्टः॥

सरावः पुं शरावः। इतिभवत

द्विरूपकोषः ॥
सरिः पुं स्त्री निर्झरः । इति हेम चन्द्रः ॥
सरिका स्त्री हिंगुपत्री । इति शब्दचंद्रिका गमनकर्त्री च ॥
सरित् स्त्री नदी । इत्यमरः ॥ सूत्रं । इति शब्दमाला । दुर्गा । यथा । क्रिया कारणरूपत्वात् सरणाच्च सरिन्मता । संगमाक्रमनाक्रांता लोके देवी विभाव्यते । इति देवीपुराणे ४५ । अध्यायः ॥
सरित्पतिः पुं समुद्रः । इत्यमरः ॥
सरित्वान्[न] पुं समुद्रः । इति केचित् ॥
सरित्सुतः पुं भीष्मः । गंगापुत्रत्वात् ॥
सरिलांनाथः पुं समुद्रः । अस्य प्रमाणं सरितांवरापन्दे द्रष्टव्यं
सरितांपतिः पुं समुद्रः । इति शब्दरत्नावली ॥
सरितांवरा स्त्री गंगा । यथा । त्वद्देव सरितांनाथ त्वं देविसरितांवरे । उभयोः संगमे स्नात्वा मुंचामि दुरितानि वै ॥ इति प्रायश्चित्ततत्त्वे गंगासागरस्ना नमंत्रः ॥
सरिद्वरा स्त्री गंगा । इति हेमचंद्रः ॥
सरिन्नाथः पुं समुद्रः । इति वाजनिर्घंटः ॥
सरिमा[न्] पुं गमने । वायुः । इत्युणादिकोषः ॥
सरिले क्ली सलिले । इत्यमरटीकायां भरतः ॥
सरिषपः पुं सर्षपः । इति त्रिकाण्डशेषः ॥
सरी स्त्री निर्झरः । इति भरतद्विरूपकोषः ॥
सरीसृपः पुं सर्पः । इत्यमरः ॥
सरुः पुं त्सरुः । खड्गमुष्टिः । इत्यमरटीकासारसुंदरी ॥
सरूः त्रि सूक्ष्मः । इति भूरिप्रयोगः ॥
सरूपः त्रि सदृशः । समानरूपः । इति जटाधरः ॥
सरूपता स्त्री समरूपत्वं । तुल्यता । सरूपशब्दात् तप्रत्ययेन निष्पन्ना ॥
सरोजं क्ली पद्मं । इति हेमचंद्रः सरोवरजाते त्रि ॥
सरोजन्म[न्] क्ली पद्मं । इति हेमचंद्रः ॥

सरोजिनी स्त्री कमलाकरः । पद्मं । इति मेदिनी ॥ पद्मसमूहः । इति रत्नमाला ॥
सरोजी[न्] पुं ब्रह्मा । इति शब्दरत्नावली त्रिकाण्डशेषः ॥
सरोत्सवः पुं सारसपक्षी ॥ इति शब्दरत्नावली ॥
सरोधः त्रि रुद्धः । रोधेन सह वर्त्तमानः । इति बहुव्रीहिसमासनिष्पन्नः ॥
सरोरुट्[ह्] क्ली पद्मं इति हेमचंद्रः ॥
सरोरुहं क्ली पद्मं । इति रत्नमाला ॥
सरोरुहासनः पुं ब्रह्मा । इति हेमचंद्रः ॥
सरोवरः पुं जलाशयविशेषः तत्पर्यायः । पद्माकरः २ कासारः ३ तडागः ४ तडाकः ५ तटाकः ६ सरसं ७ सरसी ८ सरः ९ सरं १० सरकं ११ । इति शब्दरत्नावली । तल्लक्षणादि पुष्करिणीशब्दे द्रष्टव्यं । तत्सजलगुणाः सरःशब्दे द्रष्टव्याः ॥
सर्कः पुं वायुः । मनः । प्रजापतिः । इति संक्षिप्तसारोणादिवृत्तिः ॥
सर्गः पुं स्वभावः । निर्मोक्षः । निश्चयः अध्यायः ॥ सृष्टिः । इत्यमरः । मोहः । उत्साहः । इति मेदिनी । अनुमतिः । इति हेमचंद्रः । सर्गविवरणं यथा अव्याकृत गुणक्षोभात् महतस्त्रिवृतो ऽहम् भूत सूक्ष्मेन्द्रियार्थानां संभवः सर्ग उच्यते इति श्रीभागवते । नवधा सर्गो यथा । सर्गो नवविधस्तस्य प्राकृतो वैकृतस्त्रयः । कालद्रव्यगुणैरस्य त्रिविधः प्रतिसंक्रमः । आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः । द्वितीय स्त्वहमो यत्र द्रव्यज्ञानक्रियोदयः । भूतसर्गस्तृतीयस्तु तन्मात्रो द्रव्यशक्तिमान् । चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः । वैकारिको देवसर्गः पंचमो यन्मयं मनः । षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः प्रभोः । षडिमे प्राकृताः सर्गा वैकृतानपि मे शृणु । रजोभाजो भगवतो लीलेयं हरिमेधसः सप्तमो मुख्यसर्गस्तु षड्विधस्तस्थुषां च यः । वनस्पत्योषधि लता त्वक्सारा वीरुधो



दुमाः । उत्स्रोतसस्तमःप्राया
अन्तःस्पर्शा विशेषिणः । ति
रश्चा मष्टमःसर्गः सोऽष्टाविंश
द्विधो मतः । अविदो भूरित
मसो घ्राणज्ञा हृद्यवेदिनः ॥
गौरजो महिषः कृष्णःसूकरो
गवयो रुरुः । द्विशफाःपशव
श्चेमे अविरुष्ट्रश्च सत्तम । ख
रोऽश्वोऽश्वतरो गौरः शरभ
श्चमरी तथा । एते चैकशफाः
क्षत्तः शृणु पंचनखान्पशून्
श्वा शृगालो वृकोव्याघ्रो मा
र्जारः शशशल्लकौ ॥ सिंहः
कपि र्गजः कूर्मो गोधाच म
करादयः । कंक गृध्र वकश्येन
भास भल्लूक बर्हिणः ॥ हं
स सारस चक्राह्व काकोलू
कादयःखगाः । अर्वाक्स्रोत
स्तु नवमःक्षत्तरेकविधो नृणां
रजोधिकाः कर्मपरा दुःखेच
सुखमानिनः । वैकृतास्त्रय
एवैते देवसर्गश्च सत्तम । वैका
रिकस्तु यः प्रोक्तः कौमार
स्तूभयात्मकः । देवसर्गश्चाष्ट
विधो विबुधाःपितरोऽसुराः
गन्धर्वाप्सरसः सिद्धा यक्ष र
क्षांसिचारणाः । भूतप्रेत पि

शाचाश्च विद्याध्राः किन्नरादयः
दशैते विदुराख्याताः सर्गास्ते
विश्वसृक्कृताः । अतःपरं प्र
वक्ष्यामि वंशाःमन्वन्तराणिच ।
एवं रजःप्लुतः स्रष्टा कल्पादि
ष्वात्मभूर्हरिः । सृजत्यमोघसं
कल्प आत्मैवात्मानमात्मना ॥
इति च श्रीभागवते ३ स्कंधे १०
अध्यायः ॥
सर्गवंधः पुं महाकाव्यं । इति
भूरिप्रयोगः । तल्लक्षणं यथा
सर्गबंधो महाकाव्य मुच्यते त
स्यलक्षणं । आशी र्नमस्क्रिया
वस्तुनिर्देशो वापि तन्मुखं ।
इतिहास कथोद्भूत मितरद्वा
तदाश्रयं । चतुर्वर्ग फलायत्तं
चतुरोदात्त नायकं । नगरार्ण
वशैलर्त्तु चंद्रार्कोदय वर्णनैः
उद्यान सलिलक्रीडा मधुपान
रतोत्सवैः ॥ विप्रलंभैः वि
वाहैश्च कुमारोदयवर्णनैः ॥
मंत्र दूत प्रयाणाजि नायका
भ्युदयै रपि । अलंकृतमसंक्षि
प्तं रसभाव निरंतरं । सर्गै रन
तिविस्तीर्णैः श्रव्यवृत्तैः सुसं
धिभिः ॥ सर्वत्र भिन्नवृत्तान्तै
रुपेतं लोकरंजनं ॥

काव्यं कल्पान्तरस्थायि जायते
सदलंकृति । इति दंडी ॥
सर्ज अर्जने । इति कविकल्पद्रु
मः । विसर्ज्जयिष्यति । सर्जति
धने लोकः । इति दुर्गादा
सः ॥
सर्जः पुं शालवृक्षः । इत्यमरः
सर्जरसः । इति भरतः ॥
पीतशालः । इति शब्दरत्नावली
सर्जकः पुं पीतशालः । इत्यम
रः ॥ शालः ॥ इति जटा
धरः ॥
सर्जगंधा स्त्री रास्ना । इति र
त्नमाला ॥
सर्जनं क्ली सैन्यपश्चाद्भागः ॥
इति शब्दरत्नावली विसर्ज्जने ।
सृष्टिः । इति सृजधात्वर्थदर्श
नात् ॥
सर्जनिर्यासकः पुं रालः । इति
राजनिर्घण्टः ॥
सर्जमणिः पुं धूनकः । इति
त्रिकाण्डशेषः ॥
सर्जरसः पुं शालवृक्षनिर्यो
सः । धूना इति भाषा । तत्पर्य्यायः
यक्षधूपः २ अरालः ३ सर्वर
सः ४ बहुरूपः ५ इत्यमरः । रालः
६ वह्निवल्लभः ७ इति भरतधृत

रभसः शालजः ८ शालनिर्या
सः ९ सर्ज्जः १० धूनकः ११ शा
लसारः १२ इति रत्नमाला ॥
विडूपः १३ इति शब्दरत्नावली ।
शालवेष्टः १४ अग्निवल्लभः १५
सर्ज्जमणिः १६ इति हेमचंद्रः ॥
राजनिर्घण्टोक्त पर्य्याय गुणाः
रालशब्दे द्रष्टव्याः ॥
सर्जिः स्त्री सर्जिकाक्षारः । इति
रत्नमाला ॥
सर्ज्जिका स्त्री सर्जिकाक्षारः ॥
इति जटाधरः ॥
सर्जिकाक्षारः पुं सर्ज्जिकाया
नद्याः क्षारः । इति भरतः ॥
साचिक्षार इति साजिमाटि इति
च भाषा । तत्पर्य्यायः । कापोतः
२ सुखवर्च्चकः ३ सौवर्च्चलं ४
रुचकं ५ इत्यमरः । सर्जिकाक्षा
रः ६ सर्ज्जिका ७ क्षारः ८ ।
इति तट्टीका स्वर्ज्जिका ९
स्वर्ज्जिका १० इति शब्दरत्नाव
ली । सुखवर्ज्जकः ११ । इति ज
टाधरः । सर्ज्जिक्षारः १२ सर्ज्जि
कः १३ सर्ज्जी १४ सुखोर्ज्जि
कः १५ सुवर्च्चिकः १६ सुवर्च्ची
१७ सुखवर्च्चाः १८ । अस्य गु
णाः । पटुत्वं । कटुत्वं । उष्णत्व

कफ वातोदरार्त्तिनाशित्वञ्च। इति राजनिर्घण्टः ॥
अपिच। पाकक्षारो यवक्षारो यावशूको यवाग्रजः। सर्ज्जिको पि स्मृतः क्षारः कापोतः सुखवर्च्चकः ॥ कथितः सर्ज्जिकाभेदो विशेषज्ञैः सुवर्च्चिका यवक्षारो लघुः स्निग्धः सुसूक्ष्मो वह्निदीपनः। निहन्ति शूल वातामश्लेष्म श्वासगलामयान्। पाण्डुर्शो ग्रहणी गुल्मानाहप्लीहहृदामयान्। सर्ज्जिकाल्पगुणा तस्माद्विशेषाद् गुल्मशूलहृत्। सुवर्च्चिका सर्ज्जिवद्बोद्धव्या गुणतो जनैः ॥ इतिभावप्रकाशः ॥
सर्ज्जिक्षारः पुं सर्ज्जिकाक्षारः ॥ इतिराजनिर्घण्टः ॥
सर्ज्जी स्त्री सर्ज्जिकाक्षारः। इति राजनिर्घण्टः ॥
सर्ज्जुः पुं वणिक्। इति मेदिसुणादिकोषौ ॥
सर्ज्जूः स्त्री विद्युत्। इति मेदिनी अभिसारः। हारः। इति शब्दरत्नावली ॥
सर्ज्ज्यः पुं सर्ज्जवृक्षः। इति रत्नमाला। अर्ज्जुनीयोनि ॥

सर्पः पुं नागकेशरः। इति रत्नमाला। गमने। इति सृपधात्वर्थ दर्शनात्। पसक्रथारी म्लेच्छजातिविशेषः। पुरात्र यैताद्वि आसीत्। सगरराजेन अस्य वेद यागादौ अनधिकारित्वं कृत्वा वेशान्यत्वं धर्म्मनाशं च चकार। यथा। सगरः स्वां प्रतिज्ञाञ्च गुरोर्वाक्यं निशम्य च। धर्म्मं जघान तेषां वै वेशान्यत्वं चकार ह। अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज्जयेत्। यवनानां शिरः सर्व्वं काम्बोजानां तथैव च। पारदान् मुक्तकेशांस्तु पह्लवान् श्मश्रुधारिणः। निःस्वाध्याय वषट्कारैः कृता स्तेन महात्मना। शकायवन काम्बोजाः पारदाः पह्लवास्तथा। कोलिसर्पा माहिषका दार्व्वा श्चोलाः सकेरलाः। सर्व्वे ते क्षत्रिया स्तात धर्म्मस्तेषां निराकृतः। वशिष्ठवचनाद्राजन् सगरेण महात्मना इति महाभारते हरिवंशे १४ अध्यायः। हिंस्रजन्तुविशेषः साप इति भाषा। तत्पर्य्यायः पृदाकुः २ भुजगः ३ भुजंगः ४

अहिः ५ भुजङ्गमः ६ आशीविषः ७ विषधरः ८ चक्री ९ व्यालः १० सरीसृपः ११ कुण्डली १२ गूढपात् १३ चक्षुःश्रवाः १४ काकोदरः १५ फणी १६ दर्व्वीकरः १७ दीर्घपृष्ठः १८ दन्दशूकः १९ विलेशयः २० उरगः २१ पन्नगः २२ भोगी २३ जिह्मगः २४ पवनाशनः २५ इत्यमरः। विलशयः २६ कुम्भीनसः २७ द्विरसनः २८ भेकभुक् २९ श्वसनोत्सुकः ३० फणाधरः ३१ फणधरः ३२ फणावान् ३३ फणवान् ३४ फणाकरः ३५ फणकरः ३६ समकोलः ३७ व्यालुः ३८ दंष्ट्री ३९ विषास्यः ४० गोकर्णः ४१ उरङ्गमः ४२ गूढपादः ४३ विलवासी ४४ दर्व्वीभृत् ४५ हरिः ४६ इतिशब्दरत्नावली। प्रचलाकी ४७ द्विजिह्वः ४८ जलरुण्डः ४९ कञ्चुकी ५० चिक्रुरः ५१ भुजः ५२ इतिजटाधरः। अस्योत्पत्ति र्यथा। अप्रियेणासूयतान्दृष्ट्वा केशाः शीर्य्यन्त वेधसः। हीनाः स्वशिरसो भूयः समरोहन् ततः शिरः सर्पेण त्वेऽभवन् सर्पाहीनत्वा दहयः स्मृताः। इति वह्निपुराणे सर्पकथन नामाध्यायः। सर्पाणां कुलस्थितिश्च यथा। सुमन्तुरुवाच। पञ्चमी दयिता राजन्नागानां नन्दिवर्द्धिनी पञ्चम्यां किल नागानां भवतीत्युत्सवो महान्। वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः। ऐरावतो धृतराष्ट्रः कर्क्कोटक धनञ्जयौ ॥ एते प्रयच्छन्त्यभयं प्राणिनां प्राणजीवितं। पञ्चम्यां स्नापयन्तीह नागान् क्षीरेण ये नराः। तेषां कुले प्रयच्छन्ति अभयं प्राणदक्षिणं। शप्ता नागा यदा मात्रा दह्यमाना दिवानिशं निर्व्वापयन्ति स्नपनैर्गवां क्षीरेण मिश्रितैः। ये स्नापयन्ति वै नागान् भक्त्या श्रद्धा समन्विताः। शतानीक उवाच ॥ मात्रा शप्ताः कथं नागाः कारणं किं वद स्व वै। कथं वा नन्दकरणं कस्य वा संप्रसादजं। सुमन्तुरुवाच। उच्चैःश्रवा अश्वरत्नं श्वेतो जातोऽमृतोद्भवः। तं दृष्ट्वा चाब्रवीत् कद्रुर्नागानां जननी स्वसा। अश्वरत्नमिदं श्वेतं संपश्यत संभवं। कृष्णांश्च पश्यसे वालान् सर्व्वे श्वेतः

स्तुताहयैः॥ विनतोवाच सर्व
श्वेतो हयवरो नास्य कृष्णा न
लोहितः। कथंत्वंपश्यसेकृष्णं
विनतोवाच तां स्वसा॥ कद्रुरु
वाच। पश्येह मेकनयना कृष्ण
वालसमन्वितं। हीनेषा त्वंत
विनतेनपश्यसिपणं कुरु। विन
तोवाच। अहंदासीभविष्यीतेकृ
ष्णकेशेप्रदर्शिते। नचेद्दर्शीन
तो कद्रुर्ममदासीभविष्यसि।
पणंतैः विनयं कृत्वा गतेक्रोध
समन्विते। विनतास्वसा च
शयने कद्रु जिह्म मचिंतयेत्
आहूय पुत्रान् प्रोवाचवाला
भूत्वा हयातने। तिष्ठध्वं विष
रोजेष्ठ्य विनतां जयशृङ्गिनी
प्रोचु स्ता जिह्मबुद्धिं ते नागा
मातां विशृज्यते। अधर्ममेतन्मा
तोःतोनकरिष्यामतेवचः॥
तान्शशापरुषा कद्रुःपावको
वःप्रधक्ष्यति। गते बहुतिथे
काले पाण्डवो जनमेजयः।
सर्पसत्रे सकर्तावै भुवि अन्यैः
सुदुष्करं। तस्मिन्सत्रे सर्ति·
रमोघुःपावकोवः प्रधक्ष्यति
एवं शप्ता रुषा कद्रुः प्रोकृवा
नैव किंचन। माता शशाप

या नागाः कर्तव्यं नात्यपद्यत
वासुकिं दुःखितं ज्ञात्वाब्रह्मा
प्रोवाचसान्त्वयन् माशुचो वा
सुकेऽत्यर्थं शृणुमद्वचनं परं
यायावरकुलेज्जातो जरत्का
रुरितिद्विजः। भविष्यतिमहा
तेजा स्तस्मिन्कालेतपोनिधिः
भगिनींचजरत्कारुं तस्यत्वंप्र
तिदास्यति। भविता तस्य पुत्रोः
सौ आस्तीक इति विश्रुतः।
सतत् सत्रेप्रवृत्तेवै नागानांभ
यदंमहत् निषेधिष्यतिसस्तुति
वाग्भिरग्र्याभि स्तोष्यति। त
दिमांभगिनींराजन् तस्यत्वंप्र·
तिदास्यति। जरत्कार्याजरत्·
कारोः प्रदद्यादविचारयन्॥
यदासौ प्रार्थ्यते·ऽरोऽय यत्किं
चिद्विवदिष्यति। तत्कर्तव्यम
शंकेन यदीच्छेः श्रेय आत्म
नः। पितामहवचः श्रुत्वा वा
सुकिः प्रणिपत्यच। तथाकरोद्य
था चोक्तं यत्नश्च परमास्थितः
तच्छ्रुत्वा पन्नगाः सर्वे प्रहर्षो
त्फुल्ललोचनाः। पुनर्जातमिवा
त्मानं मेनिरे भुजगोत्तमाः। त
च्छ्रैषंच महावाहो नव पित्राप
वर्तितं। ऋत्विग्भिः सहितं·

नेह सर्वलोकेषु दुष्करं। प्रोक्तं
च विस्तरा एवं धर्मपुत्रस्यधी
मतः। अवश्यं तस्य भविता ना
गानांभयकारकं। तस्मात् का
लांतराद्राजन् साग्रे वर्षशतेग
ते। तत् सत्रंभविता घोरंनागा
नांक्षयकारकं। यास्यंत्यधर्म
भवितां दन्दशूका विषोल्बणाः
कोटिसंख्या महाराज निपति
ष्यंत्यहर्निशं। आस्तिवंतु निम
ग्नानां घोरे रौद्राग्निसागरे।
आस्तीक स्त्राता भविता तेषां·
नो वह्निसागरे। स्तुत्वासचा
ग्निं राजान ऋत्विजस्तदनंतरं
निवर्तयिष्यति तद्यागं नागा
नांमोहनंपरं। पंचम्यां तच्चभ
विता ब्रह्मा प्रोवाच लोहिता
न्। तस्मादियं महाबाहो पंच
मीदयितासदा। नागानामानं
दकरी दत्तावै ब्रह्मणा पुरा।
कृत्वात्र भोजनं पूर्वं ब्राह्मणा·
नांतु कामतः। विसृज्य नागाः
प्रीयंतां ये केचित् पृथिवीतले
येच हेलिमरीचिस्था येऽन्तरी
क्षे दिवि स्थिताः। येनदीषुम
हानागा ये सरस्वतिगामिनः।
येचवापीतडागेषु तेषु सर्वेषु·

वैनमः। नागान्विप्रांश्चसंपू
ज्य विसृज्यच यथार्थितः। ततः
पश्चात्तु भुंजीयात् सहभृत्यैर्न
राधिपः। प्रथमंमधुरमश्नीया
त्द्वितीयं भुज्यकामतः। एवं नि
यमयुक्तस्यतत्फलंतन्निबोध
मे। मृतो नागपुरंयातिपूज्यमा
नोऽप्सरोगणैः। विमानवरमा
रूढो रमते कालमीप्सितं॥
इहचागत्य राजासौ प्रयुतानां
वरोभवेत्। सर्वरत्नसमृद्धःस्या
त् वाहनाढ्यश्चजायते। पंच
जन्मन्यसौ राजा द्वापरे द्वापरे
भवेत्। आधिव्याधि विनिर्मु
क्तः पत्नी पुत्र महायशान्॥
तस्मात् पूजयाप्रमाणंच घृत
पायस गुग्गुलैः॥ शतानीकउ
वाच दर्शांतियं नवविध नागाः
क्रोधसमन्विताः। भवेत् किंत
स्यदष्टस्य विस्तरात् प्रब्रवीहि
मे। सुमंतुरुवाच। दंष्ट्राघुक्ता
चकृसाच रक्तापीताचदक्षिणा
समासेनतुवक्ष्यामि यथा वैव
र्णितःस्मृताः। शुक्लातुब्राह्म
णीज्ञेया रक्ता तु क्षत्रियास्मृता
वैश्या तु पीतिका ज्ञेया कृष्णा
शूद्रा तुकथ्यते॥ अतःपरंप



वक्ष्यामि दंष्ट्राणां विषलक्षणं
दंष्ट्राणान्तु विषनालि नित्यमेव
भुजङ्गमे । दक्षिणे नेत्र मासा
द्य विषं सर्पस्य तिष्ठति । संक्रु
द्धस्यैव सर्पस्य विषं गच्छति म
स्तके । मस्तकाद्धमनीं याति
ततो नाडीषु तिष्ठति । नाडी
भ्यो गच्छते दंष्ट्रे विषं तत्र प्र
वर्त्तते । तत् सर्व्वं कथयिष्या
मि यथावदनुपूर्व्वशः । अष्टभिः
कारणैः सर्पो दशते नात्र संशयः ।
आक्रान्तो दशते पूर्व्वं द्वितीये
पूर्व्ववैरिणं । तृतीयं दशते भी
तश्चतुर्थे मददर्पितः । पञ्चमे
तत्क्षुधाविष्टः षष्ठे चैव विषो
ल्वणः । सप्तमे पुत्ररक्षार्थं अ
ष्टमे कालचोदितः । यस्तु सर्पो
दशित्वा तु उदरं परिवर्त्तयेत्
वलभ्याकृतिं दंष्ट्रा आक्रान्तं
तं विनिर्द्दिशेत् । यस्य सर्पेण
दष्टस्य गम्भीरं क्षतलक्षणं । वै
रदष्टं विजानीयात् कश्यपस्य
वचो यथा । एकदंष्ट्रापदे य
स्य अव्यक्तं न च कुपितं । भी
तदष्टं विजानीयात् यथोवाच
प्रजापतिः ॥ यस्य सर्पेण द
ष्टस्य रेखा दन्तस्य जायते ॥

मददष्टं विजानीयात् कश्यप
स्य वचो यथा । द्वे च दंष्ट्राप
देयस्य दृश्येते च महान्ते न क्षु
धाविष्टं विजानीयात् यथोवा
च प्रजापतिः । द्वे दंष्ट्रे यस्य दृ
श्येते क्वचिद्रुधिर संकुले वि
षोल्वणं विजानीयाद्दशते नात्र
त्र संशयः । अपत्यरक्षणार्थाय
जानीयान्नात्र संशयः । यत्तु का
कपदाकारैस्त्रिभिर्द्दन्तैर्विच्छिद्य
ते । महानागा इति प्रोक्तः काल
दष्टं विनिर्द्दिशेत् ॥ त्रिविधं
दष्टजातेस्तु लक्षणं समुदाहृ
ते । दष्टं दष्टा तु पीतं च दष्टो
द्धृतं तथैव च । यस्तु सर्पो द
शित्वा तु पिबते तु विचक्षणः
दष्टा तु पीतं विज्ञेयं कश्यप
स्य वचो यथा । विषभागो तु सर्प
स्य विभागा स्तत्र सेकोऽत उदरं
दर्शयेद्यस्तु उद्धृतं तं विनिर्द्दि
शेत् । छर्द्दितं विषवेगेन निर्वि
षः पन्नगो भवेत् । अस्मात्पञ्चा
धिविज्ञेय स्मृतं दंष्ट्राभिपीडितः
शीतसंज्ञो भवेत् किञ्चित् सं
दष्टो विषयोगतः । आर्द्राश्ले
षा मघा भरणी कृत्तिकास
विशाखतः । विशाखा चित्रपूर्व्वास

मूला स्वाति शतात्मके । सर्प
दष्टा न जीवन्ति विषं पीतं च येस्त
था । शून्यागारे श्मशाने च शुष्क
वृक्षे तथैव च । न जीवन्ति नरा द
ष्टा नक्षत्रे तिथिसंयुते । इतो द
ष्टा स्ततः शुद्धस्ततः परिकी
र्त्तितः । इति भविष्यपुराणोक्त
तक्षाहस्त्रार्द्ध संहितायां पञ्चमी
कल्पे । कश्यप उवाच ॥ अतः
परं प्रवक्ष्यामि कालदष्टस्य ल
क्षणं । शृणु गौतम तत्त्वेन यारू
पो भवते नरः । जिह्वाभङ्गो
हृदि शूलं च चक्षुर्भ्यां च न पश्यति
दंशं च दग्धसंकाशं पक्वजम्बू
फलोपमं । वैवर्ण्यं चैव दन्तानां
श्यामो भवति वर्णतः । सर्व्वे
ष्वङ्गेषु शैथिल्यं पुरीषस्य च भे
दनं । भग्नस्कन्ध कटि ग्रीव ऊ
र्द्ध्वदृष्टिरधोमुखः । दह्यते वेप
ते चैव स्वपते च मुहुर्मुहुः ॥
शस्त्रेण छिद्यमानस्य रुधिरं न
प्रवर्त्तते । दण्डेन ताड्यमानस्य द
ण्डराजी न जायते । दंशो काक
पदे सुनील मसकजम्बूफलाभे
चनं उद्धृतं रुधिरं गास्फेकवक्त्र
ले कृष्णो विरोधो भवेत् ॥
हिक्का श्वास गलग्रह श्वसमहा

न्या ऊर्ध्वचा दृश्यते संस्थाने
प्रवदन्ति शास्त्रनिपुणा स्तत् का
लदष्टविद्रः । दंशो यस्याथ शोथः
प्रवलित वलितं मण्डलं वासुनी
लं प्रस्वेदो गात्रभेदः स्रवति च रु
धिरं सानुनासे च जल्पेत् । द
न्ताभ्यां वियोगो भ्रमति च हृ
दयं सन्निरोधश्च तीव्रो दिवाना
मेषु दंशस्थल विपुलमयो वि
द्धि तं कालदष्टं । दन्तैर्दन्तान्
स्पृशति वक्रप्रोद्दृष्टिर्यामसावि
ज्ञा स्थूलो दंष्ट्रः स्रवति रुधिरं
केकारं च त्तुरेकं । प्रस्यादिष्टः श्व
सिति सततं सानुनासं च भाषेत्
यद्यद्दृष्टे सकल गदितं कालद
ष्टं तमाहुः । वेपते वेदना तीव्रा
रक्तं नेत्रश्च जायते । ग्रीवाभङ्ग
श्च लालाभिः कालदष्टं विनि
र्द्दिशेत् । दर्पणे सलिले वापि
आत्मच्छायां न पश्यति । मन्दर
श्मिं तथा दीप्तं तेजोहीनं दि
वाकरं । वेपते वेदनातस्तु र
क्तं नेत्रश्च जायते । यथालि
नियतं जन्तुः कालदष्टं विनि
र्द्दिशेत् । अष्टम्यां च नवम्यां
च कृष्णपक्षे चतुर्द्दशी । नागपं
चमी दष्टानां जीवितस्य च सं



शायः। आर्द्राश्लेषा मघा भर
णी कृत्तिकासु विशेषतः। विशा
खाविषु पूर्वासु मूला स्वाति श
तात्मके। सर्पदष्टा न जीवंति वि
षंपीतंच ये स्त्रया। शून्यागारे
श्मशानेच शुष्कवृक्षे तथैवच
नजीवंति नरा दष्टा नक्षत्रे ति
थिसंयुते। अष्टोत्तरं धर्मशतं
प्राणिनां समुदाहृतं। तेषाम
ष्टतु धर्माणि दश द्वेचापिकी
र्तितं। शंखे नेत्रे भ्रुवो मध्ये
वस्तिभ्यांवृषणांतरे। कक्षेस्कं
धे हृदि मध्ये तालुके चिबुके
गुदे पायुहाद् मर्मसु दष्टःशा
खेणव्याहृतः। नजीवंति नरा
लोके कालदष्टे विनिर्दिशेत्
श क च ट त प म य शान्त व
र्देति आख्या न जीवंति दूतस्य
गते। कुर्यात् यदिस्खलति गिरा
तस्य संप्राप्तकालः। भवति च
यदि दूत उन्मत्तस्यापस्मो वा यदि
भवति च दूतउन्मत्तो वा यस्य
प्राहे। दूतस्य नाम यदि वदति
काचिद्वक्ति तस्यापि पश्चात् त
र्णांतवर्णाभेदो यदि भवतिसक्र
प्राप्तकालस्यदूतः। दूतोवादंड
हस्तोभवतिच शुक्लाष्टाङ्गस्त

स्त्रया वा रक्तवस्त्रश्च कृष्ण अथ
पिरस्किगाते पक्ववस्त्रश्च दूतः।
तैलाभ्यक्तश्च तद्वत् यदि तारि
तयाति मुक्तकेशश्च यातियः
कुर्यात् चोरशत्रु कर चरणयु
गैः प्राप्तकालस्यदूतः। नागोद्
ये प्रवक्ष्यामि कृशानेन तुभ्यापि
ते ब्रह्मणा तु पुरा सृष्टा अष्टा
नागा स्तवनेकशः। अनंतेभा
स्करं विद्यात् सोमे विद्यात्तवा
सुकिं। तत्तकं भूमिपुत्रेनक
कोटंच बुधे विदुः। पद्मंबृह
स्पतिं विद्यान्महापद्मंचभार्गवं
कुलिकः शंखपालश्च द्वावेतौ
तु शनैश्चरः। पूर्वपादः शंख
पालो द्वितीयः कुलिकोऽस्यच
नेत्रभागे यमौ दिष्टौ दिनरा
त्रौ तथैवच। शुक्रसोमो चम
ध्याह्ने उदयेत् समास्तत। शा
णः शामदृमे भागे दिवासमा
विद्रोच्यते। गृहाश्च भुजंगेराज
न् पश्चि मूर्छे अजनपः। अ
थोगत्वाभवेत्सर्पो निर्विषोना
त्रसंशयः। शतानीक उवाच
नागाद्दष्टः पितायस्य भ्राता वा
दुहितापि वा। माता पुत्रोऽथ
वाभार्यापि किं कर्तव्यं वदस्व

वै। मोक्षाय तस्य विप्रेंद्र दानं
व्रतमुपोषितं। ब्रूहि मे द्विज
शार्दूल येन तद्वै करोम्यहं॥
सुमंतुरुवाच उपोष्या पंचमी
राजन् नागानां पुष्टिवर्द्धिनी।
शुभेक मेकं राजेंद्र विधानेनशृ
णुभारत। मासि भाद्रपदे या
तु शुक्लपक्षे महीपते सा तु पु
ण्या महाप्रोक्ता ग्राह्यापि च म
हीपते। ततो द्वादश संवर्त्ते
पंचम्यां भरतर्षभ चतुर्थ्यां मे
कभक्तं तु तस्यां नक्तं प्रकीर्ति
तं। भूविचित्रमयं नाग मथवा
कलधौतकं। कृत्वा दारुमयं
वापि अथवा मृन्मयं नृप। पंच
म्यामर्चयेद्भक्त्या नागं पंचफ
णं नृप। करवीरैः शतपत्रैर्जाति
पुष्पैश्च सुव्रत। तथागंधप्रधू
पैश्च पूजंय पन्नग सुत्तमं। ब्रा
ह्मणं भोजयेत् पश्चात् घृतपा
यस मोदकैः। अनंत वासु
किं शंखं पद्मं कंबलमेवच॥
तथा कर्कोटकं नागं नागं वा
श्वतरं नृप। धृतराष्ट्रं शंखपालं
कलियं तक्षकं तथा। पिंगलंच
तथा नागं मासि मासि च की
र्तितं। संवत्सरांते पारणं

स्यान्महाब्राह्मणभोजनं। इति
हासविदे नागं गौरिकेण कृतं नृ
प। तथार्जुनी प्रदातव्या वाच
कस्य महीपते। एष पारणके
वापि विधिः प्रोक्तो बुधैर्नृप॥
तव पित्रा कृतश्चैवपितर्मोक्षाय
भारत। शुभात्मिके यं वैथीच
पंचमी भरतर्षभ॥ सुवर्णभा
रनिष्पन्नं नागं दत्वा तथाचगां
व्यासस्यकुरुशार्दूल पितुर्वानृण
माप्नुयात्॥ तव पित्रा कृतं त
वं पंचम्यापास्रनं नृप। उत्सृज्य
नागतां वीर तव पूर्वपितामहः
पुष्पेतरसदो गत्वा तथा पुष्प
सदा नृप। सुनासीरसदो गत्वा
तथा भंग सदो गतः। भूपस
द स्ततो गत्वा कंजजस्य सदो
गतः। अन्योपिये करिष्यंति
इदं व्रत मनुत्तमं। दृष्टकान्तमो
गते तेषां शुभे स्थान मवाप्स्य
ति। य इदं शृणुयान्नित्यं नरः
श्रद्धासमन्वितः। कुले तस्य न ना
गेभ्यो भयं भवति कुत्रचित्
इति भविष्यपुराणे पंचमी
कल्पे। शतानीक उवाच॥
सर्पाणां कति रूपाणि केवर्णाः
किंच लक्षणं। का जातिस्तु भवे



तेषां केषु योनिःकुलेषु वा ॥
सुमंतरुवाच अन्नते वह्नि सं
वादं कश्यपस्य महात्मनः। यथा
सीद्गौतमेनेह शृणु एवं हिमा
चले कृताग्निहोत्र मासीनं क
श्यपं तं हिमाचले । प्रणम्य शि
रसा भक्त्या गौतमोवाक्यमब्र
वीत् । सर्पाणां कतिरूपाणि किं
चिह्नं किंच लक्षणं । जातिकु
ले तथा वर्णान् ब्रूहि सर्वं प्र
जापते । कथं वा जायते सर्पः क
थं मुंचेद्विषं प्रभो । विषवेगाः क
ति प्रोक्ताः कस्यैव विषनाडि
काः । दंष्ट्राः कति विधाः प्रोक्ताः
किं प्रमाणं विषागमे कदा तु
गृह्णीते गर्भं कथं वेह प्रसूय
ते । कीदृशी स्त्री पुमांश्चैव क्ली
बश्चैव नपुंसकं । किंनाम द
ष्टानं चैव एतत्कथय सुव्रत ।
तस्य तद्वचनं श्रुत्वा कश्यपः प्र
त्यभाषत शृणु गौतमतत्वेन
सर्पाणामिह लक्षणं । मास्या
षाढे तथा ज्येष्ठे प्रमाद्यंति भुजं
गमाः । ततो नागो नागिनीच
मैथुनं संप्रपद्यते । चतुरो वा
र्षिकान् मासान् नागी गर्भं
सधारयत् । ततः कार्तिकमासे

तु अण्डकानि प्रसूयते । अंड
कानां तु विज्ञेयं द्वेशते द्वेच
विंशती । तामेव भक्षयेत्साप्त
भागैकं चूर्णयात्यजेत् । सुव
र्णाकवर्णाभिभात् पुमान्संजा
यतेऽण्डकात् । तानेव खादते
सर्पी अहोरात्राणि विंशतिं ॥
अर्केदकस्य वर्णाभात् स्त्रीचैव
जीव सन्निभात् तस्माहतूपाद्य
तेस्त्रीवै अंडाद्ग्रासनक्तम । शि
रीषपुष्पवर्णाभादंडकात् स्यान्न
पुंसकं । ततो भिनत्ति चाण्डानि
चण्डनासेन तु गौतम । तत स्तो
प्रीति संबंधात् स्नेहं वध्नंतिवा
लकाः । ततः स्तोक्षमराजेणकृ
ष्णोभवति यत्नतः । आयुःप्रमा
णं सर्पाणां शतं विंशोत्तरंस्मृते
मृत्युश्चाष्टविधो ज्ञेयः शृणुष्वा
त्रयथाक्रमं । मयूरात्मानुषाद्वा
पि चकोराद्धोखुरात्तथा । विडा
लाकुलाच्चैव विसहाहृश्चिका
त्तथा । एतेषांयदि मुच्येतजी
वेद्विंशोत्तरं शतं । सप्ताहे ततः
पूर्णे दंष्ट्राणांत विरोहणं ॥
विषस्यागमनं तथ वित्तेपञ्च
पञ्चः पुनः ॥ एवं ज्ञात्वा
तु तत्त्वेन विषकर्मसमारभेत्

एकविंशतिरात्रेण विषं दंष्ट्रा
सुजायते । नागीपार्श्वसमा
वर्ती वाल सर्पस्तु उच्यते । पं
चविंशतिरात्रस्तु सद्यःप्राणह
रोभवेत् । षण्मासाज्जातमात्र
स्तु कंचुकं वै प्रमुंचति । पादा
नांचापि विज्ञेया द्वे शते द्वे च
विंशती । गोलोमसदृशाः पा
दाः प्रविशंति क्रमंतिच । संधी
नांचास्य विज्ञेयं द्वे शते विंश
तीतथा । पांशुलस्यापि वि
ज्ञेया द्वे शते विंशति स्तथा ।
अकालजाता ये सर्पा निर्विषा
स्ते प्रकीर्तिताः । पंचसप्तति
वर्षाणि आयुस्तेषां प्रकीर्तितं ।
रक्त पीत शुक्ल देता आनीला
मंदवेगिनः । एते अल्पायुषो
ज्ञेया अल्पाहाराश्च भीरवः ॥
एकच्चास्य भवेद्वक्त्रं द्वे जिव्हेच
प्रकीर्तिते । प्रथमा ब्रह्मदैवत्या
द्वितीया विष्णुदेवता । तृतीया
रुद्रदैवत्या चतुर्थी यमदेवता
हीना प्रमाणतः सात्तु वामनेत्रं
समाश्रिता । तास्मा संज्ञाः प्रयो
क्तव्या नौषधं नैव भेषजं । वै
घः परोमृत्यो याति मृत्युस्तस्या
विलोचना । चिकित्सान्तु उ

पैः कार्या तदंते तस्य जीविते
मकरी मासिकी विघातकराली
च द्विमासिकी कालरात्री भवे
त्त्रीणि चतुरो यमदूतिका ॥
मकरी शाम्बके विघातकराली
काकपादिका । छकाराकृतिः
कालरात्री याम्या कूपाकृतिः
स्मृता । मकरी वातला ज्ञेया
कराली पैत्तिकी स्मृता । कफा
त्मिका कालरात्री यमदूती सा
न्निपातिकी । शुक्ला तु मकरी
ज्ञेया कराली रक्तसन्निभा का
लरात्री भवेत्पीता कृष्णाच
यमदूतिका । इति भविष्यपुरा
णे पंचमीकल्पे ॥ कश्यप उवाच
सविषादंष्ट्रयोर्मध्ये यमदूती तु
चेद्भवेत् । नचिकित्सा बुधैः
कार्या तेन नायं विनिर्दिशेत्
प्रहरार्द्धं दिवारात्रौ एकैकं भु
जंगग्रहिः । एकस्य च समाने
च द्वितीयं षोडशं तथा । ना
गोदये यदुद्दिष्टो हतो विद्धो
विदारितः । कालदष्टं विजा
नीयात् कश्यपस्य वचो यथा
यस्माद्वै पतते विंदुर्वल्लाग्र
सलिलाद्भुतं । तस्माद्वै स्रवते
दंष्ट्राविषं सर्पस्य दारुणं ॥



ज्वालाघ्राते तु संस्पर्शो देहे संक्र-
मते विषं । यावत् संक्रामयेद्धा
स्तं कुंचितं वा प्रसारयेत् । अने
नक्षणमात्रेण विषं गच्छति म
स्तके । वर्द्धते विषवेगस्तु श
तशोथ सहस्रशः । वर्द्धते रक्त
मासाद्य ततो वातशिखी य
था । तैलबिंदुर्जलं प्राप्य य
था वेगेन वर्द्धते ॥ शिखंडी
ह्याश्रये प्राप्य मारुतेन समी
रितः । ततस्त्वालाघ्राते प्राप्य-
त्वचास्थाने विचेष्टिते । त्वचा
स्वद्विगुणं विषाच्छोणितेषु
चतुर्गुणं । पित्ते तु त्रिगुणं याति
श्लेष्मेवै षोडशं भवेत् । वायौ
त्रिंशद्गुणं चैव मज्जे षष्ठिगुणं
तथा । प्राणेष्वेकार्णवी भूते स
र्वस्रोतांसि रोधयेत् । रोधेन रु
ध्यमानेन याति साध्य मसा-
ध्यतां । ततोऽसौ म्रियते जंत
र्निश्वासोच्छ्वासवर्जितः ॥ नि
ष्क्रांते तु ततो जीवे भूते पंचत्व
मागते । तानि भूतानि गच्छंति
यस्य यस्य यथालयं । पृथि-
व्यापस्तथा तेजो वायुराका
शमेव च । तेषामेव सघातः
शरीर मभिधीयते । पृथिवीपृ-
थिवीं याति आपस्तोयेषु लीयते
तेजो गच्छति चादित्यं मारुतो
मारुतं व्रजेत् । आकाशं चैव
आकाशे सह तेनैव गच्छति ।
स्वस्थाने ते प्रपद्यंते परस्पर
वियोजिताः । न जीवेदागतः
कश्चिदिह जन्मनि सुव्रत । वि
षार्त्तेन उपेक्षेत त्वरितेन तु चिकि
त्सयेत् । एकमस्ति विषं लो
के द्वितीयं नोपपद्यते । तथा च
लविषं चैव स्थावरं तत्त्रिधेव च ।
प्रथमे विषवेगेन रोमहर्षं प्रजा
यते । द्वितीये विषवेगेन स्वेदो
गात्रेषु जायते । तृतीये विषवे
गेन तु कम्पो गात्रेषु जायते । च
तुर्थे विषवेगेन श्रोत्रांतरं निरो
धयेत् । पंचमे विषवेगेन तु हि
क्का गात्रेषु जायते । षष्ठे तु वि
षवेगेन ग्रीवाभंगस्तु जायते ।
सप्तमे विषवेगेन प्राणेभ्यो वि
प्रमुच्यते । सप्तधा तु वहा ह्येते
वैनतेयेन भाषिताः ॥
त्वचस्थाने विषप्राप्ते तस्य रूपा
णि मे शृणु ॥ अंगानि ति
मिरायंते यतते च मुहुर्मुहुः ॥
एतानि यस्य चिह्नानि तस्य त्व
चगतं विषं ॥ त-

स्यागदं प्रवक्ष्यामि येन सम्प
द्यते सुखं । अर्कमूल मपामार्गं
प्रियंगु तगरं तथा । एतदालो
ड्य दातव्यं ततः संपद्यते सुखं ।
तत्र त्वस्मिन् कृते विषा नाति
वर्तेत चेद्विषं । त्वचस्थानं ततो
भित्वा रक्तस्थाने प्रधावति ॥
विषे च रक्तसंप्राप्ते तस्य रूपा
णि मे शृणु । दह्यते मुह्यते चै
व शीतलं वहु मन्यते । एतानि
यस्य रूपाणि तस्य रक्ते विषं ग
तं । तस्यागदं प्रवक्ष्यामि येन
संपद्यते सुखं । उशीरं चंदनं
कुष्ठ मुत्पलं तगरं तथा । म
हाकालस्य मूलानि सिंधुवारस्य
गस्य च । हिंगुं च मरिचं चैव ए
वं वेगे तु दापयेत् । बृहती वृ
श्चिकाली च इंद्रवारुणिमूलकं
सर्पगंधा घृतं चैव द्वितीये प
रिकीर्तितं । सिंधुवारं तथा हिं
गु तृतीये कारयेद्बुधः । नस्यं
पानं च कुर्वीत अंजनं लेपनं त-
था । एतेनैवोपचारेण ततः सं
पद्यते सुखं ॥ रक्तस्थानं ततो
गत्वा पित्तस्थानं प्रधावति । पि
त्तस्थानगते विप्र विषे रूपाणि
मे शृणु । उत्तिष्ठते निपतते द-
ह्यते मुह्यते तथा । गात्रतः पीत
ता स्याद्धि दिशः पश्यति पीति
काः । यवलाश्च भवेन्मूर्च्छा न
चात्मानं विजानते । विषक्रिया
तस्य कुर्यात् यथा संपद्यते सु
खं । पिप्पलीमधुकं चैव मधु
खंडं घृतं तथा । मधुसारमला
बुं च जाति शर्करवालकं ॥
इंद्रवारुणिमूलं च गोमूत्रेण
पेषयेत् । नस्यं तस्य प्रयुंजीत
पानमालेपमांजनं । एतेनैवो
पचारेण ततः संपद्यते सुखं ।
पित्तस्थानमतिक्रम्य श्लेष्मस्था
नं च गच्छति । श्लेष्मस्थाने त
तः प्राप्ते तस्य रूपाणि मे शृणु ।
गात्राणि तस्य रुध्यंते निश्वास-
श्च न जायते । लाला च स्रवते
तस्य कंठे घुरघुरायते । एता
नि यस्य रूपाणि तस्य श्लेष्मग
ते विषं ॥ तस्यागदं प्रवक्ष्या
मि येन संपद्यते सुखं । त्रिकटु
कं च कोषातकी लोध्रं मधुसा
रकं । एतेषां समभागानि गो
मूत्रेण पेषयेत् । नस्यं पानं च कु
र्वीत अंजनं लेपनं तथा । एते
नैवोपचारेण ततः संपद्यते
सुखं ॥

श्लेष्मस्थानमतिक्रम्य वायु-
स्थानञ्च गच्छति। तत्ररूपाणि
वक्ष्यामि वायुस्थानगते विषे।
आध्मायते च जठरं यत्नवांश्च
न पश्यति। इदं पं कुरुते रूपं दृ
ष्टिभङ्गश्च जायते। एतानि य
स्य रूपाणि तस्य वायुगतं विषं
तस्यागदं प्रवक्ष्यामि येन संप
द्यते सुखं। शोणमूलं पिया-
लं च रक्ता च गजपिप्पली॥
भार्गीवचा पिप्पलि देवदारु म
धूकसारं सह सिन्दुवारं। हिङ्गुश्च
पिष्ट्वा गुडिकां च कुर्य्याद्दद्याच्च
नस्याञ्जनलेपनादीन्। एषोऽगा
दः सर्वविषाणि हन्यात्। स्वयं
भुवा देववरेण सृष्टः। अञ्जने
चैव नस्ये च क्षिप्रं दद्याद्विषार्त्ति
ते। वायुस्थाने ततो मुक्त्वा मज्ज
स्थानं प्रधावति। विषे मज्जग
ते विप्र तस्य रूपाणि मे शृणु।
दृष्टिश्च हीयते तस्य भूपाङ्गा
नि मुञ्चति। एतानि यस्य रूपा
णि तस्य मज्जगतं विषं। तस्या
गदं प्रवक्ष्यामि येन संपद्यते सु
खं। घृतं मधु शर्करां च उशीरं
चन्दनं तथा। एतदालोड्य द
त्तं पानं तस्य च शस्यते॥ त

तः प्रणश्यते दुःखं ततः संपद्य
ते सुखं। अथ तस्मिन् कृते
योगे विषं तस्य निवर्त्तते॥
मज्जस्थानं ततो गत्वा मर्म-
स्थाने प्रधावति। विषे तु मर्म
संप्राप्ते स्फुटं रूपं यथा भवेत्।
निश्चेष्टः पतते भूमौ कर्णाभ्यां
वधिरो भवेत्। कर्णिकाछिद्य
मानस्य रोमहर्षो न जायते।
दण्डेनाहन्यमानस्य दण्डराजी न जा
यते। शस्त्रेणाछिद्यमानस्य रु
धिरं न प्रवर्त्तते। केशेषु लुञ्च्य
मानेषु नैव क्लेशप्रवेदने। य
स्य कर्णौ च पार्श्वौ च हनू पादौ
च सेधयः। शिथिलानि भवं
तीह स गतासुर्विनिष्कृतिः।
एतानि यस्य रूपाणि विपरीता
नि येन तस्य। एतैस्तं विजानी-
यात् कश्यपस्य वचो यथा।
वैद्यास्तस्य न पश्यन्ति ये पश्यं-
ति कुशिक्षिताः॥ विचक्ष-
णास्तु पश्यन्ति मन्त्रौषधिसमन्वि
ताः। तस्यागदं प्रवक्ष्यामि स्वयं
रुद्रेण भाषितं। मयूरपित्तं मा-
र्ज्जारपित्तं नकुलपित्तकं। मत्स्य
माहिषपित्तञ्च धात्रीमूलमे
व च॥ कुङ्कुमं भार्गीव- ॥

कुष्ठं काश्मरी च त्वचं तथा
उत्पलस्य च किञ्जल्कं पद्मस्य कु
मुदस्य च। एतानि समभागानि
गोमूत्रेण तु पेषयेत्। अयोः
गदो यस्य हस्ते दष्टेन म्रियते न
रः। कालाहिनापि दष्टोपि त्व
प्रभवति निर्विषः। क्षिप्रमेव-
प्रदातव्यं मृतसञ्जीवनौषधं।
अञ्जने चैव नस्ये च क्षिप्रं दद्या
द्विचक्षणः। इति भविष्यपुरा
णे ब्रह्मपर्व्वणि पञ्चमीमाहात्म्ये
विषक्रिया॥ गौतम उवाच॥
कीदृशं भवति ख्याहि सर्पदष्ट
स्य लक्षणं। कश्यप उवाच। अ
तः परं प्रवक्ष्यामि नागानां रूप
लक्षणं। सर्पदष्टस्य च तथा
समासाद्द्विजपुङ्गव। अथ सर्पेण
दष्टस्य ऊर्द्ध्वा दृष्टिः प्रजायते।
सर्पादष्टस्य च तथा अधो दृष्टिः
प्रजायते। नपुंसकेन दष्टस्य अ
गमर्द्दः प्रजायते। रुषा दष्टस्य
वा साम्या दृष्टि र्द्विजवरोत्तम
कुमारेणापि दष्टस्य दक्षिणाप
वजायते। गुर्विण्या वाथ द
ष्टस्य तथा स्वेदश्च जायते रो
माञ्चः सूतिकायाश्च वेपथुश्चा
पि जायते पञ्चमीप्रभवे द्वाशो-

दिवासर्पो विषाधिकः। नपुंस
कस्तु संध्यायां कश्यपेन तु भा
षितं। अथकारे तु दष्टाना मु
दके गहने वने। सुप्तस्य वै प्र
मत्तस्य पदे सर्पेण दृश्यते।
दृष्टरूपाणि अजानन् वै कथं वै
घश्चिकित्सति। चतुर्विधा र
हः प्रोक्ताः सर्पास्तु महात्मना
दर्व्वीकरा मण्डलिनो राजिलाश्च
त तास्तथा। दर्व्वीकरास्तु विषा
मण्डलाः पैत्तिकाः स्मृताः। श्ले
ष्मला राजिला ज्ञेया व्यन्तराः
सान्निपातिकाः। रक्तं पतीस्त
येषां फणं सर्पाणां तु पृथकपृथ
क्। कृष्णं दर्व्वीकराणां तु जाय
ते वा न सुलक्षणं। रक्तं चैव चक्र
कृशः शोणितं मण्डलीकृते पिच्छि
लं राजिलेस्वल्पं तदुष्मान्तरके त
था। ज्ञेयाः सर्पास्तु चत्वारः पञ्च
मो नोपलभ्यते। ब्राह्मणाः क्ष
त्रिया वैश्याः शूद्राश्चैव चतुर्थकः
ब्राह्मणो मधुरं दद्यात् तिक्तं दद्या
त् क्षत्रियो ते। वैश्यः कषायफलं दद्या
त् शूद्रे विफलमेव वा। ब्राह्मणे
न तु दष्टस्य दाहो गात्रेषु जायते
मूर्च्छा च प्रबला स्याद्वैनस्ताने
मभिजायते। एषामवर्णीस्त



चस्यान्मनस्तंभश्च जायते। त
स्य कुर्य्यात्प्रतीकारं येनसंपद्य
ते सुखं। अश्वगंधामपामार्गं
सिंदुवारं सुरालयं। एतत्सर्पिः
समायुक्तं पानेनस्यंच दापयेत्
एतेनैवोपचारेण सुखी भव
तिमानवः॥ हरित्रियेण तद्
ष्टस्य कंपो गात्रेषुजायते। मू
र्च्छा मोह स्तथा स्याद्वै नेत्रान
मभिजायते। जायते वेदनात
स्य ऊर्द्ध्वंचैव निरीक्षते। तस्य
कुर्य्यात् प्रतीकारं येनसंप
द्यतेसुखं। अर्कमूलमपामा
र्गं प्रियंगुमथशारुणी। एतत्स
र्पिः समायुक्तं पानेनतस्यप्रदाप
येत् एतेनैवोपचारेणसुखीभ
वतिमानवः। वैश्येनापिहि द
ष्टस्य शृणुरूपाणियानितु। श्ले
ष्मप्रकोपो लालाच नेत्रोहृह
ति वेदना मूर्च्छाच प्रबला य
स्य आध्मानं नाभिनंदति। त
स्य कुर्य्यात्प्रतीकारं येनसंप
द्यतेसुखं। अश्वगंधासगोमूत्रं
गुडधूमं मधुयुक्तं शिरीषार्कं
पलाशंच श्वेतांचगिरिकर्णि
कां। गोमूत्रेण समायुक्तं पानेन
संचदापयेत्। एषवैश्येनदष्टा

नामगदः परिकीर्तितः। शूद्रे
णापि हि दष्टस्य शृणुतत्त्वेनगौ
तम। कंपते वेपते चैव ज्वरःशी
तेच जायते। अंगानिचुलुचु
लायंते शूद्रदष्टस्य लक्षणं।
तस्यागदंप्रवक्ष्यामि येन संप
द्यतेसुखं। पद्मचंदनकंचैव
हीरं पद्मस्य केशरं। मधुम
र्कसारंच श्वेताचगिरिकर्णि
का एतानिसमभागानिपेषये
त् पीतवारिणा। पानेलेपांजने
नसुखीभवति मानवः॥ ए
वीकेचरते विप्रो मध्याह्नेक्षत्रि
यश्चरेत्। अपराह्ने चरेद्वैश्यः
शूद्रः संध्याचरोभवेत्। आहा
रश्चात्र पुष्पाणि ब्राह्मणानां
विदुर्बुधाः। मूषिकाःक्षत्रिया
णांच आहारो द्विजसत्तम। वैश्य
मंडूकभक्ष्याश्च शूद्राःसर्वाशि
नस्तथा। अग्रतो दशते विप्रः
क्षत्रियोदक्षिणेनतु। वामपार्श्वे
सदा वैश्यः पश्चाद्वै शूद्रआद
शेत्। मदकालेतु सर्पाश्चापि
उग्रास्तु महाविषाः। अवेला
यां दशंते वै मैथुनार्ताभुजंग
माः॥ पुष्पगंधाःस्मृता विप्राः
क्षत्रियाश्चंदनावहाः। वै

श्याश्चघृतगंधावै शूद्राःशूर्म
स्यगंधिनः। वासंतेषांप्रवक्ष्या
मि यथावदनुपूर्वशः। नदीकू
पतडागेषु गिरिप्रस्रवणेषुच
आरामेषु पत्रिषु शून्यविषाय
तनेषुच। वसंतिब्राह्मणाःस
र्पाग्राममहावेचतुष्पथे। क्षत्रियो
वसते नित्यं लोहाद्येषु पुरेषुच
गोशाला स्वश्वशालासु पला
लेषुतटेषुच। गोष्ठेषुपथिवृक्षे
षुविप्रवैश्याःवसंतिच। आवि
विक्तेषु स्थानेषु निर्झरेषु वने
षुच॥ शून्यागारेश्मशानेच
शूद्राविप्रवसंतिच। श्वेताश्च
कपिलाश्चैवयेसर्पास्त्वनलप्र
भाः। सात्विकास्मनस्विनो विप्र
ब्राह्मणा स्तेतुवैस्मृताः। रक्तव
र्णा सुवर्णाभ प्रवालमनिसन्नि
भाः। सूर्य्यप्रभास्तथा विप्रक्ष
त्रियास्ते भुजंगमाः। नाना वि
त्र राजीभि रतसीवर्णसन्निभाः।
बाणपुष्पसुवर्णाभावैश्यास्ते
च भुजंगमाः। काकोदरनिभाः
केचित् येच अंजनसन्निभाः काक
वर्णा धूम्रवर्णा स्ते शूद्राःपरि
कीर्तिताः। ब्राह्मणसर्पेणदष्टस्यदं
शमंगुल मंतरं वालदष्टविजा
नीयात् कश्यपस्य

वचो यथा। क्षत्रसर्पेण दष्टस्य
दंशं द्व्यंगुल मंतरं यौवनस्थेन
दष्टस्य एतद्भवति लक्षणं। य
स्यसर्पेण दष्टस्य सार्द्धद्व्यंगुलमं
तरं। वृद्धदष्टं विजानीयात् कश्य
पस्यवचोयथा। अनंतः प्रेक्षते
पूर्वं वामपार्श्वे तु वासुकिः।
तक्षको दक्षिणे पार्श्वे कर्को
टःपृष्ठतस्तथा। वलेन भ्रमते
पद्मो महापद्मो निमज्जति। वि
मर्द्दे तिष्ठते चैव शंखपालो
मुहुर्मुहुः। सर्वेषांकुरुते रूपं
कुलिकः पन्नगोत्तमः। अनंतस्य
दिशा पूर्वा वासुकेस्तु कुतापा
नः दक्षिणा तक्षकस्याज्ञा क
र्कोटस्य तुनैर्ऋती। पश्चिमा पद्म
नाभस्य महापद्मस्य वायुजा॥
उत्तरा शंखपालस्य वैशानी के
वलस्यतु अनंतस्य भवेत् पद्मं
वासुकेः स्यात्रयोत्पलं। स्व
स्तिकं तक्षकस्योक्तं कर्कोटस्य
त्रिरेखकं पद्मस्य तु भवेत् य
ग्रंमूलमस्तत्रस्यतु। शंखजा
तेभवेच्छत्रं कुलिकस्यार्द्धचंद्र
कं। अनंतःकुलिकोविप्रः क्षत्रि
यौशंखवासुकी महापद्मस्त
क्षकश्च वैश्यौ विप्रकीर्तितः

पद्मककोटकौ स्मृतौ सदा ते
यो मनीषिभिः। अनंत कुलि-
कौ शुक्लौ वर्णितौ ब्रह्मसंभवौ
वासुकिः शंखपालश्च क्षत्रियौ
ह्नि संभवौ। तक्षकश्च महाप
द्म वैश्यात् पीतौ बभूवतुः। प
द्मककोटकौ विप्र सर्पौ कृष्णौ
बभूवतुः। हयं यान्ते वृषंकौ
वेशजानमथ पावकं। घरंतीशु
न्याय एतानेतान् क्षिप्तिकरा
नृविदुः। एतौ कुंभः पताकाच
कांचनमणयस्तथा। शारसो
मालिकाकं वृजीवं जीवेति-
स्वन्नत। पतेषांदर्शनेस्वे ष्टक
न्याच प्रानिसूतिका चतुःपापि
समाख्याता भोगिनो मत्तपन्न-
गाः। शूद्रप्रणास्तेषु षड्विंप्रा-
ग्रहविप्राणमहीधराः। विशाला
कुलिताः प्रोक्ताः सप्तमंडलिन-
स्तथा। राजीवास्तु दशप्रोक्ता
दृत्ताः षोडशपंचच। ईड्वोईड्
भि सैवचैडभः सेषवाहनः ना
गपुष्पस्तवर्णाख्यो निर्विषाश्चैव
पन्नगाः। एवमेव तु सर्पाणां शा
तदिनवलिस्मृतं वराहकर्णिका
जपिप्पलिंच गांधारिकाविष्णु
ल देवदारुः। मधुकसारसहस्रि-

धुवार्क हिंगुंच पिष्ठा गुडिकाच
कार्यथा। सुमंतरुवाच। इत्युक्
वानमहावीरैगौतमस्य प्रजापतिः
लक्षणं सर्वनागानां रूपवर्ण
विशेषस्तथा। तस्मात्संपूजयेन्ना
गानसदा भक्त्या समन्वितः
विशेषतस्तु पंचम्यां पयसा पा
यसेनच श्रावणेमासि पंचम्यां
शुक्लपक्षे नराधिप द्वारस्योभ
यतो लेख्या गोमयेन विषोल्ब
णाः। पूजयेद्दधि दूर्वाभिः कुशै
र्गंधाक्षतैः कुशैः गंधपुष्पैरुप
हारैश्च ब्राह्मणानांच तर्पणैः
येत्वस्यां पूजयंतीह नागान्
भक्तिपुरःसराः। न तेषां सर्प
तोवीर भयं भवति कर्हिचित्
इति भविष्ये पंचमीकल्पे॥
सुमंतरुवाच। तथाभाद्रपदे
मासि पंचम्यां श्रद्धयान्वितः
तथालिख्य नरो नागान् कृष्ण
वर्णादिवर्णकैः पूजयेद्गंधपु
ष्पैश्च सर्पिःपायसगुग्गुलैः त
स्य तुष्टिं समायांति पन्नगास्त
कादयः आसप्तमात्कुलात्तस्य
न भयं नागतो भवेत् तस्मात्सर्व
प्रयत्नेन नागान्संपूजयेद्बुधः
इति भविष्ये पंचमीकल्पे॥

सुमंतरुवाच। तथाश्वयुजे
मासि पंचम्यां कुरुनंदन। कृत्वा
कुशमयान्नागान् इंद्राण्या सह पू
जयेत्। घृतोदकाभ्यां पयसा स्ना
पयित्वा विशांपते। गोधूमैः प
यसा स्विन्नैर्भक्ष्यैश्च विविधैस्त
था। यस्त्वस्यां विधिवन्नागान्
शुचिर्भक्त्या समन्वितः। पूज-
येत् कुरुशार्दूल तस्य शेषाद
योऽनघ। नागाः प्रीता भवंतीह
प्रांति मात्नोति मानवः। सुखं प्रा
ति लोकमासाद्य मोदते शाश्व-
तीः समाः॥ इत्येतत् कथितं
विप्र पंचमीकल्प मुत्तमं। यत्र
नान्मुच्यते मंत्रं सर्वसर्पनिषेध
कं। ओं कुरुकुले नः फट्स्वा
हा। इति भविष्यपुराणे। शत
साहस्र्यां संहितायां पंचमीकल्पे
प्रमस्व! सूतउवाच॥ प्राणेभ्य
ं गारुडंच शिवोक्तं प्रवदाम्य
हे। स्यात्कान्यादौ प्रवक्ष्यामि न
यो दष्टो न जीवति॥ चिता-
वल्मीक शैलादौ कूपेच विवरे
तरोः। दंष्ट्रा रेखात्रयं यस्य प्रा-
च्छन्ने स न जीवति। षष्ठ्यांच-
कर्कटे मेषे मूलाश्लेषा मघा
दिषु। कक्षा पाणि गले संधौ

शंखकर्णोदरादिषु। दंडीशास्त्र
यतो भिन्नलग्नादिकालहृतकः
वके वाक्षेच ग्रीवायां पृष्ठेचन
हि जीवति। एवं दिनपतिर्भुंक्ते
सार्द्धयामं तत्तोपरे। शेषाः ग्रहाः
प्रतिदिनं षट्संख्यापरिवर्त्तनैः।
नागभोगक्रमो ज्ञेयो रात्रौ वा
णविवर्तनैः शेषार्कः फणिप
श्चंद्र स्तत्कोभौम ईरितः॥
कर्कोटो गुरुः पद्मो महा
पद्मश्च भार्गवः॥ शंखः श-
नैश्चरो राहुः कुलिकश्चाहयो
ग्रहाः। रात्रौ दिवास्वगुरो र्भौ
मे स्यादमरांतकः। पंगेः का
लो दिवा राहुः कुलिकेन सह
स्थितः। यामार्द्धे संधिसंस्थः।
स वेला कालयतीत्येवेत्। वा
ण द्विषट् वह्नि वाजि युग भू
वेक भागतः। दिवा षट् वेद
नेत्राद्रि पंच शिवस्वर्गेकैः
पादांगुष्ठे पादपृष्ठे गुल्फे जा
नुनि लिंगके। नाभौ हृदि स्त
नतटे कंठे नासापुटे च णे। क
र्णयोश्च भ्रुवोः शंखे मस्तके प्र
तिपत् क्रमात्। तिष्टेज्जंभजी
वेन पुंसा दक्षिणभागके। का
यस्य वामभागे तु स्त्रिया वा



गुरुहात् करात्। अमवक्त्र हृ
तो मोहो निवर्तेत च मर्दनात्
आत्मनः परमं बीजं हंसाख्यं
स्फाटिकामले। ज्ञातव्यं विष
पापघ्ने बीजं तस्य चत्वारि यं। वि
ढ पंचस्वरयुत माद्य शक्ते द्वि
तीयकं। षष्ठान्त्यं तृतीयं स्यात्
सविसर्गं चतुर्थं। ओं क्रुक्रुंदे
स्वाहा विद्या त्रैलोक्यरक्षार्थे गा
रुडेन धृता पुरा। वैधेघ्नाच
नागानां गुरवः प्रभवं न्यसे
त्। गलेकुक्षौ न्यसेत् पश्चात् हृ
दिचैव विशेषतः। क्रुंदे स्वाहा
याप्रान्दग्रुवो हास्या सर्वं वितः॥
गृहेपि लिखिता यत्र तत्रागाः
संत्यजंति च। सहस्त्र मेवं जप्तं
तस्त्वं कर्णे हृ लं तथा। यदृ
हे प्राकं राजभा नागास्त्यजं
ति च। सप्तलक्षस्य जप्याहे सि
द्धिः प्राप्ता सुरासुरैः॥ ओं सु
वर्णरेखे कुक्कुट विग्रह रूपि
णि स्वाहा। पत्रं चाष्टदले पद्मे
दले वर्णयुगं लिखेत् नामेतत्
वारिधाराभिः स्नानो दष्टो विषं
त्यजेत्। ओं पक्षि स्वाहा। अंगु
ष्ठादि कनिष्ठांतं करे न्यस्यास्य
देहके। केवक्रे हृदि लिंगे च

पादयो गरुडो हिसः। नाक्रा
मंति च तच्छायां स्वप्नेपि विष
पन्नगाः। यस्तु लक्षं जपेत्तस्याः
सद्दृष्ट्या नाशयेद्विषं। ओं ह्रौं
ह्रौं ह्रीं भिरुण्डायै नमः। क
र्णे जप्ता त्विषविघ्ना दष्टकस्य
विषं हरेत्। अथान्यसेत्तु पादा
ग्रे इ ई गुल्फेऽथ जानुनि। उ
ऊ ए ऐ कटितटे ओ नाभौ वि
न्यसेत् सुधीः। हृदि औ वक्त्र
देशे च अंगे अः हंस संयुताः
हंसो विषादि च हरेत् जप्तो
ध्यातोऽथ पूजितः। गरुडोऽह
मिति ध्यात्वा कुर्याद्विषहरीं
क्रियां। हे मंत्र गात्रविन्यस्ते
विषादिहर मीरिते। न्यस्य
हंसं वामकरे नासा मुखानि
रोधकृत्। मंत्रो हरेत् दष्टक
स्य त्वङ्मांसादिगतं विषं। स
वायुना समाकृष्य दंता नावर
लेह रेत्। ततो न्यसेद्दष्टकेवानी
लकण्ठादि संस्मरेत्॥ पीतं
अंगोषिगिरामूले तण्डुलाहिविं
षापहे। पुनर्णवा फलिनी ना
मूले च कजमीहृषी। मूलेषु
लाहिर्हुज्जरक्षककर्कोटकाकी सिकार्णि
का अक्षि दृष्टि चूर्णेपेत लेपो

ऽयं विषमर्दनः। विषमुष्ठिंन
वजेच्च उस्न पिवति यो घृतं।
पंचांगात शिरीषस्य मूलेशृंज
नजेतथा। संधोगलेपतत्रापि
पानाद्या विषहृद्भवेत्। ह्रीं गोन
सादि विषहृत्। छलटविस
गांते ध्याते वषफादि कृद्भवेत्।
न्यस्त घोनो वृषोत् कन्यां कुर्या
त्मद जलाविलां। जन्मासमाष्ट
माहरत्व गरुत्मानिव सर्वगः॥ क
विः स्यात् प्रकृतिधारी स्याद्धप
ती श्रायुरामुयात्। विषहृत
स्यात् कृष्या नेठन्नर्निर्वासंमतो
ध्रुवं। इति गारुडे प्राणोऽश्चवेगारु
ड समाप्त ९९ अध्यायः॥
अथपंच। अग्निरुवाच॥
नागादयोऽथ नागादिः दशाख्या
नानि मर्मणि च। सूतकेदष्ट चेष्टे
ति सप्तलक्षणा मुच्यते। शे
षवासुकि तक्षाख्याः कर्कोट
ऽब्जो महांबुजः। शंखपालश्च
कुलिक इत्यष्टौ नागवर्यकाः।
दश अष्ट पंच त्रिगुण शतमूर्ध्ना
न्विताः क्रमात्। विप्रो नृपौ वि
शौ शूद्रौ द्वौ द्वौ नागेषु कीर्ति
तौ। तदन्वयाः पंचशतं तेभ्यो
जाता ह्यसंख्यकाः। फणिम

ण्डलि राजील वात पित्त कफा
त्मकाः। व्यंतरा दोषमिश्रास्ते स
र्पा दर्वीकराः स्मृताः। रथांग
लांगलच्छत्र स्वस्तिकांकुशधा
रिणः। गोनसा मन्दगा दीर्घा मं
डलै विविधैः स्थिताः। राजीला
श्चित्रिताः स्निग्धा स्तिर्यगूर्ध्वं च
राजिभिः। व्यंतरा मिश्रचिह्ना
श्च भू वर्षाग्नेय वायवः। चतुर्वि
धास्ते षड्विंशभेदाः षोडश गो
नसाः। त्रयोदश च राजीला व्यं
तरा एकविंशतिः। येऽनुक्त
काले जायंते सर्पा स्ते व्यंतराः
स्मृताः। आषाढादि त्रिमासैः
स्याद्गर्भो मासचतुष्टये। अ
ण्डकानां शते द्वे च चत्वारिंश
त्प्रसूयते। सर्पा ग्रसंति सूतौ
तान् विना स्त्री पुंनपुंसकान्। उ
न्मीलते सि सप्ताहात् कृष्णो मा
सात् भवेदहिः। द्वादशाहात् सु
बोधः स्याद्दंताः स्युः सूर्यद
र्शनात् द्वात्रिंशद्दिन विंशत्या
श्चतस्र स्तेषु दंष्ट्रिकाः। कराली
मकरी कालरात्री च यमदूतिकाः
एतास्ताः सविषा दंष्ट्रा वामद
क्षिणपार्श्वगाः। षण्मासान्मुच्य
ते कृत्तिं जीवेत् षष्टि समा द्वय

नागाः सूर्य्यादि वारेशाःसप्त उ
क्ता दिवा निशि। तेषामष्ट प्रति
वारेषु कुलिकः सर्वसंधिषु ॥
शंखेनवासमहाब्जेन सहतस्पाद
योःश्रवा। द्वयोर्द्वयो नाडिका
मेत्रमेतरे कुलिकोदयः। दुष्टः
सकालःसर्वत्र सर्वदेशे विनि
र्दिशेत्। कृत्तिका भरणी स्वा
तीमूले पूर्वात्रयाश्विनी विशा
खार्द्रा मघाश्लेषा चित्रा श्रवण
रोहिणी हस्तमंद कुजेज्यावारौ पं
चमी चाष्टमीतिथिः षष्ठी रिक्ता
शिवा निंद्याः पंचमी च चतुर्दशी।
संध्या चतुष्टयेदुष्टे दग्धयोग
श्च राशयः। एकद्वित्रिबहवो दंशा
दष्टविद्धं च खंडितं। अदंशम
वगुप्तं स्याद्दंशमेवं चतुर्विधं
त्रयो ह्येकक्षतादंशा वेदना
रुधिरोल्वणं। नक्रैश्चैकोंऽघ्रि
कूर्माभा दंशाश्च यम चोदिताः
दाहो पिपीलिकास्पर्शी कण्ठ
शोथरुजान्विताः। सतोदो ग्र
थितो दंशः सविषोन्यस्तनिर्वि
षः। देवालये शून्यगृहे वल्मी
कोद्यानकोटरे। रथ्या संध्या
श्मशाने च श्मशाने सिंधुसं
गमे। द्वीपे चतुष्पथे सौधेगृ

हे श्लेष्मपर्वताग्रतः बिलद्वारे
जीर्णकूपे जीर्णवेश्मनि कुड्य
के शिग्रु श्लेष्मातकाक्षेषु जं
बूदुंबरणेषुच। वटेच जीर्णप्रा
कारे खोस्य हृत् कक्ष जत्रुणि
तालौ शंखे गले मूर्ध्नि चिबुके
नाभिपादयोः दंशोऽशुभप्र
भो भवेत्। पुष्पहस्तः सवाक्
धीः लिंगवर्णं समानश्च शुक्ल
वस्त्रो मलःशुचिः। अपद्वारा
गतःशस्त्री प्रमादी भूगतेक्षणः
विवर्णवासाःपाशादिहस्तो ग
द्गदवर्णभाक्। शुष्ककाष्ठाश्रि
तःखिन्न स्तिलाक्तककरांशु
कः आर्द्रवासाः कृष्णरक्त पुष्पा
ढ्यशिरोरुहः। कुचमर्दी नखच्छे
दीगुदस्पृक् पादलेखकः। केश
मोची तृणच्छेदी दुष्टा दूताःस्त
थैकलः। इडान्या वाहयेद्दूतो य
दि हितस्य चात्मनः। आभ्यां द्वा
भ्यां पुष्ट्याम्यान् विद्यात् स्त्री
पुंनपुंसकान्। दूतःस्पृशति
यद्गात्रं तस्मिन् देशे सुदारु
त। दूतोंघ्रिचलने दुष्टस्थितिभि
निष्फलाशुभा जीवपार्श्वेशुभो
हूतो दुष्टोऽन्यत्र समागतः। जी
वोगतागते दुष्टः शुभोदूत.

निवेदने। दूतस्य वाक् प्रदुष्टा
सा पूर्वामर्जाद्धेनिंदिता। विभ
क्तैस्तस्य वाक्यांते विषनिर्विष
कालता। आद्यैःस्वरैश्च काद्यैश्च
वर्गै र्भिन्नलिपिर्द्विधा। स्व रे
ज्ञो वसुमान् वर्गी इति द्वेष्य
श्च मातृकाः वाताग्नीन्द्रजला
त्मानो वर्गेषुच चतुष्टये। न
पुंसकाःपंचमाःस्युःस्वराःशक्रा
द्युयोनयः। दुष्टो दूतस्य वाक्पा
दो वाताग्नी मध्यमोहरिः॥ प्र
शस्तावारुणवर्णा आतिदुष्टा
नपुंसकाः प्रस्थाने मंगलेवाक्य
गर्जिते मेघहस्तिनोः। प्रदक्षि
णे फले वृक्षे चासस्य च वेते
जिते। गुभागीतादिशब्दाः स्यु
रीदृशांस्याद्विसिद्धये। अनर्थगी
ताद्याक्रांदो दक्षिणो विकृते क्षुते
वेषधा विषा न्यसः कन्या गौर्द
तीसुरजध्वजौ। क्षीराज्यदधि
शंखांबुच्छत्रं भेरी फलं सुराः
तंडुला हेमरूप्येच सिद्धयेऽभि
मुखा शुभा। सकाष्ठः सानलः
कारुर्मलिनो वस्त्रभारभृत्। गल
स्पर्शको रोगभावःर्द्धिभोल्मुक क
पर्दिकाः तैलकपालकार्पासा
निषेधो भस्मनष्टये विषवेगा

श्च सप्तस्यु र्धातोर्धात्वंतरासि
तः। विषदंशो ललाटं यात्य
तो नेत्रं ततो मुखं। आस्याच्च
रणनाभीद्धो धातून् प्राप्नोति
हिक्कमात् इत्याग्नेये लक्षणा
नि। अग्निरुवाच। मंत्रध्याना
यधे देह चिकित्सा प्रवदामि
ते। ॐनमो भगवते नीलकंठा
येति। जपनाद्विषहानिःस्या
दौषधं जीवरक्षणं। साज्यश
र्करं पेयं हि विषं विषमुच्य
ते ॐ ॐ मे सर्प मूषादि सुरा
दिस्यादरं विषं। प्राणेन स्वा
न्विनोब्रह्मा लोहितं तारकः
शिवः। विषते नाम मंत्रोयं ता
र्क्ष्यः प्राणमयः स्मृतः। ज्वल महाम
ते हृदयाय। गरुड विलासशिर
से। गरुडशिखायै। गरुड विषभं
जन २ प्रभेदन २ विद्रावय २
विमर्दय २ कवचाय। अप्रतिह
त शासनं वं हुं फट् अस्त्राय। उ
ग्ररूपधारक सर्वभयंकर भीषय २
सर्वं दह २ भस्मी कुरु कुरु स्वाहा
नेत्राय। सप्तवर्णेन युग्माष्टदि
ग्दल स्वरकेशरात्। वर्णान्तेन
द्विष्टाभूत्कर्णिकं मातृकांबुजे
कृत्वा हृदि स्वं तन्मध्ये वामहस्त



तले स्मरेत् । अंगुष्ठादौ न्यसेद्व
र्णान् विषभेदोदिताः कलाः । पा
र्थिवं वज्रं चतुष्कोणं पार्थिवं शक्रदै
वतं । वृत्तार्द्धं माप्यं पद्माङ्कमम्बु
ङ्कं वरुणदैवतं । अस्त्रं स्वस्तिक
युक्तञ्च भैषजं वह्निदैवतं ॥ ह
त्विंदुवृत्तं वायुदैवतं वृत्तमा
निलं । अंगुष्ठाद्यंगुली मध्ये
पर्व्वास्वेषु स्मरेत्क्रमात् सवर्णा
नागवाहनैर्विहितेषु न्यसेत् क्रमा
त् । विषते चतुरो वर्णान् स्वमंड
लसमत्विषः अनूपे वदनस्याग्रे
आकाशे शिवदैवते । कनिष्ठा
मध्यपर्वान्ते न्यसेत्तस्याद्य मन्त्र
रं । नागानामादिवर्णांश्च स्व
मंडलसमान्न्यसेत् । भूतादिव
र्णान् विन्यस्य अंगुष्ठाद्यंतपर्व
सु । तन्मात्रादि गुणाद्यर्णानंगु
लीषु न्यसेद्बुधः । स्पर्शनादेवता
देहे गाहहस्तेहन्याद्विषद्वयं । मेरु
लादिषु तान् वर्णान् विषते क
रयोर्जितान् । अंगुष्ठाद्यंगुलिभि
र्देहनाभिस्थानेषु पर्वसु स्वजो
नतः सर्ववर्णासमानाभक्तहित
प्रभं । कुंकुमारुणमाकंठादाके
शान्तात् सितेतरं । ब्रह्मांडमपि
तेनाहं चंद्रार्द्धनागभूषणं ॥
नीलाग्रनासमात्मानं । महापत्ते
स्मरेद्बुधः । पर्वतार्थात्मनो वा
क्यान्मन्त्रः स्यान्नेत्रिणो विषे । स्व
स्ति तार्क्ष्यकरस्पर्शात् स्थितो गुरु
विषापहः । तार्क्ष्यहस्तस्तस्मुद्यम
नात् पंचांगुलिचालनात् । ऊर्ध्वा
द्विषस्य स्तंभादीन्कुर्यान्मदवी
यथा । आकाशादेशभूवीजः पञ्च
गाधिपति मन्त्रः । संस्तंभयेत
दीपानो भाषया स्तंभयेद्विषाम
साक्ष भूषया वीजो मंत्रोऽयमा
प्लावितः । संप्लवः प्लावयत्या
स्यशाखाद्यः संहरेद्विषं । दष्टमु
त्थापयेद्वैषं स्वजन्मांशोऽभिषेक
तः । स्वजन्मपशोर्द्धमेध्यादिविस्व
न अवणेन वा । संदद्यात्स्वसं
ग्रत्वे भूतेजो यस्य यात्स्थितः
भूतायु अस्य यन्मंत्रो विषसंक्राम
यत्यसौ । अंतस्था निजवेषम
ध्या वीजाग्नीडु जलानुभिः ॥
एततुक्रमेणयेन्मंत्री गरुडाकृ
तिविग्रहः । तार्क्ष्यवाराणगोरक्ष्य
स्वजन्माप्यायेद्विषं । जानुदे
डीडुदिते स्वधा श्रीवीजलो
छिते । स्नानपानात् सर्वविष
जरा रोगापमृत्युजित् । पक्षिप
क्षि महापक्षि महापक्षि विवि

स्वाहा । पक्षि पक्षि महापक्षि
महापक्षि क्षी क्षी स्वाहा । द्वावे
तौ पक्षिराड् मंत्रौ विषघ्नावभि
मंत्रणात् । पक्षिराजाय विद्महे
पक्षि देवाय धीमहि तन्नो गरु
डः प्रचोदयात् । वह्निस्थेवा पार्श्व
तत् ऐंद्री दंतश्रीकोच दंतिनो
सकलो लांगलीचेति नीलकं
ठाय सीवितः । वसः कंठशि
खा स्थितं न्यसेत् स्तंभे सुसं
स्थितौ । हर हर हृदयाय नमः
कपर्द्दिनेच शिरसे नीलकंठाय
वै शिखां कालकूटविष भक्ष
णाय स्वाहाद्यवं वर्मंच कंठि
नेत्रं कृत्तिवासे नेत्रैः प्रत्येकश
स्त्रिभिः एवाद्ये यानने युक्तस्फे
त पीतारुणासितैः । अभयं
वरदं चापं वासुकिंच दधद्भु
जैः । यज्ञोपवीतपार्श्वतगौरी
रुद्रोऽस्य देवता । पाद जानु
गुह्य नाभि हृत् कंठानन मू
र्द्धसु । मंत्रार्णान्न्यसकरयो रं
गुष्ठाद्यंगुलीषुच । तर्जन्यादि
तदंतास्तु सर्वमंगुष्ठयोर्न्यसेत्
ध्यात्वैवं संहरेत् क्षिप्रं वहुधा
मल शुद्धया । कनिष्ठा ज्येष्ठ
या वद्धा निःक्षोभ्याः प्र॰
सृतिर्जवः विषनाशेनावामहस्त
मन्यस्मिन् दक्षिणं करं । नमो
भगवते नीलकंठाय चिः । अम
लकंठ चिः सर्वज्ञ कंठ चिः क्षि
पओं स्वाहा । नमो नीलकंठाय
नैक सर्वविषापहाय । नमस्ते
रुद्रमन्यव । इति संस्मार्जनाद्वि
षविनश्यति । नसंदेहः कार्याश्चा
प्प उपनेत्रा विधानतः । यज्ञे
द्रुद्रविधानेन नीलग्रीवं महेश्व
रं । विषव्याधि विनाशः स्यात्
कृत्वा रुद्रविधानतः । इत्याग्ने
ये महापुराणे । यात्राकाले त
स्य शुभाशुभस्त्वचकत्वं यथा
गोनास हर्वीकरराजिलाद्या
जात्यैव सर्वे भयदा भुजंगाः ।
विलोक्य सर्पं यदि निर्विक
ल्पा निवृत्त विषस्य शुभं वि
चिंत्यं । पाषाण संस्तंभितक
एकैकेषु दत्वा पदं याति विन
ष्टविघ्नाः । सर्पच्छया पंचनखा
भिधेयः प्रयाणकाले सव्यवाम
भागे दृष्टः शुभः सिद्धिकृत्स
मताग्र क्षिपेत् पयोर्द्धे यदि
राज्यलाभः । इति सर्पः । इति
वसंतराजशाकुने ९७ वर्गः ।
सर्पककालिका स्त्री वृत्तविशे



षः। तत्पर्यायः। तीक्ष्णा २ विषदंष्ट्रा ३ विषापहा ४ इति रत्नमाला। सहा ५ सर्पकंकाली ६ विषनाशिनी ७ इति शब्दचंद्रिका॥

सर्पकंकाली स्त्री सर्पकंकालिका। इति शब्दचंद्रिका॥

सर्पगंधा स्त्री वृक्षविशेषः। यथा। छुच्छाकी सर्पगंधाच वसनाचपलंकषा। इति जटाधरः॥

सर्पघातिनी स्त्री सर्पकंकालीभेदः। यथा। सर्पसहा सर्पनाम्ना सर्पांगी सर्पघातिनी। इति रत्नमाला॥

सर्पतृणः पुं नकुलः। इति हेमचंद्रः॥

सर्पदंष्ट्रः पुं दंतीवृक्षः। इति शब्दचंद्रिका॥

सर्पदंष्ट्रा स्त्री वृश्चिकाली। इति रत्नमाला॥

सर्पदंष्ट्रिका स्त्री अजशृंगी। इति राजनिर्घण्टः॥

सर्पदंडा स्त्री सैंहली। इति राजनिर्घण्टः॥

सर्पदंडी स्त्री गोरक्षी॥ इति राजनिर्घण्ट॥

सर्पदंती स्त्री नागदंती। इति राजनिर्घण्टः॥

सर्पदमनी स्त्री वंध्याकर्कोटकी। इति राजनिर्घण्टः॥

सर्पनाम्ना स्त्री सर्पकंकालीभेदः इति रत्नमाला॥

सर्पपुष्पी स्त्री नागदंती। इति राजनिर्घण्टः॥

सर्पफणजः पुं सर्पफणजातमणिः। इति शब्दरत्नावली॥

सर्पभुक् पुं मयूरः। इति हेमचंद्रः। सर्पभक्षकेपि॥

सर्पमाला स्त्री सर्पकंकालीभेदः। इति कश्चित् रत्नमाला। सर्पनाम्ना इति साधुपाठः॥

सर्पराजः पुं वासुकिः। इत्यमरः॥

सर्पलता स्त्री नागवल्ली॥ इति राजनिर्घण्टः॥

सर्पसत्रं क्ली सर्पनाशकयज्ञविशेषः। यथा। जनमेजयः स्वपितरं श्रुत्वा तक्षक भक्षितं। यथा जुहाव संक्रुद्धः सर्पान्सत्रे सह द्विजैः। सर्पसत्रे समिद्धाग्नौ दह्यमानान् महोरगान्। दृष्ट्वेंद्र भयसंविग्न स्तक्षकः शरणं ययौ। अपश्यं स्तक्षकं तत्र राज्ञा पारीक्षितो द्विजान्।

उवाच तक्षकः कस्मान्नदह्येतोरगाधमः॥ तं गोपायति राजेंद्र शक्रः शरणमागतं। तेन संस्तंभितः सर्प स्तस्मान्नाग्नौ पतत्यसौ। पारीक्षित इति श्रुत्वा प्राह त्विज उदारधीः। सहेंद्र स्तक्षको विप्रा नाग्नौ किमिति पात्यते। तच्छ्रुत्वा जुहुवुर्विप्राः सहेंद्रं तक्षकं मखे। तक्षकाशु पतस्वेह सहेंद्रेण मरुत्वता। इति ब्रह्मोदितैराक्षेपैः स्थानादिंद्रः प्रचालितः। बभूव संभ्रांतमतिः सविमानः सतक्षकः। तं पतंतं विमानेन सह तक्षक मंबरात्। विलोक्यांगिरसः प्राह राजानं तं बृहस्पतिः॥ नैष त्वया मनुष्येंद्र वधमर्हति सर्पराट्। अनेन पीतममृतमथवा अजरामरः। जीवितं मरणं जंतोर्गतिः स्वेनैव कर्मणा। राजंस्ततोन्यो नान्यस्य प्रदाता सुख दुःखयोः सर्प चौराग्नि वज्रादि क्षुत्तृड् व्याध्यादिभिर्नृप पंचत्व मिच्छे तेजंत भुंक्ते आरब्ध कर्मतत् तस्मात् सत्र मिदं राजन् संस्थीयेताभिचारिकं॥ सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते इत्युक्तः स तथेत्याह महर्षे र्मानयन् वचः सर्प सत्रादुपरतः पूजयामास वाक्पतिं। इति श्रीभागवते १२ स्कंधे ६ अध्यायः॥

सर्पसत्री पुं जनमेजयराजः इति शब्दरत्नावली॥

सर्पसहा स्त्री सर्पकंकालीभेदः इति रत्नमाला॥

सर्पहा पुं नकुलः। इति हेमचंद्रः॥

सर्पाक्षः पुं महिषकंदभेदः॥ इति राजनिर्घण्टः। नागकेशरः इति रत्नमाला। सर्पनामकेपि॥

सर्पांगी स्त्री सर्पकंकालीभेदः इति रत्नमाला॥ सैंहली॥ इति राजनिर्घण्टः॥

सर्पादनी स्त्री नाकुली। इति राजनिर्घण्टः॥

सर्पारातिः पुं गरुडः। इति हेमचंद्रः॥

सर्पारिः पुं नकुलः। इति राजनिर्घण्टः। गरुडश्च॥

सर्पावासं क्ली चंदनं। इति राजनिर्घण्टः॥ सर्पस्थानेच॥

सर्पाशनः पुं मयूरः। इति

हल्लायुधः । गारुडस्य ॥
सर्पाक्षं क्ली रुद्राक्षे । इतिराज
निर्घण्टः ॥
सर्पाक्षी स्त्री गंधनाकुली । इ
तिराजनिर्घण्टः । वृक्षविशेषः
सरहची इति गाण्डिनी इतिच
हिंदीभाषा । तत्पर्य्यायः । ग
एडाली २ नाडीकलापकः ३
अस्यगुणाः । कटुत्वं । तिक्तत्वं
उष्णत्वं । कृमिनाशित्वं । वृश्चि
कोन्दुरु सर्पाणां विषनाशित्वं
व्रणशोधनत्वंच । इति भावप्र
काशः ॥
सर्पिः[स] क्लीघृते । इत्यमरः ॥
सर्पिणी स्त्री सर्पभार्य्या । साँपि
नी इतिभाषा । यथा । आशी
शी सर्पदंष्ट्रा तत् स्त्री सर्पी
च सर्पिणी । इति शब्दरत्नाव
ली क्षुद्रक्षुपभेदः । तत्पर्य्या
यः । भुजगी २ भोगी ३ ॥
कुण्डली ४ पन्नगी ५ फणी
६ तस्यागुणाः । विषघ्नत्वं ऊर्ध्वव
हेनत्वंच । इति राजनिर्घण्टः
सर्पी स्त्री सर्पिणी । इति शब्द
रत्नावली ॥
सर्पी[२] त्रि गमनकर्त्ता । सृपधा
तोर्णिनि प्रत्ययेननिष्पन्नः ॥

सर्पीष्टं क्ली श्रीखंडचंदने ॥
इतिरत्नमाला ॥
सर्पेष्टं क्ली श्रीखंडचंदने ॥
इतिजटाधरः ॥
सर्व सर्पणे । इति कविकल्पद्रु
मः । स्वादिः ऊष्मवर्गीयशेषोपधः
सर्वति सिसर्विषति । इति
दुर्गादासः ॥
सर्वः पुं शिवः । इत्यमरः । विष्णुः
यथा । असतश्च सतश्चैव सर्व
स्य प्रभवाप्ययाः । सर्वस्य सर्वदा
ज्ञानात् सर्वमेनं प्रचक्षते ॥
इति विष्णुपुराणे । विष्णुसहस्र
नामस्तोत्रेच ॥
सर्वः त्रि समस्तः । इत्यमरः ॥
अस्य पर्य्यायाः । सकलशब्दे द्र
ष्टव्याः प्रयोगो यथा । सर्वर
त्नमयो मेरुः सर्वाश्चर्यमयं न
भः । सर्वतीर्थमयी गंगा सर्व
देवमयो हरिः ॥ इति वह्नि
पुराणे देवांबरीष संवादे २
अध्यायः ॥
सर्वंसहा स्त्री पृथिवी इत्यमरः
सर्वकः त्रि सकलः । सर्वशब्द
स्याटेः पूर्वमकि तस्मात् स्वार्थे
चनिष्पन्नः । इति मुग्धबोध
व्याकरणं ॥

सर्वकर्त्ता[ऊ] पुं ब्रह्मा । इति शब्द
रत्नावली
सर्वकर्मीणः त्रि सकलकर्मकर्त्ता
यथा । संग्रामे सर्वकर्मीणो बाहु
यस्योपजानुकौ । इति भट्टौ ५
सर्गः ॥
सर्वके अ सर्वत्र । सर्वशब्दात्
अकच् प्रत्ययेन निष्पन्नः । इति
सिद्धांतकौमुदी ॥
सर्वकेशी[२] पुं नटः । इति शब्द
रत्नावली ॥
सर्वगं क्ली जले । इति मेदिनी ॥
सर्वगः पुं शिवः ब्रह्मा । इति
मेदिनी । आत्मा । इति शब्दमा
ला । सर्वव्यापिनि त्रि ॥
सर्वगंधं क्ली चतुर्जातकादि ।
यथा । चतुर्जातक कक्कोल ल
वंगागुरुसिल्हकं । सर्वगंधमिदं
चाग्रेमुनिभिः परिकीर्तितं । इति
शब्दचंद्रिका । अन्यच्च । चातु
र्जातककर्पूरकक्कोलागुरु कुंकु
मं । लवंगसहितंचैव सर्वगंधं
विनिर्दिशेत् । इति भावप्र
काशः ॥
सर्वगा स्त्री प्रियंगुवृक्षः । इति
शब्दचंद्रिका ॥
सर्वग्रंथिः पुं पिप्पलीमूले । इति

राजनिर्घण्टः ॥
सर्वग्रंथिकं क्ली पिप्पलीमू
ले । इतिहेमचंद्रः ॥
सर्वचर्म्मीणः त्रि सकलचर्म्मनि
र्मितः । इति सिद्धांतकौमुदी ॥
सर्वजनीनः । सर्वजनसंबंधी ॥
इतिसिद्धांतकौमुदी ॥
सर्वजित् पुं कालचक्रस्य ए
कविंशवर्षः । इति केचित् ॥
सकलजयकर्त्तरि त्रि ॥
सर्वज्ञः पुं शिवः । बुद्धः । इत्यम
रः । सकलज्ञानविशिष्टे त्रि ॥
सर्वज्ञा स्त्री दुर्गा यथा । अतप
त्रिषु निखिलेषु रजादि त्रिगु
णामता । सर्वज्ञा सर्वदेहस्थाच्छ[त्रिलोकी]
निरुच्यते । इतिदेवीपुराणे ४५ अ
ध्यायः । सर्वतः अ चतुर्दिगभिव्या
प्तिः । तत्पर्य्यायः । समन्ततः २ प
रितः ३ विश्वक् ४ । इत्यमरः ॥
सर्वतःशुभा स्त्री प्रियंगुवृक्षः
इति शब्दचंद्रिका ॥
सर्वतेजाः पुं सकलतेजोयुता ।
इतिकेचित् । सकलशब्दश्च
सर्वतापनः पुं कामदेवः । इति
केचित् । सर्वतापके त्रि ॥
सर्वतिक्ता स्त्री काकमाची ।
इतिराजनिर्घण्टः ॥

सर्व्वतोभद्रः पुं क्ली ईश्वरगृह-
विशेषः । इत्यमरः । द्वारालिन्दा-
दिभेदभिन्नाप्ययगृहं । तल्ल-
क्षणं मत्स्ये सामान्येनय
था । स्वस्तिकं प्राङ्मुखं यत्
स्यादलिन्दानुगतं भवेत् । तत्
पार्श्वानुगतौ चान्यौ तत्पर्य्य-
न्तगतौ परः ॥ अलिन्दालि-
न्दभेदेन च चतुःशालं च यद्गृहं तद्वे-
तत् सर्व्वतोभद्रं चतुरालिन्दशो-
भितं । प्राक् पश्चिमानुगतौ
च शेषावुत्तर विस्तृतौ । य-
दालिन्दौ रुचकात्तौ नचेत्स्यादु-
त्तरामुखं । क्रमेणापचीयमा-
नेयदालिन्दद्वये गृहे । तद्वर्द्ध-
मानमित्याहु र्नैचेत् स्यादुत्तरा-
मुखं । दक्षिणानुगतालिन्द-
द्वयं यत् पश्चिमामुखं । स्वस्ति-
कीयान्नमेरोच्छ्रायं नन्द्यावर्त्तं वदं-
ति तत् ॥ उपर्य्युपरिगेहे त-
द्विच्छेदकसंज्ञकं भित्तिवच-
नेषु स्वस्तिकादीनां क्लीवत्व-
दर्शनात् स्वस्तिकादीनां पुं-
नपुंसकत्वं मतम् । एव मा-
दि प्रोक्तौ रुचक वर्द्धमानौ पुंलि-
ङ्गावपि यदुक्तं । स्वस्तिकः स-
र्व्वतोभद्रो रुचको वर्द्ध-
मानकः । नन्द्यावर्त्तादयश्चापि
द्वारालिन्दादि भेदजाः । इतिभ-
रतः ॥ लक्षणान्तरं । यथा ।
भविष्योत्तरे । मेषादिचन्द्रेन्द्रा
तस्य स्वपतेः स्तु बलक्रमात् ॥
द्वादशैव गृहान् वृते तेषां ल-
क्षण मग्रतः । सुनन्दः सर्व्वतोभ-
द्रो भद्रो नन्दीमुख स्तथा ।
विनोदश्च विलासश्च विजयो
विमलस्तथा । रङ्गः केलि र्ज्ज-
यो वीरो द्वादशैते प्रकीर्त्तिताः ।
तल्लक्षणं यथा । द्वौ राजहस्ता-
वायामे परिणाहे तथैव च ॥
इत्ययं सर्व्वतोभद्रः शुक्रस्या-
स्याधिदेवता । दानवास्तत्का-
मैव राज्यं ते चाश्रयन्ति तः ॥
चतुर्द्दशास्य द्वाराणि कुर्य्याच्चि-
त्रान्वितानि च । पीठपट्टावृत्तो-
द्देशः सर्व्वानिष्टविनाशनः ॥
अत्रस्थित्वा महीपालः सर्व्वान्
शत्रून् निकृन्तति । दीर्घे २२ प्रस्थे
२१ इति सर्व्वतोभद्रः । इतियु-
क्तिकल्पतरुः ॥
सर्व्वतोभद्रं क्ली वृषोत्सर्गव्रतप्र-
तिष्ठादौ राज्ञाधार मण्डलविशे-
षः । यथा शारदायां । चतुरस्रे
चतुःकोष्ठे कर्णसूत्रसमन्विते

चतुर्ष्वपि च कोष्ठेषु कोणसूत्र-
चतुष्टयं । मध्ये मध्ये यथाम-
त्स्या भवेयुः पातयेत्तथा । एवं
प्रजायते द्वे द्वे मंत्री यास्यान्तरा-
यते । पातयेत्तेषु मत्स्येषु समं
सूत्रचतुष्टयं । एवंवत् कोणको-
ष्ठेषु कर्णसूत्राणि पातयेत् ।
तद्वत् भूतेषु मत्स्येषु दद्यात्
सूत्रचतुष्टयं ॥ ततः कोष्ठे-
षु मत्स्याः स्युस्तेषु सूत्राणि पा-
तयेत् । यावत् शतद्वयं मंत्री
षट्पंचाशत्पदान्यपि । ताव-
न्नैनैव विधिना तत्र सूत्राणि पा-
तयेत् । षट्त्रिंशतापदे मध्ये
लिखेत् पद्मं सुलक्षणं । ब-
हिः पंक्त्या भवेत् पीठं पंक्तिद्व-
येन वीथिका । द्वारशोभो-
पशोभास्तान् शिष्टाभ्यां परि-
कल्पयेत् । शास्त्रोक्तविधिना
मंत्री ततः पद्मं समालिखेत् ।
पद्मक्षेत्रस्य संत्यज्य द्वादशां-
शं बहिः सुधीः । तन्मध्यं विभ-
जेत् वृत्तै स्त्रिभिः समविभाग-
तः । आद्यं स्यात् कर्णिकास्था-
नं केशराणां द्वितीयकं । तृ-
तीयं पद्मपत्राणां शुक्रांशेन
दलाग्रकं । वासहलान्तरालस्य
मानेन विधिना सुधीः । निधाय
केशराग्रेषु परितोऽर्द्धनिशाक-
रान् ॥ लिखित्वा सन्धिसंस्थानि
तत्र सूत्राणि पातयेत् । दलाग्रा-
णां च यन्मानं तन्मानाद्दूरमालि-
खेत् । तदन्तरालं तन्मध्य सूत्र-
शोभयतः सुधीः । आलिखेव
द्वाग्रहस्तेन दलाग्राणि समंततः
दलमूलेषु युग्माः केशराणि
प्रकल्पयेत् । एतत्साधारणं प्रो-
क्तं पंकजं तन्त्रवेदिभिः । पदानि
त्रीणि पादार्थं पीठकोणेषु मा-
र्जयेत् । अवशिष्टैः पदै र्विद्वा-
न् पीठगात्राणि कारयेत् ॥
पदानि वीथि संस्थानि मार्ज-
येत् पंक्तिभेदतः । दिक्षु द्वा-
राणि रचयेत् द्विचतुः कोष्ठके-
स्तथा ॥ पदे त्रिभि र्बहिर्येकेन
शोभाः स्यु र्द्वारपार्श्वयोः । उ-
पशोभाः स्यु रेकेन त्रिभिः को-
ष्ठैरनन्तरं । अवशिष्टैः पदैः ष-
ड्भिः कोणानां स्याच्चतुष्टयं
रंजयेत् पंचभि र्वर्णै र्मंडलं त-
न्मनोहरं । पीतं हरिद्राचूर्णं
स्यात् सितं तंडुलसम्भवं । कु-
सुम्भचूर्णं मरुणं कृष्णं दग्धपु-
लाकजं । बिल्वादिपत्रजं श्या



मं रक्तं वर्णपंचकं । अंगुला
सेय विस्ताराः सीमारेखाः सि
ताः शुभाः । कर्णिकां पीतव
र्णेन केशरानारुणेनच । शु
क्लवर्णानि पद्मानि तत्सन्धीन्
धूम्रमेलेनच । रजसा रंजयेन्म
ध्ये यद्वा पीतैवकर्णिका । के
शराः पीतरक्ताः स्युः रक्तानि
दलान्यपि । सन्धयः कृष्णवर्णाः
स्युः सितेनाप्यसितेनवा । रंज
येत् पीठगात्राणि पादाः स्युर
रुणप्रभाः । गात्राणि तस्य शु
क्लानि वीथीषु चतसृष्वपि आ
लिखेत् कल्पलतिकादलपुष्प
फलान्विताः । वर्णैर्नानाविधै
श्चित्रैः सर्वदृष्टिमनोहराः । द्वा
राणि श्वेतवर्णानि शोभारक्ताः
समीरिताः उपशोभाः पीतव
र्णाः कोणान्यसितभानिच ति
स्रो रेखा बहिः कार्याः सित र
क्तासिताः क्रमात् । मंडलं सर्व
तोभद्रमेतत् साधारणं स्मृतं ।
प्रकारान्तरं यथा । चतुरस्राष्ट
वे भित्वा दिक्ष्वेषा द्वादशधाष्ट
धीः ॥ पातयेत्तत्र सूत्राणि को
ष्ठानां जायते शतं ॥ चतुः
षष्ट्या त्रिंशदाढ्यं पश्चात् षट्
त्रिंशताम्बुजं कोष्ठैः प्रकल्पयेत्
पीठं पंक्त्यानैवात्र वीथिका ॥
द्वारशोभे यथापूर्वमुपशोभा
नकल्पते । अवशिष्टैः पदैः कु
र्यात् षड्भिः कोणानि तत्रवि
त् ॥ विदध्यात् पूर्ववत् शे
षे पदे वा मंडले स्मृते । इति
तंत्रसारे १ परिच्छेदः ॥

सर्वतोभद्रमंडलस्वरूपं यथा ॥

नराणां शुभाशुभज्ञानार्थचक्र
विशेषः । यथा । अथातः संप्रव
क्ष्यामि चक्रं त्रैलोक्यदीपनं ।
विख्यातं सर्वतोभद्रं सद्यः प्रत्यय
कारकं । ऊर्द्धगा दश विन्यस्य
तिर्यग्रेखास्तथा दश । एकाशी
ति पदं चक्रं जायते नात्र संशयः
अकारादि स्वराः कोष्ठेष्वीशादौ
विदिशि क्रमात् ॥ प्रद
क्षिणक्रमाज्ज्ञेया ज्योतिःशास्त्र
विशारदैः । कृत्तिकादीनि धि
ष्ण्यानि सर्वाशादि लिखेत्ततः
सप्त सप्त क्रमेणैव ग्रहा विंश
तिसंख्यया । अ व क ह डः पूर्व
स्यां म ट प र ताः हविति दक्षिण
स्यां न य भ ज खाः वारुण्यां ग
श द च लाश्चोत्तरस्यामः । यत्र स्यु
र्ये वषाधास्तु पूर्वादि क्रमतो

तुर्यैः। राश्यो द्वादश स्थाप्या
मेषांता दक्षमार्गतः। कोष्ठेषु
कोष्ठकेष्वेवं नंदादितिथिपंच
कं। वाराणां सप्तकं लेख्यंभौ
माद्यं तत्तिथिक्रमात्। इत्येवः
सर्वतोभद्रप्रकारः कथितोम
या। यस्मिन्नृक्षे स्थितः खेट
स्ततो वेधत्रयं भवेत्। ग्रहदृ
ष्टिवशेनात्र वामदक्षिण संमु
खे। भुक्तं भोग्यं तथाक्रांतं वि
द्धं क्रूरग्रहेण भं। शुभाशुभे
षु कार्येषु वर्जनीयं प्रयत्न
तः। वक्रे दक्षिणा दृष्टि र्वामा
दृष्टिश्च शीघ्रगे। संमुखी म
ध्यचारेच ज्ञेया भौमादिपंचके
सूर्यशुक्राः ग्रहाः शीघ्रास्तथा
चार्के द्वितीयगे। समास्तृती
यगे ज्ञेया मंदा भानौ चतुर्थ
गे। वक्राःस्युः पंचषष्ठेर्के त्वति
वक्रा नगाष्टगे। नवमे दशमे
भानौ जायते सहजा गतिः। द्वा
दशैकादशे सूर्ये लभंते शीघ्र
तां पुनः। रविस्थित्यपरा कवि
प्रावधैः संख्यात्मकल्पते। ने
तु तस्पंतस्यशीत द्वितीया
दिनिरूपणं। राहुकेतू सदा
वक्रौ शीघ्रौ चंद्रभास्करौ।

रौ। गते वेकस्वभावत्वादेषां द्व
द्वित्रये सदा। क्रूरा वक्रा महा
क्रूराः सौम्या वक्रा महाशुभाः
स्युः सहजस्वभावस्थाः सौम्या
क्रूराश्च शीघ्रगाः। अ उ ऋ
ब ण ठा श्चैव प फ षा ष्ठ ज
ना स्तथा। एतत्त्रिके त्रिके वि
द्धे विद्धैः क प भ दैः क्रमात्।
अ उ ऋ रोहणे वेधे बणठा
श्चतस्रो ग्रहे। प फ षाः पूर्वाषा
ढायां चक न भा द्र उत्तरे॥ र
वो शसौ खषौ चैव जन्योणा
नौ परस्परं एकेनापि हतयत्नेये
शुभाशुभ ग्रहस्य वै। स्वराणां
दि स्वरद्वंद्वे त्वेकवेधात् ह्वयो
र्द्वयः। युग्मवर्णात्मके वेधे
अनुस्वारविसर्गयोः अकारादि
युग्मवर्णात्मक वेधवदनुस्वार
विसर्गयोः वेकवेधाद्भवयवेध इ
त्यर्थः। कोणस्थ मरुस्थो मध्ये
अंत्यादि पादगो ग्रहे। अकारादि
चतुष्केषु वेधः स्यात्तिथौ तथा
एकादि क्रूरवेधेन फलं प्रसंप्र
जायते। उद्वेगश्च भयं हानिर्व्या
धिर्मृत्युः क्रमेणतु। सप्तते भ्रमा
न्तरे हानिः स्वदेशादपि भंग
तिथौ। रागो विद्धे॥

महाविघ्नः पंचविद्धो नजीवति
एकवेधेभयं युद्धे युग्मवेधे प
राजयः। त्रिवेधेन भवेद्भंगोमृ
त्यु र्वेधचतुष्टये। दृष्टित्रये उदा
हरणमाह भरण्यकारवृषभे
नंदा भद्रा तलांच भं। विशा
खा हरिभं विध्येद्ग्रहस्याग्रे
य संस्थितः। उदाहरणांतर
माह वे गुरुम सोमस्वरकन्या
रेफं स्वाती शुकारके। प्र
थिनी रोहिणी स्याः अभिजिद्भ
वं परेष्वपि। यथा दृष्टफ
लाः क्रूरा स्तथा सौम्याः शुभ
प्रदाः। क्रूरयुक्तः पुनः सौम्योऽह
यः क्रूरफलप्रदः। अर्कवेधे
मनस्तापो द्रव्यहानिश्च भूसुते
रोगपीडाकरः सौरी राहुकेतू
रविघ्नदौ। चंद्रे मिश्रफलं
पुंसां रतिलाभश्च भार्गवे। बु
धवेधे भवेत् प्रज्ञा जीवः स
र्वशुभप्रदः। स्वदेशस्यबले
ष्णां पादोनं मिश्रभे ग्रहे।
अर्द्धं समगृहे प्रोक्तं पादं श
त्रुगृहे स्थिते। इदंच सौम्या
क्रूराणां बले स्थानवशात्तः
समं। एतदेव फलंविद्धि सौ
म्यैः क्रूरे विपर्ययात्। स्या

नवेधसमायोगात् यत्संख्य
जायतेबले। तत्सांख्येवेध
वशात् फलं ज्ञेयं शुभाशुभं
दृष्टिहीने पुनर्वेधे नस्यात्किं
चित् शुभाशुभं। ग्रहाः सौम्या
स्तथा क्रूरा वक्राः शीघ्राश्च
नीचगाः। स्थानेच वेधमित्र
वे वलं ज्ञात्वा फलं वदेत्। व
क्रग्रहे फलं द्विघ्नं त्रिगुणं सौ
म्यसंस्थिते। स्वभावजं फलं
शीघ्रे नीचस्थाः हफला ग्रहाः
तिथिराशिपंचानन्तरं विद्धं क्रूर
ग्रहेण यत्। सर्वेषु शुभकार्ये
षु वर्जयेत्तत् प्रयत्नतः। नेत्र
दृति विवाहेच यात्रायांनवि
शेते। रोगान्न मुच्यते रोगी वे
धवेलाकृतोद्यमः। रोगकाले
भवेद्वेधः क्रूरखेचरसंभवः॥
वक्रगत्या भवेन्मृत्युः शीघ्रे
जाड्यरुजान्वितः। वेधस्था
ने रोग भंगो दुर्गे खंडिः अ
जायते। कविप्रवेशने तत्र्योग
पात्रात्मश्च तत्र वै। कविश्चो
रयोश्च। यत्र सर्वादिकामायां
वृषराशिपादिगो ग्रहिः। सा
हिताःस्तसिता ज्ञेया शेषाःसि
ताः सरोहिताः। ईशानस्थाः

स्वराःप्राच्यां ज्ञेया याम्यायथा ग्निगाः। नैर्ऋतस्याश्च वारुण्यां वायव्यां सौम्यगा मताः। तद्वद्धानि स्वरा वर्णा राश्याय स्थियोदिशः ते सर्वेऽस्तमिताज्ञेया यत्र भानु स्त्रिमासिकः॥ तत्रनेऽस्ते हन्त्या वर्णे हानिःशोकः स्वरेऽस्तगे। राश्यौ विघ्नस्तिथ्यौ भीतिःपंचास्ते मरणं भवेत्। यात्रा युद्धे विवादश्च द्धुभे प्रासादहर्म्ययोः। नक्षत्रेऽथ शुभे चास्तदस्ताशमिसुते नेऽः। प्रस्ताप्राप्यां स्थिते यस्य नाम्नः प्रथम मक्षरे॥ सप्रातैः सर्वकार्येषु ज्ञेयो देवहतो नरः। क्रूरो क्रोऽहतथा हेद्व चान्तरेणमहावले। वर्ज्याश्चास्तगतायाथा यदीक्षेद्धितयेऽस्तो। तत्तद्वेःस्युदितेपुष्टिर्वैरी लाभः सुखे सुखं॥ साप्रोजय स्तिथ्या तेजः पद्माभिः पंचकोदये। प्रश्नकालेभवेद्धिद्धं यत्लग्ने क्रूरविचरेः। तदुष्ट ध्वाभवेत सौम्य स्त्रिंश्रोर्मिश्रफलं भवेत्। ग्रहाविद्धत यत्लग्ने फलं लग्न स्वभावतः ज्ञातव्यं प्रीतिते केंद्रेभाविते यच्चराद्रिके। शीर्षोदये सौम्याविलग्नवर्गे लग्नेपिवा सौम्ययुते शुभं स्यात्। अतोऽस्मयास्ते तु तदन्ययास्तेमिश्र विमिश्रे रथिके बलाब्ध्ये:॥ केंद्रोपगा नवमपंचमगाश्च सौम्याः केंद्राष्टवर्ज्ये मस्तुभास्याय षष्ट संस्थाः। सर्वार्थसाधनकराः परिदृष्टुतो सुदेषि विपर्ययगतैस्तु विपर्ययः स्यात्। लग्नाधिनाथो यदि केंद्रगः स्यात् तन्मित्र मेतस्य च केंद्रगोवा। व्ययाष्ट केंद्रान्तपराय पापा ग्रस्तत्रयाता यदितच्छुभं स्यात्। आद्यो लग्नाधिपः कार्ये लग्ने कार्याधिपोयदि द्वितीयो लग्नपो लग्नेकार्यः कार्याधिपो यदि। लग्नपः कार्यप श्चापि लग्ने यदि तृतीयकः। चतुर्थः कार्यपो स्यातां यदि लग्नप कार्यपो। कार्यासिद्धिस्तदा ज्ञेयामित्रोवेक्ष्यकंमते। एवं राशिवशाज्ज्ञेयं फलं तद्वच्चतुष्टयं॥ पूर्णनाडीस्थितो दूतो यत्पृच्छति शुभाशुभं। तत्र सर्वं सिद्धिमाप्नोति शून्ये शून्यं समीरणे॥

आदौ शून्यगतः पृच्छेत् पश्चात् पूर्णाविशेषयदि तदासर्वार्थसिद्धिःस्यात् वामे वामे तसंशयः। श्वासप्रवेशकाले चेद्दूतोजल्पति वाञ्छितं। तस्यार्थः सिद्धि माप्नोति निर्गमे नास्ति संदेह। ऊर्द्धवामाग्रतो दूतो ज्ञेयो वामपथिस्थितः॥ पृष्ठे दक्षे तथाधस्तात्दक्षवाहोपतोमतः। यात्रा दान विवाहेषु वस्त्रालंकारभूषणे। शुभैकर्माणि संधौच प्रवेशोवामगः शुभः॥ कलह श्रुतयुद्धेषुस्नानभोजनमैथुने। व्यवहारे भये भंगे दक्षनाडी प्रशस्यते॥ क्रूरे ऋभयतो विद्धा यस्यात्तत्र तिथिस्वराः राशि र्धिष्ण्यंच पंचापि तस्य मृत्यु र्न संशयः मंडलेनगरं ग्रामो दुर्गं देवालये पुरे क्रूरे ऋभयतोवेधेविनश्यंति न संशयः॥ कृत्तिकायां तथापुष्ये रेवत्यां चपुनर्वसौ। विद्धेसति क्रमाद्धेयौ वर्णोपुत्राश्रणादिषु। तौल्यभांडे रसो धान्यं गजाश्वादि चतुष्पदाः। सर्वेसहाश्चेतोयाति यद्भवत्क्रूरखेचरस्थिते क्रूरवेधसमायोगो यस्यापग्रहसंभवः तस्य मृत्युर्न संदेहो रोगाद्धाथ रणादपि॥ सूर्यभात् पंचमे धिष्ण्ये ज्ञेयं विद्युन्मुखाभिधं। शूलंचाष्टमकं प्रोक्तं सन्निपाते चतुर्दशं॥ केतु रष्टादशं प्रोक्तं मुल्कास्यादेकविंशति। द्वाविंशतितमे कंपं त्रयोविंशंच वज्रकं निर्घातंच चतुर्विंश मुक्ताश्चष्टावुपग्रहाः। प्रस्थाने विघ्नदाःप्रोक्ताःसर्वकार्येषु सर्वदा इति सर्वतोभद्रचक्रं। इति ज्योतिषतत्त्वं॥

सर्वतोभद्रचक्रस्यरूपं यथा।



पूर्व

अ	३	४	५	६	७	८	९	आ
२	उ	अ	व	क	ह	ड	ऊ	१०
१	लृ	ऋ	वृषः	मिथुनः	कर्कटः	ॠ	म	११
२७	च	मेष	ओ	नन्दा	औ	सिंहः	ट	१२
२६	द	मीन	रिक्ता	पूर्णा	भद्रा	कन्या	प	१३
२५	श	कुंभः	अः	जया	अं	तुला	र	१४
२४	ग	ए	मकरः	धनुः	वृश्चिकः	ऐ	त	१५
२३	ॡ	ख	ज	भ	य	न	ॡ	१६
ई	२२	०	२१	२०	१९	१८	१७	इ

उत्तर — दक्षिण

पश्चिम

सर्वतोभद्रः पुं निंबवृक्षः। इत्य वली। वेश्मः। इति शब्दचंद्रि
मरुः। व्यूहविशेषः। इति तट्टीका। चित्रकाव्यविशेषः। इति
का। विष्णुरथः। इति शब्दरत्ना मेदिनी। तदुदाहरणं। यथा।

स	का	र	ना	ना	र	का	स
का	य	सा	द	द	सा	य	का
र	सा	ह	वा	वा	ह	सा	र
ना	द	वा	द	द	वा	द	ना

इति सर्वतोभद्रचित्रकाव्यं। इति माघे १९ सर्गः। अस्यार्थः॥

सकारेति। पुनः कीदृशी का
यो वधे निश्चयेच बले यत्नेर
तावपीति विग्रः। सकाराः सय
त्नाः सेनासाहाः नाना नाना.
विधाश्च ये आराः अरीणांस.
महाः भिन्नादिभ्योऽरणा। तेषां
कासा रातिभेदाः काया विग्र
हाश्च येषां। सादे ददन्तीति सा
ददाः नाशकारक सायका.
यस्या सा तथोक्ता। रसेन रागे
णहवो यस्याः सा रसाहवार
णारातिरणीत्यर्थः। वाहसाराणां
वाहश्रेष्ठानां ये नादा हेषा
ह्रेषा तेषां वादे कलहे द
दातीति वाददानि। तैः सहक
लहायमानानि वादनानि वा
द्यानि यस्यां सा वाहसार नाद
वादद वादन तथ्यवाद चो.
षेमर्थ्यः। अतएव तेषां तुल्य
तोक्तेः रतिशायोक्तिः। सर्वतो
भ्रमणात् सर्वतोभद्राख्यश्चि
त्रबंधः। अतएव दण्डी। त
दिदं सर्वतोभद्रं भ्रमणं यदि
सर्वत इति उद्धारस्तु। चतुः
कोष्ठे चतुरंगबंधे पंक्तिचतु
ष्टये पादचतुष्कं विलिख्यानंत
रं पंक्तिचतुष्टयं अधः क्रमेण
पाद चतुष्टय लेखने प्रथमा
स्र चतुष्टय प्रथमपादः सर्व
तो वाच्यते। एवं द्वितीयादिषु
द्वितीय इत्यादि। इति तट्टीका
यां मल्लिनाथः॥

सर्वतोभद्रा स्त्री गंभारी। नट
योषित्। इति मेदिनी॥
सर्वतोमुखं क्लीं जलं। उत्पलः
आकाशे। इति मेदिनी॥

सर्वतोमुखः पुं शिवः । ब्रह्मा
आत्मा । इति मेदिनी । ब्राह्मणः
इति शब्दरत्नावली । स्वर्गः ।
इति शब्दमाला । अग्निः । यथा ।
सर्वतःपाणिपादांतःसर्वतो-
ऽक्षिशिरोमुखः । विश्वरूपो-
महानग्निः प्रणीतः सर्वकर्मसु
इति तिथ्यादितत्त्वधृताग्निप्रण
यनमंत्रः ॥
सर्वत्र व्य सर्वदिग्देशकाले । इ
ति शब्दरत्नावली ॥
सर्वत्रगः पुं वायुः । सर्वत्रगामि
नि त्रि । इति वक्ष्यमाणशब्दद
र्शनात् ॥
सर्वत्रगामी पुं वायुः । इति श
ब्दचंद्रिका । सर्वदिग्देशकाले
गमनकर्त्तरि त्रि ॥
सर्वथा व्य प्रतिज्ञा । भृशं ॥
हेतुः । इति शब्दरत्नावली ॥
सर्वप्रकारे । इति व्याकरणं ॥
सर्वदमनः पुं भरतराजः । सत
शकुंतलापुत्रः । इति त्रिकाण्ड
शेषः ॥
सर्वदर्शी पुं बुद्धः इति शब्दर
त्नावली सकलदर्शनकर्त्तरि
त्रि । सर्वदा व्य सर्वस्मिन्काले
इत्यमरः ॥
सर्वदुःखक्षयः पुं मोक्षः । इति
हेमचंद्रः । सकलपीडानाशश्च
सर्वदेवमुखः पुं अग्निः । इति
जटाधरः ॥
सर्वदृक् त्रि सर्वस्यद्रष्टृकः । स
र्वान्पश्यति इत्यर्थे क्विप्प्रत्ययेन
निष्पन्नः । इति व्याकरणं ॥
सर्वधारी स्त्री कालचक्रस्य द्वा
विंशवर्षः । इति केचित् ॥
सर्वधुरावहः } पुं सकलभारवा
सर्वधुरीणः } हकः वृषभलांगला
दीनां भारवाहकवृषादिः । इ
त्यमरः ॥
सर्वदमः पुं भरतराजः । सत
शकुंतलापुत्रः । इति हेमचंद्रः ॥
सर्वपा स्त्री बलिराजपत्नी । इति
केचित् ॥ सर्वरक्षणपालनकर्त्त
रि त्रि ॥
सर्वपर्णीत्वं स्त्री संभारः । इति
त्रिकाण्डशेषः ।
सर्वप्रियः त्रि सकलजनवल्लभः
सर्वेषां जनानां सर्वस्य वा प्रिय
प्रियः इति षष्ठीतत्पुरुषसमासे
न निष्पन्नः ॥
सर्वभक्षा स्त्री छागी । इति हेम
चंद्रः । सर्वभक्षणकर्त्तरि त्रि ॥
सर्वमंगला स्त्री दुर्गा । इत्यमरः

अस्या व्युत्पत्तिर्यथा । मंगले
मोक्षवचने च शब्दो दातृवाच
कः । सर्वान्मोक्षान् या ददाति
सा एव सर्वमंगला । हर्षे संप
दि कल्याणे मंगले परिकीर्ति
तं । तान्ददाति च या देवी सा ए
व सर्वमंगला । इति ब्रह्मवैव
र्त्ते प्रकृतिखंडे ५४ अध्यायः ।
अपि च । सर्वमंगलशब्दश्च से
एणाश्वर्यवाचकः । आका
रो दातृवचनः तस्मात् सा सर्व
मंगला । इति ब्रह्मवैवर्त्ते श्री
कृष्णजन्मखंडे सर्वमंगलास्तो
त्रे २२ अध्यायः । अन्यच्च । सर्वाणि
हृदयस्थानि मंगलानि शुभानि
च ददाति चेप्सितान् लोके तेन
सा सर्वमंगला । इति देवीपुरा
णे ४५ अध्यायः ॥
सर्वमयः त्रि सर्वात्मकः सर्वश
ब्दात् मयट्प्रत्ययेन निष्पन्नः ॥
सर्वमूल्यं स्त्री कपर्दके । इति
त्रिकाण्डशेषः ॥
सर्वमूषकः पुं कालः । इति हेम
चंद्रः ॥
सर्वरसः पुं धूनकः । इत्यमरः ।
वाद्यभाण्डे तत्तु वीणाभेदः ॥
इति मेदिनी ॥ लवणे । पंडि
तः । इति शब्दरत्नावली ॥
लवणरसः । इति हेमचंद्रः ॥
सर्वरसोत्तमः पुं लवणरसः
इति हेमचंद्रः ॥
सर्वरात्रः पुं समस्तरजनी । इ
ति सिद्धांतकौमुदी ॥
सर्वरी स्त्री शर्वरी । रात्रिः । इ
ति वक्ष्यमाणदर्शनात् ॥
सर्वरीकरः पुं चंद्रः । इति धर
णीति केचित् ॥
सर्वर्तुपरिवर्तः पुं वत्सरः । इ
ति जटाधरः ॥
सर्वर्तुफले स्त्री सकलर्तुजा
तफले । यथा । सर्वर्तुकुसुमा
कीर्णं सर्वर्तुफलशोभितं । स्नि
रवच्छायद्रुमाकीर्णं संतानकव
नावृतं । इति भविष्यपुराणे पि
वरात्रिव्रतकथा ॥
सर्वलक्षणकवचं स्त्री कवचवि
शेषः । यथा । शिवाः स्वस्त्ययने
चक्रुस्तेन ब्राह्मणपुंगवाः । ह
स्ते दत्त्वा शिशोर्गात्रे यथाऽकव
चे द्विजः । वदामि तत्ते विप्रेंद्र क
वचं सर्वलक्षणं । यद्दत्तं मायया
पूर्वं ब्रह्मणे नाभिपंकजे । निद्रि
ते जगतां नाथे जले च जलशा
यिनि । भीताय स्तुतिकर्त्रे च



मधुकैटभयोर्भयात् ॥
योगनिद्रोवाच । हरिभक्ते कृ-
ष्णभये भये किं ते मयि स्थिते
स्थितायां मयि च ब्रह्मन्नुवाचेति
जगत्पते ॥ श्रीहरिः पातु
ते वक्त्रं मस्तकं मधुसूदनः ॥
श्रीकृष्णश्चक्षुषी पातु नासि-
कां राधिकापतिः । कर्णयुग्मञ्च
कण्ठञ्च कपालं पातु माधवः ।
कपोले पातु गोविन्दः केशां-
श्च केशवः स्वयं । अधरौष्ठं हृ-
षीकेशो दन्तपङ्क्तिं गदाग्रजः ।
रासेश्वरश्च रसनां तालुकं वा-
मनो विभुः । वक्षः पातु मुकु-
न्दस्ते जठरं पातु दैत्यहा । ज-
नार्द्दनः पातु नाभिं पातु विष्णु-
श्च ते तनुं । नितम्बयुग्मं गुह्यं
च पातु ते पुरुषोत्तमः । जानु-
युग्मं जानकीशः पातु ते सर्व्व-
दा विभुः । हस्तयुग्मं नृसिंहश्च
पातु सर्व्वत्र संकटे । पादयुग्मं
वराहश्च पातु ते कमलोद्भव ।
ऊर्द्ध्वं नारायणः पातु अधस्तात्
कमलापतिः । पातु पूर्व्वञ्च गोपा-
लः पातु वह्नौ दशास्यहा ॥ वन-
माली पातु याम्ये वैकुण्ठः पा-
तु नैरृते । वारुणे वासुदेव-
श्च पातु जलजासन । पातु ते स-
तत मज्जो वायव्यां विष्टरश्रवाः ।
उत्तरे च सदा पातु सोऽनन्तोऽन-
न्तकः स्वयं । ऐशान्यामीश्वरः
पातु सर्व्वत्र पातु शत्रुजित् । ज-
ले स्थले चान्तरीक्षे निद्रायां
पातु माधवः ॥ इत्येवं कथितं
ब्रह्मन् कवचं परमाद्भुतं ॥
कृष्णेन कृपया दत्तं स्मृतेनैव
पुरा मया ॥ शुम्भेन सह सं-
ग्रामे निर्लक्षे घोरदारुणे ।
गगणस्थिता यः सद्यः प्राप्तिमा-
त्रेण शाक्तिनः । कवचस्य प्रसा-
देन धरणीपतितो मृतः । पूर्व्वं
वर्षशते खे च कृत्वा युद्धं भ-
यावहं । मृते शुम्भे च गोविन्दः कृ-
पालुर्गगणे स्थितः । माल्यं च
कवचं दत्वा गोलोकं स जगा-
म ह । कल्पान्तरस्य वृत्तान्तं कृ-
पया कथितं मुने । अभ्यन्त-
रं भयं नास्ति कवचस्य प्रभाव-
तः । कोटिशः कोटिशो नष्टा म-
या दृष्टाश्च वेधसः । अहञ्च हरि-
णा सार्द्धं कल्पे कल्पे स्थिरा स-
दा । इत्युक्त्वा कवचं दत्वा सान्तर्द्धा-
नञ्चकार ह । निःशङ्को नाभिक-
मले तस्थौ स कमलोद्भवः ॥

स्वर्णगुटिकायान्त कृत्वेदं क-
वचं परं । कण्ठे वा दक्षिणे बाहौ
बध्नीयात् यः सुधीः सदा । विषा-
ग्नि जलशत्रुभ्यो भयं तस्य न वि-
द्यते । जले स्थले चान्तरीक्षे नि-
द्रायां रक्षतीश्वरः । संग्रामे व-
ज्रपाते च विपत्तौ प्राणसंकटे
कवचस्मरणादेव सद्यो निःश-
ङ्को व्रजेत् ॥ बद्ध्वेदं कवचं
कण्ठे शङ्करस्त्रिपुरं पुरा ॥
जघान लीलामात्रेण दुरन्त-
मसुरेश्वरं ॥ बद्ध्वेदं कवचं
काली रक्तवीजञ्च खादसा ॥
सहस्रशीर्षा धत्तेदं विश्वं यत्ने
तिलं यथा ॥ अवाप सनत्कु-
मारश्च धर्म्मः साक्षी च कर्म्म-
णां । कवचस्य प्रसादेन सर्व्वत्र
जयी नावयं । स्वयम्भूर्दण्डिशोः
कण्ठे जगाम कवचं द्विजः ॥
आत्मनः कवचं कण्ठे दधार च
हरिः स्वयं । प्रभावं कथितं
सर्व्वं कवचस्य हरेस्तथा । मुने
तस्याच्युतस्यैव प्रभावमतुलं
मुने । इति ब्रह्मवैवर्त्ते श्रीकृ-
ष्णजन्मखण्डे [illegible] अध्यायः ॥
सर्व्वला स्त्री तोमरः । इत्यमरः ॥
सर्व्वलिङ्गी पुं पाषण्डः । इत्यमरः ॥
हे वेदविरुद्धाचारेषु सर्व्ववर्णा-
चिह्नधारिषु बौद्धक्षपणका-
दिषु । पापं सन्वति ददति पा-
षण्डः मनीषादित्वात् साधुत्वं म-
न्त्यमथोऽयं । सर्व्वेषां वर्णाश्रमा-
णां किञ्चित् किञ्चित् लिङ्गमस्त्ये-
षामिति इनि । इति भरतः ॥
सकलचिह्नधारिणि त्रि ॥
सर्व्वली स्त्री तोमरः । इति शब्द-
रत्नावली ॥
सर्व्वलोहः पुं लोहमयवाणः ।
यथा । अस्त्वेष नः । सर्व्वलोहो ना-
राच पक्षणश्च सः । इति हेम-
चन्द्रः ॥ सकलधातुश्च ॥
सर्व्ववर्णिका स्त्री गम्भारीवृक्षः
इति जटाधरः ॥
सर्व्ववल्लभा स्त्री असतीनारी
इति धरणीति केचित् ॥ सक-
लप्रियेत्रि ॥
सर्व्ववित् पुं परमेश्वरः । यथा
यः सर्व्वज्ञः सर्व्ववित् यस्य ज्ञा-
नमयं तपः । तस्मादेतद्ब्रह्म
नामरूपमन्नञ्च जायते । इति
वैद्धाधिकारे शिरोमणिः ॥
सर्व्ववेदः पुं सर्व्ववेदाध्येता ब्राह्म-
णः । इति केचित् । सर्व्वज्ञे त्रिषु
वेदवेदाः पुं सर्व्वस्वदक्षिणायोगो

येनेष्टः सः। इत्यमरः॥ सर्वं स्वं दक्षिणा यत्र स सर्वस्वदक्षिणो विश्वजिन्नामयागः स येनेष्टः संपादितः स सर्ववेदा उच्यते सर्वं स्वं वेदयति लम्भयति ऋत्विजे। इति सर्ववेदाः विद लृ लाभे ण्यन्तात् असुन् सितिप्रसू॥ इति भरतः॥

सर्ववेशी [न्] पुं नटः। इति हेमचन्द्रः। सकलवेशधारिणि त्रि॥

सर्वशान्तिकृत् पुं भल्लातः। सतश्शकुन्तलापुत्रः। इति शब्दरत्नावली। सकलशमकारके त्रि॥ सर्वसंगतः पुं षष्टिकाधान्यं। इति शब्दचन्द्रिका। सकलसंगतियुक्ते त्रि॥

सर्वसंसर्गलवणं क्ली औषरके इति राजनिर्घण्टः॥

सर्वसन्नहनार्थकः पुं चतुरङ्गसैन्यसन्नाहः। तत्पर्यायः। सर्वाभिसारः २ सर्वौघः ३ इत्यमरः॥ सर्वसन्नहने सर्वौघः अभियोगमात्रे। सर्वैः रथैरभिसार्यते अभिमुखं गम्यते अनेन सर्वाभिसारः करणे घञ्। सर्वेषाम् ओघो वृन्दं यत्र सर्वौघः॥ इति भरतः॥

सर्वसन्नाहः पुं सर्वात्मा। इति हलायुधः॥ सर्वसन्नहने च॥

सर्वसहः पुं गुग्गुलुः। इति रत्नमाला। सकलसहिष्णौ त्रि।

सर्वसिद्धिः पुं श्रीफलः। इति शब्दचन्द्रिका। सकलसाधने च॥

सर्वस्वं क्ली समुदायधने। यथा। गुरवे दक्षिणां दद्यात्प्रत्यक्षाय शिवात्मने। सर्वस्वं वा तदर्धं वा तदर्धं वा तदाज्ञया। इति तन्त्रसारः॥

सर्वस्वी [न्] पुं वर्णसङ्करविशेषः। सतुरोपकन्यायां नापिताज्जातः। इति ब्रह्मवैवर्ते ब्रह्मखण्डे १० अध्यायः॥

सर्वहितं क्ली मरिचं। इति राजनिर्घण्टः। सकलहितकारके त्रि॥ सर्वद्वारः पुं द्वारभेदः। सावान्। इति भाषा। इति केचित्। तत्पर्यायः। वज्रद्वारः २ सम्हद्वारकः ३ स्तोमद्वारः ४ महोद्वारः ५ मल्लारिः ६ द्वारमेलकः ७ अक्षयगुणः। इति हारावली। चतुष्पत्त्वे। वल्लिशापतत्त्वे उदावर्ते कृमिनाशिते। मलवस्त्रविशोधनत्वे च। इति राजनिर्घण्टः॥

सर्वाङ्गं क्ली सकलावयवः। यथा। पादौ रक्षतु मे केतुः सर्वाङ्गे मे नवग्रहाः। आपादमस्तके चैव सर्वविघ्नविनाशकाः। इति उत्पलीतन्त्रे नवग्रहकवचं॥ सर्वाङ्गसुन्दररसः पुं औषधविशेषः। यथा। रसगन्धकतुल्यांशौ द्वौ भागौ टङ्गणस्य च। मौक्तिकं विद्रुमं शङ्खं भवनीय समांशतः। हेमभस्माद्द्विभागं च सर्वं खल्वे निधापयेत्। निर्गुण्डीरसयोगेन पिष्टिकां कारयेद्भिषक्। पश्चात् गजपुटं दद्यात् शीतलं च समुद्धरेत्॥ हेमभस्मसमं तीक्ष्णं तीक्ष्णात् द्विदरदो मतः। पक्वीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत्। ततः एकां प्रकुर्वीत भक्तये दिवसे शुभे। सर्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः॥ वातपित्तज्वरे घोरे सन्निपाते सुदारुणे। अर्शःसु ग्रहणीरोगे मेहे गुल्मे भगन्दरे। निहन्ति वातजान् रोगान् श्लेष्मिकांश्च विशेषतः। पिप्पली मधुसंयुक्तं छेनयुक्तं मथापि वा। भक्षयेत् पर्णखण्डेन सितया वा ईकेण वा॥ गुडूचीसत्त्वसहिते प्रमेहे च विशेषतः॥ रसरत्नाकरप्रोक्तः सिद्धयोगो रसोत्तमः। राजिकाहिङ्गुतैलाम्ललवणाद्यं विवर्जयेत्॥ सर्वाङ्गसुन्दररसः॥ इति भैषज्यरत्नावली॥

सर्वाङ्गीणः त्रि सर्वावयवसंबन्धयुक्तः। सर्वावयवव्यापकः। यथा। वसानस्तवकनिभे सर्वाङ्गीणे तरुत्वचौ। काञ्चीवः स्वाङ्गिकः शोणी रक्तान् विप्राननुरचमान्। इति भट्टि ५ सर्गः॥

सर्वाणी स्त्री दुर्गा। इत्यमरः॥ अस्या व्युत्पत्तिर्यथा। सर्वान्तेषु प्रापयति जन्ममृत्युजरादिके। चराचरांश्च विश्वस्थान् सर्वाणी तेन कीर्तिता। इति ब्रह्मवैवर्ते प्रकृतिखण्डे ५४ अध्यायः॥

सर्वानुकारिणी स्त्री शालपर्णी। इति राजनिर्घण्टः॥

सर्वानुभूतिः स्त्री श्वेतत्रिवृता। इत्यमरः। चतुर्विंशतिभूतार्हदन्तर्गतार्हद्भेदः। चतुर्विंशतिभाव्यर्हदन्तर्गतार्हद्भेदश्च। इति हेमचन्द्रः॥

सर्वान्नभक्षकः त्रि सकलान्नभो
जी। तत्पर्य्यायः। उदरपिशाचः २
सर्वान्नीनः ३ इतिहेमचन्द्रः ॥
सर्वान्नभोजी त्रि सर्वेषामन्नभ
क्षकः। इत्यमरः। सर्वप्रकारान्न
भक्षकः। इति केचित् ॥ स
र्वेषां चतुर्णां वर्णानामन्नं
भुंक्ते सर्वान्नभोजी। इति भ
रतः ॥
सर्वान्नीनः त्रि सर्वान्नभोजी।
इत्यमरः ॥
सर्वाभिसंधी पुं वैतालव्रति
कः। छद्मतापसः। इति त्रिकाण्ड
शेषः। सकलाभिसंधानविशि
ष्टे त्रि। सर्वाभिसारः पुं चतुरंगसै
न्यसन्नाहः। इत्यमरः। अस्य पर्य्या
यः सर्वसन्नहनशब्दे द्रष्टव्यः ॥
सर्वार्थसाधिका स्त्री दुर्गा। य
था। सर्वमंगलमंगल्ये शिवे
सर्वार्थसाधिके। शरण्ये त्र्यम्ब
के गौरि नारायणि नमोस्तु ते। इ
ति मार्कण्डेये देवीमाहात्म्ये। स
कलप्रयोजनसाधके त्रि ॥
सर्वार्थानुसाधिनी स्त्री दुर्गा।
यथा। धर्मार्थहीनं चिंतितान्
यस्मात् सर्वलोकेषु यच्छति। त
तो देवी समाख्याता सा सर्वार्थानु
साधिनी। इति देवीपुराणे ४५
अध्यायः ॥
सर्वार्थसिद्धः पुं बुद्धः। इत्यम
रः ॥ सकलप्रयोजनसिद्धियु
क्ते त्रि ॥
सर्वावसरः पुं अर्द्धरात्रः। इति
त्रिकाण्डशेषः ॥
सर्वास्त्रा स्त्री षोडशविद्यादे
व्यन्तर्गतदेवीविशेषः। इति हेम
चन्द्रः। सकलास्त्रयुक्ता च ॥
सर्वाह्णः पुं समस्तदिनं। इति
मुग्धव्याकरणं ॥
सर्वीयः त्रि सर्वसंबंधी। सर्वश
ब्दात् खीयप्रत्ययेन निष्पन्नः ॥
इति व्याकरणं ॥
सर्वेश्वरः पुं शिवः। इति के
चित्। सार्वभौमश्च ॥
सर्वौघः पुं चतुरंगसैन्यसन्नाहः।
इत्यमरः। गुरुवेगः। इति मे
दिनी ॥
सर्वौषधिः पुं ओषधिवर्गविशे
षः। यथा। कुष्ठं मांसी हरिद्राभि
र्वचा शैलेयचंदनैः। मुरा चं
दनकर्पूरैः मुस्तैः सर्वौषधिः
स्मृतः। अत्र द्वितीयचंदनपदे
रक्तचंदनपरं ॥ इति राज
निर्घण्टः ॥

सर्वौषधिगणः पुं मुराद्योष
धिसमूहः। यथा। मुरा मांसी
वचा कुष्ठं शैलेयं रजनीद्वयं।
शटी चंपक मुस्तं च सर्वौषधि
गणः स्मृतः। इति शब्दचन्द्रिका
अन्यच्च। हरिद्रा चंदनं दार्वी मुस्त
कं देवतारुकं। धन्याकं जीरकं
मेथी धात्रीफल सुषीरकं त्रि
सुगन्धिः शटी गंधमांसी कर्पू
रकं वचा। नली मरुवकं कुष्ठं
देवदारु विडंगकं। सरलं प
द्मकाष्ठं च वालकं भद्रमुस्तकं
ग्रन्थिकं च जटामांसी पलाशः
शैलजं शमी। अर्कैर्वाप्यक्तकं
द्वे मुरा मांसी च कुंकुमं।
अपामार्गो मधुरिका विकासा
खदिरः कुशा। चान्द्रजातकस्त
तोऽग्नेः स्वर्णं यत्तद्वरः ॥
तालीसपत्रं कस्तूरी त्रिफला
पद्मकेशरं कक्कोलं धातकी
पुष्पं त्रिकटु रेणुकं यवः। नि
शाः कुन्दरु लोलकं भार्गी गो
रोचना नखः। शुंठी ग्रन्थिं च न
कुली श्रीफलं वंशलोचना। इंदी
वरं बकुलस्नानं बकुलं मालती
दलं। इंद्रबीजं कोकनदं जये
ते गजपिप्पली। श्वेतापरा·
जिताद्युक्तं सर्वौषधिगणः स्मृ
तः। इति पाद्मोत्तरखंडे ८१ अ
ध्यायः। अत्र कतिपयद्रव्याणि
अप्रसिद्धलिखितत्वान्नोपगम्या
नि सर्षपः पुं शस्यविशेषः। स
रिषा इति भाषा। तत्पर्य्यायः। तं
तुभः २ कदंबकः ३ इत्यमरः
सरिषपः ४ इति भरतः ॥
तंतुकः ५ इति रत्नमाला ॥
कटुस्नेहः ६ इति जटाधरः ॥
शर्षपः ७ इति शब्दरत्नावली।
राजक्षवकः ८ इति राजनिर्घ
ण्टः। अस्य गुणाः कफ वा
तघ्नत्वं। तीक्ष्णत्वं। उष्णत्वं। र
क्तपित्तकारित्वं। कटुत्वं। कृमि
कुष्ठनाशित्वं च सिद्धार्थस्यापि
तद्गुणाः। इति राजवल्लभः ॥
अपरंच। आसुरी राजिका रा
ज्ञी रक्तिका रक्तसर्षपः। तीक्ष्णा
गंधा मधुरिका क्षवकः क्षत
कः स्तवः। आसुरी कटुतिक्तोष्णा
वातश्लीहार्त्तिशूलनुत्। दाह
पित्तप्रदा हंति कफ गुल्म कृ
मिव्रणान् ॥ सर्षपा राजक्षव
कः कृष्णा तीक्ष्णफला राजि
का। राज्ञी साकृष्णा सर्षपाख्या
विज्ञेया राजसर्षपाख्या च। रा

जसर्षपक स्निग्धः कटूष्णो वात
शूलजित्। पित्तदाहप्रदो गुल्म
कण्डूकुष्ठव्रणापहः। कालेय
सर्षिवदः॥ सर्षपस्तन्तुभो गौरः
सिद्धार्थो भूतनाशनः॥
कटुस्नेहो ग्रहघ्नश्च कण्डूघ्नो
राजिकाफलः। तीक्ष्णकश्च कु
राथघो रक्षोघ्नः कुष्ठनाशनः
सिद्धप्रयोजनः सिद्धः साधनः
सितसर्षपः। सिद्धार्थः कटुकोष्ण
श्च वात रक्त ग्रहापहः। त्वग्दो
षशमनो रुच्यो विष भूतव्रणा
पहः। इति सर्षपः॥ तत्तैलगु
णाः। सर्षपतैलं तिक्तकटुकं
वातकफविकारघ्नं। पित्तास्र
दोषदं कृमिकुष्ठघ्नं तिलजव
च्चक्षुष्यं। तत्पत्रशाकगुणाः
सर्षपे पत्र मत्तुष्ट रक्तपित्तप्र
कोपनं विदाहि कटुकं स्वादु
प्रकृष्टं च रुचिदायकं। इति
राजनिर्घण्टः। अन्यच्च। सर्षपः
कटुकस्नेहः स्नेतभश्च कटेल
कः। गौरस्तु सर्षपः प्राज्ञैः सि
द्धार्थः इति कथ्यते। सर्षपस्तु
रसेपाके कटुस्निग्धः सतिक्तकः
तीक्ष्णोष्णः कफवातघ्नो रक्तपि
त्ताग्निवर्द्धनः। रक्षोहरो जयेत्
कण्डूकुष्ठ कोठकृमि ग्रहान्
यथा रक्त स्तथा गौरः किन्तु
गौरो वरो मतः। अथराइकस
गुणः राजीतु राजिका तीक्ष्ण
गन्धा क्षवजनिका सुरी। क्षवः
क्षुताभिजनकः कृमिकः कृष्ण
सर्षपः। राजिका कफपित्तघ्नी
तीक्ष्णोष्णा रक्तपित्तकृत् किंचि
द्रूक्षाग्निदा कण्डूकुष्ठ कोठकृ
मीन् हरेत्। अतितीक्ष्णा विशे
षेण तद्वत्कृष्णापि राजिका॥
तत्तैलगुणाः। दीपनं सार्षपं
तैलं कटुपाकरसं लघु लेखनं
स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तास्र
दूषकं। कफमेदोऽनिलार्शोघ्नं
शिरःकर्णामयापहं। कण्डूको
ठकृमि श्वित्र कुष्ठ दुष्टव्रणप्र
णुत्। तद्वद्राजिकयो स्तैलं
विशेषान्मूत्रकृच्छ्रकृत्। राजि
कयोः कृष्णराइ श्वेतराइ त
योः। तच्छाकगुणाः। कटुकं सा
र्षपं शाकं बहुमूत्र मलं गुरु
अम्लपाकं विदाहि स्याद्रसेऽतिरू
क्षं त्रिदोषकृत्। सस्त्रां लव
णं तीक्ष्णं स्वादु शाकेषु नि
न्दितं। तीक्ष्णोष्णं सार्षपं नालं
वातश्लेष्म व्रणापहं। कण्डूकृमि

हरं दद्रु कुष्ठघ्नं रुचिकारकं
इतिभावप्रकाशः॥ स्थावरवि
षभेदः। इति हेमचन्द्रः॥
षड्लिख्यापरिमाणं। यथा।
जालान्तरगते भानौ यच्चाणु
र्दृश्यते रजः। इतिस्मृतिः। अष्टभि
र्वेलिख्या लिख्याषड्भिश्च स
र्षपः। इति शब्दचन्द्रिका॥
सर्षपतैलं क्ली सर्षपजाततैल
ः। यथा सर्षपतैलं तिक्तक
टुकं वातकफ विकारघ्नं पित्ता
स्रदोषदं कृमिकुष्ठघ्नं तिल
वच्चक्षुष्यं। इति राजनिर्घण्टः
सर्षपी स्त्री खञ्जनिका। इति
त्रिकाण्डशेषः॥
सलं क्ली जलं। इत्यमरटी
कायां भरतः॥
सलिलं क्ली जलं। इत्यमरः
तत्र विण्मूत्रत्यागनिषेधो यथा
मनुः। नमूत्रं पथि कुर्वीत नभ
स्मनि नगोव्रजे। नफालकृ
ष्टे न जले न चित्यां नच प
र्वते। न जीर्णदेवायतने न व
ल्मीके कदाचन। न ससत्वेषु
गर्त्तेषु नगच्छन्नापि संस्थितः
नन दीतीर मासाद्य नचपर्वत
मस्तके। वाय्वग्निविप्रानादित्य
मपः पश्यंस्तथैवच। नकदा
चन कुर्वीत विण्मूत्रस्य विसर्ज
नं। इत्याह्निकतत्त्वं। अपिच म
श्लेष्म पुरीषाणि ये कृतस्रष्टा
निवारिणि। तेषां तत्रैव विण्मू
त्रे दुर्गन्धे रूपहारिते। इतिवाम
नपुराणे कर्म्मविपाको नाम
१२ अध्यायः। अथसलिल
परीक्षा पितामहः। तोयस्या
प्य प्रवक्ष्यामि विधिं धर्म्मसना
तनं। मण्डलं पुष्प धूपाभ्यां का
रयेत् सविचक्षणः। शास्त्रान्स
र्जयेद्वरुणावेलां च धनुस्त
था। तत्र प्रथमतो वरुणं पूज
येत्। यथा नारदः। गन्धमाल्यैः
सुरभिभि र्मधु क्षीर घृतादि
भिः। वरुणाय प्रकुर्वीत पूजा
मादौ समाहितः। ततोधर्म्मावा
हनादि सकलदेवतापूजा होम
समंत्रकप्रतिज्ञापत्र शिरोलि
खनं तेकर्म्मकुर्य्यात्। कात्यायनः
शिरोऽलवनायसाग्रं सम्प्रकुर्वीत
विशुद्धये वेणुं काण्डमयं श्रे
ष्ठं तथाच सुदृढं क्षिपेत्। पि
तामहः सेम्नाच हविषःकाङ्क्षः
तद्दृक्ति श्रोत्रियेणा ऽश्य वा। अ
क्रूरहृदयः शान्तः सोपवास



स्तथा शुचिः। इषुत्रं प्रक्षिपे
द्धीमान् मारुते वाति वा भृशं।
विषमे भूःप्रदेशे च वृक्षस्थाणु
समाकुले नारदः। क्रूरे धनुः
सप्तशतं मध्यमं षट्शतं मतं।
मंदं पंचशतं प्रोक्तमेष ज्ञेयो
धनुर्विधिः। अंगुलीनां सप्ता
धिकं शतं यस्य धनुषः परि
माणं तत्सप्तशतमेवं षट्शता
दिकं। पितामहः। मध्यमेन तु
चापेन प्रक्षिपेत्तु शरत्रयं। ह
स्तानां च शते सार्द्धे लक्ष्यं कृत्वा
विचक्षणः। तेषां च प्रेषितानां
तु शराणां ग्राह्यदेशनात्। म
ध्यमस्तु शरो ग्राह्यः पुरुषेण ब
लीयसा। कृष्णाणां पतने ग्राह्य
सर्पशापरिवर्जयेत्. सर्पनसर्प
नशरो या तिहस्त्रा दूरतर्वे यतः॥
पतने ग्राह्यमिति शरपतन स्था
नपर्यन्तं गच्छेदित्यर्थः। तेन प
रमपतिवेपि पतन स्थानक
र्षाग्रहणं। ततश्च प्रथमतः शु
क्लांतवेगेन तस्या ते शरमध्याने
तद्वः। नारदः। तदीषु नातिवे
गास्तु तदायेषु स्मसत्तच कृदे
शुस्थिरतोयेषु कुर्यात् शुद्धो
निमज्जने नातिवेगासु द्विपाति
द्विशोपि वेगयुक्तास्तु। विष्णुः॥
पंकशैवालदुष्टग्राहमत्स्यज
लौकादिवर्जिते तस्य नाभि
मात्रजले मग्नस्यारागद्वेषिणः
पुरुषस्यान्यस्योरू गृहीत्वाम्भ
सि तिष्ठतोम्भः प्रविशेत्। तत्सम
कालं च नातिक्रूरमृदुना ध
नुषा पुरुषोऽपरः शरत्रयं क्ष
प्यादिति। तस्य प्रोक्तमेव तत्स्थैः
अस्यधातस्येति अर्थस्मात्। अ
नपुरुषस्य स्तम्भधारणमाह
स्मृतिः उदके प्रास्तुत स्तिष्ठे
द्धस्तस्तम्भं गृहीत्वा च प्राड्विवा
ककर्त्तकं जलाभिमंत्रणमाह
पितामहः तोयं त्वं प्राणिनां प्रा
णः सृष्टेराद्यन्तु निर्मितं। शुद्धेश्च
कारणं प्रोक्तं द्रव्याणां देहिनां
तथा। अतस्त्वं दर्शयात्मानं शु
भाशुभपरीक्षणे। शोध्यक
र्त्तृकाभिमंत्रणमाह याज्ञव
ल्क्यः। सत्येन माभिरक्ष त्वं वरु
णेत्यभिशाप्य कं नाभिमात्रोद
कस्थस्य गृहीत्वोरू जले विशेत्
समाममभिप्राप्य प्रयोग कार
यित्वा कं जले विशेत् निमज्जेत्
तोरणेच निमज्जन समीपे समेष्वा
नेशाध्यकशरप्रामाण्यात्कृतकार्यं

यथा नारदः। गत्वा तत्तज्जल
स्थानं तत्र तोरणमुच्छ्रितं कु
र्वीत कर्णमात्रेत भूमिभागे समे
शुचौ। शरमोक्षे विशेषमाह त
नारदबृहस्पती। शरप्रक्षेपण
स्थानात् युवा जवसमन्वितः। ग
च्छेत्परमया शक्त्या यत्रासौ म
ध्यमः शरः। मध्यमं शरमादाय
पुरुषोऽन्यस्तथाविधः। प्रत्याग
च्छेत्तु वेगेन यतः स पुरुषो ग
तः। आगतस्तु शरग्राही न प
श्यति यदा जले। अन्तर्जलगतं
सम्यक् तदा शुद्धिं विनिर्दिशे
त्। अन्यथा न विशुद्धः स्यादेका
ङ्गस्यापि दर्शनात्। स्थानाद्वान्य
त्र गमनाद्यस्मिन् पूर्वं निवेश
येत्। जवित्वं विशेषयति ना
रदः। पञ्चाशतो धावकानां यौ
स्यातामधिकौ जवे। तौ चात्र
नियोक्तव्यौ शरानयनकर्म
णि। एकांगस्य दर्शनादित्येक
देशाभिप्रायेण। शिरोमात्रेत
द्दर्शनं कर्णादिनापि नासिके
ऽप्यत्र प्रवेशने यस्य शुद्धेतम
पि निर्दिशेत्। इति विशेषा
भिधानात् कात्यायनः। निम
ज्योत्प्लवते यस्तु दृष्टः स्यात्तत्र
तिनाम्बरः। पुनस्तत्र निमज्जे
त्तदेपविकृतविचारितः। जले
नोगतमस्य जलौकादिनादष्टः
समुत्प्लवेत यदि तदादष्टेष्टे
एव निमज्जनीय इत्यर्थः॥
पितामहः। गंतृ स्थापिचकर्त्ते
स्वसमं गमनमज्जने। गच्छेत्तो
रणमूलात्तु शरस्थानं जवीन
रः। तस्मिन् गते द्वितीयोऽपि वे
गादादाय सायकं। गच्छेत्तोर
णमूलं तु यतः स पुरुषो गतः
आगतस्तु शरग्राही न पश्यति
यदा जले। अन्तर्जलगतं सम्यक्
ततः शुद्धिं विनिर्दिशेत्। अत्र
मज्जनसमकालं गमनाभिधा
नात् शरमोक्षसमकालं गम
नं मूलपाठेऽत्र मध्यके मज्जन
समकाल इति मध्यमे शरमो
दायेत्यपरमुक्तमपि प्रमाणम्
त्। ततश्च त्रिषु शरेषु प्रक्षेपु
एकोवेगवान् मध्यमशरपत
नस्थानं गत्वा तमादाय तत्रैव
तिष्ठति अन्यस्तु पुरुषो वेगवान्
शरमोक्षस्थाने तोरणमूले ति
ष्ठति एवं स्थितयोः तृतीयायां
करतालिकायां प्राड्विवाकदत्ता
यां प्रेष्यो निमज्जति तत्समकाल

मेव तोरणमूलस्थितोऽपि द्रुत
तरं मध्यम शरपतनस्थाने ग
च्छति शरग्राही च तस्मिन् प्राप्ते
द्रुततरं तोरणमूले प्राप्यान्तर्ज्ज
लगतो यदि न पश्यति तदा शुद्धो
भवतीति वर्त्तुलार्थः । तत्प्रयो
गः । उक्तलक्षणजलाशयनिक
टे तथा तोरणं विधाय उत्कृष्टो
पोलस्पर्शं कृत्वा तोरणसमीपेऽस
प्तरं धनुः संस्थाप्य जलाशये वरु
णमावाह्य पूजयित्वा तत्तीरे प
श्चिमदीक्षु देवानहवांत सिद्धादृदि
णां कृत्वा प्रोष्ठस्याधिशिरसि प्रति
ज्ञापत्रं बद्धा प्राड्विवाको जल
मभिमन्त्रयेत् । ओँ तोयत्वं प्राणि
नां प्राणाः सृष्टेराद्यन्तु निर्मितं
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां
देहिनां तथा । अतस्त्वं दर्शया
त्मानं शुभाशुभपरीक्षणे । इ
ति मन्त्रेण । प्रोष्ठस्तु ओँ सत्येन
माभिरक्षस्व वरुणेत्यनेन जल
मभिमन्त्र्य गृहीतसत्यस्य प्रो
ष्ठनाभिमात्रोदकावस्थितस्य व
लीयसः प्राङ्मुखस्य पुरुषस्य समी
पे जलमध्ये गच्छेत् । ततः शरेषु
त्रिषु मुक्तेषु मध्यमशरपतनस्था
ने मध्यमशरं गृहीत्वा विजत्यक

स्मिन् पुरुषे स्थिते अन्यस्मि
श्च तोरणमूले स्थिते प्राड्वि
वाकेन तालत्रये दत्ते प्रोष्ठो
गृहीतसत्यः प्राङ्मुख एव पुरुष
स्योरू गृहीत्वा निमज्जति । त
त्समकालमेव तोरणमूल
स्थापि मध्यमशरस्थाने द्रुतं
गच्छति । ततः शरग्राही च तस्मि
न् प्राप्ते द्रुतं तोरणमूले प्राप्य
जलान्तःस्थं यदि न पश्यति त
दा शुद्धः । कर्णाद्यङ्गं विनापि
शिरोमात्रदर्शनेऽपि शुद्धः । मज्जन
स्थानादन्यत्रगमनेऽप्यशुद्धः । द
क्षिणादिकं दद्यात् इति दिव्य
तत्त्वं ॥

सलिलान्तर्गतलः, पुं शैवालः ।
इति त्रिकाण्डशेषः ॥

सलिलजं, क्ली पद्मं । इति राज
निर्घण्टः । जलजाते त्रि ॥

सलिलाशयः, पुं जलाशयः । त
स्य वैकल्ये दोषो यथा । गारुड
वाच । नगरादपसर्पन्ते समीप
मुपयान्ति च । नद्यो ह्रदाः प्रस्र
वणाः विरसाश्च भवन्ति ते । वि
वर्णं कलुषं तप्तं फेनवज्जन्तु
संकुलं । क्षीरं स्नेहः सुरा रक्तं
वहन्ते चाकुलोदकाः ॥

षण्मासाभ्यन्तरे तत्र परचक्र
भयं भवेत् । जलाशया नदन्ते वा
प्रज्वलन्ति कथञ्चन । विसृति
तथा त्रसन् ज्वाला धूमरजां
सि च । अस्थाने वा जलोत्पत्तिः
सत्त्वा वा जलाशयाः ॥
संगीतशब्दा दृश्यन्ते जलेमा
भयं वदेत् । दिव्यसंभोभयेस
र्पि मधुना तबसेचनं । जप्र
याश्चारुणं मंत्रैस्तैश्च होमो
जले भवेत् । सध्वाज्य युक्तं पर
मान्नं मत्र देयं द्विजानां द्विज
भोजनार्थं । गावश्च देयाः सित
वस्त्रयुक्ताः स्त्रियोदकं भोः स
लिलाञ्च शान्त्यै । इति मात्स्ये
२३४ अध्यायः ॥

सलिलेन्धनः, पुं वाडवानलः ॥
इति त्रिकाण्डशेषः ॥


सलिलः, त्रि लीलया सह वर्त्त
मानः । यथा । सुरद्रुमूलमण्डप
विचित्ररत्ननिर्मिते लसद्विता
न भूषिते सलील विभ्रमालसं
सुराङ्गनाभिवल्लवीकरं प्रपञ्चचा
मरस्फुरत् समीर वीजितं सदा
श्रुतं भजामि तं । इति छन्दोमं
जरी ॥

सलकी, स्त्री स्वनामख्यातवृक्षः
तत्पर्य्यायः । गजभक्ष्या २ सु
वहा ३ सुरभी ४ रसा ५ महे
रणा ६ कुन्दुरुकी ७ ह्लादिनी ८
इत्यमरः । गजभक्ता ९ सुरभिः
१० सुरभीरसा ११ महेरुणा १२
शल्लकी १३ सिल्लकी १४ शि
लकी १५ ह्लादिनी १६ इति टी
का । शल्यते श्लाघ्यते गजैः शल्ल
की । शल कत्थने स्वाद्ये चुरादिः
मे रभावपुंस्त्वे नाम्नीति लक
ट् । स्वाविद्भेदो शल्लक्यां शंका
शासवितर्केयो विति तालव्या
दी रभसः । सलति गच्छति सल
गतौ दन्त्यादिः णकः भौवादिः
निपातनात् लस्य द्वित्वं । सतक्कं
म लक्यते स्वाद्यते गजैरिति
वा सलकी दन्त्यादि रित्यन्ये ।
सिलकी चेत्येके दन्त्यप्राये ।
सलकी सिलकी ह्लादेति रुद्रः
इति स्वामी ॥ इत्यमरटीकायां
भरतः ॥

सवं, क्ली जलं । इति जटाधरः
पुष्परसः । इति केचित् ॥

सवः, पुं यज्ञः । इत्यमरः ॥
सन्तानः । इति मेदिनी सूर्य्यः
चन्द्रः । इति केचित् ॥

सवनं, क्ली यज्ञस्नानं । तत्पर्य्या



यः। सुत्या २ अभिषवः ३। इत्यमरः। सोमसंधाने ४॥ इतिजटाधरः। सोमपाने। इतिभरतः। अध्वरे। सोमनिर्द्दलने। इतिमेदिनी। प्रसवः। इतिकेचित्॥

सवयाः(स्) स्त्री समवयस्का। तत्पर्य्यायः। आलिः २ वयस्या ३ सखी ४ सहचरी ५ इति जटाधरः॥

सवयाः(स्) पुं वयस्यः। इत्यमरः। समानवयस्केत्रि॥

सवरः पुं सलिले। शिवः। इति त्रिकाण्डशेषः॥

सवर्णः त्रि सदृशः। इतिहेमचन्द्रः। समानवर्णः। तुल्यजातिः। यथा मनुः। पाणिग्रहणसंस्कारः सवर्णास्वुपदिश्यते। असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्म्मणि। इत्युद्वाहतत्त्वे॥ एकस्थानोत्पन्नवर्णः। यथा सवर्णेनाकदीर्घः। इतिसंक्षिप्तसारव्याकरणं॥

सवर्णा स्त्री सूर्य्यपत्नीछाया इतिशब्दरत्नावली॥

सवहा स्त्री त्रिवृता इत्यमरटीकायांभरतः॥

सविकाशः त्रि विकाशितः। प्रफुल्लः। विकाशेन सहवर्त्तमानः॥

सविता(ऋ) पुं सूर्य्यः। अर्कवृक्षः इत्यमरः। तस्य व्युत्पत्तिः यथा धीशब्दवाच्याब्रह्माणं प्रचोदयति सर्व्वदा। सृष्ट्यर्थे भगवान् विष्णुः सविता स तु कीर्त्तितः सर्व्वलोकप्रसवनात् सविता स तु कीर्त्यते यतस्तद्देवता देवी सावित्रीत्युच्यते ततः॥ इति वह्निपुराणे गायत्रीकल्पे नामाध्यायः॥

सवितृदैवतः पुं हस्तनक्षत्रे इतिहेमचन्द्रः॥

सवितृलः त्रि सवितृसंबंधी सवितृ शब्दात् ल प्रत्ययेन निष्पन्नः॥

सवित्रं क्ली प्रसवकरणं। सूयतेऽनेनेति सूधातोः करणे इत्रप्रत्यय निष्पन्नं। इतिमुग्धबोधव्याकरणं॥

सवित्रियः त्रि सूर्य्यसंबंधीयः इतिसिद्धान्तकौमुदी॥

सवित्री स्त्री माता। इति हेमचन्द्रः। गौः। इति केचित्॥

सविधः त्रि निकटे। इत्यमरः। समानप्रकारश्च॥

सविस्मयः। त्रि विस्मयापन्नः। तत्पर्य्यायः। वीक्षापन्नः २ इतिहारावली॥

सवेशः त्रि निकटे। इत्यमरः। वेशान्वितः। इतिधरणी॥

सव्यः त्रि वामः। इत्यमरः॥ दक्षिणः॥ प्रतिकूलः। इति हेमचन्द्रः॥

सव्यः पुं विष्णुः। इति शब्दमाला॥

सव्यसाची(न्) पुं अर्ज्जुनः॥ इति हेमचन्द्रः॥

सव्येष्ठः पुं सारथिः। इतिहलायुधः॥

सव्येष्ठा(ऋ) पुं सारथिः। इत्यमरः॥

सशल्या स्त्री नागदन्ती। इतिरत्नमाला। शस्यशूकमस्यास्तीति॥

सशूकः पुं आस्तिकः। इति केचित्॥

सश्मश्रुः स्त्री श्मश्रुयुक्तस्त्री तत्पर्य्यायः। नरमालिनी २ इतिहेमचन्द्रः॥

ससत्वा स्त्री गर्भिणी। इतिशब्दरत्नावली। प्राणियुक्ते त्रि। यथा मनुः। न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे। न ससत्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः। ससत्वेषु प्राणिमत्सु इत्याह्निकतत्त्वे॥

ससनं क्ली यज्ञार्थपशुहननं इत्यमरटीका। तस्य रूपान्तरं शमन शसनंच॥

सस्मितः त्रि ईषद्धास्ययुक्तः। यथा। सस्मिताननसरोजसंगते विंगमाला मतिलोलकुन्तले। रोचनोल्लसितभालमस्तु मे केशवे मनसि शैशवं वपुः॥ इत्यनुमितौ जगदीशः॥

सस्यं क्ली वृक्षादीनांफलं। यथा। संसने सीसके सस्ये स्खलंसा स्नाच साध्वसे। इत्युणादिविवेकात्। अमरटीकायां भरतः धान्यं। यथा। धान्येन सस्यं सीरं च व्रीहिः स्तंवकरिस्तथा॥ इति हेमचन्द्रः॥ शस्त्रं। गुणः॥ इति विश्वः। तस्य प्रशंसा। यथा। जीर्णमन्नं प्रशंसीयात् भार्य्याञ्च गतयौवनां। रणात् प्रत्यागतं शूरं सस्यञ्च गृहमागतं। इति चाणक्यः। अन्यत् शस्यशब्दे द्रष्टव्यं॥

सस्यकः पुं मणिभेदः। असिः इतिमेदिनी सस्यको नालिकेरान्तःसस्याभमणि खड्गयोः॥

इति हेमचन्द्रः ॥
सस्यमारी [२] पुं महामूषकः । इति राजनिर्घण्टः ॥ सस्यनाशके त्रि ॥
सस्यसंवरः पुं शालवृक्षः ॥ इत्यमरः ॥
सस्यसंवरणः पुं अश्वकर्णवृक्षः इति राजनिर्घण्टः ॥
सस्वेदा स्त्री दूषिताकन्या । इति शब्दरत्नावली ॥
सह व्य सहिते । तत्पर्यायः । साकं २ सार्द्धं ३ सत्रं ४ समं ५ इत्यमरः ॥ सजुः ५ इति जटाधरः । साकल्यं । विद्यमाने सादृश्यं । यौगपद्ये ॥ समृद्धिः ॥ सम्बन्धः । इति मेदिनी । सामर्थ्यं । इति शब्दरत्नावली ॥
सहं क्ली पांशुलवणं । इति राजनिर्घण्टः ॥
सहः पुं अग्रहायणमासः । क्षमे त्रि । इति हेमचन्द्रः ॥
सहः पुं क्ली बलं । इति मेदिनी
सहः [२] क्ली ज्योतिः । बलं । इति शब्दरत्नावली ॥
सहकारः पुं अतिसौरभाम्रः ॥ इत्यमरः ॥
सहकारी [२] पुं सहायः । यथा । अथ हेतु रूपादाने प्रत्ययाः सहकारिणः । इति त्रिकाण्डशेषः न्यायमते तद्भिन्नत्वे सति तज्जन्य जनकत्वं सहकारित्वं ।
सहचरः पुं स्त्री पीतझिण्टी ॥ नीलझिण्टी । इति रत्नमाला ।
सहचरः पुं झिण्टी । वयस्यः प्रतिबन्धकः । इति हेमचन्द्रः । अनुचरे त्रि । इति मेदिनी ॥
सहचरी स्त्री पीतझिण्टी । इत्यमरः ॥ पत्नी । इति हेमचन्द्रः ॥ सखी । इति जटाधरः ॥
सहजः पुं सहोदरः ॥ इत्यमरः निसर्गः । सहोत्थे त्रि । इति मेदिनी जन्मलग्नात् तृतीयस्थाने । यथा । सुत मदन नवान्त्ये पूर्णदृष्टिः सुखवि युगल दशमगेहे दृष्टिपादत्रयार्द्धैः ॥ सहज रिपु चतुर्थेष्वष्टमे चार्द्धदृष्टिः स्थितिभवनमुपान्त्येनेक्षयंप हिराहोः । इति ज्योतिस्तत्त्वं ॥
सहजमित्रं क्ली स्वाभाविकसुहृत् । यथा । अपि मित्र मुरादीनां अनन्तरस्तत्परः परः । क्रमशो मंडले चिन्त्यं सामादिभि रुपक्रमैः अरिः शत्रुः । मित्रं ॥

सुहृत् । उभय विलक्षणउदासीनः । ते चत्रय स्त्रिविधाः । सहजाः कृत्रिमाः प्राकृताश्चेति । सहजं मित्रं भागिनेय पैतृष्वस्त्रीय मातृष्वस्त्रीयादिः । इति मिताक्षराया माचाराध्याये १ अध्यायः ॥
सहजातः त्रि सहोदरः । यमजः । इति केचित् ॥
सहजारिः पुं स्वाभाविकशत्रुः यथा सहजारिः सापत्न्यपितृव्यतत्पुत्रादिः । इति मिताक्षराया माचाराध्यायः ॥
सहजोदासीनः पुं स्वाभाविक परतरः । यथा । सहज कृत्रिम मित्र शत्रुलक्षणरहितो सहज कृत्रिमोदासीनो । इति मिताक्षराया माचाराध्यायः ॥
सहण्डुकं क्ली मांसव्यञ्जनविशेषः । यथा । छागादेर्मांसमुद्दिष्टं कुट्टितं खण्डितं पुनः । शुद्धमांस विधानेन पचेदेतत् सहण्डुकं । सहण्डुकं गुणैर्ज्ञेयं शुद्धमांसगुणैः स्मृतं । इति भावप्रकाशः ॥
सहदेवः पुं पाण्डवविशेषः । इति मेदिनी । सच पाण्डुराजस्य पंचमपुत्रः । माद्रीगर्भेऽश्विनीकुमाराभ्यां जातः ॥ जरासंधसुतः । स युधिष्ठिरसमकालीनो मगधेषु राजासीत् । इति श्रीभागवते ॥
सहदेवा स्त्री बला ॥ दण्डोत्पलः । शारिवौषधिः । इति मेदिनी । अर्हन्माता । इति । हेमचन्द्रः ॥
सहदेवी स्त्री सर्पाक्षी । इति मेदिनी । पीतदण्डोत्पला ॥ इति रत्नमाला । बलाभेदः ॥ तत्पर्यायः । महाबला २ ज्येष्ठबला ३ कटुंभरा ४ केशारुहा ५ केसरिका ६ मृगादनी ७ वषपुष्पा ८ केशवर्द्धिनी ९ भुरासिनी १० देवबला ११ सारिणी १२ पीतपुष्पी १३ देवाही १४ गोधवल्ली १५ मृगा १६ मृगरसा १७ अस्या गुणाः । हृद्रोगवातार्शः शोफहारित्वं । शुक्रवृद्धिकारित्वं । बल्यत्वं । विषमज्वरनाशित्वं च । इति राजनिर्घण्टः । सहदेवपत्नी च ॥
सहदेवीगणः पुं प्रतिष्ठायां देवस्नानार्थमोषधिसमूहः । यथा पंचगव्यैः स्नापयेच्च सहदेव्यादि

मिस्ततः। सहदेवीबलाचैव-
शतमूलीशतावरी कुमारीच
गुडूचीचसिंहीव्याघ्रीतथैवच
या ओषधीति मंत्रेण स्नानमो
षधिमंगलैः। इति गारुडे ४८
अध्यायः ॥
सहधर्म्मिणी स्त्री वेदविधाने
नोढा। इत्यमरः ॥
सहनं क्ली क्षान्तिः। तत्पर्य्यायः
तितिक्षा २ क्षमा ३। इति
हेमचंद्रः ॥
सहनः त्रि सहनशीलः। इत्य
मरः। तत्पर्य्यायः। सहिष्णुः २
क्षमिता ३ क्षमी ४ तितिक्षुः ५
क्षन्ता ६ इतिहेमचंद्रः ॥
सहनर्त्तनं क्ली एकत्रमंडला-
कारनृत्यकरणं। इति केचित्
सहपानं क्ली एकत्रमद्यादिप
हरणं। तत्पर्य्यायः। सपीतिः २
इतिहेमचंद्रः। तुल्यपानं ३।
इत्यमरः। सहपीतिः ४। इति
शब्दरत्नावली ॥
सहपांशुकिलः पुं वयस्यः। इ
ति त्रिकाण्डशेषः ॥
सहपूर्व्वाह्णं क्ली पूर्व्वाह्णसदृशं
इति मुग्धबोधव्याकरणे अव्य
यीभावसमासः ॥

सहभावी [२] त्रि सहायः। इति त्रि
काण्डशेषः ॥
सहभोजनं क्ली एकत्रभक्षणं
तत्पर्य्यायः सग्धिः २ इत्यम
रः ॥
सहमरणं क्ली मृतस्वामिसहि
तज्वलच्चितारोहणपूर्व्वकमरणं
यथा। अथ सहानुगमने। अंगि
राः मृते भर्त्तरि या नारी समारो-
हेद्धुताशनं। साऽरुन्धतीसमा-
चारा स्वर्गलोके महीयते ॥
तिस्रः कोट्योऽर्द्धकोटीच या
नि लोमानि मानवे। ताव
न्त्यब्दानि सा स्वर्गे भर्त्तारं याऽनु
गच्छति व्यालग्राही यथा व्या
लं बलादुद्धरते बिलात् तद्व
द्भर्त्तारमादाय तेनैव सह मोद
ते। मातृकं पैतृकं चैव यत्र क
न्या प्रदीयते। पुनाति त्रिकुलं
नारी भर्त्तारं याऽनुगच्छति ॥
तत्र सा भर्त्तृपरमा परापर म
लालसा क्रीडते पतिना सा
र्द्धं यावदिन्द्राश्चतुर्द्दश। भर्त्तृप
रमा भर्त्ता परमो यस्याः सा
तथा। परा परम्लालसेत्य
त्र स्तूयमानाप्सरोगणैरिति
व्यासेन पठितं। ब्रह्मघ्नो वा-

कृतघ्नो वा मित्रघ्नो वापि यो
नरः। तं वै पुनाति सा नारी इ
त्यंगिरसभाषितं। साध्वीनामे
व नारीणामग्निप्रपतनादृते
नान्यो धर्म्मो हि विज्ञेयो मृते
भर्त्तरि कर्हिचित्। या नारी स्व
पादानात् सहमरणाभावप
तेऽपि सूचितः। नान्यो धर्म्म इति
ते सहमरणाशक्तस्य। तथाचवि
ष्णुः। मृते भर्त्तरि ब्रह्मचर्य्यं तद
न्वारोहणं वा इति ब्रह्मचर्य्ये मै
थुनवर्ज्जने ताम्बूलादिवर्ज्जनेच
यथा प्रचेताः ताम्बूलाभ्यंजन
ञ्चैव कांस्यपात्रे चभोजनं ॥
यतिश्च ब्रह्मचारीच विधवाच
विवर्ज्जयेत्। अभ्यंजनमायुर्वे
दोक्तं पारिभाषिकं। यथा। मू
र्द्ध्नि दत्तं यदा तैलं भवेत् सर्व्वांग
संगतं स्रोतोभिस्तर्पयेद्धाह्
अभ्यंगः स उदाहृतः। तैलम
ल्पयदा देहे न च स्याद्धातुतर्पणं
सामाहिः पृथगभ्यंगो मस्तका
दौ प्रकीर्त्तितः। स्मृतिः पक्का
हारः सदाकार्य्यो न द्वितीयः क
दाचन। पर्य्यंकशायिनी नारी
विधवा पातयेत् पतिं। गंध
द्रव्यस्य सम्भोगो नैव कार्य्यः

स्तया पुनः। तर्पणं प्रत्यहं का
र्य्यं भर्त्तुस्तिल कुशोदकैः। त
त्पितुस्तत्पितुश्चापि नामगो
त्रादि पूर्व्वकं। एतत्तु तर्पणं पुत्र
पौत्राद्यभावविषयमिति मदन
पारिजातः। वैशाखे कार्त्तिके
माघे विशेषनियमं चरेत्। स्ना
नं दानं तीर्थयात्रां विष्णोर्नामग्र
हणं मुहुः ॥ अथ साध्वीत्वमाह
आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते
मलिना कृशा। मृते म्रियेत
या पत्यौ साध्वी ज्ञेया पतिव्र
ता। इति छन्दोगपरिशिष्टीय
मिति कल्पतरुः। साध्वीप्रसादे
न लोकधारणमप्याह। मत्स्यपु
राणे। तस्मात् साध्व्यः स्त्रियः पू
ज्याः सततं देववज्जनैः। तासां
राज्ञ प्रसादेन धार्य्यते च जग
त्त्रयं। महाभारते। अवमन्यच
या एवं पतिं दुष्टेन चेतसा।
वर्त्तते याश्च सततं भर्त्तॄणां प्र
तिकूलतः। भर्त्रनुमरणं काले
याः कुर्व्वन्ति तथाविधाः। कामा
त् क्रोधात् भयान्मोहात् सर्व्वाः
पूता भवन्ति ताः। अत्र पैतृक
ब्रह्मघ्नपते दाहनिषेधात् ज
न्मान्तरीयतत्पापक्षयएवसहमरे



णोनोद्धारः । ब्रह्मपुराणे । दे
शान्तरमृते पत्यौ साध्वी तत्
पादुकाद्वयं । निधायोरसि सं
शुद्धा प्रविशेज्जातवेदसं । ऋ
ग्वेदवादात् साध्वी स्त्री न भवे
दात्मघातिनी । त्र्यहाशौचे नि
वृत्ते तु श्राद्धं प्राप्नोति प्राप्य
वत् । ऋग्वेदवादात् इमा ना
रीरविधवा इत्यादि मन्त्रात् ।
एतेनैवाङ्गिरो ब्रह्मपुराणवचन
पर्य्यालोचनया ब्राह्मण्यादिस
कलभार्य्याणां स्वगत भर्त्तृगत
फलविशेषार्थिनीनां गर्भव
तीबालापत्यादि स्मृतिविरुद्धानां
सहमरणानुमरणयोरधिकार
इति । विवादकल्पतरु रत्नाकरौ
तत्र ब्राह्मण्याद्यनुमरणाधिका·
रोऽसंगतस्तस्या स्तन्निषेधात् ।
तथाचमिताक्षरायां देवलोपक्
त याज्ञवल्क्यटीकायाञ्च गौतमः
पृथक्चितिं समारुह्य न विप्रा
गन्तुमर्हति इतरासान्तु नारीणां स्त्री
धर्म्मोऽयं परः स्मृतः । तस्माद्ब्रा
ह्मण्याः सहमरणमेव इतरासां
तूभयमिति कल्पतरुरत्नाक
रस्मृति चिन्तामणिषु पादुकाद्व
यमिति देशनात्पादुकादिकमित्य

पपाठः किन्तु पादुकाद्वयमि
त्युपलक्षणं उशनसा विप्रेतरा
सोऽद्ध्वविशेष मनुपादाय पृथ
क्चित्यारोहणं मात्रोक्तेः । यथो
शना । पृथक् चितिं समारुह्य
न विप्रा गन्तुमर्हति । अन्यासामे
व नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः
मदनपारिजातोऽप्येवं । शिष्टाचा
रोपितया । कृत्यतत्त्वार्णवेऽह
न्नारदीये । बालापत्याश्च गर्भि
ण्यो ह्यदृष्टऋतवस्तथा । रज
स्वला राजसुते नारोहन्ति चि
तां शुभे । राजसुते इति सगर
मातुः सम्बोधने । बृहस्पतिः ॥
बालसंवर्द्धनं त्यक्त्वा बालाप
त्या न गच्छति । रजस्वला सूति
का चैव रक्षेद्गर्भञ्च गर्भिणी । एव
मन्यत्र स्नेहात्तस्य संवर्द्धने स्या
न्न दानतस्या अप्यधिकारः । व्यासः
दिनैकगम्यदेशस्था साध्वी चेत्
कृतनिश्चया । न दहेत् स्वामिनं
तस्या यावदागमनं भवेत् । भ
विष्यपुराणे तृतीयेऽह्नि उद·
क्यायां मृते भर्त्तरि वै द्विजाः
तस्यानुमरणार्थाय स्थापयेद्दे
कराचके । तस्य भर्त्तुः तथाप्येको
चितिं समासाद्य भर्त्तारं यानु

गच्छति । तदूर्ध्वं येः क्रियाकर्त्ता ।
सतस्याश्च क्रियाञ्चरेत् । एतच्च
पिण्डदानपर्य्यन्तं । यस्मादग्निदाता
प्रेतस्य पिण्डान्दद्यात् स एव हि ।
इति वायुपुराणीयवाक्यत्वात् ।
ब्रह्मपुराणे । आवेदयेत् ज्ञातयोऽत
स्य भर्त्तुः कुलपाविनीं चितामा
रोपयन् प्राज्ञः प्रमते पश्चसत्तम
इमाः पतिव्रताः पुण्याः स्त्रियो
या याः सुशोभनाः । सह भर्त्तुः
शरीरेण संविशन्ति विभावसुं
एवं कृत्वा ततो नारी श्रद्धा
भक्तिसमन्विता । पितृमेधे·
न यज्ञेन इष्ट्वा स्वर्गमवाप्नुया
त् । प्रमृते भर्त्तरि विशेषः ॥
पितृमेधेन यज्ञेन चितारोह·
णरूपेण । पादुकाद्वय ग्रहण·
पूर्वकानुमरणेऽपि सह भर्त्तुः श
रीरेण इत्यत्र दूरः प्रयोज्यः देशा
न्तरमृते पत्यावित्यादिना शरीर
प्रतिनिधित्वेन तदीयस्य विधा
नात् । प्रतिनिधेश्च यथाक्तनम
त्रपाठमाह कात्यायनः प्राहेः
विप्रतिपत्तिः इत्येतत् विहृते मे
कादशीतत्त्वे । तच्च आग्नेजले
प्रविष्टानां भृगु संग्राम देशान्त
र मृतानां गर्भिणीनां जातद·

न्तानां मरणे त्रिरात्रेण शुद्धिः ।
इति काश्यपवचनात् । सहम
तायाश्चाग्नि प्रवेशेन त्रिरात्र
शौचं तेनैव तस्याः पिण्डदानमिति
वाच्यं । प्रागुक्त ब्रह्मपुराणे पृथ
क्चितिसमारोहणमात्रेऽप्यहाशौ
च विधानात् अन्यत्र भर्त्तृतुल्या
शौच प्रतीतेः । सहमरणे काश्य
पोक्त त्रिरात्राशौचाङ्गीकारेऽ
पि तस्याशौचस्य हेतुत्वा पत्य·
शौचकालावधिस्थायित्वाश्च तेन
दंशाहे स्याताञ्चेत् पुनर्मरण
जन्मनी । तावत् स्यादशुचिर्विप्रो
यावत्तत् स्यादनिर्दशम् । इति मनु
क्ताशौच संकरे परशौचस्य पू
र्व्वाशौचकालावधिस्थायित्वप्र
तीतेः । ततश्च यथा अशौचका
लसंकोचे तन्मध्य एव संकल्प्य
पिण्डदानं तस्याशौचकालवृद्धा
वपि यावदशौचं यथाक्रमं दश
पिण्डादेया इति । अतएव निक
णीयाश्चेहिपि विष्णुमरणविवेक
योर्व्यासः । संक्षिप्ते पतिमालिङ्ग्य
प्रविशेद्या हुताशने । अस्याः पिण्डा
दिकं देयं क्रमशः पतिपिण्डवत्
विष्णुः । अन्विता पिण्डदानेन
यथा भर्त्तुर्दिने दिने । तदन्वा·



रोहिणी यस्मात्तस्मात् सा नात्म
घातिनी। अत्रानुःसहार्थः। पति
मालिंग्यैव तेनैकवाक्यत्वात्।
स्वाम्यशौचाभ्यंतरे पृथक्‌चिता
मृताया अग्रहेण पिंडदानं स्वाम्य
शौचापगमे तु श्राद्धं। अन्विता
याः प्रदातव्या दशपिण्डा स्व
ग्रहेणतु। स्वाम्यशौच अतीते त
तस्याः श्राद्धं विधीयते। इति।
त्रिकनघृत पैठीनसि वचनात्
अग्निपुराणस्थेदमिति शूलपा
णिः। अत्रानुःपश्चादर्थः। अतीते
तु भर्तृशौचे पाड्काद्यय श्रुपा
दायज्वलदग्निप्रवेशे अग्रहाशौच
व्यवस्थया पिंडदानं चतुर्थ्यादि
नेष्वाद्धे एवोक्त ब्रह्मपुराणवच
नात्। यत्र तु भर्तुःसंग्राममरणत्वा
दिना सद्यःशौचं तत्र पृथक्
चितामृतायाशौचस्य एवोक्त ब्र
ह्मपुराणवचनात् त्रिरात्रत्वेन
बहुकालव्यापित्वेनाचेहस्थिम।
त्वात्तेनैव एतच्छौचस्य व्यवस्था
तु तत्र भर्तुरपि अग्रहेण पिंडदानं
तत्राप्येकचितारोहणे भर्तृशौ
चव्यपगमात् शुद्धिः। सपिंडी
पति मालिंग्य इति अन्वितापि
उदान मिति एवोक्तवचना।

भ्यां अग्निप्रवेशे कृतं तेन स
द्यःशौचविधानाच्च। यथा भृ
ग्वग्नि जल संग्राम देशांतरस्थ
संन्यासानशनाशनि महाध्वनि
कानांउदककिया कार्या सद्यः
शौचंभवति इति भृगु रुद्रदेशाः
महाध्वनिकः शुल्पांथ हिमा
लयावधिक महापथ गमनेन
संपादित मरणाः। न चैतत्सद्यः
शौचं नित्यवेदाध्यायकेऽग्निहो
त्रभिन्न एकाहाशौचविभिन्न क
ल्पं मिति हारलतादत्तविषय
त्वेन नैतद्विषयक मिति वाच्यं
तन्मात्र विषयकत्वे प्रमाणाभा
वात्। सामान्यश्रुतिप्रवृत्तत्वेन तथाव
चनांतर संवादितया चैतद्विषय
कमिति अन्यथाकश्यपोक्तशि
ष्टाशौच मपि अग्नि जल संग्राम
प्रविष्टानां प्रमादादेव मरणं इ
ति हारलता दर्शनात् अनुमरण
विषयकं नस्यात् तस्मात्काश्य
पवचनं ब्रह्मपुराणसमानवि
षयकमिति। स्वमनत्वचनं संग्राम
हतभर्तृ सहगमन विषयकमपी
ति॥ एवंच समाधिना स्वकृदेह
स्यमुक्तस्य पुत्रवाहस्य पत्नीट
जाग्निना देहदाहकाले तत्

पत्न्या गांधार्या अग्निप्रवेशदर्श
नादिदानीं काश्यपादि मृतस्य मु
क्तस्यापि पत्युः सत्यपत्न्याः सह
मरणं संगच्छते। श्रीभागवतेत
दुक्तं। दह्यमानेऽग्निभिर्देहे पत्युः
पत्नी सहोटजे। बहिःस्थिता
पतिं साध्वी तमग्निमनुवेक्ष्य
ति। अनुवेक्ष्यति अग्निप्रवेशनं
करिष्यति इति युधिष्ठिराय
नारदस्य भविष्यत् कथनं। द
यिते यान्यदेशस्थे मृते स्नात्वा
पतिव्रता समारोहति शीघ्राग्नौ
तस्याः शिद्धिं निवोधत। इति
व्यासवचनादिना सहमरणानुम
रणयो नित्यकाश्ये नैमित्तिकका
म्यत्वेन मलमासादावपि कर्तव्य
ता। नैमित्तिकानि काम्यानि निप
तेति यथा यथा। तथा तथैव का
र्याणि न कालस्तु विधीयते। इति
दक्षवचनात्। तदयं प्रयोगः॥
प्रज्ञादिना स्वगृह्योक्त विधिना
अग्नौ दत्ते ज्वलितायां भर्तृचि
तायां सहगामी साध्वी स्नाता प
रिहित धौतवासोयुगा कुशहस्ता
प्राङ्मुखी उदङ्मुखी वा दैवतीर्थे
नाचांता तिलजल कुशत्रयमादा
य ॐ तत् सदिति ब्राह्मणो रुक्ता

दिते नारायणं संस्मृत्य नमो
ऽद्यामुके मासि अमुके पक्षेऽ
मुकतिथौ अमुकगोत्रा श्रीम
तीअमुकीदेवी अरुंधती समाचा
रत्व एवंक स्वर्गलोकमहीय
मानत्वमानवाधिकरणक लो
मसमसंख्याब्दावच्छिन्न स्वर्गवा
स भर्तृसहित मोदमानत्व मातृ
पितृ श्वशुरकुलत्रय पूतत्वचतु
र्दशेन्द्रावच्छिन्नकालाधिकरण
काप्सरोगण स्तूयमानत्वपतिस
हितक्रीडमानत्वब्रह्मघ्नकृतघ्नमि
त्रघ्नपति पूतत्वकामा भर्तृज्वलच्चि
तारोहणमहं करिष्ये इति अनुम
रणेतु भर्तृज्वलच्चितारोहणमि
त्यत्र ज्वलच्चिताप्रवेशेन भर्त्रनुम
रणमिति संकल्प अष्टौ लोकपा
ला आदित्यचंद्रानिलाग्न्याकाश
भूमिजलहृदयावाच्छिन्नंतर्यामि
पुरुषयमदिनरात्रि संध्या धर्मा
एयं सात्तिणोभवत ज्वलच्चिता
रोहणेन भर्तृशरीरानुगमनमहं
करोमि इति। अनुमरणे तु भर्तृश
रीरानुगमन मित्यत्र भर्त्रनुमरण
मित्युच्चार्य ज्वलच्चिताग्निं त्रिः प्र
दक्षिणीकृत्य ॐ इमा नारी रविध
वाःसपत्नी रंजनेन सर्पिषा संविशं

ता। अनस्रवो अनमीरा सुरत्ना
आरोहन्तु जलयोनि मग्ने इति ऋ
ग्वेदोक्त मन्त्रे ओं इमाः पतिव्रताः
पुण्याः स्त्रियो या याः सुशोभ
नाः। सह भर्त्रा शरीरेण संविश
न्तु विभावसुं॥ इति पौराणि
कमन्त्रे च ब्राह्मणेन पठितेन
मानस इत्युच्चार्य्य ज्वलच्चितां
समारोहेत्॥ आपस्तम्बः॥
चितिभ्रष्टा तु या नारी मोहा
द्विचलिता भवेत्। प्राजापत्ये
न शुद्ध्येत्तु तस्माद्धि पापकर्म्मणः
पाश्चात्य निर्णयामृते स्मृतिः
एकचित्या समारूढौ दम्पती
निधनं गतौ पृथक् श्राद्धं तयोः
कुर्य्यादोदनन्तु पृथक् पृथक्
पिण्डाकर्षस्तथा स्मृतिः। एकाहे
समृतानान्तु बहूनामथ वा द्वयोः
तन्त्रेण श्रपणं कृत्वा पृथक्श्रा
द्धं प्रवर्त्तयेत्। यत्तु यदा नारी
विप्रोद्दिष्टे स्वेच्छया पतिना
सह। अग्नौ चेद्दहनं तस्याः स
हभर्त्रेति निश्चितं। निष्पन्ने तु
मृतायां तु पृथक् श्राद्धं न वि
द्यते। इति चतुर्भुज महाचा-
र्य्यधृतयमवचनाद्भिन्नतिथिमृ
तायाश्चापि पत्युर्मृततिथौ श्राद्ध
मिति हरिदास तर्काचार्य्याः॥
तन्न अस्य वचनस्यामूलत्वात् स
मूलत्वेपि श्राद्धपदे पिण्डपरे।
एकोद्दिष्टं मृताहनीति यमव
चनविरोधात्। इति शुद्धितत्त्व
म्। ब्रह्मवैवर्त्ते गणपतिख
ण्डे १८ अध्याये। मार्कण्डेय
पुराणे दमचरिताध्याये विष्णु
पुराणे ५ अंशे ३८ अध्याये।
कल्किपुराणे ३३ अध्याये च
द्रष्टव्यं॥

सहगामी[न्] त्रि मिलितागामी। य
था। न नदीपुनर्नदीकुर्यात् सर्वेषु
चपर्वतान्। आवासे भोजने वा
पि न सज्जेत् सहगामिने॥
इति कूर्म्मपुराणे उपरिभागे
१५ अध्यायः॥

सहरक्षा स्त्री शुक्रपर्णी। इतिश
ब्दरत्नावली॥

सहरि ब्य हरेःसदृशे। इतिमु
ग्धबोधव्याकरणं। स्थैर्य्येवृषेच
पुं। इति केचित्॥

सहर्षः पुं स्पर्द्धने हर्षः। इति
त्रिकाण्डशेषः। हर्षयुक्ते त्रि।

सहसा ब्य हठात्। तत्पर्य्यायः।
अतर्कितः २ इत्यमरः। अकस्मा
त् ३। इति शब्दरत्नावली॥

सहसा कर्म्मकरणनिषेधो य
था। सहसा विदधीत न क्रिया
मविवेकः परमापदां पदं। वृणु
ते हि विमृश्यकारिणं गुणलु
ब्धाः स्वयमेव संपदः। इति भारवि
हास्ययुक्तासौ। यथा। प्रियत
मेन यया सरुषा स्थितं न सह
सा सहसा परिरभ्यते। श्लथयि
तुं क्षणमक्षमताङ्गना न सह
सा सहसा कृतवेपथुः। इति मा
घे ६ सर्गः॥

सहसादृष्टः त्रि हठाद्दृष्टः॥
दत्तकपुत्रे पुं। इति केचित्

सहसानुः पुं मयूरः। यज्ञः।
क्षमायुक्ते त्रि। इत्युणादिकोषः

सहस्यः पुं पौषमासः। इ
त्यमरः॥

सहस्रं क्ली दशशतसंख्या। इ
ति हेमचन्द्रः। हाजार इति पार
स्य भाषा। तद्वाचकानि यथा
जाह्नवीवक्त्रं १ पोषशीर्षं २।
पद्मच्छदः ३ रविकरः ४ अर्ज्जु
नबाणाः ५ वेदशाखा ६ इन्द्रदृ
ष्टिः ७ इति कविकल्पलता॥

सहस्रकाण्डा स्त्री श्वेतदूर्वा। इ
ति राजनिर्घण्टः॥

सहस्रकिरणः पुं सूर्य्यः। इति
हलायुधः॥

सहस्रदंष्ट्रः पुं पीठनमत्स्यः॥
इत्यमरः॥

सहस्रदंष्ट्री[न्] पुं बोदालमत्स्यः।
इति शब्दरत्नावली॥

सहस्रदोः[स्] पुं कार्त्तवीर्य्यार्ज्जुनः
इति जटाधरः॥

सहस्रधारः पुं विष्णुचक्रं॥
इति केचित्॥

सहस्रधारा स्त्री देवतास्नाना
र्थसहस्रच्छिद्रयुक्तपात्रगलित
जलधारा। यथा। सहस्रधारया
देवीं स्नापयामि सुरेश्वरीं। इ
ति दुर्गोत्सवपद्धतिः॥

सहस्रनयनः पुं इन्द्रः। इति
हलायुधः॥

सहस्रनेत्रः पुं इन्द्रः। इति हेमचं
द्रः। विष्णुः॥ इति श्रीभागव
ते॥

सहस्रपत्रं क्ली पद्मं। इत्यमरः

सहस्रपात्[द्] पुं विष्णुः। यथा।
सहस्रशीर्षा पुरुषः सहस्राक्षः
सहस्रपात्। इति पुरुषसूक्तं॥

सहस्रपादः पुं कारण्डपक्षी॥
सूर्य्यः। विष्णुः इति मेदिनी॥

सहस्रभुजः पुं विष्णुः। यथा।
पश्यन्त्यदोरूप मदभ्रचक्षुषा स



सहस्रपादोरुभुजाननाद्भुतं । सहस्रमूर्द्धश्रवणाक्षिनासिकं सहस्रमौल्यम्बरकुण्डलोल्लसत् ॥ इति श्रीभागवते १ स्कन्धे ३ अध्यायः । कार्त्तवीर्य्यार्ज्जुनश्च ॥

सहस्रभुजा स्त्री महालक्ष्मीः सा च महिषासुरमर्द्दिनी । यथा । श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला । रक्तमध्या रक्तदेहा नीलजङ्घोरुतालुका । चित्रानुलेपना कान्ता सर्वसौभाग्यदायिनी । अष्टादशभुजा पूज्या सा सहस्रभुजा रणे । आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् । अक्षमाला च मूषलं बाणासि कुलिशं गदा । चक्रं त्रिशूलं परशुं शङ्खघण्टे च पाशकं । शक्तिं दण्डं चर्म चापं पानपात्रं कमण्डलुं । अलङ्कृतभुजा त्वेभिरायुधैः परमेश्वरी स्मर्त्तव्या स्तुतिकालादौ महिषासुरमर्द्दिनी । इत्येषा राजसी मूर्त्तिः सर्वदेवमयी मता ॥ यां ध्यात्वा मानवा नित्यं लभन्ते हितमात्मनः ॥ इति मार्कण्डेयपुराणीय देवीमाहात्म्यपाठक्रमः ॥

सहस्रमूर्द्धः पुं विष्णुः । अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यं ॥

सहस्रमूली स्त्री द्रवन्ती । इति राजनिर्घण्टः ॥

सहस्रमौलिः पुं विष्णुः । अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यं ॥

सहस्ररश्मिः पुं सूर्य्यः । सहस्रकिरणशब्ददर्शनात् ॥

सहस्रवदनः पुं विष्णुः । इति शब्दरत्नावली ॥

सहस्रबाहुः पुं बाणराजः । यथा । बाणः पुत्रशतज्येष्ठो बलेरासीन्महात्मनः । सहस्रबाहुर्वाद्येन ताण्डवे तोषयन्मृडं ॥ इति श्रीभागवते ९ स्कन्धे ६२ अध्यायः ॥

सहस्रवीर्य्या स्त्री दूर्वा । इत्यमरः । महाशतावरी ॥ इति राजनिर्घण्टः ॥

सहस्रवेधं क्ली चुक्रं । काञ्जिकविशेषः । इति राजनिर्घण्टः ॥

सहस्रवेधि क्ली हिङ्गु । इति मेदिनी राजनिर्घण्टौ ॥

सहस्रवेधी पुं अम्लवेतसः । इति मेदिनी । कस्तूरी । इति राजनिर्घण्टः ॥ सहस्रवेधकर्त्तरि त्रि ॥

सहस्रशिखरः पुं विन्ध्यपर्वतः

इति केचित् ॥

सहस्रश्रवणः पुं विष्णुः । अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यं ॥

सहस्रहर्यश्वः पुं इन्द्ररथः । इति केचित् ॥

सहस्रा स्त्री अम्बष्ठा । इति भावप्रकाशः ॥

सहस्रांशुः पुं सूर्य्यः । इत्यमरः ॥

सहस्रानीकः पुं शतानीकराजपुत्रः । यथा । शतानीकोऽभवत् एवं पुराकल्पे महीपतिः । ईजाय स बहून् यज्ञान् श्रद्धापूतेन चेतसा । यज्ञे यज्ञे सहस्राणि राजास्य ददौ दन्तिनो ब्राह्मणेभ्योऽददद्राजन् शतमानाच शतं शते । द्विजस्तु शौनको पुत्रः कौशिको भूभृते तथा पत्न्यां त्वस्य समुत्पन्नोऽपि काले तत्काले व्यवर्द्धत । वेदवेदाङ्गतत्त्वज्ञो धर्म्मज्ञो नियतव्रतः । कोऽन्या चेदम सत्तुल्यः प्रतापात् सत्यवत् प्रभुः ॥ समये धर्म्मराजेव क्षमया पृथिवीसमः । एतद्गुणवतो ज्ञात्वा सुते राज्ञो द्विजातयः ॥ सहस्रानीकनामानं चक्रुस्तस्य स

हर्षिताः । इति वह्निपुराणे पापनाशन वृषदानाध्यायः ॥

सहस्राननः पुं विष्णुः । अस्य प्रमाणं सहस्रभुजशब्दे द्रष्टव्यं ॥

सहस्रारः पुं क्ली शिरोवस्थिताधोमुखसहस्रदलकमलं । यथा । सहस्रारे हिमनिभे सर्ववर्णविभूषिते । अकथादि त्रिरेखात्मे हलक्षत्रयभूषिते । तन्मध्ये परबिन्दुंच सृष्टिस्थितिलयात्मके । एवं समाहितमना ध्याये· आसोऽयमोतरः । इति तन्त्रसारोक्तं तन्मात्रकान्यासः ॥

सहस्राक्षः पुं इन्द्रः । इत्यमरः ॥ विष्णुः । यथा । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । इति पुरुषसूक्तं ॥

सहस्री पुं सहस्रगणो बली । तत्पर्य्यायः । साहस्रः २ । इत्यमरः ॥ दे हाजरा इति ख्याते ॥ ये सहस्रेण सहस्रसंख्येन गजादिना बलिनः सैन्यवन्तः ते । सहस्रं बलानि सन्त्येषामिति अस्त्यर्थे विकारसंघेत्यादिनाशे नैकाज्जादिति इनिच रूपद्वयं । इति भरतः ॥

सहा स्त्री हूलकुमारी । मुद्गपर्णी

इत्यमरः ॥ नखभेषजं ॥ हेमोत्पला। पृथिवी। इतिमेदिनी। शुक्लकिराटी। सर्पकंकाली। इति शब्दचन्द्रिका ॥ राम्ना। स्वर्णक्षीरी। पीतदंडोत्पला। इति रत्नमाला। तरणीपुष्पं। इति राजनिर्घण्टः ॥

सहाः पुं अग्रहायणमासः। इत्यमरः। हेमन्तकालः ॥ इति मेदिनी ॥

सहाचरः पुं पीतकिराटी। इति शब्दरत्नावली। सहचरश्च ॥

सहायः पुं अनुकूलः। तत्पर्य्यायः। अनुप्लवः २ अनुचरः ३ अभिसरः ४ इत्यमरः ॥ राज्ञां सहाया यथा। सद्वृत्तास्तथा प्राज्ञाः सततं प्रतिमानिताः। राज्ञा सहायाः कर्त्तव्याः पृथिवीं जेतुमिच्छता। इति मात्स्ये १८९ अध्यायः ॥

सहायता स्त्री सहायानां समूहः ॥ इत्यमरः। साहाय्यञ्च ॥

सहायत्वं क्ली सहायता। सहायस्य भावः। सहायशब्दाद्भावे त्व प्रत्ययेन निष्पन्नं ॥

सहारः पुं आम्रवृक्षः। इत्युणादिकोषः। महाप्रलयः। इति हलायुधः ॥

सहारोग्यः त्रि नीरुक्। इति हेमचन्द्रः ॥

सहार्द्दः त्रि सप्रेमः। स्नेहयुक्तः। हार्द्देन सह वर्त्तमानः ॥

सहितः त्रि समभिव्याहृतः। संयुक्तः। सहशब्दात् इतच् प्रत्ययेन सहधातोः क्त प्रत्ययेन च निष्पन्नः। इति सिद्धान्तकौमुदी ॥ संहितः। सम्यक् हितः ॥ इति मुग्धबोधव्याकरणं। हितेन सह वर्त्तमानश्च ॥

सहिता त्रि सहनशीलः। सोढा। सहधातोः तृच् प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी।

सहित्रं क्ली सहनकरणं। सह्यते अनेनेति सहधातोः त्रिन् प्रत्ययेन निष्पन्नं। इति व्याकरणं ॥

सहिष्णुः त्रि सहनशीलः। तत्पर्य्यायः। सहनः २ क्षन्ता ३ तितिक्षुः ४ क्षमिता ५ क्षमी ६ इत्यमरः ॥

सहिष्णुता स्त्री सहिष्णोर्भावः। तत्पर्य्यायः। तितिक्षा २ क्षमा ३ क्षान्तिः ३ इति जटाधरः ॥

सहुरिः पुं सूर्य्यः। इत्युणादिकोषः ॥

सहूरिः स्त्री पृथिवी। इति सिद्धान्तकौमुद्यां उणादिवृत्तिः ॥

सहृदयः त्रि प्रशस्तमनाः। इत्यमरटीकायां भरतः ॥

सहृल्लेखं क्ली विचिकित्सितान्नं यथा। विचिकित्सान्तु हृदये अन्नं यस्मिन् प्रजायते। सहृल्लेखन्तु विज्ञेयं पुरीषन्तु स्वभावतः। इति प्रायश्चित्तविवेकः ॥

सहोक्तिः स्त्री अलंकारविशेषः। यथा। सहोक्तिः सहभावेन भासते जनरंजनः ॥ दिगन्तमगमत्तस्य कीर्त्तिः प्रत्यर्थिभिः सह ॥ इति चन्द्रालोकः ॥

सहोटजः पुं मुनीनां पर्णशाला। यथा। मुनीनाञ्च विकुसापर्णोटज सहोटजौ। इति हारावली ॥

सहोढः पुं द्वादशविधपुत्रान्तर्गतपुत्रविशेषः। इति जटाधरः। या गर्भिणी संस्क्रियते ज्ञाताज्ञातापि वा सती। वोढुः स गर्भो भवति सहोढ इति चोच्यते ॥ इति मानवे ८ अध्यायः ॥ या गर्भवती अज्ञातगर्भा ज्ञातगर्भा वा परिणीयते तस्य गर्भे तस्यां जातः परिणेतुः पुत्रो भवति सहोढ इति व्यपदिश्यते। इति कुल्लूकभट्टः ॥

सहोदरः पुं एकमातृगर्भजातभ्राता। तत्पर्य्यायः सहजः २ सोदरः ३ भ्राता ४ सगर्भः ५ समानोदर्य्यः ५ सोदर्य्यः ६ इति जटाधरः ॥

सहोरः त्रि साधुः। इत्युणादिकोषः ॥

सहोवलं क्ली दौरात्म्यं। इति केचित् ॥

सह्यं क्ली आरोग्यं। साम्यं समपुरं। इति शब्दरत्नावली

सह्यः पुं पर्वतविशेषः। इति मेदिनी। स तु पुनाख्यदेशस्य उत्तरपश्चिमदिशि वर्त्तते ॥

सह्यः त्रि सोढव्यः। सहनीयः इति मेदिनी ॥

सक्षमः त्रि क्षमताविशिष्टः। क्षमाविशिष्टः। क्षमेण क्षमया वा सह वर्त्तमानः। इति बहुव्रीहिसमासनिष्पन्नः ॥

सक्षारः त्रि लवणयुक्तः। क्षारेण सह वर्त्तमानः। इति बहुव्रीहिसमासनिष्पन्नः ॥

सा स्त्री गौरी। लक्ष्मीः। इति
शब्दरत्नावली। पूर्वोक्तपरा
मर्शविषयीभूता। प्रसिद्धा।
इति स्त्रीलिंग तद्शब्दस्य प्र
थमैकवचन निष्पन्ना। इति
व्याकरणं ॥
सांख्यं क्ली षड्दर्शनांतर्गत
दर्शनशास्त्रविशेषः। तत्पर्य्या
यः। कापिलं २ इति हेमचंद्रः।
यथा। पंचमः कपिलो नामसि
द्धेशः कालविप्लुतं। प्रोवाचा
सुरये सांख्यं तत्वग्रामविनि
र्णयं। इतिश्रीभागवते १ स्कं
धे ३ अध्यायः। अपिच। सांख्यं
संख्यात्मकत्वाच्च कपिलादि
भिरुच्यते। इतिमात्स्ये ३ अध्या
यः। अस्यव्युत्पत्तिर्यथा। सम्य
क् ख्यायते प्रकाश्यते वस्तुत
त्व मनयेति संख्या सम्यक्
ज्ञानं तस्यां प्रकाशमान मात्म
तत्वं सांख्यं। इति श्रीभगवद्
गीता टीकायां श्रीधरस्वामी
अथसांख्यं व्याख्यायते परिणा
मवादे। परिणामिनि ज्ञाते जगत्
के कथंकारं विवर्तवादव्या
ख्यानीयो भवेदिति तेषामा
क्षेपः संक्षेपेण हि सांख्यशा

स्त्रे चतस्रो विधाः संमाख्येते। क
श्चिद्विकृतिरेव कश्चिद्विकृतिः
प्रकृतिश्च। कश्चिदनुभव इति
तत्र केवला प्रकृतिः॥ प्रधान
पदेन वेदनीया मूल प्रकृतिः
नासावन्यस्य कस्यचिद्विकृतिः
प्रकरोतीति प्रकृति रिति व्युत्
पत्त्या सत्व रज स्तमो गुणा-
नां साम्यावस्थाया अभिधाना
त्। तदुक्तं। मूलप्रकृति रविकृ
तिरिति। मूलंचासौ प्रकृतिश्चे
ति मूलप्रकृतिः महदादेः कार्य्य
कलापस्यासौ मूलं न त्वस्य प्रधा
नस्य मूलांतर मस्ति अनव-
स्थापातात्। नच बीजांकुरवदन
वस्थादोषो न भवति इति वाच्य
प्रमाणाभावादिति भावः। प्रकृ
तयश्च महदहंकार तन्मात्राणि
तदप्युक्तं। महदाद्याः प्रकृति-
विकृतयः सप्तेति। अस्यार्थः
प्रकृतयश्च ता विकृतयश्चेति
प्रकृतिविकृतयः सप्त महदादी
नि तत्वानि। तत्रांतःकरणादिप
देनेय महत्तत्व महंकारप्रकृ
तिः मूलप्रकृतेस्तु विकृतिः। एव
महंकारतत्वमभिमानापरनाम
धेयं महतो विकृतिः प्रकृतिश्च

तदेवाहंकार तत्वं तामसं स
त्वंचतन्मात्राणां सूक्ष्माभिधा
नं तदेव सात्विकं सत् प्रकृति
रेकादशेंद्रियाणां बुद्धींद्रियाणां
चक्षुःश्रोत्र घ्राण रसना त्वगा-
ख्यानां कर्मेंद्रियाणां वाक्पाणि
पादपायूपस्थाख्यानां मुभयात्म
कस्यमनसश्च रजस स्तूभयत्र क्रि
योत्पादन द्वारेण कारण मस्ती
ति वैयर्थ्यं। तदुक्त मीश्वर कृ
ष्णेन। अभिमानोऽहंकार स्तस्मा
त् द्विविधः प्रवर्तते सर्गः। एका
दशकश्च गण स्तन्मात्रा पंचकं
चैव। सात्विक मेकादशकः प्र
वर्तते वैकृतादहंकारात्। भूता
दे स्तन्मात्रः सतामस स्तैजसा
दुभयं। बुद्धींद्रियाणि चक्षुःश्रो
त्र घ्राणरसना त्वगाख्यानि वा
क्पाद पाणि पायूपस्थाख्यानि
कर्मेंद्रियाण्याहुः। उभयात्मक
मत्रमनः संकल्प विकल्पात्मक
मिंद्रियं चेति। विकृतंच तत्वैको
घृणामाचार्य्य वाचस्पतिभिः कि
मवला विकृतयस्तु वियदादी
नि पंचभूतानि। एकादशेंद्रिया
णि च। तदुक्तं षोडशकस्तु विका
र इति षोडश संख्यावच्छिन्नो ग

णः षोडशको विकार एव न प्रकृ
तिरित्यर्थः। यद्यपि पृथिव्याद
यो गो घटादीनां प्रकृतिस्तथा
पि न ते पृथिव्यादिभ्यस्तत्वांतर
मिति न प्रकृतिः। तत्वांतरोपादा
नत्वंचेह प्रकृतित्व मभिमतं
गो घटादीनां स्थूलत्वेंद्रियग्रा
ह्यत्वयोः समानत्वेन तत्वांतर
त्वाभावः। तत्र शब्दस्पर्श रूप
रस गंधतन्मात्रेभ्यः पूर्व पूर्व स
स्वभूतसहितेभ्यः पंच महाभू
तानि वियदादीनि क्रमेणैकद्वि
त्रि चतुःपंचगुणानि जायंते।
इंद्रियसृष्टिस्तु प्रयोगेणोक्ता।
उक्तंच। प्रकृतेर्महान् ततोऽहंका
रः तस्माद्गणश्च षोडशकः तस्मा
दपि षोडशकात् पंचभ्यः पंचभू
तानीति। अनुभवात्मकः। पुरुषः
तदुक्तं। न प्रकृति नं विकृतिः पु
रुष इति। पुरुषस्तु कूटस्थो-
नित्यः परिणामी न कस्यचित्
प्रकृति र्नापि विकृतिः कस्यचि
दित्यर्थः। एतस्यंच विंशति त
त्वं साधकत्वेन प्रमाणत्रयमभि
मतं। तदप्युक्तं। दृष्ट मनुमानमा
प्तवचनं सर्वप्रमाण सिद्धत्वात्
त्रिविधं प्रमाण मिष्टं प्रमेयसि

ष्ठिः प्रमाणाद्धीति। इह कार्य्य
कारणभावे चतुर्द्धा विप्रतिप
त्तिः प्रसरति। असतः सज्जायत इ
ति सौगताः संगिरंते। नैयायिका
दयः सतोऽसज्जायते इति।
वेदांतिनः सतो विवर्त्तः कार्य्य
जातं न वस्तु सदिति। सांख्याः
पुनः सतः सज्जायत इति। त
त्रासतः सज्जायत इति न प्रा
माणिकः पक्षः। असतो निरु
पाख्यस्य शशविषाणवत् का
रणत्वानुपपत्तेः तुच्छातुच्छयो
स्तादात्म्यानुपपत्तेश्च नापि स
तोऽसज्जायते कारकव्यापारा
त् प्रागसतः शशविषाणवत्
सत्तासंबंधलक्षणोत्पत्तेः। नहि
नीलं शिल्पसहस्रेणापि पीतं क
र्त्तुं पार्य्यते। ननु सत्वासत्वे घट
स्य धर्म्माविति चेत्तथाप्यस
ति धर्म्मिणि तद्धर्म्म इति व्यपदेशा
नुपपत्त्या धर्म्मिणः सत्वापत्तेः। त
स्मात् कारकव्यापारात् प्राग
पि कार्य्यं सदेव सतश्चाभिव्य
क्तिरुपपद्यते। यथा पीडनेन ति
लेषु तैलस्य दोहनेन सौरभे
यीषु पयसः। असतः करणे
किमपि निदर्शनं रूपयते किंच

कार्य्येण कारणं संबद्धं तज्ज
नकं असंबद्धं वा प्रथमे कार्य्य
स्य सत्वमायातं सतोरेव संबं
ध इति नियमात्। चरमे सर्व्वं का
र्य्यजातं सर्व्वस्माज्जायेत असंब
द्धत्वाविशेषात्। तदाहुः सांख्या
चार्य्याः असत्वान्नास्ति सं
बंधः कारणैः सत्वसंगिभिः।
असंबद्धस्य चोत्पत्तिमिच्छतो
न व्यवस्थितिरिति। अथैवम
नुषेयसंबद्धमपि तदेव जनयति
यत्र यच्छक्तं शक्तिश्च कार्य्य दर्श
नोन्नेयेति तेन संगच्छते। तिले
षु तैलजननशक्तिरित्यत्र तैलस्या
सत्वे संबद्धत्वासंबद्धत्व विकल्प
न तच्छक्तिरिति निरूपणायोगा
त् कार्य्य कारणयोरभेदाच्च। का
र्य्यस्य सत्वं कारणात्पृथक् नभ
वति पटः स्वतंतुभ्यो न भिद्यते तद्ध
र्म्मत्वान्नयदेवं नतदेवं यथा गोर
श्वः। तद्धर्म्मश्च पटः तस्मान्नार्थांतरं
तर्हि प्रत्येकं तंतव एव प्रावरणकार्य्यं
कुर्य्युरिति चेन्न संस्थानभेदेनावि
र्भूतपटभावानां प्रावरणार्थ
क्रियाकारित्वोपपत्तेः। यथा हि
कूर्म्मस्यांगानि कूर्म्मशरीरे निवि
शमानानि तिरोभवंति निःसर

न्ति चाविर्भवंति एवं कारणात्
त्वादेः पटादयो विशेषा निःसरं
त आविर्भवंत उत्पद्यंत इत्युच्यं
ते निविशमाना स्तिरोभवंतो
विनश्यंतीत्युच्यंते न पुनरसता
मुत्पत्तिः सतो वा विनाशः। य
थाह भगवद्गीतायां। नासतो
विद्यते भावो नाभावो विद्यते स
त इति। ततश्च कार्य्यानुमाना
त्तत् प्रधानसिद्धिः। तदुक्तं।
असदकरणादुपादाने ग्र
हणात् सर्व्वसंभवात्। शक्त
स्य शक्यकरणात् कारणभा
वाच्च सत्कार्य्यमिति नापि सतो
ब्रह्मतत्वस्य विवर्त्तः प्रपंचः बा
धानुपलंभात्। अपि ह्यनारोप्य
योः चिज्जडयोः कलधौत रौप्या
दिवत् सारूप्याभेदेनापि संभ
वाच्च। तस्मात् सुखदुःखमो
हात्मकस्य तथाविधकारण
मवधारणीयं। तथा च प्रयोगः
विमतं भावजातं सुखदुःखमो
हात्मककारकं तदन्वितत्वात्
यत् येनान्वीयते तत्तत्कार
णकं यथा रुचकादिकं सुवर्णा
न्वितं सुवर्णकारणकं तथा चेदं
तस्मात्तथेति तत्र जगत्कारणेयं

सुखात्मकता तत्सत्वं। या दुः
खात्मकता तद्रजः। या च मोहा
त्मकता तत्तम इति त्रिगुणात्मक
कारणसिद्धिः। यथा हि प्रत्येकं
भावास्त्रैगुण्यवंतोऽनुभूयंते। य
था मैत्रदारेषु सत्यवती मैत्रस्य सु
खमाविर्भवति तं प्रति सत्वगु
ण प्रादुर्भावात्तत् सपत्नीनां दुः
खं ताः प्रति रजोगुण प्रादुर्भावा
त् तामलभमानस्य चैत्रस्य मोहो
भवति तं प्रति तमोगुण सद्भा
वात्। एवमन्यदपि घटादिकं
लभ्यमानं सुखं करोति परैर
पि क्रियमाणं दुःखाकरोति उ
दासीनस्यापेक्षाविषयत्वेनोप
तिष्ठते उपेक्षाविषयत्वं नाम मोहः
मुह वैचित्ये इत्यस्माद्धातोर्मोह
शब्दनिष्पत्तेः उपेक्षणीयेषु चि
त्तस्यानुदयात्तस्मात् सर्व्वभाव
जातं सुखदुःखमोहात्मकं त्रि
गुण प्रधानकारणकमवगम्य
ते। तथा च श्वेताश्वतरोपनिषदि श्रूय
ते। अजामेकां लोहितशुक्लकृ
ष्णां बह्वीः प्रजाः जनयंतीं सरू
पाः। अजो ह्येको जुषमाणोऽनु
शेते जहात्येनां भुक्तभोगामज
ोऽन्य इति। अत्र लोहितशुक्ल



कृस्य शाह्यं रंजकत्व प्रकाश
कत्वावरकत्व साधर्म्यात् रजःस
त्वतमोगुणत्व प्रतिपादनपरः ।
नन्वचेतनं प्रधानं चेतनानधि
ष्ठितं महदादि कार्ये न व्याप्रि·
यते अतः केनचित् चेतनाधि
ष्ठात्रा भवितव्यं । तथाच सर्वा
र्थदर्शी । परमेश्वरः स्वीकर्तव्यः स्या
दिति चेत् । तदसंगतं अचेतनस्य
यथा वत्सविवृद्ध्यर्थमचेतनं क्षी
रं प्रवर्तते ॥ यथाच जल मचेतनं
लोकोपकाराय प्रवर्तते । तथा
च प्रकृति रचेतनापि पुरुष वि
मोक्षाय प्रवर्त्स्यति । तदुक्तं । व
त्स विवृद्ध्यर्थं क्षीरस्य यथा प्र
वृत्ति रज्ञस्यः पुरुष विमोक्ष नि
मित्तं तथा प्रवृत्तिः प्रधानस्ये
ति । यत्तु परमेश्वरः करुण·
या प्रवर्तक इति परमेश्वरास्ति
त्ववादिनां डिण्डिमः स प्रायेण
गतः विकल्पानुपपत्तेः । स किं
सृष्टेः प्राक् प्रवर्तते सृष्ट्युत्तर·
कालेवा । आद्ये शरीराद्यभावेन
दुःखानुत्पत्तौ जीवानांदुःखप्र
हाणेच्छानुपपत्तिः । द्वितीयेप
रस्पराश्रय प्रसंगः । करुणया
सृष्टिः सृष्ट्या कारुण्य मिति·
स्मादचेतनस्यापि चेतनानधि
ष्ठितस्य प्रधानस्य महदादिरू
पेण परिणामः पुरुषार्थ प्र
युक्त प्रधान पुरुष संयोगनि
मित्तः । यथा । निर्व्यापारस्याप्य
यस्कसन्निधानेन लोहितस्य
व्यापारः । तथा निर्व्यापारस्य पु
रुषस्य सन्निधानेन प्रधान व्या
पारो युज्यते । प्रकृति पुरुष
संबंधश्च पंग्वंधवत् परस्परापे
क्षानिबंधनः । प्रकृति र्हि भोग्य
तया भोक्तारं पुरुषमपेक्षते ।
पुरुषोपि भेदाग्रहाद्बुद्धिच्छाया
पत्त्या तद्गतं दुःखत्रयमात्मन्य
मानः कैवल्य मपेक्षते । तत
प्रकृति पुरुष विवेक निबंधनः
न च तदंतरेण युक्त मिति कैव
ल्यार्थं पुरुषः प्रधान मपेक्षते
यथा खलु कौचित् । पंग्वंधौ प
थि सार्थेन गच्छंतौ दैवकृतादु
पप्लवात् परित्यक्तसार्थौ मंदम
न्दमितस्ततः परिभ्रमंतौ भया
कुलौ दैववशात् संयोग मुप
गच्छेतां । तत्रचांधेन पंगुः स्कं
धे समारोपितः पंगुदर्शितेन मा
र्गेणांधः समीहितं स्थानं प्रा
प्नोति पंगुरपि स्कंधाधिरूढः तथा

परस्परापेक्ष प्रधान पुरुषनिबं
धनः सर्गः पुरुषस्य दर्शनार्थं कै
वल्यार्थं तथा प्रधानस्य पंग्वंध
वत् उभयो रपि संबंधस्तत्कृतः
सर्गः इति । ननु पुरुषार्थनिबं
धना भवतु प्रकृतेः प्रवृत्तिः नि
वृत्तिश्च कथमुपपद्यत इतिचे
दुच्यते यथा भर्त्तृदृष्टदोषास्वै
रिणी पुन भर्त्तारं नोपैति यथा
वा कृतप्रयोजना नर्तकी नर्त·
ते तथा प्रकृति रपि यथोक्तं
रंगस्य दर्शयित्वा निवर्तते नर्त
तकी यथा नृत्यात् पुरुषस्य
तथात्मानं प्रकाश्य निवर्तते प्र
कृतिरिति । तदर्थं निरीश्वर·
सांख्य शास्त्र प्रवर्तक कपिला
नुसारिणां मतमुपन्यस्तं । इति
माधवाचार्यकृते सर्वदर्शनसंग्र
हे सांख्यदर्शनं ॥ अस्यचत्वा
रो ग्रथ्यायाः । तत्र प्रकृतिपु
रुषयो रूभयोः सृष्टिकर्तृत्वं ।
ग्रंथ पुरुन्यायेन स्थापितं ।
तत्वानांसंख्यानंचकृतं । इति
केचित् ॥
सांघातिकः त्रि सम्यक्प्रकारे
णहननकारकः मारात्मकः । सं
घातशब्दात् ठिक प्रत्ययेन नि·
ष्पन्नः । जन्मनक्षत्रावधिक षो
डशनक्षत्रे । यथा । जन्माद्येक
मेनतोपिदशमं सांघातिकमे
कोनविंशं । तत्फलं । देहद्रविण
वेघुनांहानिः सांघातिके तथा
इति ज्योतिस्तत्वे ॥
सांदृष्टिकं क्ली सद्यःफलं । इ
त्यमरः । दृष्टिपरिकल्पनात्प्रायः
यथा । दौहित्रोत स्वसंतानाभा
वे पित रधिकारवत् दौहित्रो
ते पितृसंतानाभावे पितामः
हाधिकारस्य सांदृष्टिकन्याय
सिद्धत्वाच्च । यथा पित्रभावेमा
ता तथा पितामहाभावे पितामः
हीति सांदृष्टिकन्यायेन पिता
मह्याधिकारस्य सिद्धत्वाच्च ॥
इतिश्रीकृष्णतर्कालंकारकृत
क्रमसंग्रहः ॥
सांयात्रिकः पुं पोतवणिक्
इत्यमरः । द्वीपांतरगामिनि व
णिग्जने । संयात्रो याति द्वीपां
तरगमनद्वति यत्नसाध्य मिति
मेः स्त्रियामाप् संयात्रा द्वीपांत
र गमने तदस्य प्रयोजनमिति
विकार संयेति ठिकः । सम्यक्
यात्रा संयात्रा तया व्यवहरती
ति ष्ठक्काद् इति ठिको वा ।

इतिभरतः ॥
सांयुगीनः त्रि युद्धकुशलः। रणे
साधुः। इत्यमरः ॥
सांराविणं क्ली इहस्यसम्यक्
प्राहुः। इतिमुग्धबोधव्याकरणं
संपूर्वरुल शब्दे भावे णिनिण्
ताद्धेतौ संराविणं इति स्थिते
ततःस्वार्थे सेणि इत्ये त्रियायच
इति वृद्धौ ययो र्लोप इत्यका
रलोपे सांराविणं इहस्यसम्य
क् प्राहो व्याम इत्यर्थः॥ इति
तट्टीकायां दुर्गादासः॥ सांव
त्सरः पुं गणकः। इत्यमरः॥
संवत्सरसंबन्धिनि त्रि॥ सांवत्
सरिकः त्रि संवत्सरेभवः॥
संवत्सरं व्याप्यभूतः॥ प्रतिव
र्षकर्तव्यश्राद्धे। यथा। अथ
सांवत्सरिकश्राद्धे। तत्र गोभि
लः। मृतऽह्नि संवत्सरे संव
त्सरे प्रेतायान्नं दद्यात् यस्मि
न्नहनि प्रेतः स्यात्। इति॥
मृत ऽह्नि सपिण्डीकरणान्त
श्राद्धानि मित्रादाद्य संवत्स
राद्दूर्द्धं संवत्सरे संवत् सरे प्रति
वर्षं यस्मिन्नहनि मृत स्तस्मि
न्नहनि मृताय दद्यात्। व्याघ्रः
प्रतिसंवत्सरं चैव मेकोद्दिष्टम्

न्नाहनि। एतेन सपिण्डीकर
णापकर्षे आद्यसंवत्सरेऽपि
मृताहे श्राद्धान्तरं कर्त्तव्यमि
ति मैथिलोक्तं हेयं। यत्तु मा
ह हेमाद्रि धृतं वचनं। पूर्णसं
वत्सरे श्राद्धे षोडशे परिकीर्त्ति
ते तेनैवच सपिण्डत्वं तेनैवा
ह्निक मिष्यते। अत्र पूर्णसंवत्
सर क्रियमाण श्राद्धाद्यपोभ
य निर्वाह स्तथापकृष्टसपि
ण्डीकरणे श्राद्धाद्युभयनिर्वा
हो न पूर्णसंवत्सरे श्राद्धिका
न्तरे। एवं पंचदश श्राद्धेष्वन्त्ये
मत्स्यपुराणे। ततःप्रभृति सं
क्रान्तावुपरागादि पर्वसु। त्रि
पिण्डमाचरेत् श्राद्ध मेकोद्दिष्टं
मृताहनि। ततः प्रेतत्वपरीहा
रात् त्रिपिण्डं त्रैपुरुषं। निरूप
पद मृताहशब्दः मृतसंबन्धि
मास पक्ष तिथिविशेष परः
उपपदात् क्वचित्तिथिविशेष
मात्रपरः। यथा मृताहे प्रतिमा
सं कुर्य्यादित्यादौ। अगावः। सपि
ण्डीकरणादूर्द्धं यत्र यत्र प्रदीय
ते।तत्र तत्र त्रयं कुर्य्यात् वर्जयित्वा
मृताहनि। अमावास्या त्वयोश्च
स्य प्रेतपक्षेऽथ वा पुनः॥

सपिण्डीकरणादूर्द्धं तत्र प्रोक्तः पा
र्वणोविधिः। त्रयं संप्रदानानां
त्रयं कुर्य्यात् त्रिभ्यो दद्यात् इ
त्यर्थः। मृताह पर्युदस्त त्रिदैव
तत्वस्य प्रतिप्रसव माह। अमा
वास्यामिति। प्रेतपक्षोऽत्रपितृ
पक्षः अश्वयुक्कृष्णपक्ष इति
यावत्। न तु कृष्णपक्षमात्रं कृष्ण
पक्षमासान्यपरत्वे अमावास्याप
दवैयर्थ्यापत्तेः। पितृपक्षे विशेष
यति हेमाद्रि माधवाचार्य्यधृतं
नागरखण्डे। नभो वाऽथ नभ
स्यो वा मलमासो यदा भवेत्
सप्तमः पितृपक्षः स्यादन्यत्रैव
तु पंचमः। अत्र श्रावण भाद्र
यो रन्यतरस्य मलमासत्वे अ
षाढ्यपेक्षया सप्तम पक्षस्य
पितृपक्षत्वात्। अत्र मृतस्यैव
प्रेतपक्ष मृतत्वे न तु मलमास
भाद्रकृष्णपक्षमृतस्य। ततश्च मृत
स्य मृतस्य वर्षान्तरे अश्वयुक्कृष्ण
पक्षेऽपि तत्कृष्णाहकरणे न पार्व
णं। किन्त्वेकोद्दिष्टमिति। अत्रपा
र्वणेन विधिः पार्वणेतिकर्त्तव्य
ता कैकोद्दिष्टविधिरिति नव्यवर्द्ध
मानप्रभृतयः। तत्र एवं वचनो
क्तै त्रैपुरुषिकस्य मृताहे पर्युर

स्तस्य पार्वणे विधि रित्यनेन
प्रतिप्रसवात्। तस्मादत्र मते
दैवेकोद्दिष्टे न युक्तं किन्तु त्रैपु
रुषिके न तु षाट्पुरुषिके।
कर्ष समन्वितं मुक्त्वा तथाद्यं
श्राद्धषोडशं। प्रत्याब्दिकंच शे
षेषु पिण्डाः स्यु षडिति स्थि
तिः। इति छन्दोगपरिशिष्ट वच
नेन प्रत्याब्दिक व्यतिरेकेण
षट्संख्यानियमात्। एवममा
वास्यादिमरणनिमित्तेन मातु
रपि प्रत्याब्दिके पार्वण विधि
नैव। अपुत्रा ये मृताः केचित्
स्त्रियो वा पुरुषाश्च ये। तेषा
मपि च देयं स्यादेकोद्दिष्टं न
पार्वणं। इत्यापस्तम्बवचने अ
पुत्रा इति विशेषणोपादानात्
सपुत्राणां पार्वणमनुष्ठाना
त्। एतच्च मात्रादि त्रितय दैव
तेकार्य्यं। मातृपितामह्योः प्रपि
तामह्योश्च एवं वत् ब्राह्मण
भोजयित्वा इत्यप्येककार्य्यं ते
ष्वादरवानात्। अवसान दिनमि
त्रेनपार्वण विधिना च्छन्दोगै
रपि मात्रादि त्रिकाणां श्राद्धं क
र्त्तव्यं। तथाच शुद्धिःएष्वपाद्व
मानदिनादरेन। इति छन्दोगपरि

शिष्टवचने विशेषतः प्रतिप्रस
रात् एवं सपिंडीकरणेऽपि । एत
च्चमृतानां पार्वणे माता पित्रो देव
तथा च होमाद्विष्टे कात्याय
नवचने । सपिंडीकरणार्द्धं पित्रो
देव हि पार्वणं । पितृव्य भ्रातृ
मातृणा मेकोद्दिष्टं सदैव तु
मातृपदं सपत्नीमातृपरं । स
पत्नीमाचित्यत्र मातृपदस्य राज
दंतादित्वात् परनिपातः । तत
श्च वाक्ये मातृसपत्नीति तत्र
योज्यं किंतु सपत्नीमातृ वित्या
दिकं । एवं साग्निकौरस क्षेत्रजा
भ्यां मृताहे पार्वणं कर्त्तव्यं ।
औरस क्षेत्रजौ पुत्रौ विधिना
पार्वणेन तु । प्रत्यब्दमितरे कु
र्युरेकोद्दिष्टं सुता दश । इति
जावाल वचनस्य । यत्र यत्र प्र
दातव्यं सपिंडीकरणात्परे । पा
र्वणेन विधानेन देयमग्नि
तात्सदा । इति मत्स्यपुराण वच
नस्यैकवाक्यत्वात् । उशनाच
प्रत्यहं दर्शवच्छ्राद्धं साग्निः कुर्वीत
वै द्विजः । एकोद्दिष्टं सदा कुर्य्या
न्निरग्निः श्राद्धदः सुतः ॥ अत्र
प्रागुक्तयुक्त्या प्रेतश्राद्धस्य ए
कोद्दिष्टत्वाभिधानात् सांवत्स
रिकश्राद्धे यदेकोद्दिष्ट पदमु
क्तं तत् प्रेतश्राद्ध धर्मग्राहि
त्वार्थं । ततश्च योग्यत्वादेका
ग्न्यादिलाभः । न तु यथा प्रेत
श्राद्धे पितृशब्द स्थाने प्रेतपदो
हः तथात्रापीति वाच्यं सांवत्
सरिके प्रेतत्वाभावात्तथा विधा
नानुपपत्तेः । एवं प्रतिसांवत्स
रिकश्राद्धे सर्वे धार्य्यकपदं श्रा
द्धौः प्रार्थने शेषभोजने च कर्त्त
व्यं ॥ रजस्वलायां विशेष यति
गौतमः । अपुत्रा तु यदा भा
र्य्या संप्राप्ते भर्त्तृ वार्षिके । र
जस्वला भवेत् सातु कुर्य्यात्
तत्पंचमे दिने । कुर्य्यात्कुर्य्याहमिति
शेषः । यत्तु श्राद्धचिंतामणौ ।
एकोद्दिष्टं त्रैवर्णिकेन सिद्धा
न्नेन कर्त्तव्यं । एकोद्दिष्टं तु क
र्त्तव्यं पाकेनैव सदा स्वयं । अ
भावे पाकपात्राणां तदहः स
मुपोषणं । इति लघुहारीतवच
नात् । पाकपात्राभावः पाकसा
मग्र्यभावोपलक्षकः । तदापि
नामश्राद्धं किंतूपोषणमेव श्रा
द्धस्थानीय मित्यर्थः । स्वयमि
त्यभिधानात् अपारवादिनापि
त्यद्वारा कारयितव्यं । अतएव

उपवासेनैव श्राद्धस्थानीयेन
तदकरणे प्रायश्चित्तेन वाकृत
कृत्यतया श्राद्धविघ्ने इत्यादि
वचनादपि नैकादश्या मनुष्ठान
मिति तन्न पितृत्वमे रजातत्वे
नैकादश्यां तदनुष्ठानस्यायुक्त
त्वात् । अन्यथा षोडश श्राद्धा
धिकारिणः कदाचिन्नथाते
शस्यैतानि न दीयंते प्रेतश्रा
द्धानि षोडश पिशाचत्वं ध्रुवं
तस्य दत्तैः श्राद्धशतैरपि । इति
यमवचनेन षोडशश्राद्धा भा
वे प्रेतत्वपरीहारो न स्यात् । त
स्मादुपवासो न श्राद्धार्थः किं
तु तदानीं तदकरण प्रायश्चि
त्तार्थः । यथा स्वकालाकृत सं
स्कारे प्रायश्चित्तं कृत्वा कालां
तरे तत्करणं तथात्रापि तद्दिने
उपवासं कृत्वा एकादश्यां श्रा
द्धं कर्त्तव्य मिति । एकोद्दिष्टत्वस्य
द्वारा कार्य्य मित्यत्रापि गोत्र
जेतरत्वेन विशेषणीयं । न क
दाचित् सगोत्राय श्राद्धे कार्य्य
सगोत्रजैः । इति प्रेतश्राद्धे ब्रह्म
पुराणात् । अत्र हीनगोत्रज
स्य साक्षात् कर्त्तृत्वे निषिद्ध
ते सगोत्रायेत्यसंबंधापत्तेः ।
तस्माद्गोत्रजैर्द्वारभूतैः सगो
त्राय श्राद्धं न कार्य्य मित्यर्थः
तथा च पर्य्युदासपक्षे गोत्रज
द्वारा कारयितव्य मिति स्वव्य
क्तमेव । प्रसज्यपक्षे तु अगोत्र
ज विशेषणे स्वरसात् गोत्रज
लाभः ॥ प्रेतश्राद्ध धर्म ग्राहि
त्वात् सांवत्सरिक मपि तथे
ति श्राद्धविवेकः । कल्पतरुरत्ना
करयोस्तु स्वगोत्रायेति पठिते
स्वसमानीये गोत्रे यस्य स स्वगो
त्रः विद्यमानगोत्र इत्यर्थः । यस्मै
श्राद्धं कर्त्तव्यं तस्य स्वगोत्रजेन वि
द्यमानैः स्वगोत्रजेन संख्यानीत
गोतेन राज्ञा श्राद्धं न कारयि
तव्य मिति व्याख्यातन्तु ॥ ए
तन्मते पुत्रिकादीनामस
गोत्रत्वेपि न निषेधः । वस्तुत
स्तु तत्पाठेपि कर्मधारयोपल
यावकुर्व्वीहे जघन्यत्वात् समा
नीयेन तत् गोत्रेचेति तस्मै
अन्यगोत्रजद्वारा श्राद्धं न कार्य्य
मित्यर्थः । अतो लघुहारीतवच
ने स्वयं पदं स्वगोत्रपरं । अन्य
था ब्रह्मपुराणोक्तागोत्रजप
देवैयर्थ्यापत्तेः ॥ एवं च भवि
ष्यपुराण प्रभासखंडयोः मृता

हनि पितु यस्तु नकुर्य्यात्श्रा
द्धमादरात्। मातुश्चैव वरारोहे
वत्सरान्ते मृताहनि नाहं त·
स्य महादेवि पूजां गृह्णामि
नोहरिः। मरीचिः। पंडिता ज्ञा
तिनो मूर्खा स्त्रियश्च ब्रह्मचारि
णः। मृताहे समतिक्रम्य चाण्डा
लेष्वभिजायते। इत्याभ्यां का
लमाधवीयधृताभ्यां वचनाभ्यां
सांवत्सरिक श्राद्धस्य मृताह
कर्त्तव्यत्वेनावश्यकत्वात् भवि·
ष्यन्मृताहे स्वयं कर्त्तव्यत्व संभा
वनारहितेन मृताहात्पूर्वका
लेऽपि प्रतिनिधीयते। प्रतिष्ठा
ग्निस्वदारेषु परिकल्प्यास्तिजे न
था। प्रवसेत् कार्य्यवान् विप्रो
वृत्यैवन चिरं क्वचित्। इति छं
दोगपरिशिष्टोक्त सायं प्रातर्हो
मयोतिनिधिवत्। पूर्वस्तिथौ ति
निधिकरणं पूर्व प्रकारदर्शनं·
क्रियते। न च पाकस्यांगत्वेन
प्रधानतिथिकर्त्तव्यत्वानियम इ
ति वाच्यं। व्रतोपवास नियमे घ
टिकैका यदा भवेत् सा तिथिः
सकला ज्ञेया पित्रर्थे चापरा·
ह्निकी। इति वचनेन मुहूर्त्तमात्र
लाभेऽपि कर्त्तव्यतोपदेशात् न
दानीं पाके तदसंभवात्। पव
मुदीच्यांगापेक्षभोजनेऽपि त
न्नियमः। इति श्राद्धतत्त्वं॥

सांवादिकः पुं नैयायिकः॥
इति जटाधरः॥ संवादस्ता
तेरिति॥

सांशयिकः त्रि संशयप्रयुक्तः
तत्पर्य्यायः। संशयापन्नमानसः २
इत्यमरः। संदिहानः ३। इति
जटाधरः॥ हे संशयविषयस्था
एवादौ। संशयमापन्नः। सां
शयिकः स्मिकः संशयमाप
न्नेमानसे यत्र स्याएवादौ स
तथा। संशय मापन्नं मानसं
यस्य सतथेति यद्वान्त पदार्थेन
संशयितेनवि पुरुषादावप्युपत
न्तप्रावृह्यप्रवृत्तिः स्यादितिभ
रतः।

सांस्थानिकः त्रि समान
देशीयः। इति सिद्धान्तकौमुदी।
संस्थानेयुक्तस्य॥

सांस्राविणं क्ली हतस्यवृत्तं
व्याप्य सम्यक्स्रावः। इति सं ति
प्रसावेत्यादि वृत्तिः॥

साकं अव्य सहार्थः। इत्यमरः॥

साकल्यं क्ली समुदायः। स
कलस्यभावः। सकलशब्दात्
स्य प्रत्ययेन निष्पन्नं॥

साकारः त्रि आकारविशिष्टः।
यथा। साकारं च निराकारं सगु
णं निर्गुणं प्रभुं। सर्वाधारं च स
र्वं च स्वेच्छारूपं नमाम्यहं॥
इति ब्रह्मवैवर्त्ते गणपतिखंडे
३१ अध्यायः॥

साकुरुंडः पुं वृक्षविशेषः। स
कुरुंडव इति गुर्जरदेशीयभा·
षा। तत्पर्य्यायः ग्रंथिफलः २
विकंटः ३ वस्त्रभूषणः ४ कुरुंडः
५ कर्बूरफलः ६ सकुरुंडः ७
अस्य गुणाः। कषायत्वं। रुचिका
रित्वं। दीपनत्वं। सारकत्वं॥
श्लेष्म वातनाशित्वं। वस्त्ररंज·
कत्वं। लघुत्वं च। इति राज
निर्घण्टः॥

साकेतं क्ली अयोध्यानगरं।
इति शब्दरत्नावली॥

साक्तुकः पुं यवः। इति सिद्धा
न्तकौमुदी। सक्तुसमूहे क्ली।
सक्तुसंबंधिनि त्रि॥

साक्षयः त्रि साक्षिसंबंधी। इति
सिद्धान्तकौमुदी॥

साख्यं क्ली सख्यं। इति धनं·
जयकोषः॥

सागरः पुं समुद्रः। इत्यमरः॥
सगरेण खनितत्वात् तस्याय
मितिसे सागरो ह्यस्यादिः।
क्षीरोदादिष्वप्युपमया सागरव्य
पदेशः इति भट्टाः। इति भरतः
सतुसप्तविधः। यथा। लवणः
क्षीरसंज्ञश्च घृतोदो दधिसंज्ञ
कः। सुरोदश्चेक्षुरसोदोच स्वाद्
दः सप्तमो भवेत्। चत्वारः सा
गराः ख्याताः पुष्करिणपश्चतः
स्मृताः॥ इत्याद्यं वह्निपुराणे
गणभेदनामाध्यायः॥
मृगविशेषः। इति शब्दचंद्रि
का। दशपद्मसंख्या। यथा।
विन्दुः खर्वो निखर्वश्च शंख
पद्मौ च सागरः। इति ब्रह्मा
ण्डपुराणे॥

सागरगामिनी स्त्री नदी। इ
ति त्रिकाण्डशेषः॥ स्थूलैला।
इति राजनिर्घण्टः॥

सागरनेमिः स्त्री पृथिवी।
इति हेमचंद्रः॥

सागरमेखला स्त्री पृथिवी
इति हेमचंद्रः॥

सागराम्बरा स्त्री पृथिवी।
इति हेमचंद्रः॥

सागरालयः पुं वरुणः।
इति शब्दमाला॥

सागरोत्थं क्ली सामुद्रलवणं।

इति राजनिर्घण्टः ॥
सांकले त्रि संकले निर्वृत्ते । संकलनाज्जाते । इति सिद्धांतकौमुदी ॥
सांकृतिः पुं मुनिविशेषः । स तु वैयाघ्रपद्यगोत्रस्य प्रवरः ॥ यथा वैयाघ्रपद्यगोत्राय सांकृतिप्रवराय च । अपुत्राय ददाम्येतत् सलिलं भीष्मवर्मणे इति तिथ्यादितत्त्वं ॥
सांख्यः पुं कपिलमुनिकृतदर्शनशास्त्रविशेषः । तत्पर्य्यायः कापिलः २ इति हेमचंद्रः ॥ तथा च । सांख्यं कपिलमुनिना प्रोक्तं संसारविमुक्तिकारणं हि । यत्रैताः सप्तति रार्य्या भाष्यं चात्र गौडपादकृतं । एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकंपया प्रददौ । आसुरिरपि पंचशिखाय तेन च बहुधाकृतं तंत्रं । शिष्यपरंपरयागतमीश्वरकृष्णेन चैतदार्य्याभिः । संक्षिप्तमार्य्यमतिना सम्यग्विज्ञाय सिद्धांते । सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितंत्रस्य । आख्यायिका विरहिताः परवाद विवर्जिताश्चापि । इति सांख्यप्रवचनभाष्ये ॥
सांगमः पुं संगमः । इत्यमरटीकायां भरतः ॥
सांग्रामिकः पुं संग्रामाय प्रभवति । सेनापतिः । संग्रामसंबंधे त्रि । इति सिद्धांतकौमुदी ॥
सांक्षेपिकः त्रि संक्षिप्तः । इति सिद्धांतकौमुदी । संक्षेपकारकः । संक्षेपशब्दात् ठिक्प्रत्ययनिष्पन्नः ॥
साचि अ तिर्य्यगर्थः । तत्पर्य्यायः । तिरः २ इत्यमरः ॥
साचिव्यं क्ली सचिवस्य भावः । सचिवशब्दात् भावे ष्य प्रत्ययेन निष्पन्नं ॥
साचिवादिका स्त्री श्वेतपुनर्नवा । इति रत्नमाला ॥
साचीकृते त्रि वक्रीकृते । इति सिद्धांतकौमुदी ॥
साजनः पुं कृकलासः । इति शब्दचंद्रिका ॥
साट त् क प्रकाशने । इति कविकल्पद्रुमः । द्वितीयस्वरयुक्तसकारादि रयं । असस्साटत् ॥ इति दुर्गादासः ॥
सात क्ली ब्रह्म । इति केचित् ॥

सात क सुखे । इति कविकल्पद्रुमः । दंत्यादिः । सातयः । सोऽनथा तुदयं । इति दुर्गादासः ॥
सातं क्ली सुखे । इत्यमरटीकायां भरतः । दत्तं । नष्टं । षणधातोः षोधातोश्च क्त प्रत्ययेन निष्पन्नं ॥
सातयः त्रि सुखजनकः । सातकसुखे इत्यस्मात् णौ श प्रत्ययेन निष्पन्नः । इति मुग्धबोधटीकायां दुर्गादासः ॥
सातला स्त्री चर्म्मकषा । इत्यमरः । स्नुहीविशेषः । सातसेहुंडभेदः । तत्पर्य्यायः । सप्तला २ सारी ३ विदुला ४ विमला ५ अमला ६ बहुफेना ७ चर्म्मकषा ८ फेना ९ दीप्ता १० विषाणिका ११ स्वर्णपुष्पी १२ पत्रत्वना १३ । अस्या गुणाः कफपित्तघ्नत्वं । लघुत्वं ॥ तिक्तत्वं कषायत्वं । विसर्पविष विस्फोट व्रण शोफनाशित्वं च इति राजनिर्घण्टः ॥
सातवाहनः पुं शालिवाहनराजः इति हेमचंद्रः ॥
सातिः स्त्री अवसाने दाने ॥ तीव्रवेदना । इत्यमरभरतौ ॥
सातिसारः त्रि अतिसाररोगयुक्तः । तत्पर्य्यायः । अतिसारकी २ ॥ इत्यमरः ॥
सातीलकः पुं सतीलकः । इत्यमरटीकायां रायमुकुटः ॥
सात्यकिः पुं वृष्णिवंशीयसत्यकपुत्रः । स तु श्रीकृष्णस्य सारथिः । तत्पर्य्यायः शैनेयः २ शिनेर्नप्ता ३ युयुधानः ४ । इति त्रिकाण्डशेषः यौधः ५ इति जटाधरः ॥
सात्यवतः पुं वेदव्यासः । इति त्रिकाण्डशेषः ॥
सात्यवतेयः पुं सत्यवतीसुतः वेदव्यासः । इति हलायुधः ॥
सात्वतः पुं बलदेवः । इति हेमचंद्रः । विष्णुः । इति त्रिकांडशेषः । विष्णुभक्तविशेषः । यथा । सत्वे सत्वा श्रयं सत्वगुणं सेवेत केशवं । योऽनन्यत्वेन मनसा सात्वतः समुदाहृतः । विहाय काम्यकर्मादीन् भजेदेकाकिनं हरिं । सत्यं सत्वगुणोपेतो भक्त्या तं सात्वतं विदुः ॥ मुकुंदपादसेवायां तन्नामश्रवणेपि च । कीर्त्तने च रतो भक्तो नाम्नः स्यात् स्मरणे हरेः । वेदनाद्वैनयो भक्तिरनिशं दा

स्यसख्ययोः । इति शब्दार्णवेसो-
यस्य हृत्स्थानेतस्य सात्वतः ॥
इति पाद्मोत्तरखण्डे ९९ अध्या
यः ॥ यदुवंशीयांशुराजपुत्रः ।
यथा । अंशोस्तु पुरुकुत्सोऽ
भूद्भजेयुस्तस्य तु विक्रमभाक् ।
अंशांशोः सात्वतो नाम विष्णु
भक्तः प्रतापवान् ॥ महात्मा
दाननिरतो धनुर्वेदविदांवरः ।
स नारदस्य वचनाद्वासुदेवार्च्च
नान्वितः । शास्त्रं प्रवर्त्तयामा
स कुण्ड गोलादिभिः श्रुतं ।
तस्य नाम्ना तु विख्यातं सा
त्वतं नामशोभनं । प्रवर्त्तते
महाशास्त्रं कुण्डादीनां हिता
वहं । सात्वतस्तस्य पुत्रोऽभूत्
सर्व्वशास्त्रविशारदः । पुण्य-
श्लोको महाराजस्तेन चैतत्प्र
कीर्त्तितं । सात्वतः सत्वसंपन्नः
कौशल्यान् सुषुवे सुतान् ॥
अंधकं वैमहाभोजं विष्णुं देवा
वृधं नृपं । इति कौर्म्मे यदुवं
शानुकीर्त्तने २२ अध्यायः ॥
सात्वताः पुं भूम्नि देशभेदः ॥
यथा । यदवस्तु दशार्हाः स्युः
सात्वताः कुकुराश्च ते । इति त्रि
काण्डशेषः ॥

सात्वती स्त्री नाटकवृत्तिविशेषः
यथा । अभिनेय प्रकाराः स्युर्भा
षाः षट् संस्कृतादिकाः । भारती
सात्वती कैशिक्यारभट्यो च वृ
त्तयः ॥ इति हेमचंद्रः ॥
शिशुपालमाता । इति केचित् ॥
सात्विकः पुं ब्रह्मा ॥ विविधभावा
नर्गतभावविशेषः । इति हेम-
चंद्रः । तस्य लक्षणं यथा ॥
सत्वात्कष्टे मनसि ये प्रभवंति
भावा स्ते सात्विका । इति वि
दुर्मुनिपुंगवास्ते । इति सर्व्वा
नंदः ॥ तेच यथा । स्वेदस्तंभोः
थरोमांचः स्वरभंगोऽथवेप-
थुः । वैवर्ण्य मश्रु प्रलय-
इत्यष्टौ सात्विका मताः ॥
प्रलयो मूर्छा । इति भरतः ॥
सात्विकः त्रि सत्वगुणनिष्पादि
तः । इत्यमरः । सत्वमंतोगुणःप्रा
णो वा तेन निष्पादितः सा
त्विकः स्वेदादिः सत्वप्राह्यात्
च ठेकादिति ठिकः । इति भरतः
सात्विकपुराणानि यथा ॥
वैष्णवं नारदीयंच तथा भाग
वतं शुभं । गारुडंच तथा
पाद्मं वाराहं शुभदर्शने ॥
सात्विकानि पुराणानि विज्ञेया

ति शुभानिवै ॥ सात्विकस्य
तयो यथा । वाशिष्ठंचैव हा
रीतं व्यासं पाराशरं । तथा ।
भारद्वाजं काश्यपंच सात्विकाः
शुक्तिदाः शुभाः । इति पाद्मोत्त
रखंडे ४२ अध्यायः । सात्विक
प्रियाहारा यथा । आयुःसत्व
बलारोग्य सुखप्रीति विवर्द्धनाः
रस्याः स्निग्धाः स्थिराहृद्या आ
हाराः सात्विकप्रियाः ॥ इति
श्रीभगवद्गीतायां १७ अध्यायः
सात्विककर्त्तृलक्षणं कर्त्तृश
ब्देद्रष्टव्यं ॥
सात्विकी स्त्री दुर्गा । इति श
ब्दरत्नावली । पूजाविशेषः । यथा
शारदी चंडिकापूजा त्रिविधा
परिगीयते । सात्विकी राजसी
चैव तामसी चेति तत् शृणु
सात्विकी जपयज्ञाद्यै र्नैवेद्यै
श्च निरामिषैः । माहात्म्यं भग-
वत्याश्च पुराणादिषु कीर्त्ति
तं । पाठस्तस्य जपः प्रोक्तः प
ठेद्देवीमनास्तथा ॥ इति दु
र्गोत्सवतत्वं ॥
सादः पुं विषादः ॥ शरणं ॥
गतिः ॥ षद्धातो र्घञ्प्रत्य
येननिष्पन्नः ॥

सादनं क्ली सदनं । इत्यमर
टीकायां भरतः ॥
सादनी स्त्री कटुकी । इति रा
जनिर्घण्टः ॥
सादिः पुं सारथिः । इति हेम
चंद्रः । योद्धा । इत्युणादिको
षः । अवसन्नः । वायुः । इति
संक्षिप्तसारोणादिवृत्तिः ॥
सादितः त्रि विषादितः । शा
रणंप्रापितः ॥ गमितः । इति
स्यंतषदधातोः क्तप्रत्ययेन
निष्पन्नः ॥
सादी पुं अश्वारूढः । इत्यमरः
गजारोहः ॥ रथारोहः ॥
इति मेदिनी ॥
सादृश्यं क्ली सदृशात्वं । तद्भि
न्नत्वे सति तद्गतभूयोधर्म
वत्वं । यथा चंद्रभिन्नत्वे सति चं
द्रगताह्लादकत्वादिमत्वं मुखे चं
द्रसादृश्यं । इति सिद्धांतकाव
अथ सादृश्यानि । वेणाः सर्पः
१ भ्रमरश्रेणिः २ केशपाश
स्य चामरः १ मयूरपक्षः २
धम्मिल्लस्य विधुंतुदः १ अंध
कारः २ सीमंतस्य मेघः १ पंथाः
२ दंडः ३ ललाटस्य अष्टमीचंद्रः
१ फलकं २ कपोलस्य चंद्रः १

मुकुरस्थले २ भ्रुवोः खड्गः १४
नुर्यष्टिः २ रेखा ३ पल्लवः ४
वल्लिः ५ दृशोः चकोरचक्षुः १ ह
रिणचक्षुः २ मदिरा ३ खंजनः
४ अंजने ५ कुमुदे ६ नीलपद्मे ७
प्रोष्ठीमत्स्यः ८ कर्णस्य दोला १
पाशः २ नासायाः वंशः १ केत
कीपुष्पकंटकः २ अधोमुखवल्ल
रीविः ३ चञ्चुः ४ तिलपुष्पं ५
दंडः ६ अधरस्य नवपल्लवं १ बिं
बफलं २ प्रवालः ३ दंतानां मु
क्ताश्रेणिः १ कुंदपुष्पं २ दाडिम
बीजं ३ हीरकं ४ स्मितस्य ज्यो
त्स्ना १ पुष्पं २ पीयूषं ३ । श्वासस्य
पद्मगंधः १ मुक्ताशुक्तितले २ ।
जिह्वायाः जवापुष्पं १ चंचलवस्त्र
२ वाण्याः कोकिलशब्दः १ भ्र
मरगुंजनं २ सुधा ३ मधु ४ वी
णाक्वाणः ५ । मुखस्य चंद्रः १ पद्मं
२ दर्पणं ३ । कंठस्य शंखः १ ।
चिबुकस्य दर्पणावृतं १ । अंसस्य
कुंभः १ बाह्वोः वल्ली १ मृणा
लं २ तरंगाः ३ शाखा ४ पाशः
५ । हस्तस्य मृणालादयः १ अंगु
ल्याः पल्लवं १ पद्मदलं २ चंपकपु
ष्पं ३ नवदलं ४ दीपः ५ । नखा
नां रत्नं १ तारकाः २ पुष्पं ३ चंद्रः ४

स्तनयोः पद्ममुकुले १ चक्रः २
हस्तिकुंभः ३ गिरिः ४ च
क्रवाकः ५ बिल्वयुग्मं ६ मध्य
स्य वरटकमध्यं १ सिंहमध्यं २ व
ज्रमध्यं ३ स्त्रीणां ब्रह्मं ४ । लोमश्रे
ण्या रेखा १ नीलकांतमणिशि
खा २ शैवाललता ३ भ्रमरलता
४ हस्तिशुंडा ५ नाभेः आवर्तः
१ पद्मं २ हृदः ३ विवरं ४ कूपः
५ । त्रिवल्याः तरंगः १ सोपानं
२ निश्रेणी ३ । जघनस्य पुलिनं
१ पीठः २ फलकं ३ । नितंबस्य
स्थलं १ पर्वतः २ पृथिवी ३ स्थ
लोत्पलं ४ महद्धस्तं ५ ऊर्वोः
कदलीकांडः १ करिकरः २ जं
घयोः स्तंभः १ । पादस्य पद्मं १
नवपल्लवं २ । गतेः हंसगमनं १
हस्तिगमनं २ खंजनगमनं ३
पुरुषस्त्रियोः यौचित्येन सादृश्य
वर्णनीयं । पुरुषरूपे कोपि क्व
चिद्विशेषो लिख्यते । स्कंधस्य
वृषस्कंधः १ वज्रं २ अश्वस्कंधः ३
बाह्वोः वृहत्सर्पः १ हस्तिशुंडाः
२ स्तम्भः ३ अर्गलदंडः । वक्षसः
शिला १ कवाटं २ । गतेः प्रम
त्तगजकृतिः १ । यशसः चंद्रकुं
द स्फटिकाप्रभृतिशुक्लवर्णपदा

र्थाः १ । प्रतापस्य अग्निः १ वाड
वाग्निः २ रविः ३ रविकिरणादिः
४ जवापद्म प्रभृति रक्तवर्णपदा
र्थाः ५ गुणस्य संस्कारः १ गोः २
हलबीजं ३ अंकुरः ४ शुक्लवर्ण
पदार्थाः ५ सामर्थ्यस्य महद्धस्ती १
सिंहविक्रमादिः २ नीतेः साध्वीस्त्री
१ प्रदीपज्वाला २ लतादिः ३ आ
ज्ञायाः वेदवाक्यं १ गुरूपदेशः २
उत्कटेच्छादिः ३ शासनस्य प्र
स्थकर्म १ स्थिरवस्तूनि २ पा
पस्य कर्दमः १ कलंकः २ अकी
र्तिः ३ कृष्णवर्णकेशमसीप्रभृ
तिवस्तूनि ४ अंधकारः ५ अकी
र्तेः मालिन्यं १ कृष्णवर्णवस्तूनि २
अंधकारः ३ कलंकिकायाः मेघः
१ भ्रमरः २ नीलकांतमणिः ३ क
ज्जलं ४ स्वर्गादिद्वयराहुजन्मभ्रमः
५ कृष्णवर्णपुष्पप्रभृतिः ६ स्थल
विशेषे कन्दर्पयशः ७ कामुका
यशः ८ कामिन्यपुष्पं ९ कज्ज
लस्य मेघादीपेलानि ९ । कर्पूरस्य
चंद्रः १ चंद्रकिरणाः २ कुन्दयूथि
कादिपुष्पं ३ हिरणीरपिंडः ४ वि
रहिणएरप्रभृतिः ५ मनोरथस्य
फलपुष्पादियुक्तवृक्षः १ कविबु
द्धिरचना २ आनंदस्य सुधासमुद्रः

१ ब्रह्मसाक्षात्कारादिः २ कामि
न्यवलोकनस्य नित्यसुखसाक्षा
त्कारः १ अमृतरसः २ पूर्णचं
द्रादिसाक्षात्कारः ३ अतिप्रियत
मवस्तुप्राप्तिः ४ ब्रह्मसाक्षात्कारः
५ अमृतस्य कामिन्यधरादिः १ सत्
काव्यं २ ब्रह्मसाक्षात्कारः ३ ।
विषस्य सापत्नीस्त्री विरहः १ पा
पं २ मलिनवस्त्रं ३ दुःखदवस्तु
४ ग्रीष्माग्निः ५ शीतकालीन
शीतोदकं ६ व्यभिचारिणीभार्या
७ विरहस्य अग्निः १ आधिः २ या
तना ३ समुद्रः ४ तप्तवस्तु ५ दुः
खदवस्तूनि ६ । ग्रीष्माणांचक्षादिः १
कामिनी २ कर्पूरं ३ यशः ५ चं
द्रस्य प्रमदामुखं १ अतिशुभ्र
वस्तु २ यशः पुण्यादिः ३ । सूर्य
स्य पापिनेत्राग्निः १ जवापुष्पं २
वसंतकालीनपलाशवृक्षः ३ को
चनवृक्षः ४ वाडवाग्निः ५ । पद्मस्य
पाटलपुष्पं १ कामिनीमुखादिः २
रक्तवर्णाद्र्व्यं ३ । इंदीवरस्य नी
लकांतमणिः १ कस्तूरी २ कामि
नीनेत्रं ३ । कैरवस्य चंद्रः १ कुं
दादिशुक्लवर्णास्तु २ । शक्रः इंद्रः
१ कुबेरः २ चंद्रः ३ सूर्यः ४
मान्यात्मा भगीरथप्रभृति प्रसि

हचक्रवर्तिनः ५। मेघस्य कृष्णः
१ काली २ नीलपद्मसरोरुहः ३ भ्रम
रश्रेणिः ४ इंदीवरवने ५ दातव्य
क्तिः ६ कृष्णवर्णास्तु ७ शरन्मेघ
स्य चंद्रप्रभृतिशुक्लवर्णपदार्थाः
१ कंदर्पस्य चंद्रः १ प्रद्युम्नः २ अ·
श्विनीकुमारः ३ नलः ४ प्रदीप
स्य चंपकपुष्पं १ प्रतापः २ प्रा
णः ३ ऋषिः ४। वायोः शीघ्रगप
दार्थः १। अश्वस्य वायुः १ हरिणः
२ मनः ३। हस्तिनः पर्वतः १ मेघः
१ तमालवृक्षः ३ अंधकारः ४
सौधस्य कैलासः १ ऐरावतः २
उच्चैःश्रवाः ३ चंद्रः ४। शिवस्य
एवोक्तानि ४। श्रीकृष्णस्य सज
लजलदः १ तमालवृक्षः २ नील
मणिः ३ भ्रमरश्रेणिः ४ इंदीव
रं ५ नीलपद्मं ६ आकाशः ७ श्री
रामस्य पूर्वकथिताः ७ दूर्वादले
८ वृक्षपल्लवे ९। लक्ष्म्याः पार्वती
१ चंद्रकांतिः २ रतिः ३ सीता ४
द्रौपदी ५ पद्मकांतिः ६। सरस्व
त्याः चंद्रकला १ कैलासकांतिः
२ शुक्लवर्णपदार्थाः ३। विपतेः
समुद्रः १ पंडितमनः २ नाराय
णोदरं ३ ब्रह्मांडं ४। समुद्र
स्य मेघादिकृष्णवर्णवस्तु १ विर
रभूमिः २ महाभारतं ३ अपस्मा
री ४। पुरस्य स्वर्गः १ कैलासः २
मनोरमवृक्षस्थलं ३ रथस्य पुष्प
कं १ वैकुंठः २ तरी ३ पोतः ४
हस्ती ५। कामिनीमुखस्य चंद्रः १
पद्मं २ दर्पणः ३। कामिन्याः त
डित् १ तारा २ स्वर्णलता ३ स्वर्ण
वर्णा केतकी ४। नायकस्य चंद्रः १
कंदर्पः २ ऐलः ३ अश्विनीकुमारः
४। सभायाः सूर्यमंडलं १ सुधर्मा
२ गंडकीपर्वतः ३ सुमेरुः ४ गं
गा ५। पंडितस्य बृहस्पतिः १
शुक्रः २ ऋषिः ३ सरस्वती ४।
विरहिणः श्रीरामः १ श्रीशिवः २
अजः ३ दुःखिव्यक्तिः ४ उन्मत्त
व्यक्तिः ५ चंदनतरुः ६ शिवशि
रश्चंद्रः ७ वाडवाग्नियुक्तसमुद्रः
८ वल्मीकः ९ चंद्रशेखरपर्वतः
१०। दातुः कर्णः १ उशीनरः २ क
ल्पवृक्षः ३ कामधेनुः ४ रोहणः
५ समुद्रः ६ मेघः ७ बलिः ८ जै
मिनिः ९ युधिष्ठिरः १०। वसंत·
ऋतोः मलयवायुः १ मधुं २ उ
न्मादरोगः ३। विरहिणी प्रतिप
मः १ अग्निः २ विषं ३ सर्पः ४।
ग्रीष्मऋतोः अग्निः १ विरहः २
विरहिणीनिश्वासः ३ सर्पनिश्वासः

४ वर्षाऋतोः रात्रिः १ समुद्रः
२ गगनं ३ नारायणः ४ शर
दृतोः काशपुष्पादिरूपचामरैरा
वृतराजाः १ चंद्रः २। शीतऋ
तोः अपस्मारिव्यक्तिः १ राज्य
भ्रष्टराजा २ शिशिरऋतोः रा
ज्ञागमनकालः १। गुणिनः स
मुद्रः १ पर्वतः २ पृथिवी ३ म
दनः ४ अश्विनौ ५ सचिवस्य
बृहस्पतिः १ वाक्यस्य कोकिल
शब्दः १ भ्रमरगुंजनं २ वीणा
वाद्यं ३ इति कविकल्पलता
यां ४ स्तबके ४ कुसुमे ॥
साध धन डौ सिद्धौ। इति कवि
कल्पद्रुमः। य साध्यति। न सा
ध्नोति। डौ सिषात्सति। सिद्धि
र्निष्पत्तिः। साध्यति घटो निष्प
न्नः स्यादित्यर्थः। सिद्धि निष्पा
दनेति गोविंदभट्टः। साध्नोति
साध्यति घटं कुलालः निष्पा
दयतीत्यर्थः ॥ इतिडर्गा
दासः ॥
साधकः पुं साधनकर्ता निष्पा
दकः। तस्य लक्षणं यथा। अ
तः परं प्रवक्ष्यामि साधकानां तु
लक्षणं धर्मशीला रूपयुक्ताः
सत्यवादिजितेंद्रियाः। मात्स
र्येण परिमुक्ताः सर्वसत्वहिते
रताः। कर्मशीला स्तथोत्साहा
मर्त्यलोके जुगुप्सकाः। परस्य
२ समंतुष्टाश्च कुलाः साधकस्य
तु ईदृशैः साधनं कुर्यात् सुस
हायैः सहैव तु। इति देवीपुरा
णे नंदामाहात्म्ये साधनाध्या
ध्यायः ॥ अपि च। चतुर्धा सा
धको ज्ञेयो मृदु मध्याधिमा
त्रकः। अधिमात्रतमः श्रेष्ठो भ
वाब्धौ लंघनक्षमः॥ मंदोत्सा
ही सुसंमूढो व्याधिष्ठो गुरु
दूषकः। लोभी पापमति श्चैव
बह्वाशी वनिताश्रयः। चपलः
कातरो रोगी पराधीनोऽतिनि
ष्ठुरः। मंदाचारो मंदवीर्यो ज्ञा
तव्यो मृदुको नरः। द्वादशा
ब्दे भवेत् सिद्धि रेतस्य यत्नतः
परं। मंत्र योगाधिकारी स ज्ञा
तव्यो गुरुणा ध्रुवं १ समबुद्धिः
क्षमायुक्तः पुण्याकांक्षी प्रियं
वदः। मध्यस्थः सर्वकार्येषु सा
मान्यः स्यान्न संशयः। एतज्ज्ञा
नैव गुरुभि र्दीयते मुक्तिमे·
लयः २ स्थिरबुद्धि र्लययुक्तः
स्वाधीनो वीर्यवानपि ॥ म
हाशयो दयायुक्तः क्षमावान्

वीर्य्यवानपि। शूरो लयश्च श्रद्धावान् गुरुपादाब्जपूजकः॥ योगाभ्यासरतश्चैव ज्ञातव्यः साधिमात्रकः। एतस्य सिद्धिः षड्वर्षे भवेदभ्यासयोगतः॥ एतस्मै दीयते धीरैर्हठयोगश्च साधकः। ३। महावीर्य्यान्वितोत्साही मनोज्ञः शौर्य्यवानपि। शास्त्रज्ञोऽभ्यासशीलश्च निर्म्ममश्च निराकुलः। नवयौवनसंपन्नो मिताहारी जितेन्द्रियः। निर्भयश्च शुचिर्द्दक्षो दाता सर्व्वजनाश्रयः। अधिकारी स्थिरो धीमान् यथेच्छावस्थितः क्षमी॥ सुशीलो धर्म्मचारी च गुप्तचेष्टः प्रियंवदः॥ शास्त्रविश्वाससंपन्नो देवतागुरुपूजकः। जनसंगविरक्तश्च महाव्याधिविवर्जितः। अधिमात्रव्रतज्ञश्च सर्व्वयोगस्य साधकः। त्रिभिः संवत्सरैः सिद्धिरेतस्य स्यान्न संशयः। सर्व्वयोगाधिकारी च नात्र कार्य्या विचारणा॥ ४ इति शिवसंहिता॥

साधका स्त्री दुर्गा। यथा। साधनात् सिद्धि विसृष्टा साधकानाञ्च ईश्वरी। स्वामित्वाद्दानसिद्धित्वात् सिद्धीश्वर्य्या प्रकीर्त्तिता। इति देवीपुराणे ४५ देवीनिरुक्ताध्यायः॥

साधनं क्ली करणकारकविशेषः। तत्र तृतीया स्यात्। इति व्याकरणम्। साध्यते कर्म्म निष्पाद्यतेऽनेनेति साधनम्। इति दुर्गादासः॥ मारणम्। मृतसंस्कारः। अग्निदानम्। गतिः। गमनम्॥ द्रव्यम्। धनम्॥ अर्थदापनम्। अर्थस्य धनभूम्यादेर्दापनम्॥ निर्वर्त्तनम्। निष्पादनम्। उपकरणम्। सामग्री यथा युद्धोपकरणं हस्त्यश्वादिः। अनुव्रज्या॥ अनुगमनम्। इत्यमरभरतौ॥ सैन्यम्॥ सिद्धौषधिः। उपायः। मेढ्रः। इति मेदिनी॥ मेढ्रे ऊधः। सिद्धिः। इति धरणिः॥ कारकः। प्रमाणम्। इति हेमचन्द्रः॥ व्याप्यम्। यथा॥ अनुमा त्वनुमाने स्यात् व्याप्ये लिंगञ्च साधनम्। इति त्रिकाण्डशेषः। मोहनम्॥ जवः॥ इत्यजयः॥ साधना। साधाइ इति भाषा। यथा। ब्रह्मोवाच॥ शृणुष्व पार्व्वति रुष्टा स्त्रीस्वभावाच्च चापलात्। सर्व्वेषां

साधनेनैव तंत्रमर्हति साधकः इति ब्रह्मवैवर्त्ते गणेशखण्डे १२ अध्यायः॥ तपः। यथा। तपोभिः प्राप्यतेऽभीष्टं नासाध्यं हि तपस्यतः। दुर्भगत्वं वृथालोको वहते सति साधने। इति तिथ्यादितत्त्वधृतमत्स्यपुराणवचनम्॥ मंत्रसिद्धिकरणम्। यथा। मत्स्यं मांसञ्च मद्यञ्च मुद्रा मैथुनमेव च। दिव्यानाञ्चैव वीराणां साधनं भवसाधनम्। इति मुण्डमालातंत्रम्॥ नित्यानित्यवस्तुविवेकेहामुत्रफलभोगविरागशमदमादिसम्पन्मुमुक्षुत्वम्। इति वेदान्तसारः॥

साधना स्त्री सिद्धिः। निष्पादना। इति साधधात्वर्थदर्शनात्। आराधना। ण्यन्तसाधधातोरन प्रत्ययनिष्पन्ना॥

साधन्तः त्रि भिक्षुकः। इत्युणादिकोषः॥

साधयन्ती स्त्री उपासनाकर्त्री। यथा। सर्व्वमन्त्राणि नाथ त्वं साधयन्ती निरन्तरं प्रतिश्रोतास्मि सम्भाव स्नेहयोगियमोचिती इति काव्यचन्द्रिका॥

साधारणः त्रि समानः। सदृशः। इत्यमरः। सामान्यम्। अनेकसम्बन्ध्येकवस्तु। इति चामरः। यथा। साधारणं समाश्रित्य किंचिदाह हलायुधः। शौर्य्यादिनामातिधनं भ्रातरस्तत्र भागिनः। इति दायभागः॥ न्यायमते हेत्वाभासविशेषः। यथा अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः। कालात्ययापदिष्टश्च हेत्वाभासस्तु पंचधा। आद्यः साधारणस्तु स्यादसाधारणकः परः। तथैवानुपसंहारी त्रिधानैकान्तिको भवेत्। यः सपक्षे विपक्षे च भवेत् साधारणो मतः। यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः। तथैवानुपसंहारी केवलान्वयिपक्षकः। इति भाषापरिच्छेदः॥

साधारणदेशः पुं जांगलानूपलक्षणसंपन्नस्थानम्। तद्गुणाः। रूक्षत्वम्। दीपनत्वम्। मधुरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः वल्लभः॥

साधारणधर्म्मः पुं चतुर्वर्णिकनित्यकर्म्म। यथा। प्रजनार्थं स्त्रि

यः स्पृष्टाः सन्तानार्थञ्च मानवाः
तस्मात् साधारणो धर्मः श्रुतौ
पत्न्या सहोदितः । इति मान
वे ९ अध्यायः । अपि च । अहिं
सा सत्यमस्तेयं शौचमिन्द्रि
यसंयमः । दमः क्षमार्जवं दा
नं सर्वेषां धर्मसाधनं । इति
गारुडे ९६ अध्यायः ॥
साधारणस्त्री स्त्री वेश्या । इ
तिहेमचन्द्रः ॥
साधारणी स्त्री कुञ्चिका । इ
तिहेमचन्द्रः ॥
साधारण्यं क्ली कुञ्चिका । इ
तिहेमचन्द्रः । साधारणस्य भा
वश्च ॥ साधिका स्त्री सुषुप्तिः । इ
तिहेमचन्द्रः ॥ साधनकर्त्री । अधि
केन सह वर्त्तमाना च ॥
साधितः त्रि दापितः । इत्यमरः
हे धनादिकं दापिते धृती इति
ख्याते यस्मिन् दण्डे तत्रैवेतिरमा
नाथः । दण्डिते इति विद्यावि
नोदः ॥ शोधितद्रव्ये इति न
यनानन्दः । दद्यातेर्ण्यन्तात्
क्तः स्त्री क्ली रीति धनदेयो
रूप मिति नयनानन्दः ॥ दा
पित इति पाठ इति कालिंग
प्रकाशोहेमो । तत्र त्रि दध उ॰
ग्रहणे गतौ वधे दाने इत्यस्मा
त् ण्यन्तात् क्तः । साधे ण्यन्तात्
क्ते साधितः । इति भरतः ॥
दापितो दापितोऽपि स्यात् साधि
तः शोधितोऽपि च । इति शब्दर
त्नावली ॥
साधिष्ठः त्रि अतिशयबाढः ।
दृढतमः । इत्यमरः । न्याय्यः ॥
इति हेमचन्द्रः ॥ अत्यार्य्यः ॥
इति मेदिनी ॥
साधीयान् त्रि अतिशयबाढः ॥
अतिशयसाधुः । इत्यमरः ॥
साधुः पुं उत्तमकुलोद्भवः । तत्
पर्य्यायः । महाकुलः २ कुलीनः
३ आर्य्यः ४ सभ्यः ५ सज्जनः ६ ।
इत्यमरः । कुलजः ७ साधुजः ८
कुलकः ९ कुलिकः १० । इति श
ब्दरत्नावली ॥ कुल्यः ११ कौले
यकः १२ । इति भरतः ॥ जिनः ।
मुनिः । इति हेमचन्द्रः ॥ साधु
लक्षणं यथा । यथालब्धोऽपि
सन्तुष्टः समचित्तो जितेन्द्रियः
हरिपादाश्रयो लोके विप्रः
साधुरनिन्दकः ॥ १ ॥ निर्वैरः
सदयः शान्तो दम्भाहङ्कारवर्जितः
निरपेक्षो मुनिर्वीतरागः साधु
रिहोच्यते । २ ॥ लोभ॰

मोहमदक्रोधकामादिरहितः
सुखी । कृष्णाङ्घ्रिशरणः साधुः
सहिष्णुः समदर्शनः ३ समचि
त्तो मुनिः श्रीगोविन्दचरणा
श्रयः । सर्वभूतदयः कान्तो विवे
की साधुरुत्तमः ४ कृष्णार्पित
प्राणधारी शुद्धिः शान्तेन्द्रियः स्पृ
हत संपदादिः । आसक्तिवि
तेः श्रवणादिभक्तिं यस्येह सा
धुः सततं हरेषः ५ कृष्णाश्रयः
कृष्णकथानुरक्तः कृष्णेष्टमन्त्र
स्मृतिपूजनीयः । कृष्णानिशं॰
ध्यानमनास्त्वनन्यो यो वै स सा
धुर्मुनिवर्य्य कार्ष्णः । ६ । इति
पाद्मोत्तरखण्डे ९९ अध्यायः ॥
अन्यच्च । नप्रहृष्यति सम्माने
नावमानेन कुप्यति । न क्रुद्धः
परुषं ब्रूयादेतत् साधोस्तु ल
क्षणं । इति गारुडे ११२ अ
ध्यायः ॥ तस्य स्वभावो यथा
त्यक्तात्मस्तु विभागेच्छाः स
र्वसत्त्वस्य वैषिणः । भवन्ति पर
दुःखेन साधवो नित्य दुःखिताः
परदुःखातुरा नित्यं स्वसुखानि
महान्त्यपि । नापेक्षन्ते महात्मा
नः सर्वभूतहिते रताः । परार्थ
मुद्यताः सन्तः सन्तः किं किं न कु
र्वते । तादृग्यपादपे छाये वारि ज
लदैः स्तनप्रपीयते । एक एव
सतां मार्गो यदङ्गीकृतपालनं
दहन्तमकरोत् क्रोडे पावकं
यदपांपतिः । आत्मानं पीडयि
त्वापि साधुः सुखयते परं ।
ह्लादयन्नाश्रितान् वृक्षो दुःखं
च सहते स्वयं । इति वह्निपुरा
णे दानावस्थानिर्णयनामाध्या
यः । तस्य प्रशंसा यथा । यस्य ज्ञा
यां भवेत् पूज्यो दृष्ट्वा न यम
दर्शनं । पापसंज्ञः स्पर्शनाच्च॰
किमहो साधुसङ्गमः । साध्वनां हृ
दयं धर्म्मो वाचो देवः सनातनाः
कर्म्मक्षयाणि कर्म्माणि यतः सा
धुर्हरिः स्वयं ॥ इति कल्किपुरा
णे ३ अध्यायः । कलिस्तु दु॰
ष्टीणां साधुत्वं तत्कारणञ्च य
था । कलिः साध्विति यत्प्रोक्तं श
द्रः साध्विति योषितः । तत्राह
भगवान् साधु धन्या श्चेति पु
नः पुनः ॥ तत्सर्वं श्रोतुमिच्छा
मो नचेत् गुह्यं महामुने । इ
त्युक्तो मुनिभिर्व्यासः प्रहस्येद
मथाब्रवीत् । श्रूयतां भो मुनि
गणा यदुक्तं साधु साध्विति । य
त्कृते दशभिर्वर्षैस्त्रेतायां हाय

तेनैव तत् । द्वापरे तच्च मासेन अ
होरात्रेण तत् कलौ । तपसो
ब्रह्मचर्य्यस्य जपादेश्च फलं द्वि
जाः प्राप्नोति पुरुष स्तेन कलिः
साध्विति भाषिते । ध्यायन् कृते
यजन् यज्ञै स्त्रेतायां द्वापरेऽर्च्च
यन् । यदाप्नोति तदाप्नोति क
लौ संकीर्त्त्य केशवं । धर्म्मोत्
कर्ष मतीवात्र प्राप्नोति पुरुषः
कलौ । स्वल्पायासेन धर्म्मज्ञा
स्तेन तुष्टोस्म्यहं कलेः ॥
व्रतचर्य्यापरै र्ग्राह्या वेदाः पूर्व्वं
द्विजातिभिः ॥ ततस्तु धर्म्म
संप्राप्तै र्यष्टव्यं विधिवद्धनैः ॥
वृथा कथा वृथा भोज्यं वृथे
ज्याच द्विजन्मनां । पतनाय त
तो भाव्यं तैस्तु संयमिभिः सदा
असम्यक्करणे दोषा स्तेषां
सर्व्वेषु वस्तुषु । भक्ष्य पेयादिकं
चैषां नेच्छा प्राप्तिकरं द्विजाः ।
पारतन्त्र्यं समस्तेषु तेषां कार्य्ये
षु वै ततः । जयन्ति ते निजान्
लोकान् क्लेशेन महता द्विजाः
द्विजशुश्रूषयैवैष पाकयज्ञा
धिकारवान् । निजं जयति वै
लोके शूद्रो धन्यतरः स्ततः ॥
भक्ष्याभक्ष्येषु नास्यास्ति पेयापे

येषु वा यतः । नियमो मुनि
शार्दूला स्तेनासौ साध्वितीरि
ते ॥ स्वधर्म्मस्याविरोधेन नरै
र्लब्धं धनं सदा । प्रतिपाद्यञ्च
पात्रेषु यष्टव्यञ्च यथाविधि
तस्यार्ज्जने महान् क्लेशः पाल
नेच द्विजोत्तमाः । तथा सद्वि
नियोगाय विज्ञेयं गहनं नृणां
एभि रन्यै स्तथा क्लेशैः पुरु
षा द्विजसत्तमाः । निजान् ज
यन्ति वै लोकान् प्राजापत्यादि
कान् क्रमात् । योषित् शुश्रू
षणं भर्त्तुः कर्म्मणा मनसा गि
रा । कुर्व्वती समवाप्नोति तत्
सालोक्यं ततो द्विजाः ॥
नाति क्लेशेन महता तानेव
पुरुषो यथा । तृतीयं व्याहृतं
तेन मया साध्विति योषितः ॥
इति विष्णुपुराणे ६ अंशे २ अ
ध्यायः ॥
साधुः त्रि वार्द्धुषिकः ॥ चारुः
सज्जनः । इति मेदिनी ॥
साधुजः त्रि उत्तमकुलोद्भवः ॥
इति शब्दरत्नावली ॥
साधुधी स्त्री श्वश्रूः । इति हारा
वली ॥ सुन्दरबुद्धिः । तद्युक्ते
त्रि ॥

साधुपुष्पं क्ली स्थलपद्मं । इति
शब्दमाला । उत्तमकुसुमञ्च ॥
साधुवाहः पुं विनीताश्वः । इ
ति हेमचन्द्रः । सुन्दरवाहनञ्च ॥
साधुवाही पुं शोभनवहनशी
लघोटकः । सुशिक्षिताश्वः । तत्
पर्य्यायः । विनीतः २ । इत्यम
रः ॥ सुष्ठुवाहनशीलकः ३ ।
इति शब्दरत्नावली । सुन्दरघो
टकविशिष्टे त्रि ।
साधुवृत्तिः स्त्री उत्तमजीविका ॥
सद्विवरणं । सुन्दरवर्त्तनं । साध्वी
चासौ वृत्तिश्चेति कर्म्मधारय
समासनिष्पन्ना । साधोर्वृत्तिरि
ति षष्ठीतत्पुरुषसमास नि
ष्पन्ना वा ॥
साधुवृक्षः पुं कदम्बतरुः । इति
शब्दचन्द्रिका । वरुणवृक्षः । इति
राजनिर्घण्टः । शोभनतरुश्च ॥
साष्टनं क्ली मधुरसमवृतः । पथ्य
वीथी । आतपत्रं । इत्यजय
पालः ॥
साध्यः पुं गणदेवताविशेषः
इत्यमरः । स तु द्वादशसंख्यकः
यथा । साध्या द्वादश विख्याता
रुद्रा एकादश स्मृताः । इति
भरतः । तेषां नामानि यथा ।

मनो मन्ता तथा प्राणो नरो
पानश्च वीर्य्यवान् । विनि
र्भयो नयश्चैव दंसो नाराय
णो वृषः । प्रभुश्चेति समा
ख्याताः साध्या द्वादश पौर्व्विकाः
इति वह्निपुराणे गणभेदना
माध्यायः ॥ देवः । विष्कम्भा
दि सप्तविंशति योगान्तर्गतैक
विंशयोगः । इति मेदिनी ॥
तत्रजातफलं । असाध्यसा
ध्यः किल साध्यजातः शूरो
ऽतिधीरो विजितारिपक्षः ॥
शुद्धो सुपायैः परिसाधिता
र्थः परं कृतार्थः सुतरां विनी
तः । इति कोष्ठीप्रदीपः ॥
साध्यः त्रि साधनीयः । इति मे
दिनी । ऋणादिषु विवादेषु स्थि
रप्रायेषु निश्चिते । ऋणेवाप्य
थिके चार्थे प्रोक्ते साध्यं तसि
द्धाति ॥ इति मिताक्षराधृतका
त्यायनवचनं । साधनार्होभिम
तः स तु पक्षः । यथा । प्रति
ज्ञादोष निर्मुक्तं साध्यं सत्का
रणान्वितं । निश्चितं लोकसि
द्धञ्च पक्षं पक्षविदो विदुः ॥
साध्यं साधनार्होभिमतं पक्षं
विदुः । यद्यप्यन्यत्र साध्ये ज्ञा



र्यं तद्विशिष्टधर्मी पक्ष इति भेदः तथाप्यत्र वाक्प्रत्यायकत्वादि धर्मविशेषविशिष्टस्य पक्षतया धर्मिणः पक्षपदेनैव साध्यत्वात् साध्यपक्षयोरभेदाभिधानं। इति व्यवहारतत्त्वं
अनुमितिविधेयः। यथा। साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः। इति सिद्धान्तलक्षणजागदीशीटीका। मन्त्रविशेषः यथा। नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरं। चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टये। पुनः कोष्ठककोष्ठेषु सव्यतो नाम्न आदितः। सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया मनीषिभिः। सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः। सुसिद्धो ग्रहणमात्रेणारिर्मूलं निकृन्तति। इति तन्त्रसारः॥

साध्यतावच्छेदकं क्ली अनुमितिविधेयांशभासमानधर्मः। यथा साध्यतावच्छेदकमिति अनुमितिविधेयतावच्छेदकमित्यर्थः तथा चोक्तव्याप्तिज्ञानाद्धेतुपो दण्डत्वप्रकारिका दण्डत्ववत्तानिश्चयवाऽनुमिति न तु दण्डिमान् इत्याकारा दण्डप्रकारिकापि तस्य व्यापकतावच्छेदकत्वेनाग्रहात् कारणबाधेन तदसम्भवादिति भावः। इति सिद्धान्तलक्षणजागदीशीटीका॥

साध्यसिद्धिपादः पुं व्यवहारस्य चतुर्थपादः। स च निर्णयपादः। यथा। प्रत्यर्थिनोऽग्रतो लेख्यमिति भाषापादः प्रथमः। श्रुतार्थस्यानन्तरं लेख्यमित्युत्तरपादो द्वितीयः। ततोऽर्थी लेखयेत् सद्य इति क्रियापादस्तृतीयः। तत्सिद्धौ सिद्धिमाप्नोति इति साध्यसिद्धिपादश्चतुर्थः। यथा। भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः। आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते। इति मिताक्षरा॥

साध्वसं क्ली भयं। इत्यमरः॥

साध्वी स्त्री मेदा। इति राजनिर्घण्टः। पतिव्रता। इत्यमरः॥ तल्लक्षणमाह हारीतः। आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ साध्वी ज्ञेया पतिव्रता॥

तद्धर्मो यथा। अङ्गिराः। साध्वीनामेव नारीणामग्निप्रपतनादृते। नान्यो धर्मो हि विज्ञेयो मृते भर्त्तरि कर्हिचित्। इति शुद्धितत्त्वं। तत्प्रशंसा यथा। साध्वी स्त्री मातृतुल्या च सर्वेषां हितकारिणी असाध्वी वैरतुल्या च शश्वत् सन्तापदायिका। इति ब्रह्मवैवर्त्ते गणपतिखण्डे २ अध्यायः। साध्वीस्त्रीणां पतिः प्रेम्णा शतपुत्राधिकः। यथा। शतपुत्राधिकः प्रेम्णा सतीनाञ्च पतिः स्वयं। निरूपितो भगवता वेदेषु हरिणा स्वयं इति तत्रैव ३४ अध्यायः॥ कामिनी कुलजाताञ्च रहस्येकामिनी सती। न त्यजति कुले जातं पतिमेव श्रुतौ श्रुतं॥ श्रुतौ पुराणे यासाञ्च चरित्रमतिनिरूपितं। तासु को विश्वसेत् प्राज्ञो ह्यप्रज्ञाश्च दुराशयाः॥ तासां को वा रिपुर्मित्रं प्रार्थयन्ती नवं नवं। दृष्ट्वा सुवेशं पुरुषमिच्छन्ति हृदये सदा। बाह्ये स्वात्मसतीत्वञ्च प्रापयन्ती प्रयत्नतः। सत्त्वप्रधानं यद्रूपं तत् शुद्धञ्च स्वभावतः॥ तदुत्तमञ्च विश्वेषु साध्वीरूपं प्रशंसितं। स्थानाभावात् क्षणाभावात् मध्यस्थेरभावतः। देहक्लेशेन रोगेण सत्संसर्गेण सुन्दरि। बहुगोष्ठीयुतेनैव विग्रहभयेन च। रजोरूपस्य साध्वीत्वमेतेनैव प्रजायते॥ इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५४ अध्यायः॥ अन्यच्च। स्वतेजस्त्वे यः स्नेहो याकाङ्क्षा नैतिष्ठामिते। पतिस्नेहस्य साध्वीनां कलां नार्हति षोडशीं। स्तनान्धे स्तनदानान्ते मिष्टान्नेभोजनावधि। कान्ते चित्ते सतीनाञ्च सर्वे स्थाने च सन्तते॥ नास्ति रक्षा जले रक्षा साध्वीनां स्वामिना विना। यथा जारे पुंश्चलीनां साध्वीनान्तु तथा प्रिये। शोकं निमग्नमन्येषां काले न पानभोजनात्। विपरीते च कान्तशोको वर्द्धते भक्षणाद्दहो। इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८२ अध्यायः॥ किञ्च आकाशोऽसौ दिशः सर्वा यदि नश्यन्ति वायवः। तथापि साध्वीशापस्तु न नश्यति कदाचन। इति तत्रैव ४४ अध्यायः॥



सानंदः पुं षोडशध्रुवकान्तर्गत ध्रुवकभेदः । यथा । अष्टादशाक्ष
रै श्लोको यशोहर्षप्रदो ध्रुवः । क
रुण संज्ञके ताले सानंदो वीरके
सरे ॥ इति संगीतदामोदरः ॥
गुच्छकरंजः ॥ इति राज-
निर्घण्टः । अल्हादयुक्ते त्रि-
यथा । रामेनमतिमानंदं प
श्यन्नभिनिविष्टवसन् ॥ इ
ति मुग्धबोधव्याकरणं ॥
सानंदूरः पुं तीर्थविशेषः ॥
यथा । धरण्युवाच । द्वारकातः
परंश्रेष्ठं आलिगृहं परं क्वचित्
ततोमहीवचः श्रुत्वा विष्णुःक
मललोचनः । वाराहरूपीभगवा
न्प्रत्युवाचवसुंधरां । वाराहउ
वाच । सानंदूरेति विख्याते भू
मे गुह्यं परं मम । उत्तरेत समु
द्रस्य मलयस्य च दक्षिणे ॥
तत्रतिष्ठामि वसुधे उदीचीं दि
शमाश्रितः । प्रतिमाऽस्ति मही
यासि नात्युच्चा नातिनीचका
आयसीतां वदंत्येके अन्ये ताम्र
मयीं तथा ॥ कांस्यीं रीतिम
यीं अन्ये केचित् सीसक लि
खितां । शिलामयीमित्य
परे महदाश्चर्यरूपि ॥

गणी । तत्रस्थानानि मे भूमे क
थ्यमानं मया शृणु । मनुजा
यत्रमुच्यन्ते गताः संसारसागरे ।
तत्राश्चर्यं प्रवक्ष्यामि सानन्दूरेय
शस्विनि । सौवर्णे दृश्यते प
क्षे मध्याह्ने तु दिवाकरे । यत्र
रामागृहंनाम मम गुह्यं यशस्वि
नि । तत्रापि शृणु चाश्चर्यं यस्त्वा
पि परिवर्तते । पर्वते लताहस्ते
मुच्चस्थलमहाद्रुमे । सप्तरुमध्ये
तिष्ठन्तं सोऽपि तत्र न पश्यति ॥
अन्यच्च ते प्रवक्ष्यामि महाश्च
र्यं शृणुष्व मे । मम भक्ताऽपि
पश्यन्ति तिष्ठमानाः स्वकर्मणा
वृक्षमन्यसहस्राणि कोऽप्याह
र्दमेवच । तिमिः पिंडश्च तन्मध्ये
येनकेन विकर्मिणा । एकाग्र
श्रसूलमन्येषा भूमिचक्रेण चा
कितः । तावत्कश्चिन्न शृणोति
यावत्तेन नमस्तितः । तत्रराम
सरं नाम तस्मिन्क्षेत्रे परं मम ।
अगाध श्चाप्यपारश्च रक्तपद्म
विभूषिते । तत्रस्नानेन तु जीवेत
एकरात्रोषितोनरः । उषस्य भ
वनंगत्वा मोदते नात्रसंशयः
अथ प्राणान्प्रमुच्येत रमेराम
सरेतथा । उषस्य भवनेमत्वा

ममलोकंच गच्छति । तत्रराम
सरे भूमे महाश्चर्यं शृणुष्वमे
मनुजा स्तत्र पश्यन्ति ममकर्म
परायणाः । सस्सरः कोशविस्ता
रं वकुलमलतासकुले । मनोज्ञेर
मणीयंच जलजैश्चापि सेवितं
तत्रमृणालिपद्मानि धोतयन्ति
दिशोदश । एकंतु दृश्यते श्वेत
मेकं रुक्ममयं तथा ॥ तत्रब्र
ह्मसरंनाम गुह्यं क्षेत्रे परंमम
उत्तरेण तु पार्श्वेन ममक्षेत्रस्य
सुंदरि । तत्र कुण्डं महाभागे
पर्वते च समाश्रिते । धारा
यत्र पतेच्चैव स्थूला मुषल
सन्निभा । तत्रस्नानेन कुर्वीत ष
ट्कालोषितो नरः । ब्रह्मलो
कं समासाद्य मोदते नात्रसंश
यः । अथ प्राणान् प्रमुच्येत तत्र
ब्रह्मसरे मम । ब्रह्मणा समनु
ज्ञातो मम लोकंच गच्छति ।
तत्राश्चर्यं महाभागे रम्य ब्रह्म
सरे शृणु । मद्भक्ता यानि पश्य
न्ति घोरे संसारमोक्षणे । चतुर्वि
शतिद्वादशषा सा धारा एष्णुले
त्तरो । मध्याह्ने पतते भूमेया
वत् सूर्यः स तिष्ठति । पराह्ने
तु मध्याह्ने सा धारा न पते

दृश्यते । एवं तत्र महाश्चर्यं यो
ऽपि ब्रह्मसरे मम । इत्यादि ।
इति वाराहे सानन्दूरमाहात्म्य
नामाध्यायः ॥
सानसिः पुं सुवर्णः । इत्युणा
दिकोषः ॥
सानिका स्त्री वंशी । इति श
ब्दरत्नावली ॥
सानुः पुं स्त्री पर्वतसमभूभा
गः । तत्पर्यायः ॥ स्नुः २ प्रस्थः
३ इत्यमरः । वनं ॥ वात्या ॥ मा
र्गः । अग्रं ॥ कोविदः ॥ इति
मेदिनी । अर्कः । पल्लवः ॥
इति जटाधरः ॥
सानुजं क्ली प्रपौण्डरीकं । इ
ति राजनिर्घण्टः ॥
सानुजः पुं तुम्बुरुवृक्षः । इति
राजनिर्घण्टः ॥ अनुजेन सह
वर्तमाने सानुजाते च त्रि ॥
सानुमान् पुं पर्वतः । इति
हेमचन्द्रः ॥
सानेयिका स्त्री वंशी । इति
शब्दरत्नावली ॥
सानेयी स्त्री वंशी । इति शब्द
रत्नावली ॥
सांतपनं क्ली व्रतविशेषः । य
था । गोमूत्रं गोमयं क्षीरं दधि

सर्पिः कुशोदकं । एकरात्रोप-
वासश्च कृच्छ्रं सांतपनं स्मृतं ।
इति मानवे ११ अध्यायः ॥
गोमूत्रमिति गोमूत्रादिषट्की
कृत्य एकस्मिन्नहनि भक्षयेत्
नान्यत् किंचिद्यात् अपरदि
ने चोपवासः । इत्येतत् सांतप
ने कृच्छ्रं स्मृतं । यदा तु गोमू
त्रादि षट् प्रत्येकं षड्दिनान्
अभ्यसेत् सप्तमे दिने चोप-
वासः तदा महासांतपनं भव
ति । तथा च याज्ञवल्क्यः ॥
कुशोदकं च गोक्षीरं दधि मू
त्रं सकृद्धृतं । जग्ध्वा परेऽह्न्यु
पवसेत् कृच्छ्रं सांतपनं चरन् ।
पृथक् सांतपन द्रव्यैः षडहः
सोपवासिकः । सप्ताहेन तु
कृच्छ्रोऽयं महासांतपनं स्मृतं
इति कुल्लूकभट्टः ॥ मार्कंडे
९५ अध्यायेप्येवं ॥ सांतवं
त्रि विरले । इति जटाधरः ॥
अंतरेण सहवर्त्तमानं च ॥
सांत्वत् क सांत्वने । इति कवि
कल्पद्रुमः । दंत्यादिरयं मध्य-
तकारोपधः । सांत्वने प्रियक
रणे । सांत्वयति सांत्वापय
ति । इति दुर्गादासः ॥

सांत्वक सामप्रयोगे । इति कवि
कल्पद्रुमः । क सांत्वयति शीता
र्त्तं दयालुः । इति दुर्गादासः ॥
सांत्व क्ली अत्यर्थमधुरं । तत्र
कर्णे मनःप्रीतिजनकं वाक्य
साम । तच्च प्रियवादार्थप्रदा
नं सवधादिभिः क्रोधोपशम
नं । इत्यमरभरतौ ॥ दाक्षिण्ये
इति मेदिनी ॥
सांत्वनं क्ली सामोपायः । इति
हेमचंद्रः । प्रियकरणं । इति
सांत्वधातु टीकायां दुर्गादासः
सांत्वना स्त्री क्ली सांत्वनं । प्रण
यः । यथा । प्रणयः सांत्वनोन
ना । इति जटाधरः ॥
सांत्ववादः त्रि सांत्वनावाक्यं ।
इतिकेचित् ॥
सांदीपनिः पु मुनिविशेषः ।
यथा । विश्वामित्रः सतानंदो
जाजलि स्तैत्तिलि स्तथा । सां
दीपनिश्च ब्रह्मर्षे योगिनां
ज्ञानिनां गुरुः । इति ब्रह्मवैवर्त्ते
श्रीकृष्णजन्मखंडे ९९ अध्या
यः ॥ अपिच । विदिताखिल
विज्ञानौ तत्त्वज्ञानमयावपि ।
शिष्याचार्य्य क्रमं वीरौ ख्याप
यंतौ यदूत्तमौ ॥ ततः

सांदीपनिं काश्यमवंतिपुरवा
सिनं । अस्त्रार्थं जग्मतु र्वीरौ
बलदेव जनार्दनौ । काशंका
पृपोजातं । तस्य शिष्यत्व म
भ्येत्य गुरुवृत्तिपरौ हि तौ । दर्श
यांचक्रतु र्वीरावाचारमखिले
जने । सरहस्यं धनुर्वेदं ससं
ग्रह मधीयतां । अहोरात्रैश्च
तुःषष्ट्या तदद्भुतमभूद्द्विज ॥
सांदीपनिरसंभाव्यं तयोः क-
र्मातिमानुषं । विचिंत्य तौ तदा
मेने प्राप्तौ चंद्रदिवाकरौ । अ
स्त्रग्राममशेषं च प्रोक्तमात्रम
वाप्य तौ । ऊचतु र्व्रियतां या
ते दातव्या गुरुदक्षिणा । सोप्य
तींद्रियमालोक्य तयोः कर्म-
महामतिः । अयाचत मृतं पु
त्रं प्रभासे लवणार्णवे । प्रती-
ल्हिये अस्पशाहष्टपूर्वं । गृहीता
स्त्रौ ततस्तौ तु सार्घपात्रो म-
होदधिः । उवाच न मया पु-
त्रो हृतः सांदीपने रिति । दैत्यः
पंचजनो नाम शंखरूपः स
बालकं । जग्राह सोऽस्ति-
सलिले ममैवासुरसूदन ॥
इत्युक्तोंतर्ज्जलं गत्वा हत्वा पंच
जनं च तं ॥

कृष्णो जग्राह तस्यास्थिप्रभवं
शंख मुत्तमं । तेपांचजन्यमा
एध्य गत्वा यमपुरीं हरिः । बल
देवश्च बलवान् जित्वा वैवस्वतं
यमं । तं बालं यातनासंस्थं यथा
पूर्वशरीरिणं । पित्रे प्रदत्तवा
न् कृष्णो बलश्च बलिनां वरः
इति विष्णुपुराणे ५ अंशे २१
अध्यायः ॥
सान्द्रष्टिकं क्ली सद्यःफले । इ
त्यमरः । दृष्टपरिकल्पनान्यायः
यथा । पितामह दौहित्राभावे
प्रपितामह प्रपितामहयोः क्र
मेणाधिकारः प्रपितामहपि
तुस्तु धनितोऽपत्यात् एवोक्त
सांदृष्टिकन्यायसिद्धत्वात् । इ
तिदायक्रमसंग्रहः ॥
सांद्रं क्लीवने । इति मेदिनी ॥
सांद्रः त्रि घनः । इत्यमरः ॥
मृदुः । इति मेदिनी । स्निग्धः
मनोज्ञः । इति शब्दरत्नावली
सांद्रपुष्पः पु विभीतकवृक्षः
इति शब्दचंद्रिका ॥
सांद्रस्निग्धः त्रि निविडस्नि
ग्धः । तत्पर्यायः । मेदुरः २ इ
ति शब्दरत्नावली ॥
सांधिकः पु शौंडिकः । इति

शब्दमाला। सन्धिकर्त्तरि च ॥

सान्धिवेलं त्रि सन्धिवेलायां भवं। सन्धिवेला सन्ध्या। इति सिद्धान्तकौमुदी ॥

सान्ध्यः त्रि सन्ध्यासम्बन्धीयः। सन्ध्याशब्दात् ष्ण प्रत्ययेन निष्पन्नः। सन्ध्याकुसुमा स्त्री त्रिसन्धिपुष्पवृक्षः। इति राजनिर्घण्टः

सामहनिकः त्रि समाहविशिष्टः समाहशब्दात् ठक्प्रत्ययेन निष्पन्नः। इति सिद्धान्तकौमुदी ॥

सान्नाय्यं क्ली हविः। इत्यमरः

सान्निध्यं क्ली निकटं। यथा श्रद्धेकस्य तपोयोगात् श्रद्धेनस्यातिशायनात्। आभिरूप्याच्च विंबानां देवः सान्निध्यमृच्छति। इति तिथ्यादितत्त्वं।

सान्निपातिकः त्रि सन्निपातजरोगः। इति राजनिर्घण्टः। तद्विवरणं सन्निपातशब्दे द्रष्टव्यं।

सान्न्यासिकः पुं संन्यासी। तत्पर्य्यायः। भिक्षुः २ यतिः ३ कर्म्मन्दी ४ रक्तवसनः ५ परिव्राजकः ६ तापसः ७ पाराशरी ८ पारिकांक्षी ९ मस्करी १० पारिरक्षकः ११ इति हेमचन्द्रः

सापत्नः पुं शत्रुः। इत्यमरटीकायां रमानाथः सपत्नीपुत्रः। यथा बृहस्पतिः। पित्र्यासह विभक्ता ये सापत्ना वा सहोदराः। जघन्यजाश्च ये तेषां पितृभागहरा स्मृते। इति दायतत्त्वं। सपत्नीभावे क्ली।

सापिण्ड्यं क्ली सपिण्डता। सा तु पुंसां सप्तमपुरुषपर्य्यन्ते अनूढकन्यानां त्रिपुरुषपर्य्यन्ते च स्थायिनी। यथा लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः। पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषं। इति मत्स्यपुराणं। अप्रत्तानां त्रिपौरुषं। इति वसिष्ठः। अपि च॥ पित्रादि षड्भिः सापिण्ड्यं तेन तु संततिः सप्तकैः। गोत्रैक्ये सति तस्मात् षड्भिः पुत्रादिभिस्तथा। अप्रत्तानां तु कन्यानां त्रिभिः पित्रादिभिः स्मृतं इति कारिका। अन्यत् सापिण्ड्यशब्दे द्रष्टव्यं ॥

साप्तपदीनं क्ली सख्यं। इत्यमरः। सप्तपदसम्बन्धिनि त्रि॥

साफल्यं क्ली सफलता। सफलस्य भाव इत्यर्थे ष्य प्रत्ययेन निष्पन्नं ॥

साम्री स्त्री द्राक्षाविशेषः। इति केचित् ॥

साम त् क सान्त्वने। इति कविकल्पद्रुमः। सान्त्वने प्रियकरणे अससामत् दीनं दानेन दाता ॥ इति दुर्गादासः ॥

साम क सान्त्वे। इति कविकल्पद्रुमः। दन्त्यादिः द्वितीयस्वरी सान्त्वः प्रियकरणं। क सामयति दीनं दानेन दाता। इति दुर्गादासः ॥

साम [न] क्ली वेदविशेषः। इत्यमरः। स्यति पापं साम षो नाशे आसु मनिति मन्। इति भरतः। तल्लक्षणं माह जैमिनिः गीतेषु सामाख्या इति। गीयमानेषु मन्त्रेषु साम संज्ञेत्यर्थः। इति तिथ्यादितत्त्वं ॥ तत्तु चतुर्वेदान्तर्गततृतीयवेदः। तत् सहस्रशाखो तस्योपनिषत् छान्दोग्यादिः। विवरणं तु वेदशब्दे द्रष्टव्यं ॥ सामध्वनिश्रवणानन्तरं वेदपाठनिषेधः तदधिष्ठातृदेवता कथनं च। यथा। सामध्वनावृग्यजुषी नाधीयीत कदाचन। वेदस्याधीत्य वाप्यन्त मारण्यक मधीत्य च। ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः। सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचि ध्वनिः॥ इति मानवे ४ अध्यायः॥ शत्रुवशीकरणोपायविशेषः। इत्यमरः। प्रियवादार्थप्रदानसम्बन्धादिभिः कोपोपशमने साम। स्यति विरोधमिति षो ऽन्तकर्मणि अस्मात् आसु मिति मन्। सान्त्व साम तक सान्त्वने इत्यस्मात् वा मनीति अन् वा। सामदंस्यादि शमयति विरोधमिति शाम नान्तं तालव्यादि इति केचित् इति भरतः॥ अपि च। मनुरुवाच। उपायान् त्वं समाचक्ष्व सामपूर्वान् महाद्युते। लक्षणं च तथा तेषां प्रयोगं च सुरोत्तम। मत्स्य उवाच। साम भेदस्तथा दानं दण्डश्च मनुजोत्तम। उपेक्षा च तथा माया इन्द्रजालं च पार्थिव। प्रयोगाः कथिताः सप्त तन्मे निगदतः शृणु द्विविधं कथितं साम तथ्यं चातथ्यमेव च। तत्राप्यतथ्यं साधूनामाक्रोशायैव जायते। तत्र साधुः प्रयत्नेन सामसाध्यो नरः स्मृतः ॥ महाकुलीना ऋजवो धर्मनित्या

जितेंद्रियाः। सामसाध्या नरास्त
च्च तेषु साम प्रयोजयेत्॥ ते-
ष्वंच साम कर्तव्यं कुलशीलादि
वर्तिना। तथा सदुपचाराणाकृ
तानां चानुवर्णनं। अनयैव तथा
युक्त्या कृतज्ञाख्यापनं स्वकं। प
वंशो त्वेन कर्तव्या वशगायस्य
तत्पराः। साम्नायद्यपि रक्तोसि
शृह्णातीति परा श्रुतिः॥ तथा
प्येतदसाधूनां प्रयुक्तं नोपकार
कं॥ अतिशंकितमित्येवं पु
रुषं सामवादिनं। असाधवोः
वजानंति तस्मात्तेषु विवर्जयेत्
त्। ये शुद्धवंशा ऋजवः प्रती-
तायस्य स्थिताः सत्यपराः वि
नीताः। ते सामसाध्याः पुरुषाः
प्रदिष्टाः मानोन्नता ये सततं
च राजन्। इति मात्स्ये राज-
धर्मे सामविधिः २२६
अध्यायः॥
सामकं क्ली मूलऋणं। इति-
मिताक्षरा॥
सामकः पुं तर्कुशाणः। इति
त्रिकाण्डशेषः॥
सामगः पुं सामवेदी ब्राह्मणः
इति जटाधरः॥
सामगर्भः पुं विष्णुः। इति शब्द
रत्नावली॥
सामगी स्त्री सामगब्राह्मणप
त्नी। इति केचित्॥
सामग्री स्त्री कारणसमूहः। यथा
सामग्री चेन्न फलविरहो व्याप्ति-
रेवेति तत्त्वं। इति पदांकदूतः॥
द्रव्य। यथा। एकोद्दिष्टं तु कर्त-
व्यं पाकेनैव सदा स्वयं॥ अभा
वे पाकपात्राणां तदहः समु-
पोषणं। इति लघुहारीतवच
नात् पाकपात्राभावः पाकसा
मग्र्यभावोपलक्षणं। इति-
श्राद्धतत्त्वं॥
सामग्र्यं क्ली समुदायतत्त्वं।
समग्रस्य भावः इत्यर्थे ष्य प्रत्यये
न निष्पन्नं॥
सामजः पुं हस्ती। सामोस्य
त्रि। इति मेदिनी॥
सामंजस्य क्ली औचित्यं। समं
जसशब्दात् ष्य प्रत्ययेन निष्प
न्नं। सामनी स्त्री पशुबंधनरज्जुः
इति दामशब्दटीकायां सारसुं
दरी॥
सामंतः पुं स्वविषयानंतरराजा
संसेलग्नो ऽन्त एकदेशो यस्याः
सा समंता स्वविषयानंतरा भू-
मिः तस्या ईश्वरा इति मे-

सामंताः। इत्यमरटीकायां भ
रतः॥
सामन्यः पुं सामवेदज्ञब्राह्मणः
सामन् शब्दात् ष्य प्रत्ययेन नि
ष्पन्नः॥
सामयिकः त्रि समयोचितः। स
मयशब्दात् ठिक प्रत्ययेन नि
ष्पन्नः॥
सामयोनिः पुं ब्रह्मा। हस्ती।
सामोऽस्य वक्त्र(?)ति त्रि। इति मे-
दिनी॥
सामर्थ्यं क्ली योग्यता। शक्तिः
इति मेदिनी॥
सामवायिकः पुं मंत्री। इति हे
मचंद्रः। समवायसंबंधिनि त्रि-
सामाजिकः पुं सभ्यः। इत्य-
मरः। सभासंबंधिनि त्रि॥
सामान्यं क्ली जातिः। यथा।
जातिर्जातं च सामान्यं व्यक्ति
स्तु पृथगात्मिका। इति काश्चि
दमरः। तद्द्विविधं यथा। सा
मान्यं द्विविधं प्रोक्तं परञ्चाप
रमेव च। द्रव्यादि त्रिकवृत्ति
स्तु सत्ता परतयोच्यते। पर
भिन्ना च या जातिः सैवापरत
योच्यते। व्यापकत्वात् परापि
स्यात् व्याप्यत्वादपरापि च। इ
त्यादिकं जातिस्तु परापरत-
योच्यते। इति भाषापरिच्छेदः
तल्लक्षणं यथा। नित्यत्वे सत्यने
क समवेतत्वं। अनेकसमवेत-
त्वं संयोगादीनामप्यस्ति अतः
सत्यंते नित्यत्वे सति समवेतत्वं
गगनपरिमाणादीनामप्यस्ति अ
तउक्तं अनेकेति नित्यत्वे सति
अनेकवृत्तित्वं मत्यंताभावस्या
प्यस्ति अतो वृत्तिसामान्यमुपे
क्ष्य समवेतत्वमुक्तं। एकव्यक्ति
वृत्तिस्तु न जातिः। तथा चोक्तं
व्यक्तेरभेदस्तुल्यत्वं संकरोथा
नवस्थिति। रूपहानि रसंबंधो
जाति बाधक संग्रहः। एकव्य
क्तिकत्वात् आकाशत्वं न जा
तिः तुल्यवृत्तिकत्वात् घटत्वं क
लसत्वं न जातिद्वयं। संकीर्णत्वा
त् भूतत्वं मूर्तत्वं न जातिः। अन
वस्था भयात् सामान्यत्वं न जा-
तिः। विशेषस्य व्यावृत्त स्वभाव
स्य रूपहानिः स्यादतो विशेषत्वं
न जातिः। समवाय संबंधाभावात्
समवायो न जातिः। इत्यादि त्रि
कवृत्ति रितिपरत्वं अधिकदेश
वृत्तित्वं अपरत्वं मल्पदेशवृत्तित्वं
सकलजात्यपेक्षया अधिकदे

शावृत्तित्वात् सत्तायाः परत्वं ॥ तद्-
पत्तेह्रायत्नाय द्रव्यादीति। तद्-
पेक्षया चान्यासां जातीनां अ
परत्वं। परभिन्ना सत्ताभिन्ना।
व्यापकत्वात् परापिस्यात् व्या
प्यत्वादपरापिच। पृथिवीत्वा
द्यपेक्षया व्यापकत्वात् अपि
कदेशवृत्तित्वात् द्रव्यत्वस्यपर
त्वं। सत्तापेक्षया अल्पदेशवृ-
त्तित्वात् द्रव्यत्वस्य अपरत्वंच
तथाच धर्मद्वय समावेशात्
उभय मविरुद्धं। इतिसिद्धांत
मुक्तावली ॥

सामान्यं त्रि अनेकसंबंध्येक-
वस्तु। साधारणं। यथा देव
लः। सामान्ये पुत्रकन्यानांमृता
यांस्त्रीधनं विदुः। अप्रजायांहृ
रेद्भर्त्ता माता भ्राता पितापिवा
इतिदायतत्वं ॥

सामान्यलक्षणा स्त्री अलौकि
कसन्निकर्षविशेषः। सतत्राश्रय
ज्ञापकसामान्यज्ञानं। यथा।
एकघटदर्शने सकलघटज्ञानं
भवति ईदृशा घटत्वादिज्ञानं।
तत्प्रमाणंयथा। अलौकिकः
सन्निकर्षस्त्रिविधःपरिकीर्तितः।
सामान्यलक्षणाज्ञानलक्षणयो

गजस्तथा आसत्तिराश्रयाणां
त सामान्यज्ञान मिष्यते। तदि
न्द्रियज तद्धर्मबोध सामग्र्यपे
क्षते। इति भाषापरिच्छेदः ॥

सामान्यशासने क्ली सामान्या
धिकारः। यथा। मेघेंद्रकेषोस्या
द्भस्मशासने धर्मकीलकः ॥
सामान्यशासने सोरं शुक्तिः
सूद्रशासनं ॥ इति शुक्रनीश
द्रत्नावली ॥

सामान्या स्त्री साधारणीनायिका
अस्या लक्षणं। धनमात्रलाभा
र्थं सकलपुरुषाभिलासा। सा
त्रिधा। अन्यसंभोगदुःखिता ॥
वक्रोक्तिगर्विता। मानवती।
वक्रोक्तिगर्वितापि द्विविधा ॥
प्रेमगर्विता सौंदर्यगर्विता च
एता नायिका अवस्थाभेदेनप्रत्ये
कं अष्टप्रकारा भवंति। यथा
प्रोषितभर्तृका १ खंडिता २
कलहांतरिता ३ विप्रलब्धा ४
उत्कण्ठिता ५ वासकसज्जा ६
स्वाधीनपतिका ७ अभिसारि
का ८। इतिरसमंजरी ॥

सामि व्य अर्द्धं। निंदा। इत्यम
रः ॥

सामिकृतः त्रि अर्द्धीकृतः। सामि

शब्दात् कृधातोःक्त प्रत्ययेन-
निष्पन्नः ॥

सामिधेनी स्त्री अग्निसमिंधन
ऋक्। अग्नेर्ज्वालने या ऋक्
पठ्यते। तत्पर्यायः। धाय्या २
इत्यमरः। सामित्। इति मेदि
नी ॥

सामिपीतः त्रि अर्द्धपानकृतः
सामिशब्दात् पाधातोःक्तप्र
त्ययेननिष्पन्नः ॥

सामिभुक्तः त्रि अर्द्धभुक्तः। सा
मिशब्दात् भुजधातोःक्त प्र
त्ययेननिष्पन्नः ॥

सामीची स्त्री वंदना। इतिहा
रावली ॥

सामीप्यं क्ली समीपत्वं। नैक
ट्यं। यथा। वःकसामीप्यसाद्द
श्य साकल्यानुक्रमर्द्धिषु। इ
ति मुग्धबोधव्याकरणं। अपि
करणविशेषः। आधारभेदः
यथा। सामीप्याश्लेषविषयैर्व्या
प्त्याधार श्चतुर्विधः। इति का
रकेमुग्धबोधव्याकरणं ॥

सामुद्रं क्ली समुद्रलवणं। इति
हेमचंद्रः। करकच् इति भाषा
तत्पर्यायः। सामुद्रं यत्तुलव
णं त्रिकूटं कडकंच तत् ॥

इति रत्नमाला ॥ अस्यगुणाः
सामुद्रं लवणं पाके नात्युष्ण
मविदाहिच। भेदनं मधुरंस्नि
ग्धं शूलघ्नं नातिपित्तलं ॥ इ
तिराजवल्लभः ॥ अन्यत् समुद्र
लवणशब्दे द्रष्टव्यं ॥ समुद्रफेणं
इति राजनिर्घण्टः ॥
देहचिह्नं। समुद्रजाते त्रि ॥
इति मेदिनी ॥

सामुद्रकं क्ली समुद्रलवणं। इति
राजनिर्घण्टः। समुद्रोक्तस्त्रीपुं-
लक्षणग्रंथः। तद्विवरणं। यथा
श्रीकृष्णउवाच। कीदृशाःपुरुषा
वेद्योःवेद्यावा कीदृशा भवेत्।
कन्या वा कीदृशी शंस्यागार्हि-
ता वापिकीदृशी ॥ महेशउवा
च। शृणु कृष्ण प्रवक्ष्यामि समु
द्रवचनं यथा। लक्षणंतुमनु
ष्याणं एकैकेनवदाम्यहं ॥
वामभागे तु नारीणां दक्षिणे
पुरुषस्यच निर्दिष्टं लक्षणं ते
षां समुद्रेण यथोदितं। एवं
मायुः परीक्षेत पश्चाल्लक्षणमे
वच आयुर्हीने नराणांचेत् ल
क्षणैः किं प्रयोजनं ॥ अथ-
पुरुषलक्षणं। पंचदीर्घं चतु
र्ह्रस्वं पंचसूक्ष्मं षडुन्नतं ॥

समरक्तं त्रिगंभीरं त्रिविशालं
प्रशस्यते । बाहू नेत्रद्वयं कुक्षी
द्वौ तु नासा तथैवच । स्तन
यो रंतरंचैव पंचदीर्घं प्रशस्य
ते । ग्रीवाथ कर्णौ पृष्ठंच ह्र
स्वे जंघे सुपूजिते । चत्वारि
यस्य ह्रस्वानि राज्यं प्राप्नोति
नित्यशः । सूक्ष्माण्यंगुलिपर्वा
णि दंत केशा नख त्वचः । पंच
सूक्ष्माणि येषां हि ते नरा दीर्घ
जीविनः । नासा नेत्रंच दंताश्च
ललाटंच शिरस्तथा । हृदयं
चैव विज्ञेय मुन्नतं षट् प्रशस्य
ते । पाणि पादतलौ रक्तौ नेत्रां
त नखानिच । तालकोष्ठ·
जिह्वाच समरक्तं प्रशस्यते ॥
स्वरो बुद्धिश्च नाभिश्च त्रिगंभीर
मुदाहृतं । उरः शिरो ललाटंच
त्रिविस्तीर्णं प्रशस्यते ॥ क
टिर्विशाला बहुपुत्रभागी वि
शालहस्तो नरपुंगवः स्यात् । उ
रो विशालं धनधान्यभागी शिरो
विशाले नरपूजितः स्यात् ॥ न
श्रीस्त्यजति रक्तांगं नार्थः क
नकपिंगलं । दीर्घबाहुं नचैश्व
र्यं न मांसोपचितांसकं । कदा
चिद्दंतुरो मूर्खः कदाचित् लो

मशः सुखी कदाचित् तुंदिलो
दुःखी कदाचित् चंचला सती
नेत्रस्नेहे सौभाग्यं दंतस्नेहेन
भोजनं । हस्तस्नेहेनैश्वर्यं
पादस्नेहेन वाहनं । अकर्मक
ठिनौ हस्तौ पादावध्वनि को
मलौ । यस्य पाणितलौ र
क्तौ तस्य राज्यं विनिर्दिशेत् ।
दीर्घलिंगेन दारिद्र्यं स्थूललिं
गेन निर्धनः । कृशलिंगेन सौ
भाग्यं ह्रस्वलिंगेन भूपतिः । रे
खाभिर्बहुभिर्दुःखं स्वल्पाभिर्ध
नहीनता । रक्ताभिः सुखमाप्नो
ति कृष्णाभिः प्रेष्यतां व्रजेत् । अं
गुष्ठोदरमध्ये तु यवो यस्य वि
राजितः । उत्तमं भोजनं तस्य
प्रांते जीवति मानवः । अंकु
शं कुलिशं छत्रं यस्य पाणि
तले भवेत् । तस्यैश्वर्यं विनिर्दि
ष्टं अशीत्यायुर्भवेद्ध्रुवं । यत्र
यस्य भवेत् पाणौ पंकजं वा
थ तोरणं । तस्यैश्वर्यं च राज्यं च
अशीत्यायुर्भवेद्ध्रुवं । कनिष्ठा
तर्जनी यावद्रेखा भवति चा
यता । विंशत्यब्दाधिकशतं नरो
जीवत्यनामयः । कनिष्ठामध्य
मा यावद्रेखा भवति चा ·

यता । शताब्दं वाथ वाशीतिं न
रो जीवेन्न संशयः । कनिष्ठा·
नामिकायांचेत् रेखा भवति
चायता । षष्टिं पंचाशदब्दं वा
नरा जीवंत्यसंशयं । रेखयाभि
घते रेखा स्वल्पायुश्च भवेन्नरः
कनिष्ठाधः स्थिता रेखाः संख्या
यावतिः स्मृताः ॥ तावती पुरु
षाणां तु नारी भवति निश्चि·
तं । करभमध्यगता रेखा ध्रुवा ऊ
र्ध्वमवेद्यदि । नृपो वा नृपतु·
ल्यो वा चिरं ख्यातोऽर्थवान्भवे
त् । मत्स्यपुच्छप्रकीर्णेन वि·
द्याविनयसमान्वितः ॥ पिताम
हस्य वा किंचिद्धनंच लभते ध्रुवं ।
मध्यमायां यदि यवा दृश्यते
ऽत्यंत शोभनाः । तदास्य संचि
तं वित्तं प्राप्नोत्यंगुष्ठके यवे । य
स्यास्य चक्रमंगुष्ठे यवः पूर्ण·
श्च दृश्यते । तदा पितामहादी
ना मर्जितं धनमाप्नुयात् । तर्ज
न्यामथ चक्रंच मित्रद्वाराधनं·
भवेत् । तेनैव विपरीतं तत्क्षयो
भवति निश्चितं मध्यमायांस्थि
ते चक्रे देवद्वाराधनं लभेत् ॥
तेनैव विपरीतं तत्क्षयो भवति·
निश्चितं । अनामिकायां भ

वेच्चक्रं सर्वद्वारा भवेद्धनं ॥
तेनैव विपरीतं तत्क्षयो भवति
निश्चितं ॥ कनिष्ठायां भवे
च्चक्रं वाणिज्येन धनं भवेत् ॥
तेनैव विपरीतं तत् क्षयो भवति
निश्चितं । ललाटे दृश्यते य
स्य चक्ररेखा चतुष्टयं । अशी
त्यायुः समाप्नोति पंचरेखाः श·
तं समाः । यस्योन्नतं ललाटं
च ताम्रवर्णंच दृश्यते ॥ रेखा
हीनंच कंठस्य स चोन्मत्तो म
ही भ्रमेत् । यस्य जिह्वा भवे
द्दीर्घा नासाग्रं लेढि सर्वदा ॥
योगी भवति निर्वाणः पृथ्वीं भ
मति सर्वदा । दंताश्च विरला
यस्य गंडे कूपोपि जायते । प
रस्त्रीरमणो नित्यं परवित्तेन वि
त्तवान् । कर्कशैः कठिनै र्लिं
गैः प्रमाणान्निर्गतैः सदा ॥
रमते च सदा दासी निर्धनो
भवति ध्रुवं । कृशलिंगेन सूक्ष्मे
ण रक्तवर्णेन भूपतिः ॥ वक्र
स्त्रीरमणो नित्यं नारीणां वल्लभो
भवेत् । यस्य पादतले पद्मं च
क्रं वाप्यथ तोरणं ॥ अंकुशं
कुलिशं वापि स राजा भवति
ध्रुवं ॥ कृशातिलोमशा येस्युः

केकराक्षाः कुचेलकाः ॥ का
तराः ब्यालजिकाश्च ते दरिद्र
तामे शयः । कपिला मलिना
गाश्च कृस्वाश्चैव हृहन्नखाः ॥
कृशातिदीर्घा मजुञा स्तेदरि
द्रानसंशयः । चिबुके समश्रुम
ध्याये निर्लोमहृदयाश्चये । ते
स्तो नैवसंदेहः समुद्रवचनं य
था । सूचीमुखा भग्नपृष्ठाः कु
स्तदेताः कुचेलकाः । वक्रनासा
वज्रनासा स्तेनरा दुष्टमानसाः
दयालवश्च दातारो रूपवन्तोजि
तेंद्रियाः । परोपकारिणश्चैव
ते एवीमानवाः स्मृताः । इति
पुरुषलक्षणं । अथ स्त्रीलक्ष
णं । यस्याः पादतले रेखा
सा भवेत् क्षितिपांगना । भवे
दखंडभोगाश्च यामध्यांगुलिस
गता । उन्नतो मांसलोङ्गुष्ठोव
र्तुलोतुलभोगदः । वक्रोहृस्व
श्च चिपिटः सुख सौभाग्यभं
जकः । दीर्घांगुलीभिः कुलटा
कृशाभिः रतिनिर्धना हृस्वाभिः
स्याच्च हृस्वायुः भग्नाभिर्भुग्नवर्ति
नी । चिपिटाभिर्भवेद्दासी विर
लाभिः दरिद्रिणी । यस्याः सं
मामूष्पा यदांगुल्या भवंति हि

हत्वा बहूनपि पतीन् परप्रेष्या
तदा भवेत् । स्निग्धा समुन्नता
स्ताम्रा वृत्ताः पादनखाः शुभाः
राज्ञीत्व सूचकं स्त्रीणां पादपृ
ष्ठं समुन्नतं । समपार्ष्णी शुभा नारी
पृथुपार्ष्णी सुदुर्भगा । कुलटोन्न
तपार्ष्णी स्यात् दीर्घपार्ष्णी च दुः
खभाक् । रोमहीने समे स्निग्धे
जंघे च क्रमवर्तुले । सा राजप
त्नी भवति विशिरे सुमनोह
रे । वृत्ते पिशितसंलग्ने जानु
युग्मं प्रशस्यते । निर्मांसे स्व
च्छचारिण्या दरिद्रायाश्च विश्ल
थे । विशिरैः करभाकारैरूरुभि
र्मसृणैर्घनैः । सवृत्तैः रोमर
हितैर्भवेद्भूपवल्लभाः । च
तुर्भिरंगुलैः शाला कटि विंश
तिसंयुतैः ॥ समुन्नत नितम्बा
ढ्या चतुरस्रा मृगाट्टशा नितं
बबिंबो नारीणां उन्नतो मांसलः
पृथुः । महाभोगाय संप्रोक्तः त
दन्योऽप्रासगाय च । गंभीरा द
क्षिणावर्ता नाभिः स्यात् सुख
संपदे वामावर्ता समुत्ताना च
कुत्रचिन्न शोभना । उदरेण
भिन्नकुक्षेन विशिरेणा मृदुत्वचा
योषिद्भवति भोगाढ्या नित्य

मिष्टान्नसेविनी कुंभाकारं द
रिद्राया जठरं च मृदंगवत् । कु
ष्मांडाभं यवाभं च दुष्पूरं जाय
ते स्त्रियाः । निर्लोम हृदयं य
स्याः समं निम्नत्व वर्जितं । ऐश्व
र्यं चाप्यवैधव्यं प्रियप्रेमा च
सा भवेत् । घनौ वृत्तौ दृढौ
पीनौ समौ शस्तौ पयोधरौ ।
स्थूलाग्रौ विरलौ शुष्कौ वामो
रूणां न शर्मदौ । दक्षिणोन्नत
स्तोजा पुत्रिणी श्रेष्ठाग्रणी मता ।
वामोन्नत कुचा सूते कन्या सौ
भाग्यसुंदरी । मूले स्थूलौ क्रम
कृशावग्रे तीक्ष्णौ पयोधरौ । सु
खदौ बाल्यकालेतु पश्चादत्यंत
दुःखदौ । अंभोज मुकुलाकार
मंगुष्ठांगुलिसन्मुखं । हस्तद्वयं
मृगाक्षीणां बहुभोगाय जाय
ते । मृदु मध्योन्नतं रक्तं तलं पाणि
रंध्रकं । प्रशस्तं शस्तरेखाढ्य
मल्परेखं शुभप्रदं । विधवा बहु
रेखेण विरेखेण दरिद्रिणी । भि
क्षुकी सुशिराढ्येन नारी कर
तलेन वै । मत्स्येन सुभगा नारी
स्वस्तिकेन च सुप्रजा । पद्मेन
भूपतेः पत्नी जनयेत् भूपतिं
सुतं । चक्रवर्तिस्त्रियाः पाणौ न

न्द्यावर्तं प्रदक्षिणाः । शंखातप
त्रकमठा राजमातृत्व सूचकाः ।
कृषीवलस्य पत्नी स्यात् तुला के
न युगेन वा । चामरांकुशकोदंडैः
राजपत्नी भवेद्ध्रुवं । अंगुष्ठमू
लान्निर्गत्य रेखायाति कनिष्ठि
कां । यदि स्यात् पतिहंत्री सा दूर
तस्तां त्यजेत्सुधीः । त्रिशूला
सिगदा शक्ति दुंदुभ्याकृति रे
खया । नितंबिनी कीर्तिमती क
रेण पृथिवीतले । पाटलो वर्तुलः
स्निग्धो रेखाभूषित मध्यगः ।
सीमंतिनीनां मणिबंधो राज्ञी चैव
प्रियो भवेत् । श्यामः स्थूलः
परोक्षः स्यात् वैधव्य कलहप्रदः
मसृणा मनका श्लिष्टा अंगुष्ठो
ऽप्य सुभोगदः । पीनाः श्यामाश्च
दशनाः स्थूला दीर्घा द्विपंक्तयः
शुक्लाकाराश्च विरला दुःखदौ
र्भाग्यकारणं । अधस्तादधिके
दंते मातरं भक्षयेत्स्फुटं । पति
हीना च विकटैः कुलटा विरलै
र्भवेत् । समवृत्तपुटा नासा लघु
च्छिद्रा शुभावहा । स्थूलाग्रा मध्य
नम्रा च न प्रशस्ता समुन्नता ॥
ललना लोचने शस्ते रक्तांते
कृष्णतारके । गोक्षीरवर्णविश



देशस्त्रियो कुलपालिनी। उष्ट्राक्षीन दीर्घायुः कृष्णाक्षीकुलटाभवेत्। मेषाक्षी महिषाक्षीचकेकराक्षीनशोभना। कामदृष्टीला नितरां गोपिङ्गाक्षी सुदुर्मदा। पारावताक्षी दुःशीलारक्ताक्षीभर्तृघातिनी कोटराक्षयना दुष्टा गजनेत्रा नशोभना। पुंश्चलीवामकाणाक्षी वेश्यादक्षिणकाणिका। मधुपिङ्गाक्षीरमणी धन धान्य समृद्धिभाक्। प्रलंबमलिकं यस्यादेवरं हन्तिसाध्रुवं। रोमशेन शिरोलेन प्रांशुना रोगिणीमता। स्थूलमूर्द्धी च विधवा दीर्घशीर्षाच बंधकी। विशालेनापि शिरसा भवेद्दौर्भाग्यभाजनं। केशाग्रलिंगलक्षायाः स्त्रियाः सूक्ष्माः मृदुकोमलाः। किंचिदाकुंचिताग्राश्चकुटिलाश्चातिशोभनाः। भ्रुवो रते ललाटेवा मशको राज्यसूचकः। वामे कपोले मशकः शोणे मिष्टान्नदःशुभः॥ तिलकं लाञ्छनं वापि हृदिसौभाग्यकारणं। यस्या दक्षिणवक्षोजे भवेत् तिलकलाञ्छनं कन्याचतुष्टयं सूते सूतेसाच-

सुतद्वयं। तिलकंलाञ्छनंशोणंयस्यावामकुचेभवेत्। एकं पुत्रं प्रसूयादौ ततश्च विधवा भवेत्। गुह्यस्य दक्षिणे भागे तिलकं यदियोषितः। तदाक्षितिपतेःपत्नी सूतेच क्षितिपं सुतं। नासाग्रे मशकः शोणे महिष्या एवजायते। कृष्णःस एवभर्तृघ्न्याः पुंश्चल्यावाप्रकीर्तितः। नाभे रधस्तात् तिलकं मशको लाञ्छनं शुभं। मशकं स्तिलकं चिह्नं गुल्फदेशे दरिद्रकृत्। सुलक्षणापि दुःशीला कुलक्षणाशिरोमणिः। कुलक्षणापिया साध्वी सर्वलक्षणभूषसा कृष्णा कपिलकेशीचमिलितभ्रूकुटिस्तथा। गमनं सत्वरंचैव त्यक्तव्यास्यात् सदाबुधैः। यस्या गमनमात्रेणभूमौकंपःप्रजायते। वक्राशिनी प्रलोभाच लो नारीपरिवर्जयेत्। विरला दशना यस्याः कृष्णोष्ठी कृष्णजिह्विका। भर्त्तारं प्रथमे हन्ति हित्वा यंचैव विंदति। अंगुलीविरला यस्याः सलोमा गात्रकर्कशा भेका भेकस्तनी तद्दूरतः परिवर्जयेत्। क्षीणियस्याः

प्रलेवाति ललाटं उदरं भगं॥ क्षीणिस्या भवेन्नारी श्वशुरंदेवरंपतिं। ललाटे श्वशुरंहन्यात् जठरेदेवरं तथा॥ भगंच हन्याद्भर्त्तारं महादोषाह्वयाःस्मृताः। यस्या ग्रस्तुतकटनाड्या वक्षश्च विस्तृतंभवेत्। उत्तरोष्ठेच लोमानि शीघ्रंसा भक्षयेत्पतिं। चरणानामिकायस्याः क्षितिं नस्पृशते यदि॥ द्वितीयावा तृतीयावा साकन्या सुखवर्जिता। नानाग्रेष्ट पृषते यस्याःतिलकंमशकोऽपिच। कृष्णदंता कृष्णजिह्वा दशाहेन पतिंहरेत्। सूक्ष्मकेशान्तया कन्या गौरवर्णा च याभवेत्। श्रेष्ठाजनयते पुत्रान् प्राप्नोति विपुलंसुखं। इतिसामुद्रके स्त्रीलक्षणं समाप्तं॥

सामुद्रिकः त्रि स्त्रीपुंसचिह्नवेत्ता। इतिहारावली। समुद्रसंबंधीच॥

साम्नी स्त्री वैदिकछंदोविशेषः इतिकेचित्॥

सांपरायिकं क्ली युद्धं। इत्यमरः। पारलौकिके त्रि। यथा प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते। नसांपरायिकं तस्य दुर्मते विद्यते फलं॥ इतितिथ्यादितत्वं॥

सांप्रतं अ युक्ते। इदानीं॥ इत्यमरः॥

सांब क संबंधे। इतिकविकल्पद्रुमः। उष्ठवर्गशेषोपधः। द्वितीयस्वरी। क सांबयति घनं लोकः संबध्नातिइत्यर्थः। इति दुर्गादासः॥

सांबरं क्ली गडुलवणं। यथा गडादिलवणं शुभ्रं दृष्टीजं गडदेशजं। गडोत्थंच महारंभंसाबरं संबरोद्भवं॥ इतिराजनिर्घण्टः॥

सांबरी स्त्री माया। यथा। शांबरी सांबरीमायामायाकूहि हुकेनटे। इतिशब्दरत्नावली॥

सांवादिकः पुं नैयायिकः॥ यथा। नैयायिकः साक्षपादः स्यात्सांवादिकआहिकः। इति जटाधरः॥

सांभवी स्त्री रक्तलोध्रः। इति शब्दचंद्रिका॥

साम्यं क्ली समता। तुल्यत्वं यथा। चाण्डालोत्पाद्विया ग

त्वा भुक्त्वा च प्रतिगृह्य च । पतत्स्वाचान्तो विप्रो ज्ञानात् साम्यन्तु गच्छति । इति प्रायश्चित्ततत्त्वं । साम्यं तैकस्थानत्वं ॥ इति मुग्धबोधव्याकरणं ॥

साम्राज्यं क्ली समस्तराज्यम् । सम्राजो भाव इत्यर्थे ष्य प्रत्ययेन निष्पन्नं । दशलक्षाधिपत्यं यथा ॥ लक्षाधिपत्यं राज्यं स्यात् साम्राज्यं दशलक्षके । शतलक्षे महेशानि महासाम्राज्यमुच्यते । इति वरदातन्त्रे २ पटलः ॥

साम्राणिकर्द्दमं क्ली जवादिनामकगन्धद्रव्यं । इति राजनिर्घण्टः ॥

साम्राणिजं क्ली महापारेवतं इति राजनिर्घण्टः ॥

साये व्य सायाह्नः । इत्यमरः सन्ध्या । इति राजनिर्घण्टः ॥ दिनान्ते पुंसि सायः स्यात् सायाह्ने सायमव्ययं । इति शब्दार्णवः ॥

सायः पुं दिनान्तः । इत्यमरः । वाणः । इति मेदिनी । सायोत्सृष्टे विकालके । इति त्रिकाण्डशेषः ॥

सायकः पुं वाणः । खड्गः । इत्यमरः ॥

सायकपुङ्खा स्त्री शरपुङ्खा । इति राजनिर्घण्टः ॥

सायंकालः पुं सायाह्नः । सायंसन्ध्यासमयः । यथा । स्मृतिसागरधृतमत्स्यसूक्ते ज्येष्ठा वाप्यथवा षष्ठी सायंकालेन चेद्भवेत् । साय मेव तथापि स्याद्बिल्वशाखाभिमन्त्रणं । इति तिथ्यादितत्त्वं ॥

सायंसन्ध्या स्त्री सायंकालोपास्यदेवता ॥ सायंकालकर्त्तव्योपासना । सायंसन्ध्योपासनाकालश्च । तत्प्रमाणं सन्ध्याशब्दे द्रष्टव्यं । पश्चिमासन्ध्या ॥ तस्या उत्पत्तिर्यथा । मार्कण्डेय उवाच । नारायणः स्वयं सन्ध्यां समस्पर्शाच्छ्रुत्वा पाणिना । ततः पुरोडाशमयं तच्छरीरमभूत्क्षणात् । महामुनेर्महायज्ञे तस्मिन्विश्वोपकारिणि ॥ नाग्निः क्रव्यादतो यातीत्येतदर्थं तथा कृते । एवं कृत्वा जगन्नाथः स्वैवान्तरधीयत ॥ सन्ध्या पश्चाद्बुबुधे तत्र मेधातिथिर्मुनिः । अथ विष्णोः

प्रसादेन केनाप्यनुपलक्षिता प्रविवेश तदा यज्ञं सन्ध्या मेधातिथेर्मुनेः । वशिष्ठेन पुरा या तु वर्णिभूता तु सा स्मृता । उपदिष्टा तपः सिद्धेर्वचनात्परमेष्ठिनः । तमेव कृत्वा मनसि तपश्चर्य्योपदेशकं । पतितेन तदा सन्ध्या ब्राह्मणं ब्रह्मचारिणं ॥ समिद्धेऽग्नौ महायज्ञे मुनिभिर्नोपलक्षिता । तदा विष्णोः प्रसादेन सा विवेश विधेः सुता तस्याः पुरोडाशमयं शरीरं तत्क्षणात्ततः । दग्धं पुरोडाशगन्धं व्याप्तावयदलक्षिते ॥ वह्निस्तस्याः शरीरं तद्दग्ध्वा सूर्य्यमण्डले । शुद्धं प्रवेशयामास विष्णोर्वेवाज्ञया पुनः सूर्य्यो द्विधा विभज्याथ तत् शरीरं तदा रथे ॥ स्वके संस्थापयामास प्रीतये पितृदेवयोः ॥ यदूर्द्ध्वभागं तस्यास्तु शरीरस्य द्विजोत्तमाः । प्रातःसन्ध्याभवत् सा तु अहोरात्रादिसम्भवा ॥ यच्छेषभागस्तस्यास्तु अहोरात्रान्तसम्भवा ॥ सा सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा सूर्य्योदयाच्च प्रथमं यदा सा दृश्योदयः ॥ प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी अस्तगते ततः सूर्य्ये शोणपद्मनिभा सदा । उदेति सायंसन्ध्या सा पितॄणां मोदकारिणी इति श्रीकालिकापुराणे अरुन्धतीजन्मकथने २२ अध्यायः ॥ सायंसन्ध्यादेवता स्त्री सरस्वती । इति कविकल्पलता ॥

सायन्तनः त्रि सायंकालसम्बन्धी । यथा ॥ सन्ध्या सायन्तनी कुर्य्यात् द्वादशपादिक्षपाप्रिये । अकुर्वन्निरयं याति यतो नित्यागमक्रिया ॥ इति देहमीलतन्त्रे प्रथमपटलः ॥

सायाह्नः पुं पञ्चधाविभक्तदिनपञ्चमांशः । दिवसस्य शेषमुहूर्त्तत्रयं । यथा । प्रातःकालो मुहूर्त्तांस्त्रीन् सङ्गवस्तावदेव तु । मध्याह्नः स्त्रिमुहूर्त्तः स्यादपराह्नस्ततः परं । सायाह्नस्त्रिमुहूर्त्तः स्यात् श्राद्धे तन्न कारयेत् राक्षसी नाम सा वेला गर्हिता सर्वकर्म्मसु ॥ इति तिथ्यादितत्त्वं ॥ तत्पर्य्यायः ॥

सायो दिनान्तः सायाह्नो वि
कालः साय मेवच । इतिशब्द
रत्नावली । सायका स्त्री क्र
मस्थितिः ॥
इतिशब्दरत्नावली ॥
सायीन्पु अश्वारोहः ॥ इति
केचित् ॥
सायुज्यं क्ली सहयोगः । एक
त्वं । तत्तु पंचधा मुक्त्यंतर्गतमु
क्तिविशेषः । यथा । सालोक्य
सार्ष्टि सामीप्य सारूप्यैकत्वम
प्युत दीयमानं न गृह्णंतिवि
ना मत्सेवनं जनाः ॥ इति
श्रीभागवते ३ स्कंधे २९ अध्या
यः । भक्तानां निष्कामतां कैमु
तिकन्यायेनाह । सालोक्यम
या सह एकस्मिन्लोके वासं
सार्ष्टिं समानैश्वर्यं । सामी
प्यंनिकटवर्तित्वं । सारूप्यंस
मानरूपतां एकत्वंसायुज्यं ॥
उत अपि दीयमान मपि नगृ
ह्णंति कुतस्तत् कामना इत्य
र्थः । इतिश्रीधरस्वामी । एक
त्वं भगवत्सायुज्यं ब्रह्मसायु
ज्यंच अनयोः स्वलीलात्मक
त्वेन तत्सेवनापत्त्याभावात्प्र
हणपक्षएकत्व मेवेति भावः

इतिक्रमसंदर्भः ॥
साये क्ल दिनान्ते । सायंकाले ।
इतिकेचित् ॥
सार त्रक दौर्बल्ये । इतिकवि
कल्पद्रुमः । रेकोपधः । अससा
रत् । इतिदुर्गादासः ॥
सारं क्लीजलं । धनं । न्याय्यं ।
इतिमेदिनी । नवनीतं ।
इतिराजनिर्घण्टः । लोहं ॥
इतिभावप्रकाशः । विपिनं ।
इतिशब्दरत्नावली । सारवस्तु
नि यथा । सारंरसानांतद्धृते
च तत्सारं कृतेचयत् । कृतस्य
सारं स्वर्गेच स्वर्गात् सारंतथो
षितः । अतो राजन् प्रदेयाः
स्युः स्त्रियः सर्वा मभीप्सतः
तयैवेह सर्वताभिःसह राज्यं
न्तयोत्तम । इति वह्निपुराणे
दासीदानाध्यायः । अपि च
असारे खलुसंसारेसार मेत
च्चतुष्टयं । काश्यांवासःसतां
संगो गंगांभः शंभुसेवनं ॥
इति कवितारत्नाकरधृतपु
राणवचनं ॥
सारः पुं बलः । स्थिरांशः ॥
मज्जा । इत्यमरः । वज्रक्षारं ।
इति राजनिर्घण्टः ॥ वायुः ॥

इतिजटाधरः । रोगः । इति ।
धरणी । पाशकः । इतिहेमः
इतिशब्दरत्नावली । दध्यग्रं ।
इतिशब्दचंद्रिका ॥
सारः त्रि वरः । श्रेष्ठः । इत्यमर
मेदिनीकरौ । यथा । सर्वसारो
यथा कृष्णो व्रतानां पुण्यके
तथा । इतिब्रह्मवैवर्तेगणप
तिखंडे ३ अध्यायः ॥ अपिच
श्रीमार्कंडेयउवाच ॥ जगत्
सर्वंतु निःसार मनित्यंदुःख
भाजनं । उत्पद्यतेक्षणादेत
त् क्षणादेतत् विपद्यते । य
थैवोत्पद्यते सारान्निःसारं ज
गदेजसा । पुनस्तस्मिन्विली
यते महाप्रलय संगमे । उत्
पत्ति प्रलयाभ्यांतु जगन्निःसा
रतांहरिः । शंभवे दर्शयामास
भावेन जगतांपतिः ॥ एके
शिवे शांतं अनंत मच्युतेप
रात्परे ज्ञानमये विशेषे । अ
द्वैतमव्यग्र मचिंत्यरूपं सारंत्व
केनास्तिसारं त्वदन्यत् यस्मा
देतज्जायते विश्व मग्रेयस्मा
ल्लीनं स्यात् तत् पश्चात्स्थि
तेच । आकाशवन्मेघजालस्य
दृश्या यद्विश्वं वै भ्रियते तच्च

सारं । अष्टांगयोगै र्यदवाप्य
भिक्षुर्न् योगी पुनरप्यात्मरूपं
सदैव । निवर्तते प्राप्ययतेह
लोके तद्धि सारं सारमन्यन्नचा
स्ति । सारो द्वितीयो धर्मस्तु
योनित्यप्राप्तये भवेत् । योवै
निवर्तकोनाम तत्रासारः प्रवर्त
कः ॥ सर्वेत्वरति लोकेस्मि
न् धर्मो नैवच्युतो भवेत् ।
स्वधर्मोयोनचलति सएवात्र
रउच्यते । एतद्वः कथितेसारं
निःसारंचयथा जगत् । यथा
स्वयं ददर्शासौ शंभुर्ज्ञानेन
स्वेऽन्तरे ॥ एतद्धि दर्शयामा
स सर्वस्वजगतां पतिः । स्व
यंजग्राह मनसा ध्यानेनात्म
नि शंकरः ॥
सारं तत्त्वं परमं निष्कलंयन्म
त्वा हीनं मूर्तिमान् धर्म नयः
सारोऽन्योऽसौ सारहीनं तद
न्यत् ज्ञात्वैवेत्थं याति निःश्रे
महार्थैः । इतिश्रीकालिका
पुराणे २२ अध्यायः ॥
सारकः पुं जयपालः । इति
राजनिर्घण्टः । विरेचके त्रि
इतिवैद्यकं ॥
सारखदिरः पुं ङःखदिरः । इति

राजनिर्घण्टः ॥

सारगंधः पुं चंदने । इति शब्दचंद्रिका ॥

सारग्राही त्रि सारग्रहणकर्त्ता । यथा । नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक् । कुशलान्याशु सिध्यंति नेतराणि कृतानि यत् । इति श्रीभागवते १ स्कंधे १८ अध्यायः । ननु अयमिहे तं कलिं सर्वथा किं न हतवान् तत्राह नानुद्वेष्टीति सारंगो भ्रमर इव सारग्राही । सारमाहय त् यस्मिन् कुशलानि शुभानि आशुसंकल्पमात्रेण फलंति इतराणि पापानि आशु न सिध्यंति यत स्तानि कृतान्येव सिध्यंति न तु संकल्पितमात्राणीति इति श्रीधरस्वामी ॥

सारंगं क्ली मधु । इति जटाधरः ॥

सारंगः पुं चातकपक्षी । इत्यमरः । हरिणः । मतंगजः ॥ इति मेदिनी । भृंगः । पक्षिभेदः । इति विश्वः । छत्रं ॥ राजहंसः । चित्रमृगः । वाद्यभेदः । श्रेष्ठकं । इति शब्दरत्नावली । नानावर्णः ॥ मयूरः ॥ कामदेवः । धनुः ॥ केशः ॥ स्वर्णं । आभरणं । पद्मं ॥ शंखः ॥ चंदने । कर्पूरे । पुष्पे कोकिलः ॥ मेघः ॥ पृथिवी रात्रिः ॥ दीप्तिः ॥ सिंहः ॥ इत्यनेकार्थकोषः ॥

सारंगहरिणमांसगुणाः ॥ सारंगं जांगलं स्निग्धं मधुरं लघु बृष्यदं । इति राजनिर्घण्टः ॥

सारंगः त्रि शबलः । इत्यमरः ॥ शारंगश्चातके ख्यातः शबले हरिणेपि च । इति तालव्यादौ वर्जयः । अतएव सारंगो दंत्यादि स्तालव्यादिश्च ॥ इति भरतः ॥

सारंगिकः पुं व्याधः । सारंगो हंतीत्यर्थे सारंगशब्दात् ठक् प्रत्ययेन निष्पन्नः । इति सिद्धांतकौमुदी ॥

सारंगी स्त्री वाद्यविशेषः । इति केचित् ॥

सारजं क्ली नवनीतं । इति शब्दचंद्रिका ॥

सारणं क्ली गंधभेदः । इति धरणी ॥

सारणः पुं अतीसाररोगः ॥ रावणामंत्री । इति हेमचंद्रः । भद्रबला । इति धरणी । आम्रा-

तकः ॥ इति शब्दचंद्रिका ॥

सारणिः स्त्री क्षुद्रनदी प्रसारणी । इत्युणादिकोषः ॥

सारणिकः त्रि पथिकः । सारणिशब्दात् ठक्प्रत्ययेन निष्पन्नः ॥

सारणिकघ्नः पुं दस्युः । इति केचित् ॥

सारणी स्त्री प्रसारणी । स्वल्पनदी । इति मेदिनी ॥

सारंडः पुं सर्पांडः । इति जटाधरः ॥

सारतरुः पुं कदलीवृक्षः । इति धनंजयः ॥

सारथिः पुं रथादिचोदकनियोगकर्त्ता । तत्पर्य्यायः । नियंता २ प्राजिता ३ यंता ४ सूतः ५ क्षत्ता ६ सव्येष्ठा ७ दक्षिणस्थः ८ रथकुटुंबी ९ इत्यमरः । सादी १० सव्येष्ठः ११ नियामकः १२ चाक्रिकः १३ । इति जटाधरः । प्रवेता १४ रथनागरः १५ इति शब्दरत्नावली । सारथ्यस्यापत्यं सारथिः बाह्वाद्यत इति लिः । सहरथेन वर्त्तते योऽसौ सरथोऽश्वः तं प्रेरयतीष्ठ चेकादिति शिवः । सारयति अश्वान् इति ज्योतातत्स्तराना- वितस्मात्नाम्नीति अप्रत्ययो वा । इत्यमरटीकायां भरतः ॥ तल्लक्षणं यथा । निमित्तशकुनज्ञानो हय शिक्षाविशारदः । हयायुर्वेदतत्त्वज्ञो भूविभागविशेषवित् ॥ स्वामिभक्तो महोत्साहः सर्वेषांच प्रियम्वदः । शूरश्च कृतविद्यश्च सारथिः परिकीर्त्तितः ॥ इति मात्स्ये १८९ अध्यायः ॥ समुद्रः । इति संक्षिप्तसारोणादिवृत्तिः ॥

सारदा स्त्री सरस्वती । इति शब्दरत्नावली । दुर्गा । यथा । शरत्कालबोधनीयत्वेन शारदाप्रस्तुतपक्षे सतपदं तालव्यादिश्च सारं ददातीति व्युत्पत्ति स्तु काल्पनिकी । इति तिथ्यादितत्त्वे सारदातरित्रे ॥

सारद्रुमः पुं खदिरः ॥ इति राजनिर्घण्टः ॥

सारपादपः पुं धामनिवृक्षः ॥ इति रत्नमाला ॥

सारभांडं क्ली अकृत्रिमपात्रं ॥ यथा मृगनाभ्यादि ॥

सारमितिः पुं वेदः । इति हेमचंद्रः । सारे यथार्थे मीयते-

ज्ञायते अनेन सारमितिः ॥ सारोपपदात् । माधातोः नीन्नीतितिः ॥

सारमूषिका स्त्री देवदाली । इति राजनिर्घण्टः ॥

सारमेयः पुं कुक्कुरः । इत्यमरः ॥

सारमेयी स्त्री कुक्कुरी । इति शब्दरत्नावली ॥

सारलोहं क्ली लौहसारः । इष्पात इति भाषा । इति भूरिप्रयोगः ॥

सारवः त्रि सरयूनदीभववस्तु इत्यमरः ॥

सारवर्जितः त्रि स्थिरांशरहितः असारवस्तु । सारेण वर्जित इति तृतीया तत्पुरुष समासनिष्पन्नः ॥

सारसं क्ली पद्मं । इत्यमरः ॥ स्त्रीकट्याभरणे । इति केचित् ॥

सारसः पुं चन्द्रः । इति मेदिनी ।

सारसः पुं स्त्री स्वनामख्यातपक्षी । तत्पर्य्यायः । पुष्कराह्वः २ । इत्यमरः । गोनर्द्दः ३ लोकुरः ४ लक्ष्मणः ५ लक्षणः ६ सरसीकः ७ सरोत्सवः ८ इति शब्दरत्नावली । रसिकः ९ कामी १० । तन्मांसगुणाः । मधुरत्वं । अम्लत्वं । कषायत्वं । महातिसारपित्तग्रहण्यर्शेण नाशित्वंच इति राजनिर्घण्टः ॥ तस्य शकुने यथा । इष्टार्थसिद्धिः सकलासु दिक्षु स्यात् सारसहंसविलोकनेन फलत्वास्य दृष्टेदिनदे न गच्छेत् सिद्ध्यत्यभीष्टे गृह एव यस्मात् । वामेन योषित्कुललाभकारी शब्दस्तथास्य स्वपतोऽर्थलब्ध्यै ॥ यः सारसाभ्यां युगपद्विरावः कृतोऽचिरेण क्रमतोपि वामः ॥ स वेदितव्यः कथितार्थकारी क्रौंचद्वयस्याप्ययमेव वर्गः ॥ इति वसन्तराजशाकुने सारसवर्गः ॥

सारसः त्रि सरोवरोद्भवजलादि । तज्जलगुणाः । नद्याः शैलवराच्चाम्भो यत्र संप्लुत्य तिष्ठति । तत् सरोजजलं छन्नं तद्भैः सारसमुच्यते । सारसं सलिलं वल्यं तृष्णाघ्नं मधुरं लघु रोचनं तुवरं रूक्षं बद्धमूत्रमलं सितं ॥ इति भावप्रकाशः ॥

सारसनं क्ली कांची । स्त्रीकट्या

भरणे । अस्य पर्य्यायाः कांचीशब्दे द्रष्टव्याः ॥ कंचुकदार्ढ्यार्थं मध्यकायनिबद्धपट्टिकादि तत्पर्य्यायः । अधिकांगं २ । इत्यमरः । हे कंचुकदार्ढ्यार्थं मध्यकाये निबद्धे पट्टिकादौ ॥ सकंचुकाः सन्नाहाः मध्ये दार्ढ्यार्थं यद्बध्नन्ति तत्सारसनं अधिकांगंचोच्यते । इति भरतः ॥

सारसी स्त्री सारसपत्नी । इति हेमचन्द्रः ॥

सारस्वतः पुं बिल्वदण्डः ॥ देशविशेषः । सतु हस्तिनापुरस्य उत्तरपश्चिमभागे प्रसिद्धः ॥ इति हेमचन्द्रः ॥ यथा कूर्म्मविभागदेशमालाह । मध्ये सारस्वतामत्स्याः शूरसेनाः समाथुराः । पांचाल शाल्व मांडव्य कुरुक्षेत्र गजाह्वयाः । इति ज्योतिस्तत्त्वे । सरस्वतीनदीपुत्रमुनिविशेषः । सारस्वतदेशोद्भवब्राह्मणः । यथा । सारस्वताः कान्यकुब्जा गौड मैथिलकोत्कलाः । पंचगौडा इति ख्याता विन्ध्यस्योत्तरवासिनः । इति पुराणं । कल्पविशेषः । यथा । सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः । तद्वृत्तान्तोद्भवं लोके तद्भागवतमुच्यते इति मात्स्ये ५० अध्यायः ॥ व्याकरणविशेषः ॥ सरस्वतीसंबन्धिनी सारस्वत देशसंबन्धिनिच त्रि ॥

सारस्वतकल्पः पुं सरस्वत्युपासनाप्रकरणं । यथा । ब्रह्मोवाच । शृणु वत्स परं गुह्यं कल्पं सारस्वतं मम । यस्य विज्ञानमात्रेण जाड्यापहरणं भवेत् । सर्वशास्त्रप्रकाशश्च सर्वज्ञो जायते चिरात् । अभ्यासाच्च भवेद्यस्य वाचाश्रिया भवंतिहि ॥ अवाक्शिरदशा ध्याने वागीशत्वं बृहस्पतिः ॥ द्वैपायनोपि यं ज्ञात्वा वेदव्यासः भवन्मुनिः ॥ मंत्रोद्धारं प्रवक्ष्यामि सांगावरणपूजनैः । अनेन विंदुनायुक्तं वामनाणांत भूषितं । जप्त्वेन्द्र दशलक्षं तु मूकोपि वाक्पतिर्भवेत् । नाभौ शुभ्रारविंदे ध्यायेद्देवीं दलेश्वरीः ॥ तन्मध्ये भावयेन्मंत्री माडलान्तयं चिरं । रत्नसिंहासने तत्र तूर्णं ज्योत्स्नामये पुनः । तस्योपरि पुनर्ध्यायेद्देवीं वागी-



षंरीततः । मुक्ताकांतिनिभां दे
वीं ज्योत्स्नाजाल विकाशिनीं
मुक्ताहारयुतां शुभ्रां शशिखं
ड विमंडितां । बिभ्रतीं दक्षह
स्ताभ्यांव्याख्यां वर्णस्य मालि
कां । अमृतेन तथापूर्णं घटं
दिव्यंच पुस्तकं । दधतीं वाम
हस्ताभ्यांपीनस्तनभरान्वितां ॥
मध्येक्षीणां तथा स्वच्छां नाना
रत्नविभूषितां । आत्माभेदेन
ध्यात्वैवंततःसंपूजयेत्क्रमात् ॥
आद्येन दीर्घयुक्तेन कुर्य्यादंगा
नि हस्तयोः । हृदयादौ तथाकु
र्य्याद्ध्रीजेनोवाक्रियापुनः ॥ मु
खे मध्येतथानाभौ गुह्येचदेशि
कसत्तमा । न्यसेद्ध्रींजंपुनर्वेत्तो
व्यापकं विन्यसेत्ततः ॥ पीठ
न्यासं ततो कुर्य्यात् देवताभा
वसुहये । मातृकाध्यानयेत्
प्रोक्तं पीठमभ्यर्च्य यत्नतः ॥
वागीज्जेनासनंदद्यात् मूर्तिमू
लेन कल्पयेत् आवाहयेज्जपे
तस्यां देवींवागीश्वरींततः ॥
श्रीशैःप्रथमावृतिःस्यात् द्विती
या प्राक्तिभिस्ततः । दलाग्रेषु
समभ्यर्च्य अन्नायामायथा
विधि ॥

लोकपाला बहिः पूज्यास्तेषा
मस्त्राणितद्बहिः । एवंसंपूज
येंमंत्री जप होमरतस्सदा ॥
कवित्वं लभते वाग्मी लसेद्दौ
दशाभिर्ध्रुवं । प्रातर्जप्त्वासहस्रं
तु पिबेद्ब्राह्मी वचान्वितां ॥
नविस्मरति मेधावी श्रुतान्
वेदागमानपि । कंठमात्रोदके
स्थित्वा ध्यायेन्मार्तंडमंडले ॥
ज्योतिःपुंजनिभां देवीं पुस्तिका
क्षसमन्वितां । वराभययुताहस्तं
मुद्रा पुस्तकधारिणीं । जपेन्
सहस्रमात्रेण षण्मासं विजि
तेंद्रियः । भौमासंप्राप्यवाक्
सिद्धिं कवीनां मग्रणी र्भवेत्
अथयोगं प्रवक्ष्यामि जाड्यता
पाकरंपरं । रात्रिशेषेसमुत्थाय
शुचि र्भूत्वा समाहितः ॥
गुरुभावेन चात्मानं गुरुंच परि
कल्पयेत् । तस्याभापटलव्याप्तं
जगत्सर्वं विचिंतयेत् । मूला
धारे स्थितां देवीं कुंडलींपरदे
वतां । सत्त्वो योन्यागतां पा
क्त्या क्रमाच्चक्राणि भेदयेत्
ततःषट्पदिवे नीत्वा सोपीच
प्राययेत्ततः । ऊर्ध्वमुखविनि
र्गच्छद्धिकादीपस्फुरद्रूपिणीं ॥

बीजरूप स्वशक्त्या तु प्रोल्लसं
तींपरात्मिकां । शब्दब्रह्मस्वरूपां
च निश्चलांचिंतयेत् पुनः ॥ त
त्प्रभापटलव्याप्तं शरीरं चिंतयेत्
ततः ॥ नित्यंसहस्रमानेनजपेत् सं
वत्सरं यदि । ततःसंजायते मे
धी वाचस्पति विवापरः ॥
छंदो॰लंकार तर्कादिनानाशा
स्त्रार्थविद्भवेत् ॥ कावित्वंतत्त
नशक्त्या तु षोडश मथिकंभ
वेत् ॥ अथापरं प्रवक्ष्यामि यो
गं भुवि सुदुर्लभं । नाभिचक्र
स्थितां सौम्यां रक्ताकारां विचिं
तयेत् । सौमावद्धनितंबांच र
क्ताभरणभूषितां । पाशांकुश
पत्रोदिव्यां वराभययुतांपुनः ॥
दृष्टाचस्तुतवर्षिणा एरयंतीम
नोरथान् । एवंध्यात्वाजपेल्लक्षं
मनुज्ञो विहितं ततः । होमं
कुर्य्यात् त्रिमध्वक्तैः रक्तोत्पलै
लयुतैर्द्विजः ॥ ततः संतर्पये
देवीं दुग्धयुक्तेन सर्पिषा ॥
पायसेन बलिं दद्यात् दधिपि
ष्ट मधुसंयुतैः । एवं कृत्वा विधा
नेन साक्षाद्वैश्रवणोभवेत् । सि
द्धार्थे क्षिमधुरोपेते हुत्वाजगा
दशां नयेत् । पद्मदानेन॰

महतीं प्राप्नुयात् श्रियं ऊर्जितां
देवीहृदयविद्याया नास्ति किं
चित् सुदुर्लभं । स्नेहभावेनसं
प्रोक्तं नदेयं यस्य कस्यचित् ॥
एतत्ते कथितंदिव्यं विद्यातप
नेच्छकारणं । विस्तुना दत्तं म
ह्यं मया तुभ्यंद्विजोत्तम ।
सिद्धमंत्री यदा मंत्री वालिशा
स्यापि सर्हति । हस्ते दत्वा
जपेत् सोपि सोपीवाच मन
गैलो । इति स्वायंभुवमातृ
कातंत्रे सारस्वतः पटलः ॥
इतितंत्रसारः ॥
सारस्वतव्रतः पु सरस्वत्याव्रत
विशेषः । यथा । मनुरुवाच ॥
मधुरा भारती केन व्रतेन मधु
सूदन । तथैव जनसौभाग्यम
तिविद्या सुकौशलं । अभेद
श्चापिदंपत्यो स्तथा दैवयते
नच । आयुश्चविपुलंपुंसांत
न्मेकथय माधव ॥ मत्स्य उ
वाच । सम्यक् पृष्टं त्वया राज
न् शृणु सारस्वतंव्रतं । यस्य
संकीर्तनादेव तुष्यतीह सरस्व
ती । यो यद्भक्तः पुमान्कुर्य्यादे
तद्व्रत मनुत्तमं । तद्वासरादौ
संपूज्य विधानेनतत् समारभेत्

अथ वादित्यवारेण ग्रहताराबलेनवा । पायसंभोजयेद्विद्वान् कृत्वा ब्राह्मणवाचनं । शुक्लवस्त्राणिदत्वाच सहिरण्यानि शक्तितः । गायत्रींपूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः । यथा न देवो भगवान् ब्रह्मा लोकपितामहः । त्वांपरित्यज्य संतिष्ठेत्तथाभव वरप्रदा । वेदाःशास्त्राणिसर्वाणि नृत्यगीतादिकंचयत् । नविहीनंत्वयादेवि तथामेसंतुसिद्धयः । लक्ष्मी र्मेधा धरा पुष्टिर्गौरीतुष्टिःप्रभामतिः । एताभिःपाहि तनुभि रष्टाभिर्मांसरस्वति । एवंसंपूज्य गायत्रींवीणाक्षमालधारिणीं । शुक्लपुष्पाक्षतै र्भक्त्या सकमण्डलुपुस्तकं । मौनव्रतेन भुंजीतसायं प्रातश्चधर्मवित् । पंचम्यां प्रतिपक्षंच पूजयेत् सुवासिनीं । तथैव तंडुलप्रस्थं घृतपात्रेण संयुतं । क्षीरं दद्याद्धिरण्यंच गायत्री प्रीयतामिति । संध्यायांच तथा मौनमेतत् कुर्वन् समाचरेत् । नांतरा भोजनं कुर्यात् यावन्मासास्त्रयोदश । समाप्ते तु व्रते दद्यात् भोजनं शुक्लतंडुलैः । सवर्णं वस्त्रयुग्मंच गांच विप्राय शोभनां । देव्या वितानं घंटांच सितनेत्रपटान्वितां । चंदनं वस्त्रयुग्मंच दद्याच्छिखरं पुनः । तथोपदेष्टारमपिभक्त्या संपूजयेद्गुरुं । वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः । अनेन विधिनायस्तु कुर्यात् सारस्वतं व्रतं । विद्यावानर्थयुक्तश्च रक्तकण्ठश्च जायते । सरस्वत्याः प्रसादेन ब्रह्मलोके महीयते । नारी वा कुरुते या तु सापि तत्फलभागिनी । ब्रह्मलोके वसेद्राजन् यावत् कल्पायुतत्रयं । सारस्वतं व्रतं यस्तु शृणुयादथवा पठेत् ॥ विद्याधरपुरे सोऽपि वसेत् कल्पायुतत्रयं ॥ इति मत्स्यपुराणे ६६ अध्यायः ।

सारस्वताः पुं भूम्नि सारस्वतदेशजातमनुष्याः । यथा ॥ काश्मीरास्तु माथुरकाः सारस्वतास्तु विकर्णिकाः । इति हेमचंद्रः ॥

सारस्वतोत्सवः पुं सरस्वत्याउत्सवः । इति तिथ्यादितत्त्वं ॥

अस्य प्रमाणादिकं सरस्वतीशब्दे द्रष्टव्यं ॥

सारा स्त्री कृष्णत्रिवृता । इति शब्दरत्नावली । दूर्वा । इति शब्दचंद्रिका ॥

सारालः पुं तिलः ॥ इति शब्दचंद्रिका ॥

सारिः पुं स्त्री पाशकः । इति शब्दरत्नावली ॥

सारिका स्त्री पक्षिविशेषः । शालिक इतिभाषा । इत्यमरः ॥ तत्पर्यायः । पीतपादा २ गोराटी ३ गोकिराटिका ४ । इति हेमचंद्रः । शारिका ५ सारी ६ शारी ७ चित्रलोचना ८ । इतिशब्दरत्नावली । मधुरालापा ९ दूती १० मेधाविनी ११ गोराटिका १२ गोकिराटी १३ गोरिंका १४ कलहप्रिया १५ इतिराजनिर्घण्टः ॥

सारिणी स्त्री सहदेवी । कार्पासी । दुरालभा । कपिलसिंसपा प्रसारिणी । रक्तपुनर्नवा ॥ इति राजनिर्घण्टः ॥

सारिवा स्त्री लताविशेषः । अनंतमूल इति ख्याता गोरिषा साउ इति हिंदीभाषा । सा तु जंबुवत् पत्रा दुग्धगर्भा व्रतति र्भवति । तत्पर्यायः । शारदा २ गोपी ३ गोपकन्या ४ गोपवल्ली ५ प्रतानिका ६ तालं ७ आस्फोता ८ काष्ठशारिवा ९ । इतिराजनिर्घण्टः । गोपा १० उत्पलसारिवा ११ अनंता १२ शारिवा १३ श्यामा १४ । इति शब्दरत्नावली । अस्या गुणाः मधुरत्वं । स्निग्धत्वं । वृष्यत्वं ॥ पित्तप्रणाशित्वंच । इति राजनिर्घण्टः ॥ कृष्णसारिवा । सा तु इंद्रजंबुवत्पत्रा सुगंधा कलंबेटेति प्रसिद्धा कालीसाउ इति हिंदीभाषा । श्यामालता इति वंगभाषा । तत्पर्यायः । कृष्णमूली २ कृष्णा ३ चंदनसारिवा ४ भद्रा ५ चंदनगोपा ६ चंदना ७ कृष्णवल्ली ८ । अस्याः गुणाः । त्रिदोषशमनत्वं । तिक्तत्वं । कटुरसत्वंच । इति राजनिर्घण्टः । अपिच । सारिवाद्वौ तु मधुरौ हिमौ भूतनिकृन्तनौ । कुष्ठ कण्डू ज्वरहरौ देहदौर्गंध्यनाशनौ । इति राजनिर्घण्टः ॥ किंच । सारिवा युगलं स्वादु स्निग्धं शुक्रकरं गुरु ॥

अग्निमांद्यारुचि श्वास कासाम
विषनाशनं। दोषत्रयास्रप्रदर-
ज्वरातिसारनाशनं। इतिभाव
प्रकाशः॥
सारी स्त्री सारिकापक्षिणी। पा
शकः। इति शब्दरत्नावली॥
सप्तला। इतिराजनिर्घण्टः॥
सारोष्ट्रिकः पुं विषभेदः।
सारोष्ट्रो देशभेद स्तत्र भवः सा
रोष्ट्रिकः छेदकादिति ष्ठिकः दे
शादिः। सरोष्ट्रशब्दात् सौरा-
ष्ट्रिकः इतिस्वामी। इत्यमरभ
रतौ॥
सार्थः पुं जंतुसंघः। इत्यमरः
वणिकसमूहः। समूहमात्रे।
इतिमेदिनी॥
सार्थः त्रि अर्थेन सहवर्तमानः
अर्थयुक्तः। इति हेमचंद्रः॥
यथा। वनपर्वणि। सार्थःप्रव
सतोमित्रं भार्या मित्रं गृहेसतः
आतुरस्य भिषङ्मित्रं दानं मि
त्रं मरिष्यतः॥ इतिशुद्धि
तत्त्वं॥
सार्थकः त्रि अर्थेन सहवर्त-
मानः। यथा। शब्दांतरमपेक्षैव
सार्थकः सार्थबोधकृत्। प्रकृ
तिप्रत्ययश्चैवनिपात श्चेतिस
त्रिधा। इति शब्दशक्तिप्रकाशि
का॥
सार्थवाहः पुं वणिक्। इत्य
मरः॥
सार्द्रं त्रि आर्द्रं। इत्यमरः॥
आर्द्रयुक्ते त्रि। यथा अंगुष्ठ-
मात्रः स्थौल्येन वाक्मात्रःप्रमा
णतः। सार्द्रेक्षुरसपलाशस्त्वदेड
इत्यभिधीयते। इति प्रायश्चि
त्ततत्त्वधृतांगिरोवचनं॥
सार्द्धं अ सहितं। इत्यमरः॥
सार्द्धं त्रि अर्द्धेनसहवर्तमाने॥
अर्द्धयुक्तं। यथा। श्रुतिभिर्द्वि
गुणं प्रोक्तं विप्राणां मत्स्यवासि
नां तिलं। अहनिच तथातम
स्विन्या सार्द्धप्रहर यामांतः॥
इति तिथ्यादितत्त्वं॥ अपिच।
गतेर्द्धे दिनये सार्द्धे पंचपक्ते-
दिनद्वये। दिवसस्याष्टमेभागे
पततेकोः पिमासकः॥
इति मलमासतत्त्वं॥
सार्षपः त्रि सर्षिःसंबंधी। स
र्पिः संस्कृतस्तु। सर्पिः शब्दात्
सप्रत्ययेननिष्पन्नः॥
सार्षिष्कं त्रि सर्पिषा संस्कृतं।
यथा। सार्पिष्कं दाधिकं सर्पि
र्दधिभ्यांसंस्कृतकमात्। इति
हेमचंद्रः॥

सार्व्यः पुं अश्लेषानक्षत्रं। इति
हेमचंद्रः। सर्पसंबंधिनि त्रि॥
सार्वः पुं बुद्धः। जिनः। इतिहे
मचंद्रः॥ सर्वसंबंधिनि त्रि॥
सार्वजनिकः त्रि सकलजनसं
बंधी। सर्वजनशब्दात् ष्ठिकप्र-
त्ययेननिष्पन्नः॥
सार्वजनीनः त्रि सार्वजनिकः।
सर्वजनशब्दात् खीनप्रत्ययेन
निष्पन्नः॥
सार्वभौमः पुं उत्तरदिग्गजः।
इत्यमरः। सर्वभूमीश्वरः। तत्
पर्यायः। चक्रवर्ती १ एकज
न्मा २ नृपाग्रणीः ३ इतिशब्दर
त्नावली। विश्वपञ्जः। यथा।
परीक्षितरुपत्यो भूत् सद्यानाम
म जन्मवः॥ ततो विश्वरयस्त
स्मात् सार्वभौम स्ततः भवत्।
इतिश्रीभागवते ९ स्कंधे २२
अध्यायः॥ सकलभूमिसंबंधि
नि त्रि॥
सार्षपः त्रि सर्षपसंबंधीयशाक
तैलादिः। यथा। क्षुतंच सार्ष
पं तैलं यत्तैलं पुष्पवासितं।
अदुष्टपक्वतैलंच स्नानाभ्यंगे
षुनित्यशः। इति तिथ्या-
दितत्त्वं॥
सार्वलौकिकः त्रि सर्वजनविदि
तः। यथा भवंतं कार्तवीर्यायो
हीनसैथि मचीकरत्। जिगा
यतस्य हेतावं सरामः सार्वलौ
किकः। इतिभट्टिकाव्ये ५ सर्गः
सार्वलौकिकः सर्वलोकविदि
तः। इति तट्टीका॥
सार्ववेद्यः पुं सकलवेदज्ञब्रा
ह्मणः। सर्ववेद शब्दात् ष्य प्र
त्ययेन निष्पन्नः॥
सालः पुं शालमत्स्यः। इत्यम
रटीकायांभरतः। वृक्षमात्रे॥
प्राकारः। इति मेदिनी॥
शालः। इति राजनिर्घण्टः॥
स्वनामख्यातवृक्षः। सखुया
इतिहिंदीभाषा। तत्पर्यायः। स
र्जः १ सर्जरसः २ कलः ३ क
ललजोद्भवः ४ वल्लीवृक्षः ५
वीरपर्णः ६ शालकार्ष्यः ७ पु
ष्करणेतरेशालःकार्ष्यश्चेतिशब्द
हयं। अजकर्णकः ८ वस्तकर्णः
९ कषायी १० ललनः ११ गंधवृक्ष
कः १२ वेशः १३ शालनिर्यासः १४
दिव्यसारः १५ स्वरेष्टकः १६ सूरः
१७ अग्निवल्लभः १८ यक्षधूपः १९
सिंहिकः २० अस्य गुणाः। क

रत्वं । तिक्तत्वं । उष्णत्वं । हिमत्वं स्निग्धत्वं । अतिसारपित्तास्त्र दोष कुष्ठ कण्डु विस्फोटवातनाशित्वंच । इति राजनिर्घण्टः ॥
अपिच । शालस्तु सर्ज्जकार्श्याश्वकर्णिकाः शस्यसंवरः । अश्वकर्णः कषायः स्याद्व्रण स्वेदकफ कृमीन् । व्रध्न विद्रधि वाधिर्य्ययोनिकर्णगदान्हरेत् । अथसालप्रभेदाः । सर्ज्जको ऽन्यो ऽजकर्णः स्याच्छालो मरिचपत्रकः । अजकर्णः कटुस्तिक्तः कषायोष्णो अपोहति । कफपोदुष्कृतिगदान् मेह कुष्ठ विषव्रणान् । इति भावप्रकाशः ॥
सालंगः पुं रागस्यप्रकारविशेषः । यो रागो रागांतरामिश्रितःसन् रागांतराभासयुक्तः ॥ इति संगीतशास्त्रं ॥
सालनः पुं सर्ज्जरसः ॥ इति रत्नमाला ॥
सालनिर्यासः पुं सर्ज्जरसः । इति रत्नमाला ॥
सालपर्णी स्त्री शालपर्णी । शालपानि इति भाषा । यथा । शालपर्णी सालपर्णी स्थिरा चांशुमती ध्रुवा । इति शब्दरत्नावली ॥
अभावे पृश्निपर्ण्याश्च शालपर्णीं नियोजयेत् । इति वैद्यशास्त्रं ॥
सालपुष्पं क्ली स्थलपद्मे । इति शब्दरत्नावली ॥
सालभंजिका स्त्री पुत्तलिका । यथा । पांचालिका तु पांचाली पुत्रिका शालभंजिका । इति वेश्या । यथा । वेश्या तु गणिका स्वैरा वारस्त्री शालभंजिका इतिच जटाधरः ॥
सालरसः पुं रालः । इति राजनिर्घण्टः ॥
सालवाहनः पुं शालिवाहनः राजः । इतिकेचित् ॥
सालवेष्टः पुं सनकः । इतिभूरिप्रयोगः ॥
सालशृंगं क्ली प्राचीराग्रे । इति केचित् ॥
साला स्त्री गृहं । इत्यमरटीकायां भरतः ॥
सालाकरी स्त्री युद्धेपराजितनारी । इतिकेचित् ॥
सालातुरीयः पुं पाणिनिमुनिः । इतिहेमचंद्रः ॥ तालव्यशकारादिः साधुपाठः । यथा । शालातुरीय शालंकि दाक्षिपुत्रा-

श्च पाणिनौ । इति शब्दरत्नावली ॥
सालारं क्ली द्वयरत्नगात्थोभित्तिस्थकीलकः । भोंगा इति भाषा इतिकेचित् ।
सालावृकः पुं कुक्कुरः । शृगालः । नरक्तुः । इति केचित् । तालव्यशकारादिश्चायं ॥
सालूरः पुं मंडूकः । इति शब्दरत्नावली । तालव्यशकारादिश्च
सालेयः पुं मधुरिका । इत्यमरटीका । तालव्यशकारादिश्च
साल्वः पुं विश्ववध्यराजविशेषः इति हेमचंद्रः । स तु सौभदेशाधिपतिः । इति महाभारते कर्णपर्व । देशविशेषः । तद्देशस्थे पुंभूम्नि । तद्देशसंबंधिनि त्रि ॥
साल्वहा [न्] पुं विष्णुः । इतिहेमचंद्रः ॥
साल्विकः पुं पक्षिविशेषः सालिक इति भाषा । यथा शावमलः स्तब्धचूडो गृथ्यलक्ष्मसाल्विकः । इति शब्दचंद्रिका ॥
सावकः त्रि शिशुः । इति केचित् ॥ तालव्यशकारादिः साधुपाठः ॥
सावधानः त्रि सचेतनः । सतर्कः यथा । आगच्छंतु महाभागा विश्वेदेवावरप्रदाः । येचात्रविहिताः श्राद्धे सावधाना भवंतु ते इति श्राद्धतत्वं ॥
सावनं क्ली सवनसंबंधिदिनं । यथा । सोमयागे सवनत्रयस्याहोरात्रसाध्यत्वात् तत्संबंधिदिने सावनं । इति माधवाचार्य्यः । अपिच । ब्रह्मसिद्धांते । सावनं दंडाः षष्टि रहः स्वलग्नवेडरांशाप्त्या स्तदैने भवेत् ॥ इति मलमासतत्वं ॥
सावनः पुं यज्ञकर्म्मांतः । यजमानः । वरुणः । इति मेदिनी दिवसविशेषः । यथा तिथिनैकेन दिवसश्चांद्रमाने प्रकीर्तितः । अहोरात्रेणचैकेन सावनो दिवसः स्मृतः । इति मलमासतत्वं । मासभेदः । सत्रिंशदहोरात्रात्मकः । यथा । त्रिंशता सौरदिवसैः सावनः परिकीर्तितः । इति शब्दरत्नावली अपिच । ब्रह्मसिद्धांते । चांद्रः शुक्लादिदर्शांतः सावनः त्रिंशता दिनैः । एकराशौ रवि यावत् कालं मासः सभास्क

रः । सर्व्वत्रैपरिवर्त्तेष्व नाक्षत्र इति चोच्यते । विसृष्टधर्म्मान्तरेच सन्निकर्षाद्द्यास्यसन्निकर्षमप्यपरं । चंद्रार्कयोर्द्वये स्मोसम्बाह इत्यभिधीयते । सावने च तथा मासि त्रिंशात् सूर्य्योदयाः स्मृताः ॥ आदित्य राशिभोगेन सौरमासः प्रकीर्त्तितः सर्व्वत्रैपरिवर्त्तेष्व नाक्षत्र इति चोच्यते ॥

सावनमाससकर्त्तव्यकर्म्मादि यथा । सूतकादि परिच्छेदो दिनमासाब्दपास्तथा ॥ मध्यमग्रहभुक्तिश्च सावनेन प्रकीर्त्तितः ॥ पितामहः । आब्दिके पितृकृत्येच मास श्चान्द्रमसः स्मृतः । विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥ अत्र आदिपदेन सत्र भृतिवृद्धि प्रायश्चित्ताद्दीयाप्राचगर्भाधान पुंसवन सीमन्तोन्नयन नामकरणान्नप्राशन निष्क्रमण चूडादि ग्रहणं तथाच विसृष्टधर्म्मान्तरे । आब्दं च ग्रहचारकर्म्म सौरेण मानेन सदाप्यवस्येत् । सद्याग्न्युपास्यान्यपि सावनेन लोकेच यत् स्याद्व्यवहारकर्म्म । इति मलमासतत्त्वं ॥ वर्षविशेषः । यथा । सौरेण हस्त मानेन यदा भवति भार्गव । सावनेन च मानेन दिनषट्के प्रपश्यते । सौरसंवत्सरे दिनषट्काधिकः सावनः संवत्सरो भवतीति ॥ इति मलमासतत्त्वं ॥

सावरः पुं लोध्रः । इत्यमरटीका शब्दरत्नावलीच । पापे ॥ अपराधः । इति विश्वः । तालव्यशकारादि रप्ययं ॥

सावर्णिः पुं अष्टममनुः । यथा छाया संज्ञासुतो योऽसौ द्वितीयः कथितो मनुः । पूर्व्वजस्य सवर्णोऽसौ सावर्णिस्तेन कथ्यते । इति देवीभागवतं ॥ सावर्णिस्य प्रवक्ष्यामि मनोर्भावि तथान्तरे । अश्वत्थामा शारद्वतश्च कौशिको गालवस्तथा ॥ सतानेदः कश्यपश्च रामश्च ऋषयः स्मृताः । धृतिर्वरीयान् यवसः सुवर्णो धृष्टिरेवच । चरिष्णुरीड्यः सुमतिः वसुः शुक्रश्च वीर्य्यवान् । भविष्या दश सावर्णा मनोः पुत्राः प्रकीर्त्तिताः । इति मात्स्ये ९ अध्यायः ॥

सावर्णलक्ष्यं क्ली चर्म्म । इति शब्दरत्नावली ॥

सावर्णिः पुं अष्टममनुः । सच सूर्य्यपुत्रः । यथा । विवस्वतश्च द्वे जाये विश्वकर्म्मसुते उभे । संज्ञा छाया च राजेन्द्र येप्रागभिहिते तव । तृतीयां वडवामेके तासां संज्ञासुतास्त्रयः ॥ यमो यमी श्राद्धदेवश्छायायाश्च सुतान् शृणु । सावर्णिस्तपती कन्या भार्य्या संवरणस्य या । शनैश्चरस्तृतीयोऽभूदश्विनौ वडवात्मजौ । अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः । निर्म्मोकविरजस्काद्याः सावर्णितनयान्नृप ॥ तत्र देवाः सुतपसो विरजा अमृतप्रभाः । तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति । दत्त्वेमां याचमानाय विष्णवे यः पदत्रयं । राद्धमिन्द्रपदं हित्वा ततः सिद्धिमवाप्स्यति ॥ योऽसौ भगवता बद्धः प्रीतेन सुतले पुनः ॥ निवेशितोऽधिके स्वर्गादधुनास्ते स्वराडिव । गालवो दीप्तिमान् रामो द्रोणपुत्रः कृपस्तथा । ऋष्यशृङ्गः पितास्माकं भगवान् बादरायणः । इमे सप्तर्षयस्तत्र भविष्यन्ति स्वयोगतः । इदानीं समासते राजन् स्वे स्वे आश्रममण्डले । देवगुह्यात् सरस्वत्यां सार्व्वभौम इति प्रभुः ॥ स्थानं पुरन्दराद्धृत्वा बलये दास्यतीश्वरः । इति श्रीभागवते ८ स्कन्धे १३ अध्यायः । गोत्रविशेषः । यथा । वात्स्यसावर्णि गोत्रयोः और्व्वच्यवन भार्गव जामदग्न्याप्नुवत् प्रवराः । इत्युद्वाहतत्त्वं ॥

सावित्रं क्ली यज्ञोपवीतं । इति शब्दरत्नावली ॥

सावित्रः पुं ब्राह्मणः । इति हेमचन्द्रः । शङ्करः ॥ वसुः । इति मेदिनी । सूर्य्यः । गर्भः । इति शब्दरत्नावली ॥

सावित्री स्त्री शाल्वदेशीयसत्यवद्राजपत्नी । सा तु मद्रदेशीयाश्वपतिराजकन्या । ब्रह्मपत्नी सा च सवितुः सूर्य्यस्य पत्नी जाता उमा । इति मेदिनी ॥ तन्नामकारणं यथा ॥ त्रिदशैः रक्षिता देवी वेदधात्री प्रपूजिता । भावञ्च स्वरूपा तु सावित्री तेन सा स्मृता ॥

इति देवीपुराणे ७७ अध्यायः।
अपिच। सर्वलोकप्रसवनात्
सविता स तु कीर्त्यते। यत स्त
देवता देवी सावित्रीत्युच्यते त
तः॥ वेद प्रसवनाच्चापि सा
वित्री प्रोच्यते बुधैः॥ इतिव
ह्निपुराणे ब्राह्मणप्रशंसानाम
माध्यायः गा ब्रह्मपत्नी उत्
पत्तिनामांतराणि यथा। त
तःसंजपतस्तस्य भित्वा देहम
कल्मषं॥ स्त्रीरूपमर्द्धमकरो
दर्द्धंपुरुषरूपवत्। शतरूपाच
साख्याता सावित्रीच निगद्यते
सरस्वत्यथ गायत्री ब्रह्माणी
च परंतप॥ इतिमात्स्ये ३
अध्यायः॥
तस्या स्थाननामानि यथा। विस
ष्ठ उवाच। सावित्री पुष्करेनामती
र्थानां प्रवरे शुभे। वाराणस्यां
विशालाक्षी नैमिषे लिंगधारि
णी प्रयागे ललितादेवी कामुका
गंधमादने। मानसे कुमुदा
नाम विश्वकाया तथांबरे॥
गोमंते गोमतीनाम मंदरे का
मचारिणी। मदोत्कटा चैत्र
रथे जयंती हस्तिनापुरी। का
न्यकुब्जे तथा गौरी रंभा मल·

पर्वते। एकाम्रके कीर्त्तिमती
विश्वा विश्वेश्वरे तथा। जवा
वराहशैलेतु कमला कमला
लये। रुद्रकोट्यांतु रुद्राणी का
लीकालंजरे गिरौ। महालिं
गेतु कपिला कर्कोटे मुकुटे·
श्वरी। शालग्रामे महादेवी शि
वलिंगे जनप्रिया। नीलोत्प
ला मायापुर्यां संताने ललि
तेत्तथा। उत्पलाक्षी सहस्रा·
क्षे हिरण्याक्षी महोत्पले॥
गंगायामंगला नाम विमला
पुरुषोत्तमे। विपाशायाम
मोघाक्षी पाटला पौंड्रवर्द्धने
नारायणी सुपार्श्वेतु त्रिकूटे
रुद्रसुंदरी। विपुलेविपुलाना
म कल्याणी मलयाचले को
टवी कोटतीर्थे सुगंधा गंध
मादने। कुब्जाम्रके त्रिसंध्यातु
गंगाद्वारे हरिप्रिया। शिवकुं
डे शुभानंदा नंदिनी देविका
तटे। रुक्मिणी द्वारवत्यांतु राधा
वृंदावने वने। देवकी मथुरायां
तु पाताले परमेश्वरी। सीता
विंध्येतथा रोहीकाविंध्ये धावि
ध्यवासिनी॥ सह्याद्रावेकवी
रातु हरिश्चंद्रे तु चंद्रिका॥

रमणा रामतीर्थेतु यमुनायांमृ
गावती। करवीरे महालक्ष्मीरु
मादेवी विनायके। आरोगातु
रोगहंत्री महाकाले महेश्वरी।
अभयेत्युष्णतीर्थे तु अमृताविं·
ध्यकंदरे माण्डव्ये माण्डवीदेवी
महागौरी महेश्वरी। गाणेशे
व प्रचंडातु चंडिकामरकण्ट
के। सोमेश्वरी वराहेतु प्रभासे
पुष्करावती। देवीमातासरस्व
त्यां पारावारतटे स्थिता। महा
लये महापद्मा पयोष्ण्यांपिंग
लेश्वरी। सिंहिकाकृतसौरेच
कार्त्तिकेयेतु शंकरी। उत्प
लावर्तके लोला सुभद्रासिंधु
संगमे। माता सिद्धवनेलक्ष्मी
रनंगा भरताश्रमे। जालंधरे
विश्वमुखी तारका किष्किंधपर्वते
देवदारुवने पुष्टि र्मेधाकाश्मी
रमंडले। भीमादेवी हिमाद्रौतु
क्षेतु वैकेश्वरे तथा। कपाल·
मोचने शुद्धा माताकायावरो
हणे। शंखोद्धारे ध्वनिर्नाम
धृतिः पिंडारके वने। काली
तु चंद्रभागायां सतोदे सिद्धि
दायिनी। नरनारायणे देवी ब
दर्यां मूर्वशी तथा॥ ओषधी

श्चोत्तरकुरौ कुशद्वीपे कुशोद
का मन्मथा हेमकूटे तु कुमु
दे सत्यवादिनी। अश्वत्थे वंदनी
कातु निधिर्वैश्रवणालये। गाय
त्री वेदशालायां सावित्री ब्रह्मस
न्निधौ। सूर्यबिंबे प्रभानाम मातॄ
णां वैष्णवी मता। अरुंधती स
तीनां तु रामासु च तिलोत्तमा।
ब्रजे ब्रह्मकला नाम शक्तिः सर्व
शरीरिणां। एतदुद्देशतः प्रोक्तं
नामाष्टशतमुत्तमं। अष्टोत्तरं च
तीर्थानां शतमेतदुदाहृतं॥
योजपेत् शृणुयाद्वापि सर्वपा
पैः प्रमुच्यते। एषु तीर्थेषु यत्
कृत्वा स्नात्वा पश्येत्तरोहियः
सर्वपाप विनिर्मुक्तः कल्पं ब्रह्म
पुरे वसेत्। नामाष्टशतकं यस्तु
श्रावयेद्ब्रह्मसन्निधौ। पौर्णमा
स्याममावास्या बहुपुत्रो भवेन्न
रः। गोदाने श्राद्धदाने च अह
न्यहनि वा पुनः। देवार्चने वि
धौ विद्वान् परं ब्रह्माधिगच्छ
ति॥ इति पद्मपुराणे सृष्टि·
खंडे ७ अध्यायः॥ अपिच।
नारद उवाच॥ तलस्यपाख्यान
मिदं श्रुत मीशा सुधोपमं॥
तत्र सावित्र्युपाख्यानं तन्मया



ख्यातुमर्हसि । पुरायेन समुद्भूता सा प्रकृताच प्रकृतिप्रसूः केन वा पूजिता देवी प्रथमे के च वा परे । नारायण उवाच ॥ ब्रह्मणा वेदजननी पूजिता प्रथमे मुने । द्वितीये च वेदगणैस्तत् पश्चाद्विदुषां गणैः । तदा चाश्वपतिः पूर्वं पूजयामास भारते ॥ तत्पश्चात् पूजयामासुर्वर्णाश्चत्वार एव च । इति ब्रह्मवैवर्ते प्रकृतिखण्डे २१ अध्यायः ॥

सावित्रीव्रतं क्ली जैष्ठकृष्णचतुर्दश्यां स्त्रीकर्त्तव्यनियमविशेषः । तद्विवरणं । यथा । पराशरः । मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत् । तां चतुर्दशीं जैष्ठकृष्णचतुर्दश्यां सावित्रीमर्च्चयंति याः । वटमूले सोपवासा न ता वैधव्यमाप्नुयुः ॥ राजमार्त्तण्डे कृत्यचिन्तामण्यः । जैष्ठे मासि चतुर्दश्यां सावित्रीव्रतमुत्तमं । अवैधव्यकरं वै तत् स्त्रियः श्रद्धा समन्विताः व्रतमाचरेत् अनेन चतुर्दशीव्रतं लोकमाचरंति । इह परिकल्पना स्यात् । तदुक्तं मत्स्यपुराणे । गर्भिणी सूतिका नक्तं कुमारी च रजस्वला । यदाशुद्धा तदान्येन कारयेत् क्रियते सदा । उपवासाशक्तौ नक्तं भोजनं कुर्य्यात् । उपवासेष्वशक्तानां नक्तं भोजनमिष्यते । इति तद्वचनात् तदात्वशुद्धा चेत् पूजां कारयेत् कायिकं त्वोपवासादिकं स्वशुद्धया अशुद्धया च स्वयं क्रियते । एके स्मृतिपराभावात्तेव हेमाद्रेरप्यायाः । नारदः ॥ दिवाभागे त्रयोदश्यां यदा चतुर्दशी भवेत् । तत्र पूज्या महासाध्वी देवी सत्यवता सह ॥ दिवाभागे दर्शयुगमात्र सत्त्वे पित्र्यत एव प्रदोषव्रतमाचरेत् इति पूर्वोक्ते तद्विपत्ते पिपरादेरिसंध्याव्यापिते परा हपक्षेपि संध्याव्यापिनीति वचनात् । यदा तु पूर्वोपरयोर्न तद्व्याप्तिः तदापि परा ह्येव । यथा । ज्योतिषे । चतुर्दश्यां ममावास्या यदा भवति नारद । उपोष्य पूजनीया सा चतुर्दश्यां विधानतः सा सावित्री । ततप्यमावास्यायां सावित्रीव्रतविधाने शिवा

द्योरा तया प्रेतेति वचनं चैतत्परं । पराशरः । सावित्रीमर्च्चयित्वा तु फलाहारा परेह्नि । ततश्चाविधवा नारी विनभोगान लभेत सा । इति तिथ्यादितत्त्वे । अन्यत्तत्वनपर्वीय सावित्रीव्रतकथायाइष्टव्यं ॥

सावित्रीसूत्रं क्ली यज्ञोपवीतं इति शब्दरत्नावली ॥

साशयन्दकः पुं जैपट्टी । इति केचित् ॥

साष्ट्रकः पुं कंबलः । इति हारावली ॥

साश्रुधीः स्त्री श्वश्रुः । इति त्रिकाण्डशेषः ॥


सास्थिताश्लेषं क्ली कोसं । इति त्रिकाण्डशेषः ॥

सास्ना स्त्री गोगलकंबलः । इत्यमरः ॥

साहचर्य्यं क्ली सहचरस्य भावः । सहगमनं । सहचरशब्दात् ष्यञ्प्रत्ययेन निष्पन्नं । सहचारः । सामानाधिकरण्यं । एकाधिकरणवृत्तित्वं । यथा । प्रायशो रूपभेदेन साहचर्य्याच्च कुत्रचित् । इत्यमरः ॥

साहयः त्रि सहनकारयिता । इति व्याकरणं ॥

साहसं क्ली दण्डः । इत्यमरः । स च त्रिविधः । यथा याज्ञवल्क्यः । साधारणापरो(?) साहसो दण्ड उत्तमसाहसः । तदर्द्धं मध्यमः प्रोक्तस्तदर्द्धं प्रथमः स्मृतः । इति प्रायश्चित्ततत्त्वे । बलात्कारकृतकार्य्यं । इति मेदिनी । दुष्कृतकर्म्म । अविमृश्यकृतिः । द्वेषः । इति हेमचन्द्रः । पश्चाद्दोषमनालोच्य करणं । तत्त्वे चौर्य्यं परदारगमनादि । इति मुग्धबोधटीकायां दुर्गादासः साहसमाह नारदः । मनुष्यमारणं स्तेयं परदाराभिमर्षणं । पारुष्यमनृतं चैव साहसं पञ्चधा स्मृतं । अत्र सघएवो(?)ऽन्तरदापनं । यथा । साहसस्तेयपारुष्यगोऽभिशापात्ययोस्त्रियो विवादयेत् स एव कालोऽप्यनेच्छया स्मृतः ॥ विवादयेत् सघएवोऽन्तरं दापयेत् । इति शूलपाणिः । तत्र दासादयोऽपि साक्षिणो भवंति । यथा उशना । दासोऽन्धो बधिरः कुष्ठी स्त्री बाल स्थविरादयः । एतेऽप्यनभिसंबंधाः साह



से साक्षिणो मताः । इति व्यवहारतत्त्वं ॥

साहसः पुं अग्निविशेषः । यथा । प्रायश्चित्ते विधुश्चैव पाकयज्ञे तु साहसः । लक्षहोमे च वह्निः स्यात् कोटिहोमे हुताशनः । इति तिथ्यादितत्त्वं ॥

साहसाङ्कः पुं विक्रमादित्यराजः । इति जटाधरः ॥

साहसिकः त्रि मनुष्यमारकः चौरः । पारदारिकः । परुषवादी ॥ अनृतवादी । इति साहसप्रसह्यार्थदर्शनात् । एते असाक्षिणः । यथा नारदः । स्तेनाः साहसिका धूर्त्ताः कितवा योधकाश्च ये । असाक्षिणस्ते दृष्टा स्तेषु सत्यं न विद्यते इति व्यवहारतत्त्वं ॥

साहस्रं क्ली सहस्रसमूहः । सहस्राणां समूहः इत्यर्थे अण्प्रत्ययेन निष्पन्नं । सहस्रमात्रे । यथा । हरिस्ते साहस्रं कमलबलिमाधाय पदयो र्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलं । गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगतां । इति महिम्नस्तवः । सहस्रेण क्रीते सहस्रसंवेधिनि च त्रि ।

साहस्रः पुं सहस्रसंख्याकगजादिनावली । इत्यमरः ॥

साहायकं क्ली साहाय्यं । सहायस्य भावः इत्यर्थे कण्प्रत्ययेन निष्पन्नं ॥

साहाय्यं क्ली सहायता । सहायशब्दात् ष्यप्रत्ययेन निष्पन्नं

साहित्यं क्ली स्त्री मेलनं । सहितस्य भावः । इत्यर्थे ष्यप्रत्ययेन निष्पन्नं । परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं साहित्यं । इति श्राद्धविवेकः । तुल्यवदेकक्रियान्वयित्वं । बुद्धिविशेषविषयित्वं वा । इति शब्दशक्तिप्रकाशिका । साहित्यं एकक्रियान्वयित्वं । तद्यथा । धवखदिरपलाशान् छिन्धि इत्यत्र धवखदिरपलाशप्रतियोगिके यत् साहित्यं तन्निरूपितं यद्द्वयवविभागरूपफलं तज्जनिकायां छिदि क्रिया तदनुकूलकृतिमत्त्वं । इति सारमञ्जरी । मनुष्यकृतश्लोकमयग्रन्थविशेषः । स तु भट्टिरघुकुमारसम्भवमाघ

भारवि मेघदूत विदग्धमुखमण्डनशान्तिशतकप्रभृतयः ॥

साही स्त्री मेलनं । सहितत्वं । इति धरणिः ॥

साह्वकृत् पुं समभिव्याहारी । साह्वशब्दात् कृधातोः क्विप्प्रत्ययेन निष्पन्नः ॥

साह्वयः पुं मेषादिप्राणिद्यूते पणयुद्धं । यथा । मेषादिप्राणिद्यूते स्यात् साह्वयस्तु समाह्वयः । इति शब्दरत्नावली ॥

साक्षरं त्रि अक्षरयुक्तं । अक्षरेण सह वर्त्तमानं । इति बहुव्रीहिसमासनिष्पन्नं ॥


साक्षात् व्य प्रत्यक्षे । तुल्ये ॥ इत्यमरः ॥

साक्षी त्रि द्रष्टा । इति हेमचन्द्रः । तत्पर्य्यायः । प्रत्यक्षदर्शनः २ । इति शब्दमाला ॥ तस्य मिथ्याकथने अकथने च दोषो यथा । पृष्टो हि साक्षी यः साक्षं जानन्नप्यन्यथा वदेत् । स गाढनाम्नः सप्तकुले हन्यात्तथा परान् । यश्च कार्य्यार्थतत्त्वज्ञो जानन्नपि न भाषते सोऽपि तेनैव पापेन लिप्यते नात्र संशयः ॥ इति महाभारते आदिपर्व । अपि च । ब्रह्मस्वस्याप्यहारी च मिथ्यासाक्ष्यप्रदायकः । मित्रद्रोही कृतघ्नश्च वृषवाहकसूपकृत् । एते महापातकिनः ख्यातास्तेषु लोकेषु निन्दिताः । कालसूत्रे च नरके पतन्ति ब्राह्मणः श्रुतं । इति ब्रह्मवैवर्त्ते गणपतिखण्डे ५५ अध्यायः ॥ अपरञ्च । मिथ्यासाक्ष्यं यो ददाति कामात् क्रोधात्तथा भयात् सभायां पातिके वापि स कृतघ्न इति स्मृतः । मिथ्यासाक्ष्यपातिके वा भारते वक्तियोऽल्प । यावदिन्द्रसहस्रं च सर्पकुण्डे वसेद्ध्रुवं । संततं वेष्टितैः सर्पै र्भीतश्च भक्षितस्तथा । भेकांश्च सर्पाविण्मूत्रं यमदूतेन ताडितः । कृकलासो भवेत्तत्र भारते सप्तजन्मसु सप्तजन्मसु मण्डूकः पितृभिः सप्तभिः सह । ततो भवेच्च वृक्षश्च महारण्ये च शाल्मलिः । ततो भवेन्नरो मूकस्ततः शूद्रस्ततः शुचिः । इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ५९ अध्यायः । सर्वशरीरेषु श्रीकृष्णस्य साक्षिरूपत्वे यथा । स्खलन्तं पापमनिष्टस्य सदर्शनं । स्थितं सर्वशरीरेषु



साक्षिरूपमहद्रूपकं । शरीरवन्तं
सगुणमशरीरं गुणात्परं ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णज-
न्मखण्डे १ अध्यायः ॥
साक्ष्यं स्त्री साक्षिकर्म्म । यथा
मनुः । समक्षदर्शनात् साक्ष्यं
श्रवणाच्चैव सिध्यति । एतत्
प्रमाणमात्रोपलक्षणं । अनु
भावी च यः कश्चित् कुर्य्यात् सा
क्ष्यं विवादिनो । इति तद्वचना
न्तरात् । अतएवाकृतमपि सा
क्षिणमाह । मनुः । यत्रानि
बद्धो वीक्षेत शृणुयाद्वापि-
किञ्चन । पृष्टस्तत्रापि तद्ब्रू
यात् यथादृष्टं यथाश्रुतं ।
अनिबद्धस्तत्र साक्षित्वेनानि
युक्तः । परस्परयापि श्रवणमा
ह विष्णुः । उद्दिष्टसाक्षिणि मृ
ते देशान्तरगते वापि तदभि-
हित श्रोतारः प्रमाणं नात्र सं
शयः । अस्यान्तरसंज्ञामाह ना
रदः । साक्षिणामपि यत् सा-
क्ष्यं स्वपक्षे परिभाषितं । श्र
वणात् श्रावणाद्वापि स साक्ष्यु
त्तरसंज्ञकः । स्वपक्ष संदेऽपि-
साक्ष्यं परिभाषितं साक्षिणामयः
स्वयं शृणोति अर्थिना श्राव
ते वा स श्रवणात् श्रावणाद्वोत्त
रसाक्षीत्यर्थः । एवं योऽर्थिना
गूढतया प्रत्यर्थिवचनं श्रा
वितः स गूढसाक्षीत्याह स ए
व अर्थिनास्वार्थसिद्धये प्रत्य
र्थिवचनं स्फुटं । यः श्राव्यते
तद्गूढो गूढसाक्षी स उच्यते
तेनान्तरवाद्यभिहितार्थवि
षयक दृष्टकारणजं विज्ञाप
नं साक्ष्यमिति स्थितं । तद्यना
रदः तेषामपि न बालः स्यान्नैको
न स्त्री न कूटकृत् । न बान्धवो न
चारातिर्ब्रूयुस्ते कार्य्यमन्यथा
कार्य्यं सदपि अन्यथा तद्विरु
द्धत्वेन । एवञ्च यदि परमधार्म्मि
कत्वेन बान्धवादीनामपि सा
वादित्वं निश्चीयते तदा तेऽपि
साक्षिणो भवितुमर्हन्तीति । ते
षां साक्ष्यविधायके वक्ष्यमानम
नुवचनमपि एतद्विषये ॥
याज्ञवल्क्यः । त्र्यवराः साक्षिणो
ज्ञेयाः श्रौतस्मार्त्तक्रियापराः
यथाजाति यथावर्णं सर्व्वे स
र्व्वेषु वा स्मृताः । त्रयोऽवरा निकृ
ष्टा येषां ते त्र्यवराः त्रिभ्यो-
ऽन्यूना भवन्तीत्यर्थः । यथे
ति यो यज्जातीयस्तस्य ते-

ज्जातीयः साक्षी ॥ स्त्रीणां स्त्रि
योऽन्त्यजानामन्त्यजाः । यथा
वर्णं ब्राह्मणानां ब्राह्मणाः क्ष
त्रियादीनां क्षत्रियादयः । अभावे
त्वेतद्वैदं विना सर्व्व एव ॥
अवरा इत्यस्यापवादमाह स एव
उभयानुमतः साक्षी भवेदेकोऽ
पि धर्म्मवित् । उभयानुमतत्वेऽथ
धर्म्मित्वञ्च नियन्तृत्वं । तदाह
विष्णुः । अभिमतगुणसम्पन्नस्तू
भयानुमत एकोऽपि इति । अ
त एव श्रोत्रियमप्येकं निषेध
यति बृहस्पतिः । नव सप्त पञ्च
वा स्युश्चत्वारस्त्रय एव वा । उ
भौ द्वौ श्रोत्रियौ ग्राह्यौ नैकं पृ
च्छेत् कदाचन । एको मिलित
गुणसम्पन्नः प्रधानकल्पः । तद
भावे उभयानुमतमात्रोऽपि ग्रा
ह्य इत्याह नारदः । उभयानुम
तो यः स्यात् द्वयोर्विवदमानयोः
भवत्येकोऽपि साक्षित्वे प्रष्टव्यः
स्यात् स संसदि । उभयानुमत-
एकोऽलुब्धत्वादिना सर्व्वजन
प्रसिद्धश्चेत्तदा साक्षित्वे संस
दि बहुजनसन्निधौ प्रष्टव्यः ।
तथात्वे स्नेहवैरादिसत्त्वेऽप्य
कीर्त्तिभयात् सत्याभिधानसम्भ
वादित्याशयः । विचारस्यानन्त
निर्णयार्थत्वात् । तदाह मनुः ।
एकोऽप्यलुब्धः साक्षी स्यात् बह्वः
शुच्योऽपि न स्त्रियः । स्त्रीबुद्धेरस्थि
रत्वात्तु दोषैश्चान्येऽपि ये वृताः
एकोऽलुब्धस्तु साक्षी स्यादिति
कुल्लूकभट्टधृतपाठः ॥ एको
लुब्धस्त्वसाक्षी स्यादिति जी
मूतवाहनधृतपाठस्तु न यु
क्तः । लुब्धाश्च बहवोऽप्यसाक्षि
णो भवितुमर्हन्तीति । एकपद
स्यानर्थकतापत्तेः । भवतु वा तत्
पाठः तथाप्येक इत्यनुवादात्
तन्निषेधपरत्वेनालुब्धस्यैकस्य
नुमतिसत्त्वे धर्म्मवित्त्वं मतेवे
ण साक्षित्वे बोध्यं । इत्यर्थैतो
न विरोधः । अतएव विष्णुरूप
भृतीनां उभयानुमत एक एव
साक्षीति व्याख्यानेऽयमविहितो
नोक्तं । दोषैस्तेषामिभिः तथा
च नारदः । स्तेनाः साहसिका
श्चण्डाः कितवा योधकास्त्रये
असाक्षिणस्तु ते दृष्टाः तेषु स
त्येन विद्यते । कितवा द्यूतक
राः ॥ अपवादमाह उशना ।
दासोऽन्धो बधिरः कुष्ठी स्त्रीबा
लः स्थविरादयः । एतेऽप्यन



भिसंबंधाः साहसे साक्षिणो
मताः। स्थविरो ग्रानेंद्रियग्रामः
आदिशब्दात् कितवादयः। ३
भयात्समत्ताभावे शुचिक्रियत्वा
दिगुणयुक्तस्यैको ग्राह्यः। तथा
च व्यासः। शुचिक्रियश्च धर्मज्ञो
योऽन्यत्राप्यनुभूतवाक्। प्रमाण
मेकोऽपि भवेत् साहसेषु विशे
षतः। अनुभूतवाकस्यानांत
रे सत्यत्वेनेति। भवदेवभट्टोऽ
प्येवं। कात्यायनः। अभ्यंतरस्तु
निःक्षेपे साक्ष्यमेकोऽपि दा
पयेत्। अर्थिना प्रहितः सा
क्षी भवेदेकोऽपि याच्यते। सं
स्कृते येन यत् पण्यं तत्तेनै
व विभावयेत्। एकएवप्रमा
णं स विवादे परिकीर्तितः। सं
स्कृतेनाक्षिते। यएवकंउक्तादि
विष्णुः। स्तेय साहस वाग्दंड
पारुष्य संग्रहणेषु साक्षिणो
न परीक्ष्या इति। स्तेयपदसाहस
नादि कार्याणां लिंगत्वेनैव कि
यमाणत्वात् देवादेवपरेक्षादि
णामवेतीति न परीक्ष्या इत्युक्ते
तेषां वाक्यं तु मिथ्यैव भावादि
त्रिक्रियोनेनैवोपपन्नत्वोपपत्तेः
भया सोलाचलीयं नन्तवाकास्मा
ज्ञादिति व्यवहारमातृका। अत
एव कात्यायनः। ऋणादिषु प
रीक्षेत साक्षिणः स्थिरकर्मसु
साहसात्ययिकेनैव परीक्षा क्व
चित्स्मृता। इति। श्रोत्रियादी
ना मसास माह नारदः॥
श्रोत्रियास्तापसा वृद्धा येच प्र
व्रजिता नराः। वचनात्तेष्वसा
क्षित्वं नात्रहेतुरुदाहृतः। वच
नादिति श्रोत्रियत्वादिरूपाभि
धानात् न चतत्राप्यहेतुविरुपेष्टैः
तथाच स्त्रीयं वैदिककर्मकर
णव्यग्रतया परकीयकार्ये
विस्मरणसंभवात् साक्षित्व
रूप लघुकार्यनियोगो नवक्ता
पभयेन व्यवहार द्रष्टारोऽपिता
न्न पृच्छतीति तत्साक्षकरणान
ध्येकत्वाच्चनते साक्षिणः कर्तव्याः
किंत्वकृताः स्वयंसाक्षिणोऽभवे
ऽपिवा। उभौततु श्रोत्रियो स्याता
मितिस्मृतेः। वृद्धस्यासाक्षित्वे व
चनादेवस्थानेंद्रियत्वादिरूपैः
मनुः स्त्रीणां साक्ष्यं स्त्रियः कुर्यु
र्द्विजानां सदृशा द्विजाः। शूद्रा
श्च सन्तः शूद्राणां अन्त्यानामन्त्य
योनयः। अतएवं शूद्रस्यापवा
शारीरस्यात्ययेऽपिच स्त्रियाप्य

संभवे कार्ये बालेन स्थविरेण
वा। शिष्येण बंधुना वापि दासे
न भृतकेन वा। देवब्राह्मणसा
न्निध्ये साक्ष्यं पृच्छेदृतं द्विजान्।
उदङ्मुखान् प्राङ्मुखान् वा पू
र्वाह्णे वै शुचिः शुचीन्। ब्रूहीति
ब्राह्मणं पृच्छेत् सत्यं ब्रूहीति
पार्थिवं। गोबीजकांचनैर्वैश्यं
शूद्रं सर्वैस्तु पातकैः॥ गोबी
जकांचनापहारे यत्पापं तत्त
दन्ताभिधाने स्यादिति वैश्यं
पतत् साक्ष्यानृताभिधानेन भ
वान् सर्वैः पातकैः संवध्यते इत्य
क्त्वा शूद्रंच पृच्छेत्। ब्रह्मघ्ना
ये स्मृता लोके येच स्त्रीबाल
घातिनः। मित्रद्रुहः कृतघ्नाश्च ते
ते स्युर्ब्रुवतो मृषा॥ इति मनू
के हयणं। सत्फलेच॥ अश्व
मेध सहस्रंच सत्यंच तुलयाधृ
तं। अश्वमेधसहस्राद्धि सत्यमे
वातिरिच्यते। इति मनु नारदो
क्तं श्रावयेत्। याज्ञवल्क्यः॥
न ददाति हि यः साक्ष्यं जानन्नपि
नराधमः। सकूटसाक्षिणां पा
पैस्तुल्यो दण्डेन चैव हि। कात्या
यनः। अवीचि नरके वर्षं वसे
युः कूटसाक्षिणः। याज्ञव-
ल्क्यः। सत्यां प्रतिज्ञां यस्याहुः
साक्षिणः स जयी भवेत्॥ अन्य
थावादिनो यस्य ध्रुवस्तस्य प
राजयः। वर्णिनां हि वधो यत्र
तत्र साक्ष्यनृतं वदेत्। तत्पाव
नाय निर्वाप्यश्चरुः सारस्वतो
द्विजैः॥ गौतमः। नानृतवच
ने दोषो जीवनं चेत्तदधीनं।
नतु पापीयसो जीवनं। इति
द्वैधे बहूनां वचने समेषु गु
णिनां तथा। गुणिद्वैधे तु वच
नं ग्राह्यं ये गुणवत्तमाः। तेषा
मितिशेषः। यत्तु। साक्षिणां
लिखितानांच निर्दिष्टानांच
वादिनां। तेषामेकोऽन्यथावा
दी भेदात् सर्वेऽप्यसाक्षिणः
इति कात्यायनवचने तत्त्रयाणां
रूपाणां साक्षिणां मध्ये एक
स्याप्यन्यथा वादे अपरस्य त
त्वस्य सत्प्रतिपक्षतया पा
तीयस्य किंचिद्वादित्वे तत्रभे
दात्परस्य विरुद्धार्थाभिधाने
भेदात् साक्षिभ्यो निर्णयः इ
ति परं। बृहस्पतिः साक्षिद्वैधे
कर्मनिष्ठानां ग्रहणमाह। गुणि
द्वैधे क्रियावतां मिमनेन। तथा
साक्षिणोऽर्थिसमुद्दिष्टान् सत्य

दोषेण दोषयेत् । अदुष्टं दूष
यन् वादी तत्समं दंडमर्हति
इति । तत्समं विवाद समं । स
भासदादि विदित साक्षिदूष-
णमेव ग्राह्यं नतु अपवादिसाक्षि
भिः प्रतिपाद्यं । अनवस्था पात
त् । इत्याह नारदः । सभासदोप्र
सिद्धं यल्लोकसिद्ध मथापिवा
साक्षिणो दूषणं ग्राह्यमसाध्यं
दोष वर्ज्जनात् । अन्यैस्तु सा
क्षिभिः साध्ये दूषणे एवं साक्षि
णां । अनवस्था भवेद्दोष स्तेषा
मप्यन्यसंभवात् । असाध्यमसा
धनानर्हं । सिद्धत्वाद्दोषवर्ज्जना
त् अनवस्थावराहात् । तस्मात्
सिद्धदूषणमेवग्राह्यं । दूषणं
माह कात्यायनः बालोऽज्ञाना
दसत्यात् स्त्री पापाभ्यासाच्च कूट
कृत । विब्रूयात् बान्धवस्नेहात्
वैरनिर्यातनादरिः । यः साक्षीन
वनिर्दिष्टो नाहूतो नैव दर्शितः
ब्रूयान्मिथ्येति तथ्यं वा दंड्यः
सोऽपि नराधमः । कात्यायनः
क्रियान्तदेशिकी प्रोक्ता विष
मानेषु साक्षिषु लेख्येच सति
वादेषु नदैवं नच साक्षिणः
समन्वे साक्षिणां परदैवकृत

विशोधयेत् । पततसंशयात्तु
च्छेदे वोध्यं । याज्ञवल्क्यः लि
क्रुते लिखितानेक मेकदेशो
विभावितः । दाप्यः सर्वान्नृपेण
र्थान्न ग्राह्य स्त्वनिवेदितः । यो
लिखितानेकं स्ववर्णादिकं प्र
पन्नपतिसंपकस्थे साक्ष्यादि
भिर्विभावितः सन् सर्वान्दाप्य
तः कात्यायनः । यद्येकदेशप्रा
प्तापि क्रिया विद्येत मानुषी ।
सा ग्राह्या नतु पूर्णापि दैविकी
वदतां नृणां । वदतां विवदतामि
त्यविशेषेण दर्शयति । पूर्णा
पि दैविकी समग्र विषयिकाः
पि न ग्राह्या तेनैकदेशप्रतिपा
दिकया मानुष्या क्रियया मा
नसाध्यसिद्धिरिति । साध्यार्था
शेनिगदिते साक्षिभिः सफलं भवे
त् स्त्रीसंगे साहसे चौर्ये यत्सा
ध्यं परिकल्पितं । इतिकात्याय
नवचनेन तद्विषय प्रदर्शकं । ऋ
णादिके पाययज्ञेऽपि योज्य
मिति । यत्तु अनेकार्थाभियो
गे तु यावत् संशोधयेद्धनी ।
साक्षिभि स्तावदेवासौ लभते
साधितं धनं । तदृणादानभिन्न
प्रश्नादि विषयकं । तथाहि ।

नानाविध पित्रर्णाद्यभियोक्तृणा
ज्ञातत्वानाहं जानामीति उत्तर
वादिना साक्ष्यादिभि र्यावद्धने
प्रतिपादयति तावदेव पुत्रेण
दातव्यं । एवमेव विस्रम्भ नि
क्षेपवाहन प्रभृतयः । कात्या
यनः । अनुमानाद्गुरुः साक्षी सा
क्षिभ्यो लिखितं गुरु । अनिरुद्धा
त्रिपुरुषी भुक्ति स्तेभ्यो गरीय
सी । अनुमाने प्रमाणसंकलिते
तदाह मनुः । बाह्यैर्विभावयेल्लिं
गैर्भावमंतर्गतं नृणां । स्वरव
र्णेङ्गिताकारैश्चक्षुषा चेष्टिते
नच । स्वरो गद्गदादिः । वर्णो
ऽस्वाभाविकः । इंगितं स्वेदवे
पथुरोमांचादि । आकारो विकृतः
चक्षुषा कातरेण । चेष्टितं तस्मा
त्स्थानगादिना । पश्चात्त्राणमथ्या
सिद्धं ईदृगित्थमनुमानात्प्रत्यक्षः साक्षी
बलवानित्यर्थः । साक्षिनिरूपण
त्वेतु याज्ञवल्क्यः । देशाद्देशा
न्तरं याति सृक्किणी परिलेढि च
ललाटं स्विद्यते चास्य मुखं वैव
र्ण्यमेति च । परिशुष्यत्स्खल
द्वाक्यो विरुद्धं बहु भाषते वाक्
चक्षुः पूजयति नो तथोष्ठौ नि
र्भुजत्यपि । स्वभावाद्विकृतिं ग

च्छेन्मनोवाक्काय कर्म्मभिः । अ
भियोगे च साक्ष्ये च स दुष्टः परि
कीर्तितः । न परोक्तां वाचं प्रतिव
चनेन पूजयति तथोष्ठौ चद्वा
ऽग्र परकीय दंशनेन निर्भुज
ति कुटिली करोति यदा मनो वा
क्काय कर्म्मभिः स्वभावात् प्र
कृतेः यथायोग्यं विकृतिं ग
च्छेत्तदा स दुष्ट इत्यर्थः । अन
पवर्गो रामायणे । आकारश्छा
द्यमानोऽपि न शक्यो विनिगूहि
तुं । बलाद्धि विवृणोत्येव भा
वमंतर्गतं नृणां । आकारो देह
धर्मः मुखप्रसादवैवर्ण्य रूपः
नारदः । सुदीर्घेणापि कालेन
लिखितं सिद्धिमाप्नुयात् । स
ज्ञानमात्मनो लेख्यं मज्ञानेन
तु लेखयेत् । सुदीर्घेणापि सं
स्कारोद्बोधक लिखनसत्वाद्व
चिरेणापि साक्ष्ये दातुं शक्नो
ति इत्यर्थः ॥ लिपिज्ञ स्स्वहस्ते
न लेखयेत् तदन्ते परहस्तेने
त्याह व्यासः । अलिपिज्ञ ऋ
णी यः स्यात् लेखयेत्स्वमतं
तेन तु सः । साक्षी वा साक्षिणा
न्येन सर्वसाक्षि समीपतः । बृ
हस्पतिः । स्वक्षितं तानितं यद्वै



सीमायाश्चसमंततः । अकृतोऽपि
भवेत् साक्षी ग्राम स्तत्रसंश
यः ॥ अकृता अपिसाक्षिणोऽभ
वेतीत्याहतु र्मनु कात्यायनौ ।
अन्ये पुन इति दिष्टाः साक्षिणः
समुदाहृताः । ग्रामश्च प्राड्विवा
कश्च राजा च व्यवहारिणां । का
र्य्येष्वभ्यंतरो यः स्यादर्थिना प्र
हितश्च यः । कुल्याः कुलविवादे
षु भवेयुस्तेऽपिसाक्षिणः । स्मृतिः
दत्तादतेऽथ भृत्यानां स्वामिनां
निर्गमेसति । विक्रीयादानसं
बंधे क्रीत्वा धन मनिच्छति ॥
द्यूते समाह्वये चैव विवादे स
मुपस्थिते । साक्षिणः साधनं प्रो
क्तं न दिव्यं न च लेख्यकं ॥
प्रक्रांते साहसे वापि पारुष्ये दं
डवाचिके । बलोद्भवेषु कार्य्येषु
साक्षिणो दिव्य मेव च ॥ बृह
स्पतिः । लेख्यका साक्षिणो वा
पि विवादे यस्य दर्शिताः ॥ त
स्य कार्य्ये न सिध्येत यावत्तन्न
विशोधयेत् । तल्लेख्य साक्षि
दूष प्रमाणं ॥ लेख्यशोधन
माह । कात्यायनः । स्वहस्त
लेख्ये संदेहे जीवतो वा मृत
स्य च । तत् स्वहस्तकृतै रन्यैः

पत्रैस्तल्लेख्यनिर्णयः । तथा । स
मवेतैस्तु यद्दृष्टं वक्तव्यं तत्तथै
व च । विभिन्नेनैव कार्य्ये तत्र
हक्तव्यं पृथक् पृथक् । नाष्ट
दृष्टे इतियुक्तौ वा समं सत्यपथ
न्वितः । वक्तव्यं साक्षिभिः साक्ष्ये
विवादस्थान मागतैः ॥ अनुद्वि
ग्नेन चित्तेन दृष्टं सम्यग्विवादव
त् । प्रत्यक्षेतत्स्तुतेकार्य्ये
साक्ष्ये साक्षी तु तद्वदेत् ॥
नारदः । यः परार्थेऽपहरति स्वां
वाचं पुरुषाधमः । आत्मार्थे
किं न कुर्य्यात् स पापी नरक
निर्भयः । अर्थोवै वाचि नियता
वाङ्मूला वाग्विनिःसृता । यस्तु
तां स्तेनयेद्वाचं स सर्व्वस्तेयकृ
न्नरः । बौधायनः । पंचपश्वनृ
ते हंति दशहंतिगवानृते । श
तमश्वानृतेहंति सहस्रं पुरुषा
नृते । हंति जातानजातांश्च हि
रण्यार्थेऽनृतंवदन् । सर्व्वं भूम्य
नृते हंति साक्ष्ये साक्षीमृषाव
दन् ॥ बृहस्पतिः । यस्यार्थे
प्रतिज्ञाते साक्षिभिः प्रतिपादि
ते सजयीस्यादन्यथात सा
ध्यार्थंनसमाप्नुयात् । याज्ञव
ल्क्यः ॥ उक्तेऽपि साक्षिभिः ॥

साक्ष्ये यद्यन्ये गुणवत्तराः । द्वि
गुणा वान्यथा ब्रूयुः कूटाः स्युः
पूर्व्वसाक्षिणः । अन्यथा सर्व्ववि
परीतार्थ प्रकारेण कूटा अना
देयवचनाः । तथा । यः साक्ष्यं
श्रावितोऽन्येभ्यो निह्नुतेतत्त
मोवृतः । सदाप्योऽष्टगुणं दंडं
ब्राह्मणं च विवासयेत् ॥ त्व
मन्येभ्यः साक्ष्यं श्रावयेतिवादि
ना प्रयुक्तो यः श्रावितः कारि
तद्यात् पटसिद्धिः । एवमन्य
तोऽपिसभायांनिगदकाले सा
क्ष्यं निह्नुते य स्तस्याष्टगुणो
दण्डः ॥ इतिव्यवहारत
त्त्वं ॥

सिंहः पुं स्वनामख्यातपशुः
तत्पर्य्यायः । मृगेन्द्रः २ पंचा
स्यः ३ हर्य्यक्षः ४ केशरी ५ ह
रिः ६ इत्यमरः । पारीन्द्रः ७ श्वे
तपिंगलः ८ कण्ठीरवः ९ पं
चशिखः १० पैलादः ११ भीम
विक्रमः १२ सटांकः १३ मृगरा
ट् १४ मृगराजः १५ मरुत्प्लवः
१६ केशी १७ लंबीकाः १८ करि
दारकः १९ इतिशब्दरत्नावली
महावीरः २० श्वेतपिंगः २१ गज
मोचनः २२ मृगारिः २३ ॥

इति जटाधरः । इभारिः २४ ।
नखरायुधः २५ महानादः २६
मृगपतिः २७ इतिहेमचंद्रः ॥
पंचमुखः २८ नखी २९ मानी
३० क्रव्यादः ३१ मृगाधिपः ३२
शूरः ३३ विक्रांतः ३४ द्विरदांत
कः ३५ वज्रबलः ३६ दीप्तः ३७
बली ३८ विक्रमी ३९ दीप्तपिंग
लः ४० तन्मांसगुणाः । अर्शःप्र
मेहजठरामयजाड्यनाशित्वं ।
इतिराजनिर्घण्टः । अपिच । सिं
हव्याघ्र ऋक्षा श्वेत तरक्षु द्वीपि
नस्तथा । वभ्रु जंबुक मार्जारा
इत्याद्यास्तु गुहाशयाः । गुहा
शायावानहरा गुरुस्निग्ध मधुराश्च
ते । स्निग्धा वल्या हितानित्यं
नेत्रगुह्य विकारिणां । इतिभा
वप्रकाशः ॥ पदांते श्रेष्ठार्थ
वाचकः । इति मेदिनी ॥
अर्हंतांगजः । इति हेमचंद्रः ॥
रक्तशिग्रुः । इतिराजनिर्घण्टः
मेषादि द्वादशराशंपतर्गत पं
चमराशिः । तत्पर्य्यायः । लेयः २
इति सत्तत्वमुक्तावली । त
स्याधिष्ठात्रीदेवता सिंहः । स
चमस्वा सर्व्वफल्गुनी समुदाय
उत्तरफल्गुनी प्रथमपादेन भव

ति । अग्निराशिः । पीतवर्णः । दृढः
पर्वधूम्रवर्णः । पित्तप्रकृतिः । पू
र्वदिक्स्वामी । पर्वतचारी । क्षत्रि
यवर्णः । क्रूरः । महाशब्दः ॥ अ
ल्पसंतानः । अल्पस्त्रीसंगश्च ।
तत्र जातफलं । क्रोधी । शीघ्र
गतिः । हास्यवाणिः । अतिव
क्ता । चंचलः । प्रीतलः । मत
स्याप्रियश्च । इति बृहज्जातकाद
यः ॥ मेषादिद्वादशलग्नान्तर्ग
तपंचमलग्ने । तत्र जातफलं
सिंहलग्ने समुद्भूतो भोगी शत्रु
विमर्द्दनः । स्वल्पोदरोऽल्प
पुत्रश्च सोत्साही राजविक्रमः
इति कोष्ठीप्रदीपः ॥
सिंहकेलिः पुं मंजुघोषः ॥
जिनविशेषः ॥ इति त्रिकाण्ड
शेषः ॥
सिंहकेशरः पुं वकुलः । इति
त्रिकाण्डशेषः । सिंहसटा च
सिंहतलः पुं कृताञ्जलिः । क
रद्वयसंयोजनं । इत्यमरटीकायां
रामाश्रमः ॥
सिंहतुण्डः पुं सेहुण्डवृक्षः ॥
इति राजनिर्घण्टः ॥
सिंहद्वारं क्ली प्रवेशद्वारं । त
त्पर्यायः । प्रवेशपात्रं २ । इति
हेमचन्द्रः ॥
सिंहध्वनिः पुं सिंहशब्दः । सिं
हनादसदृशशब्दः ॥ यथा । त
यार संघातशिलोः स्वरोद्यैः स
मुल्लिखन् दर्पकलः ककुद्मान्
दृष्टः कथंचिद्गवयै विविग्नैः र
सोढ सिंहध्वनिरुन्ननाद । इति
कुमारसंभवः ॥
सिंहनादः पुं योधानां रणेन
साहजरवः । तत्पर्यायः । क्ष्वे
डा २ इत्यमरः राजसूय दृष्टि
नात् तद्दंगाय यथा सिंहस्य
नादस्तथा परबल भयायसेवाह
स्माह विश्रद्धयेच योधावः स ।
सिंहस्येव नादः सिंहनादः ॥
इति भरतः । सिंहशब्दश्च ॥
सिंहनादकः पुं वक्कारः । सिंहा
इति भाषा । इति हारावली ॥
सिंहनादिका स्त्री दुरालभा । इ
ति शब्दचंद्रिका ॥
सिंहपर्णी स्त्री वासकः । इति
जटाधरः ॥
सिंहपुच्छिका स्त्री चित्रपर्णि
का । सूक्ष्मचाकुलिरिति भाषा । इ
ति रत्नमाला ॥
सिंहपुच्छी स्त्री चित्रपर्णिका
पृश्निपर्णी । अन्यस्यः । माषपर्णी

इति रत्नमाला ॥
सिंहपुच्छी स्त्री पृश्निपर्णी । इ
ति राजनिर्घण्टः ॥
सिंहमुखी स्त्री वासकः । इति
राजनिर्घण्टः ॥
सिंहयाना स्त्री दुर्गा । इति हेम
चन्द्रः ॥
सिंहरथा स्त्री दुर्गा । इति श
ब्दरत्नावली ॥
सिंहलं क्ली रंगं । इति हेम
चन्द्रः । रीतिः । त्वचं । इति
राजनिर्घण्टः ॥
सिंहलः पुं स्त्री देशविशेषः
शिलोन इति ख्यातः । यथा
दन्तिणोऽवंति माहेन्द्र मलया
ऋष्यमूककाः । चित्रकूटमहा
राष्ट्रकांचीसिंहलकोंकणाः । इ
ति ज्योतिस्तत्वं ॥
सिंहलस्था स्त्री सैंहली । इति
राजनिर्घण्टः । सिंहलदेशवा
सिनी च ॥
सिंहलास्थानः पुं तालवृक्षस
दृशवृक्षविशेषः । यथा शोन्फ
लः सिंहलास्थानस्तुङ्गी पिंजाख्य
ट्टापिच । इति शब्दमाला ॥
सिंहलीलः पुं रतिबन्धविशेषः
तस्य लक्षणं यथा । लिंगोपरि
स्थिता नारी भूमौ दत्वा पद
द्वये । हृदये दत्तहस्ता च सिंह
लीलः प्रकीर्तितः । लिंगोपरिस्थि
ता नारी कोकेकस्य पदद्वया
हृदये दत्तहस्ताच सिंहलीलो
प्यसावपि ॥ इति रतिमंजरी
सिंहवाहिनी स्त्री दुर्गा । य
था । सिंह माकस्य कल्पान्ते
निहतो महिषो यथा । महि
षघ्नी ततो देवी कन्या वै सिं
हवाहिनी ॥ इति देवीपुराणे
४५ अध्यायः ॥
सिंहविक्रान्तः पुं अश्वः । इति
हारावली शब्दमाला च । सिंह
तुल्यविक्रमविशिष्टे त्रि ॥
सिंहविन्ना स्त्री माषपर्णी । इति
राजनिर्घण्टः ॥
सिंहसंहननः त्रि वरांगरूपोपे
तः । इत्यमरः । प्रत्येकमवयव
श्लाघ्यः । संदरः ॥ सिंहसंहननः
सस्नाघो हि सर्वांगसुन्दरः ।
इति कोषान्तरं ॥ सिंहस्येव सं
हननं देहो यस्य सिंहसंहननः
वृष्णिशार्दूलः यथा कथंचिद
न्वयः । इति भरतः ॥
सिंहनासाने स्त्री ॥
सिंहा स्त्री नाडी । इति राज



लिङ्गेरः ॥
सिंहाणं क्ली लोहमलं । इत्यम
रटीका ॥
सिंहानं क्ली लोहमलं । इत्यम
रः । तस्यरूपान्तराणि यथा ।
पिंहाणं २ सिंहाणं ३ सिंहा-
णं ४ इतितट्टीका । नासिका
मलं । सिकनी इतिभाषा । तत्
पर्य्यायः । सिंहाणकं २ सिंहा
णं ३ सिंहाणं ४ इतिशब्दरत्ना
वली । कफः ५ श्लेष्मा ६ खेटः
७ इतिजटाधरः ॥
सिंहासनं क्ली स्वर्णमयराज्ञा
सनं । इत्यमरः । अथ सिंहासन
युक्तिः । राज्ञो यदासनं नाम्ना
सिंहासनमुच्यते । शुभेमुहू
र्त्ते शुभमासवर्षे सुवार वेला
तिथि चेद्रयोगे । कालेनिरुत्
पात निमित्तभावे सिंहासना
दस्यविधिं वदन्ति । स्थिररा
शिस्थितेभानौ चेन्दौ च स्थिर
भोदिते । आसनारम्भमिष्टं-
तिगृहारम्भेऽपि यद्भवेत् । यत्नेन
गृहारम्भ सिंहासनयोः समः ।
तत्क्रमः । वाणवेदाग्निपञ्चानि
सोपानानि युगैः क्रमात् ॥
चत्वारिंशत्प्रमाणानि विंशतिः

षोडशैवच । सिंहान्वितानिते
याति चरणानि युगैः क्रमात् ।
पद्मः शङ्खो गजो हंसः सिंहोभृ
ङ्गो मृगो हयः । अष्टौसिंहा
सनानीति नीतिशास्त्रविदोवि
दुः । आदिमादिदशाज्ञानामुप
नीतं यथाक्रमं । राज्ञः स्वहस्ते
रष्टाभिरायामपरिणाहयोः ॥
राजयाज्ञसिंहासनसोपानेषु
कथ्यते । तदर्द्धमानेनान्ये-
षां राज्ञासनमुदाहृतं । अ
ष्टौमत मिदं सम्य प्रोक्तंकालि
महीभुजां । दिगष्टहरिदिको
णः स्यादुत्सादीनां यथायथं
अथाष्टानां लक्षणानि । रा
ज्ञादिकाष्ठघटितः पद्ममालो
पचितः । पद्मरागादिविद्धांगः
शुद्धः कांचन सम्भृतः । चरणा
ग्रेपद्मकोषात् पद्ममालाविचित्रि
ताः । दिक्षैवाष्टौ पुत्रिका राजद्वार
प्रोञ्जलि सम्मिताः । राजासने
चतस्त्रश्च पञ्च द्वादश पुत्रिकाः
रत्नैश्च नवभिः कार्य्या निर्म्मा
णे चान्तरान्तरा । रक्तवस्त्रावृतं
होतत् पद्मसिंहासनं मतं ॥
शुचेष्टित्वा नरपतिः प्रताप स
म्पिविर्द्धतिः १ । भद्रेष्टकाष्ठ-

घटितः शंखमालोपशोभितः
शुद्धस्फटिकचित्रांगः शुद्धरू-
पोपशोभितः । चरणाग्रे शं
खनाभिः पुत्रिकाः सप्तविंश
तिः । स्थाने स्थाने विधात-
व्याः शुद्धस्फटिकसंस्कृताः । शुक्ल
पट्टावृतं होतत् शंखसिंहासनं
मतं २ पनसेनाघटितोगज
मालोपशोभितः । विद्रुमैरपि
वैदूर्य्यैः कांचनेनापिशोभितः
चरणाग्रे गजशिरः पुच्छादेके
क पुत्रिका । माणिक्यरचि
ता रक्तवस्त्रादिकविभूषणं ॥
गजसिंहासनं नाम साम्राज्य
फलदायकं ३ शालकाष्ठेन
घटितो हंसमालोपशोभितः
पुष्परागैः कांचनेन कुरुविन्दै-
श्च चित्रितः । चरणाग्रे हंसरू
पं पुत्रिका स्त्वेकविंशतिः । गो
मेदकोपघटितापीतवस्त्रविभू
षणं ॥ हंससिंहासनं नामस
र्वारिष्टविनाशनं । ४ । चन्द
नेनापघटितः सिंहमालोपभू
षितः शुद्धहीरकचित्रांगः शुद्ध
कांचननिर्मितः । चरणाग्रे सिं
हलेखः पुत्रिका स्त्वेकविंशतिः
मुक्ताश्मकिभिर्वैदूर्य्यैर्विमले

रेव भूषणं । शुद्धशुण्डावृतं हो
तत् सिंहसिंहासनंमतं । अधो
षित्वा नरपतिः कृत्स्नांसाधय
ति क्षितिं ५ भृंगमालोपस
ज्जितं शुद्धचंपककल्पितं । शु
द्धैर्मरकतैर्युक्तं पद्मरागे पद्म
कोषिकाः द्वाविंशतिः पुत्रि
काश्च नीलवस्त्रादिभूषणं । भृं
गसिंहासनं नाम शत्रुक्षयजय
प्रदं ६ निम्बकाष्ठेनघटनामृग
मालोपशोभिते । इन्द्रनीलैर्म
हानीलैः कांचनेनापिचित्रि
ते । चरणाग्रे मृगशिरस्त्वा
त्रिंशच्च पुत्रिकाः । नीलवस्त्रा
दियुक्तं तन्मृगसिंहासनंमतं ।
लक्ष्मीविजयसंपत्तिर्नैरुज्य
पदमुत्तमं ७ केशरेणापघटि
ते हयमालोपशोभिते । स
मस्तवर्णैर्भेरत्नैश्च पुत्रिकाः पंच
सप्ततिः । चरणाग्रे हयशिर
श्चित्रवस्त्रादिभूषणं । हयसिंहा
सनं नाम लक्ष्मीविजयवर्द्धनं
८ इत्येतत् कथितंसारंमहा
सिंहासनाष्टकं । यथा भोज
नेलिखितं यथा चान्यैश्च पंडि
तैः । एतस्मातिक्रमं दैवाद्यः
कुर्य्यात् पृथिवीपतिः । अ-



चिरादेवकुरुते तस्य मृत्युं इति
कर्मे॥ परासनस्थो यो राजा
यो राज्ञाच निरासनः । स्व
रे हन्यते सिंहे रिव मत्तराजा
धिपः । स्वलग्ने सिंहासनस्थ-
स्य संस्थितिर्नेक्ष्यतीति प्रव
दंति तज्ज्ञाः । इतिविशेषा
सनोद्देशः । इति युक्तिकल्प
तरुः ॥ चतुराजीकोशायोक्त
यविशेषः । यथा । अन्यद्राज
पदंराजा यदा यात्रोद्युपविष्टे
त् । तदा सिंहासने तस्यभ्रम
ते नृपसत्तम । राज्ञाचन्नृप
तिंहत्वा कुर्यात् सिंहासने-
यदा । द्विगुणं वाहयेत् यस्य
मस्यापेक्षितंभवेत् । मित्र
सिंहासनेपार्थे यदा रोहति
भूपतिः ॥ तदासिंहासनेत्वास
मर्वेनयति तद्दले । यदा सिंह
सनेकर्त्ते राजा युद्धपराङ्मुख
तः । तदा दानेन हन्तव्योवले
नापि स्वरक्षितः । इतितिथ्या
दितत्त्वं ॥ योगासनविशेषः
यथा । गुल्फौ च वृषणस्या-
धः सीवन्याः पार्श्वयोः क्षिपेत्
दक्षिणे सव्यगुल्फंतु दक्षगु-
ल्फं तु सव्यके । हस्तौ च ·
जान्वोः संस्थाप्य स्वांगुलीः संप्र
सार्य्यच व्यात्तवक्त्रोनिरीक्षेत्
नासाग्रं सुसमाहितः ॥ सिं
हासनं भवेदेतत् पूजितंयो-
गिभिःसदा । बंधत्रयस्य संधा
नं कुरुते चासनोत्तमं ॥ इति
हठप्रदीपः ॥
सिंहासनः पुं षोडशावयवातनो
तच्चतुर्दशावंधः ॥ तस्यलक्षणं
यथा । सज्जेजाहृयवारुचेकृता
योषा पदद्वये । स्तनेष्वाद
मेत् कामी वंधः सिंहासनोम
नः । इतिरतिमंजरी ॥
सिंहासनचक्रं क्ली सप्तविंश
तिनक्षत्राकितनराकारचक्रमयं
यथा । अथातः संप्रवक्ष्यामिच
क्रं सिंहासनत्रयं । सप्तविंशति
नक्षत्रैरेकैकंच नरात्मकं ॥
अश्विनीमस्तके मूलाद्येपंचनाडी
विभेदतः । अश्विन्याद्युत्तरेभा
गे मस्तकाद्येषु सर्वतःस्थिते । मूला
द्यंदक्षिणेभागे ज्ञातव्यं नृप
तिस्त्रयं । इतरेषु च राजेष्वष्ट
पत्नामर्तेतोवदेत् ॥ शुभाशु
भमिदं सर्वं यत्र यस्यपतिः
स्थितः । नाडिका पंचवेधेन
एकैकस्यासने भवेत् ॥

आधारमासनेपद्मे सिंहे सिंहास
नेतथा । गृहे वैधवशात्ज्ञेयं
सौम्यैः क्रूरैः शुभाशुभं ॥ ऊ
नत्याधारगो राजा अभिषिक्तो
य आसने ॥ पराधीनगतं रा
ज्यं कुरुते नात्रसंशयः ॥ आ-
सनस्थेन रुद्रेण नीतियुक्तो
भवेन्नृपः पृथानपुरुषो देवः प्र
जाशांतिकरोभवेत् । पद्मस्य
स्थेयदा राजा उपविष्टो नृपा
सने ॥ पूर्वराजस्थिते लक्ष्म
श्चिरंपालयते मही ॥ सिंहरू
पी भवेद्राजा सिंहस्थेनासने
स्थितः । संग्रामस्य प्रियोनि
त्यमसाध्यो मंत्रिमंडलैः ॥
सिंहासनगते चिह्ने तेजस्वी
भीषणाकृतिः । बलिष्ठो
महाक्रोधी प्रजापीडाकरोन्नृ
पः ॥ तत्कालेंदुगते क्रूरे
क्रूरनिर्वेध नाडिके । शुभा
वस्याशुभेलग्ने संस्थाप्य नृप
आसने । ईदृशोचसमायोगे उ
पविष्टो य आसने । उक्ताद्य
याद्युक्तचात मेकषष्ठं करो-
तिसः । क्रूरग्रहगतोनाडी शु
पविष्टो य आसने । वंधन
मृत्युनाशाय तथा मृत्युः प्र
जायते ॥ आधार मस्तगः
सोपि रत्नावृष्टिं करोतिच । उ
भिन्नेरौरवं तत्र प्रजापीडाच
जायते ॥ आसनेच यदासौ
विद्धे भंगप्रदोभवेत् । अथ
वा व्याधिपीडाच मनोदुःखं
प्रजायते । पद्मस्थे यदासौ
तिः पट्टवासौ विनश्यति ॥
प्रियो वाथ कुमारोवा मंत्रि
वंधुस्तथाऽपिवा । सिंहेसिंहा-
सने वापियदातिष्ठतिसंस्थ
जः । तदा मृत्युर्न संदेहो
यदिशक्रसमो नृपः । शनि
राहुके माहेया यदा चंद्रेण
संयुताः ॥ यस्यासनगता-
स्ते तस्यराज्ञो भयंकराः ॥
क्रूरयुक्तोऽथवाक्रूरसक्रूरनाडी
गतोऽपिवा ॥ आसनेचंद्रयो
गेन कालरूपीशनैश्चरः ॥
एवंशुभफलंदद्याद्देवमंत्री न
संशयः ॥ करोति विपु
लं राज्यं यस्यासनगतो गु
रुः ॥ इतिज्योतिस्तत्त्वं ॥
सिंहास्यः पुं वासकः ॥
इत्यमरः ॥
सिंहतल्पमुखे त्रि ॥
सिंहिका स्त्री कश्यपपत्नी । राहु

माता। यथा। कश्यपस्य गृहि
णीतु सिंहिका राहु वाल्तन
यावज्जीजनत्। एवं ज्ञो हरिनिकृ
तकंधरो देवतैरवज्ञो निपाति
तः। इतिवास्तुयागतत्वे॥
सिंहिकासुतः पुं राहुः। इति
शब्दरत्नावली। वास्तुपुरुषः
इतिवास्तुयागतत्वं॥
सिंही स्त्री वार्त्ताकी। इत्यमरः॥
कंटकारी। वासकः। इतिमे
दिनी। वृहती। राहुमाता।
इति विश्वः॥ मुद्गपर्णी। इति
राजनिर्घण्टः॥ सिंहपत्नीच॥
सिंहीलता स्त्री वृहती। इति
भावप्रकाशः॥
सिक सेचने। इति कविकल्प
द्रुमः। स्वादिः सिकता। इति
दुर्गादासः॥ सेचयातुरयं॥
सिकता स्त्री सिकतिलः। वा
लुकायुक्तभूमिः। इति मेदिनी
वालुका। इति राजनिर्घण्टः।
सिकताः पुंभूम्नि वालुका। इ
तिमेदिनी॥
सिकतामयं क्ली वालुकामय
तटे। तत्पर्यायः। सैकतं २
इत्यमरः॥
सिकतावान् त्रि वालुकावत्स्थले
शः तत्पर्यायः। सिकता २
सिकतिलः ३ सैकतः ४ इत्य
मरभरतौ॥
सिकतिलः त्रि सिकतावान्।
इत्यमरटीकायांभरतः॥
सिक्तं क्ली वस्त्रं। इति हेमचंद्रः
सिक्तः त्रि सेकाश्रयः। कृतसे
चनः। यथा। आम्राश्च सिक्ताः
पितरश्च तृप्ता एका क्रिया द्व
यर्थकरी प्रसिद्धा। इति वायुपु
राणेगयापद्धतिः॥
सिक्थं मधूच्छिष्टं। मोमः
इति भाषा। इति मेदिनी॥
नीली। इति हेमचंद्रः॥
सिक्थः पुं भक्तपुलाकः। ग्रासः
इति मेदिनी॥
सिक्थकं क्ली मधूच्छिष्टं। इत्य
मरः॥
सिंचाणं } क्ली नासिकामलं।
सिंचाणं } सिकनी इति भाषा
सिंघाणकं } इति शब्दरत्नावली
सिंघिनी स्त्री नासिका। इति
हलायुधः॥
सिचयः पुं वस्त्रं। इति हेमचं
द्रः। जीर्णवस्त्रं। इति त्रिकां
डशेषः॥
सिञ्चन् त्रि सेचनकर्त्ता। सिच

धातोः शतृप्रत्ययेन निष्पन्नः॥
सिंचिता स्त्री पिप्पली। इति
शब्दचंद्रिका॥
सिंजा स्त्री अलंकारध्वनिः। इ
तिकेचित्। तालव्यशकारादिः
साधुपाठः॥
सितं क्ली रौप्यं॥ मूलकं।
इतिराजनिर्घण्टः। चंदनं।
इतिरत्नमाला॥
सितः पुं शुक्लवर्णः। इत्यमरः
शुक्राचार्य्यः। इतिशब्दरत्नाव
ली। शरः। इति नानार्थध्वनि
मंजरी॥
सितः त्रि शुक्लवर्णयुक्तः। इत्य
मरः। समाप्तः॥ निबद्धः॥
ज्ञातः। इति विश्वः॥
सितकुण्टा } स्त्री श्वेतकंटका
सितकंटारिका } री। इति राज
निर्घण्टः॥
सितकण्ठः पुं दात्यूहपक्षी। इति
शब्दरत्नावली। श्वेतकण्ठयु
क्ते त्रि॥
सितकरः पुं कर्पूरः॥ इति
राजनिर्घण्टः॥ चंद्रश्च॥
सितकर्णी स्त्री वासकः॥ इति
राजनिर्घण्टः॥
सितकुंजरः पुं इंद्रः॥ इन्द्र·
हस्ती। इतिकेचित्॥
सितगुंजा स्त्री श्वेतगुंजा। इ
तिराजनिर्घण्टः॥
सितचिल्लः स्त्री वालुकागडः
वेलियामत्स्य इति भाषा।
इतिहारावली। सितांकः सा
धुपाठः॥
सितच्छत्रं क्ली राजच्छत्रं।
इतिभूरिप्रयोगः॥
सितच्छत्रा स्त्री शतपुष्पा।
इत्यमरः॥
सितच्छत्रितः पुं श्वेतच्छत्रयु
क्तः। यथा। निपीय यस्य क्षिति
रक्षिणः कथां तथाद्रियंते न
बुधाः सुधामपि नलः सित
च्छत्रितकीर्त्तिमंडलः स राशि
रासीन्महसां महोज्ज्वलः। इति
नैषधीय प्रथमश्लोकः॥
सितच्छदः पुं हंसः। इति हे
मचंद्रः॥
सितच्छदा स्त्री श्वेतदूर्वा। इ
तिराजनिर्घण्टः॥
सितदर्भः पुं श्वेतकुशः। इति
राजनिर्घण्टः॥
सितदीधितिः पुं चंद्रः। सिता
शुक्ला दीधिति किरणो यस्य
इति बहुव्रीहिसमास निष्पन्नः

सितदीप्यः पुं श्वेतजीरकः ।
इतिराजनिर्घण्टः ॥
सितदूर्वा स्त्री श्वेतदूर्वा । इति
रत्नमाला ॥
सितद्रुः पुं मोरटविशेषः । इति
रत्नमाला । शुक्लवर्णवृक्षश्च
सितधातुः पुं कठिनी । इति
राजनिर्घण्टः ॥ शुक्लवर्ण-
धातुमात्रञ्च ॥
सितपर्णी स्त्री अर्कपुष्पिकावृ
क्षः । इतिरत्नमाला ॥
सितपक्षः पुं हंसः । इतिशब्द-
रत्नावली । शुक्लपक्षः । यथा
माघे मासि सिते पक्षे सप्तमी
कोटिभास्करा । इति तिथ्या-
दितत्त्वं ॥
सितपाटलिका स्त्री शुक्लपा
टलावृक्षः । श्वेतपाडरि इति हि
न्दीभाषा । तत्पर्यायः । सित
कुंभी २ फलेरुहा ३ सिताम्भा
वा ४ कुबेराक्षी ५ श्वेताका ६
काष्ठपाटला ७ धवलपाटली
८ । अस्यागुणाः । तिक्तत्वं । गुरु
त्वं । उष्णत्वं । वातदोषवमि हि
क्काकफश्रम शोफनाशित्व
ञ्च । इतिराजनिर्घण्टः ॥
सितपुंखा स्त्री श्वेतशरपुंखा
इतिराजनिर्घण्टः ॥
सितपुष्पं क्ली कैवर्तीमुस्तके
इतिजटाधरः ॥ तालव्यशकारा
दिरपिपाठः ॥
सितपुष्पः पुं तगरवृक्षः । इति-
शब्दरत्नावली ॥ श्वेतरोहितः
काशः । इतिराजनिर्घण्टः ॥
सितपुष्पा स्त्री मल्लिका । इति
शब्दरत्नावली ॥
सितपुष्पी स्त्री श्वेतापराजिता
इतिराजनिर्घण्टः ॥
सितमरिचं क्ली श्वेतमरिचं । त
त्पर्यायः । सिताभ्रं २ सितवल्ली
जं ३ वालुकं ४ वकुलं ५ यव
लं ६ चेरकं ७ अस्य गुणाः ।
कटुत्वं । उष्णत्वं । विषभूतहारि
रोगनाशित्वं । चक्षुष्यत्वं । र
सायनत्वंच । इतिराज
निर्घण्टः ॥
सितमाषः पुं राजमाषः । इति
हारावली ॥
सितरञ्जनः पुं पीतवर्णः । इ
तिहेमचन्द्रः ॥
सितरश्मिः पुं चन्द्रः । सिताः शु
क्लारश्मिः किरणोयस्य सः ॥
सितवर्षाभूः पुं पुनर्णवा । इति
राजनिर्घण्टः ॥

सितशायका स्त्री श्वेतशरपुं
खा । इतिराजनिर्घण्टः ॥
सितशिंबिकः पुं गोधूमः । इ
तिहेमचन्द्रः । शितिशिंबिको
पिपाठः ॥
सितशिवं क्ली सैन्धवलवणं ।
तस्यपर्यायाणि शितशिवं ।
सितसिवं । शीतशिवं । शीत
सिवं । इत्यमरटीका ॥
सितशिंशपा स्त्री श्वेतशिंशपा
वृक्षः । इतिराजनिर्घण्टः ॥
सितशूकः पुं यवः । इत्यमरटी
कायांभरतः ॥
सितशूरणः पुं वनशूरणः । इ
तिराजनिर्घण्टः ॥
सितसप्तिः पुं अर्जुनः । इति
केचित् ॥ श्वेताश्वश्च ॥
सितसर्षपः पुं गौरसर्षपः ॥
इतिराजनिर्घण्टः ॥
सितसारः } पुं शालिंचशाकः
सितसारकः } इति राजनिर्घण्टः ।
सितसिंहा स्त्री श्वेतकंटकारी ।
इतिराजनिर्घण्टः ॥
सितसिंधुः स्त्री गंगा । इति शब्द
रत्नावली ॥
सिता स्त्री शर्करा । इत्यमरः ॥
अस्यागुणाः । स्वेदंत सिकता
रूपं सच्छ्वेतं शर्करा सिता सि
ता समधुरारुच्या वात पित्ता
स्रदाहहृत् । मूर्छा छर्दि ज्व
रान्हंति सुशीता शुक्रकारि
णी । इतिराजनिर्घण्टः । मल्लि
का । इतिशब्दरत्नावली । श्वेतकं
टकारी । वाकुची । विदारी । श्वे
तदूर्वा । चंद्रिका । कुटुंबिनी ॥
मद्यं । पिंगा । त्रायमाणा ॥
तेजनी । इति राजनिर्घण्टः
सर्वतजातापराजिता । इति
रत्नमाला ॥
सितांशुः पुं चंद्रः । कर्पूरः ॥
इति शुभ्रांशुशब्ददर्शनात् ॥
सितांशुतैलं क्ली कर्पूरतैलं
इति राजनिर्घण्टः ॥
सिताखंडः पुं मधुजातशर्क
रा । तत्पर्यायः । खंडकः २ सि
तजा ३ शर्करजा ४ माधवी ५
मधुशर्करा ६ माक्षीकशर्करा
७ । अस्य गुणाः । अतिमधुरत्व
चक्षुष्यत्वं । छर्दि उष्ण व्रण क
फश्वास हिक्का पित्तास्रदोष
नाशित्वंच । इतिराजनिर्घण्टः ।
सिताग्रः पुं कण्टके । इतिहा
रावली ॥
सितोकः पुं बालुकागडमत्स्यः



इतिहारावली ॥
सिताङ्गः पुं श्वेतरोहितः ।
इतिराजनिर्घण्टः ॥
सिताजाजी स्त्री श्वेतजीरकः
इतिराजनिर्घण्टः ॥
सितादिः पुं गुडः । इतिराज
निर्घण्टः ॥
सिताननः पुं गरुडः । इति
केचित् । शुक्लमुखयुक्ते त्रि
सितापाङ्गः पुं मयूरः । इति
त्रिकाण्डशेषः ॥
सिताब्जं क्ली श्वेतकमलं ।
इतिराजनिर्घण्टः ॥
सिताभः पुं कर्पूरः । इत्यम
रटीकायां रायमुकुटः ॥
सिताभा स्त्री तक्राह्वा । इतिरा
जनिर्घण्टः ॥
सिताभ्रः पुं कर्पूरः । इत्यमरः ।
सिताभ्रकं क्ली कर्पूरं । इति
रत्नमाला ॥
सितांबरः पुं श्वेतवस्त्रपरिहित
व्रती । इतिहलायुधः । शुक्ले
वस्त्रपरिधायिनि त्रि ॥
सिताम्भोजं क्ली श्वेतपद्मं ।
इत्यमरः ॥
सितार्जकः पुं श्वेततुलसी ॥
श्वेताजवला इतिहिन्दीभाषा ।
तत्पर्य्यायः । वैकुण्ठः २ वटप
त्रः ३ कुठेरकः ४ जम्बीरः ५
गन्धबहलः ६ सुमुखः ७ कटु
पत्रकः ८ । अस्य गुणाः । कटुत्वं
उष्णत्वं । कफवातनेत्रामय ना
शित्वं । रुच्यत्वं । सुखप्रसवका
रकत्वंच । इतिराजनिर्घण्टः ॥
सितालकः पुं श्वेतमन्दारकः
इतिराजनिर्घण्टः ॥
सितालता स्त्री श्वेतदूर्वा । इ
तिरत्नमाला ॥
सितालिकटभी स्त्री श्वेतकिणि
हीवृक्षः । इतिराजनिर्घण्टः ॥
सितावरः पुं शाकविशेषः ।
सुसुनी इतिभाषा । तत्पर्य्यायः
सूच्याह्वः २ सूचीपत्रकः ३
श्रीवारकः ४ शिखीः ५ वत्रुः ६
स्वस्तिकः ७ सुनिषण्णकः ८ कु
रुटः ९ कुक्कुटः १० सूचीदलः ११
श्वेतावरः १२ मेधाकृत् १३ ग्राह
कः १४ । अस्य गुणाः । संग्राहित्वं ।
कषायत्वं । उष्णत्वं । त्रिदोषनाशि
त्वं । मेधा रुचि प्रदत्वं । दाहज्व
रहारित्वं । रसायनत्वंच । इतिरा
जनिर्घण्टः । निद्राकारित्वं । इ
ति लोकप्रसिद्धं ॥
तस्य लक्षणं यथा । चांगेरी स


दृशः पत्रैश्चतुर्द्दलइतीरितः ।
शाकोजलान्विते देशे चतुष्प
त्रीतिचोच्यते ॥ इति भावप्र
काशः ॥
सितावरी स्त्री वाकुची । इति
राजनिर्घण्टः ॥
सितासितः पुं बलदेवः । इति
हेमचन्द्रः । शुक्लसहितशानिः ।
यथा । सितासितौचन्द्रमसोनक
श्चित् उपः शशी सौम्यासितौर
वीन्दू । रवीन्दुभौमा रवित स्व·
मित्रा मित्रारि शेषश्च समः प्र
दिष्टः ॥ इति ज्योतिस्तत्त्व ॥
शुक्लसहितकृष्णश्च ॥
सिताह्वयः पुं श्वेतशिग्रुः । श्वे
तरोहितः । इतिराजनिर्घण्टः ॥
सितिः त्रि शुक्लः । कृष्णः । इत्य
मरटीकायां रमानाथः ॥
सितिकण्ठः पुं शितिकण्ठः । शि
वः । इतिमरटीकायां सितिशब्द
स्यदन्त्यादित्वदर्शनात् ॥
सितिमा पुं शुक्लता । कृष्णता
इति सितिशब्दादिमन् प्रत्यये
ननिष्पन्नः ॥
सितिवारः पुं सुनिषण्णकः । इति
भावप्रकाशः ॥
सितिवासाः पुं बलदेवः । इति
नीलांबरशब्ददर्शनात् ॥
सितेतरः पुं श्यामशालिः ॥
कुलत्थः । इति राजनिर्घण्टः ॥
शुक्लेतरवर्णश्च ॥
सितेतरगतिः पुं अग्निः । इति
हलायुधः ॥
सितेक्षुः पुं श्वेतेक्षुः । इति रा
जनिर्घण्टः ॥
सितोदरः पुं कुवेरः । इतिहेम
चन्द्रः । शुक्लकुक्षियुते त्रि ॥
शुक्लकुक्षौ क्ली ॥
सितोद्भवं क्ली श्वेतचन्दनं । इति
केचित् । शर्कराजाते त्रि ॥
सितोपले क्ली कठिनी । इति
त्रिकाण्डशेषः ॥
सितोपलः पुं स्फटिकः । इति
राजनिर्घण्टः ॥
सितोपला स्त्री शर्करा । इति
हेमचन्द्रः ॥
सिद्धं क्ली सैन्धवलवणं । इति
राजनिर्घण्टः ॥
सिद्धः पुं देवयोनिविशेषः ॥
इत्यमरः । सच अणिमादिगुणो
पेतो विश्ववसु प्रभृतिः । इति
भरतः व्यासादिः । विष्कम्भादि
सप्तविंशतियोगान्तर्गतैकविंश
योगः । इति मेदिनी ॥

तत्रजातफलं । जितेंद्रियःसर्व-
कलानिधानो वेदोऽतिप्रेम
प्रेमोविनीतः । सत्योपपन्नः कु
तभूरिभोगोयस्यप्रसूतौ किल
सिद्धयोगः ॥ इतिकोष्ठीप्रदीपः
व्यवहारः ॥ इतिप्राकृतरत्नावली
हलायुधः । गुडः । इति रा
जनिर्घण्टः ॥
सिद्धः त्रि प्रसिद्धः । नित्यः ॥
निष्पन्नः । इति प्राकृतरत्नावली ।
मुक्तः । इतिहेमचन्द्रः ॥ पक्वे ।
यथा स्मृतिः । पर्युषिते पुनः
सिद्धमभोज्य मत्स्यञ्च सिद्धपाद
कस्पर्शनात् । इति प्रायश्चित्ततत्त्वे ॥
मंत्रसिद्धिविशिष्टः । यथा ।
अथ मंत्रसिद्धे उपायाः । गौत
मीये । सम्यगनुष्ठितो मंत्रो य
दि सिद्धि नै जायते । पुनस्ते-
नैव कर्तव्यं ततः सिद्धोभवेद्ध्रु
वं । पुन रनुष्ठितो मंत्रो यदि
सिद्धि नै जायते ॥ पुनस्ते-
नैव कर्तव्यं ततःसिद्धो न सं
शयः । पुनः सोऽनुष्ठितो मंत्रो
यदि सिद्धिर्नजायते । उपाया
स्तत्र कर्तव्याः सप्त शंकर भा
षिताः । भ्रामणं रोधनं वश्यं पी
डनंपोष शोषणं ॥ दहनां-

तेकमात् कुर्यात् ततःसिद्धो
भवेन्मनुः ॥ भ्रामणं वायुबी
जेन यथानुक्रमयोगतः । तन्मं
त्रं यंत्रमालिख्य सिल्हकर्दम
कुंकुमैः । उशीर चंदनाभ्यांत
मंत्रं संग्रथितं लिखेत् । त्री
राज्य मधुतोयानां मध्ये उलि
खितं भवेत् । एजनाजपना
द्धोमात्भ्रामितःसिद्धिदो भवेत्
भ्रमितोयदि न सिद्धः स्याद्रो
धनं तस्य कारयेत् । सारस्वते
नवीजेन संपुटीकृत्य संजपेत्
एवं रुद्धे भवेत् सिद्धो न चेद्रे
तहपीकुरु । अलक्त चंदनेकु
हे हरिद्रा मादनेषीला । ए
तैस्तु मंत्रमालिख्य भूर्जपत्रेष
शोभने । धार्य्य कंठे भवेत्सि
द्धः पीडनं वास्य कारयेत् ॥
अधरोत्तर योगेन पदानिपरि
जप्यते । ध्यायेत्तु देवतांतद
त् अधरोत्तर रूपिणी विद्या
मादित्यपुरयेन लिखित्वाकु
स्यक्तांत्रिगुणं । तथाभूतेन मं
त्रेणहोमः कार्य्योदिनेदिने । पी
डितो लज्जयाविष्टः सिद्धः
स्यादथ पोषयेत् । बालाया
स्त्रितयंबीजं आद्यंतेतस्य यो


जयेत् । गोक्षीर मधुनालिख्य
विद्याप्यानौ विभावयेत् ॥ पो
षितोऽयं भवेत् सिद्धोन चेत्
कुर्वीत शोषणं । द्वाभ्यांत-
वायुबीजाभ्यां मंत्रं कुर्यादिद-
र्भिणं ॥ पथाविद्या गले या
ध्या लिखित्वावरभस्मना ।
पोषितोपिन सिद्धःस्यात् दह
नीऽग्निबीजतः ॥ आग्नेयेन
तु बीजेन मंत्रस्यैकैक मक्ष
रं । आद्यंतमध्य कंठेच्चे योज-
येद्दाहकर्म्मणि ब्रह्मवृक्षस्य
तैलेन मंत्र मालिख्य धारये
त् । कंठदेशे ततो मंत्रः सि-
द्धःस्याच्छंकरोदितं । इत्येतत्
कथितंसम्यक् केवलं तवभ
क्तितः । एकेनैवकृतार्थःस्याद्
बहुभिःकिमुतव्रते । इति तंत्र
सारः । सिद्धिविशिष्टः । सचच
तस्त्रिंशत्सिद्धयः । यथा । चतुस्त्रिं
शाद्धियः सिद्धः सर्वकर्मोपकार
कः । तस्यैतिस्वयं सिद्धः भक्त
मंत्रैनैववान्छति । द्वात्रिंशद्विधं
सिद्धं सर्वसाधनकारणं । मन्त्र
त्वात्सर्वयत्नेन सिद्धमंत्रं गृह्णी-
यात् । अणिमा लघिमा प्राप्तिः प्रा
काम्यमहिमालया । ईशित्वंच वशि

त्वंच तथा कामावसायिता । दू
रश्रवण मेवत्ति द्वाक्कायाः प्रवे
शनं । मनोयायित्व मेवति सर्व
ज्ञत्व मभीप्सितं । वह्निस्तंभेजल
स्तंभे चिरंजीवित्व मेवचा ॥
वायुस्तंभे क्षुत्पिपासा निद्रा
स्तंभन मेवच । कायव्यूहेच वा
क्सिद्धिं मृतानयन मीप्सितं
सृष्टीनां कारणञ्चैव प्राणाक
र्षणमेवच । प्राणानांचप्रदानं
चेलोभादीनांचस्तंभनं । इंद्रि
याणां स्तंभनंच बुद्धिस्तंभनमे
वच । इति ब्रह्मवैवर्ते श्रीकृष्ण
जन्मखंडे ७८ अध्यायः ॥
सिद्धकः पुं सिंधुवारः । शालः
इतिराजनिर्घण्टः ॥
सिद्धकामेश्वरी स्त्री कामाख्यायाः
पंच मूर्त्तीनांतृतीयमूर्त्तिः । त
स्याध्यानं यथा । रवि शशि युत
कर्णा कुंकुमापीतवर्णा मणि
कनकविचित्रा लोलजिह्वात्रिने
त्रा । अभयवरदहस्ता साक्षसूत्र
प्रशस्ता प्रणतसुरनरेशा सिद्ध
कामेश्वरीसा । अरुणकमलसं
स्थाक्तपद्मासनाख्या नवतरु
णशरीरा मुक्तकेशीसुहारा ।
शववहृदि पृथुतुंगस्तनयुग्मा



मनोज्ञा शिशुरविसमवक्त्रा सि
द्धकामेश्वरी सा । विपुलविभव
दात्री स्मेरवक्त्रा सुकेशी दलित
करकदन्ता सासि चेन्द्रावनम्रा ।
मनसिज दृशदिग्धा योनिमुद्रा
लसन्ती पवनचलनशक्ता संश्रु
तस्थानभागा । इतिकालिका-
पुराणे ६९ अध्यायः ॥
सिद्धगङ्गा स्त्री मन्दाकिनी । इति
जटाधरः ॥
सिद्धजलं क्ली काञ्जिकं । इति
हारावली ॥ पक्ववारिच ॥
सिद्धदेवः पुं शिवः । इतिश
ब्दरत्नावली ॥
सिद्धधातुः पुं पारदः । इति-
त्रिकाण्डशेषः ॥
सिद्धपीठः पुं सिद्धस्थाने । यथा
ज्वालोत्तलवलि यत्र होमानां को
टिसंख्यकः । महाविद्याजपः
कोटिः सिद्धपीठः प्रकीर्त्तितः ।
इतितन्त्रं ॥
सिद्धपुरं क्ली भूगोलस्याधोदे
शविशेषः । यथा । लंका कुम
ध्ये यमकोटि रस्याः प्राक् प
श्चिमे रोमकपत्तनञ्च । अध
स्ततः सिद्धपुरं सुमेरुः सौम्ये
ऽथ याम्ये वडवानलश्च । कुवृ
त्तपादान्तरितानि तानि स्थाना
नि षड् गोलविदो वदन्ति ॥
इति सिद्धान्तशिरोमणिः ॥
सिद्धपुष्पः पुं करवीरवृक्षः ॥
इतिराजनिर्घण्टः ॥
सिद्धप्रयोजनः पुं गौरसर्षपः ।
इतिराजनिर्घण्टः ॥
सिद्धमन्त्रः ॥ पुं सिद्धिप्राप्तमन्त्रः ।
यथा । द्वाविंशाद्धियेसिद्धं सर्व
साधनकारणं । मन्मुखात् श्रूय
ता नेद सिद्धमन्त्रं गृहाणच ॥
ॐ सर्वेश्वराय सर्वविघ्नविना-
शिने मधुसूदनाय स्वाहेत्येवं
मन्त्रश्च सर्वेषां कल्पपादपः ॥
सामवेदेच कथितः सिद्धान्तोऽस्
य सिद्धिदः ॥ अनेनयोगिनः सि
द्धा मुनीन्द्राश्च सुरा स्तथा ॥
शतलक्षजपेनैव मन्त्रसिद्धिर्भवेत्
सतां । इतिब्रह्मवैवर्त्ते श्रीकृष्ण
जन्मखण्डे ४८ अध्यायः ॥
सिद्धमोदकः पुं तवराजाख्यखं
डः । इतिराजनिर्घण्टः ॥
सिद्धयोगिनी स्त्री योगिनीवि-
शेषः । अपराजितास्तोत्रं ॥
सिद्धरसः पुं पारदः । रससिद्धः
इत्यजयपालः ॥
सिद्धरसः त्रि धातुप्रभृतिः । इति

मेदिनी ॥
सिद्धविद्या स्त्री महाविद्यावि
शेषः । यथा । कालीतारा म-
हाविद्याषोडशीभुवनेश्वरी । भै
रवी छिन्नमस्ताच विद्याधूमव
तीतथा । बगलामुखी सिद्धवि
द्या मातङ्गीकमलात्मिका । ए
तादशमहाविद्याः सिद्धविद्याः
प्रकीर्त्तिताः ॥ इतितन्त्रसारः ॥
सिद्धसलिलं क्ली काञ्जिके ।
इति त्रिकाण्डशेषः ॥
सिद्धसाधनं क्ली सिद्धस्ववस्तु
नः साधनं । साध्यवत्त्वानिश्चय
सत्वेप्यनुमाने । यथा । अतएव
नस्वरूपासिद्धिः सिद्धसाधने
वा । इतिसिद्धान्तलक्षणजागदी
शी । सिद्धसाधनः पुं गौरसर्ष
पः । इतिराजनिर्घण्टः ॥
सिद्धसाध्यः } पुं मन्त्रविशेषः । य
सिद्धसिद्धः } था सिद्धसिद्धो य
थोक्तेन द्विगुणात् सिद्धसाध्य
कः । सिद्धसुसिद्धोऽर्द्धजपात् सि
द्धारि र्हन्ति बान्धवान् ॥ इति
तन्त्रसारः ॥
सिद्धसिन्धुः स्त्री गङ्गा । इतित्रि
काण्डशेषः ॥
सिद्धसुसिद्धः पुं मन्त्रविशेषः ।
अस्य प्रमाणं सिद्धसाध्यशब्दे
द्रष्टव्यं ॥
सिद्धसेनः पुं कार्त्तिकेयः । इति
शब्दरत्नावली ॥
सिद्धसेवितः पुं वटुकभैरवः
इतितस्याष्टोत्तरशतनामस्तोत्रं
सिद्धजनोपासिते त्रि ॥
सिद्धा स्त्री ऋद्धिः । इतिराज
निर्घण्टः । योगिनीविशेषः ।
यथा । मंगला पिंगला ध
न्या भ्रामरी भद्रिका तथा । उ
ल्कासिद्धा संकटाच योगि
न्योऽष्टौ प्रकीर्त्तिताः ॥ इतिजा
तकदीपिका ॥
सिद्धान्तः पुं सर्वपक्षनिरस्यसि
द्धपक्षस्थापने । इतिभरतः ।
तत्पर्यायः । राद्धान्तः २ ॥
इत्यमरः । नवविधज्योतिर्ग्रन्थाः
यथा । ब्रह्मसिद्धान्तः १ सूर्य्य
सिद्धान्तः २ सोमसिद्धान्तः ३ बृ
हस्पतिसिद्धान्तः ४ गार्ग्यसिद्धा
न्तः ५ नारदसिद्धान्तः ६ पराश
रसिद्धान्तः ७ पुलस्त्यसिद्धान्तः
८ वशिष्ठसिद्धान्तश्च ९ तन्त्रा-
धिकरणाभ्युपगमसंस्थितिः
सिद्धान्तः । सचचतुर्विधः । सर्व्वत
न्त्रप्रतितन्त्राधिकरणाभ्युपगमसं



स्थितार्थांतरभावात् । सर्वतंत्र
विरुद्धस्तंत्रेऽधिकृतोऽर्थः स
र्वतंत्रसिद्धांतः । १ समानतंत्र
सिद्धः परतंत्रासिद्धः प्रतितंत्रसि
द्धांतः ॥ २ ॥ यत्सिद्धावन्यप्र
करणसिद्धिः सोऽधिकरणसि
द्धांतः । ३ अपरीक्षिताभ्युपगः
मात्तद्विशेषपरीक्षणमभ्युप
गमसिद्धांतः ॥ ४ ॥ इतिगौ
तमसूत्रं ॥

सिद्धांताचारः पुं तांत्रिकाचार
विशेषः । यथा । आत्मानं दे
वतां मत्वा यजेद्देवींच मान
सैः । सदा शुद्धः सदा शांतः
सिद्धांताचार उच्यते ॥ इत्याचा
रभेदतंत्रं ॥

सिद्धांती पुं मीमांसकः । इति
भूरिप्रयोगः ॥

सिद्धापगा स्त्री गंगा । इति
हेमचंद्रः ॥

सिद्धायिका स्त्री चतुर्विंशति
तुहृशासनदेवतांतर्गतदेवीवि
शेषः । इतिहेमचंद्रः ॥

सिद्धारिः पुं मंत्रविशेषः । एत
न्नामानं सिद्धसाध्यशब्दे द्रष्टव्यं
सिद्धार्थः पुं बुद्धार्हत्पिता । इ
तिहेमचंद्रः ॥ शाक्यसिंहः ।
इतिमेदिनी । श्वेतसर्षपः ॥
इत्यमरः । अस्य पर्यायगुणाः
गौरसर्षपशब्दे द्रष्टव्याः ॥
वटवृक्षः । इतिराजनिर्घण्टः ॥
प्रसिद्धार्थः । यथा । सिद्धार्थं
सिद्धसंबंधं श्रोतुं श्रोताप्रव
र्त्तते । शास्त्रादौ तेन वक्तव्यः
संबंधः सप्रयोजनः ॥
इतिव्याकरणटीका ॥

सिद्धार्था स्त्री चतुर्थजिनमा
ता । इतिहेमचंद्रः ॥

सिद्धिः स्त्री दुर्गा । यथा । साध
नात् सिद्धिविख्याता साधका
नां च ईश्वरी । इति देवीपुराणे ४५
अध्यायः । ऋद्धिनामौषधं । इत्य
मरः । योगविशेषः । निष्पत्तिः
पादुका । अंतर्द्धिः ॥ वृद्धिः ॥
इति मेदिनी । मोक्षः ॥
इतिहेमचंद्रः ॥ संपत्तिः ॥ इति
धरणी । बुद्धिः । इतिशब्दर
त्नावली । अष्टसिद्धिनामलक्ष
णानि यथा । अणिमामहिमा
चैव लघिमाप्राप्तिरेवच ॥
प्राकाम्यंच तथेशित्वं वशित्वं
च तथापरे । यत्र कामावसायि
त्वं गुणानेतानथैश्वरान् । प्रा
प्नोत्यष्टौ नरव्याघ्र परंनिर्वाण

सूचकान् । सूक्ष्मात् सूक्ष्मतरो
ऽणीयान् शीघ्रत्वाल्लघिमा गुणः
महिमाशेषपूज्यत्वात् प्राप्तिर्नो
प्राप्यमस्य यत् । प्राकाम्यमस्य
व्यापित्वात् ईशित्वं चेश्वरो य
तः । वशित्वात् वशितानाम
योगिनः सप्तमो गुणः ॥ यत्र
च्छास्थानमप्युक्तं यत्रकामा
वसायिता । ऐश्वर्य्यं कारणै
रेभिर्योगिनः प्रोक्तमष्टधा । इति
मार्कण्डेय दत्तात्रेयालर्कसंवा
दे योगवल्लभनामाध्यायः ॥
भावनासिद्धिर्यथा । तीर्थे
कांतेः श्रीष्टदेवे गुरौ मंत्रे भ
वौषधे । आस्था च यादृशी
यासां सिद्धिस्तासां च तादृशी
इति ब्रह्मवैवर्ते श्रीकृष्णजन्म
खंडे ३९ अध्यायः ॥
ज्ञानात् सिद्धिर्यथा । तस्मा
त्वमपि भूपाल देहि न्याया
र्जितं धनं । दानात् ज्ञानं त
तः प्राप्य ज्ञानात् सिद्धिं म
वाप्स्यसि ॥ इतिवह्निपुरा
णे शिवे रूपाख्याननामा
ध्यायः ॥

सिद्धिदः पुं बटुकभैरवः । इति
तस्य स्तोत्रं । सिद्धिदातरि त्रि ।
यथा । मधुमासेन संप्राप्तेषु
क्लपक्षे चतुर्दशी प्रोक्ता मद
नभंजीति सिद्धिदा तु महोत्स
वे । इतितिथ्यादितत्त्वं ॥

सिद्धियोगः पुं तिथिवारघटित
शुभयोगविशेषः । यथा । शुक्रे
नंदा बुधे भद्रा शनौ रिक्ता कु
जे जया । गुरौ पूर्णा च संयु
क्ता सिद्धयोगाः प्रकीर्तिताः ॥
इति ज्योतिःसागरः ॥

सिद्धियोगिनी स्त्री योगिनीभे
दः । यथा । प्रणवाद्याश्च या वि
द्याः शूद्रादौ न समीरिताः ॥
अस्यांचैव विशेषोयत् योषि
द्भिः समुपासयेत् । डाकिनी
सा भवेत्सैव डाकिनीभिः प्रजा
यते । पतिहीना पुत्रहीनाय
या स्यात् सिद्धियोगिनी । इति
तंत्रसारः । दक्षस्य पंचाशत्
कन्याः । यथा । सती ज्योतिः
स्मृतिः स्वाहा ह्यनसूया स्वधा
तथा । प्रीतिःक्षमा च संभूतिः
सन्नतिश्च अरुंधती । कीर्ति
र्लक्ष्मी धृति मेधा पुष्टिःश्रद्धा
क्रिया मतिः । बुद्धि र्लज्जा वपुः
शांतिस्तुष्टिः सिद्धिस्तथारतिः
अरुंधती वसुर्यामीलंबाभानु

मेरुवती। संकल्पाच मुहूर्त्ताच
साध्या विश्वाच नामतः। अदि
तिश्च दितिश्चैव दनुःकालाद
नायुषा। सिंहिका मुरसाकद्रु
र्विनता सुरभिःस्वसा। क्रोधा
इराच प्रावाच दक्षकन्याःप्रकी
र्त्तिताः। पंचाशत् सिद्धियो
गिन्यः सर्वलोकस्य मातरः
इति वह्निपुराणे गणभेद
नामाध्यायः ॥
सिद्धिली स्त्री क्षुद्रपिपीलिका
इतिकेचित् ॥
सिद्धिस्थानं क्ली पुण्यस्थान
विशेषः। यथा। अतःपरंप्रव
क्ष्यामिसिद्धिस्थानानियानितु।
यस्मिन्नाराधिता देवी सिद्धं भ
वतिसिद्धिदा। तुंगाग्रे पातशृंगे
चचित्रकूटे पर्वते तथा। विंध्या
गंगा सरित्पुरे रेवातीरेतथा
पिवा। पयोष्णी अमरवाख्या तु
अष्ट वामंडलेश्वरे। ओंकारेश्वर
रामेशे अथवा अमरेश्वरे। ब्र
ह्मपुत्रतटे सिन्धुविशुद्धे तथा
प्रिये। सरस्वतीतटे पुण्ये स
गंधायतनेपिवा। स्थानेष्वेषु
जपंकुर्यात्तनंदाहे कृतमान
सः। भैरवं मूलमेदन्त्वे·
चण्डीशं त्रिपुरांतके। अष्टचक्रे
चक्रोच्छासे कपालाख्याख्यनाम
के अज्ञाविकं रवेराष्ट्राख्ये ख्या
नाम्येतानि वर्जयेत् ॥ इति
देवीपुराणे कुण्डप्रवेशनामा
ध्यायः ॥
सिद्धेश्वरी स्त्री देवीविशेषः॥
यथा। सिद्धा सिद्धेश्वरी सि
द्धविद्याधरगणैः स्तुता। मंत्रसि
द्धिप्रदा योनिसिद्धिदा लिंगशो
भिता। इतिमुण्डमालातंत्रे ९
पटले महाविद्यास्तोत्रे ॥ अ
पिच। कृष्णेन वलभद्रेणाथो
पैःकंसाजितोप्सुभिः। संकेत
के कृतेतत्रमंत्रनिश्चयकारके
तदा संकेतकेः साच सिद्धा दे
वीप्रतिष्ठिता। सिद्धिप्रदा भो
गदाच तेनसिद्धेश्वरीस्मृता।
संकेतकेश्वरीचैव दृष्ट्वासिद्धि
मवाप्नुयात्। इतिवाराहे
मथुरापरिक्रमप्रादुर्भावनामा
ध्यायः ॥
सिद्धौघः पुं गुरुक्रमविशेषः
यथा तंत्रे। अथ नाथ गुरून्
वक्ष्ये दृष्टादृष्टफलप्रदान्।
ऊर्द्ध्वकेशो व्योमकेशो नील
कण्ठो वृषध्वजः। दिव्यौघाः

सिद्धिदा वत्स सिद्धौघान् शृणु
यत्नतः। वसिष्ठः कूर्मनाथश्च
मीननाथो महेश्वरः॥ हरिना
थो मनवौघाख्यान् शृणुवत्स
सितद्गुरून्। तारावती तानुम
ती जयाविद्या महोदरी। सु
खानंदःपरानंदःपारिजातःकु
लेश्वरः। विरूपाख्यः फेरवीच
कथितं नारिणीकुले। आनं
दनाथ शांताना गुरवः सर्वसि
द्धिदाः। स्त्रियोपिगुरुरूपाश्च
अंबांताः परिकीर्त्तिताः॥ इ
ति तंत्रसारः॥ अन्यच्च। ब्रह्मा
नंदः पूर्णदेवश्चलचित्त श्च
लाचलः। कुमारः क्रोधनश्चै
वतथाच सुरदीपनः। माया
मायावती चैव मानवौघान् शृ
णुप्रिये। वशिष्ठःकूर्मनाथ
श्चमीननाथोमहेश्वरः। हरिना
थोमानवौघानथवक्ष्यामि सद्गु
रून्। इतिशाक्तिकरत्नाकरतंत्रे।
तथा। नारदः काश्यपः शंभु
र्भार्गवः कुलकौशिकः। एते
पंच महादेव सिद्धौघाः परि
कीर्त्तिताः। इतितंत्रं॥
सिध्म क्ली किलासरोगः।
इत्यमरः ॥
सिध्मः स्त्री किलासरोगः। इ
तिहेमचंद्रः॥
सिध्मलः त्रि किलासी। इत्य
मरः॥
सिध्मला स्त्री मत्स्यविकृति॥
इतिमेदिनी॥
सिध्मवान् त्रि किलासरोगावि
शिष्टः। इति सिध्मशब्दादस्त्य
र्थेवतुप्रत्ययेननिष्पन्नः॥ सिध्मा
स्त्री किलासरोगः। इतिहेमचंद्रः
सिध्यः पुं पुष्यनक्षत्रे। इत्यम
रः॥
सिध्रः पुं साधुः। वृक्षः। इत्यु
णादिकोषः॥
सिध्रका स्त्री वृक्षविशेषः। सेध
तिरोगहननत्वामिति सिध्रका।
सीप इत्युज्ज्वलदत्तः। सिध्र
गतस्यानामस्तीति रुक् ततः स्वा
र्थे कः संज्ञायां इतिसत्वात्
नष्टत्। इत्यमरभरतौ॥
सिध्रकावणं क्ली देवोद्यानं।
इतित्रिकांडशेषः॥
सिनं क्ली शरीरं। इतिसंक्षिप्त
सारोणादिवृत्तिः॥
सिनः पुं ग्रासः। इतिमुग्धबो
धव्याकरणं॥ काणः॥
इतिकेचित्॥

शुक्लगुणविशिष्टे त्रि ॥
सिनी त्रि शुक्लगुणविशिष्टा
यथा। श्वेता सिता सिनी श्येनी
इत्यादिः। इति सिनीवालीश
ब्दटीकायां भरतः ॥
सिनीवाली स्त्री दृष्टेन्दुकलामा
वास्या। इत्यमरः। साच तद्दृष्टी
युक्तामावास्या। सिनी श्वेता-
वाला चन्द्रकलास्या सिनीवा
लीनद्यादित्वादीप्। इति तट्टी-
कायां भरतः ॥ दुर्गा। इति मे
दिनी ॥
सिंडकः पुं सिन्दुवारवृक्षः। इ
त्यमरः ॥
सिंदुवारः पुं वृक्षविशेषः। नि
सिंदा इति भाषा। इन्दुरुर इति
च क्वचित्। तत्पर्यायः। सिंद
कः २ इन्द्रसुरिसः ३ निर्गुण्डी ४
इन्द्राणिका ५ इत्यमरः। सिंधु
कः ६ सिंधुवारकः ७ इन्द्राणी
८ पैलीसी ९ शाक्रागी १० का
सनाशिनी ११ इति रत्नकोषः
श्वेतपुष्पः १२ सिंदुवारकः १३
स्थिरसाधनकः १४ अनंतः १५
सिंदुक १६ अर्थसिद्धकः १७ अ
स्य गुणाः। कटुत्वं। तिक्तत्वं।
कफ वात क्षय कुष्ठ कंडू निशूल

नाशित्वं। कायसिद्धिदत्वंच। इ
तिराजनिर्घण्टः। अपिच। सिंधु
कः स्मृतिदस्तिक्तः कषायः कटु
कोलघुः। केश्यो नेत्रहितो हं
ति शूलशोथाममारुतान् ॥
कृमिकुष्ठारुचि श्लेष्म व्रणा
न्नीलापि तद्विधा। सिंधुवारद
लं तन्नु वातश्लेष्महरं लघु ॥ इ
ति भावप्रकाशः ॥ स्यंदं वार
यति सिंधुवारः यत्। निपात
नाद्यिः साधुः। सिंदुकसिं-
दुवारौ दंत्यसादी तवर्गांतौ
सर्वत्रापि तिविरहितः। केचित्तु सि
न्धुं समुद्रमपि वारयति शोष
यति तीक्ष्णरसत्वेन कफघ्न
त्वात् सिंधुवारः सिंधुक सिंधु
वारौ तवर्गचतुर्थवंतावित्याहुः
इति भरतः ॥
सिंदूरं क्ली। रक्तवर्णचूर्णविशे
षः। सिंदूर इति भाषा। तत्पर्यायः
नागसंभवं २ इत्यमरः ॥ ना
गरेणुः ३ रक्तं ४ सीमंतकं ५
नागजं ६ नागगर्भं ७ शोणं
८ वीररजः ९ गणेशभूषणं १०
संध्याराग ११ शृंगारकं १२
सौभाग्यं १३ अरुणं १४ मंगु
ल्यं १५ अस्य गुणाः। कटुत्वं

तिक्तत्वं। उष्णत्वं। व्रणविरो
पणत्वं। कुष्ठस्वभ्रमकंडूतिवि
सर्प शमनत्वंच। इति राजनि
र्घण्टः ॥ अपिच। सिंदूरं रक्त
रेणुंच नागगर्भञ्च सीसजं।
सीसोपधातुः सिंदूरं गुणैस्तत
सीसवन्मतं। संयोगजप्रभा
वेन तस्याप्यन्ये गुणाः स्मृताः
सिंदूरमुष्णं वीसर्प कुष्ठ कंडू
विषापहं। भग्नसंधानजननं व्र
णशोधनरोहणं। सिंदूर
स्य शोधनमाह। दुग्धाम्ल
योगात् स्नस्य विशुद्धिर्गदि
तावुधैः। इति भावप्रकाशः ॥
सिंदूरदानमंत्रो यथा। सिंदूरंच
वरं रम्यं भाले शोभाविवर्द्ध
नं। धुरं भूषणानांच सिंदूरं
प्रतिगृह्यतां। इति ब्रह्मवैवर्ते
प्रकृतिखंडे २१ अध्यायः ॥
तस्य धारणात् पत्युरायुर्वृद्धि-
र्यथा। हरिद्राकुंकुमंचैव सिं
दूरं कज्जलं तथा। कार्पास-
कंच तांबूलं मांगल्याभरणं
शुभं। केशसंस्कार कवरीक
रकर्णविभूषणं। भर्तुरायुष्य
मिच्छंती दूषयेन्न पतिव्रता ॥
इति काशीखंडे ४ अध्यायः ॥

सिंदूरः पुं वृक्षविशेषः। इति
मेदिनी ॥
सिंदूरकारणं क्ली सीसकं।
इति हेमचंद्रः ॥
सिंदूरतिलकं पुं हस्ती। इति
मेदिनी ॥
सिंदूरतिलका स्त्री सधवाना
री। इति मेदिनी ॥
सिंदूरपुष्पी स्त्री पुष्पवृक्षवि
शेषः। तत्पर्यायः। सिंदूरी २
वीरपुष्पी ३ तृणपुष्पी ४ क
रच्छदा ५ शोणपुष्पी ६ अस्या
गुणाः। कटुत्वं। तिक्तत्वं। क
षायत्वं। श्लेष्म वात शिरोर्त्ति
भूतनाशित्वं। चंडीप्रियत्वंच।
इति राजनिर्घण्टः ॥
सिंदूरी स्त्री रोचनी। रक्तचेलि
का। धातकी। इति मेदिनी।
सिंधुः पुं समुद्रः। इत्यमरः ॥
वमथुः। देशविशेषः। नद
विशेषः। इंदस इति ख्यातः ॥
इति मेदिनी। गजमदः। इति
हेमचंद्रः ॥ सिंधुवारवृक्षः। इति
शब्दचंद्रिका। श्वेतकेणं। इति
राजनिर्घण्टः। रागविशेषः।
सचमालकौशरागपुत्रः। यथा
माधवः शोभनः सिंधु र्मारू

मेवाड़ कुंतलाः । कालिंगः
सोम संयुक्तः कौशिकस्यसु
भा इमे । इतिसंगीतसिंधुः ॥
नदीविशेषः । तज्जलगुणाः ।
शीतत्वं विपाशापुज्जः सिंधुन
द्याः स्वर्शीते लघु स्वादु सर्वा
मयघ्नं । जले निर्मले दीपने
पाचनेच प्रदत्ते बलं बुद्धि मे
धायुषंच । इतिराजनिर्घण्टः
सिंधुःस्त्रीनदी । इतिमेदिनी
सिंधुकः पुं सिंधुवारवृक्षः । इ
तिशब्दचंद्रिका ॥
सिंधुकफः पुं समुद्रफेनः ।
इतिशब्दरत्नावली ॥
सिंधुकंटं क्ली स्वल्पटंकणं ।
इतिराजनिर्घण्टः ॥
सिंधुखेलः पुं सिंधुदेशः । इ
तिशब्दरत्नावली ॥
सिंधुजं क्ली सैंधवलवणं । इ
त्यमरः । समुद्रजाते त्रि ॥
सिंधुजन्म क्ली सैंधवलवणं ।
इतिरत्नमाला ॥
सिंधुजन्मा पुं चंद्रः । इतिज
टाधरः ॥
सिंधुजा स्त्री लक्ष्मीः । इतिज
टाधरः ॥
सिंधुजा स्त्री मालवरागस्यभार्या ।
यथा धानुषी मालसी रामकि
रीच सिंधुजा तथा । गुर्जरी
भैरवीच मालवस्य प्रिया इमाः
इतिसंगीतदामोदरः ॥
सिंधुनंदनः पुं चंद्रः । इतित्रि
काण्डशेषः ॥
सिंधुनाथः पुं समुद्रः । इति
केचित् ॥
सिंधुपत्रः पुं मर्कटेंदुः । इतिश
ब्दचंद्रिका । चंद्रश्च ॥
सिंधुपुष्पः पुं शंखः । इतिश
ब्दचंद्रिका ॥
सिंधुमंथजं क्ली सैंधवलवणं
इतिरत्नमाला ॥
सिंधुरः पुं हस्ती । इति हेम
चंद्रः ॥
सिंधुरद्वेषी पुं सिंहः । सिंधुरं
हस्तिनं द्वेष्टि इत्यर्थेणिनि प्रत्य
येन निष्पन्नः ॥
सिंधुलवणं क्ली सैंधवं । इति
रत्नमाला ॥
सिंधुवारः पुं हयोत्तमः । इति
त्रिकाण्डशेषः । सिंधुवारवृक्षः
यथा । विस्तंधकः सिंधुवारः
सिंधुकस्तरसोपिच । तथेंद्रसुर
स्त्रिलिंद्रसुरसः सिंधुवारितः
निर्गुंडीन्द्राणिकेंद्राणीसरसा ·

सिंधुवारकः । इतिशब्दरत्नाव
ली । अस्य गुणाः । सिंधुवारो वि
षश्लेष्म व्रणकुष्ठ त्वयापहः ॥
इतिराजवल्लभः ॥
सिंधुवारकः पुं सिंधुवारवृक्षः
इतिशब्दरत्नावली ॥
सिंधुवारितः पुं सिंधुवारवृक्षः
इतिशब्दरत्नावली ॥
सिंधुवेषणः पुं गम्भारीवृक्षः ।
इतिशब्दचंद्रिका ॥
सिंधुशायनः पुं विष्णुः । क्षीरो
दशायित्वात् ॥
सिंधुसंगमः पुं नदीनदसमु
द्राणां परस्परमेलकः । तत्प
र्यायः । संभेदः २ इत्यमरः ॥
सिंध्वो नद्योः संगमोमेलकः
सम्भेदः । संभिदंति मिलंति
अस्मिन्निति संभेदः चक्र ।
सिंधुशब्देन नदी नदः समुद्र
श्चोच्यते तेन नद्या नदयोर्न
दी समुद्रयोश्च मेलकः संभे
दः । इति वैकुंठादयः ॥ इति
भरतः ॥
सिंधूद्भवं क्ली सैंधवलवणं ।
इतिरत्नमाला ॥
सिंधूपलं क्ली सैंधवलवणं
इतिहारावली ॥
सिप्रं क्ली सरोवरविशेषः । यथा
पतस्मिन्नंतरे शंभुः सिप्रंत्यक्त्वाति
दासरः । गंगावतार मगमत्
हिमवत्प्रस्थमुत्तमं । इतिका
लिकापुराणे ४९ अध्यायः ॥
सिप्रः पुं चंद्रः । इतित्रिकाण्ड
शेषः । निदाघसलिलं । घर्मः
इतिमेदिनी ॥
सिप्रा स्त्री नदीभेदः । इति मेदि
नी ॥ सातु उज्जयनीदेशसमी
पे वर्तते । तस्याउत्पत्तिर्यथा
पूर्वंविवाह्यविधिवत्सावर्णे
मानसाचले । अरुंधती वशिष्ठ
स्त्र मोदमाप तयासह । तत्रय
त्पतितं तोयंमानसाचलकं
दरे । विवाहावभृतार्थाय पूर्वं
तार्थेच पुराकृते ॥ ब्रह्मविष्णु
महादेव पाणिभिः समुदीरि
तं । ततोयं सप्तधाभूत्वा पति
तंमानसाचलात् ॥ हेमाद्रेःकं
दरे सोता सरस्याच पृथकपृ
थक् । ततोयंपतितं सिप्रे दे
वभोग्यसरोवरे ॥
तेन सिप्रा नदीजाता विष्णु
ना प्रेरिता क्षितिं ॥
इति कालिकापुराणे ४९
अध्यायः ॥



सिमः पुं समुदायः। यथा। अ
विसिविसिसुखिभ्यः कित्। सिमः
सर्वः। इति सिद्धान्तकौमुदी ॥
सिम्बा स्त्री शमी। यथा। समी
शिंबि शिंबे शिंबा शिंबि र्ध्यपीष्य
ते। इति द्विरूपकोशः ॥ हेढि
मिडा इति ख्याते शुंठी इति
ख्याते। शाम्यति वृद्धि रन.
याशमी शम्बिर्य शमे नाम्नी
ति इः पाच्छोरणादी ति ऊपि शमी
तालव्यादिः शमेः पूर्वेण वेनिपा
तनादकारस्य इत्वे शिंबापि ता
लव्यादिः। सिंबा दंत्यादि विति
उरूषोत्समादयः सिंबिशब्दोप्य
त्र शिम्बि रपि तालव्यादिर्दन्त्या
दिश्च। इतिभरतः ॥
सिंबिः स्त्री शिंबा। इति द्विरूप
कोषः नवनामसायद्वयं ॥
इति राजनिर्घण्टः ॥
सिंबिजा स्त्री शमीधान्यं। इति
भावप्रकाशः। तालव्यशका.
रादि रपि ॥
सिंबी स्त्री निष्पावी। इतिराज.
निर्घण्टः। अपिच। सिंबाशिं
बीशुक्लशिंबिस्तथा शुक्लकशि
म्बिका। शिंबिद्वयं च मधुरं रसे
पाके हिमं गुरु। बल्यं दाहक
रं प्रोक्तं श्लेष्मलं वातपित्तजित्
इतिभावप्रकाशः ॥
सिरः पुं पिप्पलीमूले। इति
हेमचंद्रः ॥
सिरा स्त्री नाडी। अंबुवाहिनी
इतिहेमचंद्रः ॥
सिलकी शल्लकीवृक्षः। इ
त्यमरटीकायां भरतः ॥
सिवरः पुं हस्ती। इति जटा
धरः ॥
सिषाधयिषा स्त्री साधनेच्छा।
यथा। सिषाधयिषया शून्या
सिद्धिर्यत्र न तिष्ठति। सपक्षस्त
त्र वृत्तित्वज्ञानादनुमितिर्भवेत्
इतिभाषापरिच्छेदः ॥
सिहुंडः पुं स्नुहीवृक्षः। इति
शब्दरत्नावली ॥
सिह्लः पुं गंधद्रव्यविशेषः।
सिह्ल इति ख्यातः। तत्पर्यायः
तुरुष्कः १ पिंडकः २ यावनः ३
इत्यमरः। सिह्लकः ४ पिण्या
कः ५ कपिजलः ६ तैलाख्यः
७ यावः ८ यावलः ९ इतिश
ब्दरत्नावली। सल्लकीद्रवः १०
पिण्डकः ११ तैलपर्णी १२ हक
धूपः १३ ल्कमधूपः १४। इति
जटाधरः ॥

सिह्लकः पुं सिह्लः। इतिशब्द
रत्नावली ॥
सिह्लकी स्त्री सल्लकी इतिश
ब्दरत्नावली ॥
सिह्लभूमिका स्त्री सल्लकी। इ
तिशब्दरत्नावली ॥
सिध्मः पुं स्फटिकः। इतिके
चित् ॥
सीक स्र उ. सेके। इतिकवि
कल्पद्रुमः ॥ स्र असिसीकत्
उ. सेकते। इतिदुर्गादासः ॥
सीक कि आमर्षे। इतिकवि
कल्पद्रुमः। कि सीकयति सी
कति। आमर्षः स्पर्शः। प्रमा
णे तालव्यादौ दृष्टव्यं। इति
दुर्गादासः ॥
सीकरः पुं शीकरः। इत्यमरः
टीकायां भरतः ॥
सीता स्त्री लांगलपद्धतिः। इत्य
मरः ॥ हे लांगल रेखायां सि.
नोति स्वनति भूमि सीताषि.
न या त वधे नाम्नीति तःनि
पातनाद्दीर्घः। सीता दंत्यसा
दिः। षेनेभुवि इति शीतला.
लव्यशादिश्च। इति भरतः ॥
जनकराजनंदिनी। सा लक्ष्मी
रामपत्नी। तत्पर्यायः ॥
वैदेही २ मैथिली ३ जानकी
धरणीसुता ५। इति हेमचंद्रः ॥
भूमिसंभवा ६ इतिजटाधरः।
तस्या उत्पत्तिर्यथा। अथ मे
कृषतः क्षेत्रं लांगलादुत्थिता
ततः। क्षेत्रं शोधयता लब्धा
नाम्ना सीतेति विश्रुता। भूत
लादुत्थिता सा तु व्यवर्द्धत म
मात्मजा। वीर्यशुल्केति मे क
न्यास्थापितेयमयोनिजा। इति
वाल्मीकीयेरामायणे ६८ सर्गः
अपिच। अथलोकेश्वरी लक्ष्मी
र्जनकस्य पुरे स्वतः। शुभक्षे
त्रे हलोत्खाते तारे चोत्तरफल्गु
णे। अयोनिजा पद्मकरा बा
लार्कशतसन्निभा। सीतामुखे
समुत्पन्ना बालभावेन सुंदरी।
सीतामुखोद्भवात्सीतात्यस्यै
नाम चाकरोत्। ततोऽभूदैव
सी तस्य उर्मिला नाम कन्यका
इति महीकाण्डतपद्मपुराणे ॥
स्वर्गगंगा। इति मेदिनी। सा
तु मन्दाखवर्षगंगा। यथा। सी
ता तु ब्रह्मसदनात् केशवाच
लादि गिरिशिखरेभ्यो ऽधोऽधः
प्रस्रवंती गंधमादनमर्द्धस्य प.
तिलान्तरेण भद्राश्व वर्षं प्रा.

यां दिशि क्षारसमुद्र मभिप्र
विशति। इति श्रीभागवते ५
स्कंधे:। अपिच। मार्कण्डेय उ
वाच। यज्ञदेवसभा भूता सोना
तस्य महागिरेः॥ तत्र जाताद
वनरी सीताख्या वचनाद्विधेः।
स्नापयित्वा यथा चंद्रं सीता
तोये मनोहरेः। चंद्रे पयप्रेसु
वाक्यात् सर्वे ते त्रिदिवौकसः
तदासीताजलेचंद्रस्नानयोगा
च्चसामृते। भूत्वा निपतिते त
स्मिन् हृदह्लादित संज्ञके॥
तद्विहृदे तदा तोये तस्मिन्
सरसि निर्मले। तद्दर्शनस्य
ये ब्रह्मा विहृदे साधुतज्जले
तद्दर्शनाज्जलात्तस्मादुत्थिता
कन्यकोत्तमा। चंद्रभागेति तन्ना
मविधिश्चक्रे स्वयंततः। भार्या
र्थे सागरः स्नात्वा जग्राह ब्रह्म
सम्मते। इति कालिकापुराणे २२
अध्यायः॥ लक्ष्मीः॥ उमाया
स्याधिदेवता। इति नानार्थध्व
निमंजरी। मदिरा। इतिराजनि
र्घण्टः। योगमस्तोत्रः। यथा। गो
गायोस्तु भद्रसाया महाभद्राश्च
पाटला। तस्याःस्रोतस्विसीता
वर्वंक्षुभंद्राच कीर्तिता। तद्वैद
ग्लकनंदापि वारिणी त्वल्पवि
क्रमा। इति शब्दमाला॥
सीतापतिः पुं श्रीरामचंद्रः॥
इति शब्दरत्नावली॥
सीतायाःपतिः पुं श्रीरामचंद्रः
इति शब्दरत्नावली॥
सीतीलकः पुं सतीलकः। इ
त्यमरटीकायांरायमुकुटः॥
सीत्कारं } स्त्री मनुष्याणामु
सीत्कृतं } त्तानुरागजशब्दः।
यथा शब्दो गुरुणानुरागेणास्याः प्र
णादःसीत्कृतं त्वणां। इति हे
मचंद्रः॥
सीत्यं स्त्री धान्यं। इति हेम
चंद्रः॥
सीत्यं त्रि कृष्टक्षेत्रादि। इत्य
मरः॥
सीधं स्त्री आलस्यं। इति भूरि
प्रयोगः॥
सीधुः पुं मद्यं। इति शब्दरत्ना
वली॥ मद्यभेदः। यथा। इक्षोः
पक्वै रसैः सिद्धः सीधुःपक्वरस
श्चसः। आमैस्तैर्वयःसीधुः
सच शीतरसः स्मृतः। सीधुः
पक्वरसः श्रेष्ठः स्वराग्निबल
वर्णकृत्। वातपित्तकरःसद्यः
स्नेहनो रोचनो हरेत्॥

विबंधमेद शोफार्शः शोफ
दर कफामयान्। तस्मादल्प
गुणः शीतरसः संलेखनःस्मृ
तः। इतिराजनिर्घण्टः॥
सीधुगंधः पुं वकुलः। इतिश
ब्दरत्नावली॥
सीधुपुष्पः पुं कदंबः। वकुलः
इतिराजनिर्घण्टः॥
सीधुपुष्पी स्त्री धातकी। इति
राजनिर्घण्टः॥
सीधुरसः पुं आम्रवृक्षः। इति
राजनिर्घण्टः॥
सीधुसंज्ञः पुं वकुलवृक्षः। इ
तिराजनिर्घण्टः॥
सीध्रं स्त्री अपाने॥ इति
केचित्॥
सीपः पुं तर्पणार्घ्यजलपात्रं
कोषा इतिभाषा। यथा। वस्तु
तस्तु अग्रानुहृतस्य होपासंभ
वात् अहृत पदं हस्तादस्मेन
सीपादिनाहृतपरं। तेनसी
पादि युक्त करतर्पणेन तेनैव
जलेतिलान् मिश्रयेत्। इति
गोपालन्यायपंचाननकृतवि
चारनिर्णयः॥
सीमंतः पुं केशेषुवर्त्म। सिंति
इतिभाषा। इति हेमचंद्रः॥
सीमंतोन्नयन संस्कारः। यथा
गर्भाधान स्मृतौ पुंसः सवनं
स्पन्दनात् पुरा। षष्ठेऽष्टमेवा
सीमंतःप्रसवे जातकर्म च।
इतियाज्ञवल्क्यः॥
सीमंतकं स्त्री सिंदूरं। इति
राजनिर्घण्टः॥
सीमंतकः पुं नरकावासः। य
था। लतपंचैव नरकावासाः
सीमंतकादयः। इति हेमचंद्रः
सीमंतिनी स्त्री नारी। इत्य
मरः॥
सीमंतानयनं स्त्री संस्कार
विशेषः॥ इतिजटाधरः। तद्वि
धानंच यथा। अथसीमंतोन्न
यनं। यदि पुंसवनं नकृतंत
दातस्मिन्नेवदिने प्रायश्चित्ता
त्मकमहाव्याहृतिहोमं कृत्वा
पुंसवनंच कृत्वा सीमंतोन्नय
नंकार्यं। तथा च नारदः। ये
षांत न कृताःपित्रा संस्काराव
धयःक्रमात्। कर्तव्या भ्रातृभि
स्तेषा पैतृकादेव तद्धनात्।
अविद्यमाने पित्रर्थे स्वांशाद
हृत्यवा पुनः। अवश्य कार्याः
संस्कारा भ्रातृभिः पूर्वसंस्कृतैः
क्रमात् ब्राह्मणांसंस्काराणांच

पोर्वापर्य्ये क्रमात् प्राक्कर्म
न्तुमेदर्शविषयएव। विवाहे
तथादर्शनात्। छंदोगपरिशि
ष्टे। देवतानां विपर्य्यासे जुहो
तिषु कथं भवेत्। सर्वं प्राय
श्चित्तं कृत्वा क्रमेण जुहुया
त्पुनः। संस्कारा अतिपत्येर
न्स्वकालाच्चेत् कथंचन। कृ
त्वैतदेव कुर्वीत येतूपनयनाद
यः। एतदिस्मेनेन सर्वं प्रायश्चि
त्तमनुकृष्टं तच्च प्रागेव विहितं
उभयकरणे तन्त्रेणैव मातृका
पूजादि। वाशब्दः क्रियमाणेतु
मातृभ्यः पूजनं सकृत्। सकृदे
व भवेत्तस्मात्कुर्यादानन्त्यमादि
तः। इति छंदोगपरिशिष्टात्
गोभिलः। अथ सीमंतोन्नय
नं प्रथमे गर्भे चतुर्थे मासि ष
ष्ठेऽष्टमेवा। अथ पुंसवनानंतरं
सीमंतः केशरचना विशेषः।
नापितेनात्रचतुर्थादिमासा
नां त्रिकल्पस्य विकल्पः। किंतु सर्वे
एवैते कालाः प्रशस्ताः। समर्थस्य
श्चेपायोगात् इतिन्यायात्। तत
स्तत्र वसमासाधी प्रायश्चित्ते कृ
त्वैव कर्तव्यः। प्रथमगर्भे अनुष्ठा
नात्। यदि कथंचित्प्रकृतपतति
त्ता

स्त्रावे गर्भनाशे पुनर्गर्भोत्
पत्तौ अयं कालनियमो नकिं
तु गर्भस्पंदने सीमंतोन्नयनं
यावन्न बालप्रसवः। इति प्राग्
लिखितोक्त कालो ग्राह्यः। ज्योति
र्जमार्तंडे। यानार्थ्य कृतसीम
न्ता प्रसूते चकथंचन। अकेनि
धायतं बाले पुनः संस्कारमर्हति
यष्टेमासेऽष्टमे स्त्रीणां गर्भादिन
कृतां नंद भद्रे तिथौ च मैत्रे
मूले मृगाके कर पित्र्यपवने
पौष्ण विष्णु त्रियुग्मे। पुष्या
र्कादित्य शीते युवति हरिकुम्भे
वृश्चिके वापि लग्ने चंद्रे तारा
नुकूले शुभ मपि नियतं स्या
च्च सीमंतकर्म। मृगाजवर्हि
तेलग्नेनवांशे पुंग्रहस्यच॥
केचिद्वदंतिसीमंतं तथाधिक्येन
दैतिथौ। गोभिलः। प्रातःस
शिरस्कामाप्लुतादग्नेपुरस्तादुप
श्चादग्नेः प्रागुपविशति। उक्ता
थैमेतत्। पश्चात् पतिरवस्था
य युग्मेन मौदुंबरेण शलाटुग्र
मावध्नाति अयमूर्जावतो वृक्ष
इति। अथेनां पश्चात्पतिः स्थित्वा
युगान्निष्कलानि यस्मिन् शला
दुर्यथेनीलस्तबकेन युग्मान् ते

सन्धनते। तथा च भट्टनारायण
धृते छंदोगपरिशिष्टे शलाटुर्नो
लमित्युक्तं अस्य स्तवक उच्यते
कपिलिकाभिः केशान्मूर्ध्नि प
श्चात् कपुच्छल इति। एतच्च
ते नारायणोपाध्यायेन धृते। उ
दुम्बरभव मौदुंबरं। अयमूर्जाव
तो वृक्ष इति मंत्रेण भार्य्यायाः
कण्ठे बध्नाति॥ अथ सीमंत
मूर्द्धं नयति भूरिति दर्भपिंज
लीभि रेव प्रथमं भुव इति द्वि
तीयं स्वरिति तृतीयं। अथानं
तरं यत्र सिंदूरं स्त्री ददाति तं
सीमंतं ललाटोर्द्धं नयति भूरि
ति मंत्रेण दर्भपिञ्जलीभिः त्रि
सृभिः। एकवारकरणाद्यावंत्स
नयनानि तावतीभिरेवतिसृ
भिरित्यर्थः। अथ मादिपदानि
तथाहुतीनां पिंजलीनांच ए
षाडु नियोगार्थं। पिंजलीपरि
भाषा तथाच छंदोगपरिशिष्टं।
अनंतर्गर्भिणं साग्रं कौशं द्वि
दलमेव च। प्रादेशमात्रं विज्ञे
यं पवित्रं यत्र कुत्रचित्। एतदे
वहि पिंजल्या लक्षणं समुदा
हृतं। गोभिलः। अथ वीरतरे
ण येनादितेरिति प्रत्यनयज्ञो ॥

वीरतरं प्लवेनेन युद्धमिति वीर
तरः शरः। तथा च छंदोगपरि
शिष्टं। स्याविच्छेलाकाशलली
तथा वीरतरः शरः। तिलतंडु
लसंपाकः कृशरः सोऽभिधीय
ते। ततश्च शरेण येनादितेरिति
मंत्रेण सीमंत मूर्द्धं नयति इति
एवेत्स्वादनुवर्तते॥ अथ तृती
ने सूत्रचात्रेणवाकामहमित्य
नयत्। चात्रतर्कुः। तेनसूत्रपू
र्णेन वाकामहमितिमंत्रेण सी
मंत मूर्द्धं नयतीति शेषः। त्रिः
श्वेतया शलल्या याकेवाके स
मनय इतिस्यान त्रिनये शुक्लेन
शोजाजेन कंठकेन याकेल इति
मंत्रेण सीमंतमूर्द्धं नयतीति
शेषः। कृशरः स्थालीपाक उत्तर
घृतस्त मवेक्षयेत्। कृशर उक्तः
स्थालीपाकश्चरुः स उपरि दत्त
घृतस्तं वधाः प्रदर्शयेत्। स्थाली
पाकपदं चरुस्थाल्या कृशरस्य
श्रमणार्थं। मत्स्यापेत्वार हिः
प्रक्षालने। ततश्च यः कश्चिन्महा
नसे श्रमपित्वा स्थापयेत्। कि
म्पश्यसीत्युक्त्वा प्रजामितिवाच
येत्। किं पश्यसीति पति रु
क्त्वा प्रजामित्यादि मंत्रं गर्भिणी



वाचयेत्। तं सास्वयं भुंजीत।
त मेवेत्तितं कुपरं। वीरसूर्जी
वसू र्जीवपत्नीति ब्राह्मणेण
मंगल्यादिभिर्वाग्भिरुपासीरन्
वीरान् विक्रांतान् पुत्रान् सूत
इति वीरसूस्त्वं भवेति वाक्य
शेषः प्रतिपदेस्यात्। जीवेत्ता
दीर्घायुसः पुत्रान् सूत इति
जीवसूः जीवतः पत्नी जीव
पत्नी भविष्यदेत्यर्थः। एवंप्र
कारांभिर्वाग्भिरनुनयेयुः क
स्मुमहाव्याहृतिभिर्हुत्वा औ
दुंबरफलस्तबकं कंठे वद्ध्वा
प्रजापतिति वाचयेदितं ततैव
हुत्वाव्याहृतिभि र्होमादिशेषं
समापयेत् ततो ब्राह्मणा एव उ
पासीरन्। इति संस्कारतत्वे॥

सीमा पुं } ग्रामादीनामवधा
सीमा स्त्री } विनेतभागाः। सीमा
ना इति भाषा। तत्पर्यायः। म
र्यादा २ अवधिः ३ आघाटः ४
इति जटाधरः। स्थितिः॥ क्षे
त्रे। अंडकोषः। इति मेदिनी॥
वेला। इति विश्वः॥ सीमावि
वादः पुं ग्रामादीनां सीमावि
षयककलहः। यथा। अथ
ना सीमाविवाद निर्णय उच्य
ते। सीम्नो विवादे क्षेत्रस्य सामं
ताः स्थविरादयः। गोपाः सी
माकृषाणा ये सर्वेच वनगो
चराः। नयेयु रेते सीमानं स्थ
लांगार तुष द्रुमैः। सेतुवल्मी
क निम्नास्थि चैत्याद्यैरुपल
क्षितां। ग्रामद्वय संबंधिनः।
क्षेत्रस्य सीम्नो विवादे तत्प्र
कग्रामांतर्वर्त्ति क्षेत्र मर्यादावि
वादे च सामंतादयः स्थलांगा
रादिभिः पूर्वकृतैः सीमालक्ष
णैरुपलक्षितां चिह्नितां सीमां
नयेयुः निश्चिनुयुः। सीमा क्षे
त्रादिमर्यादा सा चतुर्विधा। ज
नपदसीमा १ ग्रामसीमा २ क्षे
त्रसीमा ३ गृहसीमा ४ चेति।
साच यथा संभवं पंचलक्षणा
तदुक्तं नारदेन। ध्वजिनी मत्
स्यिनी चैव नैधानी भयवर्जिता
राजशासन नीताच सीमापंच
विधा स्मृतेति। ध्वजिनी वृक्षा
दि लक्षिता। वृक्षादीनां प्र
काशकत्वेन ध्वजतुल्यत्वात्
मत्स्यिनी सलिलवती मत्स्यशब्द
स्य स्वाधारजललक्षणत्वात्। नै
धानी निखात तुषांगारादिमती
तेषां निखातत्वेन निधानतुल्य

त्वात्। भयवर्जिता। अर्थिप्रत्य
र्थिपरस्पर संप्रतिपत्ति निर्मिता
राजशासननीता। ज्ञातिचिह्ना
भावे राजेच्छया निर्मिता। एवंभ
तायां षोढा विवादः संभवति।
यथाह कात्यायनः। आधिक्यं
न्यूनता चांशे अस्तिनास्तित्व मे
वच। अभोगभुक्तिः सीमा च
षट् भूवादस्य हेतवः। इति।
तथाहि। ममात्र पंचनिवर्तना
धाभूमे रधिका भू रस्तीति के
नचिदुक्ते पंचनिवर्तनैव नाधि
केत्याधिक्ये विवादः। पंचनिव
र्तना मदीया भूरित्युक्तेन ततो
न्यूनैवेति न्यूनतायां। पंचनिव
र्तनो ममांशा इत्युक्ते ऽंशः एवनो
स्तीत्यस्ति नास्तित्व विवादः सं
भवति। मदीया भूः प्रागविघ
मानभोगैव भुज्यते इत्युक्तेन
संततं चिरंतनैव संभुक्ति वि
त्यभोगभुक्तौ विवादः। इयंम
र्यादेषं चेति सीमाविवाद इति
षट्प्रकार एव विवादः संभव
ति। षट्प्रकारेपि भूविवादेषु
तदर्थाक्ष्यं सीमाया अपि नि
र्णीयमानत्वात् सीमानिर्णय प्र
करणेंतर्भावः। सामंताद्भवाः सा
मंताः। चतस्रषु दिक्ष्वनंतरा ग्रा
मादय स्तेच प्रतिसीमं व्यवस्थि
ताः। ग्रामो ग्रामेषु सामंतः क्षेत्रं
क्षेत्रस्य कीर्तितं। गृहंगृहस्य नि
र्दिष्टं समंतात् परिरभ्यहि॥
इति कात्यायन वचनात्॥
ग्रामादि शब्देन तत्स्थाः पुरुषा
लक्ष्यंते। ग्रामः पलायत इति
यथा। सामंत ग्रहणंच तत्सं
सक्ताद्युपलक्षणार्थं। उक्तंच
कात्यायनेन। संसक्तकास्तु सा
मंता स्तत्संसक्ता स्तथोत्तराः
संसक्तसक्त संसक्ताः पद्माका
राः प्रकीर्तिताः। इति। स्थवि
रा वृद्धाः। आदिग्रहणेन मौ
लोद्धृतयो गृह्यंते। वृद्धादिल
क्षणंच तेनैवोक्तं। निष्पाद्यमा
नं ये दृष्टं तत्कार्यं तद्गुणान्वि
तैः। वृद्धा वा यदि वावृद्धा स्ते
च वृद्धाः प्रकीर्तिताः॥ येतत्स
वे सामंताः पश्चाद्देशांतरंगताः
तन्मूलत्वात्तुते मौला ऋषि
भिः परिकीर्तिताः। उपश्रव
णसंभोगात् कार्याख्यापनेनापि वि
श्रुताः। उद्धरंति पुनर्यस्मादुद्धृ
ता स्ते ततः स्मृताः॥ इति।
गोपा गोचारकाः॥

सीमाकृषाणाः सीमासंनिहित
क्षेत्रकर्षकाः । सर्वे च वनगोचरा
वनचारिणो व्याधादयः ते च म
नुनोक्ताः । व्याधान् शाकुनिका
न् गोपान् कैवर्त्तान् मूलखात
कान् । व्यालग्राहानुञ्छवृत्तीनन्या
न्श्च वनगोचरानिति । स्थल मु
न्नतो भूप्रदेशः । अङ्गारो ऽग्ने
रुच्छिष्टं । तुषा धान्यत्वचः ।
द्रुमा न्यग्रोधादयः । सेतुर्जल
प्रवाहबन्धः । चैत्यपाषाणादि
बन्धः । आद्यशब्देन वेणुवालु
कादीनां ग्रहणं । एतानि च प्र
काशाप्रकाशभेदेन द्विःप्रका
राणि । तथा च मनुः । सीमावृ
क्षांश्च कुर्वीत न्यग्रोधाश्वत्थ
किंशुकान् शाल्मलीन् शाल
तालांश्च क्षीरिणश्चैव पादपान्
गुल्मान् वेणूंश्च विविधान् श
मीवल्लीः स्थलानि च । शरान् कु
ब्जकगुल्मांश्च तथा सीमा न न
श्यति । तडागान्युदपानानि वा
प्यः प्रस्रवणानि च । सीमासन्धि
षु कार्याणि देवतायतनानि च
ति प्रकाशरूपाणि उपच्छन्नानि
चान्यानि सीमालिङ्गानि कारयेत्
सीमाज्ञाने नृणां वीक्ष्य नित्यं
लोके विपर्ययं । अश्मनोऽस्थी
नि गोवालान् तुषान् भस्मक
पालिकाः । करीषमिष्टकाङ्गा
रशर्करा वालुकास्तथा । या
नि चैवंप्रकाराणि कालाद्भूमि र्न
भक्षयेत् । तानि संधिषु सीमाया
मप्रकाशानि कारयेत् । एतैर्लिं
गैर्नयेत् सीमां राजा विवदमा
नयोरिति प्रच्छन्नलिङ्गानि प
तैः प्रकाशाप्रकाशरूपैर्लिङ्गैः
सामन्तादि प्रदर्शितैः सीमां
प्रति विवदमानयोः सीमानि
र्णयं कुर्याद्राजा ॥ यदा पुन
श्चिह्नानि न सन्ति विद्यमाना
नि वा लिङ्गालिङ्गतया सन्दि
ग्धानि तदा निर्णयोपायमाह ।
सामन्ता वा समग्रामाश्चत्वारोऽष्टौ
दशापि वा । रक्तस्रग्वसनाः सीमां
नयेयुः क्षितिधारिणः । सामन्ताः
पूर्वोक्तलक्षणाः । समग्रामाश्च
त्वारोऽष्टौ दशापि वा उक्तवत्स
मसंख्याः प्रत्यासन्नग्रामीणाः ॥
रक्तस्रग्विणो रक्ताम्बरधराश्च शि
रोर्पितक्षितिखण्डाः सीमान्तं न
येयुः प्रदर्शयेयुः । सामन्ता वेति
विकल्पाभिधानं सत्स्वतेषूक्त
साक्षित्वाभिप्रायं । यथाह मनुः

साक्षिप्रत्यय एव स्यात् सीमा
वादविनिर्णय इति । तत्र च सा
क्षिणां निर्णीतत्वे मुख्यं तदभा
वे सामन्तानां । तदुक्तं । साक्ष्यभा
वे तु चत्वारो ग्रामाः सीमान्तवा
सिनः । सीमाविनिर्णयं कुर्युः
प्रयता राजसन्निधाविति ॥ त
दभावे तत्संसक्तादीनां निर्ण
तृत्वं । यथाह कात्यायनः । स्वा
र्थे सिद्धे प्रदुष्टेषु सामन्तेष्वर्थ
गौरवात् । तत्संसक्तैस्तु कर्त्त
व्य उद्धारो नात्र संशयः । संस
क्त सक्तदोषे तु तत्संसक्ताः प्र
कीर्त्तिताः । कर्त्तव्यानप्रदुष्टा
स्तु राज्ञा धर्म्मं विजानतेति ॥
सामन्ताद्यभावे मौलादयो ग्रा
ह्याः । तेषामभावे सामन्त मौ
लवृद्धाद्धृतादयः । स्थावरे षट्
प्रकारेऽपि कार्य्यो नात्र विचार
णेति कात्यायनेन क्रमविधा
नात् । एते च सामन्तादयः संख्या
गुणातिरेकेण संभवन्ति । सा
मन्ताः साधनं पूर्वं निर्दोषाः स्यु
र्गुणान्विताः । द्विगुणास्तूत्त
राज्ञेया सक्तोऽन्ये त्रिगुणाः स्मृताः
इति स्मरणात् । ते च साक्षिणः
सामन्तादयश्च स्वैः स्वैः शपथैः
श्राविताः सन्तः सीमां नयेयुः ।
शिरोभिस्ते गृहीत्वोर्वीं स्रग्वि
णो रक्तवाससः । सुकृतैः शा
पिताः स्वैः स्वै र्नयेयुस्ते समं
जसमिति स्मरणात् । नयेयु
रिति बहुवचनं द्वयो र्निरासा
र्थं नैकस्य । एकश्चेदुन्नयेत् सीमां
सोपवासः समुन्नयेत् । रक्तमा
ल्याम्बरधरो भूमिमादाय मूर्द्ध
नि । इति नारदेनैकस्याभ्यनुज्ञा
नात् । यस्तु नैकः समुन्नयेत्
सीमां नरः प्रत्ययवानपि । गुरु
त्वादस्य कार्य्यस्य क्रियैवा बहु
षु स्थितेत्येकस्य निषेधः । स तू
भयानुमत धर्मविद्व्यतिरिक्तवि
षय इत्यविरोधः । स्थलादि चि
ह्नाभावेऽपि साक्षि सामन्तादी
नां सीमाज्ञाने उपायविशेषो
नारदेनोक्तः । निम्नगापहृतोत्
सृष्ट नष्टचिह्नासु भूमिषु । त
त्प्रदेशानुमानाच्च प्रमाणाद्भो
गदर्शनादिति । निम्नगा वा न
द्या अपहृतेनापहरणेनोत्सृष्टा
नि स्वस्थानात् प्रच्युतानि नष्टानि
वा लिङ्गानि यासु मर्य्यादाभूमि
षु तत्र तत्प्रदेशानुमानादुत्सृष्ट
नष्टचिह्नानां प्राचीनप्रदेशा



नुमानात् ग्रामादारभ्यमस्मह्रद
एतदुपरिमिते क्षेत्र मस्य ग्रामस्य
पश्चिमे भागइत्येवं विधानात् प्र
माणाद्वा प्रत्यर्थि समक्षमवि
प्रतिपन्नाया: स्मार्तकालोपल-
क्षितैर्भुक्तैर्वा निश्चिनुयु:। वृहस्प
तिना चात्र विशेषो दर्शित:। ग्रा
मस्य च प्रमाणञ्च भोगं कालञ्च
नाम च। भूभागलक्षणञ्चैव ये
विदुस्तत्र साक्षिणइति। एतेच
साक्षिसामन्तादय: प्रापथे: प्रा
र्थिता: सन्त: कुल्वादि समस्तेरा
ज्ञा प्रष्टव्या:। यथाह मनु:। ग्रामे
यक कुलानाञ्च समक्षं सीम्नि सा
क्षिण:। प्रष्टव्या: सीमलिङ्गानि
तयोश्चैव विवादिनो: इति ॥
ते पृष्टा: साक्ष्यादय: समस्ता
ऐकमत्येन सीम्नि निर्णयं ब्रू
युः। ते निर्णीतां सीमां तत्प्रदर्शि
तसकल लिङ्गयुक्तां साक्ष्यादिना
माख्यातांश्चाविस्मरणार्थं पत्रे स
मारोपयेत्। उक्तञ्च मनुना। ते
पृष्टास्तु यथा ब्रूयु: सामन्ता:
सीम्नि निर्णयं। निबध्नीयात्तथा
सीमां सर्वांस्तांश्चैव नामत इति
एतेषां साक्षि सामन्त प्रभृती
नां सीमाचंक्रमणादिना·

दारभ्य यावद्विपत्ते राजदैविके
व्यसने चेन्नोपपद्यते तदानम्
दर्शनात् सीमानिर्णयः ॥
अयंच राजदैविक व्यसनावधि:
कात्यायनेनोक्तः। सीमाचंक्रमणे
कोषे पादस्पर्शे तथैवच। त्रिप
क्ष पक्ष सप्ताहं दैवराजिकमि-
ष्यतइति। यदा त्वसौषो उक्तसा
क्ष्यवचसो विपत्त्यन्तरेदेवादि
दृश्यते। अथवा प्रतिवादि नि
र्दिष्टाभ्यधिक साक्षिगुणसाक्ष्य
न्तर विरुद्धवचनतात्तदाते मृषा
भाषितया दण्डनीया:। तदा
ह। अन्ते तु पृथग्दण्ड्या राज्ञा
मध्यमसाहसं। अन्ते ते मिथ्या
वदन्ते लिङ्गिनस्तेसति सर्वेसा
मन्ता: प्रत्येकं मध्यमसाहसेन
चत्वारिंशदधिकेन पणपञ्चश
तेन दण्डनीया:। सामन्तविषय
त्वाच्चास्य साक्ष्य मौलादीनाम
प्यन्तरे दण्डान्तर विधानादवगम्य
ते। तथाच मनु:। यथोक्तेनन
यन्त स्ते पूयन्ते सत्यसाक्षिण:
विपरीतं नयन्तस्तु दाप्या: स्यु
र्द्विशतं दमम् इति। नारदोऽपि।
अथचेदनृतं ब्रूयु: सामन्ता: सी
म्नि निर्णये। सर्वे पृथक् पृथक्

दण्ड्या राज्ञा मध्यमसाहसमिति
सामन्तानां मध्यमसाहसं दण्ड
मभिधाय। शेषाश्चेदनृतं ब्रूयु
र्नियुक्ता भूमिकर्मणि। प्रत्येकं
तु जघन्यास्ते विनेया: पूर्वसाह
समिति। तत्संसक्तादिषु प्रथमसाहस मुक्तवान्। मौलादीना
मपि तमेव दण्डमाह। मौलवृद्धा
दयस्त्वन्ये दण्डनीया: पृथक् पृथ
क्। विनेया: प्रथमेनैव साहसे
नानृते स्थिता इति। व्याधिग्रह
णेन गोपशाकुनिक व्याधवन
गोचराणां ग्रहणं। यद्यपि शाकु
निकादीनां पापरतत्वा लिङ्ग प्र
दर्शनप्रत्ययोपयोगो न साक्षात्
सीमा निर्णये तथापि लिङ्गाद
र्शनएव मृषाभाषित्वसंभवात्
दण्ड विधानमुपपद्यतएव। अन्ते
तु पृथग्दण्ड्या इत्येतद्दण्ड विधान
मज्ञान विषयं। बहूनां तु गृही
तृणां न सर्वे निर्णयं यदि। कुर्युः
भयाद्वा लोभाद्वा दण्ड्या उत्तम
साहसं। इति ज्ञानविषये साक्षा
दीनां कात्यायनेन दण्डान्तरविधा
नात्। तथा साक्षिवचनभेदेप्यय
मेव दण्डस्तेनैवोक्त: कीर्तिते य
दि भेद: स्याद्दण्ड्या स्तूत्तमसाह

समिति। एवमज्ञानादिनानृ
तवदने साक्ष्यादीन् दण्डयित्वा पु
न: सीमाविचार: प्रवर्तयितव्य:
अज्ञानोक्तौ दण्डयित्वा पुन: सी
मां विचारयेदित्युक्तं। त्यक्त्वा
दुष्टांस्तु सामन्तानन्यान् मौला
दिभि: सह। संमिश्र: कारयेत्
सीमामेवं धर्मविदो विदु:
इति निर्णयप्रकार स्तेनैवोक्त:
यदा पुन: सामन्त प्रभृतयो ज्ञा
तारश्चिह्नानिच न सन्ति तदाक
थं निर्णय इत्यत आह। अभा
वे ज्ञातृचिह्नानां राजा सीम्न:
प्रवर्तिता। ज्ञातॄणां सामन्तादी
नां लिङ्गादीनां च। वृक्षादीना
मभावे राजैव सीम्न: प्रवर्तिता
प्रवर्तयिता। अन्तर्भावितो ण्य
र्थ:। ग्रामद्वयमध्यवर्तिनी वि
वादास्पदीभूतां भुवं समं प्रवि
भज्यास्येष भू रस्योघ भिन्नग्राम
योः समर्प्य तन्मध्ये सीमालिं
गानि कुर्यात्। यदात स्याभूमा
वन्यतरस्योपकारातिशयो दृ
श्यते तदा तस्यैव ग्रामस्य सक
ला भू: समर्पणीया। यथाह म
नु:। सीमाया मविषह्यायां स्व
यं राजैव धर्मवित्। प्रदिशेद्भूमिमे

केशा सूपकारादिभि स्थिति
विति ॥ आरामस्या मप्यतञ्चापि
कायामस्याः स्मृते सीयमूलतो
द्योतयितु मतिदेशमाह । आरा
मायतन ग्राम निपानोद्यानवे
श्मसु । एषएवविधि र्ज्ञेयोवर्षा
म्बु प्रवहादिषु । आरामः पुष्प
फलोपचय हेतु भूभागः ।
आयतनं निवेशनं पलाल कू
टाद्यर्थं विक्षिप्तो भूप्रदेशः । ग्रा
मः प्रसिद्धः । ग्रामग्रहणंच नग
राद्युपलक्षणं । निपानं पानीय
स्थानं कूपवापी प्रभृतिकं । उ
द्यानं क्रीडार्था भूमिः । वेश्म
गृहं । एतेष्वारामादिष्वप्येवं
सामंत साक्ष्यादि लक्षणो विधि
र्ज्ञातव्यः । तथा प्रवर्षणोद्भूते
षु जलप्रवाहेषु अनयो र्गृहयोर्म
ध्ये न जलौघः प्रवहत्वनयो
र्वैत्यवे प्राकारे विवादे आदिश
ब्दात् प्रासादादिष्वपि प्राची
नएवविधि र्ज्ञेयः वेदितव्यः । त
था च कात्यायनः । क्षेत्रकूपत
डागानां केदारारामयो रपि ।
गृह प्रासादावसथ नृप देवगृ
हेषुचेति । सीमानिर्णयमुक्त्वा
तत्प्रसंगेन मर्यादाप्रभेदना

दौ दंडमाह मर्यादायाः प्रभेदेन
सीमातिक्रमणे तथा । क्षेत्रस्य
हरणे दंडा अधमोत्तममध्यमाः
अनेकक्षेत्र व्यवच्छेदिका सा
धारणी भूमर्यादा तस्याः प्रक
र्षेण भेदेन सीमातिक्रमणे
सीमा मतिलंघ्य कर्षणे क्षेत्र
स्य च भयादिप्रदर्शनेन हरणे
यथाक्रमेणाधमोत्तम मध्यम
दंडा वेदितव्याः क्षेत्रग्रहणंच गृ
हारामाद्युपलक्षणार्थं । यदापुनः
स्वीयभ्रांत्या क्षेत्रादिक मपहरति
तदा द्विशतो दण्डो वेदितव्यः ।
यथाह मनुः । गृहं तडाग मारा
मं क्षेत्रंवा भीषया हरन् । श
तानि पंचदंड्यः स्यादज्ञानाद्द्वि
शतोदम इति । अपक्रियमाण
क्षेत्रादि भयत्वपर्यालोचनया
कदाचिदुत्तमोपि दंडः प्रयो
क्तव्यः । अतएवाह । वृषः सर्वस्व
हरणं पुरान्निर्वासनांकने । त
दंगच्छेद इत्युक्तो दंड उत्तमसा
हसइति । यः पुनः परक्षेत्रे सेतु
कूपादिकं प्रार्थनया अर्थदा
नेन वा लब्धानुज्ञो निर्मातुमि
च्छति तं निषेधतः क्षेत्रस्वामि
न एव दंड इत्येतत् आह । न

निषेध्यो ऽल्पबाधस्तु सेतुः क
ल्याणकारकः । परभूमिं हरन्
कूपः स्वल्पक्षेत्रो बहूदकः । स
स्वीयां भूमि मपहरन्नाशयन्नपि
सेतु र्जलप्रवाहबंधः क्षेत्रस्वामि
ना न प्रतिषेध्यः स चेदीषत्पी
डाकरो बहूपकारकश्च भवति
कूपश्चाल्पक्षेत्रव्यापित्वेनाल्प
बाधो बहूदकत्वेन बहूपकार
कत्वेन निवारणीयः । कूपग्रह
णं च वापी पुष्करिण्याद्युपलक्ष
णार्थं । यदा पुनः रसौ सर्वक्षेत्र
वर्तितया बहुबाधो नद्यादि स
मीपक्षेत्रवर्तितया वा अल्पोप
कारक स्तदासौ निषेध्य इत्यर्था
दुक्तं भवति । सेतोश्च द्वैविध्य
मुक्तं नारदेन । सेतुश्च द्विविधो
ज्ञेयः खेयो बंध्यस्तथैवच तोय
प्रवर्तनात् खेयो बंध्यः स्यात्तन्नि
वर्तनादिति । यदा त्वस्वामिनि
तेसेतुं भेदनादिना नष्टस्वयं सं
स्करोति तदा पूर्वस्वामिनं तदे
पृच्छ्य वा स्यादेव संस्कुर्यात्
यथाह नारदः । पूर्वप्रवृत्त मुत्
सन्न मपृष्ट्वा स्वामिनंतु यः सेतुं
प्रवर्तयेत् कश्चित् नसतत्फल
भाक् भवेत् । मृते तु स्वामिनि

पुनस्तद्वंश्ये वापि मानवे । रा
जान मामंत्र्य ततः कुर्यात्सेतु
प्रवर्तन मिति । क्षेत्रस्वामिनं
प्रति उपदिष्ट मिदानीं सेतोः
प्रवर्तयितारं प्रति आह । स्वा
मिने यो ऽनिवेद्यैव क्षेत्रे सेतुं
प्रवर्तयेत् । उत्पन्ने स्वामि
नो भोग स्तदभावे महीपतेः
क्षेत्रस्वामिन मनभ्युपगम्य
तदभावे राजानंवा यः परक्षेत्रे
सेतुं प्रवर्तयत्यसौन फलभा
गभवत्यपि तु तदुत्पन्ने फले
क्षेत्र स्वामिनो भोगस्तदभा
वे राज्ञः । तस्मात् प्रार्थनया
र्थदानेन वा क्षेत्रस्वामिनं तद
भावे राजान माप्यानुज्ञाप्यैव
परक्षेत्रे सेतुः प्रवर्तनीय इति
तात्पर्यार्थः ॥
क्षेत्रस्वामिना सेतु र्न प्रतिषे
ध्य इत्युक्त मिदानीं तत्प्रस
सक्तानुप्रसक्त्या कृषिविध्यंत
रमाह कालात्यय मपि क्षेत्रे न
ऊष्याहूयो नकारयेत् । समग्रा
यः कृष्टफले क्षेत्र मन्येनका
रयेत् । यः पुनः क्षेत्रस्वामिनः
पार्श्वेऽह मिदं क्षेत्रं कृषामि
इत्यंगीकृत्य पश्चादुत्सृजति

न चान्येन कर्षयति तेन च क्षे
त्रे यद्यपि फालाहतमीषद्धलेन
विदारितं न सम्यग्बीजवापार्हं
तथापि तस्मात्कृष्टस्य फलेपा
दनयोग्यत्वार्हं सामन्तादिकलि
न्नतावद्दसौ कर्षको दापनीयः
तच्च क्षेत्रं पूर्वकर्षकाद्रुच्छि
द्यान्येन कारयेत्। इति सीमा
विवादप्रकरणं। इति मिताक्ष
रा॥ अपिच सीमां प्रतिसमुत्
पन्ने विवादे ग्रामयोर्द्वयोः।
ज्यैष्ठे मासि नयेत् सीमां सुप्रका
शेषु सेतुषु। सीमावृक्षांश्च कु
र्वीत न्यग्रोधाश्वत्थकिंशुका
न्। शाल्मलीन् शालतालांश्च
क्षीरिणश्चैव पादपान्। गुल्मान्
वेणूंश्च विविधान् शमीवल्ली
स्थलानि च। शरान् कुब्जकगुल्मां
श्च तथा सीमा न नश्यति। तडा
गान्युदपानानि वाप्यः प्रस्रवणा
नि च। सीमासन्धिषु कार्य्याणि
देवतायतनानि च। उपच्छन्नानि
चान्यानि सीमालिङ्गानि कारये
त्। सीमाज्ञाने नृणां वीक्ष्य नित्यं
लोके विपर्य्ययं। अश्मनोऽस्थी
नि गोवालान् तुषान् भस्मकपा
लिकाः। करीषमिष्टकाङ्गारश
र्कराः वालुकास्तथा। यानि चै
वंप्रकाराणि कालाद्भूमिर्न भक्ष
येत्। तानि सन्धिषु सीमायाम
प्रकाशानि कारयेत्। एतैर्लि
ङ्गैर्नयेत् सीमां राजा विवदमा
नयोः। पूर्वभुक्त्या च सततमुद
कस्यागमेन च। यदि संशय ए
व स्यात् लिङ्गानामपि दर्शने
साक्षिप्रत्यय एव स्यात् सीमा
वादविनिर्णयः। ग्रामीयककु
लानाञ्च समक्षं सीम्नि साक्षिणः
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव
विवादिनोः। ते पृष्टास्तु यथा ब्रू
युः समस्ताः सीम्नि निश्चयं। नि
बध्नीयात्तथा सीमां सर्वांस्तां
श्चैव नामतः। शिरोभिस्ते गृ
हीत्वोर्वीं स्रग्विणो रक्तवाससः
सुकृतैः शापिताः स्वैः स्वैः नयेयु
स्ते समञ्जसं। यथोक्तेन नयन्त
स्ते पूयन्ते सत्यसाक्षिणः। वि
परीतं नयन्तस्तु दाप्याः स्युर्द्वि
शतं दमं। साक्ष्यभावे तु चत्वा
रो ग्रामाः सामन्तवासिनः। सी
माविनिर्णयं कुर्य्युः प्रयता राज
सन्निधौ। सामन्तानामभावे तु
मौलानां सीम्नि साक्षिणां॥
इमानप्यनुयुञ्जीत पुरुषान् वन

गोचरान्। व्याधान् शाकुनि
कान् गोपान् कैवर्त्तान् मूल
खानकान्। व्यालग्राहानुञ्छ
वृत्तीनन्यांश्च वनचारिणः। ते
पृष्टास्तु यथा ब्रूयुः सीमास
न्धिषु लक्षणं। तत्तथा स्थापये
द्राजा धर्मेण ग्रामयोर्द्वयोः॥
क्षेत्रकूपतडागानामारामस्य
गृहस्य च। सामन्तप्रत्ययो ज्ञेयः
सीमासेतुविनिर्णयः। सामन्ता
श्चेन्मृषा ब्रूयुः सेतौ विवदतां नृ
णां। सर्वे पृथक् पृथग्दण्ड्या
राज्ञा मध्यमसाहसं। गृहं तडा
गमारामं क्षेत्रं वा भीषया हर
न्। शतानि पञ्च दण्ड्यः स्यादज्ञा
नाद्द्विशतो दमः। सीमायाम
विषह्यायां स्वयं राजैव धर्मवि
त्। प्रदिशेद्भूमिमेतेषा-
मुपकारादिति स्थितिः। इति
मानवे ८ अध्यायः॥

सीमिकः पुं वृक्षभेदः। वल्मी
कः। सूक्ष्मकृमिजातिः। इति
संक्षिप्तसारोणादिवृत्तिः॥

सीमीकः पुं वृक्षविशेषः। ष्य
मधातो रौणादिक कीकन्
प्रत्ययेन निष्पन्नः। इति सि
द्धान्तकौमुदी॥

सीरः पुं सूर्य्यः। इति मेदिनी॥
हलः। अर्कवृक्षः। इत्यमरः॥

सीरकः पुं शिशुमारः। इति
शब्दमाला॥ सीरशब्दार्थोऽ
प्यत्र॥

सीरध्वजः पुं चन्द्रवंशीयराजवि
शेषः। स तु ह्रस्वरोमराजपुत्रः
यस्य पुत्रार्थं यज्ञभुवं कृषतः
सीरे सीता दुहिता समुत्प
न्ना तस्य पुत्रो भानुमान्॥
इति विष्णुपुराणे ४ अंशे ५
अध्यायः।

सीरपाणिः पुं बलदेवः॥
इत्यमरः॥

सीरी[न्] पुं बलदेवः। इति हला
युधः। भूरिप्रयोगश्च॥

सीलयः पुं मत्स्यभेदः। सिलि
द इति भाषा। तस्य गुणाः।
सीलयः श्लेष्मलो वृष्यो विपा
के मधुरो गुरुः। वातपित्तह
रो हृद्य आमवातकरश्च सः।
इति भावप्रकाशः॥

सीवनं क्ली तन्तुसन्तानं। सू
चीकर्म सेलाई इति सेलायी
इति च भाषा। तत्पर्य्यायः।
सेवनं २ स्यूतिः ३। इत्यमरः।
ऊतिः ४ व्यूतिः ५। इति

शब्दरत्नावली ॥

सीवनी स्त्री लिंगमण्यधःसूत्रं लिंगाग्रात्गुह्यपर्य्यंतसीवनं । इति हेमचंद्रः ॥

सीसं क्ली सीसकं । इति हेमचंद्रः ॥

सीसकं क्ली धातुविशेषः । सीसा इति भाषा । तत्पर्य्यायः । नागं २ योगेष्टं ३ वप्रं ४ । इत्यमरः । सीसं ५ सीसपत्रकं ६ नागाह्वपद्मवं ७ सिंदूरकारणं ८ वेद्धं ९ स्वर्णारि १० यवनेष्टं ११ स्ववर्णकं १२ । इति हेमचंद्रः वध्रं १३ पिच्चटं १४ स्ववर्णंति १५ । त्रपु १६ त्रपुः १७ ॥ इति शब्दरत्नावली ॥ वध्रकं १८ महाबलं १९ यवनेष्टकं २० । इति जटाधरः । वक्रमलं २१ चीनं २२ पिष्टं २३ । इति रत्नमाला । जडं २४ भुजंगमं २५ अन्तं २६ कुरंगं २७ परिपिष्टकं २८ सदुकूलायसं २९ पद्म ३० नागशुद्धिकरं ३१ चिराद्वले ३२ वयोवंग ३३ चीनपिष्टं ३४ । अस्य गुणाः । सीसंतु वंगवत्सर्व्वस्यापि रसवीर्य्यविपाकतः । उष्णंच कफवातघ्नं मेहघ्नं गुरुलेखनं । वर्णेनीलमस्निग्धं निर्म्मलंच सुगौरवं । दोष्णसंशोधने क्षिप्रं सीसकं चतदुत्तमं । इति राजनिर्घण्टः ॥ अथ सीसस्योत्पत्ति नामगुणाः । दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोचयत् । वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणां । सीसं वध्रंच वप्रंच योगेष्टं नागनामकं । नागः भुजंग इत्यादि । सीसं वंगगुणं ज्ञेयं विशेषान्मेहनाशनं । नागस्तु नागशततुल्यबलं ददाति व्याधिं विनाशयति जीवनमातनोति । वह्निं प्रदीपयति कामबलं करोति मृत्युंच नाशयति संततसेवितः सः ॥ पाकेनहीनौ किलवंगनागौ कुष्ठानि गुल्मांश्च तथातिकष्टान् । पाण्डुप्रमेहानिल सादशोथ भगंदरादीन् कुरुतः प्रयुक्तौ ॥ अथ सीसकस्य शोधनं । तस्य साहजिका दोषा वंगस्येव निदर्शिताः । शोधनंचापि तस्येव भिषग्भिः गदितं पुरा ॥ अथ सीसकस्य मारणविधिः । तांबूलरससंपिष्ट शिलालेपात् पुनः पुनः । द्वात्रिंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते । शिला मनःशिला । अथवा । अश्वत्थचिंचा त्वक्चूर्णं चतुर्थांशेन निःक्षिपेत् । मृत्पात्रे विद्रुते नागे लोहदर्व्या प्रचालितः । यामैकेन भवेद्भस्मतत्तुल्या स्यान्मनःशिला । कांजिकेन द्वयं पिष्ट्वा पचेद्गजपुटेनच । स्वांगशीते पुनः पिष्ट्वा शिलया कांजिकेन च । पुनः पचेत् शरावाभ्यामेवं षष्टिपुटैर्मृतिः ॥ इतिभावप्रकाशः । मारितस्यास्य गुणाः पूर्व्ववत् ॥ अपिच । तैले तक्रे गवां मूत्रे कांजिके च कुलत्थके । त्रिधा त्रिधा विशुद्धिः स्यात् स्वर्णादीनां समासतः । अथ सीसकस्य मारणं । ऊर्द्ध्वे नागपत्राणां कुनटाः स्यात् पलार्द्धकं । तंडुलीयरसे यामं यामं वासारसे तथा ॥ समर्द्ध्य च क्रियां कृत्वा घर्म्मसंशोष्यतेपुनः । शरावसंपुटे कृत्वा पचेद्वन्योपलैर्भिषक् । पंचसप्तपुटैर्नागो भस्मीभवति निश्चितं ॥ हिंगुज्योः पेभ्रवं हन्यात् प्रमेहानतिबलानपि ॥ इति वैद्यदर्पणः ॥

सीसपत्रकं क्ली सीसकं ॥ इति हेमचंद्रः ॥

सीहुण्डः पुं सेहुण्डवृक्षः । स्नुही । इत्यमरः ॥

षष्ठ

२०८

शब्दकल्पद्रुम





२०६

शब्दकल्पद्रुम



२०६

श्राद्धकल्पद्रुमः



